AFRAID, *a.* भीतः -ता -तं, भयान्वितः -ता -तं, शङ्कान्वितः -ता -तं; 'to be afraid of,' भी (c. 3. बिभेति भेतुं), with abl. or gen.; as, 'he is afraid of the dog,' कुक्कुरात् or कुक्कुरस्य बिभेति. So also त्रस् (c. 4. त्रस्यति त्रसितुं), उद्विज् (c. 6. -विजते -विजितुं).

AFRESH, *adv.* पुनर्, पुनरपि, नूतनं, अभिनवं, प्रतिनवं.

AFT, *s.* (The part of a ship towards the stern) नावः पश्चिमभागः.

AFT, *adv.* (Towards the stern of a ship) नावः पश्चिमभागं प्रति, नावः पश्चाद्भागं प्रति.

AFTER, *prep.* अनु or पश्चात् prefixed; as, 'to go after,' अनुगन्तुं; 'to run after,' पश्चाद् धावितुं. (Of time) पश्चात्, परं, अनन्तरं, ऊर्द्ध्वं, अर्व्वाक् with abl.—(According to) अनु, अनुरूपं, अनुसारतस्, अनुरूपेण, अनुसारेण; 'after that,' तदनन्तरं, or तदनन्तरं, or तस्मात् परं, or अत ऊर्द्ध्वं; 'after one another,' अनुपूर्व्वशस्; 'a century after,' वर्षशते गते; 'after eating,' भोजनानन्तरं or भोजनात् परं; 'after the rising of the sun,' सूर्य्योदयाद् ऊर्द्ध्वं; 'after a few days,' दिनेषु गच्छत्सु. Sometimes 'after' is expressed by the indec. part.; as, 'after ascending the tree the nests were destroyed,' वृक्षम् आरुह्य नीडा भग्नाः, or even by पूर्व्वकं; as, 'after laying down a stake,' पणस्थापनपूर्व्वकं; or by repeating the word in such phrases as, 'he waters tree after tree,' वृक्षं वृक्षं सिञ्चति.

AFTER, *adv.* (In after time) परं, परकाले, आगामिकाले, उत्तरकाले.—(Following after another) पश्चात्.—(Subsequently) परस्तात्, उत्तरत्र, उत्तरतस् *ind.*

AFTER-AGES, *s.* उत्तरकालः, परकालः, आगामिकालः, भाविकालः.—(Descendants) पुत्रपौत्राः *m. pl.*

AFTER ALL, अन्ततस् *ind.*, अन्ते, परं, शेषे, अवशेषे.

AFTER-BIRTH, *s.* गर्भपरिस्रवः.

AFTER-COMER, *s.* उत्तरागामी *m.* (न्), परम् उपतिष्ठति यः, उत्तरकाले जीवति यः.

AFTER-CROP, *s.* शस्यस्य द्वितीयसङ्ग्रहः or द्वितीयोत्पत्तिः *f.*, फलस्य द्वितीयसङ्ग्रहः.

AFTER-DINNER, *s.* भोजनानन्तरं, भोजनात् परं, भोजनोत्तरं.

AFTER-ENDEAVOUR, *s.* उत्तरोद्योगः, द्वितीययत्नः.

AFTER-GAME, *s.* उत्तरोपायः.

AFTER-GRASS or AFTER-MATH, *s.* द्वितीयतृणं, द्वितीयतृणोत्पत्तिः *f.*

AFTER-INQUIRY, *s.* उत्तरानुसन्धानं, उत्तरजिज्ञासा.

AFTER-LIFE, *s.* जीवनावशेषः.

AFTERNOON, *s.* अपराह्णः, पराह्णः, वैकालः, विकालः.—(Relating to the afternoon) आपराह्णिकः -की -कं, वैकालिकः -की -कं.

AFTER-PAINS, *s.* अनुतापः, उत्तरव्यथा.—(At childbirth) प्रसवानन्तरं वेदना.

AFTER-STATE, *s.* परावस्था, उत्तरावस्था, भाव्यवस्था.

AFTER-TASTE, *s.* उत्तरस्वादः, अनुस्वादः.

AFTER-THOUGHT, *s.* अनुबोधः, उत्तरचिन्ता, कार्य्यानन्तरं विचारणं.

AFTER-TIMES, *s.* उत्तरकालः, परकालः, आगामिकालः.—(Descendants) पुत्रपौत्राः *m. pl.*

AFTERWARDS, *s.* पश्चात् *ind.*, तत्पश्चात्, तदनन्तरं, अनन्तरं, ततः परं, परं *ind.*, अपरं, परस्तात्, उत्तरतस्, ततस्.

AGAIN, *adv.* पुनर्, पुनरपि, भूयस् *ind.*—(Moreover) अन्यच्च, किञ्च, इतरम् *indec.*—(On the other hand) अन्यपक्षे, पुनर्.—(Repeatedly) मुहुस्, पुनःपुनर्, असकृत्, भूयो भूयस्, वारंवारं.—(Further, in argument) अङ्ग.—(As much again) द्विगुणः -णा -णं.—(Back again, as *re* in English or Latin) प्रति.—(In return for) प्रति.

AGAINST, *prep.* प्रति, अभि.—(Opposed to) विरुद्धः -द्धा -द्धं, प्रतिकूलः -ला -लं, विपक्षः -क्षा -क्षं.—(Over against) अभिमुखं, प्रतिमुखं, सम्मुखं; 'against the wind,' प्रतिवातं, वाताभिमुखं; 'against the stream,' प्रतिस्रोतस् *ind.* 'Against' may be expressed by अर्थे or अर्थं, in such phrases as 'one should store up money against misfortune,' आपदर्थे धनं रक्षेत्.

AGAPE, *adv.* जृम्भमाणः -णा -णं, विस्मयोत्फुल्लनयनः -ना -नं, फुल्ललोचनः -ना -नं.

AGARIC, *s.* वृक्षरुहः छत्राकविशेषः, तरुरोही, औषधीयछत्राकविशेषः.

AGASTYA, *s.* (A celebrated Saint, son of Mitra and Varuna, and regent of the star Canopus) अगस्त्यः, मैत्रावारुणिः.

AGATE, *s.* रत्नविशेषः, नानावर्णः प्रस्तरविशेषः, नानाछायान्वितः प्रस्तरविशेषः.

AGE, *s.* (Period) युगं, कालः, समयः.—(Life) आयुः *n.* (स्), जीवितकालः, वयः *n.* (स्).—(Age of the world) कल्पः.—(Old age) वृद्धत्वं, वार्द्धकं, वृद्धभावः; 'a youth who has come of age,' व्यवहारप्राप्तः, व्यवहारज्ञः; 'a son twenty years of age,' विंशतिवर्षीयः पुत्रः; 'of the same age,' समानवयस्कः -स्का -स्कं.

AGED, *a.* वृद्धः -द्धा -द्धं, जीर्णः -र्णा -र्णं, प्राचीनः -ना -नं, वयोगतः -ता -तं, आयुषः -षी -षं.

AGENCY, *s.* (State of an agent) कर्त्तृत्वं, कर्त्तृकत्वं.—(Operation) कारणत्वं, हेतुता, कारणं; 'human agency,' पौरुषेयत्वं.—(Office of a deputy) नियोगिपदं, नियोगित्वं.

AGENT, *s.* (Doer) कर्त्ता *m.* (र्त्तृ), कर्त्तृकः, कारः, कारकः, करः in comp.—(A deputy) नियोगी *m.* (न्), प्रतिपुरुषः, कार्य्याधीशः, प्रतिनिधिः *m.*—(That which has the power of operating) हेतुकः, हेतुः *m.*, कारणं, साधनं.

To AGGLOMERATE, *v. a.* सञ्चि (c. 5. -चिनोति -चेतुं), समाचि, उपचि; समाक्षिप् (c. 6. -क्षिपति -क्षेप्तुं); राशीकृ; पुञ्जं कृ, एकत्र कृ.

AGGLOMERATED, *p. p.* सञ्चितः -ता -तं, उपचितः -ता -तं, राशीकृतः -ता -तं.

To AGGLUTINATE, *v. a.* संश्लिष् in caus. (-श्लेषयति -यितुं), संयुज् (c. 7. -युनक्ति -योक्तुं, c. 10. -योजयति -यितुं), संहन् (c. 2. -हन्ति -हन्तुं), संलग्नं -ग्नां -ग्नं कृ.

To AGGRANDISE, *v. a.* वृध् in caus. (वर्धयति -यितुं), संवृध्, ऋध् in caus. (ऋधयति -यितुं), आप्यै (caus. -प्याययति -यितुं), स्फाय् in caus. स्फावयति -यितुं), प्रचुरीकृ, स्फीतीकृ, तन् (c. 8. तनोति तनितुं).

AGGRANDISEMENT, *s.* वृद्धिः *f.*, वर्द्धनं, विवृद्धिः *f.*, उन्नतिः *f.*, समुन्नतिः *f.* उपचयः, स्फातिः *f.*, अभ्युदयः; 'for one's own aggrandisement,' आत्मविवृद्धये *dat. c.* or आत्मोदयाय *dat. c.*

To AGGRAVATE, *v. a.* (To increase) वृध् in caus. (वर्धयति -यितुं), अधिकं -कां -कं कृ, अतिरिक्तं -क्तां -क्तं कृ, गरय् (nom. गरयति).—(To irritate, provoke) प्रकुप् in caus. (-कोपयति -यितुं), प्रपीड् (c. 10. -पीडयति -यितुं).

AGGRAVATED, *p. p.* (Increased) वर्धितः -ता -तं.—(Provoked) प्रकोपितः -ता -तं.

AGGRAVATION, *s.* (Act of irritating) प्रकोपणं, पीडनं, पीडाकरणं. (Act of increasing) संवर्द्धनं, वर्द्धनं, उद्दीपनं.—(Aggravating circumstance) अनुपशयः, आधिक्यं.

AGGREGATE, *s.* समूहः, सञ्चयः, सन्निपातः, समवायः, सङ्ग्रहः, राशिः *m.*, पुञ्जः.

To AGGREGATE, *v. a.* समाक्षिप् (c. 6. -क्षिपति -क्षेप्तुं), सञ्चि (c. 5. -चिनोति -चेतुं), समाचि, उपचि; समूहं कृ, राशीकृ, एकत्र कृ.

AGGREGATED, *p. p.* सञ्चितः -ता -तं, उपचितः -ता -तं, राशीकृतः -ता -तं, समवायी -यिनी -यि (न्).

AGGREGATION, *s.* (The act of aggregating) समाहारः -हरणं, राशीकरणं, सञ्चयनं, सङ्ग्रहणं.—(A sum, collection) समूहः, सन्निपातः, सङ्ग्रहः.

To AGGRESS, *v. a.* आक्रम् (c. 1. -क्रामति, c. 4. -क्राम्यति -क्रमितुं), अतिक्रम्; लङ्घ् (c. 10. लङ्घयति -यितुं).—(To be the first to injure) हिंसारम्भं or लङ्घनारम्भं कृ.

AGGRESSION, *s.* आक्रमः -मणं, अतिक्रमः, लङ्घनं.—(The first act of injury) हिंसारम्भः, अपकारारम्भः, प्रथमापकारः, आक्रमारम्भः.

AGGRESSOR, *s.* आक्रामकः, अतिक्रामकः, द्रोही *m.* (न्), प्रथमापकारकारः, प्रथमां हिंसां करोति यः.

AGGRIEVANCE, *s.* (Wrong endured) हिंसा, अपकारः, द्रोहः, क्लेशः, दुःखं, व्यथा.

To AGGRIEVE, *v. a.* दुःख् (c. 10. दुःखयति -यितुं), शुच् in caus. (शोचयति -यितुं), क्लिश् (c. 9. क्लिश्नाति क्लेष्टुं), व्यथ् in caus. (व्यथयति -यितुं), अर्द् in caus. (अर्दयति -यितुं), समर्द्, हिंस् (c. 1. हिंसति, c. 7. हिनस्ति, हिंसितुं).

AGHAST, *a. a.* विस्मयाकुलः -ला -लं, भयव्याकुलः -ला -लं, भयमोहितः -ता -तं, साध्वसोपहतः -ता -तं.

AGILE, *a.* लघुः -घुः -घु, त्वरितः -ता -तं, चञ्चलः -ला -लं, द्रुतस्वभावः -वा -वं, लघुशरीरः -रा -रं.

AGILITY, *s.* लघुता, द्रुतत्वं, चञ्चलत्वं, लघुशरीरता.

AGILLOCHUM, *s.* (Aloe-wood) अगुरुः *m.*, -रु *n.*, अगुरुकाष्ठं.

AGISTMENT, *s.* निरूपितमूल्येन सर्व्वसामान्यक्षेत्रे पश्वादिप्रतिपालनं.—(Embankment) सेतुः *m.*

AGITABLE, *a.* क्षोभणीयः -या -यं, मन्थनीयः -या -यं, चालनीयः -या -यं.

To AGITATE, *v. a.* क्षुभ् in caus. (क्षोभयति -यितुं), विक्षुभ्; धू (c. 5. धूनोति, c. 9. धुनाति धवितुं or धोतुं), आधू; मन्थ् (c. 1. मन्थति, c. 9. मथ्नाति मन्थितुं), प्रमन्थ्; ह्वल् in caus. (ह्वलयति or ह्वालयति -यितुं); गाह् (c. 1. गाहते गाहितुं or गाढुं); लुड् (c. 1. लोडति लोडितुं or caus. लोडयति), आलुड्, समालुड्, परिलुड्, विलुड्, संलुड्.—(To be agitated) क्षुभ् (c. 4. क्षुभ्यति क्षोभितुं); विह्वल् (c. 1. -ह्वलति -ह्वलितुं).

AGITATED, *p. p.* क्षुब्धः -ब्धा -ब्धं, धूतः -ता -तं, आकुलितः -ता -तं, प्रमथितः -ता -तं, उद्भ्रान्तः -न्ता -न्तं, सम्भ्रान्तः -न्ता -न्तं, विह्वलः -ला -लं, निधुरः -रा -रं, लुलितः -ता -तं, कातरः -रा -रं, पारिप्लवः -वा -वं, विक्लवः -वा -वं.

AGITATION, *s.* क्षोभः, मन्थनं, उन्मन्थनं, आलोडनं, विधुवनं, दवथुः.—(Of mind, &c.) व्याकुलत्वं, उत्कम्पः.—(Discussion) वादानुवादः, विचारणं.

AGITATOR, *s.* (He who agitates) क्षोभकः, उन्मन्थकः, मथनकारी *m.* (न्).—(Manager of affairs) कार्य्याधीशः, कार्य्याधिष्ठाता *m.* (तृ), नायकः.

AGNAIL, *s.* नखरोगः, चिप्यं, नखम्पचः.

AGNATE, *a.* (Allied to) सम्बन्धी -न्धिनी -न्धि (न्), सम्पर्कीयः -या -यं.

AGNATION, *s.* (Relationship) ज्ञातित्वं, बन्धुत्वं, सम्बन्धः, सम्पर्कः.

AGO, AGONE, *adv.* पुरा, पूर्व्वं, पूर्व्वकाले, गतकाले, पुरस्तात्.

AGOG, *adv.* कुतूहली -लिनी -लि (न्), कौतुकाकुलः -ला -लं, अन्यथावृत्तिः -त्तिः -त्ति.

AGOING, *part.* चलः -ला -लं, प्रचलः -ला -लं, प्रचलितः -ता -तं, प्रचरितः -ता -तं.

To AGONISE, *v. n.* व्यथ् (c. 1. व्यथते व्यथितुं), परितप् in pass. (-तप्यते), सन्तप्.

AGONY, *s.* तीव्रवेदना, अतिव्यथा, व्यथा, अन्तस्तापः, विबाधा, दुःखदुःखं, यन्त्रं.

AGRARIAN, *a.* क्षेत्रविषयकः -का -कं, क्षेत्रिकः -की -कं, भूमिविषयकः -का -कं.

To AGREE, *v. n.* (Be in concord) सम्मन् (c. 4. -मन्यते -मन्तुं), सम्मतः -ता -तं भू.—(Assent to) स्वीकृ, अङ्गीकृ, अनुमन् (c. 4. -मन्यते -मन्तुं), अभिमन्; अनुज्ञा (c. 9. -जानाति -ज्ञातुं), अनुवद् (c. 1. -वदति -वदितुं), ग्रह् (c. 9. गृह्णाति ग्रहीतुं), उपगम् (c. 1. -गच्छति -गन्तुं).—(Settle by stipulation) सन्धा (c. 3. -धत्ते -धातुं), संविदा निष्पन्नं -न्नां -न्नं कृ.—(Be of the same mind) एकचित्तीभू, एकमतः -ता -तं भू.—(Be consistent or suitable) युज् in pass. (युज्यते).

To AGREE, *v. a.* सन्धा (c. 3. -दधाति -धत्ते -धातुं), सम्मतं -तां -तं or संविदितं -तां -तं कृ.

AGREEABLE, *a.* (Pleasant) रम्यः -म्या -म्यं, काम्यः -म्या -म्यं, सुभगः -गा -गं, अभिमतः -ता -तं, मनोज्ञः -ज्ञा -ज्ञं, सन्तोषकः -का -कं, तुष्टिकरः -री -रं.—(Suitable, comfortable) अनुरूपः -पा -पं, उपयुक्तः -क्ता -क्तं, योग्यः -ग्या -ग्यं, सदृशः -शी -शं, तुल्यः -ल्या -ल्यं.—(To be agreeable, please) रुच् (c. 1. रोचते, रोचितुं).

AGREEABLENESS, *s.* (Consistency with) योग्यता, उपयुक्तता, अनुरूपता, सादृश्यं.—(The quality of pleasing) रम्यत्वं, काम्यत्वं, अभिमतता.—(Resemblance) तुल्यता, सदृशता.

AGREEABLY, *adv.* सुखं, अभिमतं, सुभगं, यथाभिमतं, यथासुखं.—(According to) अनुरूपं, अनुसारतस् *ind.*, योगतस् *ind.*—(Agreeably to one's nature) सस्वानुरूपं.

AGREED, *p. p.* संविदितः -ता -तं, सम्मतः -ता -तं, उपगतः -ता -तं, अभ्युपेतः -ता -तं, अभ्युपगतः -ता -तं, स्वीकृतः -ता -तं, अनुज्ञातः -ता -तं; 'he has agreed to a separation,' भेदम् उपगतः.

AGREEMENT, *s.* (Compact) संविद् *f.*, प्रतिज्ञानं, नियमः, संस्कारः, अङ्गीकारः, उपगमः, समयः, अभ्युपगमः, सङ्केतः, संवादः, व्यवस्था.—(Making an agreement) समयकारः.—(Breaking an agreement) समयभेदः.—(Concord) सम्मतिः *f.*, एकचित्तता, अनुवादः, ऐक्यं.—(Resemblance) सदृशता, अनुरूपता, सादृश्यं, तुल्यत्वं.

AGRICULTURE, *s.* कृषिः *f.*, कर्षणं, हलभृतिः *f.*, वैश्यक्रिया, वैश्यवृत्तिः *f.* (The science) कृषिविद्या.

AGRICULTURIST, *s.* कर्षकः, क्षेत्राजीवः, कृषकः, क्षेत्रिकः, क्षेत्री *m.* (न्), कृषिविद्याज्ञः.—(A man of the third class) वैश्यः, विट् (श्).

AGROUND, *adv.* उच्चैरस् *ind.*, तटस्थः -स्था -स्थं, सैकतस्थः -स्था -स्थं, पुलिनस्थः -स्था -स्थं.

AGUE, *s.* कम्पज्वरः.—(A tertian ague) तृतीयकः, तृतीयकज्वरः.—(A quartan) चातुर्थकः.

AGUE-FIT, *s.* कम्पज्वराक्रमः.

AGUISH, *a.* कम्पज्वरशीलः -ला -लं, कम्पज्वरस्वभावः -वा -वं.

AH, *interj.* आ, आस्, हन्त, हा, अहो, अहह.

AHEAD, *adv.* अग्रे, अग्रतस् *ind.*, पुरस् *ind.*, पुरतस् *ind.*—(Headlong) अधोमुखं.

AJAR, *adv.* अर्द्धविवृतः -ता -तं, अर्द्धोद्घाटितः -ता -तं.

AID, *s.* साहाय्यं, उपकारः, उपकृतं, साहित्यं, शरणं, उपग्रहः.—(An assistant) सहायः, उपकारकः, उत्तरसाधकः.

To AID, *v. a.* उपकृ (c. 8. -करोति -कर्त्तुं), उपचर (c. 1. -चरति -चरितुं), उपग्रह (c. 9. -गृह्णाति -ग्रहीतुं), साहाय्यं कृ, अभिरक्ष् (c. 1. -रक्षति -रक्षितुं).

AIDED, *p. p.* उपकृतः -ता -तं, कृतोपकारः -रा -रं.

AIDE-DE-CAMP, *s.* परिधिस्थः, सेनापतिसहायः, सेनापत्याज्ञावहः.

AIDER, *s.* सहायः, साहाय्यकर्त्ता *m.* (र्तृ), उपकारकः.

AIDLESS, *a.* साहाय्यरहितः -ता -तं, उपकारहीनः -ना -नं, असहायः -या -यं.

To AIL, *v. a.* (To give pain) पीड् (c. 10. पीडयति -यितुं).—(To be ailing) ईषद्रोगेण or क्षुद्ररोगेण, पीड् in pass. (पीड्यते).

AIL OR AILMENT, *s.* ईषद्रोगः, ईषद्व्याधिः *m.*, क्षुद्ररोगः, क्षुद्रव्याधिः *m.*

AILING, *a.* रोगी -गिणी -गि (न्), क्षुद्ररोगपीडितः -ता -तं, व्याधितः -ता -तं.

To AIM, *v. a.* and *n.* (As at a mark) अभिसन्धा (c. 3. -दधाति -धातुं), उद्दिश् (c. 6. -दिशति -देष्टुं) with acc.; as, 'aiming at him,' तमुद्दिश्य; लक्ष्यीकृ.—(Endeavour after) आप् in des. (ईप्सति ईप्सितुं), अभ्याप्; सेव् (c. 1. सेवते सेवितुं), उपसेव् निषेव्; समाचर् (c. 1. -चरति -चरितुं); काङ्क्ष् (c. 1. काङ्क्षति काङ्क्षितुं), आकाङ्क्ष्, अनुकाङ्क्ष्.—(To direct the weapon) अभिसन्धा, लक्ष्यं प्रति अस्त्रं क्षिप् (c. 6. क्षिपति, क्षेप्तुं).

AIM, *s.* (The point to which a missive weapon is thrown) लक्षं, लक्ष्यं, बाणलक्ष्यं, शरव्यं.—(The direction of the weapon) सन्धानं.—(A purpose, design) अभिप्रायः, चिकीर्षितं, आशयः, काङ्क्षा, वाञ्छा.—(Conjecture) अनुमानं.

AIMLESS, *a.* असन्धानः -ना -नं, सन्धानरहितः -ता -तं, अलक्ष्यः -क्ष्या -क्ष्यं.

AIR, *s.* आकाशः, वायुः *m.*, नभः *n.* (स्), विहायः *n.* (स्), समीरणः, समिरः.—(Air in motion) वायुः, वातः, समीरणः.—(In music) तालः, मूर्च्छना, निशारुकं.—(Appearance) रूपं, आकारः, आकृतिः *f.*—(Gesture, mien) गतिः *f.*, वदनं, रीतिः *f.*—(Manner) विधिः *m.*, प्रकारः, रूपं.—(Scent, vapour) वासः, वाष्पः, गन्धः; 'aloft in air' विहायसा *ind.*; 'to build castles in the air,' गगनकुसुमानि कृ.

To AIR, *v. a.* (To expose to the air) वायुव्याप्यं -प्यां -प्यं कृ.—(To dry) शुष् in caus. (शोषयति -यितुं), शुष्कीकृ, निर्जलं -लां -लं कृ.

AIR-BALLOON, *s.* आकाशयानं, व्योमयानं, आकाशवर्त्मना गमनार्थं विमानं.

AIR-BLADDER, *s.* (Any cuticle filled with air) वायुकोषः, अनिल-पूरिता नाडिः.

AIR-BORN, *a.* वायुजः -जा -जं, आकाशजः -जा -जं.

AIR-GUN, *s.* शरादिप्रासनार्थं वायुपूरितं यन्त्रं.

AIR-HOLE, *s.* वातायनं, गवाक्षः, जालं, वायुच्छिद्रं, वायुपथः.

AIRING, *s.* वायुसेवनं, विहारः, वायुहेतोः परिक्रमः.

AIR-PUMP, *s.* वायुप्रक्षेपको नालः.

AIR-SHAFT, *s.* आकरे वायुगमनार्थं पथः or छिद्रं.

AIRY, *a.* (Composed of air) वायुमयः -यी -यं, आकाशीयः -या -यं, वैहायसः -सी -सं.—(Open to the air) वायुव्याप्यः -प्या -प्यं.—(Wanting reality, vain, empty) शून्यः -न्या -न्यं, लघुः -घुः -घ्वी -घु, अवास्तवः -वी -वं, असारः -रा -रं, चञ्चलः -ला -लं, वायुसमः -मा -मं.

AISLE, *s.* (A path in a church) पूजाशालाभ्यन्तरे पथः.

AKIN, *a.* (Allied by blood, used of persons) सगोत्रजः -जा -जं, स्वजातीयः -या -यं.—(Used of things) सम्बन्धी -न्धिनी -न्धि (न्), सम्पर्कीयः -या -यं.

ALABASTER, *s.* श्वेतप्रस्तरविशेषः.

ALACK, *interj.* (Alas!) कष्टं, आस्, हा, हन्त, अहह, हाहा, हाहो.

ALACRITY, *s.* लाघवं, चञ्चलत्वं, सोद्यमत्वं, शीघ्रत्वं, अविलम्बत्वं, क्षिप्रता.

ALAMODE, *adv.* व्यवहारानुरूपं, रीत्यनुसारेण.

ALARM, *s.* (Fright) त्रासः, भयं, साध्वसं, शङ्का, भयप्रस्तावः.—(A cry by which soldiers are summoned to arms) सान्नहनिकं, युद्धाय योधाह्वानं.—(Alarm-cry in general) भयध्वनिः *m.*

To ALARM, *v. a.* भी in caus. (भाययति -यितुं or भीषयति -ते), त्रस् in caus. (त्रासयति -यितुं), वित्रस्, सन्त्रस् in caus.

ALARMED, *p. p.* भीतः -ता -तं, भयार्त्तः -र्त्ता -र्त्तं, चकितः -ता -तं, शङ्कितः -ता -तं, भीषितः -ता -तं.

ALARM-BELL, *s.* भयसूचका घण्टा, शत्रोर् आगमनसमये वाद्यते या घण्टा.

ALARMING, *a.* भयङ्करः -रा -रं, भयानकः -का -कं, त्रासजनकः -का -कं, भयदः -दा -दं.

ALARMIST, *s.* भयोत्पादकः, भयकारकः.

ALARM-POST, *s.* भयसमये सैन्यसमागमार्थं निरूपितस्थानं.

ALARUM, *s.* सान्नहनिकं, भयध्वनिः *m.*, निरूपितसमये निद्रालसं प्रबोधयति या घटी.

ALAS, *interj.* कष्टं, आ, आस्, हा, हन्त, अहह, अहोबत.

ALB, *s.* (A white garment worn by priests) धर्म्माध्यापकैर् भृतः श्वेतवस्त्रविशेषः.

ALBATROSS, समुद्रीयपक्षिविशेषः, दक्षिणसमुद्रसेवी पक्षी.

ALBEIT, *adv.* तथापि, यद्यपि.

ALBION, *s.* श्वेतद्वीपः.

ALBUGINEOUS, *a.* अण्डशुक्लांशोपमः -मा -मं.

ALBUGO, *s.* शुक्लं, चक्षूरोगः, शुक्लमण्डलरोगः.

ALBUM, *s.* विशिष्टश्लोकरक्षार्थं पुस्तकं.

ALCHYMICAL, *a.* रसायनविद्याविषयकः -का -कं, रसायनज्ञः -ज्ञा -ज्ञं.

ALCHYMIST, *s.* रसज्ञः, रसायनविद्याज्ञः, रससिद्धः.

ALCHYMY, *s.* रसायनविद्या, रसायनं, रससिद्धिः *f.*

ALCOHOL, *s.* मद्यसारः.—(Impalpable powder) सूक्ष्मभस्म *n.* (न्).

ALCOVE, *s.* कुञ्जः, कुञ्जकुटीरः, पर्णशाला, पत्रवशाला, निभृतस्थानं.

ALDER, *s.* वृक्षविशेषः.

ALDERMAN, *s.* पुराध्यक्षः, नगरस्य प्रधानपुरुषः, नगराध्यक्षः, पौरजनः, वृद्धः, वृद्धजनः, गुरुजनः.

ALDERMANLY, *adv.* वृद्धजनवत् *ind.* गुरुजनवत् *ind.*, गुरुजनप्रकारेण.

ALE, *s.* यवसुरं, यवनिर्म्मितो मद्यविशेषः.

ALE-HOUSE, *s.* यवसुरालयः, यवसुरस्थानं.

ALE-HOUSE-KEEPER, *s.* यवसुरविक्रयी *m.* (न्), शौण्डिकः.

ALEMBIC, *s.* वकः, वकयन्त्रं, काचवकयन्त्रं, मुषा, द्रवद्रव्यसारनिर्हारार्थं मुषा.

ALERT, *a.* त्वरितः -ता -तं, क्षिप्रः -प्रा -प्रं, उद्यमी -मिनी -मि (न्), उद्योगी -गिनी -गि (न्), स्ववहितः -ता -तं, अतन्द्रः -न्द्रा -न्द्रं.

ALERTNESS, *s.* क्षिप्रता, अतन्द्रता, सत्वरता, सोद्योगत्वं.

ALGEBRA, *s.* बीजगणितं, गणनाविद्या.

ALGEBRAICAL, *a.* बीजगणितविषयकः -का -कं, गणनाविद्यासम्बन्धी -न्धिनी -न्धि (न्).

ALGID, *a.* शीतः -ता -तं, शीतलः -ला -लं, शिशिरः -रा -रं, हिमवान् -वती -वत् (त्).

ALIEN, *s.* (A foreigner) विदेशी *m.* (न्), विदेशीयः, भिन्नजातीयः.

ALIEN, *a.* अन्यदेशीयः -या -यं, विदेशीयः -या -यं, पारक्यः -क्या -क्यं.—(Estranged from) विरक्तः -क्ता -क्तं.—(Adverse to) विरुद्धः -द्धा -द्धं, विपरीतः -ता -तं, भिन्नः -न्ना -न्नं.

ALIENABLE, *a.* विच्छेदनीयः -या -यं, विभेद्यः -द्या -द्यं.—(Alienable property) पराधीनं कर्त्तुं शक्यते यद् द्रव्यं.

To ALIENATE, *v. a.* (To withdraw the affections) विरञ्ज् in caus. (-रञ्जयति -यितुं).—(To transfer property) द्रव्याधिकारित्वं पराधीनं or परवशं कृ, or परस्वत्वे प्रतिपद् in caus. (-पादयति -यितुं).

ALIENATE, *a.* विभिन्नः -न्ना -न्नं, विरक्तः -क्ता -क्तं, विच्छिन्नः -न्ना -न्नं, पराधीनः -ना -नं.

ALIENATED, *p. p.* विरक्तः -क्ता -क्तं. *See* ALIENATE.

ALIENATION, *s.* (Coldness of affection) विरागः, विरक्तिः *f.*, वैरक्त्यं.—(Transferring of property) स्वस्वत्वत्यागानन्तरं परस्वत्वापादनं.

To ALIGHT, *v. n.* अवतॄ (c. 1. -तरति -तरितुं -तरीतुं), उपविश् (c. 6. -विशति -वेष्टुं), निपत् (c. 1. -पतति -पतितुं).

ALIGHTED, *p. p.* अवतीर्णः -र्णा -र्णं, उपविष्टः -ष्टा -ष्टं, निपतितः -ता -तं.

ALIKE, *a.* सदृशः -शी -शं, तुल्यः -ल्या -ल्यं, समानः -ना -नं, एकप्रकारः -रा -रं, तुल्यरूपः -पी -पं, तुल्याकृतिः -तिः ति.

ALIMENT, *s.* आहारः, भोजनं, भक्ष्यं, भोज्यं, अन्नं, खाद्यं, पौष्टिकं.

ALIMENTAL or ALIMENTARY, *a.* पौष्टिकः -की -कं, पोषकः -का -कं, पुष्टिदः -दा -दं, प्रतिपालकः -का -कं, भरणशीलः -ला -लं.

ALIMENTARINESS, *s.* पोषकत्वं, प्रतिपालकत्वं, भरिमा *m.* (न्), भरणशीलता.

ALIMENTATION, *s.* पोषणं, भरणं, प्रतिपालनं, पुष्टिः *f.*

ALIMONY, *s.* स्त्रीपुरुषविभेदसमये यो धनस्य न्यायांशो भार्य्यायै दीयते.

ALIVE, *a.* जीवन् -वन्ती -वत् (त्), वर्त्तमानः -ना -नं, सजीवः -वा -वं, सचेतनः -ना -नं, आयुष्मान् -ष्मती -ष्मत् (त्).—(Cheerful, sprightly) त्वरितः -ता -तं, अतन्द्रः -न्द्रा -न्द्रं, चञ्चलः -ला -लं.

ALKALI, *s.* सर्ज्जिका, सर्ज्जिः *f.*, क्षारः, सर्ज्जिकाक्षारः, यवक्षारः, गोगवाही *m.* (न्).

ALKALINE, *a.* क्षारस्वभावः -वा -वं, क्षारविशिष्टः -ष्टा -ष्टं, सर्ज्जियुक्तः -क्ता -क्तं.

ALL, *a.* सर्व्वः -र्व्वा -र्व्वं, विश्वः -श्वा -श्वं, कृत्स्नः -त्स्ना -त्स्नं, निखिलः -ला -लं, अखिलः -ला -लं, समस्तः -स्ता -स्तं, सकलः -ला -लं.

ALL, *s.* (The whole) सर्व्वं, कार्त्स्न्यं, कार्त्स्न्यं, साकल्यं: 'In all, altogether,' सर्व्वशस्, साकल्येन, कृत्स्नशस्; 'not at all' न कथञ्चन, न मनाक्; 'at all times,' सर्व्वदा; 'all but,' प्रायस् *ind.*, प्रायशस्, ईषदूनः -ना -नं; 'all of a sudden,' अकस्मात्; 'all I can,' यथाशक्ति *ind.*, यथाबलं, यथासामर्थ्यं; 'all around,' सर्व्वतस्, समन्ततस्, परितस्, चतुर्दिक्षु; 'by all means,' सर्व्वथा; 'all at once,' युगपत् *ind.*, 'most of all,' भूयिष्ठं, विशेषतस्; 'all hail,' नमस् *ind.*

ALL-ATONING, *a.* सर्व्वपापनाशकः -का -कं, सर्व्वपापशोधकः -का -कं.

ALL-BEARING, *a.* सर्व्वंभरः -रा -रं.—(Omniparous) सर्व्वप्रसवी -विनी -वि (न्).

ALL-CONQUERING, *a.* सर्व्वजयी -यिनी -यि (न्), सर्व्वदमनः -ना -नं, सर्व्वन्दमः -मा -मं.

ALL-GLORIOUS, *a.* सर्व्वतेजोमयः -यी -यं, सर्व्वप्रतापवान् -वती -वत् (त्).

ALL-KNOWING, *a.* सर्व्वज्ञः -ज्ञा -ज्ञं, सर्व्ववेदी -दिनी -दि (न्).

ALL-LOVING, *a.* सर्व्वप्रियः -या -यं, सर्व्वहितैषी -षिणी -षि (न्).

ALL-MATURING, *a.* सर्व्वपाचकः -का -कं, सर्व्वपाचनशीलः -ला -लं.

ALL-PENETRATING, *a.* सर्व्वभेदकः -का -कं, सर्व्वप्रवेशकः -का -कं.

ALL-PERVADING, सर्व्वगतः -ता -तं, सर्व्वव्यापी -पिनी -पि (न्), सर्व्वगः -गा -गं.

ALL-SEEING, *a.* सर्व्वदर्शी -र्शिनी -र्शि (न्), सर्व्वद्रष्टा -ष्ट्री -ष्टृ (ष्टृ).

ALL-SUFFICIENCY, *s.* सर्व्वशक्तिता, सर्व्वसामर्थ्यं.

ALL-SUFFICIENT, *a.* सर्व्वसमर्थः -र्था -र्थं, सर्व्वशक्तिमान् -मती -मत् (त्).

ALL-WISE, *a.* सर्व्वज्ञः -ज्ञा -ज्ञं, सर्व्ववित् *m. f. n.*, सर्व्ववेदी -दिनी -दि (न्), सर्व्वज्ञानमयः -यी -यं.

To ALLAY, *v. a.* (To mitigate) शम् in caus. (शमयति -यितुं), प्रशम्, उपशम्; शान्त्व or सान्त्व (c. 10. शान्त्वयति -यितुं), अभिशान्त्व्, परिशान्त्व्; तुष् in caus. (तोषयति -यितुं).—(To mix one metal with another) धातुं धातुना मिश्र् (c. 10. मिश्रयति -यितुं): सुवर्णं रूप्यं वा कुप्येन मिश्र्.

ALLAY or ALLAYMENT, *s.* (Mitigation) शान्तिः *f.*, प्रशमनं, प्रशान्तिः *f.*, सान्त्वनं; 'allayment of fear,' भयोपशमः; 'allayment of hunger,' क्षुत्प्रतीकारः.—(Mixture of base metal) कुप्यसम्पर्कः.

ALLAYED, *p. p.* प्रशान्तः -न्ता -न्तं, उपशान्तः -न्ता -न्तं, प्रशमितः -ता -तं.

ALLAYER, *s.* शमकः, शान्तिकरः, शान्तिकर्त्ता *m.* (र्त्तृ), शान्तिदः.

ALLEGATION, *s.* (Affirmation) वचनं, अभियोगः, वाक्यं, अभिधानं.—(False allegation) मिथ्याभिशंसनं.—(Excuse, plea) छद्म *n.* (न्), उपदेशः, व्यपदेशः.

To ALLEGE, *v. a.* (To affirm, declare) वद् (c. 1. वदति, वदितुं), तथेति ब्रू (c. 2. ब्रवीति ब्रूते वक्तुं).—(To plead as an excuse) छद्म कृ, व्यपदिश् (c. 6. -दिशति -देष्टुं), मिथ्या वद्.

ALLEGEABLE, *a.* वचनीयः -या -यं, वदनीयः -या -यं, कथनीयः -या -यं.

ALLEGIANCE, *s.* भक्तिः *f.*, अनुरागः, वशीभूतत्वं, अधीनत्वं.

ALLEGIANT, *a.* भक्तिमान् -मती -मत् (त्), अनुरागी -गिणी -गि (न्).

ALLEGORICAL, *a.* रूपकमयः -यी -यं, दृष्टान्तरूपः -पी -पं, लाक्षणिकः -की -कं.

ALLEGORICALLY, *adv.* दृष्टान्ततस् *ind.*, लाक्षणिकप्रकारेण, रूपकक्रमेण.

To ALLEGORISE, *v. a.* दृष्टान्तीकृ, दृष्टान्तय (*nom.* दृष्टान्तयति -यितुं), लाक्षणिकप्रकारेण वद् (c. 1. वदति, वदितुं).

ALLEGORY, *s.* रूपकं, दृष्टान्तः, उदाहरणं, लाक्षणिकवाक्यं, युक्तिः *f.*

ALLEGRO, *adv.* त्वरितं, क्षिप्रं, शीघ्रं.

To ALLEVIATE, *v. a.* शम् in caus. (शमयति -यितुं), प्रशम्, उपशम्; शान्त्व् or सान्त्व् (c. 10. सान्त्वयति -यितुं), अभिशान्त्व्, उपसान्त्व्, परिशान्त्व्; लघ (*nom.* लघयति -यितुं), उद्धृ (c. 1. -हरति -ते -हर्त्तुं), लघूकृ.

ALLEVIATED, *p. p.* प्रशमितः -ता -तं, प्रशान्तः -न्ता -न्तं, उपशान्तः -न्ता -न्तं, लघूकृतः -ता -तं.

ALLEVIATION, *s.* शान्तिः *f.*, प्रशमनं, प्रशान्तिः, उपशमः, लघूकरणं, लाघवं.

ALLEVIATIVE, *a.* (Giving alleviation) शान्तिदः -दा -दं, शान्तिकरः -रा -रं, शमकः -का -कं.

ALLEY, *s.* (A narrow passage) सङ्कटपथः, सम्बाधपथः, सङ्कुचितवीथिः *f.* —(A walk in a garden) उद्यानपथः.

ALLIANCE, *s.* (League) सन्धिः *m.*, साहित्यं, संयोगः, साम्यं, सहायता, ऐक्यं.—(Relation by marriage, &c.) सम्बन्धः, ज्ञातिसम्पर्कः; 'offensive and defensive alliance,' परस्परोपकारः.

ALLIED, *p. p.* सन्धितः -ता -तं, सहितः -ता -तं, सम्बद्धः -द्धा -द्धं, संयुक्तः -क्ता -क्तं.

To ALLIGATE, *v. a.* सम्बन्ध् (c. 9. -बध्नाति -बन्द्धुं or caus. -बन्धयति -यितुं), अनुबन्ध्, आबन्ध्.

ALLIGATION, *s.* (Tying together) बन्धनं, सम्बन्धनं, संयोजनं.—(Rule in arithmetic) सम्मिश्रद्रव्याणां मूल्यं निरूपयति यो गणनाविधिः, अधमस्थापन.

ALLIGATOR, *s.* नक्रः, ग्राहः, कुम्भीरः.

ALLITERATION, *s.* अनुप्रासः.

ALLODIAL, *a.* अनधीनः -ना -नं, अनायत्तः -त्ता -त्तं, स्वाधीनः -ना -नं.

To ALLOO, *v. a.* (Set on by crying alloo) हे हे इत्यादिशब्दैः कुक्कुरान् प्रचुद् (caus. -चोदयति -यितुं).

To ALLOT, *v. a.* (Distribute by lot) विभज् (c. 1. -भजति -ते -भक्तुं), प्रविभज्; व्यंस् (c. 10. -अंसयति -यितुं), अंश् (c. 10. अंशयति -यितुं), विन्यस् (c. 4. -अस्यति -असितुं), व्यस्; कॢप् (c. 10. कल्पयति -यितुं), परिकॢप्.—(To grant) प्रदा (c. 3. -ददाति -दातुं).

ALLOTMENT, *s.* (Distributing by lot) विभागः, अंशनं, विभागकल्पना.—(The portion granted) अंशः, भागः, विभागः.

To ALLOW, *v. a.* अनुज्ञा (c. 9. -जानाति -ज्ञातुं), अभ्यनुज्ञा; अनुमन् (c. 4. -मन्यते -मन्तुं), सह् (c. 1. सहते सोढुं), विषह्, अनुमुद् (c. 1. -मोदते -मोदितुं).—(To admit an argument) ग्रह् (c. 9. गृह्णाति ग्रहीतुं).—(To allow wages) वर्त्तनं दा or अनुदा (c. 3. -ददाति -दातुं).—(To abate) उद्धारं कृ, न्यूनीकृ.

ALLOWABLE, *a.* धर्म्यः -र्म्या -र्म्यं, अनुज्ञेयः -या -यं, अनुज्ञातव्यः -व्या -व्यं, स्वीकरणीयः -या -यं, अनुज्ञायोग्यः -ग्या -ग्यं, दातव्यः -व्या -व्यं.—(Admissible) ग्राह्यः -ह्या -ह्यं, गृह्यः -ह्या -ह्यं, प्रगृह्यः -ह्या -ह्यं.

ALLOWANCE, *s.* अनुज्ञा, अनुमतिः *f.*—(Stipulated pay) वर्त्तनं, वेतनं, निरूपितमूल्यं, परिमितमूल्यं.—(Abatement) उद्धारः, न्यूनीकरणं.

ALLOWED, *p. p.* अनुज्ञातः -ता -तं, अभ्यनुज्ञातः -ता -तं, अनुमतः -ता -तं.

ALLOY, *s.* अपद्रव्यं, कुप्यं, कूटस्वर्णं, अल्पमूल्यको धातुः, दूषणं, दोषः, मलं.—(Abatement, impairment) न्यूनता, क्षयः, विघ्नः.

ALLOYED, *p. p.* दूषितः -ता -तं, दुष्टः -ष्टा -ष्टं.

To ALLUDE, *v. n.* (Hint at) उद्दिश् (c. 6. -दिशति -देष्टुं), समुद्दिश्, सूच् (c. 10. सूचयति -यितुं), इङ्गं or इङ्गितं or सङ्केतं कृ, स्मृ in caus. (स्मारयति -यितुं), प्रबुध् in caus. (-बोधयति -यितुं).

ALLUDED, *p. p.* उद्दिष्टः -ष्टा -ष्टं, सूचितः -ता -तं, स्मृतः -ता -तं.

To ALLURE, *v. a.* आकृष् (c. 1. -कर्षति or c. 6. -कृषति -क्रष्टुं), समाकृष्; प्रलुभ् in caus. (-लोभयति -यितुं).

ALLURED, *p. p.* आकृष्टः -ष्टा -ष्टं or आकर्षितः -ता -तं, प्रलोभितः -ता -तं.

ALLUREMENT, *s.* प्रलोभनं, आकर्षणं, विलोभनं, वञ्चनं, भोगः.

ALLURING, *a.* आकर्षकः -का -कं, आकर्षी -र्षिणी -र्षि (न्), प्रलोभकः -का -कं, वञ्चकः -का -कं.

ALLURINGLY, *adv.* प्रलोभनपूर्व्वकं, प्रलोभनेन, आकर्षकप्रकारेण.

ALLUSION, *s.* (Hint) इङ्गं, इङ्गितं, सङ्केतः, आकारः.—(Allusion to) उद्देशः, सूचनं.—(In allusion to) उद्दिश्य, समुद्दिश्य.

ALLUSIVE, *a.* उद्देशकः -का -कं, सूचकः -का -कं.

ALLUVION, *s.* पुलिनं, नदीरयेण or जलप्रवाहेण समानीता मृत्तिका.

ALLUVIOUS, *a.* नदीरयेण समानीतः -ता -तं, पुलिनमयः -यी -यं.

ALLY, *s.* सहायः, सहकारी *m.* (न्), मित्रं, सुहृद् *m.*, परस्परोपकारी *m.* (न्), सम्बन्धी *m.* (न्).

To ALLY, *v. a.* सन्धा (c. 3. -दधाति -धत्ते -धातुं), सम्बन्ध् (caus. -बन्धयति -यितुं), संयुज् (c. 10. -योजयति -यितुं), संश्लिष् in caus. (-श्लेषयति -यितुं).

ALMANAC, *s.* पत्रिका, पत्रिः *f.*

ALMANAC-MAKER, *s.* पत्रीकरः, पत्रिकारचकः.

ALMIGHTINESS, *s.* सर्व्वशक्तिमत्त्वं, सर्व्वसामर्थ्यं.

ALMIGHTY, *a.* सर्व्वशक्तिमान् -मती -मत् (त्), सर्व्वसमर्थः -र्था -र्थं, सर्व्वशक् *m. f. n.*, अमितौजाः -जाः -जः (स्).

ALMOND, *s.* पारसीकजनैर् बादामित्य् अभिधीयते यत् फलं.

ALMONER, *s.* दानधर्म्मे नियुक्तः, भिक्षावितरणे अधिकृतः, दरिद्रेषु यद् धनं दातव्यं तद्वितरणे अधिकृतः.

ALMONRY, *s.* दानधर्म्मे नियुक्तस्य गृहं, भिक्षावितरणशाला.

ALMOST, *adv.* प्रायस्, प्रायशस्, भूयिष्ठं, ईषदूनः -ना -नं, कल्पः affixed.—(Somewhat less) ईषदूनं, यत् किञ्चिन् न्यूनं; 'almost four,' उपचतुराः *m. pl.*; 'almost every person,' प्रायः सर्व्वजनः; 'almost dead,' मुमूर्षुः or मृतप्रायः or मृतकल्पः; 'almost finished,' समाप्तभूयिष्ठः; 'seven days being almost ended,' सप्तसु दिनेषु समाप्तकल्पेषु.

ALMS, *s.* भैक्षं, भैक्ष्यं, भिक्षा, भिक्षान्नं, दानं; 'to beg alms,' भिक्ष् (c. 1. भिक्षते भिक्षितुं), भैक्ष्यं चर् (c. 1. चरति, चरितुं), भिक्षाटनं कृ.

ALMS-BOX, *s.* भिक्षापात्रं, दानाधारः.

ALMS-GIVER, *s.* भिक्षादाता *m.* (तृ), दरिद्रपोषकः.

ALMS-GIVING, *s.* दानधर्म्मः, दानकार्य्यं, भिक्षादानं, दरिद्रपोषणं.

ALMS-HOUSE, *s.* दरिद्रपोषणशाला, भिक्षावितरणशाला.

ALMS-MAN, *s.* भिक्षाचरः, भिक्षुकः, भिक्षाशी *m.* (न्), भिक्षोपजीवी *m.* (न्).

ALOE, *s.* (The plant) कुमारी, सहा, स्थूलदला.—(A precious wood) अगुरुः, अगुरुकाष्ठं.

ALOFT, *adv.* ऊर्द्ध्वं, उपरि, उपरिष्टात्, उच्चं.—(In air) विहायसा.

ALONE, *a.* एकान्तः -न्ता -न्तं, एकः -का -कं, एकाकी -किनी -कि (न्), निभृतः -ता -तं, केवलः -ला -लं, केवली -लिनी -लि (न्), अद्वितीयः -या -यं.—(Only) केवलं, मात्रं.

ALONG, *prep.* (At length, all along the side of) अनु prefixed to the acc. c. neuter; as, 'along the Ganges,' अनुगङ्गं; 'along the bank,' अनुकच्छं.—(Forward) अग्रे, पुरस् *ind.*, पुरस्तात्.—(Along with) सह, सार्द्धं, सहितः -ता -तं.—(All along, from first to last) प्रथमावधेः प्रभृति शेषपर्य्यन्तं, सर्व्वत्र.—(Along-side) पार्श्वतस् *ind.*

ALOOF, *adv.* दूरे, कियद्दूरे, ईषद्दूरे, अन्तरे, निभृतं, पृथक्.—(Standing aloof) दूरस्थः.

ALOUD, *adv.* प्रकाशं, उच्चैस् *ind.*, उच्चकैस्, प्रोच्चैस्, उच्चैःस्वरेण, महानादेन, उच्चैस्तमाम् *ind.*, मुक्तकण्ठं.

ALPHABET, *s.* वर्णमाला, वर्णक्रमः, अक्षरविन्यासः, वर्णसङ्घाटः.

ALPHABETICAL, *a.* वर्णक्रमानुसारी -रिणी -रि (न्), वर्णमालाश्रेण्यनुरूपः -पा -पं.

ALPHABETICALLY, *adv.* वर्णक्रमानुसारतस् *ind.*, वर्णमालाश्रेण्यनुरूपं.

ALREADY, *adv.* (Some time ago) तत्पूर्व्वं, पूर्व्वं, पुरा, पूर्व्वकाले, प्राग् वर्त्तमानकालात्.—(At the present time) तत्क्षणे, सम्प्रति, तत्काले.

ALSO, *adv.* च, चैव, अपिच, एवं, अपरञ्च, पुनरपि, पुनश्च.—(In like manner) तद्वत् *ind.*, तद्विधे, तत्प्रकारे.

ALTAR, *s.* चैत्यं, आयतनं, वेदिः *m.* or -दी *f.*, चयनं, यज्ञवेदिः, स्थण्डिलं.

To ALTER, *v. a.* अन्यथा कृ, अन्यरूपं -पां -पं कृ, अन्यप्रकारं -रां -रं कृ, विपर्य्यस् (c. 4. -अस्यति -असितुं), परिवृत् in caus. (-वर्त्तयति -यितुं).—(To alter for the worse) विकृ (c. 8. -कुरुते -कर्त्तुं), विरूप् (c. 10. -रूपयति -यितुं).

To ALTER, *v. n.* अन्यथा or अन्यरूपः -पा -पं or अन्यप्रकारः -रा -रं भू. —(For the worse) विकृ (c. 8. -कुरुते).—(To alter in mind and feelings) विमनीभू.

ALTERABLE, *a.* विकार्य्यः -र्य्या -र्य्यं, अन्यथा करणीयः -या -यं, विकारशीलः -ला -लं, परीवर्त्तनीयः -या -यं, परिणामयोग्यः -ग्या -ग्यं.

ALTERAGE, *s.* (The fostering of a child) बालकपोषणं, पुत्रप्रतिपालनं.

ALTERATION, *s.* विकारः, विक्रिया, विकृतिः *f.*, परिणामः, परीवर्त्तनं, अन्यथाभावः, वैकृतं.

ALTERATIVE, *a.* विकारी -रिणी -रि (न्), परिवर्त्तकः -का -कं, परिणामकरः -रा -रं.

To ALTERCATE, *v. n.* विवद् (c. 1. -वदते -वदितुं), व्यवक्रुश् (c. 1. क्रोशति -क्रोष्टुं).

ALTERCATION, *s.* विप्रलापः, व्यवक्रोशनं, व्याघभाषी *f.*, वादानुवादः, विवादः, उत्तरप्रत्युत्तरं, वाक्यविरोधः, वाग्युद्धं, वाक्यं.

ALTERED, *p. p.* विकृतः -ता -तं, वैकृतः -ता -तं, अन्यरूपः -पा -पं, अन्यथा कृतः -ता -तं, कृतविक्रियः -या -यं.—(In mind) विमनीकृतः -ता -तं.

ALTERNATE, ALTERNATELY, *adv.* विपर्य्ययेण, वारं वारं, अन्योन्यं, परस्परेतस्, परस्परम्, परिवृत्य; 'alternate sleeping and waking,' पर्य्यायशयनं.

To ALTERNATE, *v. a.* परिवृत् in caus. (-वर्त्तयति -यितुं), विहृ (c. 1. -हरति -हर्त्तुं).

To ALTERNATE, *v. n.* परिवृत् (c. 1. -वर्त्तते -वर्त्तितुं).

ALTERNATION, *s.* विपर्य्ययः, पर्य्यायः, परिवर्त्तनं, परिवृत्तिः *f.*—(Alternation of employment or duty) कर्म्मविपर्य्ययः.

ALTERNATIVE, विकल्पः, अनुकल्पः, पाक्षिकः, पक्षः, यागः. —(In grammar) विभाषा *f.*

ALTHOUGH, *conj.* यद्यपि. 'Although' is sometimes expressed by the potential mood of the verb; as, 'although it be not,' न भवेत्.—(Notwithstanding) तथापि, किन्तु.

ALTILOQUENCE, *s.* गर्व्वितवाक्यं, साटोपोक्तिः *f.*

ALTISONANT, *a.* उच्चैःस्वरकारी -रिणी -रि (न्), महास्वनः -ना -नं.

ALTIVOLANT, *a.* उच्चैर् उड्डीयमानः -ना -नं, उच्चैर् उड्डीनः -ना -नं.

ALTITUDE, *s.* उच्चत्वं, उच्छितिः *f.*, उच्छ्रायः, उत्तुङ्गता, उत्सेधः.—(Superiority) प्रधानत्वं.

ALTOGETHER, *adv.* सर्व्वथा, सर्व्वतस् *ind.*, सम्यक्, अशेषतस् *ind.*, अशेषेण, कृत्स्नशस् *ind.*, अखिलेन, साकल्येन, कार्त्स्न्येन.—(Conjunctly) समं, एकचित्तीभूय *ind.*, सहितः -ता -तं, संहतः -ता -तं.

ALUM, *s.* स्फटी, लवणविशेषः.

ALUMINOUS, *a.* स्फटीमयः -यी -यं, स्फटीसम्बन्धी -न्धिनी -न्धि (न्).

ALWAYS, *adv.* सर्व्वदा, सदा, सततम्, नित्यदा, अनिशं, अनवरतं, निरन्तरं, सर्व्वक्षणे.

AMAIN, *adv.* (Violently) प्रसभं, प्रसह्य, बलात्, बलवत् *ind.*—(With impetuosity) सवेगं, वेगतस् *ind.*, जवेन.

AMALGAM, *s.* कांस्यं.

To AMALGAMATE, *v. n.* पारेण धातून् मिश्र् (c. 10. मिश्रयति -यितुं).—(To unite together) संयुज् (c. 10. -योजयति -यितुं), संक्षिप् in caus. (-क्षेपयति -यितुं), संहन् (c. 2. -हन्ति -हन्तुं), एकीकृ.

AMALGAMATION, *s.* (Of metals) धातुमिश्रणं, योगः.—(Junction) संश्लेषः, संयोजनं.

AMANUENSIS, *s.* लेखकः, लिपिकारः, यद् अन्येन कथितं तल्लेखकः.

AMARANTH, *s.* अम्लानः, अम्लानपुष्पं.

AMARANTINE, *a.* अम्लानी -निनी -नि (न्), अम्लानवान् -वती -वत् (त्), अम्लानपुष्पयुक्तः -क्ता -क्तं.

AMARITUDE, *s.* तिक्तता, -त्वं, कटुता.

To AMASS, *v. a.* सञ्चि (c. 5. -चिनोति -चेतुं), उपचि, सम्भृ (c. 1. -भरति -ते -भर्त्तुं), समाक्षिप् (c. 6. -क्षिपति -क्षेप्तुं), एकत्र कृ, राशीकृ.

AMASSED, *p. p.* सञ्चितः -ता -तं, उपचितः -ता -तं, सम्भृतः -ता -तं, राशीकृतः -ता -तं.

AMASSMENT, *s.* सञ्चयः, पुञ्जः, समुच्चयः, संहतिः *f.*, ओघः, समुदायः, राशीकरणं.

AMATEUR, *s.* काञ्चिद् विद्यां स्वेच्छातः or आत्मविनोदार्थं सेवते यः.—(In music) गन्धर्व्वविद्याप्रियः, गन्धर्व्वविद्याकामः.

AMATORY, *a.* कामी -मिनी -मि (न्), स्नेही -हिनी -हि (न्), प्रीतिमान् -मती -मत् (त्), अनुरागी -गिणी -गि (न्), प्रेमशीलः -ला -लं, शृङ्गारी -रिणी -रि (न्), रसिकः -का -कं.

To AMAZE, *v. a.* विस्मि in caus. (-स्माययति -ते -यितुं), आकुलीकृ, व्याकुलीकृ, विस्मयाकुलं -लां -लं or आश्चर्य्यं -र्य्यां -र्य्यं or व्यस्तं -स्तां -स्तं कृ.

AMAZE, *s.* विस्मयः, आश्चर्य्यं, चमत्कारः. —(Confusion) आकुलत्वं व्याकुलता.

AMAZED, *p. p.* विस्मितः -ता -तं, चमत्कृतः -ता -तं, मोहितः -ता -तं, व्याकुलितः -ता -तं, आकुलीकृतः -ता -तं, व्याकुलमनाः -नाः -नः (स्).

AMAZEDLY, *adv.* सविस्मयं, साश्चर्य्यं, विस्मयेन, चमत्कारेण.

AMAZEMENT, *s.* विस्मयः, आश्चर्य्यत्वं, अद्भुतं, व्याकुलता, कातरता.

AMAZING, *part. a.* (Astonishing) विस्मयकारी -रिणी -रि (न्), विचित्रः -त्रा -त्रं, अद्भुतः -ता -तं, चमत्कारी -रिणी -रि (न्).—(Excessive) अतिरिक्तः -क्ता -क्तं; 'amazing power,' अतिशक्तिः *f.*

AMAZINGLY, *adv.* अद्भुतं, विचित्रं, विचित्रप्रकारेण.—(Excessively) निर्भरं, अतीव, अतिरिक्तं, अतिशयं; 'amazingly covetous,' अतिलुब्धः.

AMAZON, *s.* स्वस्तनच्छेदनपूर्व्वकं रणे विक्रमं दर्शयित्वा या स्त्रीजातिः प्राक्कालीनपुस्तकेषु प्रशस्यते.

AMBAGES, *s.* वक्रोक्तिः *f.*, वक्रभणितं.

AMBASSADOR, *s.* दूतः, सन्देशहरः, राजदूतः, राजचारः, सत्त्री *m.* (न्).

AMBASSAGE, *s.* दूत्यं, दौत्यं, दूतप्रेरणं.

AMBER, *s.* तृणमणिः *m.*, तृणग्राही *m.* (न्), शूकापुट्टः.

AMBER, *a.* तृणमणिमयः -यी -यं, शूकापुट्टरूपः -पी -पं.

AMBERGRIS, *s.* औषधविशेषः.

AMBER-TREE, *s.* सुगन्धिवृक्षविशेषः.

AMBIDEXTER OR AMBIDEXTROUS, *a.* (Having equally the use of both hands) सव्यसाची -चिनी -चि (न्), उभयहस्तकुशलः -ला -लं. (Equally ready to act on both sides) द्विपक्षपाती *m.* (न्).

AMBIENT, *a.* वेष्टकः -का -कं, परिवेष्टकः -का -कं, व्यापकः -का -कं.

AMBIGUITY, AMBIGUOUSNESS, *s.* द्व्यर्थः, सन्दिग्धार्थः, सन्देहार्थः, अस्पष्टार्थः, अस्पष्टता, वक्रोक्तिः *f.*, वक्रता.

AMBIGUOUS, *a.* द्व्यर्थः -र्था -र्थं, सन्दिग्धार्थः -र्था -र्थं, अस्पष्टार्थः -र्था -र्थं, अस्पष्टः -ष्टा -ष्टं, अव्यक्तः -क्ता -क्तं, वक्रः -क्रा -क्रं.

AMBIGUOUSLY, *adv.* द्व्यर्थतस् *ind.*, अस्पष्टं, अव्यक्तं, वक्रोक्त्या, सन्दिग्धप्रकारेण.

AMBIT, *s.* मण्डलं, वेष्टनं, चक्रवालं.

AMBITION, *s.* कीर्त्तिस्पृहा अभिहाचः *f.*, ऐश्वर्य्याकाङ्क्षा, उत्कृष्टपदवाञ्छा राज्यलोभः.

AMBITIOUS, *s.* कीर्त्तिप्रेप्सुः -प्सुः -प्सु, यशस्कामः -मा -मं, यशस्काम्यन् -म्यती -म्यत् (त्), आजिगीषुः -षुः -षु, उत्कृष्टपदप्रेप्सुः -प्सुः -प्सु, अभिरुचिमान् -मती -मत् (त्), ऐश्वर्य्यप्रेप्सुः -प्सुः -प्सु, अभिप्रेतः -ता -तं.

AMBITIOUSLY, *adv.* कीर्त्तिस्पृहातस् *ind.*, ऐश्वर्य्याकाङ्क्षया, उत्कृष्टपदवाञ्छया, अभिरुच्या.

To AMBLE, *v. n.* सुन्दरगत्या चल् (c. 1. चलति चलितुं), सुन्दरप्रकारेण प्रु (c. 1. प्रवते प्रोतुं) or धोर् (c. 1. धोरति धोरितुं).

AMBLE, *s.* अश्वस्य गतिविशेषः, प्रुतः, धोरितं, सुन्दरगतिः *f.*

AMBLER, *s.* धोरितशीलः, सुन्दरगतियायी *m.* (न्).

AMBROSIA, *s.* अमृतं, त्रिदशाहारः, पीयूषं, देवान्नं, परमान्नं.

To AMBULATE, *v. a.* विचर् (c. 1. -चरति -चरितुं). क्रम् in freq. (चंक्रम्यते), परिक्रम् (c. 4. -क्राम्यति क्रमितुं), इतस्ततश् चर्.

AMBULATION *s.* परिक्रमः, इतस्ततो भ्रमणं.

AMBUSCADE, AMBUSH, *s.* (A place where persons lie in wait) पराक्रमणार्थं निभृतस्थानं.—(The liers in wait) सैन्यं निभृते स्थापितं.

To AMELIORATE, *v. a.* भद्रतरं -रां -रं, or श्रेयांसं -यसीं -यः or श्रेष्ठतरं -रां -रं, or साधीयांसं -यसीं -यः कृ.

AMELIORATION, *s.* श्रेयस्त्वं, भद्रतरता, श्रेष्ठता, श्रैष्ठ्यं, वृद्धिः *f.*

AMEN, *adv.* तथास्तु, एवमस्तु.

AMENABLE, *a.* अभियोक्तुराह्वानाधीनः -ना -नं, परानुयोगाधीनः -ना -नं, अनुसन्धेयः -या -यं.

To AMEND, *v. a.* (To correct) शुध् in caus. (शोधयति -यितुं), परिशुध्, विशुध्, संशुध्; समाधा (c. 3. -दधाति -धत्ते -धातुं).—(To amend one's life, leave wickedness) पापात् निवृत् (c. 1. -वर्त्तते -वर्त्तितुं), पापं त्यक्त्वा धर्म्मम् आचर् (c. 1. -चरति -चरितुं), or साधून् आचारान् आस्था (c. 1. -तिष्ठति -स्थातुं), विप्रतीसारं कृ.

To AMEND, *v. n.* (As the life or manners) शुध् (c. 4. शुध्यति शोद्धुं), विशुध्, संशुध्, समाधा in pass. (-धीयते), भद्रतरः -रा -रं भू, साधुः -धुः or -ध्वी -धु भू.—(As a disease) शम् (c. 4. शाम्यति शमितुं) उपशम्.

AMENDED, *p. p.* शोधितः -ता -तं, संशुद्धः -द्धा -द्धं.—(Ceased from evil) निवृत्तपापः -पा -पं.

AMENDMENT, *s.* शोधनं, संशुद्धिः *f.*, प्रतिसमाधानं, समाधानं, विप्रतीसारः, श्रेयस्त्वं, श्रेष्ठता, श्रैष्ठ्यं.—(Of life) आचारशोधनं, दोषशोधनं.—(Of a disease) उपशमः, स्वास्थ्यं.

AMENDS, *s.* निस्तारः, निष्कृतिः *f.*, पारितोषिकं, शोधनं, संशुद्धिः *f.*

AMENITY, *s.* रम्यता, प्रियता, अभिरामत्वं, सुनन्दता.

To AMERCE, *v. a.* दण्ड् (c. 10. दण्डयति -यितुं) with two accusatives.

AMERCED, *p. p.* दण्डितः -ता -तं, साधितः -ता -तं.

AMERCEMENT, *s.* दण्डः, धनदण्डः.—(Loss) हानिः *f.*, क्षयः, अपचयः.

AMETHYST, *s.* मणिविशेषः, नीलवर्णः प्रस्तरप्रभेदः, मटीमणिः.

AMIABLE, *a.* सुशीलः -ला -लं, सुप्रियः -या -यं, सुशीलवान् -वती -वत् (त्), प्रीतिमान् -मती -मत् (त्), प्रियदर्शनः -ना -नं, स्नेहार्हः -र्हा -र्हं, प्रियङ्करः -रा -रं.—(Pleasant) रमणीयः -या -यं.

AMIABLENESS, *s.* सुशीलत्वं, सद्भावः, प्रियता, प्रियम्भविष्णुता, प्रियम्भावुकता.

AMIABLY, *adv.* सुशीलजनवत्, सुप्रियं, प्रीतिपूर्व्वकं, प्रीत्या.

AMICABLE, *a.* मैत्रः -त्री -त्रं, हितः -ता -तं, साखेयः -या -यं, स्नेहशीलः -ला -लं.

AMICABLENESS, *s.* मित्रत्वं, सख्यं, सौहार्द्दं, सहायता, अनुकूलता.

AMID, AMIDST, *prep.* मध्ये, अन्तरेण, अन्तरे, अन्तरा, अभ्यन्तरे.

AMISS, *adj.* दोषी -षिणी -षि (न्), अपराधी -धिनी -धि (न्), अनुचितः -ता -तं, अयुक्तः -क्ता -क्तं. *adv.* दुष्टु, दोषेण, सापराधतम्, अनुचितं, अयुक्तं.

AMITY, *s.* मैत्र्यं, सख्यं, बन्धुता, ऐक्यं.—(Between nations) सन्धिः *m.*

AMMONIAC, *s.* (Gum ammoniac) निर्यासप्रकारः.—(Sal ammoniac) लवणप्रकारः.

AMMUNITION, *s.* युद्धोपकरणं, युद्धसज्जा.

AMNESTY, *s.* राजक्षमा, दोषक्षमा, दोषविस्मरणव्यवस्था.

AMONG, AMONGST, *prep.* मध्ये, अभ्यन्तरे, अन्तरे, अन्तरेण, अन्तरा, आन्तर्.

AMOROUS, *a.* कामी -मिनी -मि (न्), प्रकामः -मा -मं, कामुकः -का -कं, मन्मथी -थिनी -थि (न्), शृङ्गारी -रिणी -रि (न्), रसिकः -का -कं, प्रेमशीलः -ला -लं, कामाक्रान्तः -न्ता -न्तं.

AMOROUSLY, *adv.* कामेन, कामतस् *ind.*, रसिकभावेन, प्रीतिपूर्व्वकं.

To AMOUNT, *v. n.* उपचि in pass. (-चीयते), सञ्चि, समुदि in pass. (-ईयते), सङ्ख्या in pass. (-ख्यायते); 'amounting to,' संख्यकः -का -कं.

AMOUNT, *s.* परिमाणं, सङ्ख्या, समुदायः, उपचायः, सारः, अर्थः; 'money to the amount of a lac,' लक्षसंख्यानि धनानि.—(Value, price) मूल्यं.

AMPHIBIOUS, *a.* भूजलचरः -रा -रं, स्थलजलचरः -रा -रं, जलवायुगः -गा -गं, द्विधागतिः -तिः -ति, स्थलेशयः.

AMPHITHEATRE, *s.* अर्द्धचन्द्राकारो रङ्गः, अर्द्धमण्डलाकारो रङ्गः, रङ्गभूमिः *f.*, रङ्गाङ्गणं.

AMPLE, *a.* विशालः -ला -लं, विपुलः -ला -लं, विस्तृतः -ता -तं, बृहन् -हती -हत् (त्), प्रचुरः -रा -रं, बहुलः -ला -लं, यथेष्टः -ष्टा -ष्टं.

AMPLENESS, *s.* विशालता, विपुलता, विस्तीर्णता, बृहत्त्वं, प्राचुर्य्यं.

AMPLIFICATION, *s.* विस्तारत्वं, विस्तरः, वृद्धिः *f.*, वर्द्धनं.—(In rhetoric) अत्युक्तिः *f.*

To AMPLIFY, AMPLIFICATE, *v. a.* वृध् in caus. (वर्धयति -यितुं), संवृध्; विस्तृ (c. 5. -स्तृणोति, c. 9. -स्तृणाति -स्तरितुं, -स्तरीतुं, caus. -स्तारयति), आप्यै in caus. (-प्याययति -यितुं), समाप्यै; तन् (c. 8. तनोति तनितुं).

AMPLITUDE, *s.* (Extent) विस्तीर्णता, विस्तारः, विपुलता.—(Greatness) बृहत्त्वं, महत्त्वं, महिमा *m.* (न्).—(Capacity) आधारशक्तिः, सामर्थ्यं.—(Abundance) प्रचुरत्वं, सम्पूर्णत्वं, बहुत्वं.

AMPLY, *adv.* विस्तरेण, विस्तरशस् *ind.*, विपुलं, यथेष्टं.

To AMPUTATE, *v. a.* अङ्गं छिद् (c. 7. छिनत्ति छेत्तुं), लू (c. 9. लुनाति -नीते लवितुं), निकृत् (c. 6. -कृन्तति -कर्त्तितुं), अङ्गच्छेदनं कृ.

AMPUTATED, *p. p.* छिन्नः -न्ना -न्नं, लूनः -ना -नं, कृत्तः -त्ता -त्तं.

AMPUTATION, *s.* छेदः, अङ्गच्छेदनं, कर्त्तनं, अङ्गकर्त्तनं.

AMULET, *s.* कवचः, रक्षा, रोगनिवारणार्थं किञ्चिद् द्रव्यं or औषधं.

To AMUSE, *v. a.* नन्द् in caus. (नन्दयति -यितुं), अभिनन्द्, प्रतिनन्द्; रम् in caus. (रमयति -यितुं), विनुद् in caus. (नोदयति -यितुं).—(To amuse one's self) विलस् (c. 1. -लसति -लसितुं).

AMUSED, *p. p.* विनोदितः -ता -तं, अभिनन्दितः -ता -तं.

AMUSEMENT, *s.* विनोदः, परीहासः, क्रीडा, केलिः *f.*, खेला, विलासः, आह्लादः, नर्म्म *n.* (न्), कौतुकं, कुतूहलं.

AMUSER, *s.* विनोदयिता *m.* (तृ), नन्दकः.

AN. *See* A.

ANABAPTISM, *s.* पुनर्जलसंस्कारः, पुनर्मज्जनं.

ANABAPTIST, *s.* पुनर्जलसंस्कारमतावलम्बी, पुनर्जलसंस्कारमतं धारयन्.

ANACHRONISM, *s.* कालगणनाभ्रमः.

ANAGRAM, नामाक्षरपरिवर्त्तनात् सार्थवाक्यरचनं यथा देवराजः ईश्वेद जारः.

ANALOGICAL or ANALOGOUS, सम्बन्धी -न्धिनी -न्धि (न्), सम्बन्धकः -का -कं, सदृशः -शी -शं, उपमः -मा -मं, अनुरूपः -पा -पं, समानः -ना -नं,

अनुगुणः -णा -णं, तुल्यः -ल्या -ल्यं, सम्पर्की -र्किणी -र्कि (न्), आनुषङ्गिकः -की -कं, तुल्यरूपः -पा -पी -पं.

ANALOGICALLY, *adv.* सादृश्येन, औपम्येन, सामान्यतस् *ind.*, सादृश्यतस् *ind.*

ANALOGY, *s.* सम्बन्धः, सादृश्यं, औपम्यं, सम्पर्कः, सामान्यं, समानभावः, उपमितिः.

ANALYSIS, *s.* उपोद्घातः, पृथक्करणं, विच्छेदः, व्यवच्छेदः, परिच्छेदः, विभेदः, विभागः, विवेचनं, विवेकः, द्रावणं, व्याकारः.—(The essence of any thing) सारः, वस्तु *n.*

To ANALYZE, *v. a.* उपोद्घातं कृ, किञ्चित् समस्तद्रव्यं पृथक्कृ, or खण्डशस् कृ, or भागशस् कृ, विविक्तं -क्तां -क्तं or विभिन्नं -न्नां -न्नं कृ, व्याकृ, विभज् (c. 1. -भजति -ते -भक्तुं), विच्छिद् (c. 7. -छिनत्ति -छेत्तुं), द्रु in caus. (द्रावयति -यितुं), द्रवीकृ.

ANARCHICAL, *a.* अराजकः -का -कं, अनीश्वरः -रा -रं, अशिष्टः -ष्टा -ष्टं, राजनीतिरहितः -ता -तं, अशासितः -ता -तं, अस्थिरः -रा -रं, अव्यवस्थितः -ता -तं.

ANARCHY, *s.* अराज्यं, अशासनं, प्रभुत्वराहित्यं, शासनहीनत्वं, अनधीनता, अनीश्वरता.

ANATHEMA, *s.* शापः, अभिशापः, परिशापः, आक्रोशनं, अवक्रोशः.

To ANATHEMATIZE, *v. a.* शप् (c. 1. शपति, c. 4. शप्यति, शप्तुं), अभिशप्; आक्रुश् (c. 1. -क्रोशति -क्रोष्टुं).

ANATOMICAL, *a.* व्यवच्छेदविद्यासम्बन्धकः -का -कं, व्यवच्छेदविद्यानुरूपः -पा -पं.

ANATOMICALLY, *adv.* व्यवच्छेदविद्यानुरूपं, विशसनविद्याक्रमेण, व्यवच्छेदविद्यावत्.

To ANATOMISE, *v. a.* शरीरं व्यवच्छिद् (c. 7. -छिनत्ति -छेत्तुं), विच्छिद्, सञ्छिद्; विशस् (c. 1. -शसति -शसितुं), खण्डशस् कृ, पृथक्कृ.—(To lay open distinctly) विवृ (c. 5. -वृणोति, -वरितुं or -वरीतुं), अपवृ; प्रकटीकृ, व्याख्या (c. 2. -ख्याति -ख्यातुं).

ANATOMISED, *p. p.* व्यवच्छिन्नः -न्ना -न्नं, विशसितः -ता -तं, पृथक्कृतः -ता -तं.

ANATOMIST, *s.* व्यवच्छेदविद्याज्ञः, व्यवच्छेदकः, विशसिता *m.* (तृ).

ANATOMY, *s.* शरीरव्यवच्छेदविद्या, विशसनविद्या, विशसनं.—(Division of any thing) विच्छेदः, विभेदः, पृथक्करणं.

ANCESTOR, *s.* पूर्व्वपुरुषः.—(Ancestors) पूर्व्वजाः *m. pl.*, पितरः *m. pl.*, पितृलोकः.

ANCESTRAL, *a.* पित्र्यः -त्र्या -त्र्यं, पितृकः -का -कं, कौलिकः -की -कं, पैत्रः -त्री -त्रं, पैत्रिकः -की -कं.

ANCESTRY, *s.* पितरः *m. pl.*, पूर्व्वजाः *m. pl.*, पितृसामान्यं, पितृश्रेणी *f.*, पितृपितामहादि *n.*—(Birth, the honour of descent) वंशः, अन्वयः, कुलमर्य्यादा.

ANCHOR, *s.* नौबन्धनकीलः, लोहमययन्त्रं येन नौका बध्यते or स्थिरीक्रियते.—(A post for mooring vessels) कूपकः.

To ANCHOR, *v. a.* लौहयन्त्रेण नावं बन्ध् (c. 9. बध्नाति बन्द्धुं) or स्थिरीकृ.

ANCHORAGE, *s.* स्थानं नौबन्धनयोग्यं.—(The duty paid for anchoring) नौकाबन्धनानन्तरं यत् शुल्कं नौकारूढैर् दीयते.

ANCHORITE, *s.* वनवासी *m.* (न्), यती *m.* (न्), यतिः *m.*, तपस्वी *m.* (न्), सन्न्यासी *m.* (न्), वनी *m.* (न्).—(Brahman of the 3d order) वानप्रस्थः, गृहस्थाश्रमत्यागी *m.* (न्).

ANCHOVY, *s.* क्षुद्रमत्स्यविशेषः.

ANCIENT, *a.* पुराणः -णा or -णी -णं, पुरातनः -नी -नं, प्राक्कालीनः -ना -नं, पौराणः -णी -णं, प्राक्तनः -नी -नं, वृद्धः -द्धा -द्धं, प्राचीनः -ना -नं, पूर्व्वकालीनः -ना -नं, चिरन्तनः -नी -नं.

ANCIENT, *s.* वृद्धः, प्राचीनपुरुषः, पूर्व्वकालीनलोकः.—(The flag of a ship) नावो ध्वजः or पताका.—(Flag-bearer) पताकी *m.* (न्).

ANCIENTLY, *adv.* पूर्व्वकाले, गतकाले, पुरा, पूर्व्वं.

ANCIENTNESS, *s.* प्राचीनता, पुरातनत्वं, प्राक्कालीनता, वृद्धत्वं.

ANCIENTS, *s.* पूर्व्वजाः *m. pl.*, प्राचीनपुरुषाः *m. pl.*, पूर्व्वकालीनमनुष्याः *m. pl.*

AND, *conj.* च placed after the word which it connects with another. In many cases 'and' may be omitted in Sanskrit, and the connection expressed by the use of the indeclinable participle; as, 'the beasts assembled *and* informed the lion,' पशुभिर्मिलित्वा सिंहो विज्ञप्तः.—(Moreover) अपिच, किञ्च, अपरं, अन्यच्च.—(And then) अथ.

ANDANTE, *s.* घनं, तत्त्वं, विलम्बितं, स्पष्टं.

ANDIRON, *s.* लोहनिर्म्मितः शूलाधारः.

ANDROGYNAL or ANDROGYNOUS, *a.* द्विलिङ्गविशिष्टः -ष्टा -ष्टं.

ANECDOTE, *s.* उपकथा, उपाख्यानं.

ANENT, *prep.* (Concerning) प्रति, उद्दिश्य *ind.*, प्रतीक्ष्य *ind.*, विषयकः -का -कं.

ANEURISM, *s.* नाडिस्फातिः *f.*, नाडीनां रक्तप्रवाहकाणाम् अतिशयस्फातिः.

ANEW, *adv.* (Over again) पुनर्, पुनःपुनर्, पुनरपि.—(Newly) नूतनं, प्रतिनवं.

ANGEL, *s.* ईश्वरदूतः, देवदूतः, ईश्वरप्रेष्यः, स्वर्गी *m.* (न्), परमेश्वरप्रेरितः, स्वर्गीयदूतः, स्वर्गदूतः, दिव्यदूतः.

ANGELICAL, ANGELIC, *a.* ईश्वरदूतोपमः -मा -मं, दिव्यः -व्या -व्यं, देवरूपी -पिणी -पि (न्), स्वर्गीयः -या -यं.

ANGELICALLY, *adv.* ईश्वरदूतवत्, स्वर्गीयजनवत्, दिव्यप्रकारेण.

ANGER, *s.* क्रोधः, कोपः, अमर्षः, रोषः, चेतोविकारः; 'my anger is appeased,' मम क्रोधः शाम्यति; 'through anger,' कोपात्.—(Smart of a sore) व्रणवेदना.

To ANGER, *v. a.* कुप् in caus. (कोपयति -यितुं), प्रकुप्, सङ्कुप्; क्रुध् in caus. (क्रोधयति -यितुं).

ANGLE, *s.* अस्रः, कोणः, द्विभुजः.—(Apparatus to take fish) मत्स्यवेधनोपकरणं.

To ANGLE, *v. a.* वडिशेन मत्स्यान् जलाद् उद्धृ (c. 1. -हरति -ते -हर्त्तुं), वडिश् (nom. वडिशयति), मत्स्यवेधनेन मीनान् व्यध् (c. 4. विध्यति व्यद्धुं) or ग्रह् (c. 9. गृह्णाति ग्रहीतुं).

ANGLE-ROD or ANGLING-ROD, *s.* मत्स्यग्रहणार्थं दण्डं.

ANGLER, *s.* मत्स्यवेधकः, मत्स्यबन्धी *m.* (न्), यो वडिशेन मत्स्यान् गृह्णाति.

ANGLING, *s.* वडिशेन मत्स्यवेधनं, मत्स्यबन्धनं.

ANGLING-LINE, *s.* मत्स्यग्रहणार्थं सूत्रं or रज्जुः *m.*

ANGRILY, *adv.* सकोपं, सरोषं, सामर्षं, कोपेण, क्रोधात्.

ANGRY, *a.* क्रुद्धः -द्धा -द्धं, क्रोधी -धिनी -धि (न्), कोपी -पिनी -पि (न्), जातामर्षः -र्षा -र्षं, रुष्टः -ष्टा -ष्टं, क्रोधाक्रान्तः -न्ता -न्तं, सामर्षः -र्षा -र्षं, कृतकोपः -पा -पं, कृतक्रुधः -धा -धं, आगतमन्युः -न्युः -न्यु, सरोषः -षा -षं, रोषणः -णा -णं, सकोपः -पा -पं, समन्युः -न्युः -न्यु.—(To be angry) क्रुध् (c. 4. क्रुध्यति क्रोद्धुं), अनुक्रुध्, समभिक्रुध्, संक्रुध्, अभिसंक्रुध्; रुष् (c. 4. रुष्यति रोषितुं), कुप् (c. 4. कुप्यति कोपितुं), प्रकुप्, सङ्कुप् with dative; असूय् (असूयति -ते, असूयितुं) with acc.

ANGUISH, *s.* परितापः, वेदना, तीव्रवेदना, क्लेशः, पीडा, दुःखं, आधिः *m.*, मनस्तापः, परिवेदनं, विबाधा, कृच्छ्रं, कष्टं, तोदः.

ANGULAR or ANGULOUS, *a.* अस्रः -स्रा -स्रं, कोणविशिष्टः -ष्टा -ष्टं, अस्रवान् -वती -वत् (त्), असंपेतः -ता -तं.

ANHELATION, *s.* उच्छ्वसनं, निःश्वसनं.—(Palpitation) हृदयकम्पनं.

ANIMADVERSION, *s.* (Reproof) अनुयोगः, निन्दा, उपालम्भः, घृणा.

(Infliction of punishment) दण्डयोगः.—(Observation) चर्चा, निरीक्षणं, अन्वेषणं.

To ANIMADVERT, *v. n.* (To pass censure on) प्रतिनिन्द् (c. 1. -निन्दति -निन्दितुं), उपालभ् (c. 1. -लभते -लब्धुं).—(To punish) दण्डं प्रणी (c. 1. -नयति -नेतुं), दण्ड् (c. 10. दण्डयति -यितुं).—(To make observation) निरीक्ष् (c. 1. -ईक्षते -ईक्षितुं), चर्चां कृ.

ANIMADVERTED, *p.p.* प्रतिनिन्दितः -ता -तं.—(Punished) दण्डितः -ता -तं.

ANIMADVERTER, *s.* प्रतिनिन्दकः, दण्डप्रणेता *m.* (तृ), अनुयोगी *m.* (न्).

ANIMAL, *s.* जन्तुः *m.*, प्राणी *m.* (न्), चेतनः, जीवी *m.* (न्), जन्तुः *m.*, जन्मी *m.* (न्), शरीरी *m.* (न्).—(Beast) पशुः *m.*, तिर्य्यक् *m.* (-च्).

ANIMAL, *a.* जीवी -विनी -वि (न्), प्राणी -णिनी -णि (न्), चेतनः -ना -नं, चेतनावान् -वती -वत (त्).—(Animal food) मांसाहारः.

ANIMALCULE, *s* क्षुद्रजीवी *m.* (न्), क्षुद्रजन्तुः *m.*

To ANIMATE, *v. a.* जीव् in caus. (जीवयति -यितुं), प्राण् in caus. (-प्राणयति -यितुं), आश्वस् in caus. (-श्वासयति -यितुं), समाश्वस्, विश्वस्, परिविश्वस् in caus.; उत्था in caus. (उत्थापयति -यितुं), उद्युज् in caus. (-योजयति -यितुं), प्रोत्सह् in caus. (-साहयति -यितुं), उत्तिज् (c. 10. -तेजयति -यितुं).

ANIMATE, ANIMATED, *part. a.* (Inspirited) आश्वासितः -ता -तं, उद्युक्तः -क्ता -क्तं, उत्तेजितः -ता -तं.—(Living) चेतनः -ना -नं, प्राणी -णिनी -णि (न्).—(Vivacious) प्रफुल्लवदनः -ना -नं, हृष्टहृदयः -या -यं, रसिकः -का -कं, सारवान् -वती -वत् (त्).

ANIMATION, *s.* (The act of enlivening) आश्वासनं, उत्तेजनं.—(The state of being enlivened, vivacity) प्रफुल्लता, हृष्टता.

ANIMATOR, *s.* आश्वासकः, जीवदः, प्राणदः, प्रोत्साहकः.

ANIMOSITY, *s.* वैरं, द्वेषः, विरोधः, मात्सर्य्यं.

ANISE, *s.* छत्रा, सालेयः, शीतशिवः, मधुरिका, मिशी, मिश्रेया.

ANKER, *s.* रसानां परिमाणविशेषः.

ANKLE, *s.* गुल्फः -ल्फं, घुटिका or घटिका, घुटिः *f.*, चरणग्रन्थिः *f.*

ANKLED, *a.* गुल्फयुक्तः -क्ता -क्तं, गुल्फसम्बन्धी -न्धिनी -न्धि (न्).

ANKLET, *s.* नूपुरः, पादाङ्गदं, मञ्जीरं, पादकटकः.

ANNALIST, *s.* क्रमानुसारेण चरित्ररचकः, चरित्रलेखकः, पुरावृत्तरचकः, आख्यानरचकः, वृत्तान्तलेखकः, आख्यानसङ्ग्राहकः.

To ANNALIZE, *v. a.* चरित्राणि or पुरावृत्तकथा रच् (c. 10. रचयति -यितुं).

ANNALS, *s.* क्रमानुसारेण सङ्गृहीत इतिहासः, पुरावृत्तं, पुरावृत्तकथा, चरित्राख्यानं, वृत्तान्तविवरणं.

ANNATES, *s.* प्रथमफलं, नवशस्यं.—(Sacrifice of first-fruits) आग्रायणं.

To ANNEAL, *v. n.* दृढस्थिरीकरणनिमित्तं काचं तप् (c. 1. तपति तप्तुं or caus. तापयति -यितुं).

ANNEALING, *s.* यत् काचस्य तपनं दृढस्थिरीकरणाय क्रियते.

To ANNEX, *v. a.* अनुबन्ध् (c. 9. -बध्नाति -बन्धुं), आबन्ध्; संयुज् in caus. (-योजयति -यितुं), उपाधा (c. 3. -दधाति -धत्ते -धातुं), आधा; उपस्था in caus. (-स्थापयति -यितुं).

ANNEXED, *p. p.* संयोजितः -ता -तं, उपाहितः -ता -तं, अनुबद्धः -द्धा -द्धं.

ANNEXATION, *s.* अनुबन्धनं, उपस्थापनं, संयोगः, संयोजनं, उपधानं.

ANNEXMENT, *s.* (The act of annexing). *See the last.*—(The thing annexed) अनुबन्धः, उपाहितं, संयुक्तभागः.

To ANNIHILATE, *v. a.* नश् in caus. (नाशयति -यितुं), विनश्; प्रली in caus. (-लापयति or -लाययति -यितुं), उद्धृ (c. 1. -हरति -ते -हर्त्तुं), उच्छिद् (c. 7. -छिनत्ति -छेत्तुं), लोपं कृ.

ANNIHILATED, *p. p.* उच्छिन्नः -न्ना -न्नं, विनाशितः -ता -तं.

ANNIHILATION, *s.* नाशः, क्षयः, प्रलयः, विनाशः, अभावः, समुच्छेदः, लोपः, निर्भावः, प्रलीनता.

ANNIVERSARY, *s.* दिवसः केनापि सविशेषेण कारणेन वत्सरे वत्सरे प्रसिद्धः, प्रतिवार्षिक उत्सवः, वत्सरे वत्सरे सेवितो महोत्सवः.

ANNIVERSARY, *a.* सांवत्सरिकः -की -कं, सांवत्सरः -री -रं, प्रतिवार्षिकः -का -कं.

To ANNOTATE, *v. n.* टीकां or भाष्यं लिख् (c. 6. लिखति लेखितुं) or रच् (c. 10. रचयति -यितुं).

ANNOTATION, *s.* टीका, भाष्यं, टिप्पनी *f.*

ANNOTATOR, *s.* टीकालेखकः, भाष्यकारः, भाष्यकृत्.

To ANNOUNCE, *v. a.* आख्या (c. 2. -ख्याति -ते -ख्यातुं), समाख्या; ख्या in caus. (ख्यापयति -यितुं), आख्या in caus.; विघुष् (c. 1. -घोषति -घोषितुं or c. 10. घोषयति), विद् in caus. (वेदयति -यितुं), निविद्, आविद्, समाविद्, विनिविद्, सन्निविद्; विज्ञा in caus. (-ज्ञापयति -यितुं).

ANNOUNCED, *p. p.* प्रकाशितः -ता -तं, निवेदितः -ता -तं, आवेदितः -ता -तं, अवघुष्टः -ष्टा -ष्टं, आख्यातः -ता -तं, परिकीर्त्तितः -ता -तं.

ANNOUNCEMENT, *s.* ख्यापनं, विज्ञापनं, विज्ञप्तिः *f.*, निवेदनं, विघोषणं.—(News) सन्देशः, समाचारः, संवादः.

ANNOUNCER, *s.* आख्यायकः, विज्ञापकः, विघोषकः, सन्देशहरः.

To ANNOY, *v. a.* पीड् (c. 10. पीडयति -यितुं), अभिपीड्, उपपीड्, प्रपीड्, प्रतिपीड्, सम्पीड्; तप् in caus. (तापयति -यितुं), सन्तप्, परितप्; क्लिश् (c. 9. क्लिश्नाति क्लेशुं), अर्द् in caus. (अर्दयति -यितुं), समर्द्, बाध् (c. 1. बाधते, बाधितुं).

ANNOYANCE, *s.* व्यथा, क्लेशः, विडम्बना, दुःखं, पीडा, बाधा.—(The act of annoying) पीडनं.—(A source of annoyance) कण्टकः, -कं.

ANNOYED, *p.p.* क्लिष्टः -ष्टा -ष्टं, परिक्लिष्टः -ष्टा -ष्टं, सव्यथः -था -थं, व्यथितः -ता -तं.

ANNOYER, *s.* क्लेशकः, दुःखकरः, व्यथाकरः.

ANNOYING, *a.* क्लेशी -शिनी -शि (न्), क्लेशकः -का -कं, दुःखकरः -री -रं.

ANNUAL, *a.* वार्षिकः -की -कं, आब्दिकः -की -कं, सांवत्सरः -री -रं, वर्षीकः -का -कं, समीनः -ना -नं.—(Lasting only for a year) एकवर्षजीवी -विनी -वि (न्); 'an annual plant,' ओषधिः *f.*

ANNUALLY, *adv.* प्रतिवर्षं, प्रतिवत्सरं, वत्सरे वत्सरे, वत्सरक्रमेण.

ANNUITY, *s.* वार्षिकं or सांवत्सरिकं वेतनं or वर्त्तनं, यत् निरूपितमूल्यं वत्सरे वत्सरे कस्मैचित् दीयते.

To ANNUL, *v. a.* लोपं कृ, निरर्थकं -कां -कं कृ, विनश् in caus. (-नाशयति -यितुं).

ANNULAR, *a.* मण्डलाकारः -रा -रं, वलयाकारः -रा -रं, वलयाकृतिः -तिः -ति, अङ्गुरीयाकारः -रा -रं.

ANNULET, *s.* क्षुद्रवलयः, क्षुद्राङ्गुरीयः, -यं.

ANNULMENT, *s,* लोपः, नाशः, विनाशः.

To ANNUMERATE, *v. a.* संख्यां संख्यया संयुज् (c. 7. -युनक्ति -युङ्क्ते -योक्तुं).

ANNUMERATION, *s.* संख्या संख्यया संयोजनं.

ANNUNCIATION, प्रत्यादेशः, घोषणं, -णा, ख्यापनं, विज्ञापनं.

ANODYNE, *a.* शूलघ्नः -घ्नी -घ्नं, वेदनाशान्तिकः -की -कं, पीडाशमकः -का -कं.

ANODYNE, *s.* शूलघ्नं, वेदनाशान्तिकं.

To ANOINT, *v. a.* लिप् (c. 6. लिम्पति -ते लेप्तुं), अनुलिप्, आलिप्, समालिप्, उपलिप्, विलिप्; अञ्ज् (c. 7. अनक्ति अंक्तुं) or caus. (अञ्जयति -यितुं), समालभ् (c. 1. -लभते -लब्धुं).—(To consecrate by unction) अभिषिच् (c. 6. -सिञ्चति -सेक्तुं).

ANOINTED, *p. p.* लिप्तः -प्ता -प्तं, अभिषिक्तः -क्ता -क्तं, दिग्धः -ग्धा -ग्धं, अनुलिप्तः -प्ता -प्तं, अभ्यक्तः -क्ता -क्तं, कृताभिषेकः -का -कं.

ANOINTER, *s.* अभिषेचकः, लेपकः, अञ्जनकर्त्ता *m.* (र्त्तृ).

ANOINTING, *s.* अभिषेकः, -चनं, विलेपनं, समालम्भः, अभ्यञ्जनं, अञ्जनं.

ANOMALOUS, *a.* विधिविरुद्धः -द्धा -द्धं, विधिहीनः -ना -नं, विधिघ्नः -घ्नी -घ्नं, नियमविरुद्धः -द्धा -द्धं, अविधिः -धिः -धि.

ANOMALOUSLY, *adv.* अविधानतस् *ind.*, अविधिवत् *ind.*, अनियमतस् *ind.*

ANOMALY, *s.* अविधिः *m.*, अविधानं, विधिविरुद्धता, अनियमः.

ANON, *adv.* (Quickly, soon) शीघ्रं, सपदि, झटिति.—(Now and then) कदापि, कदाचित्.

ANONYMOUS, *a.* अनामकः -का -कं, नामहीनः -ना -नं, सञ्ज्ञारहितः -ता -तं.

ANONYMOUSLY, *adv.* नामव्यतिरेकेण, संज्ञाव्यतिरेकेण, संज्ञां विना.

ANOTHER, *a.* अन्यः -न्या -न्यत्, इतरः -रा -रं, परः -रा -रं, अपरः -रा -रं, परकीयः -या -यं, अन्यदीयः -या -यं. Another is often expressed by अन्तर in composition; as, 'another place,' स्थानान्तरं; 'along with another king,' राजान्तरेण सह. 'In another place,' अन्यत्र; 'in another manner,' अन्यथा; 'at another time,' अन्यदा; 'one after another,' अनुपूर्व्वशस् *ind.*, प्रत्येकं एकैकशस्; 'a defect in another,' परच्छिद्रं; 'another's wife,' परदारः; 'another man's goods,' परद्रव्यं, परस्वं; 'another's right,' परस्वत्वं; 'another day,' अन्यस्मिन् दिवसे, अन्येद्युः (स्).

To ANSWER, *v. n.* (To speak in reply) प्रतिवच् (c. 2. -वक्ति -वक्तुं), प्रतिभाष् (c. 1. -भाषते -भाषितुं), प्रतिवद् (c. 1. -वदति -ते -वदितुं), प्रतिब्रू (c. 2. -ब्रवीति -वक्तुं), व्याहृ (c. 1. -हरति -ते -हर्त्तुं), प्रतिभण् (c. 1. -भणति -भणितुं), प्रतिजल्प् (c. 1. -जल्पति -जल्पितुं).—(To correspond, to suit) युज् in pass. (युज्यते), अनुरूपः -पा -पं or तुल्यरूपः -पा -पं or सदृशः -शी -शं अस्.—(To succeed) सम्पद् (c. 4. -पद्यते -पत्तुं), संसिध् (c. 4. -सिध्यति -सेद्धुं).—(To be accountable for) प्रतिभूः or प्रतिनिधिः अस्, लग्नकं दा (c. 3. ददाति दातुं).

ANSWER, *s.* प्रतिवचनं, प्रतिवाक्यं, प्रतिवाच् *f.* (च्), उत्तरं, प्रत्युत्तरं, प्रत्युक्तिः *f.*, प्रतिवाणिः *f.*—(Refutation of a charge) वाक्यखण्डनं,

ANSWERABLE, *a.* प्रतिवाक्यः -क्या -क्यं.—(Responsible) परानुयोगाधीनः -ना -नं, पराह्वानाधीनः -ना -नं, अभियोक्तव्यः -व्या -व्यं, येन प्रत्युत्तरं दातव्यं सः, यो लग्नकं दातुम् अर्हति.—(Corresponding to) योग्यः -ग्या -ग्यं, अनुरूपः -पा -पं, अनुसारी -रिणी -रि (न्).

ANSWERED, *p. p.* प्रत्युक्तः -क्ता -क्तं, प्रतिभाषितः -ता -तं, प्रतिभणितः -ता -तं.

ANT, *s.* पिपीलिका, पुत्तिका.

ANT-BEAR, *s.* पिपीलिकाखादको जन्तुविशेषः.

ANT-HILL, *s.* वल्मीकः, -कं, कृमिशैलः, कूलकः, भूस्रवाः *m.* (स्), वम्रीकूटं, वामलूरः, स्यमीकः, मृत्तिकाकूटं.

ANTAGONIST, *s.* विरोधी *m.* (न्), विपक्षः. वैरी *m.* (न्), शत्रुः *m.*, अभियोक्ता *m.* (क्तृ), पर्य्यवस्थाता *m.* (तृ), प्रतिबन्धकः.

ANTAGONISTIC, *a.* विरोधी -धिनी -धि (न्), विपक्षः -क्षा -क्षं, विपरीतः -ता -तं.

ANTALGIC, *a.* वेदनाशमकः -का -कं, शूलघ्नः -घ्नी -घ्नं, शोकापनुदः -दा -दं.

ANTARCTIC, *adj.* दक्षिणकेन्द्रीयः -या -यं.—(The south pole) दक्षिणकेन्द्रं, कुमेरुः *m.*

ANTECEDENT, *a.* पूर्व्वगतः -ता -तं, अग्रगतः -ता -तं, अग्रगामी -मिनी -मि (न्).

ANTECEDENTLY, *adv.* पूर्व्वं, अग्रे, पूर्व्वतस्, अग्रतस्.

ANTEDILUVIAN, *a.* प्राग् भूतसम्प्लवाद् विद्यमानः -ना -नं, प्राग् जलाप्लावनाद् वर्त्तमानः -ना -नं.

ANTELOPE, *s.* मृगः, हरिणः, ऐणेयः, कुरङ्गः. -ङ्गकः, -ङ्गमः.

ANTEMERIDIAN, *a.* पूर्व्वाह्णेतनः -नी -नं.

ANTEMUNDANE, *a.* प्राग् जगत्सृष्टेर् वर्त्तमानः -ना -नं.

ANTEPAST, *s.* पूर्व्वभुक्तिः *f.*, पूर्व्वभोजनं, पूर्व्वज्ञानं, अग्रग्रहणं.

ANTEPENULTIMATE, *s.* उपधायाः पूर्व्वं विद्यते यद् अक्षरं, पूर्व्वोपान्तः.

ANTERIOR, *a.* प्राक्तनः -नी -नं, पूर्व्वः -र्व्वा -र्व्वं, अग्र्यः -ग्र्या -ग्र्यं.

ANTHEM, *s.* ईश्वरस्तवात्मकं गीतं, ईश्वरस्तुतिरूपकं गानं.

ANTHONY'S FIRE, *s.* उदर्दः, रोगविशेषः.

ANTHROPOPHAGI, *s.* नृजग्धाः *m. pl.*, आममांसाशिनः *m. pl.*, क्रव्याशिनः *m. pl.*, असृपाः *m. pl.*, राक्षसाः *m. pl.*

ANTIBILIOUS, *a.* पित्तघ्नः -घ्नी -घ्नं.

ANTIC, *a.* (Buffoon-like) भण्डोपमः -मा -मं.—(Odd, unnatural) अपरूपः -पा -पं, विरूपः -पा -पं, असङ्गतः -ता -तं, अयोग्यः -ग्या -ग्यं.

ANTIC, *s.* (A buffoon) भण्डः, भाण्डकरः.—(An odd gesture) असङ्गतप्रकारेण हस्तादिविक्षेपः, विरूपो भ्रूविक्षेपः.

ANTI-CHAMBER, *s.* उपशाला.

To ANTICIPATE, *v. a.* (Before the time) पूर्व्वतस् ग्रह् (c. 9. गृह्णाति ग्रहीतुं), प्रवेक्ष् (c. 1. -ईक्षते -ईक्षितुं).—(To foretaste) पूर्व्वस्वादनं कृ, अग्रतस् अनुभू (c. 1. -भवति -भवितुं), पूर्व्वं ज्ञा (c. 9. जानाति ज्ञातुं) or भुज् (c. 7. भुनक्ति, भुंक्ते, भोक्तुं), उद्दृश् (c. 1. उत्पश्यति उद्द्रष्टुं), प्रदृश्.

ANTICIPATED, *p. p.* पूर्व्वभुक्तः -क्ता -क्तं, पूर्व्वतस् अनुभूतः -ता -तं, प्रदृष्टः -ष्टा -ष्टं, प्रवेक्षितः -ता -तं, सन्दृष्टः -ष्टा -ष्टं, चित्तकलितः -ता -तं, पुरस्कृतः -ता -तं.

ANTICIPATION, *s.* पूर्व्वभुक्तिः *f.*, पूर्व्वभोजनं, पूर्व्वज्ञानं, प्रवेक्षणं.

ANTIDOTAL, *a.* विषनाशी -शिनी -शि (न्), विषघाती -तिनी -ति (न्), विषघ्नः -घ्नी -घ्नं, गरघ्नः -घ्नी -घ्नं.

ANTIDOTE, *s.* विषनाशनं, प्रतिविषं.—(Dealer in) विषवैद्यः, जाङ्गुलिकः.

ANTIFEBRILE, *a.* ज्वरघ्नः -घ्नी -घ्नं, ज्वरनाशकः -का -कं, ज्वरान्तकः -का -कं.

ANTIMONY, *s.* स्रोतोञ्जनं, सौवीरं, कापोताञ्जनं, यामुनं.—(Made of antimony) स्रोतोञ्जनमयः -यी -यं.

ANTIPATHY, *s.* सहजो विरोधः, द्वन्द्वभावः, विरक्तिः *f.*, वैरिता, शत्रुता, विमतिः *f.*, अनिच्छा.

ANTIPHLEGMATIC, *a.* कफनाशनः -नी -नं, कफघ्नः -घ्नी -घ्नं, श्लेष्मघ्नः -घ्नी -घ्नं.

ANTIPHONY, *s.* प्रतिगानं, परस्परगीतिः *f.*, प्रतिध्वनिः *f.*

ANTIPODES, *s.* भूमण्डलस्य विपरीतभागे वर्त्तिनः; अन्यतरस्मिन् भूगोलभागे वर्त्तिनः परस्परम् अभिमुखपादतला जनाः.

ANTIQUARIAN, *a.* प्राक्कालीनः -ना -नं, पूर्व्वकालीनः -ना -नं, प्राक्तनः -नी -नं.

ANTIQUARY, ANTIQUARIAN, *s.* प्राक्कालीनविषयेषु पण्डितः, पुरातनद्रव्यानुसन्धायी *m.* (न्).

ANTIQUE, *a.* (Ancient) पुराणः -णा or -णी -णं, पुरातनः -नी -नं, प्राक्तनः -नी -नं, पूर्व्वकालीनः -ना -नं, चिरन्तनः -नी -नं.—(Old-fashioned) अप्रचलः -ला -लं, अपरूपः -पा -पं.

ANTIQUE, *s.* प्राचीनद्रव्यं, प्राक्कालीनविषयः.

ANTIQUITY, *s.* (Old-times) प्राक्कालं, पूर्व्वकालं, गतकालं.—(The ancients) प्राचीनपुरुषाः *m. pl.*—(Ancientness) पुरातनत्वं, प्राचीनत्वं.

ANTISEPTIC, *a.* पूतिघ्नः -घ्नी -घ्नं, पूतिनिवारकः -का -कं, पूतिनाशकः -का -कं.

ANTISTES, *s.* प्रधानपुरोहितः, धर्म्माध्यक्षः.

ANTITHESIS, *s.* अर्थान्तरन्यासः, अर्थवैपरीत्यं, विकल्पः, प्रतिपक्षता, विरोधः.

ANTITYPE, *s.* प्रतिमूर्त्त्या प्रदर्शिता मूर्त्तिः *f.*, मूलमूर्त्तिः *f.*, वस्तु *n.*, आदर्शः.

ANTLER, *s.* मृगशृङ्गं, मृगशृङ्गशाखा, मृगविषाणं.

ANTLERED, *a.* शृङ्गी -ङ्गिणी -ङ्गि (न्), विषाणी -णिनी -णि (न्).

ANUS, गुदं, पायुः *m.*, मैत्रः, अपानं.

ANVIL, *s.* सूर्मी *f.*, शूर्म्मिः *m.*, स्थूणा, लोहप्रतिमा.

ANXIETY, *s.* चिन्ता, चित्तोद्वेगः, औत्सुक्यं, मनोदुःखं, मनस्तापः, चित्तवेदना, आधिः *m.*, व्यग्रता, उद्वेगः -जनं, उत्तापः, चिन्ताभारः, मानसी व्यथा.

Anxious, *a.* (Solicitous) उद्विग्नः -ग्ना -ग्नं, उद्विग्नमनाः -नाः -नः (स्), चिन्तापरः -रा -रं, व्यग्रः -ग्रा -ग्रं, उन्मनः -ना -नं, उत्सुकः -का -कं, विधुरः -रा -रं, समन्युः -न्युः -न्यु.—(Eagerly endeavouring) सयत्नः -त्ना -त्नं.—(Desirous of) ईप्सुः -प्सुः -प्सु, इच्छुः -च्छुः -च्छु; 'anxious to see,' दर्शनेप्सुः; 'anxious to do,' कर्त्तुकामः -मा -मं.—(To be anxious) उत्सुकाय् (nom. उत्सुकायते).

Anxiously, *adv.* औत्सुक्येन, उद्वेगेन, मनोदुःखेन, चिन्तया, सोद्वेगं, सयत्नं.

Any, *a.* कश्चित् *m.* काचित् *f.* किञ्चित् *n.*, को ऽपि *m.* कापि *f.* किमपि *n.*, कश्चन *m.* काचन *f.* किञ्चन *n.*; 'any thing,' किञ्चित्, किमपि; 'any where,' क्वचित्, क्वापि, कुत्रचित्, कुत्रापि; 'any longer,' पुनर्; 'any how,' कथञ्चन, कथञ्चित्, यथातथा; 'at any time,' कदाचित्, कर्हिचित्; 'any further,' दूरतरं; 'any one soever,' यः कश्चित्.

Aorta, *s.* हृत्पिण्डवामकोष्ठनिर्गता रक्तप्रवाहिका वृहन्नाडी.

Apace, *adv.* सत्वरं, शीघ्रं, क्षिप्रं, सहसा, द्रुतं, सवेगं.

Apart, *adv.* Often expressed by the prep. वि; पृथक्, विरलं, प्रविरलं, प्रगतः -ता -तं, उज्जृम्भः -म्भा -म्भं; 'having the knees apart,' प्रगतजानुः -नुः -नु.—(Privately) एकान्ते, एकान्ततस् *ind.*, निभृतं, रहसि, विविक्ते, विजने.—(At a distance) दूरे, कियद्दूरे.—(Aside, to one's self) स्वगतं, विजने, जनान्तिकं.

Apartment, *s.* शाला, कोष्ठः, आवासः, आगारं, गृहं.—(The inner apartments) अन्तःपुरं, अन्तर्गृहं.

Apathetic, *a.* वीतरागः -गा -गं, निःसङ्गः -ङ्गा -ङ्गं, निःस्पृहः -हा -हं, निरीहः -हा -हं, निरपेक्षः -क्षा -क्षं.

Apathy, *s.* विरागः, वैराग्यं, निरीहता, जाड्यं, मान्द्यं.

Ape, *s.* वानरः, अपुच्छः कपिः *m.*, प्लवङ्गः.—(Imitator) अनुकारी *m.* (न्).

To ape, *v. a.* वानरवत् or कपिवत् अनुकृ (c. 8. -करोति -कर्त्तुं).

Apepsy, *s.* अजीर्णं, आमयावित्वं, तीक्ष्णाग्निः *m.*

Aperient, *a.* रेचकः -की -कं.—(An aperient medicine) रेचकः.

Aperture, *s.* छिद्रं, रन्ध्रं, द्वारं, पथः.—(Act of opening) व्यादानं.

Apetalous, *a.* दलहीनः -ना -नं, पुष्पपत्ररहितः -ता -तं, निष्पत्रः -त्रा -त्रं.

Apex, *s.* शिखा, शिखरं, अग्रं, चूडा, शिरः *n.* (स्).

Aphorism, *s.* सूत्रं, वचनं, तत्त्वं, उपदेशवाक्यं, आदेशः.

Aphrodisiac, *a.* (Exciting passion) वाजीकरः -रा -रं, कामाग्निदीपनः -ना -नं.

Apiary, *s.* करण्डः, छत्रकः, मधुमक्षिकारक्षणस्थानं, मधुकरस्थानं.

Apiece, *adv.* प्रत्येकं, एकैकशस् *ind.*, एकशस् *ind.*, एकतस् *ind.*, एकैकं, पृथक् पृथक्, विभागशस् *ind.*

Apish, *a.* कापेयः -यी -यं, कपिस्वभावः -वा -वं, वानरोपमः -मा -मं.—(Imitative) अनुकारशीलः -ला -लं.

Apishness, *s.* कापेयं, वानरता, अनुकारशीलता.

Apitpat, *adv.* पटपटा *ind.*

Apocalypse, *s.* प्रकाशितं भविष्यद्वाक्यं, प्रकाशनं, विवृतिः *f.*, स्पष्टीकरणं.

Apocrypha, *s.* धर्म्मग्रन्थानां मध्ये गणितः सन्दिग्धप्रमाणो ग्रन्थः.

Apocryphal, *a.* (Of uncertain authority) सन्दिग्धप्रमाणः -णा -णं, असिद्धप्रमाणः -णा -णं.

Apologetic, apologetical, *a.* व्यपदेशकः -का -कं, पक्षपाती -तिनी -ति (न्), प्रतिवादकः -का -कं, छात्रिकः -की -कं.

Apologist, *s.* (For another) पक्षपातकर्त्ता *m.* (र्तृ), परपक्षार्थे वादी *m.* (न्), प्रतिवादी *m.* (न्), उत्तरवादी *m.*—(For one's self) व्यपदेष्टा *m.* (-ष्टृ), छद्मकारी, सदोषस्वीकारी *m.* (न्), प्रत्यवस्कन्दकारी *m.* (न्).

Apologise, *v. n.* (To state some plea) व्यपदिश् (c. 6. -दिशति -देष्टुं), छद्म or व्यपदेशं or प्रत्यवस्कन्दं कृ.—(To acknowledge one's fault) स्वदोषस्य स्वीकारं कृ.—(To apologise for another) पक्षपातं कृ, परपक्षार्थे प्रतिवद् (c. 1. -वदति -वदितुं).

Apologue, *s.* उपकथा, हितोपदेशकं उपाख्यानं, नीतिवाक्यं.

Apology, *s.* व्यपदेशः, अपदेशः, उपदेशः, प्रतिवादः, उत्तरं, छद्म *n.* (न्), प्रत्यवस्कन्दः, स्वदोषस्वीकारः, छद्मकरणं.—(For another) पक्षपातः, परपक्षार्थे प्रतिवादः.

Apophlegmatic, *a.* कफनाशनः -नी -नं, कफघ्नः -घ्नी -घ्नं, श्लेष्मघ्नः -घ्नी -घ्नं.

Apophthegm, *s.* सूत्रं, नीतिवाक्यं, वचनं, आदेशः.

Apoplectical, apoplectic, *a.* (Relating to apoplexy) अङ्गविकृतिविषयः -या -यं.—(Inclined to apoplexy) अङ्गविकृतिशीलः -ला -लं.

Apoplexy, *s.* अङ्गविकृतिः *f.*

Apostacy, *s.* स्वधर्म्मत्यागः, स्वधर्म्मच्युतिः *f.*, अपहारः, स्वधर्म्मभ्रंशः, भ्रष्टत्वं, स्वजातीयधर्म्मत्यागानन्तरं परधर्म्माश्रयः.

Apostate, *s.* स्वधर्म्मत्यागी *m.* (न्), स्वजातीयव्यवहारभ्रष्टः, आत्मधर्म्मच्युतः, अन्यजातः, स्वजातीयधर्म्मं त्यक्त्वा परधर्म्माश्रितः.

To apostatize, *v. n.* स्वधर्म्मात् or स्वजातीयव्यवहाराद् भ्रंश् (c. 4. भ्रश्यति, c. 1. भ्रंशते भ्रंशितुं) or च्यु (c. 1. च्यवते च्योतुं), विच्यु; स्वजातीयधर्म्मं त्यक्त्वा परधर्म्मं आश्रि (c. 1. -श्रयति -श्रयितुं).

Aposteme, aposthume, *s.* श्वयथुः, विद्रधिः *m.*, शोफः, स्फोटः, पूयसम्पूर्णः स्फोटः.

Apostle, *s.* ईश्वरप्रेरितः, ईश्वरदूतः, ईश्वराज्ञावहः, प्रेरितः.

Apostleship, *s.* ईश्वरप्रेरितत्वं, ईश्वरदौत्यं, प्रेरितत्वं.

Apostolical, apostolic, *a.* (Enjoined by an apostle) ईश्वरप्रेरितेनादिष्टः -ष्टा -ष्टं.—(Relating to the Apostles) ईश्वरप्रेरितसम्बन्धी -न्धिनी -न्धि (न्).

Apostrophe, *s.* सम्बोधनं, वाक्यालङ्कारविशेषः.

To apostrophise, *v. a.* सम्बोधनं कृ, सम्बोधनेन आमन्त्र् (c. 10. -मन्त्रयते -यितुं).

Apostume, *s.* पूयसम्पूर्णः स्फोटः, विद्रधिः *m.*

Apothecary, *s.* विक्रयार्थं औषधधपेश्वरः, भेषजविक्रेता *m.* (तृ), औषधविक्रेता *m.* (तृ), अगदङ्कारः.

Apothegm, *s.* *See* Apophthegm.

Apotheosis, *s.* देवत्वं, ब्रह्मत्वं, ब्रह्मनिर्वाणं, देवगणितत्वं.

To appal, *v. a.* भी in caus. (भाययति or भीषयति -यितुं), त्रस् in caus. (त्रासयति -यितुं), वित्रस्, सन्त्रस्; उद्विज् in caus. (-वेजयति -यितुं), व्याकुलीकृ.

Appalled, *p. p.* भयविप्लुतः -ता -तं, भयसंहृष्टरोमा -मा -म (न्), शङ्कितः -ता -तं, सन्त्रस्तः -स्ता -स्तं, व्याकुलीकृतः -ता -तं.

Apparatus, *s.* उपकरणं, सज्जा, यन्त्रं, सामग्र्यं, सामग्री *f.*—(Military apparatus) शस्त्रोपकरणं.

Apparel, *s.* वेशः, वस्त्रं, परिधानं, परिच्छदः, अम्बरं, आभरणं, संव्यानं.

To apparel, *v. a.* वस्त्र (nom. वस्त्रयति -यितुं), आच्छद् (c. 10. -छादयति -यितुं); वेष्ट् (c. 1. वेष्टते, वेष्टितुं), वस् in caus. (वासयति -यितुं), प्रवस्; प्रवृ (c. 5. -वृणोति, -वरितुं or -वरीतुं), संव्ये (c. 1. -व्ययति -व्यातुं).—(To apparel one's self) वस् (c. 2. वस्ते, वसितुं).

Apparelled, *p. p.* आच्छादितः -ता -तं, प्रच्छादितः -ता -तं, परिच्छन्नः -न्ना -न्नं, वस्त्रवेष्टितः -ता -तं, संवीतः -ता -तं.

Apparent, *a.* व्यक्तः -क्ता -क्तं, अभिव्यक्तः -क्ता -क्तं, प्रव्यक्तः -क्ता -क्तं, स्पष्टः -ष्टा -ष्टं, स्फुटः -टा -टं, प्रेक्षणीयः -या -यं, प्रेक्ष्यः -क्ष्या -क्ष्यं, प्रत्यक्षः -क्षा -क्षं.—(Not real) अवास्तवः -वी -वं; 'apparent praise,' *i. e.*

'not real,' व्याजस्तुतिः *f.*, मिथ्याप्रशंसा; 'heir-apparent,' युवराजः.—(To make apparent) प्रादुष्कृ, आविष्कृ, प्रत्यक्षीकृ, स्पष्टीकृ, प्रकटीकृ.

Apparently, *adv.* प्रादुस् *ind.*, साक्षात् *ind.*, आविस्, प्रत्यक्षतस्, स्पष्टं.

Apparition, *s.* (Appearance, form) आभासः, आभा, छाया, आकारः, आकृतिः *f.*, रूपं.—(Spectre, walking spirit) रात्रिचरः, प्रेतनरः, प्रेतः, वेतालः.

Apparitor, *s.* यष्टिधरः, प्रेष्यजनः, राजदूतः.

Appeachment, *s.* अभियोगः, अपवादः.

To appeal, *v. n.* परावर्त्तं प्रार्थ् (c. 10. -अर्थयते -यितुं); यत् कार्य्यं अवरप्राड्विवाकेन तीरितं or निर्णीतं तस्यापि पुनर्विचारम् उत्तमप्राड्विवाकसकाशात् प्रार्थ्.—(To call another as witness) साक्षिणं कृ, आह्वे (c. 1. -ह्वयति -ते -ह्वातुं).

Appeal, *s.* परावर्त्यव्यवहारः, पुनराह्वानं, पुनर्विचारप्रार्थना, उत्तमप्राड्विवाकसाक्षाद् आह्वानं.—(The calling upon any one as witness or judge) आह्वानं.

To appear, *v. n.* (To become visible) दृश् in pass. (दृश्यते), अभिदृश्, प्रतिदृश्; प्रभू (c. 1. -भवति -भवितुं), सम्भू, प्रकाश् (c. 1. -काशते -काशितुं), सम्प्रकाश्, सङ्काश्, उदि (c. 1. उदयति -यितुं), अभ्युदि, उच्चर् (c. 1. -चरति -चरितुं).—(Show one's self) आत्मानं दृश् in caus. (दर्शयति -यितुं), दर्शनं दा.—(To seem) प्रतिभा (c. 2. -भाति -भातुं), सम्प्रभा, निर्भा, आभा; लक्ष् in pass. (लक्ष्यते).—(To be evident) प्रकाश्, प्रादुर्भू (c. 1. -भवति -भवितुं), आविर्भू; प्रादुरस् (c. 2. -अस्ति); 'you appear dismayed,' विस्मित इव प्रतिभासि.

Appearance, *s.* (Coming into sight) दर्शनं, सन्दर्शनं.—(Entry into a place or company) उपस्थितिः *f.*, प्रवेशनं.—(The thing seen) रूपं, आकृतिः *f.*, मूर्त्तिः *f.*, आकारः.—(Semblance, not reality) छाया, आभासः, आभा, अवस्तुता.—(Presence, mien) रूपं, अवस्था, भावः, आकारः.—(Probability) अनुमेयत्वं, अनुभवनीयत्वं.

To appease, *v. a.* शम् in caus. (शमयति -यितुं), उपशम्, प्रशम्; सान्त्व् or शान्त्व् (c. 10. सान्त्वयति -यितुं), अभिशान्त्व्, परिशान्त्व्, उपसान्त्व्; तुष् in caus. (तोषयति -यितुं), परितुष्, सन्तुष्; प्रसद् in caus. (-सादयति -यितुं), अभिप्रसद्, सम्प्रसद्; सुस्थिरं -रां -रं कृ; परिमृश् (c. 6. -मृशति -मर्ष्टुं), परामृश्, अनुनी (c. 1. -नयति -ते -नेतुं).—(To be appeased) शम् (c. 4. शाम्यति, शमितुं), उपशम्; प्रसद् (c. 1. -सीदति -सत्तुं).

Appeased, *p. p.* शान्तः -न्ता -न्तं, शमितः -ता -तं, प्रशान्तः -न्ता -न्तं, आराधितः -ता -तं, अनुनीतः -ता -तं, प्रसन्नः -न्ना -न्नं, प्रसादितः -ता -तं.

Appeasing, *s.* शान्तिः *f.*, उपशान्तिः *f.*, प्रशान्तिः *f.*, आराधनं, प्रसादनं.

Appellant, *s.* उत्तमप्राड्विवाकसकाशात् परावर्त्तप्रार्थकः, परावर्त्तप्रार्थयिता *m.* (तृ), पुनराह्वानकर्त्ता *m.* (र्तृ), आह्वानकर्त्ता *m.* (र्तृ), आवेदकः.

Appellate, *s.* पुनराहूतः, उत्तमप्राड्विवाकसाक्षाद् आहूतः, प्रत्यर्थी *m.* (न्).

Appellation, *s.* नामधेयं, नाम *n.* (न्), आख्या, संज्ञा, अभिधानं, अभिधा, अभिख्या, आह्वा.

Appellative, *a.* अभिधायिकः -का -कं, अभिधानीयकः -का -कं.—(Common) सामान्यः -न्या -न्यं, साधारणः -णा -णं.

Appellee, *s.* आहूतः, अभियुक्तः, प्रत्यर्थी *m.* (न्).

To append, *v. a.* अनुबन्ध् (c. 9. -बध्नाति -बन्द्धुं or caus. -बन्धयति -यितुं), आबन्ध्; उपाधा (c. 3. -दधाति -धत्ते -धातुं), आधा; अवलम्ब् in caus. (-लम्बयति -यितुं).

Appendage, *s.* अनुबन्धः, सम्बन्धः, उपाहितं, शेषांशः, उपाहितभागः.

Appendant, *adj.* अनुबन्धी -न्धिनी -न्धि (न्), सम्बन्धी -न्धिनी -न्धि (न्), अवलम्बी -म्बिनी -म्बि (न्).

Appendix, *s.* परिशिष्टं, उपग्रन्थः, शेषग्रन्थः.

To appertain, *v. n.* (To belong to one's self) आत्मसात् or आत्माधीनः -ना -नं, or स्वाधीनः -ना -नं, or स्वकीयः -या -यं अस्.—(To belong, in general) सम्बन्ध् in pass. (-बध्यते). The sense of 'appertaining' may often be expressed by the root अस् or विद् with the gen. case: as, 'money appertains to me,' मम धनं विद्यते.

Appertaining, *p.* सम्बन्धी -न्धिनी -न्धि (न्), अनुबन्धी -न्धिनी -न्धि (न्).

Appertenance, *s.* अनुबन्धः, सम्बन्धः, उपकरणं, सामग्री.

Appetency, *s.* कामः, लोभः, अभिलाषः, वाञ्छा, इच्छा.

Appetite, *s.* (Desire) कामः, लोभः, रागः, रुचिः *f.*, अभिरुचिः *f.*, अतिवाञ्छा, अतिशयलोभः, अभिलाषः, इच्छा.—(Hunger) बुभुक्षा, क्षुधा, आहारादिवाञ्छा, भक्तच्छन्दं.—(The digestive faculty causing appetite) अग्निः *m.*, वह्निः *m.*, अग्निवृद्धिः *f.*—(One who has no appetite for food) अग्निरहितः.

Appetitive, *a.* कामुकः -का -कं, अभिलाषुकः -का -कं, इच्छुकः -का -कं.

To applaud, *v. a.* प्रशंस् (c. 1. -शंसति -शंसितुं), अभिप्रशंस्, प्रतिनन्द् (c. 1. -नन्दति -नन्दितुं), प्रणादेन प्रशंस्, प्रशंसां कृ, श्लाघां कृ.—(By clapping the hands) करतालेन प्रशंस्.

Applauder, *s.* प्रशंसकः, स्तावकः, श्लाघाकर्त्ता *m.* (र्तृ).

Applause, *s.* (Loudly expressed) प्रणादः, जयशब्दः, धन्यवादः, प्रशंसाशब्दः, सांराविणं, भुजनिःस्वनः, शब्दो-नुरागजः.—(Praise) श्लाघा, प्रशंसा, स्तुतिः *f.*

Applausive, *a.* प्रशंसकः -का -कं, स्तुतिमयः -यी -यं, श्लाघान्वितः -ता -तं.

Apple, *s.* (A kind of fruit) फलप्रभेदः.—(Pupil of the eye) नयनतारा, कनीनिका, चक्षुर्गोलकः.

Appliance, *s.* (The means applied) उपायः, अभ्युपायः, उपकरणं, सामग्री.—(The act of applying) योगः, अर्पणं.

Applicability, *s.* योग्यता, प्रयोज्यत्वं, सामञ्जस्यं, साङ्गत्यं.

Applicable, *a.* योग्यः -ग्या -ग्यं, प्रयोक्तव्यः -व्या -व्यं, प्रयोज्यः -ज्या -ज्यं, उपयोग्यः -ग्या -ग्यं, व्यवहरणीयः -या -यं, अर्पणीयः -या -यं, अर्प्यः -र्प्या -र्प्यं, संयोजनीयः -या -यं, व्यापी -पिनी -पि (न्), समञ्जसः -सा -सं.

Application, *s.* (Of one thing to another) योगः, अर्पणं, न्यसनं.—(Attention to) आसक्तिः *f.*, अनुष्ठानं, योगः, प्रवेशः, व्यसनं.—(Use) उपयोगः, प्रयोगः, प्रयोजनं.—(Application of mind, study) मनःप्रवेशः, अभिनिवेशः, प्रवेशः, अभ्यसनं, अभ्यासः, विद्याभ्यासः, अध्यवसायः, अभियुक्तता, मनोयोगः.—(Petition) याच्ञा, प्रार्थना, निवेदनपत्रं.

Applied, *p. p.* प्रयुक्तः -क्ता -क्तं, अर्पितः -ता -तं, न्यस्तः -स्ता -स्तं, निहितः -ता -तं, निवेशितः -ता -तं.

Applier, *s.* उपेता *m.* (तृ), प्रयोजकः.

To apply, *v. a.* (One thing on another) संयुज् (c. 10. -योजयति -यितुं), न्यस् (c. 4. -अस्यति, -असितुं), विन्यस्; ऋ in caus. (अर्पयति -यितुं), सङ्गम् in caus. (-गमयति -यितुं), प्रविश् in caus. (-वेशयति -यितुं), निविश्, संलग्नीकृ.—(To make use of) प्रयुज् (c. 7. -युनक्ति -युङ्क्ते -योक्तुं), उपयुज्.—(To attend to) आस्था (c. 1. -तिष्ठति -ते -स्थातुं), समास्था, अनुष्ठा.—(To have recourse to, solicit) प्रयाच् (c. 1. -याचति -याचितुं), अभियाच्, आश्रि (c. 1. -श्रयति -ते -श्रयितुं), प्रार्थ् (c. 10. -अर्थयति -ते -यितुं).—(To make effort, study) अभ्यस् (c. 4. -अस्यति -असितुं), यत् (c. 1. यतते, यतितुं), प्रयत्.

To apply, *v. n.* (Suit, fit) युज् in pass. (युज्यते), संयुज्, उपपद्

(c. 4. -पद्यते -पत्तुं), सङ्गतः -ता -तं भू.—(Have recourse as a petitioner) कार्य्यसिद्धिनिमित्तं अन्यम् आश्रि (c. 1. -श्रयति -ते -श्रयितुं), अर्थ् (c. 10. अर्थयते -यितुं), प्रार्थ्.

To Appoint, *v. a.* निधा (c. 3. -दधाति -धातुं), स्था in caus. (स्थापयति -यितुं), अवस्था, प्रस्था; युज् (c. 10. योजयति -यितुं).—(To appoint over any office) अधिकृ (c. 8. -करोति -कुरुते -कर्त्तुं), प्रकृ; नियुज् (c. 10. -योजयति -यितुं, c. 7. -युनक्ति -योक्तुं), with acc. of the pers. and loc. of the thing; अभिषिच् (c. 6. -सिञ्चति -सेक्तुं), with two acc. or with acc. and loc.; समादिश् (c. 6. -दिशति -देष्टुं), व्यादिश्.—(To make an appointment) समयं कृ, समयाकृ.

Appointed, *p. p.* स्थापितः -ता -तं, प्रस्थापितः -ता -तं, नियोजितः -ता -तं, नियतः -ता -तं, विहितः -ता -तं, नियुक्तः -क्ता -क्तं, व्यवस्थितः -ता -तं.—(To any office) अधिकृतः -ता -तं, व्यापृतः -ता -तं, वावृतः -ता -तं.—(An appointed duty) नियोगः.—(An appointed time) कालावधिः *m.*—(Agreed upon) कृतसङ्केतः -ता -तं.—(As to time) कृतकालः -ला -लं, कृतावधिः -धिः -धि.

Appointment, *s.* नियोगः, -जनं, नियुक्तिः *f.*, प्रस्थापनं, निरूपणं, कल्पनं.—(Engagement) समयः, प्रज्ञप्तिः *f.*—(Breaking an appointment) समयभेदः, समयव्यभिचारः.—(Stipulation) समयः, नियमः, सङ्केतः.—(Order) आज्ञा.—(Decree) नियमः, विधिः *m.*—(Office) अधिकारः, पदं.—(Equipment, furniture) सज्जा, उपकरणं, सामग्री.—(Allowance) वर्त्तनं, निरूपितमूल्यं.—(Assignation) अभिसारः.

To Apportion, *v. a.* विभज् (c. 1. -भजति -ते -भक्तुं), प्रविभज्, संविभज्; अंश् (c. 10. अंशयति -यितुं), व्यंश्; विन्यस् (c. 4. -अस्यति -असितुं), परिक्लृप् (c. 10. -कल्पयति -यितुं), विधा (c. 3. -दधाति -धातुं).

Apportionment, *s.* विभागः, संविभागः, अंशनं, परिकल्पनं, विन्यासः.

Apposite, *a.* योग्यः -ग्या -ग्यं, युक्तः -क्ता -क्तं, उपयुक्तः -क्ता -क्तं, सङ्गतः -ता -तं, हृदयङ्गमः -मा -मं, यथार्थः -र्था -र्थं, यथार्हः -र्हा -र्हं.

Appositely, *adv.* स्थाने, यथार्हतम् *ind.*, यथार्थं, सङ्गतप्रकारेण.

To Appraise, *v. a.* (Set a price on) अर्घं संख्या in caus. (-ख्यापयति -यितुं), मूल्यं निरूप् (c. 10. -रूपयति -यितुं) or व्यवसो, (c. 4. -स्यति -सातुं), मूल्यनिर्णयं कृ, मूल्यं निश्चितं कृ.

Appraiser, *s.* अर्घसंख्यापकः, मूल्यनिरूपकः, मूल्यविज्ञापकः.

Appraising, *s.* अर्घसंख्यापनं, मूल्यनिरूपणं, मूल्यविज्ञापनं.

To Appreciate, *v. a.* मूल्यं or अर्घं or गुणागुणं or भद्राभद्रतां or सारासारं विज्ञा (c. 9. -जानाति -नीते -ज्ञातुं), or निरूप् (c. 10. -रूपयति -यितुं), or निश्चितं कृ or विविच् (c. 7. -विनक्ति -वेक्तुं); 'one who knows how to appreciate,' गुणज्ञः, गुणागुणज्ञः, गुणग्राही *m.* (न्), मर्म्मज्ञः.

Appreciation, *s.* मूल्यविज्ञानं, गुणागुणज्ञानं, भद्राभद्रनिरूपणं, दोषादोषबोधः, विज्ञानं.

To Apprehend, *v. a.* (Lay hold on) ग्रह् (c. 9. गृह्णाति -ह्णीते ग्रहीतुं), परिग्रह्, सङ्ग्रह्; परामृश् (c. 6. -मृशति -म्रष्टुं), धृ (c. 1. धरति धर्त्तुं).—(Seize in order for trial) आसिध् (c. 1. -सेधति -सेद्धुं); ग्रह्, धृ, आक्रम् (c. 1. -क्रामति -क्रमति -क्रमितुं).—(By the mind) उपलभ् (c. 1. -लभते -लब्धुं), ऊह् (c. 1. ऊहते ऊहितुं); अनुमा (c. 2. -माति -मातुं), अवगम् (c. 1. -गच्छति -गन्तुं), अवबुध् (c. 4. -बुध्यते -बोद्धुं).—(To fear) शङ्क् (c. 1. शङ्कते शङ्कितुं) आशङ्क्; भी (c. 3. बिभेति भेतुं).

Apprehended, *p. p.* (Understood) उपलब्धः -ब्धा -ब्धं, अवगतः -ता -तं.—(Arrested) आसिद्धः -द्धा -द्धं.

Apprehensible, *a.* ग्राह्यः -ह्या -ह्यं, धीगम्यः -म्या -म्यं, उपलभ्यः -भ्या -भ्यं.

Apprehension, *s.* (Fear) भयं, शङ्का, आशङ्का, सन्देहः.—(Opinion) मतिः *f.*, बुद्धिः *f.*, बोधः.—(Seizure) ग्रहणं, आक्रमणं, धरणं.—(Arrest) आसेधः.—(Conception) उपलब्धिः *f.*, मेधा, अनुभवः, अनुमानं, अवगमः, अनुबोधः, उपलम्भः.

Apprehensive, *a.* शङ्कितः -ता -तं, शङ्की -ङ्किनी -ङ्कि (न्), शङ्कान्वितः -ता -तं, कृतभयः -या -यं.

Apprentice, *s.* शिल्पविद्याशिष्यः, शिष्यः, निरूपितकालपर्य्यन्तं शिल्पविद्याशिक्षार्थं नियमपत्रेण स्थापितः or धृतः सेवकः.

To Apprentice, *v. a.* आविहितकालात् शिल्पविद्याशिक्षार्थं नियमपत्रेण शिष्यं or सेवकं स्था in caus. (स्थापयति -यितुं).

Apprenticeship, *s.* शिल्पविद्याशिक्षावधिः *m.*, शिल्पशिक्षासमयः, सेवाकालः, दास्यकालः.

To Apprize, *v. a.* ज्ञा in caus. (ज्ञापयति -यितुं), विज्ञा; विद् in caus. (वेदयति -यितुं), निविद्, समाविद्; बुध् in caus. (बोधयति -यितुं), सूच् (c. 10. सूचयति -यितुं).

Apprized, *p. p.* विज्ञापितः -ता -तं, अनुज्ञापितः -ता -तं, विज्ञप्तः -प्ता -प्तं, सन्दिष्टः -ष्टा -ष्टं, प्रत्यादिष्टः -ष्टा -ष्टं, बोधितः -ता -तं.

To Approach, *v. n.* (Draw near to) अधिगम् (c. 1. -गच्छति -गन्तुं), आगम्, अभिगम्, अभ्यागम्, उपागम्, उपगम्, समुपगम्; या (c. 2. याति यातुं), अभिया, आया, उपाया, प्रत्याया, समाया, उपया, समुपया; उपस्था (c. 1. -तिष्ठति -ते -स्थातुं), ऋ (c. 1. ऋच्छति अर्त्तुं), अभ्यृ; अभिवृत् (c. 1. -वर्त्तते -वर्त्तितुं), उपावृत्, प्रतिवृत्, उपवृत्; समभ्यागा used only in the 3d pret.; as, 'he approached,' समभ्यागात्. इ, *i. e.* इ with आ (c. 2. एति, एतुं), अभ्ये, उपे, अभी (अभ्येति), उपसृप् (c. 1. -सर्पति -सर्प्तुं), समुपसृप्; आक्रम् (c. 1. -क्रामति -क्रमितुं), उपक्रम्; आव्रज् (c. 1. -व्रजति -व्रजितुं), प्रतिव्रज्, अभिपद् (c. 4. -पद्यते -पत्तुं), समापद्, समुपपद्, प्रतिपद्; अंह् (c. 1. अंहते अंहितुं).

To Approach, *v. a.* उपस्था in caus. (-स्थापयति -यितुं), समीपं स्था in caus.; समीपं धा (c. 3. -दधाति -धत्ते -धातुं), निकटे धा; सङ्गम् in caus. (-गमयति -यितुं).

Approach, *s.* आगमः, अभिगमनं, आगमनं, उपगमः, उपस्थितिः *f.*, उपसन्नता.

Approachable, *a.* आगम्यः -म्या -म्यं, उपगम्यः -म्या -म्यं, उपसार्य्यः -र्य्या -र्य्यं.

Approached, *p. p.* अभिगतः -ता -तं, उपगतः -ता -तं, उपस्थितः -ता -तं, अभ्यागतः -ता -तं, प्रत्युपस्थितः -ता -तं.

Approaching, *a.* (Near at hand) उपस्थितः -ता -तं, समुपस्थितः -ता -तं, आसन्नः -न्ना -न्नं.

Approbation, *s.* सम्मतिः *f.* or -तं, अनुमतिः *f.* or -तं, प्रशंसा, प्रसादः, मनःसन्तोषः, ग्रहणं.

To Appropriate, *v. a.* (To consign to some particular use) प्रयुज् (c. 7. -युनक्ति -युंक्ते -योक्तुं, caus. -योजयति -यितुं), उपयुज्, विनियुज्.—(To claim to one's self by an exclusive right) स्वीकृ, स्वीयमिति or ममेति वद् (c. 1. वदति वदितुं), स्वकीयं -यां -यं or आत्मीयं -यां -यं or स्वाधीनं -नां -नं or आत्माधीनं -नां -नं or आत्मसात् कृ, स्वस्वत्वं बुध् in caus. (बोधयति -यितुं), or ज्ञा in caus. (ज्ञापयति -यितुं.)

Appropriate, *a.* (Suited to the occasion) प्रस्तावसदृशः -शी -शं.—(Belonging peculiarly) आत्मनीनः -ना -नं, स्वकीयः -या -यं, सम्बन्धी -न्धिनी -न्धि (न्), सम्बन्धकः -का -कं, विशेषकः -का -कं, जनीनः -ना -नं.—(Suitable) युक्तः -क्ता -क्तं, योग्यः -ग्या -ग्यं, सङ्गतः -ता -तं, उपयोगी -गिनी -गि (न्).

Appropriated, *p. p.* (Made one's own) आत्मसात्कृतः -ता -तं.

Appropriately, *adv.* युक्तं, यथायोग्यं, यथोचितं, यथातथा, स्थाने.

APPROPRIATENESS, s. (Fitness of application) युक्तता, योग्यत्वं, औचित्यं, उपयुक्तता, सामञ्जस्यं, सङ्गतता.

APPROPRIATION, s. (The application of something to a particular purpose) उपयोगः, प्रयोगः, विनियोगः.—(Claiming any thing as peculiar) आत्मग्रहणं, स्वत्वबोधनं, आत्मसात्करणं.

APPROVAL, s. अनुमतिः f., सम्मतिः f., अनुमतं, सम्मतं, प्रशंसा.

To APPROVE, v. a. अनुमन् (c. 4. -मन्यते -मन्तुं), सम्मन्; प्रशंस् (c. 1. -शंसति -शंसितुं), रुच्, in caus. (रोचयति -यितुं), अनुरुच्; 'that is approved by me,' तत् मया प्रशस्यते or तत् मह्यं रोचते. प्रतिनन्द् (c. 1. -नन्दति -नन्दितुं), अनुरुध् (c. 4. -रुध्यते -रोद्धुं).—(To prove, show) प्रमाणीकृ, प्रमाण (nom. प्रमाणयति -यितुं), विभू in caus. (-भावयति -यितुं).

APPROVED, p. p. सम्मतः -ता -तं, अभिमतः -ता -तं, मतः -ता -तं, यथाभिमतः -ता -तं, प्रशस्तः -स्ता -स्तं, शिष्टः -ष्टा -ष्टं.—(Tried) परीक्षितः -ता -तं.—(Of tried probity) उपधाशुचिः -चिः -चि.

To APPROXIMATE, v. n. उपस्था (c. 1. -तिष्ठति -ते -स्थातुं), समीपं or निकटं वृत् (c. 1. वर्त्तते वर्त्तितुं), or स्था, उपागम् (c. 1. -गच्छति -गन्तुं), उपगम्, समुपगम्, अभिगम्.—(To be like) तुल्यः -ल्या -ल्यं or सदृशः -शी -शं अस्.

To APPROXIMATE, v. a. नेद (nom. नेदयति -यितुं), उपस्था in caus. (-स्थापयति -यितुं), समीपं स्था in caus., उपनी (c. 1. -नयति -नेतुं), सङ्गम् in caus. (-गमयति -यितुं).

APPROXIMATE, a. समीपः -पा -पं, आसन्नः -न्ना -न्नं, सन्निकृष्टः -ष्टा -ष्टं, उपस्थायी -यिनी -यि (न्).

APPROXIMATED, p. p. उपस्थापितः -ता -तं, उपनीतः -ता -तं, उपनतः -ता -तं, उपसन्नः -न्ना -न्नं, कृतसन्निधानः -ना -नं.

APPROXIMATION, s. (Approach) उपगमः, समुपगमः, समीपगमनं, संहतता -त्वं, उपस्थितिः f., उपस्थानं, समुपस्था.—(Nearness) नैकट्यं, सामीप्यं, सान्निध्यं, सन्निधानं.

APPULSE, s. आघातः, आघातनं, प्रतिहननं, प्रतिघातः.

APPURTENANCE, s. *See* APPERTENANCE.

APRICOT, s. फलविशेषः.

APRIL, s. चैत्रः, चैत्रिकः, मधुः, वैशाखः, माधवः, राधः.

APRON, s. मलनिवारणार्थं स्त्रीभिर् भृतम् आच्छादनं.

APROPROS, adv. स्थाने, यथायोग्यं, यथावसरं, यथावकाशं.

APSIS, s. (In astronomy) मन्दोच्चः.

APT, a. (Fit) उपयुक्तः -क्ता -क्तं, योग्यः -ग्या -ग्यं, युक्तः -क्ता -क्तं, आप्तः -प्ता -प्तं.—(Having a tendency to) expressed by शीलः in composition; as, 'disposed to piety,' धर्म्मशीलः -ला -लं, or by the affix आलु; as, 'apt to sleep,' शयालुः -लुः -लु, or by the desiderative adjective; as, 'apt to do,' चिकीर्षुः -र्षुः -र्षु; 'apt to fall,' पिपतिषुः -षुः -षु.—(Skilful) कुशलः -ला -लं, दक्षः -क्षा -क्षं, पटुः -टुः -ट्वी -टु, अभिज्ञः -ज्ञा -ज्ञं.—(Ready, quick) त्वरितः -ता -तं, उद्युक्तः -क्ता -क्तं.

APTITUDE, s. (Fitness) योग्यता, पात्रता or -त्वं, उपयोगिता, आप्तिः f.—(Tendency) शीलत्वं, -ता, अभिप्रायः, आशयः.—(Disposition) शीलः, स्वभावः, भावः, रीतिः f.

APTLY, adv. यथायोग्यं, योगतस् ind., स्थाने.—(Skilfully) दाक्ष्येण, चातुर्य्येण, सपाटवं.

APTNESS, s. (Fitness) योग्यता.—(Skill) कुशलता, पाटवं, विदग्धता, चातुर्य्यं.—(Ability) शक्तिः f., सामर्थ्यं.

AQUATIC, a. (Inhabiting the water) जलेचरः -रा -रं, जलजः -जा -जं, वारिजः -जा -जं, वारिचरः -रा -रं, अम्बुचरः -रा -रं, अम्बुजः -जा -जं, आम्भसिकः -की -कं, जलोद्भवः -वा -वं, जलभूः -भूः -भु.—(Growing in the water) अम्भोरुहः, जलरुहः.—(Watery) औदकः -की -कं, आप्यः -प्या -प्यं; 'an aquatic animal,' जलजन्तुः m.

AQUEDUCT, s. जलमार्गः, जलपथः, जलनिर्गमः, जलप्रणाली.

AQUEOUS, a. अम्मयः -यी -यं, सजलः -ला -लं, जलसः -सा -सं, अनूपः -पा -पं.

AQUEOUSNESS, s. सजलता, औदकत्वं, अनूपता.

AQUILINE, a. (Resembling an eagle) उत्क्रोशरूपः -पा -पं, गृध्राकारः -रा -रं.—(Hooked) वक्रः -क्रा -क्रं, कुञ्चितः -ता -तं, वृजिनः -ना -नं; 'having an aquiline nose,' प्रलम्बघोणः.

ARABIA, s. यवनः, यवनदेशः.

ARABIAN, a. यवनसम्बन्धी -न्धिनी -न्धि (न्), यवनदेशीयः -या -यं; 'an Arabian,' यवनदेशजः.

ARABLE, a. कृषियोग्यः -ग्या -ग्यं, कर्षणीयः -या -यं, फालकृष्टः -ष्टा -ष्टं.

ARATION, s. कृषिः f., कार्षिः f., कर्षणं, हलहतिः f.

ARBITER, s. प्रमाणपुरुषः, मध्यस्थः, निर्णेता m. (तृ), विचारकर्त्ता m. (र्त्तृ).

ARBITRABLE, a. निर्णेयः -या -यं, विचारणीयः -या -यं.

ARBITRARILY, adv. स्वेच्छया, स्वेच्छातस् ind., स्वकामतस् ind.

ARBITRARY, a. (Following the will) कामकारी -रिणी -रि (न्), यथाकामी -मिनी -मि (न्), स्वतन्त्रः -न्त्रा -न्त्रं, स्वच्छन्दः -न्दा -न्दं, स्वाधीनः -ना -नं, अनायत्तः -त्ता -त्तं, स्वैरवृत्तः -त्ता -त्तं.—(Capricious) चपलः -ला -लं.—(Tyrannical) क्रूरचरितः -ता -तं.—(Depending on no rule) अविहितः -ता -तं.

To ARBITRATE, v. n., v. a. विचर् in caus. (-चारयति -यितुं), निर्णी (c. 1. -नयति -ते -नेतुं), निश्चि (c. 5. -चिनोति -चेतुं), तीर् (c. 10. तीरयति -यितुं), निश्चयं or विचारं or निर्णयं or परिच्छेदं कृ.

ARBITRATED, p. p. निर्णीतः -ता -तं, तीरितः -ता -तं, निश्चितः -ता -तं, कृतनिश्चयः -या -यं.

ARBITRATION, s. (Determination) निर्णयः, विचारः, -रणं, निश्चयः, परिच्छेदः.—(Mediation) माध्यस्थ्यं.

ARBITRATOR, s. प्रमाणपुरुषः, स्थेयः, मध्यस्थः, निर्णेता m. (तृ), निश्चायकः, विचारकः.

ARBOROUS, a. वार्क्षः -र्क्षी -र्क्षं, वार्क्ष्यः -र्क्ष्यी -र्क्ष्यं, वृक्षसम्बन्धी -न्धिनी -न्धि (न्).

ARBOUR, s. लतागृहं, कुञ्जः, निकुञ्जः, पर्णशाला, मण्डपः -पं, कुटुङ्गकः, छत्वरः.

ARC, s. (Segment of a circle) खण्डमण्डलं, वृत्तखण्डं, गोलखण्डं.—(Arched gateway) तोरणः.

ARCADE, s. (Garden-walk) वृक्षैर् आच्छादित उद्यानपथः.—(A street arched over) इष्टकानिर्म्मिततोरणाकारपटला वीथिः, or धनुराकारेण पटलेन आवृता वीथिः.

ARCH, s. (Part of a circle) खण्डमण्डलं, वृत्तखण्डं, गोलखण्डं.—(Arched gateway) तोरणः -णं.—(The arched roof of a house) खोडकशीर्षं.—(Vault of heaven) खगोलः, नभोमण्डलं.

ARCH, a. (Sly, waggish) क्रीडाशीलः -ला -लं, रसिकः -का -कं, लोलापाङ्गः -ङ्गा -ङ्गं, विदग्धः -ग्धा -ग्धं.—(Chief) प्रधानः -ना -नं, मुख्यः -ख्या -ख्यं, उत्तमः -मा -मं, श्रेष्ठः -ष्ठा -ष्ठं.

To ARCH, v. a. (To make in the form of an arch) मण्डलीकृ, गोलीकृ, तोरणरूपेण निर्मा (c. 2. -माति, c. 4. -मायते -मातुं) or कृ in caus. (कारयति -यितुं), तोरणाकारपटलेन आछद् (c. 10. -छादयति -यितुं).—(To build an arch) तोरणं निर्मा.

ARCHANGEL, s. ईश्वरदूतानां मध्ये मुख्यदूतः or प्रधानदूतः, ईश्वरदूताधिष्ठाता m. (तृ).

Archbishop, *s.* धर्म्माध्यक्षाणां मध्ये प्रधानो or मुख्यो धर्म्माध्यक्षः.

Archdeacon, *s.* (The bishop's vicegerent) धर्म्माध्यक्षसहायः, धर्म्माध्यक्षोपकारकः.

Archaiology or archæology, *s.* प्राक्कालीनव्यवहारविषयं वाक्यं, पुरातनशास्त्रं.

Arched, *p. p.* मण्डलीकृतः -ता -तं, गोलीकृतः -ता -तं, तोरणाकारः -रा -रं, कुञ्चितः -ता -तं.

Archer, *s.* धनुर्धरः, धन्वी *m.* (न्), धन्वा *m.* (न्), धनुष्मान् *m.* (-त्), धानुष्कः, धनुर्धारी *m.* (न्), इष्वासः, इषुधरः, काण्डीरः, निषङ्गी *m.*, अस्त्री *m.*

Archery, *s.* धनुर्विद्या, शराभ्यासः, उपासनं, शराघातः, वाणमोक्षणं.—(Skilled in) कृतहस्तः, सुप्रयोगविशिखः, कृतपुङ्खः.

Archetype, *s.* मूलं, मूलमूर्त्तिः *f.*, आदर्शः, सूक्ष्मशरीरं.

Architect, *s.* स्थपतिः *m.*, गृहादिनिर्म्माणविद्याज्ञः, गृहनिर्म्माणाध्यक्षः, निर्म्माता *m.* (तृ).

Architectural, *a.* निर्म्माणविद्यासम्बन्धी -न्धिनी -न्धि (न्).

Architecture, *s.* निर्म्माणविद्या, निर्म्माणशिल्पं, गृहादिनिर्म्माणशिल्पं.

Architrave, *s.* गृहस्य यो भागः स्तम्भाग्रे अवलम्बते or निवेश्यते.

Archives, *s.* प्राक्कालीनग्रन्थरक्षागारं.—(Ancient records) इतिहासः, पुरावृत्तं.

Archness, *s.* विदग्धता, वैदग्ध्यं, रसिकत्वं.

Archwise, *adv.* तोरणरूपेण, अर्द्धमण्डलाकारेण, तोरणवत्; धनुराकारेण.

Arctic, *a.* उत्तरः -रा -रं, उदीचीनः -ना -नं, उत्तरकेन्द्रीयः -या -यं, चित्रशिखण्ड्यधःस्थितो भूगोलभागः.

Ardency, *s.* उत्तापः, उत्साहः, उग्रता, व्यग्रता, कौतूहलं, उत्सुकता.

Ardent, *a.* (Hot) उत्तप्तः -प्ता -प्तं, प्रचण्डः -ण्डा -ण्डं.—(Eager) कुतूहली -लिनी -लि (न्), उत्सुकः -का -कं, अतीक्ष्णः -क्ष्णा -क्ष्णं, व्यग्रः -ग्रा -ग्रं, उत्साही -हिनी -हि (न्).—(Affectionate) अनुरागी -गिणी -गि (न्).

Ardently, *adv.* उत्तापेन, कौतूहलेन, सौत्सुक्येन, सानुरागं.

Ardour, *s.* उत्तापः, आसक्तिः *f.*, उग्रता, व्यग्रता, कौतूहलं, औत्सुक्यं, उत्साहः.—(Of affection) अनुरागः.

Arduous, *a.* (Lofty) उच्चः -च्चा -च्चं, प्रांशुः -शुः -शु, आरोहणदुर्गम्यः -म्या -म्यं.—(Difficult) दुष्करः -रा -रं, सुदुष्करः -रा -रं, अतिदुष्करः -रा -रं, कठिनः -ना -नं, दुर्गम्यः -म्या -म्यं, दुःसाध्यः -ध्या -ध्यं, दुश्चरः -रा -रं.

Arduousness, *s.* उच्चता, उत्तुङ्गता.—(Difficulty) कठिनता, काठिन्यं.

Area, *s.* अङ्गणं, प्राङ्गणं, अभ्यन्तरस्थानं.

Arena, *s.* रङ्गः, रङ्गभूमिः *f.*, मल्लभूः, अक्षवाटः.

Argent, *a.* रूप्यः -प्या -प्यं, रौप्यः -प्यी -प्यं, राजतः -ती -तं.

Argillous, *a.* मृण्मयः -यी -यं, मार्त्तिकः -की -कं, चिक्कणमृत्तिकामयः -यी -यं.

To **argue**, *v. n.* (To reason) विचर् in caus. (-चारयति -यितुं), तर्क् (c. 10. तर्कयति -यितुं), वितर्क्, विवेचनं कृ.—(To dispute) विवद् (c. 1. -वदते -वदितुं), वादानुवादं or उत्तरप्रत्युत्तरं कृ.

To **argue**, *v. a.* (To prove by argument) प्रमाण्, (nom. प्रमाणयति -यितुं), प्रमाणीकृ, प्रमाणेन or तर्केण or विचारेण सिद्धीकृ; सूच् (c. 10. सूचयति -यितुं).—(To charge with, as a crime) दोषारोपं कृ, अपवद् (c. 1. -वदति -वदितुं), अधिक्षिप् (c. 6. -क्षिपति -क्षेप्तुं).

Arguer, *s.* तर्की *m.* (न्), विवादी *m.* (न्), विचारकः, प्रतिवादी *m.* (न्), न्यायी *m.* (न्).

Argument, *s.* (A reason stated) पक्षः, प्रमाणं, हेतुः *m.*, कारणं, वितर्कः, न्यायः; 'a false argument,' पक्षाभासः; 'a different side of the argument,' पक्षान्तरं.—(Controversy) वादानुवादः, वादयुद्धं, वाक्कलहं, विचारः, वितर्कः, विवादः, वितण्डा.—(The subject of any work) विषयः.—(Table of contents) अनुक्रमणिका, निर्घण्टः.

Argumentation, *s.* वितर्कणं, विचारणं, न्यायः.

Argumentative, *a.* (Consisting of argument) तार्किकः -की -कं वितर्की -र्किणी -र्कि (न्), विवादी -दिनी -दि (न्), न्यायी -यिनी -यि (न्), विचारी -रिणी -रि (न्).—(Disposed to controversy) विवादशीलः -ला -लं, विवादार्थी -र्थिनी -र्थि (न्), विवादप्रियः -या -यं.

Argumentatively, *adv.* सवितर्कं, वादानुवादपूर्व्वकं, वितर्कपूर्व्वकं, न्यायवत्.

Arid, *a.* शुष्कः -ष्का -ष्कं, शोषितः -ता -तं, परिशुष्कः -ष्का -ष्कं; 'arid soil,' मरुः *m.*, मरुस्थली, धन्वा *m.* (न्).

Aridity, *s.* शुष्कता, -त्वं, शोषः, शोषणं, परिशोषः.

Aright, *adv.* युक्तं, ऋतं, यथातथं, यथोचितं, यथायोग्यं, सम्यक्, यथार्हं.

To **arise**, *v. n.* (To stand up) उत्था for उत्स्था (c. 1. -तिष्ठति -ते -थातुं).—(To have origin) उत्पद् (c. 4. -पद्यते -पत्तुं), समुत्पद्; उच्चर् (c. 1. -चरति -चरितुं), उदि (c. 1. -अयति -एतुं), अभ्युदि, समुदि; प्रभू (c. 1. -भवति -भवितुं), सम्भू, आविर्भू, प्रादुर्भू; प्रवृत् (c. 1. -वर्त्तते -वर्त्तितुं), प्रसृ (c. 1. -सरति -सर्त्तुं), उद्भा (c. 2. -भाति -भातुं), निर्भा; आत्मानं दृश् in caus. (दर्शयति -यितुं), जन् (c. 4. जायते जनितुं), अभिजन्, उपजन्, सञ्जन्.—(From death) प्रतिसञ्जन्, समुत्था.

Arisen, *p. p.* उत्थितः -ता -तं, सञ्जातः -ता -तं, जातः -ता -तं, जनितः -ता -तं, उत्पन्नः -न्ना -न्नं, समुत्पन्नः -न्ना -न्नं, विनिःसृतः -ता -तं, जन्यः -न्या -न्यं.

Aristocracy, *s.* (A form of government) कुलीनजनाधिष्ठितं राज्यं, कुलीनवर्गप्रमुखं राज्यं, कुलीनवर्गप्रभुत्वं.—(The persons of whom it is composed) कुलीनजनाः, कुलीनवर्गः.

Aristocratical, *a.* कुलीनः -ना -नं, कुलीनकः -का -कं, कौलेयः -यी -यं, कुलीनवर्गयोग्यः -ग्या -ग्यं, उत्कृष्टः -ष्टा -ष्टं.

Aristocratically, *adv.* कुलीनजनवत्, राजन्यवत्, कुलीनकप्रकारेण.

Arithmetic, *s.* गणनाविद्या, गणितं, पाटीगणितं, अङ्कविद्या, परिपाटिः *f.* -टी, परिकर्म्म *n.* (न्); 'the eight rules of arithmetic,' परिकर्म्माष्टकं.

Arithmetical, *a.* गणनाविद्यानुरूपः -पा -पं, अङ्कविद्यानुसारी -रिणी -रि (न्).

Arithmetician, *s.* गणनाविद्याज्ञः, गणनाशास्त्रपण्डितः, अङ्कविद्याज्ञः, गणकः.

Ark, *s.* (A vessel, ship) नौः, नौका, पोतः, तरणी, वृहन्नौका.—(A chest) आधारः, कोषः, पेटिका, पेटः -टा -टी.

Arm, *s.* (Of the body) बाहुः *m. f.*, भुजः or -जा *f.*, दोषा *f.*, दोः *m.* (-स्), प्रवेष्टः.—(Of a tree) शाखा, उपशाखा.—(Of the sea) समुद्रवङ्कः.—(Of a river) वक्रं, वङ्कः, नदीवङ्कः, नदीवक्रं, पुटभेदः.—(Power, might) बलं, शक्तिः *f.*; 'a dominion acquired by one's own arm,' स्वभुजोपार्ज्जितं राज्यं.—(The upper arm) प्रगण्डः.

To **arm**, *v. a.* सन्नह् (c. 4. -नह्यति -नद्धुं), सज्जीकृ, अस्त्रैः or शस्त्रैः सज्जीकृ, or युज् in caus. (योजयति -यितुं), or समायुज्.—(To arm one's self, put on one's arms) नह् (c. 4. नह्यते नद्धुं), सन्नह्.—(To put on armour) वर्म्म् (nom. वर्म्मयति -यितुं or संवर्म्मयति).

Armada, *s.* वृहन्नौकासमूहः, समुद्रयुद्धाय सज्जीकृतो वृहन्नौकासमूहः.

Armadillo, *s.* घुणः, कवचाकारचर्म्मधारी विलवासी क्षुद्रजन्तुः.

Armament, *s.* सैनिकः, युद्धाय सज्जीकृतं बलं, योद्धृसज्जनं.

Armed, *p. p.* सज्जः -ज्जा -ज्जं, वर्म्मितः -ता -तं, सन्नद्धः -द्धा -द्धं, अभिसन्नद्धः -द्धा -द्धं, सायुधः -धा -धं, कृतास्त्रः -स्त्रा -स्त्रं, शस्त्री -स्त्रिणी -स्त्रि (न्).—(Having a weapon in the hand) शस्त्रपाणिः -णिः -णि.

Arm-hole, *s.* कक्षः, बाहुमूलं, भुजकोटरः, कक्षस्थानं, दोर्मूलं.

Armistice, *s.* किञ्चित्कालपर्य्यन्तं युद्धनिवर्त्तनं, सन्धिः *m.*, क्षमा.

Armless, *a.* (Without an arm) अभुजः -जा -जं.—(Without weapons) अस्त्रहीनः -ना -नं, अशस्त्रः -स्त्रा -स्त्रं.

Armlet, *s.* (Bracelet) वलयः or यं, केयूरं, अङ्गदं.—(A little arm) क्षुद्रबाहुः *m.*, उपशाखा.

Armorial, *a.* कावचिकः -की -कं, आयुधिकः -का -कं, आयुधीयः -या -यं. —(Belonging to the escutcheon of a family) कुलचिह्नसम्बन्धी -न्धिनी -न्धि (न्).

Armory, *s.* आयुधागारं, शस्त्रागारं, अस्त्रागारः.—(A collection of arms) शस्त्रसंहतिः *f.*, शस्त्रसमूहं.

Armour, *s.* वर्म्म *n.* (न्), लौहवर्म्म *n.* (न्), तनुत्रं, तनुत्राणं, कवचः or -चं, वारवाणः, कञ्चुकः, त्वक्त्रं, दंशनं, सन्नाहः, देहावरणं, युद्धास्त्रं, तनुवारं, सज्जा.—(Chain-armour) जालिका, जालप्राया; 'arrayed in armour,' वर्म्मितः ता -तं, कवची -चिनी -चि (न्).

Armour-bearer, *s.* भारवहानकः, वर्म्मवाहकः.

Armourer, *s.* अस्त्रकारकः, शस्त्रकारः, शस्त्रमार्जः, अस्त्रनिर्म्माणशिल्पज्ञः, सज्जाकर्त्ता *m.* (र्तृ), अभिधावकः.

Arm-pit, *s.* कक्षः, बाहुमूलं, भुजकोटरः, दोर्मूलं.

Arms, *s.* अस्त्रं, शस्त्रं, आयुधः, युद्धास्त्रं, शस्त्रास्त्रं.—(War in general) विग्रहः, समरः, रणः, युद्धं, सङ्ग्रामः.—(State of hostility) युद्धावस्था, रणसमयः; 'dexterity in arms,' अस्त्रलाघवं; 'the taking up of arms,' अस्त्रग्रहणं, युद्धे प्रवृत्तिः, अस्त्रधारणं; 'passage of arms,' अस्त्रशिक्षा, शस्त्राभ्यासः, 'a brother in arms,' सहयुध्वा *m.* (न्).—(The ensigns armorial of a family) कुलीनपदसूचकचिह्नं, कुलचिह्नं.

Army, *s.* सेना *f.*, सैन्यं, बलं, वाहिनी, चमूः *f.*, दण्डः or -ण्डं, अनीकं, चक्रं, ध्वजिनी, व्यूहः, योधसमूहः, पृतना, वरूथिनी.—(A complete army) अक्षौहिणी, चतुरङ्गः.—(In motion) प्रचक्रं.

Aroma, *s.* गन्धः, वासः, आमोदः, धूपः, परिमलः.

Aromatic, *a.* सुगन्धीयः -या -यं, गन्धी -न्धिनी -न्धि (न्), तिक्तः -क्ता -क्तं, सुरभितः -ता -तं, सुवासितः -ता -तं, धूपितः -ता -तं.

Aromatics, *s.* उपस्कराः *m. pl.*, सुगन्धिद्रव्याणि *n. pl.*, सुगन्धानि *n. pl.*

To **aromatise**, *v. a.* वास् (c. 10. वासयति -यितुं), धूप् (c. 1. धूपायति, धूपितुं).

Around, *adv.* (Circularly) परितस्, अभितस्.—(On every side) समन्ततस्, सर्व्वतस्, विश्वतस्, समन्तात्.

Around, *prep.* परि, अभि.

To **arouse**, *v. a.* (To excite) उत्सह् in caus. (-साहयति -यितुं), प्रोत्सह्, उत्था for उत्स्था in caus. (उत्थापयति -यितुं), उद्बुध् in caus. (-बोधयति -यितुं), प्रबुध्.—(To wake from sleep) जागृ in caus. (जागरयति -यितुं), प्रबुध् in caus., निद्रां भञ्ज् (c. 7. भनक्ति भंक्तुं).

Aroused, *p. p.* प्रोत्साहितः -ता -तं.—(Awaked) प्रबोधितः -ता -तं, प्रबुद्धः -द्धा -द्धं, निद्राभङ्गः -ङ्गा -ङ्गं.

To **arraign**, *v. a.* (To set in order) विरच् (c. 10. -रचयति -यितुं), स्वस्थाने स्था in caus. (स्थापयति -यितुं).—(To accuse) अभियोगं कृ, आह्वे (c. 1. -ह्वयति -ह्वातुं), अपवद् (c. 1. -वदति -वदितुं), अभिशप् (c. 1. -शपति -शप्तुं).

Arraigned, *p. p.* अभियुक्तः -क्ता -क्तं, आहूतः -ता -तं, अभिशप्तः -प्ता -प्तं.

Arraignment, *s.* अभियोगः, आह्वानं, अपवादः.

To **arrange**, *v. a.* रच् (c. 10. रचयति -यितुं), विरच्; विधा (c. 3. -दधाति -धातुं), संविधा; क्रमेण or यथाक्रमं स्था in caus. (स्थापयति -यितुं), ग्रन्थ् (c. 1. ग्रन्थति, c. 9. ग्रथ्नाति, ग्रन्थितुं).

Arranged, *p. p.* विरचितः -ता -तं, ग्रथितः -ता -तं, विन्यस्तः -स्ता -स्तं, विहितः -ता -तं, प्रतिविहितः -ता -तं, परिमितः -ता -तं, व्यूढः -ढा -ढं; 'well-arranged,' सुघटितः -ता -तं.

Arrangement, *s.* विन्यासः, पर्य्यायः, प्रतिविधानं, व्यूहनं, व्यूढिः *f.*, रचना, विरचनं, ग्रन्थनं, -ना, व्यवस्थापनं, अनुसन्धानं, क्रमेण स्थापनं, परिपाटिः *f.*—(The state of being in order) क्रमः.

Arranger, *s.* विरचकः, उपायज्ञः, उपेता *m.* (तृ), व्यासः.

Arrant, *a.* (Bad in a high degree) अतिदुष्टः -ष्टा -ष्टं, अतिनिकृष्टः -ष्टा -ष्टं, अतिकुत्सितः -ता -तं.—(Excessive) अत्यन्तः -न्ता -न्तं.

Arras, *s.* नानावर्णानि चित्रितवस्त्राणि.

Array, *s.* (Of battle) व्यूहः, or -हनं, व्यूढिः *f.*, बलविन्यासः; 'to draw up in battle array,' व्यूह् (c. 1. -ऊहते -ऊहितुं).—(Order) क्रमः, श्रेणी, पङ्क्तिः *f.*, रचना.—(Dress) आभरणं, भूषणं, परिच्छदः.

To **array**, *v. a.* (To put in order) क्रमेण or व्यूहेन रच् (c. 10. रचयति -यितुं), विरच् or स्था in caus. (स्थापयति -यितुं), or व्यवस्था; or विधा (c. 3. -दधाति -धातुं), or सज्जीकृ.—(To dress) वस्त्रम् आछद् (c. 10. -छादयति -यितुं), संव्ये (c. 1. -व्ययति -व्यातुं), भूष् (c. 10. भूषयति -यितुं); अलङ्कृ, परिष्कृ.

Arrear, *s.* ऋणशेषं, ऋणशेषांशः, ऋणस्य अशोधितो भागः, ऋणस्य शोधनीयो भागः.

Arrest, *s.* आसेधः, धरणं, ग्रहणं, निरोधः, बन्धनं.—(Stop) निवारणं.

To **arrest**, *v. a.* (As a bailiff) आसिध् (c. 1. -सेधति -सेद्धुं), निरुध् (c. 7. -रुणद्धि -रोद्धुं), ऋणहेतोः or दोषहेतोः राजलेखेन or राजाज्ञया बन्ध् (c. 9. बध्नाति -बन्द्धुं), or ग्रह् (c. 9. गृह्णाति, ग्रहीतुं) or धृ (c. 1. धरति, धर्त्तुं).—(Stop, bring to a stand) स्तम्भ् in caus. (स्तम्भयति -यितुं), विष्टम्भ् (c. 5. -स्तभ्नोति, c. 9. -स्तभ्नाति -स्तम्भितुं), निवृ in caus. (-वारयति -यितुं).

Arrested, *p. p.* आसिद्धः -द्धा -द्धं, धृतः -ता -तं, बद्धः -द्धा -द्धं, निरुद्धः -द्धा -द्धं.

Arrival, *s.* आगमनं, अभिगमनं, उपस्थितिः *f.*, उपयातं, आयः.

To **arrive**, *v. n.* आगम् (c. 1. -गच्छति -गन्तुं), अभिगम्, उपगम्; उपस्था (c. 1. -तिष्ठति -स्थातुं), प्राप् (c. 5. -आप्नोति -आप्तुं), सम्प्राप्, अवाप्, अनुसम्प्राप्, उपसम्प्राप्, आया (c. 2. -याति -यातुं), अभिया, उपाया, समाया.

Arrived, *p. p.* आगतः -ता -तं, समायातः -ता -तं, उपस्थितः -ता -तं, प्राप्तः -प्ता -प्तं.

Arrogance, *s.* गर्वः, धर्षः, दर्पः, मानः, अभिमानः, मदः, अवलेपः, अहङ्कारः, प्रागल्भ्यं, प्रगल्भता, आटोपः, चित्तसमुन्नतिः, औद्धत्यं, प्रतिभानं.

Arrogantly, *adv.* सगर्व्वं, सदर्पं, साटोपं, गर्व्वेण, धर्षेण, प्रगल्भं.

Arrogant, *a.* प्रगल्भः -ल्भा -ल्भं, गर्व्वी -र्व्विणी -र्व्वि (न्), अतिगर्व्वितः -ता -तं, सगर्व्वः -र्व्वा -र्व्वं, मानी -निनी -नि (न्), मदोद्धतः -ता -तं, अहङ्कारी -रिणी -रि (न्), आत्मश्लाघी -घिनी -घि (न्), प्रधर्षितः -ता -तं, अवलिप्तः -प्ता -प्तं, उद्धतः -ता -तं, प्रतिभामुखः -खी -खं.—(To be arrogant) प्रगल्भ् (c. 1. -गल्भते -गल्भितुं), दृप् (c. 4. दृप्यति, दर्प्तुं द्रप्तुं).

To **arrogate**, *v. a.* (To claim proudly) गर्व्वपूर्व्वकं or सगर्व्वं or अनर्हतस् or अधर्म्मतस् or मिथ्या ग्रह् (c. 9. गृह्णाति ग्रहीतुं), अभिग्रह्, परिग्रह्; or लभ् (c. 1. लभते लब्धुं), or आदा (c. 3. -ददाति -दातुं), or अभ्यनुज्ञा (c. 9. -जानाति -ज्ञातुं), or आत्मीयं -यां -यं कृ or स्वीकृ; मृषा or मिथ्या ग्रह्; उपधां कृ, ध्वजीकृ.

Arrogation, *s.* सगर्व्वग्रहणं, अनर्हग्रहणं, अभिग्रहणं, अन्याय्यग्रहणं, मिथ्याग्रहणं, ध्वजीकरणं, उपधा.

Arrow, *s.* शरः, बाणः, इषुः *m.*, शायकः, काण्डं, शल्यं, विपाठः, विशिखः, पृषत्कः, पत्री *m.* (न्), भल्लः, नाराचः, प्रक्ष्वेडनः, अजिह्मगः, खगः, आशुगः, मार्गणः, कलम्बः, रोपः; 'arrow-head,' बाणाग्रं; 'arrow-shaft,' शरकाण्डं; 'a shower of arrows,' शराक्षेपः, शरवर्षं.

Arrowy, *a.* (Consisting of arrows) बाणी -णिनी -णि (न्), बाणवान्

-वती -वत् (त्).—(Arrow-shaped) बाणाकारः -रा -रं.

Arsenal, *s.* आयुधागारं, आयुधगृहं, शस्त्रागारं, अस्त्रागारं, युद्धभाण्डागारं.—(A collection of arms) शस्त्रसंहतिः, शस्त्रसमूहः.

Arsenic, *s.* मनःशिला, शिला, मनोगुप्ता, नागजिह्विका, नैपाली, कुनटी.

Arson, *s.* आगारदाहः, गृहदाहापराधः.

Art, *s.* शिल्पं, शिल्पविद्या, कला, व्यवसायः, कर्म्म *n.* (न्).—(Invention) कल्पनं, -ना.—(Science) विद्या.—(Skill) निपुणता, पाण्डित्यं, दक्षता, युक्तिः *f.*, शिक्षाशक्तिः *f.*—(Cunning) विदग्धता, वैदग्ध्यं, माया.

Artery, *s.* नाडी, नाडिः *f.*, कण्डरा, नाली, नालिः *f.*, सिरा, रक्तवाही *m.* (न्).

Arterial, *a.* नाडीसम्बन्धी -न्धिनी -न्धि (न्), रक्तवाही -हिनी -हि (न्).

Artful, *a.* (Performed with art) शिल्पेन or पाण्डित्येन कृतः -ता -तं.—(Skilful) शिक्षितः -ता -तं, निपुणः -णा -णं, पटुः -टुः -ट्वी -टु.—(Cunning) उपायज्ञः -ज्ञा -ज्ञं, विदग्धः -ग्धा -ग्धं, छलान्वितः -ता -तं, मायी -यिनी -यि (न्).

Artfully, *adv.* पाण्डित्येन, नैपुण्येन, सपाटवं, वैदग्ध्येन, छलेन.

Artfulness, *s.* (Skill) पाण्डित्यं, निपुणता, चातुर्य्यं, दक्षता, पटुता.—(Cunning) विदग्धता, वैदग्ध्यं, शठता.

Arthritic, *a.* (Gouty) वातकी -किनी -कि (न्).—(Relating to the joints) ग्रन्थिलः -ला -लं.

Artichoke, *s.* शाकविशेषः.

Article, *s.* (Part of speech) वाक्यार्थनिर्णायकोऽव्ययशब्दः.—(A particular part of any complex thing) अंशः, भागः, पदं, विषयः.—(Thing) द्रव्यं, वस्तु *n.*, विषयः.—(Apparatus) सामग्री *f.*—(Terms, stipulation) नियमपत्रं, समयः; 'articles of peace,' सन्धिसमयः.—(A point of time) क्षणः, समयः, वेला.

To Article, *v. n.* समयं कृ, नियमपत्रेण स्थिरीकृ, सङ्घट्ट् (c. 1. -घट्टते -घट्टितुं).

Articular, *a.* ग्रन्थिलः -ला -लं, ग्रन्थिसम्बन्धकः -का -कं.

Articulate, *a.* (Distinct) व्यक्तः -क्ता -क्तं, स्पष्टः -ष्टा -ष्टं.

To Articulate, *v. a.* (To utter words distinctly) स्पष्टं or व्यक्तं उच्चर् in caus. (-चारयति -यितुं), or उदीर् (c. 10. -ईरयति -यितुं, c. 1. -ईरति -ईरितुं), or उदाहृ (c. 1. -हरति -हर्त्तुं).—(To joint) ग्रन्थ् (c. 1. ग्रन्थति, c. 9. ग्रथ्नाति ग्रन्थितुं)

Articulated, *p. p.* (Uttered) उच्चारितः -ता -तं.—(Jointed) ग्रन्थितः -ता -तं, सन्धितः -ता -तं.

Articulation, *s.* (Of words) उच्चारणं, उदाहरणं.—(The juncture of bones) ग्रन्थिः *m.*, अस्थिसन्धिस्थानं, सन्धिः *m.*

Artifice, *s.* (Stratagem, contrivance) उपायः, छद्म *n.* (न्), छलं, व्यपदेशः, कपटः -टं, कौशलं.

Artificer, *s.* (An artist) शिल्पकारः, शिल्पी *m.* (न्), कर्म्मकारः, कर्म्मारः, कारुः *m.*—(Maker) कर्त्ता *m.* (र्तृ), निर्म्माता *m.* (तृ).—(Contriver) उपेता *m.* (तृ), उपायज्ञः.

Artificial, *a.* शिल्पिकः -की -कं, कृत्रिमः -मा -मं, कृतकः -का -कं, काल्पनिकः -की -कं, प्रतियत्नपूर्वः -र्वा -र्वं.—(Made by art) कल्पितः -ता -तं, शिल्पनिर्म्मितः -ता -तं; 'an artificial lake,' क्रीडासरः *n.* (स्).

Artificially, *adv.* शिल्पेन, कृत्रिमप्रकारेण, शिल्पिकप्रकारेण.

Artillery, *s.* अग्न्यस्त्रं, युद्धास्त्रं, आग्नेयानि अस्त्राणि *n. pl.*

Artisan, *s.* शिल्पी *m.* (न्), शिल्पकारः, कर्म्मकारः, कारुकः.

Artist, *s.* शिल्पी *m.* (न्).—(A skilful man) पण्डितः, निपुणः, पटुः.—(Painter) चित्रकरः.

To AWAKE, AWAKEN, *v. a.* जागृ in caus. (जागरयति -यितुं), बुध् in caus. (बोधयति -यितुं), प्रबुध्, प्रतिबुध्, विबुध्; निद्रां भञ्ज् (c. 7. भनक्ति, भंक्तुं), निद्राभङ्गं कृ.—(To incite) उत्था in caus. (-थापयति -यितुं), उत्सह् in caus. (-साहयति -यितुं), प्रोत्सह्; उत्तिज् (c. 10. -तेजयति -यितुं).

To AWAKE, *v. n.* जागृ (c. 2. जागर्त्ति, जागरितुं), प्रजागृ; बुध् (c. 4. बुध्यते, बोद्धुं), अनुबुध्, प्रबुध्, प्रतिबुध्, विबुध्, प्रतिसम्बुध्.

AWAKE, *a.* —— प्रबुद्धः -द्धा -द्धं, प्रतिबुद्धः -द्धा -द्धं, विप्रबुद्धः -द्धा -द्धं, प्रजागरः -रा -रं, उन्निद्रः -द्रा -द्रं; 'that which keeps one awake at night,' रात्रिजागरदः.

AWAKENED, *p. p.* जागरितः -ता -तं, प्रबोधितः -ता -तं, निद्राभग्नः -ग्ना -ग्नं.

AWAKENING, *s.* प्रबोधनं, प्रबोधः, निद्राभञ्जनं.

To AWARD, *v. a.* दा in caus. (दापयति -यितुं), तीर् (c. 10. तीरयति -यितुं).

AWARD, *s.* (Judgment, sentence) विचारः, निर्णयः, निष्पत्तिः *f.*, तीरणं, समाधानं, दण्डः, आज्ञा.

AWARDED, *p. p.* दापितः -ता -तं, तीरितः -ता -तं.

AWARDER, *s.* विचारकः, निर्णेता *m.* (तृ), दापकः.

AWARE, *a.* (Excited to consciousness) विज्ञापितः -ता -तं, बोधितः -ता -तं.—(Knowing) वेदी -दिनी -दि (न्), ज्ञः -ज्ञा -ज्ञं in comp.—(Vigilant, attentive) सावधानः -ना -नं, जागरः -रा -रं, -री -रिणी -रि (न्); 'he is aware,' वेत्ति, जानाति.

AWAY, *a.* and *adv.*, expressed by the preposition अप.—(Absent) परोक्षः -क्षा -क्षं, स्थानान्तरङ्गतः -ता -तं, अनुपस्थितः -ता -तं, अविद्यमानः -ना -नं.—(Far away) दूरस्थः -स्था -स्थं, दूरस्थायी -यिनी -यि (न्).—(Come along) यातु.—(Begone!) अपेहि, अपसर, हूम्; 'away with this fear,' अलम् अनया शङ्कया.

AWE, *s.* आदरः, सम्भ्रमः, विस्मयः, त्रासः, आतङ्कः, आदरप्रयुक्तं भयं.—(To stand in awe of) भी (c. 3. बिभेति, भेतुं), त्रस् (c. 4. त्रस्यति, त्रसितुं) with abl., आदृ (c. 6. -द्रियते) with acc.

To AWE, *v. a.* (To strike terror into) भी in caus. (भाययति or भीषयति -यितुं), त्रस् in caus. (त्रासयति -यितुं), व्याकुलीकृ, आकुलीकृ, सम्भ्रमेण उपहन् (c. 2. -हन्ति -हन्तुं).

AWE-STRUCK, *a.* सम्भ्रान्तः -न्ता -न्तं, विस्मयाकुलः -ला -लं, भयविप्लुतः -ता -तं.

AWFUL, *a.* घोरः -रा -रं, दारुणः -णा -णं, भैरवः -वा -वं, भीषणः -णा -णं, भयङ्करः -रा -रं, भयानकः -का -कं.—(Worshipful) आदरणीयः -या -यं, आदृत्यः -त्या -त्यं, पूज्यः -ज्या -ज्यं.

AWFULLY, *adv.* दारुणं, घोरं, यथा सम्भ्रम उत्पद्यते तथा.

AWFULNESS, *s.* घोरता, दारुणता, भीषणं, भैरवं, भीष्मं.

AWHILE, *adv.* कियत्कालं, किञ्चित्कालं, अल्पकालं, इयत्कालं, मुहूर्त्तं, क्षणं, यत्किञ्चित्समयं.

AWKWARD, *a.* (Clumsy, unskilful) अदक्षः -क्षा -क्षं, अनाम्रः -म्रा -म्रं, अपटुः -टुः -टु, अक्षिप्रः -प्रा -प्रं, अविज्ञः -ज्ञा -ज्ञं, अकृती -तिनी -ति (न्).—(Inelegant) विरूपः -पी -पं, स्थूलः -ला -लं.

AWKWARDLY, *adv.* अपटु, अदक्षं, अक्षिप्रं, अनाम्रं.

AWKWARDNESS, *s.* (Unskilfulness) अपाटवं, अपटुता, अदक्षत्वं, अक्षिप्रत्वं.—(Inelegance) स्थूलता, वैरूप्यं.

AWL, *s.* आरा, चर्म्मप्रभेदिका, आविधः, वेधनिका.

AWN, *s.* (A beard of corn) शूकः -कं, शस्यशूकं, किंशारुः *m.*

AWNING, *s.* वितानं, वितानकं, आच्छादनं, उल्लोचः.

AWRY, *adv.* तिरस्, साचि, तिर्य्यक्, कुटिलं, जिह्मं, अनृजु.—(Perversely) विपरीतं, प्रतिकूलं, विलोमं.

AXE, *s.* टङ्कः, कुठारः, परशुः *m.*, परश्वधः, छिदिः *f.*, वृक्षभिद् *f.*, वृक्षभेदी *m.* (न्), स्वधितिः *m.*

AXIOM, *s.* तत्त्वं, सूत्रं, सिद्धान्तः, आदेशः, वचनं.

AXIOMATIC, *a.* सौत्रः -त्री -त्रं, सिद्धान्ती -न्तिनी -न्ति (न्).

AXIS, *s.* अक्षः, ध्रुवः, मेरुः *m.*

AXLE, AXLE-TREE, *s.* अक्षाग्रं, अक्षदण्डः.

AY, *adv.* तथेति, एवं, हूम्, आम्.

AYE, *adv.* सर्व्वदा, सदा, नित्यं, नित्यदा, शाश्वतं, अजस्रं, शाश्वतीः समाः.

Azure, *a.* नीलः -ला -लं, नीलवर्णः, -र्णा -र्णं, आकाशवर्णः -र्णा -र्णं.

B.

To baa, *v. n.* रु (c. 1. रवते, रोतुं), मेषवत् or उरभ्रवत् शब्दं कृ.

To babble, *v. n.* (To prattle like a child) बालवत् जल्प् (c. 1. जल्पति, जल्पितुं).—(To talk idly) जल्प्.—(To tell secrets) रहस्यं प्रकाश् in caus. (-काशयति -यितुं) or विख्या, in caus. (-ख्यापयति -यितुं), रहस्यभेदं कृ.

Babble or **babbling**, *s.* जल्पः, जल्पनं, वावदूकता, बालवचनं, आख्यायिका.

Babbler, *s.* वाचालः, जल्पकः, उपजल्पी *m.* (न्), वाचाटः, जल्पाकः, वावदूकः.

Babe, baby, *s.* बालः -ला, बालकः, शिशुः *m.*, शावकः.—(At the breast) स्तनन्धयः, स्तनपाः *m.* (पा), क्षीरपः.

Babel, *s.* (Confusion) सङ्करः, साङ्कर्य्यं, तुमुलं, कोलाहलः, कालकीलः.

Baboon, *s.* वानरः, कपिः, मर्कटः, प्लवङ्गः, प्लवगः, शाखामृगः, वलीमुखः.

Babyhood, *s.* बाल्यं, बालकत्वं, बालभावः, शैशवं.

Babyish, *a.* बालकीयः -या -यं, बालिशः -शा -शं, बालेयः -यी -यं.

Bacchanalian, *s.* पानरतः, पानप्रसक्तः, मद्यपीतः, मद्यप्रियः, सम्प्रीतिरतः.

Bachelor, *s.* (A man unmarried) अविवाहितः, अकृतदारः, अकृतदारसङ्ग्रहः, अकृतविवाहः.—(One who takes his first degree) विद्यालये पूर्व्वपदप्राप्तः.

Back, *s.* पृष्ठं, विग्रहावरं; 'to turn the back, avert the face,' पराङ्मुखः -खी -खं or पराचीनः -ना -नं भू; 'to turn back, away from,' अपवृत् (c. 1. -वर्त्तते -वर्त्तितुं), विनिवृत्, अपावृत्, निवृत्; 'turned back,' विपरिवर्त्तितः -ता -तं; 'at one's back, behind the back,' पृष्ठतस्; 'behind one's back, in one's absence,' परोक्षे.—(The hinder part) पृष्ठदेशः, पश्चाद्देशः, पश्चाद्भागः, पृष्ठं, नितम्बः; 'the back of the hand,' करपृष्ठं.

Back, *adv.* (To the place whence one came) commonly expressed by प्रति prefixed; as, 'to go back,' प्रतिगम्; 'come back,' प्रत्यावृत्तः -त्ता -त्तं, पुनरागतः -ता -तं; 'brought back,' प्रत्यानीतः -ता -तं.—(Backward from the present station) expressed by परा, प्रति, or पश्चात् prefixed; as, 'to beat back,' पराहन्, प्रत्याहन्.—(Again) expressed by पुनर्, प्रति, or अनु prefixed; as, 'to give back,' प्रतिदा.—(Kept back) निगृहीतः -ता -तं, निवारितः -ता -तं; 'in the back-ground,' दूरस्थः -स्था -स्थं, निभृते.

To back, *v. a.* (To mount a horse) आरुह् (c. 1. -रोहति -रोढुं), अधिरुह्, समारुह्.—(To support, justify) रक्ष् (c. 1. रक्षति, रक्षितुं), अभिरक्ष्, संरक्ष्; पक्षपातं कृ, उपकृ, अनुग्रह् (c. 9. -गृह्णाति -ग्रहीतुं).—(To impel backwards) पराणुद् (c. 6. -णुदति -णोत्तुं), विपरीतं प्रणुद्.

To back, *v. n.* (To go backwards) अपक्रम् (c. 1. -क्रामति, c. 4 -क्राम्यति, -क्रमितुं), व्यपक्रम्, परावृत् (c. 1. -वर्त्तते -वर्त्तितुं).

To backbite, *v. a.* पृष्ठमांसं खाद् (c. 1. खादति, खादितुं).—(To slander) परिवद् (c. 1. -वदति -ते -वदितुं), अपवद्.

Backbiter, *s.* पृष्ठमांसादः, परोक्षे अपवादकः, परिवादकः, पिशुनः.

Backbiting, *s.* परिवादः, अपवादः, पिशुनवाक्यं.

Backbone, *s.* कशेरुका, पृष्ठवंशः, पृष्ठास्थि *n.*, रीढकः.

Backdoor, *s.* पक्षद्वारं, अन्तर्द्वारं, उपद्वारं, प्रच्छन्नं, पक्षकः, खडक्किका.

Backgammon, *s.* चर्म्मपट्टिकाक्रीडा.—(Backgammon-board) चर्म्मपट्टिका, अष्टापदं, बभ्रुः.

Backroom, *s.* अन्तर्गृहं, अन्तःशाला, उपरोधकं, उपशाला.

Backside, *s.* (The hinder part of any thing) पृष्ठदेशः, पश्चाद्देशः, पश्चाद्भागः, अधोदेशः.—(The hinder part of any animal) नितम्बः, पृष्ठं.

To backslide, *v. n.* स्वधर्म्मात् परिभ्रंश् (c. 4. -भ्रश्यति -भ्रंशितुं) or च्यु (c. 1. च्यवते, च्योतुं), स्वधर्म्मं त्यज् (c. 1. त्यजति, त्यक्तुं).

Backslider, *s.* धर्म्मच्युतः, धर्म्मभ्रष्टः, स्वधर्म्मत्यागी *m.* (न्), उन्मार्गगामी *m.* (न्), अन्यशास्त्रकः.

Backstairs, *s.* उपसोपानं, अन्तःसोपानं, पक्षसोपानं, प्रच्छन्नसोपानं.

Backward or **backwards**, *adv.* Expressed by परा or प्रति prefixed; पश्चात्, प्रतीपं, विपरीतं, अपकटं; 'to walk backwards and forwards,' गतागतानि or प्रतिगतागतं or गमनागमने or यातायातं कृ.

Backward, *a.* (Unwilling) प्रतीपः -पा -पं, अनिच्छः -च्छा -च्छं, असम्मतः -ता -तं, अनिच्छकः -का -कं.—(Sluggish) मन्दः -न्दा -न्दं, अलसः -सा -सं, विलम्बी -म्बिनी -म्बि (न्).—(Dull of apprehension) मन्दमतिः -तिः -ति.—(Late, after its time) अतीतकालः -ला -लं, अतिक्रान्तकालः -ला -लं, दीर्घकालीनः -ना -नं, दीर्घपक्ष्मः -क्ष्मा -क्ष्मं, दीर्घपक्ष्मशीलः -ला -लं.

Backwardness, *s.* (Unwillingness) अनिच्छा, अस्वीकारः, असम्मतिः *f.*—(Sluggishness) आलस्यं, मान्द्यं, विलम्बत्वं.—(Dulness) मन्दमतिता.—(Lateness) दीर्घकालीनता, अतीतकालत्वं, दीर्घता, दीर्घपक्ष्मता.

Bacon, *s.* वल्लूरं, शूकरस्य शुष्कमांसं.

Bad, *a.* (Vicious, corrupt) पापः -पा -पं, दुष्टः -ष्टा -ष्टं, अधमः -मा -मं, नीचः -चा -चं, खलः -ला -लं, कुत्सितः -ता -तं, कदर्य्यः -र्य्या -र्य्यं.—(Not good) अभद्रः -द्रा -द्रं, असाधुः -धुः -धु, अधार्म्मिकः -की -कं, असारः -रा -रं, असन् -सती -सत् (त्).—(Worthless) निर्गुणः -णा -णं.—(Hurtful, unwholesome) हिंस्रः -स्रा -स्रं, अहितः -ता -तं, अपथ्यः -थ्या -थ्यं, रुजाकरः -रा -रं.—(Sick) रोगी -गिणी -गि (न्), व्याधितः -ता -तं.—(Sick of) आतुरः -रा -रं, आर्त्तः -र्त्ता -र्त्तं in comp.—(Unfortunate) विपन्नः -न्ना -न्नं, दुर्गतः -ता -तं. 'Bad,' as a general word, is often expressed by दुर्, कु, कत्, or sometimes by वि or अप prefixed; as, 'a bad road,' दुरध्वः, कुपथं, कदध्वा *m.* (न्), विमार्गः; 'a bad man,' दुर्ज्जनः, दुराचारः; 'bad weather,' दुर्द्दिनं; 'bad food,' कदन्नं; 'bad thing,' अपद्रव्यं; 'bad conduct,' दुर्णयः, कुकर्म्म *n.* (न्), अपकर्म्म *n.* (न्); 'bad policy,' अनीतिः *f.*

Badge, *s.* चिह्नं, लिङ्गं, व्यञ्जनं, लक्षणं.—(Badge of rank) पदचिह्नं, पदसूचकं चिह्नं.

Badger, *s.* गर्त्तवासी जन्तुविशेषः.

Badinage, *s.* लघुवाक्यं, लघूक्तिः *f.*, हास्यवाक्यं, नर्म्म *n.* (न्), टट्टरी.

Badly, *adv.* दुष्ठु, दुष्टं, अभद्रं. Often expressed by दुर्, कु, अप prefixed; as, 'badly managed,' दुर्णीतः -ता -तं; 'badly shaped,' कुरूपः -पी -पं; 'badly-behaved,' दुःशीलः, कुशीलः; 'badly done,' दुष्कृतः -ता -तं, अपकृतः -ता -तं.

Badness, *s.* दुष्टता, दौष्ठ्यं, निर्गुणत्वं, नीचता, अभद्रता, कदर्य्यत्वं.—(Of character) दुरात्मता, दुराचारत्वं.

To baffle, *v. a.* (To make ineffectual) मोघीकृ, निष्फल् (nom. निष्फलयति -यितुं), खण्ड् (c. 10. खण्डयति -यितुं), व्यर्थीकृ, प्रतिहन् (c. 2. -हन्ति -हन्तुं), मुधा कृ, वृथा कृ.—(To defeat) पराभू (c. 1. -भवति -भवितुं), पराजि (c. 1. -जयति -ते -जेतुं).

Baffled, *p. p.* प्रतिहतः -ता -तं, मोघाशः -शा -शं, मनोहतः -ता -तं, प्रति-

बद्धः -द्धा -द्धं, भग्नोद्यमः -मा -मं, खण्डितः -ता -तं, खण्डिताशंसः -सा -सं, पराजितः -ता -तं.

BAG, *s.* शाणपुटः -टं, स्यूतः, स्योतः, कोषः, आधारः.

To BAG, *v. a.* (To put into a bag) शाणपुटे or स्यूते or कोषे निधा (c. 3. -दधाति -धातुं) or निविश् in caus. (-वेशयति -यितुं). - (To make tumid) श्वि in caus. (श्वाययति -यितुं).

To BAG, *v. n.* (To swell out like a bag) स्यूतवत् लस् (c. 1. लसते, लसितुं), प्रलस्, or पृ in pass. (पूर्य्यते), or श्वि (c. 1. श्वयति, श्वयितुं).

BAGATELLE, *s.* स्वल्पविषयः. अल्पमूल्यद्रव्यं, क्षुद्रद्रव्यं, क्षुद्रविषयः.

BAGGAGE, *s.* (The furniture of an army) सामग्री -ग्र्यं, भारः, उपकरणं, परिच्छदः.—(A worthless woman) पुंश्चली *f.*, वेश्या, बन्धकी.

BAGNIO, *s.* (A house for bathing) स्नानागारं, गात्रमार्ज्जनशाला.—(A brothel) वेश्यालयः.

BAIL, *s.* (Security for one's appearance) दर्शनप्रतिभूः *m.*, दर्शनप्रातिभाव्यं, प्रतिनिधिः *m.* प्रतिभूः *m.* प्रातिभाव्यं. पारिभाव्यं, लग्नकः. न्यासः, अन्वाधिः *m.*, बन्धकः. तृणमत्कुणः.—(The person who gives the security) प्रतिनिधिः *m.*, प्रतिभूः *m.*, लग्नकदायी *m.* (न्).

To BAIL, *v. a.* (To give bail for another) प्रतिनिधिः or प्रतिभूः भू, लग्नकं दा (c. 3. ददाति, दातुं).

BAILABLE, *a.* यो लग्नकं दत्त्वा मोक्तुं शक्यते or शक्यः.

BAILIFF, *s.* (An officer who arrests) आसेद्धा *m.* (द्धृ), आसेधकर्त्ता *m.* (र्त्तृ), ग्राहकः. यष्टिधरः, दण्डनायकः. -(A steward) कार्य्याधीशः.

BAILMENT, *s.* आक्षेपः.

BAIRN, *s.* बालः, बालकः, शिशुः *m.*

To BAIT, *v. a.* (To put meat on a hook to tempt animals) मत्स्यादिग्रहणार्थं वडिशे आमिषादि निधा (c. 3. -दधाति -धातुं), or निविश् in caus. (-वेशयति -यितुं). (To give food to horses on the road) मध्ययाने यवादिना वाहनानि भुज् in caus. (भोजयति -यितुं). यानश्रान्तानि वाहनानि विश्रम् in caus. (-श्रामयति -यितुं).—(To incite dogs to attack a bull) वृषभम् आक्रमितुं कुक्कुरान् प्रचुद् in caus. (-चोदयति -यितुं).

To BAIT, *v. n.* (To stop on the road for refreshment) मध्ययाने भोजनार्थं विश्रम् (c. 4. -श्राम्यति -श्रमितुं).

BAIT, *s.* मत्स्यग्रहणार्थं यद् आमिषं वडिशे निवेश्यते.—(Temptation) प्रलोभनं.

BAIZE, *s.* शाणं, कम्बलः, ऊर्णामयो वस्त्रविशेषः.

To BAKE, *v. a.* आपाके or कन्दौ or चुल्लौ पच् (c. 1. पचति, पक्तुं) or तप् (c. 1. तपति, तप्तुं, c. 10. तापयति -यितुं) or भ्रस्ज् (c. 6. भृज्जति, भ्रष्टुं), कान्दवीकृ.

To BAKE, *v. n.* (To be heated) तप् in pass. (तप्यते). पच् in pass. (पच्यते).

BAKED, *p. p.* कान्दवः -वा -वं, उख्यः -ख्या -ख्यं, कन्दुपक्वः -क्वा -क्वं.

BAKEHOUSE, *s.* आपाकः, कन्दुः *m. f.*, पूपागारं, पूपशाला.

BAKE-MEATS, *s.* कान्दवं, कान्दवान्नं, उख्यं, पक्वान्नं, आपूपिकं, शाष्कुलिकं.

BAKER, *s.* आपूपिकः, कान्दविकः, मोदककृत्, भक्ष्यकारः.

BAKING, *s.* कन्दुपचनं, चुल्लिपचनं, पचनं, तपनं, तापनं.

BALANCE, *s.* (Scales) तुला, मापनः, मापनदण्डं, तोलं, तोलदण्डं.—(The act of comparing two things in the mind) विवेचनं, विकल्पनं, विगणनं, उपमानं.—(That which is wanting to make two parts of an account even) अवशेषः, शेषं, शेषभागः, अधिकांशः, न्यूनांशः.—(Equipoise) तुल्यता, भारतुल्यता.

To BALANCE, *v. a.* (To weigh in a balance) तुल् (nom. तुलयति -यितुं), तूल् (c. 10. तूलयति).—(In the mind) विक्लृप् in caus. (-कल्पयति -यितुं), विगण् (c. 10. -गणयति -यितुं).—(To equipoise) समीकृ, तुल्यभारं -रां -रं कृ.—(To regulate an account) शुध् in caus. (शोधयति -यितुं), समीकृ, अपनयनं कृ, विगणनं कृ.

To BALANCE, *v. n.* (To hesitate, fluctuate) दोल (nom. दोलायते -यितुं), विक्लृप् (c. 1. -कल्पते -कल्पितुं).—(To be equipollent) समीभू, तुल्यीभू.

BALANCED, *p. p.* तुलितः -ता -तं, समीकृतः -ता -तं, तुल्यभारः -रा -रं.—(As an account) शोधितः -ता -तं, अपनीतः -ता -तं, विगणितः -ता -तं.

BALARÁMA, *s.* (A celebrated demigod, half-brother to Kṛishńa, and the third of the Rámas; and considered to be the eighth avatár of Vishńu) बलरामः, बलदेवः, रामः.—As elder brother of Kṛishńa) अच्युताग्रजः.—(As armed with a plough-share) हलायुधः. हलभृत् *m.*, हली *m.* (न्), सीरपाणिः, सङ्कर्षणः.—(As carrying a pestle-like club) मुसली *m.* (न्).—(As having the palm for a banner) तालध्वजः, तालाङ्कः.—(As diverting the stream of the Yamuna) कालिन्दीभेदनः.—(As dressed in blue) नीलाम्बरः.—(As husband of Revatí) रेवतीरमणः.—(As killer of a certain demon) प्रलम्बघ्नः.—(As guardian of Káma) कामपालः.

BALCONY, *s.* वरण्डः, इन्द्रकोषः, प्रग्रीवः -वं, निष्काशः, वितर्द्दिः *f.* or -र्द्दी.

BALD, *a.* (Without hair) मुण्डः -ण्डा -ण्डं, मुण्डितः -ता -तं, अकेशः -शा -शं. विकेशः -शी -शं, केशहीनः -ना -नं.—(Without natural covering) अनावृतः -ता -तं, विवृतः -ता -तं, नग्नः -ग्ना -ग्नं.—(Unadorned, inelegant) असंस्कृतः -ता -तं, अपरिष्कृतः -ता -तं, असभ्यः -भ्या -भ्यं.—(As style) अलङ्कारहीनः -ना -नं, अव्यञ्जनः -ना -नं.

BALDERDASH, *s.* (Any thing jumbled together) प्रकीर्णकं.—(Nonsense) अनर्थकवाक्यं, आलस्यवचनं, वृथाकथा.

BALDNESS, *s.* मौण्ड्यं, मुण्डता, अकेशत्वं.—(Inelegance) असभ्यता.

BALD-PATED, *a.* मुण्डितशिराः -राः -रः (स्), मुण्डमस्तकः -का -कं. नग्नमस्तकः -का -कं.

BALDRICK, *s.* (A girdle) मेखला, काञ्ची.—(The zodiac) राशिचक्रं. राशिमण्डलं, लग्नमण्डलं, ज्योतिश्चक्रं.

BALE, *s.* भाण्डकं, भाण्डं, द्रव्यकूर्चं, पोटलिका, द्रव्यपोट्टली, भारः.

To BALE, *v. a.* (To make up into a bale) भाण्डं कृ, द्रव्याणि कूर्चीकृ. (To bale out water) अब्भ्रिणा or द्रोण्या जलम् उत्क्षिप् (c. 6. -क्षिपति -क्षेप्तुं) or उत्तुल् (c. 10. -तोलयति -यितुं).

BALEFUL, *a.* (Full of misery) क्लेशी -शिनी -शि (न्), दुःखी -खिनी -खि (न्), सशोकः -का -कं, शोकान्वितः -ता -तं.—(Destructive) नाशी -शिनी -शि (न्), आत्ययिकः -की -कं, प्राणहरः -रा -रं, क्लेशकः -की -कं, हिंस्रः -स्रा -स्रं.

BALEFULLY, *adv.* सशोकं, सक्लेशं, दुःखेन, यथा हिंसा जायते तथा.

BALING-VESSEL, *s.* सेकपात्रं, सेचनं, सेक्तृ, अब्भ्रि *n.*, अभ्रिः *f.*, असुसेचनी, द्रोणिः *f.*, -णी, अवगाहः, काष्ठकुद्दालः, काष्ठाम्बुवाहिनी *f.*

BALK, *s.* (A ridge of land left unploughed) सेतुः *m.*

To BALK *v. a.* (To frustrate, disappoint) खण्ड् (c. 10. खण्डयति -यितुं), प्रतिहन् (c. 2. -हन्ति -हन्तुं), वृथा कृ, मुधा कृ, भग्नाशं -शां -शं कृ, मोघाशं -शां -शं कृ, व्यर्थीकृ, मोघीकृ, वञ्च् in caus. (वञ्चयति -यितुं).

BALKED, *p. p.* प्रतिहतः -ता -तं, भग्नोद्यमः -मा -मं, खण्डितः -ता -तं, वञ्चितः -ता -तं, परिवञ्चितः -ता -तं, विप्रलब्धः -ब्धा -ब्धं.

BALKH, *s.* (The country) वाह्लीकः.

BALL, *s.* (Any thing round) गोलः -लं, मण्डलं, परिमण्डलं, गोलकः, वर्त्तुलः, निघः, पिण्डः.—(The ball of the earth) भूगोलः, भूमण्डलं.—(For playing) कन्दुकः, गुडः, गेन्दुः *m.*, गेन्दुकः, गिरिः *m.*—(A dancing party) सहनर्त्तनं, नृत्यक्रीडा.—(A ball of thread) सूत्रकोषं.—(Ball of the eye) अक्षिगोलः.—(Ball-room) नृत्यस्थानं, रङ्गशाला, वासकर्णी *f.*

To BALL, *v. a.* (To make into a ball) वर्त्तुलीकृ, गोलीकृ.

BALLAD, *s.* (A song) गीतं, गानं, गीतिः *f.*, सङ्गीतं.

BALLAD-SINGER, *s.* गायकः, गाथाकारः, गाथकः, गाता *m.* (तृ).

BALLAST, *s.* नाव अधोभागे स्थापितो भारः, पोतस्थिरीकरणाय तदधोभागे यत् प्रस्तरवालुकादि द्रव्यं निवेश्यते, स्थैर्य्यद्रव्यं.

To BALLAST, *v. a.* नौकायाः स्थिरीकरणाय तदधोभागे भारं स्था in caus. (स्थापयति -यितुं), स्थिरीकृ.

BALLOON, *s.* आकाशयानं, व्योमयानं, आकाशवर्त्मना गमनार्थं विमानं.

BALLOT, *s.* (A ball or ticket used in voting) गुटिका, गुलिका, काकिनी *f.*, कपर्द्दकः, स्वीकृतास्वीकृतचिह्नं.—(The act of voting by ballot) गुटिकां निभृतं पातयित्वा स्वीकृतास्वीकृतज्ञापनं or मतामतसूचनं.

To BALLOT, *v. n.* स्वीकृतास्वीकृतज्ञापनाय गुटिकां निभृतं पत in caus. (पातयति -यितुं).

BALM, *s.* (The juice of a shrub) गुग्गुलुः *m.*—(That which alleviates) प्रशमनं, शान्तिः *f.*, उपशान्तिः *f.*, वेदनाशान्तिः *f.*

BALMY, *a.* (Having the qualities of balm) पूर्व्वोक्तवृक्षरसोपेतः -ता -तं.—(Soothing) उपशमकः -का -कं, उपशायी -यिनी -यि (न्).—(Fragrant) सौगन्धिकः -की -कं, सुरभिः -भिः -भि.

BALSAM, *s.* (Ointment, unguent) विलेपः, विलेपनं, उपदेहः, अभ्यञ्जनं.

BALSAMIC, *a.* (Unctuous) स्निग्धः -ग्धा -ग्धं, मेदुरः -रा -रं, प्रमेदितः -ता -तं, चिक्कणः -णा -णं, स्नेही -हिनी -हि (न्), मृदुः -द्वी -दु.

BALUSTRADE, *s.* पङ्क्तिक्रमेण रचितः क्षुद्रस्तम्भसमूहः, क्षुद्रस्तम्भश्रेणी.

BAMBOO, *s.* वेणुः, वंशः, वेतसः, त्वक्सारः, शतपर्व्वा *m.* (न्), मस्करः, तृणध्वजः, यवफलः, तेजनः, कर्म्मारः.—(When rattling) कीचकः.

To BAMBOOZLE, *v. a.* (To cheat) वञ्च् in caus. (वञ्चयते -यितुं), परिवञ्च्, प्रलभ् (c. 1. -लभते -लब्धुं), विप्रलभ्, छल् (c. 10. छलयति -यितुं).

BAMBOOZLED, *p. p.* वञ्चितः -ता -तं, प्रलब्धः -ब्धा -ब्धं, विप्रलब्धः -ब्धा -ब्धं.

BAMBOOZLER, *s.* वञ्चकः, छली *m.* (न्), धूर्त्तः, कूटकः, कितवः, प्रतारकः.

BAN, *s.* (Public notice of any thing) घोषणं -णा, घोषणापत्रं, उत्कीर्त्तनं, समाचारः.—(A curse) शापः, अभिशापः, आक्रोशः; 'under a ban,' शापग्रस्तः -स्ता -स्तं.—(Interdiction) निषेधः, प्रतिषेधः, वारणं, विरोधः.

To BAN, *v. a.* (To curse) शप् (c. 1. शपति -ते, c. 4. शप्यति, शप्तुं), अभिशप्, परिशप्.

BANANA, *s.* कदली, तृणसारा, गुच्छफला, वारणवुषा, रम्भा, मोचा, काष्ठीला.

BAND, *s.* (That which binds) बन्धनं or -नी or -नः.—(Bond) पाशः, शृङ्खलं.—(Union or connection) सम्बन्धः, संयोगः.—(A company of persons) पङ्क्तिः *f.*, समूहः, श्रेणी, समागमः.—(Of musical instruments) वाद्यभाण्डं, वादित्रगणः, तूर्य्यौघः.—(A company of soldiers) गुल्मः, सैनिकः.

To BAND, *v. a.* संयुज् (c. 10. -योजयति -यितुं), एकत्र कृ.

To BAND, *v. n.* एकत्र मिल् (c. 6. मिलति, मेलितुं), सम्मिल्.

BANDAGE, *s.* पट्टः, बन्धनं, पट्टकः, आवेष्टनं, कवलिका.—(Securing with bandages in surgery) अनुवेल्लितं.

BANDBOX, *s.* यत् किञ्चित्सपुवस्त्रं स्त्रीलोकेन भृतं तदाधानयोग्यः सम्पुटकः or आधारः.

BANDIT, *s.* परिपन्थी *m.* (न्), दस्युः, प्रसह्यचौरः, चौरः, विप्लवकारी *m.* (न्), आरण्यिकमनुष्यः.

To BANDY, *v. a.* (To toss to and fro) इतस्ततः or इतश्चेतः क्षिप् (c. 6. क्षिपति, क्षेप्तुं).—(To give and take reciprocally) निमे (c. 1. -मयते -मातुं), विनिमे, परिवृत् in caus. (-वर्त्तयति -यितुं).

BANDY-LEGGED, *a.* प्रज्ञुः -ज्ञुः -ज्ञु, प्रगतजानुः -नुः -नु, विरलजानुः -नुः -नु.

BANE, *s.* (Poison) विषं, गरः -रं, हलाहलः.—(Ruin) नाशः, विनाशः, अत्ययः, दूषणं.—(Causing ruin) दूषकः.

BANEFUL, *a.* (Poisonous) विषधरः -रा -रं, गरली -लिनी -लि (न्). विषान्वितः -ता -तं, विषतुल्यः -ल्या -ल्यं.—(Destructive) नाशी -शिनी -शि (न्), विनाशकः -का -कं, आत्ययिकः -की -कं, दूषकः -का -कं, हिंस्रः -स्रा -स्रं.

BANEFULNESS, *s.* विषालुता, नाशित्वं, हिंस्रता, सगरता.

To BANG, *v. a.* (To beat, thump) तड् (c. 10. ताडयति -यितुं), प्रहृ (c. 1. -हरति -हर्त्तुं), तुद् (c. 6. -तुदति -तोत्तुं), आतुद्.

BANG, *s.* आघातः, अभिघातः, प्रहारः, मुष्टिपातः, कराघातः.

To BANISH, *v. a.* (To another country) विवस् in caus. (-वासयति -यितुं), निर्वस्, प्रवस्, विप्रवस्, प्रव्रज् in caus. (-व्राजयति -यितुं), देशान्तरीकृ.—(To drive away) निराकृ (c. 8. -करोति -कर्त्तुं), वहिष्कृ or वहिः कृ, निःसृ, in caus. (-सारयति -यितुं), उत्सृ; अपानुद् (c. 6. -नुदति -नोत्तुं), निरस् (c. 4. -अस्यति -असितुं).

BANISHED, *p. p.* प्रवासितः -ता -तं, विवासितः -ता -तं, निःसारितः -ता -तं, वहिष्कृतः -ता -तं, निरस्तः -स्ता -स्तं, निराकृतः -ता -तं, निःकासितः -ता -तं, अवकृष्टः -ष्टा -ष्टं.

BANISHMENT, *s.* (The act) प्रवासनं, विवासनं, निर्वासनं, प्रव्राजनं, निःसारणं, निरसनं, अपनोदनं, निराकरणं.—(The state) प्रवासः, विवासः.

BANISTER, *s.* सोपाने उभयतः स्थापिता क्षुद्रस्तम्भपङ्क्तिः.

BANK, *s.* (Of a river) तीरं, तटं -टः, कूलं, प्रतीरं, कच्छः, रोधः *n.* (स्); 'the opposite bank,' पारं, तीरान्तरं; 'the near bank,' अवारं.—(Any heap) चयः, कूलं, पिण्डनः, वप्रः; 'sand-bank,' सैकतं.—(A place where money is laid up) धनागारं, मुद्रागारं, निक्षिप्तधनागारं, टङ्कागारं.

To BANK, *v. a.* (To inclose with a bank) कूलेन or वप्रेण परिवेष्ट् (c. 1. -वेष्टते -वेष्टितुं).—(To lay up money in a bank) धनागारे धनं निक्षिप् (c. 6. -क्षिपति -क्षेप्तुं) or न्यस् (c. 4. -अस्यति -असितुं), कुसीदिकं निकटे धनं स्था in caus. (स्थापयति -यितुं).

BANK-BILL, BANK-NOTE, *s.* आनृण्यप्रतिज्ञापत्रं or ऋणशोधनप्रतिज्ञापत्रं यद्दर्शनाद् मुद्रागारे निक्षिप्तधनं प्रतिदीयते, निक्षिप्तधनविनिमयेन यत् प्रतिज्ञापत्रं प्रचलीक्रियते.

BANKER, *s.* (Keeper of a bank) धनागारपतिः *m.*, मुद्रागारपतिः.—(Trader in money) कुसीदिकः, कलोपजीवी *m.* (न्).

BANKRUPT, *s.* परिक्षीणः, ऋणशोधनाय अक्षम ऋणी (न्) or अधमर्णः or ऋणवान् (त्), असमर्थर्णशोधनः, अशक्तानृण्यः, गतविभवः, सर्व्वस्वच्युतः, निर्धनः, हतसम्पदः.

BANKRUPTCY, *s.* परिक्षीणता, ऋणशोधनाशक्तिः *f.*, ऋणमोक्षासामर्थ्यं, निर्धनता.

BANNER, *s.* पताका, ध्वजः or -जं, केतनं, वैजयन्ती *f.*, ध्वजपटः.

BANNS, *s.* (Of marriage) विवाहघोषणा, विवाहघोषणपत्रं

BANQUET, *s.* उत्सवः, सम्भोजनं, स्वाद्वन्नभोजनं.

To BANQUET, *v. a.* स्वाद्वन्नैः or मिष्टान्नैः or भोजनविशेषैः or सविशेषपानैः भुज in caus. (भोजयति -यितुं) or सन्तुष् in caus. (-तोषयति -यितुं)

or संवृध् in caus. (-वर्द्धयति -यितुं) or तृप् in caus. (तर्पयति -यितुं).

To BANQUET, *v. n.* उत्सवं कृ, विशिष्टान्नं or स्वाद्वन्नं or भोजनविशेषान् or सविशेषान्नं भुज् (c. 7. भुंक्ते, भोक्तुं), विशिष्टरूपेण आहारं कृ, आत्मम्भरिः -रिः -रि अस्.

BANQUETER, *s.* उत्सवकर्त्ता *m.* (र्तृ), विशिष्टान्नभोक्ता *m.* (क्तृ), स्वाद्वन्नसन्तोषितः, स्वाद्वन्नभक्षकः.

BANQUETING, *s.* उत्सवकरणं, विशिष्टान्नभोजनं, स्वाद्वन्नखादनं.

To BANTER, *v. a.* अवहस् (c. 1. -हसति -हसितुं), अपहस्, विहस् with acc.; अवक्षिप् (c. 6. -क्षिपति -क्षेप्तुं), भर्त्स् (c. 10. भर्त्सयते -ति -यितुं), निन्द् (c. 1. निन्दति, निन्दितुं).

BANTERER, *s.* अवक्षेपकः, क्षेपकः, निन्दकः, परिहासवेदी *m.* (न्).

BANTLING, *s.* बालः, -ला, बालकः, शिशुः *m.*

BANYAN-TREE, *s.* वटः, न्यग्रोधः, पर्कटी.

BAPTISM, *s.* मज्जनं, जलसंस्कारः, अवगाहनं.

BAPTISMAL, *a.* मज्जनसम्बन्धी -न्धिनी -न्धि (न्), जलसंस्कारविषयः -या -यं.

BAPTIST, *s.* मज्जयिता *m.* (तृ), अवगाहकः, जलसंस्कारकर्त्ता *m.* (र्तृ).

BAPTISTERY, *s.* मज्जनस्थानं, अवगाहनस्थानं, जलसंस्कारकरणस्थानं.

To BAPTIZE, *v. a.* मस्ज् in caus. (मज्जयति -यितुं), निमस्ज्, अवगाह् in caus. (-गाहयति -यितुं), जलसंस्कारं कृ.

BAR, *s.* (Of a door) अर्गलं.—(Of a cage) शलाका.—(Any obstacle) विघ्नः, अवरोधः -धकं, व्याघातः, प्रतिष्टम्भः, बाधकः, प्रतिबन्धः, प्रत्यूहः.—(A sand-bank) सैकतं.—(The place where criminals are tried) धर्म्मसभा, विचारस्थानं.—(A solid mass of metal) लोहपिण्डः -ण्डं, कुशी.—(In music) तालनियामका रेखा.—(In a tavern) शुण्डापाने मद्यक्रेतृविक्रेत्रोरभ्यन्तरे स्थापितम् अवरोधकं तत्र च तन्मध्ये विगणनं क्रियते.

To BAR, *v. a.* (To fasten with a bar) अर्गलेन बन्ध् (c. 9. बध्नाति, बद्धुं).—(To hinder) वृ in caus. (वारयति -यितुं), निवृ, प्रतिवृ; प्रतिरुध् (c. 7. -रुणद्धि -रोद्धुं), निरुध्, विरुध्, प्रतिबन्ध्.—(To shut out from) निराकृ, निरस् (c. 4. -अस्यति -असितुं).—(To exclude) वहिष्कृ, निराकृ.—(To prohibit) प्रतिषिध् (c. 1. -सेधति -सेद्धुं), निषिध्; अन्तःख्या (c. 2. -ख्याति -ख्यातुं).

BARB, *s.* (A species of horse brought from Barbary) विदेशजातीयः मृतनुकायविशिष्टस् तुरगप्रभेदः.—(A crooked point) फलं, कर्णः, शूलाग्रं, शरफलं.—(Armour for horses) प्रखरः, प्रक्षरः, अश्वतनुत्रं, अश्वसज्जा.

BARBACAN, *s.* प्राकारीयनगरोपान्ते निर्म्मितं दुर्गं.

BARBARIAN, *s.* म्लेच्छः, म्लेच्छजातिः *m.*, शबरः, किरातः, खुधुनः, पुलिन्दः.—(An uncivilized man) असभ्यलोकः, पुरुषपशुः.—(A foreigner) विदेशी *m.* (न्).—(A cruel tyrant) निर्दयः.—(The country of barbarians) प्रत्यन्तः.

BARBARIAN, BARBARIC, *a.* (Belonging to barbarians) म्लेच्छी -च्छिनी -च्छि (न्), विदेशी -शिनी -शि (न्), वैदेशिकः -की -कं.—(Uncivilized) असभ्यः -भ्या -भ्यं, असंस्कृतः -ता -तं, अशिष्टः -ष्टा -ष्टं.

BARBARISM, *s.* (In grammar) म्लेच्छितं.—(Savageness of manners) क्रूरता, क्रूराचारता, म्लेच्छत्वं, पशुता, दुराचारत्वं.

BARBARITY, *s.* (Cruelty) निष्ठुरता, निर्दयत्वं, क्रूरता.—(Of manners) असभ्यता, क्रूराचारता.

BARBAROUS, *a.* (Foreign) म्लेच्छीयः -या -यं, वैदेशिकः -की -कं.—(Savage in manners) क्रूराचारः -रा -रं, कुशीलः -ला -लं, दुराचारः -रा -रं, अशिष्टः -ष्टा -ष्टं, श्वापदः -दी -दं.—(Cruel) निष्ठुरः -रा -रं, निर्दयः -या -यं, क्रूरः -रा -रं.

BARBAROUSLY, *adv.* म्लेच्छवत्, असभ्यलोकवत्, पशुवत्, श्वापदवत्.—(Cruelly) निर्दयं, निष्ठुरं, अतिक्रूरतया.

BARBED, *a.* कर्णी -र्णिनी -र्णि (न्), फलयुक्तः -क्ता -क्तं, लौहाग्रयुक्तः -क्ता -क्तं.—(Mailed) वर्म्मितः -ता -तं, कवची -चिनी -चि (न्), परिदंशितः -ता -तं.

BARBEL, *s.* नादेयमत्स्यविशेषः.

BARBER, *s.* नापितः, क्षुरी *m.* (न्), मुण्डी *m.* (न्), क्षौरिकः, अन्तावसायी *m.* (न्), दिवाकीर्त्तिः *m.*; 'a barber's business,' नापित्यं.

BARBES, *s. pl.* (A disease of horses) अश्वीयरोगविशेषः.

BARD, *s.* मागधः, वन्दी *m.* (न्), मधुकः.—(Poet) कविः *m.*, काव्यशास्त्रज्ञः.

BARDICK, *a.* मागधसम्बन्धी -न्धिनी -न्धि (न्), काव्यशास्त्रसम्बन्धीयः -या -यं.

BARE, *a.* (Naked) नग्नः -ग्ना -ग्नं.—(Without ornament) अभूषितः -ता -तं, अनलङ्कृतः -ता -तं, असंस्कृतः -ता -तं.—(Unclothed) विवस्त्रः -स्त्रा -स्त्रं.—(Uncovered) अनावृतः -ता -तं, विवृतः -ता -तं, अपवृतः -ता -तं.—(Mere) केवलः -ला -लं, मात्रकः -का -कं, मात्रं.—(Threadbare, worn) जीर्णः -र्णा -र्णं; 'the bare ground,' केवला भूमिः, पृथिवीतलं, भूतलं.

To BARE, *v. a.* (To strip, uncover) नग्नीकृ; व्यक्तीकृ; उच्छद् (c. 10. -छादयति -यितुं), विवृ (c. 5. -वृणोति -वरितुं -वरीतुं).

BARED, *p. p.* नग्नीकृतः -ता -तं, व्यक्तीकृतः -ता -तं, विवृतः -ता -तं.

BAREFACED, *a.* (Shameless) निर्लज्जः -ज्जा -ज्जं, लज्जाहीनः -ना -नं, धृष्टः -ष्टा -ष्टं.

BAREFACEDNESS, *s.* निर्लज्जत्वं, धृष्टता, धार्ष्ट्यं, प्रगल्भता, प्रागल्भ्यं, वैयात्यं.

BAREFOOT, *a.* नग्नपादः -दा -दं, शून्यपादः -दा -दं, पादुकाहीनः -ना -नं.

BAREHEADED, *a.* नग्नशिराः -राः -रः (स्), शून्यमस्तकः -का -कं, अनावृतशिराः -राः -रः (स्).

BARELY, *adv.* (Merely) मात्रं, केवलं.—(Hardly) कष्टं, कष्टेन, कृच्छ्रेण.—(Nakedly)—नग्नं, शून्यं, आच्छादनव्यतिरेकेण.—(Without ornament) अलङ्कारव्यतिरेकेण, भूषणं विना.

BARENESS, *s.* (Nakedness) नग्नत्वं, शून्यता, रिक्तता.—(Leanness, poverty) क्षीणता, दरिद्रता, दैन्यं.

BARGAIN, *s.* (A contract, agreement) समयः, नियमः, संविद् *f.*, उपगमः, अभ्युपगमः, संश्रवः, आश्रवः, समाधिः *m.*, उद्देशः.—(Contract concerning the price of a thing sold) पणः, विपणः, क्रयनियमः, क्रयविक्रयनियमः, क्रयपत्रं.

To BARGAIN, *v. n.* पण् (c. 1. पणते, पणितुं or पणायति -यितुं), पणं कृ, सङ्घट्ट् (c. 1. -घट्टते -घट्टितुं), समयाकृ, नियमीकृ, क्रयविक्रयनियमं कृ.

BARGAINED, *p. p.* पणितः -ता -तं, पणायितः -ता -तं, सङ्घट्टितः -ता -तं.

BARGE, *s.* तरालुः *m.*, तरान्धुः *m.*, वहित्रं.—(Pleasure-boat) केलिनौका.

BARGEMAN, *s.* नाविकः, पोतवाहः, पृष्ठोक्तनौकाकर्णधारः, तरिकः.

BARK, *s.* वल्कलः -लं, वल्कं, त्वक् *f.* (च्), त्वचं, छल्ली *f.*, शल्कं, शल्कलं; 'bark of a tree,' तरुत्वक् *f.* (च्).—(Made of bark) त्वङ्मयः -यी -यं, तरुत्वङ्निर्म्मितः -ता -तं, वाल्कलः -ली -लं.—(Garment of) वल्कलः.—(A small ship) पोतः, क्षुद्रनौका.

To BARK, *v. a.* (To strip trees of their bark) त्वच् (nom. त्वचयति -यितुं), वल्क् (nom. वल्कयति -यितुं), त्वक्ष् (c. 1. त्वक्षति, त्वक्षितुं), वल्कम् उत्कृष् (c. 1. -कर्षति -क्रष्टुं) or निष्कृष्.—(To enclose, as bark) वल्कलवत् परिवेष्ट् (c. 1. -वेष्टते -वेष्टितुं).

To BARK, *v. n.* भष् (c. 1. भषति, भषितुं), बुक्क् (c. 1. बुक्कति, बुक्कितुं, c. 10. बुक्कयति -यितुं), रै (c. 1. रायति, रातुं).—(To revile) आक्रुश् (c. 1. -क्रोशति -क्रोष्टुं), मुखरीकृ.

Barker, *s.* भषकः.—(Reviler) आक्रोशकः.

Barking, *s.* (Of dogs) भषणं, बुक्कनं, रायणं, रुतं.

Barky, *a.* वाल्कः -ल्की -ल्कं, वाल्कलः -ली -लं, त्वङ्मयः -यी -यं.

Barleria, *s.* (A flower) वाणा, आर्त्तगलः, कुरवकः, सहचरी, क्षुरः.

Barley, *s.* यवः, यवकः, तीक्ष्णशूकः, प्रवेटः, शितशूकः; 'unripe barley,' तोक्मः, यावकः, कुल्माषं; 'barley-meal,' यवक्षोदः; 'barley-water,' उदमन्थः; 'made of barley,' यवमयः -यी -यं; 'sown with barley,' यव्यः -व्या -व्यं.

Barley-broth, *s.* यवसुरं, यवनिर्म्मितं पानीयं, यवरसः.

Barley-corn, *s.* यवः, तिर्य्यग्यवोदरं.

Barley-mow, *s.* लूनयवसङ्ग्रहणस्थानं, यवे लूने सति तत्सञ्चयनस्थानं.

Barley-sugar, *s.* यवरसक्वथित इक्षुसारः, माधिकशर्करा, शुक्लोपला.

Barm, *s.* सुरामण्डः, मद्यमण्डः, कारोत्तरः, कारोत्तमः, अभिषवः.

Barn, *s.* कुशूलः, शस्यभाण्डं, भाण्डागारः, धान्यागारः, धान्यकोष्ठकं, धान्यसङ्ग्रहस्थानं.

Barnacle, *s.* (A kind of shell-fish) नौकाकाष्ठजः शम्बूकविशेषः.—(An instrument to hold a horse by the nose) पाशविशेषो येन तुरङ्गो मुखदेशे ध्रियमाणोऽश्वचिकित्सकेन चिकित्सितुं शक्यते.—(A kind of bird) हंसजातीयः पक्षिप्रभेदः.

Barometer, *s.* आकाशतोलनयन्त्रं, आकाशपरिमाणार्थं पारदपूरिता काचनाली.

Baron, *s.* क्रमागतानां कुलीनपदानां मध्ये पदप्रभेदः, अधिपतिः *m.*, स्वामी *m.* (न्).—(Baron of beef) गोपृष्ठं, उभयपार्श्वीयपृष्ठयुक्तं गोमांसं.

Baroness, *s.* वक्ष्यमाणकुलीनपदस्थितस्य पुरुषस्य पत्नी or भार्य्या.

Baronet, *s.* क्रमागतानां कुलीनपदानां मध्ये अवरपदं यस्य सः.

Baronial, *a.* पूर्व्वोक्तकुलीनपदसम्बन्धी -न्धिनी -न्धि (न्).

Barony, *s.* पूर्व्वोक्तकुलीनपदसम्बन्धीयम् आधिपत्यं or स्वाम्यं.

Barrack, *s.* सैन्यागारं, सैन्यालयः, अयुद्धसमये सैन्यनिवासस्थानं, सैन्यायामः.

To **barrack**, *v. a.* सैन्यान् सैन्यागारे पृथक् पृथक् स्था in caus. (स्थापयति -यितुं), or वस् in caus. (वासयति -यितुं).

Barred, *p.p.* विरुद्धः -द्धा -द्धं, प्रतिबद्धः -द्धा -द्धं, निषिद्धः -द्धा -द्धं, बाधितः -ता -तं.

Barrel, *s.* (A small cask) दीर्घगोलाकारं काष्ठनिर्म्मितं पात्रं or भाण्डं.—(A cylinder, as of a gun) नाडिः -डी *f.*, नाली or -ला.

To **barrel**, *v. a.* (To put in a barrel) पूर्व्वोक्तपात्रे निविश् in caus. (-वेशयति -यितुं).

Barren, *a.* (Not prolific) वन्ध्यः -न्ध्या -न्ध्यं, असुती -तिनी -ति (न्), अप्रसवी -विनी -वि (न्), प्रजारहितः -ता -तं.—Unfruitful) निष्फलः -ला -लं, अफलः -ला -लं, अवकेशी -शिनी -शि (न्), शुष्कः -ष्का -ष्कं.—(Useless) व्यर्थः -र्था -र्थं, अनर्थकः -का -कं, मोघः -घा -घं.—(Empty) शून्यः -न्या -न्यं, रिक्तः -क्ता -क्तं; 'a barren woman,' वन्ध्या, अप्रसूता; 'a barren soil,' मरुस्थलं or -ली.

Barrenness, *s.* वन्ध्यता, निष्फलता, वैयर्थ्यं, शुष्कता, शून्यता.—(In a female) वन्ध्यात्वं.

Barricade or barricado, *s.* प्राचीरं, प्राकारः, वप्रः -प्रं, अवरोधकं, पथावरोधः.

To **barricade or barricado**, *v. a.* and *n.* रुध् (c. 7. रुणद्धि, रोद्धुं), प्रतिरुध्, संरुध्; प्रतिबन्ध् (c. 9. -बध्नाति -बद्धुं); प्राचीरेण पथम् अवरुध्.

Barrier, *s.* (A barricade) प्राकारः, प्राचीरं, परिकूटं, वप्रः.—(An obstacle) विघ्नः, प्रतिष्टम्भः, अवरोधकं, प्रतिरोधः, प्रतिबन्धः, सम्बाधनं, प्रत्यूहः.—(A boundary) सीमा, पर्य्यन्तं, परिसीमा.

Barrister, *s.* उत्तरवादी *m.* (न्), परार्थं वादी *m.* (न्), प्रतिवादी *m.* (न्), परार्थे वादानुवादकर्त्ता *m.* (र्तृ), मन्त्री *m.* (न्), मन्त्रकृत्, व्यवस्थानिरूपकः, व्यवहारपण्डितः, स्मृतिशास्त्रज्ञः, धीसचिवः.

Barrow, *s.* (A kind of vehicle) हस्तप्रचालितं वाहनं or यानं.—(A hog) शूकरः.—(A mound) मृत्तिकाराशिः *f.*, उन्नतभूभागः.

To **barter**, *v. n.* (To trade) भाण्डविनिमयेन वाणिज्यं कृ.

To **barter**, *v. a.* (To exchange one article for another) निमे (c. 1. -मयते -मातुं), विमे, विनिमे, भाण्डविनिमयं कृ, परिवृत् in caus. (-वर्त्तयति -यितुं), भाण्डं प्रति भाण्डं दा (c. 3. ददाति, दातुं); 'capable of being bartered,' परिवर्त्तनीयः -या -यं.

Barter, *s.* भाण्डविनिमयः, निमेयः, नैमेयः, विमयः, विनिमयः, वैमेयः, प्रतिदानं, परिदानं, परिवृत्तिः *f.*, परीवर्त्तः, परिवर्त्तः, निमया, व्यतिहारः; 'any thing obtained by barter,' आपमित्यकं.—(Rule of barter in arithmetic) भाण्डप्रतिभाण्डकः.

Barton, *s.* (A poultry-yard) ग्रामकुक्कुटादिरक्षणार्थं वृतिः.

Basalt, *s.* लोहसदृश अतिदृढः कृष्णवर्णः प्रस्तरविशेषः.

Basaltic, पूर्व्वोक्तप्रस्तरसम्बन्धी -न्धिनी -न्धि (न्).

Base, *a.* (Mean, vile) नीचः -चा -चं, अधमः -मा -मं, निकृष्टः -ष्टा -ष्टं अपकृष्टः -ष्टा -ष्टं, खलः -ला -लं, अनार्य्यः -र्य्या -र्य्यं, निर्गुणः -णा -णं दुष्टः -ष्टा -ष्टं, तुच्छः -च्छा -च्छं, जघन्यः -न्या -न्यं, कदर्य्यः -र्य्या -र्य्यं, हीनः -ना -नं, कुत्सितः -ता -तं; 'a base man,' कापुरुषः.—(Of mean parentage) अकुलः -ला -लं, अकुलीनः -ना -नं.—(Of mean spirit) कृपणः -णा -णं, दुष्टभावः -वा -वं; 'base metal,' कुप्यं.

Base or bass, *a.* (As sound) गम्भीरः -रा -रं, धीरः -रा -रं.—(A base sound) मन्द्रः.

Base, *s.* (The bottom of any thing) अधोभागः, मूलं, तलं, उपष्टम्भः, उपान्तं.—(In geometry) मूर्द्धा *m.* (न्), भूमिः *f.*—(Base of a pillar) उपष्टम्भः, स्तम्भस्य अधोभागः.—(Base of a tree) तरुतलं.—(Foundation of a house) भित्तिमूलं, पोटः.

Base-born, *a.* विहीनयोनः -निः -नि, विजातः -ता -तं, कलुषयोनिजः -जा -जं, हीनजातिः -तिः -ति.—(Bastard) जारजः, कुण्डः.

Base-minded, *a.* दुष्टमतिः -तिः -ति, दुष्टचेताः -ताः -तः (स्)

Based, *p. p.* (Founded) मूलः -ला -लं in comp.; 'based on knowledge,' ज्ञानमूलः -ला -लं.

Baseless, *a.* निर्म्मूलः -ला -लं, अमूलः -ला -लं.

Basely, *adv.* अपकृष्टं, निकृष्टं, नीचतया, सदैन्यं, दुर्ज्जनवत्, अधमप्रकारेण, कार्पण्येन.

Basement, *s.* (Foundation of a house) गृहस्य भित्तिमूलं, वास्तु *n.*, पोटः.

Baseness, *s.* (Meanness) नीचता, दुष्टता, निकृष्टता, दैन्यं, कदर्य्यत्वं, अनार्य्यता, खलता.—(Of birth) हीनजातिता, वैजात्यं.—(Of Sound) गाम्भीर्य्यं.—(Of metal) मलं, कुप्यत्वं.

Bashaw, *s.* तर्क्कीयदेशे ख्यातिविशेषः, सेनानीः *m.*, सेनापतिः *m.*, अधिपतिः *m.*

Bashful, *a.* ह्रीमान् -मती -मत् (त्), लज्जावान् -वती -वत् (त्), अपत्रपिष्णुः -ष्णुः -ष्णु, त्रपितः -ता -तं, त्रपायुक्तः -क्ता -क्तं, व्रीडितः -ता -तं, शालीनः -ना -नं.—(Timorous) भीरुः -रुः -रु.

Bashfully, *adv.* लज्जया, सत्रपं, सव्रीडनं.—(Timorously) सचकितं, सभयं.

Bashfulness, *s.* ह्रीः *f.*, लज्जा, त्रपः -पा, अपत्रपा, व्रीडा, व्रीडनं, शालीनत्वं, मन्दाक्षं.—(Timidity) भीरुता.

Basil, *s.* (A plant) तुलसी, मरुवकः, समीरणः, प्रस्थपुष्पः, फणिज्झकः, पर्णासः, जम्भीरः, कठिञ्जरः, कुठेरकः, अर्ज्जकः.

Basilica, *s.* (The middle vein of the arm) बाहुमध्यस्था बृहन्नाडिः

Basilick, *s.* बृहत्पूजाशाला.

Basilisk, *s.* (A kind of serpent) चूडायुक्तः सर्पभेदः.

Basin, *s.* तडागः, जलाशयः, जलाधारः, खातं. See Bason.

Basis, *s.* (Foundation of any thing) मूलं, अधोभागः, उपष्टम्भः, तलं.—(Basis of a pillar) स्तम्भस्य अधोभागः.—(The groundwork of any thing) मूलं, वस्तु *n.*, योनिः *m.*; 'prosperity has virtue for its basis,' धर्म्ममूला सम्पत्तिः; 'the basis or material of cloth,' वस्त्रयोनिः.

To bask, *v. n.* सूर्य्यातपं or सूर्य्यतेजः सेव् (c. 1. सेवते, सेवितुं), प्रतिसूर्य्यं शी (c. 2. शेते, शयितुं) or संविश् (c. 6. -विशति -वेष्टुं).

Basket, *s.* पिटकः, पेटकः, पेटा, डलकं, डल्लकं, करण्डः, मञ्जूषा, कण्डोलः; 'basket-maker,' वैणवः, वैदलकारः; 'basket-work,' वैदलं.

Bason or basin, *s.* (Reservoir) तडागः, जलाशयः, वेशन्तः, पल्वलः -लं, अल्पसरः *n.* (स्), खातं, क्रीडासरः *n.* (स्).—(Round the foot of a tree) आलवालं, आवालं, आवापः.—(Vessel to hold water) द्रोणी, पात्रं, भाण्डं, जलाधारः, काष्ठाम्बुवाहिनी.—(Harbour) खातं, पोतबन्धनस्थानं.—(Scale of a balance) तुलापटः.

Bass, *a.* (In music.) See Base.

Bass, *s.* (Mat) कटः, तृणपूली, तलाची, पादपाशी.

Basso-relievo or bass-relief *s.* प्रतिच्छाया, प्रतिच्छन्दः, उच्चैःप्रकारेण तक्षिता चित्रलेखा.

Bassoon, *s.* शुषिरविशेषः, शुषिरवाद्यप्रभेदः.

Bastard, *s.* जारजः, असतीसुतः, कुण्डः -ण्डी *m.* (न्), उपस्त्रीजातः, दासीपुत्रः, कौलटेरः, कौलटेयः, बन्धुलः, बान्धकिनेयः.—(Born after the death of a husband) गोलकः.

Bastard, *a.* (Illegitimate) विजनितः -ता -तं, विजातः -ता -तं.—(Spurious) कृत्रिमः -मा -मं, कल्पितः -ता -तं.

Bastardy, *s.* जारजातता, जारजत्वं, कुण्डावस्था, उपस्त्रीजातदशा.

To baste, *v. a.* (To beat with a stick) लगुडेन or गदया तड् (c. 10. ताडयति -यितुं), or प्रहृ (c. 1. -हरति -हर्त्तुं), or अभिहन् (c. 2. -हन्ति -हन्तुं), or तुद् (c. 6. तुदति, तोत्तुं).—(To sprinkle meat that is roasting) पच्यमानं or शूलाकृतं मांसं घृतेन सिच् (c. 6. सिञ्चति, सेक्तुं).—(To sew) सीव् (c. 4. सीव्यति, सेवितुं).

Bastile, *s.* प्राकारयुक्तं कारागारं, दुर्गं, दुर्गपरिगतं परिखाप्राचीरादि.

Bastinade or bastinado, *s.* लगुडेन ताडनं, दण्डाघातः, गदाप्रहारः.

Basting, *s.* दण्डाघातनं, लगुडपातनं, गदाप्रहरणं, अभिघातः, ताडनं.

Bastion, *s.* वप्रः -प्रं, दुर्गबहिःपार्श्वे राशीकृता मृत्तिका or उपचितो वप्रः.

Bat, *s.* जतुका, जतूका, अजिनपत्रा, चर्म्मचटका, चर्म्मचटी, भङ्गारी.—(A club) गुलिकाक्रीडायां गुलिकाप्रणोदार्थं यष्टिः *m.* or गदा or लगुडः.

Bat-fowler, *s.* रात्रिकाले जतुकादिव्याधः or पक्षिग्राहकः.

Bat-fowling, *s.* प्रदोषकाले or रात्रिसमये पक्षिग्रहणं.

Batch, *s.* (A number of things) गणः, सङ्घः, सङ्घातः.—(A single baking) आपूपिकं, पैष्टिकं, शाष्कुलिकं, यत्पिष्टकपूपादि एककाले पच्यते.

Batchelor, *s.* अविवाहितः, अकृतदारः, अकृतविवाहः.

To bate, *v. a.* न्यूनीकृ, अल्पीकृ, ह्रस् in caus. (ह्रासयति -यितुं), कन् (nom. कनयति -यितुं), लघ् (nom. लघयति -यितुं), शम् in caus. (शमयति -यितुं), उद्धारं कृ.

To bate, *v. n.* क्षि in pass. (क्षीयते), न्यूनीभू, अल्पीभू, ह्रस् (c. 1. ह्रसति, ह्रसितुं), शम् (c. 4 शाम्यति, शमितुं).

Bateful, *a.* कलहकारी -रिणी -रि (न्), विवादशीलः -ला -लं.

Batement, *s.* न्यूनीकरणं, अल्पीकरणं, न्यूनता, उद्धारः, उद्धरणं.

Bath, *s.* स्नानकुण्डं, स्नानागारं, स्नानशाला, अवगाहः, अवगाहनस्थानं.

To bathe, *v. a.* स्ना in caus. (स्नापयति -यितुं), धाव् (c. 1. धावति, धावितुं or caus. धावयति -यितुं), प्रधाव् in caus., क्षल् (c. 10. क्षालयति -यितुं), प्रक्षल्, निमज्ज् in caus. (-मज्जयति -यितुं), आप्लु in caus. (-प्लावयति -यितुं).

To bathe, *v. n.* स्ना (c. 2. स्नाति, स्नातुं), निमज्ज् (c. 6. -मज्जति -मज्जितुं), अवगाह् (c. 1. -गाहते -गाहितुं -गाढुं), आप्लु (c. 1. -प्लवते -प्लोतुं), अभिषेकं कृ.—(With one's clothes on) सचेलः स्ना.

Bathed, *p. p.* स्नातः -ता -तं, कृतस्नानः -ना -नं, अवगाहितः -ता -तं, अवगाढः -ढा -ढं, आप्लुतः -ता -तं, निमग्नः -ग्ना -ग्नं, धौतः -ता -तं, जलशुचिः -चिः -चि.

Bather, *s.* स्नायी *m.* (न्), कृतस्नानः, स्नाता *m.* (तृ), आप्लवकः, निमज्जनकृत्.

Bathing, *s.* (Act of) स्नानं, मज्जनं, निमज्जनं, आप्लवः, आप्लावः, अवगाहनं, अभिषेकः.—(Religious bathing) सवनं, अभिषवः, सुत्या.—(Relating to bathing) स्नानीयः -या -यं.—(Bathing-gown) स्नानवस्त्रं.

Bathos, *s.* वाक्यालङ्कारविशेषः, गम्भीरता, गाम्भीर्य्यं, नीचता.

Bating, *prep.* वर्ज्जयित्वा, वर्ज्जं, ऋते, अपास्य, व्यतिरिक्तं, व्यतिरेकेण.

Batlet, *s.* वस्त्रधावने रजकैः प्रयुक्तश् चतुष्कोणः काष्ठमुद्गरः.

Batoon, *s.* दण्डः, गदा, लगुडः, यष्टिः *m.*, वेत्रं.

Battalion, *s.* वाहिनी, सैन्यदलं, गुल्मः, व्यूहः, सेनामुखं.

Battel, *s.* यः कश्चिद् व्ययो राजविद्यालये अन्तेवासिना क्रियते तद्गणनापत्रं.

To batten, *v. a.* (To make fat) प्यै in caus. (प्याययति -यितुं), स्फाय् in caus. (स्फावयति -यितुं), संवृध् in caus. (-वर्धयति -यितुं), तृप् in caus. (तर्पयति -यितुं), पीनं -नां -नं कृ.—(To fertilize) सफल (nom. सफलयति -यितुं).

To batten, *v. n.* (To grow fat) प्यै (c. 1. प्यायते, प्यातुं), स्फाय् (c. 1. स्फायते, स्फायितुं), संवृध् (c. 1. -वर्धते -वर्धितुं), आत्मम्भरिः -रिः -रि or उदरम्भरिः -रिः -रि अस्.

To batter, *v. a.* (To shatter) मृद् (c. 9. मृद्नाति, मर्द्दितुं), अवमृद्, प्रमृद्; चूर्ण् (c. 10. चूर्णयति -यितुं), प्रचूर्ण्, मथ् (c. 9. मथ्नाति, मन्थितुं or मथितुं), विमथ्, पिष् (c. 7. पिनष्टि, पेष्टुं), निष्पिष्, प्रतिपिष्; चूर्णीकृ, भञ्ज् (c. 7. भनक्ति, भंक्तुं), प्रभञ्ज्; तड् (c. 10. ताडयति -यितुं), तुद् (c. 6. तुदति, तोत्तुं).

Battered, *p. p.* मृदितः -ता -तं, मर्द्दितः -ता -तं, विमथितः -ता -तं, चूर्णितः -ता -तं, भग्नः -ग्ना -ग्नं, ताडितः -ता -तं, निष्पिष्टः -ष्टा -ष्टं.

Battering-ram, *s.* दुर्गभित्तिमर्द्दने or नगरप्राचीरभञ्जने पूर्व्वकालीनयोधैः प्रयुक्तो मेषमस्तकाकारायो बृहद्दण्डः.

Battery, *s.* (The act of battering) मर्द्दनं, पेषणं, भञ्जनं, आघातनं.—(In law) दण्डपारुष्यं.—(A line of cannon) युद्धयन्त्रश्रेणी.

Battle, *s.* युद्धं, रणः, रणं, सङ्ग्रामः, समरः -रं, विग्रहः, संयुगः, आहवः, आयोधनं, प्रयुद्धं, प्रधनं, संख्यं, सङ्गरः, कलहः, प्रघातः, प्राघातः, समाघातः, मृधं, सम्परायः -यकं, साम्परायिकं, युत् *f.* (ध्), कलिः *m.*, सम्प्रहारः, प्रविदारणं, समुदायः, समित् *f.*, समितिः, समीकं, जन्यं, संयत् *f.*, संस्फोटः, अभिसम्पातः, अभ्यामर्द्दः, अभ्यागमः, आजिः *f.*—(Close fight) नियुद्धं, बाहुयुद्धं.—(Mingled fight) तुमुलं, रणसङ्कुलं.—(Battle-cry) सिंहनादः, क्ष्वेडितं; 'field of battle,' रणभूमिः *f.*

To battle, *v. n.* युध् (c. 4. युध्यते, योद्धुं), कलह् (nom. कलहायते); 'to desire battle,' युध् in des. (युयुत्सते) रणकाम्य् (nom. रणकाम्यति).

Battle-array, *s.* सैन्यव्यूहः, सैन्यविन्यासः, बलविन्यासः, व्यूढिः *f.*, योद्धृश्रेणी.

Battle-axe, *s.* परश्वधः, परशुः *m.*—(Armed with) पारश्वधिकः.

Battledoor, *s.* गुलिकाक्रीडायां दण्डो येन्द्वारा गुलिका प्रणुद्यते or आहन्यते,

कन्दुकप्रहरणार्थं यष्टिः.

TTLE-FIELD, *s.* रणभूमिः *f.*, आयोधनं, रणः, रणाङ्गणं, रणाजिरं, मल्लभूः *f.*, मल्लभूमिः *f.*, रङ्गः, रङ्गभूमिः *f.*

TTLEMENT, *s.* भित्तिः *f.*, छिद्रयुक्तः प्राकारः, बाणादिप्रक्षेपार्थं प्राकारच्छिद्रं.

TTOLOGIST, *s.* येन निरर्थका पुनरुक्तिः क्रियते सः, निरर्थकवक्ता *m.* (क्तृ).

TTOLOGY, *s.* निरर्थका पुनरुक्तिः or मुहुर्भाषा, निरर्थकवाक्यं.

VIN, *s.* इन्धनयोग्यं शुष्ककाष्ठखण्डं, शुष्ककाष्ठं.

WBLE, *s.* अल्पमूल्यकम् आभरणं or कङ्कणं, अल्पार्थं क्रीडाद्रव्यं, कङ्कणं, किङ्किणी, कदर्थद्रव्यं.

AWD, *s.* कुट्टनी, कुट्टिनी, दूती, चुन्दी, शम्भली, घटदासी, वेश्याचार्यः *m.*

AWDILY, *adv.* अशुद्धं, लम्पटवत्, वैयात्येन, गर्हितं, गर्ह्यप्रकारेण.

AWDINESS, *s.* अवाच्यता, गर्ह्यता, अनचारं, वैयात्यं, लम्पटता.

AWDRY, *s.* कुट्टनीकर्म्म *n.* (न्), वेश्याकर्म्म *n.* (न्), दूतीकार्य्यं.

AWDY, *a.* अवाच्यः -च्या -च्यं, अवक्तव्यः -व्या -व्यं, अकथ्यः -थ्या -थ्यं, गर्हितः -ता -तं, गर्ह्यः -र्ह्या -र्ह्यं, नीचः -चा -चं, अधमः -मा -मं, अशुद्धः -द्धा -द्धं, अविनीतः -ता -तं.

AWDY-HOUSE, *s.* वेश्याजनसमाश्रयः, वेश्यागृहं, वेश्याश्रयः, गणिकागृहं, वेशः.

To BAWL, *v. n.* उत्क्रुश् (c. 1. -क्रोशति -क्रोष्टुं), प्रक्रुश्, विक्रुश्, नद् (c. 1. नदति, नदितुं), प्रणद्, विनद्; उद्घुष् (c. 10. -घोषयति -यितुं), चित्कारं कृ; घोरं शब्दं कृ, रस् (c. 1. रसति, रसितुं).

BAWLER, *s.* उत्क्रोष्टा *m.* (-ष्टृ), विक्रोष्टा *m.* (-ष्टृ), घोषकः, उद्घोषकः.

BAWLING, *s.* विक्रोशनं, उत्क्रोशनं, घोषणं, चित्कारशब्दः, रासः.

BAY, *s.* (An opening of the sea into the land) अखातं, खातं, पुटभेदः, समुद्रवङ्कः, वङ्कः, वक्रं.—(An honorary garland) श्यामवृक्षनिर्म्मिता मानसूचका माला.—(An opening in a wall) गृहाक्षः; 'to stand at bay,' शत्रुं प्रति or शत्रुप्रतिमुखं or अभिमुखं or मुखामुखि स्था (c. 1. तिष्ठति, स्थातुं).

BAY, *a.* (Colour) पिङ्गलः -ला -लं, पिङ्गः -ङ्गा -ङ्गं.—(A bay horse) उकनाहः, कियाहः.

To BAY, *v. n.* रै (c. 1. रायति, रातुं), भष् (c. 1. भषति, भषितुं).

BAY-SALT, *s.* समुद्रलवणं, सिन्धुलवणं, सामुद्रं, सैन्धवं, वसिरं, अक्षीयं.

BAY-TREE, *s.* श्यामवृक्षो यस्य पत्राणि मानसूचकहाररचने प्रयुज्यन्ते.

BAY-WINDOW, *s.* पुटाकारो गवाक्षः, भित्तिबहिर्लम्बो गृहाक्षः, पुटरूपवातायनं.

BAYONET, *s.* या लोहगुलिकाप्रक्षेपणे अधुनातनयोद्धृभिः प्रयुज्यते नाडिस् तदग्रे बद्धा कृपाणी or छुरिका.

BAZAR, *s.* पण्यवीथी, पण्यशाला, आपणः, हट्टः, क्रयारोहः.

BDELLIUM, *s.* गुग्गुलुः *m.*, कुम्भं, उलूखलकं, सर्वसहः, कौशिकः, पुरः, कङ्कोलः, कोलकं, कोशफलं.

To BE, *v. n.* (To be in some state) अस् (c. 2. अस्ति), आस् (c. 2. आस्ते).—(To enter into some state) भू (c. 1. भवति, भवितुं).—(To exist) अस्, वृत् (c. 1. वर्त्तते, वर्त्तितुं), विद् in pass. (विद्यते), जन् in pass. (जायते).—(To be in or at) वृत्, स्था (c. 1. तिष्ठति, स्थातुं); 'be it so,' एवम् अस्तु. The verb 'to be' is often expressed by the use of the passive form of the Sanskrit verb, and is not unfrequently omitted altogether.

BEACH, *s.* समुद्रतीरं, समुद्रकूलं, समुद्रतटं, वेला.

BEACHED, *a.* समुद्रतीरस्थः -स्था -स्थं, उत्तरङ्गः -ङ्गा -ङ्गं.

BEACHY, *a.* तीरविशिष्टः -ष्टा -ष्टं, तटयुक्तः -क्ता -क्तं, कूलमयः -यी -यं.

BEACON, *s.* आकाशदीपः, उन्नतभूभागे स्थापिता शत्रोर् आगमनसमये जाज्वल्यमाना महोल्का, समुद्रगामिनां पथदर्शनार्थम् उच्चीकृतं चिह्नं.

BEAD, *s.* (Little globular body) गुलिका, गुटिका, गुली, वर्त्तुलः.—(A string of beads) माला, हारः.—(A rosary of beads) जपमाला.

BEADLE, *s.* गर्ह्मेदः, यष्टिधरः, राजदूतः, दण्डधरः, दण्डी *m.* (न्), दण्डहस्तः.

BEADROLL, *s.* ये लोका जपे कथयितव्यास् तत्परिसंख्या.

BEADSMAN, *s.* परार्थं or अन्यनिमित्ते जपकरणे नियुक्तो जनः.

BEAGLE, *s.* शशाखेटकः कुक्कुरप्रभेदः, शशाखेटे शिक्षितो मृगव्यश्वा *m.* (न्).

BEAK, *s.* (Of a bird) चञ्चुः *f.*, चञ्चूः *f.*, त्रोटी -टिः *f.*, मुखः, तुण्डिः *m.*, तुण्डः.—(Of a ship) पित्तलमयं चञ्चुरूपेण तक्षितं नौकाग्रं.

BEAKED, *a.* चञ्चुमान् -मती -मत् (त्), चञ्चुरूपः -पी -पं, चञ्चुविशिष्टः -ष्टा -ष्टं.

BEAM, *s.* (Piece of timber) स्थूणा, दीर्घकाष्ठं, काष्ठं, बृहत्काष्ठं, नासा, यष्टिः *m.*—(Main support of a house) वेश्मस्थूणा.—(Ray of light) रश्मिः *m.*, मरीचिः *m. f.*, किरणः, अंशुः *m.*—(Part of a balance) तुलाधारः, तुलादण्डः.—(Pole of a carriage) धूः *f.* (धुर्), कूबरः.—(Part of a weaver's loom) वायदण्डः, वापदण्डः.

To BEAM, *v. n.* (To emit rays of light) स्फुर् (c. 6. स्फुरति, स्फुरितुं), अंशु (nom. अंशूयति -यितुं), किरण (nom. किरणायते -यितुं), दीप् (c. 4. दीप्यते, दीपितुं), वर्च्चस् (nom. वर्च्चायते -यितुं).

BEAMLESS, *a.* रश्मिहीनः -ना -नं, निस्तेजाः -जाः -जः (स्), निष्प्रभः -भा -भं.

BEAMY, *a.* (Radiant) अंशुमान् -मती -मत् (त्), अंशुलः -ला -लं, किरणमयः -यी -यं, मरीचिमाली -लिनी -लि (न्), प्रभावान् -वती -वत् (त्), देदीप्यमानः -ना -नं.

BEAN, *s.* शिम्बिकः, शिम्बा, मुद्गः, माषः.

BEAR, *s.* ऋक्षः, भल्लकः, भल्लुकः, भल्लः, भालुकः, अच्छः, अच्छभल्लः.—(The Great Bear, constellation) चित्रशिखण्डिनः *m. pl.*

To BEAR, *v. a.* (Carry) वह् (c. 1. वहति -ते, वोढुं), सह् (c. 1. सहते, सोढुं); 'he bore his mother on his back,' मातरं पृष्ठेन अवहत्; 'he is borne on a horse,' अश्वेन उह्यते or अश्वेन सञ्चरति.—(Support) भृ (c. 1. भरति -ते, c. 3. बिभर्त्ति, भर्त्तुं), धृ (c. 1. धरति -ते, धर्त्तुं or in caus. धारयति -यितुं), आलम्ब् (c. 1. -लम्बते -लम्बितुं).—(Suffer, endure) सह्, विषह्, क्षम् (c. 1. क्षमते, क्षन्तुं), सङ्क्षम्; तिज् in des. (तितिक्षते -क्षितुं), मृष् (c. 4. मृष्यति -ते, मर्षितुं, c. 10. मर्षयति -यितुं); 'that is not to be borne,' न सह्यं तत्.—(Permit) अनुज्ञा (c. 9. -जानाति -ज्ञातुं).—(Admit) ग्रह् (c. 9. गृह्णाति, ग्रहीतुं).—(Produce) उत्पद् in caus. (-पादयति -यितुं), जन् in caus. (जनयति -यितुं).—(Bring forth) सु (c. 1. सवति, c. 2. सौति, सोतुं), प्रसु; प्रजन् (c. 4. -जायते -जनितुं) or जन् in caus.—(Bear in mind) अनुस्मृ (c. 1. -स्मरति -स्मर्त्तुं), अनुचिन्त् (c. 10. -चिन्तयति -यितुं).—(Bear witness) साक्ष्यं दा (c. 3. ददाति, दातुं).—(Keep afloat) प्लु in caus. (प्लावयति -यितुं).—(Bear fruit) फल् (फलति, फलितुं).—(Possess) भृ, धा, धृ in caus.—(Bear up) उद्वह्.—(Bear away) अपवह्.—(Bear down) निपत् in caus. (-पातयति -यितुं).—(Be capable of) उत्सह् with inf.—(Bear on, incite) प्रोत्सह् in caus. (-साहयति -यितुं).—(Bear the blame) दोषं स्वीकृ; 'I will bear the blame,' दोषो मयि वर्त्तिष्यते.—(Bear one's self, behave) वृत् (c. 1. वर्त्तते, वर्त्तितुं), काञ्चिद् वृत्तिम् अनुष्ठा (c. 1. -तिष्ठति -स्थातुं).—(Bear malice) द्रुह् (c. 4. द्रुह्यति, द्रोहितुं). When this verb occurs in phrases such as, 'to bear company,' 'to bear aid,' 'to bear resemblance,' *see* '*to* ACCOMPANY,' '*to* AID,' '*to* RESEMBLE.'

To BEAR, *v. n.* (To be patient) सह् (c. 1. सहते, सोढुं), सोढ (nom. सोढयते -यितुं).—(To wait patiently) विलम्ब् (c. 1. -लम्बते -लम्बितुं).—(To be fruitful) फल् (c. 1. फलति, फलितुं), फलं दा (c. 3. ददाति,

दातुं), सफलः -ला -लं भू.—(To be situated towards) प्रतिष्ठा (c. 1. -तिष्ठति -स्थातुं), दिश्यः -श्या -श्यं सम्; as, 'bearing towards the east,' पूर्व्वदिश्यः.—(To bear up) मनःस्थैर्य्यं कृ.

BEARD, *s.* श्मश्रु *n.*, मासुरी, मुखजं रोम *n.* (न्), मुखरोम *n.*—(Of corn) शस्यशूकं, शूकं, किंशारुः *m.*—(Barb of an arrow) फलं, कर्णः.

To BEARD, *v. a.* (To take by the beard) अवज्ञानात् परश्मश्रु सङ्ग्रह् (c. 9. -गृह्णाति -ग्रहीतुं).—(To insult to the face) मुखरीकृ, प्रतिमुखं or प्रत्यक्षं अवज्ञा (c. 9. -जानाति -ज्ञातुं), अवक्षिप् (c. 6. -क्षिपति -क्षेप्तुं).

BEARDED, *a.* (Having a beard) सश्मश्रुः -श्रुः -श्रु, श्मश्रुमान् -मती -मत् (त्), श्मश्रुलः -ला -लं.—(As corn) शूकवान् -वती -वत् (त्); 'bearded corn,' शूकधान्यं.—(As an arrow) कर्णी -र्णिनी -र्णि (न्).—(A bearded dart) प्रासः, कुन्तः.—(Insulted) अवज्ञातः -ता -तं.

BEARDLESS, *a.* श्मश्रुहीनः -ना -नं.—(A stripling) अप्राप्तव्यवहारः, बटुः, माणवकः.

BEARER, *s.* वाहकः, वाही *m.* (न्).—(Of burdens) भारवाहः -हनः, भारहारः, धुरन्धरः; 'one who carries out the dead,' प्रेतनिर्हारकः; 'letter-bearer,' पत्रवाहः; 'bearer of news,' सन्देशहरः.

BEARING, *s.* (The relative situation of a place) दिश्यं, दिक् *f.* (श्), अवस्थानं, अवस्थितिः *f.*, स्थानं.—(Behaviour) वृत्तिः *f.*, दर्शनं, रीतिः *f.*, गतिः *f.*, भावः, वर्त्तनं.

BEARISH, *a.* ऋक्षशीलः -ला -लं, भल्लूकस्वभावः -वा -वं, अशिष्टः -ष्टा -ष्टं.

BEAST, *s.* पशुः *m.*, जन्तुः *m.*, तिर्य्यङ् (च्).—(Four-footed beast) चतुष्पात् *m. f. n.* (द्).—(Beast of prey) श्वापदः.—(Of burden) धुरीणः, धुरीयः, धुर्य्यः, भारवाहनः.—(Applied to a man) पुरुषपशुः *m.*, दुराचारः.

BEASTLINESS, *s.* पशुता -त्वं, पाशवं, पशुशीलता, अमनुष्यता.

BEASTLY, *a.* पाशवः -वी -वं, पशुशीलः -ला -लं, पशुव्यवहारः -रा -रं, अमानुषः -षी -षं.

BEASTLY, *adv.* पशुवत्, पशुव्यवहारानुसारेण, मानुषाचारविरुद्धं.

BEAT, *s.* आघातः, घातः, प्रहारः, पातः.—(Of the pulse or heart) स्पन्दनं, स्फुरणं, विष्पन्दः; 'at the beat of the drum,' आहतेषु पटहेषु.

To BEAT, *v. a.* तड् (c. 10. ताडयति -यितुं), वितड्; हन् (c. 2. हन्ति, हन्तुं), निहन्, अभिहन्; प्रहृ (c. 1. -हरति -ते -हर्त्तुं), तुद् (c. 6. तुदति, तोत्तुं), आतुद्, वितुद्.—(With a stick) वेत्राघातं कृ.—(To conquer, excel) पराजि (c. 1. -जयति -ते -जेतुं), विजि; अभिभू (c. 1. -भवति -भवितुं), अती (c. 2. अत्येति, अत्येतुं).—(To mix by beating) आलुड् (c. 1. -लोडति -लोडितुं), मन्थ् (c. 1. मथति, मथितुं).—(To bruise) चूर्ण् (c. 10. चूर्णयति -यितुं), मृद् (c. 9. मृद्नाति, मर्द्दितुं).—(To beat off, beat back) प्रतिहन् (c. 2. -हन्ति -हन्तुं).—(To beat down) निपत् in caus. (-पातयति -यितुं).—(To beat down the price) मूल्यं न्यूनीकृ or ह्रस् in caus. (ह्रासयति -यितुं).—(To flap the wings) पक्षास्फालं कृ, पक्षौ चल् in caus. (चालयति -यितुं).—(To rouse game by striking the bushes) मृगयासमये यथा मृगाः स्वस्थानानि त्यजन्ति तथा कोलाहलेन गुल्मादिताडनं कृ, मृगान्वेषणे यथा मृगो निजाश्रयात् पलायते तथा गुल्मादीन् तड्.

To BEAT, *v. n.* (To palpitate) स्पन्द् (c. 1. स्पन्दते, स्पन्दितुं), परिस्पन्द्; कम्प् (c. 1. कम्पते, कम्पितुं), स्फुर् (c. 6. स्फुरति, स्फुरितुं).

BEATEN, *part. a.* आहतः -ता -तं, ताडितः -ता -तं.—(Conquered) पराजितः -ता -तं; 'beaten by the waves,' उत्तरङ्गः -ङ्गा -ङ्गं.—(One that deserves to be beaten) कश्यः -श्या -श्यं, कशार्हः -र्हा -र्हं.

To BID, *v. a.* (To invite) निमन्त्र् (c. 10. -मन्त्रयति -ते -यितुं), आह्वे (c. 1. -ह्वयति -ह्वातुं). —(To command) आज्ञा in caus. (-ज्ञापयति -यितुं), प्रेर् (c. 10. प्रेरयति -यितुं), आदिश् (c. 6. -दिशति -देष्टुं), समादिश्. —(To offer a price) अमुकमूल्यं दित्सामीति or दातुमिच्छामीति वद् (c. 1. वदति, वदितुं) or ख्या in caus. (ख्यापयति -यितुं) or घुष् (c. 10. घोषयति -यितुं) or अभिधा (c. 3. -दधाति -धातुं). —(To bid welcome) स्वागतमिति वद्. —(To bid adieu) आमन्त्र् (c. 10. -मन्त्रयते -यितुं), अनुमन्त्र्; आप्रच्छ् (c. 6. -पृच्छते -प्रष्टुं). —(To bid defiance) आह्वे, समाह्वे.

BIDDEN, *p. p.* (Commanded) आज्ञातः -ता -तं, प्रेरितः -ता -तं, चोदितः -ता -तं, देशितः -ता -तं, आदिष्टः -ष्टा -ष्टं. —(Invited) निमन्त्रितः -ता -तं, केतितः -ता -तं, आहूतः -ता -तं.

BIDDER, *s.* क्रेता *m.* (तृ), क्रायकः, मूल्यदित्सुः *m.*, प्रकाशक्रयसमये अमुकमूल्यं दित्सामीति or दास्यामीति ख्यापयति यो जनः.

BIDDING, *s.* (Command) आज्ञा, प्रेरणं, आदेशः, निर्देशः, शासनं. —(Offer of a price) मूल्यदित्साख्यापनं, अमुकमूल्यं दित्सामीति ख्यापनं, मूल्यदित्सा.

To BIDE, *v. a.* and *n.* (To remain) स्था (c. 1. तिष्ठति -ते, स्थातुं), वृत् (c. 1. वर्त्तते, वर्त्तितुं), वस् (c. 1. वसति, वस्तुं). —(To expect) प्रतीक्ष् (c. 1. -ईक्षते -ईक्षितुं), उद्दृश् (c. 1. -पश्यति -द्रष्टुं). —(To endure) सह् (c. 1. सहते, सोढुं), मृष् (c. 4. मृष्यति, मर्षितुं).

BIDENTAL, *a.* द्विदन् -दती -दत् (त्), द्विदन्तः -न्ती -न्तं, द्विरदः -दा -दं.

BIENNIAL, *a.* द्वैवर्षिकः -की -कं, द्विवर्षः -र्षी -र्षं, द्विवर्षीणः -णा -णं, द्विवर्षमात्रस्थायी -यिनी -यि (न्), वत्सरद्वयमात्रजीवी *m.* (न्).

BIER, *s.* शिबिका, शववाहनं, शवयानं, कटः, खट्टिः *m.*, खाटः, वारुढः, प्रेतवाहनसाधनं खट्वादि.

BIESTING, *s.* पेयूषः -षं, पीयूषः -षं, प्रसवानन्तरं प्रथमगोदुग्धं.

BIFID, BIFIDATED, *a.* द्विखण्डीकृतः -ता -तं, द्वैधीकृतः -ता -तं.

BIFOLD, *a.* द्विगुणः -णा -णं, द्वैधः -धी -धं, द्विःप्रकारः -रा -रं.

BIFORMED, *a.* द्विरूपः -पा -पी -पं, द्विमूर्त्तिमान् -मती -मत् (त्).

BIFURCATED, *s.* द्व्यग्रः -ग्रा -ग्रं, अग्रद्वयविशिष्टः -ष्टा -ष्टं.

BIG, *a.* स्थूलः -ला -लं, बृहन् -हती -हत् (त्), विपुलः -ला -लं. —(Big-bodied) बृहत्कायः -या -यं, महाकायः -या -यं, महाङ्गः -ङ्गी -ङ्गं. —(A pregnant woman) गर्भिणी, गर्भवती. —(Bombastic) गर्व्वितः -ता -तं. —(Teeming with) सङ्कुलः -ला -लं, सङ्कीर्णः -र्णा -र्णं, आकीर्णः -र्णा -र्णं, पूर्णः -र्णा -र्णं. —(As big as) परिमाण or परिमित, or मात्र affixed; as, 'as big as an egg,' अण्डपरिमाणः -णा -णं; 'as big as a grain of mustard,' सर्षपपरिमितः -ता -तं; 'as big as a man,' पुरुषमात्रः -त्रा -त्रं.

BIGAMIST, *s.* द्विभार्य्यः, द्विपत्नीस्वामी *m.* (न्), एककाले विवाहद्वयकर्त्ता *m.* (र्तृ).

BIGAMY, *s.* एककाले द्विविवाहकरणं, द्विपत्नीधारित्वं.

BIG-BELLIED, *a.* पृषूदरः -रा -रं, स्थूलोदरः -रा -रं, लम्बोदरः -रा -रं, बृहत्कुक्षिः -क्षिः -क्षि, पिचण्डिलः -ला -लं, वृद्धनाभिः -भिः -भि, तुन्दवान् -वती -वत् (त्).

BIG-BONED, *a.* बृहदस्थिमान् -मती -मत् (त्), बृहदङ्गः -ङ्गी -ङ्गं.

BIGGIN, *s.* बालकयोग्यं शिरोवेष्टनं, बालशिरस्कं. —(A pot) पात्रं, आधारः.

BIGNESS, *s.* स्थूलता, स्थौल्यं, बृहत्त्वं, विपुलता. —(Size, comparative bulk) परिमाणं; 'of the bigness of an egg,' अण्डपरिमाणः -णा -णं.

BIGNONIA, *s.* पाटलिः *m. f.* -ला, अमोघा, काचस्थाली, फलेरुहा, कुवेराक्षी.

BIGOT, *s.* स्वमतधारणे व्यग्रः, विचारणां विना or अविचार्य्य पक्षपाती *m.* (न्), निर्वन्धशीलः, व्यग्रचित्तः.

BIGOTED, *a.* अविचार्य्य स्वमते स्थितः -ता -तं, स्वमतधारणे व्यग्रः -ग्रा -ग्रं, स्वमतनिश्चितः -ता -तं, साचीकृतः -ता -तं, स्वमतरक्षी -क्षिणी -क्षि (न्).

BIGOTRY, *s.* विचारणां विना स्वमते व्यग्रस्थितिः *f.* or अभिनिवेशः or अतिनिर्वन्धः, साचीकृतं.

BIG-SWOLN, *a.* अतिस्फीतः -ता -तं, उच्छूनः -ना -नं, प्रवृद्धः -द्धा -द्धं.

BIG-UDDERED, *a.* पीनोध्नी *f.*, पीवरस्तनी *f.*, पीनस्तनधारिणी *f.*

BILBO, *s.* कृपाणः, खड्गः, निस्त्रिंशः, असिः *m.*

BILE, *s.* पित्तं, मायुः *m.*, भाजकं, पलाग्निः *m.*

BILE, *s.* (A boil) स्फोटः, स्फोटकः, विस्फोटः.

To BILGE, *v. n.* (To spring a leak) नौकातले or नौकापार्श्वे दारुस्फोटनप्रयुक्तं जलं गृहीत्वा मस्ज् (c. 6. मज्जति, मज्जितुं).

BILIARY, *a.* पैत्तः -त्ती -त्तं, पित्तसम्बन्धी -न्धिनी -न्धि (न्).

BILINGUOUS, *a.* द्विजिह्वः -ह्वा -ह्वं, द्विभाषावादी -दिनी -दि (न्).

BILIOUS, *a.* पित्तलः -ला -लं, पैत्तः -त्ती -त्तं, पैत्तिकः -की -कं.

To BILK, *v. a.* वञ्च् in caus. (वञ्चयति -ते -यितुं), परिवञ्च्, प्रलभ् (c. 1. -लभते -लब्धुं), विप्रलभ्.

BILL, *s.* (Beak of a bird) चञ्चुः *f.*, तुण्डः, तुण्डिः *m.*, मुखः. —(A kind of hatchet) दात्रं, लवित्रः. —(An act of parliament) व्यवस्था. —(A written paper of any kind) पत्रं, लेखः -खा, लेख्यं. —(An account of money) विक्रयपत्रं. —(An advertisement) घोषणापत्रं. —(In law) भाषापादं, पूर्व्वपक्षपादः, अभियोगपत्रं.

To BILL, *v. n.* (To kiss, embrace) चुम्ब् (c. 1. चुम्बति, चुम्बितुं), निंस् (c. 2. निंस्ते, निंसितुं), आलिङ्ग् (c. 1. -लिङ्गति -लिङ्गितुं), परिरम्भं कृ.

BILLET, *s.* (A note) पत्रं, लेखः, लेख्यं. —(A ticket) निदर्शनपत्रं, चिह्नं. —(A log of wood) काष्ठखण्डं, काष्ठं.

To BILLET, *v. a.* निदर्शनपत्रेण सैन्यानाम् आवासस्थानं प्रकॢप् (c. 10. -कल्पयति -यितुं); सैन्यान् वस् in caus. (वासयति -यितुं).

BILLIARDS, *s. pl.* इदानीन्तनजनैः सेविता गुलिकाक्रीडा

BILLION, *s.* खर्व्वः. —(A million millions) नियुतनियुतानि, शङ्कुः.

BILLOW, *s.* ऊर्म्मिः *m. f.*, महोर्म्मिः *m. f.*, भङ्गः, तरङ्गः, उल्लोलः, पयोराशिः *f.*, वारिराशिः *f.*, कल्लोलः, अर्गलः.

To BILLOW, *v. n.* तरङ्ग (nom. तरङ्गायते), तरङ्गरूपेण प्रलुठ् (c. 1. -लोठति -लोठितुं), महावेलया प्रवृध् (c. 1. -वर्धते -वर्धितुं).

BILLOW-BEATEN, *a.* तरङ्गोद्घातः -ता -तं, तरङ्गक्षिप्तः -प्ता -प्तं, उत्तरङ्गः -ङ्गा -ङ्गं.

Billowy, *a.* ऊर्म्मिमान् -मती -मत् (त्), तरङ्गितः -ता -तं, महावेलः -ला -लं, महातरङ्गः -ङ्गा -ङ्गं, प्रलोठितः -ता -तं.

Bill-sticker, *s.* घोषणापत्त्राणि राजमार्गादिषु जनसङ्कीर्णस्थानेषु स्थापयति यः.

Bin, *s.* धान्यकोष्ठकं, कुशूलः, पिटः.

Binary, *a.* द्वैधः -धी -धं, द्विगुणः -णा -णं.

To **bind**, *v. a.* (To tie) बन्ध् (c. 9. बध्नाति, बन्द्धुं), निबन्ध्, योक्त्र (nom. योक्त्रयति -यितुं), यन्त्र् (c. 10. यन्त्रयति -यितुं), संयम् (c. 1. -यच्छति -यन्तुं). —(To fasten to any thing, fasten on) आबन्ध्, अनुबन्ध्, आकच् (c. 1. -कचते -कचितुं), पिनद्धं -द्धां -द्धं कृ.—(To tie together) सम्बन्ध्, संश्लिष् in caus. (-श्लेषयति -यितुं), ग्रन्थ् (c. 9. ग्रथ्नाति, ग्रथितुं or caus. ग्रन्थयति -यितुं), संहृ (c. 1. -हरति -हर्त्तुं).—(To unite) संयुज् (c. 7. -युनक्ति -युंक्ते -योक्तुं or caus. -योजयति -यितुं).—(To connect closely) सम्बन्ध्, संश्लिष् in caus.; 'my life is bound up in his,' मम प्राणा अस्य प्राणैर् बद्धाः सन्ति.—(To constrain, compel) धृ (c. 1. धरति, धर्त्तुं).—(To bind one's self by a promise) प्रतिज्ञा (c. 9. -जानीते -ज्ञातुं), सम्प्रतिज्ञा; 'to bind one's self over to appear,' दर्शनप्रातिभाव्यं दा.—(To be bound, obliged) expressed by the fut. pass. part.; as, 'he is bound to marry the damsel,' तेन कन्या वोढव्या, or by the root अर्ह्, as, कन्यां वोढुम् अर्हति.—(To bind books) ग्रन्थपत्त्राणि चर्म्मादिना छादयित्वा सम्बन्ध्.—(To make costive) आनद्धं -द्धां -द्धं कृ, निबद्धं -द्धां -द्धं कृ. —(To secure with bandages) अनुवेल्लितं कृ, क्षतानि बन्ध्.

Binder, *s.* ग्रन्थपत्त्राणि चर्म्मादिना सम्बन्धा *m.* (न्धृ).

Binding, *s.* (A bandage) बन्धनं, दाम *n.* (न्), उद्दानं, पट्टः.—(Of a book) ग्रन्थपत्त्राच्छादनं.

Bindweed, *s.* क्षीरविदारी, महाश्वेता, विदारी, इक्षुगन्धा, क्रोष्टुगन्धिका, क्रोष्ट्री, श्यामा.

Binocular, *a.* द्विनयनः -नी -नं, द्विनेत्रः -त्रा -त्रं, चक्षुर्द्वयविशिष्टः -ष्टा -ष्टं.

Binomial, *a.* (In algebra) द्विपदः -दा -दं.

Biographer, *s.* शिष्टसमाचाररचकः, शिष्टजनचरित्ररचकः, मृतजनचारित्रनिबन्धा *m.* (न्धृ).

Biographical, *a.* शिष्टसमाचारसम्बन्धकः -का -कं, शिष्टजनचरित्रविषयः -या -यं.

Biography, *s.* (The act of writing it) शिष्टजनचरित्ररचना, शिष्टसमाचाररचना.—(The book) शिष्टजनचरित्रग्रन्थः, शिष्टसमाचारः.

Bipartite, *a.* द्वैधः -धी -धं, द्वैधीकृतः -ता -तं.

Bipartition, *s.* द्वैधीकरणं, द्विधाकरणं, द्वैधीभावः.

Biped, *a.* द्विपादः -दा -दं, द्विपदः -दा -दं, द्विपाद् -पदी -पत्.

Bipedal, *a.* द्विपादपरिमाणः -णा -णं, द्विपादवान् -वती -वत् (त्).

Bipennated, *a.* द्विपक्षः -क्षा -क्षं, पक्षद्वयविशिष्टः -ष्टा -ष्टं.

Birch or birch-tree, *s.* भूर्ज्जः, भूर्ज्जपत्रः, कवचपत्रं, चर्म्मी *m.* (न्), मृदुच्छदः, मृदुत्वचः, विश्वा, शृङ्गी, महौषधं, अरुणा, प्रतिविषा.

Birchen, *a.* भूर्ज्जमयः -यी -यं, भूर्ज्जनिर्म्मितः -ता -तं.

Bird, *s.* पक्षी *m.* (न्), पक्षिणी *f.*, खगः, विहगः, विहङ्गः -ङ्गमः, पतगः, पत्री *m.* (न्), पात्री *m.* (न्), विहायाः *m.* (स्), गरुत्मान् *m.* (त्), नीडजः, नीडोद्भवः, द्विजः, अण्डजः, नगौकाः *m.* (स्), पक्षवाहनः, शकुनिः *m.* -नः, विकिरः, विष्किरः, वाजी *m.* (न्), पतन् *m.* (त्), शकुन्तः, नभसङ्गमः, पत्ररथः, विः *m.*, वी, पित्सन् *m.* (त्).

To **bird**, *v. n.* (To catch birds) पक्षिणो ग्रह् (c. 9. गृह्णाति, ग्रहीतुं) or धृ (c. 1. धरति, धर्त्तुं), or बन्ध् (c. 9. बध्नाति, बन्द्धुं), शकुन (nom. शकुनयति -यितुं).

Birdcage, *s.* पञ्जरं, पिञ्जरं, वीतंसः, कुलायिका, पक्षिशाला, शालारं.

Birdcall, *s.* पक्षिप्रलोभनार्थं शाकुनिकैर् वादितं पक्षिरावानुकारिणो वंशी.

Bird-catcher, *s.* शाकुनिकः, व्याधः, जालिकः, जीवान्तकः, वागुरिकः.

Bird-fancier, *s.* पक्षिपोषकः, पक्षिपालकः, पक्षिप्रियः.

Birding, *s.* (Catching birds) पक्षिग्रहणं, पक्षिबन्धनं, श्येनम्पाता.

Birdlike, *a.* पक्षिसन्निभः -भा -भं, पक्षिसदृशः -शी -शं, पक्षिनिभः -भा -भं.

Birdlime, *s.* अतिश्यानम् उपलेपं येन लिप्तासु तरुशाखासु पक्षिणो बध्यन्ते.

Bird's-eye-view, *s.* यादृशं डीयमानेन पक्षिणा क्रियते तादृशं दर्शनं उच्चैःस्थानाद् अवलोकनं.

Bird's-nest, *s.* नीडः -डं, कुलायः, पक्षिशाला.

Birth, *s.* जन्म *n.* (न्), जातिः *f.*, जनिः *f.*, जननं, जनिमा *m.* (न्), उत्पत्तिः *f.*, उद्भवः, सम्भवः, भवः, जनुः *n.* (स्).—(The act of bringing forth) प्रसवनं, प्रसवः, उत्पादनं, प्रसूतिः *f.*—(Extraction, lineage) वंशः, कुलं, अन्वयः, जातिः *f.*—(Rise, origin) योनिः *m. f.*, मूलं, उद्भवः. —(Rank, high birth) कुलीनता, कौलीनं; 'of good birth,' कुलीनः -ना -नं, कुलकः -का -कं, कौलेयः -यी -यं, सुजन्मा -न्मा -न्म (न्), महाकुलप्रसूतः -ता -तं, महाकुलः -ला -लं; 'pride of birth,' कुलाभिमानं; 'blind from birth,' जन्मान्धः -न्धा -न्धं, जात्यन्धः -न्धा -न्धं.—(To give birth to) सु (c. 1. सवति, c. 2. सौति, सोतुं), प्रसु, जन् in caus. (जनयति -यितुं), सञ्जन्.

Birthday, *s.* जन्मदिनोत्सवः, जन्मदिवसः, जन्मतिथिः *m.*, जन्मदिनं.

Birthplace, *s.* जन्मभूमिः *f.*, जन्मस्थानं, जन्मदेशः.

Birthright, *s.* ज्येष्ठत्वं, ज्यैष्ठ्यं, ज्येष्ठाधिकारः, ज्येष्ठभागः, पैतृकं.

Biscuit, *s.* पिष्टकः, पूपः, अपूपः, सुकान्दवो गोधूमादिचूर्णमयः पिष्टकः.

To **bisect**, *v. a.* द्वैधीकृ, द्विभागीकृ, द्विखण्डीकृ, द्विधा कृ or छिद् (c. 7. छिनत्ति, छेत्तुं) or कृत् (c. 6. कृन्तति, कर्त्तितुं).

Bisected, *p. p.* द्वैधीकृतः -ता -तं, द्विखण्डीकृतः -ता -तं, द्विधा छिन्नः -न्ना -न्नं.

Bisection, *s.* द्विधाकरणं, द्वैधीकरणं.

Bishop, *s.* धर्म्माधिपतिः *m.*, धर्म्माध्यक्षः.

Bishop, *s.* (A beverage) मद्यनागरङ्गरसादिनिर्म्मितं पानीयं.

Bishopric, *s.* धर्म्माधिपतिपदं, धर्म्माध्यक्षाधिकारः.

Bismuth, *s.* अतिदृढः शुक्लवर्णो विदेशीयधातुप्रभेदः.

Bison, *s.* अरण्यवृषभप्रभेदः.

Bissextile, *s.* चतुर्थः संवत्सरो यस्मिन् अधिदिवसो निवेश्यते.

Bit, *s.* (Part of a bridle) खलीनः, कविका -कं, वल्गा, मुखयन्त्रणं, लङ्गनी.—(A piece) खण्डं, भागः, भित्तं, भिन्नं, भित्तिः *f.*; 'in bits,' खण्डशस्, भागशस्, खण्डं खण्डं.—(A mouthful, morsel) पिण्डः -ण्डं ग्रासः; 'a tit bit,' स्वाद्वन्नं, भोजनविशेषः; 'not a bit,' न मनागपि न किञ्चिदपि, न सूक्ष्ममपि; 'a bit bigger,' किञ्चित्स्थूलतरं.

To **bit**, *v. a.* खलीन (nom. खलीनयति -यितुं), अश्वमुखं खलीनेन यन्त्र् (c. 10. यन्त्रयति -यितुं).

Bitch, *s.* शुनी, कुक्कुरी, सरमा, कुलाबुता.—(A name of reproach) बन्धकी.

To **bite**, *v. a.* दंश् (c. 1. दशति, दंष्टुं), विदंश्; 'to bite the lips,' दशनच्छदं or दन्तान् सन्दंश्.—(To gnaw) चर्व् (c. 1. चर्वति, चर्वितुं); 'to bite the nails,' नखान् खाद् (c. 1. खादति, खादितुं).—(To pain by cold) शीतार्त्तं -र्त्तां -र्त्तं कृ.—(To rail at) अवक्षिप् (c. 6. -क्षिपति -क्षेप्तुं).—(To vex) पीड् (c. 10. पीडयति -यितुं).—(To defraud) वञ्च् (c. 10. वञ्चयति -ते -यितुं).

Bite, *s.* दंशः, दंशनं, दन्ताघातः; 'the mark of the teeth,' दशनाङ्कः.

Biter, *s.* दंशकः, खादिता *m.* (तृ), दंष्टा *m.* (ष्टृ), वञ्चकः.

Biting, *a.* दंशकः -का -कं, दंशेरः -रा -रं, पीडाकरः -री -रं.

Bitten, *p. p.* दष्टः -ष्टा -ष्टं, सन्दष्टः -ष्टा -ष्टं, दंशितः -ता -तं.

Bitter, *a.* तिक्तः -क्ता -क्तं, तिक्तस्वादः -दा -दं, तिक्तरसः -सा -सं.—(Pungent) कटुः -टुः -ट्वी -टु, तीक्ष्णः -क्ष्णा -क्ष्णं, तिग्मः -ग्मा -ग्मं.—(Grievous) उग्रः -ग्रा -ग्रं, स्रात्ययिकः -की -कं.—(Cruel, severe) कठोरः -रा -रं, निष्ठुरः -रा -रं, पीडाकरः -रा -रं.—(Malicious) मत्सरः -रा -रं, पिशुनः -ना -नं.

Bittergourd, *s.* इन्द्रवारुणिका, अरुणा.

Bitterly, *adv.* उग्रं, निष्ठुरं, उग्रतया; 'one who grieves bitterly,' उग्रशोकः -का -कं.

Bittern, *s.* क्रौञ्चजातीयः पक्षिभेदः, क्रौञ्चः, क्रुङः, कलिकः.

Bitterness, *s.* तिक्तः, तिक्तत्वं, तिक्तरसः.—(Pungency) कटुता, तिग्मता, तीक्ष्णता.—(Malice) असूया, मात्सर्यं.—(Severity) उग्रत्वं -ता, निष्ठुरता, कठोरता.—(Sorrow) शोकः, उग्रशोकः, दुःखं.

Bitumen, *s.* शिलाजतु *n.*, अश्मजतुकं, शिलाददुः *m.*, गिरिपुष्पकं, शैलं, शैलनिर्य्यासः.

Bituminous, *a.* शिलाजतुमयः -यी -यं, शिलाजतुगुणविशिष्टः -ष्टा -ष्टं.

Bivalve, *a.* द्विकपाटः -टा -टं, द्विकोषः -षा -षं.—(Bivalve shell) कम्बुः *m.*, शम्बुः *m.*, शम्बुकः -का, जलशुक्तिः *f.*, पद्मनखुकः.

Bivouac, *s.* (A guard at night) वीरासनं.

To blab, *v. n.* and *a.* रहस्यं प्रकाश् in caus. (-काशयति -यितुं), रहस्यभेदं कृ.

Blab, blabber, *s.* रहस्यभेदकः, रहस्यप्रकाशकः, वाचालः, वावदूकः, जल्पकः.

Blabber-lipped, *a.* स्थूलोष्ठः -ष्ठा -ष्ठं, लम्बौष्ठः -ष्ठा -ष्ठं.

Black, *a.* कृष्णः -ष्णा -ष्णं, श्यामः -मा -मं, -मलः -ला -लं, कालः -ला -लं, कालकः -का -कं, काष्णिः -र्ष्णी -र्ष्णि, असितः -ता -तं, नीलः -ली -लं, मेचकः -का -कं, ध्यामः -मा -मं.—(Dark) तमस्वी -स्विनी -स्वि (न्), तिमिरः -रा -रं, अन्धकारयुक्तः -क्ता -क्तं, निष्प्रभः -भा -भं.—(Horrible) घोरः -रा -रं, दारुणः -णा -णं.—(Cloudy of countenance) म्लानवदनः -ना -नं.—(Black with crime) कृष्णकर्म्मा -र्म्मा -र्म्म (न्).—(White and black) सितासितः -ता -तं.

Black, *s.* (The colour) कृष्णः, कृष्णवर्णः.—(A blackamoor) कृष्णदेहः श्यामाङ्गः; 'black clothes,' नीलवस्त्रं, नीलाम्बरं; 'clothed in black,' नीलवस्त्रः -स्त्रा -स्त्रं, नीलाम्बरः -रा -रं, श्यामवस्त्रः -स्त्रा -स्त्रं.—(Lamp-black) दीपकिट्टं, कज्जलं.

To black, *v. a.* कृष्ण (nom. कृष्णायते -यितुं), कृष्णीकृ.

Blackamoor, *s.* श्यामाङ्गः, श्यामदेहः, कृष्णदेहः, कृष्णाङ्गः.

Blackberry, *s.* कृष्णवर्णं कण्टकगुल्मफलं, शृगालकण्टकफलं.

Blackbeetle, *s.* भ्रमरः, भृङ्गः, अलिः *m.*

Blackbird, *s.* कृष्णवर्णो मधुररावविशिष्टः पक्षिप्रभेदः.

To blacken, *v. a.* कृष्णीकृ, कृष्ण (nom. कृष्णायते -यितुं), श्याम (nom. श्यामयति -यितुं), श्यामीकृ.—(To darken) तिमिर (nom. तिमिरयति -यितुं).

To blacken, *v. n.* श्याम (nom. श्यामायते), नील (nom. नीलायते).

Blackened, *p. p.* कृष्णीकृतः -ता -तं, श्यामितः -ता -तं, कृष्णीभूतः -ता -तं, तमोवृतः -ता -तं, तमोभृतः -ता -तं, समलसः -सा -सं.

Blackeyed, *a.* असितनयनः -नी -नं, कृष्णनयनः -नी -नं, नीलाक्षः -क्षी -क्षं.

Blackguard, *s.* अधमाचारः, दुर्वृत्तः, दुराचारः, कृष्णकर्म्मा *m.* (न्), दुष्टः.

Blacking, *s.* पादुकाञ्जनं, मसिः *f.* -सी, काली.

Blackish, *a.* ईषत्कृष्णः -ष्णा -ष्णं, ईषत्कालः -ला -लं, आकालः -ला -लं.

Blacklead, *s.* सीसकप्रभेदो येन तूलिकायां निवेशितेन कृष्णरेखा क्रियते.

Blackly, *adv.* कृष्णवर्णेन, कृष्णं, दारुणं, अतिदुष्टतया.

Black-mouthed, *a.* दुर्मुखः -खी -खं, मुखरः -रा -रं, वाग्दुष्टः -ष्टा -ष्टं.

Blackness, *s.* कृष्णता -त्वं, कृष्णिमा *m.* (न्), कालिमा *m.* (न्), श्यामत्वं, नीलिमा *m.* (न्).—(Darkness) तमः *n.* (स्), तमिस्रं, तिमिरं, अन्धकारः.—(Horribleness) घोरता, दारुणता.—(Atrocity) अतिदुष्टता.

Blackpudding, *s.* अधुनातनजनखादितम् असृग्धान्यादिपूरितं शूकरपुरीतत्.

Blacksmith, *s.* लोहकारः, ध्माकारः, कर्म्मकारः, अयस्कारः, कर्म्मारः, व्योकारः.

Bladder, *s.* वस्तिः *m. f.* मूत्राशयः, तिलकं, क्लोम *n.* (न्), क्लोमं.

Blade, *s.* (The sharp part of a weapon) फलं, पत्रं, फलकः -कं, धारा, पत्रः, पुष्करं; 'the blade of a sword,' असिपत्रं.—(Spire of grass) काण्डं, दलः -लं, अङ्कुरः, तृणदलं, तृणकाण्डं, किसलः, कुशः.—(Of the shoulder) अंशः, स्कन्धास्थि *n.*, भुजशिरः *n.* (स्).

Bladed, *a.* काण्डवान् -वती -वत् (त्), मञ्जरितः -ता -तं, दलवान् -वती -वत् (त्).

Blain, *s.* विस्फोटः, स्फोटः, स्फोटकः, व्रणं, वटी, वरटी.

Blamable, *a.* निन्दनीयः -या -यं, निन्द्यः -न्द्या -न्द्यं, निन्दार्हः -र्हा -र्हं, दोषी -षिणी -षि (न्), अपराधी -धिनी -धि (न्), अपराद्धः -द्धा -द्धं, सापराधः -धा -धं, गर्हितः -ता -तं, दूष्यः -ष्या -ष्यं, गर्ह्यः -र्ह्या -र्ह्यं, वाच्यः -च्या -च्यं.

Blamableness, *s.* निन्द्यता, निन्दार्हत्वं, अपराधिता -त्वं, दोषित्वं.

Blamably, *adv.* सापराधं, अपराधेन, निन्द्यप्रकारेण, यथा दोषो जायते तथा.

To blame, *v. a.* (To lay the blame) दोषम् आरुह् in caus. (-रोपयति -यितुं), दोषीकृ.—(To censure) निन्द् (c. 1. निन्दति, निन्दितुं), प्रणिन्द्, प्रतिनिन्द्, विनिन्द्; तिरस्कृ; कुत्स् (c. 10. कुत्सयति -ते -यितुं), गुप् in des. (जुगुप्सते -प्सितुं), उपालभ् (c. 1. -लभते -लब्धुं), गर्ह् (c. 1. गर्हते, गर्हितुं, c. 10. गर्हयते -यितुं), विगर्ह्, परिगर्ह्; 'he casts the blame on him,' तस्मिन् दोषं क्षिपति.

Blame, *s.* (Censure) निन्दा, परीवादः, अपवादः, आक्षेपः, घृणा, तिरस्कारः, गर्हा, परिभाषणं, जुगुप्सा, कलङ्कः, कुत्सा, निर्वादः, अवर्णः, उपालम्भः, उपक्रोशः.—(Fault) दोषः, अपराधः, वचनीयता, वाच्यता, —(Imputation of a fault) दोषारोपः; 'I am not to blame,' नाहम् अपराद्धः, or सापराधः, or निन्दार्हः.

Blamed, *p. p.* निन्दितः -ता -तं, जुगुप्सितः -ता -तं, गर्हितः -ता -तं, तिरस्कृतः -ता -तं, धिक्कृतः -ता -तं, उपालब्धः -ब्धा -ब्धं, अवगीणः -णा -णं.

Blameless, *a.* निर्दोषः -षा -षं, निरपराधः -धा -धं, अनिन्द्यः -न्द्या -न्द्यं, अनिन्दितः -ता -तं, अनेनाः -नाः -नः (स्), अविगर्हितः -ता -तं, अनघः -घा -घं.

Blamelessly, *adv.* अपराधं विना, दोषव्यतिरेकेण, निरपराधं, अनघं, अनिन्द्यप्रकारेण.

Blamelessness, *s.* अनिन्द्यता, निर्दोषता, निरपराधता, शुद्धत्वं.

Blamer, *s.* निन्दकः, दोषारोपकः, परिवादकः, निन्दाकारी *m.* (न्), कलङ्ककरः.

Blameworthy, *a.* निन्दार्हः -र्हा -र्हं, निन्दनीयः -या -यं.

To blanch, *v. a.* (To whiten) शुक्लीकृ, धवलीकृ.—(To peel such things as have husks) निस्तुष (nom. -तुषयति -यितुं), तुषीकृ, त्वच् (nom. त्वचयति -यितुं), त्वचं निष्कृष् (c. 1. -कर्षति -क्रष्टुं), त्वक्परिपुटनं कृ.

Bland, *a.* मृदुः -द्वी -दु, स्निग्धः -ग्धा -ग्धं, मसृणः -णा -णं, मेदुरः -रा -रं, श्लक्ष्णः -क्ष्णा -क्ष्णं, कोमलः -ला -लं, सोमालः -ला -लं.—(In speech) प्रियम्वदः -दा -दं.

Blandation, *s.* चाटूक्तिः *f.*, चाटुकारः, कोमलत्वं.

To blandish, *v. a.* (To caress, flatter) शान्त्व् or सान्त्व् (c. 10. सान्त्वयति -यितुं), अभिशान्त्व्, परिशान्त्व्, प्रियं वद् (c. 1. वदति, वदितुं).

Blandishment, *s.* (Gesture of love) ललितं, हावः, विलासः, विभ्रमः. —(Soft words) प्रियवाक्यं, चाटूक्तिः *f.*, चाटुः *m.*

Blank, *a.* (Empty, not written upon) शून्यः -न्या -न्यं, रिक्तः -क्ता -क्तं, लेखाशून्यः -न्या -न्यं, अलिखितः -ता -तं.—(White) शुक्लः -क्ला -क्लं.—(Pale, depressed) पाण्डुः -ण्डुः -ण्डु, विवर्णवदनः -ना -नं, म्लानवदनः -ना -नं, विषण्णः -ण्णा -ण्णं.—(Confused) विस्मितः -ता -तं, विलक्षः -क्षा -क्षं, आकुलः -ला -लं.—(Without rhyme) अनुप्रासहीनः -ना -नं, अमित्राक्षरः -रा -रं, यमकहीनः -ना -नं, छन्दोरहितः -ता -तं.

Blank, *s.* (A void space) शून्यं, रिक्तं, शून्यत्वं -ता, रिक्तता, शून्यस्थानं.—(A paper without writing) लेखाशून्यं पत्रं.—(In a lottery) माङ्गल्यरहिता or लाभरहिता गुटिका, दौर्भाग्यं.

To **blank**, *v. a.* शून्यीकृ, म्लानीकृ, आकुलीकृ, विस्मयाकुलं -लां -लं कृ.

Blanket, *s.* कम्बलः, रल्लकः, ऊर्णायुः *m.*, सहस्ररोम *n.* (न्), मेषकम्बलः, साशूकः, कुतपः.—(Covered with a blanket) काम्बलः -ली -लं, कम्बलाच्छादितः -ता -तं.

To **blanket**, *v. a.* कम्बलेन आच्छद् (c. 10. -छादयति -यितुं).

To **blaspheme**, *v. a.* परमेश्वरं निन्द् (c. 1. निन्दति, निन्दितुं) or अवमन् (c. 4. -मन्यते -मन्तुं) or अभिशप् (c. 1. -शपति -शप्तुं) or आक्रुश् (c. 1. -क्रोशति -क्रोष्टुं), ईश्वरनिन्दां कृ, पाषण्डीयकथां कथ् (c. 10. कथयति -यितुं).

Blasphemer, *s.* ईश्वरनिन्दकः, ईश्वराभिशापकः, ईश्वरावमानकृत्, पाषण्डः, गर्ह्यवादी *m.* (न्).

Blasphemous, *a.* ईश्वरनिन्दकः -का -कं, ईश्वरावमानकरः -री -रं, पाषण्डीयः -या -यं.

Blasphemously, *adv.* ईश्वरनिन्दापूर्व्वकं, ईश्वरनिन्दाक्रमेण, पाषण्डवत्.

Blasphemy, *s.* ईश्वरनिन्दा, ईश्वरावमानं, ईश्वराभिशापः, देवनिन्दा, पाषण्डता.

Blast, *s.* (A gust of wind) वातः, वायुवेगः, वायुगुल्मः, वातरूपः, निर्घातः, प्रभञ्जनः, व्योममुद्गरः.—(Puff) श्वासः.—(Of a horn) शङ्खध्मानं.—(Blight) विनाशः, व्याघातः, क्षयः.

To **blast**, *v. a.* (To ruin, destroy) विनश् in caus. (-नाशयति -यितुं), क्षि in caus. (क्षययति -यितुं), विहन् (c. 2. -हन्ति -हन्तुं).—(To make to wither) मृ in caus. (मारयति -यितुं), म्लानीकृ, विशॄ in caus. (-शारयति -यितुं).

Blasted, *p. p.* विनाशितः -ता -तं, मारितः -ता -तं, परिम्लानः -ना -नं, विशीर्णः -र्णा -र्णं.—(By lightning) विद्युद्धतः -ता -तं.

Blaster, *s.* विनाशकः, मारकः, नाशयिता *m.* (तृ), विघाती *m.* (न्), विशारणकृत्.

Blaze, *s.* ज्वालः -ला, ज्वलः, ज्वलका, ज्वालाग्निः *m.*, उल्का; 'a blaze of light,' रश्मिजालं, अंशुजालं.—(Publication) प्रकाशनं, प्रकटीकरणं, प्रचारणं.

To **blaze**, *v. n.* ज्वल् (c. 1. ज्वलति, ज्वलितुं), प्रज्वल्, सम्प्रज्वल्, or in freq. (जाज्वल्यते), दीप् (c. 4. दीप्यते, दीपितुं), आदीप्, प्रदीप् or in freq. (देदीप्यते).

To **blaze abroad**, *v. a.* प्रकाश् in caus. (-काशयति -यितुं), विकाश्, प्रचर् in caus. (-चारयति -यितुं), विघुष् (c. 10. -घोषयति -यितुं), विख्या in caus. (-ख्यापयति -यितुं), प्रकटीकृ.

Blazing, *a.* ज्वाली -लिनी -लि (न्), ज्वालः -ली -लं, ज्वालन् -लन्ती -लत् (त्), उज्ज्वलः -ला -लं, जाज्वल्यमानः -ना -नं, ज्वलितः -ता -तं, प्रज्वलितः -ता -तं, उज्ज्वसः -सा -सं, प्रदीप्तः -प्ता -प्तं.

To **blazon**, *v. a.* (To draw coats of arms) कुलीनपदचिह्नानि लिख् (c. 6. लिखति, लेखितुं).—(To explain coats of arms) चित्रगतानि कुलीनपदचिह्नानि व्याख्या (c. 2. -ख्याति -ख्यातुं).—(To deck) भूष् (c. 10. भूषयति -यितुं), परिभूष्, परिष्कृ.—(To celebrate) प्रख्या, विख्या.—(To display, publish) प्रकाश् in caus. (-काशयति -यितुं),

प्रचर् in caus. (-चारयति -यितुं).

To **bleach**, *v. a.* धाव् (c. 1. धावति, धावितुं, c. 10. धावयति -यितुं), वस्त्राणि वायुव्याप्यानि कृत्वा शुक्लीकृ or धवलीकृ or निर्णिज् (c. 3. -नेनेक्ति -नेक्तुं).

To **bleach**, *v. n.* वायुव्यापकत्वाद् धवलीभू or शुक्लीभू.

Bleached, *p. p.* धौतः -ता -तं, धवलितः -ता -तं, शुक्लीकृतः -ता -तं, धवलीकृतः -ता -तं, धवलीभूतः -ता -तं, वीतरागः -गा -गं; 'bleached silk,' धौतकौशेयं, पत्त्रोर्णं; 'a pair of bleached clothes,' उद्गमनीयं.

Bleacher, *s.* धावकः, वस्त्रधावकः, वस्त्रनिर्णेजकः.

Bleak, *a.* (Cold) शीतलः -ला -लं, शिशिरः -रा -रं, हिमः -मा -मं, हैमन्तः -न्ती -न्तं, -न्तिकः -की -कं, हिमशीतलः -ला -लं.—(Exposed to the weather) आभ्यवकाशिकः -की -कं, शीतावकाशिकः -की -कं.—(Cheerless) निरानन्दः -न्दा -न्दं.

Bleakness, *s.* शीतता, शीतलता, शैत्यं, हिमता, शीतावकाशिकत्वं.

To **blear**, *v. a.* चुल्लीकृ, तिमिर (nom. तिमिरयति -यितुं).

Blearedness, *s.* (Having blear eyes) चुल्लत्वं, पिल्लत्वं, क्लिन्नाक्षता.

Blear-eyed, *a.* क्लिन्नाक्षः -क्षा -क्षं, चुल्लः -ल्ली -ल्लं, चिल्लः -ल्ला -ल्लं, पिल्लः -ल्ली -ल्लं.

To **bleat**, *v. n.* रु (c. 1. रवते, रोतुं), मेषरुतं कृ, अविरुत शब्दं कृ.

Bleating, *s.* मेषरुतं, मेषरावः, मेषशब्दः, उरभ्रनादः.

To **bleed**, *v. n.* रक्तं or शोणितं स्रु (c. 1. स्रवति, स्रोतुं), प्रस्रु or मुच् (c. 6. मुञ्चति, मोक्तुं), प्रमुच्: 'the wound bleeds,' क्षतं शोणितं स्रवति.

To **bleed**, *v. a.* रक्तं or शोणितं स्रु in caus. (स्रावयति -यितुं) or मुच् in caus. (मोचयति -यितुं) or मोक्ष (c. 10. मोक्षयति -यितुं) or अवसिच् (c. 6. -सिञ्चति -सेक्तुं).

Bleeder, *s.* रक्तस्रावकः, असृक्स्रावी *m.* (न्), रक्तमोचकः, सिराव्यधनकृत्, रक्तावसेचकः.

Bleeding, *s.* (Venesection) रक्तस्रावः, असृक्स्रावः, रक्तमोक्षणं, असृग्विमोक्षणं, सिरामोक्षः, सिराव्यधः, रक्तावसेचनं.

To **blemish**, *v. a.* मलिन (nom. मलिनयति -यितुं), कलङ्क (nom. कलङ्कयति -यितुं), दुष् in caus. (दूषयति -यितुं), अपयशः कृ, सदोषं -षां -षं कृ.

Blemish, *s.* दोषः, कलङ्कः, छिद्रं, कलुषं, अघं, आगः *n.* (स्).—(Loss of reputation) अपयशः *n.* (स्), अख्यातिः *f.*, अकीर्त्तिः *f.*, अपकीर्त्तिः *f.*, वाच्यता.—(Without blemish) अनघः -घा -घं, निश्छिद्रः -द्रा -द्रं.

Blemished, *p. p.* कलङ्कितः -ता -तं, दूषितः -ता -तं, दोषवान् -वती -वत् (त्), सदोषः -षा -षं, कलुषितः -ता -तं.

To **blench**, *v. n.* सहसा सङ्कोचं कृ, मील् (c. 1. मीलति, मीलितुं), निमील्.

To **blend**, *v. a.* मिश्र् (c. 10. मिश्रयति -यितुं), सम्मिश्र्, मिश्रीकृ, सम्पृच् (c. 7. -पृणक्ति -पर्चितुं), संयुज् (c. 7. -युनक्ति -योक्तुं), संश्लिष् in caus. (-श्लेषयति -यितुं), एकीकृ, एकत्र कृ, व्यतिकरं कृ.—(To be mingled) सङ्कॄ in pass. (-कीर्य्यते), मिल् (c. 6. मिलति, मेलितुं), सम्मिल्.

Blended, *p. p.* मिश्रितः -ता -तं, मिश्रीकृतः -ता -तं, सम्मिश्रः -श्रा -श्रं, व्यामिश्रः -श्रा -श्रं, सम्पृक्तः -क्ता -क्तं, आश्लिष्टः -ष्टा -ष्टं, सङ्कीर्णः -र्णा -र्णं, मिलितः -ता -तं, एकीकृतः -ता -तं, करम्बितः -ता -तं, संसृष्टः -ष्टा -ष्टं, सन्निपतितः -ता -तं, संवलितः -ता -तं.

To **bless**, *v. a.* (To pronounce a blessing) आशिषं दा (c. 3. ददाति, दातुं), or वद् (c. 1. वदति, वदितुं), or गद् (c. 1. गदति, गदितुं), or आशंस् (c. 1. -शंसते -शंसितुं), धन्यवादं कृ, कुशलं वद्.—(To make happy) सुख् (c. 10. सुखयति -यितुं), सुखिनं -खिनीं -खि कृ, धन्यं -न्यां -न्यं कृ, मङ्गलं -लां -लं कृ, कुशलं -लां -लं कृ.—(To glorify, give thanks) कस्यचिद् धन्यं वद्, कस्यचिद् गुणान् वद् or कृत् (c. 10. कीर्त्तयति -यितुं), स्तु (c. 2. स्तौति, स्तोतुं); 'God bless you!' स्वस्ति,

मङ्गलं भूयात्, शर्म भूयात्.

Blessed, *a.* धन्यः -न्या -न्यं, मङ्गलः -ला -लं, कुशलः -ला -लं, प्राप्तमङ्गलः -ला -लं, कृतमङ्गलः -ला -लं, कल्याणः -णी -णं, क्षेमवान् -वती -वत् (त्), परमसुखभागी -गिनी -गि (न्), सुखी -खिनी -खि (न्).—(In the joys of heaven) प्राप्तस्वर्गः -र्गा -र्गं, सिद्धः -द्धा -द्धं.

Blessedness, *s.* धन्यत्वं, माङ्गल्यं, कौशल्यं, कल्याणं, परमसुखं, परमानन्दः, सद्गतिः *f.*—(In heaven) सिद्धिः *f.*, स्वर्गगतिः *f.*, परमपदं, परम्पदं, परमागतिः *f.*, अपवर्गः.

Blesser, *s.* आशीर्वादी *m.* (न्) आशंसिता *m.* (तृ), धन्यवादकृत् *m.*, कुशलवादी *m.* (न्).

Blessing, *s.* (Benediction) आशीः *f.* (स्), आशीर्वादः, धन्यवादः, आशीर्वचनं, कुशलवादः, कुशलं.—(A benefit received) वरः, हितं, कुशलं, उपकृतं, धन्यत्वं; 'wishing blessing,' आशंसुः -सुः -सु.

Blight, *s.* नाशः, क्षयः, विनाशः, व्याघातः, आघातः, दूषणं, कलङ्कः, विषं.

To blight, *v. a.* दुष् in caus. (दूषयति -यितुं), नश् in caus. (नाशयति -यितुं), विनश्, क्षि in caus. (क्षययति -यितुं) मृ in caus. (मारयति -यितुं), म्लानीकृ, विशीर्ण -र्णा -र्णं कृ, विफलीकृ.

Blighted, *p. p.* दूषितः -ता -तं, विनाशितः -ता -तं, मारितः -ता -तं.

Blind, *a.* अन्धः -न्धा -न्धं, अन्धकः -का -कं, अचक्षुः -क्षुः -क्षु (स्), विचक्षुः -क्षुः -क्षु (स्), गताक्षः -क्षा -क्षं, अनक्षः -क्षा -क्षं, नेत्रेन्द्रियविकलः -ला -लं, अदृक् *m.* (श्).—(Blind from birth) जात्यन्धः -न्धा -न्धं, जन्मान्धः -न्धा -न्धं.—(Blind of one eye) काणः -णा -णं.—(Hard to find, private) अदृश्यः -श्या -श्यं, निभृतः -ता -तं; 'a blind well,' अन्धकूपः.—(Dark) तमस्वी -स्विनी -स्वि (न्).—(Ignorant) अज्ञानः -ना -नं, अज्ञः -ज्ञा -ज्ञं, दुर्बुद्धिः -द्धिः -द्धि.

To blind, *v. a.* अन्धीकृ, तिमिरीकृ, तिमिर (nom. तिमिरयति -यितुं).

Blind, *s.* (Screen to hinder the sight) तिरस्करिणी, व्यवधा, -धानं.—(Something to mislead) छद्म *n.* (न्), कपटः, कपटवेशः, छद्मवेशः.

Blinded, *p. p.* अन्धीकृतः -ता -तं, अन्धीभूतः -ता -तं, तमोवृतः -ता -तं.—(By sin) पापतिमिरः -रा -रं.

To blindfold, *v. a.* वस्त्रेण नयने or दृशौ बन्ध् (c. 9. बध्नाति, बन्द्धुं), or अवरुध् (c. 7. -रुणद्धि -रोद्धुं), or विरुध्, or आवृ (c. 5. -वृणोति -वरितुं -वरीतुं), वस्त्रेण नयने आछद् (c. 10. -छादयति -यितुं).

Blindfold, *a.* वस्त्रावरुद्धनयनः -नी -नं, अवरुद्धदृष्टिः -ष्टिः -ष्टि, बद्धनेत्रः -त्री -त्रं.

Blindly, *adv.* अन्धवत्, अनालोचितं, अविचार्य्य, असमीक्ष्य, अविचिन्त्य, सहसा.

Blind-man's-buff, *s.* बालानाम् क्रीडाविशेषो यस्मिन् एकतमो वस्त्रावरुद्धनयनः or अवरुद्धदृष्टिर् इतरान् इतस्ततः पलायमानान् जिघृक्षया अनुधावति.

Blindness, *s.* अन्धता -त्वं, तिमिरं.—(Ignorance) अज्ञानं, आवरणं, दुर्बुद्धित्वं, मोहः.

To blink, *v. n.* मील् (c. 1. मीलति, मीलितुं), निमील् or in caus. (निमीलयति -यितुं), निमिष् (c. 6. -मिषति -मेषितुं).

Blink, *s.* निमेषः, निमिषः, मीलितं, दृष्टिनिपातः, अर्द्धवीक्षणं.

Blinking, *s.* मीलनं, निमीलनं, निमेषः, *part.* निमीलन् -लन्ती -लत् (त्).

Bliss, *s.* परमसुखं, परमाह्लादः, परमानन्दः, प्रहर्षः, सुखं, शर्म्म *n.* (न्), प्रह्लादः, अत्यन्तसुखं, धन्यता, कल्याणं.—(Celestial life) अपवर्गः, मोक्षः, सिद्धिः *f.*, मुक्तिः *f.*, स्वर्गगतिः *f.*, परमपदं, परम्पदं.

Blissful, *a.* परमसुखमयः -यी -यं, आनन्दमयः -यी -यं, परमाह्लादवान् -वती -वत् (त्), सुखी -खिनी -खि (न्), धन्यः -न्या -न्यं, सानन्दः -न्दा -न्दं, प्रमोदी -दिनी -दि (न्).

Blissfully, *adv.* परमसुखेन, परमाह्लादेन, परमानन्दपूर्व्वकं, सानन्दं.

Blissless, *a.* सुखहीनः -ना -नं, आह्लादरहितः -ता -तं, निरानन्दः -न्दा -न्दं.

Blister, *s.* त्वक्स्फोटः, स्फोटः, स्फोटकः, विस्फोटः, शोफः, व्रणं.—(On the foot) पादस्फोटः, स्फुटिः *f.*, विपादिका.—(A blistering plaster) त्वक्स्फोटोत्पादक उपनाहः.

To blister, *v. a.* त्वक्स्फोटम् उत्पद् in caus. (-पादयति -यितुं).

To blister, *v. n.* व्रणरूपेण श्वि (c. 1. श्वयति, श्वयितुं) or स्फुट् (c. 1. स्फोटते, स्फोटितुं).

Blistered, *p. p.* व्रणी -णिनी -णि (न्), शूनः -ना -नं, स्फातः -ता -तं.

Blithe, blithesome, *a.* हृष्टः -ष्टा -ष्टं, हृष्टमानसः -सी -सं, प्रहृष्टः -ष्टा -ष्टं, प्रफुल्लः -ल्ला -ल्लं, आनन्दी -न्दिनी -न्दि (न्), आह्लादी -दिनी -दि (न्), प्रमोदी -दिनी -दि (न्), पुलकितः -ता -तं, उल्लासितः -ता -तं, मुदान्वितः -ता -तं, प्रसन्नवदनः -नी -नं.

Blithely, *adv.* सहर्षं, हृष्टमनसा, प्रहृष्टं, प्रहर्षेण, प्रह्लादेन, सानन्दं.

Blitheness, blithesomeness, *s.* प्रहर्षः, हर्षः, प्रहृष्टता, प्रफुल्लता, आह्लादः, आनन्दः.

To bloat, *v. a.* मांसाद्याहारेण मन्त्रोष्य संशूनीकृ or पीनीकृ or स्थूलीकृ, स्फाय् in caus. (स्फाययति -यितुं), श्वि in caus. (श्वाययति -यितुं), आप्यै in caus. (-प्याययति -यितुं).

To bloat, *v. n.* मांसाद्युपभोगेन संशूनीभू or पीनीभू or स्थूलीभू, स्फाय् (c. 1. स्फायते, स्फायितुं), श्वि (c. 1. श्वयति, श्वयितुं), संश्वि, आप्यै (c. 1. -प्यायते -प्यातुं).

Bloated, *p. p.* शूनः -ना -नं, मांसोपभोगसंशूनः -ना -नं, प्रोच्छूनः -ना -नं, पीनः -ना -नं, स्फीतः -ता -तं, स्फातः -ता -तं, प्रवृद्धः -द्धा -द्धं, स्थूलीभूतः -ता -तं.

Bloatedness, *s.* शूनता, स्थूलता, स्फातिः *f.*, स्फीतिः *f.*, पीनता.

Blobber-lipped, *a.* स्थूलोष्ठः -ष्ठा -ष्ठं, लम्बौष्ठः -ष्ठा -ष्ठं.

Block, *s.* (Of wood) स्थूलकाष्ठं, काष्ठं, काष्ठखण्डं.—(Any mass) पिण्डः -ण्डं.—(A massy body) स्थूलद्रव्यं, भारः, स्थूणा.—(Of stone) शिला.—(Obstruction) अवरोधः -धकं, विरोधः, प्रतिष्टम्भः, विष्टम्भः, प्रत्यूहः, विघ्नः.—(A washerman's block) फलकः.

To block up, *v. a.* प्रतिरुध् (c. 7. -रुणद्धि -रोद्धुं), उपरुध्, निरुध्, संरुध्, स्तम्भ् (c. 9. स्तभ्नाति, स्तम्भितुं or caus. स्तम्भयति -यितुं), अपिधा (c. 3. -दधाति -धातुं), पिधा, बाध् (c. 1. बाधते, बाधितुं), आवृ (c. 5. -वृणोति -वरितुं -वरीतुं), प्रतिबन्ध् (c. 9. -बध्नाति -बन्द्धुं).

Blockade, *s.* अवरोधः, रोधः, रोधनं, वेष्टनं, परिवेष्टनं, चिररोधः.

To blockade, *v. a.* रुध् (c. 7. रुणद्धि, रोद्धुं), उपरुध्, संरुध्, निरुध्, प्रतिरुध्, विरुध्; परिवेष्ट् (c. 1. -वेष्टते -वेष्टितुं), बाध् (c. 1. बाधते, बाधितुं).

Blockaded, *p. p.* रुद्धः -द्धा -द्धं, परिवेष्टितः -ता -तं, बाधितः -ता -तं.

Blocked up, *p. p.* प्रतिरुद्धः -द्धा -द्धं, रुद्धः -द्धा -द्धं, प्रतिष्टब्धः -ब्धा -ब्धं, स्तब्धः -ब्धा -ब्धं, सम्बाधः -धा -धं, वारितः -ता -तं, पिहितः -ता -तं.

Blockhead, *s.* स्थूलबुद्धिः *m.*, स्थूलधीः *m.*, मन्दबुद्धिः *m.*, मूर्खः, मूढः, दुर्बुद्धिः *m.*, वर्व्वरः.

Blood, *s.* असृक् *n.* (ज्), लोहितं, रक्तं, रुधिरं, शोणितं, क्षतजं, अस्रं, 'to lose blood, रक्तं मुच् (c. 6. मुञ्चति, मोक्तुं); 'to flow with blood,' रक्तं स्रु (c. 1. स्रवति, स्रोतुं).—(Kindred, lineage) कुलं, वंशः, सन्तानः, गोत्रं, गोष्ठी; 'of whole blood,' सोदरः, सहोदरः, सोदर्य्यः, समानोदर्य्यः, सगर्भः, सनाभिः *m.*, एकशरीरः; 'of half blood,' भिन्नोदरः.—(Murder) वधः, नृहत्या, घातनं, मारणं.

To blood, *v. a.* (To stain with blood) असृजा or शोणितेन लिप् (c. 6. लिम्पति, लेप्तुं), अनुलिप् or अञ्ज् (c. 7. अनक्ति, अंक्तुं) or मलिन (nom. मलिनयति -यितुं).—(To let blood) रक्तं or शोणितं स्रु in caus. (स्रावयति -यितुं) or मुष् in caus. (मोक्षयति -यितुं).

Blood-bespotted, *a.* रक्तमलिनः -ना -नं, शोणितोक्षितः -ता -तं.

Blood-drinking, *a.* रक्तपः -पा -पं, रक्तपायी -यिनी -यि (न्) or रुधिरपायी, शोणितपः -पा -पं, असृक्पः -क्पा.

Bloodhound, *s.* अतिक्रूरो मृगव्यकुक्कुरभेदः स च घ्राणबलेन मृगस्थानं नयति.

Bloodily, *adv.* जिघांसया, क्रूरं, निर्घृणं, नैर्घृण्येन, निर्दयं.

Bloodiness, *s.* रक्तपूर्णता.—(Disposition to kill) जिघांसा.

Bloodless, *a.* नीरक्तः -क्ता -क्तं, रक्तहीनः -ना -नं, निःशोणितः -ता -तं.

Bloodletter, *s.* रक्तस्रावकः, असृक्स्रावी *m.* (न्), रक्तमोक्षकः, सिरावेधकः.

Bloodshed, *s.* रक्तपातः, असृक्पातः, वधः, नृहत्या, रिपुहत्या.

Bloodshedder, *s.* रक्तपातकः, जिघांसुः *m.*, घातकः, हन्ता *m.* (न्तृ) or निहन्ता, वधोद्यतः.

Bloodshot, *a.* रक्तपूर्णः -र्णा -र्णं, शोणिताप्लुतः -ता -तं.—(Redness of the vessels of the eye) रक्ताभिष्यन्दः; 'having bloodshot eyes,' रक्तेक्षणः -णा -णं.

Blood-stained, *a.* असृग्लिप्तः -प्ता -प्तं, शोणिताक्तः -क्ता -क्तं, रक्ताक्तः -क्ता -क्तं, शोणितोक्षितः -ता -तं, रक्तमलिनः -ना -नं.

Bloodsucker, *s.* शोणितपः, रक्तपायी *m.* (न्) or रुधिरपायी, असृक्पः.—(A leech) जलौका, रक्तपा *f.*, जलौकाः *m.* (स्).

Bloodthirsty, *a.* रक्तपिपासुः -सुः -सु, शोणितप्रियः -या -यं, जिघांसुः -सुः -सु, क्रूरः -रा -रं, वधोद्यतः -ता -तं.

Bloodvessel, *s.* असृग्वहा *f.*, नाडिः *f.*, रक्तप्रवाहकनाडिः *f.*, शिरा, रक्तवाही *m.* (न्).

Bloody, *a.* रक्तमयः -यी -यं, शोणितमयः -यी -यं, रक्ताक्तः -क्ता -क्तं.—(Murderous) मारात्मकः -का -कं, क्रूरः -रा -रं.

Bloody-flux, *s.* रक्तातीसारः, रक्तपित्तं, अधोसपित्तं, मारणः, प्रवाहिका.

Bloody-minded, *a.* मारात्मकः -का -कं, जिघांसुः -सुः -सु, क्रूरचेताः -ताः -तः (स्).

Bloody-red, *a.* रक्तवर्णः -र्णा -र्णं, लोहितवर्णः -र्णा -र्णं.

Bloom, *s.* (A blossom) पुष्पं, कुसुमं, पल्लवः, मुकुलः -लं.—(Freshcolour) नववर्णः.—(In a state of bloom) अदृष्टपरिणामः.—(Bloom of youth) नवयौवनं, अक्षतयौवनं; 'in the bloom of youth,' प्रौढयौवनः -ना -नं.

To bloom, *v. n.* फुल्ल् (c. 1. फुल्लति, फुल्लितुं), पुष्प् (c. 4. पुष्प्यति, पुष्पितुं), कुसुम (nom. कुसुमयति -यितुं), विकस् (c. 1. -कसति -कसितुं).—(To flourish) ऋध् (c. 5. ऋध्नोति, अर्धितुं), समृध्; स्फ्ध् (c. 1. स्फ्धते, स्फ्धितुं), वृध् (c. 1. वर्धते, वर्धितुं).

Blooming, *a.* फुल्लवान् -वती -वत् (त्), प्रफुल्लः -ल्ला -ल्लं, विकसन् -सन्ती -सत् (त्), स्फुटन् -टन्ती -टत् (त्), विकासी -सिनी -सि (न्).—(Flourishing) वर्द्धमानः -ना -नं, समृद्धः -द्धा -द्धं, उदयी -यिनी -यि (न्).

Blossom, *s.* पुष्पं, कुसुमं, पल्लवः, मुकुलः -लं, क्षारकः, प्रसवः.

To blossom, *v. n.* फुल्ल् (c. 1. फुल्लति, फुल्लितुं), कुसुम (nom. कुसुमयति -यितुं), स्फुट् (c. 6. स्फुटति, स्फुटितुं, c. 1. स्फोटते, स्फोटितुं), पुष्प् (c. 4. पुष्प्यति, पुष्पितुं), विकस् (c. 1. -कसति -कसितुं).

Blossoming, *a.* फुल्लवान् -वती -वत् (त्), पुष्पितः -ता -तं, पुष्पवान् -वती -वत् (त्), कुसुमितः -ता -तं, कुसुमवान् -वती -वत् (त्), स्फुटितपुष्पः -ष्पा -ष्पं.

To blot, *v. a.* मलिन (nom. मलिनयति -यितुं), मलिनीकृ, लिप् (c. 6. लिम्पति, लेप्तुं), दुष् in caus. (दूषयति -यितुं), कलङ्क (nom. कलङ्कयति -यितुं), कृष्णीकृ.—(To make indistinct) अस्पष्टीकृ.

To blot out, *v. a.* (To efface, destroy) विनश् in caus. (-नाशयति -यितुं), उच्छिद् (c. 7. -छिनत्ति -छेत्तुं), उद्धृ (c. 1. -हरति -हर्तुं), विलुप् in caus. (-लोपयति -यितुं).—(To erase) व्यामृष् (c. 1. -मर्षति -मर्षितुं), लोपं कृ.

Blot, *s.* (Erasure) लोपः, व्यामर्षः.—(Spot, stain) कलङ्कः, अपकलङ्कः, कलुषं, मलं, दोषः.—(Disgrace) अपकीर्त्तिः *f.*, अपयशः *n.* (स्), अकीर्त्तिः *f.*

Blotch, *s.* किलासं, सिध्म *n.* (न्), स्फोटः, विस्फोटः, व्रणं, कच्छपिका.

To blotch, *v. a.* किलासीकृ, मलिन (nom. मलिनयति -यितुं).

Blotchy, *a.* किलासी -सिनी -सि (न्), सिध्मलः -ला -लं, सिध्मवान् -वती -वत् (त्).

Blotted, *p. p.* मलिनितः -ता -तं, दूषितः -ता -तं, कलङ्कितः -ता -तं.

Blotting-paper, *s.* मसीशोषकः, मसीशोषणयोग्यं पत्रं.

Blow, *s.* (A stroke) प्रहारः, आघातः, अभिघातः, घातः, पातः, पातनं, दण्डः, हतिः *f.*, आहतिः *f.*—(A blow with the fist) मुष्टिपातः; 'a blow which reduces to powder,' निष्पेषः.—(Blooming of flowers) फुल्लिः *f.*, फुल्लतिः *f.*, स्फुटनं, विकाशः.—(The act of a fly which infects meat by depositing eggs) मक्षिकया अण्डप्रसवेन खाद्यमांसदूषणं.

To blow, *v. n.* (As the wind) वा (c. 2. वाति, वातुं), प्रवा.—(To breathe) श्वस् (c. 2. श्वसिति, श्वसितुं), उच्छ्वस्, श्वासप्रश्वासं कृ.—(To pant) कृच्छ्रेण श्वस्, विनिश्वस्, दुःश्वासं कृ, यष्टिप्राणः -णा -णं भू.—(As a flower) फुल्ल् (c. 1. फुल्लति, फुल्लितुं), स्फुट् (c. 6. स्फुटति, स्फुटितुं), पुष्प् (c. 4. पुष्प्यति, पुष्पितुं).

To blow, *v. a.* ध्मा (c. 1. धमति, ध्मातुं), समाध्मा, प्रध्मा, उपध्मा; 'he blew his horn,' शङ्खं दध्मौ; 'fire blown by the wind,' वायुना ध्मायमानोऽग्निः.—(To blow away) अपध्मा, विध्मा.—(To blow out) निर्वा in caus. (-वापयति -यितुं).—(To blow upon) वीज् (c. 10. वीजयति -यितुं), अनुवीज्, उद्वीज्, उपवीज्; 'blown upon by sacred breezes,' पुण्यैर्वायुभिर् अनुवीजितः.—(To puff upon, to cool) फुत् कृ, फूत्कारं कृ.—(To blow the nose) नासिकां ध्मा.—(One who blows his nose) नासिकन्धमः.

Blowing, *part.* (As a flower) स्फुटन् -टन्ती -टत् (त्), विकाशी -शिनी -शि (न्), फुल्लवान् -वती -वत् (त्).—(The act) फुल्लिः *f.*, स्फुटनं, प्रस्फोटनं, विकाशः.

Blown, *p. p.* (As a flower) फुल्लः -ल्ला -ल्लं, उत्फुल्लः -ल्ला -ल्लं, प्रफुल्लः -ल्ला -ल्लं, स्फुटः -टा -टं, व्याकोशः -शा -शं, विकसितः -ता -तं, विकचः -चा -चं, प्रस्फुटः -टा -टं.—(Inflated) आध्मातः -ता -तं.

Blow-pipe, *s.* नाडिः *f.*—(One who uses it) नाडिन्धमः.

Blowzy, *a.* आतपदग्धवदनः -नी -नं, सूर्य्यतेजसा विकृतवर्णः -र्णा -र्णं.

Blubber, *s.* तिमिमेदः *n.* (स्), तिमिवसा, तिमितैलं, बृहन्मीनमेदः *n.* (स्).

To blubber, *v. n.* यथा गण्डौ श्वयतस् तथा रुद् (c. 2. रोदिति, रोदितुं) अतिशयक्रन्दनाद् उच्छूनमुखो भू.

Bludgeon, *s.* लगुडः, परिघः, परिघातनं, गदा.—(Armed with) लगुडहस्तः.

Blue, *s.* (The colour) नीलः, नीलवर्णः.

Blue, *a.* नीलः -ला -लं, नीलवर्णः -र्णा -र्णं, श्यामः -मा -मं.

To blue, *v. a.* नीलीकृ.—(To become blue) नील (nom. नीलायते).

Bluebottle, *s.* नीलशरीरः स्थूलमक्षिकाप्रभेदः, वर्व्वणा.

Blue-eyed, *a.* नीलनयनः -नी -नं, नीलाक्षः -क्षी -क्षं.

Blueness, *s.* नैल्यं, नीलता -त्वं, श्यामता.

Bluff, *a.* (Big) स्थूलः -ला -लं.—(Harsh) रूक्षः -क्षा -क्षं, परुषः -षा -षं, उग्रः -ग्रा -ग्रं, कर्कशः -शा -शं.—(Not pointed) घनाग्रः -ग्रा -ग्रं.—(Exposed to wind) वातावकाशिकः -की -कं.

Bluffness, *s.* रूक्षता, कार्कश्यं, परुषत्वं, घनत्वं.

Bluish, *a.* आनीलः -ला -लं, ईषन्नीलः -ला -लं, ईषच्छ्यामः -मा -मं.

To BLUNDER, *v. n.* प्रमद् (c. 4. -माद्यति -मदितुं), स्खल् (c. 1. स्खलति, स्खलितुं), भ्रम (c. 1. भ्रमति, c. 4. भ्राम्यति, भ्रमितुं), अनवधानं कृ.

BLUNDER, *s.* प्रमादः, स्खलितं, स्खलनं, दोषः, भ्रमः, कर्म्मदोषः, अनवधानं, अशुद्धं.

BLUNDERBUSS, *s.* अनेकशो लोहगुलिकाप्रक्षेपणी विशालमुखविशिष्टा नाडिः *f.*

BLUNDERER, *s.* प्रमादी *m.* (न्), प्रमादकर्त्ता *m.* (र्त्तृ), दोषकर्त्ता *m.* (र्त्तृ), स्खलनशीलः

BLUNDERING, *a.* प्रमादी -दिनी -दि (न्), प्रमत्तः -त्ता -त्तं, स्खलन्मतिः -तिः -ति, अनवधानः -ना -नं, दोषी -षिणी -षि (न्).

BLUNDERINGLY, *adv.* प्रमादेन, प्रमाद्यतस्, स्खलनपूर्व्वं, अनवधानेन, अवधानं विना.

BLUNT, *a.* (Not sharp) अतीक्ष्णः -क्ष्णा -क्ष्णं, अतीव्रः -व्रा -व्रं, अप्रखरः -रा -रं, धाराहीनः -ना -नं.—(Thick, obtuse) घनः -ना -नं, स्थूलः -ला -लं.—(Dull of understanding) मन्दमतिः -तिः -ति, अविदग्धः -ग्धा -ग्धं.—(Rough) रूक्षः -क्षा -क्षं, परुषः -षा -षं, कर्कशः -शा -शं, असमृणः -णा -णं.

To BLUNT, *v. a.* घनीकृ, धाराम् अतीक्ष्णां कृ, विरुग्नधारां -रां -रं कृ, रुग्नीकृ, विरुग्नीकृ, स्थूलीकृ.—(To lessen) अल्पीकृ, न्यूनीकृ, शम in caus. (शमयति -यितुं), ह्रस in caus. (ह्रासयति -यितुं); 'one who blunts desire,' कामायसायिता *m.* (तृ).

BLUNTED, *p. p.* घनीकृतः -ता -तं, विरुग्नधारः -रा -रं, विरुग्नः -ग्ना -ग्नं.

BLUNTLY, *adv.* पारुष्येण, कार्कश्येन, कर्कशवाक्येन, परुषोक्त्या, सपारुष्यं.

BLUNTNESS, *s.* अतीक्ष्णता, धाराहीनता, घनत्वं, रूक्षता, स्थूलता.—(Of intellect) मन्दमतिता, अविदग्धता, बुद्धिमान्द्यं.—(Of manner) पारुष्यं, रूक्षता, कर्कशत्वं, कार्कश्यं.

BLUR, *s.* कलङ्कः, दोषः, कलुषं, मलं.

To BLUR, *v. a.* मलिन (nom. मलिनयति -यितुं), कलङ्क (nom. कलङ्कयति -यितुं), लिप (c. 6. लिम्पति, लेप्तुं), दुष in caus. (दूषयति -यितुं), कलुष (nom. कलुषयति -यितुं).

BLURRED, *p. p.* मलिनितः -ता -तं, परिमलितः -ता -तं, कलुषितः -ता -तं.

To BLURT, *v. a.* असमीक्ष्य or अविमृश्य or अविचार्य्य or प्रमादेन वद (c. 1. वदति, वदितुं), जल्प (c. 1. जल्पति, जल्पितुं).

To BLUSH, *v. n.* लज्ज (c. 6. लज्जते, लज्जितुं), विलज्ज, संलज्ज, व्रीड (c. 4. व्रीड्यति, व्रीडितुं), त्रप (c. 1. त्रपते, त्रपितुं), ह्री (c. 3. जिह्रेति, ह्रेतुं); 'to blush at any thing,' ह्री with abl. or gen. c.—(To become red) अरुणीभू, ईषदरुणीभू, लोहित (nom. लोहितायते).—(In the face) लोहिताननः -ना -नं भू.

To BLUSH, *v. a.* (To make red) अरुणीकृ, अरुण (nom. अरुणयति -यितुं).

BLUSH, *s.* कपोलरागः.—(Colour in the face resulting from shame) लज्जाप्रयुक्तं वदनरक्तत्वं, व्रीडाजनितो मुखारुणिमा *m.* (न्).—(Bashfulness) लज्जा, ह्रीः *f.*, व्रीडा, त्रपा; 'full of blushes,' ह्रीपरिगतः -ता -तं.—(To put to the blush) ह्री in caus. (ह्रेपयति -यितुं); 'put to the blush,' ह्रेपितः -ता -तं.—(At the first blush or aspect) प्रथमदर्शने, आदावेव.

To BLUSTER, *v. n.* (To roar) गर्ज (c. 1. गर्जति, गर्जितुं).—(To be tumultuous) तुमुलं कृ, मुखरीभू, शब्द (nom. शब्दायते).—(To brag) विकत्थ (c. 1. -कत्थते -कत्थितुं).—(To be violent) भृश (nom. भृशायते).—(To bully) तर्ज (c. 1. तर्जति, तर्जितुं), मुखरीकृ, भर्त्स (c. 10. भर्त्सयते -यितुं).

BLUSTERER, *s.* शूरम्मन्यः, भर्त्सनकारः, कलहकारः, दाम्भिकः, विकत्थी *m.* (न्).

BLUSTERING, *s.* गर्ज्जनं, गर्ज्जितं, तुमुलं, कोलाहलः, भर्त्सनं, विकत्थनं.

BLUSTEROUS, *a.* गर्ज्जनकारी -रिणी -रि (न्), महास्वनः -ना -नं, मुखरः -रा -रं.

BOA-CONSTRICTOR, *s.* (A snake) अजगरः, वाहसः, शयुः *m.*, वोडुः.

BOAR, *s.* वराहः, शूकरः, दंष्ट्री *m.* (न्), स्थूलनासः, पृथुस्कन्धः, कोलः, किरः, दृढलोमा *m.* (न्), वक्रदंष्ट्रः; 'wild boar,' वनशूकरः.

BOARD, *s.* (A plank) फलकः -कं, दीर्घकाष्ठं.—(A table) भोजनाधारः, फलकः, भोजनासनं, मञ्चः.—(Food) भोजनं, आहारः, भृतिः *f.*, अन्नजलं; 'board and clothing,' ग्रासाच्छादनं; 'board and lodging,' ग्रासावासौ *du.*—(A council) सभा; 'the members of it,' सभासदः *m. pl.*—(The deck of a ship) नौकापृष्ठं, पोतपृष्ठं, नौकातलं, नौकाफलकं, पोतास्तरणं; 'on board,' नौकारूढः -ढा -ढं.—(A board for playing drafts, &c.) अष्टापदं, शारिफलं, नयपीठी.

To BOARD, *v. a.* (To enter a ship by force) नावं बलात or बलेन or प्रमथ्य आरुह् (c. 1. -रोहति -रोढुं) or अधिक्रम् (c. 1. -क्रामति -क्रमितुं) or आक्रम or अवप्लु (c. 1. -प्लवते -प्लोतुं).—(To lay with boards) फलक (nom. फलकयति -यितुं), फलकैः or दीर्घकाष्ठैः or काष्ठफलकेन आस्तृ (c. 9. -स्तृणाति -स्तरितुं -स्तरीतुं).—(To diet another at a settled rate) निरूपितमूल्येन स्वगृहे अन्तेवासिनं भुज in caus. (भोजयति -यितुं) or भृ (c. 3. बिभर्त्ति, भर्त्तुं).

To BOARD, *v. n.* (To diet with another at a settled rate) निरूपितवेतनं दत्त्वा or निरूपितमूल्येन परगृहे भोजनशयनादि कृ or अन्तेवासी भू.

BOARDER, *s.* (One who diets with another) निरूपितमूल्येन परगृहे भोजनशयनादिकर्त्ता *m.* (र्त्तृ), सहभोजी *m.* (न्), सहभोक्ता *m.* (क्तृ), पांक्तः.—(A pupil at a boarding-school) अन्तेवासी *m.* (न्).

BOARDING-SCHOOL, *s.* यस्मिन् विद्यालये अन्तेवासिनः शिक्षकगृहे भोजनशयनादि कुर्व्वन्ति सः.

BOARD-WAGES, *s.* भोजनक्रयणार्थं वेतनं, अन्नक्रयणार्थं वर्त्तनं, भोजनात् प्रति वेतनं.

BOARISH, *a.* वाराहः -ही -हं, सौकरः -री -रं, असभ्यः -भ्या -भ्यं.

To BOAST, *v. n.* आत्मानं श्लाघ् (c. 1. श्लाघते, श्लाघितुं), कत्थ (c. 1. कत्थते, कत्थितुं), विकत्थ with inst. of the thing of which boast is made, दम्भं कृ, परिकृत् (c. 10. -कीर्त्तयति -यितुं), दृप (c. 4. दृप्यति, दर्प्तुं), गर्व्व (c. 1. गर्व्वति, गर्व्वितुं).

BOAST, BOASTING, *s.* आत्मश्लाघा, विकत्था, विकत्थनं, परिकीर्त्तनं, अहङ्कारोक्तिः *f.*, शूरमानं, दम्भः, दर्पकरणं, दर्पः, गर्व्वः, अभिमानं, आहोपुरुषिका, अहमहमिका.

BOASTED, *p. p.* श्लाघितः -ता -तं, परिकीर्त्तितः -ता -तं.

BOASTER, *s.* आत्मश्लाघी *m.* (न्), विकत्थी *m.* (न्), -त्थिनी *f.*, -त्थनः, उपजल्पी *m.* (न्), दम्भी *m.* (न्), शूरम्मन्यः, शूरमानी *m.* (न्).

BOASTFUL, *a.* दाम्भिकः -की -कं, दम्भी -म्भिनी -म्भि (न्), गर्व्वितः -ता -तं, गर्व्वपूर्णः -र्णा -र्णं, विकत्थनः -ना -नं, अवलिप्तः -प्ता -प्तं, वाचालः -ला -लं.

BOASTFULLY, *adv.* गर्व्वेण, दम्भेन, सदर्पं, सगर्व्वं, सदम्भं, विकत्थनपूर्व्वं.

BOASTLESS, *a.* दम्भहीनः -ना -नं, अगर्व्वः -र्व्वा -र्व्वं, अभिमानरहितः -ता -तं.

BOAT, *s.* नौः *f.*, नौका, पोतः, तरी, तरणी, तरण्डः, उडुपः.

BOATFUL, *s.* नौकापूरणं, पोतपूरणं.

BOATLOAD, *s.* नौकाभारः, पोतभारः.

BOATMAN, *s.* नाविकः, पोतवाहः, निर्यामः, नौकारूढः, औडुपिकः.

BOATSWAIN, *s.* मुख्यनाविकः, प्रधाननाविकः, नाविकः, कर्णधारः, निर्यामाधिष्ठाता *m.* (तृ).

To BOB, *v. a.* (To crop) ह्रस in caus. (ह्रासयति -यितुं).—(To beat) तड in caus. (ताडयति -यितुं).

To BOB, *v. n.* (To play backwards and forwards) इतस्ततो लुठ

(c. 6. लुठति, लुठितुं) or स्फुर् (c. 6. स्फुरति, स्फुरितुं) or प्रेङ्ख् (c. 1. प्रेङ्खति, प्रेङ्खितुं), दोल (nom. दोलायते -यितुं), चञ्च् (c. 1. चञ्चति, चञ्चितुं), चञ्चल (nom. चञ्चलायते).

Bob, s. (Ear-ring) कुण्डलं, कर्णिका.—(A blow) प्रहारः, आघातः.

Bobbin, s. कपालनालिका, सूत्रगण्डिका, तन्तुकीलः.

Bobtail, s. छिन्नबालधारी m. (न्), ह्रस्वपुच्छी m. (न्), कर्त्तितलाङ्गूली m. (न्).

Bobtailed, a. छिन्नबालः -ला -लं, ह्रस्वपुच्छः -च्छा -च्छं, कर्त्तितलाङ्गूलः -ला -लं.

Bobwig, s. शिरोरुहहीनैर् भृतं परकीयकृत्रिमकेशनिर्म्मितं शिरस्त्रं.

To bode, v. a. शुभाशुभं or मङ्गलामङ्गलं प्रदृश् in caus. (-दर्शयति -यितुं), इष्टानिष्टम् आविद् in caus. (-वेदयति -यितुं) or सूच् (c. 10. सूचयति -यितुं), पूर्व्वलिङ्गं or पूर्व्वचिह्नं or पूर्व्वलक्षणं दा (c. 3. ददाति, दातुं), निपातं or विनिपातं शंस् (c. 1. शंसति, शंसितुं).

Bodement, s. पूर्व्वलक्षणं, पूर्व्वचिह्नं, पूर्व्वलिङ्गं, चिह्नं, शुभाशुभलक्षणं, शुभाशुभचिह्नं, शकुनं, उत्पातः, अजन्यं, निमित्तं, उपसर्गः, उपलिङ्गं, भाविसूचकं चिह्नं.

Bodice, s. चोलः -ली, अङ्गिका, चेलिका, कञ्चुलिका, कूर्पासकः -कं.

Bodied, a. शरीरी -रिणी -रि (न्), देही -हिनी -हि (न्), अङ्गी -ङ्गिनी -ङ्गि (न्).

Bodiless, a. अशरीरः -रा -रं or -री -रिणी -रि (न्), अनङ्गः -ङ्गा -ङ्गं, अङ्गहीनः -ना -नं, निराकारः -रा -रं, अमूर्त्तः -र्त्ता -र्त्तं, व्यङ्गः -ङ्गी -ङ्गं.

Bodily, a. शारीरिकः -की -कं, दैहिकः -की -कं, शरीरजः -जा -जं, कायिकः -की -कं, आङ्गिकः -का -की -कं, आङ्गः -ङ्गी -ङ्गं.—(Bodily hardship) कायक्लेशः, देहक्लेशः, कृच्छ्रं.

Bodily, adv. शरीरतस्, सदेहं, सशरीरं, सकायं, साङ्गं.—(In a mass) साकल्येन.—(United with the body) शरीरसंयुक्तः -क्ता -क्तं, शरीरसम्पृक्तः -क्ता -क्तं.

Bodkin, s. सूचिविशेषः, सूचिः -ची, सूचिनी.—(A dagger) छुरिका, शङ्कुः m.—(Instrument for piercing) आविधः, वेधनिका.—(For the hair) केशरचनायोग्यः कीलविशेषः.

Body, s. (As opposed to the immaterial substance of an animal) शरीरं, देहः, कायः, गात्रं, मूर्त्तिः f., अङ्गं, वपुः n. (स्), कलेवरं, वर्ष्म n. (न्), विग्रहः, संहननं, तनुः f. -नूः f., करणं; 'a dead body,' मृतशरीरं, शवः, कुणपः; 'a little body,' शरीरकं.—(Substance) मूर्त्तिः f.; 'the body of cloth,' वस्त्रयोनिः m.—(A person) पुरुषः, जनः, मनुष्यः, लोकः.—(A collective mass) समूहः, समवायः, सङ्घातः, समुदायः, मण्डलं, सङ्घः, वृन्दं, निवहः, ओघः; 'a body of men,' जनसमूहः; 'a body of water,' पयोराशिः m., वारिराशिः m.; 'in a body,' सङ्घशस्, सम्भूय, समूह्य.—(A society of men) संसर्गः, समागमः, पङ्क्तिः f.—(A corporate body) श्रेणी.—(A collegiate or religious body) आश्रमः.—(Strength) बलं.—(The main part) प्रधानभागः; 'body of a tree,' प्रकाण्डः, स्कन्धः; 'the body or interior of a building,' प्रासादाभ्यन्तरं, अन्तर्गृहं, अन्तर्भवनं, भवनोदरं, भवनगर्भः.—(A body of troops) गुल्मः, सैन्यदलं, सैनिकः; 'a body of reserve,' प्रतिग्रहः; 'body to body,' अङ्गाङ्गि.

Body-clothes, s. (Of horses) आस्तरः, पर्य्ययणं, अश्वानां गात्रवस्त्रं.

To body-forth, v. a. रूप् (c. 10. रूपयति -यितुं), निर्मा (c. 2. -माति -मातुं).

Body-guard, s. परिचरः, परिधिस्थः, अनुचरः, परिवारः.

Bog, s. अनूपः, अनूपभूः f., कच्छः, कच्छभूः f., पङ्कः, कर्द्दमः, पङ्ककर्द्दटः.

Bog-trotter, s. अनूपवासी m. (न्), कच्छभूमिवासी m. (न्), कच्छदेशस्थायी m. (न्).

To boggle, v. n. (To hesitate) शङ्क् (c. 1. शङ्कते, शङ्कितुं), विशङ्क्, अभिशङ्क्, आशङ्क्, सन्दिह् (c. 2. -देग्धि -देग्धुं), दोल (nom. दोलायते -यितुं), आन्दोल, विलम्ब् (c. 1. -लम्बते -लम्बितुं), विकृप् (c. 1. -कल्पते -कल्पितुं).

Boggler, s. सन्दिग्धमतिः, शङ्कितमतिः, संशयिता m. (तृ), संशयालुः, शङ्काशीलः.

Boggy, a. अनूपः -पा -पं, आनूपः -पी -पं, पङ्किलः -ला -लं, कार्द्दमः -मी -मं, कच्छः -च्छा -च्छं.

To boil, v. n. (To be effervescent) फेन् (nom. फेनायते -यितुं), फुत् कृ.—(To boil over) उत्सेचनं कृ.—(To be cooked by boiling) क्कथ् in pass. (क्कथ्यते), श्रा in pass. (श्रायते), पच् in pass. (पच्यते).—(To be hot) तप् in pass. (तप्यते).

To boil, v. a. क्कथ् (c. 1. क्कथति, क्कथितुं), स्थाल्यां पच्, श्रा (c. 2. श्राति, श्रातुं or caus. श्रपयति -यितुं), तप् in caus. (तापयति -यितुं).

Boil, s. व्रणं -णः, तनुव्रणः, विस्फोटः, स्फोटः, स्फोटकः, पिटकः -का, नालीव्रणः, गण्डः, पोटिकः; 'blind boil,' अन्धालजी.

Boiled, p. p. क्कथितः -ता -तं, श्राणः -णा -णं, शृतः -ता -तं, श्रपितः -ता -तं.—(In a caldron) पैठरः -री -रं, स्थालीपक्कः -क्का -क्कं, उख्यः -ख्या -ख्यं; 'boiled rice,' भक्तं.

Boiler, s. स्थाली, ऋजीषं, पिष्टपचनं, पिठरः -रं, उखा, कन्दुः m. f.

Boisterous, a. (Stormy) वातवान् -वती -वत् (त्), वातलः -ला -लं, गर्जनकारी -रिणी -रि (न्); 'a boisterous wind,' प्रचण्डपवनः.—(Violent) प्रचण्डः -ण्डा -ण्डं, उच्चण्डः -ण्डा -ण्डं, रोषणः -णा -णं, साहसिकः -की -कं.—(Turbulent) कलहकारी -रिणी -रि (न्).—(Noisy) शब्दकारी -रिणी -रि (न्) or तुमुलकारी.—(Laughing violently) अट्टहासी -सिनी -सि (न्).

Boisterously, adv. प्रचण्डं, प्रचण्डतया, महारोषेण, महाशब्देन, कोलाहलेन.

Boisterousness, s. वातलत्वं, प्रचण्डता, साहसिकत्वं, सरोषता.

Bold, a. (Brave) शूरः -रा -रं, प्रवीरः -रा -रं, निर्भयः -या -यं, निर्विशङ्कः -ङ्का -ङ्कं.—(Daring, audacious) साहसी -सिनी -सि (न्), प्रगल्भः -ल्भा -ल्भं, प्रतिभान्वितः -ता -तं.—(Impudent) निर्लज्जः -ज्जा -ज्जं, धृष्टः -ष्टा -ष्टं, अनिभृतः -ता -तं, प्रतिभानवान् -वती -वत् (त्); 'to be bold,' धृष् (c. 5. धृष्णोति, धर्षितुं).

To bolden, v. a. निर्भयं -यां -यं कृ, अभयं दा (c. 3. ददाति, दातुं).

Bold-faced, a. प्रतिभामुखः -खी -खं, निर्लज्जमुखः -खी -खं, निर्लज्जः -ज्जा -ज्जं.

Boldly, adv. शूरवत्, साहसेन, प्रागल्भ्येन, निर्भयं, भयं विना; 'to speak boldly,' जल्प् (c. 1. जल्पति, जल्पितुं).

Boldness, s. (Courage) शौर्य्यं, शूरता, वीरता, निर्भयत्वं, अक्षोभः.—(Daringness) प्रागल्भ्यं, प्रगल्भता, साहसं, प्रतिभानं.—(Impudence) निर्लज्जत्वं, धार्ष्ट्यं, धृष्टता.

Bole, s. (Trunk of a tree) स्कन्धः, प्रकाण्डः, स्थाणुः m.

Boll, s. नाडिः -डी f., नाली, काण्डः -ण्डं.

To boll, v. n. अतसीवत् स्फुट् (c. 6. स्फुटति, स्फुटितुं) or विकस् (c. 1. -कसति -कसितुं) or शस्ययुक्तः -क्ता -क्तं भू.

Bolster, s. उपधानं, उपधानीयं, उच्छीर्षकं, उपबर्हः, गभोलिकः.—(Bandage) पट्टः, बन्धनं.—(A prop, support) उपस्तम्भः, उपघ्नः, आलम्बः.

To bolster up, v. a. (To support) संस्तम्भ् (c. 5. स्तभ्नोति, c. 9. स्तभ्नाति, स्तम्भितुं or caus. स्तम्भयति -यितुं), उपस्तम्भ्, विष्टम्भ्; धृ (c. 1. धरति, धर्त्तुं or caus. धारयति -यितुं), आलम्ब् (c. 1. -लम्बते -लम्बितुं), समवलम्ब्.

Bolt, s. (Of a door) अर्गलं, तालकं, कीलः, तालयन्त्रं, द्वारयन्त्रं, अपलं.—(A dart) मृगः, शूलः -लं, शल्यं, शङ्कुः m., प्रासः, शरः.—(Thunder-bolt) वज्रं, कुलिशं, अशनिः m. f.

To **bring**, *v. a.* (Fetch from another place) आनी (c. 1. -नयति -ते -नेतुं), उपानी, आहृ (c. 1. -हरति -हर्त्तुं).—(Carry to a place) नी, आवह् (c. 1. -वहति -वोढुं), उपवह्, संवह्.—(Cause to come) आगम् in caus. (-गमयति -यितुं), प्राप् in caus. (-आपयति -यितुं), उपपद् in caus. (-पादयति -यितुं).—(Reduce to a particular state) गम् in caus., कृ; 'brought to misery,' कृच्छ्रगतः -ता -तं; 'brought low,' अल्पीकृतः -ता -तं, अस्तङ्गमितः -ता -तं.—(Induce) अनुनी, उपागम् in caus., प्रोत्सह् in caus. (-साहयति -यितुं), आकृष् (c. 1. -कर्षति -क्रष्टुं).—(Bring about) घट् (c. 1. घटते, घटितुं), सिध् in caus. (साधयति -यितुं), संसिध्, सम्पद् in caus. (-पादयति -यितुं), उपपद्.—(Bring back) प्रत्यानी, प्रतिपद् in caus., प्रत्यृ in caus. (-अर्पयति -यितुं).—(Bring down, humble) अपकृष्, अभिभू (c. 1. -भवति -भवितुं); 'having his pride brought down,' आत्तगर्व्वः, भग्नदर्पः.—(Bring forth, give birth to) सु (c. 1. सवति, c. 2. सौति, सोतुं), प्रसु; प्रजन् (c. 4. -जायते -जनितुं), जन् in caus. (जनयति -यितुं), उत्पद् in caus.; 'act of bringing forth,' प्रसवः.—(Bring forward) प्रणी, अभिप्रणी, आनी, उपनी, अग्रे नी, पुरस्कृ, प्रगम् in caus., सम्प्रस्था in caus. (-स्थापयति -यितुं), प्रसृ in caus. (-सारयति -यितुं); 'brought forward as an example,' उपन्यस्तः -स्ता -स्तं.—(Bring in) प्रविश् in caus. (-वेशयति -यितुं), निविश्, उपन्यस् (c. 4. -अस्यति, असितुं).—(Bring on) आवह्, उत्पद् in caus. (-पादयति -यितुं); 'that would bring on death,' तन्मृत्युम् आवहेत्; 'bringing happiness,' सुखावहः -हा -हं.—(Bring out) प्रकाश् in caus. (-काशयति -यितुं), प्रचर् in caus. (-चारयति -यितुं), प्रकटीकृ, दृश् in caus. (दर्शयति -यितुं).—(Bring together) समानी, एकत्र नी or कृ, सम्भृ (c. 1. -भरति -भर्त्तुं).—(Bring under) अपकृष्, अभिभू, दम् in caus. (दमयति -यितुं), वशीकृ.—(Bring up) विनी, पुष् in caus. (पोषयति -यितुं), वृध् in caus (वर्धयति -यितुं).—(Bring to an end) निर्वह् in caus. (-वाहयति -यितुं), निर्वृत् in caus. (-वर्त्तयति -यितुं), समाप् in caus (-आपयति -यितुं), सिध् in caus.—(Bring to light) प्रकाश् in caus., स्पष्टीकृ.—(Bring to pass).

See Bring about.—(Bring word) निविद् in caus. (-वेदयति -यितुं), वार्त्ताम् or संवादम् आख्या (c. 2. -ख्याति -ख्यातुं), संवद् in caus. (-वादयति -यितुं).—(Bring an action against) अभियुज् (c. 7. -युनक्ति -योक्तुं), विवादास्पदीकृ.

Bringer, *s.* आनेता *m.* (तृ), उपानेता *m.* (तृ), आवहः in comp.

Brinish or briny, *a.* लवणः -णा -णं, लावणः -णी -णं, क्षाररसः -सा -सं.

Brinishness, *s.* लावण्यं, लवणत्वं, क्षारता, क्षाररसः.

Brink, *s.* (Of a river) तीरं, कूलं, तटं, कच्छः.—(Of any thing) प्रान्तः, सन्तः -न्तं, उपान्तं, पर्य्यन्तं, धारः -रा.—(Of a precipice) उत्सङ्गः, शैलकटकः.

Brisk, *a.* लघुः -घुः -घु, त्वरितः -ता -तं, अविलम्बः -म्बा -म्बं, क्षिप्रः -प्रा -प्रं, अतन्द्रः -न्द्रा -न्द्रं, प्रफुल्लः -ल्ला -ल्लं.—(Powerful, spirituous) प्रबलः -ला -लं, तीव्रः -व्रा -व्रं, तैजसः -सी -सं, सारवान् -वती -वत् (त्), मोरिकः -की -कं; 'a brisk shower,' धारासम्पातः.

Brisket, *s.* पशोर् वक्षः *n.* (स्), or उरः *n.* (स्), or वक्षस्थलं.

Briskly, *adv.* त्वरितं, क्षिप्रं, सत्वरं, प्रयत्नतस्, सारतस्, अविलम्बितं, अतन्द्रितं, बलवत्.

Briskness, *s.* लाघवं, क्षिप्रत्वं, शीघ्रता, अविलम्बता.—(Vigour) तेजः *n.* (स्), सारता, सत्त्वं, तीव्रता.

Bristle, *s.* शूकः -कं, दृढलोम *n.* (न्), स्तब्धरोम *n.* (न्), रोम *n.* (न्), सूचिः *f.*—(Of a hog) शूकरलोम *n.* (न्).

To bristle, *v. n.* शूकवत् or शूकरलोमवद् हृष् (c. 4. हृष्यति, हर्षितुं) or पुलकितः -ता -तं or उन्नतः -ता -तं or उद्धतः -ता -तं भू or स्तब्धीभू; शूक (nom. शूकायते), पुलक (nom. पुलकायते); 'the hairs of his skin bristled up,' तस्य रोमाण्य् अहृष्यन्.

Bristling, *part.* हृषितः -ता -तं, हृष्टः -ष्टा -ष्टं, पुलकितः -ता -तं, पुलकी -किनी -कि (न्), दन्तुरः -रा -रं; 'bristling hairs,' हृषितानि रोमाणि.

Bristly, *a.* शूकी -किनी -कि (न्), शूकवान् -वती -वत् (त्), सूचीरोमा -मा -म (न्), दृढलोमा -मा -म (न्), स्तब्धरोमा -मा -म (न्).

Britain, *s.* (The white island) श्वेतद्वीपः.

British, *a.* पूर्व्वोक्तदेशसम्बन्धी -न्धिनी -न्धि (न्).

Brittle, *a.* भङ्गुरः -रा -रं, भिदुरः -रा -रं, भिदेलिमः -मा -मं, सुखभेद्यः -द्या -द्यं, भेद्यः -द्या -द्यं, खण्डनीयः -या -यं, सुभङ्गः -ङ्गा -ङ्गं, कोमलः -ला -लं.

Brittleness, *s.* भङ्गुरता -त्वं, सुभङ्गता, भिदुरत्वं, खण्डनीयता, भेद्यता, कोमलता.

Brize, *s.* दंशः, दंशकः, वनमक्षिका, गोमक्षिका.

Broach, *s.* (A spit) शूलः, शलाका, शल्यं, शङ्कुः *m.*—(An ornament). *See* Brooch.

To broach, *v. a.* (To spit) शूल् (c. 1. शूलति, शूलितुं), शूलाकृ.—(To tap a vessel) मद्यादिस्रावणार्थं सुराभाजने छिद्रं कृ, मद्यादिमोचनार्थं भाण्डं छिद् (c. 10. छिद्रयति -यितुं).—(To open) विवृ (c. 5. -वृणोति -वरितुं -वरीतुं), अपावृ, उद्घट् (c. 10. -घाटयति -यितुं).—(To give out, utter) उच्चर् in caus. (-चारयति -यितुं), प्रचर्, प्रकाश् in caus. (-काशयति -यितुं), निविद् in caus. (-वेदयति -यितुं), प्रचलीकृ.

Broad, *a.* (Wide, large) पृथुः -थुः -थु, विशालः -ला -लं, विपुलः -ला -लं, प्रस्थः -स्था -स्थं.—(Spacious, expanded) विस्तीर्णः -र्णा -र्णं, विततः -ता -तं.—(Coarse) असभ्यः -भ्या -भ्यं, अपरिष्कृतः -ता -तं, अशुद्धः -द्धा -द्धं.—(Indelicate) अवाच्यः -च्या -च्यं, गर्हितः -ता -तं; 'to make broad,' प्रथ् (nom. प्रथयति -यितुं); 'broad-waisted,' पृथुमध्यः -ध्या -ध्यं.

Broad-awake, *a.* प्रजागरः -रा -रं, प्रबुद्धः -द्धा -द्धं, उन्निद्रः -द्रा -द्रं.

Broad-breasted, *a.* व्यूढोरस्कः -स्का -स्कं, उरस्वान् -स्वती -स्वत् (त्), उरसिलः -ला -लं.

Broad-brimmed, *a.* पृथुधारः -रा -रं, विशालाञ्चलः -ला -लं, विपुलधारः -रा -रं.

Broad-cloth, *s.* अधुनातनजनैर् भृतं मेषलोमनिर्म्मितं सूक्ष्मवस्त्रं.

To broaden, *v. n.* प्रथ् (c. 1. प्रथते, प्रथितुं), विप्रथ्, विस्तॄ in pass. (-स्तीर्य्यते).

Broadness, *s.* पृथुता, पार्थवं, प्रथिमा *m.* (न्), विशालता, विस्तारः, विस्तीर्णता, विपुलता, प्रस्थता, परिसरः, पाटः.—(Coarseness) असभ्यता, अशुद्धता, अवाच्यत्वं, गर्ह्यता.

Broad-shouldered, *a.* पृथुस्कन्धः -न्धा -न्धं, अंसलः -ला -लं, पृथुबाहुः -हुः -हु.

Broadside, *s.* नौपार्श्वः -र्श्वं, नौकापार्श्वः, पोतपार्श्वः.—(Volley of shot) सामुद्रयुद्धसमये ये लोहगोलका एककाले नौकापार्श्वात् प्रक्षिप्यन्ते.

Broadsword, *s.* पृथुपत्रः खड्गविशेषः, पृथुफलकविशिष्टः कृपाणः.

Brocade, *s.* सुवर्णरूप्यतन्तुस्यूतं दुकूलं, कार्म्मिकवस्त्रं, नानावर्णकौशाम्बरं.

Brocaded, *a.* चित्रदुकूलाम्बरः -रा -रं, नानावर्णदुकूलालङ्कृतः -ता -तं.

Brocage, brokage, or brokerage, *s.* (The profit gotten by promoting bargains) शुल्कः -ल्कं, पारितोषिकं, क्रेतृविक्रेत्रोर्मध्ये पणसम्पादकेन गृहीतं शुल्कं or मूल्यं, परकार्य्यनिर्व्वाहणात् प्रति निरूपितप्रतिफलं, पणप्रयोजकपारितोषिकं.—(The trade of dealing in old things) जीर्णद्रव्याणां क्रयविक्रयः.—(The transaction of business for other men) परस्य कृते पणाया or पणसम्पादनं, परकार्य्यनिर्व्वाहः.

Brocoli, *s.* शाकप्रभेदः, हरितकभेदः, शिग्रुः *m.*, पोतकी.

Brocket, *s.* द्विवर्षीयस् ताम्रतनुविशिष्टो हरिणप्रभेदः.

Brogue, *s.* भ्रष्टभाषा, प्राकृतभाषा, अपशब्दः, अशुद्धोच्चारणं, असभ्यव्याहरणं, म्लेच्छभाषा.—(A kind of shoe) चर्म्मपादुकाविशेषः.

To broider, *v. a.* सूच्या पुष्पाद्यलङ्कारान् सिव् (c. 4. सीव्यति, सेवितुं) or निषिव्, or चित्र् (c. 10. चित्रयति -यितुं) or लिख् (c. 6. लिखति, लेखितुं).

Broidery, *s.* सूचिकर्म्म *n.* (न्), सूचिता, सूच्या पुष्पाद्यलङ्कारसीवनं.

Broil, *s.* (A quarrel) कलहः, द्वन्द्वं, विरोधः, व्यवक्रोशनं, कलिः *m.*, तुमुलं; 'to raise broils,' कलह (nom. कलहायते).

To broil, *v. a.* भ्रस्ज् (c. 6. भृज्जति, भर्ष्टुं), भृज् (c. 1. भर्जते, भर्जितुं), ऋम्र (c. 1. ऋम्रते, ऋम्रितुं).

To broil, *v. n.* (To be hot) तप् in pass. (तप्यते), पच् in pass. (पच्यते).

Broiled, *p. p.* भर्जितः -ता -तं, भृष्टः -ष्टा -ष्टं, तप्तः -प्ता -प्तं.

To broke, *v. n.* पणं or परकार्य्याणि सम्पद् in caus. (-पादयति -यितुं) or साध् in caus. (साधयति -यितुं); परार्थं पण् (c. 1. पणते, पणितुं or पणायति -यितुं).

Broken, *p. p.* भग्नः -ग्ना -ग्नं, भिन्नः -न्ना -न्नं, खण्डितः -ता -तं, रुग्णः -ग्णा -ग्णं, विदीर्णः -र्णा -र्णं, शकलीकृतः -ता -तं, विघट्टितः -ता -तं, त्रुटितः -ता -तं.—(Trained) विनीतः -ता -तं, दमितः -ता -तं.

Broken-hearted, *a.* भग्नहृदयः -या -यं, दलद्धृदयः -या -यं, विदीर्णहृदयः -या -यं, भग्नान्तःकरणः -णा -णं, शोकाकुलः -ला -लं, भग्नाशः -शा -शं.

Broken-kneed, *a.* भग्नजानुः -नुः -नु, भिन्नजानुः -नुः -नु.

Broken-winded, *a.* नष्टश्वासः -सा -सं, नष्टप्राणः -णा -णं, यष्टिप्राणः -णा -णं.

Broker, *s.* निरूपितशुल्केन or निरूपितपारितोषिकेण परार्थं क्रेता विक्रेता वा or परार्थं व्यवसायी *m.* (न्) or क्रयविक्रयप्रयोजकः or परकार्य्यनिर्व्वाहकः or परकार्य्यसम्पादकः, घटकः.—(A dealer in old things) जीर्णद्रव्यक्रयविक्रयिकः, जीर्णपरिच्छदक्रयविक्रयी *m.* (न्).

Brokerage, *s.* *See* Brocage.

Bronchial, *a.* कण्ठ्यः -ण्ठ्या -ण्ठ्यं, कण्ठसम्बन्धीयः -या -यं, ग्रैवेयः -यी -यं.

Bronze, *s.* कांस्यं, पित्तलं, ताम्रं, रीतिः *f.*, रैत्यं, आरः.

To bronze, *v. a.* पित्तलीकृ, ताम्रसात्कृ, पित्तलरूपेण कठिनीकृ.

Bronzed, *p. p.* ताम्रसात्कृतः -ता -तं, रैत्यः -त्यी -त्यं, कांस्यतुल्यः -ल्या -ल्यं.

Brooch, *s.* (A kind of ornament) वस्त्राञ्चलसङ्ग्रहणयोग्यो वक्षस्स्थले भृतः सुवर्णकीलः, उरसि कीलितः सूक्ष्मसुवर्णशङ्कुयुक्तालङ्कारो यद्द्वारेण वस्त्राञ्चलद्वयं संलग्नीकृतं, उरोमणिः, वक्षोभूषणं.

To brood, *v. n.* (To sit on eggs) कुलायनिलायं or नीडनिलायं कृ, कुलायं निली (c. 4. -लीयते -लेतुं), अण्डप्रसवानन्तरम् आपक्षिशावकोत्पत्तेर् नीडं निली; अण्डानाम् उपरि उपविश् (c. 6. -विशति -वेष्टुं).

To brood-over, *v. a.* चिन्ताकुलीभू, चिन्ताव्यग्रः -ग्रा -ग्रं भू, अवसन्नेन मनसा चिन्त् (c.10. चिन्तयति -यितुं), यथा महद्दुःखं जायते तथा सुचिरं चिन्त्.

Brood, *s.* (A hatch) शावकगणः, यः शावकगण एककाले डिम्बाद् उत्पद्यते.—(Offspring) प्रजा, अपत्यं, सन्तानः.

Brooding, *s.* (The act of sitting on eggs) कुलायनिलायः.

Broody, *a.* कुलायनिलायी -यिनी -यि (न्).

Brook, *s.* अल्पनदी, अल्पसरित् *f.*, कुसरित् *f.*, क्षुद्रसरित् *f.*, अल्पस्रोतः *n.* (स्).

To brook, *v. a.* and *v. n.* सह् (c. 1. सहते, सोढुं), विषह्, क्षम् (c. 1. क्षमते, क्षन्तुं), सङ्क्षम्; तिज् in des. (तितिक्षते -क्षितुं), मृष् (c. 4. मृष्यति -ते, मर्षितुं, c. 10. मर्षयति -यितुं).

Brooklime, *s.* नदीकूलप्रियः or कञ्जरुहो नीलपुष्पविशिष्ट ओषधिभेदः.

Broom, *s.* (For cleaning) मार्जनी, सम्मार्जनी, शोधनी *f.*, विमार्गः, ऊहनी, समूहनी.—(A shrub) क्षुपप्रभेदस् तस्य च क्षुद्रविटपा मार्जनीनिर्म्माणे कदापि प्रयुज्यन्ते.

Broomstaff, *s.* मार्जनीदण्डः, शोधनीदण्डः, विमार्गयष्टिः *m.*

Broth, *s.* जूषं, यूषं, सूपः, निष्क्वाथः.

Brothel, *s.* वेश्याजनसमाश्रयः, गणिकागृहं, वेश्याश्रयः, वेश्यागृहं, वेश्यालयः, वेश्यावेश्म *n.* (न्), केलिगृहं.

Brother, *s.* भ्राता *m.* (तृ).—(Of whole blood) सोदरः, सहोदरः, सोदर्य्यः, समानोदर्य्यः, सगर्भः, सगर्भ्यः, सनाभिः *m.*, स्वयोनिः *m.*, सहजः.—(Of half blood) भिन्नोदरः.—(Half-brother, step-mother's son) वैमात्रेयः, विमातृजः.—(Brother in law, husband's brother) देवा *m.* (वृ), देवरः.—(Wife's brother) श्यालः.—(Brother's wife) भ्रातृजाया, प्रजावती.—(Brother and sister) भ्रातृभगिन्यौ *m. du.*, भ्रातरौ *m. du.*—(Any one closely united) बन्धुः *m.*, बान्धवः, सजातिः *m.*, समानगोत्रः, सहायः, सहकारी *m.* (न्), संसर्गी *m.* (न्); 'a brother in arms,' सहयुध्वा *m.* (न्).

Brotherhood, *s.* भ्रातृत्वं, सौभ्रात्रं.—(Association) संसर्गित्वं, समाश्रिता, सहकारिता, साहचर्य्यं, साहित्यं, बन्धुता, संसर्गः.

Brotherless, *a.* अभ्रातृकः -का -कं, भ्रातृहीनः -ना -नं.

Brotherly, *a.* भ्रातृकः -का -कं, भ्रात्रीयः -या -यं, भ्रातृसन्निभः -भा -भं.

Brotherly, *adv.* भ्रातृवत्, सोदरवत्, भ्रातृरूपेण, भ्रातृकप्रकारेण.

Brought, *p. p.* नीतः -ता -तं, आनीतः -ता -तं, उपानीतः -ता -तं, आहृतः -ता -तं.—(Brought forth) प्रसूतः -ता -तं, जातः -ता -तं, उत्पादितः -ता -तं, उत्पन्नः -न्ना -न्नं.—(Brought up) गृहीतविद्यः -द्या -द्यं, लब्धविद्यः -द्या -द्यं, विनीतः -ता -तं, वर्धितः -ता -तं.

Brow, *s.* (The forehead) ललाटं, मूर्द्धा *m.* (न्), गोधिः *m.*—(The countenance) वदनं, मुखं, आननं.—(The arch of hair over the eye) भ्रूः *f.*, भ्रूलता.—(The edge of any high place) शैलकटकः, गिरिमूर्द्धा *m.* (न्), उत्सङ्गः, नितम्बः, गिरिपृष्ठं.

To browbeat, *v. a.* भ्रूभङ्गेन or सभ्रूभङ्गं or सभ्रुकुटीमुखं or कटाक्षेण or सदर्पं निरीक्ष् (c. 1. -ईक्षते -ईक्षितुं); 'brow-beaten,' कटाक्षितः -ता -तं.

Browbound, *a.* किरीटी -टिनी -टि (न्), किरीटधारी -रिणी -रि (न्).

Brown, *a.* श्यावः -वा -वं, कपिशः -शा -शं, कपिलः -ला -लं, पिङ्गलः -ला -लं, पिशङ्गः -ङ्गा -ङ्गं, ताम्रः -म्री -म्रं, ताम्रवर्णः -र्णा -र्णं.—(Browned, made brown) कपिशितः -ता -तं.

Brownish, *a.* ईषत्कपिशः -शा -शं, ईषत्पिङ्गलः -ला -लं, आताम्रः -म्री -म्रं.

Brownness, *s.* कपिशः, कपिशवर्णः, पिङ्गलता, श्यावः, ताम्रवर्णः.

Brownstudy, *s.* समाधानं, अन्तर्ध्यानं, अन्यमनस्कत्वं, चिन्ताव्यग्रभावः, चिन्ताकुलता.

Browse, *s.* किसलः -लं, किसलयं, नवपल्लवं, पल्लवं, गवादनं, छागादनं, छागादिभक्षणीयं नवशाखागुल्मादि.

To browse, *v. n.* छागादिवत् किसलशाखादि भक्ष् (c. 1. भक्षति, भक्षितुं) or खाद् (c. 1. खादति, खादितुं), चर् (c. 1. चरति, चरितुं).

Browsick, *a.* विषण्णवदनः -ना -नं, अधोमुखः -खी -खं, नतमूर्द्धा -र्द्धा -र्द्ध (न्).

Browsing, *s.* नवकिसलयं, नवपल्लवं, नवतृणं, यवसः, शाड्वलं, पत्रयौवनं, मृगभोजनीयं नवाङ्कुरलतादि.

Bruise, *s.* क्षतं, परिक्षतं, अष्ठीला, प्रहारक्षतं, प्रहारार्त्तिः *f.*, प्रहारः, आघातः.

To bruise, *v. a.* (Hurt by a blow) प्रहारेण हिंस् (c. 7. हिनस्ति, हिंसितुं) or क्षतं कृ, or क्षण् (c. 8. क्षणोति, क्षणितुं), अष्ठीलां कृ.—(Reduce to powder, crush) चूर्ण् (c. 10. चूर्णयति -यितुं), मृद् (c. 9. मृद्नाति, मर्द्दितुं), अवमृद्, विमृद्, चूर्णीकृ.

Bruised, *p. p.* प्रहारार्त्तः -र्त्ता -र्त्तं, क्षतः -ता -तं, परिक्षतः -ता -तं, विक्षतः -ता -तं, चूर्णितः -ता -तं, चूर्णीकृतः -ता -तं, मर्द्दितः -ता -तं.

Bruiser, *s.* (Boxer) मल्लः, मल्लयोधः, पाणिघातः, बाहुप्रहरणः, बाहुयोधी *m.* (न्).

Bruit, *s.* (Noise) शब्दः, ध्वनिः *m.*—(Rumour) प्रवादः, जनप्रवादः, समाचारः, संवादः, किंवदन्ती, वार्त्ता.

To bruit, *v. a.* घुष् in caus. (घोषयति -यितुं), आघुष्, विघुष्, ख्या in caus. (ख्यापयति -यितुं), आख्या, प्रकाश् in caus. (-काशयति -यितुं).

Brumal, *a.* हैमन्तः -न्ती -न्तं, -मन्तिकः -की -कं, शीतकालीनः -ना -नं.

Brunette, *s.* श्यामा, श्यामला, श्यावाङ्गी, ताम्रमुखी, कपिशमुखी.

Brunt, *s.* (Attack) आक्रमः, अभिक्रमः, प्रथमाक्रमः, सङ्घट्टः, अभिमर्द्दः, बलात्कारः.—(Blow) आघातः, प्रहारः, समाघातः.

Brush, *s.* आघर्षणी, निघर्षणकः, मार्जनी, शूकरलोममयी मार्जनी, शोधनी, विमार्गः, कूर्चः, कूर्चकं.—(Painter's brush) ईषिका, तूलिका, वर्त्तिका, लेख्यचूर्णिका.—(Tail of a fox) लोमशावालः.—(A rude encounter) सङ्घट्टः, समाघातः, बलात्कारः.

To brush, *v. a.* (To rub or clean with a brush) मृज् (c. 2. मार्ष्टि, मार्ष्टुं, c. 1. मार्जति, मार्जितुं), अपमृज्, प्रमृज्, परिमृज्, अवमृज्, सम्मृज्, आघृष् (c. 1. -घर्षति -घर्षितुं), आघर्षणीद्वारेण शुध् in caus. (शोधयति -यितुं), प्रक्षल् (c. 10. -क्षालयति -यितुं).—(To strike lightly) घृष्, लघु or लाघवेन तड् (c. 10. ताडयति -यितुं).

To brush, *v. n.* (To brush by, pass hastily by) लघुगत्या अतिक्रम्य परवस्त्रं घृष् (c. 1. -घर्षति -घर्षितुं).—(To brush off, hasten off) अपधाव् (c. 1. -धावति -धावितुं).—(To skim lightly, glide) विसृप् (c. 1. सर्पति -सर्प्तुं -सप्तुं).

Brushed, *p. p.* आघर्षितः -ता -तं, मार्ज्जितः -ता -तं, आघाट्टतः -ता -तं.

Brusher, *s.* मार्ज्जनकृत्, आघर्षणकृत्, प्रक्षालकः, मार्जनीद्वारा शोधनकृत्.

Brush-maker, *s.* मार्जनीकारः, आघर्षणीकारः.

Brushwood, *s.* जङ्गलः, गुल्मः, कक्षः -क्षं, कुक्षः, प्रस्तारः, इन्धनं.

Brushy, *a.* लोमशः -शा -शं, दृढलोमा -मा -म (न्), स्तब्धरोमा -मा -म (न्).

Brutal, *a.* (Like a brute) शौवापदः -दी -दं, पशुशीलः -ला -लं, पशुव्यवहारः -रा -रं, पशुसदृशः -शी -शं, अमानुषः -षी -षं.—(Cruel) निर्दयः -या -यं, क्रूरः -रा -रं, क्रूराचारः -रा -रं, निष्ठुरः -रा -रं.

Brutality, *s.* पशुत्वं -ता, तिर्य्यक्त्वं, पशुशीलता, अमनुष्यता, क्रूराचारता.

To brutalize, *v. a.* पशूकृ, पशुशीलं -लां -लं कृ, शौवापदीकृ.

Brutally, *adv.* पशुवत्, पशुरूपेण, पशुव्यवहारानुसारेण, अतिक्रौर्य्येण, निर्दयं.

Brute, *s.* पशुः *m.*, जन्तुः *m.*, तिर्य्यङ् (ञ्च्), प्राणी *m.* (न्).—(A savage) पुरुषपशुः *m.*, दुराचारः, दुर्वृत्तः, क्रूराचारः, असभ्यजनः.

Brute, *a.* (Irrational) अज्ञानी -निनी -नि (न्), अप्राज्ञः -ज्ञा -ज्ञं.—(Savage) क्रूरकर्म्मशाली -लिनी -लि (न्), असभ्यः -भ्या -भ्यं.—(Senseless) विचेतनः -ना -नं, विमूढात्मा -त्मा -त्म (न्).—(Bestial) शौवापदः -दी -दं, पाशवः -वी -वं.

Brutish, *a.* पशुसदृशः -शी -शं, जडः -डा -डं, मूढः -ढा -ढं. *See* Brutal.

Brutishly, *adv.* पशुवत्, जडवत्, मूढवत्. *See* Brutally.

Brutishness, *s.* पशुत्वं, जडता, मूढता, क्रौर्य्यं, दुराचारता, नैष्ठुर्य्यं.

Bryony, *s.* तुण्डिकेरी, रक्तफला, बिम्बिका, पीलुपर्णी.

Bubble, *s.* बुद्बुदः, जलबुद्बुदः, डिम्बिका, स्फारः, गण्डः, फेनाग्रं.—(Any thing unreal, a trifle) अवस्तु *n.*, असारवस्तु *n.*, स्वल्पविषयः.—(A cheat) वञ्चकः, कपटी *m.* (न्).

To bubble, *v. n.* बुद्बुद (nom. बुद्बुदायते -यितुं), फेन (nom. फेनायते -यितुं), उत्सेचनं कृ.

To bubble, *v. a.* (To cheat) वञ्च् in caus. (वञ्चयते -यितुं), प्रलभ् (c. 1. -लभते -लब्धुं), विप्रलभ्, छल् (c. 10. छलयति -यितुं).

Bubby, *s.* स्तनः, स्तनकुड्मलं, कुचः, वक्षोजं उरसिजः.

Bubo, *s.* व्रणः, उपदंशः, स्फोटः, विस्फोटः.

Buccanier or buccaneer, *s.* आमेरिकादेशीयः समुद्रयायी दस्युविशेषः.

Buck, *s.* (Male of the deer) पुम्मृगः; 'male of the rabbit,' पुंशशकः; 'male of the goat,' पुंश्छागः.—(Liquor in which clothes are washed) वस्त्रधावनार्थं जलं.—(Clothes washed in that liquor) पूर्व्वोक्तजलधावितं वस्त्रं.—(A fop) दर्शनीयमानी *m.* (न्), सुवेशी *m.* (न्), रूपगर्व्वितः.

To buck, *v. a.* (To wash clothes) वस्त्राणि धाव् (c. 1. धावति, धावितुं) or प्रक्षल् (c. 10. -क्षालयति -यितुं).

Buck-basket, *s.* तरिः *f.*, पेटः, पेटकः, पेटा, पिटकः.

Bucket, *s.* सेक्त्रं, पात्रं, द्रोणी, सेकपात्रं, सेचनं -नी.—(Bucket of a well) नीरोत्तोलनपात्रं, उद्घाटनं, घटीयन्त्रं.

Buckle, *s.* द्व्यङ्गसंलग्नीकरणार्थं कीलयुक्तं धातुमयचक्रं, वस्त्राञ्चलपादुकाबन्धनादिसङ्ग्रहणार्थं मध्यस्थकीलविशिष्टः कुड्मपविशेषः, उपानद्बन्धनकुड्मपः, कुड्मपः, निदर्शनमुद्रा.—(A curl, crisp) अलकः, कर्कराल:

To buckle, *v. a.* पूर्व्वोक्तकुड्मपद्वारेण बन्ध् (c. 9. बध्नाति, बन्द्धुं) or संलग्नीकृ

To buckle to, *v. n.* (To a business) आस्था (c. 1. -तिष्ठति -स्थातुं), अनुष्ठा; सेव् (c. 1. सेवते, सेवितुं), परायणः -णा -णं or आसक्तः -क्ता -क्तं भू.—(To engage in close fight) नियुद्धं कृ, बाहुयुद्धं कृ.

Buckler, *s.* चर्म्म *n.* (न्), फलकः -कं.—(Armed with) फलकपाणिः, फलकी *m.* (न्).

Buckram, *s.* दृढवस्त्रविशेषः, स्तब्धक्षौमपटविशेषः, स्तब्धीकृतवस्त्रं, स्थूलपट्टं, स्थूलशाटिः *m.*, पटी.—(Stiff, formal) कठिनः -ना -नं, दृढः -ढा -ढं.

Buckskin, *a.* मृगाजिनमयः -यी -यं, मृगचर्म्मनिर्म्मितः -ता -तं.

Buckthorn, *s.* रेचकफलदायी वृक्षप्रभेदः.

Buckwheat, *s.* शस्यक्षेत्ररुह ओषधिप्रभेदः.

Bucolics, *s. pl.* गोमेषादिविषयं गीतं, पशुपालनादिविषयकं काव्यं.

Bud, *s.* मुकुलः -लं, कुड्मलः -लं, कुड्मलः, जालकं, क्षारकः, कलिका, प्ररोहः, अङ्कुरः, पल्लवः -वं, कोषः, कोरकः -कं, मुकुलोद्गमः.

To bud, *v. n.* स्फुट् (c. 6. स्फुटति, स्फुटितुं), फुल्ल् (c. 1. फुल्लति, फुल्लितुं), विकस् (c. 1. -कसति -कसितुं), अङ्कुर (nom. अङ्कुरयति -यितुं).

Budded, *p. p.* स्फुटितः -ता -तं, विकसितः -ता -तं, व्याकोशः -शा -शं, कुड्मलितः -ता -तं, अङ्कुरितः -ता -तं, प्रस्फुटः -टा -टं, फुल्लवान् -वती -वत् (त्).

Budding, *a.* उद्भिज्जः -ज्जा -ज्जं, प्ररोही -हिणी -हि (न्), फुल्लवान् -वती -वत् (त्).

Buddha, *s.* (The name applied to the ninth incarnation of Vishńu, and to the founder of the Buddhist religion) बुद्धः, शाक्यमुनिः *m.*, शाक्यसिंहः, गौतमः, मुनिः *m.*, मुनीन्द्रः, शास्ता *m.* (स्तृ), श्रीघनः, सर्व्वार्थसिद्धः, शौद्धोदनिः *m.*, अर्कबन्धुः *m.*, मायादेवीसुतः.

To budge, *v. n.* चल् (c. 1. चलति, चलितुं), प्रचल्; अपसृ (c. 1. -सरति -सर्त्तुं).

Budget, *s.* (Bag) शाणपुटः, पुटः, कोषः, दृतिः *f.*, आधारः, स्यूतः.—(Stock, store) कोषः, सामग्र्यं, सङ्ग्रहः, सञ्चयः.—(The statement made by the chancellor of the exchequer) कोशाधीशेन प्रजाप्रतिनिधिसभायाम् आगामिसंवत्सरं प्रति आयव्यययोर् ज्ञापनपत्रं.

Buff, *s.* (Leather made of the skin of the buffalo) महिषचर्म्म *n.* (न्), महिषाजिनं.—(A light yellow colour) ईषत्पीतः, पाण्डुवर्णः.

Buffalo, *s.* महिषः -षी *f.*, कासरः, गवलः, लुलापः, वाहद्विषन् *m.* (त्), सैरिभः.

Buffet, *s.* (A blow) मुष्ट्याघातः, मुष्टिघातः, कराघातः, पाणिघातः, बाहुप्रहरणं, चपेटाघातः, चपेटिका.—(A cupboard) कुशूलः, कोष्ठः.

To buffet, *v. a.* मुष्टिना or पाणिना or चपेटेन हन् (c. 2. हन्ति, हन्तुं) or प्रहृ (c. 1. -हरति -हर्त्तुं) or तड् (c. . ताडयति -यितुं).

Buffeter, *s.* प्रहर्त्ता *m.* (र्त्तृ), पाणिघातः, बाहुप्रहरणः, कराघातकृत्.

Buffoon, *s.* भण्डः, वैहासिकः, विदूषकः, परिहासवेदी *m.* (न्), नर्म्मसचिवः.

Buffoonery, *s.* भाण्डं, वैहासिककर्म्म *n.* (न्), विहासः, हास्यं, परिहासः, नर्म्म *n.* (न्).

Bug, *s.* मत्कुणः, उत्कुणः, उत्कुणः, ओकणः, उद्दंशः, किटिभः, तल्पकीटः.

Bugbear, *s.* भयानकं or सन्त्रासजनकं यत्किञ्चित्, भयहेतु *n.*, त्रासदायी -यिनी -यि (न्), त्रासकरः -री -रं.

Buggy, *a.* (Full of bugs) मत्कुणपूर्णः -र्णा -र्णं, समत्कुणः -णा -णं.

Bugle, *s.* शङ्खः -ङ्खं, मृगव्यशङ्खः, व्याधवादितं शृङ्गं or विषाणं.

Bugloss, *s.* खिलरुह ओषधिप्रभेदः, गोजिह्वा.

To build, *v. a.* निर्म्मा (c. 2. -माति -मातुं or in caus. -मापयति -यितुं or c. 4. -मीयते), निचि (c. 5. -चिनोति -चेतुं), कृ in caus. (कारयति -यितुं); 'to build castles in the air,' गगणकुसुमानि कृ.

To build upon, *v. a.* (To rely upon) अवलम्ब् (c. 1. -लम्बते -लम्बितुं), समालम्ब्, संश्रि (c. 1. -श्रयति -ते -श्रयितुं), समाश्रि, उपाश्रि.

Builder, *s.* निर्म्माता *m.* (तृ), निर्म्माणकर्त्ता *m.* (र्त्तृ), कारकः, निचेता *m.* (तृ), विधायकः.—(Of houses) स्थपतिः *m.* गृहकारकः, गृहकारी *m.* (न्).

Building, *s.* (The act of building) निर्म्माणं, निर्म्मापणं, निचयनं, गृहकरणं.—(The fabric built) प्रासादः, गृहं, भवनं, हर्म्यं.

Built, *p. p.* निर्म्मितः -ता -तं, कारितः -ता -तं, निचितः -ता -तं.

Bulb, *s.* कन्दः -न्दं, गोलमूलं, स्थूलकन्दः, वृहत्कन्दः.

Bulbous, *a.* कन्दी -न्दिनी -न्दि (न्), गोलमूलविशिष्टः -ष्टा -ष्टं, कन्दाकृतिः -तिः -ति.

To bulge, *v. n.* (To founder) दारुस्फोटनात् पोतपार्श्वे जलं गृहीत्वा मस्ज् (c. 6. मज्जति, मज्जितुं).—(To bag down, jut out) पुटरूपेण लम्ब् (c. 1. लम्बते लम्बितुं), वहिर्लम्ब्.

Bulk, *s.* (Bigness) स्थूलता, स्थौल्यं, वृहत्त्वं, परिमाणं, स्थूलाकारता.—(The greatest part of a thing) प्रधानभागः, अधिकभागः, बहुतरभागः.—(Part of a building jutting out) वहिर्लम्बो हर्म्यभागः.

Bulkhead, *s.* नौकाभ्यन्तरे पार्श्वात्पार्श्वं स्थापिता काष्ठमयी भित्तिः

Bulkiness, *s.* स्थूलता, वृहत्त्वं, स्थूलकायता. *See* Bulk.

Bulky, *a.* स्थूलः -ला -लं, वृहन् -हती -हत् (त्), महाकायः -या -यं, महाङ्गः -ङ्गी -ङ्गं, स्थूलकायः -यी -यं, वृहदङ्गः -ङ्गी -ङ्गं, स्थूलाकारः -रा -रं.

BULL, *s.* वृषभः, वृषः, पुङ्गवः, ऋषभः, गौः *m.* (गो), बलीवर्द्दः, उक्षा *m.* (न्), सौरभेयः, गोनाथः, ककुद्मान् (त्), अनड्वान् *m.* (-डुह्), भद्रः; 'a cow which is fit for the bull,' काल्या, उपसर्य्या; 'one which has gone to the bull,' वृषभेण आक्रान्ता, सन्धिनी; 'one which is bulling,' सन्धिनी, वृषस्यन्ती.—(A letter published by the pope) महाधर्म्माध्यक्षेण प्रकाशितम् आज्ञापत्रं.—(A blunder) स्खलितं, प्रमादः, वाग्दोषः.

BULLACE, *s.* अम्लरसविशिष्टः फलप्रभेदः.

BULL-BAITING, *s.* कुक्कुरवृषभयोर् युद्धं यत्र मनुष्याः क्रीडार्थं वृषभम् आक्रमितुं कुक्कुरान् प्रचोदयन्ति.

BULL-DOG, *s.* वृषभाक्रमणाय शिक्षितो ऽतिशयक्रूरस्वभावो वृहन्मुखः कुक्कुरभेदः.

BULLET, *s.* अधुनातनयोद्धृभिः सेविता सीसकगुलिका या ऽग्न्यग्निबलेन नाडिच्छिद्राद् अतिदूरे निःसार्य्यते, दूरवेधिनी गुलिका, सीसकगुलिका.

BULLETIN, *s.* राजाज्ञया प्रचारितं समाचारपत्रं, राजकीयचिकित्सकैः प्रकाशितं रोगार्त्तमहीपतेः शरीरस्थितिज्ञापनपत्रं.

BULL-FINCH, *s.* वागनुकरणशीलः क्षुद्रपक्षिभेदः.

BULL-HEAD, *s.* स्थूलबुद्धिः *m.*, स्थूलधीः *m.*, दुर्बुद्धिः *m.*, मूढः, मूर्खः, जडः.

BULLION, *s.* हिरण्यं, रूप्यं, अमुद्रितं सुवर्णं रूप्यं वा, कोशः.

BULLITION, *s.* (The act or state of boiling) क्वथनं, क्वाथः, उत्सेचनं.

BULLOCK, *s.* जातोक्षः, वृषभः, वृषः, पुङ्गवः, अभिनववयस्को वृषभः.

BULL'S EYE, *s.* (A kind of window) गवाक्षः.

BULLY, *s.* (A blustering coward) शूरम्मन्यः, दम्भी *m.* (न्), दाम्भिकः, कुम्भः, विटः, पिण्डीशूरः, भर्त्सनकारी *m.* (न्), तर्जनकृत्, कलहकारः.

To BULLY, *v. a.* भर्त्स् (c. 10. भर्त्सयति -ते -यितुं), तर्ज् (c. 1. तर्जति, तर्जितुं), तिरस्कृ, मुखरीकृ.

BULRUSH, *s.* पर्व्वहीनो दूर्व्वाप्रभेदः, नलः, शरः.

BULWARK, *s.* वप्रः, प्राकारः, प्राचीरं, दुर्गं, परिकूटं.—(Shelter, protection) आश्रयः, संश्रयः, शरणं, आलम्बः, उपस्तम्भः.

BUM, *s.* नितम्बः, स्फिचौ *f. du.*, कटिप्रोथः.

BUMBAILIFF, *s.* ग्राहकः, आसेद्धा *m.* (द्धृ), आसेधकर्त्ता *m.* (र्तृ), राजपुरुषः.

BUMBARD, *s.* *See* BOMB, BOMBARD.

BUMBLE-BEE, *s.* ध्वनमोदी *m.* (न्).

BUMP, *s.* (A swelling) स्फोटः, विस्फोटः, श्वयथुः *m.*, शोफः, शोथः, गण्डः, गण्डका, आभोगः.

To BUMP, *v. a.* (To strike) तड् (c. 10. ताडयति -यितुं), तुद् (c. 6. तुदति, तोत्तुं), हन् (c. 2. हन्ति, हन्तुं), प्रहृ (c. 1. -हरति -हर्त्तुं).

To BUMP, *v. n.* (To swell) श्वि (c. 1. श्वयति, श्वयितुं).—(To make a noise) आस्फोटनं कृ.

BUMPER, *s.* आकर्णं or धारपर्य्यन्तं पूरितं पात्रं, अतिपूर्णं भाजनं.

BUMPKIN, *s.* ग्राम्यजनः, ग्रामिकः, ग्रामेवासी *m.* (न्), वृषलः, जानपदः, प्राकृतजनः.

BUNCH, *s.* (A hard lump) पिण्डः -ण्डं, गण्डः, गण्डका.—(A cluster) गुच्छः, गुच्छकः, स्तवकः; 'a bunch of grapes,' द्राक्षास्तवकः.—(A number of things tied together) कूर्चः, पोट्टली.—(A knot, a tuft) ग्रन्थिः *m.*, चूडा, शेखरः.

To BUNCH OUT, *v. n.* पिण्डीभू, पिण्डाकारः -रा -रं अस्, प्रलस् (c. 1. -लसते -लसितुं).

BUNCHY, *a.* पिण्डाकारः -रा -रं, स्तवकमयः -यी -यं, गुच्छाकारः -रा -रं.

BUNDLE, *s.* कूर्चः, कूर्च्चं, भारः, कृतकूर्चः, गुच्छः, गुच्छकः, पोटलिका, पोट्टली, पीटिका; 'a bundle of goods,' भाण्डकं; 'bundle off,' दूरम् अपसर, अपेहि.

To BUNDLE UP, *v. a.* कूर्चं कृ, कूर्चीकृ, गुच्छीकृ, पोटलिकां कृ.

BUNDLED UP, *p. p.* कृतकूर्च्चकः -का -कं, कृतपोटलिकः -का -कं, कृतगुच्छः -च्छा -च्छं.

BUNG, *s.* पात्रमध्ये छिद्रप्रतिबन्धकं तरुत्वङ्निर्म्मितं द्रव्यं, यवसुरभाजने छिद्रावरोधनार्थं काष्ठखण्डं, भाण्डछिद्रस्तम्भनकाष्ठं, पात्रछिद्रपिधानं.

To BUNG, *v. n.* छिद्रं or रन्ध्रं or धारां पिधा (c. 3. -दधाति -धातुं) or प्रतिबन्ध् (c. 9. -बध्नाति -बन्द्धुं) or निरुध् (c. 7. -रुणद्धि -रोद्धुं) or स्तम्भ् in caus. (स्तम्भयति -यितुं).

BUNG-HOLE, *s.* पात्रछिद्रं, पात्ररन्ध्रं, पात्रधारा, भाण्डशुषिरं, यवसुरभाजनछिद्रं.

To BUNGLE, *v. n.* प्रमाद्यतस् or अदक्षप्रकारेण or अनाप्तं किञ्चित् कार्य्यं निर्व्वह् in caus. (-वाहयति -यितुं), प्रमद् (c. 4. -माद्यति -मदितुं), स्खल् (c. 1. स्खलति, स्खलितुं), भ्रम् (c. 4. भ्राम्यति, भ्रमितुं), दोषं कृ.

BUNGLE, *s.* प्रमादः, दोषः, भ्रमः, दुर्णयः, छिद्रं, स्खलनं, स्खलितं.

BUNGLED, *p. p.* दुर्णीतः -ता -तं, दुर्घटितः -ता -तं, दूषितः -ता -तं.

BUNGLER, *s.* अकृती *m.* (न्), अनाप्तः, अनिपुणः, अदक्षः, अपटुः *m.*, प्रमादी *m.* (न्), स्खलन्मतिः *m.*

BUNGLINGLY, *adv.* प्रमाद्यतम्, प्रमादेन, अनाप्तं, अदक्षतया, सदोषं, स्खलनेन.

BUNN, *s.* मिष्टापूपः, पिष्टकः, पिण्डः, गोधूमचूर्णमिष्टान्नादिनिर्म्मितः पिष्टकः.

BUNT, *s.* पुटः, पुटकं, क्रमशो विस्तीर्य्यमाणं रन्ध्रं, क्रमशो विवारः.

BUNTER, *s.* कुत्सितकर्म्मजीविनी, वृषली, बन्धकी, दुष्टा.

BUNTING, *s.* पताकानिर्म्माणयोग्यो or ध्वजवसनकरणयोग्यो विरलपटविशेषः, ध्वजपटः, केतुवसनः.

BUOY, *s.* समुद्रगाणां पथदर्शनार्थं or प्रच्छन्नसैकतशिलादिभयस्थानसूचनार्थं जलोपरि प्रवमानं काष्ठखण्डं.—(For mooring vessels) कूपकः.

To BUOY UP, *v. a.* (To keep afloat) उन्मज्ज् in caus. (-मज्जयति -यितुं), प्लु in caus. (प्लावयति -यितुं), उत्पत् in caus. (-पातयति -यितुं).—(To bear up, support) धृ in caus. (धारयति -यितुं), सन्धृ, अभिधृ, स्तम्भ् in caus. (स्तम्भयति -यितुं), उत्तम्भ्, संस्तम्भ्, आलम्ब् (c. 1. -लम्बते -लम्बितुं).

BUOYANCY, *s.* प्लवनशीलता, उत्पतिष्णुता, लघुता, लाघवं, लघिमा *m.* (न्).

BUOYANT, *a.* प्लवनशीलः -ला -लं, तरणशीलः -ला -लं, लघुः -घुः -घु, उत्पतिष्णुः -ष्णुः -ष्णु.

BUR, *s.* अङ्कुशाकारलोमविशिष्टो वस्त्रानुबन्धनशीलो वक्ष्यमाणक्षुद्रगुल्मसम्बन्धी दलपिण्डः.

BURDEN, *s.* भारः, धुरा, धूः (धुर्) *f.*—(Something grievous) पीडाकरः -रा -रं; 'burden-bearing,' भारवाहनः -ना -नं, धुरन्धरः -रा -रं, भारसहः -हा -हं, धुर्व्वहः -हा -हं, भारहरः -रा -रं.—(Beast of burden) भारवाहनः, धुरीणः, धुरीयः, धुर्य्यः, धौरेयः -यी -यं.—(Of a song) ध्रुवका, कथितपदं, आवर्त्तनीयश्लोकः, परिवर्त्तकश्लोकः.

To BURDEN, *v. a.* भारं न्यस् (c. 4. -अस्यति -असितुं) with loc. c. or दा (c. 3. ददाति, दातुं); 'to lay a burden on the shoulder,' भारं स्कन्धे न्यस् or निविश् in caus. (-वेशयति -यितुं) or समृ in caus. (-अर्पयति -यितुं).

BURDENED, *p. p.* भारवान् -वती -वत् (त्), भारी -रिणी -रि (न्), धुरीणः -णा -णं, भाराक्रान्तः -न्ता -न्तं, भारग्रस्तः -स्ता -स्तं, भारयुक्तः -क्ता -क्तं.

BURDENSOME, *a.* (Troublesome to be borne) दुर्भरः -रा -रं, दुःसहः -हा -हं, दुर्व्वहः -हा -हं, दुरुद्वहः -हा -हं.—(Grievous, oppressive) पीडाकरः -रा -रं, कष्टकरः -रा -रं, दुःखी -खिनी -खि (न्).

BURDOCK, *s.* पूर्व्वोक्तदलपिण्डविशिष्टः क्षुद्रगुल्मप्रभेदः.

BUREAU, *s.* (A chest, receptacle) आगारं, आधारः, निधानं, गोपनस्थानं, भाण्डागारं.—(An office for writing, &c.) लेख्यस्थानं, ग्रन्थकुटी.

Burg or burgh, *s.* महासभया प्रतिनिधिप्रेरणाधिकारयुक्ता नगरी, कर्वटः -टं, नगरं -री, पुरं -री.

Burgess, *s.* (A citizen) पौरजनः, नगरजनः, पौरः, नगरस्थः.—(A representative of a city) नगरप्रतिनिधिः *m.*, नगरप्रतिभूः *m.*, नगरजनप्रतिनिधिः *m.*, प्रजाप्रतिनिधिः *m.*

Burgher, *s.* नगरजनाधिकारभोगी *m.* (न्), प्रधाननगरजनः, मुख्यपौरजनः, नगरसभासद् *m.*

Burghership, *s.* नगरजनाधिकारः, नगरजनपदं, नगरसभासदधिकारः.

Burglar, *s.* भित्तिचौरः, कुड्यच्छेदी *m.* (न्), कपाटघ्नः, गृहभङ्गकृत्, गृहरन्ध्रकृत्, सन्धिचौरः, कारुचौरः, सन्धिचौरः, बन्दीकारः, बन्दिग्राहः, खनिलः, कुजम्भलः, मुरङ्गाहिः *m.*, सुरङ्गाकृत्.

Burglary, *s.* गृहभङ्गः, गृहभङ्गापराधः, कुड्यच्छेदः, भित्तिचौर्य्यं.

Burgomaster, *s.* नगराधिष्ठाता *m.* (तृ), नगराध्यक्षः, पुराध्यक्षः, प्रधाननगरजनः, मुख्यपौरजनः, नगरव्यवहारेषु नियुक्तः, नगराधिपतिः, पुराधिकारी *m.* (न्).

Burial, *s.* भूमिखननं, निखननं, भूमौ निखननं, श्मशाने स्थापनं, श्मशाननयापनं, भूमिसमर्पणं, प्रेतनिर्हारः.—(Funeral rites) प्रेतकर्म्म *n.* (न्), प्रेतकार्य्यं, मृतकसत्कर्म्म *n.* (न्), सत्क्रिया.

Burial-ground, *s.* श्मशानं, प्रेतवनं, पितृवनं, प्रेतगृहं, मृतशरीरस्थानं.

Buried, *p. p.* निखातः -ता -तं, भूमिनिखातः -ता -तं, श्मशानशायी -यिनी -यि (न्), श्मशानस्थापितः -ता -तं, श्मशानसमर्पितः -ता -तं.

Burier, *s.* प्रेतनिर्हारकः, प्रेतहारः, मृतपाः *m.*, शववाहकः.

Burine, *s.* तक्षणयन्त्रं, तक्षणी, तङ्कः, व्रश्चनः, शैलभित्तिः *f.*

To burl, *v. a.* लोहसन्दंशद्वारा or तुरीद्वारा निष्प्रयाणपटं श्लक्ष्णीकृ.

Burlesque, *a.* परिहासकरः -रा -रं, हास्यः -स्या -स्यं, हास्यजनकः -का -कं, प्रहासी -सिनी -सि (न्), सपहास्यः -स्या -स्यं, हासोत्पादकः -का -कं, नर्म्मदः -दा -दं.

Burlesque, *s.* भाण्डं, परिहासः, परीहासः, प्रहासः, प्रहसितं, उपहासः, अपहासः, नर्म्म *n.* (न्), टट्टरी, परिहासवाक्यं, उत्प्रासनं.

To burlesque, *v. a.* अपहस् (c. 1. -हसति -हसितुं), अवहस्, प्रहस्, उपहस्, उपहासास्पदं कृ.

Burliness, *s.* स्थूलता, स्थौल्यं, बृहत्त्वं, स्थूलशरीरता, बृहदङ्गत्वं.

Burly, *a.* स्थूलः -ला -लं, स्थूलशरीरः -रा -रं, बृहत्कायः -यी -यं, महाङ्गः -ङ्गी -ङ्गं, बृहदङ्गः -ङ्गी -ङ्गं.

Burn, *s.* अग्निकृतं क्षतं, अग्निक्षतं, सन्तापः, संज्वरः, दाहः, अग्निदाहः.

To burn, *v. a.* दह् (c. 1. दहति, दग्धुं), अनुदह्, आदह्, निदह्, निर्दह्, परिदह्, प्रदह्, सम्प्रदह्; तप् (c. 1. तपति, तप्तुं) or in caus. (तापयति -यितुं), सन्तप् in caus., उष् (c. 1. ओषति, ओषितुं), दीप् in caus. (दीपयति -यितुं), आदीप्, उद्दीप्, उपदीप्, प्रदीप्, सन्दीप्; सन्धुक्ष् in caus. (-धुक्षयति -यितुं); ज्वल् in caus. (ज्वालयति -यितुं), प्रज्वल्, प्रुष् (c. 1. प्रोषति, प्रोषितुं).

To burn, *v. n.* दह् (c. 4. दह्यति, दग्धुं or in pass. दह्यते), सम्परिदह्, दीप् (c. 4. दीप्यते, दीपितुं), आदीप्, प्रदीप्, सम्प्रदीप्, विदीप्, सन्दीप्, तप् in pass. (तप्यते or c. 1. तपति, तप्तुं), प्रतप्, ज्वल् (c. 1. ज्वलति, ज्वलितुं), प्रज्वल्, सन्धुक्ष् (c. 1. -धुक्षते -धुक्षितुं); 'to be inflamed with passion, &c.,' दह् in pass. (दह्यते); 'with anger,' कोपदीप्तः -प्ता -प्तं भू; 'to burn after,' उत्कण्ठ् (c. 1. -कण्ठते -कण्ठितुं), अभिकाङ्क्ष् (c. 1. -काङ्क्षति -काङ्क्षितुं).

Burnable, *a.* दहनीयः -या -यं, दाह्यः -ह्या -ह्यं, दग्धव्यः -व्या -व्यं, ज्वलनीयः -या -यं, दीपनीयः -या -यं, तपनीयः -या -यं.

Burner, *s.* दाहकः, दग्धा *m.* (ग्धृ), दाहनकृत्, अग्निदः, तापकः, दीपकः.

Burnet, *s.* अनूपक्षेत्ररुहः क्षुद्रगुल्मप्रभेदः.

Burning, *s.* दाहः, दाहनं, ज्वलनं, दीपनं, तापः, प्रोषः, ओषः.

Burning, *a.* दाहकः -का -कं, तापकः -का -कं, दीपनः -ना -नं, नैदाघः -घी -घं, ज्वाली -लिनी -लि (न्).—(That is on fire) दह्यमानः -ना -नं, दहन् -हन्ती -हत् (त्), ज्वलन् -लन्ती -लत् (त्), दाहवान् -वती -वत् (त्).—(Vehement) तैजसः -सी -सं, चण्डः -ण्डा -ण्डं.

Burning-glass, *s.* सूर्य्यतेजःसंवर्द्धनार्थं तदंशुसङ्ग्रहणयोग्यं काचपत्रं, दीप्तोपलः, अर्काश्मा *m.* (न्).

To burnish, *v. a.* तिज् in caus. (तेजयति -यितुं), निघृष् in caus. (निघर्षयति -यितुं), कान्तिं दा (c. 3. ददाति, दातुं), परिष्कृ, निशो (c. 4. -श्यति -शातुं).

Burnished, *part.* तेजितः -ता -तं, तैजसः -सी -सं, सुनिघृष्टः -ष्टा -ष्टं, निर्धौतः -ता -तं, प्रमृष्टः -ष्टा -ष्टं, निशातः -ता -तं, निशितः -ता -तं, परिष्कृतः -ता -तं.

Burnisher, *s.* तेजकः, धावकः, मार्ज्जनकृत्, कान्तिदायकः.

Burnishing, *s.* तेजनं, मार्ज्जनं, परिष्कारः, धावनं.

Burnt, *a.* and *part.* दग्धः -ग्धा -ग्धं, अग्निदग्धः -ग्धा -ग्धं, प्लुष्टः -ष्टा -ष्टं, विप्लुष्टः -ष्टा -ष्टं, प्लुष्टः -ष्टा -ष्टं, ज्वलितः -ता -तं, तप्तः -प्ता -प्तं, सन्तप्तः -प्ता -प्तं, उषितः -ता -तं; 'burnt up,' उत्तप्तः -प्ता -प्तं; 'burnt as a sacrifice,' वषट्कृतः -ता -तं; 'burnt brick,' पक्वेष्टका.

Burnt-offering, *s.* होमः, वषट्कारः, वैतानिकं, वैतानं.

Burr, *s.* (Lobe of the ear) कर्णलतिका, पालिका, कर्णपालिका.

Burrow, *s.* (Hole) गर्त्तः, विवरं, बिलं, खातं, श्वभ्रं.

To burrow, *v. n.* गर्त्ते or विवरे कृ, गर्त्ते वस् (c. 1. वसति, वस्तुं).

Burrowing, *a.* बिलवासी -सिनी -सि (न्), गर्त्तवासी -सिनी -सि (न्).

Bursar, *s.* विद्यालये धनाधिकारी *m.* (न्), धनाध्यक्षः, कोषाध्यक्षः.

Bursarship, *s.* अर्थाधिकारः, धनाधिकारः, धनाध्यक्षाधिकारः, कोषाध्यक्षपदं.

Bursary, *s.* विद्यालये धनगृहं, धनागारः, कोषः, धनकोष्ठकं.

Burse, *s.* वणिक्समागमचत्वरं, श्रेष्ठिचत्वरं, पण्यशाला, निगमस्थानं.

To burst, *v. a.* भिद् (c. 7. भिनत्ति, भेत्तुं or caus. भेदयति -यितुं), विभिद्, निर्भिद्, भञ्ज् (c. 7. भनक्ति, भंक्तुं), प्रभञ्ज्, विभञ्ज्, खण्ड् (c. 10. खण्डयति -यितुं), स्फुट् (c. 10. स्फोटयति -यितुं), दॄ in caus. (दारयति -यितुं), विदॄ, अवदॄ, शकलीकृ, खण्डशः कृ, विदल् in caus. (-दलयति -यितुं), लुप् (c. 6. लुम्पति, लोप्तुं), अवलुप्.

To burst, *v. n.* भिद् in pass. (भिद्यते), विभिद्, निर्भिद्; भञ्ज् in pass. (भज्यते), प्रभञ्ज्, विभञ्ज्, स्फुट् (c. 6. स्फुटति, स्फुटितुं, c. 1. स्फोटते, स्फोटितुं), विदॄ in pass. (-दीर्य्यते), अवदॄ, विदल् (c. 1. -दलति -दलितुं), विशॄ in pass. (-शीर्य्यते), परिशॄ.—(To burst in pieces) शकलीभू, खण्डशो भिद् in pass. or भञ्ज् in pass.—(To burst forth, break out) प्रपत् (c. 1. -पतति -पतितुं).—(As seeds) प्रोद्भिद्.

Burst, *s.* (Sudden rending) स्फोटनं, स्फुटनं, अकस्मात् भञ्जनं, भङ्गः, विभङ्गः, भेदनं, भेदः.—(Of laughter) प्रहसनं, प्रहसितं, अतिहसितं, अट्टहासः.—(Of light) ज्वाला.

Burst, *p. p.* स्फुटः -टा -टं, स्फुटितः -ता -तं, विदीर्णः -र्णा -र्णं, विभग्नः -ग्ना -ग्नं, विघटितः -ता -तं, विदलितः -ता -तं, भिन्नः -न्ना -न्नं, विभिन्नः -न्ना -न्नं.—(Diseased with hernia) अन्त्रवृद्धिपीडितः -ता -तं.

Burthen, *s.* भारः, धुरा. *See* Burden.

To bury, *v. a.* श्मशाने or भूमौ स्था in caus. (स्थापयति -यितुं) or निधा (c. 3. -दधाति -धातुं) or निखन् (c. 1. -खनति -खनितुं or -खातुं), निर्हृ (c. 1. -हरति -ते -हर्त्तुं).

Burying, *s.* भूमिखननं, निखननं, श्मशाने स्थापनं, भूमिसमर्पणं, प्रेतनिर्हारः.

Burying-ground, *s.* श्मशानं, प्रेतवनं, प्रेतगृहं, पितृवनं, मृतशरीरस्थानं.

Bush, *s.* गुल्मः, क्षुपः, स्तम्बः, लुपः, कुटः, कटिः *m.*—(A bough of a tree fixed at the door of a tavern) अत्र सुरादि विक्रीयते इति घोषणार्थं द्वारोपरि स्थापिता तरुशाखा; सुराध्वजः.—(Tail of a fox) लोमशापुच्छं.

Bushel, *s.* (A measure) द्रोणः -णं, आढकः.

Bushy, *a.* (Full of bushes) गुल्मी -ल्मिनी -ल्मि (न्), तरुगुल्मावृतः -ता -तं.—(Thick) घनः -ना -नं, निविडः -डा -डं, अविरलः -ला -लं.—(Formed like a bush) गुल्माकारः -रा -रं.

Busiless, *s.* कार्य्यरहितः -ता -तं, शून्यः -न्या -न्यं, निष्कर्म्मा -र्म्मा -र्म्म (न्).

Busily, *adv.* अनलसं, अतन्द्रितं, मनःप्रवेशेन, अभिनिवेशेन, औत्सुक्येन.—(Inquisitively) चर्च्चया.

Business, *s.* (Affair) कर्म्म *n.* (न्), कार्य्यं, अर्थः.—(Employment) व्यापारः, व्यवसायः, व्यवहारः, कार्य्योद्योगः, नियोगः, प्रवृत्तिः *f.*, प्रवर्त्तनं, चरितं, प्रसन्धः.—(Something to be done) कृत्यं, कर्त्तव्यं, कार्य्यं.—(Object) विषयः, अर्थः, प्रयोजनं.—(A point, case) अर्थः, पदं.—(Means of livelihood, profession) वृत्तिः *f.*, वर्त्तनं, जीविका, आजीवनार्थं.—(Point, matter of discussion) स्थलं; 'a man of business, one who knows the proper ways of acting,' क्रियाविधिज्ञः, कार्य्ये कुशलः, दृष्टकर्म्मा *m.* (न्); 'what business have I with that?' कोऽर्थो मे तेन.

Busk, *s.* चेलिकासन्मोकरणे स्त्रीजनैः प्रयुक्तः शृङ्गलोहादिनिर्म्मितः फलकविशेषः.

Buskin, *s.* (A half-boot) अर्द्धजङ्घापरिमाणः पादुकाविशेषः, पदङ्गा, अनुपदीना, उपानत् *f.* (ह्).—(A high-heeled shoe worn by ancient actors) उच्चपार्ष्णियुक्तो गौरवसूचकः पूर्व्वकालीननटैर् भृतः पादुकाविशेषः.

Buskined, *p. p.* पूर्व्वोक्तपादुकारूढः -ढा -ढं, सपादुकः -का -कं.

Buss, *s.* चुम्बनं, परिरिंसा, निमित्तकं.

To **buss**, *v. a.* चुम्ब् (c. 1. चुम्बति, चुम्बितुं), निंस् (c. 2. निंस्ते, निंसितुं).

Bust, *s.* मस्तकाद्यारभ्य वक्षस्स्थलपर्य्यन्तम् अर्द्धशरीरप्रतिमा, ऊर्द्धकायप्रतिमा.

Bustard, *s.* आरण्यपक्षिप्रभेदः.

To **bustle**, *v. n.* चेष्ट् (c. 1. चेष्टते, चेष्टितुं), आत्मानं चेष्ट् in caus. (चेष्टयति -यितुं), व्यवसो (c. 4. -स्यति -सातुं), कार्य्यव्यग्रत्वाद् इतस्ततो धाव् (c. 1. धावति, धावितुं).

Bustle, *s.* (Hurry, confusion) सम्भ्रमः, वैक्लव्यं, विप्लवः, त्वरा, व्यग्रता, आकुलत्वं, व्यस्तता.—(Tumult) तुमुलं, कोलाहलः.

Bustler, *s.* व्यवसायी *m.* (न्), चेष्टाशीलः, सचेष्टः, तीक्ष्णकर्म्मा *m.* (न्).

Busy, *a.* व्यापारी -रिणी -रि (न्), व्यापृतः -ता -तं, व्यवसायी -यिनी -यि (न्), कर्म्मी -र्म्मिणी -र्म्मि (न्), कर्म्मोद्युक्तः -क्ता -क्तं, कार्य्योद्युक्तः -क्ता -क्तं, कार्य्यनिविष्टः -ष्टा -ष्टं, कर्म्मिष्ठः -ष्ठा -ष्ठं, कार्य्यी -र्य्यिणी -र्य्यि (न्), कार्य्यवान् -वती -वत् (त्), सचेष्टः -ष्टा -ष्टं, प्रयत्नवान् -वती -वत् (त्), सोत्साहः -हा -हं, सोद्योगः -गा -गं, प्रवृत्तः -त्ता -त्तं, अतन्द्रितः -ता -तं, अनलसः -सा -सं, कार्य्यनिमग्नः -ग्ना -ग्नं.—(Meddling) परकार्य्यचर्च्चाशीलः -ला -लं.

To **busy**, *v. a.* (To employ) व्यापृ in caus. (व्यापारयति -यितुं), कार्य्ये नियुज् in caus. (-योजयति -यितुं, c. 7. -युनक्ति -योक्तुं) or अधिकृ.

Busybody, *s.* परकार्य्यचर्च्चकः, पराधिकारचर्च्चकः, छिद्रान्वेषी *m.* (न्).

But, *conj.* (As an adversative) किन्तु, तु, परन्तु, पुनर्, अथवा.—(Except) ऋते with abl., विना with acc. or inst., अन्यः with abl.; as, 'any one but the father,' पितुर् अन्यः.—(But for, without) व्यतिरेकेण, अन्तरेण, विना; as, 'but for sin every thing flourishes,' पापं विना सर्व्वं फलति.—(But yet, howbeit) तथापि.—(Only) केवलं, मात्रं.—(All but) अल्पोनः -ना -नं, ईषदूनः -ना -नं; 'next but one,' एकान्तरः -रा -रं.—(If it were not, unless) यदि न.—(Moreover) किञ्च, अपरञ्च, अधिकन्तु.—(On the other hand) पुनर्.—(Otherwise than) अन्यथा with abl. 'But' may often be omitted in Sanskrit, or expressed by another form of sentence; as, 'he will not gain his end but by doing that,' तद् अकृत्वा प्राप्तार्थो न भविष्यति; 'I do not doubt but I am to blame,' सापराधो ऽस्मि इति न संशयः; 'but a short time since,' न चिरात्; 'there is none but fears him,' सर्व्वे तस्माद् बिभ्यति; 'she does nothing but grieve,' सा निरन्तरं शोचति; "who but a child weeps," को रोदिति अबालिशः.

Butcher, *s.* (Seller of meat) मांसविक्रयी *m.* (न्), मांसिकः, शौनिकः, सौनिकः, शूनावान् *m.* (त्), सूनी *m.* (न्), पशुमारणपूर्व्वकं मांसविक्रयजीवी *m.* (न्), प्राणिहिंसापरः.—(Butcher's meat) सौनं, घातस्थानभवं मांसं.

To **butcher**, *v. a.* हन् (c. 2. हन्ति, हन्तुं), निहन्, or in caus. (घातयति -यितुं), मृ in caus. (मारयति -यितुं), वध् (defective, usually found in the 3d pret. अवधीत् and fut. वधिष्यति -ते), विशस् (c. 1. -शसति -शसितुं), निसूद् in caus. (-सूदयति -यितुं), अभिसूद्, विनिसूद्.

Butchery, *s.* वधः, हननं, निहननं, घातनं, निषूदनं, विशसनं.—(The place where animals are killed) शूना, सूना, वधस्थानं, वधस्थली, वध्यभूमिः *f.*, घातस्थानं, पशुमारणस्थानं.

Butea, *s.* (A plant) किंशुकः, पलाशः, वातपोथः, पर्णः.

But-end, *s.* घनाग्रं, स्थूलाग्रं, अतीक्ष्णाग्रं.—(Hilt) त्सरुः *m.*

Butler, *s.* पानपात्रवाहकः, मद्यरक्षकः, मद्यागाराधिकृतः.

Butment, *s.* उभयतस् तोरणमूलोत्तम्भकः सेतुहर्म्यादिभागः.

Butt, *s.* (For shooting at) लक्ष्यं, लक्ष्मं, शरव्यं, वेध्यं, व्यध्यः, प्रतिकायः, दृष्टिगुणः.—(Aim, end) अभिप्रायः, आशयः, उद्देशः, चिकीर्षितं.—(Object of jest) उपहासस्थानं, परिहासास्पदं, हास्यभूमिः *f.*—(A cask) पात्रं, भाण्डं, सुराभाजनं.

To **butt**, *v. n.* (To strike with the head like horned animals) शृङ्गिवत् or मेषादिवत् शिरसा आहन् (c. 2. -हन्ति -हन्तुं).

Butter, *s.* नवनीतं, क्षीरसारः, दधिजं, दधिसारः, किलाटः -टी, मन्थजं, नवोद्धृतं.—(Clarified butter or ghee) घृतं, हविः *n.* (स्), सर्पिः *n.* (स्), पुरोडाशः, आज्यं.—(Of yesterday's milk) हैयङ्गवीनं.

To **butter**, *v. a.* नवनीतेन लिप् (c. 6 लिम्पति, लेप्तुं) or अञ्ज् (c. 7. अनक्ति, अंक्तुं).

Butter-bump, *s.* क्रौञ्चजातीयः पक्षिभेदः, क्रौञ्चः, बकप्रभेदः.

Butter-cup, butter-flower, *s.* पीतपुष्पप्रभेदः स च वसन्तसमये यवसमध्ये प्ररोहति.

Buttered, *p. p.* नवनीताक्तः -क्ता -क्तं, घृताक्तः -क्ता -क्तं, घृताभ्यक्तः -क्ता -क्तं.

Butterfly, *s.* चित्रपतङ्गः, चित्राङ्गः पतङ्गभेदः, आपन्नपक्षः कीटभेदः, कीटोद्भवश् चित्रपतङ्गः, सपक्षः कीटः.

Butteris, *s.* (An instrument for paring the hoof of a horse) अश्वखुरतक्षणयोग्या कर्त्तरिका, तुरगशफकर्त्तनार्थं यन्त्रविशेषः.

Butter-knife, *s.* कुन्तलिका, घृतकुन्तलिका, नवनीतकर्त्तरिका.

Butter-man, *s.* नवनीतविक्रयी *m.* (न्), नवनीतविक्रयजीवी *m.* (न्), घृतविक्रेता *m.* (तृ).

Butter-milk, *s.* दण्डाहतं, तक्रं, प्रमथितं, अरिष्टं, कालशेयं, गोरसः, कटुरं.

BUTTER-PRINT, *s.* नवनीताङ्कनयोग्या काष्ठमयी मुद्रा.

BUTTER-TEETH, *s.* मुखाग्रभागे वृहद्दन्तद्वयं, सम्मुखस्थौ छेदकदन्तौ.

BUTTERY, *a.* नवनीतगुणविशिष्टः -ष्टा -ष्टं, घृतमयः -यी -यं.

BUTTERY, *s.* (The room where provisions are laid up) खाद्यद्रव्यागारं, विद्यालये पूपनवनीतयवसुरादिकोष्ठकं, कुशूलः, अन्नकोष्ठकं.

BUTTOCK, *s.* स्फिचौ *f. du.* (स्फिच्), नितम्बः, कटिप्रोथः.

BUTTON, *s.* (Catch by which clothes are fastened) गण्डः, पुंसो वस्त्राञ्चलद्वयमङ्ग्रहणार्थं गुलिका.—(Bud) मुकुलं, कुड्मलं, पल्लवः.

To BUTTON, *v. a.* (To dress) संव्ये (c. 1. -व्ययति -व्यातुं), वेष्ट् (c. 1. वेष्टते, वेष्टितुं).—(To fasten with buttons) पूर्व्वोक्तगण्डेन सङ्ग्रह् (c. 9. -गृह्णाति -ग्रहीतुं) or संलग्नीकृ or बन्ध् (c. 9. बध्नाति, बन्द्धुं).

To BUTTON, *v. n.* (To bud) गण्डाकारमुकुलवत् स्फुट् (c. 6. स्फुटति, स्फुटितुं).

BUTTON-HOLE, *s.* गण्डाधारः, गण्डछिद्रं, गुलिकाग्रहणयोग्यं छिद्रं, शिक्यं.

BUTTON-MAKER, *s.* गण्डकृत्, गण्डकारी *m.* (न्), गुलिकाकारः.

BUTTRESS, *s.* वप्रः, भवनस्य वहिरालम्बः, भित्त्युपस्तम्भनार्थं वप्रः or प्राकारः.—(Prop, support) उपस्तम्भः, आलम्बः, उपघ्नः, आश्रयः, आधारः.

To BUTTRESS, *v. a.* (To prop) पूर्व्वोक्तवप्रेण उत्तम्भ् (c. 9. उत्तभ्नाति, उत्तम्भितुं).

BUXOM, *a.* (Gay, lively) हृष्टः -ष्टा -ष्टं, प्रहसितवदनः -ना -नं, प्रहासी -सिनी -सि (न्), प्रफुल्लवदनः -ना -नं, आनन्दी -न्दिनी -न्दि (न्), सरसः -सा -सं.—(Wanton) ललितः -ता -तं, विलासी -सिनी -सि (न्).

BUXOMLY, *adv.* सानन्दं, सहर्षं, सललितं, सविलासं, सरसं.

BUXOMNESS, *s.* (Wantonness) लालित्यं, सविलासता, सरसता, लीला.

To BUY, *v. a.* क्री (c. 9. क्रीणाति -णीते, क्रेतुं), उपक्री, सङ्क्री, मूल्यं दत्त्वा लभ् (c. 1. लभते, लब्धुं) or प्राप् (c. 5. -आप्नोति, -आप्तुं).

BUYER, *s.* क्रेता *m.* (तृ), क्रयी *m.* (न्), क्रायकः, क्रयिकः.—(Buyer and seller) क्रयविक्रयी *m.* (न्).

BUYING, *s.* क्रयः.—(Buying and selling) क्रयविक्रयः.

To BUZZ, *v. n.* रु (c. 2. रौति, रवितुं), गुम्फ् (c. 1. गुम्फति, गुम्फितुं), रण् (c. 1. रणति, रणितुं), रणरणं कृ.

BUZZ, BUZZING, *s.* गुम्फनं, गुम्फितं, कलः, कलकलः, मर्म्मरः, रणत्कारः, कलरवः, कलस्वरं; *part.* गुम्फन् -म्फन्ती -म्फत् (त्), रणन् -णन्ती -णत् (त्).

BUZZARD, *s.* अपकृष्टजातिः श्येनभेदः, श्येनकः.—(A blockhead) स्थूलधीः *m.*, मन्दमतिः *m.*, मूर्खः.

BY, *prep.* (By the side of) expressed by उप prefixed; as, 'he sits by me,' माम् उपास्ते; 'a tank by a well,' उपकूपजलाशयः.—(Beside, denoting passage) expressed by अति prefixed; as, 'he passes by me,' माम् अत्येति.—(Denoting the agent, instrument, cause, means or manner) expressed by the instr. case; as, 'by him,' 'by that,' 'on that account,' 'by that means,' 'in that manner,' may all be expressed by तेन. In modern Sanskrit the instrument and agent are often expressed by द्वारा or द्वारेण and कर्त्तृक; as, 'to hit with a stick,' काष्ठद्वारा or काष्ठद्वारेण तड्; 'sacrifices by sages,' ऋषिकर्त्तृकयज्ञाः. 'By,' in some of these senses, may often be expressed by the indec. part.; 'a man may be happy by doing penance,' तपस् तप्त्वा सुखी भवेत्.—(According to) अनुरूपं, अनुसारेण; 'by rule,' विधिवत्, विधितस्, यथाविधि.—(As soon as, not later than) मध्ये; as, 'by next year,' आगामिवत्सरमध्ये. (The quantity at one time) expressed by the affix शस्; as, 'by thousands,' सहस्रशस्; 'by twos and threes,' द्विशस् त्रिशस्; 'by companies,' पंक्तिभिः.—(Successive action) expressed by प्रति or अनु, or by repeating the word; as, 'man by man,' प्रतिपुरुषं; 'day by day,' प्रतिदिवसं or अनुदिवसं or दिवसे दिवसे.—(By himself, alone) एकान्ततस्, निभृतं, रहसि, रहोभूतः -ता -तं.—(In swearing or adjuring) expressed by the instr. c.; as, 'swear not at all, neither by heaven, nor by earth,' कमपि शपथं मा कार्ष्ट स्वर्गेण न पृथिव्या न; 'by name,' नाम्ना, नामतस्, नामधेयतस्; 'by force,' बलात्, बलात्कारेण, प्रसह्य; 'by chance,' दैवात्; 'by day,' दिवा.

BY, *adv.* (Near) निकटे, समीपे, अन्तिके, अभितस्, आरात्.—(By the side) पार्श्वतस्, पार्श्वे.—(Passing by) expressed by the prep. अति; as, 'he passes by,' अतिक्रामति.—(In presence) सन्निधाने, साक्षात्, अग्रे, समक्षं, सम्मुखे.

BY, *s.* (Something not the direct object of regard) expressed, when in composition, by उप; as, 'a duty by the by,' *i. e.* 'a secondary duty,' उपधर्म्मः.

BY AND BY, *adv.* अनन्तरं, क्षणान्तरे, न चिरेण, अचिरेण, अचिरात्.

BY THE BY, OR BY THE WAY, *adv.* (Exclusively of the subject in hand) प्रस्तुतम् अन्तरेण, प्रस्तुतविषयव्यतिरेकेण.—(Besides, moreover) किञ्च, अपरञ्च, अन्यच्च.—(In reference to that) तदुद्दिश्य.

BY-DEGREES, *adv.* क्रमशस्, क्रमे क्रमे, पदे पदे, प्रतिपदं.

BY-CONCERNMENT, *s.* उपविषयः, अप्रधानकार्य्यं.

BY-END, *s.* स्वहितं, स्वार्थः, आत्मविवृद्धिः *f.*, आत्मोदयः.

BY-GONE, *a.* अतिक्रान्तः -न्ता -न्तं, अतीतः -ता -तं, गतः -ता -तं, पुरातीतः -ता -तं.

BY-LANE, BY-STREET, BY-ROAD, *s.* उपमार्गः, उपपथः, उपरथ्या, उपप्रतोली, गूढमार्गः.

BY-LAW, *s.* उपधर्म्मः, उपव्यवस्था, उपविधिः *m.*, अनुव्यवस्था.

BY-NAME, *s.* उपाधिः *m.*, उपनाम *n.* (न्).

BY-PATH, *s.* उपमार्गः, उपपथः, उत्पथः, गूढपथः.

BY-ROOM, *s.* उपरोधकं, उपशाला, उपकोष्ठः, अन्तर्गृहं, कक्षान्तरं.

BYSTANDER, *s.* पार्श्वस्थः, समीपस्थः, निकटस्थः, तत्रस्थः, समीपवर्त्ती *m.* (न्), उपस्थायी *m.* (न्).—(At a sacrifice) सदस्यः, विधिदर्शी *m.* (न्).

BY-WEST, *a.* (Westward, to the west of) पश्चिमदिश्यः -श्या -श्यं.

BY-WORD, *s.* उपकथा, उपवाक्यं.—(Subject of scorn) तिरस्कारविषयः, उपकथनविषयः, अपवादविषयः, उपहासस्थानं, उपहासास्पदं, अवहासभूमिः *f.*

CABAL, *s.* (An union of a few persons in some secret design) गोपनीयकार्य्यसाधनार्थं कतिपयजनसंसर्गः or पंक्तिः *f.*—(Intrigue) कुमन्त्रणा, कुविचारणा, कुपरामर्शः, कुयुक्तिः *f.*, कुसंसर्गः.

To CABAL, *v. n.* गोपनीयकर्म्मसम्पादनार्थं सुनिभृतं सम्मिल् (c. 6. -मिलति -मेलितुं) or सह गम् (c. 1. गच्छति, गन्तुं) or संयुज् in pass. (-युज्यते) or सङ्घट्ट् (c. 1. -घट्टते -घट्टितुं) or संसर्गं कृ.

CABALA, *s.* (A secret science) निगूढविद्या, निगूढशास्त्रं, गूढशास्त्रं, गुह्यविद्या, परमगहनविद्या.

CABALIST, *s.* (One skilled in occult sciences) निगूढविद्याज्ञः, निगूढशास्त्रज्ञः.

CABALISTICAL, *a.* (Having an occult meaning) निगूढार्थः -र्था -र्थं, अतिगुप्तार्थः -र्था -र्थं, परमगहनः -ना -नं, गूढः -ढा -ढं, गुह्यः -ह्या -ह्यं, रहस्यः -स्या -स्यं.

CABALISTICALLY, *adv.* अतिगुप्तं, निगूढं, सरहस्यं, परमगहनप्रकारेण.

CABALLER, *s.* कुमन्त्रणकृत्, कुमन्त्री *m.* (न्), भेत्ता *m.* (तृ), भेदकारः.

राजद्रोही *m.* (न्).

CABBAGE, *s.* (A pot-herb) शाकप्रभेदः, शाकं, हरितकं, शूरणं, शिग्रुः *m.* —(Any thing stolen) मूषितं, मुष्टं, अपहारः, लोप्त्रं, होढं.

To CABBAGE, *v. n.* (To steal in cutting clothes) सूचिकवत् पटखण्डम् अवछिद्य चुर् (c. 10. चोरयति -यितुं) or मुष् (c. 9. मुष्णाति, मोषितुं).

CABBAGE-TREE, *s.* (A species of palm) तालजातीयो वृक्षप्रभेदः, उच्चतरुः *m.*

CABIN, *s.* (A small room) कुटिः *f.*, कुटी, कोष्ठः, शालिका, शाला, स्थलं.—(A chamber in a ship) नौकाभ्यन्तरे कुटिः or कोष्ठः or कक्षः or वेश्म *n.* (न्).—(A cottage) कुटीरः, वेश्म *n.* (न्), कुट्टिमः, पर्णशाला.—(A tent) पटकुटिः *f.*, पटवेश्म *n.* (न्), मण्डपः.

To CABIN, *v. n.* (To live in a cabin) कुटीरे वस् (c. 1. वसति, वस्तुं).

CABIN-BOY, *s.* नौकारूढानां परिचारकः or सेवकः or प्रेष्यः.

CABINET, *s.* (Private room) कक्षः, उपरोधकं, कक्षान्तरं, अन्तःशाला.—(Private council of the state) प्रधानमन्त्रिणां गूढसभा, धीसचिवानां सभा, शिष्टसभा, गूढमन्त्रणं, गूढभाषितं; 'a cabinet-minister,' मुख्यमन्त्री *m.* (न्), प्रधानमन्त्री *m.*, गूढमन्त्री *m.*—(A place in which rare things are kept) विशिष्टाधारः, दुर्लभद्रव्याधारः, रत्नकोष्ठः, रत्नाधारः, रत्नपात्रं, रत्नभाण्डं.—(A kind of box) समुद्गः, समुद्गकः, सम्पुटः.

CABINET-MAKER, *s.* रत्नाधारकृत्, रत्नभाण्डकृत्, समुद्गकारः, सम्पुटकृत्.

CABLE, *s.* नौरज्जुः *m.*, नौबन्धनरज्जुः *m.*, शाणरज्जुः, नौबन्धनार्थं स्थूलरज्जुः or महारज्जुः, नौकाया महागुणः or दृढगुणः.

CABLED, *a.* रज्जुना or गुणेन बद्धः -द्धा -द्धं, रज्जुबद्धः -द्धा -द्धं.

CABRIOLET, *s.* चक्रद्वययुक्तः सपिधानो रथविशेषः, कर्णीरथः, हयनं.

CACHECTICAL, *a.* दोषत्रयपीडितः -ता -तं, दुष्टशरीरः -रा -रं, अस्वस्थः -स्था -स्थं.

CACHEXY, *s.* शरीरदोषः, रक्तदूषणं, दोषत्रयं, शरीरस्य अस्वास्थ्यं.

CACHINNATION, *s.* अट्टहासः, आच्छुरितं, अवच्छुरितं, प्रहासः, प्रहसनं.

CACKLE or CACKLING, *s.* कूजनं, हंसनादः, हंसरुतं, कुक्कुटीशब्दः.—(Making a cackle) हंसनादी -दिनी -दि (न्).—(Idle talk) जल्पनं, आलस्यवचनं, वृथाकथा, असम्बद्धं.

To CACKLE, *v. n.* कूज् (c. 1. कूजति, कूजितुं), हंसनादं कृ, हंसवत् or कुक्कुटीवत् शब्दं कृ.

CACKLER, *s.* हंसरूपेण नादी *m.* (न्), कूजकः, कूजनकृत्.—(A tell-tale) जल्पकः, वाचालः, रहस्यभेदकः.

CACOCHYMY, *s.* शरीरविकारः, रक्तविकारः, शरीरदोषः, दोषत्रयं.

CACODÆMON, *s.* अपदेवता, पिशाचः, वेतालः, भूतः, दैत्यः.

CACOPHONY, *s.* विस्वरपदं, अपरवः, अपक्वणः, कष्टपदं, कटुश्रुतिः *f.*

CADAVEROUS, *a.* मृतशरीरोपमः -मा -मं, शवसवर्णः -र्णा -र्णं.

CADE, *s.* (A barrel) दीर्घगोलाकारः काष्ठमयो भाण्डविशेषः.

CADE, *a.* कोमलः -ला -लं, सुकुमारः -री -रं, गृह्यकः -का -कं.

To CADE, *v. a.* कोमलतया or कोमलप्रकारेण पुष् (c. 9. पुष्णाति, c. 1. पोषति, पोषितुं) or संवृध् in caus. (-वर्धयति -यितुं).

CADENCE, *s.* (Fall, state of sinking) पातः, पतनं, अवपातः, च्युतिः *f.* —(Modulation of the voice, tone) स्वरः, कलः, स्वनः, निःस्वनः, निह्रादः, विरावः, क्वणः, विरिब्धः, छन्दः *n.* (स्).

CADENT, *a.* (Falling down) पातुकः -का -कं, पतयालुः -लुः -लु.

CADET, *s.* अनुजः, अवरजः, जघन्यजः, कनिष्ठः.—(A young volunteer) युद्धकर्म्मशिक्षार्थं वेतनं विना क्षत्रियधर्म्मम् आचरति यो कुलीनयुवा.

CADGER, *s.* विपणी *m.* (न्), प्रापणिकः, आपणिकः, अण्डनवनीतादिविक्रयिकः.

CADI, *s.* तर्कीयदेशे प्राड्विवाकः, धर्म्माध्यक्षः, दण्डनायकः, न्यायाधिपतिः.

CADUCITY, *s.* पातुकता, पतयालुत्वं, पतनशीलता, सद्यःपातित्वं, अस्थिरता.

CÆSURA, *s.* विच्छित्तिः *f.*, विच्छेदः, अवच्छेदः, विरामः.

CAG, *s.* (A barrel) दीर्घगोलाकृतिः काष्ठनिर्म्मितः पात्रविशेषः.

CAGE, *s.* पञ्जरं, पिञ्जरं, वीतंसः, कुलायिका, पक्षिशाला, शालारं.—(A prison) कारा, कारागारं, कारावेश्म *n.* (न्), बन्धनगृहं.

To CAGE, *v. a.* पञ्जरे or कारागारे निरुध् (c. 7. -रुणद्धि -रोद्धुं) or अवरुध् or बन्ध् (c. 9. बध्नाति, बन्द्धुं).

To CAJOLE, *v. a.* (To flatter, wheedle) शान्त्व् or सान्त्व् (c. 10. शान्त्वयति, सान्त्वयति -यितुं), लल् in caus. (लालयति -यितुं).—(With intent to overreach) वञ्च् in caus. (वञ्चयते -यितुं), परिवञ्च्, प्रलभ् (c. 1. -लभते -लब्धुं), विप्रलभ्, छल् (c. 10. छलयति -यितुं).

CAJOLED, *p. p.* लालितः -ता -तं, मधुरैर्वचोभिः संलापितः -ता -तं, वञ्चितः -ता -तं, विप्रलब्धः -ब्धा -ब्धं, प्रतारितः -ता -तं.

CAJOLER, *s.* (Coaxer) लालनकृत् *m.*, चाटुकारः.—(Deceiver) वञ्चकः, प्रतारकः, कूटकः, कूटकारः, कपटिकः.

CAJOLERY, *s.* (Coaxing) लालनं, चाटूक्तिः *f.*—(Overreaching) छलं, वञ्चनं, प्रतारणं, कूटता, कपटः, व्याजः.

CAITIFF, *s.* दुर्वृत्तः, दुरात्मा *m.* (न्), नराधमः, खलः, धूर्त्तः, शठः.

CAITIFF, *a.* दुर्वृत्तः -त्ता -त्तं, खलः -ला -लं, शठः -ठा -ठं, अधमः -मा -मं.

CAIRN, *s.* प्रस्तरचितिः *f.*, पाषाणचितिः *f.*, शिलाराशिः *m.*, पाषाणोत्करः.

CAKE, *s.* पूपः, अपूपः, पिष्टकः, पोलिका, करम्भः.—(A mass of any thing) पिण्डः.

To CAKE, *v. n.* पिण्डीभू, पिण्ड (nom. पिण्डायते), पिष्टकरूपेण घनीभू.

CAKED, *p. p.* पिण्डितः -ता -तं, पिण्डीभूतः -ता -तं, घनीकृतः -ता -तं.

CALABASH, *s.* बृहदलाबुप्रभेदः, अलाबुः *f.*, पिच्छिका.

CALAMANCO, *s.* ऊर्णानिर्म्मितः पटविशेषः, ऊर्णामयवस्त्रं.

CALAMINE, *s.* शिलाजतुस्वभावो भूमिविशेषो यत्संसर्गेण ताम्रं पित्तलः सम्पद्यते.

CALAMITOUS, *a.* व्यसनी -निनी -नि (न्), आत्ययिकः -की -कं, विपन्नः -न्ना -न्नं, विपद्युक्तः -क्ता -क्तं, आपद्ग्रस्तः -स्ता -स्तं, दुर्गतः -ता -तं, विधुरः -रा -रं, दैवोपहतः -ता -तं, उपाकृतः -ता -तं, दुःखी -खिनी -खि (न्), क्लेशी -शिनी -शि (न्), औत्पातिकः -की -कं, शोकपूर्णः -र्णा -र्णं, व्यथाकरः -रा -रं.

CALAMITY, *s.* विपद् *f.*, आपद् *f.*, विपत्तिः *f.*, व्यसनं, व्यापद् *f.*, विप्लवः, उपप्लवः, दुर्घटना, दौर्गत्यं, दुर्दैवं, दौर्भाग्यं, दुःखं, क्लेशः.—(From heaven) विनिपातः, उत्पातः, विनिहतः.

CALAMUS, *s.* सुगन्धिवेतसप्रभेदः, वेत्रः, वेणुः *m.*, वंशः, नडः, नलः.

CALASH, *s.* (A pleasure-carriage) क्रीडारथः, पुष्परथः, केलिरथः.

CALCAREOUS, *a.* शार्करिकः -का -कं, शार्करीयः -यी -यं, शर्करावान् -वती -वत् (त्).

CALCEATED, *p. p.* सपादुकः -का -कं, पादुकारूढः -ढा -ढं, उपानद्युक्तः -क्ता -क्तं.

CALCEDONY, *s.* (A kind of opal) शिवधातुः *m.*, गोमेदसन्निभः.

To CALCINATE or CALCINE, *v. a.* भस्मीकृ, आतञ्चनं कृ, प्रतीवापं कृ.

CALCINATION, *s.* भस्मीकरणं, आतञ्चनं, प्रतीवापः.—(Apparatus for) पातालः.

CALCINED, *p. p.* भस्मीकृतः -ता -तं, भस्मीभूतः -ता -तं.

CALCULABLE, *a.* गणनीयः -या -यं, विगण्यः -ण्या -ण्यं, संख्येयः -या -यं.

To CALCULATE, *v. n.* गण् (c. 10. गणयति -यितुं), विगण्, प्रगण्, संख्या (c. 2. -ख्याति -ते -ख्यातुं), परिसंख्या, सम्परिख्या, कल् (c. 10. कलयति -यितुं), सङ्कल्.

CALCULATED, *p. p.* गणितः -ता -तं, विगणितः -ता -तं, परिगणितः -ता -तं, राशिगतः -ता -तं, चित्तकलितः -ता -तं.—(Adapted, suited) युक्तः -क्ता

-क्तं, उपयुक्तः -क्ता -क्तं, योग्यः -ग्या -ग्यं, उचितः -ता -तं, पर्य्याप्तः -प्ता -प्तं.

CALCULATION, *s.* (The act) गणनं *n.* -ना, विगणनं, सङ्ख्यानं, परिसङ्ख्यानं, गुणनं.—(The result) गणितं.

CALCULATOR, *s.* गणकः, विगणकः, गणनकृत्, गुणकः, गुणकारः, सङ्ख्याकृत्.

CALCULOUS, *a.* शार्करः -री -रं, आश्मिकः -की -कं, अश्मरः -रा -रं, आश्मनः -नी -नं, अश्ममयः -यी -यं, शिलामयः -यी -यं.

CALCULUS, *s.* (Stone in the bladder) अश्मरी, अश्मरीः, शर्करा, मूत्रकृच्छ्रं.

CALDRON, *s.* पिठरः, उखा, स्थाली, उदस्थाली, पिष्टपचनं, कन्दुः *m.*, कटाहः.

CALECHE, *s.* क्रीडारथः, पुष्परथः, केलिरथः.

CALEFACTION, *s.* तपनं, तापनं, प्रतापनं, दाहनं, स्निग्धकरणं.

CALEFACTORY, *a.* तापकः -का -कं, तापनः -नी -नं, तापकरः -री -रं.

To CALEFY, *v. n.* (To be heated) तप् (c. 1. तपति, तप्तुं), प्रतप्.

CALENDAR, *s.* (Almanack) पञ्जिः *f.*, पञ्जी, पञ्जिका, तिथिपत्रं.

CALENDER, *s.* (A hot-press) वस्त्रस्निग्धीकरणार्थं or पटश्लक्ष्णीकरणार्थं or वस्त्रमार्जनार्थं चक्रयन्त्रं.

To CALENDER, *v. a.* (To dress cloth) पूर्व्वोक्तयन्त्रेण वस्त्रं or पटं स्निग्धीकृ or श्लक्ष्णीकृ or मृज् (c. 2. मार्ष्टि, मार्ष्टुं), प्रमृज्.

CALENDS, *s.* मासस्य प्रथमदिनं, शुक्लपक्षस्य प्रथमदिवसः, अक्षुण्णदिनं, प्रतिपद् *f.*, पक्षतिः *f.*

CALENTURE, *s.* समुद्रयायिनां व्याधिप्रभेदस् तद्रोगग्रस्तः पोतवाहः शस्यक्षेत्रम् इति बुद्ध्या समुद्रमध्ये आत्मानं प्रक्षिपति.

CALF, *s.* गोवत्सः, वत्सः, वष्कयः, शकृत्करिः *m.* -री *f.*, दोग्धकः.—(Newborn) तर्णः, तर्णकः.—(A herd of calves) वात्सकं.—(The thick part of the leg) जङ्घायाः स्थूलभागः or मांसलभागः, जङ्घापिण्डः, जङ्घामध्यं, मांसपिण्डाङ्गं.—(A dolt) स्थूलबुद्धिः, जडः.

CALIBRE, *s.* (Bore of a gun, &c.) छिद्रं, यन्त्रछिद्रं, सुषिरं, शुषिरं, व्यासं, छिद्रव्यासं, विस्तारः, छिद्रविस्तृतिः *f.*—(Size, measure) परिमाणं, मात्रा.—(Sort, kind) प्रकारः.

CALICE, *s.* कंसः, पात्रं, भाजनं, पुटकं.

CALICO, *s.* कार्पासं, नानावर्णमूर्त्तिमुद्रितः कार्पासपटः, चित्रितकार्पासं.

CALID, *a.* उष्णः -ष्णा -ष्णं, तप्तः -प्ता -प्तं, नैदाघः -घी -घं.

CALIDITY, *s.* तापः, उष्णता, घर्म्मः, निदाघः, अशिशिरता.

CALIGATION, *s.* अन्धकारः, तिमिरं, तमः *n.* (स्), तमिस्रं, मेघतिमिरं.

CALIGINOUS, *a.* तमस्वी -स्विनी -स्वि (न्), अन्धकारयुक्तः -क्ता -क्तं, तमोवृतः -ता -तं.

CALIGRAPHY, *s.* चारुलेखनं, शुभलेखनं, सुलेखनं, चारुलेखनशिल्पं.

CALIX, *s.* पुष्पगर्भः, पुष्पकोषः, पुष्पाधारः, कुसुमपुटी, उपदलं, पुष्पसम्बन्धी दलमयो वहिःकोषः or पुटः, पुष्पधारको दलपुटः.

To CALK, *v. a.* नौकातले दारुस्फोटनप्रयुक्तानि छिद्राणि शणसूत्रादिना निरुध् (c. 7. -रुणद्धि -रोद्धुं) or पिधा (c. 3. -दधाति -धातुं).

CALKER, *s.* नौकातले शणसूत्रादिना छिद्रावरोधी *m.* (न्) or छिद्रप्रतिबन्धकः.

CALL, *s.* (Summon) आह्वानं, आहूतिः *f.*, आह्वयः, आकरणं.—(Invitation) निमन्त्रणं.—(Address by name) सम्बोधनं, नामग्रहः.—(Impulse) वेगः.—(Divine vocation) प्रत्यादेशः, आकाशवाणी, ईश्वराह्वानं.—(Requisition, obligation) प्रयोजनं, अवश्यकता.—(Claim, demand) अभियोगः.—(Authority) अधिकारः.—(A visit) अभिगमः, अभ्यागमः, समायः.—(Challenge) आहूतिः *f.*—(A calling over the names of the members of parliament) महासभायां प्रत्यक्षाप्रत्यक्षनिर्णयनार्थम् एकैकशः प्रतिनिधिनामव्याहरणं.

To CALL, *v. a.* (Name, denominate) अभिधा (c. 3. -दधाति -धातुं), आख्या (c. 2. -ख्याति -ख्यातुं), प्रचक्ष् (c. 2. -चष्टे), कृत् (c. 10. कीर्त्तयति -यितुं), प्रकृत्, नाम कृ; 'they called his name Rama,' तस्य नाम राम इति चक्रुः; 'to call upon by name,' सम्बोधनं कृ; 'to be called,' अभिधा in pass. (-धीयते), ख्या in pass. (ख्यायते).—(Summon) आह्वे (c. 1. -ह्वयति -ह्वातुं).—(Invite) निमन्त्र् (c. 10. -मन्त्रयति -यितुं), आमन्त्र्.—(Convoke) समाह्वे, आह्वे, सङ्घट्ट् (c. 10. -घट्टयति -यितुं).—(Appeal to, invoke) ह्वे, आह्वे, उपह्वे.—(Call forth, put in action, excite) प्रोत्सह् in caus. (-साहयति -यितुं), उद्युज् in caus. (-योजयति -यितुं), चेष्ट् in caus. (चेष्टयति -यितुं).—(Call back, revoke) निवृत् in caus. (-वर्त्तयति -यितुं), खण्ड् (c. 10. खण्डयति -यितुं), प्रत्यादिश् (c. 6. -दिशति -देष्टुं).—(Call for, require) अर्ह् (c. 1. अर्हति, अर्हितुं), प्रार्थ् (c. 10. -अर्थयते -यितुं), याच् (c. 1. याचति, याचितुं); 'this matter calls for deliberation,' अत्र विचारेण प्रयोजनं.—(Call in, as coin) मुद्राप्रचलनं निवृत्, मुद्राप्रावर्त्यं निवृ in caus. (-वारयति -यितुं).—(Call over names) प्रत्यक्षाप्रत्यक्षनिश्चयनार्थं नामानि एकैकश उदाहृ (c. 1. -हरति -हर्त्तुं) or परिसंख्या or गण् in caus. (गणयति -यितुं).—(Call out, exclaim) उत्क्रुश् (c. 1. -क्रोशति -क्रोष्टुं), प्रक्रुश्, विक्रुश्, उच्चैःस्वरे घुष् (c. 10. घोषयति -यितुं), उद्घुष्, चित्कारं कृ, चीत्कृ.—(Call out, challenge) आह्वे, उपाह्वे.—(Call to witness) साक्षिणं कृ or आह्वे.—(Call to mind) स्मृ (c. 1. स्मरति, स्मर्तुं).—(Call to account) अनुयुज् (c. 7. -युङ्क्ते -योक्तुं), अभियुज्, अनुसन्धा (c. 3. -दधाति -धातुं), निबद्धं -द्धां -द्धं कृ.—(Call up, from sleep) जागृ in caus. (जागरयति -यितुं), प्रबुध् in caus. (-बोधयति -यितुं).—(Address) आमन्त्र्, आलप् (c. 1. -लपति -लपितुं); 'by name,' नाम ग्रह् (c. 9. गृह्णाति, ग्रहीतुं).—(Call upon, implore) प्रार्थ् (c. 10. -अर्थयते -यितुं), विनयेन प्रार्थ्.—(To visit) अभिगम् (c. 1 -गच्छति -गन्तुं), अभ्यागम्, अभिसृ in caus. (-सारयति -यितुं).

CALLED, *p. p.* (Named) प्रोक्तः -क्ता -क्तं, अभिहितः -ता -तं, उदाहृतः -ता -तं, परिकीर्त्तितः -ता -तं, स्मृतः -ता -तं, शब्दितः -ता -तं, संज्ञितः -ता -तं. The following are used in composition only: नामा -मा -म, अभिधानः -ना -नं, आख्यः -ख्या -ख्यं, आह्वः -ह्वा -ह्वं, आह्वयः -या -यं, नामधेयः -या -यं; thus, 'a lake called blue-lotus,' नीलोत्पलनाम or नीलोत्पलाभिधानं सरः.—(Summoned, invited) आहूतः -ता -तं, निमन्त्रितः -ता -तं.

CALLING, *s.* (Inviting) आह्वानं, हूतिः *f.*, हवः, निमन्त्रणं.—(Addressing by name) सम्बोधनं, नामग्रहः.—(Giving name) नामकरणं.—(Profession, employment) वृत्तिः *f.*, जीविका, उपजीविका, व्यापारः, व्यवसायः.—(Divine vocation) प्रत्यादेशः, आकाशवाणी.

CALLOSITY, *s.* (Induration of the skin) कदरः, किणः, त्वक्काठिन्यं, त्वग्घनता, त्वग्दृढता, तनुकूपघनता.

CALLOUS, *a.* कठिनः -ना -नं, दृढः -ढा -ढं, घनः -ना -नं, घनीकृतः -ता -तं.—(Hard-hearted) कठिनहृदयः -या -यं.—(Insensible, unfeeling) विचेतनः -ना -नं, कर्कशः -शा -शं, निर्दयः -या -यं, कृपाहीनः -ना -नं.—(Shameless) निर्लज्जः -ज्जा -ज्जं.

CALLOUSLY, *adv.* काठिन्येन, सकार्कश्यं, दार्ढ्येन, निर्दयं, लज्जां विना.

CALLOUSNESS, *s.* (Hardness) कठिनता, काठिन्यं, कार्कश्यं, दृढता, दार्ढ्यं, द्रढिमा *m.* (न्).—(Insensibility, want of feeling) अचैतन्यं, हृदयकाठिन्यं, निर्दयता, निर्लज्जता.

CALLOW, *a.* पक्षहीनः -ना -नं, अजातपक्षः -क्षा -क्षं, अजातपर्णः -र्णा -र्णं, अनुत्पन्नपक्षः -क्षा -क्षं, गरुद्रहितः -ता -तं, नग्नदेहः -हा -हं, अकृतडीनः -ना -नं.

CALM, *s.* (Freedom from wind and waves) निर्वातः, वायुनिवृत्तिः *f.*, निर्वेगता, निस्तरङ्गता.—(Quiet, repose) शान्तिः *f.*, शमः, प्रशान्तिः *f.*,

विश्रामः, विश्रान्तिः *f.*, प्रसन्नता, प्रसादः.

Calm, *a.* (Free from wind and waves) निर्वातः -ता -तं, गतानिलः -ला -लं, निवृत्तवायुः -युः -यु, निर्वेगः -गा -गं, निस्तरङ्गः -ङ्गा -ङ्गं.—(Quiet, composed in mind) शान्तः -न्ता -न्तं, प्रशान्तः -न्ता -न्तं, विश्रान्तः -न्ता -न्तं, प्रसन्नः -न्ना -न्नं, अव्याकुलः -ला -लं, निराकुलः -ला -लं, समाहितः -ता -तं, प्रशान्तात्मा -त्मा -त्म (न्), स्थिरमतिः -तिः -ति, शान्तचेताः -ताः -तः (स्), अन्तर्वेगहीनः -ना -नं, असम्भ्रमः -मा -मं, अनुग्रः -ग्रा -ग्रं.—(In countenance) प्रसन्नमुखी -खिनी -खि (न्).

To **calm**, *v. a.* शम् in caus. (शमयति -यितुं), प्रशम्, उपशम्, तुष् in caus. (तोषयति -यितुं), परितुष्, प्रसद् in caus. (-सादयति -यितुं), अभिप्रसद्, शान्त्व् or सान्त्व् (c. 10. सान्त्वयति -यितुं), अभिशान्त्व्, परिशान्त्व्; 'to be calm,' शम् (c. 4. शाम्यति, शमितुं), प्रसद् (c. 1. 6. -सीदति -सत्तुं), सम्प्रसद्; 'the sea became calm,' प्रससाद सागरः; 'my mind is calm,' अन्तरात्मा प्रसीदति.

Calmed, *p. p.* शमितः -ता -तं, प्रशमितः -ता -तं, प्रसादितः -ता -तं.

Calmer, *s.* शमकः, शान्तिकर्त्ता *m.* (र्तृ), शान्तिकरः, शान्तिदः, तुष्टिकरः.

Calmly, *adv.* शान्त्या, शान्तं, मनःप्रसादेन, असम्भ्रमं, प्रशान्तचेतसा.

Calmness, *s.* शान्तता, प्रशान्तता, शान्तिः *f.*, विश्रान्तता, प्रसादः, निराकुलता, अव्याकुलता, स्थिरता, असम्भ्रमः.—(Of the sea) निर्वातत्वं.

Calomel, *s.* षट्कृत्वः शोधितः or ऊर्द्ध्वपातितः पारदः स च चिकित्सकैर् नानाव्याधिप्रतिकाराय रोगार्त्तेषु प्रयुज्यते.

Calorific, *a.* तापकरः -री -रं, तापजनकः -का -कं, निदाघकरः -री -रं.

Calotte, *s.* धर्म्माचार्य्यैर् भृतं शरावाकृति मस्तकाभरणं or शिरोवेष्टनं.

Caltrop, *s.* विग्रहसमये शत्रोर् अश्वखुरवेधनार्थं रणभूमौ न्यस्तं शूलत्रययुक्तं लोहयन्त्रं.—(The plant) गोक्षुरः -रकः, गोखुरः -रकः.

To **calve**, *v. n.* वत्सं or तर्णं सु (c. 2. सूते, c. 4. सूयते, सोतुं) or प्रसु or जन् in caus. (जनयति -यितुं) or प्रजन् (c. 4. -जायते -जनितुं); 'a cow that calves often,' बहुसूतिः *f.*, चिरसूता, वष्कयणी; 'cows calve every year,' प्रतिवर्षं प्रसूयन्ते गावः; 'a cow that has lately calved,' नवसूतिका; 'calving of a cow,' गोप्रसवः.

To **calumniate**, *v. a.* परिवद् (c. 1. -वदति -वदितुं), अपवद्, निन्द् (c. 1. निन्दति, निन्दितुं), मिथ्या अभियुज् (c. 7. -युनक्ति -युङ्क्ते -योक्तुं), अभिशप् (c. 1. -शपति -शप्तुं), अभिशंस् (c. 1. -शंसति -शंसितुं), अपक्षिप् (c. 6. -क्षिपति -क्षेप्तुं), आक्षर् in caus. (-क्षारयति -यितुं), कलङ्क (nom. कलङ्कयति -यितुं), परगुणान् अपवद्.

Calumniated, *p. p.* अभिशस्तः -स्ता -स्तं, मिथ्याभिशस्तः -स्ता -स्तं, मिथ्याभियुक्तः -क्ता -क्तं, आक्षारितः -ता -तं, क्षारितः -ता -तं, कलङ्कितः -ता -तं.

Calumniator, *s.* परिवादी *m.* (न्) -दकः, पिशुनः, अभिशंसकः, अभिशापकः, मिथ्याभियोगी *m.* (न्), अभ्यसूयकः, निन्दकः, गुणघाती *m.* (न्), गुणापवादकः, कलङ्ककरः, कुवादः.

Calumnious, *a.* पिशुनः -ना -नं, असूयकः -का -कं, अभ्यसूयकः -का -कं, वाग्दुष्टः -ष्टा -ष्टं, कलङ्ककरः -री -रं, कलङ्कमयः -यी -यं, कलङ्की -ङ्किनी -ङ्कि (न्).

Calumniously, *adv.* परिवादेन, सापवादं, गुणापवादेन, असूयया, सकलङ्कं, पैशुन्येन, पिशुनवचनेन, निन्दापूर्व्वकं, सासूयं.

Calumny, *s.* परिवादः, अपवादः, असूया *f.* -यनं, असूयुः *m.*, अभ्यसूया, पिशुनवचनं, पिशुनवाक्यं, पैशुन्यं, अभिशंसनं, मिथ्याभिशंसनं, अभिशपनं, अभिशापः, आक्षारः -रणं, कलङ्कः, गुणापवादः, वाग्दोषः, मिथ्याभियोगः, निन्दा, परदोषवादः, अलीकप्रवादः.

Calx, *s.* चूर्णं, भस्म *n.* (न्).—(Of brass) रीतिपुष्पं, रीतिका, पुष्पकेतु *n.*, पौष्पकं, कुसुमाञ्जनं.

Calycle, *s.* क्षुद्रमुकुलं, क्षुद्रकुड्मलं, नवजालकं.

Cámadeva, *s.* *See* Kámadeva.

Cambist, *s.* हुण्डिकापत्रक्रयविक्रयजीवी *m.* (न्).

Cambric, *s.* अंशुकं, दुकूलं, कुलीनस्त्रीलोकेन भृतः सूक्ष्मक्षौमपटविशेषः.

Camel, *s.* उष्ट्रः, क्रमेलः, क्रमेलकः, महाङ्गः, मयः, वणिग्वहः, शरभः, द्विककुद् *m.*, दीर्घग्रीवः; 'a young camel,' करभः; 'a flock of camels,' औष्ट्रकं.

Cameleon, *s.* सरटः, सरटुः *m.*, प्रतिसूर्य्यः, कृकलासः, कृकवाकुः *m.*

Camelopard, *s.* तरक्षुरूपेण चित्रित उष्ट्रजातीयो दीर्घग्रीवो जन्तुप्रभेदः.

Camelot, *s.* (A stuff made of camel's hair, &c.) उष्ट्रलोमादिनिर्म्मितं वस्त्रं.

Cameo, *s.* तक्षितुं शक्यो द्विवर्णप्रस्तरविशेषः, तक्षणीयत्वक्षमः वसुविशेषः.

Camera-obscura, *s.* सान्धकारकुटीपटलनिवेशितश् चाक्षुषयन्त्रविशेषो यद्वारेण अन्तरस्थश्वेतफलके प्रतिबिम्बिता वहिःस्था विषया दृश्या भवन्ति.

Camerated, *a.* (Arched) तोरणाकारपटलयुक्तः -क्ता -क्तं, तोरणीकृतः -ता -तं.

Camisado, *s.* सौप्तिकं, सौप्तिकवधः, नैशाक्रमः, नैशाभिक्रमः, रात्रियुद्धं, रात्रौ or अन्धकारे अभियोगः or अवस्कन्दः.

Camoys or **camous**, *a.* (Flat, said of the nose) चिपिटः -टा -टं, चिक्किनः -ना -नं, अवभटः -टा -टं.

Camp, *s.* वाहिनीनिवेशः, निवेशः, शिविरं, कटकः, मन्दिरं, स्कन्धावारः. बलस्थितिः *f.*, पटकः; 'camp-follower,' सेनाचरः.

To **camp**, *v. n.* (To pitch a camp, to lodge in a camp) निविश् (c. 6. -विशते -वेष्टुं), सैन्यं निविश् in caus. (-वेशयति -यितुं), शिविरे वस् (c. 1. वसति, वस्तुं).

Campaign, *s.* (A level open tract of ground) समभूमिः *f.*, समस्थलं, तरुगुल्मरहितः समो भूभागः, निर्वनभूमिः.—(The time for which any army keeps the field) अभिषेणनकालः, युद्धकालः, रणक्षेत्रे वर्त्तनकालः, वत्सरमध्ये यत्कालपर्य्यन्तं सैन्या रणक्षेत्रे युयुत्सवो विचरन्ति.

Campaniform, *a.* (As a flower) घण्टाकारः -रा -रं, घण्टाकृतिः -तिः -ति.

Campestral, *a.* क्षैत्रिकः -की -कं, कैदारः -री -रं, जाङ्गलः -ली -लं.

Camphor or **camphire**, *s.* कर्पूरः -रं, चन्द्रः, सोमः, सोमसंज्ञं, सिताभः, ताराभः, सुधांशुः *m.*, घनसारः, हिमवालुका.

Camphorated, *a.* कर्पूरसंसृष्टः -ष्टा -ष्टं, कर्पूरीयः -या -यं.

Can, *s.* कंसः, कांस्यः, त्रापुषकुम्भः, लोहकुण्डः, धातुमयपात्रं, भाजनं.

To **can**, *v. n.* (To be able) शक् (c. 5. शक्नोति, c. 4. शक्यति, शक्तुं), समर्थः -र्था -र्थं अस्, क्षम् (c. 1. क्षमते, क्षन्तुं), प्रभू (c. 1. -भवति -भवितुं).

Canaille, *s.* अन्त्याः *m. pl.*, अन्त्यजातीयाः *m. pl.*, अन्त्यजाः *m. pl.*, प्राकृतमनुष्याः *m. pl.*, अधमजातीयाः *m. pl.*, खलाः *m. pl.*, हीनवर्णाः *m. pl.*, पृथग्जनाः *m. pl.*, इतरजनाः *m. pl.*

Canal, *s.* कुल्या, उपकुल्या, खातं, प्रणालः -ली, खल्लः, जलनिर्गमः, सारणिः *f.*, कृत्रिमा सरित्.

Canary-bird, *s.* उत्तालरुतविशिष्टः पीतवर्णो विजातीयः क्षुद्रपक्षी.

To **cancel**, *v. a.* (To annul, obliterate) लुप् (c. 6. लुम्पति, लोप्तुं), लोपं कृ, उच्छिद् (c. 7. -छिनत्ति -छेत्तुं), अपमृज् (c. 2. -मार्ष्टि -मार्ष्टुं), निर्मृज्, व्यामृज्, परिमृज्, उद्धृ (c. 1. -हरति -हर्त्तुं).—(To mark a writing with cross lines) लिखितलोपसूचनार्थं व्यत्यस्तरेखाद्वयेन पत्रं चिह्न् (c. 10. चिह्नयति -यितुं).

Cancellated, *p. p.* व्यत्यस्तरेखाचिह्नितः -ता -तं.

Cancelled, *p. p.* लुप्तः -प्ता -प्तं, उच्छिन्नः -न्ना -न्नं, व्यामृष्टः -ष्टा -ष्टं.

Cancer, *s.* (A sore) विद्रधिः *m.*, व्रणः, गलितव्रणं, नालीव्रणः, तनुव्रणः, उपदंशः, विस्फोटः, नाडी.—(The sign of the summer

solstice) कर्कटः, कर्कः, कर्कटराशिः *m.*; 'stars in cancer,' पुष्यः, सिध्यः, तिष्यः.—(A crab-fish) कुलीरः, कर्कटः.

To CANCERATE, *v. n.* (To become a cancer) व्रणीभू, विद्रधीभू, व्रण (nom. व्रणायते).

CANCEROUS, *a.* विद्रधिगुणविशिष्टः -ष्टा -ष्टं, विद्रधीयः -या -यं.

CANCRINE, *a.* कर्कटीयः -या -यं, कुलीरसम्बन्धी -न्धिनी -न्धि (न्).

CANDENT, *a.* प्रचण्डः -ण्डा -ण्डं, अत्युष्णः -ष्णा -ष्णं, अत्यन्ततप्तः -प्ता -प्तं.

CANDID, *a.* (Fair, upright) सरलः -ला -लं, दक्षिणः -णा -णं, उदारः -रा -रं, अवक्रः -क्रा -क्रं, अजिह्मः -ह्मा -ह्मं, शुद्धमतिः -तिः -ति, ऋजुः -जुः -जु, अगूढभावः -वा -वं, विमलात्मा -त्मा -त्म (न्), निर्व्यलीकः -का -कं.—(Pure) शुचिः -चिः -चि, विमलः -ला -लं, निर्म्मलः -ला -लं.—(White) शुक्लः -क्ला -क्लं.

CANDIDATE, *s.* अर्थी *m.* (न्), प्रार्थकः, याचकः, प्रत्याशी *m.* (न्), पदान्वेषी *m.* (न्), अभियोक्ता *m.* (तृ).

CANDIDLY, *adv.* सरलं, दाक्षिण्येन, अजिह्मं, धर्म्मतस्, अमायया, निर्व्यलीकं, निर्व्याजं, कपटं विना, मायाव्यतिरेकेण.

CANDIDNESS, *s.* सरलता, सारल्यं, दाक्षिण्यं, शुचिता, ऋजुता, आर्जवं, अजिह्मता, निर्व्यलीकता, अमाया.

CANDIED, *a.* घनीभूतः -ता -तं.—(Sugar) खण्डमोदकः, माक्षिकशर्करा, उपला, दृढगात्रिका.

To CANDIFY, *v. a.* शुक्लीकृ, धवलीकृ, धवल (nom. धवलयति -यितुं).

CANDLE, *s.* दीपः -पकः, दीपिका, प्रदीपः, वर्त्ती, वर्त्तिः *f.*, दशाकर्षः, शिखी *m.* (न्), कज्जलध्वजः.

CANDLEHOLDER, *s.* दीपधारी *m.* (न्), दीपवाहः, प्रदीपभृत्, दीपहस्तः.

CANDLELIGHT, *s.* दीपद्युतिः *f.*, प्रदीपद्युतिः, दीपप्रभा, वर्त्तिदीप्तिः *f.*

CANDLEMAS, *s.* मरियमनामिकायाः कन्यायाः शुचित्वम् उद्दिश्य महोत्सवो यस्य सेवनकाले भूरिप्रदीपाः समिद्धा भवन्ति

CANDLESTICK, *s.* दीपाधारः, दीपपादपः, प्रदीपपादपः, दीपवृक्षः, वर्त्त्याधारः, शिखातरुः *m.*, शिखावृक्षः, कौमुदीवृक्षः, कज्जलरोचकः.

CANDLESTUFF, *s.* दीपिकानिर्म्माणार्थं तैलवसादि द्रव्यं, वसा, तैलं, स्नेहः.

CANDOUR, *s.* सरलता, दाक्षिण्यं, शुचिता, अमाया, ऋजुता, मत्यता, सत्यवादित्वं, विमलात्मता, मनोनिर्म्मलत्वं, निर्व्यलीकता, औदार्य्यं, सुशीलता.

To CANDY, *v. a.* (To form into congelations) खण्डीकृ, खण्डमोदाकारं -रां -रं or उपलाकारं कृ, घनीकृ or सान्द्रीकृ or संहतीकृ, श्यै in caus. (श्यापयति -यितुं).

To CANDY, *v. n.* (To grow congealed) खण्डीभू, खण्डमोदकवद् घनीभू or सान्द्रीभू, उपलाकारः -रा -रं भू, श्यै (c. 1. श्यायते, श्यातुं).

CANDY, *s.* (Sugar) खण्डमोदकः, खण्डः, उपला, शुक्लोपला, माक्षिकशर्करा, शर्करा, दृढगात्रिका.

CANE, *s.* वेतसः, वेणुः *m.*, वेत्रः, वेत्रं, वंशः, कीचकः, वानीरः; 'made of cane,' वैणवः -वी -वं, वेत्रकः -की -कं, वैदलः -ली -लं; 'a worker in cane,' वेणुच्छेदनजीवी *m.* (न्), वैदलकारः; 'a blow with a cane,' वेत्राघातः, वेत्रेण आघातः.—(A stick) यष्टिः *m. f.*, दण्डः; 'a cane stick,' वेणवी यष्टिः.—(Sugar-cane) इक्षुः *m.*, इक्षुयष्टिः *m.*, इक्षुदण्डः.—(Cane-chair) वेत्रासनं.

To CANE, *v. a.* (To beat with a cane) दण्डेन or वेत्रेण or यष्टिना हन् (c. 2. हन्ति, हन्तुं) or तड् (c. 1. ताडयति -यितुं), वेत्राघातं कृ.

CANICULAR, *a.* (Belonging to the dog star) कुक्कुराख्यनक्षत्रसम्बन्धी -न्धिनी -न्धि (न्).

CANINE, *a.* कुक्कुरसम्बन्धकः -का -कं, कुक्कुरीयः -या -यं, शौवः -वी -वं.

CANISTER, *s.* (A basket) पिटकः, करण्डः.—(A tin-box) त्रापुषपात्रं

CANKER, *s.* (A corroding sore) गलितक्षतं, विद्रधिः *m.*, नालीव्रणः.—(A worm that destroys fruits) फलनाशकः कीटः.—(Any thing that corrupts or corrodes) कलङ्कः, विषं, दूषकः, गरः.—(Corrosion, consuming) दूषणं, विलयः, विलयनं, क्षयः, नाशः, विनाशः.—(Virulence) विषालुता, सगरता.

To CANKER, *v. a.* (To corrupt, corrode) दुष् in caus. (दूषयति -यितुं), कलङ्क (nom. कलङ्कयति -यितुं), विली in caus. (-लापयति -यितुं), विनश् in caus. (-नाशयति -यितुं), क्षि in caus. (क्षययति -यितुं), मृ in caus. (मारयति -यितुं).

To CANKER, *v. n.* (To grow corrupt) दुष् (c. 4. दुष्यति, दोष्टुं), प्रदुष्, विली (c. 4. -लीयते -लेतुं), विपसम्पर्कात् or विषसंसर्गात् क्षी in pass. (क्षीयते), गल् (c. 1. गलति, गलितुं), विगल्.

CANKER-BIT, *a.* विषाक्तदन्तेन दष्टः -ष्टा -ष्टं or दंशितः -ता -तं.

CANKERED, *p. p.* कलङ्कितः -ता -तं, दूषितः -ता -तं, विषाक्तः -क्ता -क्तं, गरली -लिनी -लि (न्).—(In disposition) प्रतीपः -पा -पं, दुःशीलः -ला -लं, विषहृदयः -या -यं.

CANNABINE, *a.* शाणः -णी -णं, भाङ्गीनः -ना -नं, शणसूत्रमयः -यी -यं.

CANNIBAL, *s.* पुरुषादः, नृजग्धः, नरभुक् *m.* (ज्), मनुष्यभोजी *m.* (न्), अस्रपः, पिशिताशः, क्रव्याशी *m.* (न्), आममांसाशी *m.* (न्), राक्षसः.

CANNIBALISM, *s.* नृजग्धत्वं, क्रव्याशिता, मनुष्यभोजित्वं.

CANNON, *s.* अन्तरग्निबलेन लोहगुलिकाप्रक्षेपणं युद्धयन्त्रं, बृहद्गोलप्रक्षेपार्थं सुषिरयन्त्रं, गोलासनं, गुलिप्रक्षेपणी बृहल्लोहनाडिः *f.*

To CANNONADE, *v. a.* पूर्वोक्तेन यन्त्रेण मृद् (c. 9. मृद्नाति, मर्द्दितुं) or प्रमृद्.

CANNON-BALL, *s.*, रणगुलिः *f.*, रणगोलः, गुलिः *f.* -ली, अयोगुडः, पूर्व्वोक्तबृहन्नाडेः प्रक्षेपणीयो लोहगोलकः, दूरवेधिनी गुलिका, आग्नेयास्त्रं.

CANNONEER, *s.* पूर्व्वोक्तयन्त्रेण मर्द्दी *m.* (न्) or विमर्द्दी, रणगुलिप्रक्षेपकः, रणगोलासः, आग्नेयास्त्रप्रक्षेपकः.

CANOE, *s.* वृक्षस्य खातस्कन्धनिर्म्मिता क्षुद्रनौका, लघुनौका.

CANON, *s.* (A rule, a law) विधिः *m.*, नियमः, सूत्रं, व्यवस्था, शास्त्रं, रीतिः *f.*—(Ecclesiastical law) पौरोहितधर्म्मशास्त्रं, धर्म्माध्यक्षसमाजेन व्यवस्थापिता धर्म्मसंहिता, पौरोहित्यसम्बन्धि स्मृतिशास्त्रं, याजकीयधर्म्मशास्त्रं.—(The received books of Holy Scripture) धर्म्ममूलं, धर्म्मपुस्तकसंहिता, धर्म्मनिदर्शनं.—(A dignitary of a Cathedral) महापूजाशालासम्बन्धीयमठे गुरुः or सभासद्, महाभजनप्रासादे प्रधानपुरोहितः, महापूजाशालायां मुख्यधर्म्माध्यापकः.

CANONESS, *s.* पूर्व्वोक्तपुरोहितव्यवहारानुसारिणी स्त्री or नारी.

CANONICAL, *a.* वैधिकः -की -कं, नैयमिकः -की -कं, शास्त्रीयः -या -यं, धर्म्मशास्त्रीयः -या -यं, रीत्यनुसारी -रिणी -रि (न्), व्यावहारिकः -की -कं, पौरोहितधर्म्मानुरूपः -पा -पं.

CANONICALLY, *adv.* विधिवत्, शास्त्रवत्, विधितस्, शास्त्रतस्, विधिपूर्व्वकं, रीतिपूर्व्वकं, नियमपूर्व्वकं, यथाविधि, यथाशास्त्रं, पौरोहितधर्म्मानुसारेण, याजकीयस्मृतिशास्त्रक्रमेण.

CANONICALS, *s. pl.* धर्म्माध्यापकलाक्षणिकं वस्त्रादि, पुरोहितवेशः, याजकवेशः.

CANONIST, *s.* पौरोहितधर्म्मशास्त्रज्ञः, पुरोहितव्यवहारपण्डितः, याजकीयधर्म्मशास्त्रज्ञः.

CANONIZATION, *s.* सिद्धानाम् मध्ये आरोपणं, अमुकसाधुजनः सिद्धिं प्राप्तवान् इति घोषणापत्रेण विज्ञापनं.

To CANONIZE, *v. a.* सिद्धलोकमध्ये आरुह् in caus. (-रोपयति -यितुं), अमुकसाधुजनः सिद्धानां मध्ये विगणनीय इति घोषणापत्रेण विज्ञा in caus. (-ज्ञापयति -यितुं).

CANONIZED, *p. p.* सिद्धलोकारोपितः -ता -तं, सिद्धानां मध्ये संख्यातः -ता -तं.

CANONRY or CANONSHIP, *s.* पूर्व्वोक्तपुरोहितसम्बन्धि पदं or वर्त्तनं.

CANOPIED, *p. p.* वितानीकृतः -ता -तं, वितानाच्छादितः -ता -तं.

CANOPY, *s.* वितानं -नकं, चन्द्रातपः, उल्लोचः, आच्छादनं, पिधानं, व्यवधा.

To CANOPY, *v. a.* वितानीकृ, चन्द्रातपेन आच्छद् (c. 10. -छादयति -यितुं).

CANOROUS, *a.* सुस्वरः -रा -रं, सुघारुस्वनः -ना -नं, स्वरयुक्तः -क्ता -क्तं.

CANT, *s.* (A technical form of speaking) परिभाषा, लाक्षणिकवाक्यं, कल्पितवाक्यं, कल्पितसंज्ञा, रचितवाक्यं.—(A corrupt dialect) भ्रष्टभाषा, अपभाषा, कुभाषा, अपशब्दः.—(A whining pretension to goodness) सन्तर्दुष्टस्य धर्म्मध्वजीकरणार्थं सद्वाक्यमात्रं, साधुवाङ्मात्रं, दम्भोक्तिः *f.*, दाम्भिकवचनं, धर्म्मोपदेशकवाक्यं, निःसत्यवाक्यं, वैलक्ष्यवचनं, वाक्छलं, छाद्मिकवचनं.

To CANT, *v. n.* (To talk in technical language) परिभाष् (c. 1. -भाषते -भाषितुं), लाक्षणिकवाक्यं or रचितवाक्यं वद् (c. 1. वदति, वदितुं).—(To speak hypocritically) धर्म्मध्वजीकरणार्थं or धर्म्मोपदेशमात्रात् सज्जन इव वद्, दम्भार्थं स्वव्यवहारविरुद्धं सद्वाक्यमात्रं वद्.

CANTATION, *s.* (The act of singing) गानं, गीतिः *f.*, गीतं, गानकरणं.

CANTEEN, *s.* सैन्यानां प्रस्थानकाले मद्यशुण्डादिधारणयोग्यं त्रापुषभाण्डं.

CANTER, *s.* (Pace of a horse) अर्द्धपुलायितं, अर्द्धवल्गितं, विक्रान्तिः *f.*—(A canting hypocrite) दम्भार्थं वादी *m.* (न्), वाङ्मात्रेण धार्म्मिकः, दाम्भिकः, छद्मतापसः, धर्म्मध्वजी *m.* (न्), आर्य्यलिङ्गी *m.* (न्), साधुम्मन्यः.

To CANTER, *v. n.* अर्द्धपुलायितेन or अर्द्धवल्गितेन चल् (c. 1. चलति, चलितुं).

CANTHARIDES, *s. pl.* त्वक्स्फोटोत्पादका विदेशीयमक्षिकाप्रभेदाः.

CANTHUS, *s.* (Corner of the eye) अपाङ्गः -ङ्गकं, नयनोपान्तः, नेत्रपर्य्यन्तः.

CANTICLE, *s.* उपगीतं, उपगानं, ईषद्गीतं, काव्यबन्धः.—(Book of the Bible) सुलेमान्नाम्ना राज्ञा रचितं धर्म्मग्रन्थानां मध्ये गणितं गीतं.

CANTLE or CANTLET, *s.* (A piece) खण्डं, भिन्नं, भागः, विभागः, शकलं.

CANTO, *s.* अध्यायः, सर्गः, पर्व्व *n.* (न्), परिच्छेदः, विच्छेदः, स्कन्धः, खण्डः -ण्डं, उच्छ्वासः, काण्डः, परिवर्त्तः.

CANTON, *s.* मण्डलं, उपमण्डलं, चक्रं, भूप्रदेशः, भूमिभागः, भूभागः, देशः.

To CANTON, *v. a.* (To divide into parts) खण्डशस् or भागशस् or खण्डं खण्डं विभज् (c. 1. -भजति -भक्तुं) or परिकॢप् (c. 10. -कल्पयति -यितुं) or व्यंश् (c. 10. -अंशयति -यितुं).—(To canton a town for soldiers) नगरे स्वं स्वम् आवासं सैन्यानां कॢप् (c. 10. कल्पयति -यितुं).

CANTONMENT, *s.* सैन्यावासः, नगरे पृथक् पृथक् परिकल्पितं सैन्यनिवासस्थानं.—(Camp) कटकः, शिबिरं.

CANVASS, *s.* (A coarse cloth) शाणं, शाणवस्त्रं, पटः, पटी, स्थूलपट्टं, स्थूलशाटिः *m.*—(Sails of a ship) वातवसनं.—(Solicitation upon an election) अमुकपदप्रेप्सया परसम्मतप्रार्थनं.

To CANVASS, *v. a.* (To sift, examine) परीक्ष् (c. 1. -ईक्षते -ईक्षितुं), निरूप् (c. 10. -रूपयति -यितुं), अनुसन्धा (c. 3. -दधाति -धातुं).—(To debate) विचर् in caus. (-चारयति -यितुं), तर्क् (c. 10. तर्कयति -यितुं), वितर्क्.

To CANVASS, *v. n.* (To solicit votes) अमुकपदप्रेप्सया परेषां सम्मतं or आश्रयं or आग्रहं or अनुपालनं or संवर्द्धनं प्रार्थ् (c. 10. -अर्थयते -यितुं).

CANVASSER, *s.* प्रार्थकः, अर्थी *m.* (न्), अमुकपदप्रेप्सुः *m.*, पराश्रयप्रार्थकः.

CANY, *a.* वेतस्वान् -स्वती -स्वत् (त्), वैत्रकः -की -कं, वैदलः -ली -लं, वैणवः -वी -वं.

CANZONET, *s.* (A little song) उपगीतं, उपगानं, गीतकः, ईषद्गीतं.

CAP, *s.* शिरोवेष्टः -ष्टनं, शिरस्कं, शिरस्त्रं, शिरस्त्राणं, शिरोवस्त्रं, मस्तकाभरणं.

To CAP, *v. n.* (To take off the cap in salutation) मस्तकम् उच्छाद्य or शिरस्कम् उन्नम्य अभिवद् (c. 10. -वादयति -ते -यितुं); अभिवादनार्थं शिरस्त्रम् अवतॄ in caus. (-तारयति -यितुं), or अवमुच् (c. 6. -मुञ्चति -मोक्तुं).

To CAP, *v. a.* (To cover) पिधा (c. 3. -दधाति -धातुं), सपिधानं -ना -नं कृ; 'to cap verses,' प्रतिमालां कृ.

CAPABILITY, *s.* शक्यत्वं, शक्तिः *f.*, शक्तता, सामर्थ्यं, समर्थता, क्षमता, उपयोगिता, योग्यता, युक्तिः *f.*, पात्रता, सामञ्जस्यं; 'of acting,' क्रियाशक्तिः *f.*

CAPABLE, *a.* (Having powers equal to any thing) क्षमः -मा -मं, समर्थः -र्था -र्थं, शक्तः -क्ता -क्तं, योग्यः -ग्या -ग्यं, उचितः -ता -तं; 'capable of building a house,' गृहकरणे शक्तः; 'capable of a journey,' अध्वनि क्षमः; 'capable of toils,' क्लेशानाम् उचितः; 'capable of being done,' शक्यः -क्या -क्यं; 'to be capable of,' शक् (c. 5. शक्नोति or pass. शक्यते), क्षम् (c. 1. क्षमते), उत्सह् (c. 1. -सहते) with inf.; कॢप् (c. 1. कल्पते), उपकॢप्; 'I am not capable of leaving thee,' त्वाम् उत्स्रष्टुं नोत्सहे; 'he is rendered capable of immortality,' अमृतत्वाय कल्पते.—(Qualified, competent) उपयुक्तः -क्ता -क्तं, पात्रिकः -का -कं.—(A competent person) पात्रं, सत्पात्रं.—(One endowed with good qualities, intelligent) गुणवान् -वती -वत् (त्), बुद्धिमान् -मती -मत् (त्), कृती -तिनी -ति (न्).—(Capable of holding) धारणक्षमः -मा -मं, आदानयोग्यः -ग्या -ग्यं.

CAPACIOUS, *a.* विशालः -ला -लं, विस्तीर्णः -र्णा -र्णं, विस्तृतः -ता -तं, पृथुः -थुः -थु, विवृतः -ता -तं, विपुलः -ला -लं, उरुः -रुः -रु, प्रमृतः -ता -तं, प्रस्थः -स्था -स्थं.

CAPACIOUSNESS, *s.* विशालता, विस्तीर्णता, पृथुता, परिसरः, उरुत्वं.

To CAPACITATE, *v. a.* क्षमीकृ, उपयुक्तं -क्तां -क्तं कृ, उपयोगित्वं दा (c. 3. ददाति, दातुं).

CAPACITY, *s.* (Size) परिमाणं.—(Power of holding) धारणशक्तिः *f.*, कोष्ठः.—(Room) प्रसरः, विस्तृतिः *f.*, विस्तारः.—(Power of the mind) धीशक्तिः *f.*, बुद्धिपात्रता.—(Power, ability, fitness) शक्तिः *f.*, सामर्थ्यं, बलं, योग्यता, उपयुक्तता, उपयोगित्वं, पात्रता; 'according to one's capacity,' यथाशक्ति, यथासामर्थ्यं, यथाबलं; 'beyond one's capacity,' अतिशक्ति.—(State, profession) भावः, दशा, अवस्था, वृत्तिः *f.*

CAP-À-PIÉ or CAP-À-PIE, अङ्गप्रत्यङ्गं, मस्तकात्प्रभृति पादपर्य्यन्तं, सर्व्वाङ्गं.—(Completely armed) संवर्म्मितः -ता -तं.

CAPARISON, *s.* (Of a horse or elephant) आस्तरः -रणं, परिष्टोमः, वर्णः, जयनं, सज्जा, अश्वसज्जा, अश्वपरिधानं, प्रखरः.

To CAPARISON, *v. a.* परिष्टोमं or आस्तरं परिधा (c. 3. -दधाति -धातुं), सज्जीकृ.

CAPARISONED, *p. p.* परिष्टोमभूषितः -ता -तं, सज्जितः -ता -तं, जयनयुक् *m. f. n.* (ज्).

CAPCASE, *s.* लघुवस्त्राधारः, भाण्डं, समुद्गः -द्गकः, सम्पुटः.

CAPE, *s.* (Promontory) अन्तरीपः -पं, नासारूपेण समुद्रमध्ये प्रलम्बो भूमिभागः, समुद्रमध्ये उदग्रा गिरिनासिका, स्थलाभोगः.—(Neck-piece of a cloak) ग्रीवाप्रच्छदः, स्कन्धप्रच्छदः, स्कन्धप्रावरणं, उत्तरप्रच्छदः.(A small cloak) अरत्निपर्य्यन्तं लम्बमानः क्षुद्रप्रावारः.

CAPER, *s.* (A jump) प्लुतं, प्लवः, कम्पः, वल्गितं, उत्फालः, लङ्घनं, नर्त्तनं.—(A kind of pickle) सन्धितविशेषः.

To CAPER, *v. n.* प्लु (c. 1. प्लवते, प्लोतुं), नृत् (c. 4. नृत्यति, नर्त्तितुं), वल्ग् (c. 1. वल्गति, वल्गितुं), उत्पत् (c. 1. -पतति -पतितुं).

CAPILLAMENT, *s.* केशरः, केसरः, पक्ष्म *n.* (न्), किञ्जल्कः, किञ्जल्कः.

CAPILLARY, *a.* (Resembling hair) केशोपमः -मा -मं, कैशिकः -की -कं, केशरी -रिणी -रि (न्).—(Minute) सूक्ष्मः -क्ष्मा -क्ष्मं, कणीकः -का -कं.

CAPILLARY, *s.* सूक्ष्मतृणाकारदलविशिष्ट ओषधिभेदः.—(Vein) सूक्ष्मनाडिः.

Capital, *a.* (Relating to the head) मस्तकसम्बन्धी -न्धिनी -न्धि (न्). —(Chief, principal) परमः -मा -मं, मुख्यः -ख्या -ख्यं, उत्तमः -मा -मं, अग्र्यः -ग्र्या -ग्र्यं, विशिष्टः -ष्टा -ष्टं, श्रेष्ठः -ष्ठा -ष्ठं, प्रधानः in comp. —(Criminal in the highest degree, worthy of death) महापातकी -किनी -कि (न्), वधार्हः -र्हा -र्हं, वधदण्ड्यः -ण्ड्या -ण्ड्यं; 'a capital crime,' महापातकं, महापापं.—(A capital city) पुरोत्तमः, *see* the next.—(Capital punishment) वधदण्डः, उत्तमसाहसं, प्राणहननं, प्राणदण्डः.—(Capital stock) मूलद्रव्यं.

Capital, *s.* (In money, &c.) मूलं, मूलधनं, मूलद्रव्यं, नीवी -विः *f.*, परिपणं.—(A capital city) राजधानं -नी, स्कन्धावारः, कर्वटः -टं, खर्वटः -टं.—(A large letter) वृहदक्षरं, महाक्षरं.—(Top of a pillar) स्तम्भशीर्षं, स्तम्भाग्रं, स्तम्भशृङ्गं.

Capitalist, *s.* कोटीश्वरः, मूलधनाढ्यः, धनाढ्यः, धनवान् *m.* (त्), कोषवान् *m.* (त्), सधनः, वित्तवान् *m.* (त्).

Capitally, *adv.* उत्तमसाहसेन, प्राणदण्डेन, परमं, उत्तमप्रकारेण.

Capitation, *s.* मस्तकसंख्या, शरीरगणना, व्यक्तितः परिसंख्या, प्रत्येकं or एकशस् or एकतम or एकैकशस् or पृथक् पृथक् संख्यानं or परिगणना.

Capitol, *s.* रोमनगरे पूजितस्य युपितराख्यस्य आदिदेवस्य प्रासादः.

Capitular, *s.* (The statutes of the chapter of a cathedral) महाभजनप्रासादे सङ्घसभासद्भिर् विहिता व्यवस्थासंहिता.—(A member of the chapter) महाभजनप्रासादे सभासद् *m.*, महापूजाशालासम्बन्धीयमठे सभासद्.

Capitular, *a.* पूर्व्वोक्तमठव्यवस्थासम्बन्धी -न्धिनी -न्धि (न्).

To capitulate, *v. n.* (To surrender on certain stipulations) समयं or नियमं कृत्वा शत्रुवशे or शत्रुहस्ते or शत्रोरधिकारे परादा (c. 3. -ददाति -दातुं) or प्रदा, or सम्प्रदा or सम् in caus. (-अर्पयति -यितुं) or शत्रोरधीनः -ना -नं भू or शत्रोर् वशीभू.—(To draw up any thing in heads) मार्गेषु निबन्ध् (c. 9. -बध्नाति -बन्द्धुं) or रच् (c. 10. रचयति -यितुं), सम्प्रवच् (c. 2. -वक्ति -वक्तुं), समासतस् or सङ्क्षेपतस् लिख् (c. 6. लिखति, लेखितुं).

Capitulation, *s.* (Surrendering on certain stipulations) नियमपूर्व्वकं परादानं or सम्प्रदानं or प्रदानं or समर्पणं.—(Reduction to heads) मार्गेषु निबन्धनं or रचना, समासतो लिखनं.

Capitulator, *s.* नियमपूर्व्वकं परादाता *m.* (तृ) or सम्प्रदाता *m.* (तृ), समयकर्त्ता *m.* (र्त्तृ).

Cap-maker, *s.* शिरस्त्रकारी *m.* (न्), शिरोवेष्टनकृत्, मस्तकाभरणविक्रेता *m.* (तृ).

Capon, *s.* छिन्नवृषणः कुक्कुटः, वृषणहीनः कृकवाकुः *m.*

Capot, *s.* पिकेटाख्यायां क्रीडायां सर्व्वद्यूतपत्राणां निर्जयः or स्वीकरणं.

To capot, *v. a.* पूर्व्वोक्तक्रीडायां सर्व्वद्यूतपत्राणि निर्जि (c. 1. -जयति -जेतुं) or स्वीकृ.

Capouch, *s.* (A monk's hood) सन्न्यासिभिर् भृतं शिरःपिधानं.

Caprice, *s.* मनोलौल्यं, लौल्यं, चापलं, निर्बन्धः, असद्ग्रहः *m.*, असद्ग्रहः, स्वाटिः *f.*

Capricious, *a.* चपलः -ला -लं, चञ्चलः -ला -लं, लोलः -ला -लं, अस्थिरः -रा -रं, सङ्कसुकः -का -कं, चञ्चलहृदयः -या -यं, लोलचेताः -ताः -तः (स्), चलचित्तः -त्ता -त्तं, चपलात्मकः -का -कं, प्रकृतितरलः -ला -लं, नैकभावाश्रयः -या -यं, असद्ग्राहः -ग्रा -यं.

Capriciously, *adv.* मनोलौल्येन, चापल्येन, चाञ्चल्येन, लोलचेतसा.

Capriciousness, *s.* चापल्यं, चपलता, चाञ्चल्यं, चञ्चलता, अस्थिरता, चलता हृदयचाञ्चल्यं, चलचित्तता, चित्ततरलता.

Capricorn, *s.* (Sign of the zodiac) मकरराशिः *m.*, मकरः.

Capriole, *s.* अश्वप्लुतं, तुरङ्गवल्गितं, अश्वस्य गतिविशेषः.

Capstan, *s.* गुरुभाराकर्षणार्थं यष्टिभिः सञ्चारितं चक्रयन्त्रं.

Capsular, capsulary, *a.* वीजकोशाकारः -रा -रं, पुटाकारः -रा -रं.

Capsulated, *a.* कोशस्थः -स्था -स्थं, कोशपरिगतः -ता -तं.

Capsule, *s.* वीजकोशः, वीजगुप्तिः *f.*, कोषः, पुटः, सिम्बा.

Captain, *s.* (In the army) सैन्याधिपतिः *m.*, सैन्याध्यक्षः, व्यूहपतिः *m.*, गुल्मपतिः, योधमुख्यः, दण्डनायकः, सेनानीः *m.*—(Of a ship) नौकाधिपतिः *m.*, नौकाधिष्ठाता *m.* (तृ), पोताध्यक्षः, नौपतिः.—(Any chief) मुख्यः, नायकः, नेता *m.* (तृ), पुरोगः -गमः, अग्रगः.

Captainship, *s.* सैन्याधिपतिपदं, नौकाध्यक्षाधिकारः, नेतृत्वं, मुख्यत्वं.

Captation, *s.* (Courting favour) लोकरञ्जनं, लोकानुरञ्जनं, लोकसेवनं, लोकप्रशंसासेवनं, जनप्रसादलिप्सा.

Caption, *s.* (Seizure of person) आसेधः.—(Overreaching) प्रलम्भः प्रतारणं छलं.

Captious, *a.* (Censorious) छिद्रान्वेषी -षिणी -षि (न्), छिद्रानुसारी -रिणी -रि (न्), घृणी -णिनी -णि (न्), दोषग्राही -हिणी -हि (न्), विवादशीलः -ला -लं, ऊहापोहशीलः -ला -लं.—(Fallacious, insidious) मोही -हिनी -हि (न्), भ्रान्तिकरः -री -रं.

Captiously, *adv.* विवादार्थं, विवादमात्रवाञ्छया, छिद्रान्वेषिवत्, ऊहापोहशीलत्वात्, घृणया.

Captiousness, *s.* छिद्रान्वेषिता, विवादशीलता, घृणा, दोषग्राहित्वं, ऊहापोहशीलता.

To captivate, *v. a.* (To bring into bondage) वशीकृ, वन्दीकृ, दासीकृ, करदीकृ, दम् in caus. (दमयति -यितुं).—(To charm) वशीकृ, चित्तं or मनो हृ (c. 1. हरति, हर्त्तुं) or अपहृ, हृदयं ग्रह् (c. 9. गृह्णाति, ग्रहीतुं), मुह् in caus. (मोहयति -यितुं).

Captivated, *p. p.* वशीकृतः -ता -तं, वशीभूतः -ता -तं, वशतापन्नः -न्ना -न्नं.

Captivating, *a.* मनोहरः -रा -रं, चित्तहारी -रिणी -रि (न्), चित्तापहारी -रिणी -रि (न्), हृदयग्राही -हिणी -हि (न्), मोहनः -ना -नी -नं, मोही -हिनी -हि (न्).

Captivation, *s.* वशीकरणं, ग्रहणं, बन्धनं, दासीकरणं, वन्दीकरणं.

Captive, *a.* वन्दीकृतः -ता -तं, दासीभूतः -ता -तं, शत्रुधृतः -ता -तं, शत्रुवशः -शा -शं, शत्रुग्रस्तः -स्ता -स्तं, कारास्थितः -ता -तं, कारागुप्तः -प्ता -प्तं, ग्रहणः -णा -णं.

Captive, *s.* वन्दिः *f.*, वन्दी, शत्रुधृतः, कारास्थः, कारागुप्तः, ग्रहणः, उपग्रहः, प्रग्रहः, करदः, कपरकी; 'taken alive,' जीवग्राहः.—(Slave) दासः; 'to take captive,' वन्दीकृ, दासीकृ.—(One charmed by beauty, &c.) वशीभूतः, मोहितः.

Captivity, *s.* बन्धनं, वन्दिभावः, कारागोपनं, वशित्वं, वश्यता, शत्रुवशिता.—(Servitude) दासत्वं, दास्यं, दासभावः.

Captor, *s.* वन्दीकर्त्ता *m.* (र्त्तृ), ग्राहकः, जेता *m.* (तृ), लोप्त्रकृत्.

Capture, *s.* (The act of taking) ग्रहणं; 'capture of a fort,' दुर्गलङ्घनं, दुर्गभङ्गः.—(The prize taken) लोप्त्रं, लोत्रं; 'capture of cattle,' गोग्रहः.

To capture, *v. a.* ग्रह् (c. 9. गृह्णाति, ग्रहीतुं), वन्दीकृ, दासीकृ, करदीकृ; 'to capture a fort,' दुर्गं भञ्ज् (c. 7. भनक्ति, भंक्तुं) or लङ्घ् (c. 10. लङ्घयति -यितुं).

Capuchin, *s.* रोमीयमतस्थः सन्न्यासिविशेषः.

Caput mortuum, *s.* मलं, खलं, किट्टं, कल्कं, विनीयः, शेषं.

Car, *s.* रथः, चक्रयानं, गन्त्री, गन्त्रीरथः, शकटः; 'of the gods,' विमानः -नं; 'war-car,' स्यन्दनः, शताङ्गः; 'pleasure-car,' क्रीडारथः,

पुष्परथः; 'a covered car,' कर्णीरथः, ह्यनं, प्रवहणं; 'multitude of cars,' रथ्या, रथकट्या; 'car-maker,' रथकारः.

CARABINE or CARBINE, *s.* (A short gun used by the light horse) सङ्ग्रामसमये अश्वारूढैर् भृता सीसकगोलकप्रक्षेपणी बाहुपरिमाणा लोहनाडिः.

CARABINEER, *s.* पूर्व्वोक्तशस्त्रधारी हयारूढः, पूर्व्वोक्तशस्त्रभृत्.

CARACK, *s.* (A large ship of burthen) भारवाहिनी बृहन्नौका.

CARACOLE, *s.* तिर्य्यक्प्लुतं, तिर्य्यग्वल्गितं, वक्रगतिः *f.*, कुटिलगतिः, अर्द्धचन्द्राकारा तुरङ्गगतिः.

To CARACOLE, *v. a.* तिर्य्यक् प्लु (c. 1. प्लवते, प्लोतुं) or वल्ग् (c. 1. वल्गति, वल्गितुं), अश्ववद् वक्रगत्या or अर्द्धचन्द्राकारगत्या चल् (c. 1. चलति, चलितुं).

CARAT, CARACT, *s.* (A weight of four grains) रक्तिकाद्वयसम उन्मानविशेषः.—(Manner of expressing the fineness of gold) स्वर्णकारभाषायां सुवर्णनिर्म्मल्यवाचिकः शब्दः.

CARAVAN, *s.* सार्थः, पथिकसन्ततिः *f.*, यात्रा, यात्रिकसङ्घः, सार्थवाहसमूहः, समध्वगनिवहः.

CARAVANSARY, *s.* पथिकाश्रयः, पथिकावासस्थानं, सार्थवाहानाम् उत्तरणस्थानं, उपकारी.

CARAWAY or CARWAY, *s.* अजमोदा, क्षुद्रबीजप्रभेदः स च पिष्टकापूपादिना कदापि संसृज्यते.

CARBONADO, *s.* भर्ज्जनार्थं छिन्नमांसं or व्यवच्छिन्नमांसं, भर्ज्जनयोग्यं विनिकृत्तमांसं.

To CARBONADO, *v. a.* भर्ज्जनार्थं मांसं व्यवछिद् (c. 7. -छिनत्ति -छेत्तुं) or विनिकृत् (c. 6. -कृन्तति -कर्त्तितुं) or विशस् (c. 1. -शसति -शसितुं).

CARBUNCLE, *s.* (Swelling) व्रणः -णं, विस्फोटः, स्फोटः. गण्डः.—(Jewel) पद्मरागः, सर्पमणिः.

CARBUNCLED, *a.* (Having swellings) व्रणी -णिनी -णि (न्).—(Set with the jewel) पद्मरागमयः -यी -यं, सर्पमणिकरञ्जितः -ता -तं.

CARCANET, *s.* (A chain or necklace of jewels) रत्नावलिः *f.*, मणिमाला, मुक्तावली.

CARCASS, *s.* (A dead body) शवः -वं, मृतशरीरं, मृताङ्गं, मृतकं, कुणपः -पं.—(The remains, ruins) शेषभागः, जीर्णभागः.

CARCELAGE, *s.* (Prison fees) काराध्यक्षशुल्कं, कारारक्षकेण गृहीतं शुल्कं.

CARCERAL, *a.* कारासम्बन्धी -न्धिनी -न्धि (न्), बन्धनालयसम्बन्धकः -का -कं.

CARD, *s.* (A painted paper used in games of chance) क्रीडापत्रं, द्यूतपत्रं, चित्रितद्यूतपत्रं.—(The paper on which the points of the compass are marked under the needle) दिग्विदिगङ्कितं पत्रं.—(The instrument for combing wool, flax, &c.) ऊर्णाशणादिमार्ज्जनार्थं लोहदन्तयुक्तं यन्त्रं, ऊर्णामार्ज्जनी, ऊर्णानिर्घर्षणयन्त्रं.

To CARD, *v. a.* (To comb wool) पूर्व्वोक्तयन्त्रेण ऊर्णां सम्मृज् (c. 2. -मार्ष्टि -मार्ष्टुं) or निर्घृष् (c. 1. -घर्षति -घर्षितुं).

CARDAMOM, *s.* (Large) एला, एलीका, पृथ्वीका, चन्द्रवाला, निष्कुटिः *f.*, बहुला.—(Small) तुत्था, त्रिपुटा, त्रुटिः *f.*, कोरङ्गी, कुञ्चिका.

CARDER, *s.* (One that cards wool) ऊर्णामार्ज्जकः, ऊर्णानिर्घर्षकः.—(One that plays much at cards) द्यूतपत्रक्रीडासक्तः.

CARDIACAL, CARDIAC, *a.* तेजस्करः -री -रं, दीपनः -ना -नं, अग्निदः -दा -दं.

CARDINAL, *a.* (Chief) परमः -मा -मं, मुख्यः -ख्या -ख्यं, उत्तमः -मा -मं, श्रेष्ठः -ष्ठा -ष्ठं, विशिष्टः -ष्टा -ष्टं, अग्र्यः -ग्र्या -ग्र्यं, प्रधान: in comp.

CARDINAL, *s.* रोमनगरे महाधर्म्माध्यक्षसमाजे सभासद्, रोमीयमतधारिणां मध्ये धर्म्माधिपतिः *m.*

CARDINALATE or CARDINALSHIP, *s.* पूर्व्वोक्तधर्म्माधिपतेः पदं or अधिकारः.

CARDINAL-POINT, *s.* उत्तरदिक्, पूर्व्वदिक्, पश्चिमदिक्, दक्षिणदिक् *f.* (श्).

CARDMATCH, *s.* (Game at cards) द्यूतपत्रक्रीडा, चित्रितपत्रद्यूतं.

CARE, *s.* (Anxiety) चिन्ता, चित्तोद्वेगः, चित्तवेदना, मनोदुःखं, मनस्तापः, आधिः *m.*, चर्च्चा, औत्सुक्यं, उद्वेगः -जनं, चिन्ताभारः, मानसी व्यथा; 'cares of this world,' सांसारिकी चिन्ता.—(Diligence, pains) प्रयत्नः, यत्नः, व्यवसायः, आस्था; 'with care,' प्रयत्नतस्.—(Regard, attention) अवेक्षा, अपेक्षा, मनःप्रवेशः, मनोयोगः.—(Caution, heed) अवधानं, अप्रमादः; 'to take care,' अवधा (c. 3. -धत्ते -धातुं), सावधानः -ना -नं भू.—(Heed, in order to, protection) गुप्तिः *f.*, रक्षणं, रक्षा, पालनं; 'to take care of, protect,' रक्ष् (c. 1. रक्षति, रक्षितुं), पाल् (c. 10. पालयति -यितुं), गुप् (c. 1. गोपायति, गोप्तुं).—(The object of care) रक्षणीयः -या -यं, अपेक्षाभूमिः *f.*—(Care and management) योगक्षेमः.

To CARE, *v. n.* (To care for, concern one's self about) अपेक्ष् (c. 1. -ईक्षते -ईक्षितुं), अवेक्ष्, चिन्त् (c. 10. चिन्तयति -यितुं), अनुचिन्त्, सेव् (c. 1. सेवते, सेवितुं), भज् (c. 1. भजति -ते, भक्तुं), मनो धा (c. 3. दधाति, धातुं) with loc.

CARE-CRAZED, *a.* चिन्ताव्याकुलः -ला -लं, चिन्ताकुलः -ला -लं, चिन्ताव्यग्रः -ग्रा -ग्रं.

To CAREEN, *v. a.* (To calk) दारुजीर्णत्वाद् दारुस्फोटनाद् वा नौकां पार्श्वे पर्य्यस्य छिद्राणि पिधा (c. 3. -दधाति -धातुं).

CAREER, *s.* (A race-ground) धावनस्थानं, चर्य्यास्थानं.—(A race) चर्य्या, मार्गः, पणलाभार्थं धावनं.—(Course of action, &c.) गतिः *f.*, मार्गः, क्रियाप्रसङ्गः, प्रसरः, पर्य्यायः, क्रमः, रीतिः *f.*, गमनं, चलनं; 'in full career, at full speed,' परमवेगेन, सरभसं, सर्व्ववेगेन

To CAREER, *v. n.* परमवेगेन धाव् (c. 1. धावति -वितुं), त्वर् (c. 1. त्वरते -रितुं).

CAREFUL, *a.* (Heedful, attentive) सावधानः -ना -नं, अवहितः -ता -तं, कृतावधानः -ना -नं, अप्रमत्तः -त्ता -त्तं, अप्रमादी -दिनी -दि (न्), सयत्नः -त्ना -त्नं, यत्नवान् -वती -वत् (त्), प्रयत्नवान् -वती -वत्.—(Anxious, full of care) चिन्तावान् -वती -वत् (त्), सचिन्तः -न्ता -न्तं, उत्सुकः -का -कं, व्यग्रः -ग्रा -ग्रं.

CAREFULLY, *adv.* सावधानं, सयत्नं, प्रयत्नतस्, यत्नतस्, प्रयत्नेन, प्रयत्नात्, यत्नात्, प्रमादं विना, अप्रमत्तं, प्रमादव्यतिरेकेण.

CAREFULNESS, *s.* अवधानता, सावधानता, सयत्नता, अप्रमादः, अप्रमादित्वं.

CARELESS, *a.* प्रमत्तः -त्ता -त्तं, प्रमादी -दिनी -दि (न्), प्रमादवान् -वती -वत् (त्), अनवहितः -ता -तं, अनवधानः -ना -नं, निरपेक्षः -क्षा -क्षं, असावधानः -ना -नं, असमीक्ष्यकारी -रिणी -रि (न्).—(To be careless of) प्रमद् (c. 4. -माद्यति -मदितुं) with abl.; 'he is careless of his own interest,' स्वहितात् प्रमाद्यति.

CARELESSLY, *adv.* प्रमादेन, प्रमादतस्, सप्रमादं, निरपेक्षं, अनपेक्षया, अवधानं विना, अनवधानेन.—(Implying absence of restraint) निर्यन्त्रणं.

CARELESSNESS, *s.* अनवधानं -नता, असावधानता, प्रमाद्यं, प्रमादः, अनपेक्षा.

To CARESS, *v. a.* आलिङ्ग् (c. 1. -लिङ्गति -लिङ्गितुं), समालिङ्ग्, भज् (c. 1. भजते, भक्तुं), स्वञ्ज् (c. 1. स्वजते, स्वंक्तुं), परिष्वञ्ज्; क्रोडीकृ; परिमृश् (c. 6. -मृशति -मर्ष्टुं), परिरभ् (c. 1. -रभते -रब्धुं), प्रेम कृ.

CARESS, *s.* आलिङ्गितं -ङ्गनं, परिष्वङ्गः, ललितं, क्रोडीकृतिः *f.*, अङ्कपाली, अङ्कपालिः *m.*, परिरम्भः.

CARESSED, *p. p.* आलिङ्गितः -ता -तं, क्रोडीकृतः -ता -तं, परिमृष्टः -ष्टा -ष्टं. परिरब्धः -ब्धा -ब्धं, परिष्वक्तः -क्ता -क्तं, उपगूढः -ढा -ढं.

CARET, *s.* इह किञ्चिद् अधिकं विस्मृतं वा निवेशयितव्यम् इति सूचनार्थं हंसपादाकृति चिह्नं.

CARGO, *s.* नौकाभारः, पोतभारः, पौतिकं, पोतस्थद्रव्यं. पोतस्थं भाण्डं.

CARICATURE, *s.* विकृताकारत्वाद् हास्यजनकं प्रतिमानं or उपमानं, हास्यप्रतिमानं, हास्योपमानं, हास्यचित्रं, विकृतचित्रं, हास्यप्रकारेण or अतिशयेन चित्रितम् आलेख्यं.

To CARICATURE, *v. a.* आकारं or मूर्त्तिं विकृत्य or साचीकृत्य हास्यप्रकारेण चित्र् (c. 10. चित्रयति -यितुं) or आलिख् (c. 6.-लिखति -लेखितुं), हास्यप्रतिमानं कृ, मूर्त्तिविकारपूर्व्वकं प्रतिमूर्त्तिं चित्रे लिखित्वा हास्यभूमिं कृ.

CARICATURED, *p. p.* हास्यप्रकारेण चित्रलिखितः -ता -तं, अङ्गविकारपूर्व्वकम् आलिखितः -ता -तं.

CARICATURIST, *s.* हास्यप्रकारेण उपमाता *m.* (तृ), हास्यप्रतिमानकृत्, हास्यचित्रकर्त्ता *m.* (र्तृ), विकृतप्रतिमानकृत्, यो मूर्त्तिम् चित्रे विकृत्य प्रतिमूर्त्तिं हास्यास्पदं करोति.

CARIES or CARIOSITY, *s.* अस्थिगलितत्वं, अस्थिपूयनं, अस्थिव्यसनं, अस्थिपाकः, अस्थिक्षयः, अस्थिशोषः.—(Of the teeth) दन्तव्यसनं.

CARIOUS, *a.* गलितः -ता -तं, पूयपूर्णः -र्णा -र्णं, क्षीणः -णा -णं, पूतिगन्धः -न्धा -न्धं.

To CARK, *v. n.* (To be anxious) चिन्ताव्याकुलः -ला -लं or चिन्ताव्यग्रः -ग्रा -ग्रं अस्, उत्सुक (nom. उत्सुकायते).

CARLE, *s.* दुर्वृत्तः, दुराचारः, अधमाचारः, कुशीलः, असभ्यः, निकृष्टः.

CARMAN, *s.* रथिकः, रथी *m.* (न्), रथवाहकः, चातुरिकः, सारथिः *m.*

CARMELITE, *s.* (Belonging to the order of Carmelites) रोमीयमतधारी सन्न्यासिविशेषः.

CARMINATIVE, *a.* वातघ्नः -घ्ना -घ्नं, वायुघ्नः -घ्ना -घ्नं, वायुनाशी -शिनी -शि (न्), रोचकः -का -कं, रूक्षकः -का -कं, अग्निदः -दा -दं, स्वेदजनकः -का -कं.

CARMINE, *s.* जतुसवर्णो रक्तरङ्गः, सिन्दूरोपमः or ओड्रपुष्पसवर्णो रङ्गः, जतुजरङ्गः, रक्तरेणुः *m.*

CARNAGE, *s.* संहारः, विशसनं, बधः, हत्या, घातनं, निहननं, निषूदनं.

CARNAL, *a.* (Fleshly, bodily) शारीरिकः -की -कं, शरीरजः -जा -जं, दैहिकः -की -कं, कायिकः -की -कं, वापुषिकः -की -कं.—(Worldly) सांसारिकः -की -कं, लौकिकः -की -कं, ऐहिकः -की -कं, ऐहलौकिकः -की -कं.—(Sensual) विषयी -यिणी -यि (न्), विषयासक्तः -क्ता -क्तं, विषयसङ्गी -ङ्गिनी -ङ्गि (न्), विषयानुरागी -गिणी -गि (न्), विषयोपसेवी -विनी -वि (न्), कामासक्तः -क्ता -क्तं, भोगासक्तः -क्ता -क्तं, कामुकः -का -कं; 'carnal desire,' कामः; 'carnal connexion,' अङ्गसङ्गः, सङ्ग्रहणं.

CARNALITY, *s.* विषयासक्तिः *f.*, विषयोपसेवा, विषयकामः, कामासक्तिः, विषयसङ्गः, शारीरिकविषयेषु अनुरागः, सङ्गः, कामिता.

CARNALLY, *adv.* शारीरिकरीतिक्रमेण, सांसारिकरीत्यनुसारात्, विषयसङ्गात्, कामुकवत्; 'to know carnally,' भज् (c. 1. भजते, भक्तुं).

CARNATION, *s.* (Flesh colour) मांसवर्णः.—(The flower) मांसवर्णविशिष्टः पुष्पप्रभेदः.

CARNELIAN or CORNELIAN, *s.* मांसवर्णः प्रस्तरविशेषः.

CARNEOUS, *a.* मांसलः -ला -लं, मांसशीलः -ला -लं, मांसगुणविशिष्टः -ष्टा -ष्टं.

To CARNIFY, *v. n.* and *a.* मांसीभू, मांससाद्भू, मांससात्कृ.

CARNIVAL, *s.* (The feast held before Lent) वसन्तसमये प्राग्ग्रहोपवासात् रोमीयमतधारिभिः सेवितो महोत्सवः, दोलोत्सवः, होलाका.

CARNIVOROUS, *a.* क्रव्यादः -दा -दं, क्रव्यभुक् *m. f. n.* (ज्), क्रव्यभोजनः -ना -नं, मांसाशी -शिनी -शि (न्), मांसभक्षः -क्षा -क्षं, आमिषाशी -शिनी -शि (न्) or पिशिताशी, आममांसभक्षी -क्षिणी -क्षि (न्).

CARNOSITY, *s.* अर्बुदः, गण्डः, मेदोग्रन्थिः *m.*, अर्शः *n.* (स्), दुष्टमांसं, मांसवृद्धिः *f.*

CAROB-BEAN, *s.* सिम्बाप्रभेदः, सिम्बिका, शिम्बा.

CAROCHE, *s.* क्रीडारथः, पुष्परथः, रथः, प्रवहणं, चातुरं.

CAROL, *s.* (A song of joy) हर्षगीतं, हर्षगानं, आनन्दगीतं, जयगीतं जयशब्दः, आह्लादसूचकं गीतं.—(A song of devotion) स्तवगीतं, भक्तिगीतं, गीतं, स्तुतिः *f.*, स्तोत्रं, गाथा, खेलिः *f.*, सङ्गीतं.

To CAROL, *v. n.* गै (c. 1. गायति, गातुं), सुख (nom. सुखायते); 'to celebrate in song, &c.' उपगै, स्तु (c. 2. स्तौति, स्तोतुं), उपवीण (nom. उपवीणयति -यितुं).

CAROTID, *s.* (Two arteries) हृत्पिण्डाद् रक्तप्रवाहकं वृहन्नाडिद्वयं, कण्ठ[illegible]यं.

To CAROUSE, *v. n.* (To drink largely) अतिशयेन पा (c. 1. पिबति, पातुं) or सम्पा, अतिशयसम्पीत्या क्षीवः -वा -वं भू, उत्सवं कृ.

CAROUSE or CAROUSAL, *s.* सम्पीतिः *f.*, अतिपानं, अतिशयसम्पीतिः *f.*, उत्सवः.

CAROUSER, *s.* पानप्रसक्तः, पानरतः, सम्पीतिरतः, मद्यपीतः, अतिपायी *m.* (न्).

CARP, *s.* (A fish) शफरी, सफरी, प्रोष्ठी, प्रोष्ठः, रोहितः.

To CARP AT, *v. n.* निन्द् (c. 1. निन्दति -न्दितुं), प्रतिनिन्द्, गर्ह् (c. 1. गर्हते, गर्हितुं, c. 10. गर्हयति -ते -यितुं), अधिक्षिप् (c. 6. -क्षिपति -क्षेप्तुं), अवक्षिप्, दोषीकृ, दोषं or छिद्रम् अन्विष् (c. 6. -इच्छति -एषितुं), असूय (nom. असूयति -यितुं).

CARPENTER, *s.* तक्षकः, तक्षा *m.* (न्), सूत्रधारः, त्वष्टा *m.* (ष्टृ), काष्ठतक्षकः, काष्ठतट् (क्ष्), तष्टा *m.* (ष्टृ), स्थपतिः *m.*, वर्द्धकिः *m.*, रथकारः; 'carpenter's bench,' उद्घनः.

CARPENTRY, *s.* त्वष्टिः *f.*, तक्षणं, काष्ठतक्षणं, सूत्रधारकर्म्म *n.* (न्), तक्षकक्रिया.

CARPER, *s.* दोषग्राही *m.* (न्), दोषकथकः, छिद्रान्वेषी *m.* (न्), दोषैकदृक् *m.* (श्), घृणी *m.* (न्), पापदर्शी *m.* (न्), गुणघाती *m.* (न्), निन्दकः, विवादशीलः, विवादप्रियः.

CARPET, *s.* आस्तरणं, पादपाशी, कुथः, कुथा, चित्रितवस्त्रं, पुष्पालङ्कृतवस्त्रं, आसनवस्त्रं; 'a carpet of grass,' दर्भास्तरणं; 'brought on the carpet,' प्रस्तुतः -ता -तं, उपन्यस्तः -स्ता -स्तं, प्रतिज्ञातः -ता -तं.

To CARPET, *v. a.* चित्रितवस्त्रादिना आस्तृ or आस्तॄ (c. 5. -स्तृणोति, c. 9. -स्तृणाति -स्तरितुं -स्तरीतुं).

CARPING, *a.* दोषग्राही -हिणी -हि (न्), घृणी -णिनी -णि (न्), निन्दकः -का -कं.

CARPING, *s.* (Cavil) निन्दा, गर्हा -र्हणं, घृणा, अपवादः, दोषकल्पनं, दोषप्रसङ्गः, दोषीकरणं, छिद्रान्वेषः, असूया, जुगुप्सा, ऋतीया, आक्षेपः, उद्ग्राहः.

CARPINGLY, *adv.* निन्दया, घृणया, असूयया, विवादशीलत्वात्, जुगुप्सया, सापवादं.

CARRIAGE, *s.* वाहनं, यानं, रथः, गन्त्री, चातुरं, वाहः, प्रवहणं, चक्रुरः; 'travelling-carriage,' अध्वरथः, पुष्परथः; 'bullock-carriage,' वृषभयानं; 'one who has a carriage,' रथी *m.* (न्), रथिकः; 'riding in a carriage,' रथारूढः -ढा -ढं; 'alighting from a carriage,' रथावरोही -हिणी -हि (न्); 'carriage-road,' रथ्या; 'carriage-horse,' रथ्यः, प्रवहणवाजी *m.* (न्); 'bottom of a carriage,' अनुकर्षः.—(Framework of a gun) युद्धयन्त्रवाहनं.—(Behaviour) गतिः *f.*, चरितं, आचारः, चलनं, व्यवहारः.—(Management) नयः, प्रणयनं.

CARRIED, *p. p.* ऊढः -ढा -ढं, भृतः -ता -तं, धृतः -ता -तं, आहृतः -ता -तं, सञ्चारितः -ता -तं; 'grass carried along by the wind,' वातप्रेरितं तृणं.

CARRIER, *s.* वाहकः, वाही *m.* (न्).—(One who lives by carrying goods) भाण्डवाहनजीवी *m.* (न्).—(Carrier of news) सन्देशहरः.—(Pigeon) पत्रवाहकः कपोतः.

CARRION, *s.* पूतिमांसं, मृतं, मृतकं, अखाद्यमांसं, अखाद्यं, अमेध्यकुणपः.

CARROT, *s.* गर्जरं, पीतकन्दं, शिखामूलं, स्वादुमूलं, पिण्डमूलं.

CARROTINESS, *s.* रक्तत्वं, पिङ्गलत्वं.—(Of hair) केशरक्तत्वं, केशपिङ्गलता.

Carroty, *a.* रक्तः -क्ता -क्तं, पिङ्गलः -ला -लं, गर्जरवर्णः -र्णा -र्णं.—(Carroty haired) पिङ्गलकेशी -शिनी -शि(न्) or रक्तकेशी, यूथिकाकेशः -शी -शं.

To carry, *v. a.* (Convey, transport) वह् (c. 1. वहति -ते, वोढुं), आवह्, उपवह्, संवह्, आनी (c. 1. -नयति -नेतुं), तॄ in caus. (तारयति -यितुं) गम् in caus. (गमयति -यितुं); 'he is carried on horse-back,' अश्वेन उह्यते or अश्वेन सञ्चरति.—(Bear as a burden) वह्, प्रवह्, उद्वह्; भृ (c. 3. बिभर्त्ति, भर्त्तुं), हृ (c. 1. हरति, हर्त्तुं); 'he carried his son on his back,' पुत्रम् अवहत् पृष्ठेन.—(Gain, carry a cause) साध् in caus. (साधयति -यितुं); 'to carry a fortress,' दुर्गं लङ्घ् (c. 10. लङ्घयति -यितुं) or भञ्ज् (c. 7. भनक्ति, भंक्तुं); 'to carry one's point,' अभिप्रेतसिद्धिं कृ, प्रतिज्ञापूरणं कृ.—(Carry about) परिवह्, पर्यानी.—(Carry away) अपवह्, अपनी (c. 1. -नयति -नेतुं), व्यपनी, अपोह् (c. 1. -ऊहते -ऊहितुं), व्यपोह्; 'to carry away with one,' समुपादा (c. 3. -ददाति -दातुं).—(Carry back) प्रत्यानी, प्रतिनी.—(Carry forth) निर्हृ.—(Carry off) अपवह्, अपनी, हृ, अपहृ, व्यपहृ, अपकृ (c. 8. -करोति -कुरुते -कर्त्तुं), कल् (c. 10. कालयति -यितुं).—(Carry on) कृ, प्रणी, सम्प्रणी, विधा (c. 3. -दधाति -धातुं).—(To carry on war) विग्रह् (c. 9. -गृह्णाति -ग्रहीतुं), सङ्ग्रामं कृ, युद्धं कृ.—(Carry out, effect) निर्वह् in caus. (-वाहयति -यितुं), सम्पद् in caus. (-पादयति -यितुं), निष्पद्.—(Carry letters) पत्राणि वह् or हृ.—(Carry arms) शस्त्राणि ग्रह् (c. 9. गृह्णाति, ग्रहीतुं), भृ or धृ, सैनिकवृत्तिम् आस्था (c. 1. -तिष्ठति -स्थातुं).

To carry one's self, *v. n.* (Behave) चर् (c. 1. चरति, चरितुं), आचर्, वृत् (c. 1. वर्त्तते, वर्त्तितुं), व्यवहृ (c. 1. -हरति -हर्त्तुं).

Cart, *s.* शकटः, गन्त्री, गन्त्रीरथः, चक्रयानं, वाहनं, अनः *n.* (स्), यातुरं.

To cart, *v. a.* (To carry in a cart) शकटेन वह् (c. 1. वहति, वोढुं).—(To place in a cart) शकटे आरुह् in caus. (-रोपयति -यितुं) or निविश् in caus. (-वेशयति -यितुं).

Carte-blanche, *s.* अलिखितपत्रं, लिखनशून्यं पत्रं.—(Permission to act as one pleases) स्वेच्छातः or स्वेच्छया कर्त्तुम् अनुमतिः or अनुज्ञा.

Carted, *a.* शकटारूढः -ढा -ढं, शकटारोपितः -ता -तं, शकटनिवेशितः -ता -तं.

Cartel, *s.* (A paper containing a challenge) द्वन्द्वयुद्धार्थं or नियुद्धार्थम् आह्वानपत्रं.—(Compact for exchange of prisoners) सङ्ग्रामसमये परस्परं वन्दीकृतानां योधानां परिवर्त्तनार्थं नियमपत्रं.

Carter, *s.* शाकटिकः, शकटवाहकः, गन्त्रीवाहकः, यातुरिकः.

Cart-horse, *s.* शाकटः, शकटवाजी *m.* (न्), शकटवाहनः, धुर्यः, धुरीणः.

Carthusian, *s.* रोमीयमतधारी सन्न्यासिविशेषः.

Carticeya. *See* Kartikeya.

CHANTER, *s.* उद्गाता *m.* (तृ), गायकः, गेष्णुः, गाथिकः, सुस्वरः *m.*

CHANTICLEER, *s.* उषाकलः, कुक्कुटः, कृकवाकुः, यामघोषः.

CHAOS, *s.* महाभूतादिसाङ्कर्य्यं, प्राग्जगत्सृष्टेर् जलादिभूतानाम् अस्तव्यस्तता, एकार्णवः.—(Confusion) सङ्करः, साङ्कर्य्यं, संक्षोभः, व्यस्तता, अव्यक्तता.

CHAOTIC, *a.* सङ्करीकृतः -ता -तं, अस्तव्यस्तः -स्ता -स्तं, अधरोत्तरः -रा -रं, सङ्कीर्णः -र्णा -र्णं, सङ्कुलः -ला -लं, एकार्णवीभूतः -ता -तं, अव्यक्तः -क्ता -क्तं, अलक्षणः -णा -णं.

To CHAP, *v. n.* (To break into gapings from the effect of cold) शीतोपहतत्वात् त्रुट् (c. 4. त्रुट्यति, त्रुटितुं) or विदल् (c. 1. -दलति -दलितुं) or विभिद् in pass. (-भिद्यते) or विदॄ in pass. (-दीर्य्यते) or छिद् in pass. (छिद्यते) or स्फुट् (c. 6. स्फुटति, स्फुटितुं).

CHAP, *s.* (Cleft, chink) त्रुटितं, त्रुटिः *f.* -टी, छिद्रं, रन्ध्रं, गर्त्तः, भित्तिः *f.*; 'in the feet,' पाददारी, अलसः.—(A person, a fellow, contemptuously) माणवः -वकः, मनुष्यकः, नागरः.

CHAPE, *s.* (The catch of any thing by which it is held) बन्धनी, बन्धनकीलकः, सङ्ग्रहणार्थं दन्तकः, ग्रहणी, रक्षणी, आलानं.

CHAPEL, *s.* (Shrine) देवागारः, देवतागारः, देवायतनं, देवालयं.—(A small place of worship subject to a church) महामन्दिराधीना क्षुद्रपूजाशाला, अप्रधानमन्दिरं.—(Of ease) दूरस्थैः सेवितं क्षुद्रभजनभवनं.

CHAPELRY, *s.* क्षुद्रमन्दिराधिकारः, पूर्व्वोक्तपूजाशालाधीनो भूमिभागः.

CHAPERON, *s.* नृत्यगीतादिसमाजे अनूढाम् तरुणीम् उपास्ते या मध्यमवयस्का भाविनी or कुलीना स्त्री.

To CHAPERON, *v. a.* नृत्यगीतादिसमाजे अनूढां तरुणीं युवतिगणं वा उपास् (c. 2. -आस्ते -आसितुं) or उपस्था (c. 1. -तिष्ठति -स्थातुं), or उपचर् (c. 1. -चरति -चरितुं).

CHAPFALLEN, *a.* म्लानवदनः -नी -नं, मलिनमुखः -खी -खं, हताशः -शा -शं.

CHAPITER, *s.* स्तम्भशीर्षं, स्तम्भमस्तकः, स्तम्भशृङ्गं, ऊर्द्ध्वस्तम्भः, स्तम्भस्य ऊर्द्ध्वभागः.

CHAPLAIN, *s.* पुरोहितः, कुलाचार्य्यः, ऋत्विक् *m.* (ज्), कुलगुरुः *m.*, कुलविप्रः.

CHAPLAINSHIP, *s.* पौरोहित्यं, पुरोहितपदं, कुलाचार्य्यपदं, आर्त्विज्यं.

CHAPLET, *s.* माला, माल्यं, स्रक् *f.* (ज्), दाम *n.* (न्), कुसुमावतंसकं, निर्व्यूहः, आपीडः, पीडा; 'chaplet-maker,' मालाकारः, मालिकः; 'chaplets worn in different positions,' गर्भकः, प्रभ्रष्टकं, ललामकं, प्रालम्बं, वैकक्षकं, आपीडः, शेखरः.

CHAPMAN, *s.* आपणिकः, विपणी *m.* (न्), क्रयिकः, विक्रयिकः.

CHAPPED, *p. p.* त्रुटितः -ता -तं, त्रुटितवान् -वती -वत् (त्), विदलितः -ता -तं, विभिन्नः -न्ना -न्नं, विदीर्णः -र्णा -र्णं, छिन्नः -न्ना -न्नं.

CHAPS, *s. pl.* (The mouth of a beast of prey) आस्यं, मुखं, वदनं, हनुः *m.*—(Entrance of a channel) सङ्कटमुखं, सङ्कटप्रवेशः.

CHAPTER, *s.* (Division) अध्यायः, अध्ययः, सर्गः, पर्व्व *n.* (न्), परिच्छेदः, विच्छेदः, काण्डः -ण्डं, खण्डः -ण्डं, स्कन्धः, उच्छ्वासः, आश्वासः, प्रकरणं, लम्बकः.—(An assembly of canons) महामन्दिरे प्रधानपुरोहितानां सभा.

To CHAR, *v. a.* (To burn wood to a cinder) अङ्गारसात्कृ, अङ्गारीकृ, अङ्गार (nom. अङ्गारयति -यितुं); ईषद्दह् (c. 1. -दहति -दग्धुं).

To CHAR, *v. n.* (To work at other's houses by the day) गृहसम्मार्जने उदकवाहने इत्यादिकुत्सितकर्म्मणि एकदिनमात्रं यावद् व्यापृता भू or नियुज् in pass. (-युज्यते).

CHAR-WOMAN, *s.* गृहसम्मार्जने उदकवाहने इत्यादिकुत्सितकर्म्मणि एकदिनमात्रं नियुक्ता or व्यापृता चेटी, प्रत्यहं भृतिं गृह्णाति या कर्म्मकरी, दिनिकाचेटी, दिनिकाप्रेष्या, प्रेष्या, भैरिन्ध्री.

CHARACTER, *s.* (Disposition) शीलः -लं, शीलत्वं -ता, स्वभावः, वृत्तिः *f.*, स्वरूपं, स्वाभिप्रायः, चारित्रं.—(Property, peculiarity) भावः, गुणः, विशेषः.—(Natural character) स्वभावः, निसर्गः, प्रकृतिः *f.*—(Mark) लक्षणं, चिह्नं, अभिज्ञानं.—(Letter) अक्षरं, वर्णः -र्णं.—(Handwriting) स्वहस्ताक्षरं.—(Personage in a drama) भूमिका.—(Reputation, honour) मर्य्यादा, कीर्त्तिः *f.*, यशः *n.* (स्).—(Dignity) गौरवं

CHARACTERISTIC, *a.* लाक्षणिकः -की -कं, लाक्षण्यः -ण्या -ण्यं, विशेषकः -का -कं, विशेषणः -णा -णं, स्वाभाविकः -की -कं, गुणवाचकः -का -कं.

CHARACTERISTIC, *s.* लक्षणं, विशेषलक्षणं, संलक्षणं, लिङ्गं, चिह्नं, विशेषः -षणं, अभिज्ञानं, संज्ञा, गुणः, उपाधिः *m.*, स्वधर्म्मः, स्वभावः; 'generic property,' समानाधिकरणं; 'specific property,' जातित्वं.

CHARACTERISTICALLY, *adv.* विशेषतस्, सविशेषं, लक्षणतस्.

To CHARACTERIZE, *v. a.* लक्ष् (c. 10. लक्षयति -यितुं), संलक्ष्, उपलक्ष्; विशिष् in caus. (-शेषयति -यितुं), चिह्न (c. 10. चिह्नयति -यितुं).—(To give an account of the personal qualities) गुणदोषान् व्याख्या (c. 2. -ख्याति -ख्यातुं).

CHARACTERIZED, *p. p.* विशिष्टः -ष्टा -ष्टं, विशेषितः -ता -तं, सविशेषः -षा -षं -षणः -णा -णं, लक्षितः -ता -तं, संलक्षितः -ता -तं, उपलक्षितः -ता -तं, कृतलक्षणः -णा -णं, लिङ्गी -ङ्गिनी -ङ्गि (न्).

CHARADE, *s.* सङ्केतभेदः, वर्द्धमानः, प्रवह्लिका, पद्यविरचिता प्रश्नदूती यथा किंस्विच्छीघ्रतरं वायोः किंस्विद्बहुतरं तृणात् मनः शीघ्रतरं वाताच्चिन्ता बहुतरा तृणादिति.

CHARCOAL, *s.* अङ्गारः -रं, निधापकः, दग्धकाष्ठं, दग्धेध्मं.

To CHARGE, *v. a.* (Accuse) अभियुज् (c. 7. -युनक्ति -योक्तुं), अभिशप् (c. 1. -शपति -शप्तुं), अभिशंस् (c. 1. -शंसति -शंसितुं), अधिक्षिप् (c. 6. -क्षिपति -क्षेप्तुं).—(Impute a crime to any one) दोषं कस्मिंश्चिद् आरुह् in caus. (-रोपयति -यितुं).—(Enjoin, exhort) आदिश् (c. 6. -दिशति -देष्टुं), समादिश्, प्रत्यादिश्, निर्दिश्, उपदिश्; आज्ञा in caus. -ज्ञापयति -यितुं).—(Intrust) निक्षिप्, न्यस् (c. 4. -अस्यति -असितुं), सम् in caus. (-अर्पयति -यितुं).—(Impose as a task) नियुज् (c. 7. -युनक्ति -युंक्ते -योक्तुं, c. 10. -योजयति -यितुं).—(Attack) अभिद्रु (c. 1. -द्रवति -द्रोतुं); आस्कन्द् (c. 1. -स्कन्दति -स्कन्तुं), आक्रम् (c. 1. -क्रामति -क्रमितुं), अभिधाव् (c. 1. -धावति -ते -धावितुं).—(Burden, load) भारं न्यस्, or निविश् in caus. (-वेशयति -यितुं) or आरुह् in caus. (-रोपयति -यितुं), पॄ (c. 10. पूरयति -यितुं) with inst. c.—(Ask a price) मूल्यं प्रार्थ् (c. 10. -अर्थयते -ति -यितुं).

CHARGE, *s.* (Care, custody) गुप्तिः *f.*, रक्षा, रक्षणं; 'to take charge of,' रक्ष् (c. 1. रक्षति, रक्षितुं), अधिष्ठा (c. 1. -तिष्ठति -ष्ठातुं).—(Trust) निक्षेपः, उपनिक्षेपः, न्यासः, उपन्यासः, उपनिधिः *m.*; 'to give in charge,' निक्षिप् (c. 6. -क्षिपति -क्षेप्तुं), न्यस् (c. 4. -अस्यति -असितुं), नियुज् (c. 7. -युनक्ति -युंक्ते -योक्तुं).—(Commission, office, task,

duty) नियोगः, अधिकारः, भारः, व्रतं, धर्म्मः.—(Mandate, command) आदेशः, आज्ञा, शासनं.—(Exhortation) प्रत्यादेशः, उपदेशः.—(Accusation) अभियोगः, अभिशापः, अभिशंसनं, अपवादः.—(Imputation) दोषारोपः, दोषकल्पनं; 'to lay a crime to any one's charge,' दोषं कस्मिंश्चिद् आरुह् in caus. (-रोपयति -यितुं).—(Onset, attack) संप्रहारः, आस्कन्दः, अभ्यवस्कन्दः, उपघातः, अभिक्रमः, आक्रमः; 'charge sounded by musical instruments,' आडम्बरः.—(Burden) भारः, धुरा.—(Charge of a gun) यन्त्रगोलिकादिकम् एकवारे युद्धनाडी निवेशयितव्यं.—(Expense) व्ययः.—(Price) मूल्यं, अर्घः.

CHARGEABLE, *a.* (Liable to be accused) अभियोक्तव्यः -व्या -व्यं, अभियोज्यः -ज्या -ज्यं.—(Imputable) आरोपणीयः -या -यं.—(Causing expense) व्ययकारी -रिणी -रि (न्).

CHARGED, *p. p.* (Loaded) धुर्वहः -हा -हं, धुरीणः -णा -णं, धुरीयः -या -यं, भारवान् -वती -वत् (त्), भाराक्रान्तः -न्ता -न्तं, अभिपूर्णः -र्णा -र्णं, गर्भः -र्भा -र्भं in comp.; as, 'a cloud charged with water,' अम्भोगर्भो जलदः.—(Accused) अभियुक्तः -क्ता -क्तं, अभिशस्तः -स्ता -स्तं.—(Injoined) समादिष्टः -ष्टा -ष्टं, प्रत्यादिष्टः -ष्टा -ष्टं.—(Made to pay) दापितः -ता -तं.—(Imputed) आरोपितः -ता -तं.

CHARGER, *s.* (Large dish) बृहत्पात्रं, पात्रं, भाजनं.—(War-horse) वारकीरः, योधहयः, युद्धाश्वः, युद्धवाजी *m.* (न्).

CHARILY, *adv.* परिमितप्रकारेण, मितप्रकारेण, परिमितं, अमुक्तहस्तेन, अल्पशस्.

CHARIOT, *s.* रथः, चक्रयानं, गन्त्री, गन्त्रीरथः; 'of war,' स्यन्दनः, शताङ्गः; 'of the gods,' विमानः -नं; 'covered chariot,' कर्णीरथः, ह्यनं; 'pleasure-chariot,' क्रीडारथः; 'chariot-race,' रथचर्य्या; 'chariot-horse,' रथ्यः; 'warrior mounted on a chariot,' स्यन्दनारोहः, रथारूढः, रथी *m.* (न्).

CHARIOTEER, *s.* सूतः, यन्ता *m.* (न्तृ), नियन्ता (न्तृ), अधिरथः, रथवाहकः, सादिः *m.*, सारथिः *m.*, चातुरिकः, प्राजिता *m.* (तृ), क्षत्ता *m.* (त्तृ), सव्येष्ठा *m.* (ष्ठृ), दक्षिणस्थः, प्रवेता *m.* (तृ).

CHARITABLE, *a.* (Kind in giving alms and assisting the poor) कृपणवत्सलः -ला -लं, दरिद्रवत्सलः -ला -लं, दीनवत्सलः -ला -लं, करुणात्मकः -का -कं, दानशीलः -ला -लं, दरिद्रोपकारी -रिणी -रि (न्) or परोपकारी, अन्नदाता -त्री -तृ (तृ) or भिक्षादाता, दयालुः -लुः -लु, दरिद्रपोष्टा -ष्ट्री -ष्टृ (ष्टृ), दरिद्रपालकः -का -कं, सर्व्वभूतानुकम्पकः -का -कं, धर्म्मात्मा -त्मा -त्म (न्).—(Kind in judging of others) परदोषसहनः -ना -नं, अनसूयकः -का -कं, अमत्सरः -रा -रं.

CHARITABLY, *adv.* दरिद्रोपकारशीलत्वात्, दयया, सदयं, दयालुवत्, दीनवत्सलवत्, दरिद्रपोष्टृवत्, सानुकम्पं.—(Without malignity) अनसूयया, अमत्सरं, परदोषसहनवत्.

CHARITY, *s.* (Kindness to the poor, liberality) दरिद्रोपकारः, दरिद्रपालनं, दरिद्रपोषणं, दया, कारुण्यं, दयालुत्वं, दानशीलता, कृपा, सुकरं, पूर्त्तं.—(Almsgiving) भिक्षादानं, दानं, दानधर्म्मः.—(Alms) भिक्षा, भैक्षं, भिक्षान्नं, पुण्यं, पुण्यकं; 'for charity,' पुण्यार्थं.—(Christian charity, love) प्रेम *n.* (न्), सर्व्वभूतानुकम्पा, सर्व्वप्राणिनः प्रति प्रेम.

CHARLATAN, *s.* मिथ्याचिकित्सकः, दुश्चिकित्सकः, छद्मवैद्यः, आयुर्वेदानभिज्ञः.—(Deceiver) छली *m.* (न्), मायी *m.* (न्), कपटी *m.* (न्).

CHARLATANICAL, *a.* आयुर्वेदविरुद्धः -द्धा -द्धं, मिथ्याचिकित्सासम्बन्धीयः -या -यं, कापटिकः -की -कं, छाद्मिकः -की -कं, दाम्भिकः -की -कं.

CHARLATANRY, *s.* मिथ्याचिकित्सा, दुश्चिकित्सा, आयुर्वेदानभिज्ञता, छलं, कपटः -टं, छद्म *n.* (न्), दम्भः, प्रतारणं, वञ्चनं, वाक्छलं.

CHARLES'S WAIN, *s.* सप्तर्षयः *m.pl.*, चित्रशिखण्डिनः *m.pl.*, शकटाकृति नक्षत्रं.

CHARLOCK, *s.* शस्यक्षेत्रप्ररोही पीतपुष्पविशिष्ट ओषधिभेदः.

CHARM, *s.* (Words having mystic power) मन्त्रः, अभिचारमन्त्रः.—(Charm, amulet) कवचः -चं, संवदनं -ना, गारुडः; 'subduing by charms, &c.' वशक्रिया, अभिचारः, संवदनं -ना; 'under the influence of a charm,' अनुमन्त्रितः -ता -तं, अभिमन्त्रितः -ता -तं.—(Something of power to charm or allure) प्रलोभनं, विलोभनं.—(Beauty) मुग्धता, शोभा, कान्तिः *f.*, श्रीः, सौन्दर्य्यं.

To CHARM, *v. a.* (To enchant) मन्त्रद्वारेण वशीकृ or मुह् in caus. (मोहयति -यितुं), अभिमन्त्र् (c. 10. -मन्त्रयते -यितुं), अनुमन्त्र्, अभिचर् (c. 10. -चारयति -यितुं).—(To rejoice the mind) मनो हृ (c. 1. हरति, हर्त्तुं) or रम् in caus. (रमयति -यितुं), हृष् in caus. (हर्षयति -यितुं).—(To allure) प्रलुभ् in caus. (-लोभयति -यितुं).

CHARMED, *p. p.* (With joy) हृतमानसः -सा -सं, हृष्टमानसः -सा -सं, प्रह्लादितः -ता -तं, उल्लासितः -ता -तं.—(By incantations, &c.) अभिमन्त्रितः -ता -तं, अनुमन्त्रितः -ता -तं, अभिचारितः -ता -तं, वशः -शा -शं, वशीभूतः -ता -तं, वशीकृतः -ता -तं, वशतापन्नः -न्ना -न्नं, मोहितः -ता -तं, आकृष्टः -ष्टा -ष्टं.

CHARMER, *s.* (A dealer in charms) गारुडिकः, जाङ्गुलिकः.—(An enchanter) अभिचारी *m.* (न्), -रिणी *f.*, मायी *m.* (न्), -यिनी *f.*, मायाकारः, मोही *m.* (न्), -हिनी *f.*—(Word of endearment applied to a woman) प्रिया, वत्सा, मुग्धा.

CHARMING, *a.* मनोहरः -रा -रं, मनोरमः -मा -मं, रम्यः -म्या -म्यं, रमणीयः -या -यं, कमनीयः -या -यं, सुभगः -गा -गं, कान्तः -न्ता -न्तं, मोदकः -का -कं, हर्षकरः -री -रं, विचित्रः -त्रा -त्रं, सश्रीकः -का -कं, आकर्षकः -का -कं, आकृष्टवान् -वती -वत् (त्), उत्सेचनकः -का -कं; 'a charming woman,' मुग्धा, प्रमदा.

CHARMINGLY, *adv.* मनोरमं, रमणीयप्रकारेण, रम्यं, रमणीयतया, विचित्रं, सुभगं, यथा मनो ह्रियते तथा, मनोहरप्रकारेण.

CHARMINGNESS, *s.* रम्यत्वं, रमणीयता, कमनीयता, मनोहरत्वं, सश्रीकता.

CHARNEL-HOUSE, *s.* शवास्थिस्थानं, अस्थिसञ्चयस्थानं, श्मशानं, शवास्थिगृहं.

CHARRED, *p. p.* अङ्गारितः -ता -तं, अङ्गारसात्कृतः -ता -तं, अर्द्धदग्धः -ग्धा -ग्धं.

CHART, *s.* वेलालेख्यं, वेलापटः, समुद्रयायिनां पथदर्शनार्थं नदीसमुद्रवेलासैकतादिभिर् अङ्कितं पत्रं, समुद्रद्वीपादीनाम् आलेख्यं, नौकारूढानां पथदर्शकं पत्रं.

CHARTER, *s.* शासनं, शासनपत्रं, राजाज्ञापत्रं, प्रामाणिकपत्रं, धर्म्मकीलः, पट्टः.—(Privilege) अधिकारः.

CHARTERED, *p. p.* राजादिसकाशात् शासनपत्रेण अधिकारयुक्तः -क्ता -क्तं.

CHARY, *a.* परिमितः -ता -तं, मितः -ता -तं, अमुक्तहस्तः -स्ता -स्तं, सावधानः -ना -नं, अवहितः -ता -तं, विचक्षणः -णा -णं.

To CHASE, *v. a.* (To hunt) मृग् (c. 10. मृगयते -यितुं), मृगयां कृ, आखिट् (c. 1. -खेटति -खेटितुं), परिकल् (c. 10. -कालयति -यितुं).—(To pursue) अनुधाव् (c. 1. -धावति -धावितुं), पश्चाद्धाव्, अभिधाव्, अनुसृ (c. 1. -सरति -सर्त्तुं), अन्विष् (c. 4. -इष्यति -एषितुं), अनुष्ठा (c. 1. -तिष्ठति -ष्ठातुं), अनुवृत् (c. 1. -वर्त्तते -वर्त्तितुं), पश्चाद्वृत्.—(To drive away) निरस् (c. 4. -अस्यति -असितुं), अपास्; निराकृ; अपानुद् (c. 6. -नुदति -नोत्तुं), द्रु in caus. (द्रावयति -यितुं).—(To chase gold and silver vessels) राजतानि भाजनानि रेखादिना अलङ्कृ or उपस्कृ.

CHASE, *s.* (Hunting) मृगव्यं, मृगया *f.*, खेटः -टं, आखेटः, आच्छोदनं, पापर्द्धिः *f.*, आच्छोदनं, पराधिः *f.*; 'he went to the chase,' मृगयायै गतः or मृगयां कर्त्तुं गतः.—(The game hunted) जाङ्गलं.—(Pur-

suit, running after) अनुधावनं, अभिधावनं, पश्चाद्धावनं, अनुसरणं, अन्वेषणं, मृगया.—(Open ground fit for hunting) मृगव्ययोग्यो निर्विघ्नभूमिभागः, जाङ्गलभूमिः.

Chased, *p. p.* अनुधावितः -ता -तं, मृगितः -ता -तं, द्रावितः -ता -तं.

Chaser, *s.* मृगयुः *m.*, आखेटकः, अनुधावकः, अनुसारी *m.* (न्), द्रावकः, पश्चाद्धावकः.

Chasm, *s.* छिद्रं, अवटः -टिः *m.*, विवरं, बिलं, रन्ध्रं, दरी, गर्त्तः, कुहरं, शुषिरं, रोकं, विरोकं, विद्रं, टङ्कः, भङ्गः, भकेरा, रोपं, रुहकं.

Chaste, *a.* अलम्पटः -टा -टं, यतमैथुनः -ना -नं, सद्वृत्तः -त्ता -त्तं, अकामः -मा -मं, अपांशुलः -ला -लं, यतेन्द्रियः -या -यं, जितेन्द्रियः -या -यं, निष्कामः -मा -मं, ऊर्द्ध्वरेताः -ताः -तः (स्), अव्यसनी -निनी -नि (न्), धर्म्मचारी -रिणी -रि (न्), संयतोपस्थः -स्था -स्थं, अव्यभिचारी -रिणी -रि (न्); 'a chaste wife,' पतिव्रता, साध्वी, सती *f.*, अव्यभिचारिणी, कुलवधूः; 'most chaste,' महासती; 'a chaste woman,' कुलस्त्री, कुलपालिका.—(Pure, correct, as language, &c.) शुद्धः -द्धा -द्धं, विशुद्धः -द्धा -द्धं, शुचिः -चिः -चि, निर्म्मलः -ला -लं.

Chastely, *adv.* निष्कामं, उपस्थनिग्रहेण, इन्द्रियसंयमेन, शुद्धं, शुचि.

To chasten or chastise, *v. a.* शास् (c. 2. शास्ति, शासितुं), अनुशास्, दण्ड् (c. 10. दण्डयति -यितुं), वियत् (c. 10. -यातयति -यितुं), दण्डं प्रणी (c. 1. -णयति -णेतुं).

Chastised, *p. p.* शिष्टः -ष्टा -ष्टं, शासितः -ता -तं, दण्डितः -ता -तं, ताडितः -ता -तं, दुःखितः -ता -तं.

Chastisement, *s.* शिष्टिः *f.*, शास्तिः *f.*, दण्डः, साहसं, अनुशासनं, निग्रहः.—(Of a pupil) शिष्यशिष्टिः *f.*

Chastiser, *s.* शासिता *m.* (तृ), शास्ता *m.* (स्तृ), दण्डप्रणेता *m.* (तृ), साहसकृत्.

Chastity, *s.* उपस्थनिग्रहः, उपस्थसंयमः, इन्द्रियनिग्रहः, जितेन्द्रियत्वं, यतेन्द्रियत्वं, निष्कामता, ब्रह्मचर्य्यं.—(In a woman) सतीत्वं, साध्वीत्वं, पातिव्रत्यं, कुलवधूत्वं; 'a sage of perfect chastity,' ऊर्द्ध्वमन्थी *m.* (न्).

To chat, *v. n.* संलप् (c. 1. -लपति -लपितुं), कथोपकथनं कृ, वृथाकथां कृ, आलस्यवचनं कृ, सम्भाष् (c. 1. -भाषते -भाषितुं).

Chat, *s.* कथोपकथनं, संलापः, वृथाकथा, अनर्थककथा, सम्भाषः, सङ्कथा, कथायोगः, सम्प्रवदनं, आलस्यवचनं.

Chatellany, *s.* दुर्गाधिकाराधीनं भूमिमण्डलं, दुर्गाधीनो भूमिप्रदेशः.

Chattels, *s. pl.* अस्थावरधनं, द्रव्यं, विभवः, सामग्री -ग्र्यं.

To chatter, *v. n.* (To talk idly) जल्प् (c. 1. जल्पति, जल्पितुं), प्रलप् (c. 1. -लपति -लपितुं, c. 10. -लापयति -यितुं), विलप्, कथोपकथनं कृ, वृथाकथां कृ.—(To make a noise as a jay, &c.) किकि or चटचट or चित् शब्दं कृ. चटचट (nom. चटचटायते), कै c. 1. (कायति, कातुं), कूज् (c. 1. कूजति, कूजितुं).—(To make a noise by colliding the teeth) कटकट (nom. कटकटापयति -यितुं), दन्तैर् दन्तान् निष्पिष् (c. 7. -पिनष्टि -पेष्टुं).

Chatter or chattering, *s.* (Idle prate) वृथाकथा, प्रलापः, विप्रलापः, विलपनं, जल्पनं, प्रजल्पः, वाक्चापल्यं, अतिकथा, इतिकथा, निरर्थककथा, कलना.—(Noise of a jay, &c.) चटचट *ind.*, रुच् *f.* (च्), किकि शब्दः, चित् शब्दः.

Chatterer, *s.* जल्पकः, जल्पाकः, उपजल्पी *m.* (न्), वाचालः, गायनः वावदूकः.

Chatty, *a.* संलापी -पिनी -पि (न्) or प्रलापी, कथोपकथनकृत् *m. f. n.*

Chaunt, *s.* *See* Chant.

To chaw, *v. a.* चर्व् (c. 1. चर्वति, चर्वितुं c. 10. चर्वयति -यितुं).

Chawdron, *s.* अन्त्रं, पुरीतत् *m. n.*, नाडिः *f.*, -डी, धमनी.

Cheap, *a.* अल्पमूल्यः -ल्या -ल्यं, अल्पार्घः -र्घा -र्घं, सुमूल्यः -ल्या -ल्यं, सुलभः -भा -भं, अल्पमूल्येन क्रेयः -या -यं or लभ्यः -भ्या -भ्यं, न्यूनः -ना -नं.

To cheapen, *v. a.* (To bid for, attempt to purchase) अमुकमूल्यं दित्सामीति वद् (c. 1. वदति -दितुं); न्यूनमूल्यं दा in des. (दित्सति -त्सितुं).—(To lessen value) मूल्यं न्यूनीकृ or अल्पीकृ.

Cheaply, *adv.* अल्पमूल्येन, अल्पार्घेण, सुमूल्येन, सुलभं.

Cheapness, *s.* सुमूल्यं, अल्पमूल्यता, अल्पार्घत्वं, मूल्यन्यूनता, सुलभता.

To cheat, *v. a.* वञ्च् in caus. (वञ्चयते -ति -यितुं), परिवञ्च्, प्रलभ् (c. 1. -लभते -लब्धुं), विप्रलभ्, छल् (c. 10. छलयति -यितुं).

Cheat, *s.* (Fraud) छलं, वञ्चनं, कपटः.—(Cheater) वञ्चकः, छली *m.* (न्), धूर्त्तः, प्रतारकः, कूटकः, कार्पटिकः, कपटी *m.* (न्), कितवः, कूटकारः, दाम्भिकः, कुहकः, उपधिकः.

Cheated, *p. p.* वञ्चितः -ता -तं, परिवञ्चितः -ता -तं, प्रलब्धः -ब्धा -ब्धं, विप्रलब्धः -ब्धा -ब्धं, मुषितः -ता -तं, अतिसंहितः -ता -तं.

Cheating, *s.* वञ्चनं, छलनं, प्रतारणं -णा, कपटः -टं, व्याजः, कैतवं, अतिसन्धिः *m.*, अतिसन्धानं, कूटः -टं.

To check, *v. a.* यम् (c. 1. यच्छति, यन्तुं), संयम्, नियम्, विनियम्, निग्रह् (c. 9. -गृह्णाति -गृह्णीते -ग्रहीतुं), विनिग्रह्, सन्निग्रह्, वृ in caus. (-वारयति -यितुं), निवृ, निरुध् (c. 9. -रुणद्धि -रोद्धुं), अवरुध्, सन्निरुध्, प्रतिषिध् (c. 1. -षेधति -षेद्धुं), विधृ in caus. (-धारयति -यितुं), स्तम्भ् in caus. (स्तम्भयति -यितुं), विष्टम्भ्.

Check, *s.* संयमः, निग्रहः, निवारः -रणं, यन्त्रणं, निरोधः, विरोधः, संरोधः, प्रतिषेधः, यन्ता -न्त्री -न्तृ (न्तृ).—(As of the perspiration) विष्टम्भः.

Checked, *p. p.* संयमितः -ता -तं, संयतः -ता -तं, नियमितः -ता -तं, रुद्धः -द्धा -द्धं, निरुद्धः -द्धा -द्धं, संरुद्धः -द्धा -द्धं, निवारितः -ता -तं, नियन्त्रितः -ता -तं.

To checker or chequer, *v. a.* अष्टापदप्रकारेण व्यत्यस्तरेखा लिखित्वा चित्रविचित्रीकृ or चित्र् (c. 10. चित्रयति -यितुं) or द्विरङ्गीकृ or नानारङ्गीकृ or कर्बुरीकृ.

Checkered, *p. p.* चित्रविचित्रः -त्रा -त्रं, अष्टापदप्रकारेण चित्रितः -ता -तं, कर्बुरितः -ता -तं, द्विरङ्गीकृतः -ता -तं, नानावर्णः -र्णा -र्णं.

Checkerwork, *s.* अष्टापदप्रकारेण चित्रविचित्रकर्म्म *n.* (न्), चित्रविचित्रकार्य्यं.

Checkmate, *s.* जयकारी शारिपरीणायः, शारिपरीणायो येन परः स्वशारीन परिणेतुम् अक्षमः सन् पराजितो भवति.

Cheek, *s.* गण्डः -ण्डं, कपोलः, कन्दलः, गण्डस्थलः -ली, गल्लः; 'the two cheeks,' गण्डौ; 'colour in the cheek,' कपोलरागः.

Cheekbone, *s.* कपोलफलकः, गण्डफलकः -कं.

Cheer, *s.* (Provisions, entertainment) आहारः, भोजनं, भोज्यं, सत्कारः.—(Heart, courage) वीर्य्यं, धैर्य्यं, स्थैर्य्यं, स्थिरता, तेजः *n.* (स्); 'be of good cheer,' समाश्वसिहि.—(Air of countenance) वदनं, मुखं, आकारः.—(Shout of joy) प्रणादः, जयशब्दः, जयध्वनिः *m.*, जयकोलाहलः, धन्यवादः.

To cheer, *v. a.* (Incite) प्रोत्सह् in caus. (-साहयति -यितुं), प्रचुद् (c. 10. -चोदयति -यितुं).—(Gladden) हृष् in caus. (हर्षयति -यितुं), परिहृष्, प्रहृष्, ह्लाद् in caus. (ह्लादयति -यितुं), आह्लाद्, प्रह्लाद्, नन्द् in caus. (नन्दयति -यितुं), उल्लस् in caus. (-लासयति -यितुं).—(Comfort) आश्वस् in caus. (-श्वासयति -यितुं), समाश्वस्, विश्वस्, सान्त्व् (c. 10. सान्त्वयति -यितुं).

To cheer-up, *v. n.* प्रत्याश्वस् (c. 2. -श्वसिति -श्वसितुं), आश्वस्, समुत्था (c. 1. -तिष्ठति -स्थातुं), हृष् (c. 4. हृष्यति, हर्षितुं), प्रतिसंहृष्, आनन्द् (c. 1. -नन्दति -नन्दितुं), ह्लाद् (c. 1. ह्लादते, ह्लादितुं); 'cheer up!' समाश्वसिहि, साहसं कुरु, सुस्थिरो भव.

CHEERED, *p. p.* प्रहर्षितः -ता -तं, समाश्वासितः -ता -तं, आश्वासितः -ता -तं.

CHEERER, *s.* आश्वासकः, हर्षकरः, आनन्ददः, प्रह्लादकः, प्रहर्षकः.

CHEERFUL, *a.* आनन्दी -न्दिनी -न्दि (न्), सानन्दः -न्दा -न्दं, हृष्टः -ष्टा -ष्टं, प्रहृष्टः -ष्टा -ष्टं, हर्षयुक्तः -क्ता -क्तं, हृष्टहृदयः -या -यं, हृष्टमानसः -सी -सं, हर्षमाणः -णा -णं, प्रफुल्लः -ल्ला -ल्लं, प्रमनाः -नाः -नः (स्), उल्लसः -सा -सं -सितः -ता -तं, उल्लासितः -ता -तं, विकुर्वाणः -णा -णं.—(Having a cheerful countenance) प्रफुल्लवदनः -ना -नं or फुल्लवदनः, मुहसाननः -ना -नं, प्रसन्नवदनः -ना -नं, सदैव प्रहसितवदनः -ना -नं.

CHEERFULLY, *adv.* सहर्षं, सानन्दं, हृष्टमनसा, हृष्टवत्, प्रसन्नचेतसा.

CHEERFULNESS, *s.* हर्षः, हृष्टिः *f.*, आनन्दः, आह्लादः, प्रफुल्लता, चित्तप्रसन्नता, उल्लासः.

CHEERLESS, *a.* निरानन्दः -न्दा -न्दं, अहर्षः -र्षा -र्षं, हर्षरहितः -ता -तं.

CHEERLESSLY, *adv.* अहर्षं -र्षितं, निरानन्दं, आनन्दं विना.

CHEESE, *s.* किलाटः -टी, दधिजं, मन्थजं, क्षीरविकृतिः *f.*

CHEESECAKE, *s.* किलाटपिष्टकः, दधिनवनीतादिमयो मोदकविशेषः.

CHEESE-CURDS, *s.* दधि *n.*, किलाटः, पयस्यं, क्षीरजं, आमिक्षा.

CHEESE-MONGER, *s.* किलाटविक्रेता *m.* (तृ), दधिजविक्रयी *m.* (न्), किलाटविक्रयोपजीवी *m.* (न्).

CHEESE-PRESS, *s.* दधिसम्पीडनयन्त्रं येन किलाटः सम्पद्यते.

CHEESY, *adv.* किलाटमयः -यी -यं, किलाटगुणोपेतः -ता -तं.

CHELY, *s.* कर्कटनखः, कुलीरादिनखः, कुलीराङ्घ्रिः *m.*, कर्कटपाणिः *m.*

CHEMISE, *s.* स्त्रीलोकभृत्यम् अन्तरीयं or अधोवसनं.

CHEMISTRY, *s.* रसायनं. *See* CHYMISTRY.

To CHERISH, *v. a.* पुष् (c. 1. पोषति, c. 9. पुष्णाति, पोषितुं, c. 10. पोषयति -यितुं), परिपुष्, पाल् (c. 10. पालयति -यितुं), संवृध् in caus. (-वर्धयति -यितुं), भृ (c. 1. भरति -ते, भर्तुं), भज् (c. 1. भजति -ते, भक्तुं), उपास् (c. 2. -आस्ते -आसितुं), दय् (c. 1. दयते, दयितुं), लल् (c. 10. लालयति -यितुं).

CHERISHED, *p. p.* पालितः -ता -तं, पोषितः -ता -तं, पुष्टः -ष्टा -ष्टं, संवर्द्धितः -ता -तं, भर्त्रिमः -मा -मं, अभीष्टः -ष्टा -ष्टं, हृद्यः -द्या -द्यं, हृन्नतः -ता -तं, दयितः -ता -तं, हृदिस्पृक् (श्), लालितः -ता -तं.

CHERISHER, *s.* पोष्टा *m.* (ष्टृ), पोषकः, पालकः, पालयिता *m.* (तृ), भर्त्ता *m.* (र्त्तृ).

CHERISHING, *s.* पोषः -षणं, पालनं, भरणं, भरिमा *m.* (न्).

CHERRY, *s.* अष्ठिगर्भः क्षुद्रफलविशेषः.

CHERRY-ORCHARD, *s.* वक्ष्यमाणवृक्षवाटिका or -वाटी.

CHERRY-TREE, *s.* पूर्वोक्तफलविशिष्टो वृक्षभेदः.

CHERSONESE, *s.* द्वीपः, अन्तरीपः -पं.

CHERUB, *s.* स्वर्गी *m.* (न्), स्वर्गदूतः, स्वर्गीयजनः, दिव्यदूतः, देवदूतः. Modern scholars coin the word किरूपः.

CHERUBIC, *a.* स्वर्गीयः -या -यं, दिव्यः -व्या -व्यं, स्वर्ग्यः -र्ग्या -र्ग्यं.

To CHERUP, *v. n.* किञ्ज or चिञ्च शब्दं कृ. *See To* CHIRP.

CHERVIL, *s.* ओषधिभेदो यस्मिन् एककाण्डाग्राद् अनेकमञ्जर्य आतपत्ररूपेण प्ररोहन्ति.

CHESS, *s.* चतुरङ्गं; 'moving a piece at chess,' नयोणायः.

CHESS-BOARD, *s.* अष्टापदं, शारिफलकं, पञ्चनी, पञ्चमी, पञ्चारी, नयपीठी.

CHESSMAN, *s.* जतुपुत्रकः, सारः, शारः, शारिः *m.*, सारिः *m.* -री *f.* सारिका, खेलिनी, खेलनी.

CHEST, *s.* (The breast) उरः *n.* (स्), वक्षः *n.* (स्), भुजान्तरं, क्रोडं -डा, 'broad-chested,' उरस्वान् -स्वती -स्वत् (त्), उरस्कः -स्का -स्कं, उरसिलः.—(A box) भाण्डं, सम्पुटः -टकः, समुद्गः, भाजनं.

CHESTNUT or CHESNUT, *s.* श्यावफलविशेषः; 'a chestnut horse,' शोणः, उकनाहः.

CHEVALIER, *s.* सादी *m.* (न्), अश्वारोही *m.* (न्), रथी *m.* (न्), महारथः, महावीरः, राजर्षिः *m.*, मानसूचका ख्यातिः.

CHEVAUX DE FRISE, *s.* नागदन्तयुक्तं प्राचीरं, युद्धसमये परकायप्रवेशनार्थं शितशल्ययुक्तम् अवरोधकं.

CHEVERIL, *s.* (A kid) छागशावकः, अजशावकः.—(Kid leather) अजचर्म्म *n.* (न्).

To CHEW, *v. a.* चर्व् (c. 1. चर्वति, चर्वितुं, c. 10. चर्वयति -यितुं), दन्तैः पिष् (c. 7. पिनष्टि, पेष्टुं), विदंश् (c. 1. -दशति -दंष्टुं); 'to chew the cud,' रोमन्थ (nom. रोमन्थायते).

CHEWED, *p. p.* चर्वितः -ता -तं, अवलीढः -ढा -ढं, दन्तैः पिष्टः -ष्टा -ष्टं.

CHEWING, *s.* चर्वणं, दन्तपेषणं, रोमन्थः.

CHICANE, *s.* (Prolonging a judicial contest) विवादिभिर् मिथ्योत्तरद्वारा or असदुद्ग्राहद्वारेण अर्थनिर्णयविलम्बनं, मिथ्याप्रौढिः *f.*, मिथ्यापक्षिः *f.*—(Artifice in general) छद्म *n.* (न्), छलं, व्यपदेशः, अपदेशः, कपटः.

To CHICANE, *v. n.* विवादसमये मिथ्योत्तरद्वारा or असदुद्ग्राहद्वारेण अर्थनिर्णयविलम्बनं कृ.

CHICANER, *s.* मिथ्याविवादी *m.* (न्), मिथ्यातार्किकः, वाग्वीकः, मिथ्योत्तरवादी *m.* (न्), असदुद्ग्राहकृत्, जल्पकः.

CHICANERY, *s.* मिथ्याविवादः, हेत्वाभासः, पक्षाभासः, मिथ्यावादः, मिथ्यातर्कः, मिथ्याहेतुः, वाक्छलं, मिथ्याप्रौढिः *f.*, जल्पः, कपटः.

CHICK or CHICKEN, *s.* कुक्कुटशावकः, पक्षिशावकः.

CHICKEN-HEARTED, *a.* भीरुहृदयः -या -यं, हरिणहृदयः -या -यं.

CHICKEN-POX, *s.* रक्तवटीविशिष्टो बालानां रोगः.

CHICK-PEAS, *s.* चणकः, हरिमन्थः -न्थकः.

CHICK-WEED, *s.* पक्षिभुक्तः क्षुद्रौषधिभेदः.

CHIDDEN, *p. p.* निन्दितः -ता -तं, निर्भर्त्सितः -ता -तं, धिक्कृतः -ता -तं.

To CHIDE, *v. a.* निन्द् (c. 1. निन्दति, निन्दितुं), प्रतिनिन्द्, विनिन्द्, भर्त्स् (c. 10. भर्त्सयते -ति -यितुं), गुप् in des. (जुगुप्सते -प्सितुं), गर्ह् (c. 1. गर्हते, गर्हितुं), धिक्कृ, आक्रुश् (c. 1. -क्रोशति -क्रोष्टुं).

To CHIDE, *v. n.* (Clamour) उत्क्रुश् (c. 1. -क्रोशति -क्रोष्टुं), प्रक्रुश्, विक्रुश्.—(Quarrel) विवद् (c. 1. -वदते -वदितुं), विप्रवद्, वाक्कलहं कृ.

CHIDER, *s.* निन्दकः, धिक्कर्त्ता *m.* (र्त्तृ), परिवादकः, आक्रोशकः.

CHIDING, *s.* निन्दा, परिभाषणं, परीवादः, जुगुप्सा, उपक्रोशः, तिरस्कारः, उपालम्भः, निर्भर्त्सनं, धिक्कारः, धिक्क्रिया, विप्रलापः, वाग्युद्धं.

CHIEF, *a.* परमः -मा -मं, परः -रा -रं, उत्तमः -मा -मं, मुख्यः -ख्या -ख्यं, प्रमुखः -खा -खं, अग्रः -ग्रा -ग्रं, अग्र्यः -ग्र्या -ग्र्यं, प्राग्र्यः -ग्र्या -ग्र्यं, अग्रीयः -या -यं, अग्रियः -या -यं, प्रधानः -ना -नं, शिष्टः -ष्टा -ष्टं, विशिष्टः -ष्टा -ष्टं, उत्कृष्टः -ष्टा -ष्टं, अनुत्तमः -मा -मं, पारमिकः -की -कं, वर्य्यः -र्य्या -र्य्यं, प्रवरः -रा -रं, वरेण्यः -ण्या -ण्यं, पुरोगमः -मा -मं, प्रवर्हः -र्हा -र्हं, परार्द्ध्यः -र्द्ध्या -र्द्ध्यं, अनवरार्द्ध्यः -र्द्ध्या -र्द्ध्यं, वृन्दारकः -का -कं, प्रष्ठः -ष्ठा -ष्ठं, इन्द्रः -न्द्रा -न्द्रं in comp., पुङ्गवः -वा -वं in comp., ऋषभः -भा -भं in comp.; 'chief minister,' प्रधानमन्त्री *m.* (न्); 'chief priest,' प्रधानयाजकः; 'chief justice,' धर्म्माधिकारी *m.* (न्), धर्म्माध्यक्षः; 'chief seat,' अग्रासनं; 'chief of sages,' देवर्षिः *m.*; 'chief person,' आदिपुरुषः.

CHIEF, *s.* पतिः *m.*, ईश्वरः, ईशः, नायकः, मुखरः, पुरोगः, अग्रगः, अधिपः, अधिपतिः *m.*, अधिष्ठाता *m.* (तृ), अध्यक्षः, श्रेष्ठी *m.* (न्), शिष्टः, गणपतिः, प्रष्ठः, उद्वहः, शिरोवर्त्ती *m.* (न्), वृन्दारकः.—(Military chief) सेनापतिः, सेनाग्रगः, सेनानीः *m.*

CHIEFLESS, *a.* अनायकः -का -कं, अनीश्वरः -रा -रं, अराजकः -का -कं.

CHIEFLY, *adv.* प्रधानतस्, प्राधान्यतस्, मुख्यशस्, विशेषतस्, परमं.

CHIEFTAIN, *s.* (Leader) मुखरः, पुरोगः, अग्रगः, नायकः, पतिः *m.*, ईश्वरः.—(Commander) सेनापतिः, सेनानीः *m.*—(Head of a clan) गणपतिः, सामन्तः.

CHIEFTAINSHIP, *s.* मुख्यता, गाणपत्यं, सैनापत्यं, ऐश्वर्य्यं.

CHILBLAIN, *s.* पादस्फोटः, पाददारी *f.*, शिशिरजातं क्षतं.

CHILD, *s.* बालः -ला, बालकः, शिशुः *m.*, वत्सः -त्सा -त्सकः, सुतः, पुत्रः, शावकः, सन्तानः, सन्ततिः *f.*, अपत्यं, बालापत्यं, दारकः, तोकं, अर्भः, अर्भकः, माणवकः.—(The compellation of an old to a young man) वत्स.—(To be with child) गर्भवती or सञ्जातगर्भा भू.

CHILDBEARING, *s.* प्रसवः, सवनं, सूः *f.*; 'past childbearing,' विगतार्त्तवा, निष्कला; 'capable of childbearing,' सरजस्का.

CHILDBED, *s.* प्रसवावस्था, प्रसवकालः, प्रसववेदना, गर्भवेदनावस्था.

CHILDBIRTH, *s.* प्रसवः, प्रसूतिः *f.*, सूतिः *f.*, जननं; 'the pains of childbirth,' प्रसववेदना, गर्भवेदना; 'to suffer the pains of childbirth,' प्राप्तप्रसववेदना भू.

CHILDERMAS-DAY, *s.* हेरोद्नाम्नो यिहुदीयराजस्य आज्ञया अपापशिशूनां वधमुद्दिश्य पर्व्व *n.* (न्).

CHILDHOOD, *s.* बाल्यं, शैशवं, शिशुत्वं, बालकत्वं, बालभावः, कौमारं, शैशवकालः, बाल्यकालः, बाल्यावस्था, अपत्यता, अर्भत्वं.

CHILDISH, *a.* बालिशः -शा -शं, बालेयः -या -यं, बालकीयः -या -यं, बालयोग्यः -ग्या -ग्यं; 'childish prattle,' बालवचनं; 'childish understanding,' बालबुद्धिः.

CHILDISHLY, *adv.* बालवत्, शिशुवत्, बालकवत्, बालरूपेण.

CHILDISHNESS, *s.* बालिश्यं, बालेयत्वं, बालकीयता, बालरूपत्वं.

CHILDLESS, *a.* अपुत्रः -त्रा -त्रं -त्रकः -का -कं, निष्पुत्रः -त्रा -त्रं, असुतः -ता -तं, अप्रसुतः -ता -तं, पुत्ररहितः -ता -तं, पुत्रशून्यः -न्या -न्यं, अनपत्यः -त्या -त्यं, असन्तानः -ना -नं, निःसन्तानः -ना -नं, अप्रजः -जा -जं, निरन्वयः -या -यं, निर्वंशः -शा -शं; 'a childless woman,' वन्ध्या, अशिश्वी; 'the state of being childless,' आनपत्यं.

CHILDLIKE, *a.* बालोपमः -मा -मं, बालसदृशः -शी -शं, बालेयः -या -यं.

CHILIAEDRON, *s.* सहस्रभुजः, सहस्रकोणः, सहस्रास्रं.

CHILIFACTORY, *a.* रक्तजनकः -का -कं. *See* CHYLIFACTORY.

To CHILL, *v. a.* शीतीकृ, शीतलीकृ.—(Check the perspiration) स्वेदं विष्टम्भ् in caus. (-स्तम्भयति -यितुं).—(Discourage) निर्विर्ण्णं -र्ण्णां -र्ण्णं कृ, तेजोहीनं -नां -नं कृ.

CHILL, *a.* शीतलः -ला -लं, शिशिरः -रा -रं, शीतः -ता -तं.

CHILL, *s.* शीतं, शीतता, हिमं; 'a check to the perspiration,' स्वेदविष्टम्भः.

CHILLED, *p. p.* शीतीकृतः -ता -तं, हिमाक्तः -क्ता -क्तं, हततापः -पा -पं.

CHILLINESS, *s.* शीतता, शीतलता, शैत्यं, शीतीभावः, शिशिरत्वं

CHILLY, *a.* शिशिरः -रा -रं, ईषच्छीतः -ता -तं, आशीतलः -ला -लं.

CHIME, *s.* नानावादित्राणाम् एकतालः or एकतानः or तालैक्यं, अनेकवाद्यानाम् तानैक्यं or तौर्य्यैक्यं, शब्दैक्यं.—(Of bells) अनेकघण्टानां तालैक्यं, ताड्यमानानाम् अनेकघण्टानां सुस्वरशब्दः, घण्टाशिञ्जितं.

To CHIME, *v. a.* यथा स्वरैक्यं or तालैक्यं जायते तथा नानावादित्राणि वद् in caus. (वादयति -यितुं) or तड् (c. 10. ताडयति -यितुं); घण्टां तड्.

To CHIME, *v. n.* (To agree) संवद् (c. 1. -वदति -वदितुं), अनुवद्, एकीभू, अनुगुणः -णा -णं भू, अनुरूपः -पा -पं भू.

CHIMERA, *s.* वृथावासना, असम्भवकल्पना, अनर्थकवासना, मिथ्यावासना, दुर्वासना, अनर्थकचिन्ता, अनर्थकभावना, मनोरथसृष्टिः *f.*, आभासः, मृषार्थकं, शशविषाणं, कूर्म्मलोमतन्तुत्राणं.

CHIMERICAL, *a.* काल्पनिकः -की -कं, मानसिकः -की -कं, मनोरथसृष्टः -ष्टा -ष्टं, वासनाकल्पितः -ता -तं, अमूलकः -का -कं.

CHIMNEY, *s.* धूमरन्ध्रं, धूमपथः, धूमनिर्गमः.—(Fire-place) चुल्लिः *f.*, -ल्ली, जातिः *f.*, तेमनी, अग्निकुण्डं.

CHIMNEY-CORNER, *s.* चुल्लिपार्श्वं, चुल्लेरुपान्तं, चुल्लिपार्श्वे आसनं.

CHIMNEY-PIECE, *s.* चुल्लिशीर्षं, चुल्लिशिला, चुल्लेरुपरि प्रस्तरः.

CHIMNEY-SWEEPER, *s.* धूमरन्ध्रसम्मार्ज्जकः, चुल्लिसम्मार्ज्जकः.

CHIN, *s.* चिबुकं, चिबुः *m.*, हनुः *m. f.*, चिबिः *m.*, पोचं, जम्भः.

CHIN-COUGH, *s.* बालानाम् आक्षेपकः कासः, महाकासः.

CHINA, *s.* (Porcelain) कौलालकं, मृन्मयं भाण्डं, मार्त्तिकं भाण्डं.—(The country) चीनः; 'China-cloth,' चीनांशुकं; 'China-rose,' ओड्रपुष्पं, जवा.

CHINE, *s.* सपृष्ठास्थि पृष्ठमांसं, सवंशः पृष्ठभागः, पृष्ठं, कशेरुका.

To CHINE, *v. a.* पृष्ठास्थिरूपेण छिद् (c. 7. छिनत्ति, छेत्तुं), पृष्ठवंशानुलोमं छिद्.

CHINK, *s.* (Aperture) छिद्रं, रन्ध्रं, सन्धिः *m.*—(Sound) शिञ्जितं, क्वणितं.

To CHINK, *v. n.* (To open in gaps) स्फुट् (c. 6. स्फुटति, स्फुटितुं), विदॄ in pass. (-दीर्य्यते), फल् (c. 1. फलति, फलितुं).—(To ring as metal) क्वण् (c. 1. क्वणति, क्वणितुं), शिञ्ज् (c. 2. शिंक्ते, शिञ्जितुं).

CHINKY, *a.* छिद्रपूर्णः -र्णा -र्णं, छिद्रितः -ता -तं, बहुरन्ध्रवान् -वती -वत् (त्)

CHINTZ, *s.* चित्रितपटं, चित्रकार्पासं, पटी, पटोलं, चीनांशुकं.

CHIP, *s.* विदलं, तष्टं, भिन्नं, भित्तिः *f.*, भित्तं, खण्डं, शकलं; 'a chip of wood,' काष्ठखण्डं.

To CHIP, *v. a.* तक्ष् (c. 1. तक्षति, तक्षितुं), विदलीकृ, खण्डीकृ.

CHIP-AXE, *s.* तक्षणी, छिदिः *f.*, तङ्कः, वृक्षभिद्.

CHIPPINGS, *s. pl.* विदलानि, भित्तानि, खण्डानि, तष्टानि.

CHIRAGRA, *s.* वातरोगविशेषो यत्र करमात्रम् उपहतं, हस्तशोथः.

CHIROGRAPHER, *s.* हस्तलेखकः, लिपिकरः, कायस्थः, अक्षरजीवकः.

CHIROGRAPHY, *s.* हस्तलेखनं, लेखनविद्या, लिपिः *f.*, लिखनं.

CHIROMANCER, *s.* हस्तरेखालक्षणात् शुभाशुभदर्शकः, हस्तरेखाविद्याज्ञः.

CHIROMANCY, *s.* हस्तरेखालक्षणात् शुभाशुभदर्शनं, हस्तरेखाविद्या, सामुद्रविद्या.

To CHIRP, *v. n.* पक्षिवत् कूज् (c. 1. कूजति, कूजितु), अनुकूज्, विकूज्, क्षिप्र or क्षिप्र शब्दं कृ, सुरारिं कृ.

CHIRPING, *s.* कूजितं, रावः, सुरारिः *m.*, वाशितं, रुतं, काकली -लिः.

CHIRURGEON, *s.* कायशल्यादिभिषक् *m.* (ज्). *See* SURGEON.

CHISEL, *s.* व्रश्चनः, तक्षणी, तङ्कः, वृक्षभेदी *m.* (न्), वृक्षादनः, शिलाभेदः, शिलाकुट्टकः, शैलभित्तिः *f.*

To CHISEL, *v. a.* तक्ष् (c. 1. तक्षति, तक्षितुं), व्रश्च् (c. 6. वृश्चति, व्रश्चितुं).

CHIT, *s.* (A child) बालः -ला, बालकः, शिशुः *m.*, शावकः.—(A freckle) तिलः -लकः, जडुलः.

CHIT-CHAT, *s.* विश्रम्भालापः, विश्रम्भकथितं, वृथाकथा, सङ्कथा, जल्पः.

CHITTERLINGS, *s. pl.* पश्वन्त्राणि *n. pl.*, पशुनाड्यः *f. pl.*, पुरीतत् *m. n.*

CHITTY, *a.* बालकीयः -या -यं, बालेयः -यी -यं, बालिशः -शा -शं.

CHIVALROUS, *a.* सुविक्रान्तः -न्ता -न्तं, महावीर्य्यः -र्य्या -र्य्यं, धामवान् -वती -वत् (त्).

CHIVALRY, *s.* (Knighthood) सादिपदं, रथिपदं, महारथत्वं.—(Prowess) सुविक्रमः, सुवीर्य्यं, धाम *n.* (न्), पौरुषं, कर्म्मोदार्य, रणोत्साहः.

CHIVES, *s.* पुष्पकेशराग्रं, पुष्पपक्ष्माग्राणि *n. pl.*

CHOCOLATE, *s.* आमेरिकादेशीयवृक्षफलं, तत्फलनिर्मितं पानीयं.

CHOICE, *s.* (The act) वरणं, वृतिः *f.*, वरः.—(The power of choice

between two things) विकल्पः -ल्पकः ; 'choice of a husband by a bride,' स्वयंवरः ; 'the best of any thing,' उत्तमभागः, परभागः, उत्तमांशः, रत्नं in comp.; 'of one's own choice,' कामतस्, इच्छातस्, यथेप्सितं, यथेष्टं, यथाकामं.

CHOICE, *a.* उत्तमः -मा -मं, सर्व्वोत्तमः -मा -मं, विशिष्टः -ष्टा -ष्टं, शिष्टः -ष्टा -ष्टं, अनुत्तमः -मा -मं, मनोनीतः -ता -तं, विशेष्यः -ष्या -ष्यं, सारः -रा -रं, सारवान् -वती -वत् (त्), उत्कृष्टः -ष्टा -ष्टं, अभीष्टः -ष्टा -ष्टं, प्रशस्तः -स्ता -स्तं, भद्रतमः -मा -मं, सर्व्वश्रेष्ठः -ष्ठा -ष्ठं ; 'choice food,' भोजनविशेषः, विशिष्टान्नं.

CHOICELESS, *a.* अविकल्पः -ल्पा -ल्पं, अवैकल्पिकः -की -कं.

CHOICELY, *adv.* विशिष्टप्रकारेण, सविशेषं, उत्तमप्रकारेण, प्रशस्तं.

CHOICENESS, *s.* उत्कृष्टता, प्रकृष्टत्वं, वैशिष्ट्यं, विशिष्टता, श्रेष्ठता, प्राशस्त्यं, सौकर्य्यं.

CHOIR, *s.* गायकचक्रं, गायकचक्रं, गायकसमूहः, चाक्रिकगणः.—(Part of a church) पूजाशालायाः सङ्कीर्त्तनयोग्यं मध्यमस्थलं.

To CHOKE, *v. a.* (To suffocate) कण्ठं सम्पीड् (c. 10. -पीडयति -यितुं) or ग्रस् (c. 1. ग्रसति, ग्रसितुं), गलहस्त (nom. गलहस्तयति -यितुं), गलग्रहं कृ, श्वासावरोधं कृ, श्वासवारणं कृ.—(To obstruct) रुध् (c. 7. रुणद्धि, रोद्धुं), निरुध्, अवरुध्, संरुध् ; प्रतिबन्ध् (c. 9. -बध्नाति -बन्द्धुं).

CHOKED, *p. p.* अवरुद्धश्वासः -सा -सं, सन्नकण्ठः -ण्ठा -ण्ठं, निरुद्धः -द्धा -द्धं.

CHOKER, *s.* (Argument that stops the mouth) गलहस्तः.

CHOLAGOGUES, *s.* पित्तद्रावणं, पित्तद्रावकः, पित्तघ्नं, पित्तनाशनं.

CHOLER, *s.* (Bile) पित्तं.—(Rage) क्रोधः, कोपः, रोषः, अमर्षः

CHOLERA, *s.* विसूचिका, विषूचिका, महामारी.

CHOLERIC, *a.* पित्तवेगी -गिनी -गि (न्), क्रोधी -धिनी -धि (न्), कोपी -पिनी -पि (न्), चण्डः -ण्डा -ण्डं ; 'choleric constitution,' पित्तप्रकृतिः

CHOLIC, *s.* शूलः -लं, पक्तिशूलं. *See* COLIC.

To CHOOSE, *v. a.* (Select) वृ (c. 5. वृणोति -णुते, c. 9. वृणाति -णीते, c. 1. वरति, वरितुं, वरीतुं), आवृ, प्रवृ ; or in caus. (वरयति -यितुं), अनुरुच् in caus. (-रोचयति -यितुं), वावृत् (c. 4. वावृत्यते).—(Take) ग्रह् (c. 9. गृह्णाति, ग्रहीतुं).—(Appoint) नियुज् (c. 10. -योजयति -यितुं), निरूप् (c. 10. -रूपयति -यितुं).

To CHOOSE, *v. n.* (To be willing) इष् (c. 6. इच्छति, एषितुं), रुच् (c. 1. रोचते) used impersonally. न प्रत्याख्या (c. 2. -ख्याति -ख्यातुं), अभिरुच् in caus. (-रोचयते -यितुं).

To CHOP, *v. a.* (To cut into pieces) खण्डं खण्डं कृ or खण्डशः कृ or छिद् (c. 7. छिनत्ति, छेत्तुं), शकलीकृ, विदलीकृ.

CHOP, *s.* खण्डं, शकलं, भिन्नं, भित्तिः, विदलं.—(Of meat) मांसखण्डं.—(A mutton chop) औरभ्रखण्डं.

CHOP-HOUSE, *s.* पक्वमांसविक्रयस्थानं, पाकशाला.

CHOPPING, *a.* हृष्टपुष्टः -ष्टा -ष्टं, मांसलः -ला -लं, स्थूलः -ला -लं.

CHOPPING-KNIFE, *s.* मांसछेदनार्थं छुरिका, मांसखण्डनी छुरिका.

CHOPS, *s.* (Mouth) मुखं, आननं, आस्यं.—(Of a river) सम्भेदः.

CHORAL, *a.* साङ्गीतिकः -की -कं, गानीयः -या -यं, चाक्रिकः -की -कं.

CHORD, *s.* (A string) गुणः. *See* CORD.—(Of an instrument) तन्त्री *f.*—(Of arc) द्विज्या, ज्या, ज्यका, जीवा

CHORDED, *p. p.* तन्त्री -न्त्रिणी -न्त्रि (न्).

CHORIAMBUS, *s.* (In prosody) विप्रः.

CHORION, *s.* गर्भकोशः, गर्भवेष्टनं, गर्भाशयः, गर्भावरणं चर्म्म.

CHORISTER, *s.* प्रधानमन्दिरस्य गायकः or गायकः, चाक्रिकः, तालावचरः, किन्नरः, किम्पुरुषः.

CHOROGRAPHER, *s.* देशविवरणकृत, देशवर्णनकृत, देशपर्य्यमालेखकः.

CHORUS, *s.* (Number of singers) गायकगणः, गायकसमूहः.—(Dramatic) पार्श्वस्थः, पारिपार्श्विकः.—(Of a song) ध्रुवकः, ध्रुवः, अनुपदं.

CHOSEN, *p. p.* मनोनीतः -ता -तं, वृतः -ता -तं, वृत्तः -त्ता -त्तं, वावृत्तः -त्ता -त्तं.

CHOUGH, *s.* काकजातीयः समुद्रवेलासेवी पक्षिभेदः.

To CHOUSE, *v. a.* वञ्च् (c. 10. वञ्चयते -ति -यितुं), प्रलभ् (c. 1. -लभते -लब्धुं), छल् (c. 10. छलयति -यितुं).

CHOUSE, *s.* (Trick) छलं, कूटः -टं, व्याजः.—(A cheater) वञ्चकः.

CHOWRIE, *s.* (Tail used to drive away flies) चामरं, अवचूलकं, रोमगुच्छः, रोमकेशरं.

CHRISM, *s.* अभ्यञ्जनं, अञ्जनं, अभिषेकः -षेचनं.

CHRIST, *s.* (The anointed) अभिषिक्तः.—(The anointed Saviour) अभिषिक्तत्राता *m.* (तृ). Modern scholars coin the word ख्रीष्टः.

To CHRISTEN, *v. a.* (To baptize) जलसंस्कारेण ख्रीष्टीयं -यां -यं कृ, जलसंस्कारेण ख्रीष्टीयमतधारिणां or ख्रीष्टीयानां मध्ये प्रविश् in caus. (-वेशयति -यितुं).—(To name) नाम कृ, नाम दा (c. 3. ददाति, दातुं).

CHRISTENDOM, *s.* ख्रीष्टीयमतधारिणां कृत्स्नसमूहः, ख्रीष्टीयदेशसामग्र्यं, ये केचिद् देशाः ख्रीष्टीयमतं धारयन्ति तत्साकल्यं.

CHRISTENING, *s.* जलसंस्कारः, जलसंस्कारेण ख्रीष्टीयानां मध्ये प्रवेशनं.—(Naming) नामकरणं.

CHRISTIAN, *s* ख्रीष्टीयः, ख्रीष्टीयमतधारी *m.* (न्), ख्रीष्टीयमतावलम्बी *m.* (न्).

CHRISTIAN-NAME, *s.* जलसंस्कारकाले दत्तं नाम *n.* (न्), नाम, गुप्तनाम, राशिनाम.

CHRISTIANITY, *s.* ख्रीष्टीयमतं, ख्रीष्टीयानां मतं, ख्रीष्टीयधर्म्मः.

CHRISTIANLY, *adv.* ख्रीष्टीयवत्, ख्रीष्टीयधर्म्मानुसारेण.

CHRISTMAS-BOX, *s.* ख्रीष्टजन्मोत्सवकाले दत्तं (or देयं) पारितोषिकं.

CHRISTMAS-DAY, *s.* ख्रीष्टजन्मदिवसमुद्दिश्य महोत्सवः, ख्रीष्टजन्मपर्व्व *n.* (न्).

CHROMATIC, *a.* (Relating to colour) वर्णसम्बन्धी -न्धिनी -न्धि (न्), रङ्गी -ङ्गिणी -ङ्गि (न्).—(In music) ग्रामीणः -णा -णं, ग्रामिकः -की -कं.

CHRONIC or CHRONICAL, *a.* कालिकः -की -कं, दीर्घकालीनः -ना -नं, अविसर्गी -र्गिणी -र्गि (न्); 'chronical distemper,' दीर्घरोगः, दीर्घव्याधिः *m.*

CHRONICLE, *s.* इतिहासः, पुरावृत्तविवरणं, वृत्तविवरणं or -रणपुस्तकं, पुरावृत्ताख्यानं, पुरावृत्तग्रन्थः, समाचारग्रन्थः, शिष्टसमाचारः.

To CHRONICLE, *v. a.* इतिहासपुस्तकेषु समारुह् in caus. (-रोपयति -यितुं) or अभिलिख् (c. 6. -लिखति -लेखितुं), यथाक्रमं वृत्तविवरणं कृ or वृत्तानि रच् (c. 10. रचयति -यितुं).

CHRONICLER, *s.* ऐतिहासिकः, इतिहासलेखकः, पुरावृत्तरचकः, वृत्तविवरणकृत्, शिष्टसमाचाररचकः.

CHRONOGRAM, *s.* यथा अक्षरविन्यासात् संवत्सरकादिकालो निर्णेतुं शक्यते तथा प्रस्तरादौ लिखितम् अमुकप्रसिद्धवृत्तविवरणं.

CHRONOLOGIST, *s.* कालगणकः, कालगणनाविद्वान्, कालज्ञः, यथाकालं or कालक्रमेण पुरावृत्तरचकः, वृत्तकालनिरूपकः, गतकालनिर्णेता *m.* (तृ).

CHRONOLOGICAL, *a.* कालगणनाविषयकः -का -कं, कालिकः -की -कं.

CHRONOLOGICALLY, *adv.* यथाकालं, कालक्रमेण, कालक्रमानुसारेण.

CHRONOLOGY, *s.* कालगणनाविद्या, कालनिरूपणविद्या, कालनिर्णयविद्या, कालक्रमेण पुरावृत्तरचना.

CHRONOMETER, *s.* कालपरिमाणार्थं यन्त्रं, घटी, यामनाली.

CHRYSALIS, *s.* कोशस्थः, कोशवासी *m.* (न्), कोषकारः, डिम्बः, गुटिका.

CHRYSOLITE, *s.* चन्द्रकान्तः, हरिताश्म *n.* (न्), पीतमणिः *m.*

CHUB, *s.* स्थूलशिरस्को नादेयमत्स्यभेदः.

CHUBBED, *a.* स्थूलशिरस्कः -स्का -स्कं, स्थूलमस्तकः -का -कं.

CHUBBY-FACED, *a.* स्थूलास्यः -स्या -स्यं, स्थूलाननः -नी -नं.

CHUCK, *s.* (The cry of a hen) कुक्कुटीरावः, कुक्कुटीनादः.—(A term of endearment) प्रिये voc. c. *f.*, वत्स voc. c. *m.*, वत्से voc. c. *f.*

To CHUCK, *v. n.* (To call as a hen) कुक्कुटीवद् रु (c. 2. रौति, रवितुं). —(To give a gentle blow under the chin) वात्सल्यात् परचिबुकम् ईषत्प्रहारेण उन्नम् in caus. (-नमयति -यितुं).

CHUFF, *s.* (A loutish clown) ग्राम्यजनः, ग्रामिकः, ग्रामबुद्धिः, स्थूलबुद्धिः, असभ्यः, जडः.

CHUFFY, *a.* ग्राम्यः -म्या -म्यं, मन्दमतिः -तिः -ति, स्थूलः -ला -लं.

CHUM, *s.* वयस्यः, सहवासी *m.* (न्), सङ्गी *m.* (न्), प्रियमित्रं, संसर्गी *m.* (न्)

CHUMP, *s.* स्थूलकाष्ठं, स्थूलदारु: *m.*, वृहत्काष्ठखण्डं.

CHURCH, *s.* (Place of worship) मन्दिरं, पूजाशाला, भजनभवनं, भजनगृहं, प्रासादः, मण्डपः.—(The body of Christians) खृष्टमतधारिणां कृत्स्नसमूहः, मण्डली -लं, समाजः.

To CHURCH, *v. a.* प्रसवसमुत्थितां स्त्रीं परमेश्वरस्य धन्यवादं कृ in caus. (कारयति -यितुं).

CHURCHMAN, *s.* पुरोहितः, याजकः, धर्म्माध्यापकः.

CHURCHWARDEN, *s.* मन्दिररक्षकः, भजनगृहपालकः, पूजाशालाध्यक्षः.

CHURCHYARD, *s.* श्मशानं, प्रेतवनं, पितृवनं, शवनिखननस्थानं; 'churchyard flowers,' पितृवनसुमनः *n.* (स्).

CHURL, *s.* (A rustic) ग्राम्यजनः, ग्रामजः, ग्रामी *m.* (न्), असभ्यः.—(A rude man) कुशीलः, दुःशीलः, वामशीलः.—(A miser) कृपणः, कदर्य्यः, मुष्टेरुकः.

CHURLISH, *a.* दुराचारः -रा -रं, दुष्प्रकृतिः -तिः -ति, अविनयः -या -यं, अशिष्टः -ष्टा -ष्टं, अश्लीलः -ला -लं, क्रूराचारः -रा -रं, खलः -ला -लं, कदर्य्यः -र्य्या -र्य्यं.

CHURLISHLY, *adv.* असभ्यवत्, कदर्य्यवत्, कृपणं, अश्लीलं.

CHURLISHNESS, *s.* कुशीलता, अश्लीलता, अशिष्टता, अविनयः, असभ्यता.

CHURN, *s.* मन्थनी, मन्थिनी, गर्गरी, मन्थनघटी, जालगणिका.

To CHURN, *v. a.* मथ् (c. 1. मथति, मथितुं) or मन्थ् (c. 1. मन्थति, c. 9. मथ्नाति, मन्थितुं), उन्मन्थ्, निर्मन्थ्, खज् (c. 1. खजति, खजितुं), समालुड् (c. 1. -लोडति -लोडितुं, c. 10. -लोडयति -यितुं).

CHURNED, *p. p.* मथितः -ता -तं, प्रमथितः -ता -तं, आलोडितः -ता -तं, दण्डाहतः -ता -तं, व्याघट्टितः -ता -तं, कोथः -था -थं.

CHURNING, *s.* मन्थः, मन्थनं, मथनं, आलोडनं, समालोडा, खजा, कोथः.

CHURN-STAFF, *s.* मन्थः, मन्था *m.* (मथिन्), मन्थदण्डकः, मन्थानः, दधिचारः, वैशाखः, खजकः.

CHYLE, *s.* अन्नरसः, धातुपः, रसः, भोज्यसम्भवः, असमातृका, अन्नसारः.

CHYLIFACTORY, *a.* धातुपकारी -रिणी -रि (न्), अन्नरसोत्पादकः -का -कं.

CHYLOUS, *a.* अन्नरसमयः -यी -यं, धातुपरूपः -पा -पं.

CHYMIC or CHYMICAL, *a.* रसायनविद्यासम्बन्धी -न्धिनी -न्धि (न्), रसायनजः -जा -जं.

CHYMICALLY, *adv.* रसायनविद्यानुसारात्, रसायनविद्यानुरूपेण.

CHYMIST, *s.* रसायनविद्याज्ञः, रसज्ञः, रसायनः.

CHYMISTRY, *s.* रसायनं, रसायनविद्या, रसविद्या, रसज्ञता.

CIBARIOUS, *a.* अन्नमयः -यी -यं, भोज्यः -ज्या -ज्यं, आद्यः -द्या -द्यं.

CICATRICE, *s.* सिध्म *n.* (न्), सिध्मं, शुष्कव्रणः, रूढक्षतचिह्नं, रूढक्षतं.

CICATRIZATION, *s.* व्रणविशोषणं, व्रणशोधनं, रोपणं, व्रणरोपणं, समुत्थानं, प्रतिसारणं, प्रतिसरः.

To CICATRIZE, *v. a.* क्षतं रुह् in caus. (रोपयति -यितुं) or शुष् in caus. (शोषयति -यितुं) or शुष्कीकृ, प्रतिसृ in caus. (सारयति -यितुं).

CICATRIZED, *p. p.* रूढः -ढा -ढं, रोपितः -ता -तं, शुष्कः -ष्का -ष्कं, समुत्थितः -ता -तं, प्रतिसारितः -ता -तं.

To CICURATE, *v. a.* दम् in caus. (दमयति -यितुं), वशीकृ, निग्रह् (c. 9. -गृह्णाति -ग्रहीतुं).

CIDER, *s.* आम्ररसः पानीयविशेषः, आम्रफलनिर्म्मितो मद्यविशेषः.

CILIARY, *a.* नेत्रच्छदसम्बन्धी -न्धिनी -न्धि (न्), वर्त्मसम्बन्धी &c.

CILICIOUS, *a.* लोममयः -यी -यं, लोमशः -शा -शं.

CIMITER, *s.* वक्रखड्गः, चन्द्रहासः, मण्डलाग्रः, खड्गः, निस्त्रिंशः, कृपाणः -णकः, असिरिष्टिः *m.*

CINCTURE, *s.* मेखला, कटिसूत्रं, रसना, काञ्ची, वन्धनं.

CINDER, *s.* अग्नेरुच्छिष्टं, तमाङ्गारोच्छिष्टं, अङ्गारः -रं, भस्म *n.* (न्).

CINERATION, *s.* भस्मीकरणं, भस्मसात्करणं.

CINERITIOUS, *a.* भास्मनः -नी -नं, भस्मरूपः -पा -पं.

CINNABAR, *s.* रससिन्दूरं, रसस्थानं, रक्तपारदं.

CINNAMON, *s.* दारुगन्धः, तिक्तवल्कलं, सुगन्धत्वक् *f.* (च्), गन्धवल्कलं.

CINNAMON-TREE, *s.* पूर्व्वोक्ततिक्तवल्कलविशिष्टः सिंहलद्वीपरोही क्षुद्रवृक्षः.

CINQUE, *s.* (A five) पञ्चकः, पञ्चत्वं.

CINQUEFOIL, *s.* पञ्चपर्णी, पञ्चपत्री, पञ्चदली.

CINQUE-SPOTTED, *a.* पञ्चचिह्नविशिष्टः -ष्टा -ष्टं, पञ्चतिलवान् -वती -वत (त्).

CION, *s.* पल्लवं, नवपल्लवं, किसलः -लं, किसलयः -यं.

CIPHER, *s.* (An arithmetical character) अङ्कः, गुणनिका.—(Character in general) अक्षरं, वर्णः.—(Mark standing for nothing) शून्यं, विन्दुः *m.*, वटः, हः, ठः, खं.—(Occult character in writing) बीजाक्षरं, बीजं.

To CIPHER, *v. a.* (To practise arithmetic) अङ्कविद्याम् अभ्यस् (c. 4. -अस्यति -असितुं) or शिक्ष् (c. 1. शिक्षते, शिक्षितुं).—(To write in occult characters) बीजाक्षरैर् अङ्क् (c. 10. अङ्कयति -यितुं) or लिख् (c. 6. लिखति, लेखितुं).

CIPHERING, *s.* अङ्कनं, गणितं, अङ्कविद्या, गणनविद्या, पाटीगणितं.

CIRCLE, *s.* (A round line) मण्डलं, परिमण्डलं, चक्रं, चक्रवालं, वृत्तं, गोलः -लं, निचः, चन्द्रकः, वटः, वर्णकः, वलयः -यं.—(Circuit, circumference) परिणाहः, परिधिः *m.*, परिवेष्टनं, वृत्तिः *f.*, परिवेशः; 'the circle of the earth,' भूपरिधिः *m.*, भूमण्डलं.—(A circle of people, assembly) मण्डलं, परिषद् *f.*, पंक्तिः *f.*—(Circle on the forehead) तिलकः -कं, तमालपत्रं, चित्रकं, विशेषकं; 'segment of a circle,' वृत्तखण्डं, खण्डमण्डलं; 'area of a circle,' फलं.

To CIRCLE, *v. a.* (To surround) परिवेष्ट् (c. 1. -वेष्टते -वेष्टितुं), परिवृ (c. 5. वृणोति -वरितुं -वरीतुं), परिष्ठा (c. 1. -तिष्ठति, -ष्ठातुं), मण्डल (nom. मण्डलयति -यितुं).

To CIRCLE, *v. n.* (To move circularly) चक्रवत् परिवृत् (c. 1. -वर्त्तते -वर्त्तितुं), or आवृत् or परिभ्रम् (c. 1. -भ्रमति, c. 4. -भ्राम्यति -भ्रमितुं), मण्डल (nom. मण्डलायते).

CIRCLED, *p. p.* मण्डलितः -ता -तं, परिमण्डलितः -ता -तं, वलयितः -ता -तं.—(Having the form of a circle) मण्डली -लिनी -लि (न्), मण्डलाकारः -रा -रं, चक्राकारः -रा -रं.

CIRCUIT, *s.* (Compass, circumference) मण्डलं, परिमण्डलं, परिधिः *m.*, परिमाणं, परिणाहः, परीणाहः, परिवेष्टनं.—(Act of moving round) परिवर्त्तनं, आवर्त्तः, आवृत्तिः *f.*, आवर्त्तनं, विवर्त्तः, भ्रमणं, परिभ्रमः, घूर्णिः *f.*—(Visitation of a judge) धर्म्माध्यक्षाभ्यागमनं, प्राड्विवाकभ्रमणं.

To CIRCUIT, *v. n.* परिभ्रम् (c. 4. -भ्राम्यति -भ्रमितुं), परिवृत् (c. 1. -वर्त्तते -वर्त्तितुं).

Circuitous, *a.* वक्रः -क्रा -क्रं, कुटिलगामी -मिनी -मि (न्), सुदीर्घः -र्घा -र्घं.

Circular, *a.* वर्त्तुलः -ला -लं, मण्डली -लिनी -लि (न्), चाक्रिकः -की -कं, चक्राकारः -रा -रं, चक्राकृतिः -तिः -ति, चक्री -क्रिणी -क्रि (न्), चक्रवान् -वती -वत् (त्), चाक्रेयः -यी -यं, वटी -टिनी -टि (न्), निघः -घा -घं, विष्वक्समः -मा -मं.

Circularity, *s.* मण्डलता, परिमण्डलता, वर्त्तुलत्वं, चक्राकारता, गोलाकारत्वं.

Circularly, *adv.* चक्रवत्, चक्ररूपेण, गोलवत्, मण्डलवत्, मण्डलतस्.

To circulate, *v. n.* प्रचल् (c. 1. -चलति -चलितुं), प्रचर् (c. 1. -चरति -चरितुं), परिवृत् (c. 1. -वर्त्तते -वर्त्तितुं), सम्परिवृत्, विपरिवृत्, विवृत्.

To circulate, *v. a.* परिवृत् in caus. (-वर्त्तयति -यितुं), प्रचल् in caus. (-चलयति -यितुं).

Circulated, *p. p.* प्रचलितः -ता -तं, परिवर्त्तितः -ता -तं, प्रचारितः -ता -तं, व्यावर्त्तकः -का -कं.

Circulating, *a.* प्रचलः -ला -लं, परिवर्त्ती -र्त्तिनी -र्त्ति (न्), व्यावर्त्तकः -का -कं.

Circulation, *s.* परिवर्त्तः -र्त्तनं, व्यावर्त्तः, प्रचारः, प्रचलनं, प्रचरः, भ्रमणं, परिभ्रमणं, चलनं, प्राचुर्य्यं.—(Of the blood) रक्तचलनं रक्तवहनं.

Circulatory, *a.* वर्त्तुलः -ला -लं, चाक्रिकः -की -कं, मण्डली -लिनी -लि (न्).

Circumambiency, *s.* परिवेष्टनं, व्याप्तिः *f.*, व्यापनं, व्यापकत्वं, परिगमनं.

Circumambient, *a.* परिवेष्टकः -का -कं, व्यापकः -का -कं, परिगतः -ता -तं.

To circumambulate, *v. n.* परिक्रम् (c. 1. -क्रामति -क्रमितुं), परिभ्रम (c. 4. -भ्राम्यति -भ्रमितुं).

Circumambulation, *s.* परिक्रमः, परिभ्रमणं, परिसर्य्या, परीसारः, पर्य्यटनं. —(Reverential) प्रदक्षिणः -णा -णं.

To circumcise, *v. a.* त्वचं छिद् (c. 7. छिनत्ति, छेत्तुं), लिङ्गाग्रचर्म्म छिद्, परिच्छिद्, परिकृत् (c. 6. -कृन्तति -कर्त्तितुं). —(A circumcised man) दुश्चर्म्मा *m.* (न्), वण्डः, वण्ठः, दुर्बलः, छिन्नग्नकः.

Circumcision, *s.* त्वक्छेदनं, लिङ्गाग्रचर्म्मच्छेदनं, दौश्चर्म्म्यं, परिकर्त्तनं.

To circumduct, *v. a.* लुप् (c. 6. लुम्पति, लोप्तुं), व्यर्थीकृ, मोघीकृ, निष्फलीकृ.

Circumduction, *s.* लोपः, अनिष्पादनं, मोघीकरणं, व्यर्थीकरणं.

Circumference, *s.* परिधिः *m.*, मण्डलं, परीणाहः, परिणाहः, परिमाणं, वृत्तिः *f.*, चक्रवालं, पालिः *f.*, परिवेशः -षः, परिवेष्टनं.—(Of a wheel) चक्रपरिधिः *m.*, नेमिः *f.*, प्रधिः *m.*, प्रधिमण्डलं, नीध्रं, नीव्रः —(Of the earth) भूपरिधिः *m.*

Circumflex, *s.* (Accent) स्वरितः, तृतीयम् उच्चारणचिह्नं.

Circumfluence, *s.* परिस्रवः, परिप्रवः, परिवाहः, परिस्यन्दनं, परिगलनं.

Circumfluent or circumfluous, *a.* परिस्रुतः -ता -तं, परिसारी -रिणी -रि (न्), परिस्यन्दी -न्दिनी -न्दि (न्), परिस्यन्नः -न्ना -न्नं, परिगलितः -ता -तं.

Circumforaneous, *a.* गृहाद्गृहम् अटमानः -ना -नं, अटाट्यमानः -ना -नं.

To circumfuse, *v. a.* परिप्लु in caus. (-प्लावयति -यितुं), समाप्लु.

Circumfused, *p. p.* परिप्लुतः -ता -तं, समाप्लुतः -ता -तं, परिगलितः -ता -तं, परिगतः -ता -तं, व्याप्तः -प्ता -प्तं, समाक्रान्तः -न्ता -न्तं.

Circumfusile, *a.* परिस्रावी -विणी -वि (न्), व्यापकः -का -कं, व्यश्नुवानः -ना -नं.

Circumfusion, *s.* परिस्रावः, परिप्रवः, व्याप्तिः *f.*, व्यापकत्वं, परिगलनं.

To circumgyrate, *v. n.* परिवृत् (c. 1. -वर्त्तते -वर्त्तितुं), व्यावृत्, घूर्ण् (c. 1. घूर्णते, घूर्णितुं), परिघूर्ण, व्याघूर्ण.

Circumgyration, *s.* चक्रावर्त्तः, आवर्त्तः, परिवर्त्तः, आवृत्तिः *f.*, घूर्णिः *f.*

Circumjacent, *a.* पर्य्यन्तस्थः -स्था -स्थं, सामन्तस्थः -स्था -स्थं, उपान्तिकः -की -कं.

Circumition, *s.* परिगमः, परिक्रमः, परिसर्य्या, परिभ्रमः.

Circumlocution, *s.* वाग्विस्तारः, वाक्यविस्तरः, वक्रोक्तिः *f.*, वक्रभणितं, व्याजोक्तिः *f.*, अत्युक्तिः, अतिशयोक्तिः, बहुवाक्यं, बहूक्तिः, वाक्यबाहुल्यं.

Circumlocutory, *a.* बहुवाक्यः -क्या -क्यं, विस्तीर्णवाक्यः -क्या -क्यं, वक्रः -क्रा -क्रं.

Circumnavigable, *a.* समन्तात् or परितो नावा तार्य्यः -र्य्या -र्य्यं.

To circumnavigate, *v. a.* समन्तात् नावा तॄ (c. 1. तरति, तरितुं, तरीतुं) or प्लु (c. 1. प्लवते, प्लोतुं).

Circumnavigation, *s.* नौकया समन्तात् तरणं.

Circumrotation, *s.* चक्रावर्त्तः, परिवर्त्तः, आवर्त्तः, आवृत्तिः *f.*, घूर्णिः *f.*

Circumrotatory, *a.* चक्रवत् परिवर्त्ती -र्त्तिनी -र्त्ति (न्), आवर्त्तमानः -ना -नं, घूर्णायमानः -ना -नं.

To circumscribe, *v. a.* परिमा (c. 2. -माति, c. 3. मिमीते -मातुं), संहृ (c. 1. -हरति -हर्त्तुं), संयम् (c. 1. -यच्छति -यन्तुं), नियम्, समन्त (nom. समन्तयति -यितुं).

Circumscribed, *p. p.* परिमितः -ता -तं, संहृतः -ता -तं, संयतः -ता -तं, सबाधः -धा -धं, सङ्कुचितः -ता -तं, संवृतः -ता -तं, समर्य्यादः -दा -दं, सावधिकः -की -कं, सुसंस्थितः -ता -तं, सुसङ्गृहीतः -ता -तं.

Circumscription, *s.* परिमाणं, संयमनं, संहरणं, सङ्कोचः, संवारः, संवृतिः *f.*

Circumspect, *a.* अवहितः -ता -तं, स्ववहितः -ता -तं, सावधानः -ना -नं, समीक्ष्यकारी -रिणी -रि (न्) or विमृश्यकारी, अप्रमत्तः -त्ता -त्तं, परिणामदर्शी -र्शिनी -र्शि (न्).

Circumspection, *s.* अवधानं -नता, सावधानता, अप्रमादः, समीक्ष्यकारित्वं.

Circumspectly, *adv.* अवेक्षया, सावधानं, सुसमीक्ष्य, सुविमृश्य.

Circumstance, *s.* (Something adjunct to a fact) सम्बन्धः, अनुबन्धः. —(A thing, fact) विषयः, वस्तु *n.*, भूतं, विषयकत्वं.—(Incident, event) वृत्तं, वृत्तान्तः, सम्भवः.—(Condition, state) अवस्था, दशा, स्थितिः *f.*, संस्थितिः *f.*, भावः, वृत्तिः *f.*, गतिः *f.*; 'he related all the circumstances as they occurred,' सकलवृत्तान्तं यथावृत्तं न्यवेदयत्; 'according to circumstances,' यथासम्भवं, यथास्थितं; 'in good circumstances,' सुस्थितः -ता -तं, सुस्थः -स्था -स्थं; 'in bad circumstances,' दुःस्थः -स्था -स्थं, दुर्गतः -ता -तं.

Circumstanced, *p. p.* स्थितः -ता -तं, अवस्थितः -ता -तं, स्थः -स्था -स्थं in comp., भूतः -ता -तं, वर्त्ती -र्त्तिनी -र्त्ति (न्); 'so circumstanced,' एवम्भूतः -ता -तं, इत्थम्भूतः -ता -तं, एवंविधः -धा -धं, तथाविधः -धा -धं.

Circumstant, *a.* समन्तात् स्थायी -यिनी -यि (न्) or वर्त्ती -र्त्तिनी -र्त्ति (न्).

Circumstantial, *a.* (In detail) सविस्तरः -रा -रं, विस्तीर्णः -र्णा -र्णं, सविशेषः -षा -षं, सोपवर्णः -र्णा -र्णं, सविवरणः -णा -णं.—(Not essential) अप्रकृतः -ता -तं. —(Incidental) आगन्तुकः -का -कं.

Circumstantially, *adv.* यथावृत्तं, यथास्थितं, सुविस्तरं, विस्तरेण, उपवर्णेन, सुविवरणपूर्व्वकं, निरवशेषतस्.

Circumstantiated, *p. p.* विशेषभाववर्त्ती -र्त्तिनी -र्त्ति (न्). *See* Circumstanced.

To circumvallate, *v. a.* परिखाप्राचीरादिना परिवेष्ट् (c. 1. -वेष्टते -वेष्टितुं), समन्ताद् उपरुध् (c. 7. -रुणद्धि -रोद्धुं).

Circumvallation, *s.* (The act) परिखाप्राचीरादिना नगरपरिवेष्टनं, समन्तादुपरोधनं.—(The trenches, &c., round a besieged town) रुद्धनगरपरिगतं परिखाप्राचीरादि.

To circumvent, *v. a.* वञ्च् in caus. (वञ्चयते -ति -यितुं), परिवञ्च्, प्रलभ् (c. 1. -लभते -लब्धुं), विप्रलभ्, छल् (c. 10. छलयति -यितुं).

Circumvented, *p. p.* वञ्चितः -ता -तं, परिवञ्चितः -ता -तं, विप्रलब्धः -ब्धा -ब्धं.

CUNNING, *a.* (Sly) विदग्धः -ग्धा -ग्धं, छली -लिनी -लि (न्), छलनापरः -रा -रं, सव्याजः -जा -जं, मायी -यिनी -यि (न्), मायान्वितः -ता -तं, कापटिकः -की -कं, कूटकृत *m.f.n.*, विप्रलम्भकः -का -कं, धूर्त्तः -र्त्ता -र्त्तं, वञ्चनशीलः -ला -लं, प्रतारणशीलः -ला -लं.—(Skilful) निपुणः -णा -णं, चतुरः -रा -रं, पटुः -टुः -ट्वी -टु.

CUNNING, *s.* (Deceit, slyness) विदग्धता, वैदग्ध्यं, छलं -लना, व्याजः, माया, कपटः, कापट्यं, कूटः -टं, धूर्त्तता, वञ्चनं, प्रवञ्चना, शठता, वक्रता, कैतवं.—(Skill) पाटवं, नैपुण्यं, चातुर्यं, युक्तिः *f.*

CUNNINGLY, *adv.* विदग्धं, छलेन, सव्याजं, समायं, वैदग्ध्येन, सपाटवं.

CUP, *s.* पात्रं, पानपात्रं, भाण्डं, भाजनं, कंसः -सं, कांस्यः -स्यं, चषकः, शरावः, कुम्भलः, कुशयः, शालाजिरः -रं, पानीयाधारः.—(Any thing hollow like a cup) पुटः -टकं; 'the cup of a flower,' पुटं, पुष्पगर्भः, पुष्पकोषः; 'cup of a balance,' कल्यं.—(Drinking bout) सम्पीतिः *f.*; 'one who loves a cup,' पानासक्तः.

To CUP, *v. a.* (Draw blood by applying cupping-glasses) आचूषणं कृ, आचूषणयन्त्रेण रक्तं स्रु in caus. (स्रावयति -यितुं) or मुच् in caus. (मोचयति -यितुं) or मोक्ष् (c. 10. मोक्षयति -यितुं).

CUPBEARER, *s.* पात्रवाहकः, पानपात्रवाही *m.* (न्), पात्रभृत्, मद्यरक्षकः.

CUPBOARD, *s.* अन्नकोष्ठः, कुशूलः, काण्डोलः -लकः, खाद्यद्रव्याधारः.

To CUPBOARD, *v. a.* अन्नकोष्ठे निधा (c. 3. -दधाति -धातुं) or निविश् in caus. (-वेशयति -यितुं).

CUPEL, *s.* स्वर्णकारैर् व्यवहारिता सुवर्णशोधनार्थं मूषा.

CUPID, *s.* कामः, कामदेवः, अनङ्गः, मदनः, कन्दर्पः. *See* KÁMADEVA.

CUPIDINOUS, *a.* कामी -मिनी -मि (न्), कामुकः -का -कं, लोभी -भिनी -भि (न्), लोलुभः -भा -भं, लोभाविष्टः -ष्टा -ष्टं, लाभलिप्सुः -प्सुः -प्सु, लिप्सुः -प्सुः -प्सु.

CUPIDITY, *s.* कामः -मिता, कामुकत्वं, अभिलाषः, लोभः, लुब्धता -त्वं, लाभलिप्सा, लिप्सा, कामना, तृष्णा, अभिकाङ्क्षा, अतिस्पृहा.

CUPOLA, *s.* अर्द्धगोलाकारं प्रासादशृङ्गं or हर्म्यशिखरं.

CUPPER, *s.* आचूषणयन्त्रेण रक्तमोचकः or असृक्स्रावी *m.* (न्).

Cupping-glass, *s.* रक्ताकर्षणयन्त्रं, रक्ताकर्षणार्थं काचपात्रं.

Cur, *s.* श्वा *m.* (न्), शुनकः, कुक्कुरः, दुष्टकुक्कुरः; 'cur-like,' श्ववत्.

Curable, *a.* चिकित्स्यः -त्स्या -त्स्यं, साध्यः -ध्या -ध्यं, प्रतीकार्य्यः -र्य्या -र्य्यं, शमनीयः -या -यं, चिकित्सितुं शक्यः -क्या -क्यं, स्वास्थ्यक्षमः -मा -मं.

Curableness, *s.* चिकित्स्यत्वं, साध्यता, प्रतीकार्य्यत्वं, उपशमनीयता.

Curacy, *s.* उपपुरोहितस्य वृत्तिः *f.* or व्यापारः or अधिकारः.

Curate, *s.* उपपुरोहितः, उपयाजकः, पुरोहितप्रतिनिधिः *m.*, उपगुरुः.

Curative, *a.* रोगघ्नः -घ्नी -घ्नं, रोगहरः -रा -रं, रोगान्तकः -की -कं, व्याधिशमकः -का -कं, शान्तिकरः -री -रं, शान्तिदः -दा -दं.

Curator, *s.* अध्यक्षः, अधिकारी *m.* (न्), अधिकृतः, रक्षकः, अधीशः, अवेक्षिता *m.* (तृ), अधिकर्म्मिकः, द्रष्टा *m.* (ष्टृ).

Curb, *s.* (Of a bridle) मुखयन्त्रणं, वल्गाशृङ्खलः, वागासम्बन्धिनी शृङ्खला, अश्वमुखशृङ्खला.—(Restraint) यन्त्रणं, शृङ्खलता, संयमः, यमः, निग्रहः, अवरोधः, निषेधः.

To **curb**, *v. a.* (Hold a horse in with a curb) अश्वं मुखयन्त्रणेन or मुखशृङ्खलया यम् (c. 1. यच्छति, यन्तुं).—(Restrain) यम्, संयम्; यन्त्र् (c. 10. यन्त्रयति -यितुं), निग्रह् (c. 9. -गृह्णाति -ग्रहीतुं), अवरुध् (c. 7. -रुणद्धि -रोद्धुं), निरुध्.

Curbed, *p. p.* शृङ्खलितः -ता -तं, यन्त्रितः -ता -तं, संयतः -ता -तं.

Curb-stone, *s.* परिसरस्तरोपान्ते सुदृढप्रस्तरः.

To **curd or curdle**, *v. n.* दधिरूपेण श्यै (c. 1. श्यायते, श्यातुं) or घनीभू.

To **curd or curdle**, *v. a.* दधिसात्कृ, श्यै in caus. (श्यापयति -यितुं), घनीकृ.

Curds, *s.* दधि *n.*, पयस्यं, क्षीरजं, गव्यं, किलाटः, गोरसजं, त्रप्सं, द्रप्सं, रसाला, मार्जिता.

Curdy or curdled, *a.* दधिमयः -यी -यं, श्यानः -ना -नं, शीनः -ना -नं, आश्यानः -ना -नं, घनीभूतः -ता -तं, दधिवत् संहतः -ता -तं.

Cure, *s.* (Act of healing) चिकित्सा -त्सनं -त्सितं, शमः, शान्तिः *f.*, उपशमः, रोगशान्तिः *f.*, रोगशमः, रोगोपशमः, समाधानं, प्रतिसमाधानं, रुक्प्रतिक्रिया, प्रतीकारः, रोगोपचारः.—(State of being healed) समुत्थानं, स्वास्थ्यं, सुस्थता.—(The remedy itself) भेषजं, भैषज्यं, औषधं, रोगहृत्.—(Benefice of clergyman) पुरोहितवृत्तिः *f.*, धर्म्माध्यापकस्य व्यापारः or अधिकारः.

To **cure**, *v. a.* कित् in des. (चिकित्सति -त्सितुं), शम् in caus. (शमयति -यितुं), प्रशम्, उपशम्; स्वस्थं -स्थां -स्थं कृ, सुस्थं -स्थां -स्थं कृ, प्रतिकृ, समाधा (c. 3. -दधाति -धातुं), प्रतिसमाधा, समुत्था in caus. (-थापयति for -स्थापयति -यितुं), भिषज् (nom. भिषज्यति), साध् in caus. (साधयति -यितुं).—(Cure fish or meat) लवण (nom. लवणयति -यितुं), लवणीकृ.

Cured, *p. p.* चिकित्सितः -ता -तं, शमितः -ता -तं, शान्तः -न्ता -न्तं, उपशान्तः -न्ता -न्तं, प्रशान्तः -न्ता -न्तं, स्वस्थः -स्था -स्थं, सुस्थः -स्था -स्थं, प्रतिकृतः -ता -तं, समुत्थितः -ता -तं, रोगमुक्तः -क्ता -क्तं; 'cured of fever,' विगतज्वरः -रा -रं.

Cureless, *a.* अचिकित्स्यः -त्स्या -त्स्यं, असाध्यः -ध्या -ध्यं, दुरुपचारः -रा -रं.

Curer, *s.* चिकित्सकः, रोगशान्तकः, रोगहारी *m.* (न्), रोगहा *m.* (न्), जीवदः.

Curfew, *s.* अग्निप्रदीपा निर्व्वापयितव्या इति पुरा निर्देशार्थं प्रदोषकाले वादिता घण्टा, प्रदोषकाले घण्टाशब्दः.

Curiosity, *s.* (Inquisitiveness) कौतूहलं, कुतूहलं, कौतुकं, कुतुकं, जिज्ञासा, जिज्ञासाकुतूहलं, पिपृच्छिषा, अनुसन्धानेच्छा, असति प्रयोजने किमेतदिति जिज्ञासा; 'one whose curiosity is excited,' उपजातकौतुकः.—(A rarity) दुर्लभद्रव्यं, दुष्प्राप्यद्रव्यं, बहुमतद्रव्यं, विशिष्टद्रव्यं, उत्कृष्टद्रव्यं.

Curious, *a.* (Inquisitive) कुतूहली -लिनी -लि (न्), कौतूहलान्वितः -ता -तं, कौतूहलपरः -रा -रं, कौतुकाविष्टः -ष्टा -ष्टं, जिज्ञासुः -सुः -सु, पिपृच्छिषुः -षुः -षु, अनुसन्धानेच्छुः -च्छुः -च्छु.—(Skilled in) अभिज्ञः -ज्ञा -ज्ञं, विचक्षणः -णा -णं.—(Exact, nice) सूक्ष्मः -क्ष्मा -क्ष्मं, सूक्ष्मदर्शी -र्शिनी -र्शि (न्).—(Worthy of being seen, rare) दर्शनार्हः -र्हा -र्हं, दर्शनीयः -या -यं, दुर्लभः -भा -भं, दुष्प्राप्यः -प्या -प्यं, बहुमतः -ता -तं.—(Strange, wonderful) अद्भुतः -ता -तं, चित्रः -त्रा -त्रं, विचित्रः -त्रा -त्रं, आश्चर्य्यः -र्य्या -र्य्यं, अपूर्व्वः -र्व्वा -र्व्वं.

Curiously, *adv.* (Inquisitively) कौतूहलात्, कुतूहलेन, कौतुकेन, जिज्ञासया.—(Skilfully, nicely, strangely) निपुणं, सूक्ष्मं, अद्भुतं.

To **curl**, *v. a.* (Turn the hair in curls) अलकरूपेण केशान् कुञ्च् (c. 1. कुञ्चति -ञ्चितुं or c. 10. कुञ्चयति -यितुं), अलकान् कृ or रच् (c. 10. रचयति -यितुं).—(Twist) कुञ्च्, आकुञ्च्, व्यावृत् in caus. (-वर्त्तयति -यितुं).—(Raise in waves) तरङ्ग (nom. तरङ्गयति -यितुं), बन्धुरीकृ, उन्नताननतीकृ.

To **curl**, *v. n.* अलकरूपेण कुञ्च् in pass. (कुच्यते) or आकुञ्च् in pass., व्यावृत् (c. 1. -वर्त्तते -र्त्तितुं).—(Rise in waves) तरङ्ग (nom. तरङ्गायते), तरल (nom. तरलायते), बन्धुरीभू, उन्नताननतीभू.

Curl, *s.* अलकः, आवर्त्तः -र्त्तका, कुरलः, कर्करालः -लं, खङ्करः, काकपक्षः, वर्व्वरीकः, चूर्णकुन्तलः, झल्लरी, भ्रमरकः; 'row of curls,' अलकसंहतिः *f.*—(Undulation) ऊर्म्मिः *f.*, तरङ्गः.

Curlew, *s.* क्रौञ्चः, क्रुङः, कलिकः, कालिकः, कालीकः, अतिजागरः.

Curmudgeon, *s.* कृपणः, कदर्य्यः, स्वल्पव्ययी *m.* (न्), मत्सरः, गाढमुष्टिः.

Currant, *s.* (The tree) अम्लफलविशिष्टः क्षुद्रवृक्षः.—(A small dried grape) शोषितरसा क्षुद्रद्राक्षा.

Currency, *s.* (Circulation, general reception) प्रचारः, प्रचरः, प्रचलनं, चलनं, हस्ताद्धस्तं चलनं, व्यवहारः, सर्व्वसाधारणव्यवहारः, सर्व्वग्रहणं, सर्व्वसम्मानं.—(Continuous flow or course) प्रवाहः, प्रसरः.—(Easiness of utterance) सुखोच्चारणं, सुखोच्चार्य्यता.—(Current coin) प्रचलमुद्रा, प्रचारितमुद्रा.

Current, *a.* (Circulatory, generally received) प्रचलः -ला -लं, प्रचलितः -ता -तं, प्रचलन् -लन्ती -लत् (त्), प्रचरितः -ता -तं, प्रचरन् -रन्ती -रत् (त्), चलमानः -ना -नं, परिचालितः -ता -तं, सञ्चारितः -ता -तं, सर्व्वसम्मतः -ता -तं, सर्व्वगृहीतः -ता -तं.—(Common, general, popular) सर्व्वसाधारणः -णी -णं, सर्व्वसामान्यः -न्या -न्यं, लोकप्रसिद्धः -द्धा -द्धं, लोकविश्रुतः -ता -तं, व्यावहारिकः -की -कं, आचारिकः -की -कं, लौकिकः -की -कं.—(Received as authority, allowable) प्रचलितः -ता -तं, प्रामाणिकः -की -कं, ग्राह्यः -ह्या -ह्यं.—(What is now passing) वर्त्तमानः -ना -नं, विद्यमानः -ना -नं; 'the current year,' वर्त्तमानवत्सरः; 'current moment,' आपातः; 'current report,' लोकप्रवादः, जनवादः.

Current, *s.* (A running stream) स्रोतः *n.* (स्), स्रवन्ती, स्रोतस्वती, स्रोतस्विनी.—(The flow or course of water) वेला, वेगः, रयः, प्रवाहः, उदकप्रवाहः, धारः -रा, स्रोतः *n.* (स्), ओघः, प्रस्रवः -वणं, संसृतिः *f.*, प्रवृत्तिः *f.*, पात्रसंस्कारः, असुपद्धतिः *f.*, पात्रझङ्कारः, रायभाटी, ऊर्म्मी, कूलङ्कपः, पुरोटिः *m.*; 'current of the Ganges,' गाङ्गौघं; 'against the current,' प्रतिस्रोतस्.

Currently, *adv.* (Generally, popularly) सामान्यतस्, साधारणतस्, लोकतस्, प्रसिद्धं; 'it is currently reported,' इति लोकप्रवादः श्रूयते; 'it is currently known,' लोकप्रसिद्धम् अस्ति.

Curricle, *s.* रथः, क्रीडारथः, केलिरथः, अश्वद्वयसञ्चारितो रथः

CURRIER, *s.* चर्म्मकारः -री *m.* (न्), चर्म्मच्छेदनकारी *m.*, चर्म्मोपकारी *m.* (न्), करटः.

CURRISH, *a.* कुक्कुराचारः -रा -रं, श्वशीलः -ला -लं, शौवः -वी -वं, दुःशीलः -ला -लं, शौवापदः -दी -दं; 'a currish man,' श्वनरः.

To CURRY, *v. a.* (Dress leather) चर्म्म परिष्कृ.—(Beat) तड् (c. 10. ताडयति -यितुं), प्रहृ (c. 1. -हरति -हर्त्तुं).—(Rub a horse with a curry-comb) अश्वलोम लोहकङ्कतेन मृज् (c. 2. मार्ष्टि, मार्ष्टुं).—(Curry favour) आराध् in caus. (-राधयति -यितुं), सान्त्व् (c. 10. सान्त्वयति -यितुं), लल् in caus. (लालयति -यितुं).

CURRY, *s.* (The dish) व्यञ्जनमिश्रणीयो or भक्तेन सह खाद्यो व्यञ्जनविशेषः.

CURRY-COMB, *s.* अश्वलोममार्जनार्थं लोहकङ्कतः, अश्वमार्जनी.

To CURSE, *v. a.* शप् (c. 1. शपति -ते, c. 4. शप्यति, शप्तुं), अभिशप्, परिशप्, शापं or अभिशापं दा or कृ; अमङ्गलं or अनिष्टम् आशंस् (c. 1. -शंसते -सितुं); आक्रुश् (c. 1. -क्रोशति -क्रोष्टुं), गर्ह् (c. 1. गर्हते -र्हितुं), धिक्कृ, भर्त्स् (c. 10. भर्त्सयति -यितुं).

To CURSE, *v. n.* शप् (c. 1. शपते, शप्तुं), शपथं or शापं वद् (c. 1. वदति -दितुं) or ब्रू (c. 2. ब्रवीति, वक्तुं); 'to curse and swear,' शपथाभिशापौ कृ.

CURSE, *s.* (Malediction) शापः, अभिशापः, शपथः, शपः -पनं, परिशापः, आक्रोशनं, अवक्रोशः, भर्त्सनं, अभिषङ्गः, अभीषङ्गः, गालिः *m.*, मन्दवाञ्छा; 'under a curse,' शापग्रस्तः -स्ता -स्तं.—(A pest) कण्टकः, दूषकः, अपकारकः. The following are forms of curses answering to 'confusion seize you,' &c., अजीवनिस्ते भूयात्, अकरणिस्तेऽस्तु, निग्राहस्ते भूयात्, अवग्राहस्ते स्यात्, अजननिर् अस्तु तव.

CURSED, *p. p.* शप्तः -प्ता -प्तं, अभिशप्तः -प्ता -प्तं, शापार्हः -र्हा -र्हं, गर्हितः -ता -तं, गर्हणीयः -या -यं, घृणार्हः -र्हा -र्हं, धिक्कृतः -ता -तं, अपध्वस्तः -स्ता -स्तं.

CURSEDLY, *adv.* गर्हितं, गर्हणीयप्रकारेण, दुष्टं, दुष्टु.

CURSHIP, *s.* कुक्कुरत्वं, श्वशीलता, दुःशीलता, अधमाचारत्वं.

CURSITOR, *s.* महाविचारगणसभासम्बन्धी लेखकविशेषः.

CURSORILY, *adv.* ईषदवेक्षया, ईषन्मनोयोगेन, चुम्बकवत्, ईषद्दर्शनेन, सत्वरं, अनवधानेन, अनपेक्षया.

CURSORY, *a.* त्वरितः -ता -तं, असावधानः -ना -नं, अनवहितः -ता -तं, अयत्नपूर्व्वः -र्व्वा -र्व्वं, शीघ्रः -घ्रा -घ्रं; 'cursory view,' ईषद्दर्शनं, अर्द्धवीक्षणं.

CURST, *a.* कर्कशः -शा -शं, नृशंसः -सा -सं, दुष्टचेताः -ताः -तः (स्).

CURT, *a.* ह्रस्वः -स्वा -स्वं, संक्षिप्तः -प्ता -प्तं, संक्षिप्तः -प्ता -प्तं.

To CURTAIL, *v. a.* ह्रस् in caus. (ह्रासयति -यितुं), छिद् (c. 7. छिनत्ति, छेत्तुं), अवच्छिद्, संक्षिप् (c. 6. -क्षिपति -क्षेप्तुं), संहृ (c. 1. -हरति -हर्त्तुं).

CURTAILED, *p. p.* ह्रसितः -ता -तं, छिन्नः -न्ना -न्नं, संक्षिप्तः -प्ता -प्तं, क्षीणः -णा -णं, अवरोपितः -ता -तं, अल्पीकृतः -ता -तं.

CURTAIN, *s.* तिरस्करिणी, व्यवधानं, आवरणं, तिरोधानं, आवरणपटः, प्रच्छदपटः, अपटी, यवनिका, नीशारः; 'bed-curtain,' चतुष्की, मशहरी.

To CURTAIN, *v. a.* आवरणपटेन परिवेष्ट् (c. 1. -वेष्टते -ष्टितुं) or परिवृ (c. 5. -वृणोति -वरितुं -रीतुं) or प्रच्छद् (c. 10. -छादयति -यितुं).

CURTAIN-LECTURE, *s.* रात्रिकाले शय्यागतपतिमुद्दिश्य भार्य्योक्तं निन्दावाक्यं or भर्त्सनवाक्यं or तर्ज्जनं.

CURTSY, *s.* स्त्रीलोकेन कृतः प्रणामः or जङ्घप्रणामः or नमस्कारः.

CURVATED, *a.* नतः -ता -तं, आनतः -ता -तं, प्रणतः -ता -तं, परिणतः -ता -तं, भुग्नः -ग्ना -ग्नं, अवभुग्नः -ग्ना -ग्नं, विभुग्नः -ग्ना -ग्नं, कुञ्चितः -ता -तं, आकुञ्चितः -ता -तं

CURVATION, *s.* वक्रीकरणं, नम्रीकरणं, कुञ्चनं, आकुञ्चनं, अवकुञ्चनं.

CURVATURE, *s.* नतिः *f.*, आनतिः *f.*, वक्रता, वक्रिमा *m.* (न्), वक्रीभावः, जिह्मता, कुटिलता, कौटिल्यं, नम्रत्वं, रुग्णता; 'of the spine,' कशेरुकानामः.

CURVE, *a.* वक्रः -क्रा -क्रं, वक्रिमः -मा -मं, नतः -ता -तं, कुटिलः -ला -लं, नम्रः -म्रा -म्रं, जिह्मः -ह्मा -ह्मं, भुग्नः -ग्ना -ग्नं, कुञ्चितः -ता -तं.

CURVE, *s.* नतिः *f.*, नतं, भुजः, कुटिः *m.*, वक्रता, वक्रिमा *m.* (न्), कुञ्चनं, अवकुञ्चनं; 'a curve line,' धनुर्मार्गं, वक्ररेखा.

To CURVE, *v. a.* नम् in caus. (नामयति -यितुं), आनम्, अवनम्; नम्रीकृ; वक्रीकृ; आवृज् in caus. (-वर्जयति -यितुं), कुच् (c. 1. कुचति -चितुं), कुटिलीकृ, अञ्च् (c. 1. अञ्चति -ञ्चितुं), जिह्म (nom. जिह्मयति -यितुं).

CURVED, *p. p.* नतः -ता -तं, नामितः -ता -तं, वक्रीभूतः -ता -तं, कुटिलीकृतः -ता -तं, जिह्मितः -ता -तं, विभुग्नः -ग्ना -ग्नं, अवभुग्नः -ग्ना -ग्नं, सम्भुग्नः -ग्ना -ग्नं, रुग्णः -ग्णा -ग्णं, कुञ्चितः -ता -तं, वृजिनः -ना -नं, प्रवणः -णा -णं.

To CURVET, *v. n.* प्लु (c. 1. प्लवते, प्लोतुं), वल्ग् (c. 1. वल्गति -ल्गितुं), आवल्ग्.

CURVET, *s.* प्लुतं, प्लवः, वल्गितं, लङ्घनं, उत्फालः, झम्पः.

CURVILINEAR, *a.* वक्ररेखः -खा -खं, धनुर्मार्गाकारः -रा -रं, वक्रः -क्रा -क्रं.

CURULE, *a.* (Chair) पूर्व्वं रोमनगरे विचारकर्तृणाम् आसनं.

CUSHION, *s.* उपधानं -नीयं, पीठोपधानं, बालिशं, विष्टरः, विस्तरः, आस्तरणं, पीठास्तरणं, पीठगर्भः *m. f.*, उपबर्हः, पीठाजिनं, अजिनं, चर्म्म *n.* (न्).

CUSHIONED, *a.* उपधानसंविष्टः -ष्टा -ष्टं, अजिनशयानः -ना -नं, बालिशनिषण्णः -ण्णा -ण्णं.

CUSP, *s.* अर्द्धचन्द्रकोणः, अर्द्धेन्दुशिखा, अर्द्धचन्द्राग्रं, कलाग्रं, कलाकोणः.

CUSPATED, CUSPIDATED, *a.* सूक्ष्माग्रः -ग्रा -ग्रं, सूच्यग्रः -ग्रा -ग्रं.

CUSTARD, *s.* अण्डक्षीरादिमयं मिष्टलेह्यं

CUSTODY, *s.* (Imprisonment) रोधः, निरोधनं, बन्धनं, स्थानासेधः, आसेधः, कारागारे निरोधः.—(Care, charge) गुप्तिः *f.*, रक्षा, रक्षणं.—(Defence) रक्षणं, पालनं, त्राणं.

CUSTOM, *s.* (Habit, established manner, fashion) आचारः, व्यवहारः, व्यवहृतिः *f.*, प्रचारः, समाचारः, रीतिः *f.*, नियमः, अभ्यासः, नित्यकृत्यं, धारा, मार्गः, स्थितिः *f.*, अनुसारः, आवृत्तिः *f.*, चर्य्या, चरितं, क्रमः, सम्प्रदायः, व्यापारः, शीलं; 'according to custom,' यथाव्यवहारं.—(Practice of buying of one person) एकपण्यविक्रेतुः सदाक्रयः or नित्यक्रयः.—(Tribute, toll) शुल्कः -ल्कं, करः, राजस्वं, राजग्राह्यभागः, शाल्किकः.

CUSTOMABLE, *a.* व्यावहारिकः -की -कं, आचारिकः -की -कं, लोकसिद्धः -द्धा -द्धं.

CUSTOMABLY, *adv.* व्यवहारानुसारेण, व्यवहारतस्, आचारानुरूपं.

CUSTOMARILY, *adv.* यथाव्यवहारं, यथारीति, रीत्यनुसारात्, प्रायशस्.

CUSTOMARY, *a.* आचारिकः -की -कं, व्यावहारिकः -की -कं or व्यवहारिकः, व्यवहारानुसारी -रिणी -रि (न्), आचारानुयायी -यिनी -यि (न्), आचरितः -ता -तं, प्रचरितः -ता -तं, प्रचलः -ला -लं, प्रचलितः -ता -तं, नैयमिकः -की -कं, रीत्यनुसारी &c., यौगिकः -की -कं.—(Habitual) आभ्यासिकः -की -कं, नित्यः -त्या -त्यं.—(Usual) प्रायिकः -की -कं, लोकसिद्धः -द्धा -द्धं, लौकिकः -की -कं, प्रसिद्धः -द्धा -द्धं.

CUSTOMER, *s.* क्रेता *m.* (तृ), क्रयी *m.* (न्), नित्यक्रेता *m.*, सदाक्रयी.

CUSTOM-HOUSE, *s.* शुल्कग्रहणशाला, शुल्कस्थानं, करसञ्चयगृहं.

CUSTOM-HOUSE-OFFICER, *s.* शौल्कः, शौल्किकः, करग्राही *m.* (न्).

To CUT, *v. a.* कृत् (c. 6. कृन्तति, कर्त्तितुं), छिद् (c. 7. छिनत्ति, छेत्तुं), संछिद्, लू (c. 9. लुनाति, लवितुं), व्रश्च् (c. 6. वृश्चति, व्रश्चितुं), छो (c. 4. छ्यति, छातुं), दो or दा (c. 4. द्यति, c. 2. दाति -तुं).—(Cut in two) द्विधा छिद् or कृ, द्विखण्डीकृ.—(Divide) भिद् (c. 7. भिनत्ति, भेत्तुं), खण्ड् (c. 10. खण्डयति -यितुं).—(Pierce) व्यध् (c. 4. विध्यति,

व्यद्धुं), छिद्र् (c. 10. छिद्रयति -यितुं), निर्भिद्, खन् (c. 1. खनति -नितुं), छिद्.—(Carve, make by sculpture) तक्ष् (c. 1. तक्षति -क्षितुं).—(Hew) छिद्, विशस् (c. 1. -शसति -सितुं).—(Intersect) परिच्छिद्.—(Scratch) क्षुर् (c. 6. क्षुरति, क्षोरितुं).—(Cut away) अवकृत्, निकृत्, उच्छिद्.—(Cut down) अवकृत्, प्रकृत्, अवच्छिद्, अवभञ्ज् (c. 7. -भनक्ति -भंक्तुं), निभञ्ज्, प्रभञ्ज्; अवपत् in caus. (-पातयति -यितुं).—(Cut off) छिद्, अवच्छिद्, निकृत्, अपकृत्, लू; 'destroy,' उच्छिद्, उद्धृ (c. 1. -हरति -हर्त्तुं), उन्मूल् (c. 10. -मूलयति -यितुं); 'rescind,' लुप् (c. 6. लुम्पति, लोप्तुं); 'take away,' अपनी (c. 1. -नयति -नेतुं), अपहृ; 'intercept,' विच्छिद्, उच्छिद्, अवरुध् (c. 7. -रुणद्धि -रोद्धुं); 'interrupt,' विच्छिद्, खण्ड् (c. 10. खण्डयति -यितुं); 'preclude,' निवृ in caus. (-वारयति -यितुं), निरुध्; 'obviate,' परिच्छिद्; 'cut off a limb,' अङ्गं छिद्.—(Cut out) उत्कृत्, निष्कृत्; 'shape,' कॢप् (c. 10. कल्पयति -यितुं), परिकॢप्; 'contrive,' मनसा चिन्त् (c. 10. चिन्तयति -यितुं), परिकॢप्; 'adapt,' युज् in caus. (योजयति -यितुं); 'outdo,' अतिभू, विशिष् in pass. (-शिष्यते); 'cut off a letter,' लुप्.—(Cut short, abridge) संहृ, संक्षिप् (c. 6. -क्षिपति -क्षेप्तुं), उच्छिद्, लुप्; 'interrupt abruptly,' सहसा विच्छिद्.—(Cut up) व्यवच्छिद्, विनिकृत्, निकृत्; 'eradicate,' उच्छिद्.—(Cut the hair) केशान् छिद् or आवप् in caus. (-वापयति -यितुं) or परिवप्.—(Cut to the heart) मर्म्म भिद् or छिद् or व्यध्.

To CUT, *v. n.* (Make way by dividing) उद्भिद् in pass. (-भिद्यते), प्रोद्भिद्, स्फुट् (c. 6. स्फुटति -टितुं), उत्पद् in pass. (-पद्यते), प्रभू.

CUT, *p. p.* छिन्नः -न्ना -न्नं, कृत्तः -त्ता -त्तं, कर्त्तितः -ता -तं, लूनः -ना -नं, छातः -ता -तं, दातः -ता -तं, छितः -ता -तं, दितः -ता -तं, वृक्णः -क्णा -क्णं, खण्डितः -ता -तं, त्रुटितः -ता -तं, कॢप्तः -प्ता -प्तं, तष्टः -ष्टा -ष्टं, परिवापितः -ता -तं; 'cut up,' व्यवच्छिन्नः -न्ना -न्नं, छिन्नभिन्नः -न्ना -न्नं, निकृत्तः -त्ता -त्तं; 'cut off,' in grammar, लुप्तः -प्ता -प्तं.

CUT, *s.* (The blow of a sharp instrument) प्रहारः, आघातः; 'a sword-cut,' खड्गप्रहारः, खड्गाघातः; 'cut with a whip,' कशाघातः.—(Impression made by an edge) छेदः, लूनकः, व्रश्चनचिह्नं.—(Channel or canal) खातं, कुल्या, कृत्रिमा सरित्.—(Part cut off from the rest) खण्डः -ण्डं, छेदः, भिन्नं, भित्तिः *f.*, दलं.—(Small particle) लवः, कणः, लेशः.—(A direct road) ऋजुमार्गः, अविमार्गः, अदीर्घपथः.—(Print) मुद्रा, पत्रे मुद्रिता प्रतिमा or प्रतिमूर्त्तिः *f.*—(Fashion, form) रीतिः *f.*, रूपं, आकारः, विधानं, संस्कारः, संस्थानं.

CUTANEOUS, *a.* त्वाचः -ची -चं, चार्म्मिकः -की -कं, चर्म्मी -र्म्मिणी -र्म्मि (न्), त्वक्सम्बन्धी -न्धिनी -न्धि (न्); 'cutaneous disease,' त्वग्रोगः, चर्म्मदूषिका; 'cutaneous eruption,' दद्रुः *m.*, दद्रूः *m.*

CUTICLE, *s.* अवभासिनी, बाह्यत्वक् *f.* (च्), बाह्यचर्म्म *n.* (न्).

CUTICULAR, *a.* त्वाचः -ची -चं, बाह्यत्वक्सम्बन्धी -न्धिनी -न्धि (न्).

CUTIS, *s.* (The true skin) वेदनी.

CUTLASS, *s.* कर्त्तरिका, खड्गः, कृपाणः, पृथुपत्रः खड्गः.

CUTLER, *s.* छुरिकाकारः, शस्त्रकारः, छुरिकाविक्रेता *m.* (तृ), शस्त्रमार्जः.

CUTLET, *s.* खण्डः -ण्डं, पर्शुका, पार्श्वास्थि *n.*; 'of mutton,' औरभ्रमांसखण्डः.

CUTPURSE, *s.* ग्रन्थिभेदः -दकः, चौरः, अपहारकः, तस्करः.

CUTTER, *s.* (One who cuts) छेत्ता *m.* (तृ), छेदकरः, छिद् in comp.; 'wood-cutter,' वनच्छिद्.—(Cutting instrument) कर्त्तरिका, कृन्तत्रं, छित्वरः.—(A nimble boat) लघुनौका.—(Front-teeth) छेदकदन्ताः *m. pl.*, राजदन्ताः *m. pl.*

CUT-THROAT, *s.* घातकः, सुप्तघातकः, प्राणघातकः, आततायी *m.* (न्).

CUT-THROAT, *a.* वधोद्यतः -ता -तं, मारात्मकः -का -कं, क्रूरः -रा -रं.

CUTTING, *s.* (Piece cut off) विदलं, खण्डः -ण्डं, तष्टं, भित्तिः *f.* शकलं, भिन्नं.—(Act of cutting) छेदनं, कर्त्तनं, व्रश्चनं, खण्डनं, छिदा, छित्तिः *f.*, लूनिः *f.*, लावः, दातिः *f.*, दानं.

CUTTING, *a.* छित्वरः -रा -रं, छिदुरः -रा -रं.—(Caustic) खरः -रा -रं, अरुन्तुदः -दा -दं, मार्म्मिकः -की -कं, मर्म्मभेदी -दिनी -दि (न्).

CUTTLE, *s.* (A fish, or its bone) फेनः -नकः, समुद्रफेनः, सिन्धुकफः, अब्धिकफः, हिण्डीरः, हिण्डिरः, पिण्डीरः, श्वेतधामा *m.* (न्), सुफेनं, मलं.—(A foul-mouthed fellow) मुखरः, वाग्दुष्टः, दुर्मुखः.

CUVERA, *s.* *See* KUVERA.

CYCLE, *s.* चक्रं, कालचक्रं, आवृत्तिः *f.*, कालावृत्तिः *f.*, कालावर्त्तः, परिवृत्तिः *f.*, परिवर्त्तः, पर्य्यायः, आवलिः *f.*; 'of the seasons,' ऋतुपर्य्यायः.

CYCLOPÆDIA, *s.* ज्ञानचक्रं, विद्याचक्रं, विद्यापर्य्यायः, विद्याहारावलिः *f.*

CYCLOPTIC, CYCLOPEAN, *a.* क्रूराचारः -रा -रं, दारुणः -णा -णं, पशुव्यवहारः -रा -रं, अतिमहान् -हती -हत् (त्).

CYGNET, *s.* हंसशावकः, बालहंसः, युवहंसः, हंसापत्यं.

CYLINDER, *s.* गोलः, नलः, स्तम्भः, शलाका, निघः.

CYLINDRICAL, *a.* वर्त्तुलः -ला -लं, गोलाकारः -रा -रं, स्तम्भाकारः -रा -रं.

CYMBAL, *s.* घनं, झल्लरी, झल्लकं, झिल्लिः *f.*, झर्झरी, भेरी, करतालं.

CYNEGETICS, *s.* मृगव्यं, मृगया, मृगव्यविद्या, आखेटविद्या.

CYNIC, *s.* (A misanthrope) सर्व्वाभिसन्धकः -सन्धी *m.* (न्), पुरुषद्वेषी *m.* (न्).

CYNICAL, *a.* सदावक्रः -क्रा -क्रं, अपरिचयी -यिनी -यि (न्), निरानन्दः -न्दा -न्दं, कुटिलभावः -वा -वं, निन्दाशीलः -ला -लं, चिरदुःखी -खिनी -खि (न्), अनाल्पप्यः -प्या -प्यं, परश्रीकातरः -रा -रं.

CYNOSURE, *s.* ध्रुवः, नक्षत्रनेमिः *m.*, द्युतिकरः, ज्योतीरथः.

CYPHER, *s.* अङ्कः, शून्यं, गुणनिका. *See* CIPHER.

CYPHERING, *s.* अङ्कनं, अङ्कविद्या, गणनविद्या. *See* CIPHERING.

CYPRESS-TREE, *s.* श्मशानरोपितः शोकलाक्षणिकस् तिक्तपत्रो दीर्घवृक्षः.

D.

To DAB, *v. a.* आर्द्रद्रव्यलघ्वाघातेन सिच् (c. 6. सिञ्चति, सेक्तुं) or प्रोक्ष् (c. 1. -उक्षति -क्षितुं), सिक्तद्रव्येण लघु आहन् (c. 2. -हन्ति -हन्तुं).

DAB, *s.* (Small lump) क्षुद्रपिण्डः, पिण्डः, क्षुद्रखण्डः.—(Blow with something moist) सिक्तद्रव्येण लघुप्रहारः or लघ्वाघातः, सेचनं, निषेकः.—(Something muddy thrown upon one) मलसेचनं, क्षिप्तपङ्कः.—(A man expert at something) निपुणः, पटुः, कुशलः, दक्षः.

To DABBLE, *v. a.* सिच् (c. 6. सिञ्चति, सेक्तुं), अवसिच्, निषिच्, लिप् (c. 6. लिम्पति, लेप्तुं), उक्ष् (c. 1. उक्षति -क्षितुं), प्रोक्ष्, क्लिद् in caus. (क्लेदयति -यितुं).

To DABBLE, *v. n.* (Play in water) जले or पङ्के क्रीड् (c. 1. क्रीडति -डितुं).—(Dabble in books, read superficially) शास्त्राणि चुष् (c. 1. चुषति -षितुं).

DABBLER, *s.* (One that plays in water or mud) जलक्रीडः, पङ्कक्रीडः.—(Superficial reader) शास्त्रचुम्बकः, शास्त्रगण्डः, किञ्चिज्ज्ञः, अल्पमात्रविद्.

DACE, *s.* नदीचरः क्षुद्रमत्स्यभेदः.

DACTYL, *s.* चरणः -णं, भगणः, छन्दःशास्त्रेषु असमानपदं.

DAD, DADDY, *s.* बालकभाषायां पितृसमानार्थः शब्दः, बाबा, तातः.

DÆDAL, *a.* चित्रविचित्रः -त्रा -त्रं, नानाप्रकारः -रा -रं, बहुविधः -धा -धं.

DAFFODIL, DAFFODOWNDILLY, *s.* उत्पलजातीयः पुष्पप्रभेदः.

DAGGER, *s.* कट्टारः, कृपाणी, छुरिका, शङ्कुः *m.*, असिपुत्रिका, कर्त्तरी.

To DAGGLE, *v. a.* मलेन or पङ्केन लिप् (c. 6. लिम्पति, लेप्तुं).

To DAGGLE, *v. n.* पङ्के or कर्द्दमे लुठ् (c. 6. लुठति -ठितुं).

DAGGLETAIL, *a.* मलपङ्की -ङ्किनी -ङ्कि (न्), मलदूषितः -ता -तं.

DAILY, *a.* आह्निकः -की -कं, दैनिकः -की -कं, दैनः -नी -नं, दैवसिकः -की -कं, प्रात्यहिकः -की -कं, दिवातनः -नी -नं, अन्वाहिकः -की -कं, नैत्यिकः -की -कं, अवश्यकः -का -कं; 'daily occupation,' आह्निकं, नित्यकृत्यं.

DAILY, *adv.* प्रतिदिनं, प्रतिदिवसं, प्रत्यहं, प्रतिवासरं, अनुदिनं, अन्वहं, दिवसे दिवसे, दिने दिने, अहनि अहनि, अहरहः.

DAINTILY, *adv.* ललितं, सलालित्यं, सलौल्यं, सुकुमारं, कोमलं, विलासेन.

DAINTINESS, *s.* (Delicacy, softness) सौकुमार्य्यं, कोमलता, मृदुता.—(Elegance, nicety) लालित्यं, लौल्यं, लावण्यं, विलासः, सूक्ष्मता, विनीतता.—(Deliciousness) सुस्वादुता, सुरसत्वं, सौरस्यं.

DAINTY, *a.* (Delicious) स्वादुः -दुः -द्वी -दु or सुस्वादुः, सुरसः -सा -सं, रसिकः -का -कं, सरसः -सा -सं, मिष्टः -ष्टा -ष्टं, स्वादुकारः -रा -रं, सुखाद्यः -द्या -द्यं.—(Delicate, nice) सुकुमारः -रा -रं, कोमलः -ला -लं, मृदुः -द्वी -दु, विनीतः -ता -तं, सूक्ष्मः -क्ष्मा -क्ष्मं.—(Over-nice, ceremonious) अतिविनीतः -ता -तं, अतिसभ्यः -भ्या -भ्यं.

DAINTY, *s.* सुग्रासः, स्वाद्वन्नं, स्वादुभोजनं, विशिष्टान्नं, भोजनविशेषः, सुखाद्यं.

DAIRY, *s.* क्षीरमन्थनशाला, दधिमन्थनगृहं, गोदुग्धागारं, पयोरक्षणस्थानं.

DAIRY-MAID, *s.* गोदोहिनी, क्षीरमन्थिनी, गोदुग्धरक्षिका, गोपी, आभीरी.

DAISY, *s.* वसन्तसमये यवसप्ररोही शुक्लदलः क्षुद्रपुष्पभेदः.

DALE, *s.* दरी -रा, दरीभूः *f.*, कन्दरः -री, अद्रिद्रोणी, उपत्यका, प्रान्तरं.

DALLIANCE, *s.* (Act of fondness) कामचेष्टा, हावः, ललितं, लालसा, रमणं, रमणीयं, विलासः, विलसितं.—(Delay) विलम्बः, कालयापः.

To DALLY, *v. n.* (Sport, play, trifle) क्रीड् (c. 1. क्रीडति -डितुं), प्रक्रीड्; रम् (c. 1. रमते, रन्तुं), लल् (c. 1. ललति -लितुं), विलस् (c. 1. -लसति -सितुं), कुड् (c. 6. कुडति -डितुं).—(Caress a woman) स्त्रिया सह रम् or विलस्, कामचेष्टां कृ.—(Delay) विलम्ब् (c. 1. -लम्बते -म्बितुं).

DAM, *s.* (Mother, said of animals) जननी, जनिका, प्रजनिका, प्रजायिनी, प्रसूः *f.*, जनयित्री, अम्बा, माता *f.* (तृ).—(Bank to confine water) सेतुः *m.*, सेतुबन्धः, जलबन्धकः, धरणं, पिण्डनः, आलिः *f.*

To DAM UP, *v. a.* सेतुना जलं बन्ध् (c. 9. बध्नाति, बन्द्धुं) or संस्तम्भ् (c. 9. -स्तभ्नाति -स्तम्भितुं) or निरुध् (c. 7. -रुणद्धि -रोद्धुं).

DAMAGE, *s.* क्षतिः *f.*, क्षतं, अपचयः, अपायः, हानिः *f.*, नाशः, दोषः, दूषणं, क्षयः, उपक्षयः, अपकारः, अपकृतं, हिंसा, द्रोहः, ध्वंसः, प्रध्वंसः, भ्रंशः, अनिष्टं.—(Damages in law) क्षतिपूरणं, दण्डः, पारितोषिकं, प्रतिफलं, निष्कृतिः *f.*, प्रायश्चित्तं.

To DAMAGE, *v. a.* हिंस् (c. 7. हिनस्ति c. 1. हिंसति -सितुं), उपहिंस्, विहिंस्; दुष् in caus. (दूषयति -यितुं); अपकृ; अर्द् in caus. (अर्दयति -यितुं); क्षण् (c. 8. क्षणोति -णितुं), परिक्षण्; नश् in caus. (नाशयति -यितुं), द्रुह् (c. 4. द्रुह्यति, द्रोग्धुं).

DAMAGEABLE, *a.* हिंसनीयः -या -यं, दूष्यः -ष्या -ष्यं, अपचयक्षमः -मा -मं.—(Mischievous) हिंस्रः -स्रा -स्रं, दूषकः -का -कं, अपकारकः -का -कं.

DAMAGED, *p. p.* क्षतः -ता -तं, परिक्षतः -ता -तं, विक्षतः -ता -तं, दूषित; -ता -तं, सदोषः -षा -षं, अर्द्दितः -ता -तं, कृतापकारः -रा -रं, अपकृतः -ता -तं.

DAMASK, *s.* पुष्पादिसूचिकर्म्मालङ्कृतं दमस्कनाम चित्रदुकूलं.

To DAMASK, *v. a.* (Adorn stuffs with flowers) दुकूलं सूचिकर्म्मद्वारा पुष्पादिना अलङ्कृ.—(Variegate) चित्र् (c. 10. चित्रयति -यितुं), कर्ब्बुरीकृ.

DAMASK-ROSE, *s.* हेमपुष्पं, रक्तपुष्पो जवाप्रभेदः.

DAME, *s.* (Lady) आर्य्या, भाविनी.—(Woman) स्त्री, वधूः, गृहिणी.

To DAMN, *v. a.* (Doom to hell or eternal torments) नरकं गम्या इति शापं वद् (c. 1. वदति -दितुं); अनन्तदण्डं or नरकदण्डं प्राप्या इति ब्रू (c. 2. ब्रवीति, वक्तुं), अनन्तदुःखं or अनन्तयातना ते भूयाद् इति धिक्कृ, स नरकं व्रजतु or अधोऽधो निरये पततु इति शापं कृ, नरकदण्डार्हं ज्ञा (c. 9. जानाति, ज्ञातुं), नरके निपत् in caus. (-पातयति -यितुं).—(Condemn) दण्ड् (c. 10. दण्डयति -यितुं), दण्डार्हं ज्ञा.—(Hiss any public performance) रङ्गे नाटकं प्रेक्ष्य कर्कशशब्दैर् अप्रसादं सूच् (c. 10. सूचयति -यितुं).

DAMNABLE, *a.* अनन्तदण्डार्हः -र्हा -र्हं, नरकदण्डार्हः -र्हा -र्हं, नरके पतनार्हः -र्हा -र्हं.—(Odious) गर्हितः -ता -तं, गर्हणीयः -या -यं.

DAMNABLY, *adv.* यथा नरकदण्डार्हो भवति तथा, गर्हितं.

DAMNATION, *s.* अनन्तदण्डः, नरकदण्डः, अनन्तयातना, नरकयातना, नरके पतनं, नरकगमनं, अधोगमनं, अभिसम्पातः, ईश्वरकृपावहिष्करणं.

DAMNED, *p. p.* नरकगतः -ता -तं, नरकपतितः -ता -तं, नरकस्थः -स्था -स्थं, नारकी -किणी -कि (न्), नैरयः -यी -यं, नरकप्राप्तः -प्ता -प्तं, अभिशप्तः -प्ता -प्तं, गर्हितः -ता -तं, गर्हणीयः -या -यं, घृणार्हः -र्हा -र्हं.

DAMNIFIC, *a.* क्षतिकारकः -का -कं, अपकारी -रिणी -रि (न्), दूषकः -का -कं.

To DAMNIFY, *v. a.* दुष् in caus. (दूषयति -यितुं), अपकृ, क्षतं -तां -तं कृ.

DAMP, DANK, *a.* (Moist) आर्द्रः -र्द्रा -र्द्रं, सार्द्रः -र्द्रा -र्द्रं, जलार्द्रः -र्द्रा -र्द्रं, क्लिन्नः -न्ना -न्नं, तिमितः -ता -तं, स्तिमितः -ता -तं, उन्नः -न्ना -न्नं, समुन्नः -न्ना -न्नं, सरसः -सा -सं, जलसिक्तः -क्ता -क्तं, अनूपः -पा -पं, समुक्षितः -ता -तं, वोदः -दा -दं, उत्तः -त्ता -त्तं.—(Dejected) म्लानः -ना -नं, क्लान्तः -न्ता -न्तं, विषण्णः -ण्णा -ण्णं.

DAMP, *s.* (Moisture) क्लेदं, सङ्क्लेदः, स्तेमः, तेमः -मनं, समुन्दनं, जलावसेकः, चिक्लिदं.—(Fog, vapour) वाष्पः, अवाष्पः, धूमः -मिका, स्वेदः.—(Dejection) विषादः, म्लानिः *f.*; 'to be damp,' क्लिद् (c. 4. क्लिद्यति) तिम् (c. 4. तिम्यति or तीम्यति).

To DAMP, *v. a.* (Moisten) क्लिद् in caus. (क्लेदयति -यितुं), परिक्लिद्; सिच् (c. 6. सिञ्चति, सेक्तुं), अवसिच्; उक्ष् (c. 1. उक्षति -क्षितुं), समुक्ष्; उन्द् (c. 7. उनत्ति, उन्दितुं), आर्द्रीकृ.—(Dispirit) मनो खण्ड् (c. 10. खण्डयति -यितुं), खण्डिताशंसं -सां -सं कृ, भग्नाशं -शां -शं कृ, म्लानाशं -शां -शं, कृ.

DAMPISH, *a.* ईषदार्द्रः -र्द्रा -र्द्रं, ईषत्स्तिमितः -ता -तं, आक्लिन्नः -न्ना -न्नं.

DAMPNESS, *s.* आर्द्रता, सार्द्रता, जलार्द्रत्वं, क्लिन्नता, जलसिक्तत्वं, अनूपता.

DAMPY, *a.* विषादी -दिनी -दि (न्), अवसन्नः -न्ना -न्नं, उद्विग्नः -ग्ना -ग्नं.

DAMSEL, *s.* कन्या, कुमारी -रिका, कन्यका, युवतिः *f.* -ती, यूनी, बाला -लिका, अविवाहिता स्त्री; 'damsel's child,' कानीनः -नी.

DAMSON, *s.* दाम्सन्नामकः कृष्णवर्णः शुक्रफलप्रभेदः.

To DANCE, *v. n.* नृत् (c. 4. नृत्यति, नर्त्तितुं), प्रनृत्, उपनृत्, सम्प्रनृत्, नट् (c. 1. नटति -टितुं), नृत्यं कृ, नर्त्तकवद् हस्तपादादि सञ्चल् in caus. (-चालयति -यितुं); 'to dance attendance,' उपास् (c. 2. -आस्ते -आसितुं).

To DANCE, *v. a.* नृत् in caus. (नर्त्तयति -यितुं), चल् in caus. (चालयति -यितुं).

DANCE, *s.* नृत्यं, नाट्यं, ताण्डवं, लास्यं, चारणत्वं, पादन्यासः, गुणनिका.

DANCER, *s.* नर्त्तकः -की *f.*, नटः -टी *f.*, कुशीलवः, लासकः -की *f.*, लासिका *f.*, चारणः, चारणदाराः *f. pl.*, शैलाली *m.* (न्), शैलूषः, नाटकः -की *f.*, कृशाश्वी *m.* (न्), नर्त्तनवृत्तिः *m.f.*, नृत्यकुशलः, भरतः, भारतः, जायाजीवः, तालावचरः.

DANCING, *s.* नृत्यं, नर्त्तनं, नाट्यं, नटनं, प्रनर्त्तनं, लास्यं, लासः, ताण्डवं,

कौशीलव्यं, चारणत्वं, गुणनिका, हस्तपादादिसञ्चालनं.

DANCING-MASTER, *s.* नृत्याचार्य्यः, नृत्यशिक्षकः, नृत्यगुरुः *m.*

DANCING-SCHOOL, *s.* नृत्यशिक्षणशाला, नृत्यशाला, नृत्यशिक्षावेश्म *n.* (न्).

DANDELION, *s.* सिंहपर्णी, सिंहदन्तसरूपपत्रः क्षुद्रौषधिभेदः.

DANDIPRAT OF DAPPERLING, *s.* बालकः, पुत्रकः, माणवकः, वामनः.

To DANDLE, *v. a.* अङ्कदेशे बालकं धृत्वा लल् in caus. (लालयति -यितुं).

DANDLED, *p. p.* लालितः -ता -तं, सान्त्वकरणार्थं जानुदेशे धृतः -ता -तं.

DANDRIFF, DANDRUFF, *s.* मज्जा, शिरोमध्ये पिण्डितस्नेहः, शिरोमलं.

DANDY, *s.* सुवेशी *m.* (न्), सुवसनः, दर्शनीयमानी *m.* (न्), छेकः.

DANGER, *s.* भयं, भयहेतुः *m.*, संशयः, शङ्का, सन्देहः, विकल्पः, आतङ्कः, आपद् *f.*, विपद् *f.*, अपायः, विपत्तिः *f.*, उत्पातः, बाधा, व्याघातः; 'any thing exposed to danger,' भयस्थानं, संशयस्थानं, शङ्कास्पदं; 'danger of life,' जीवितसंशयः, प्राणनाशसंशयः, प्राणबाधः; 'we are in danger of being led to justice,' अस्माकं विचारस्थाने आनयनशङ्का विद्यते; 'in danger of punishment,' दण्डयोग्यः -ग्या -ग्यं; 'brought into danger,' संशयितः -ता -तं; 'an act attended with danger,' सन्दिग्धकर्म्म *n.* (न्).

To DANGER, *v. a.* संशयस्थं -स्थां -स्थं कृ, शङ्कास्पदं कृ, सन्देहस्थं -स्थां -स्थं कृ; 'one who dangers his life,' संशयितजीवितः.

DANGEROUS, *a.* भयङ्करः -रा -रं, भयानकः -की -कं, भयहेतुकः -का -कं, सन्दिग्धः -ग्धा -ग्धं, सांशयिकः -की -कं, संशयस्थः -स्था -स्थं, संशयापन्नः -न्ना -न्नं, शङ्काक्रान्तः -न्ता -न्तं, भयाक्रान्तः -न्ता -न्तं, भयजनकः -का -कं, भैरवः -वी -वं, विपज्जनकः -का -कं; 'a dangerous illness,' सन्निपातकः.

DANGEROUSLY, *adv.* यथा संशयः or भयहेतुर् उत्पद्यते तथा, भैरवं, शङ्कापूर्व्वकं, भयानकं, सन्दिग्धं; 'dangerously ill,' सन्निपातकरोगग्रस्तः.

DANGEROUSNESS, *s.* भयानकत्वं, सन्दिग्धता, सांशयिकत्वं, शङ्काक्रान्तत्वं.

To DANGLE, *v. n.* लुठ् (c. 6. लुठति -ठितुं), चञ्च् (c. 1. चञ्चति -ञ्चितुं), लम्ब् (c. 1. लम्बते -म्बितुं), अवलम्ब्, लुल् (c. 1. लोलति -ते -लितुं).

DANGLER, *s.* स्त्रीणाम् उपासने or स्त्रीभिः सह विलासकरणे कालक्षेपकः.

DANGLING, *a.* चञ्चन् -ञ्चन्ती -ञ्चत् (त्), लोलः -ला -लं, लोलमानः -ना -नं, लुठन् -ठन्ती -ठत् (त्), लम्बमानः -ना -नं, अवलम्बितः -ता -तं, लुलितः -ता -तं.

DAPPER, *a.* विनीतः -ता -तं, क्षुद्राकारः -रा -रं, ललितरूपः -पा -पं.

To DAPPLE, *v. a.* चित्र् (c. 10. चित्रयति -यितुं), चित्रविचित्रीकृ, कर्ब्बुरीकृ.

DAPPLED, *a.* चित्रितः -ता -तं, कर्ब्बुरितः -ता -तं, नानावर्णः -र्णा -र्णं.

To DARE, *v. n.* धृष् (c. 5. धृष्णोति, धर्षितुं), साहसं कृ, साहसेन व्यवसो (c. 4. -स्यति -सातुं); 'I dare not ask him,' न तं प्रष्टुं धृष्णोमि.

To DARE, *v. a.* (Challenge) आह्वे (c. 1. -ह्वयति -ह्वातुं), समाह्वे, नियुद्धार्थम् आह्वे, स्पर्ध् (c. 1. स्पर्धते -र्धितुं), आक्रन्द् (c. 1. -क्रन्दति -न्दितुं).

DARE, *s.* आह्वानं, समाह्वानं, योधसंरावः, क्रन्दितं, अभिग्रहः.

DARED, *p. p.* (Challenged) आहूतः -ता -तं, समाहूतः -ता -तं.

DARING, *s.* साहसं, प्रतिभा, धार्ष्ट्यं; 'act of daring,' अत्याहितं.

DARING, *a.* साहसी -सिनी -सि (न्), साहसिकः -की -कं, धृष्टः -ष्टा -ष्टं, धृष्णुः -ष्णुः -ष्णु, प्रगल्भः -ल्भा -ल्भं, वीरः -रा -रं, प्रवीरः -रा -रं, शूरः -रा -रं, निर्भयः -या -यं, अभीतः -ता -तं, निर्विशङ्कः -ङ्का -ङ्कं, अकुतोभयः -या -यं, विक्रान्तः -न्ता -न्तं, पराक्रमी -मिणी -मि (न्), प्रतिभानवान् -वती -वत् (त्), प्रतिभान्वितः -ता -तं.

DARINGLY, *adv.* साहसेन -सात्, साहसपूर्व्वकं, धृष्टं, धृष्टत्वात्, सशौर्य्यं, प्रगल्भं, निर्भयं, निर्विशङ्कं, सविक्रमं, सप्रतिभानं, वीरवत्.

DARINGNESS, *s.* साहसं, साहसिकत्वं, धृष्टता, धृष्णुता, धार्ष्ट्यं, प्रगल्भता, प्रागल्भ्यं, प्रतिभा -भानं, निर्भयत्वं, वीरता, शौर्य्यं, धैर्य्यं, विक्रमः.

DARK, *a.* तामसः -सी -सं -सिकः -की -कं, तमस्वी -स्विनी -स्वि (न्), सान्धकारः -रा -रं, अन्धकारयुक्तः -क्ता -क्तं, सतिमिरः -रा -रं, तिमिरयुक्तः -क्ता -क्तं, तमोवृतः -ता -तं, तमोमयः -यी -यं, तमोभूतः -ता -तं, निरालोकः -का -कं, निष्प्रभः -भा -भं, अप्रकाशः -शा -शं, हतज्योतीः -तीः -तिः (स्).—(Obscure) गूढः -ढा -ढं, निगूढः -ढा -ढं, दुर्ज्ञेयः -या -यं, अस्पष्टः -ष्टा -ष्टं, दुर्दर्शः -र्शा -र्शं.—(Dark-coloured) कृष्णः -ष्णा -ष्णं, श्यामः -मा -मं, कालेयः -यी -यं, मेचकः -का -कं, नीलः -ला -लं, सितेतरः -रा -रं,—(Opaque) अस्वच्छः -च्छा -च्छं; 'a dark night,' तामसी, तमिस्रा, नष्टचन्द्रा रात्रिः.

DARK, *s.* तमः *n.* (स्), अन्धकारः, तिमिरं, तमिस्रं, अन्धं.

To DARKEN, *v. a.* तिमिर (nom. तिमिरयति -यितुं), तिमिरीकृ, अन्धीकृ.

To DARKEN, *v. n.* तमस्वी -स्विनी -स्वि भू, तिमिरीभू, अन्धीभू.

DARKENED, *p. p.* तमोवृतः -ता -तं, तिमिरीकृतः -ता -तं, सन्तमसः -सा -सं.

DARKISH, *a.* तमस्कल्पः -ल्पा -ल्पं, ईषत्तामसः -सी -सं.—(In colour) ईषत्कृष्णः -ष्णा -ष्णं, आकालः -ला -लं, आनीलः -ला -लं.

DARKLING, *a.* तमोवर्त्ती -र्त्तिनी -र्त्ति (न्) or अन्धकारवर्त्ती.

DARKLY, *adv.* अस्पष्टं, अप्रकाशं, अव्यक्तं, सान्धकारं, अन्धवत्, अन्धं.

DARKNESS, *s.* अन्धकारः, तमः *n.* (स्), तिमिरं, तमिस्रं, तमसं, ध्वान्तं, निरालोकता, सान्धकारत्वं, निष्प्रभता, अन्धं, शार्वरं, रात्रिवासः *n.* (स्), निशाचर्म्म *n.* (न्), भूच्छाया, खलुक् *m.* (ज्); 'slight darkness,' अवतमसं; 'great darkness,' अन्धतमसं, तमस्ततिः *f.*; 'universal darkness,' सन्तमसं,

DARKSOME, *s.* तमस्वी -स्विनी -स्वि (न्), तमस्कल्पः -ल्पा -ल्पं, निष्प्रभः -भा -भं.

DARLING, *s.* प्रियः -या, हृदयप्रियः -या, दयितः -ता, स्नेहपात्रं.

DARLING, *a.* हृदयप्रियः -या -यं, सुप्रियः -या -यं, प्रियतमः -मा -मं, हृद्यः -द्या -द्यं, वल्लभः -भा -भं, इष्टः -ष्टा -ष्टं, इष्टतमः -मा -मं.

DARN, *s.* वस्त्रयोन्यनुकृतं जीर्णवस्त्रसीवनं, वस्त्रसन्धिः *m.*

To DARN, *v. a.* जीर्णवस्त्राणि सिव् (c. 4. सीव्यति, सेवितुं) or सूक्ष्मसूचिकर्म्मद्वारा सन्धा (c. 3. -धत्ते -धातुं).

DARNEL, *s.* कक्षः, शस्यक्षेत्ररुहः कक्षप्रभेदः.

DART, *s.* शूलः -लं, प्रासः, शल्यं, शङ्कुः *m.*, क्षिपणिः *m.*, पाणिमुक्तं, करमुक्तं, मुक्तकं, वाणः, अस्त्रं, समिकं, दूरवेधी *m.* (न्).

To DART, *v. a.* अस् (c. 4. अस्यति, असितुं), प्रास्, क्षिप् (c. 6. क्षिपति, क्षेप्तुं), मुच् (c. 6. मुञ्चति, मोक्तुं), प्रमुच्, सृज् (c. 6. सृजति, स्रष्टुं), ईर् (c.10. ईरयति -यितुं), पत् in caus. (पातयति -यितुं), हृ (c. 1. -हरति -हर्त्तुं).

To DART, *v. n.* (As lightning) स्फुर् (c. 6. स्फुरति -रितुं).—(Dart upon one) आपत् (c. 1. -पतति -तितुं), अभिद्रु (c. 1. -द्रवति -द्रोतुं).

To DASH, *v. a.* (Throw or strike any thing suddenly or forcibly against another) सहसा or प्रसभं क्षिप् (c. 6. क्षिपति, क्षेप्तुं) or प्रक्षिप् or अस् (c. 4. अस्यति, असितुं) or प्रास् or पत् in caus. (पातयति -यितुं), or अभिहन् (c. 2. -हन्ति -न्तुं), or अभ्याहन् or प्रतिहन् or पद्द (c. 1. -हरति -हर्त्तुं).—(Break by collision, dash in pieces) मृद् (c. 9. मृद्नाति, मर्द्दितुं), निष्पिष् (c. 7. -पिनष्टि -पेष्टुं), प्रभञ्ज् (c. 7. -भनक्ति, भंक्तुं), विघट्ट् (c. 10. -घट्टयति -यितुं), भूमौ प्रक्षिप्य खण्डं खण्डं कृ or खण्डशः कृ or लवशः कृ or चूर्ण् (c. 10. चूर्णयति -यितुं),—(Bespatter, besprinkle) अवकृ (c. 6. -किरति -करितुं -रीतुं), अभ्यवकृ, समवकृ; उक्ष् (c. 1. उक्षति -क्षितुं), अभ्युक्ष्, प्रोक्ष्; अवसिच् (c. 6. -सिञ्चति -सेक्तुं),—(Mingle, adulterate) मिश्र् (c. 10. मिश्रयति -यितुं), सम्मिश्र्, संसृज् (c. 6. -सृजति -स्रष्टुं).—(Confound) मुह् in caus. (मोहयति -यितुं), विनश् in caus. (-नाशयति -यितुं).—(Obliterate) आमृज् (c. 2. -मार्ष्टि -मार्ष्टुं), उच्छिद् (c. 7. -छिनत्ति -छेत्तुं), विलुप्

in caus. (-लोपयति -यितुं); 'dash one's hopes,' आशा भञ्ज् or खण्ड् (c. 10. खण्डयति -यितुं); 'dash out the brains,' मस्तकं निष्पिष्.

To DASH, *v. n.* (Rush against with a violent motion) प्रपत् (c. 1. -पतति -तितुं), प्रोत्पत्, आपत्, प्रस्कन्द् (c. 1. -स्कन्दति -स्कन्तुं), उत्प्लु (c. 1. -प्लवते -प्लोतुं), अभिद्रु (c. 1. -द्रवति -द्रोतुं).—(Be dashed in pieces), प्रभञ्ज् in pass. (-भज्यते).

DASH, *s.* (Collision) सङ्घट्टः -ट्टनं, समाघातः, प्रतिघातः, अभिघातः, परस्पराघातः, प्रभङ्गः, सम्मर्द्दः, मर्द्दनं, निष्पेषः.—(Infusion, admixture) प्रक्षेपः, मिश्रणं, सम्पर्कः, संसर्गः; 'a dash, a slight quantity,' किञ्चित्, ईषत्.—(A line in writing to denote a pause or omission) लिखने विरामसूचनार्थं or त्यागसूचनार्थं क्षुद्ररेखा.—(Blow) प्रहारः, आघातः, आहतिः *f.*

DASTARD, *s.* कापुरुषः, कुपुरुषः, हतकः, क्लीबः, कातरः, कृपणः, भीरुः.

To DASTARD or DASTARDISE, *v. a.* त्रस् in caus. (त्रासयति -यितुं), सन्त्रस्; भी in caus. (भाययति or भीषयति -यितुं), दीनचेतसं -सां -सं कृ.

DASTARDLY, *a.* अमनुष्यः -ष्या -ष्यं, कातरः -रा -रं, निर्वीरः -रा -रं, क्लीबः -बा -बं, अपौरुषेयः -यी -यं, दीनमनस्कः -स्का -स्कं.

DASTARDY, *s.* कापुरुषत्वं, अमनुष्यता, अपौरुषं, कातर्यं, क्लैव्यं, दीनता.

DATA, DATUM, *s.* तत्त्वानि *n. pl.*, सत्यानि *n. pl.*, सर्व्वानुमतं तत्त्वं, उपन्यासः.

DATE, *s.* (Time at which a letter, &c. is written) लिखनकालः, लिखनदिवसः, दिवसः, दिनं, तिथिः *m. f.*—(Time at which a thing was done) कालः, कालिकता, तत्कालः.—(Period, term) अवधिः *m.*, कालावधिः *m.*, परिमाणं.—(Fruit) खर्ज्जूरः, काठिनः; 'out of date,' अव्यवहारितः -ता -तं, निरूढः -ढा -ढं.

To DATE, *v. a.* कालं or दिवसं or दिनं or तिथिं लिख् (c. 6. लिखति, लेखितुं).

DATED, *p. p.* कालसम्बद्धः -द्धा -द्धं, सकालः -ला -लं, कृतकालः -ला -लं.

DATE-TREE, *s.* खर्ज्जूरः, तृणद्रुमः, घनामयः; 'marshy date-tree,' हिन्तालः, हीन्तालः, हिमहासकः.

DATIVE, *a.* (Case) सम्प्रदानं, सम्प्रदानकारकः, चतुर्थी विभक्तिः.

To DAUB, *v. a.* लिप् (c. 6. लिम्पति, लेप्तुं), आलिप्, उपलिप्, समालिप्; अञ्ज् (c. 7. अनक्ति, अंक्तुं or caus. अञ्जयति -यितुं), दिह् (c. 2. देग्धि -ग्धुं), प्रदिह्.—(Cover over) छद् (c. 10. छादयति -यितुं), प्रच्छद्.

DAUB, *s.* लेपः, विलेपः.—(Bad painting) कुचित्रं, कुचित्रलेखा, मन्दचित्रं.

DAUBED, *p. p.* लिप्तः -प्ता -प्तं, उपलिप्तः -प्ता -प्तं, विलिप्तः -प्ता -प्तं, अक्तः -क्ता -क्तं, अभ्यक्तः -क्ता -क्तं, दिग्धः -ग्धा -ग्धं, निदिग्धः -ग्धा -ग्धं.

DAUBER, *s.* लेपकः, लेपकरः, प्रलेपकः.—(Coarse painter) अनभिज्ञचित्रकरः, कुचित्रलिक् *m.* (ख्), चित्रकरदेशीयः, चित्रकरपाशः.

DAUBY, *a.* श्यानः -ना -नं, शीनः -ना -नं, सान्द्रः -न्द्रा -न्द्रं, लेप्यः -प्या -प्यं.

DAUGHTER, *s.* दुहिता *f.* (तृ), पुत्री, पुत्रिका, पुत्रका, सुता, सूनुः -नूः *f.*, आत्मजा, स्वजा, अङ्गजा, कन्या, तनया, कन्यकाजनः, जाता, दारिका, प्रसूतिः *f.*, पिद् *f.* (श्); 'legitimate daughter,' औरसी, धर्म्मजा; 'daughter in law,' स्नुषा, जनी, पुत्रवधूः *f.*, वधूः *f.*, वधूटी, सुतस्त्री; 'adopted daughter,' करणीसुता, पुत्रिका, पोष्यपुत्री, क्रीतपुत्री; 'daughter's husband,' जामाता *m.* (तृ), दुहितुःपतिः *m.*

To DAUNT, *v. a.* त्रस् in caus. (-त्रासयति -यितुं), सन्त्रस्, भी in caus. (भाययति or भीषयति -यितुं), भयं जन् in caus. (जनयति -यितुं), मनो भञ्ज् (c. 7. भनक्ति, भंक्तुं), मनोहतं -तां -तं कृ.

DAUNTLESS, *a.* निर्भयः -या -यं, अशङ्कः -ङ्का -ङ्कं, विशङ्कः -ङ्का -ङ्कं, अभीतः -ता -तं, अकुतोभयः -या -यं, अपभीः -भीः -भि, निःसाध्वसः -सा -सं.

DAUNTLESSNESS, *s.* निर्भयत्वं, अभीतिः *f.*, अभयं, अभीरुता, विशङ्कता.

DAUPHIN, *s.* युवराजः, ज्येष्ठो राजपुत्रः, राज्ञः पूर्व्वजपुत्रः.

To DAWDLE, *v. n.* विलस् (c. 1. -लसते -सितुं), कालं क्षिप् (c. 6. क्षिपति, क्षेप्तुं).

DAWDLER, *s.* विलासी *m.* (न्), कालक्षेपकः, दीर्घसूत्री *m.* (न्).

To DAWN, *v. n.* प्रभा (c. 2. -भाति -तुं), उषस् (nom. उषस्यति), उष् (c. 1. उच्छति, ओषितुं), व्युष्, समुष्, प्रभातीभू.

DAWN, *s.* अरुणः, प्रभातं, उषः -षः *n.* (स्), प्रत्युषः -षः *n.* (स्), प्रत्यूषः -षः *n.* (स्), अरुणोदयः, व्युष्टं, विभातं, भातः, उदयः, प्रातःकालः, कल्यं, काल्यं, पूर्व्वसन्ध्या, प्राक्सन्ध्या, सन्ध्या, दिवसमुखं, अहर्मुखं, दिनारम्भः, दिनादिः *m.*, निशावसानं, निशान्तं, क्षपान्तः, रात्रिविगमः, गोसर्गः, प्राबोधिकः; 'at dawn,' प्रभाते, उषा, प्रातःकाले, प्रातर्; 'belonging to the dawn,' उषस्यः -स्या -स्यं, प्रभातीयः -या -यं, प्रातःकालीनः -ना -नं.

DAY, *s.* दिवसः -सं, दिनं, अहः *m.* (न्), वासरः, वारः, द्यु *n.*, घस्रः, वाश्रः; 'a lunar day,' तिथिः *m. f.* -थी; 'to day,' अद्य; 'by day,' दिवा, अह्नाय; 'day by day,' प्रतिदिनं, प्रतिदिवसं, प्रतिवासरं, प्रत्यहं, दिवसे दिवसे, अहन्यहनि, अहरहः, दिने दिने; 'day and night,' अहोरात्रं, अहर्निशं, दिवानिशं, दिवारात्रं, क्षपाहं, द्युनिशं, द्युनिशौ; 'from day to day,' दिनाद्दिनं, वारं वारं; 'one day,' एकदा; 'a former day,' पूर्व्वेद्युस्; 'a future day,' उत्तरेद्युस्; 'another day,' अन्येद्युस्; 'next day,' परेद्युस्, परेद्यवि; 'the day before yesterday,' अपरेद्युस्; 'the day after to-morrow,' परश्वस्, अधरेद्युस्; 'a night and two days or a day and two nights,' पक्षिणी; 'a day of Brahma,' ब्राह्मः; 'a day of the gods,' दैवतः; 'a rainy day,' दुर्द्दिनं, वार्द्दलं; 'day's hire,' दिनिका, दैनिकी.

DAY-BOOK, *s.* महाजनस्य दैनिकपुस्तकं, वाणिज्यपुस्तकं यस्मिन् दिवसे दिवसे पण्यादावृत्तान्तो लिख्यते or आरोप्यते.

DAY-BREAK, *s.* अरुणोदयः, उदयकालः, उषः, प्रत्युषः, प्रभातं, प्रभातकालः, दिवसमुखं, अहर्मुखं, दिनारम्भः, दिनादिः *m.*, रात्र्यवसानं, निशान्तं.

DAY-LABOUR, *s.* व्रातं, दैनिककर्म्म *n.* (न्), आह्निकक्रिया, दिवाकर्म्म *n.*

DAY-LABOURER, *s.* व्रातीनः, व्रातकरः, व्रातव्यापृतः, दैनिककर्म्मकरः.

DAY-LIGHT, *s.* दिनज्योतिः *n.* (स्), सूर्य्यकालः, सूर्य्यरश्मिः *m.*, दिनालोकः, दीप्तिः *f.*

DAY-SPRING, *s.* अरुणोदयः, उदयः, सूर्य्योदयः, दिवसमुखं, दिनारम्भः.

DAY-STAR, *s.* प्रभातनक्षत्रं, प्रभातीयतारा, प्रातरुदयिनी तारा, शुक्रतारा.

DAY-TIME, *s.* दिवसकालः, सूर्य्यकालः, सूर्य्यसमयः, दिनकालः, रविकालः.

DAY-WORK, *s.* दिवसकर्म्म *n.* (न्), दिवाकर्म्म, आह्निकक्रिया, व्रातं.

To DAZZLE, *v. a.* अतिशयतेजसा दृष्टिं सन्तप् in caus. (-तापयति -यितुं) or उपहन् (c. 2. -हन्ति -न्तुं) or अवरुध् (c. 7. -रुणद्धि -रोद्धुं).

To DAZZLE, *v. n.* अतिदीप्त्युपहतत्वात् सन्तापितदृष्टिः -ष्टिः -ष्टि भू.

DAZZLED, *p. p.* उपहतदृष्टिः -ष्टिः -ष्टि or अवरुद्धदृष्टिः, उपहतनयनः -ना -नं.

DAZZLING, *a.* अतितैजसः -सी -सं, उज्ज्वलः -ला -लं, दृष्टिसन्तापकः -का -कं, दुरालोकः -का -कं, दुर्निरीक्ष्यः -क्ष्या -क्ष्यं, दुर्दर्शः -र्शा -र्शं, नयनोपघाती -तिनी -ति (न्).

DEACON, *s.* उपपुरोहितः, उपधर्म्माध्यापकः, पुरोहितसहायः, सहकारी *m.* (न्).

DEACONESS, *s.* पूर्व्वकाले ख्रीष्टीयसमाजे पुरोहितसहकारिणी स्त्री.

DEACONRY, DEACONSHIP, *s.* उपपुरोहितस्य पदं or व्यापारः or कर्म्म *n.* (न्).

DEAD, *a.* and *p.* मृतः -ता -तं, प्रेतः -ता -तं, परेतः -ता -तं, सम्मृतः -ता -तं, प्रेतीभूतः -ता -तं, अतीतः -ता -तं, व्यतीतः -ता -तं, अपगतः -ता -तं,

विगतः -ता -तं, अजीवः -वा -वं, निर्जीवः -वा -वं, व्यापन्नः -न्ना -न्नं, विपन्नः -न्ना -न्नं, संस्थितः -ता -तं, मृतः -ता -तं, प्रमीतः -ता -तं, नष्टः -ष्टा -ष्टं, उपरतः -ता -तं, अवसन्नः -न्ना -न्नं, त्यक्तजीवनः -ना -नं, प्रहीणजीवितः -ता -तं, न्यस्तदेहः -हा -हं, गतप्राणः -णा -णं, गतासुः -सुः -सु or उद्गतासुः, परासुः -सुः -सु, प्राप्तपञ्चत्वः -त्वा -त्वं, अध्रियमाणः -णा -णं, नामशेषः -षा -षं, कीर्त्तिशेषः -षा -षं, कथाशेषः -षा -षं, दिष्टङ्गतः -ता -तं, प्रशान्तः -न्ता -न्तं; 'gone to heaven,' स्वर्यातः -ता -तं, ऊर्ड्वगतः -ता -तं; 'half-dead,' मृतकल्पः -ल्पा -ल्पं, मृतप्रायः -या -यं, मुमूर्षुः -र्षुः -र्षु.—(Inanimate) अप्राणी -णिनी -णि (न्), विचेतनः -ना -नं, अमुः -सुः -सु, प्राणहीनः -ना -नं.—(Motionless) निष्पन्दः -न्दा -न्दं, निश्चेष्टः -ष्टा -ष्टं, निश्चलः -ला -लं.—(Empty) शून्यः -न्या -न्यं.—(Dull) मन्दः -न्दा -न्दं, निस्तेजाः -जाः -जः (स्).—(Obtuse) जडः -डा -डं, अतीक्ष्णः -क्ष्णा -क्ष्णं.—(Vapid) विरसः -सा -सं, निस्सत्त्वः -त्त्वा -त्त्वं, निस्सारः -रा -रं, क्लीवः -वा -वं.—(Useless) विफलः -ला -लं.—(Numbed) स्तब्धः -ब्धा -ब्धं, सुप्तः -प्ता -प्तं.—(Dead body) मृतशरीरं, मृतकं, शवः -वं, कुणपः -पं.

DEAD, *s.* (Of night) मध्यरात्रः, महारात्रः, महानिशा, अर्द्धरात्रः, अर्द्धनिशा, निशीथः; 'in the dead of night,' रात्रिमध्ये; 'of winter,' शीतकालमध्ये.

To DEADEN, *v. a.* दुर्बलीकृ, निर्बलीकृ, म्लानीकृ, शिथिलीकृ, विरसीकृ, तेजो हृ (c. 1. हरति, हर्त्तुं) or उपहन् (c. 2. -हन्ति -न्तुं), शम् in caus. (शमयति -यितुं).

To DEADEN, *v. n.* म्लै (c. 1. म्लायति, म्लातुं), क्षि in pass. (क्षीयते), शिथिलीभू.

DEADENED, *p. p.* हृततेजाः -जाः -जः (स्) or म्लानतेजाः or नष्टतेजाः, क्षीणशक्तिः -क्तिः -क्ति, शिथिलबलः -ला -लं, उपहतशक्तिः -क्तिः -क्ति.

DEADLY, *a.* मारात्मकः -का -कं, व्यापादकः -का -कं, आत्ययिकः -की -कं, प्राणान्तिकः -की -कं or प्राणान्तकः or जीवान्तकः, प्राणहारी -रिणी -रि (न्) or प्राणापहारी, प्राणघातकः -का -कं, मृत्युजनकः -का -कं, निधनकारी -रिणी -रि (न्), विषतुल्यः -ल्या -ल्यं, सविषः -षा -षं, कालकल्पः -ल्पा -ल्पं, प्राणनाशकः -का -कं, मर्म्मान्तिकः -की -कं.—(Implacable) अशाम्यः -म्या -म्यं; 'deadly hatred,' बद्धवैरं; 'deadly poison,' मृत्युजनकगरलं.

DEADLY, *adv.* (In a manner like the dead) मृतवत्, प्रेतवत्, शववत्.—(Mortally) मारात्मकं, प्राणान्तिकं; 'deadly wounded,' भिन्नमर्म्मा *m.* (न्); 'deadly pale,' शवसवर्णः -र्णा -र्णं.

DEADNESS, *s.* (Coldness, want of affection) निःस्नेहता, विरक्तिः *f.*, वैराग्यं.—(Languor, weakness) म्लानिः *f.*, ग्लानिः *f.*, अवसादः, मान्द्यं, निर्बलता, दौर्बल्यं, अशक्तिः *f.*, बलशैथिल्यं, शिथिलता.—(Want of motion) निष्पन्दता, निश्चलता.—(Want of spirit) तेजोहीनता, निस्सत्त्वता, वैरस्यं, जडत्वं.—(Numbness) सुप्तिः *f.*, स्तब्धता.—(Barrenness) वन्ध्यता, वैफल्यं.

DEAD-RECKONING, *s.* कुत्र समुद्रे नौका वर्त्तते इति जिज्ञासया सूर्य्यताराद्यभावे नाविकैः कृता गणना.

DEAF, *a.* बधिरः -रा -रं, एडः -डा -डं, अकर्णः -र्णा -र्णं, बन्धुरः -रा -रं, कल्लः -ल्ला -ल्लं, श्रोत्रविकलः -ला -लं, श्रवणेन्द्रियविकलः -ला -लं, श्रवणशक्तिरहितः -ता -तं, श्रुतिवर्ज्जितः -ता -तं; 'deaf and dumb,' एडमूकः -का -कं, कल्पः -ल्पा -ल्पं.

To DEAFEN, *v. a.* बधिरीकृ, बधिर (nom. बधिरयति -यितुं), कर्णम् उपहन् (c. 2. -हन्ति -न्तुं), श्रवणशक्तिं हृ (c. 1. हरति, हर्त्तुं).

DEAFENED, *p. p.* उपहतकर्णः -र्णा -र्णं, बधिरीकृतः -ता -तं.

DEAFENING, *a.* कर्णोपघाती -तिनी -ति (न्), श्रवणशक्तिहारी -रिणी -रि (न्)

DEAFISH, *a.* ईषद्बधिरः -रा -रं, ईषदेडः -डा -डं, अस्पष्टश्रवणः -णा -णं.

DEAFLY, *adv.* बधिरवत्, एडवत्, अश्रवणपूर्व्वं, अस्पष्टं.

DEAFNESS, *s.* बधिरत्वं -ता, एडता, कल्लत्वं, अश्रवणं, श्रवणहीनता, श्रवणेन्द्रियवैकल्यं, श्रवणाक्षमता.

DEAL, *s.* (Quantity) बाहुल्यं, बहुत्वं, प्राचुर्य्यं, प्रायः; 'a deal of, much,' बहुः -हुः -ह्वी -हु, भूरिः -रिः -रि, प्रचुरः -रा -रं, अनल्पः -ल्पा -ल्पं, अनेकः -का -कं; 'a deal of money,' बहुधनं; 'a good deal,' बहु, भृशं, अतिशयं, निर्भरं, गाढं, अत्यन्तं, अनल्पं, अति or सु, prefixed; 'a good deal vexed,' सुदुःखितः.—(Fir wood) दारु *n.*, देवदारु, देवकाष्ठं, इन्द्रदारुः *m.*, किलिमं.

To DEAL, *v. a.* (Distribute) कॢप् (c. 10. कल्पयति -यितुं), परिकॢप्; पृथक् पृथग् विभज् (c. 1. -भजति -ते -भक्तुं) or विन्यस् (c. 4. -अस्यति -असितुं) or व्यंस् (c. 10. -अंसयति -यितुं) or विधा (c. 3. -दधाति -धातुं), वण्ट् (c. 10. वण्टयति -यितुं).—(Scatter) विकॄ (c. 6. -किरति -करितुं -रीतुं), विक्षिप् (c. 6. -क्षिपति -क्षेप्तुं), व्यस्; 'to deal blows,' मुष्टिं or दण्डं पत् in caus. (पातयति -यितुं).

To DEAL, *v. n.* (Transact business, trade) पण् (c. 1. पणते -णितुं or पणायति -यितुं), पणायां कृ, व्यवहृ (c. 1. -हरति -हर्त्तुं), व्यापृ (c. 6. -प्रियते), क्रयविक्रयं कृ.—(Behave, act) चर् (c. 1. चरति -रितुं), आचर्, समाचर्; वृत् (c. 1. वर्त्तते -र्त्तितुं), चेष्ट् (c. 1. चेष्टते -ष्टितुं), विधा (c. 3. -दधाति -धातुं).

To DEAL WITH, *v. a.* (Treat in any manner) विधा (c. 3. -दधाति -धातुं), आचर् (c. 1. -चरति -रितुं), समाचर्; व्यवहृ (c. 1. -हरति -हर्त्तुं); 'he deals honourably with me,' मयि यथान्यायं वृत्तिं वर्त्तते.—(Contend with) प्रतिकृ, विरुध् (c. 7. -रुणद्धि -रोद्धुं), प्रतिरुध्, प्रतिकूल (nom. प्रतिकूलयति -यितुं); 'how can one deal with such a monarch?' एवंविधे नृपे कुतो यदीशत्वं.—(Manage) प्रणी (c. 1. -णयति -णेतुं), विधा, घट् (c. 1. घटते -टितुं); 'an easy man to deal with,' विधेयः, प्रणेयः, वश्यः, गृह्यकः, अभिगम्यः, विनेयः; 'a hard man to deal with,' दुर्धर्षः.

DEALER, *s.* (One who has to do with any thing) व्यापारी *m.* (न्), व्यवसायी *m.* (न्), व्यवहर्त्ता *m.* (र्त्तृ), व्यवहारी *m.* (न्), कर्म्मकारी *m.* (न्).—(Trader) क्रयविक्रयिकः, विपणी *m.* (न्), आपणिकः, प्रापणिकः, पणिकः, वणिक् *m.* (ज्), वाणिजः, विक्रयिकः, विक्रेता *m.* (तृ).

DEALING, *s.* (Practice, mode of treatment) व्यापारः, व्यवहारः, व्यवसायः, कर्म्म *n.* (न्), क्रिया, कार्य्यं, चेष्टा, विचेष्टितं, प्रवृत्तिः *f.*, विधानं, आचारः, आचरणं, चरितं, वृत्तं, कर्म्मविधिः *m.*—(Intercourse) व्यवहारः, सङ्गतिः *f.*, सङ्गः, संसर्गः.—(Traffic) क्रयविक्रयः, विपणः, पणाया, पणः, पाणः, वाणिज्यं -ज्या, वणिक्पथं, महाजनकर्म्म *n.* (न्), निगमः, सत्यानृतं.

DEALT WITH, *p. p.* व्यवहारितः -ता -तं, आचरितः -ता -तं, पणायितः -ता -तं.

DEAMBULATION, *s.* बहिर्गमनं, बहिर्भ्रमणं, परिक्रमः, पर्य्यटनं, भ्रमणं, विहारः.

DEAN, *s.* प्रधानधर्म्माध्यक्षाधिकारे द्वितीयपदस्थः, महापूजाशालासम्बन्धीयमठे प्रधानसभासद्, दशपुरोहिताधिपतिः *m.*—(In a college) विद्यालये विनयाध्यक्षः.

DEANERY, *s.* (House of a dean) पुरोहिताधिपतेर् गृहं or वेश्म *n.* (न्) or निवासः.

DEANSHIP, *s.* पुरोहिताधिपतेः पदं or अधिकारः or व्यापारः.

DEAR, *a.* (Beloved) प्रियः -या -यं, सुप्रियः -या -यं, हृदयप्रियः -या -यं, दयितः -ता -तं, इष्टः -ष्टा -ष्टं, अभीष्टः -ष्टा -ष्टं, प्रीतः -ता -तं, प्रेष्ठः -ष्ठा -ष्ठं, हृद्यः -द्या -द्यं, वल्लभः -भा -भं, अभीप्सितः -ता -तं, सुभगः -गा -गं.

कान्तः -न्ता -न्तं, प्रियतमः -मा -मं, इष्टतमः -मा -मं; 'a dear friend,' प्रियसुहृद् *m.*; 'dear as one's life,' असुसमः -मा -मं, प्राणाधिकः -का -कं, प्राणेभ्यो गरीयान् -यसी -यः (स्).—(Of high price, costly) दुर्मूल्यः -ल्या -ल्यं, बहुमूल्यः -ल्या -ल्यं, महामूल्यः -ल्या -ल्यं, महार्घः -र्घा -र्घं, दुष्क्रयः -या -यं, बहुधनव्ययेन क्रेयः -या -यं, गुरुः -र्वी -रु, महार्हः -र्हा -र्हं, अर्घ्यः -र्घ्या -र्घ्यं, उत्कृष्टः -ष्टा -ष्टं.

DEAR, *s.* (Word of endearment) प्रियः -या, दयितः -ता, कान्तः -न्ता, दयितः -ता, वत्सः -त्सा; 'my dear,' प्रिय voc. c. *m.*, प्रिये voc. c. *f.*

DEAR, *adv.* (Oh dear!) अहो, अहोबत, कष्टं, आ, हा, हन्त, अहह.

DEAR-BOUGHT, *a.* दुष्क्रीतः -ता -तं, बहुमूल्येन क्रीतः -ता -तं.

DEARLY, *adv.* (With great fondness) प्रियं, सुप्रियं, प्रीत्या, सुप्रीत्या; 'dearly beloved,' अतिप्रियः -या -यं, प्रियतमः -मा -मं.—(At a high price) बहुमूल्येन, दुर्मूल्येन, महार्घेण, गुरु, गुरुमूल्येन.

DEARNESS, *s.* (Fondness) प्रियता, इष्टता, अभीष्टता, प्रीतिः *f.*—(High price) दुर्मूल्यं, बहुमूल्यं, माहार्घ्यं, महार्घता, महार्घः, मूल्यगुरुता, गुरुत्वं.

DEARTH, *s.* (Famine) दुर्भिक्षं, दुष्कालः, अनाकालं, दुर्भक्ष्यं, नीवाकः, प्रयामः, उपद्रवः; 'dearth of provisions,' आहारविरहः.—(Want, need) अभावः, अप्राप्तिः *f.*, विरहः, असम्भवः, दौर्लभ्यं, वैरल्यं; 'dearth of money,' धनाभावः.

To DEARTICULATE, *v. a.* विसन्धीकृ, सन्धित्रोटनं कृ, व्यङ्गीकृ.

DEARTICULATED, *p. p.* विसन्धितः -ता -तं, त्रुटितसन्धिः -न्धिः -न्धि.

DOCIBLE, DOCILE, *a.* विनेयः -या -यं, प्रणेयः -या -यं, विधेयः -या -यं, वश्यः -श्या -श्यं, वशगः -गा -गं, वशानुगः -गा -गं, वश्यात्मा -त्मा -त्म (न्) अनुकूलः -ला -लं, अनायासेन शिक्षणीयः -या -यं or शिक्ष्यः -क्ष्या -क्ष्यं, गृह्यकः -का -कं, अनुविधायी -यिनी -यि (न्), अधीनः -ना -नं, आयत्तः -त्ता -त्तं, अस्वच्छन्दः -न्दा -न्दं, निघ्नः -घ्ना -घ्नं, शिक्षाशीलः -ला -लं.

DOCIBLENESS, DOCILITY, *s.* विनेयता, विधेयता, वश्यता, शिक्षणीयत्वं, शिक्षाशीलत्वं.

DOCK, *s.* (The plant) लोलिका, भृङ्गराजः, रक्तस्रावः, सौगन्धिकं, रक्तसौगन्धिकं.—(Tail cut short) छिन्नवालः, ह्रस्वपुच्छः.—(Station for ships) नौकावस्थानं, नौकाश्रयः, नावाश्रयः, नौकाधारः, नौकागारं, नावाधारः, नौकोद्धरणस्थानं.

To DOCK, *v. a.* पुच्छं छिद् (c. 7. छिनत्ति, छेत्तुं) or अवछिद् or ह्रस् (c. 10. ह्रासयति -यितुं), अपकृत् (c. 6. -कृन्तति -कर्त्तितुं), निकृत्, लू (c. 9. लुनाति, लवितुं).—(Lay up in a dock) नौकाश्रये निविश्

in caus. (-वेशयति -यितुं), नावम् उद्धृ (c. 1. -हरति -हर्त्तुं).

Dock-yard, *s.* नाविकभाण्डागारं, नौकानिर्म्माणस्थानं.

Docked, *p. p.* अवच्छिन्नः -न्ना -न्नं, अवकर्त्तितः -ता -तं, लूनः -ना -नं.

Docket, *s.* (Ticket on goods) अङ्कपटः, भाण्डोपरि चिह्नं or अङ्कः or अङ्कपत्रं, पत्रकं.—(Small piece of paper containing the heads of a writing) सङ्ग्रहपत्रकं, सूचिपत्रकं.—(List of those who have cases in a court) अर्थिनां or कार्य्यिणां नामावलिपत्रं.

To **docket**, *v. a.* (Make an abstract of a writing and enter it in a book) लिखितसङ्ग्रहं कृत्वा पुस्तके समारुह् in caus. (-रोपयति -यितुं), or अभिलिख् (c. 6. -लिखति -लेखितुं).

Doctor, *s.* (A learned man) पण्डितः, ज्ञानी *m.* (न्), व्युत्पन्नः, वैद्यः, शास्त्री *m.* (न्).—The word आचार्य्यः is affixed to the names of learned men, as 'Doctor' is prefixed: thus राघवाचार्य्यः, रामाचार्य्यः.—(Teacher) आचार्य्यः, शिक्षकः, अध्यापकः, उपदेशकः, गुरुः *m.*—(Doctor of divinity) परमार्थविद्याज्ञः, श्रुतिविद्यासम्पन्नः.—(Physician) वैद्यः, चिकित्सकः, भिषक् *m.* (ज्), आयुर्वेददृक् *m.* (श्), चिकित्साजीवी *m.* (न्), अगदकारः, रोगशान्तकः, रोगहृत् *m.*, रोगहा *m.* (न्), जीवदः.

To **doctor**, *v. a.* कित् in des. (चिकित्सति -त्सितुं), भिषज् (nom. भिषज्यति -ज्यितुं), उपचर् (c. 1. -चरति -रितुं), उपचारं कृ, औषधीकृ.

Doctoral, *a.* आचार्य्यपदसम्बन्धी -न्धिनी -न्धि (न्), वैद्यः -द्या -द्यं.

Doctorally, *adv.* वैद्यवत्, पण्डितवत्, आचार्य्यवत्, गुरुवत्.

Doctorship, *s.* आचार्य्यता -त्वं, आचार्य्यपदं, गुरुत्वं, वैद्यपदं.

Doctrinal, *a.* तत्त्वोपदेशकः -का -कं, तत्त्वोपदेशी -शिनी -शि (न्), तत्त्वशिक्षकः -का -कं, शिक्षाविषयः -या -यं, वैधिकः -की -कं, सौत्रः -त्री -त्रं.

Doctrine, *s.* (Principle laid down) तत्त्वं, मतं, सूत्रं, न्यायः.—(System of doctrines) पथः, पन्थाः *m.* (पथिन्), मार्गः; 'a different doctrine,' परमतं; 'difference of doctrine,' शास्त्रभेदः; 'heretical doctrine,' असच्छास्त्रं; 'received doctrine,' आम्नायः, सम्प्रदायः; 'adhering to a doctrine,' वादरतः.—(Learning) विद्या, पाण्डित्यं.

Document, *s.* पत्रं -त्री, पत्रकं, पत्रिका, लेख्यं, लेख्यपत्रं, लेख्यप्रसङ्गः, लेख्यपत्रं, लेख्यप्रमाणं, लिखनं, लिखितं; 'a forged document,' कपटलेख्यं.

Dodecagon, *s.* द्वादशास्रं, द्वादशकोणः.

To **dodge**, *v. a.* and *n.* (Trick) वञ्च् (c. 10. वञ्चयते -ति -यितुं), व्यपदिश् (c. 6. -दिशति -देष्टुं), अपदिश्, प्रलभ् (c. 1. -लभते -लब्धुं), प्रतॄ in caus. (-तारयति -यितुं), छल् (c. 10. छलयति -यितुं).—(Evade) अपक्रम् (c. 1. -क्रामति -क्रमितुं), पलाय् (c. 1. पलायते -यितुं).—(Escape by suddenly shifting place) पलायमानो अकस्मात् परिवृत् (c. 1. -वर्त्तते -र्त्तितुं), विपरिवृत्, इतश्चेतः परिधाव् (c. 1. -धावति -वितुं), विपरिधाव्.

Dodger, *s.* वञ्चकः, मायी *m.* (न्), कपटी *m.* (न्), व्यपदेष्टा *m.* (ष्टृ), प्रतारकः.

Doe, *s.* (She-deer) मृगी, मृगवधूः, हरिणी, एणी, रोहित् *f.*, समीची, पृषती, कन्दली; 'doe-skin,' मृगीचर्म्म *n.* (न्).

Doer, *s.* कर्त्ता *m.* (र्तृ), कारी *m.* (न्), कारकः, कारः, करः, कृत् in comp. विधायी *m.* (न्), अनुष्ठाता *m.* (तृ), कर्म्मकारी *m.*, कर्म्मकरः, सम्पादकः, निर्वाहकः प्रवर्त्तकः.

To **doff**, *v. a.* (Put off dress) वस्त्रम् अवतॄ in caus. (-तारयति -यितुं), or अपनी (c. 1. -नयति -नेतुं), व्यपनी, विवस्त्र (nom. -वस्त्रयति -यितुं), उत्कृष् (c. 1. -कर्षति -क्रष्टुं), अवमुच् (c. 6. -मुञ्चति -मोक्तुं), विमुच्, अपनह् (c. 4. -नह्यति -नद्धुं).

Dog, *s.* (The animal) श्वा *m.* (श्वन्), कुक्कुरः, कुकुरः, शुनकः, भषकः, मृगदंशकः, वक्रपुच्छः, वक्रवालधिः *m.*, ललजिह्वः, जिह्वालिट् *m.* (ह्), वृकारिः *m.*, ग्रामसिंहः, शीघ्रचेतनः, रात्रिजागरः, कृतज्ञः, सारमेयः, वान्तादः, शरत्कामी *m.* (न्), शवकाम्यः, कौलेयकः; 'sporting-dog,' मृगयाकुशलः कुक्कुरः, आखेटकार्थं श्वा, विश्वकद्रुः *m.*; 'mad-dog,' अलर्कः; 'bite of a dog,' श्वदंशनं.—(Andiron) लोहमयः शूलाधारः. 'To go to the dogs,' शुनो गम् (c. 1. गच्छति, गन्तुं), परिक्षि in pass. (-क्षीयते), विनश् (c. 4. -नश्यति).

To **dog**, *v. a.* कुक्कुरवद् अन्विष् (c. 4. -इष्यति -एषितुं), पश्चाद्गम् (c. 1. -गच्छति -गन्तुं), पश्चाद्वृत् (c. 1. -वर्त्तते -र्त्तितुं), अनुवृत्, अनुसृ (c. 1. -सरति -सर्त्तुं), अनुष्ठा (c. 1. -तिष्ठति -ष्ठातुं), नित्यम् अनुसृत्य आयासं जन् (c. 10. जनयति -यितुं).

Dog-brier or **dog-rose**, *s.* जवापुष्पः करटकगुल्मः, ओड्रपुष्पः करटकस्तम्बः.

Dog-cheap, *a.* श्वमांसवत् or विमांसवद् अल्पमूल्येन क्रेयः -या -यं, स्वल्पमूल्यः -ल्या -ल्यं, स्वल्पार्घः -र्घा -र्घं.

Dog-days, *s.* श्वदिनानि *n. pl.*, अत्युष्णकालः, अत्युष्णसमयः, सूर्य्यदिनानि, श्रावणात् प्रभृति भाद्रपर्य्यन्तं कालः.

Dog-fancier, *s.* श्वक्रीडी *m.* (न्), श्वगणिकः, श्वागणिकः.

Dogged, *a.* (Sullen, obstinate) वक्रभावः -वा -वं, कर्कशभावः -वा -वं, जडः -डा -डं, स्तब्धः -ब्धा -ब्धं, कठिनः -ना -नं, निष्ठुरः -रा -रं.

Doggedly, *adv.* वक्रभावेन, कर्कशभावेन, जाड्येन, निष्ठुरं, कर्कशं.

Doggedness, *s.* भाववक्रता, कार्कश्यं, जाड्यं, जडता, नैष्ठुर्य्यं, काठिन्यं.

Doggerel, *a.* (Irregular, as verses) अपरिमितचरणः -णा -णं, अपरिमितपदः -दा -दं, विषमः -मा -मं; 'doggerel verse,' कुकविता, मन्दकविता, नीचकविता.

Doggish, *a.* श्वशीलः -ला -लं, शौवः -वी -वं, कुक्कुराचारः -रा -रं, श्ववृत्तिः -त्तिः -त्ति, श्वापदः -दी -दं, शौवापदः -दी -दं; 'a doggish fellow,' श्वनरः; 'a doggish life,' श्ववृत्तिः *f.*

Doggishness, *s.* शौवं, श्वशीलता, कुक्कुराचारत्वं, श्वभावः, पशुता.

Dog-grass, *s.* तृणभेदः, तृणं, कक्षः, घासविशेषः.

Dog-hearted, *a.* श्वहृदयः -या -यं, कुक्कुरहृदयः -या -यं, कठिनहृदयः -या -यं.

Dog-hole, *s.* श्वबिलं, श्वगर्त्तः, कुक्कुरगर्त्तः, श्वविवरं, श्वभ्रं, अधमस्थानं.

Dog-keeper, *s.* श्वपोषकः, श्ववान् *m.* (त्), श्वागणिकः, श्वपचः.

Dog-kennel, *s.* कुक्कुरालयः, श्वगृहं, कुक्कुरगृहं, कुक्कुरागारं.

Dog-louse, *s.* श्वयूका, कुक्कुरयूका, श्वकीटः, कुक्कुरकीटः.

Dogma, *s.* मतं, तत्त्वं, सूत्रं, विधिः *m.*, सम्मतं, नियमः, आदेशः, निर्देशः, व्यवस्था.

Dogmatic, **dogmatical**, *a.* आदेशकः -का -कं or निर्देशकः, स्वमताभिमानी -निनी -नि (न्), सधर्षं स्वमतवादी -दिनी -दि (न्) or स्वमतावलम्बी -म्बिनी -म्बि (न्), मतसंस्थापनः -ना -नं, नैयमिकः -की -कं, वैधिकः -की -कं, सौत्रः -त्री -त्रं.

Dogmatically, *adv.* आदेशकप्रकारेण, सनिर्देशं, दृढनिश्चयपूर्वं, सधर्षं.

Dogmatism, *s.* स्वमताभिमानं, स्वमतसंस्थापनं, सधर्षं स्वमतवादः or स्वमतावलम्बनं, दृढोक्तिः *f.*

Dogmatist, **dogmatiser**, *s.* धर्षपूर्वं or गर्वपूर्वं स्वमतवादी *m.* (न्) or स्वमताभिमानी *m.* (न्) or तत्त्ववादी.

To **dogmatise**, *v. n.* सधर्षं or सगर्वं स्वमतं वद् (c. 1. वदति -दितुं), दृढोक्त्या स्वमतं संस्था in caus. (-स्थापयति -यितुं), तत्त्वानि धर्षेण वद.

Dog's ear, *s.* कुक्कुरकर्णः, श्वकर्णः, पुस्तकपत्रकोणे श्वकर्णाकारः पुटः.

Dog-sick, *a.* कुक्कुरवद् वमनकारी -रिणी -रि (न्).

Dog's-meat, *s.* श्वमांसं, कुक्कुरमांसं, विमांसं, कुक्कुराहारः, उच्छिष्टान्नं.

Dog-star, *s.* कुक्कुरसंज्ञा तारा यस्याम् उदितायाम् अत्युष्णकालो भवति.

DOG'S-TOOTH, *s.* श्वादन्तः, श्वदंष्ट्रा, कुक्कुरदन्तः.

DOG-TRICK, *s.* श्ववृत्तं, श्वचेष्टितं, श्वकर्म्म *n.* (न्), दुश्चेष्टितं, कुचेष्टा.

DOG-WEARY, *a.* कुक्कुरवत् परिश्रान्तः -न्ता -न्तं, अतिक्लान्तः -न्ता -न्तं.

DOINGS, *s. pl.* (Things done) चरित्रं, चरितं, चेष्टितं, विचेष्टितं, कृतं, कर्म्म *n.* (न्), विधानं, व्यापारः, चेष्टा, वृत्तं.—(Conduct) व्यवहारः, आचारः, आचरितं, चारित्र्यं, वृत्तिः *f.*, चर्य्या, प्रवृत्तिः *f.*, रीतिः *f.*

DOLE, *s.* (That which is dealt, a part, share) भागः, अंशः, विभागः, भाजितं, भाज्यं, उद्धारः, उपहारः, खण्डं, छेदः, भिन्नं, वण्टः.—(Gratuity) पारितोषिकं.—(Grief) शोकः, दुःखं.

To DOLE, *v. a.* पृथक् पृथग् विभज् (c. 1. -भजति -ते -भक्तुं), विभागशः or अंशांशि दा.

DOLEFUL, DOLESOME, *a.* सशोकः -का -कं, शोचनः -ना -नं, शोकार्त्तः -र्त्ता -र्त्तं, दुःखी -खिनी -खि (न्), समन्युः -न्युः -न्यु, विषादी -दिनी -दि (न्), उद्विग्नः -ग्ना -ग्नं, उग्रः -ग्रा -ग्रं.

DOLEFULLY, *adv.* सशोकं, सविषादं, सोद्वेगं, सदुःखं, सोत्कण्ठं, सखेदं, उग्रं.

DOLEFULNESS, DOLESOMENESS, *s.* शोकः, दुःखं, विषादः, विषण्णता, मन्युः *m.*, खेदः, उद्वेगः, अनाह्लादः, उग्रत्वं, उद्विग्नता, ग्लानिः *f.*, मनोग्लानिः *f.* दुःखितत्वं.

DOLL, *s.* पुत्त्रिका, दारुपुत्त्रिका, पाञ्चालिका, पाञ्चलिका, पाञ्चाली, पुत्तली दारुगर्भा, दारुस्त्री, शालभञ्जी -ञ्जिका, शालाङ्गी, कुरुण्टी, याया कञ्चलिकारिका.

DOLLAR, *s.* (A silver coin) रूप्यमुद्रा, रौप्यमुद्रा.

DOLORIFIC, *a.* दुःखकरः -री -रं, व्यथाकरः -री -रं, पीडाकरः -री -रं.

DOLOROUS, *a.* सशोकः -का -कं, शोकमयः -यी -यं, दुःखमयः -यी -यं, शोकान्वितः -ता -तं, समन्युः -न्युः -न्यु, खेदान्वितः -ता -तं.

DOLOUR, DOLOR, *s.* शोकः, दुःखं, खेदः, मन्युः *m.*, क्लेशः.

DOLPHIN, *s.* (Kind of sea-fish) समुद्रीयमत्स्यभेदः.—(The constellation) श्रविष्ठा, धनिष्ठा.

DOLT, *s.* स्थूलबुद्धिः *m.*, स्थूलधीः *m.*, मन्दबुद्धिः, मूर्खः, मूढः, जडः.

DOLTISH, *a.* जडबुद्धिः -द्धिः -द्धि, मन्दमतिः -तिः -ति, स्थूलः -ला -लं.

DOLTISHLY, *adv.* मूढवत्, जडवत्, मूर्खवत्, जाड्येन, बर्ब्बरवत्.

DOLTISHNESS, *s.* स्थूलबुद्धित्वं, मन्दमतित्वं, जडता -त्वं, जाड्यं, मूढता, मूर्खता, निर्बुद्धिता, अविज्ञता.

DOMAIN, *s.* (Territory governed) राष्ट्रं, विषयः, देशः, प्रदेशः.—(Empire) राज्यं.—(Estate, possession) भूमिः *f.*, अधिकारः, आधिकारण्यं, रिक्थं.

DOME, *s.* (Cupola) अर्द्धगोलाकारं प्रासादशृङ्गं or हर्म्यशिखरं.

DOMESTIC, *s.* (One who lives in the family) गृहवासी *m.* (न्), अन्तेवासी *m.* (न्), आन्तर्वेश्मिकः.—(Servant) भृत्यः, भृतकः, अनुजीवी *m.* (न्), गृहदासः, प्रेष्यः, कर्म्मकरः, सेवकः, परिचरः; 'female domestic,' दासी, प्रेष्या.

DOMESTIC, *a.* (Belonging to one's house or family) गृह्यः -ह्या -ह्यं, गृहसम्बन्धी -न्धिनी -न्धि (न्), आन्तर्वेश्मिकः -की -कं, गृहजः -जा -जं, गृहजातः -ता -तं, भृत्यः -त्या -त्यं, आवसथिकः -का -कं; 'domestic affairs,' गृहकार्य्यं, गृहव्यापारः; 'domestic chaplain,' कुलाचार्य्यः, कुलविप्रः; 'domestic contentions,' गृहछिद्रं, गृहभेदः, गृहकलहः; 'domestic duties,' कुलाचारः; 'domestic slave,' गृहदासः -सी; 'bewildered with domestic cares,' गृहमूढधीः.—(Not wild) गृह्यकः -का -कं, ग्राम्यः -म्या -म्यं, ग्रामवासी -सिनी -सि (न्); 'a domestic cock,' गृहकुक्कुटः, ग्रामकुक्कुटः; 'a domestic pigeon,' गृहकपोतकः.—(Staying much at home) गृहारूढचेताः *m.* (स्), गेहेशूरः, गृहप्रियः, गृहवासी *m.* (न्).—(Pertaining to one's country) दैशिकः -की -कं, देश prefixed in comp., अभिजनदेशीयः -या -यं; 'intestine broil,' जनपदभेदः.

To DOMESTICATE, *v. a.* गृह्यकं -कां -कं कृ, गृहे पुष् (c. 10. पोषयति -यितुं).

DOMESTICATED, *p. p.* गृह्यकः -का -कं, गृहपुष्टः -ष्टा -ष्टं, छेकः -का -कं, ग्राम्यः -म्या -म्यं, संस्थः -स्था -स्थं.

DOMICILE, *s.* गृहं, वासस्थानं, वसतिः *f.*, निवासः, आवासः, अधिवासः, समावासः, अवस्थानं, वेश्म *n.* (न्), आलयः, निलयः, आयतनं.

DOMICILED, *p. p.* कृतवासः -सा -सं, कृतालयः -या -यं, समावासितः -ता -तं.

DOMINANT, *a.* प्रभूतः -ता -तं, प्रभवः -वा -वं, प्रभविष्णुः -ष्णुः -ष्णु, प्रधानः -ना -नं, प्रबलः -ला -लं, अतिरेकी -किणी -कि (न्), सातिशयः -या -यं, प्रकृष्टः -ष्टा -ष्टं, श्रेष्ठः -ष्ठा -ष्ठं, अधिष्ठाता -त्री -तृ (तृ), अग्रस्थः -स्था -स्थं.

To DOMINATE, *v. n.* प्रभू, अतिरिच् in pass. (-रिच्यते), उद्रिच्, व्यतिरिच्, अधिष्ठा (c. 1. -तिष्ठति -ष्ठातुं), अध्यास् (c. 2. -आस्ते -आसितुं), प्रशास् (c. 2. -शास्ति -शासितुं).

DOMINATION, *s.* प्रभुत्वं, प्रभविष्णुता, प्राधान्यं, आधिपत्यं, ईशत्वं, ऐश्वर्य्यं, अधिकारः, राजत्वं, राज्यं, शासनं, प्रशासनं, प्रबलता.

To DOMINEER, *v. n.* धर्षेण शास् (c. 2. शास्ति, शासितुं) or ईश् (c. 2. ईष्टे, ईशितुं), भर्त्सनपूर्व्वम् आधिपत्यं कृ, धृष् (c. 5. धृष्णोति, धर्षितुं).

DOMINEERING, *a.* धर्षी -र्षिणी -र्षि (न्), धृष्टः -ष्टा -ष्टं, भर्त्सनकारी -रिणी -रि (न्), मदोद्धतः -ता -तं, मदोदग्रः -ग्रा -ग्रं, उत्सिक्तः -क्ता -क्तं.

DOMINICAL, *a.* प्रभुदिवसविषयकः -का -कं, विश्रामवारसम्बन्धी -न्धिनी -न्धि (न्); 'dominical letter,' प्रभुवारलाक्षणिको वर्णः, विश्रामवारसूचकम् अक्षरं

DOMINICAL, *s.* (The Lord's-day) ईश्वरदिवसः, प्रभुदिनं, विश्रामवारः, रविवारः, भट्टारकवारः.

DOMINICAN, *s.* डामिनिकमतावलम्बी सन्न्यासिविशेषः, योगी *m.* (न्) तपस्वी *m.* (न्).

DOMINION, *s.* ऐश्वर्य्यं, राज्यं, राजत्वं, प्रभुत्वं, ईशत्वं, अधिकारः, आधिपत्यं, शासनं.—(Country governed) राष्ट्रं, विषयः, देशः, प्रदेशः.

DOMINO, *s.* (A long cloak used as a disguise) विडम्बनयोग्यो दीर्घप्रावारः.—(An oblong piece of ivory) शलाका, दन्तादिमयो दीर्घचतुरस्रः.

DON, *s.* आर्य्यः, महाशयः, सुजनः, महानुभावः, प्रधानलोकः, शिष्टलोकः.

DONARY, *s.* धर्म्मार्थं दत्तं, ईश्वराय दत्तं वस्तु or द्रव्यं.

DONATION, *s.* दानं, प्रदानं, दत्तं, प्रदेयं, सम्प्रदानं, दायः, उपहारः, उपायनं, वितरणं, विसर्ज्जनं, उत्सर्ज्जनं, त्यागः, विश्राणनं, अंहतिः *f.*, प्रदा, दादः दा, दं, हरणं, प्रतिपादनं, विहापितं, स्पर्शनं.

DONATIVE, *s.* दानं, प्रदानं, वितरणं, विसर्ज्जनं, पारितोषिकं.

DONE, *p. p.* कृतः -ता -तं, अनुष्ठितः -ता -तं, आचरितः -ता -तं, निष्पन्नः -न्ना -न्नं, वृत्तः -त्ता -त्तं, सम्पादितः -ता -तं.

DONEE, *s.* दानग्राही *m.* (न्), दानग्रहीता *m.* (तृ), देयी *m.* (न्).

DONGEON or DONJON, *s.* दुर्गमध्ये सुगुप्तस्थानं, दुर्गगुप्तिः *f.*, दुर्गकोटिः *f.*; दुर्गशिखरं. *See* DUNGEON.

DONKEY, *s.* गर्द्दभः, खरः, रासभः; 'donkey-cart,' खरयानं; 'bray of a donkey,' खरनादः, खाकारः.

DONOR, *s.* दाता *m.* (तृ), प्रदाता, दायकः, दाकः, दादी *m.* (न्), दानकर्त्ता *m.* (तृ).

DOODLE, *s.* अल्पबुद्धिः *m.*, अल्पधीः *m.*, मूर्खः, दुर्मतिः *m.* अबद्धजल्पी *m.* (न्).

To DOOM, *v. a.* (Condemn to punishment) दण्ड् (c. 10. दण्डयति -यितुं).—(To death) वधदण्डार्हं -र्हां -र्हं ज्ञा (c. 9. जानाति, ज्ञातुं), वधदण्डाज्ञां कृ.—(Consign) ऋ in caus. (अर्पयति -यितुं), सम्, प्रतिपद् in caus. (-पादयति -यितुं), निक्षिप् (c. 6. -क्षिपति -क्षेप्तुं), नियुज्

(c. 7. -युनक्ति -योक्तुं).—(Destine) प्रक्लृप् (c. 10. -कल्पयति -यितुं), निर्दिश् (c. 6. -दिशति -देष्टुं).—(Judge) विचर् in caus. (-चारयति -यितुं), निर्णी (c. 1. -णयति -णेतुं).

Doom, *s.* (Judgment) विचारः, अभिमतविचारः.—(Sentence) निर्णयः, आधर्षणं.—(Condemnation) दण्डः -ण्डनं, दण्डाज्ञा, दण्डयोगः.—(State to which one is destined) भवितव्यता, विधिः *m.*, कालनियोगः, विहितदशा, दिष्टं, नियतिः *f.*—(Ruin) घातः, क्षयः, नाशः.

Doomed, *p. p.* दण्डितः -ता -तं, प्रकल्पितः -ता -तं, निर्दिष्टः -ष्टा -ष्टं, विचारितः -ता -तं, निर्णीतः -ता -तं, नियुक्तः -क्ता -क्तं or कालनियुक्तः.

Doomsday, *s.* विचारदिनं, महाविचारदिनं, सर्वलोकविचारणदिवसः.

Doomsday-book, domesday-book, *s.* पूर्वकाले भोजाज्ञयापराजाज्ञया लिखितं सर्वक्षेत्रपरिसंख्यारूपं पुस्तकं, क्षेत्रसङ्ग्रहपुस्तकं.

Door, *s.* द्वारं, द्वाः *f.* (र्), कपाटः -टं, कवाटः -टं, अररः -री -रिः *m.* अलारः, गृहमुखं, प्रतिहारः, प्रतीहारः.—(Entrance) प्रवेशः -शनं, मुखं, वेशिका, प्रतिहारणं.—(Passage) पथः; 'principal door,' सिंहद्वारं; 'private door,' अन्तर्द्वारं, प्रच्छन्नद्वारं, प्रच्छन्नं; 'back door,' पक्षद्वारं, पक्षकः; 'in doors,' गृहस्थितः; 'out of doors,' गृहबहिःस्थः, स्थानान्तरीगतः; 'next door to,' निकटस्थः -स्था -स्थं, अनन्तरवर्त्ती -र्त्तिनी -र्त्ति (न्); 'leaf of a door,' द्वारशाखा.

Door-case, *s.* द्वारपरिगतं काष्ठादि, द्वारबन्धकः.

Door-keeper, *s.* द्वारपालः, द्वारस्थः, द्वाररक्षकः, द्वारी *m.* (न्), द्वाःस्थः, द्वाःस्थितः, द्वाराध्यक्षः, प्रतिहारः, प्रतीहारः -री *f.*

Door-post, *s.* द्वारस्तम्भः, द्वारस्थूणा, द्वारकाष्ठं, द्वारदारु *m.*

Door-sill, *s.* द्वारपिण्डी, देहलिः *f.* -ली, गृहतटी, गृहावग्रहणी, हरिद्धका, असुरः, उडुम्बरः.

Doric, *a.* (Architecture) गृहनिर्म्माणे विशेषमार्गः or रीतिविशेषः.

Dormant, *a.* सुप्तः -प्ता -प्तं, प्रसुप्तः -प्ता -प्तं, शयितः -ता -तं, शयानः -ना -नं, निद्रितः -ता -तं, निद्राणः -णा -णं.—(Concealed) प्रच्छन्नः -न्ना -न्नं, गुप्तः -प्ता -प्तं.

Dormitory, *s.* शय्यागृहं, शयनगृहं, शयनशाला, निद्राशाला, स्वप्ननिकेतनं, विश्रामशाला, शयनागारः.—(Burial-place) श्मशानं, प्रेतवनं, पितृवनं.

Dormouse, *s.* अतिनिद्रालुः क्षुद्रमूषिकभेदः, अतिस्वप्नशीलो मूषिकः.

Dorsal, *a.* पृष्ठ्यः -ष्ठ्या -ष्ठ्यं, पृष्ठसम्बन्धी -न्धिनी -न्धि (न्).

Dorsel, dorser, dosser, *s.* पृष्ठेन वाहनयोग्यः पिटकः or पेटकः or करण्डः.

Dose, *s.* यद् भेषजम् एकवारे रोगिणे देयं or रोगिणा पेयं or निगरणीयं, भेषजमात्रा, औषधमात्रा, रोगियोग्य औषधभागः, देयं, पेयं, पानं; 'a small dose of medicine,' औषधस्य अल्पभागः.

To dose, *v. a.* रोगिणा निगरणीयम् औषधभागं दा, (c. 3. ददाति, दातुं), भेषजं दा, भिषज् (nom. भिषज्यति -ज्यितुं), औषधीकृ.

Dossil, *s.* (Pledget of lint on a sore) विकेशिका.

Dot, *s.* बिन्दुः *m.*, शून्यं, विप्रुट् *f.* (ष्) or विप्रुद्, खं, कणः, अङ्कः.

To dot, *v. a.* बिन्दुना अङ्क् (c. 10. अङ्कयति -यितुं) or चिह्न् (c. 10. चिह्नयति -यितुं).

Dotage, *s.* बालिशबुद्धित्वं, बालिशता, बालिश्यं, बुद्धिनाशः, बुद्धिवैकल्यं, हतबुद्धित्वं, बुद्धिक्षीणता, ज्ञानहानिः *f.*, बुद्धिलोपः, दौर्बल्यं, जीर्णावस्था. —(Excessive fondness) अत्यन्तानुरागः, अत्यन्तप्रेम *n.* (न्).

Dotal, *a.* यौतुकसम्बन्धी -न्धिनी -न्धि (न्), औद्वाहिकः -की -कं, शौल्कः -ल्की -ल्कं, शौल्किकः -की -कं, स्त्रीधनविषयः -या -यं.

Dotard, *s.* बालिशमतिः *m.*, जरातुरः, हतबुद्धिः *m.*, क्षीणबुद्धिः *m.*, बालिशः, अतिवृद्धः.

To dote, *v. n.* (Be silly through age) अतिवृद्धत्वाद् बालिशबुद्धिः -द्धिः -द्धि भू or मुह् (c. 4. मुह्यति, मोहितुं).—(Love to excess) अत्यनुरागवान् -वती -वत् or अत्यन्तानुरक्तः -क्ता -क्तं भू or अस्; 'I dote upon her,' तया अत्यनुरागवान् अस्मि.

Doting, *a.* अत्यनुरागवान् -वती -वत् (त्), अत्यनुरक्तः -क्ता -क्तं.

Dotingly, *adv.* अत्यनुरागेण, अत्यनुरागपूर्वं, सात्यनुरागं, सातिस्नेहं.

Dotted, *p. p.* चिह्नितः -ता -तं, अङ्कितः -ता -तं, बिन्दुचित्रितः -ता -तं.

Double, *a.* द्विगुणः -णा -णं, द्वैधः -धी -धं, द्विकः -का -कं, द्विविधः -धा -धं, द्विप्रकारः -रा -रं, द्विगुणसंख्यः -ख्या -ख्यं, द्विगुणपरिमाणः -णा -णं, उभयः -ये *sing.* and *pl.* only, द्वि in comp., as, 'having double leaves,' द्विपर्णः -र्णा -र्णं; 'having a double row of teeth,' उभयतोदन् -दती -दत् (त्) or द्विदन्; 'for a double object,' उभयार्थं.—(Deceitful) विजिह्मः -ह्मा -ह्मं, अनृजुः -जुः -जु, वञ्चकः -का -कं.

Double, *s.* (Twice the quantity) द्विगुणं, द्वैधं, द्विकं, द्विस्, द्विकृत्वस्. —(Trick) छलं, कपटः -टं, उपायः, माया, व्यपदेशः.—(A turn) विपरिवर्त्तनं.

To double, *v. a.* द्विगुणीकृ, द्विगुण (nom. द्विगुणयति -यितुं), गुणीकृ. —(Fold) पुटीकृ, पुट (nom. पुटयति -यितुं); 'to double a cape,' अन्तरीपं परितो नौकया वह् in pass. (उह्यते); 'to double the fist,' मुष्टिं बन्ध् (c. 9. बध्नाति, बन्द्धुं).

To double, *v. n.* द्विगुणीभू.—(Turn in running) विपरिवृत् (c. 1. -वर्त्तते -र्त्तितुं).—(Play tricks) मायां कृ, कुहकं कृ, कपटं कृ, व्यपदिश् (c. 6. -दिशति -देष्टुं).

Doubled, *p. p.* द्विगुणितः -ता -तं, द्विगुणीकृतः -ता -तं, गुणीकृतः -ता -तं. (Folded) पुटितः -ता -तं, पुटीकृतः -ता -तं.

Double-dealer, *s.* द्विव्यापारी *m.* (न्), द्विव्यवहारी *m.* (न्), उभयविधः, द्विकर्म्मा *m.* (न्), मायी *m.* (न्), कपटी *m.* (न्), कापटिकः, असरलः.

Double-dealing, *s.* द्विव्यापारः, द्विव्यवहारित्वं, कपटः, छलं, माया, असारल्यं, शठता, व्याजः, वैदग्ध्यं.

Double-dyed, *p. p.* द्विरञ्जितः -ता -तं, द्विरक्तः -क्ता -क्तं, द्विकषायितः -ता -तं.

Double-edged, *a.* द्विधारः -रा -रं, उभयतस् तीक्ष्णः -क्ष्णा -क्ष्णं.

Double-faced, *a.* द्विमुखः -खी -खं, द्विवदनः -नी -नं, उभयतोमुखः -खी -खं.

Double-formed, *a.* द्विरूपः -पी -पं, द्व्याकारः -रा -रं, द्विप्रकारः -रा -रं.

Double-headed, *a.* द्विशीर्षकः -का -कं, द्विशिराः -राः -रः (स्), द्विमूर्द्धः -र्द्धी -र्द्धं.

Double-meaning, *s.* द्व्यर्थः, सन्दिग्धार्थः, द्विरूपः, उपादानं.

Double-minded, *a.* द्विमनस्कः -स्का -स्कं, द्विमनाः -नाः -नः (स्).

Double-natured, *a.* द्विभावः -वा -वं, द्विधातुः -तुः -तु.

Double-tongued, *a.* द्विजिह्वः -ह्वा -ह्वं, द्विरसनः -ना -नं, मिथ्यावादी -दिनी -दि (न्) or असत्यवादी, अनृतवाक् *m. f. n.*

Doubleness, *s.* द्वैगुण्यं, द्वित्वं, द्वैतं, द्वैविध्यं, उभयत्वं.

Doubler, *s.* द्विगुणकारी *m.* (न्), द्विगुणकृत्, द्विविधकर्त्ता *m.* (र्तृ).

Doublet, अन्तरीयं, उरोवस्त्रं, उरश्छदः, परिधानं, उरोरक्षणी.

Doubloon, *s.* विदेशीयस्वर्णमुद्राविशेषः.

Doubly, *adv.* उभयतस्, उभयथा, द्विधा, द्विगुणं, द्विविधं.

To doubt, *v. n.* शङ्क् (c. 1. शङ्कते -ङ्कितुं), अभिशङ्क्, आशङ्क्, विशङ्क्, परिशङ्क्, सन्दिह् (c. 2. -देग्धि -ग्धुं), विकॢप् (c. 1. -कल्पते -ल्पितुं c. 10. -कल्पयति -यितुं), संशी (c. 2. -शेते -शयितुं), विचर् in caus. (-चारयति -यितुं), मनसा दोल (nom. दोलायते -यितुं) or आन्दोल (आन्दोलयति -यितुं), सन्देहं कृ.

To doubt, *v. a.* शङ्क् (c. 1. शङ्कते -ङ्कितुं), परिशङ्क्, न विश्वस् (c. 2 -श्वसिति -तुं), न प्रती (c. 2. प्रत्येति -तुं rt. इ), उद्विज् (c. 6. -विजते -जितुं)

Doubt, *s.* सन्देहः, संशयः, शङ्का, आशङ्का, विकल्पः, विकल्पितं, वितर्कः विचिकित्सा, द्वैधं, विचिकित्सा, द्वापरः.—(Uncertainty of mind) चित्तविभ्रमः,

विक्षेपः, चित्तान्दोलनं, चित्तविभ्रमः, व्यस्तता, विप्रतिपत्तिः *f.*, अस्थैर्य्यं, अनिर्णयः.—(Suspicion, distrust, fear) शङ्का, अविश्वासः, अप्रत्ययः, भयं.—(Difficulty) शल्यं, दुर्गं, कृच्छ्रं, कष्टं, विषमं, बाधा.—(Objection) बाधः -धकं, उद्ग्राहः; 'case of doubt,' सन्देहपदं; 'cause of doubt,' शङ्कास्पदं; 'in doubt,' दोलायमानः -ना -नं, संशयापन्नः -न्ना -न्नं, शङ्कान्वितः -ता -तं, सशङ्कः -ङ्का -ङ्कं; 'without doubt,' असंशयं.

Doubted, *p. p.* सन्दिग्धः -ग्धा -ग्धं, संशयितः -ता -तं, शङ्कितः -ता -तं.

Doubter, *s.* संशयिता *m.* (तृ), संशयात्मा *m.* (न्), सन्दिग्धमतिः *m.*, संशयालुः *m.*, सन्देग्धा *m.* (ग्धृ), सन्देहकर्त्ता *m.* (र्त्तृ); संशयकृत्.

Doubtful, *a.* सन्दिग्धः -ग्धा -ग्धं, सांशयिकः -की -कं, शङ्कनीयः -या -यं, सशङ्कः -ङ्का -ङ्कं, ससंशयः -या -यं, संशयापन्नः -न्ना -न्नं, शङ्कान्वितः -ता -तं, संशयस्थः -स्था -स्थं, संशयात्मकः -का -कं, शङ्कामयः -यी -यं, सन्दिहानः -ना -नं, वैकल्पिकः -की -कं, सविकल्पकः -का -कं, विशयी -यिनी -यि (न्).—(Ambiguous) सन्दिग्धार्थः -र्था -र्थं, अस्पष्टार्थः -र्था -र्थं.—(Questionable) आशङ्कनीयः -या -यं, वितर्क्यः -र्क्या -र्क्यं, मीमांस्यः -स्या -स्यं; 'to render doubtful,' सन्दिह in caus. (-देहयति -यितुं).

Doubtfully, *adv.* ससंशयं, सशङ्कं, सन्देहेन, शङ्कया, सविकल्पं, सवितर्कं.

Doubtfulness, *s.* सन्दिग्धता, सांशयिकत्वं, ससंशयता, शङ्कनीयत्वं.

Doubtingly, *adv.* साशङ्कं, शङ्कापूर्व्वं, शङ्कया, अविश्वासेन, अप्रत्ययात्.

Doubtless, *a.* असंशयः -या -यं, असन्दिग्धः -ग्धा -ग्धं, निःसन्देहः -हा -हं.

Doubtless, doubtlessly, *adv.* असंशयं, निःसंशयं, निःसन्देहेन, संशयं विना, कः सन्देहः, सुनिश्चितं.

Douceur, *s.* पारितोषिकं, उपप्रदानं, उपायनं, उत्कोचः.

Dough, *s.* गुण्डिका, जलघटितः शक्तुः *m.*, जलसंसृष्टः शक्तुः, मर्द्दितशक्तुः, पिष्टकः, अपूपः.

Doughty, *a.* वीरः -रा -रं, शूरः -रा -रं, विक्रान्तः -न्ता -न्तं, प्रशस्तः -स्ता -स्तं.

To douse, *v. a.* जले मज्ज in caus. (मज्जयति -यितुं) or निमज्ज or निविश in caus. (-वेशयति -यितुं).—(Put out) निर्वा in caus. (-वापयति -यितुं).

Dove, *s.* कपोतः, कपोतिका, पारावतः, कलरवः, कलध्वनिः *m.*, कलकण्ठः.

Dove-cot, dove-house, *s.* कपोतपालिका, विटङ्कः, कपोतागारः, पारावतालयः.

Dove-tail, *s.* काष्ठसन्धिः *m.*, दारुसीवनं, काष्ठग्रन्थनं, कपोतवालाकारः काष्ठसन्धिः *m.*

Dowager, *s.* मृतभर्त्तृधनभागिनी विधवा, निर्नाथा, रण्डा, मृतभर्त्तृका.

Dowdy, *s.* (Woman) विरूपी -पिणी, दुर्वेशिनी, दुर्वसना, स्थूलरूपी.

Dower, dowry, *s.* (Jointure) स्त्रीधनं, विधवाधनं, स्त्रीवृत्तिः *f.*, स्वामिदत्तं.—(Wife's portion) यौतुकं, यौतकं, युतकं, शुल्कः, औद्वाहिकं, अध्यावाहनिकं.

Dowered, *a.* यौतुकवती, शुल्किनी, यौतुकप्राप्ता, मृतभर्त्तृधनभागिनी.

Dowerless, *a.* यौतुकहीनः -ना -नं, शुल्कहीनः -ना -नं, निर्धनः -ना -नं.

Dowlas, *s.* (Coarse cloth) स्थूलपट्टं, स्थूलशाटकः, वराशिः *m.*

Down, *s.* (Soft feather) मृदुपक्षः, सुकुमारपक्षः, स्निग्धपर्णः, सुखस्पर्शः पर्णः.—(Fine hair) मृदुलोम *n.* (न्), स्निग्धलोम, सुकुमारलोम.—(Down of the body) अङ्गरुहं, तनुरुहं, लोम *n.* (न्), रोम *n.* (न्), अङ्कुरः.—(Down of plants) तृणलोम, तृणकेशः; 'down of the gourd,' अलाबुकटं.—(Poor hilly land for pasturing sheep) अविप्रचारयोग्यं पार्व्वतीयमरुस्थलं, तृणमयपर्व्वतः, निर्वृक्षपर्व्वतः.

Down, *prep.* अव, अधस्; 'thrown down,' अवपातितः -ता -तं, अधःपातितः -ता -तं, अवक्षिप्तः -प्ता -प्तं, अधःक्षिप्तः -प्ता -प्तं; 'put down,' अधःकृतः -ता -तं; 'fallen down,' अधःपतितः -ता -तं; 'gone down,' अधोगतः -ता -तं; 'laid down,' अवतारितः -ता -तं; 'hanging down,' अवलम्बमानः -ना -नं; 'to sit down,' उपविश् (c. 6. -विशति -वेष्टुं); 'down to,' पर्य्यन्तं, यावत् affixed, as, 'down to the present time,' अधुना यावत्.

Down, *adv.* अधस्, अधस्तात्, नीचैः, अधोऽधस्, अधोभागं प्रति.—(Tending down) अवाक्, अवाचीनं, अवकटं.—(At the bottom) अधःस्थः -स्था -स्थं; 'ups and downs,' पातोत्पाताः *m. pl.*

Down-cast, *a.* अवसन्नः -न्ना -न्नं, विषण्णः -ण्णा -ण्णं, विषण्णवदनः -ना -नं, अवनतः -ता -तं, नतमुखः -खी -खं, अधोमुखः -खी -खं, अधोवदनः -नी -नं, अवाङ्मुखः -खी -खं, अधोदृष्टिः -ष्टिः -ष्टि, दीनमुखः -खी -खं, विमुखः -खा -खं, दीनमनाः -नाः -नः (स्), दीनचेतनः -ना -नं.

Downfall, *s.* ध्वंसः, प्रध्वंसः, क्षयः, परिक्षयः, नाशः, विनाशः, अत्ययः, व्ययः, उच्छेदः, उत्पाटनं, अधःपतनं.

Downfallen, *a.* अधःपतितः -ता -तं, परिक्षीणः -णा -णं, ध्वंसितः -ता -तं.

Downhearted, *a.* विषण्णः -ण्णा -ण्णं, दीनमनाः -नाः -नः (स्) or उद्विग्नमनाः or दुर्मनाः, दीनमनस्कः -स्का -स्कं, दीनचेतनः -ना -नं, म्लानः -ना -नं, खिद्यमानः -ना -नं, उत्साहहीनः -ना -नं.

Downhill, *s.* प्रवणभूमिः *f.*, पातुकभूमिः, उत्सङ्गः, स्थानं क्रमशोऽधोगम्यं.

Downlooked, *a.* अधोदृष्टिः -ष्टिः -ष्टि, अधोमुखः -खी -खं, अधोवदनः -नी -नं, अवाङ्मुखः -खी -खं, नम्रमुखः -खी -खं, नतमूर्द्धा -र्द्धा -र्द्ध (न्).

Downlying, *s.* शयनकालः, शय्यागमनसमयः, विश्रामकालः.

Downlying, *a.* प्राप्तप्रसवकाला, आसन्नप्रसववेदना, प्राप्तशयनकाला.

Downright, *adv.* (Straight down) अवक्रं, अजिह्मं, अकुटिलं, अविलोमं, अधोऽधस्, अवाक्.—(Plainly) व्यक्तं, सुव्यक्तं, भिन्नार्थं, स्पष्टं.—(Completely) सु or अति prefixed, सम्यक्, सर्व्वतस्, अखिलेन.

Downright, *a.* (Plain) स्पष्टः -ष्टा -ष्टं, व्यक्तः -क्ता -क्तं, सुस्पष्टः -ष्टा -ष्टं, सुव्यक्तः -क्ता -क्तं.—(Direct) अवक्रः -क्रा -क्रं, अजिह्मः -ह्मा -ह्मं, अकुटिलः -ला -लं.

Downsitting, *s.* उपवेशः -शनं, समुपवेशनं, विश्रामः.

Downward, *a.* अधस्तनः -नी -नं, अधोगामी -मिनी -मि (न्), अवाङ् -वाची -वाक् (क्), अवाचीनः -ना -नं, अवकटः -टा -टं.—(Declivous) प्रवणः -णा -णं, पातुकः -की -कं.

Downward, downwards, *adv.* अव prefixed, अधस्, अधोऽधस्, अधस्तात्, अवाक्, अवाचीनं, अवकटं; 'looking downwards,' अधोदृष्टिः *m. f.*; 'going downwards,' अधोगामी -मिनी -मि (न्).

Downy, *a.* (Covered with down or soft hair) मृदुलोमवान् -वती -वत् (त्), मृदुलोमा -मा -म (न्), स्निग्धपर्णः -र्णा -र्णं.—(Soft) सुखस्पर्शः -र्शा -र्शं, कोमलः -ला -लं, मृदुः -द्वी -दु, सुकुमारः -रा -रं.

Dowry, *s.* यौतुकं, शुल्कः. *See* Dower.

Dowse, *s.* आस्फोटः -टनं, चपेटिका, तलप्रहारः, कराघातः, चपेटाघातः.

To doze, *v. n.* निद्रा (c. 2. -द्राति -तुं), स्वप् (c. 2. स्वपिति, स्वप्तुं), प्रस्वप्, निमील् (c. 1. -मीलति -लितुं), शी (c. 2. शेते, शयितुं), निद्रां कृ, अल्पनिद्रां कृ, ईषन्निद्रां कृ.

Dozen, *s.* and *a.* द्वादश *m. f. n.* (न्), द्वादशकः -का -कं, द्वादशसंख्यकः -का -कं.

Dozer, *s.* निद्राणः, निद्रायमाणः, ईषन्निद्राकृत् *m.*, शायी *m.* (न्).

Doziness, *s.* निद्रा, निद्राशीलत्वं, शिशयिषा, निद्रालुत्वं, शयालुता.

Dozy, *a.* निद्रालुः -लुः -लु, शिशयिषुः -षुः -षु, स्वप्नशीलः -ला -लं, निद्राशीलः -ला -लं, सुषुप्सुः -प्सुः -प्सु, तैन्द्रः -न्द्री -न्द्रं, निद्रालसः -सा -सं.

Drab, *s.* (Low woman) बन्धकी, कुलटा, वेश्या, भ्रष्टा, व्यभिचारिणी.—(Brown cloth) कपिशवस्त्रं.

Drab, *a.* (Dun-coloured) कपिशः -शा -शं, कपिलः -ला -लं, पिङ्गलः -ला -लं.

Drachm, drachma, *s.*(Silver coin) रूप्यमुद्राविशेषः.—(Eighth part of a particular weight) विशेषपरिमाणस्य पादार्द्धं.

Draff, *s.* उच्छिष्टं, शेषं, भुक्तावशेषं, शेषान्नं, मलं, खलं, किट्टं, असारः.

Draffish, draffy, *a.* मलिनः-ना-नं, खली-लिनी-लि(न्), असारः-रा-रं.

Draft, *s.* (Order for money) हुण्डिका, हुण्डिकापत्रं. *See* Draught.

To drag, *v. a.* कृष् (c. 1. कर्षति c. 6. कृषति, क्रष्टुं, कर्ष्टुं), आकृष्, हृ (c. 1. हरति -ते, हर्त्तुं).—(Drag off, drag away) अपकृष्, अवकृष्, व्यपकृष्, अपहृ, व्यपहृ.—(Drag out) उत्कृष्, निष्कृष्, उद्धृ, निर्हृ, उत्पद् in caus. (-पादयति -यितुं).

To drag, *v. n.* कृष् in pass. (कृष्यते), आकृष्.—(Proceed slowly) विलस् (c. 1. -लसते -सितुं).

Drag, *s.* (Instrument for dragging) आकर्षणी, आकर्षणयन्त्रं.—(Car) रथः, क्रीडारथः, चक्रयानं.

Dragged, *p. p.* कृष्टः-ष्टा-ष्टं, आकृष्टः-ष्टा-ष्टं, अपकृष्टः-ष्टा-ष्टं, हृतः-ता-तं.

To draggle, *v. a.* पङ्केन दुष् in caus. (दूषयति -यितुं), कर्द्दमे लुट् in caus. (लोठयति -यितुं), कर्द्दमान्तरेण कृष् (c. 1. कर्षति, क्रष्टुं).

To draggle, *v. n.* कर्द्दमे लुठ् (c. 6. लुठति -ठितुं), कर्द्दमे लोठनाद् मलिनीभू, पङ्कान्तरेण कृष् in pass. (कृष्यते).

Draggle-tail, *s.* अपरिष्कृता स्त्री, अविनीतवेशिनी.

Drag-net, *s.* आकर्षकजालं, आकर्षणी, नदीतले आकर्षणयोग्यं जालं.

Dragon, *s.* नागः, व्यालः, अहिः *m.*, भुजङ्गमः, पन्नगः, पक्षयुक्तः सर्पः.

Dragon-like, *a.* नागरूपः -पी -पं, व्यालवद् उग्रस्वभावः -वा -वं.

Dragoon, *s.* अश्वारूढः सैन्यः, अश्वारोही योद्धा *m.* (द्धृ), सादी *m.* (न्).

To dragoon, *v. a.* देशम् अश्वारूढसैन्येन विप्लुतं कृ.

Drain, *s.* जलनिर्गमः, जलमार्गः, नालः, प्रणालः, नाली, प्रणाली, परीवाहः, परिवाहः, सारणिः *f.* -णी, जलोच्छ्वासः, उदकगमनमार्गः, जलवाहनी, कर्द्दमाटकः, सङ्करः, भ्रमः, वाहसः; 'a village drain,' ग्रामसङ्करः.

To drain, *v. a.* (Draw off gradually) क्रमशो निःसृ in caus. (-सारयति -यितुं) or निर्गम् in caus. (-गमयति -यितुं) or निष्कृष् (c. 1, -कर्षति -क्रष्टुं) or आकृष् or अपवह् (c. 1. -वहति -वोढुं) or परिवह् or स्रु in caus. (स्रावयति -यितुं) or निःस्रु or उत्क्षिप् (c. 6. -क्षिपति -क्षेप्तुं).—(Dry up, exhaust) शुष् in caus. (शोषयति -यितुं), उच्छुष्, विशुष्, संशुष्, शुष्कीकृ.—(Drink up) आपा (c. 1. -पिबति -पातुं), प्रपा, परिपा.

Drained, *p. p.* शोषितः -ता -तं, उच्छोषितः -ता -तं, परिवाहितः -ता -तं, आपीतः-ता-तं, शुष्कीकृतः -ता -तं, रेचितः -ता -तं, नीरसीकृतः -ता -तं.

Drake, *s.* हंसः, कलहंसः, राजहंसः, कादम्बः, वरटः, कामिकः.

Dram, *s.* (A small quantity) अल्पिका, अल्पभागः.—(A draught of spirituous liquor) सुरापानं, शुण्डामात्रा, सुरामात्रा.—(Drink to give courage) वीरपाणं.—(Spirituous liquor) शुण्डा, शीधुः *m.* -धु *n.* सुरा, वारुणी, मदिरा, हाला; 'dram-shop,' शुण्डापानं; 'keeper of one,' शौण्डिकः -की *f.*

Dram-drinker, *s.* सुरापः -पी *f.*, शुण्डापायी -यिनी *f.* (न्), शीधुपः -पी.

Drama, *s.* नाटकः, प्रकरणं, रूपं -पकं, यात्रा. The following are various kinds: भाणः, व्यायोगः, समवाकारः, डिमः, ईहामृगः, अङ्कः, वीथी, प्रहसनं.—(Minor drama) उपरूपकं. The following are various kinds: नाटिका, त्रोटकं, गोष्ठी, सट्टकं, नाट्यरासकः, प्रस्थानं, उल्लाप्यः, काव्यं, प्रेङ्खणं, रासकं, संलापकं, श्रीगदितं, शिल्पकं, विलासिका, लासिका, दुर्मल्लिका, प्रकरणिका, हल्लीशं, भाणिका.—(The science or art of acting) नाट्यं, नटचर्य्या.

Dramatic, dramatical, *a.* नाटकीयः -या -यं, नाटकविषयः -या -यं, काव्यशास्त्रीयः -या -यं, याचिकः -की -कं; 'dramatic language,' नाट्योक्तिः *f.*; 'dramatic rules,' नाट्यधर्म्मिकः; 'dramatic representation,' नटचर्य्या.

Dramatically, *adv.* नाट्यधर्म्मानुसारात्, नाटकरूपेण, काव्यशास्त्रानुसारेण.

Dramatis-personæ, *s.* नटनामानि *n. pl.*, नटानां नामावलिः *f.*

Dramatist, *s.* नाटकरचकः, नाटककर्त्ता *m.* (र्तृ), काव्यशास्त्रज्ञः, रूपकनिबन्धा *m.* (न्धृ).

Drap, *s.* वस्त्रं, वसनं, पटः, चेलः -लं, चैलं, शाटकः -कं.

Draper, *s.* वस्त्रविक्रेता *m.* (तृ), पटविक्रयी *m.* (न्), वस्त्रवाणिज्यकारी *m.* (न्).

Drapery, *s.* (The trade) वस्त्रादिक्रयविक्रयः, वस्त्रकर्म्म *n.* (न्), वस्त्रवाणिज्यं.—(Cloth) वस्त्रं, पटः, वासः *n.* (स्).—(Dress of a picture, &c.) प्रच्छदपटः, परिच्छदः, वसनं, अम्बरं.

Draught, *s.* (Act of drinking) पानं.—(Quantity drunk at once) पीतं, पेयं, पानं, एकपानं; 'a draught of milk,' पयःपानं.—(Abstract) सङ्ग्रहः, सारः, वस्तु, वस्तुमात्रं.—(Delineation, sketch) आलेख्यं, आलेखनं, पाण्डुलेख्यं, चित्रारम्भः, वस्तुमात्रं.—(Picture drawn, resemblance) चित्रं, उपमा -मानं, प्रतिमानं, प्रतिमूर्त्तिः *f.*—(Detachment from the main army) महासैन्यमध्याद् आनीतः सैन्यगुल्मः.—(Sewer, drain) सङ्करः, कर्द्दमाटकः.—(Draught of a ship) यत् जलपरिमाणं नावं प्लावयति.—(Order for money). *See* Draft. (Act of drawing) आकर्षणं, आकृष्टिः *f.*; 'a draught ox,' शाकटः, ग्रामङ्गुः, प्राग्भारः.

Draught-board, *s.* अष्टापदं, शारिफलं -लकं, नयपीठी, पञ्चनी, पञ्चमी, पञ्चारी.

Draught-horse, *s.* शाकटः -टिकः -टीनः, रथ्यः, प्रवहणवाजी *m.* (न्).

Draughts, *s.* अष्टापदक्रीडा, शारिक्रीडा; 'a piece at draughts,' शारिः *m.*, शारः, सारिः *m.*, सारः, सारिका, जतुपुत्रकः, खेलनी -लिनी, नयः; 'moving a piece at draughts,' परिणायः, परीणायः.

Draughtsman, *s.* लेखकः, आलेख्यकृत्, चित्रकारः, चित्रकरः.

To draw, *v. a.* (Pull along) कृष् (c. 1. कर्षति c. 6. कृषति -ते, क्रष्टुं, कर्ष्टुं), आकृष्, समाकृष्, परिकृष्, प्रतिकृष्, सङ्कृष्.—(Drag forcibly) हृ (c. 1. हरति, हर्त्तुं).—(Attract) आकृष्, समाकृष्, प्रतिकृष्, समुपकृष्; अभिप्रणी (c. 1. -णयति -णेतुं); 'she draws the eyes of all,' सर्व्वेषाम् अपि मुष्णाति.—(Lead, induce) आनी, अनुनी.—(Win conciliate) आराध् (c. 10. -राधयति -यितुं), अभिराध्, अनुरञ्ज् (c. 10. -रञ्जयति -यितुं).—(Receive, take) ग्रह् (c. 9. गृह्णाति, ग्रहीतुं), लभ् (c. 1. लभते, लब्धुं), उपलभ्, आदा, उपादा.—(Cause liquid to flow) स्रु in caus. (स्रावयति -यितुं) or मुच् (c. 6. मुञ्चति, मोक्तुं c. 10. मोचयति -यितुं) or मोक्ष् (c. 10. मोक्षयति -यितुं) or अवसिच् (c. 6. -सिञ्चति -सेक्तुं); 'draw blood,' रक्तं स्रु.—(Close curtains) तिरस्करिणीं or यवनिकां संवृ (c. 5. -वृणोति -णुते -वरितुं -रीतुं) or सम्पुटीकृ.—(Unclose curtains) तिरस्करिणीं विवृ or विततीकृ.—(Represent, form a picture) लिख् (c. 6. लिखति, लेखितुं), आलिख्, अभिलिख्; चित्र् (c. 10. चित्रयति -यितुं).—(Describe) वर्ण् (c. 10. वर्णयति -यितुं).—(Unsheath a sword) खड्गं विकोषय (nom. -कोषयति -यितुं) or कोषाद् निःसृ in caus. (-सारयति -यितुं) or विकोषीकृ.—(Inhale) श्वस् (c. 2. श्वसिति -तुं), आश्वस्, प्राण् (c. 2. प्राणिति -तुं, rt. अन् with प्र).—(Suck the breast) स्तनं पा (c. 1. पिबति, पातुं), धे (c. 1. धयति, धातुं).—(Extract) निष्कृष्, उत्कृष्, निर्हृ.—(Extend, lengthen) तन् (c. 8. तनोति -नितुं), विस्तृ in caus. (-स्तारयति -यितुं), द्राघ् nom. (द्राघयति -यितुं).—(Utter drawlingly) दीर्घोच्चारणं कृ.—(Bend a bow) धनुर् विस्फुर् in caus. (-स्फारयति

-रयतुं) or आयम् (c. 1. -यच्छति -यन्तुं).—(Derive) आनी, निष्कृष्, अपवह् (c. 1. -वहति -वोढुं).—(Cause to come out) निःसृ in caus. (-सारयति -यितुं), निर्गम् in caus. (-गमयति -यितुं), उद्भू in caus. (-भावयति -यितुं).—(Draw water) जलम् उत्तुल् (c.10.-तोलयति-यितुं).

To DRAW-AWAY, *v. a.* अपकृष्, अपाकृष्, व्यपकृष्, व्यपाकृष्, अवकृष्, विकृष्, अपनी (c. 1. -नयति -नेतुं), व्यपनी, अपहृ (c. 1. -हरति -हर्तुं).

To DRAW-BACK, *v. a.* प्रतिकृष्, प्रत्यादा, प्रत्याहृ (c. 1. -हरति -हर्तुं), प्रतिसंहृ, प्रतिनी (c. 1. -नयति -नेतुं), प्रत्यानी.

To DRAW-DOWN, *v. a.* (Bring on, produce) आवह् (c. 1. -वहति -वोढुं), उत्पद् in caus. (-पादयति -यितुं), जन् (c. 10. जनयति -यितुं).

To DRAW-IN, *v. a.* संहृ (c. 1. -हरति -हर्तुं), प्रतिसंहृ, प्रत्याहृ, उपसंहृ.

To DRAW-OFF, *v. a.* अपकृष्, अपाकृष्, व्यपकृष्, अवकृष्, विकृष्, अपहृ, व्यपहृ, अपनी, व्यपनी, विनी.—(Cause liquid to flow) स्रु in caus. (स्रावयति -यितुं), मुच् (c. 6. मुञ्चति, मोक्तुं).

To DRAW-ON, *v. a.* आकृष्, समाकृष्, समुपकृष्, आनी, अभिप्रणी.—(Bring on, cause) आवह् (c. 1. -वहति -वोढुं), उत्पद् in caus. (-पादयति -यितुं).

To DRAW-OVER, *v. a.* (Induce) अनुनी, आकृष्, प्रोत्सह् in caus. (-साहयति -यितुं), प्रयुज् in caus. (-योजयति -यितुं).

To DRAW-OUT, *v. a.* (Extract) निष्कृष्, उत्कृष्, आकृष्, निर्हृ, उद्धृ, उद्ग्रह् (c. 9. -गृह्णाति -ग्रहीतुं), निर्दुह् (c. 2. -दोग्धि -ग्धुं).—(Extend, lengthen) तन् (c. 8. तनोति -नितुं), वितन्, व्यातन्, विततीकृ, विस्तृ in caus.(-स्तारयति -यितुं), दीर्घीकृ, द्राघ (nom. द्राघयति-यितुं).—(Beat out metal) उद्वर्त्तनं कृ.—(Array an army) सैन्यं व्यूह् (c. 1. -ऊहते -हितुं), व्यूहेन रच् (c. 10. रचयति -यितुं), पंक्तिक्रमेण रच्.

To DRAW-TOGETHER, *v. a.* समाहृ, संहृ, सङ्ग्रह्, एकीकृ, समानी, समूह् (c. 1. ऊहते -हितुं).

To DRAW-UP, *v. a.* (Lift, raise) उत्तुल् (c. 10. -तोलयति -यितुं), उद्धृ, उत्कृष्, उद्वह् (c. 1. -वहति -वोढुं).—(Compose in writing) लिख् (c. 6. लिखति, लेखितुं), रच् (c. 10. रचयति -यितुं), विरच्, निबन्ध् (c. 9. -बध्नाति -बन्द्धुं).

To DRAW, *v. n.* (As a beast of burden) कृष् (c. 1. कर्षति c. 6. कृषति -ते, क्रष्टुं).—(As a weight) कृष्, आकृष्.—(Contract) सङ्कुच् in pass. (-कुच्यते), सङ्कोचम् इ (c. 2. एति -तुं), संहृ in pass. (-ह्रियते), संक्षिप् in pass. (-क्षिप्यते).—(Cause suppuration) पूयं or पूयत्वं or पाकं जन् in caus. (जनयति-यितुं) or उत्पद् in caus. (-पादयति -यितुं).

To DRAW-BACK, DRAW OFF, *v. n.* अपक्रम् (c. 1. -क्रामति -क्रमितुं), व्यपक्रम्, अपसृ (c. 1. -सरति -सर्तुं), अपया (c. 2. -याति -तुं), निवृत् (c. 1. -वर्त्तते -र्त्तितुं), प्रतिनिवृत्, पार्श्वे परिवृत्, परावृत्, पलाय् (c. 1. पलायते -यितुं), अवस्था (c. 1. -तिष्ठति -स्थातुं).

To DRAW-NEAR, DRAW-ON, *v. n.* (Approach) उपस्था (c. 1. -तिष्ठति -स्थातुं), उपवृत् (c. 1. -वर्त्तते -र्त्तितुं), आगम् (c. 1. -गच्छति -गन्तुं), उपागम्, आया (c. 2. -याति -तुं).

DRAWBACK, *s.* (Deduction) उद्धारः, उद्धृतभागः, भागप्रतिदानं.—(Loss of advantage) हानिः *f.*, क्षतिः *f.*, अपचयः, अपचितिः *f.*, अपायः.

DRAW-BRIDGE, *s.* सङ्क्रमसेतुः *m.*, चलसेतुः *m.*, लघुसेतुः यो विक्रमम् उत्तोलयितुं वा शक्यते.

DRAWER, *s.* कर्षकः, आकर्षकः.—(A sliding case) चलकोष्ठः, चलकोष्ठकं, सम्पुट -टकः, भाजनं.

DRAWERS, *s. pl.* (For the legs) कञ्चुकः, शाटकः, कटिवस्त्रं, कटीपटः, जङ्घापरिधानं.

DRAWING, *s.* (Act of pulling) कर्षः -र्षणं, कृष्टिः *f.*, आकर्षः -र्षणं, आकृष्टिः *f.*; 'drawing of water,' जलोत्तोलनं.—(Representation) चित्रं, चित्रलेखा-लिखनं, चित्रफलकः, आलेख्यं, वर्त्तिकारेखा, प्रतिमानं, प्रतिमा, प्रतिरूपं.—(Art of drawing) चित्रकर्म्म *n.* (न्), चित्रविद्या.

DRAWING-MASTER, *s.* चित्रकर्म्मविद् *m.* चित्रविद्योपदेशकः, चित्रलिखनशिक्षकः.

DRAWING-ROOM, *s.* दर्शनशाला, दर्शनगृहं, उपवेशनशाला.—(Of a king) राजदर्शनं.

To DRAWL, *v. n.* दीर्घोच्चारणेन वद् (c. 1. वदति -दितुं), दीर्घोदाहरणं कृ, मन्दं मन्दं वाक्यानि उच्चर् in caus. (-चारयति -यितुं).

DRAWLING, *s.* दीर्घोच्चारणं, दीर्घोदाहरणं, मन्दोच्चारणं, दीर्घव्याहरणं.

DRAWN, *p. p.* (Pulled) कर्षितः -ता -तं, कृष्टः -ष्टा -ष्टं, आकृष्टः -ष्टा -ष्टं.—(Delineated) आलिखितः -ता -तं, अभिलिखितः -ता -तं, चित्रितः -ता -तं.—(Unsheathed) विकोषः -षा -षं, विकोषीकृतः -ता -तं, उल्लसितः -ता -तं, कोषान्निःसारितः -ता -तं.—(Drawn up, lifted) उत्तोलितः -ता -तं, उन्नाहितः -ता -तं, उद्धृतः -ता -तं, समुदक्तः -क्ता -क्तं.—(Drawn up in array) व्यूढः -ढा -ढं, विन्यस्तः -स्ता -स्तं, व्यूहेन रचितः -ता -तं, श्रेणीबद्धः -द्धा -द्धं.—(Equal) समानः -ना -नं, तुल्यबलः -ला -लं; 'a cart drawn by a horse,' अश्वयुक्तः or अश्वप्रयुक्तः शकटः; 'a chariot drawn by white horses,' श्वेतहयैर् युक्तो रथः.

DRAW-WELL, *s.* गम्भीरकूपः, जलकूपी, उदकाधारः.

DRAY, *s.* शकटः -टं, गन्त्री, गन्त्रीरथः, चक्रयानं, चातुरं, अशागवं.

DRAY-HORSE, *s.* शाकटः, शाकटिकवाजी *m.* (न्), शकटाश्वः.

DRAY-MAN, *s.* शकटवाहकः, शाकटिकः, गन्त्रीवाहकः, चातुरिकः.

DREAD, *s.* त्रासः, सन्त्रासः, साध्वसं, भयं, भीतिः *f.*, भीषणं, भीषणं.

DREAD, *a.* त्रासकरः -री -रं, भीषणः -णा -णं, भीमः -मा -मं.

To DREAD, *v. a.* and *n.* भी (c. 3. बिभेति, भेतुं) with abl. or gen. c So also प्रभी, विभी, त्रस् (c. 4. त्रस्यति, त्रसितुं), वित्रस्, उद्विज् (c. 6. -विजते -जितुं).

DREADFUL, *a.* भयङ्करः -री -रं, भयानकः -का -कं, दारुणः -णा -णं, घोरः -रा -रं, भीमः -मा -मं, भयावहः -हा -हं, त्रासकरः -रा -रं, उग्रः -ग्रा -ग्रं, भीष्मः -ष्मा -ष्मं, भीरुमयः -यी -यं, भैरवः -वा -वं, सुभैरवः -वा -वं, रौद्रः -द्री -द्रं, घोरदर्शनः -ना -नं, उद्वेजनीयः -या -यं.

DREADFULLY, *adv.* दारुणं, घोरं, भयानकं, उग्रं, भैरवं, रौद्रं.

DREADFULNESS, *s.* घोरत्वं, दारुणता, दारुण्यं, उग्रत्वं, रौद्रता.

DREADLESS, *a.* त्रासहीनः -ना -नं, निःसाध्वसः -सा -सं, निर्भयः -या -यं.

DREAM, *s.* स्वप्नः, स्वप्नदर्शनं, स्वप्नसृष्टिः *f.*, स्वप्नप्रपञ्चः, सुप्तज्ञानं, सुप्तविज्ञानं, स्वापः, दर्शनं, स्वप्नकल्पितं, निद्रा, संवेशः.—(Vain fancy) वृथार्थकं, वृथावासना, अनर्थकवासना, मिथ्यावासना, असम्भवकल्पना, दुर्वासना, अनर्थकचिन्ता, आभासः, अनर्थकभावना; 'like a dream,' स्वप्नवत्.

To DREAM, *v. n.* (See images in sleep) स्वप्नं दृश् (c. 1. पश्यति, द्रष्टुं), स्वप्न (nom. स्वप्नायते), उत्स्वप्न, स्वप्नकल्पितं दृश्.—(Imagine, think) चिन्त् (c. 10. चिन्तयति -यितुं), भू in caus. (भावयति -यितुं), मनसि or मनसा कॢप् (c. 10. कल्पयति -यितुं).—(Think idly) अनर्थकचिन्तां कृ, वृथावासनां कृ, असम्भवकल्पनां कृ.

To DREAM, *v. a.* (See in a dream) स्वप्ने दृश् (c. 1. पश्यति, द्रष्टुं).

DREAMER, *s.* स्वप्नदर्शकः.—(A fanciful man) वृथावासनाकारी *m.* (न्), दुर्वासनाकृत्, अनर्थकचिन्ताकरः, असम्भवकल्पयिता *m.* (तृ).

DREAMY, *a.* स्वप्नवान् -वती -वत् (त्), स्वप्नमयः -यी -यं.

DREARINESS, *s.* शून्यता, निर्जनत्वं, निर्मनुष्यता, निरानन्दता, घोरता.

DREARY, DREAR, *a.* (Uninhabited, gloomy, wild) निर्जनः -ना -नं,

निर्म्मनुष्यः -ष्या -ष्यं, शून्यः -न्या -न्यं, तमस्वी -स्विनी -स्वि (न्), तामसः -सी -सं, निष्प्रभः -भा -भं, आकुलः -ली -लं, आरण्यकः -का -कं.—(Joyless) निरानन्दः -न्दा -न्दं.

Dredge, *s.* (Drag-net) आकर्षणजालं, आकर्षणी, आकर्षणयन्त्रं.

To dredge, *v. a.* (Catch with a dredge) आकृष् (c. 1. -कर्षति -क्रष्टुं). —(Scatter flour on meat when roasting) पच्यमानमांसे चूर्णं क्षिप् (c. 6. क्षिपति, क्षेप्तुं).

Dreggish, dreggy, *a.* मलिनः -ना -नं, समलः -ला -लं, खली -लिनी -लि (न्).

Dregs, *s.* मलं, खलं, किट्टं, उच्छिष्टं, शेषं, कलङ्कः, अमेध्यं, अवस्करः, अपस्करः, कल्कं, असारः, विनीयः.

To drench, *v. a.* क्लिद् in caus. (क्लेदयति -यितुं), सिच् (c. 6. सिञ्चति सेक्तुं), समुक्ष् (c. 1. -उक्षति -क्षितुं), अभ्युक्ष्, जलेन प्लु in caus. (प्लावयति -यितुं), समाप्लु.

Drench, *s.* (A draught) पानं, पेयं.—(Medicine for horses, &c.) अश्वादिना निगरणीयम् औषधं.

Drenched, *p. p.* सिक्तः -क्ता -क्तं, समाप्लुतः -ता -तं, प्रक्लिन्नः -न्ना -न्नं.

Dress, *s.* वेशः, वेषः, वस्त्रं, वासः *n.* (स्), वसनं, परिधानं, भरणं, आभरणं, परिच्छदः, अम्बरं, भूषणं, विभूषणं, अलङ्कारः, प्रसाधनं, आच्छादनं, प्रतिकर्म्म *n.* (न्), सज्जा, संस्कारः, नेपथ्यं, आकल्पः.

To dress, *v. a.* (Clothe) वेष्ट् (c. 1. वेष्टते -ष्टितुं), परिवेष्ट्, प्रवेष्ट्; आच्छद् (c. 10. -छादयति -यितुं), प्रवृ (c. 5. -वृणोति -वरितुं -रीतुं), संव्ये (c. 1. -व्ययति -व्यातुं), वस्त्र (nom. वस्त्रयति -यितुं), परिधा in caus. (-धापयति -यितुं), प्रसाध् in caus. (-साधयति -यितुं), वस् in caus. (वासयति -यितुं), विवस्, प्रतिवस्.—(Clothe one's self) वस् (c. 2. वस्ते, वसितुं), प्रवस्, विवस्, परिधा (c. 3. -धत्ते -धातुं), वस्त्राणि परिधा or आच्छद् or आमुच् (c. 6. -मुञ्चति -मोक्तुं).—(Adorn) भूष् (c. 1. भूषति -षितुं c. 10. भूषयति -यितुं); विभूष्, परिभूष्, अलङ्कृ, समलङ्कृ, परिष्कृ.—(Prepare) क्लृप् (c. 10. कल्पयति -यितुं), उपक्लृप्; संस्कृ, उपस्कृ, सज्जीकृ.—(Prepare food) अन्नं or मांसं पच् (c. 1. पचति, पक्तुं) or संस्कृ, or श्रा in caus. (श्रपयति -यितुं) or सिद्धीकृ or सन्धा (c. 3. -दधाति -धातुं).—(Dress the hair) केशान् रच् (c. 10. रचयति -यितुं).—(Trim, put in order) रच्, विरच्, विधा, सज्जीकृ, विन्यस् (c. 4. -अस्यति -असितुं).—(Curry a horse) अश्वलोम मृज् (c. 2. मार्ष्टि -र्ष्टुं) or सम्मृज्.—(Dress leather) चर्म्म परिष्कृ.—(Cleanse) शुध् in caus. (शोधयति -यितुं), प्रक्षल् (c. 10. -क्षालयति -यितुं), निर्णिज् (c. 3. -नेनेक्ति -नेक्तुं).—(Dress a wound) क्षतं परिष्कृ, औषधं प्रतिसृ in caus. (-सारयति -यितुं).

Dressed, *p. p.* (Clothed) आच्छादितः -ता -तं, परिच्छन्नः -न्ना -न्नं, वेष्टितः -ता -तं, वस्त्रवेष्टितः -ता -तं, वासितः -ता -तं, सवेशः -शा -शं, सचेलः -ला -लं, सवासाः -साः -सः (स्), संवीतः -ता -तं, प्रावृतः -ता -तं, परिहितः -ता -तं, वेशी -शिनी -शि (न्), वस्त्रान्वितः -ता -तं, अनग्नः -ग्ना -ग्नं, अलङ्कृतः -ता -तं, भूषितः -ता -तं; 'well-dressed,' सुवेशः -शा -शं, सुवसनः -ना -नं, सुवाः *m. f. n.* (स्); 'ill-dressed,' दुर्वासाः -साः -सः (स्); 'dressed as a herdsman,' गोपवेशः or गोपवासाः; 'dressed as a hermit,' मुनिवेशः; 'dressed in yellow,' पीताम्बरः -रा -रं.—(Cooked) पक्वः -क्वा -क्वं, सिद्धः -द्धा -द्धं, संस्कृतः -ता -तं, श्राणः -णा -णं, शृतः -ता -तं, श्रपितः -ता -तं, प्रणीतः -ता -तं, उपसम्पन्नः -न्ना -न्नं, राद्धः -द्धा -द्धं; 'dressed food,' सिद्धान्नं; 'half dressed,' आपक्वः -क्वा -क्वं; 'half-dressed grain,' पौलिः *m.*, अभ्युषः, अभ्यूषः, अभ्योषः.—(As a wound) प्रतिसारितः -ता -तं.

Dresser, *s.* (One who dresses) आच्छादकः, प्रसाधकः -का, परिधानकृत्, कल्पकः.—(Of hair) केशरचकः.—(Table for dressing food) अन्नसंस्कारफलकं, पाकफलकः.

Dressing, *s.* (Putting on clothes) वस्त्राच्छादनं, वस्त्रपरिधानं, अङ्गसंस्कारः, कल्पना, वस्त्रमाल्यादिविन्यासः.—(Of food) अन्नसंस्कारः, पाकः, पाकनिष्पत्तिः *f.*—(Of a wound) प्रतिसारणं, लेपः, प्रलेपः, विलेपः, उपदेहः, उपनाहः.—(Chastisement) शास्तिः *f.*, दण्डनं, वेत्राघातः.

Dressing-gown, *s.* अङ्गसंस्कारकाले भृतो लघुप्रावारः.

Dressing-room, *s.* वस्त्रपरिधानशाला, आच्छादनशाला, विभूषणागारः नेपथ्यं, अङ्गसंस्कारगृहं.

Dress-maker, *s.* स्त्रीवेशकारिणी, स्त्रीवस्त्रकृत् *f.*, स्त्रीवेशनिर्म्माणोपजीविनी.

Dressy, *a.* दर्शनीयः -या -यं, दर्शनीयवेशी -शिनी -शि (न्).

To drib, *v. a.* उद्धृ (c. 1. -हरति -हर्त्तुं), अवच्छिद् (c. 7. -छिनत्ति -छेत्तुं).

To dribble, *v. n.* लवशः or बिन्दुक्रमेण स्यन्द् (c. 1. स्यन्दते -न्दितुं) or प्रस्यन्द्, शनैः शनैः क्षर् (c. 1. क्षरति -रितुं) or री (c. 4. रीयते, रेतुं) or स्रु (c. 1. स्रवति, स्रोतुं).

To dribble, *v. a.* लवशः or बिन्दुक्रमेण स्रु in caus. (स्रावयति -यितुं).

Dribblet, *s.* कणः, कणिका, लवः, लेशः, स्तोकः, खण्डं, अल्पभागः; 'in dribblets,' लवशस्, अल्पाल्पं, स्तोकशस्.

Dried, *p. p.* शुष्कः -ष्का -ष्कं, शोषितः -ता -तं, विशोषितः -ता -तं, उच्छुष्कः -ष्का -ष्कं, गतरसः -सा -सं, अवानः -ना -नं, यमुः -मुः -मु; 'dried flesh,' शुष्कमांसं, वल्लूरं; 'dried fruit,' विप्रदहः; 'dried up,' उच्छोषितः -ता -तं.

Drier, *s.* शोषणः, शोषकः, उच्छोषणः -णी -णं, शुष्ककृत्.

Drift, *s.* (Tendency, aim) प्रवृत्तिः *f.*, प्रवाहः, तात्पर्य्यं, अन्वयः, अभिप्रायः, अभिप्रेतं, आशयः, उद्देशः, प्रावण्यं, अभिसन्धिः *m.*, आकांक्षा.—(Impulse) वेगः, प्रेरणं, प्रणोदः.—(Heap) राशिः *m. f.*, पुञ्जः, चितिः *f.*, सञ्चयः, निकरः; 'of snow,' हिमपुञ्जः, हिमसंहतिः *f.*—(Shower of any thing) सम्पातः, पातः, वर्षः.

To drift, *v. a.* प्रवह् in caus. (-वाहयति -यितुं), सम्पत् in caus. (-पातयति -यितुं), प्रेर् (c. 10. प्रेरयति -यितुं rt. ईर्), राशीकृ, पुञ्जीकृ, पिण्डीकृ, एकौघीकृ.

To drift, *v. n.* वातबलेन राशीभू, वायुवेगात् पुञ्जीभू.—(Be carried away by the current) सलिलवेगेन संवह् in pass. (समुह्यते) or अपवह् in pass.

Drifted, *p. p.* वातप्रेरितः -ता -तं, वायुवेगराशीकृतः -ता -तं.

To drill, *v. a.* (Perforate) व्यध् (c. 4. विध्यति, व्यद्धुं), छिद्र् (c. 10. छिद्रयति -यितुं), शुषिरीकृ.—(Exercise troops) सैन्यान् अभ्यस् (c. 4. -अस्यति -असितुं), सैन्यान् रणशिक्षां or अस्त्रशिक्षां शिक्ष् (c. 10. शिक्षयति -यितुं), युद्धविद्यां शिक्ष्, सैन्यव्यायामं कृ.—(Sow seed in rows) पंक्तिक्रमेण बीजानि वप् (c. 1. वपति, वप्तुं).

Drill, *s.* (Boring tool) आविधः, वेधनी, वेधनिका, आस्फोटनी.—(Act of training soldiers) शस्त्राभ्यासः, अस्त्रशिक्षा, सैन्यव्यायामः.—(Baboon) वानरः, कपिः *m.*

To drink, *v. a.* पा (c. 1. पिबति, पातुं), आपा, निपा, परिपा, चम् (c. 1. चमति -मितुं), आचम् (c. 1. आचामति); 'to drink up,' आपा; 'drink in,' निपा; 'drink together,' सम्पा; 'drink after,' अनुपा; 'to give to drink,' पा in caus. (पाययति -यितुं).

To drink, *v. n.* पा (c. 1. पिबति, पातुं).—(Be a drunkard) पानरतः -ता -तम् अस्.—(Feast with liquors) सम्पीतिं कृ, सपीतिं कृ.—(Salute in drinking) चषकग्रहणकाले मङ्गलप्रार्थनां कृ or शुभं भूयाद् इति वद् (c. 1. वदति -दितुं).

DRINK, *s.* पानं, पानीयं, पेयं, पयः *n.* (स्), आचमनीयं, मद्यं, मदिरा.

DRINKABLE, *a.* पेयः -या -यं, पानीयः -या -यं, प्रपाणीयः -या -यं, आचमनीयः -या -यं, पानयोग्यः -ग्या -ग्यं, पानोपयुक्तः -क्ता -क्तं.

DRINKER, *s.* पाता *m.* (तृ), पायी *m.* (न्), पानरतः, पानप्रसक्तः, मद्यपीतः.

DRINKING, *s.* पानं, पीतिः *f.*, निपानं, आचमनं; 'drinking together,' सम्पीतिः *f.*, सपीतिः *f.*

DRINKING-VESSEL, *s.* पानपात्रं, पानभाजनं, पानयोग्यभाजनं, आचमनोपयुक्तपात्रं, चषकः, सरकः, अनुतर्षः -र्षणं.

To DRIP, *v. n.* कणशः or लवशः or विन्दुक्रमेण स्यन्द् (c. 1. स्यन्दते -न्दितुं) or प्रस्यन्द्, शनैः शनैः क्षर् (c. 1. क्षरति -रितुं) or री (c. 4. रीयते, रेतुं) or स्रु (c. 1. स्रवति, स्रोतुं).

To DRIP, *v. a.* कणशः or शनैः शनैः स्रु in caus. (स्रावयति -यितुं).

DRIP, *s.* (Edge of a roof) पटलप्रान्तः, वलिकः -कं, नीध्रं.

DRIPPING, *part.* (Trickling) स्यन्दी -न्दिनी -न्दि (न्), स्रवः -वा -वं, निस्यन्दमानः -ना -नं, क्षरन् -रन्ती -रत् (त्), रीणः -णा -णं, स्रुतः -ता -तं.

DRIPPING, *s.* (Act of trickling) क्षरणं, स्रवणं, श्रवणं, प्रस्रवणं, स्रवः, स्रवः, स्रावः, स्यन्दनं.—(Fat which falls from roasting meat) पच्यमानमांसपतं मांसवसा, मांसस्नेहः, मांसनिर्गतसारः.

DRIPPING-PAN, *s.* पच्यमानमांसात् प्रस्रुतघृतस्य भाजनं, मांसस्नेहाधारः.

To DRIVE, *v. a.* (Impel, compel) प्रेर् (c. 10. -ईरयति -यितुं), प्रणुद् (c. 6. -णुदति -णोत्तुं), प्रचुद् (c. 10. -चोदयति -यितुं), प्रवृत् in caus. (-वर्त्तयति -यितुं), चल् in caus. (चालयति -यितुं), नियुज् in caus. (-योजयति -यितुं), कृष् (c. 1. कर्षति, क्रष्टुं), समाकृष्.—(Urge or guide horses) अश्वान् प्रेर् or प्रणुद् or प्रचुद् or यम् (c. 1. यच्छति, यन्तुं).—(Drive a carriage) रथं वह् in caus. (वाहयति -यितुं), or चल् in caus.—(Drive a nail) कीलम् आहत्य प्रविश् in caus. (-वेशयति -यितुं).—(Drive away) अपानुद्, व्यपानुद्, निराकृ, अपाकृ, निरस् (c. 4. -अस्यति -असितुं), अपास्, अपवह् (c. 1. -वहति -वोढुं), व्यपवह्, अपवह् in caus., निर्धू (c. 5. -धूनोति -धवितुं), विधू, निःसृ in caus. (-सारयति -यितुं), बाध् (c. 1. बाधते -धितुं), हृ (c. 1. हरति, हर्तुं), अपहृ, परिहृ.

To DRIVE, *v. n.* (Be impelled) प्रेरितः -ता -तं भू, अपवह् in pass. (अपोह्यते rt. वह्), संवह् in pass. चल् in caus. pass. (चाल्यते) कृष् in pass. (कृष्यते).—(Rush against) आपत् (c. 1. -पतति -तितुं), अभिपत्.—(In a carriage) क्रीडारथेन विहारं कृ.—(Aim at) अभिसन्धा (c. 3. -दधाति -धातुं), उद्दिश् (c. 6. -दिशति -देष्टुं), अभिप्रे (c. 2. अभिप्रैति -तुं rt. इ).

DRIVE, *s.* क्रीडारथेन भ्रमणं or विहारः or परिक्रमः.

To DRIVEL, *v. n.* लालां or श्लेष्माणं मुखात् स्रु in caus. (स्रावयति -यितुं) or पत् in caus. (पातयति -यितुं) or निःसृ in caus. (-सारयति -यितुं).—(Be idiotic, childish) बुद्धिविकलः -ला -लं भू, बालिशीभू, जडीभू.

DRIVEL, *s.* लाला, मुखस्रावः, वक्त्रासवः, वदनासवः, स्यन्दिनी, द्राविका, सृणिका, लसिका, मुखनिःसारितं जलं.

DRIVELLER, *s.* लालास्रावकः.—(Idiot) जडः, मूढः, बुद्धिविकलः.

DRIVEN, *p. p.* प्रेरितः -ता -तं, प्रणोदितः -ता -तं, प्रणुन्नः -न्ना -न्नं, प्रवर्त्तितः -ता -तं, प्रचोदितः -ता -तं; 'driven away,' अपनोदितः -ता -तं, निराकृतः -ता -तं, अपाकृतः -ता -तं, निरस्तः -स्ता -स्तं, निर्धूतः -ता -तं, विधूतः -ता -तं, अवधूतः -ता -तं, अपोढः -ढा -ढं, व्यपोढः -ढा -ढं, व्याधितः -ता -तं.

DRIVER, *s.* प्रेरकः, प्रणोदकः.—(Of a carriage) रथवाहकः, यन्ता *m.* (न्तृ), नियन्ता *m.*, प्राजकः, प्राजिता *m.* (तृ), प्रचेता *m.* (तृ), याता *m.* (तृ).—(Of horses) अश्वप्रणोदकः, हयकृष्टः.—(Of an elephant) महामात्रः, आधोरणः, हस्तिपः -पकः.—(Of cattle) पशुप्रेरकः.

DRIVING, *s.* प्रेरणं, प्रणोदः.—(Of cattle) पशुप्रेरणं उदजः; 'driving away,' अपनोदनं, निरसनं, निराकरणं.

To DRIZZLE, *v. n.* शीकर (nom. शीकरायते), शीक् (c. 1. शीकते -कितुं).

To DRIZZLE, *v. a.* शीकरं वृष् (c. 1. वर्षति -र्षितुं), सूक्ष्मविन्दून् वृष्.

DRIZZLING, *s.* शीकरवर्षः, शीकरपातः, सूक्ष्मविन्दुवर्षः.

DRIZZLY, *a.* शीकरीयः -या -यं, शीकरविशिष्टः -ष्टा -ष्टं.

To EMULATE, *v. a.* स्पर्ध् (c. 1. स्पर्धते -र्धितुं), विस्पर्ध्, आस्पर्ध्, प्रतिस्पर्ध् with inst. c.; जि in des. (जिगीषति -षितुं), संघृष् (c. 1. -घर्षति -र्षितुं), परम् अभिभवितुं यत् (c. 1. यतते -तितुं), पराभिभवनाय उद्योगं कृ, अहम्पूर्व्वम् अहम्पूर्व्वमिति वद् (c. 1. वदति -दितुं); 'he emulates Indra,' शक्रेण सह स्पर्धते.

EMULATION, *s.* स्पर्द्धा, आस्पर्द्धा, प्रतिस्पर्द्धा, जिगीषा, विजिगीषा, सङ्घर्षः, पराभिभवेच्छा, पराभिभवनाय उद्योगः, अहम्पूर्व्विका, सापत्न्यं.

EMULATIVE, EMULOUS, *a.* स्पर्द्धी -र्द्धिनी -र्द्धि (न्), प्रतिस्पर्द्धी &c., जिगीषुः -षुः -षु, जिगीषन् -षन्ती -षत् (त्), विजिगीषुः -षुः -षु, जयेच्छुः -च्छुः -च्छु, पराभिभवेच्छुः -च्छुः -च्छु, बीभत्सुः -त्सुः -त्सु.

EMULATOR, *s.* स्पर्द्धाकारी *m.* (न्), जिगीषुः *m.*, सङ्घर्षकारी *m.*, सपत्नः.

To EMULGE, *v. a.* निर्दुह् (c. 2. -दोग्धि -ग्धुं, c. 10. -दोहयति -यितुं), नीरसीकृ.

EMULGENT, *a.* निर्दोहनकारी -रिणी -रि (न्), निर्दोग्धा -ग्ध्री -ग्धृ (ग्धृ).

EMULSION, *s.* पायसिकम् औषधं, पायसं, पयस्यं.

EMUNCTORY, *s.* शरीरमलद्वारं, शरीरमलपथः, देहोत्सर्गपथः.

To ENABLE, *v. a.* शक्तिं or सामर्थ्यं or क्षमतां दा, समर्थं -र्थां -र्थं कृ, शक्तं -क्तां -क्तं कृ, क्षमं -मां -मं कृ, समर्थीकृ, कॢप् in caus. (कल्पयति -यितुं).

To ENACT, *v. a.* (Act, perform) कृ, विधा (c. 3. -दधाति -धातुं), प्रयुज् (c. 7. -युंक्ते -योक्तुं), निष्पद् in caus. (-पादयति -यितुं), सम्पद् in caus.—(Decree) व्यवस्थाद्वारेण or शासनद्वारेण निष्पन्नं कृ or सिद्धं कृ, व्यवस्थां कृ, शासनं कृ, व्यवस्था in caus. (-स्थापयति -यितुं), प्रशास् (c. 2. -शास्ति -शासितुं), प्रकॢप् (c. 10. -कल्पयति -यितुं).—(Represent in action) नट् (c. 10. नाटयति -यितुं), अभिनी (c. 1. -नयति -नेतुं).

ENACTED, *p. p.* व्यवस्थापितः -ता -तं, निष्पन्नः -न्ना -न्नं, प्रशासितः -ता -तं.

ENACTMENT, *s.* शासनं, प्रशासनं, व्यवस्था -स्थापनं, नियमः, शासनपत्रं, आज्ञापत्रं, राजाज्ञा, विधानं, निदेशः, आदेशः.

ENAMEL, *s.* सुवर्णालङ्कारचित्रकरणे प्रयुक्तं काचवत् सुविलयं मणिवत् सुतेजनीयं स्निग्धद्रव्यं.

To ENAMEL, *v. a.* पूर्व्वोक्तस्निग्धद्रव्येण सुवर्णालङ्कारान् चित्र् (c. 10. चित्रयति -यितुं) or चित्रविचित्रीकृ.

To BE ENAMOURED, *v. n.* अनुरागवान् -वती -वत् or अनुरक्तः -क्ता -क्तं or आसक्तः -क्ता -क्तं भू or अस् with inst. c. or loc. c., अनुरञ्ज् in pass. (-रज्यते) आसञ्ज् in pass. (-सज्यते), with loc. c., मुह्

(c. 4. मुह्यति, मोहितुं); 'he is enamoured with her,' तया अनुरागवान् अस्ति.

ENAMOURED, *p. p.* अनुरागवान् -वती -वत् (त्), अनुरागी -गिणी -गि (न्), अनुरक्तः -क्ता -क्तं, आसक्तः -क्ता -क्तं, कामासक्तः -क्ता -क्तं, जातमन्मथः -था -थं.

To ENCAGE, *v. a.* पिञ्जरे प्रविश् in caus. (-वेशयति -यितुं) or निरुध् (c. 7. -रुणद्धि -रोद्धुं) or अवरुध् or बन्ध् (c. 9. बध्नाति, बन्द्धुं).

To ENCAMP, *v. n.* निविश् (c. 6. -विशते -वेष्टुं), उपविश् (-विशति), बलेन or सैन्येन उपविश्, कटके or शिविरे वस् (c. 1. वसति, वस्तुं) or समावस् or अध्यास् (c. 2. -आस्ते -आसितुं).

To ENCAMP, *v. a.* सैन्यं निविश् in caus. (-वेशयति -यितुं), कटकं समावस् in caus. (-वासयति -यितुं), शिविरं स्था in caus. (स्थापयति -यितुं).

ENCAMPED, *p. p.* निविष्टः -ष्टा -ष्टं, उपविष्टः -ष्टा -ष्टं, समावासितः -ता -तं, समावासितकटकः -का -कं, निवेशितसैन्यः -न्या -न्यं, अध्यासितः -ता -तं.

ENCAMPMENT, *s.* (Act of encamping) निवेशनं, वाहिनीनिवेशनं, बलोपवेशनं, समावासः.—(Camp) निवेशः, शिविरं, कटकः, मन्दिरं, स्कन्धावारः, बलस्थितिः *f.*, पटकः.

To ENCASE, *v. a.* *See* INCASE.

To ENCAVE, *v. a.* कन्दरे or कुहरे or विवरे गुह् (c. 1. गूहति, गोढुं), गर्त्ते गोपनं कृ.

ENCEINTE, *a.* गर्भिणी, गर्भवती, पूर्णगर्भा, ससत्त्वा, आपन्नसत्त्वा.

To ENCHAFE, *v. a.* तप् in caus. (तापयति -यितुं), परितप्, कुप् in caus. (कोपयति -यितुं), प्रकुप्, रुष् in caus. (रोषयति -यितुं), बाध् (c. 1. बाधते -धितुं).

To ENCHAIN, *v. a.* निगडेन or शृङ्खलया बन्ध् (c. 9. बध्नाति, बन्द्धुं), निगड (nom. निगडयति -यितुं), शृङ्खल (nom. शृङ्खलयति -यितुं).

To ENCHANT, *v. a.* (Subdue by spells) मन्त्रद्वारेण वशीकृ or मुह् in caus. (मोहयति -यितुं), अभिमन्त्र् (c. 10. -मन्त्रयते -यितुं), अनुमन्त्र्; अभिचर् (c. 10. -चारयति -यितुं), मायां कृ.—(Charm the mind) मनो हृ (c. 1. हरति, हर्त्तुं) or रम् (c. 10. रमयति -यितुं), हृष् (c. 10. हर्षयति -यितुं), प्रहृष्, परमहर्षं जन् (c. 10. जनयति -यितुं).

ENCHANTED, *p. p.* (With joy) हृष्टमानसः -सी -सं, हृतमानसः -सी -सं, परमहृष्टः -ष्टा -ष्टं, हृष्टचित्तः -त्ता -त्तं, परमानन्दितः -ता -तं, पुलकितः -ता -तं.—(By spells) अभिमन्त्रितः -ता -तं, मन्त्रमोहितः -ता -तं. *See* CHARMED.

ENCHANTER, *s.* मायी *m.* (न्), अभिचारी *m.* (न्), अभिचारविद्, मायाकारः, मायाकृत् *m.*, मायिकः, मोही *m.* (न्), ऐन्द्रजालिकः, योगी *m.* (न्), योगेश्वरः.

ENCHANTING, *a.* मनोहरः -रा -रं, परमहर्षकरः -री -रं, परमानन्ददः -दा -दं, मोही -हिनी -हि (न्). *See* CHARMING.

ENCHANTINGLY, *adv.* मायया, सुरमणीयं, यथा परमहर्षो जायते तथा.

ENCHANTMENT, *s.* माया, अभिचारः, वशक्रिया, योगः, सम्प्रयोगः, अभिमन्त्रणं, इन्द्रजालं, जालं, कुहकः, मोहः, मन्त्रमोहनं, संवदनं -ना, मूलकर्म्म *n.* (न्), चित्रकर्म्म *n.*, कार्म्मणं, कुसृतिः *f.*

ENCHANTRESS, *s.* मायिनी, योगिनी, अभिचारिणी, मोहिनी, कुहककारी.

To ENCHASE, *v. a.* (A gem in gold) मणिं सुवर्णे प्रणिधा (c. 3. -दधाति -धातुं) or खच् (c. 10. खचयति -यितुं).—(Adorn silver vessels, &c., by embossed work) राजतभाण्डादीनि उच्चरेखादिना अलङ्कृ or उपस्कृ.

To ENCIRCLE, *v. a.* परिवेष्ट् (c. 1. -वेष्टते -ष्टितुं, c. 10. -वेष्टयति -यितुं), उपवेष्ट्, संवेष्ट्, परिवृ (c. 5. -वृणोति -वरितुं -रीतुं), परिष्ठा (c. 1. -तिष्ठति -ष्ठातुं), परिगम् (c. 1. -गच्छति -गन्तुं), परिसृ (c. 1. -सरति -सर्त्तुं), मण्डल (nom. मण्डलयति -यितुं).—(Embrace) परिष्वञ्ज् (c. 1. -ष्वजते -ष्वंक्तुं).

ENCIRCLED, *p. p.* वलयितः -ता -तं, मण्डलितः -ता -तं, परिमण्डलितः -ता -तं, परिगतः -ता -तं, परिवेष्टितः -ता -तं, आवृतः -ता -तं, व्याप्तः -प्ता -प्तं.

ENCIRCLET, *s.* वलयः, मण्डलं, परिमण्डलं, चक्रवालं, परिवेष्टनं.

To ENCLOSE, ENCLOSED, ENCLOSURE. *See* INCLOSE, &c.

ENCOMIAST, *s.* स्तुतिपाठकः, मङ्गलपाठकः, वन्दी *m.* (न्), वर्णकः, गुणोत्कीर्त्तनकृत्, गुणकथकः, गुणप्रशंसकः, गुणप्रशंसाकारी *m.* (न्).

ENCOMIASTIC, ENCOMIASTICAL, *a.* प्रशंसाकरः -री -रं, स्तुतिमयः -यी -यं, श्लाघामयः -यी -यं, वन्दारुः -रुः -रु, गुणप्रकाशकः -का -कं, कीर्त्तिप्रकाशकः -का -कं.

ENCOMIUM, *s.* प्रशंसा, स्तुतिः *f.*, श्लाघा, गुणप्रशंसा, गुणश्लाघा, गुणस्तुतिः *f.*, स्तुतिवाक्यं, प्रशंसावाक्यं, स्तुतिवादः, गुणोत्कीर्त्तनं, गुणगानं, वन्दना, वर्णना, यशोवर्णना, स्तोत्रं, स्तवः, वन्दिपाठः.

To ENCOMPASS, *v. a.* परिवेष्ट् (c. 1. -वेष्टते -ष्टितुं, c. 10. -वेष्टयति -यितुं), संवेष्ट्, उपवेष्ट्, प्रवेष्ट्; परिवृ (c. 5. -वृणोति -वरितुं -रीतुं), परिगम् (c. 1. -गच्छति -गन्तुं), परिष्ठा (c. 1. -तिष्ठति -ष्ठातुं), पर्युपस्था, परिसृ (c. 1. -सरति -सर्त्तुं), परी (c. 2. पर्य्येति -तुं, rt. इ), परिवी, व्याप् (c. 5. -आप्नोति -आप्तुं), संवल् (c. 1. -वलते -लितुं), रुध् (c. 7. रुणद्धि, रोद्धुं).

ENCOMPASSED, *p. p.* वेष्टितः -ता -तं, परिवेष्टितः -ता -तं, परिवृतः -ता -तं, आवृतः -ता -तं, वृतः -ता -तं, परिगतः -ता -तं, परीतः -ता -तं, अभिपरीतः -ता -तं, परिवीतः -ता -तं, परिवारितः -ता -तं, संवीतः -ता -तं, वलयितः -ता -तं, संवलितः -ता -तं, व्याप्तः -प्ता -प्तं, परिक्षिप्तः -प्ता -प्तं, परिप्लुतः -ता -तं, अभिपरिप्लुतः -ता -तं, निलीनः -ना -नं, गुधितः -ता -तं, रुद्धः -द्धा -द्धं; 'having encompassed,' परीत्य.

ENCOMPASSMENT, *s.* परिवेष्टनं, वेष्टनं, परिवृतिः *f.*, वृतिः *f.*, परिवेशः -वेषणं, परिगमः, परिसर्पः, परिक्रिया.—(Circumlocution) वक्रोक्तिः *f.*

ENCORE, *s.* पुनर्, पुनर्वारं, नाटकसङ्गीतादिशालायां प्रशंसासूचनार्थं प्रेक्षकाणां पुनरिति सांरावणं or पुनर् गीयतां पुनर् अभिनीयतामिति बहुभिः कृता संहूतिः *f.*

To ENCORE, *v. a.* प्रशंसासूचनार्थं पुनरिति उत्क्रुश् (c. 1. -क्रोशति -क्रोष्टुं), पुनरिति संहूतिं कृत्वा पुनरभिनयं प्रार्थ् (c. 10. -अर्थयति -ते -यितुं).

ENCOUNTER, *s.* (Meeting) समागमः, समागतिः *f.*, सङ्गः, सङ्गमः, सङ्गतं, मेलनं, मेलकः, मिलनं, समासादनं.—(Conflict, collision) समाघातः, संयुगः, समरः, सङ्ग्रामः, युद्धं, विग्रहः, सम्प्रहारः, अभिसम्पातः, सम्परायः, सङ्घट्टः -ट्टनं, सम्मर्दः, प्रतिघातः, सम्फेटः.

To ENCOUNTER, *v. a.* and *n.* (Meet) समागम् (c. 1. -गच्छति -गन्तुं), सङ्गम्, मिल् (c. 6. मिलति, मेलितुं), सम्मिल्, समे (c. 2. समैति -तुं, rt. इ), आसद् (c. 10. -सादयति -यितुं), समासद्, प्रतिमुखं or अभिमुखं गम्, सम्मुखीभू.—(In a hostile manner) प्रतियुध् (c. 4. -युध्यते -योद्धुं), विग्रह् (c. 9. -गृह्णाति -ग्रहीतुं), सङ्घट्ट् (c. 1. -घट्टते -ट्टितुं), समाहन् (c. 2. -हन्ति -न्तुं), समाघातं कृ.

ENCOUNTERED, *p. p.* समागतः -ता -तं, सङ्गतः -ता -तं, समुपागतः -ता -तं, मिलितः -ता -तं, प्रतिमुखागतः -ता -तं, अभिमुखागतः -ता -तं, आसादितः -ता -तं, समासादितः -ता -तं, आक्रान्तः -न्ता -न्तं, विगृहीतः -ता -तं.

To ENCOURAGE, *v. a.* आश्वस् in caus. (-श्वासयति -यितुं), समाश्वस्, विश्वस्, उच्छ्वस्; प्रोत्सह् in caus. (-साहयति -यितुं), समुत्सह्, परिशान्त्व् (c. 10. -शान्त्वयति -यितुं), प्रहृष् in caus. (-हर्षयति -यितुं), उत्तिज् in caus. (-तेजयति -यितुं), अनुग्रह् (c. 9. -गृह्णाति -ग्रहीतुं), सङ्गृह्, प्रदिश् in caus. (-देशयति -यितुं), तेजः or विश्वासं or आशां कृ or दा or वृध् in caus. (वर्धयति -यितुं) or संवृध्; प्रवृत् in caus. (-वर्त्तयति -यितुं).

ENCOURAGED, *p. p.* आश्वासितः -ता -तं, समाश्वासितः -ता -तं, उच्छ्वासितः

-ता -तं, प्रोत्साहितः -ता -तं, उत्तेजितः -ता -तं, अनुगृहीतः -ता -तं.

ENCOURAGEMENT, *s.* (Act of encouraging) आश्वासनं, समाश्वासनं, उच्छ्वासः, प्रोत्साहः -हनं, प्रवर्त्तः, प्ररोचनं, उत्तेजनं, समुत्तेजनं, तेजोवर्धनं, वर्धनं, संवर्धनं.—(Favor) अनुग्रहः, आग्रहः, संग्रहः, ग्रहः, साहाय्यं, उपकारः, अनुपालनं, आनुकूल्यं, अभ्युपपत्तिः *f.*, अनुरागः.

ENCOURAGER, *s.* आश्वासकः, प्रोत्साहकः, प्रवर्त्तकः, अनुग्रहीता *m.* (तृ).

ENCOURAGING, *a.* आश्वासकः -सिका -कं, आशावर्धकः -का -कं, तेजस्करः -री -रं, सान्त्वदः -दा -दं, प्ररोचनदः -दा -दं.

To ENCROACH, *v. n.* क्रमे क्रमे प्रसृप् (c. 1. -सर्पति -सर्प्तुं), पदे पदे प्रसृप्य पराधिकारं or परभूमिम् आविश् (c. 6. -विशति -वेष्टुं) or प्रविश् or समाविश्; क्रमे क्रमे स्वाधिकारमर्य्यादाम् अतिक्रम्य पराधिकारं or परभूमिम् आक्रम् (c. 1. -क्रामति -क्रमितुं) or अभिक्रम् or अध्याक्रम्; पराधीनं किञ्चिद् द्रव्यम् अधर्म्मतः or अन्यायतो ग्रह् (c. 9. गृह्णाति, ग्रहीतुं) or अभिग्रह् or ग्रस् (c. 1. ग्रसते -सितुं) or स्वीकृ or आत्मीयं कृ.

ENCROACHER, *s.* पदे पदे प्रसर्पकः or पराधिकारग्रसकः or पराधिकाराक्रामकः or स्वभूमिमर्य्यादातिक्रामकः or पराधीनद्रव्यग्राहकः.

ENCROACHING, ENCROACHMENT, *s.* पदे पदे प्रसर्पणं or पराधिकारप्रवेशः; क्रमे क्रमे पराधिकाराक्रमणं or परभूम्यभिक्रमः or स्वाधिकारातिक्रमणं or स्वाधिकारोल्लङ्घनं or पराधीनद्रव्यग्रसनं or पराधिपत्याक्रान्तिः *f.* or स्वाधिपत्यातिक्रान्तिः *f.*

To ENCRUST, *v. a.* *See To* INCRUST.

To ENCUMBER, *v. a.* (Load, clog) भारं दा or न्यस् (c. 4. -अस्यति -असितुं), भारवन्तं -वतीं -वत् कृ, भाराक्रान्तं -न्तां -न्तं कृ, भारेण परिबाध् (c. 1. -बाधते -धितुं) or गतिपरिबाधां कृ or उपरुध् (c. 7. -रुणद्धि -रोद्धुं) or प्रतिरुध् or प्रतिबन्ध् (c. 9. -बध्नाति -बन्धुं) or स्तम्भ् in caus. (स्तम्भयति -यितुं) or विघ्न (nom. विघ्नयति -यितुं) or आयस् in caus. (-यासयति -यितुं) or क्लिश् (c. 9. क्लिश्नाति, क्लेशितुं).—(Load with debts) ऋणभारग्रस्तं -स्तां -स्तं कृ.

ENCUMBERED, *p. p.* भारवान् -वती -वत् (त्), भारी -रिणी -रि (न्), भारयुक्तः -क्ता -क्तं, भाराक्रान्तः -न्ता -न्तं, भारग्रस्तः -स्ता -स्तं, बाधितः -ता -तं, प्रतिरुद्धः -द्धा -द्धं, विघ्नितः -ता -तं.

ENCUMBRANCE, *s.* (Load) भारः, धुरा.—(Impediment) बाधा -धकः, प्रतिबन्धः, प्रतिरोधः, उपरोधः, विघ्नः, स्तम्भः, प्रतिष्टम्भः, विष्टम्भः, प्रत्यूहः, अन्तरायः.—(Useless addition) अनुबन्धः.—(Debt) ऋणभारः, ऋणं, धारणा.

ENCYCLICAL, *a.* चाक्रिकः -की -कं, चाक्रेयः -यी -यं, मण्डली -लिनी -लि (न्), वर्त्तुलः -ला -लं; 'letter,' बहुजनानुद्दिश्य पत्रं, बहुसाधारणपत्रं.

ENCYCLOPÆDIA, *s.* विद्याचक्रं, विद्यामण्डलं, विद्यामुक्तावलिः *f.*, विद्याहारावलिः *f.*, विद्यावलिः *f.*, विद्यापर्य्यायः.

END, *s.* (Extremity) अन्तः -न्तं, पर्य्यन्तं, प्रान्तः, समन्तः, पारः -रं.—(Termination) अवसानं, पर्य्यवसानं, अवसायः, अवसादः, अवसन्नता, सातिः *f.*, सायः, अन्तः -न्तं, शेषः, पर्य्यवशेषः, परिणामः, क्षयः, गतिः *f.*, निधनं, अत्ययः.—(Conclusion) समाप्तिः *f.*, निष्पत्तिः *f.*, सिद्धिः *f.*, निर्वृत्तिः *f.*, निष्ठा.—(Cessation) विरतिः *f.*, विरामः, अवरतिः *f.*, उपरतिः *f.*, निवृत्तिः *f.*, विनिवृत्तिः *f.*, विच्छेदः, उपशमः.—(Limit, term) अवधिः *m.*, सीमा, अन्तरं.—(Last stage) परिणामः.—(Death) अन्तकालः, अन्तः, अन्तकः, निधनं, अत्ययः, अपगमः, अपायः, मरणं, नाशः, विनाशः, देहक्षयः, उपसंहारः.—(Extreme point) अग्रं, अग्रभागः, मुखं, शिखा, शिखरं, अग्निः *m.*—(Consequence) अन्तः, फलं, फलमुत्तरं, उत्तरं, परिणामः.—(Object, scope) अर्थः, आशयः, अभिप्रायः, तात्पर्य्यं, उद्देशः, अभिसन्धिः *m.*, कार्य्यं, कार्य्यवस्तु *n.*; 'end of the world,' प्रलयः, क्षयः, कल्पः, कल्पान्तः, संवर्त्तः उपसंयमः; 'end of day,' दिवसात्ययः, दिनावसानं; 'end of night,' निशावसानं, क्षपात्ययः; 'end of a garment,' अञ्चलः, पटाञ्चलः -लं, तरी, तरिः *f.*, दशा, वस्तिः *m.*; 'hear my speech to the end,' मद्वचनम् अवसानपर्य्यन्तं or शेषं यावत् शृणु.

To END, *v. a.* अवसो (c. 4. -स्यति -सातुं), समाप् in caus. (-आपयति -यितुं), सम्पॄ in caus. (-पूरयति -यितुं), निवृत् in caus. (-वर्त्तयति -यितुं) or निवृत् with abl. c. (c. 1. -वर्त्तते -र्त्तितुं), निर्वृत्, विनिवृत्, विरम् in caus. (-रमयति -यितुं) or विरम् with abl. c. (c. 1. -रमति -रन्तुं), उपरम्, व्युपरम्, निष्पद् in caus. (-पादयति -यितुं), साध् in caus. (साधयति -यितुं), प्रतियत् (c. 10. -यातयति -यितुं). Often rendered by अन्त as the last member of a compound; as, 'death ends life,' मरणान्तं जीवितं.—(Get to the end) पार् (c. 10. पारयति -यितुं), तीर् (c. 10. तीरयति -यितुं).

To END, *v. n.* विरम् (c. 1. -रमति -रन्तुं), उपरम्, व्युपरम्; निवृत् (c. 1. -वर्त्तते -र्त्तितुं), विनिवृत्, निर्वृत्, समाप् in pass. (-आप्यते), निष्पद् in pass. (-पद्यते), विगम् (c. 1. -गच्छति -गन्तुं), अपया (c. 2. -याति -तुं), विच्छिद् in pass. (-छिद्यते), अवसद् (c. 1. -सीदति -सत्तुं), शम् (c. 4. शाम्यति, शमितुं). Often expressed by अन्तः -न्ता -न्तं or पर्य्यन्तः -न्ता -न्तं as the last member of a compound; as, 'a name which ends in a long vowel,' दीर्घवर्णान्तं नाम; 'ending at the ocean,' सागरपर्य्यन्तः -न्ता -न्तं.

To ENDANGER, *v. a.* संशयस्थं -स्थां -स्थं कृ, शङ्कास्थं -स्थां -स्थं कृ, सन्देहस्थं -स्थां -स्थं कृ, भयस्थं -स्थां -स्थं कृ, सन्देहदोलस्थं -स्थां -स्थं कृ, संशयापन्नं -न्नां -न्नं कृ, शङ्कास्पदं कृ; 'one who endangers his life,' संशयितजीवितः.

To ENDEAR, *v. a.* प्रियं -यां -यं कृ, हृदयप्रियं -यां -यं कृ, दयितं -तां -तं कृ, प्रीतं -तां -तं कृ, अभीष्टं -ष्टां -ष्टं कृ, इष्टं -ष्टां -ष्टं कृ, स्नेहपात्रं कृ.

ENDEARING, *a.* प्रियङ्करः -री -रं, प्रियकारः -री -रं, प्रीतिकरः -री -रं.

ENDEARMENT, *s.* प्रेमकारणं, स्नेहकारणं, प्रियता -त्वं, प्रेमहेतुः *m.*, प्रेमकर्म्म *n.* (न्), शृङ्गारकर्म्म *n.*, ललितं, हावः, विलासः; 'word of endearment,' प्रियवाक्यं.

ENDEAVOR, *s.* यत्नः, प्रयत्नः, उद्यमः, उद्योगः, उत्साहः, चेष्टा -ष्टनं, व्यवसायः, अध्यवसायः, समुद्यमः, प्रवृत्तिः *f.*, आरम्भः, उपक्रमः, आयासः, प्रयासः, गुरणं, विचेष्टितं, उत्थानं, ग्रहः, व्यापारः, घटना.

To ENDEAVOR, *v. n.* यत् (c. 1. यतते -तितुं), प्रयत्, चेष्ट् (c. 1. चेष्टते -ष्टितुं), विचेष्ट्, सञ्चेष्ट्, व्यवसो (c. 4. -स्यति -सातुं), अध्यवसो, उद्यम् (c. 1. -यच्छति -यन्तुं), व्यायम्, घट् (c. 1. घटते -टितुं), उपक्रम् (c. 1. -क्रमते -मितुं), आयस् (c. 4. -यस्यति -यसितुं), प्रयस्, आरभ् (c. 1. -रभते -रब्धुं), समारभ्, वाह् (c. 1. वाहते -हितुं), प्रवृत् (c. 1. -वर्त्तते -र्त्तितुं), उद्योगं कृ, प्रयासं कृ.

ENDEAVORED, *p. p.* व्यवसितः -ता -तं, अध्यवसायितः -ता -तं, चेष्टितः -ता -तं, कृतप्रयत्नः -त्ना -त्नं, समुद्यतः -ता -तं, कृतोत्साहः -हा -हं, वाहितः -ता -तं.

ENDED, *p. p.* अवसितः -ता -तं, अवसन्नः -न्ना -न्नं, पर्य्यवसितः -ता -तं, सन्नः -न्ना -न्नं, सितः -ता -तं, निवृत्तः -त्ता -त्तं, निर्वृत्तः -त्ता -त्तं, वृत्तः -त्ता -त्तं, समाप्तः -प्ता -प्तं, परिणतः -ता -तं, गतः -ता -तं, विगतः -ता -तं, अस्तङ्गतः -ता -तं, अस्तङ्गमितः -ता -तं.

ENDING, *s.* अन्तः -न्तं, शेषः, समाप्तिः *f.*; 'of a word,' पदान्तं, पदस्य शेषवर्णः.

ENDICT, ENDICTMENT, ENDITE. *See* INDICT, &c.

ENDIVE, *s.* शाकप्रभेदः, शुक्लतैलादिना सह खादनीयः शाकः.

Endless, *a.* अनन्तः -न्ता -न्तं -न्तकः -का -कं, अत्यन्तः -न्ता -न्तं, अपर्य्यन्तः -न्ता -न्तं, अशेषः -षा -षं, निरवधिः -धिः -धि, अपारः -रा -रं, निरन्तरः -रा -रं, अविरतः -ता -तं, अनवरतः -ता -तं, अमितः -ता -तं, अतिदीर्घः -र्घा -र्घं.

Endlessly, *adv.* अत्यन्तं, अविरतं, अनारतं, निरन्तरं, अशेषतस्.

Endlessness, *s.* आनन्त्यं, अनन्तता -त्वं, अत्यन्तत्वं, अविरामः, अविरतिः *f.*, अविच्छेदः, आनन्तर्य्यं, नित्यता.

Endorse, endorsement. *See* Indorse, indorsement.

To **endow**, *v. a.* (With a portion) यौतुकं or शुल्कं or वृत्तिं दा, प्रतिष्ठां कृ, प्रतिष्ठा in caus. (-ष्ठापयति -यितुं).—(Furnish with any thing) युज् (c. 10. योजयति -यितुं), समायुज्, सम्पन्नं -न्नां -न्नं कृ, युक्तं -क्तां -क्तं कृ, दा; 'to be endowed with,' युज् in pass. (युज्यते); 'he is endowed with all good qualities,' सर्व्वगुणोपेतोऽस्ति.

Endowed, *p. p.* (With a portion, &c.) प्रतिष्ठितः -ता -तं, गृहीतशुल्कः -ल्का -ल्कं.—(Furnished with any thing) युक्तः -क्ता -क्तं, संयुक्तः -क्ता -क्तं, उपेतः -ता -तं, सम्पन्नः -न्ना -न्नं, उपपन्नः -न्ना -न्नं, अन्वितः -ता -तं, प्रयुक्तः -क्ता -क्तं, शीलः -ला -लं, शीलितः -ता -तं.—(With a grant of property) निबद्धः -द्धा -द्धं.

Endowment, *s.* (Settling a dower on a woman) यौतुकदानं, प्रतिष्ठा.—(Settling property for religious purposes) देवस्वदानं, अग्रहारदानं, प्रतिष्ठा.—(The property so settled) देवस्वं, अग्रहारः.—(Grant of money for support) निबन्धः -न्धनं.—(Quality, gift of nature) गुणः, शक्तिः *f.*

To **endue**, *v. a.* सम्पन्नं -न्नां -न्नं कृ, युक्तं -क्तां -क्तं कृ, युज् (c. 10. योजयति -यितुं), समायुज्, दा; 'to be endued,' सम्पन्नः -न्ना -न्नं भू, युज् in pass. (युज्यते). *See* Endow.

Endued, *p. p.* सम्पन्नः -न्ना -न्नं, उपेतः -ता -तं, युक्तः -क्ता -क्तं, संयुक्तः -क्ता -क्तं, समायुक्तः -क्ता -क्तं, अन्वितः -ता -तं, आपन्नः -न्ना -न्नं, उपपन्नः -न्ना -न्नं.

Endurance, *s.* (Bearing with patience) सहनं, सहत्वं, सहता, साहनं, सहिष्णुता -त्वं, सहनशीलता, क्षमा, तितिक्षा, क्षान्तिः *f.*, मर्षः -र्षणं, धैर्य्यं, धृतिः *f.*, धीरत्वं, स्थैर्य्यं, उत्साहः; 'of austerities,' दमः.—(Continuance) संस्थितिः *f.*, स्थितिः *f.*, स्थायित्वं.

To **endure**, *v. a.* (Bear) सह् (c. 1. सहते, सोढुं), विषह्, क्षम् (c. 1. क्षमते, क्षन्तुं), संक्षम्, तिज् in des. (तितिक्षते -क्षितुं), मृष् (c. 4. मृष्यति -ते, मर्षितुं, c. 10. मर्षयति -यितुं), धृ in caus. (धारयति -यितुं), उपागम् (c. 1. -गच्छति -गन्तुं), भुज् (c. 7. भुंक्ते, भोक्तुं), धैर्य्यम् आलम्ब् (c. 1. -लम्बते -म्बितुं) or अवलम्ब्. Sometimes expressible by शक्; as, 'I cannot endure to see him,' तं द्रष्टुं न शक्नोमि.

To **endure**, *v. n.* (Last, continue) स्था (c. 1. तिष्ठति -ते, स्थातुं), चिरस्थायी -यिनी -यि भू.

Endured, *p. p.* सोढः -ढा -ढं, विसोढः -ढा -ढं, क्षान्तः -न्ता -न्तं, तितिक्षितः -ता -तं, मर्षितः -ता -तं; 'not to be endured,' न सह्यः -ह्या -ह्यं, न क्षन्तव्यः -व्या -व्यं.

Endurer, *s.* सोढा *m.* (ढृ), विसोढा *m.*, क्षन्ता *m.* (न्तृ), सहः in comp.

Enduring, *a.* (Lasting) स्थायी -यिनी -यि (न्), चिरस्थायी &c., दीर्घकालस्थायी &c., संस्थः -स्था -स्थं, अविसर्गी -र्गिणी -र्गि (न्).—(Patient) सहिष्णुः -ष्णुः -ष्णु, सहनशीलः -ला -लं, तितिक्षुः -क्षुः -क्षु, सहनः -ना -नं, क्षमः -मा -मं, सहः -हा -हं.

Endwise, *adv.* अग्रे, अग्रतस्, अध्यग्रं, अग्रम् उपधाय or अवलम्ब्य.

Enemy, *s.* शत्रुः *m.*, रिपुः *m.*, अरिः *m.*, अरातिः *m.*, विपक्षः, वैरी *m.* (न्), आमित्रः, प्रतिपक्षः, अपकारी *m.* (न्), अपकर्त्ता *m.* (र्तृ), द्वेषी *m.* (न्), द्वेष्टा *m.* (ष्टृ), द्वेषणः, द्विषन् *m.* (त्), द्विट् *m.* (ष्), विद्विट्, विद्वेषी *m.* (न्), अहितः, विरोधी *m.* (न्), प्रतिरोधी *m.* -रोधकः, सपत्नः, दुर्हृद् *m.*, अभिघाती *m.* (न्), प्रत्यवस्थाता *m.* (तृ), परः, पारक्यः, परिपन्थी *m.* (न्) -न्थकः, प्रत्यर्थी *m.* (न्), शात्रवः, प्रतिजन्यकः, विजिगीषुः *m.*; 'enemy in the rear,' पार्ष्णिग्राहः; 'having no enemies,' अभूतशत्रुः -त्रुः -त्रु.

Energetic, *a.* उत्साही -हिनी -हि (न्), उद्योगी -गिनी -गि (न्), व्यवसायी -यिनी -यि (न्), उद्यमी -मिनी -मि (न्), उत्साहयुक्तः -क्ता -क्तं, सोत्साहः -हा -हं, सोद्योगः -गा -गं, उद्युक्तः -क्ता -क्तं, तेजोवान् -वती -वत् (त्), तेजस्वी -स्विनी -स्वि (न्), कृतप्रयत्नः -त्ना -त्नं, प्रयत्नवान् -वती -वत् (त्), सयत्नः -त्ना -त्नं, कर्म्मोद्युक्तः -क्ता -क्तं, तीक्ष्णकर्म्मा -र्म्मा -र्म्म (न्), कर्म्मशीलः -ला -लं, कर्म्मी -र्म्मिणी -र्म्मि (न्), शक्तिमान् -मती -मत् (त्), शक्तिरूपः -पा -पं, अनलसः -सा -सं, अतन्द्रः -न्द्रा -न्द्रं, अतन्द्रितः -ता -तं, आलस्यशून्यः -न्या -न्यं, प्रगल्भः -ल्भा -ल्भं, वीर्य्यवान् -वती -वत् (त्).

Energetically, *adv.* सोत्साहं, सोद्योगं, सव्यवसायं, उद्यमेन, सयत्नं, शक्त्या, प्रयत्नतस्, सवीर्य्यं, ससत्त्वं, पौरुषेण.

Energy, *s.* (Power) तेजः *n.* (स्), वीर्य्यं, शक्तिः *f.*, सत्त्वं, प्रभावः, पौरुषं.—(Activity) उद्योगः, व्यवसायः, उद्यमः, उत्साहः, सत्त्वोत्साहः, कर्म्मोद्योगः, सयत्नता, प्रवृत्तिः *f.* The divine energies or mothers of the gods are ब्राह्मी, महेश्वरी, ऐन्द्री, वाराही, वैष्णवी, कौमारी, कौवेरी, चामुण्डा.

To **enervate**, *v. a.* दुर्बलीकृ, शिथिलीकृ, तेजः or शक्तिं or वीर्य्यं हृ (c. 1. हरति, हर्त्तुं), क्लीव् in caus. (क्लीवयति -यितुं), क्षीणीकृ, क्षीणं -णां -णं कृ, क्लीबीकृ.

Enervated, *p. p.* हृततेजाः -जाः -जः (स्), क्षीणवीर्य्यः -र्य्या -र्य्यं, शिथिलशक्तिः -क्तिः -क्ति.

Enervation, *s.* दुर्बलीकरणं, शिथिलीकरणं, तेजोहरणं, तेजोहानिः *f.*, वीर्य्यक्षयः, शक्तिहानिः *f.*, क्लीवभावः, क्लीवत्वं, प्रमीला.

To **enfeeble**, *v. a.* दुर्बलीकृ, अल्पबलीकृ, तेजः or सत्त्वं हृ (c. 1. हरति, हर्त्तुं).

Enfeebled, *p. p.* क्षीणशक्तिः -क्तिः -क्ति, शिथिलबलः -ला -लं, हृततेजाः -जाः -जः (स्), क्षीणसत्त्वः -त्त्वा -त्त्वं, गतवीर्य्यः -र्य्या -र्य्यं, सामर्थ्यहीनः -ना -नं, दुर्बलः -ला -लं; 'by age,' जरितः -ता -तं, जरातुरः -रा -रं.

To **enforce**, *v. a.* (Give strength to) दृढीकृ, स्थिरीकृ, दृढ (nom. दृढयति -यितुं), संस्तम्भ् (c. 5. -स्तभ्नोति -स्तम्भितुं, c. 10. -स्तम्भयति -यितुं), सबलं -लां -लं कृ, तेजः or शक्तिं दा.—(Put in act by force) बलेन or बलात्कारेण कृ in caus. (कारयति -यितुं) or प्रवृत् in caus. (-वर्त्तयति -यितुं) or प्रणी (c. 1. -णयति -णेतुं) or निर्वह् in caus. (-वाहयति -यितुं) or निष्पद् in caus. (-पादयति -यितुं). The causal form of a verb may express the sense of enforce; as, 'to enforce payment,' दा in caus. (दापयति -यितुं).

Enforced, *p. p.* बलेन प्रवर्त्तितः -ता -तं or निष्पादितः -ता -तं or प्रणीतः -ता -तं, दृढीकृतः -ता -तं, स्थिरीकृतः -ता -तं, संस्तब्धः -ब्धा -ब्धं; 'payment must be enforced,' दाप्यः (*i.e.* he must be made to pay).

Enforcement, *s.* (Putting in act by force) बलात्कारः, बलेन प्रवर्त्तनं or प्रणयनं or निष्पादनं.—(Corroboration) दृढीकरणं, स्थिरीकरणं, संस्तम्भः, दृढप्रमाणं.—(Urgent evidence) दृढप्रमाणं, गुरुप्रमाणं.

To **enfranchise**, *v. a.* (Free from slavery or confinement) दास्यात् or बन्धनाद् मुच् (c. 6. मुञ्चति, मोक्तुं, c. 10. मोचयति -यितुं) or विमुच् or मोक्ष् (c. 10. मोक्षयति -यितुं) or विसृज् (c. 6. -सृजति -स्रष्टुं).—(Admit to the privileges of citizens) स्वाधीनीकृ, स्वतन्त्रीकृ, स्ववशीकृ, पौरजनानाम् अधिकारान् दा or प्रदा.

ENFRANCHISEMENT, *s.* (Liberation from slavery or custody) दास्यमोक्षः, बन्धनमोक्षः, दासभावाद् विमोक्षः or विमुक्तिः *f.*—(Admission to the privileges of citizen, &c.) पौरजनाधिकारदानं, स्वाधीनीकरणं.

To ENGAGE, *v. a.* (Occupy, employ) व्यापृ in caus. (-पारयति -यितुं), प्रवृत् in caus. (-वर्त्तयति -यितुं), प्रयुज् in caus. (-योजयति -यितुं); 'be occupied in,' व्यापृ in pass. (-प्रियते) with loc. c., वृत् (c. 1. वर्त्तते -र्त्तितुं), प्रवृत् with loc. c., आस्था (c. 1. -तिष्ठति -स्थातुं) with acc. c., सेव् (c. 1. सेवते -वितुं), निरतः -ता -तं भू.—(Appoint to any business) नियुज्, विनियुज्, अधिकृ, प्रकृ, वृ (c. 10. वरयति -यितुं).—(Bind by contract) नियमपत्रेण or नियमेन बन्ध् (c. 9. बध्नाति, बन्धुं), प्रतिज्ञापत्रेण बन्ध्.—(Encounter, attack) युद्धं कृ, सङ्ग्रामं कृ, समाघातं कृ, संयुध् (c. 4. -युध्यते -योद्धुं), आक्रम् (c. 1. -क्रामति -क्रमितुं).—(Win, draw) आराध् (c. 10. -राधयति -यितुं), अनुरञ्ज् (c. 10. -रञ्जयति -यितुं), आकृष् (c. 1. -कर्षति -क्रष्टुं), अनुनी (c. 1. -नयति -नेतुं).—(Pledge, pawn) पण् (c. 1. पणते -णितुं), आधीकृ.

To ENGAGE, *v. n.* (In battle) संयुध् (c. 4. -युध्यते -योद्धुं), युद्धारम्भं कृ, रणाभियोगं कृ.—(Undertake) आरभ् (c. 1. -रभते -रब्धुं), उपक्रम् (c. 1. -क्रमते -मितुं), व्यवसो (c. 4. -स्यति -सातुं).—(Promise, make a contract) प्रतिज्ञा (c. 9. -जानीते -ज्ञातुं), सम्प्रतिज्ञा, नियमं कृ, समयाकृ, पणं कृ, अङ्गीकृ, पण् (c. 1. पणते -णितुं), उपगम् (c. 1. -गच्छति -गन्तुं); 'make a contract of marriage,' विवाहप्रतिज्ञां कृ, विवाहसम्बन्धं कृ, वाग्दानं कृ, वाग्निश्चयं कृ; 'better die than engage in such an act as this,' वरं मरणं न च ईदृशे कर्म्मणि प्रवृत्तिः.

ENGAGED, *p. p.* (Occupied in) व्यापृतः -ता -तं, निरतः -ता -तं, रतः -ता -तं, प्रवृत्तः -त्ता -त्तं, परः -रा -रं, निष्ठः -ष्ठा -ष्ठं, निष्ठितः -ता -तं, आस्थितः -ता -तं, अवस्थितः -ता -तं, वृत्तः -त्ता -त्तं, निविष्टः -ष्टा -ष्टं, निवेशितः -ता -तं; 'engaged in business,' कर्म्मनिष्ठः -ष्ठा -ष्ठं, कर्म्मोद्युक्तः -क्ता -क्तं, कार्य्यवान् -वती -वत् (त्), क्रियावान् &c., कर्म्मी -र्म्मिणी -र्म्मि (न्), व्यापारी -रिणी -रि (न्), व्यवसायी -यिनी -यि (न्), कर्म्मसूद्यतः -ता -तं; 'being engaged in,' प्रवर्त्तमानः -ना -नं; 'engaged in devotion,' योगारूढः -ढा -ढं; 'engaged in reading,' अध्ययनरतः -ता -तं, अध्ययनाभिमुखः -खा -खं; 'engaged in meditation,' ध्यानपरः -रा -रं, ध्यानतत्परः -रा -रं; 'engaged in one's own duties,' स्वधर्म्मे निरतः -ता -तं; 'engaged in a quarrel,' कलहायितः -ता -तं.—(By contract, promised) प्रतिज्ञातः -ता -तं, संविदितः -ता -तं, उपगतः -ता -तं, अभ्युपगतः -ता -तं, अभ्युपेतः -ता -तं, अङ्गीकृतः -ता -तं, प्रज्ञप्तः -प्ता -प्तं, कृतसङ्केतः -ता -तं, कृतसमयः -या -यं, कृतसम्बन्धः -न्धा -न्धं.—(Engaged to be married) प्रतिज्ञाविवाहितः -ता, वाग्दत्तः -त्ता, प्रत्तः -त्ता.

ENGAGEMENT, *s.* (Occupation) व्यापारः, कार्य्यं, कर्म्म *n.* (न्), प्रवृत्तिः *f.*, प्रवर्त्तनं, वृत्तिः *f.*, व्यवसायः, व्यवहारः.—(Agreement, contract) प्रतिज्ञा -ज्ञानं, सङ्केतः, संविद् *f.*, समयः, नियमः, संस्कारः, उपगमः, अभ्युपगमः, अभ्युपायः, पणः, परिपणनं, व्यवस्था, प्रज्ञप्तिः *f.*, समाधिः *m.*; 'to make an engagement,' समयं कृ, समयाकृ. *See To* ENGAGE, *v. n.* 'To keep an engagement,' प्रतिज्ञातं पाल् (c. 10. पालयति -यितुं); 'to break an engagement,' समयं भिद् (c. 7. भिनत्ति, भेत्तुं), समयभेदं कृ, विसंवादं कृ; 'one who has fulfilled his engagement,' कृतप्रतिज्ञः.—(Marriage-contract) वाग्निश्चयः, विवाहप्रतिज्ञा.—(Battle) युद्धं, रणाभियोगः, समाघातः, सङ्ग्रामः, सम्प्रहारः.—(Obligation) अवश्यकर्त्तव्यं.

ENGAGING, *a.* (Attractive, pleasing) मनोहरः -रा -रं, हृदयग्राही -हिणी -हि (न्), हृदयकर्षी -र्षिणी -र्षि (न्), मित्रयुः -युः -यु, मित्रवत्सलः -ला -लं, अनुरञ्जकः -का -कं, हृदयङ्गमः -मा -मं, अनुरागजनकः -का -कं.

ENGAGINGLY, *adv.* मनोहरं, सप्रणयं, यथा हृदयम् आकृष्यते तथा.

To ENGENDER, *v. a.* (Beget) जन् in caus. (जनयति -यितुं), सञ्जन्, विजन्, प्रसू (c. 2. -सूते, c. 4. -सूयते -सोतुं).—(Produce) उत्पद् in caus. (-पादयति -यितुं), जन् in caus.

ENGENDERED, *p. p.* जातः -ता -तं, जनितः -ता -तं, उपजातः -ता -तं, उत्पादितः -ता -तं, प्रसूतः -ता -तं, प्ररूढः -ढा -ढं, उद्भवः -वा -वं, in comp.

ENGINE, *s.* यन्त्रं, उपकरणं, साधनं, विलालः; 'military engine,' युद्धयन्त्रं, युद्धास्त्रं; 'fire-engine,' अग्निनिर्वापणयन्त्रं.

ENGINEER, *s.* यन्त्रकारः -रकः, यन्त्रनिर्म्माणशिल्पविद्, यन्त्रविद्, कलाज्ञः.

ENGINEERING, *s.* यन्त्रकारस्य व्यापारः or कर्म्म *n.* (न्).

To ENGIRD, *v. a.* परिवेष्ट् (c. 1. -वेष्टते -ष्टितुं), मण्डल (nom. मण्डलयति -यितुं).

ENGLAND, *s.* श्वेतद्वीपः, इङ्गलण्डनामको देशः.

To ENGORGE, *v. a.* ग्रस् (c. 1. ग्रसते -सितुं), निगॄ (c. 6. -गिरति -गरितुं -रीतुं).

To ENGRAPPLE, *v. n.* बाहूबाहवि or हस्ताहस्ति युध् (c. 4. युध्यते, योद्धुं).

To ENGRASP, *v. a.* ग्रह् (c. 9. गृह्णाति, ग्रहीतुं), धृ (c. 1. धरति, धर्त्तुं).

To ENGRAVE, *v. a.* तक्ष् (c. 1. तक्षति -क्षितुं, c. 5. तक्ष्णोति), त्वक्ष् (c. 1. त्वक्षति -क्षितुं), रेखादिना अलङ्कृ or उपस्कृ or मुद्रीकृ or मुद्र (nom. मुद्रयति -यितुं).

ENGRAVED, *p. p.* तष्टः -ष्टा -ष्टं, रेखादिना मुद्रितः -ता -तं or मुद्रीकृतः -ता -तं.

ENGRAVER, *s.* तक्षकः, तष्टा *m.* (ष्टृ), त्वष्टा *m.* (ष्टृ), मुद्राकरः.

ENGRAVING, *s.* तक्षणं, तक्षणकर्म्म *n.* (न्).—(A print) मुद्रा.

To ENGROSS, *v. a.* (Thicken) स्थूलीकृ, घनीकृ, सान्द्रीकृ, निबिडीकृ.—(Fatten) पुष् in caus. (पोषयति -यितुं), प्यै in caus. (प्याययति -यितुं).—(Take the whole) सर्व्वं ग्रह् (c. 9. गृह्णाति, ग्रहीतुं), पूर्व्वं ग्रह्, समुदायं ग्रह्; 'to engross the mind,' चित्तैकाग्र्यं जन् (c. 10. जनयति -यितुं), चित्तम् अनन्यविषयं कृ or एकाग्रवणं कृ.—(Purchase the whole of a commodity with a view to sell at a higher price) अधिकमूल्येन विक्रयार्थं सर्व्वभाण्डानि पूर्व्वं क्री (c. 9. क्रीणाति -णीते, क्रेतुं), पूर्व्वक्रयं कृ, प्रख्या (c. 2. -ख्याति -तुं).—(Copy in a large distinct hand) सुव्यक्ताक्षरैः or स्पष्टरूपेण लिख् (c. 6. लिखति, लेखितुं), सुस्पष्टाक्षराणि लिखित्वा उद्धृ (c. 1. -हरति -रितुं -रीतुं).

ENGROSSED, *p. p.* (Absorbed) निविष्टः -ष्टा -ष्टं, अभिनिविष्टः -ष्टा -ष्टं, आविष्टः -ष्टा -ष्टं, निमग्नः -ग्ना -ग्नं, आसक्तचेताः -ताः -तः (स्), अनन्यविषयः -या -यं, एकाग्रवणः -णा -णं, एकाग्रः -ग्रा -ग्रं, परायणः -णा -णं; 'by fear,' भयैकप्रवणः -णा -णं.—(Forestalled) पूर्व्वं गृहीतः -ता -तं or क्रीतः -ता -तं.

ENGROSSER, *s.* (Forestaller) पूर्व्वक्रेता *m.* (तृ), सर्व्वभाण्डक्रेता, पूर्व्वग्राहकः, प्रख्याता *m.* (तृ).—(Copier) सुस्पष्टरूपेण लेखकः, सुव्यक्तलिपिकारः.

To ENGULPH, *v. a.* जलावर्त्ते or जलगुल्मे निक्षिप् (c. 6. -क्षिपति -क्षेप्तुं), आवर्त्तेन ग्रस् (c. 1. ग्रसते -सितुं), उपग्रस्.

To ENHANCE, *v. a.* वृध् in caus. (वर्धयति -यितुं), उपचि (c. 5. -चिनोति -चेतुं), अधिकीकृ, अधिकं -का -कं कृ, गर (nom. गरयति -यितुं), प्रचुरीकृ; 'is enhanced,' उपचीयते.

ENHANCED, *p. p.* वर्धितः -ता -तं, अधिकीकृतः -ता -तं, उपचितः -ता -तं.

ENHANCEMENT, *s.* वृद्धिः *f.*, वर्धनं, उपचयः, विवर्धनं, उन्नतिः *f.*, अभ्युदयः.

ENIGMA, *s.* गूढं, गूढवाक्यं, गूढप्रश्नः, प्रवह्लिः *f.* -ह्लिका, प्रहेलिका, प्रश्नदूती,

क्षेपः, क्षेपोक्तिः *f.*

ENIGMATICAL, *a.* गूढः -ढा -ढं, गूढार्थः -र्था -र्थं, निगूढार्थः -र्था -र्थं, सन्दिग्धार्थः -र्था -र्थं, अस्पष्टार्थः -र्था -र्थं, द्व्यर्थः -र्था -र्थं, दुर्ज्ञेयः -या -यं, बोधागम्यः -म्या -म्यं, अव्याख्येयः -या -यं, व्याख्यागम्यः -म्या -म्यं, वक्रः -क्रा -क्रं.

ENIGMATICALLY, *adv.* गूढं, सगूढार्थं, निगूढार्थतस्, अस्पष्टं, अव्यक्तं, वक्रोक्त्या.

To ENJOIN, *v. a.* आदिश् (c. 6. -दिशति -देष्टुं), निर्दिश्, प्रदिश्, विनिर्दिश्, समादिश्, सन्दिश्, व्यादिश्, उपदिश्; आज्ञा in caus. (-ज्ञापयति -यितुं), समाज्ञा, नियुज् (c. 7. -युनक्ति -योक्तुं, c. 10. -योजयति -यितुं), विनियुज्, सन्नियुज्, चुद् (c. 10. चोदयति -यितुं), प्रचुद्, सञ्चुद्, शास् (c. 2. शास्ति, शासितुं), विधा (c. 3. -दधाति -धातुं).

ENJOINED, *p. p.* आदिष्टः -ष्टा -ष्टं, निर्दिष्टः -ष्टा -ष्टं, उद्दिष्टः -ष्टा -ष्टं, प्रचोदितः -ता -तं, सञ्चोदितः -ता -तं, विहितः -ता -तं: 'by the vedas,' वेदविहितः -ता -तं.

To ENJOY, *v. a.* भुज् (c. 7. भुनक्ति, भुंक्ते, भोक्तुं), उपभुज्, अनुभुज्, परिभुज्, अभिभुज्; अश् (c. 5. अश्नुते, c. 9. अश्नाति, अशितुं), समश्, उपाश्; अनुभू (c. 1. -भवति -वितुं), आस्वद् or आस्वाद् (c. 1. -स्वदति or -स्वादति -दितुं), पुष् (c. 4. पुष्यति, पोष्टुं) with acc. c.—(Delight in) रम् (c. 1. रमते, रन्तुं), अभिरम्, नन्द् (c. 1. नन्दति -न्दितुं), अभिनन्द्, रुच् (c. 1. रोचते -चितुं).—(Possess with satisfaction) सुखेन or सन्तोषेण उपयुज् (c. 7. -युनक्ति -युंक्ते -योक्तुं) or धृ (c. 10. धारयति -यितुं) or धा (c. 3. धत्ते, धातुं) or सेव् (c. 1. सेवते -वितुं).

ENJOYABLE, *a.* भोग्यः -ग्या -ग्यं, उपभोग्यः -ग्या -ग्यं, सुभोगीनः -ना -नं, भोगवान् -वती -वत् (त्), रम्यः -म्या -म्यं, रमणीयः -या -यं, सुभगः -गा -गं, आनन्ददः -दा -दं, सुखदः -दा -दं, मनोरमः -मा -मं, कमनीयः -या -यं, आस्वादनीयः -या -यं.

ENJOYABLY, *adv.* सभोगं, सोपभोगं, रमणीयं, सुभगं, जोषं.

ENJOYED, *p. p.* भुक्तः -क्ता -क्तं, उपभुक्तः -क्ता -क्तं, कृतोपभोगः -गा -गं, अनुभूतः -ता -तं, अशितः -ता -तं, आस्वादित -ता -तं.

ENJOYMENT, *s.* (Fruition) भोगः, भुक्तिः *f.*, उपभोगः, परिभोगः, अनुभवः, आस्वादः -दनं, फलभोगः, सुखास्वादः, निर्वेशः.—(Pleasure) सुखं, सौख्यं, रतिः *f.*, रतं, आनन्दः, हर्षः, आह्लादः, आमोदः, प्रमोदः, सन्तोषः, मदः.

To ENKINDLE, *v. a.* उद्दीप् in caus. (-दीपयति -यितुं), उत्तप् in caus. (-तापयति -यितुं), उत्तिज् in caus. (-तेजयति -यितुं), समिन्ध् (c. 7. -इन्धे -न्धितुं), प्रज्वल् in caus. (-ज्वलयति -यितुं), संज्वल्, सन्धुक्ष् (c. 10. -धुक्षयति -यितुं).

ENKINDLED, *p. p.* उद्दीप्तः -प्ता -प्तं, समिद्धः -द्धा -द्धं, उत्तेजितः -ता -तं, उत्तापितः -ता -तं, प्रतप्तः -प्ता -प्तं, ज्वलितः -ता -तं, सन्धुक्षितः -ता -तं.

To ENLARGE, *v. a.* (Extend, make large) विस्तृ in caus. (-स्तारयति -यितुं), वितन् (c. 8. -तनोति -नितुं), प्रथ् (c. 10. प्रथयति -यितुं), विशालीकृ, विपुलीकृ, प्रचुरीकृ, प्रसृ in caus. (-सारयति -यितुं).—(Augment) वृध् in caus. (वर्धयति -यितुं), संवृध्; ऋध् in caus. (ऋधयति -यितुं), आप्यै in caus. (-प्याययति -यितुं), समाप्यै, स्फाय् in caus. (स्फावयति -यितुं), स्फीतीकृ, वृद्धिं नी (c. 1. नयति, नेतुं), बृंह् (c. 10. बृंहयति -यितुं), उपबृंह्.

To ENLARGE, *v. n.* (Grow large) वृध् (c. 1. वर्धते -र्धितुं), अभिवृध्, विवृध्, प्रवृध्; विशालीभू, विपुलीभू, प्रचुरीभू, प्यै (c. 1. प्यायते, प्यातुं), उपचि in pass. (-चीयते), स्फाय् (c. 1. स्फायते -यितुं), आस्फाय्, वितन् in pass. (-तन्यते), विस्तृ in pass. (-स्तीर्य्यते), वृद्धिम् इ (c. 2. एति -तुं), प्ररुह् (c. 1. -रोहति -रोढुं).—(Describe at large) वर्ण् (c. 10. वर्णयति -यितुं), उपवर्ण्, संवर्ण्, सुविस्तरेण वद् (c. 1. वदति -दितुं), वाग्विस्तारेण or वाक्प्रपञ्चेन व्याख्या (c. 2. -ख्याति -तुं), प्रपञ्च् (c. 10. -पञ्चयति -यितुं), बहुक्तिं कृ.

ENLARGED, *p. p.* प्रवृद्धः -द्धा -द्धं, प्रथितः -ता -तं, उपचितः -ता -तं, वर्धितः -ता -तं, प्ररूढः -ढा -ढं, शूनः -ना -नं, स्फीतः -ता -तं, स्फातः -ता -तं, आप्यायितः -ता -तं, बृंहितः -ता -तं.

ENLARGEMENT, *s.* वृद्धिः *f.*, वर्धनं, प्रवृद्धिः *f.*, विवृद्धिः *f.*, स्फातिः *f.*, स्फीतिः *f.*, विस्तारः, आप्यायनं, बृंहणं, विपुलता, विशालता, स्फारः, प्रपञ्चः, बाहुल्यं.

ENLARGER, *s.* वृद्धिकरः, स्फीतिकरः, विस्तारकः, संवर्धकः.

To ENLIGHTEN, *v. a.* विकाश् in caus. (-काशयति -यितुं), प्रकाश्, द्युत् in caus. (द्योतयति -यितुं), प्रद्युत्, उद्द्युत्, दीप्, in caus. (दीपयति -यितुं), विदीप्, उद्दीप्; विराज् in caus. (-राजयति -यितुं), भास् in caus. (भासयति -यितुं), प्रभास्, उद्भास्, भाज् in caus. (भाजयति -यितुं), विमल (nom. विमलयति -यितुं).—(Instruct) उपदिश् (c. 6. -दिशति -देष्टुं).

ENLIGHTENED, *p. p.* प्रकाशितः -ता -तं, प्रद्योतितः -ता -तं, उद्द्योतितः -ता -तं, दीपितः -ता -तं, सुप्रभातः -ता -तं.—(Instructed) गृहीतार्थः -र्था -र्थं, प्राप्तबुद्धिः -द्धिः -द्धि, उपदिष्टः -ष्टा -ष्टं.

To ENLIST, *v. a.* (Enter names on a list) नामावलिपत्रे or नामपरिसंख्यापत्रे नामानि समारुह् in caus. (-रोपयति -यितुं) or आरुह् or अभिलिख् (c. 6. -लिखति -लेखितुं) or लिख्.—(Enlist soldiers) सैन्यमध्ये समारुह् in caus. or सैन्यनामावलिमध्ये आरुह् or अभिलिख्, युद्धकर्म्मणि व्यापृ in caus. (-पारयति -यितुं) or प्रवृत् in caus. (-वर्त्तयति -यितुं), अस्त्राणि ग्रह् in caus. (ग्राहयति -यितुं).—(Gain over to one's own party) स्वपक्षीकृ, आत्मपक्षीकृ, आत्मसात्कृ.

ENLISTED, *p. p.* सैन्यनामावलिमध्ये समारोपितः -ता -तं, अभिलिखितः -ता -तं.

ENLISTING, *s.* सैन्यनामावलिमध्ये समारोपणं or आरोपणं or नामाभिलेखनं, युद्धे प्रवर्त्तनं.

To ENLIVEN, *v. a.* आश्वस् in caus. (-श्वासयति -यितुं), समाश्वस्, विश्वस्, उत्तिज् in caus. (-तेजयति -यितुं), तेजः कृ or दा.—(Make cheerful) हृष् in caus. (हर्षयति -यितुं), ह्लाद् in caus. (ह्लादयति -यितुं), आह्लाद्, उल्लस् in caus. (-लासयति -यितुं).

ENMITY, *s.* वैरं, वैरिता, शत्रुता, रिपुता, अरिता, शात्रवं, विपक्षता, द्वेषः -षणं, विद्वेषः, विरोधः, वैरभावः, प्रतिद्वन्द्वं, प्रतिपक्षता, विद्विष्टता, अप्रीतिः *f.*, परता.

To ENNOBLE, *v. a.* (Raise to nobility) कुलीनपदे नियुज् (c. 7. -युंक्ते -योक्तुं) or प्रतिपद् in caus. (-पादयति -यितुं).—(Dignify) शुभ् in caus. (शोभयति -यितुं), सम्मन् in caus. (-मानयति -यितुं), उत्कर्षं कृ, उन्नतिं कृ, यशः कृ.

ENNOBLEMENT, *s.* प्रतिपत्तिः *f.*, उत्कर्षः, पदवृद्धिः *f.*, कुलीनता, पदसमुन्नतिः *f.*

ENNUI, *s.* ग्लानिः *f.*, क्लान्तिः *f.*, श्रान्तिः *f.*, विषादः, विषण्णता, निर्वेदः.

ENORMITY, *s.* (Atrocious crime) अतिपातकं, अतिपापं, महापातकं, महापापं, अघोरपातकं.—(Atrociousness) अतिदुष्टता, अघोरता, घोरता.

ENORMOUS, *a.* (Beyond measure, exceeding) अतिमात्रः -त्रा -त्रं, अत्यन्तः -न्ता -न्तं, अपरिमितः -ता -तं.—(Very large) अतिमहान् -हती -हत् (त्), सुमहान् &c., अतिबृहन् -हती -हत् (त्).—(In body) अतिकायः -या -यं, बृहत्कायः -या -यं, बृहच्छरीरः -रा -रं, भीमविग्रहः -हा -हं.

ENORMOUSLY, *adv.* अत्यन्तं, अतिमात्रं, अतिशयेन, सुमहत्, अतिमहत्.

ENOUGH, *adv.* अलं, यथेष्टं, इयत्तं, पर्य्याप्तं, प्रचुरं, प्रचुरतरं, उपयुक्तं, कृतं, यथावत्; 'quite enough,' अलम्तरां; 'enough of this,' अलम् अनेन; 'enough of ceremony,' कृतम् आदरेण; 'to be enough for,' क्लृप् (c. 1. कल्पते -ल्पितुं).

ENOUGH, *a.* यथेष्टः -ष्टा -ष्टं, उपयुक्तः -क्ता -क्तं, उचितः -ता -तं, समर्थः -र्था

-र्यं, पर्य्याप्तः -प्ता -प्तं, प्रचुरः -रा -रं -रतरः -रा -रं, सम्पूर्णः -र्णा -र्णं, बहुलः -ला -लं; 'just food enough to satisfy hunger,' तृप्तिमात्रोचितम् अन्नं; 'food enough for a year,' संवत्सरनिर्वाहसमर्थम् अन्नं.

ENOUGH, *s.* यथेष्टत्वं, पर्य्याप्तिः *f.*, प्राचुर्य्यं, उपयुक्तत्वं, बाहुल्यं, निर्वाहः; 'having enough for subsistence,' अलञ्जीविकः -का -कं.

ENQUIRE, ENQUIRY. *See* INQUIRE, &c.

To ENRAGE, *v. a.* कुप् in caus. (कोपयति -यितुं), प्रकुप्, संकुप्; क्रुध् in caus. (क्रोधयति -यितुं), रुष् in caus. (रोषयति -यितुं), क्रोधं or कोपं जन् (c. 10. जनयति -यितुं).

To be ENRAGED, *v. n.* क्रुध् (c. 4. क्रुध्यति, क्रोद्धुं), संक्रुध्, अभिसंक्रुध्; कुप् (c. 4. कुप्यति, कोपितुं), प्रकुप्, सङ्कुप्; रुष् (c. 4. रुष्यति, रोषितुं), with dat. c.

ENRAGED, *p. p.* क्रुद्धः -द्धा -द्धं, कुपितः -ता -तं, प्रकोपितः -ता -तं, प्रकुपितः -ता -तं, संक्रुद्धः -द्धा -द्धं, कोपाकुलः -ला -लं, रुषितः -ता -तं, रुष्टः -ष्टा -ष्टं, संरब्धः -ब्धा -ब्धं, उपजातकोपः -पा -पं, जातामर्षः -र्षा -र्षं, आगतमन्युः -न्युः -न्यु, जातरोषः -षा -षं, इद्धमन्युः -न्युः -न्यु, उष्मान्वितः -ता -तं.

To ENRAPTURE, ENRAVISH, *v. a.* परमहर्षेण मुह् in caus. (मोहयति -यितुं) or सम्मुह्, अतिशयेन प्रहृष् in caus. (-हर्षयति -यितुं) or परिहृष्; 'to be enraptured,' अत्यन्तं हृष् (c. 4. हृष्यति, हर्षितुं), पुलकितः -ता -तम् अस्, परमहर्षेण मुह् (c. 4. मुह्यति, मोहितुं).

ENRAPTURED, *p. p.* हर्षमोहितः -ता -तं, सम्मोहितः -ता -तं, प्रहर्षितः -ता -तं, सम्प्रहृष्टः -ष्टा -ष्टं, पुलकितः -ता -तं, रोमाञ्चितः -ता -तं, परमानन्दितः -ता -तं, विस्मितः -ता -तं, हर्षोन्मत्तः -त्ता -त्तं.

ENRAVISHMENT, *s.* परमहर्षजो मोहः, सम्मोहः, प्रहर्षः, हर्षावेशः, परमानन्दः, अत्यन्ताह्लादः, विस्मयः, उन्मदः.

To ENRICH, *v. a.* (Make rich) सधनं -नां -नं कृ, आढ्यं -ढ्यां -ढ्यं कृ, समृद्धीकृ, वृध् in caus. (वर्धयति -यितुं), धनं or अर्थं वृध्.—(Make fertile) आप्यै in caus. (-प्याययति -यितुं), स्फाय् in caus. (स्फावयति -यितुं), स्फीतीकृ, सफल (nom. सफलयति -यितुं).—(Adorn) शुभ् in caus. (शोभयति -यितुं), उपशुभ्.

ENRICHED, *p.p.* संवर्धितः -ता -तं, आप्यायितः -ता -तं, स्फीतीकृतः -ता -तं.

ENRICHING, *a.* अर्थकरः -री -रं, अर्थजनकः -का -कं, शोभकृत् *m.f.n.*

To ENROLL, *v. a.* नामावलिपत्रे or नामपरिसंख्यापत्रे नामानि समारुह् in caus. (-रोपयति -यितुं) or आरुह् or अभिलिख् (c. 6. -लिखति -लेखितुं) or लिख्.

ENROLLED, *p. p.* नामावलिपत्रे समारोपितः -ता -तं or अभिलिखितः -ता -तं, अभिलिखितनामा -मा -म (न्), आरोपितनामा -मा -म (न्).

ENROLLER, *s.* नामलेखकः, नामाभिलेखकः, नामसमारोपकः, नामारोपकः.

ENROLMENT, *s.* नामाभिलेखनं, नामसमारोपणं, नामारोपणं, नामलिखनं, नामलेखनं.

ENS, *s.* (Being) भूतं, अधिभूतं, सत्त्वं, भावः, सत्ता, सम्भवः.

ENSAMPLE, *s.* *See* EXAMPLE.

To ENSANGUINE, *v. a.* रक्तेन or शोणितेन लिप् (c. 6. लिम्पति, लेप्तुं), रक्ताक्तं -क्तां -क्तं कृ.

To ENSCONCE, *v. a.* छद् (c. 10. छादयति -यितुं), संछद्, प्रच्छद्, रक्ष् (c. 1. रक्षति -क्षितुं), गुप् (c. 1. गोपायति, गोप्तुं), अभिगुप्, गुह् (c. 1. गूहति -हितुं); 'ensconce one's self,' आश्रि (c. 1. -श्रयति -यितुं), समाश्रि, संश्रि, आत्मानं गुप् or गुह्.

ENSCONCED, *p.p.* समाश्रितः -ता -तं, गुप्तः -प्ता -प्तं, प्रच्छन्ने स्थापितः -ता -तं.

To ENSEAR, *v. a.* दह् in caus. (दाहयति -यितुं), आरम् ऋ in caus. (अर्पयति -यितुं).

To ENSHIELD, *v. a.* आछद् (-छादयति -यितुं), गुप् (c. 1. गोपायति, गोप्तुं).

To ENSHRINE, *v. a.* पवित्रद्रव्यं सुगहनाधारे or सुगहनभाण्डे or सुप्रतिष्ठितभाजने निविश् in caus. (-वेशयति -यितुं) or रक्ष् (c. 1. रक्षति -क्षितुं).

ENSHRINED, *p. p.* सुप्रतिष्ठितभाण्डे or सुगहनाधारे रक्षितः -ता -तं.

ENSIFORM, *a.* अस्याकारः -रा -रं, खड्गाकृतिः -तिः -ति, खड्गाकारः -रा -रं.

ENSIGN, *s.* (Banner) पताका, ध्वजः, ध्वजपटः, केतनं, केतुः *m.*, वैजयन्ती, केतुवसनः, जयन्तः कदली -लिका, उच्छूलः.—(Badge) चिह्नं, लिङ्गं, ध्वजः, व्यञ्जनं, लक्षणं.—(Officer). *See* the next word.

ENSIGN-BEARER, *s.* ध्वजी *m.* (न्), ध्वजवान् *m.* (त्), पताकी *m.* (न्), वैजयन्तिकः, ध्वजधारी *m.* (न्), पताकाधारी *m.* (न्), पताकावाहकः.

To ENSLAVE, *v. a.* दासीकृ, वशीकृ, करदीकृ, दास (nom. दासयति -यितुं), दास्ये or दासत्वे नियुज् (c. 7. -युनक्ति -योक्तुं), दास्यं गम् in caus. (गमयति -यितुं).

ENSLAVED, *p. p.* दासीकृतः -ता -तं, दास्यं गमितः -ता -तं, दास्यगतः -ता -तं.

ENSLAVEMENT, *s.* दास्यं, दासत्वं, दासभावः, परप्रेष्यत्वं, बन्धनं.

To ENSNARE, *v. a.* *See* INSNARE.

To ENSUE, *v. n.* अनुवृत् (c. 1. -वर्त्तते -र्त्तितुं), प्रवृत्, अनुसृ (c. 1. -सरति -सर्त्तुं), उत्पद् in pass. (-पद्यते), जन् in pass. (जायते), अन्वि (c. 2. अन्वेति -तुं rt. इ), अनुया (c. 2. -याति -तुं), उपस्था (c. 1. -तिष्ठति -स्थातुं), अनुष्ठा, पश्चाद् आगम् (c. 1. -गच्छति -गन्तुं), सम्भू, प्रभू, उद्भू.

ENSUED, *p.p.* उत्पन्नः -न्ना -न्नं, प्रवृत्तः -त्ता -त्तं, वृत्तः -त्ता -त्तं, जातः -ता -तं.

ENSUING, *a.* आगामी -मिनी -मि (न्), भावी -विनी -वि (न्), उत्तरकालीनः -ना -नं, अनुवर्त्ती -र्त्तिनी -र्त्ति (न्), अनागतः -ता -तं; 'in the ensuing year,' आगामिवत्सरे.

To ENSURE, *v. a.* *See* INSURE.

ENTABLATURE, ENTABLEMENT, *s.* गृहस्य यो भागः स्तम्भाग्रेऽवलम्बते.

ENTAIL, *s.* (An estate inherited lineally) क्रमागतरिक्थं, क्रमायातरिक्थं.—(Rule of descent) क्रमागमविधिः *m.*, अन्वयागमविधिः *m.*, बद्धत्वं, नियुक्तता.

To ENTAIL, *v. a.* (An estate) रिक्थं or स्थावरधनादि विशेषक्रमागमानुसारेण दायादिभ्यः प्रदा (c. 3. -ददाति -दातुं), रिक्थाधिकारित्वं विशेषक्रमागमानुसारात् स्थिरीकृ or बन्ध् (c. 9. बध्नाति, बन्धुं).—(Bring on) आवह् (c. 1. -वहति -वोढुं) or उत्पद् in caus. (-पादयति -यितुं) or जन् in caus. (जनयति -यितुं).

To ENTANGLE, *v. a.* संश्लिष् in caus. (-श्लेषयति -यितुं), आश्लिष्, परिश्लिष्, श्लिष्टीकृ, संलग्नीकृ, ग्रन्थ् (c. 1. ग्रन्थति -न्थितुं), ग्रन्थिलीकृ, सङ्कुलीकृ, आकुलीकृ, आकुञ्च् (c. 1. -कुञ्चति -ञ्चितुं), व्यावृत् in caus. (-वर्त्तयति -यितुं), सङ्कीर्णीकृ, सग्रन्थ् (c. 9. -ग्रथ्नाति -ग्रन्थुं), सम्मिश्र् (c. 10. -मिश्रयति -यितुं); 'to be entangled, as the hair,' जट् or झट् (c. 1. जटति, झटति -टितुं); 'to disentangle,' उद्ग्रन्थ्, समुद्ग्रन्थ्.

ENTANGLED, *p. p.* (Caught) श्लिष्टः -ष्टा -ष्टं, आश्लिष्टः -ष्टा -ष्टं, संश्लिष्टः -ष्टा -ष्टं, परिश्लिष्टः -ष्टा -ष्टं, परिलग्नः -ग्ना -ग्नं, संलग्नः -ग्ना -ग्नं, सक्तः -क्ता -क्तं, सबद्धः -द्धा -द्धं.—(Confused) सङ्कीर्णः -र्णा -र्णं, सङ्कुलः -ला -लं, ग्रन्थिलः -ला -लं.—(Twisted) आकुञ्चितः -ता -तं; 'entangled in the teeth,' दन्तश्लिष्टः -ष्टा -ष्टं, दन्तसक्तः -क्ता -क्तं; 'entangled in the branches,' विटपपरिलग्नः -ग्ना -ग्नं, शाखासु सक्तः -क्ता -क्तं; 'entangled hair,' जटा, जुटकं, जूटः; 'having entangled hair,' जटावान् -वती -वत् (त्), जटिलः -ला -लं; 'entangled in a net,' जालबद्धः -द्धा -द्धं.

ENTANGLEMENT, *s.* आश्लिष्टता, संलग्नता, ग्रन्थिलत्वं, जटिलत्वं, सङ्कुलता सङ्कीर्णत्वं, सङ्करः, साङ्कर्य्यं, व्यतिकरः, आकुलत्वं, व्याकुलत्वं.

ENT

To ENTER, *v. a.* and *n.* **विश्** (c. 6. **विशति, वेष्टुं**), **प्रविश्, निविश्, आविश्, समाविश्, आगम्** (c. 1. **-गच्छति -गन्तुं**), **अभिगम्, अभ्यागम्, समागम्, आया** (c. 2. **-याति -तुं**), **अभिया, उपस्था** (c. 1. **-तिष्ठति -स्थातुं**), **श्रि** (c. 1. **श्रयति -यितुं**), **आश्रि, गाह्** (c. 1. **गाहते -हितुं**), **विगाह्**.—(Set down in writing) **अभिलिख्** (c. 6. **-लिखति -लेखितुं**), **पुस्तके समारुह्** in caus. (**-रोपयति -यितुं**) or **आरुह्**.—(Enter upon a business) **प्रवृत्** (c. 1. **-वर्त्तते -र्त्तितुं**), **प्रक्रम्** (c. 1. **-क्रमते -मितुं**), **उपक्रम्**.—(Enter into another's views) **परमतम् अनुमन्** (c. 4. **-मन्यते -मन्तुं**) or **ग्रह्** (c. 9. **गृह्णाति, ग्रहीतुं**).

ENTERED, *p. p.* **प्रविष्टः -ष्टा -ष्टं, निविष्टः -ष्टा -ष्टं, आविष्टः -ष्टा -ष्टं**.—(In writing) **अभिलिखितः -ता -तं, आरोपितः -ता -तं, लेख्यारूढः -ढा -ढं, समारोपितः -ता -तं**.

ENTERPRISE, *s.* (Undertaking) **प्रवृत्तिः** *f.*, **उद्योगः, उत्साहः, आरम्भः, उपक्रमः, व्यवसायः, उद्यमः, चेष्टा, चेष्टितं, कर्म्म** *n.* (**न्**), **प्रौढिः** *f.*, **ग्रहः, साध्यं**.—(Bold undertaking) **महोत्साहः, दुर्गकर्म्म** *n.* (**न्**), **अद्भुतकर्म्म** *n.*, **आश्चर्य्यकर्म्म** *n.*, **कठिनकर्म्म** *n.*

To ENTERPRISE, *v. a.* **उपक्रम्** (c. 1. **-क्रमते -मितुं**), **आरभ्** (c. 1. **-रभते -रब्धुं**), **समारभ्, व्यवसो** (c. 4. **-स्यति -सातुं**), **प्रवृत्** (c. 1. **-वर्त्तते -र्त्तितुं**).

ENTERPRISER, *s.* **कठिनकर्म्मप्रवृत्तः, दुर्गकर्म्मव्यवसायी** *m.* (**न्**), **महोत्साहः**.

ENTERPRISING, *a.* **व्यवसायी -यिनी -यि** (**न्**), **व्यवसायकारी -रिणी -रि** (**न्**), **उद्योगी -गिनी -गि** (**न्**), **सोद्योगः -गा -गं, कठिनकर्म्मव्यवसायी** &c., **साहसिकः -की -कं**.

To ENTERTAIN, *v. a.* (A guest with hospitality) **अतिथिं सत्कृ** or **सेव्** (c. 1. **सेवते -वितुं**) or **पूज्** (c. 10. **पूजयति -यितुं**), **आतिथ्यं कृ, सत्कारं कृ**; 'with choice food,' **स्वाद्वन्नैः** or **भोजनविशेषैः सन्तुष्** in caus. (**-तोषयति -यितुं**) or **तृप्** in caus. (**तर्पयति -यितुं**) or **भुज्** in caus. (**भोजयति -यितुं**).—(Amuse) **विनुद्** (c. 10. **-नोदयति -यितुं**), **विलस्** (c. 10. **-लासयति -यितुं**), **रम्** (c. 10. **रमयति -यितुं**).—(Hold in the mind) **मनसि** or **मनसा धृ** (c. 1. **धरति, धर्त्तुं**) or **उपलभ्** (c. 1. **-लभते -लब्धुं**) or **ग्रह्** (c. 9. **गृह्णाति, ग्रहीतुं**).

ENTERTAINED, *p. p.* (Hospitably) **सत्कृतः -ता -तं**.—(Amused) **विनोदितः -ता -तं**.

ENTERTAINER, *s.* **सत्कारी** *m.* (**न्**), **सत्कर्त्ता** *m.*, **आमन्त्रयिता** *m.* (**तृ**), **निमन्त्रणकृत्**.

ENTERTAINING, *a.* **विनोदकः -का -कं, विनोदजनकः -का -कं, हास्ययुक्तः -क्ता -क्तं**.

ENTERTAINMENT, *s.* (Amusement) **विनोदः, विलासः**.—(Of guests) **सत्कारः, सत्कर्म्म** *n.* (**न्**), **अतिथिसत्क्रिया, अतिथिसेवा, अतिथिपूजनं, आतिथ्यं, अतिथिक्रिया, सङ्ग्रहः**.—(Feast) **उत्सवः, सहभोजनं, सम्भोजनं**.

To ENTHRALL. *See* INTHRALL.

To ENTHRONE, *v. a.* **राजासने** or **सिंहासने उपविश्** in caus. (**-वेशयति -यितुं**) or **अध्यास्** in caus. (**-आसयति -यितुं**), **राज्ये अभिषिच्** (c. 6. **-षिञ्चति -षेक्तुं**).

ENTHRONED, *p. p.* **सिंहासनोपविष्टः -ष्टा -ष्टं, सिंहासनाध्यासितः -ता -तं, अध्यासीनः -ना -नं, राज्ये अभिषिक्तः -क्ता -क्तं**.

ENTHRONEMENT, *s.* **सिंहासनोपवेशनं, सिंहासनाध्यासः, अभिषेकः**.

ENTHUSIASM, *s.* (Religious) **अतिशयदेवभक्तिजन्यो मादविशेषः** or **उन्मादः** or **मदः** or **उन्मदः, अतिश्रद्धाप्रयुक्ता उन्मत्तता, भक्तिव्यग्रता, श्रद्धाव्यग्रता, भक्तिचण्डता, मिथ्याभक्तिः** *f.*—(Warmth, zeal) **उत्तापः, उष्णता, उष्मः, चण्डता, उच्चण्डता, प्रचण्डता, व्यग्रता, उग्रता, औत्सुक्यं, तैक्ष्ण्यं, तीक्ष्णता, अत्यन्तानुरागः, बुद्धिव्यग्रता**.

ENTHUSIAST, *s.* (In religion) **अतिशयदेवभक्तिवाद उन्मत्तो जनः, देवभक्तिव्यग्रः, मिथ्याभक्तिमान्** *m.* (**त्**).—(In any thing) **उग्रबुद्धिः** *m.*, **व्यग्रबुद्धिः** *m.*, **प्रमत्तजनः, तीक्ष्णमनः**.

ENTHUSIASTIC, ENTHUSIASTICAL, *a.* **व्यग्रः -ग्रा -ग्रं, उग्रः -ग्रा -ग्रं, चण्डः -ण्डा -ण्डं, उच्चण्डः -ण्डा -ण्डं, प्रचण्डः -ण्डा -ण्डं, उष्णः -ष्णा -ष्णं, उग्रः -ग्रा -ग्रं, अत्यनुरागी -गिणी -गि** (**न्**), **उत्सुकः -का -कं, तीक्ष्णः -क्ष्णा -क्ष्णं, तीक्ष्णकर्म्मा -र्म्मा -र्म्म** (**न्**), **उद्युक्तः -क्ता -क्तं, उन्मादवान् -वती -वत्** (**त्**).

ENTHUSIASTICALLY, *adv.* **अतिव्यग्रं, उत्तापेन, अत्यनुरागेण, सकुतूहलं**.

ENTHYMEME, *s.* **न्यूनैकावयवः** or **न्यूनैकपक्षो न्यायविशेषः, लुप्तन्यायः**.

To ENTICE, *v. a.* **आकृष्** (c. 1. **-कर्षति -क्रष्टुं**), **लुभ्** in caus. (**लोभयति -यितुं**), **प्रलुभ्, परिलुभ्, मुह्** in caus. (**मोहयति -यितुं**), **भ्रान्तिं जन्** (c. 10. **जनयति -यितुं**), **प्रलभ्** (c. 1. **-लभते -लब्धुं**), **लल्** (c. 10. **लालयति -यितुं**), **दुष्टकर्म्मणि प्रवृत्** in caus. (**-वर्त्तयति -यितुं**) or **नियुज्** (c. 10. **-योजयति -यितुं**).

ENTICED, *p. p.* **आकृष्टः -ष्टा -ष्टं, प्रलोभितः -ता -तं, लालितः -ता -तं**.

ENTICEMENT, *s.* **आकर्षणं, आकृष्टिः** *f.*, **प्रलोभनं, विलोभनं, मोहनं, विमोहनं, मोहः, लोभः, लालनं, लोभदर्शनं, वञ्चनं, प्रलम्भः**.

ENTICER, *s.* **प्रलोभकः, आकर्षकः, विमोही** *m.* (**न्**), **लाली** *m.* (**न्**), **लोभदर्शकः**.

ENTICING, *a.* **प्रलोभकः -का -कं, आकर्षकः -का -कं, आकर्षी -र्षिणी -र्षि** (**न्**), **विमोहनः -ना -नी -नं, मोही -हिनी -हि** (**न्**), **भ्रान्तिजनकः -का -कं**.

ENTICINGLY, *adv.* **सप्रलोभनं, आकृष्या, प्रलोभनेन, आकर्षकप्रकारेण**.

ENTIRE, *a.* (Complete, whole, not defective) **कृत्स्नः -त्स्ना -त्स्नं, सकलः -ला -लं, सर्व्वः -र्व्वा -र्व्वं, विश्वः -श्वा -श्वं, सम्पूर्णः -र्णा -र्णं, पूर्णः -र्णा -र्णं, समग्रः -ग्रा -ग्रं, निखिलः -ला -लं, अखिलः -ला -लं, समस्तः -स्ता -स्तं, पर्य्याप्तः -प्ता -प्तं, अशेषः -षा -षं, निःशेषः -षा -षं, निरवशेषः -षा -षं, अन्यूनः -ना -नं, अनूनः -ना -नं, अविकलः -ला -लं, अखण्डः -ण्डा -ण्डं, अभग्नः -ग्ना -ग्नं, अभिन्नः -न्ना -न्नं, अक्षतः -ता -तं, साद्यन्तः -न्ता -न्तं, आत्यन्तिकः -की -कं, व्यक्षः -क्षा -क्षं, सिमः** *m.* only. (Of perfect integrity) **अभेद्यः -द्या -द्यं, अहार्य्यः -र्य्या -र्य्यं, सरलः -ला -लं**.—(An entire horse) **सवृषणोऽश्वः, योजाश्वः**.

ENTIRELY, *adv.* **अशेषतस्, अशेषेण, निःशेषेण, निरवशेषं, कृत्स्नशस्, कार्त्स्न्येन, साकल्येन, अखिलेन, निखिलेन, सर्व्वतस्, सर्व्वशस्, विश्वतस्, आमूलं, सम्यक्, पर्य्याप्तं, साद्यन्तं, अन्यूनं, अखण्डतस्**; 'entirely around,' **समन्ततस्, अभितस्**.

ENTIRENESS, ENTIRETY, *s.* **कार्त्स्न्यं, कार्त्स्नं, साकल्यं आखिल्यं, सामग्र्यं, सम्पूर्णता, समुदायः, समस्तता, समस्तिः** *f.*, **अभिन्नता, अखण्डत्वं, अन्यूनता, अवैकल्यं**.—(Integrity) **अभेद्यता, सारल्यं, मायाहीनता**.

To ENTITLE, *v. a.* (Give a title or name) **नाम कृ** or **दा, उपाधिं** or **संज्ञां दा, नामधेयं कृ, अभिधा** (c. 3. **-दधाति -धातुं**), **आख्या** (c. 2. **-ख्याति -तुं**), **कृत्** (c. 10. **कीर्त्तयति -यितुं**), **उदाहृ** (c. 1. **-हरति -हर्त्तुं**).—(Give a claim) **अधिकारं** or **अधिकारित्वं** or **स्वत्वं दा**; 'to be entitled,' **अर्ह्** (c. 1. **अर्हति -ते -र्हितुं**), **अर्हः -र्हा -र्हं** or **उपयुक्तः -क्ता -क्तं अस्**; 'he is entitled to honour,' **मानम् अर्हति**; 'he is entitled to receive so much salary,' **उपयुक्तोऽयम् एतावद् वर्त्तनं गृह्णाति**; 'knowledge entitles to respect,' **विद्या मान्यत्वकारणं**; 'a good man is entitled to reverence,' **साधुजनः पूजनीयः**.

ENTITLED, *p. p.* (Named) **प्रोक्तः -क्ता -क्तं, अभिहितः -ता -तं, स्मृतः -ता -तं, संज्ञितः -ता -तं, उदाहृतः -ता -तं, आख्यातः -ता -तं**. *See* CALLED. (Having a claim) **अधिकारी -रिणी -रि** (**न्**), **अर्हः -र्हा -र्हं**; 'entitled to honour,' **पूजार्हः -र्हा -र्हं**; 'entitled to a sixth,'

षड्भागभाज् *m. f. n.* (ज्).

ENTITY, *s.* भूतं, अधिभूतं, सत्त्वं, सत्ता, भावः, वस्तु *n.*, वर्त्तनं.

To ENTOMB, *v. a.* श्मशाने or समाधौ स्था in caus. (स्थापयति -यितुं) or निधा (c. 3. -दधाति -धातुं) or निखन् (c. 1. -खनति -नितुं) or समृ in caus. (-अर्पयति -यितुं).

ENTOMBED, *p. p.* निखातः -ता -तं, समाधिनिखातः -ता -तं, भूमिनिखातः -ता -तं.

ENTRAIL, ENTRAILS, *s.* अन्त्रं, अन्त्राणि *n. pl.*, पुरीतत् *m. n.*, नाडिः -डी *f.*, धमनी, कोष्ठः.

ENTRANCE, *s.* (Act of entering) प्रवेशः -शनं, निवेशः -शनं, आवेशः -शनं, समावेशः, वेशः -शनं, वेषणं, वेशिका, प्रतिहारणं.—(Door, gate) द्वारं, द्वारवर्त्म *n.* (न्), मुखं, गृहमुखं, निःसरणं, प्रतीहारः, पथः; 'principal entrance,' सिंहद्वारं; 'private entrance,' प्रच्छन्नद्वारं.

ENTRANCED, *p. p.* (Put in a trance) मूर्च्छितः -ता -तं, मूर्च्छापन्नः -न्ना -न्नं.—(Enraptured) सम्मोहितः -ता -तं, मोहप्राप्तः -प्ता -प्तं, परमहर्षमोहितः -ता -तं.

To ENTRAP, *v. a.* उन्माथे or पाशे पत् in caus. (पातयति -यितुं), जाले पातयित्वा बन्ध् (c. 9. बध्नाति, बन्द्धुं) or धृ (c. 1. धरति, धर्त्तुं) or ग्रह् (c. 9. गृह्णाति, ग्रहीतुं), प्रलुभ् in caus. (-लोभयति -यितुं).

ENTRAPPED, *p. p.* उन्माथे पातितः -ता -तं, पाशबद्धः -द्धा -द्धं, जालबद्धः -द्धा -द्धं.

To ENTREAT, *v. a.* अञ्जलिं कृत्वा प्रार्थ् (c. 10. -अर्थयति -ते -यितुं), सम्प्रार्थ्, अभ्यर्थ्; विनयेन or कृताञ्जलिवत् प्रार्थ् or याच् (c. 1. याचति -चितुं), अभियाच्, प्रयाच्, सम्प्रयाच्; प्रसद् (c. 10. -सादयते -ति -यितुं), विनी (c. 1. -नयति -नेतुं), विनयेन स्वार्थं निविद् (c. 10. -वेदयति -यितुं).

ENTREATED, *p. p.* अञ्जलिकर्म्मपूर्व्वं प्रार्थितः -ता -तं or अभ्यर्थितः -ता -तं, विनयेन याचितः -ता -तं, प्रसादितः -ता -तं, अनुनीतः -ता -तं.

ENTREATY, *s.* प्रार्थनं -ना, अभ्यर्थना, अर्थः, अर्थित्वं -ता, याचना, विनतिः *f.*, मार्गणं, विनयेन निवेदनं.

ENTRY, *s.* (Passage for entrance) द्वारं, द्वारवर्त्म *n.* (न्), गमनागमनपथः.—(Ingress) प्रवेशः -शनं.—(Committing to writing) अभिलिखनं, लेख्यारोपणं, पुस्तकारोपणं, समारोपणं.

To ENUCLEATE, *v. a.* स्पष्टीकृ, व्यक्तीकृ, विशुध् in caus. (-शोधयति -यितुं), परिशुध्.

To ENUMERATE, *v. a.* संख्या (c. 2. -ख्याति -तुं), सम्परिख्या, परिसंख्या, प्रसंख्या; परिगण् (c. 10. -गणयति -यितुं), विगण्, प्रगण्, गण्; अनुपूर्व्वशस् or एकैकशस् or यथाक्रमं or पृथक् पृथक् ख्या, उद्दिश् (c. 6. -दिशति -देष्टुं), समुद्दिश्, निर्दिश्.

ENUMERATED, *p. p.* परिसंख्यातः -ता -तं, परिगणितः -ता -तं, उद्दिष्टः -ष्टा -ष्टं, समुद्दिष्टः -ष्टा -ष्टं, एकैकशः or प्रत्येकं कथितः -ता -तं or निर्दिष्टः -ष्टा -ष्टं, अनुक्रान्तः -न्ता -न्तं.

ENUMERATION, *s.* परिसंख्या -ख्यानं, संख्या, गणनं -ना, परिगणना, समुद्देशः, एकैकशो निर्देशः.

To ENUNCIATE, *v. a.* उच्चर् in caus. (-चारयति -यितुं), उदीर् (c. 10. -ईरयति -यितुं), समुदीर्, उदाहृ (c. 1. -हरति -हर्त्तुं), प्रख्या (c. 2. -ख्याति -तुं), कॄत् (c. 10. कीर्त्तयति -यितुं), प्रकृत्.

ENUNCIATED, *p. p.* उच्चारितः -ता -तं, उदीरितः -ता -तं, उदाहृतः -ता -तं.

ENUNCIATION, *s.* उच्चारणं, उदीरणं, उदाहरणं, व्याहारः -हरणं, समुदाहरणं, ख्यापनं, विज्ञापनं, प्रकीर्त्तनं, प्रकाशनं, घोषणा.

ENUNCIATIVE, *a.* उच्चारकः -का -कं, ख्यापकः -का -कं, आवेदकः -का -कं.

To ENVELOP, *v. a.* आवेष्ट् (c. 1. -वेष्टते -ष्टितुं), परिवेष्ट्, संवेष्ट्, आछद् (c. 10. -छादयति -यितुं), परिछद्, समाछद्, प्रछद्, प्रतिछद्, संछद्; परिवृ (c. 5. -वृणोति -वरितुं -रीतुं), आवृ; पिधा (c. 3. -दधाति -धातुं), कोशेन परिवेष्ट्.

ENVELOPE, *s.* कोशः, कोषः, आवेष्टनं, परिवेष्टनं, वेष्टनं, प्रच्छदपटः, प्रावारः, प्रावरणं, वासनं, पिधानं, पुटः, आच्छादनं, निचोलः, अवगुण्ठनं.

ENVELOPED, *p. p.* वेष्टितः -ता -तं, आवेष्टितः -ता -तं, परिवेष्टितः -ता -तं, कोशस्थः -स्था -स्थं, वासनस्थः -स्था -स्थं, परीतः -ता -तं, अवगुण्ठितः -ता -तं.

To ENVENOM, *v. a.* विषेण लिप् (c. 6. लिम्पति, लेप्तुं) or दिह् (c. 2. देग्धि -ग्धुं) or अञ्ज् (c. 7. अनक्ति, अंक्तुं) or संसृज् (c. 6. -सृजति -स्रष्टुं), सविषं -षां -षं कृ.

ENVENOMED, *p. p.* विषाक्तः -क्ता -क्तं, विषलिप्तः -प्ता -प्तं, विषप्रदिग्धः -ग्धा -ग्धं, सविषः -षा -षं, गरली -लिनी -लि (न्); 'envenomed shaft,' दिग्धः.

ENVIABLE, *a.* ईर्षणीयः -या -यं, ईर्षोत्पादकः -का -कं, लोभ्यः -भ्या -भ्यं, स्पृहणीयः -या -यं, प्रार्थनीयः -या -यं, आकांक्षणीयः -या -यं.

ENVIED, *p. p.* ईर्षितः -ता -तं, ईर्ष्यितः -ता -तं, अभिलषितः -ता -तं, स्पर्धितः -ता -तं.

ENVIER, *s.* ईर्षी *m.* (न्), असूयकः, अभ्यसूयकः, परकल्याणासहनः.

ENVIOUS, *a.* ईर्षी -र्षिणी -र्षि (न्), ईर्षालुः -लुः -लु, ईर्षकः -का -कं, सेर्ष्यः -र्ष्या -र्ष्यं, मत्सरः -रा -रं -री -रिणी -रि (न्), समत्सरः -रा -रं, परधनमत्सरः -रा -रं, परधनाभिलाषुकः -का -कं, परगुणमत्सरः -रा -रं, परोत्कर्षासहनः -ना -नं, परप्रशंसासहिष्णुः -ष्णुः -ष्णु, स्पर्धी -र्धिनी -र्धि (न्), साभ्यसूयः -या -यं, कृतेर्ष्यः -र्ष्या -र्ष्यं, सञ्जातेर्ष्यः -र्ष्या -र्ष्यं, कुहनः -ना -नं, बीभत्सुः -त्सुः -त्सु, स्पृहयालुः -लुः -लु, अभिलाषी -षिणी -षि (न्), परशुभामर्षणः -णा -णं.

ENVIOUSLY, *adv.* सेर्ष्यं, सासूयं, समत्सरं, समात्सर्य्यं, साभ्यसूयं.

To ENVIRON, *v. a.* परिवेष्ट् (c. 1. -वेष्टते -ष्टितुं), परिवृ (c. 5. -वृणोति -वरितुं -रीतुं), आवृ, परिष्ठा (c. 1. -तिष्ठति -ष्ठातुं). *See* ENCOMPASS.

ENVIRONED, *p. p.* परिवेष्टितः -ता -तं, परिवृतः -ता -तं, आवृतः -ता -तं, परिगतः -ता -तं, परीतः -ता -तं, वलयितः -ता -तं, व्याप्तः -प्ता -प्तं.

ENVIRONS, *s.* (Of a town) नगरोपान्तं, उपनगरं, उपपुरं, परिसरः.

ENVOY, *s.* दूतः, राजदूतः, सत्त्री *m.* (न्), सन्देशहरः, वार्त्ताहरः, निसृष्टार्थः, कार्य्यङ्करः, राजचारः, राजप्रतिनिधिः *m.*

To ENVY, *v. a.* ईर्ष्य् (c. 1. ईर्ष्यति -र्षितुं), ईर्क्ष्य् (c. 1. ईर्क्ष्यति -र्क्ष्यितुं), स्पृह् (c. 10. स्पृहयति -यितुं), स्पर्ध् (c. 1. स्पर्धते -र्धितुं), असूय (nom. असूयति -ते -यितुं), अभ्यसूय, परद्रव्यम् अभिलष् (c. 1. -लषति, c. 4. -लष्यति -षितुं), परोत्कर्षं न सह् (c. 1. सहते, सोढुं) or न मृष् (c. 4. मृष्यति, मर्षितुं), मात्सर्य्यं कृ.

ENVY, *s.* ईर्ष्या, असूया, मात्सर्य्यं, मत्सरः -रता, स्पर्धा, स्पर्धता, अक्षान्तिः *f.*, अमर्षः, परिमर्षः, रागः, द्वेषः, ईर्षा, स्पृहा, परधनाभिलाषः, परोत्कर्षासहिष्णुता, अन्यगुणासहिष्णुता, अन्यशुभद्वेषः, परप्रशंसाया असहिष्णुता.

EOLUS, *s.* (God of the winds) पवनदेवता, वायुदेवता.

EPACT, *s.* कालगणकभाषायां सौरवत्सरावसाने अमावस्याः प्रभृति तिथिसंख्यासूचकः शब्दः or शब्दो येन चान्द्रवत्सरात् सौरवत्सराधिक्यं सूच्यते.

EPAULET, *s.* स्कन्धाभरणं, सैनिकजनैः स्कन्धदेशे भृतः पदसूचकोऽलङ्कारः, अंसालङ्कारः, अंसाभरणं.

EPHEMERAL, *a.* ऐकाहिकः -की -कं, क्षणविध्वंसी -सिनी -सि (न्), उत्पन्नविनाशी -शिनी -शि (न्), क्षणभङ्गुरः -रा -रं, एकाहमात्रस्थायी -यिनी -यि (न्).

EPHEMERIS, *s.* आह्निकव्यवहारपुस्तकं, दैवसिकवृत्तान्तपुस्तकं.—(In astronomy) पुस्तकं यस्मिन् नक्षत्राणां गतिभावादि प्रतिदिनम् आरोप्यते.

EPIC, *a.* ऐतिहासिकः -की -कं, वीरचरित्रकथकः -का -कं, काथिकः -की -कं, शूरवृत्तान्तविषयः -या -यं, महाकाव्यसम्बन्धी -न्धिनी -न्धि (न्)

EPIC, *s.* (Poem) महाकाव्यं, इतिहासः, वीरचरित्रविषयं काव्यं.

EPICENE, *a.* सामान्यलिङ्गः -ङ्गा -ङ्गं, साधारणलिङ्गः -ङ्गा -ङ्गं.

EPICURE, *a.* मिष्टान्नव्यञ्जनादिषु प्रसक्तः, सर्व्वान्नरसज्ञः, स्वाद्वन्नाभिलाषी *m.* (न्), उदरपरायणः, कुक्षिम्भरिः *m.*, लोलुपः, अतिलोभी *m.* (न्), रसिकः, वैषयिकः, विषयासक्तः, विषयसेवी *m.* (न्), पात्रेसमितः.

EPICUREAN, *a.* विषयी -यिणी -यि (न्), शारीरिकसुखसेवी -विनी -वि (न्), वैषयिकः -की -कं, भोगपरायणः -णा -णं.

EPICURISM, *s.* विषयोपसेवा, विषयासक्तिः *f.*, शारीरिकसुखानुरागः.

EPICYCLE, *s.* (In astronomy) प्राक् चक्रं, परिधिः *m.*

EPIDEMIC, EPIDEMICAL, *a.* देशसाधारणः -णा -णी -णं, सर्व्वत्रगः -गा -गं, बहुजनसामान्यः -न्या -न्यं; 'disease,' मारी, मारः -रिः *f.*, महामारी, मरकः, मारकः, आतङ्कः, सन्निपातकः, उपसर्गः.

EPIDERMIS, *s.* वाह्यत्वक् *f.* (च्), वहिस्त्वक्, वाह्यचर्म्म *n.* (न्), अवभासिनी.

EPIGLOTTIS, *s.* उपजिह्वा, अलिजिह्वा, प्रतिजिह्वा, घण्टिका, शुण्डिका.

EPIGRAM, *s.* अबहुश्लोकपरिमाणं रसिककाव्यं, सरसं लघुकाव्यं.

EPIGRAMMATICAL, *a.* पूर्व्वोक्तलघुकवितायोग्यः -ग्या -ग्यं, रसिककवितासम्बन्धी -न्धिनी -न्धि (न्).—(Pointed) रसिकः -का -कं, रसवान् -वती -वत् (त्), सरसः -सा -सं.

EPIGRAMMATIST, *s.* पूर्व्वोक्तरसिककविताकर्त्ता *m.* (र्तृ), लघुकाव्यरचकः.

EPILEPSY, *s.* अपस्मारः, ग्रहामयः, भामरं, भूतविक्रिया, प्रतानः, मूर्च्छावायुः *m.*

EPILEPTIC, *a.* अपस्मारी -रिणी -रि (न्), भामरी -रिणी -रि (न्), वातग्रस्तः -स्ता -स्तं, वायुग्रस्तः -स्ता -स्तं, ग्रहामयपीडितः -ता -तं, आकृष्टः -ष्टा -ष्टं.

EPILOGUE, *s.* अन्तवाक्यं, शेषवाक्यं, अन्त्यवचनं, समापकवाक्यं, समापनवचनं.

EPINICION, *s.* जयगीतं, जयशब्दः.

EPIPHANY, *s.* ख्रीष्टप्रकाशनं, ख्रीष्टप्रकाशनमुद्दिश्य ख्रीष्टजन्मपर्व्वणः परं द्वादशदिने सेवितो महोत्सवः, ख्रीष्टप्रकाशनपर्व्व *n.* (न्).

EPISCOPACY, *s.* धर्म्माध्यक्षता -त्वं, धर्म्माध्यक्षाधिपत्यं, धर्म्माध्यक्षाधिकारः, धर्म्माध्यक्षकर्तृका ख्रीष्टीयसमाजनीतिः *f.*

EPISCOPAL, EPISCOPALIAN, *a.* धर्म्माध्यक्षसम्बन्धी -न्धिनी -न्धि (न्), धर्म्माध्यक्षशासितः -ता -तं, धर्म्माध्यक्षपालितः -ता -तं.

EPISCOPATE, *s.* धर्म्माध्यक्षाधिकारः, धर्म्माध्यक्षाधिपत्यं, धर्म्माध्यक्षपदं.

EPISODE, *s.* उपाख्यानं, उपकथा, प्रसङ्गवाक्यं, प्रासङ्गिकवाक्यं, पताका, मूलविषयवहिर्गता कथा.

EPISODIC, EPISODICAL, *a.* प्रासङ्गिकः -की -कं, मूलविषयानन्वितः -ता -तं, प्रस्तुतविषयवहिर्गतः -ता -तं, अनन्वितः -ता -तं, अप्रस्तुतः -ता -तं.

EPISPASTIC, *a.* त्वकस्फोटोत्पादकः -का -कं, स्फोटकारी -रिणी -रि (न्).

EPISTLE, *s.* पत्रं, लेखः, लेख्यं, पत्रिका, पत्री, संवादपत्रं, सन्देशपत्रं, लिपिः *f.*

EPISTOLARY, *a.* पत्री -त्रिणी -त्रि (न्), पत्रीयः -या -यं, लेख्यकः -का -कं.

EPITAPH, *s.* चैत्यस्य उपरिलिखितं मृतजनमुद्दिश्य स्तुतिवाक्यं, चैत्योपरि लिखिता तत्रैव निखातजनमुद्दिश्य गुणस्तुतिः, चैत्यलिपिः *f.*, चैत्योपरिस्था लिपिः

EPITHALAMIUM, *s.* वैवाहिकगीतं, औद्वाहिकगीतं, विवाहसमये माङ्गलिकगीतं.

EPITHEM, *s.* उत्कारिका, उपदेहः, उपनाहः, प्रलेपः, लेपः

EPITHET, *s.* विशेषणं -षकः -कं, संज्ञाविषयः, अधुद्धिः *f.*, उपाधिः *m.*, गुणागुणवाचकः शब्दः

EPITOME, *s.* संक्षेपः -पणं, सङ्ग्रहः, सारसङ्ग्रहः, सारः, संहिता, प्रत्याहारः, समाहारः, समाहृतिः *f.*, समसनं.

To EPITOMIZE, *v. a.* संक्षिप् (c. 6. -क्षिपति -क्षेप्तुं), संहृ (c. 1. -हरति -हर्त्तुं), उपसंहृ.

EPITOMIZED, *p. p.* संक्षिप्तः -प्ता -प्तं, सांक्षेपिकः -की -कं, समस्तः -स्ता -स्तं, सामासिकः -की -कं, संहृतः -ता -तं, उपसंहृतः -ता -तं, चुम्बकः -का -कं.

EPITOMIZER, EPITOMIST, *s.* संक्षेप्ता *m.* (प्तृ), सङ्ग्रहकर्त्ता *m.* (र्तृ), सारलेखकः.

EPOCH, EPOCHA, *s.* (A fixed era from which computation of years begin) ध्रुवः, शाकः, शकः, संवत् indec. The era of Sálivâhana is called शाकः, that of Vikramáditya, संवत्.—(Any period or fixed time) कालः, कालावधिः *m.*, अवधिः *m.* निर्णीतकालः

EPODE, *s.* उपगीतं, उपगानं, अधिगीतं, अपरगीतं, गीतानुबन्धः.

EPOPEE, *s.* महाकाव्यं, वीरचरित्रविषयं काव्यं.

EPULATION, *s.* उत्सवकरणं, उत्सवः, मिष्टान्नभोजनं.

EQUABLE, *a.* समानः -ना -नं, निर्व्विकारः -रा -रं.—(In motion) समानगतिः -तिः -ति.—(In temper) समभावः -वी -वं, समवृत्तिः -त्तिः -त्ति, समचित्तः -त्ता -त्तं.

EQUAL, *a.* समः -मा -मं, समानः -ना -नं, तुल्यः -ल्या -ल्यं, समीयः -या -यं, सदृशः -शी -शं, ईदृशः -शी -शं.—(Not inferior) अनवरः -रा -रं, अनवमः -मा -मं.—(Even, uniform) समानः -ना -नं, समस्थः -स्था -स्थं, निर्व्विकारः -रा -रं, अन्तरः -रा -रं: 'of equal extent or size,' सम्मितः -ता -तं, सममात्रः -त्रा -त्रं, तुल्यपरिमाणः -णा -णं; 'equal to all,' सर्व्वसमः -मा -मं; 'of equal strength,' तुल्यबलः -ला -लं; 'equal in glory,' समानतेजाः -जाः -जः (स्); 'this is equal to a sixteenth part of that,' एतत् तस्य षोडशांशेन समं.

EQUAL, *s.* (Of the same age) समानवयस्कः, समवयस्कः, सवयाः *m.* (स्), तुल्यवयाः *m.* (स्), समानजन्मा *m.* (न्), वयस्यः.—(Of the same rank) समानपदस्थः, तुल्यपदस्थः.

To EQUAL, *v. a.* समीकृ, समानीकृ, तुल्यीकृ, समान (nom. समानयति -यितुं), समानं -नां -नं कृ, तुल्यं -ल्यां -ल्यं कृ.

EQUALITY, *s.* समता, साम्यं, समानता, तुल्यता -त्वं, सामान्यं, साम्यता, प्रतियोगिता.—(In rank) समानपदं, तुल्यपदं.—(In tribe) सवर्णता.

EQUALIZATION, *s.* समीकरणं, समानीकरणं, तुल्यत्वं, समानता.

To EQUALIZE, *v. a.* समीकृ, समानीकृ, तुल् (c. 10. तुलयति -यितुं). *See To* EQUAL.

EQUALIZED, *p. p.* समीकृतः -ता -तं, समानीकृतः -ता -तं, तुलितः -ता -तं.

EQUALLY, *adv.* समं, समानं, समानतस्, तुल्यवत्, साम्यतस्, सामान्येन.

EQUANIMITY, *s.* समचित्तत्वं, समबुद्धिता, समभावः, समानवृत्तिः *f.*, सर्व्वसमता, सत्त्वसम्पन्नता, सत्त्वं, सम्पदापदोर् हर्षविषादराहित्यं.

EQUANIMOUS, *a.* समचित्तः -त्ता -त्तं, समबुद्धिः -द्धिः -द्धि, समभावः -वी -वं, समवृत्तिः -त्तिः -त्ति, सत्त्वसम्पन्नः -न्ना -न्नं, सत्यसम्पन्नः -न्ना -न्नं, सम्पदापदोर् हर्षविषादरहितः -ता -तं, निर्व्विकारः -रा -रं.

EQUATION, *s.* (In algebra) समीक्रिया, समीकरणं, साम्यं, फलं; 'of unknown quantity,' अव्यक्तसाम्यं; 'unlimited equation,' एकवर्णसमीकरणं.

EQUATOR, *s.* निरक्षः, भूचक्रं, भूपरिधिः *m.*, भूगोलरेखा; 'equatorial region,' निरक्षदेशः; 'celestial equator,' नाडिमण्डलं, नाडीमण्डलं. *See* EQUINOCTIAL LINE.

EQUATORIAL, *a.* निरक्षसम्बन्धी -न्धिनी -न्धि (न्), भूचक्रसम्बन्धी, &c.

EQUERY, EQUERRY, *s.* राजाश्वपालः, राजाश्वशालारक्षणे नियुक्तो जनः.—(Stable for horses) अश्वशाला, वाजिशाला.

EQUESTRIAN, *a.* आश्वः -श्वी -श्वं, आश्विकः -की -कं, अश्वीयः -या -यं, तुरगी -गिणी -गि (न्); 'person on horseback,' अश्वारूढः, अश्वारोही *m.* (न्).

EQUIANGULAR, *a.* समकोणः -णा -णं, समानास्रः -स्रा -स्रं, तुल्यकोणः -णा -णं.

EQUIDISTANT, *a.* समान्तरः -रा -रं, तुल्यान्तरः -रा -रं, समान्तरस्थः -स्था -स्थं.

Equilateral, *a.* समभुजः -जा -जं, समानबाहुः -हुः -हु, समपार्श्वः -र्श्वा -र्श्वं ; 'an equilateral triangle,' समत्रिभुजः.

Equilibrium, *s.* तुल्यता, भारतुल्यता, समतोलत्वं, तुल्यबलत्वं, परिमाणतुल्यता, समता, साम्यं.

Equinoctial, *a.* विषुवीयः -या -यं, विषुवसम्बन्धी -न्धिनी -न्धि (न्) ; 'equinoctial line,' विषुवच्चक्रं, विषुवमण्डलं, विषुवद्वृत्तं, विषुवरेखा, भूचक्रं, भूपरिधिः *m.*, नाडीमण्डलं ; 'equinoctial point,' अयनं.

Equinox, *s.* विषुवं, विषुवत् *n.*, विष्वक् *n.*, विषुपं ; 'the vernal equinox,' महाविषुवं, हरिपदं ; 'autumnal,' विषुपदं ; 'day of the equinox,' विषुवद्दिनं.

Equinumerant, *a.* समसंख्यः -ख्या -ख्यं, समानसंख्यः -ख्या -ख्यं.

To equip, *v. a.* सज्जीकृ, सज्ज् (c. 1. सज्जति -ज्जितुं), ससज्जं -ज्जां -ज्जं कृ, सर्व्वोपकरणैः or सोपकारद्रव्यैः समायुज् in caus. (-योजयति -यितुं) or युज्, सर्व्वसोपकारद्रव्याणि उपकॢप् (c. 10. -कल्पयति -यितुं) or सम्प्रकॢप् or उपस्था in caus. (-स्थापयति -यितुं), or उपपद् in caus. (-पादयति -यितुं) or सम्भृ (c. 1. -भरति -भर्त्तुं) or उपस्कृ or पुरस्कृ or सिद्धीकृ or प्रस्तुतीकृ, द्रव्यसम्भारं कृ, उपकरणसम्भारं कृ.—(With arms) अस्त्रैः or शस्त्रैः सज्जीकृ, सन्नह् (c. 4. -नह्यति -नद्धुं), संवर्म्म् (nom. -वर्म्मयति -यितुं).—(Fit out a ship) नावं समुद्रयानार्थं or युद्धार्थं सज्जीकृ.—(With clothes) वस्त्रैर् वेष्ट् (c. 1. वेष्टते -ष्टितुं) or भूष् (c. 10. भूषयति -यितुं) or अलङ्कृ.

Equipage, *s.* (Implements, materials) उपकरणं, साधनं, सामग्र्यं -ग्री, सम्भारः, उपस्करः.—(Paraphernalia) सज्जा, परिच्छदः, सन्नाहः, सत्क्रिया.—(Of war) युद्धसज्जा, युद्धोपकरणं, वाहिनी.—(Retinue) परिवर्हः, वर्हः, तन्त्रं.—(Vehicle) वाहनं, विमानं.

Equipment, *s.* (Act of equipping) सज्जीकरणं, सज्जनं -ना, सज्जकर्म्म *n.* (न्), सज्जा, साधनं, सम्भारः, सम्भृतिः *f.*, आयोजनं, उपाकर्म्म *n.* (न्), पुरस्कारः, पुरस्करणं. *See* Equipage.

Equipoise, *s.* तुल्यता, भारतुल्यता, तुल्यभारत्वं, समतोलत्वं, तुल्यबलत्वं, समता, साम्यं, तुल्यपरिमाणं, परिमाणतुल्यता.

To equipoise, *v. a.* समीकृ, तुल्यीकृ, तुल्यबलीकृ, समतोलीकृ.

Equipoised, *p. p.* तुलितः -ता -तं, समीकृतः -ता -तं, समतोलः -ला -लं.

Equipollence, *s.* तुल्यबलत्वं, बलसमता, तुल्यशक्तित्वं, शक्तिसाम्यं.

Equipollent, *a.* तुल्यबलः -ला -लं, तुल्यशक्तिः -क्तिः -क्ति, तुल्यौजाः -जाः -जः (स्).

Equiponderance, *s.* तुल्यता, भारतुल्यता, समतोलत्वं, तुल्यबलत्वं.

Equiponderant, *a.* समतोलः -ला -लं, तुल्यबलः -ला -लं, तुल्यपरिमाणः -णा -णं.

Equipped, *p. p.* सज्जीकृतः -ता -तं, सज्जितः -ता -तं, सज्जः -ज्जा -ज्जं, सोपकारद्रव्ययुक्तः -क्ता -क्तं, संयुक्तः -क्ता -क्तं, समायुक्तः -क्ता -क्तं, समन्वितः -ता -तं, सोपकारः -री -रं, सन्नद्धः -द्धा -द्धं, पिनद्धः -द्धा -द्धं, संहितः -ता -तं.

Equitable, *a.* समदर्शी -र्शिनी -र्शि (न्), धर्म्मकारी -रिणी -रि (न्), न्यायकारी &c., न्यायी -यिनी -यि (न्), धार्म्मिकः -की -कं, न्यायवर्त्ती -र्त्तिनी -र्त्ति (न्), यथान्यायः -या -यं, अपक्षपाती -तिनी -ति (न्), विपक्षपातः -ता -तं, पक्षपातरहितः -ता -तं, सर्व्वसमः -मा -मं, उभयसाधारणः -णा -णी -णं, निरपेक्षी -क्षिणी -क्षि (न्).

Equitableness, *s.* साम्यं, समता, सर्व्वसमता, अपक्षपातः, न्यायता.

Equitably, *adv.* न्यायतस्, यथान्यायं, न्यायवत्, पक्षपातं विना, साम्येन.

Equity, *s.* न्यायः, धर्म्मः, न्यायता, अपक्षपातः, साम्यं, समता, उभयसामान्यं, सर्व्वसमता, युक्तिः *f.*, याथार्थ्यं, विचारः.—(Qualification of the severity of law) दण्डनैष्ठुर्य्यशमनं, धर्म्मनैष्ठुर्य्यशमनं ; 'court of equity,' दण्डनैष्ठुर्य्यशमनका महाविचारणसभा.

Equivalent, *a.* सममूल्यः -ल्या -ल्यं, तुल्यमूल्यः -ल्या -ल्यं, समानमूल्यः -ल्या -ल्यं, तुल्यबलः -ला -लं, तुल्यार्थः -र्था -र्थं, समार्थः -र्था -र्थं, समानबलः -ला -लं, समशक्तिः -क्तिः -क्ति, तुल्यशक्तिः -क्तिः -क्ति, तुल्यः -ल्या -ल्यं, समः -मा -मं, समानः -ना -नं.

Equivalent, *s.* समानमूल्यकं द्रव्यं, तुल्यद्रव्यं, तुल्यवस्तु *n.*, प्रतिक्रिया, प्रतीकारः, प्रतिकृतिः *f.*, प्रत्युपकारः, निस्तारः, प्रतिफलं, परिवर्त्तः, तुल्यत्वं, साम्यं, समानत्वं.

Equivocal, *a.* सन्दिग्धार्थः -र्था -र्थं, अस्पष्टार्थः -र्था -र्थं, द्व्यर्थः -र्था -र्थं, वक्रः -क्रा -क्रं, वक्रार्थः -र्था -र्थं, अस्पष्टः -ष्टा -ष्टं, विकल्पार्थकः -का -कं.

Equivocally, *adv.* सन्दिग्धार्थतस्, द्व्यर्थतस्, वक्रोक्त्या, अस्पष्टं, अव्यक्तं.

Equivocalness, *s.* सन्दिग्धार्थः, द्व्यर्थः, अर्थसन्देहः, अर्थसन्दिग्धता, अर्थवक्रिमा *m.* (न्), अस्पष्टता, सन्दिग्धता, वक्रता.

To equivocate, *v. n.* वक्रं or सवक्रार्थं or अर्थवक्रतया or द्व्यर्थतो वद् (c. 1. वदति -दितुं), वक्रोक्तिं कृ, अस्पष्टं वद्.

Equivocating, *a.* वक्रोक्तिमान् -मती -मत् (त्), वाक्छलान्वितः -ता -तं.

Equivocation, *s.* वक्रोक्तिः *f.*, वक्रवाक्यं, वक्रभणितं, वक्रवचनं, वाक्यवक्रता, वाक्छलं, वक्रता, वक्रिमा *m.* (न्), अर्थवैकल्यं, अपदेशः, व्यपदेशः.

Equivocator, *s.* द्व्यर्थवक्ता *m.* (क्तृ), द्व्यर्थवादी *m.* (न्), वक्रवाक्यवादी *m.*

Equivoque, *s.* वक्रोक्तिः *f.*, कूटोक्तिः *f.*, कैतववादः, लालिका, अर्थापत्तिः *f.*

Era, *s.* कालः, युगः, शाकः, शकः, संवत indec. The era of Śálivâhana is called शाकः, that of Vikramáditya, संवत्.

To eradiate, *v. a.* स्फुर् (c. 6. स्फुरति -रितुं), रश्मीन् or किरणान् पत् in caus. (पातयति -यितुं) or मुच् (c. 6. मुञ्चति, मोक्तुं) or निक्षिप् (c. 6. -क्षिपति -क्षेप्तुं).

Eradicable, *a.* उन्मूल्यः -ल्या -ल्यं, उन्मूलनीयः -या -यं, उत्पाटनीयः -या -यं, मूल्यः -ल्या -ल्यं.

To eradicate, *v. a.* उन्मूल् (c. 10. -मूलयति -यितुं), समुन्मूल्, उत्पट् (c. 10. -पाटयति -यितुं), मूलात् or आमूलं or समूलम् उद्धृ (c. 1. -हरति -हर्त्तुं) or समुद्धृ or उच्छिद् (c. 7. -छिनत्ति -छेत्तुं) or उत्खन् (c. 1. -खनति -नितुं), व्यपरुह् in caus. (-रोपयति -यितुं), उद्वृह् (c. 6. -वृहति -वर्हितुं).

Eradicated, *p. p.* उन्मूलितः -ता -तं, उत्पाटितः -ता -तं, उच्छिन्नः -न्ना -न्नं, उद्धृतः -ता -तं, उत्खातः -ता -तं, व्यपरोपितः -ता -तं, आवर्हितः -ता -तं, उद्वर्हितः -ता -तं.

Eradication, *s.* उत्पाटनं, उच्छेदः, उद्धरणं, उन्मूलनं, समूलोत्पाटनं, समूलोद्धरणं, मूलादुद्धरणं, व्यपरोपणं, समूलघातं, निष्कोषणं, विनाशः.

Eradicative, *a.* उच्छेदी -दिनी -दि (न्), उत्पाटनकारी -रिणी -रि (न्).

Eradicator, *s.* उद्धर्त्ता *m.* (र्त्तृ), उन्मूलयिता *m.* (तृ), उच्छेदी *m.* (न्).

To erase, *v. a.* (Rub out) व्यामृज् (c. 2. -मार्ष्टि -र्ष्टुं), अपमृज्, उन्मृज्, व्यामृश् (c. 6. -मृशति -म्रष्टुं), लुप् (c. 6. लुम्पति, लोप्तुं), विलुप् (c. 10. -लोपयति -यितुं), लोपं कृ.—(Destroy) उच्छिद् (c. 7. -छिनत्ति -छेत्तुं), उद्धृ (c. 1. -हरति -हर्त्तुं), विनश् in caus. (-नाशयति -यितुं).

Erased, *p. p.* व्यामृष्टः -ष्टा -ष्टं, लुप्तः -प्ता -प्तं, उच्छिन्नः -न्ना -न्नं.

Erastian, *s.* ख्रीष्टीयसमाजो राज्यरीतिसबद्धो भवति or राज्यरीत्यधीनो भवति इति मन्यते यो जनः.

Erasure, *s.* आमर्षः, लोपः, विलोपनं, उच्छेदः, विनाशः.

Ere, *adv.* or *prep.* प्राक्, पूर्व्वं, पुरा, अग्रे ; 'ere he could come,' तस्य आगमनात् पूर्व्वं or पुरा ; 'ere the time appointed,' प्राग् विहितकालात् ; 'ere twelve years are over,' प्राग् द्वादशसमाः ; or, expressed by loc. absolute ; as, 'ere my child die,' मम पुत्रे न मृते सति.

Erelong, *adv.* अचिरेण, अचिरात्, न चिरेण, न चिरात्, पुरा.

Erenow, *adv.* अधुना पूर्व्वं, अद्य पूर्व्वं, प्राग् इहसमयात्.

To erect, *v. a.* (Set up) स्था in caus. (स्थापयति -यितुं), प्रतिष्ठा, अवस्था, संस्था, अधिष्ठा, अधिरुह् in caus. -रोपयति -यितुं), निरुह्, रुह्.—(Raise, elevate) उत्था (rt. स्था with उत्), उन्नम् in caus. (-नमयति -यितुं), उच्छ्रि (c. 1. -छ्रयति -यितुं, rt. श्रि), समुच्छ्रि, प्रोच्छ्रि; उत्क्षिप् (c. 6. -क्षिपति -क्षेप्तुं), उद्यम् (c. 1. -यच्छति -यन्तुं), उद्धृ (c. 1. -हरति -हर्त्तुं), उन्नी (c. 1. -नयति -नेतुं), उद्बृह् (c. 6. -वृहति -वर्हितुं), उच्चीकृ, ऊर्द्ध्वीकृ, उच्चैः कृ; 'to erect the hair,' पुलक (nom. पुलकयति -यितुं).

Erect, *a.* उन्नतः -ता -तं, समुन्नतः -ता -तं, अनतः -ता -तं, ऋजुः -जुः -जु, उन्नस्थितः -ता -तं, उत्तानः -ना -नं, अजिह्मः -ह्मा -ह्मं, उच्चः -च्चा -च्चं, उच्छ्रितः -ता -तं.—(Having the head or countenance erect) उन्नतशिराः -राः -रः (स्), प्रकटशीर्षः -र्षा -र्षं, ऊर्द्ध्वमुखः -खी -खं, उत्पक्ष्मलः -ला -लं; 'having the hair erect,' पुलकितः -ता -तं, रोमाञ्चितः -ता -तं.

Erected, *p. p.* प्रतिष्ठापितः -ता -तं, प्रतिष्ठितः -ता -तं, अधिष्ठितः -ता -तं, उत्थापितः -ता -तं, उच्छ्रितः -ता -तं, उन्नमितः -ता -तं, उन्नतः -ता -तं, उद्धृतः -ता -तं, उद्यतः -ता -तं, उद्बर्हितः -ता -तं, उच्चीकृतः -ता -तं, उद्गूर्णः -र्णा -र्णं, उद्वृत्तः -त्ता -त्तं, उन्नस्थितः -ता -तं.

Erection, *s.* (Establishing) प्रतिष्ठापनं, संस्थापनं, अवस्थापनं.—(Raising) उत्थापनं, उच्छ्रयः, उच्छ्रायः, उच्छ्रितिः *f.*, समुच्छ्रयः, उन्नतिः *f.* उन्नमनं, उन्नयः -यनं, उन्नामः, उन्नायः, उत्क्षेपः, उद्यमः, उद्वर्त्तनं; 'of the hair of the body,' पुलकः, पुलकोद्गमः, उद्धर्षणं, रोमहर्षणं, रोमाञ्चः -ञ्चनं, रोमोद्गमः, रोमोद्भेदः, उद्धूषणं.

Erectness, *s.* अनतता, उन्नतता, उत्तानत्वं, उच्चता, ऋजुता.

Eremite, *s.* अरण्यवासी *m.* (न्), वनवासी *m.*, वनस्थायी *m.* (न्), वानप्रस्थः

Ermine, *s.* नकुलजातीयो हिमवद्देशजः शुक्ललोमा क्षुद्रजन्तुः.

Erotic, *a.* कामी -मिनी -मि (न्), शृङ्गारी -रिणी -रि (न्), कामविषयः -या -यं.

To err, *v. n.* भ्रम् (c. 4. भ्राम्यति, भ्रमितुं), विभ्रम्, परिभ्रम्, भ्रान्तिं कृ, अपराध् (c. 4. -राध्यति, c. 5. -राध्नोति -राद्धुं), अपराधं कृ, दोषं कृ, प्रमद् (c. 4. -माद्यति -मदितुं), सत्पथात् or यथोचिताद् भ्रंश् (c. 4. भ्रश्यति, भ्रंशितुं) or च्यु (c. 1. च्यवते, च्योतुं) or विच्यु or विचल् (c. 1. -चलति -लितुं), उत्क्रम् (c. 1. -क्रामति -क्रमितुं), व्युत्क्रम्, व्यभिचर् (c. 1. -चरति -रितुं); उत्पथेन or उन्मार्गेण गम् (c. 1. गच्छति, गन्तुं), मुह् (c. 4. मुह्यति, मोहितुं), प्रमादं कृ.

Errand, *s.* सन्देशः, सन्दिष्टं, शासनं, शास्तिः *f.*, आदेशः, आज्ञा, निर्देशः, समाचारः, वाचिकं, दूत्यं, दौत्यं, कार्य्यं, कृत्यं, कर्त्तव्यं; 'sending on an errand,' प्रतिशासनं.

Errant, *a.* भ्रमी -मिणी -मि (न्), परिभ्रमी &c., पर्य्यटनकारी -रिणी -रि (न्), इतस्ततो भ्रमणकारी &c., अवनिचरः -रा -रं.

Errantry, *s.* भ्रमणं, परिभ्रमणं, अटनं, पर्य्यटनं, चक्राटनं.

Errata-list, *s.* शुद्धिपत्रं, शोधनपत्रं, अशुद्धशोधनपत्रं.

Erratic, *a.* परिभ्रमी -मिणी -मि (न्), भ्रमणशीलः -ला -लं, चरः -रा -रं, चलनः -ना -नं, जङ्गमः -मा -मं, अस्थिरः -रा -रं, चञ्चलः -ला -लं. *See* Errant.

Erratum, *s.* अशुद्धं, अशुद्धिः *f.* अशोधनं.

Errhine, *a.* नस्यः -स्या -स्यं, क्षुत्करः -री -रं, छिक्कः -का -कं.

Erroneous, *a.* भ्रान्तिमान् -मती -मत् (त्), अशुद्धः -द्धा -द्धं, अयथार्थः -र्था -र्थं, अतथ्यः -थ्या -थ्यं, वितथः -था -थं, अनृतः -ता -तं, असत्यः -त्या -त्यं, भ्रमजनकः -का -कं, भ्रमात्मकः -का -कं, भ्रमोत्पादकः -का -कं, प्रमादी -दिनी -दि (न्), प्रमादवान् -वती -वत् (त्). Often expressed by मिथ्या or मृषा prefixed; as, 'an erroneous opinion,' मिथ्यामतिः *f.*; 'an erroneous statement,' मिथ्यावादः, मृषावादः; 'erroneous conclusion,' अपसिद्धान्तः

Erroneously, *adv.* मिथ्या, मृषा, अन्यथा, अयथार्थं, अयथावत्, वृथा, अतथ्यं, वितथं, अनृतं, असत्यं, प्रमादेन, सप्रमादं.

Erroneousness, *s.* अयाथार्थ्यं, असत्यता, अयथार्थता, अतथ्यता, वितथत्वं, भ्रान्तिमत्त्वं, प्रमादवत्त्वं.

Error, *s.* (Mistake) भ्रमः, भ्रान्तिः *f.*, मतिभ्रमः, मतिभ्रान्तिः *f.*, विभ्रमः, मतिविभ्रमः, प्रमादः, मिथ्यामतिः *f.*, परिभ्रमः, भ्रामः, प्रपञ्चः, मोहः, व्यामोहः, विवर्त्तः, विचिकित्सा.—(Irregular course, deviation) उन्मार्गः, उन्मार्गगमनं, विमार्गगमनं, उत्पथः, सत्पथभ्रंशः, यथोचिताद्भ्रंशः, उत्क्रमः, व्यतिक्रमः, व्यभिचारः, भ्रेषः.—(Fault, sin) दोषः, अपराधः, पापं; 'in error,' अपराधी -धिनी -धि (न्), अपराद्धः -द्धा -द्धं; 'I am not in error,' नाहम् अपराद्धः.

Erst, *adv.* पुरा, पूर्व्वं, पूर्व्वतस्, पूर्व्वकाले, प्राक्, प्राक्काले.

Erubescence, *s.* अरुणीभावः, अरुणिमा *m.* (न्), मुखारुणिमा *m.*, कपोलरागः.

Erubescent, *a.* ईषद्रक्तवदनः -नी -नं, ईषदरुणितकपोलः -ला -लं.

To eruct, *v. a.* उद्गॄ (c. 6. -गिरति -गरितुं -रीतुं), उद्वम् (c. 1. -वमति -मितुं).

Eructation, *s.* उद्गारः, उद्गिरणं, उद्वमः -मनं, उत्क्षेपः -पणं, उद्गमः, उद्गारः; 'sour eructation,' अम्लोद्गारः.

Erudite, *a.* पण्डितः -ता -तं, विद्यावान् -वती -वत् (त्), ज्ञानवान् &c., कृतधीः -धीः -धि, व्युत्पन्नः -न्ना -न्नं, विपश्चित् *m. f. n.*, शिक्षितः -ता -तं.

Erudition, *s.* पाण्डित्यं, विद्या, ज्ञानं, व्युत्पत्तिः *f.*, शिक्षा, वैदुष्यं.

Eruginous, *a.* ताम्रमलसमभावः -वी -वं, ताम्रकलङ्करूपः -पी -पं.

Eruption, *s.* (Bursting forth, emission) उद्भेदः, प्रोद्भेदः, उद्गारः, उद्गिरणं, उत्सर्गः, उत्क्षेपः, उद्गमः, स्फोटनं, निःसरणं, निर्गमः.—(On the skin) दद्रुः *m.*, खर्जूः *f.*, स्फोटोत्पत्तिः *f.*, विस्फोटः, वरटी, वरण्डकः.

Eruptive, *a.* उद्भेदी -दिनी -दि (न्), स्फोटविशिष्टः -ष्टा -ष्टं.

Erysipelas, *s.* उदर्दः, विसर्पः, दद्रुः *m.*, दद्रूः *m.*

Escalade, *s.* लङ्घनं, दुर्गलङ्घनं, अवस्कन्दः -न्दनं, उल्लङ्घनं.

To escape, *v. n.* and *a.* पलाय् (c. 1. पलायते -यितुं, rt. इ), विपलाय्, प्रपलाय्, सम्पलाय्; निस्तॄ (c. 1. -तरति -रितुं -रीतुं), उत्तॄ; अपक्रम् (c. 1. -क्रामति -क्रमितुं), निर्गम् (c. 1. -गच्छति -गन्तुं), प्रद्रु (c. 1. -द्रवति -द्रोतुं), विद्रु, विप्रद्रु; प्रधाव् (c. 1. -धावति -वितुं), अपधाव्, उत्पत् (c. 1. -पतति -तितुं), निष्पत्, अपसृप् (c. 1. -सर्पति -सर्प्तुं), क्षेमं or त्राणं or रक्षां लभ् (c. 1. लभते, लब्धुं) or प्राप् (c. 5. -आप्नोति -आप्तुं).—(Avoid) परिहृ (c. 1. -हरति -हर्त्तुं), प्रोज्झ् (c. 6. -उज्झति -ज्झितुं), त्यज् (c. 1. त्यजति, त्यक्तुं), परित्यज्; 'escaping,' निस्तीर्य्य, पलायित्वा, पलायमानः -ना -नं; 'one who has escaped danger,' भयमुक्तः -क्ता -क्तं, भयविमुक्तः -क्ता -क्तं, भयत्रातः -ता -तं, क्षेमप्राप्तः -प्ता -प्तं; 'he escapes blame,' दोषेण विमुच्यते.

Escape, *s.* निस्तारः, निस्तरणं, उत्तरणं, निर्गमः, निर्गतिः *f.*, पलायनं, प्रपलायनं, विपलायनं, अपक्रमः, अपयानं, प्रद्रावः, विद्रवः, उद्द्रावः, अत्ययः, अपायः, क्षेमप्राप्तिः *f.*, त्राणं, मोक्षः, मुक्तिः *f.*, भ्रेषः; 'from punishment,' दण्डभङ्गः, दण्डमोक्षः; 'desire of escaping with life,' प्राणपरीप्सा.

Escaped, *p. p.* निस्तीर्णः -र्णा -र्णं, उत्तीर्णः -र्णा -र्णं, पलायितः -ता -तं, निर्गतः -ता -तं, द्रुतः -ता -तं, परिभ्रष्टः -ष्टा -ष्टं, प्रभ्रष्टः -ष्टा -ष्टं.

Eschalot, *s.* लशुनजातीयः क्षुद्रकन्दः, तीक्ष्णकन्दभेदः.

Escharotic, *a.* मांसदाहकः -का -कं, मांसविलयनकृत्.

Escharotic, *s.* विलयनं, अवसादनं, मांसदाहकः प्रलेपः.

Escheat, *s.* उत्तराधिकारिणो अभावाद् भूस्वामिहस्तगतं भूमिक्षेत्रादि or भूस्वामिना प्राप्तं क्षेत्रादि.

To escheat, *v. n.* उत्तराधिकारिणाम् अभावाद् भूस्वामिन आधिकारण्ये परावृत् (c. 1. -वर्त्तते -र्त्तितुं) or भूस्वामिहस्तं गम् (c. 1. गच्छति, गन्तुं) or भूस्वामिना पुनः प्राप् in pass. (प्राप्यते).

To eschew, *v. a.* वृज् (c. 10. वर्जयति -यितुं), हा (c 3. जहाति, हातुं), उत्सृज् (c. 6. -सृजति -स्रष्टुं), त्यज् (c. 1. त्यजति, त्यक्तुं), प्रोज्झ् (c. 6. -उज्झति -ज्झितुं).

Escort, *s.* (Body of men for protection) रक्षार्थं सैनिकगुल्मः or सैन्यदलं, रक्षकाः *m. pl.*, परिचराः *m. pl.*, अनुचराः *m. pl.*, परिवारः.—(Protection, safeguard) रक्षा -क्षणं, आश्रयः, शरणं.—(Attendance for defence) रक्षार्थम् अनुव्रजनं, अनुव्रज्या.

To escort, *v. a.* (Attend by way of defence) रक्षार्थम् अनुव्रज् (c. 1. -व्रजति -जितुं) or अनुया (c. 2. -याति -तुं), अध्वनि रक्ष् (c. 1. रक्षति -क्षितुं), सञ्चर् in caus. (-चारयति -यितुं).

Escorted, *p. p.* अनुयातः -ता -तं, अध्वनि रक्षितः -ता -तं, सञ्चारितः -ता -तं

Escritoir, *s.* लिपिसज्जाधारः, लेखसाधनाधारः.

Esculent, *a.* खाद्यः -द्या -द्यं, खादनीयः -या -यं, भक्षणीयः -या -यं.

Escutcheon, *s.* कुलचिह्नपत्रं, वंशमर्य्यादालक्षणपत्रं.

Esophagus, *s.* अन्नवाहिस्रोतः *n.* (स्), निगरणस्रोतः *n.* (स्).

Esoteric, *a.* गूढः -ढा -ढं, अलौकिकः -की -कं, अन्तर्भूतः -ता -तं.

Espalier, *s.* वातावरणार्थम् उद्यानपरितो रोपिता क्षुद्रवृक्षपंक्तिः *f.*, वृक्षजालं.

Especial, *a.* (Particular) विशेषकः -का -कं, सविशेषः -षा -षं, विशेष्यः -ष्या -ष्यं, विशेष in comp., as, 'especial duty,' विशेषधर्म्मः.—(Principal) उत्तमः -मा -मं, परमः -मा -मं, मुख्यः -ख्या -ख्यं, अधिकः -का -कं.

Especially, *adv.* विशेषतस्, सविशेषं, प्रधानतस्, मुख्यशस्, परमं.

Espied, *p. p.* दृष्टः -ष्टा -ष्टं, आलोकितः -ता -तं, आलक्षितः -ता -तं.

Espionage, *s.* पैशुन्यं, चारकर्म्म *n.* (न्), गूढावेक्षणं, चारचक्षुः *n.* (स्).

Esplanade, *s.* तृणास्तीर्णः समभूभागः, तृणविशिष्टः समस्थलीकृतः क्रीडाप्रदेशः.

Espousal, *s.* वाग्दानं, कन्याप्रदानं, वाग्निश्चयः, विवाहसम्बन्धः.—(Adoption) परिग्रहः, सङ्ग्रहः, ग्रहणं, अनुपालनं; 'of another's cause,' पक्षपातः.

To espouse, *v. a.* (Betroth) वाग्दानं कृ, विवाहप्रतिज्ञां कृ.—(Marry a wife) कन्यां विवह् (c. 1. -वहति -वोढुं) or उद्वह् or परिणी (c. 1. -णयति -णेतुं) or परिग्रह् (c. 9. -गृह्णाति -ग्रहीतुं).—(Take to one's self, adopt, maintain) स्वीकृ, आत्मसात्कृ, अङ्गीकृ, सङ्ग्रह्, परिग्रह्, संवृध् in caus. (-वर्धयति -यितुं), अनुपाल् (c. 10. -पालयति -यितुं); 'the cause of another,' परस्य सपक्षो भू or पक्षपातं कृ or पक्षपाती भू; 'of a follower,' भक्ताभिमानं कृ.

Espoused, *p. p.* वाग्दत्तः -त्ता -त्तं, प्रदत्तः -त्ता -त्तं, प्रत्तः -त्ता -त्तं, प्रतिज्ञाविवाहितः -ता -तं, विवाहितः -ता -तं, परिणीतः -ता -तं, उपोढः -ढा -ढं.

To espy, *v. a.* (See at a distance) दूराद् आलोक् (c. 1. -लोकते, c. 10. -लोकयति -यितुं) or अवलोक् or दृश् (c. 1. पश्यति, द्रष्टुं) or ईक्ष् (c. 1. ईक्षते -क्षितुं) or समीक्ष् or प्रेक्ष् or आलक्ष् (c. 10. -लक्षयति -यितुं), निरूप् (c. 10. -रूपयति -यितुं).

Esquire, *s.* (Armour-bearer) सान्नहनिकः.—(Gentleman) महाशयः, आर्य्यः. In cases where esquire is affixed to a name out of respect, श्री may be prefixed.

To essay, *v. a.* परीक्ष् (c. 1. -ईक्षते -क्षितुं), परीक्षां कृ, यत् (c. 1. यतते -तितुं), चेष्ट् (c. 1. चेष्टते -ष्टितुं), उद्यम् (c. 1. -यच्छति -यन्तुं), उपक्रम् (c. 1. -क्रमते -मितुं), व्यवसो (c. 4. -स्यति -सातुं), आरभ् (c. 1. -रभते -रब्धुं).

Essay, *s.* परीक्षा -क्षणं, उद्योगः, चेष्टा, उद्यमः, समुद्यमः, आरम्भः, प्रवृत्तिः *f.*, उपक्रमः.—(A composition on any thesis) अमुकपक्षविषयो लेख्यबन्धः or निबन्धः or लेख्यप्रसङ्गः, लेख्यं, लेख्यपत्रं.

Essayist, *s.* लेख्यनिबन्धा *m.* (न्धृ), निबन्धकृत् *m.*, लेखकः.

Essence, *s.* (Constituent substance or nature) सारः -रता, वस्तु *n.*, मूलवस्तु *n.*, भावः, पदार्थः, मूलं, अधिभूतं.—(Pith, extract) सारः, निष्कर्षः, निर्यासः, कषायः, निर्गलितार्थः, मज्जः, रसः.—(Perfume) वासः, आमोदः, सुगन्धिद्रव्यं, सौरभं.

Essential, *a.* (Constituent) वास्तवः -वी -वं, सारः -रा -रं, सारभूतः -ता -तं, सारवान् -वती -वत् (त्), स्वाभाविकः -की -कं; 'essential nature,' सारता.—(Important or necessary in the highest degree) आवश्यकः -की -कं, अत्यवश्यकः -का -कं, गुर्वर्थः -र्था -र्थं, बह्वर्थः -र्था -र्थं, अतिप्रयोजनार्हः -र्हा -र्हं.

Essential, *s.* (First principle) तत्त्वं.—(Constituent principle) वस्तु, मूलं, पदार्थः.—(Important point) परमार्थः, गुर्वर्थः, प्रधानार्थः.

Essentially, *adv.* सारतस्, वस्तुतस्, अर्थतस्, भावतस्, भावेन, तत्त्वतस्, पदार्थतस्; 'essentially necessary to be done,' अवश्यकार्य्यः -र्य्या -र्य्यं.

To establish, *v. a.* (Set up, settle) स्था in caus. (स्थापयति -यितुं), प्रतिष्ठा, अवस्था, संस्था, रुह् in caus. (रोपयति -यितुं), निरुह्; प्रतिनिधा (c. 3. -दधाति -धातुं).—(Ordain, enact) व्यवस्था in caus. विधा, प्रकॢप् (c. 10. -कल्पयति -यितुं), परिकॢप्, प्रतिपद् in caus. (-पादयति -यितुं), नियुज् (c. 7. युंक्ते -योक्तुं).—(Make firm, ratify) स्थिरीकृ, दृढीकृ, सुस्थिरं -रां -रं कृ, संस्तम्भ् (c. 5. -स्तभ्नोति -स्तम्भितुं, c. 10. -स्तम्भयति -यितुं); 'by fresh evidence,' प्रमाणीकृ, भू in caus. (भावयति -यितुं), विभू, उपपद् in caus. सत्याकृ.

Established, *p. p.* स्थापितः -ता -तं, प्रतिष्ठापितः -ता -तं, प्रतिष्ठितः -ता -तं, संस्थापितः -ता -तं, व्यवस्थितः -ता -तं, व्यवस्थापितः -ता -तं, स्थितः -ता -तं, स्थावरः -रा -रं, विहितः -ता -तं, प्रकल्पितः -ता -तं, प्रतिपादितः -ता -तं, निश्चितः -ता -तं, स्थिरीकृतः -ता -तं, उपन्यस्तः -स्ता -स्तं.—(Proved) प्रमाणीकृतः -ता -तं, निर्णीतः -ता -तं, सिद्धः -द्धा -द्धं, उपपन्नः -न्ना -न्नं; 'established custom,' कृतानुसारः.

Establishment, *s.* (Act of establishing) प्रतिष्ठापनं, संस्थापनं, अवस्थापनं, स्थापनं, व्यवस्थापनं, नियोजनं.—(Confirmation) स्थिरीकरणं, दृढीकरणं, संस्तम्भः, सत्यापनं, सत्याकृतिः *f.*—(System) स्थितिः *f.*, संस्थानं.

Estate, *s.* (Condition) अवस्था, स्थितिः *f.*, भावः, दशा, वृत्तिः *f.*—(Property, possession) रिक्थं, दायः, धनं, अधिकारः, भूमिः *f.*: 'paternal estate,' पैतृकभूमिः *f.*—(Rank) पदं, स्थानं, पदविः *f.*—(Degree, order) वर्गः, गणः.

To esteem, *v. a.* (Value) मन् (c. 4. मन्यते, मन्तुं, c. 10. मानयति -यितुं), सम्मन्, प्रतिमन्; पूज् (c. 10. पूजयति -यितुं), सम्पूज्, अभिपूज्, आदृ (c. 6. -द्रियते -दर्त्तुं); 'to esteem highly,' बहु मन्.—(Consider, think) मन्, भू in caus. (भावयति -यितुं), विभू, विगण् (c. 10. -गणयति -यितुं).

Esteem, *s.* (Opinion) मतं, मतिः *f.*—(Regard, respect) मानं, सम्मानं, आदरः, पूजा, मान्यत्वं; 'high esteem,' बहुमानं, बहुमतिः *f.*

Esteemed, *p. p.* मतः -ता -तं, सम्मानितः -ता -तं, आदृतः -ता -तं, पूजितः -ता -तं; esteemed highly,' बहुमतः -ता -तं.—(Considered) स्मृतः -ता -तं.

Estimable, *a.* मान्यः -न्या -न्यं, सम्मान्यः -न्या -न्यं, अर्घ्यः -र्घ्या -र्घ्यं, अर्घार्हः -र्हा -र्हं, आदरणीयः -या -यं, पूजनीयः -या -यं; 'highly

estimable,' परममान्यः -न्या -न्यं.—(To be reckoned) गणनीयः -या -यं, अनुमेयः -या -यं.

To ESTIMATE, *v. a.* विगण् (c. 10. -गणयति -यितुं), परिगण, प्रगण, गण; संख्या (c. 2. -ख्याति -तुं), परिसंख्या, कल् (c. 10. कलयति -यितुं), सङ्कल्, अर्घं or मूल्यं संख्या or निर्णी (c. 1. -णयति -णेतुं) or निरूप् (c. 10. -रूपयति -यितुं); विभू in caus. (-भावयति -यितुं); 'to estimate worth,' गुणं ग्रह् (c. 9. गृह्णाति, ग्रहीतुं); 'to estimate highly,' बहु मन् (c. 4. मन्यते, मन्तुं).

ESTIMATE, *s.* (Computation) विगणनं -ना, परिसंख्यानं, गणना.—(Valuation) मूल्यपरिसंख्या, मूल्यनिरूपणं, मूल्यविज्ञापनं, अर्घविज्ञप्तिः *f.*; 'rough estimate,' स्थूलमानं, आकारः.

ESTIMATED, *p. p.* विगणितः -ता -तं, विभावितः -ता -तं, निर्णीतमूल्यः -ल्या -ल्यं, निरूपितमूल्यः -ल्या -ल्यं, सङ्कलितः -ता -तं, परिसंख्यातः -ता -तं.

ESTIMATION, *s.* (Calculation) विगणना, गणना, संख्या, परिसंख्यानं.—(Esteem, regard) मानं, सम्मानं, आदरः; 'high estimation,' बहुमानं, बहुमतिः *f.*

ESTIMATOR, *s.* गणकः, विगणकः, गुणकारः, संख्याता *m.* (तृ), मूल्यनिरूपकः.

ESTIVAL, *a.* नैदाघः -घी -घं, ग्रीष्मकालसम्बन्धी -न्धिनी -न्धि (न्).

ESTRADE, *s.* समभूमिः *f.*, समानभूमिः, समस्थलं, समस्थानं.

To ESTRANGE, *v. a.* विरञ्ज् in caus. (-रञ्जयति -यितुं), वैरक्त्यं जन् (c. 10. जनयति -यितुं), विरक्तीकृ, स्नेहं निवृत् in caus. (-वर्त्तयति -यितुं) or भिद् (c. 7. भिनत्ति, भेत्तुं), स्नेहछेदं कृ, स्नेहविच्छेदं कृ, स्नेहभेदं कृ, द्वैधीकृ, द्वैधं जन्, विक्षिप् in caus. (-क्षेपयति -यितुं), दूरीकृ.

ESTRANGED, *p. p.* विरक्तः -क्ता -क्तं, जातविरागः -गा -गं, विकृतः -ता -तं, विकारितः -ता -तं, विकृतबुद्धिः -द्धिः -द्धि, निवृत्तस्नेहः -हा -हं, दूरीभूतः -ता -तं.

ESTRANGEMENT, *s.* विरक्तिः *f.*, वैरक्त्यं, विरागः, वैराग्यं, विकृतिः *f.*, विकारः, बुद्धिविकारः, स्नेहनिवृत्तिः *f.*, स्नेहविच्छेदः, स्नेहभेदः, स्नेहच्छेदः, वियोगः, विप्रयोगः, विश्लेषः, दूरीभावः, पृथग्भावः

ESTUARY, *s.* समुद्रशाखा, समुद्रवक्त्रः.—(Mouth of a river) सम्भेदः, सङ्गमः.

To ESTUATE, *v. n.* फेन (nom. फेनायते), उत्सेचनं कृ, वेला (nom. वेलायते).

ET-CÆTERA. Expressed by आदिः -दि in the *m.* or *n.* gender and in the *plur.* or *sing.* numb.; as, 'parrots, starlings, &c.,' शुकसारिकादयः; 'Indra, Kuvera, &c.,' इन्द्रकुवेरादयः; 'Of Agni, Pavana, &c.,' अग्निपवनादीनां; 'the nose, eyes, &c.' नासाचक्षुरादीनि; 'peace, war, &c.' सन्धिविग्रहादि; 'by liberality, &c.,' दानादिना; 'from liberality, &c.,' दानादेः (for दानादिनः). Sometimes इति is prefixed to आदि; as, 'the word chitralig, &c.,' चित्रलिगित्यादि. Sometimes आदिकः -का -कं, आद्यः -द्या -द्यं and प्रभृति are used for आदि; as, 'gifts, &c.,' दानादिकं; 'Indra, &c.,' इन्द्राद्याः, or इन्द्रप्रभृतयः *pl.*

To ETCH, *v. a.* लिख् (c. 6. लिखति, लेखितुं), आलिख्, चित्र् (c. 10. चित्रयति -यितुं).

ETCHING, *s.* चित्रलिखनं, चित्रं, आलेख्यं, वर्त्तिकारेखा.

ETERNAL, *a.* नित्यः -त्या -त्यं, अनन्तः -न्ता -न्तं -न्तकः -का -कं, सनातनः -नी -नं, शाश्वतः -ती -तं, अनादिः -दिः -दि, अनाद्यन्तः -न्ता -न्तं, अनाद्यः -द्या -द्यं, सदातनः -नी -नं अनन्तकालस्थायी -यिनी -यि (न्), सर्व्वकालीनः -ना -नं, नैत्यिकः -की -कं, अनन्त्यः -न्त्या -न्त्यं, ध्रुवः -वा -वं, सन्ततः -ता -तं, सततः -ता -तं, अभीक्ष्णः -क्ष्णा -क्ष्णं, निरपायः -या -यं, निरन्तरः -रा -रं, अविच्युतः -ता -तं, अविसर्गी -र्गिणी -र्गि (न्), अविरतः -ता -तं, अमरः -रा -रं.

ETERNALLY, *adv.* नित्यं, नित्यदा, नित्यशस्, शाश्वतं, शश्वत्, सततं, सन्ततं, अनन्तं, अनाद्यन्तं, सदा, अजस्रं, अनिशं, अभीक्ष्णं, निरन्तरं, अविरतं, अश्रान्तं, अनारतं, सर्व्वकालं.

ETERNITY, *s.* नित्यता, नैत्यं, अनन्तता -त्वं, आनन्त्यं, अनन्त्यं, अनन्तकालः, अनाद्यन्तता, ध्रुवता, ध्रौव्यं, अनन्तभावः, नैरन्तर्य्यं, अमरता.

To ETERNIZE, *v. a.* अनन्त (nom. अनन्तयति -यितुं), अनन्तीकृ, शाश्वतीकृ.

ETESIAN, *a.* सांवत्सरिकः -की -कं, प्रतिवार्षिकः -की -कं, सामयिकः -की -कं.

ETHER, *s.* आकाशः, खं, शून्यं, वायुः *m.*, निर्म्मलवायुः, अन्तरीक्षोपरिस्थः सूक्ष्मवायुः, नभः *n.* (स्), गगणं, विहायः *n.* (स्).

ETHERIAL, *a.* आकाशीयः -या -यं, आकाशजः -जा -जं, आकाशसम्भवः -वा -वं, आकाशस्थः -स्था -स्थं, खसम्भवः -वा -वं, वायवः -वी -वं, वैहायसः -सी -सं.

ETHIC, ETHICAL, *a.* वैनयिकः -की -कं, नीतिविषयः -या -यं, नीतिविद्याविषयकः -का -कं, नीतिशास्त्रसम्बन्धी -न्धिनी -न्धि (न्), नीतिशास्त्रीयः -या -यं.

ETHICALLY, *adv.* नीतिशास्त्रवत्, नीतिशास्त्रानुसारेण.

ETHICS, *s.* नीतिविद्या, नीतिः *f.*, नीतिशास्त्रं, विनयः, विनयविद्या, अर्थशास्त्रं, दण्डनीतिः *f.*, शीलविद्या, आन्वीक्षिकी.—(As invented by Vrihaspati) वार्हस्पत्यं.

ETHNIC, ETHNICAL, *a.* (Relating to the Gentiles) अन्यदेशीयः -या -यं, भिन्नदेशीयः -या -यं, देवार्च्चकसम्बन्धी -न्धिनी -न्धि (न्), देवपूजकसम्बन्धी &c.

ETHNOLOGY, *s.* नृकुलविद्या, नृजातिविद्या, नृवंशविद्या.

ETIQUETTE, *s.* सदाचारविधिः *m.*, सार्य्यव्यवहारविधिः, सुजनाचारविधिः, विनयविधिः, विनयरीतिः *f.*, आदरविधिः *m.*, सौजन्यं, मर्य्यादा, सुनीतिः *f.*, सभ्यता, सच्चरित्रं, न्यायः.

ETYMOLOGICAL, *a.* शब्दव्युत्पत्तिविषयः -या -यं, पदभञ्जनविषयः -या -यं, शब्दशास्त्रसम्बन्धी -न्धिनी -न्धि (न्), शब्दसाधनविद्यासम्बन्धी &c.

ETYMOLOGIST, *s.* शब्दव्युत्पत्तिकुशलः, पदभञ्जनविद्याज्ञः, शब्दशास्त्रज्ञः.

To ETYMOLOGIZE, *v. n.* शब्दव्युत्पत्तिं कृ, पदभञ्जनं कृ, शब्दसाधनं कृ.

ETYMOLOGY, *s.* व्युत्पत्तिः *f.*, शब्दव्युत्पत्तिः *f.*, शब्दव्युत्पत्तिविद्या, पदभञ्जनं, शब्दसाधनं, शब्दसाधनविद्या.

EUCHARIST, *s.* ख्रीष्टमृत्युस्मरणार्थकं भोजनं, ख्रीष्टभोजनं, ख्रीष्टप्रकल्पितभोजनं.—(Giving thanks to God) ईश्वरस्य धन्यवादकरणं or कुशलवादः.

EULOGIST, *s.* प्रशंसकः, गुणस्तावकः, स्तुतिपाठकः, वन्दी *m.* (न्).

EULOGISTIC, *a.* स्तुतिमयः -यी -यं, प्रशंसाकरः -री -रं, वन्दारुः -रुः -रु.

To EULOGIZE, *v. a.* प्रशंस् (c. 1. -शंसति -सितुं), स्तु (c. 2. स्तौति, स्तोतुं), अभिष्टु, संस्तु, श्लाघ् (c. 1. श्लाघते -घितुं), गुणान् कृत् (c. 10. कीर्त्तयति -यितुं) or उत्कृत्.

EULOGIZED, *p. p.* प्रशंसितः -ता -तं, प्रशस्तः -स्ता -स्तं, श्लाघितः -ता -तं, स्तुतः -ता -तं.

EULOGY, *s.* प्रशंसा -सनं, गुणप्रशंसा, स्तुतिः *f.*, गुणस्तुतिः *f.*, स्तवः, श्लाघा, गुणश्लाघा, स्तुतिवादः, स्तुतिवाक्यं, गुणोत्कीर्त्तनं, स्तोत्रं, शंसा, यशोवर्णना, वर्णना, वन्दना, वन्दिपाठः, गुणगानं, भोगावली.

EUNUCH, *s.* क्लीवः, षण्डः, षण्ढः, शण्डः, शण्ढः, मुष्कशून्यः, छिन्नवृषणः, छिन्नमुष्कः, निष्पुरुषः, नपुंसकः, पोगण्डः, पण्डः, तृतीयप्रकृतिः *m.*, तृतीयाप्रकृतिः, अफलः, विफलः, वर्षवरः, तूवरः.—(Guard of the women's apartments) स्थापत्यः, कञ्चुकी *m.* (न्), शुद्धान्तपालकः, शुद्धान्तजनः.

EUPHONIC, *a.* सुस्वरः -रा -रं, सुशब्दः -ब्दा -ब्दं, सुश्राव्यः -व्या -व्यं, श्रुतिसुखः -खा -खं, सुचारुस्वनः -ना -नं, अकर्कशः -शा -शं.

EUPHONY, *s.* सुस्वरः, सुशब्दः, सुस्वनः, सुश्राव्यशब्दः, अकटुत्वं, अकर्कशत्वं.

EUPHORBIA, *s.* बहुदुग्धिका, समन्तदुग्धा, सीहुण्डः, वज्रद्रुः *m.*, स्नुक् *f.* (ह्)

खुही, गुहा.

EUROPEAN, *s.* अरोपीयः, अरोप्नामकदेशजः, ताम्रमुखः,

To EVACUATE, *v. a.* शून्यीकृ, उत्सृज् (c. 6. -सृजति -स्रष्टुं), विसृज्, विरिच् (c. 7. -रिणक्ति -रिक्ते -रेक्तुं), रिच्, उच्चर् (c. 1. -चरति -रितुं), निश्चर् in caus. (-चारयति -यितुं), शुध् (c. 10. शोधयति -यितुं), ; 'the bowels,' मलोत्सर्गं कृ, मलविसर्गं कृ, मलशुद्धिं कृ.

EVACUATED, *p. p.* रेचितः -ता -तं, विरेचितः -ता -तं, शोधितः -ता -तं, रिक्तः -क्ता -क्तं, विरिक्तः -क्ता -क्तं, विसृष्टः -ष्टा -ष्टं.

EVACUATION, *s.* (Of the bowels) मलविसर्गः, मलोत्सर्गः, समुत्सर्गः, मलशुद्धिः *f.*, मलशोधनं, विरेकः, विरेचनं, रेकः, रेचनं, मलोच्चारः, उच्चारः, शोधनं, उत्थानं, निर्हारः, निश्चारकः, अधोभागहरं.

To EVADE, *v. a.* छलेन पलायित्वा परिहृ (c. 1. -हरति -हर्त्तुं) or प्रोज्झ् (c. 6. -उज्झति -ज्झितुं).—(Elude by sophistry) वक्रोक्त्या छल् (c. 10. छलयति -यितुं), अपलप् (c. 1. -लपति -पितुं), अपह्नु (c. 2. -ह्नुते -ह्नोतुं), निह्नु, अपदिश् (c. 6. -दिशति -देष्टुं), व्यपदिश्.

To EVADE, *v. n.* (Escape) छलेन पलाय् (c. 1. पलायते -यितुं, rt. इ) or निस्तॄ (c. 1. -तरति -रितुं -रीतुं) or अपक्रम् (c. 1. -क्रामति -क्रमितुं) or अपधाव् (c. 1. -धावति -वितुं) or अपसृप् (c. 1. -सर्पति -सर्प्तुं), or उत्पत् (c. 1. -पतति -तितुं) or निष्पत्.—(Practice artifice) वाक्छलं कृ, वक्रोक्तिं कृ, व्यपदेशं कृ, अपह्नवं कृ.

EVADED, *p. p.* छलेन or अपदेशेन परिहृतः -ता -तं or प्रोज्झितः -ता -तं, निह्नुतः -ता -तं, अपह्नुतः -ता -तं, निस्तीर्णः -र्णा -र्णं.

[EV]AGATION, *s.* भ्रमणं, परिभ्रमणं, विभ्रान्तिः *f.*, भ्रान्तिः *f.*, विचलनं, व्यभिचारः,

[EV]ANESENCE, *s.* अन्तर्द्धानं, तिरोधानं, अन्तर्हितत्वं, अदर्शनं.

EVANESCENT, *a.* तिरोधेयः -या -यं, अन्तर्हितः -ता -तं, अदृष्टरूपः -पी -पं, अदृश्यः -श्या -श्यं, अप्रत्यक्षः -क्षा -क्षं, परोक्षः -क्षा -क्षं.—(Fleeting) भङ्गुरः -रा -रं, क्षणभङ्गुरः -रा -रं, क्षणमात्रस्थायी -यिनी -यि (न्), क्षणाभ्रतः -ती -तं.

EVANGELICAL, *a.* सुसंवादानुसारी -रिणी -रि (न्), ख्रीष्टीयधर्म्मानुयायी -यिनी -यि (न्), ख्रीष्टप्रचारितः -ता -तं, ख्रीष्टीयधर्म्मपुस्तकान्तर्गतः -ता -तं.

EVANGELIST, *s.* (Writer of the life of Christ) ख्रीष्टचरित्ररचकः, ख्रीष्टसमाचाररचकः, सुसंवादलेखकः, मङ्गलसमाचारलेखकः.—(Preacher of the Gospel) सुसंवादप्रचारकः, ख्रीष्टीयधर्म्मप्रवक्ता *m.* (क्तृ).

To EVANGELIZE, *v. a.* and *n.* सुसंवादं प्रचर् in caus. (-चारयति -यितुं), ख्रीष्टीयधर्म्मं प्रवच् (c. 2. -वक्ति -क्तुं) or उपदिश् (c. 6. -दिशति -देष्टुं) or ग्रह् in caus. (-ग्राहयति -यितुं), ख्रीष्टीयधर्म्मे प्रवृत् in caus. (-वर्त्तयति -यितुं).

To EVAPORATE, *v. n.* वाष्प (nom. वाष्पायते), धूम (nom. धूमायते) वाष्पसाद्भू, वाष्पीभू, वाष्परूपेण उत्पत् (c. 1. -पतति -तितुं) or उद्गम् (c. 1. -गच्छति -गन्तुं), धूमरूपेण विद्रु (c. 1. -द्रवति -द्रोतुं) or नश् (c. 4. नश्यति, नशितुं) or प्रणश् or अन्तर्धा in pass. (-धीयते) or क्षि in pass. (क्षीयते).—(Dry up) आतपेन परिशुष् (c. 4. -शुष्यति -शोष्टुं), शुष्कीभू.

To EVAPORATE, *v. a.* वाष्पसात्कृ, धूमसात्कृ, वाष्पीकृ, वाष्परूपेण विद्रु in caus. (-द्रावयति -यितुं), आतपेन परिशुष् in caus. (-शोषयति -यितुं) or शुष्कीकृ.

EVAPORATED, *p. p.* आतपशुष्कः -ष्का -ष्कं, परिशुष्कः -ष्का -ष्कं, शोषितरसः -सा -सं, वाष्परूपेण उद्गतरसः -सा -सं, वाष्पसात्कृतः -ता -तं, वाष्पीभूतः -ता -तं.

EVAPORATION, *s.* (Drying up) परिशोषः -षणं, शोषः -षणं, उच्छोषणं.—(Conversion to vapour) वाष्पसात्करणं, धूमसात्करणं, वाष्पभावः, वाष्परूपेण उत्पतनं or उद्गमः or नाशः, वाष्पीभूतत्वं.

EVASION, *s.* (Artifice to elude) अपदेशः, व्यपदेशः, छद्म *n.* (न्), छलं, कपटः -टं, अपह्नवः, निह्नवः.—(Equivocation) वक्रोक्तिः *f.*, वक्रता, वक्रवाक्यं, वाक्छलं, अपलापः, कैतववादः, प्रतीपवचनं.—(Escape) निस्तारः, उत्तरणं, निर्गमः, निर्गतिः *f.*, पलायनं, अपक्रमः.

EVASIVE, *a.* छली -लिनी -लि (न्), छलान्वितः -ता -तं, व्यपदेशकः -का -कं, वञ्चकः -का -कं, निह्नवकारी -रिणी -रि (न्),—(Equivocating) वक्रः -क्रा -क्रं, वाक्छलान्वितः -ता -तं; 'an evasive answer,' निह्नवोत्तरं, वक्रोत्तरं,

EVASIVELY, *adv.* वाक्छलेन, वक्रोक्त्या, निह्नवेन, सनिह्नवं, वक्रं.

EVE, *s.* (The fast to be observed on the evening before a holiday) महापर्व्वणः पूर्व्वदिनान्ते सेवनीय उपवासः, पुण्यदिवसस्य पूर्व्वप्रदोषः.—(Decline of day). *See* EVENING.—'To be on the eve of happening,' उपस्था (c. 1. -तिष्ठति -स्थातुं).

EVEN, *s.* सायः, सायङ्कालः, प्रदोषः, प्रदोषकालः. *See* EVENING.

EVEN-TIDE, *s.* सन्ध्याकालः, सन्ध्यासमयः, सायङ्कालः, प्रदोषकालः, प्रदोषसमयः.

EVEN, *a.* (Level, flat) समः -मा -मं, समानः -ना -नं, समस्थः -स्था -स्थं, सपाटः -टा -टं, घनाघनः -ना -नं; 'even ground,' समभूमिः *f.*, समस्थलं, आजिः *f.*, पाटः.—(Straight) समरेखः -खा -खं, अवक्रः -क्रा -क्रं, अभुग्नः -ग्ना -ग्नं, निर्भुग्नः -ग्ना -ग्नं, ऋजुः -जुः -जु, अक्षसः -सा -सं.—(Smooth) श्लक्ष्णः -क्ष्णा -क्ष्णं, अरूक्षः -क्षा -क्षं.—(Uniform, equal) तुल्यः -ल्या -ल्यं, समतुल्यः -ल्या -ल्यं, उभयपार्श्वयोः समानः -ना -नं, निर्विकारः -रा -रं: 'in temper,' समभावः -वा -वं, समवृत्तिः -त्तिः -त्ति.—(Not odd) युग्मः -ग्मा -ग्मं, युगलः -ला -लं, समः -मा -मं; 'an even number,' युग्मं, युगलं; 'with both feet even,' समपदं.

To EVEN, *v. a.* समस्थलीकृ, समीकृ, समानीकृ, समान (nom. समानयति -यितुं).

EVEN, *adv.* अपि, एव, वा, वापि, सत्यं; 'even though,' यद्यपि, यद्यपि स्यात्, तथापि; 'even so,' एवं, एवमेव, तथा, तथापि, तथैव; 'even as,' यथैव, यद्वदेव, यत्प्रकारेण; 'even now,' अद्यापि, अद्यैव; 'not even,' नापि, नैव.

EVEN-HANDED, *a.* उभयसमः -मा -मं, समदर्शी -र्शिनी -र्शि (न्), विपक्षपातः -ता -तं.

EVENING, *s.* प्रदोषः, प्रदोषकालः, सायः, सायङ्कालः, सायाह्नः, अपराह्णः, सन्ध्या, सन्ध्याकालः, विकालः -लकः, वैकालः, दिनान्तः, दिनावसानं, दिवसावसानं, दिवसात्ययः, अहःशेषः, दिनशेषः, रजनीमुखं, निशादिः *f.*, रात्र्यारम्भः, उत्सूरः, अह्नः पश्चिमो भागः; 'in the evening,' सायं, सायं दिनान्ते, अभिसायं, अनुसन्ध्यं; 'good evening to you,' शुभस् ते प्रदोषः.

EVENING, *a.* प्रादोषिकः -की -कं, वैकालिकः -की -कं, सान्ध्यः -न्ध्यी -न्ध्यं, सायन्तनः -नी -नं, अपराह्णेतनः -नी -नं or अपराह्णतनः.

EVENLY, *adv.* समं, समानं, समानतस्, अञ्जसा, तुल्यं; 'evenly matched,' तुल्यबलः -ला -लं, तुल्यवीर्य्यः -र्य्या -र्य्यं, समतोलः -ला -लं.

EVEN-MINDED, *a.* समचित्तः -त्ता -त्तं, समबुद्धिः -द्धिः -द्धि, समभावः -वा -वं, सत्त्वसम्पन्नः -न्ना -न्नं, सत्यसम्पन्नः -न्ना -न्नं, सम्पदापदोर् हर्षविषादरहितः -ता -तं.

EVENNESS, *s.* समता, समानता -त्वं, साम्यं, साम्यता, सामञ्जस्यं, तुल्यता, ऋजुता, निर्भुग्नता; 'of temper,' समचित्तत्वं, समानवृत्तिः *f.*, समभावः.

EVENT, *s.* वृत्तं, सम्भवः, उत्पन्नं, समुत्पत्तिः *f.*, समुत्पन्नं, समुद्भवः, सङ्गतं, गतं, सङ्गतिः *f.*, घटना, समुपागतं, उपागमः, समुपस्थितं.—(Consequence, conclusion) उद्भूतं, अनुवृत्तं, अनुवर्त्तनं, परिणामः, निष्पन्नं, सिद्धिः *f.*

To EVENTERATE, *v. a.* निरन्त्रीकृ, अन्त्राणि विद् in caus. (-दारयति-यितुं).

EVENTFUL, *a.* गुरुघटनाविशिष्टः -ष्टा -ष्टं, गुरुसङ्गतविशिष्टः -ष्टा -ष्टं, गहुवृत्तविशिष्टः-ष्टा-ष्टं, बहुसमुच्चयवान्-वती-वत् (त्), बहुघटनामयः-यी-यं.

To EVENTILATE, *v. a.* वीज् (c. 10. वीजयति -यितुं), विधू (c. 5. -धूनोति, c. 6. -धुवति -धवितुं), निष्पावं कृ.

EVENTUAL, *a.* (Consequential) अनुवर्त्ती -र्त्तिनी -र्त्ति (न्), आनुपङ्गिकः -की -कं, अनुसारी -रिणी -रि (न्), अनुभूतः -ता -तं, परः -रा -रं.—(Ultimate) अन्तिमः -मा -मं, अन्त्यः -न्त्या -न्त्यं.

EVENTUALLY, *adv.* अन्ततस्, अन्ते, शेषे, शेषतस्, परतस्, प्रयोगतस्.

EVER, *adv.* (At any time) कदाचित्, कदापि, कदाचन, कर्हिचित्, जातु.—(Always, at all times) सदा, सर्व्वदा, सततं, नित्यदा, अनुक्षणं, प्रतिक्षणं; 'for ever,' नित्यं, सर्व्वकालं, अनन्तकालं, शाश्वतीः समाः, अजस्रं, शश्वत्, निरन्तरं, सना; 'ever and anon,' वारं वारं, काले काले, अनुकालं; 'ever since,' यतः प्रभृति; 'ever so little,' मनाक्, ईषत्, किञ्चित्, कियत्.—(As a word of enforcement) एव; 'ever young,' नित्ययौवनः -ना -नं; 'ever happy,' सदानन्दः -न्दा -न्दं.

EVERGREEN, *a.* अशीर्णपत्रः -त्रा -त्रं, अम्लानपर्णः -र्णा -र्णं, अशुष्कपर्णः -र्णा -र्णं.

EVERLASTING, *a.* अनन्तः -न्ता -न्तं, अनन्तकालस्थायी -यिनी -यि (न्), नित्यस्थायी &c., शाश्वतः -ती -तं, अक्षयः -या -यं, अनाश्यः -श्या -श्यं, अजरः -रा -रं. *See* ETERNAL.

EVERLASTINGLY, *adv.* शाश्वतं, अनन्तकालं, शाश्वतीः समाः, नित्यं, अजस्रं.

EVERLIVING, *a.* नित्यजीवी -विनी -वि (न्), अनन्तकालजीवी &c. *See* ETERNAL.

EVERMORE, *s.* अनन्तकालं, सर्व्वकालं, शाश्वतीः समाः, शाश्वतं, शश्वत्, नित्यं, नित्यकालं, सततं, अजस्रं, सना. *See* ETERNALLY.

EVER-RESTLESS, *a.* नित्यगतिः -तिः -ति, सदागतिः -तिः -ति, सततगतिः -तिः -ति.

EVERSION, *s.* पर्य्यासः, पराक्षेपः, परिवर्त्तनं, नाशः, विनाशः.

To EVERT, *v. a.* पर्य्यस् (c. 4. -अस्यति -असितुं), पराक्षिप् (c. 6. -क्षिपति -क्षेप्तुं), अधः कृ.

EVERY, *a.* सर्व्वः -र्व्वा -र्व्वं, विश्वः -श्वा -श्वं, सकलः -ला -लं, सर्व्वकः -का -कं; 'every art,' सर्व्वकर्म्म *n.* (न्); 'knowing every thing,' सर्व्वज्ञः; 'every road,' सर्व्वपथः; 'the maker of every thing,' सर्व्वभृतकृत्, सर्व्वकर्त्ता *m.* (र्तृ), विश्वकृत्; 'enduring every thing,' सर्व्वसहः, विश्वसहः; 'every one,' सर्व्वजनाः *m. pl.*, विश्वजनं; 'dear to every one,' सर्व्वप्रियः; 'sustaining every thing,' विश्वम्भरः. 'Every,' may often be expressed by प्रति or अनु prefixed; as, 'every day,' प्रतिदिनं, प्रतिदिवसं, अनुदिनं, अन्वहं, प्रत्यहं; 'every night,' प्रतिरात्रं; 'every month,' प्रतिमासं; 'every moment,' अनुक्षणं; 'to every one,' प्रत्येकं. Or by doubling the word; as, 'every day,' दिने दिने, दिवसे दिवसे, अहरहः; 'in every house,' गृहे गृहे; 'every one,' एकैकः -का -कं, एकैकशस्, पृथक् पृथक्; 'every man,' एकैकजनः, प्रतिजनं; 'in every direction,' प्रतिदिशं, सर्व्वदिक्षु, सर्व्वपथीनः -ना -नं; 'on every side,' सर्व्वतस्, समन्ततस्, समन्तात्, विश्वतस्, परितस्.

EVERYWHERE, *adv.* सर्व्वत्र, सर्व्वतस्, विश्वतस्, विश्वक्, सर्व्वके, प्रतिदिशं; 'going everywhere,' सर्व्वत्रगः -गा -गं, सर्व्वगः -गा -गं, विश्वव्यापी -पिनी -पि (न्).

To EVICT, *v. a.* निर्णयपादानन्तरं or व्यवहारदर्शनानन्तरम् अधिकाराद् भ्रंश (c. 10. भ्रंशयति -यितुं) or निराकृ or बहिष्कृ or अधिकारं or स्वत्वं हृ (c. 1. हरति, हर्त्तुं).

EVICTED, *p. p.* व्यवहारसभासकाशाद् आज्ञया हृताधिकारः -रा -रं, साधितः -ता -तं.

EVICTION, *s.* व्यवहारमण्डपसकाशाद् आज्ञानुसारेण अधिकारान्निराकरणं or बहिष्करणं or स्वत्वहरणं, साधनं.

EVIDENCE, *s.* (Testimony) साक्ष्यं, साक्षिता, प्रमाणं, साधनं, प्रामाण्यं, प्रमाता *m.* (तृ), क्रियानिर्देशः, साधननिर्देशः; 'written evidence,' लेख्यप्रमाणं, लिखितं, साधनपत्रं; 'ocular evidence,' प्रत्यक्षप्रमाणं, साक्षात्प्रमाणं, चाक्षुषज्ञानं; 'false evidence,' कौटसाक्ष्यं, कूटसाक्ष्यं; 'want of evidence,' साक्ष्यभावः, प्रमाणाभावः.—(Witness) साक्षी *m.* (न्), प्रमाता *m.* (तृ); 'having evidence,' साक्षिमान् -मती -मत् (त्).

To EVIDENCE, *v. a.* प्रमाण (nom. प्रमाणयति -यितुं), प्रमाणीकृ, साक्षिणा or साक्ष्येण or प्रमाणेन साध् (c. 10. साधयति -यितुं) or भू in caus. (भावयति -यितुं) or निर्दिश् (c. 6. -दिशति -देष्टुं) or उपपद् in caus. (-पादयति -यितुं).

EVIDENCED, *p. p.* साक्षिभावितः -ता -तं, साक्षिलक्षणः -णा -णं, स्पष्टीकृतः -ता -तं.

EVIDENT, *a.* स्पष्टः -ष्टा -ष्टं, सुस्पष्टः -ष्टा -ष्टं, व्यक्तः -क्ता -क्तं or प्रव्यक्तः or अभिव्यक्तः, प्रत्यक्षः -क्षा -क्षं, प्रकाशः -शा -शं, सुप्रकाशः -शा -शं, समक्षः -क्षी -क्षं, स्फुटः -टा -टं, उल्बणः -णा -णं; 'to make evident,' स्पष्टीकृ, व्यक्तीकृ, प्रकाश् (c. 10. -काशयति -यितुं), प्रकटीकृ, प्रत्यक्षीकृ, आविष्कृ, प्रादुष्कृ; 'to be evident,' स्पष्टीभू, आविर्भू, प्रादुर्भू, प्रादुरस्, प्रकाश् (c. 1. -काशते -शितुं); 'made evident,' स्पष्टीकृतः -ता -तं, प्रादुष्कृतः -ता -तं, प्रकाशितः -ता -तं, प्रत्यक्षभूतः -ता -तं.

EVIDENTLY, *adv.* व्यक्तं, सुव्यक्तं, स्पष्टं, स्पष्टरूपेण, प्रत्यक्षतस्, प्रत्यक्षेण, साक्षात्, प्रकाशं, स्फुटं, प्रादुस्, समक्षं, नाम.

EVIL, *a.* दुष्टः -ष्टा -ष्टं, पापः -पा -पं, पापी -पिनी -पि (न्), खलः -ला -लं, अभद्रः -द्रा -द्रं, असाधुः -धुः -धु, असन् -सती -सत् (त्), निर्गुणः -णा -णं, शठः -ठा -ठं, मन्दः -न्दा -न्दं, अधमः -मा -मं, कुत्सितः -ता -तं, कदर्य्यः -र्य्या -र्य्यं, अधार्म्मिकः -की -कं. 'Evil,' is often expressed by दुर् or कु, or अप prefixed; as, 'an evil man,' दुर्ज्जनः; 'evil thought,' कुचिन्ता, अपध्यानं; 'evil conduct,' दुर्णयः; 'evil deed,' कुकर्म्म *n.* (न्), दुष्कर्म्म *n.*, अपकर्म्म *n.*, पापकर्म्म *n.*, असत्कर्म्म *n.*, दुष्कृतं; 'evil course,' कुमार्गः, उन्मार्गः, विमार्गः; 'evil destiny,' दुर्भाग्यं, दुर्दैवं.

EVIL, *s.* (Wickedness) पापं, दुष्टता, दोषः, व्यसनं -निता, शाठ्यं, दौष्ट्यं, असाधुता, अधर्म्मः, व्यभिचारः, दौरात्म्यं, दौर्जन्यं, कुसृतिः *f.*, निकारः.—(Injury) अपकारः, अपकृतं, अपायः, द्रोहः, हिंसा, क्षतिः *f.*—(Misfortune, distress) अपायः, अशुभं, दुर्गतिः *f.*, दौर्गत्यं, अकुशलं, अभद्रं, अरिष्टं, अनिष्टं, अहितं, दुःखं, दुरवस्था, दुर्दशा, व्यसनं, उत्पातः, आपद् *f.*, विपद् *f.*, विपत्तिः *f.*, अनिष्टपातः, अनयः, क्लेशः, कष्टं.

EVIL, *adv.* दुष्टु; expressed by दुर्, कि, दुष्ट, पाप &c., prefixed; 'evil-intentioned,' दुष्टबुद्धिः -द्धिः -द्धि, दुराशयः -या -यं, पापाशयः -या -यं; 'evil-affected,' विरक्तः -क्ता -क्तं, अहितः -ता -तं; 'evil-natured,' दुष्प्रकृतिः -तिः -ति; 'evil-fated,' दैवोपहतः -ता -तं, उपहतकः -का -कं, दुर्दैवग्रस्तः -स्ता -स्तं; 'evil-favoured,' कुरूपः -पी -पं.

EVIL-DOER, *s.* पापकारी *m.* (न्), पापकर्त्ता *m.* (र्तृ), पापकरः, पापकृत् *m.*, पापकर्म्मा *m.* (न्), असत्कर्म्मा, कुकर्म्मा, दुष्कृती *m.* (न्), कुकर्म्मकारी *m.*, मन्दचरित्रः, मन्दकारी *m.*, दुर्वृत्तः, दुष्टचारी *m.* (न्), अधर्म्मचारी *m.* (न्), व्यसनी *m.* (न्).

EVIL-EYE, *s.* कुदृष्टिः *f.*, असदृष्टिः *f.*, दुरीक्षणं, क्रूरदृष्टिः *f.*; 'evil-eyed,' क्रूरदृक् *m. f. n.* (श्), असमदृक् *m. f. n.* पापदृष्टिः -ष्टिः -ष्टि.

EVIL-MINDED, *a.* पापमतिः -तिः -ति, पापबुद्धिः -द्धिः -द्धि, पापचेतनः -ना -नं, दुष्टचित्तः -त्ता -त्तं, दुष्टबुद्धिः -द्धिः -द्धि, दुष्टमतिः -तिः -ति, दुरात्मा

-त्मा -त्म (न्), अधर्म्मात्मा &c., पापात्मा &c., पापस्वभावः -वा -वं, दुष्टान्तःकरणः -णा -णं, दुर्हृदयः -या -यं.

EVIL-SPEAKING, *s.* दुरालापः, अपवादः, वाग्दोषः, पिशुनवाक्यं, मौखर्य्यं.

To EVINCE, *v. a.* स्पष्टीकृ, व्यक्तीकृ, प्रकाश् (c. 10. -काशयति -यितुं), सूच् (c. 10. सूचयति -यितुं), निर्दिश् (c. 6. -दिशति -देष्टुं), प्रदिश्, दृश् in caus. (दर्शयति -यितुं), प्रमाणीकृ.

EVINCIBLE, *a.* सूच्यः -च्या -च्यं, साध्यः -ध्या -ध्यं, निर्देशनीयः -या -यं.

EVINCIBLY, *adv.* स्पष्टं, सुस्पष्टं, सुव्यक्तं, असंशयं, अत्र न सन्देहः.

To EVISCERATE, *v. a.* निरन्त्रीकृ, निरन्त्र(nom. निरन्त्रयति -यितुं), नाडीर् बहिष्कृ.

EVITABLE, *a.* परिहरणीयः -या -यं, हेयः -या -यं, वर्ज्जनीयः -या -यं.

EVOCATION, *s.* (Calling upon) आह्वानं, प्रह्वायः, अनुकर्षणं.—(Appealing) पुनराह्वानं, पुनर्विचारप्रार्थना, अन्यप्राड्विवाकसाक्षाद् आह्वानं.

To EVOKE, *v. a.* आह्वे (c. 1. -ह्वयति -ह्वातुं), प्रह्वे, अनुकृष् (c. 1. -कर्षति -क्रष्टुं).—(From one tribunal to another) अन्यविचारसभासाक्षाद् आह्वे.

EVOLUTION, *s.* (Unfolding) विस्तारः -रणं, प्रसारणं, प्रकटीकरणं, विवारः, विवृतिः *f.*—(In arithmetic) प्रादुर्भावः.—(Series) श्रेणी, श्रेधी.

To EVOLVE, *v. a.* विस्तॄ in caus. (-स्तारयति -यितुं), प्रसृ in caus. (-सारयति -यितुं), विवृ (c. 5. -वृणोति -वरितुं -रीतुं), अपावृ, वितन् (c. 8. -तनोति -नितुं), विततीकृ.

EVOLVED, *p. p.* विस्तारितः -ता -तं, प्रसारितः -ता -तं, विवृतः -ता -तं.

EVULSION, *s.* उत्पाटनं, उत्कर्षणं, विकर्षणं, उल्लुञ्चनं, अवलुञ्चनं.

EWE, *s.* मेषी -षिका, एडका, उरणी, भेडी, अविला; 'ewe's milk,' अविसोढं, अविदूसं, अविमरीसं.

EWER, *s.* घटी, उदकपात्रं, उदपात्रं, कुम्भः, पुटग्रीवः, कमण्डलुः *m.*

To EXACERBATE, *v. a.* प्रकुप् in caus. (-कोपयति -यितुं), उत्तिज् in caus. (-तेजयति -यितुं), तीक्ष्णीकृ, तिग्मतरं -रां -रं कृ, तीव्रतरं -रां -रं कृ, उग्रतरं -रां -रं कृ.

EXACERBATION, *s.* प्रकोपः -पणं, उत्तेजनं, समुत्तेजनं, उग्रत्वं, कोपज्वलनं, कोपवर्धनं, रोगवृद्धिः *f.*

EXACT, *a.* (Accurate, correct) यथार्थः -र्था -र्थं, यायार्थिकः -की -कं, समग्रसः -सा -सं, अग्रसः -सा -सं, सत्यः -त्या -त्यं, ऋतः -ता -तं, तथ्यः -थ्या -थ्यं, यथातथः -था -थं, शुचिः -चिः -चि, शुद्धः -द्धा -द्धं, निर्दोषः -षा -षं, दोषरहितः -ता -तं, स्पष्टः -ष्टा -ष्टं.—(Careful) सयत्नः -त्ना -त्नं, अवहितः -ता -तं, अप्रमादी -दिनी -दि (न्).—(Nice, precise) सूक्ष्मः -क्ष्मा -क्ष्मं.—(Not different) समानः -ना -नं, निर्विशेषः -षा -षं, अनन्यः -न्या -न्यं -न्यत्, समसमानः -ना -नं.—(Neither more nor less) नाधिको न च न्यूनः; 'the exact state,' तारतम्यं; 'exact measurement,' सूक्ष्ममानं.

To EXACT, *v. a.* (Compel to pay) दा in caus. (दापयति -यितुं), विहा in caus. (-हापयति -यितुं); 'exact tribute,' बलिं or शुल्कम् आहृ in caus. (-हारयति -यितुं) or अपहृ.—(Take forcibly) बलात् or बलेन ग्रह् (c. 9. गृह्णाति, ग्रहीतुं) or आदा (c. 3. -ददाति -दत्ते -दातुं).—(Demand) याच् (c. 1. याचति -चितुं), प्रार्थ् (c. 10. -र्थयति -ते -यितुं).—(Enforce) कृ in caus. (कारयति -यितुं) with 2 acc.; 'exact punishment,' दण्डं प्रणी (c. 1. -णयति -णेतुं).

To EXACT, *v. n.* बाध् (c. 1. बाधते -धितुं), बाधं कृ, उपद्रवं कृ, उपधिं कृ.

EXACTED, *p. p.* बलाद्गृहीतः -ता -तं, अपहारितः -ता -तं, आहारितः -ता -तं, आकारितः -ता -तं, विहापितः -ता -तं.

EXACTER, *s.* बलात्कारपूर्व्वं परस्वादायी *m.* (न्) or परस्वग्राहकः, उपधिकः, औपधिकः, बाधकः, आहारकः, अपहारकः, हारकः.

EXACTING, *a.* बाधकः -का -कं, विप्रलम्भकः -का -कं, प्रार्थकः -का -कं.

EXACTION, *s.* बलेन ग्रहणं or आदानं or हरणं, भर्त्सनपूर्व्वं प्रार्थनं or याचना, बाधः -धनं, उपद्रवः, विप्रवः, उपधिकरणं, परस्वादानं, अकृत्यं.

EXACTLY, *adv.* यथार्थं, यथावत्, सम्यक्, अग्रसा, समग्रसं, यथातथं, तथ्यं, सत्यं, ऋतं, सूक्ष्मत्वेन, सूक्ष्मतया; 'neither more nor less,' नाधिकं न च न्यूनं; 'exactly so,' एवमेव, तथैव; 'exactly alike,' समसमानः -ना -नं.

EXACTNESS, *s.* (Accuracy) याथार्थ्यं, यथार्थता, सम्यक्त्वं, याथातथ्यं, सत्यता, तथ्यं, सामग्रस्यं, शुद्धता.—(Niceness, precision) सूक्ष्मता, सौक्ष्म्यं.—(Carefulness) अवहितत्वं, अप्रमादः, यत्नः, आस्था.—(Regularity, method) पारिपाट्यं, समता, अनुक्रमणं, क्रमानुसारः, न्यायः.

To EXAGGERATE, *v. a.* अत्युक्त्या or अतिशयोक्त्या वृध् (c. 10. वर्धयति -यितुं) or विस्तॄ in caus. (-स्तारयति -यितुं) or अधिकीकृ, or उपचि (c. 5. -चिनोति -चेतुं), अतिशयेन वर्ण् (c. 10. वर्णयति -यितुं), अतिवर्णनं कृ, अत्युक्तिं कृ, वाग्विस्तारं कृ.

EXAGGERATED, *p. p.* वर्धितः -ता -तं, अधिकीकृतः -ता -तं, विस्तारितः -ता -तं, उपचितः -ता -तं, अत्युक्तिपूर्व्वं वर्णितः -ता -तं or प्रपञ्चितः -ता -तं.

EXAGGERATION, *s.* अत्युक्तिः *f.*, अतिशयोक्तिः *f.*, अधिकं, वागाधिक्यं, अधिकीकरणं, वागुपचयः, वाक्यबाहुल्यं, चित्रोक्तिः, अतिवर्णना, अतिप्रपञ्चः.

To EXAGITATE, *v. a.* विक्षुभ् in caus. (-क्षोभयति -यितुं). *See* AGITATE.

To EXALT, *v. a.* उन्नम् in caus. -नमयति -यितुं), उच्छ्रि (c. 1. उच्छ्रयति -यितुं, rt. श्रि), समुच्छ्रि, उच्चीकृ, ऊर्द्धीकृ, उन्नी (c. 1. -नयति -नेतुं), उन्नतिं कृ, समुन्नतिं कृ, उद्धृ (c. 1. -हरति -हर्त्तुं), अधिरुह् in caus. (-रोपयति -यितुं). *See* ELEVATE.

EXALTATION, *s.* उन्नतिः *f.*, समुन्नतिः *f.*, उत्कर्षः, उत्कृष्टता, औत्कर्ष्यं, उच्छ्रयः, समुच्छ्रयः, उत्सेधः, उद्गतिः *f.*, उदयः, उच्चता, ऊर्द्धत्वं, अधिरोहः. *See* ELEVATION.

EXALTED, *p. p.* उन्नतः -ता -तं, समुन्नतः -ता -तं, उच्छ्रितः -ता -तं, उत्कृष्टः -ष्टा -ष्टं, उद्गतः -ता -तं, उद्यतः -ता -तं, अधिरोपितः -ता -तं, अधिरूढः -ढा -ढं, उद्धृतः -ता -तं, आभ्युदयिकः -की -कं. *See* ELEVATED.

EXAMINATION, *s.* (Investigation) परीक्षा -क्षणं, निरूपणं, अनुसन्धानं, विचारः -रणं -णा, जिज्ञासा, अन्वेषणा -णं, अनुयोगः, समीक्षणं, संवीक्षणं, प्रसमीक्षा, निर्णयः, चर्चा, निरूपत्वं, विमर्शः, निश्चयः, परीष्टिः *f.*, विवेचना, शोधनं.—(By question) प्रश्नेन परीक्षा, प्रश्नोत्तरक्रमेण जिज्ञासा or परीक्षा.—(Inspection) निरीक्षणं, आलोचनं, अवेक्षा -क्षणं, दर्शनं, सन्दर्शनं.—(Judicial) विचारः, व्यवहारदर्शनं, आह्वानदर्शनं; 'examination of a witness,' साक्षिपरीक्षा.

To EXAMINE, *v. a.* (Investigate) परीक्ष् (c. 1. -ईक्षते -क्षितुं), निरूप् (c. 10. -रूपयति -यितुं), अनुसन्धा (c. 3. -दधाति -धातुं), ज्ञा in des. (जिज्ञासते -सितुं), अन्विष् (c. 4. -इष्यति -एषितुं) or अन्वेष् (c. 1. -एषते -षितुं), अनुयुज् (c. 7. -युनक्ति -युंक्ते -योक्तुं), विचर् in caus. (-चारयति -यितुं), चर्च् (c. 1. चर्चति -र्चितुं), विमृश् (c. 6. -मृशति -मर्ष्टुं), निर्णी (c. 1. -णयति -णेतुं), निश्चि (c. 5. -चिनोति -चेतुं), विनिश्चि, विचि, अभिनिध्यै (c. 1. -ध्यायति -ध्यातुं), मार्ग् (c. 10. मार्गयति -यितुं).—(Inspect) निरीक्ष्, अवेक्ष्, समीक्ष्, वीक्ष्, अभिवीक्ष्, दृश् (c. 1. पश्यति द्रष्टुं), अनुदृश्, परिदृश्, सन्दृश्, प्रतिदृश्, आलोच् (c. 10. -लोचयति -यितुं), आलोक् (c. 10. -लोकयति -यितुं).—(Interrogate) अनुप्रच्छ् (c. 6. -पृच्छति -प्रष्टुं), परिप्रच्छ्, समनुप्रच्छ्, प्रश्नेन परीक्ष्, प्रश्नोत्तरक्रमेण परीक्ष् or अनुयुज्.—(Judicially) विचर् in caus. विचारं कृ; 'examine witnesses,' साक्षिणः परीक्ष्.

EXAMINED, *p. p.* निरूपितः -ता -तं, परीक्षितः -ता -तं, निरीक्षितः -ता -तं, अवेक्षितः -ता -तं, जिज्ञासितः -ता -तं, विचारितः -ता -तं, अनुयुक्तः -क्ता -क्तं, चर्चितः -ता -तं, अन्वेषितः -ता -तं, निर्णीतः -ता -तं, आलोचितः -ता -तं.

EXAMINER, *s.* परीक्षकः, विचारकः, विचारकर्त्ता *m.* (र्तृ), अनुसन्धाता *m.* (तृ), निरूपकः, अनुयोक्ता *m.* (क्तृ), निर्णेता *m.* (तृ), जिज्ञासाकृत्.

EXAMPLE, *s.* (Pattern for imitation) प्रमाणं, प्रमा, आदर्शः, प्रतिरूपं, प्रतिमा -मानं: 'to follow an example,' अनुकृ; 'following an example,' अनुकरणं; 'whatever example he sets, the world follows,' यत् प्रमाणं स कुरुते लोकस् तद् अनुवर्त्तते; 'men follow my example,' मम वर्त्म मनुष्या अनुवर्त्तन्ते or अनुगच्छन्ति.—(Person fit for an example) प्रमाणं, प्रमाता *m.* (तृ).—(Instance serving for illustration) दृष्टान्तः, निदर्शनं, उदाहारः -हरणं, उपोद्घातः; 'for example,' दृष्टान्तरूपेण, दृष्टान्तक्रमेण, यथा, तथाहि.

EXANIMATE, *a.* निर्जीवः -वा -वं, अजीवः -वा -वं, विचेतनः -ना -नं, निस्तेजाः -जाः -जः (स्), भग्नमनाः -नाः -नः (स्), निरुत्साहः -हा -हं, प्राणहीनः -ना -नं.

To EXANIMATE, *v. a.* निर्जीवीकृ, मनोभङ्गं कृ, तेजो हृ (c. 1. हरति, हर्त्तुं).

EXANIMATION, *s.* प्राणहत्या, मनोभङ्गः, उत्साहभङ्गः, तेजोहरणं.

To EXASPERATE, *v. a.* कुप् in caus. (कोपयति -यितुं), प्रकुप्, सङ्कुप्, कोपं or क्रोधं जन् (c. 10. जनयति -यितुं), क्रुध् in caus. (क्रोधयति -यितुं).

EXASPERATED, *p. p.* प्रकोपितः -ता -तं, प्रकुपितः -ता -तं, उपजातकोपः -पा -पं, जातक्रोधः -धा -धं, संरब्धः -ब्धा -ब्धं, जातामर्षः -र्षा -र्षं, इद्धमन्युः -न्युः -न्यु.

EXASPERATION, *s.* प्रकोपः -पनं, क्रोधकरणं, कोपकरणं, संरम्भः.

To EXAUCTORATE, *v. a.* पदात् or अधिकाराद् भ्रंश् (c. 10. भ्रंशयति -यितुं). *See* DISMISS.

To EXCAVATE, *v. a.* खन् (c. 1. खनति -ते -नितुं), उत्खन्, निखन्, अभिखन्, प्रोत्खन्, खनित्रेण भूमिं भिद् (c. 7. भिनत्ति, भेत्तुं) or दृ in caus. (दारयति -यितुं) or भूमौ गर्त्तं or विवरं कृ, शुषिरीकृ, शून्यीकृ.

EXCAVATED, *p. p.* निखातः -ता -तं, उत्खातः -ता -तं, खातः -ता -तं, खनितः -ता -तं, शुषिरीकृतः -ता -तं, शून्यीकृतः -ता -तं, पुटितः -ता -तं.

EXCAVATION, *s.* (Act of digging out) खननं, उत्खननं.—(A cavity) खातं, गर्त्तः, रन्ध्रं, कुहरं, अवटः -टिः *m.*, विलं, शुषिरं.

EXCAVATOR, *s.* खनकः, खनिता *m.* (तृ), खानिकः, खातकः.

To EXCECATE, *v. a.* अन्धीकृ, तिमिरीकृ, तिमिर (nom. तिमिरयति -यितुं).

To EXCEED, *v. a.* and *n.* अतिक्रम् (c. 1. -क्रामति -क्रमितुं), अतिभू (c. 1. -भवति -वितुं), अभिभू, अती (c. 2. अत्येति -तुं rt. इ), अतिशी (c. 2. -शेते -शयितुं), अधिशी, अतिचर् (c. 1. -चरति -रितुं), अतिगम् (c. 1. -गच्छति -गन्तुं), अतिरिच् in pass. (-रिच्यते), with abl. c. अतिरिक्तः -क्ता -क्तं भू, अधिकीभू, लङ्घ् (c. 10. लङ्घयति -यितुं), व्यत्यस् (c. 2. व्यतिस्ते).

EXCEEDED, *p. p.* अतिक्रान्तः -न्ता -न्तं, उत्क्रान्तः -न्ता -न्तं, अतीतः -ता -तं, अत्ययितः -ता -तं, अतिशायितः -ता -तं, लङ्घितः -ता -तं.

EXCEEDING, *a.* (Surpassing) अतिक्रामकः -का -कं, अतिचरः -रा -रं, अतिगः -गा -गं, अतिरेकी -किणी -कि (न्), अतिशायी -यिनी -यि (न्), अतिरिक्तः -क्ता -क्तं, अधिकः -का -कं -कतरः -रा -रं, समधिकः -का -कं -कतरः -रा -रं, अभ्यधिकः -का -कं.—(In a great degree, very) अत्यन्तः -न्ता -न्तं, अति or सु or अतिशय prefixed, भूरिः -रिः -रि, गाढः -ढा -ढं, बाढः -ढा -ढं, परमः -मा -मं, परः -रा -रं, अतिमितः -ता -तं, अपरिमितः -ता -तं, पुरुः -रुः -रु; 'exceeding large,' अतिमहान् -हती -हत् (त्), सुमहान् &c.; 'exceeding bounds,' अतिमर्य्यादः -दा -दं, अतिभूमिः -मिः -मि; 'exceeding human power,' अतिमानुषः -षा -षं, जनातिगः -गा -गं; 'exceeding orders,' उल्लङ्घितशासनः -ना -नं.

EXCEEDINGLY, *adv.* अति or सु or अतिशय prefixed, अतिशयं -येन, सातिशयं, भृशं, अत्यन्तं, निर्भरं, अत्यर्थं, अतीव, नितान्तं, परं, गाढं, बाढं, प्रगाढं, एकान्ततस्, अतितरां, सुतरां, अतिमात्रं, अधिकं, निकामं, सुमहत्.

To EXCEL, *v. a.* and *n.* विशिष् in pass. (-शिष्यते), with abl. c., अतिरिच् in pass. (-रिच्यते), with abl. c., अतिशी (c. 2. -शेते -शयितुं), अतिक्रम् (c. 1. -क्रामति -क्रमितुं), अती (c. 2. अत्येति -तुं rt. इ), अतिचर् (c. 1. -चरति -रितुं), अतिगम् (c. 1. -गच्छति -गन्तुं), अतिभू, अभिभू, जि (c. 1. जयति, जेतुं), विजि, पराजि, प्रशंस् in pass. (-शस्यते); 'one whose eyes excel the lotus,' अधिक्षिप्तपद्मनेत्रः -त्री.

EXCELLED, *p. p.* अतीतः -ता -तं, अतिक्रान्तः -न्ता -न्तं, अतिशायितः -ता -तं.

EXCELLENCE, EXCELLENCY, *s.* (State of excelling or possessing good qualities) विशिष्टता, वैशिष्ट्यं, श्रेष्ठता -त्वं, उत्कृष्टता, उत्कर्षः, औत्कर्ष्यं, प्रकर्षः, प्रकृष्टत्वं, प्राशस्त्यं, प्रशस्तिः *f.*, उत्तमता, गुणवैशेष्यं, गुणोत्कर्षः, गुणप्रकर्षः, गुणिता, गुणता, गुणवत्ता -त्वं, सारत्वं, कौशलं, सौष्ठवं, सारत्वं, मतल्लिका, मचर्चिका, उद्घः, तल्लजः, प्रकाण्डः -ण्डं.—(Any valuable quality) गुणः, उत्कृष्टगुणः, परभागः; 'your excellency,' आर्य्य.

EXCELLENT, *a.* विशिष्टः -ष्टा -ष्टं, उत्कृष्टः -ष्टा -ष्टं, श्रेष्ठः -ष्ठा -ष्ठं, उत्तमः -मा -मं, अनुत्तमः -मा -मं, प्रशस्तः -स्ता -स्तं, प्रशस्यः -स्या -स्यं, शस्तः -स्ता -स्तं, शस्यः -स्या -स्यं, श्रेयान् -यसी -यः (स्), सत्तमः -मा -मं, शिष्टः -ष्टा -ष्टं, परमः -मा -मं, अग्रियः -या -यं, अग्र्यः -ग्र्या -ग्र्यं, परः -रा -रं, वरः -रा -रं, प्रवरः -रा -रं, वरेण्यः -ण्या -ण्यं, प्रवर्हः -र्हा -र्हं, पुष्कलः -ला -लं, अतिशोभनः -ना -नं, सारवान् -वती -वत् (त्), अर्घ्यः -र्घ्या -र्घ्यं, भट्टारकः -का -कं, अपीच्यः -च्या -च्यं.—(Having excellent qualities) गुणी -णिनी -णि (न्), गुणवान् -वती -वत् (त्), गुणोत्कृष्टः -ष्टा -ष्टं, गुणोपेतः -ता -तं, गुणमयः -यी -यं, गुणवत्तमः -मा -मं, अधिगुणः -णा -णं; 'having numberless good qualities,' अपरिमितगुणगणः -णा -णं. Excellent may be expressed by वृषभः or पुङ्गवः or व्याघ्रः or सिंहः or शार्दूलः or इन्द्रः or प्रकाण्डः in comp.; as, 'an excellent or eminent man,' पुरुषर्षभः, पुरुषव्याघ्रः, नरपुङ्गवः &c.; 'an excellent woman,' उत्तमा, वरारोहा, वरवर्णिनी, मत्तकाशिनी, कुमारीतल्लजः.

EXCELLENTLY, *adv.* उत्तमं, अनुत्तमं, प्रशस्तं, श्रेष्ठं, सु, सुष्ठु, भद्रं.

To EXCEPT, *v. a.* वृज् (c. 10. वर्ज्जयति -यितुं), अपास् (c. 4. -अस्यति -असितुं), पर्य्युदस्, व्युदस्, अपहा (c. 3. -जहाति -हातुं), विहा, त्यज् (c. 1. त्यजति, त्यक्तुं), मुच् (c. 6. मुञ्चति, मोक्तुं), उपसंहृ (c. 1. -हरति -हर्त्तुं).

EXCEPT, *prep.* वर्ज्जयित्वा, अपास्य, अपहाय, मुक्त्वा all with acc. c., विना with inst. or acc. c., ऋते with abl. or acc. c., अन्तरेण, अन्तरा, व्यतिरेकेण, व्यतिरिक्तं, वर्ज्जं, अन्यत्र, पृथक्.—(Unless) यदि न. Sometimes expressed by the loc. absolute; as, 'except ye eat flesh,' आमिषे न भुक्ते or by the indecl. part.; as, 'except ye see,' न दृष्ट्वा.

EXCEPTED, *p. p.* वर्ज्जितः -ता -तं, पर्य्युदस्तः -स्ता -स्तं, विनिर्मुक्तः -क्ता -क्तं, व्यतिरिक्तः -क्ता -क्तं, उपसंहृतः -ता -तं, व्यावृत्तः -त्ता -त्तं, व्यावृतः -ता -तं, अपास्तः -स्ता -स्तं.—(In grammar) निपातितः -ता -तं, विधिसङ्कोचितः -ता -तं.

EXCEPTING, *part.* वर्ज्जयित्वा, अपास्य, मुक्त्वा, अपहाय, हित्वा, त्यक्त्वा.

EXCEPTION, *s.* (Act of excepting) वर्ज्जः -र्ज्जनं, अपासनं, पर्य्युदासः, व्युदासः, अपहानिः *f.*, विनिर्म्मोकः, परिहारः -हरणं, व्यतिरेकः, व्यावृत्तिः *f.*, अपवादः, निषेधः.—(In grammar) निपातनं, ग्रहणं, विपक्षः, विधिसङ्कोचः, विधिभञ्जकः.—(That which is to be excepted) वर्ज्जनीयं, वर्ज्यं.—(Objection) बाधः -धा, अपवादः, उद्ग्राहः.

EXCEPTIONABLE, *a.* बाध्यः -ध्या -ध्यं, परिहरणीयः -या -यं, परिहार्य्यः -र्य्या -र्य्यं, वर्ज्यः -र्ज्या -र्ज्यं, वर्ज्जनीयः -या -यं, अप्रशस्तः -स्ता -स्तं.

EXCERPTED, *p. p.* उद्धृतः -ता -तं, निर्हृतः -ता -तं, व्यवस्थितः -ता -तं.

EXCERPTION, *s.* उद्धारः, निर्हारः, व्यवस्थितिः *f.*, चूर्णिः *m.*, चूर्णीकरणं.

EXCESS, *s.* अधिकता, आधिक्यं, आतिरेक्यं, सातिशय्यं, उद्रेकः, उपचयः, अतिरिक्तता, उत्सेकः, भृशता, भाशयं, भ्रशिमा *m.* (न्), उत्कर्षः, गाढता, आत्यन्तिकता, समभिहारः, एकान्तत्वं, अपरिमितत्वं, बाहुल्यं, प्राचुर्य्यं.—(Transgression of due limits) मर्य्यादातिक्रमः, अमर्य्यादा, अतिक्रमः, अत्याचारः, अत्ययः.—(Intemperance in eating, &c.) आहारादिविषये असंयमः.

EXCESSIVE, *a.* अति or अतिशय or सु prefixed, अत्यन्तः -न्ता -न्तं, गाढः -ढा -ढं, भूरिः -रिः -रि, अधिकः -का -कं, अतिमात्रः -त्रा -त्रं, अपरिमितः -ता -तं, अमितः -ता -तं, अतिमितः -ता -तं, नितान्तः -न्ता -न्तं, आत्यन्तिकः -की -कं, प्रगाढः -ढा -ढं, उद्गाढः -ढा -ढं, उद्रिक्तः -क्ता -क्तं, अतिमर्य्यादः -दा -दं, एकान्तः -न्ता -न्तं, भृशः -शा -शं, सुभृशः -शा -शं, निर्भरः -रा -रं, भरः -रा -रं, उत्कटः -टा -टं, अतिशयी -यिनी -यि (न्), अतिशायनः -ना -नं, अतिरिक्तः -क्ता -क्तं, परमः -मा -मं, परः -रा -रं; 'excessive heat,' अतिदाहः, गुरुतापः; 'excessive speaking,' अतिशयोक्तिः *f.*; 'excessive sleep,' सुनिद्रा, निर्भरनिद्रा; 'excessive rain,' भूरिवृष्टिः *f.*; 'excessive pain,' तीव्रवेदना.

EXCESSIVELY, *adv.* भृशं, सुभृशं, निर्भरं, अत्यन्तं, अतिशयं -येन, सातिशयं, गाढं, प्रगाढं, उद्गाढं, नितान्तं, अतिमात्रं, एकान्ततस्, अत्यर्थं, निर्दयं, अतिमर्य्यादं, अतितरां, सुतरां, तीव्रं, बलवत्, अतिवेलं. Often expressed by अति or सु or अतिशय prefixed; as, 'excessively sharp,' अतितीक्ष्णः -क्ष्णा -क्ष्णं.

To EXCHANGE, *v. a.* परिवृत् in caus. (-वर्त्तयति -यितुं), निमे (c. 1. -मयते -मातुं), विनिमे, विमे, all with acc and inst. c., प्रतिदा, परिवर्त्तं कृ, विनिमयं कृ, व्यतिहृ (c. 1. -हरति -हर्त्तुं), प्रतिपण् (c. 10. -पणयति -यितुं). 'To exchange' may be expressed by the phrase 'having given one thing to take another,' अन्यद् दत्त्वा अन्यद् आदा, or अन्यत् त्यक्त्वा अन्यद् ग्रह् (c. 9. गृह्णाति, ग्रहीतुं); 'he exchanges beans for sesamum seeds,' तिलैर् माषान् परिवर्त्तयति or तिलेभ्यः प्रति माषान् ददाति; 'liquids to be exchanged for liquids,' रसा रसैर् निमातव्याः; 'not to be exchanged,' अपरिवर्त्तनीयः -या -यं, अप्रतिपण्यः -ण्या -ण्यं.

EXCHANGE, *s.* परिवर्त्तः -र्त्तनं, परिवृत्तिः *f.*, परीवर्त्तः, विनिमयः, विमयः, निमयः, निमेयः, नैमेयः, वैमेयः, प्रतिदानं, परिदानं, परावर्त्तः, परावृत्तिः *f.*, व्यतिहारः, व्यतीहारः, निमया.—(Barter) भाण्डविनिमयः.—(Place where merchants meet) श्रेष्ठिचत्वरं, वणिक्समागमचत्वरं; 'exchange of civilities,' प्रतिपूजनं; 'exchange of favours,' परस्परोपकारः; 'exchange of blows,' अन्योन्यघातः, व्यतिहारः; 'in exchange for,' प्रति, विनिमयेन; 'in exchange for one's life,' स्वप्राणविनिमयेन.

EXCHANGEABLE, *a.* परिवर्त्तनीयः -या -यं, निमातव्यः -व्या -व्यं, प्रतिपण्यः -ण्या -ण्यं.

EXCHANGED, *p. p.* परिवर्त्तितः -ता -तं, परिवृत्तः -त्ता -त्तं, परावृत्तः -त्ता -त्तं.

EXCHANGER, *s.* परिवर्त्तकः, परिवर्त्तनकृत्, विनिमयकर्त्ता *m.* (र्त्तृ), विमयकारी *m.* (न्).

EXCHEQUER, *s.* (Treasury) राजकोषः, राजधनागारः, राजधनगृहं, राजस्वकोषः; 'chancellor of the exchequer,' कोषाध्यक्षः, कोषाधीशः, कोशाधीशः, राजधनाधिकारी *m.* (न्), राजस्वपालकः, गञ्जाधिपः.—(Court). *See* CHANCERY.

EXCISABLE, *a.* (article) शुल्कस्थानं, करस्थानं.

EXCISE, *s.* स्वदेशनिर्म्मितद्रव्याणां राजग्राह्यभागः or राजदेयो भागः, शुल्कः -ल्कं, करः, स्वविषयनिर्म्मितद्रव्येषु राजनिरूपितः करः.

To EXCISE, *v. a.* स्वदेशनिर्म्मितद्रव्याणां or -द्रव्येषु राजग्रहणीयं भागं निरूप् (c. 10. -रूपयति -यितुं) or राजदेयभागं निरूप्, करं or शुल्कं निरूप् or स्था in caus. (स्थापयति -यितुं).

EXCISEMAN, *s.* स्वदेशनिर्म्मितद्रव्याणां राजग्राह्यभागनिरूपकः, शुल्काध्यक्षः, कराध्यक्षः, करनिरूपकः, करग्राही *m.* (न्), करग्रहः.

EXCISION, *s.* उच्छेदः, उच्छित्तिः *f.*, उत्कर्त्तनं, कर्त्तनं, विच्छेदः, विच्छित्तिः *f.*, उत्पाटनं, उद्धरणं, विनाशः.

EXCITABILITY, *s.* उत्तेजनीयता, उद्दीपनीयता, उत्तेजनक्षमता, उत्तापनीयता, प्रकोपणीयता, शीघ्रकोपित्वं.

EXCITABLE, *a.* उत्तेजनीयः -या -यं, उत्तापनीयः -या -यं, उद्दीपनीयः -या -यं, प्रवर्त्तनीयः -या -यं, प्रकोपणीयः -या -यं, शीघ्रकोपी -पिणी -पि (न्), चित्तवेगी -गिनी -गि (न्).

EXCITANT, *s.* रूचकं, प्ररोचनं, दीपकं, तेजनं, तेजोवर्धनं.

EXCITATION, *s.* उत्तेजनं, समुत्तेजनं, उत्तापः -पनं, उद्दीपनं, दीपनं, प्ररोचनं, प्रोत्साहः -हनं.

To EXCITE, *v. a.* उत्तिज् in caus. (-तेजयति -यितुं), समुत्तिज्, उत्तप् in caus. (-तापयति -यितुं), उद्दीप् (c. 10. -दीपयति -यितुं), दीप्, उत्था in caus. (-थापयति -यितुं, rt. स्था), व्युत्था, उद्युज् in caus. (-योजयति -यितुं), उत्सह् in caus. (-साहयति -यितुं), प्रोत्सह्, प्ररुच् in caus. (-रोचयति -यितुं), प्रवृत् in caus. (-वर्त्तयति -यितुं), चुद् (c. 10. चोदयति -यितुं), प्रचुद्, सञ्चुद्, परिचुद्, सन्धुक्ष् (c. 10. -धुक्षयति -यितुं), उद्धन् (c. 2. -हन्ति -न्तुं).—(Create, cause) जन् (c. 10. जनयति -यितुं), उत्पद् (c. 10. -पादयति -यितुं); 'to excite divisions,' भेदं जन्.

EXCITED, *p. p.* उत्तेजितः -ता -तं, तेजितः -ता -तं, समुत्तेजितः -ता -तं, उत्तापितः -ता -तं, उत्तप्तः -प्ता -प्तं, उद्दीप्तः -प्ता -प्तं, उद्युक्तः -क्ता -क्तं, प्रवर्त्तितः -ता -तं, उत्थापितः -ता -तं, उद्धतः -ता -तं, विनिर्वृत्तः -त्ता -त्तं, चोदितः -ता -तं, उद्घूर्णः -र्णा -र्णं, कृतोद्यमः -मा -मं, संरब्धः -ब्धा -ब्धं, उज्जृम्भितः -ता -तं.—(Caused) जनितः -ता -तं, जातः -ता -तं, उत्पन्नः -न्ना -न्नं.—(Under emotion) चित्तवेगवान् -वती -वत् (त्), अन्यथावृत्तिः -त्तिः -त्ति, गतशान्तिः -न्तिः -न्ति, गतधृतिः -तिः -ति.

EXCITEMENT, *s.* उत्तापः, उत्तप्तता, उत्तेजनं, उद्दीपः -पनं, उद्दीप्तिः *f.*, दीपनं, प्ररोचनं, उत्थापनं, प्रोत्साहः -हनं, प्रवर्त्तः -र्त्तनं, प्रवृत्तिः *f.*, अभितापः, उन्मदः, उद्धतिः *f.*, उद्योगः, संरम्भः.—(Emotion) चित्तवेगः, उत्कम्पः, चित्तोत्तापः.

EXCITER, *s.* उत्तापकः, उद्दीपकः, दीपकः, उत्थापकः, उत्तेजकः, प्रोत्साहकः, प्रवर्त्तकः.

EXCITING, *a.* उद्दीपकः -का -कं, चित्तोत्तापकारी -रिणी -रि (न्).

To EXCLAIM, *v. n.* उत्क्रुश् (c. 1. -क्रोशति -क्रोष्टुं), विक्रुश्, प्रक्रुश्, उच्चैःस्वरेण घुष् in caus. (घोषयति -यितुं), उद्घुष्, विघुष्, उच्चैः or प्रकाशं वद् (c. 1. वदति -दितुं) or भाष् (c. 1. भाषते -षितुं), उच्चैःस्वरं कृ, उच्चैर्घुष्टं कृ, उच्चभाषणं कृ, उच्चवाक्यम् उदीर् (c. 10. -ईरयति -यितुं),

प्रक्ष्विड् (c. 1. -क्ष्वेडति -डितुं).

EXCLAIMED, *p. p.* उत्क्रुष्टः -ष्टा -ष्टं, विक्रुष्टः -ष्टा -ष्टं, उद्घुष्टः -ष्टा -ष्टं.

EXCLAMATION, *s.* उत्क्रोशः, उत्क्रुष्टं, घोषणं -णा, उद्घोषणं, उद्गारः, उच्चैर्घुष्टं, उद्घुष्टं, उच्चभाषणं, उच्चैःस्वरः, रासः, प्रक्ष्वेडनं, चीत्कारः.

EXCLAMATORY, *a.* उत्क्रोशकः -का -कं, उद्घोषणः -णा -णं, विक्रोशनः -ना -नं.

To EXCLUDE, *v. a.* (Thrust out) वहिःकृ, वहिष्कृ, निराकृ, अपाकृ, निःसृ in caus. (-सारयति -यितुं), अपसृ, निरस् (c. 4. -अस्यति -असितुं), अपास्, अपानुद् (c. 6. -नुदति -नोत्तुं), निष्क्रम् in caus. (-क्रामयति -यितुं).—(Debar) बाध् (c. 1. बाधते -धितुं), निषिध् (c. 1. -षेधति -षेद्धुं), वृ in caus. (-वारयति -यितुं). निरुध् (c. 7. -रुणद्धि -रोद्धुं), विरुध्, अवरुध्.—(Except, not include) वृज् (c. 10. वर्ज्जयति -यितुं), अपास्, पर्य्युदस्, व्युदस्, उपसंहृ, उपसंहरणं कृ, न परिग्रह् (c. 9. -गृह्णाति -ग्रहीतुं); 'is excluded,' परिहीयते.

EXCLUDED, *p. p.* वहिष्कृतः -ता -तं, वहिःकृतः -ता -तं, निराकृतः -ता -तं, निरस्तः -स्ता -स्तं, उदस्तः -स्ता -स्तं, अपास्तः -स्ता -स्तं, निःसारितः -ता -तं, निषिद्धः -द्धा -द्धं, बाधितः -ता -तं, निवारितः -ता -तं, विहीनः -ना -नं, परिहीणः -णा -णं.—(Excepted) वर्ज्जितः -ता -तं, पर्य्युदस्तः -स्ता -स्तं, व्यतिरिक्तः -क्ता -क्तं, उपसंहृतः -ता -तं, व्यावृत्तः -त्ता -त्तं, व्यावृतः -ता -तं; 'excluded from society,' अपांक्तः -क्ता -क्तं.

EXCLUSION, *s.* वहिष्करणं, वहिःकरणं, निराकरणं, निरासः, निरसनं, अपासनं, अपसारणं, निःसारणं, निष्कासनं, निषेधः, प्रतिषेधः, निवारणं, वारणं, अवरोधनं, निरोधः, विरोधः, विरुद्धत्वं, वहिर्भावः.—(Exception) वर्ज्जनं, पर्य्युदासः, व्युदासः, उपसंहारः -हरणं, व्यावृतिः *f.*, व्यतिरेकः.

EXCLUSIVE, *a.* (Debarring) निवारकः -का -कं, बाधकः -का -कं, निषेधकः -का -कं.—(Possessed to the exclusion of others) असामान्येन भुक्तः -क्ता -क्तं, पृथग्भुक्तः -क्ता -क्तं, अन्यव्यतिरेकेण भुक्तः -क्ता -क्तं, अनन्यः -न्या -न्यं -न्यत्, केवलः -ला -लं.—(In logic) वैशेषिकः -की -कं.—(Not including, not taking into the account) वर्ज्जयित्वा, अपास्य, अपहाय, हित्वा, अपरिगणय्य; or expressed by रहितः -ता -तं, हीनः -ना -नं in comp.

EXCLUSIVELY, *adv.* (To the exclusion of others, apart) असामान्येन, असाधारण्येन, पृथक्, एकान्ततस्, एकान्ते, अन्यव्यतिरेकेण, केवलं, विजने.—(Without including) वर्ज्जयित्वा, अपास्य, अपरिगणय्य.

EXCLUSIVENESS, *s.* कैवल्यं, केवलत्वं, अनन्यता, असामान्येन परिभोगः.

To EXCOGITATE, *v. a.* प्रचिन्त् (c. 10. -चिन्तयति -यितुं), परिचिन्त्, विचिन्त्, मनसा क्लृप् (c. 10. कल्पयति -यितुं), परिकॢप्.

EXCOGITATED, *p. p.* प्रचिन्तितः -ता -तं, मनःकल्पितः -ता -तं, परिकल्पितः -ता -तं.

EXCOGITATION, *s.* उपायचिन्तनं, परिचिन्ता, मनसा परिकल्पनं.

To EXCOMMUNICATE, *v. a.* ख्रीष्टीयसमाजात् वहिष्कृ or निराकृ or निरस् (c. 4. -अस्यति -असितुं), ख्रीष्टीयधर्म्माधिकाराद् भ्रंश् (c. 10. भ्रंशयति -यितुं) or च्यु in caus. (च्यावयति -यितुं), अपांक्तीकृ, अपात्रीकृ.

EXCOMMUNICATED, *p. p.* ख्रीष्टीयसमाजाद् वहिष्कृतः -ता -तं or निराकृतः -ता -तं, अपांक्तः -क्ता -क्तं, अपात्रीकृतः -ता -तं.

EXCOMMUNICATION, *s.* ख्रीष्टीयसमाजाद् वहिष्करणं or निराकरणं or निरसनं, अपांक्तीकरणं, अपात्रीकरणं; 'by edict, अपांक्तपत्रं.

To EXCORIATE, *v. a.* त्वक्छेदं कृ, त्वग्भेदं कृ, चर्म्मघातं कृ, त्वगुल्लेखनं कृ, चर्म्म लिख् (c. 6. लिखति, लेखितुं) or उल्लिख् or दृ in caus. (दारयति -यितुं) or भिद्, त्वच (nom. त्वचयति -यितुं), चर्म्म घृष् (c. 1. घर्षति -र्षितुं) or निर्घृष्, निस्त्वचीकृ.

EXCORIATED, *p. p.* क्षतचर्म्मा -र्म्मा -र्म्म (न्), उल्लिखितचर्म्मा &c., विदारितत्वक् *m. f. n.*, निश्चर्म्मा &c., घर्षितचर्म्मा &c., निस्त्वचः -चा -चं.

EXCORIATION, *s.* त्वक्क्षतिः *f.*, चर्म्मक्षतिः *f.*, त्वक्परिक्षतिः *f.*, चर्म्मोल्लिखनं, त्वक्छेदः, त्वग्भेदः, त्वगुल्लिखनं, त्वग्दारणं, चर्म्मदारणं, चर्म्मनिर्घर्षणं.

EXCORTICATION, *s.* निस्त्वचीकरणं, निर्वल्कलीकरणं, त्वक्परिपुटनं.

EXCREMENT, *s.* शकृत् *n.*, पुरीषं, उच्चारः, उच्चरितं, अमेध्यं, मलं, शरीरमलं, विष्ठा, विश्ठा, विट् *f.* (ष्), गूथः -थं, शारीरं, शमलं, अवस्करः, अपस्करः, वर्च्चस्कः -स्कं, कल्कं, हन्नं, दूष्यं, पूतिकं, शोधनं, किट्टं; 'excrement and urine,' विण्मूत्रं; 'to void excrement,' पुरीषोत्सर्गं कृ, विण्मूत्रोत्सर्गं कृ, गु (c. 6. गुवति -वितुं).

EXCREMENTAL, *a.* उच्चरितः -ता -तं, उत्सर्जितः -ता -तं, हन्नः -न्ना -न्नं.

EXCREMENTITIOUS, *a.* मली -लिनी -लि (न्), पुरीषमयः -यी -यं, विण्मयः -यी -यं.

EXCRESCENCE, *s.* गण्डः -ण्डका, स्फोटः -टकः, अर्बुदः, आभोगः; 'fleshy excrescence,' अधिमांसं; 'on the tongue,' अधिजिह्वः; 'on the bone,' अध्यस्थि *n.*

To EXCRETE, *v. a.* उत्सृज् (c. 6. -सृजति -स्रष्टुं), मूत्रपुरीषोत्सर्गं कृ, उच्चर् (c. 1. -चरति -रितुं), गु (c. 6. गुवति -वितुं), हद् (c. 1. हदते, हत्तुं).

EXCRETED, *p. p.* उच्चरितः -ता -तं, हन्नः -न्ना -न्नं, गूनः -ना -नं.

EXCRETION, *s.* (Act of excreting) उत्सर्गः, उत्सर्जनं, उच्चरणं.—(That which is excreted) उच्चारः, उच्चरितं, मलं. *See* EXCREMENT.

EXCRETIVE, EXCRETORY, *a.* उत्सर्गकारी -रिणी -रि (न्), उच्चारकः -का -कं, मलवहिष्कारकः -का -कं, मलरेचकः -का -कं.

To EXCRUCIATE, *v. a.* व्यथ् (c. 10. व्यथयति -यितुं), तप् in caus. (तापयति -यितुं), सन्तप्, परितप्, यत् in caus. (यातयति -यितुं), कृष् in caus. (कर्षयति -यितुं), तिग्मयातनां दा or कृ.

EXCRUCIATED, *p. p.* व्यथितः -ता -तं, सन्तप्तः -प्ता -प्तं, कर्षितः -ता -तं.

EXCRUCIATING, *a.* व्यथकः -का -कं, व्यथाकरः -री -रं, उद्वेजनकरः -री -रं, सन्तापकः -का -कं, तिग्मयातनाकारी -रिणी -रि (न्), अरुन्तुदः -दा -दं, प्रमाथी -थिनी -थि (न्).

EXCRUCIATION, *s.* तिग्मयातना, तीव्रवेदना, यातना, व्यथा -थनं.

To EXCULPATE, *v. a.* दोषात् or अपराधात् शुध् in caus. (शोधयति -यितुं) or विशुध् or परिशुध् or मुच् (c. 6. मुञ्चति, मोक्तुं), निर्दोषीकृ, निरपराधीकृ, अनपराधिनं -धिनीं -धि कृ.

EXCULPATED, *p. p.* दोषमुक्तः -क्ता -क्तं, विशोधितः -ता -तं, विशुद्धः -द्धा -द्धं, निर्दोषः -षा -षं, निरपराधः -धा -धं, विगतदोषः -षा -षं, गतकलङ्कः -ङ्का -ङ्कं.

EXCULPATION, *s.* विशोधनं, विशुद्धिः *f.*, परिशोधः -धनं, दोषमुक्तिः *f.*, दोषमोचनं, निर्दोषीकरणं, निरपराधीकरणं, दोषप्रक्षालनं, दोषमार्जनं.

EXCULPATORY, *a.* शोधकः -का -कं, शोधनः -ना -नं, विशोधकः -का -कं, विशोधनः -ना -नं, परिशोधनः -ना -नं, दोषमोचकः -का -कं, निर्दोषकारी -रिणी -रि (न्).

EXCURSION, *s.* (Ramble) भ्रमणं, परिभ्रमः -मणं, विहारः, विहरणं.—(Deviation) उत्क्रमः, विचलनं, व्यभिचारः, भ्रान्तिः *f.*, पथत्यागः, पथभ्रंशः, पथोल्लङ्घनं, पथातिक्रमः.

EXCURSIVE, *a.* भ्रमी -मिणी -मि (न्), भ्रमणकारी -रिणी -रि (न्), उत्क्रान्तमर्य्यादः -दा -दं, व्यभिचारी -रिणी -रि (न्), विहारी -रिणी -रि (न्), त्यक्तमार्गः -र्गा -र्गं.

EXCUSABLE, *a.* क्षमणीयः -या -यं, क्षन्तव्यः -व्या -व्यं, क्षमार्हः -र्हा -र्हं, मर्षव्यः -व्या -व्यं, शोधनीयः -या -यं, मार्जनीयः -या -यं, मोचनीयः -या -यं, मर्षणीयः -या -यं.

To EXCUSE, *v. a.* (Pardon) क्षम् (c. 1. क्षमते -ति, क्षन्तुं), संक्षम्, मृष् (c. 4. मृष्यति, मर्षितुं, मर्ष्टुं, c. 10. मर्षयति -यितुं).—(Free from

fault) दोषात् or अपराधात् शुध् (c. 10. शोधयति -यितुं) or विशुध् or परिशुध् or मुच् (c. 6. मुञ्चति, मोक्तुं), निर्दोषीकृ.—(Extenuate a fault or crime) दोषं or पापं क्षम् or छद् (c. 10. छादयति -यितुं) or आछद् or मृज् (c. 2. मार्ष्टि -र्ष्टुं), दोषक्षालनं कृ.—(Remit) अवसृज (c. 6. -सृजति -स्रष्टुं), मुच्, विमुच्.—(Excuse one's self) उत्तरं कृ or दा, अपदेशं कृ, व्यपदेशं कृ, छद्म कृ, आत्मदोषं छद्, आत्मानं शुध्, आत्मदोषमार्जनं कृ, छलं कृ, अपदिश् (c. 6. -दिशति -देष्टुं), व्यपदिश्; 'excuse me,' प्रसीदतु भवान्.

Excuse, *s.* उत्तरं, उत्तरदानं, अपदेशः, व्यपदेशः, छद्म *n.* (न्), दोषच्छादनं, पापाच्छादनं, आच्छादनं, शुद्धिः *f.*, विशुद्धिः *f.*, शोधनं, पापशोधनं, निमित्तं, दोषमार्जना, दोषक्षालनं, दोषप्रक्षालनं, अनुनयः, उपदेशः, प्रत्यवस्कन्दः, कैतवं, छलं, क्षमाप्रार्थनं.

Excused, *p. p.* क्षान्तः -न्ता -न्तं, मुक्तः -क्ता -क्तं, विमोचितः -ता -तं, अवसृष्टः -ष्टा -ष्टं.

Excuseless, *a.* निरुत्तरः -रा -रं, अक्षमणीयः -या -यं, अक्षमार्हः -र्हा -र्हं.

Excuser, *s.* (One who pleads for another) परार्थम् उत्तरवादी *m.* (न्), पक्षपाती *m.* (न्), छद्मकारी *m.* (न्).—(One who forgives) क्षन्ता *m.* (न्तृ).

Execrable, *a.* गर्हणीयः -या -यं, गर्ह्यः -र्ह्या -र्ह्यं, गर्हितः -ता -तं, शापार्हः -र्हा -र्हं, घृणार्हः -र्हा -र्हं, द्वेष्यः -ष्या -ष्यं, द्वेषणीयः -या -यं, आक्रोशनीयः -या -यं.

Execrably, *adv.* गर्हणीयं, गर्ह्यं, गर्हितं, गर्ह्यप्रकारेण, द्वेषणीयं.

To execrate, *v. a.* शप् (c. 1. शपति -ते, c. 4. शप्यति, शप्तुं), अभिशप्, परिशप्; गर्ह् (c. 1. गर्हते -र्हितुं), आक्रुश् (c. 1. -क्रोशति -क्रोष्टुं), अमङ्गलं or अनिष्टम् आशंस् (c. 1. -शंसति -सितुं), भर्त्स् (c. 10. भर्त्सयति -यितुं), धिक्कृ, घृण् (c. 1. घृणते -णितुं), बाध् in des. (बीभत्सते -त्सितुं).

Execrated, *p. p.* शप्तः -प्ता -प्तं, अभिशप्तः -प्ता -प्तं, गर्हितः -ता -तं, आक्रुष्टः -ष्टा -ष्टं, धिक्कृतः -ता -तं, निर्भर्त्सितः -ता -तं, अभिशस्तः -स्ता -स्तं

Execration, *s.* शापः, अभिशापः, शपः -पनं, शपथः, परिशापः, आक्रोशः -शनं, अवक्रोशः, उपक्रोशः, भर्त्सनं, निर्भर्त्सनं, तर्ज्जनं, अभिषङ्गः, अभीषङ्गः, गालिः *m.*

To execute, *v. a.* कृ, विधा (c. 3. -दधाति -धातुं), निर्वह् in caus. (-वाहयति -यितुं), सम्पद् in caus. (-पादयति -यितुं), निष्पद्, अनुष्ठा (c. 1. -तिष्ठति -ष्ठातुं), आस्था, समास्था, साध् (c. 10. साधयति -यितुं), संसाध्, सिद्धीकृ, वृत् in caus. (वर्त्तयति -यितुं), निर्वृत्, निवृत्, संवृत्, प्रवृत्, प्रणी (c. 1. -णयति -णेतुं), सम्प्रणी, घट् (c. 10. घटयति -यितुं), आचर् (c. 1. -चरति -रितुं), समाचर्, प्रयुज् (c. 7. -युनक्ति -योक्तुं). (Inflict capital punishment) धर्म्मसभाविचारानुसारेण वधदण्डार्हं हन् (c. 2. हन्ति -न्तुं), वधदण्डं कृ, प्राणदण्डं कृ.

Executed, *p. p.* कृतः -ता -तं, अनुष्ठितः -ता -तं, निष्पादितः -ता -तं, निष्पन्नः -न्ना -न्नं, सम्पादितः -ता -तं, विहितः -ता -तं, निर्वाहितः -ता -तं, आचरितः -ता -तं, सिद्धीकृतः -ता -तं, साधितः -ता -तं, प्रणीतः -ता -तं, घटितः -ता -तं.—(Put to death by judicial sentence) धर्म्मसभाविचारानुसारेण हतः -ता -तं or व्यापादितः -ता -तं.

Execution, *s.* (Performance) करणं, विधानं, अनुष्ठानं, आचरणं, निर्वहणं, निर्वाहः, निष्पादनं, सम्पादनं, निर्वर्त्तनं, साधनं, सिद्धिः *f.*, निष्पत्तिः *f.*—(Putting to death by judicial sentence) धर्म्मसभाविचारानुसारेण प्राणाघातः or प्राणहननं or प्राणदण्डः, वधदण्डार्हघातः, वधः, हत्या, व्यापादनं, मारणं; 'place of execution,' वध्यभूमिः *f.*, वधस्थानं, घातस्थानं, वधस्थली.

Executioner, *s.* घातुकपुरुषः, घातकजनः, वध्यपुरुषः, वधकर्म्माधिकारी *m.* (न्), मृतपाः *m.*, दण्डपाशिकः.

Executive, *a.* सम्पादकः -का -कं, निर्वाहकः -का -कं, साधकः -का -कं, विधायकः -का -कं, प्रवर्त्तकः -का -कं, निष्पादकः -का -कं, प्रणायकः -का -कं.

Executor, *s.* मृतपत्रनिरूपणाधिकृतः, मृतलेखाधिकारी *m.* (न्), मृतकर्म्माधिकारी *m.*, मृतकर्म्मनिर्वाहकः, मृतकर्म्मसम्पादकः, मृतपत्रानुसारेण तद्विषयनिर्वाहकः.

Executorship, *s.* मृतजनकर्म्माधिकारिणः पदं or कर्म्म *n.* (न्).

Executrix, *s.* मृतलेखाधिकारिणी स्त्री, मृतकर्म्माधिकारिणी.

Exegesis, *s.* व्याख्या -ख्यानं, विवरणं, व्याकरणं, विवृतिः *f.*, उद्देशः.

Exegetical, *a.* वाचकः -का -कं, उद्देशकः -का -कं, प्रकाशकः -का -कं.

Exegetically, *adv.* व्याख्याक्रमेण, प्रकाशनार्थं, उद्दिश्य, विवरणार्थं.

Exemplar, *s.* प्रमाणं, प्रतिमा -मानं, उपमा, प्रतिरूपं, आदर्शः, प्रतिकृतिः *f.*, न्यायाधारः, दृष्टान्तः.

Exemplarily, *adv.* प्रमाणतस्, प्रमाणवत्, प्रमाणम् इव, प्रमाणरूपेण, प्रामाणिकप्रकारेण, दृष्टान्तरूपेण, अनुकरणीयप्रकारेण, अनुकरणीयं.

Exemplariness, *s.* अनुकरणीयता, अनुकरणयोग्यता, अनुगम्यत्वं, अनुवर्त्तनीयत्वं, प्रामाणिकत्वं, प्रमाणयोग्यता, प्रामाण्यं, दृष्टान्तता.

Exemplary, *a.* प्रमाणयोग्यः -ग्या -ग्यं, अनुकरणयोग्यः -ग्या -ग्यं, अनुकरणीयः -या -यं, अनुकरणार्हः -र्हा -र्हं, अनुगम्यः -म्या -म्यं, अनुवर्त्तनीयः -या -यं, दृष्टान्तयोग्यः -ग्या -ग्यं, प्रामाणिकः -की -कं, दार्ष्टान्तिकः -की -कं.

Exemplification, *s.* उदाहरणं, उदाहारः, समुदाहरणं, उद्देशः, निदर्शनं, प्रदर्शनं, दृष्टान्तः, दृष्टान्तीकरणं, उत्प्रेक्षा.

Exemplified, *p. p.* उदाहृतः -ता -तं, समुदाहृतः -ता -तं, प्रदर्शितः -ता -तं, उद्दिष्टः -ष्टा -ष्टं, दृष्टान्तेन स्पष्टीकृतः -ता -तं or प्रकाशितः -ता -तं

To exemplify, *v. a.* दृष्टान्तेन स्पष्टीकृ or प्रकाश् (c. 10. -काशयति -यितुं) or प्रदृश् (c. 10. -दर्शयति -यितुं) or उद्दिश् (c. 6. -दिशति -देष्टुं), दृष्टान्तीकृ, उदाहृ (c. 1. -हरति -हर्त्तुं), व्याहृ.

To exempt, *v. a.* मुच् (c. 6. मुञ्चति, मोक्तुं, c. 10. मोचयति -यितुं), विमुच्, निर्मुच्, विनिर्मुच्; मोक्ष् (c. 10. मोक्षयति -यितुं), विमोक्ष्; विसृज् (c. 6. -सृजति -स्रष्टुं, c. 10. -सर्जयति -यितुं), अवसृज्; 'to exempt from taxes,' अकरीकृ, निष्करीकृ, स्वाधीनीकृ.

Exempt, exempted, *a.* and *p. p.* (Free from) वर्ज्जितः -ता -तं, विवर्ज्जितः -ता -तं, मुक्तः -क्ता -क्तं, विनिर्मुक्तः -क्ता -क्तं, निर्मुक्तः -क्ता -क्तं, शून्यः -न्या -न्यं, रहितः -ता -तं, हीनः -ना -नं, विनाकृतः -ता -तं, वियुक्तः -क्ता -क्तं, विगतः -ता -तं, वीतः -ता -तं; 'exempt from bias,' मुक्तसङ्गः -ङ्गा -ङ्गं, सङ्गमुक्तः -क्ता -क्तं, सङ्गवर्ज्जितः -ता -तं, सङ्गहीनः -ना -नं, विगतसङ्गः -ङ्गा -ङ्गं; 'exempt from passion,' वीतरागः -गा -गं. Or expressed by अ or निर् prefixed; as, 'exempt from tax,' अकरः -रा -रं, निष्करः -रा -रं.—(Not liable) अनधीनः -ना -नं, अनायत्तः -त्ता -त्तं.

Exemption, *s.* (Freedom from) मुक्तिः *f.*, मोक्षः, विनिर्मोकः, निर्मोकः, विमोक्षः, विरहः, राहित्यं, रहितत्वं, शून्यता, अभावः, असम्भवः, व्यावृतिः *f.*; 'exemption from war,' युद्धाभावः. Or expressed by अ prefixed; as, 'exemption from fear,' अभयं; 'exemption from exertion,' अनायासः; 'exemption from taxes,' अकरत्वं.

To exenterate, *v. a.* निरन्त्रीकृ, नाडीः or अन्त्राणि बहिष्कृ.

Exequial, *a.* और्द्ध्वदेहिकः -की -कं, अन्त्येष्टिक्रियासम्बन्धी -न्धिनी -न्धि (न्), अन्त्यसत्क्रियासम्बन्धी &c., श्राद्धादिकर्म्मसम्बन्धी &c.

Exequies, *s.* और्द्ध्वदेहिकं, और्द्ध्वदेहिकक्रिया, अन्त्येष्टिक्रिया, अन्त्येष्टिः *f.*

अमन्त्रसत्क्रिया, मृतशरीरसत्कर्म्म *n.* (न्). प्रेतकर्म्म *n.* अन्त्यकर्म्म *n.* शवकर्म्म *n.*

Exercise, *s.* (Habitual practice) अभ्यासः, अभ्यसनं, अभ्यासता, चर्य्या, आवृत्तिः *f.*—(Performance) आचरणं, प्रवृत्तिः *f.*, व्यापारः, निषेवनं, अनुष्ठानं.—(Employment) प्रयोगः, उपयोगः, सेवनं.—(Exertion) व्यवसायः, उद्यमः, आयासः, उद्योगः, चेष्टा, उत्थानं.—(Discipline) शिक्षा.—(Bodily exercise) व्यायामः, परिश्रमः, शरीरपरिश्रमः.—(Exercise of mind) मनोव्यापारः, मनोव्यवसायः.—(Military exercise) सैन्यव्यायामः, शस्त्रशिक्षा, शस्त्राभ्यासः, युद्धाभ्यासः, योग्या; 'daily exercises,' नित्यकृत्यं; 'taking exercise,' व्यायामी -मिनी -मि (न्).

To exercise, *v. a.* (Practice habitually) अभ्यस् (c. 4. -अस्यति -असितुं), आचर् (c. 1. -चरति -रितुं), समाचर्, अभ्यासं कृ.—(Employ, use) प्रयुज् (c. 7. -युनक्ति -युंक्ते -योक्तुं), उपयुज्, व्यापृ in caus. (-पारयति -यितुं).—(Perform) कृ, आचर्, आस्था, (c. 1. -तिष्ठति -स्थातुं), अनुष्ठा, सेव् (c. 1. सेवते -वितुं), निषेव्, आसेव्, उपसेव्.—(Discipline) शिक्ष् in caus. (शिक्षयति -यितुं).—(Exercise the body, troops, &c.) व्यायम् (c. 10. -यमयति -यामयति -यितुं, c. 1. -यच्छति -यन्तुं).—(Exercise one's self) चेष्ट् (c. 1. चेष्टते -ष्टितुं), आत्मानं चेष्ट् (c. 10. चेष्टयति -यितुं), उद्यम् (c. 1. -यच्छति -यन्तुं), व्यायम्, व्यवसो (c. 4. -स्यति -सातुं), उद्योगं कृ; 'having exercised,' व्यायाम्य.

To exercise, *v. n.* (Use bodily exercise for health) शरीरव्यायामं कृ, आरोग्यार्थं विहारं कृ or परिक्रमं कृ.

Exercised, *p. p.* अभ्यस्तः -स्ता -स्तं, कृताभ्यासः -सा -सं, उद्यतः -ता -तं, व्यायतः -ता -तं, कृतोद्यमः -मा -मं, शिक्षितः -ता -तं, शीलितः -ता -तं.

To exert, *v. a.* (Bring into action) प्रयुज् (c. 7. -युनक्ति -युंक्ते -योक्तुं, c. 10. -योजयति -यितुं), उपयुज्, उद्युज्, चेष्ट् in caus. (चेष्टयति -यितुं), व्यापृ in caus. (-पारयति -यितुं) वृत् in caus. (वर्त्तयति -यितुं), प्रवृत्, वाह् (c. 10. वाहयति -यितुं), उत्सह् in caus. (-साहयति -यितुं).—(Exert one's self) चेष्ट् (c. 1. चेष्टते -ष्टितुं), आत्मानं चेष्ट् in caus., विचेष्ट्, यत् (c. 1. यतते -तितुं), प्रयत्, व्यवसो (c. 4. -स्यति -सातुं), उद्यम् (c. 1. -यच्छति -यन्तुं), व्यायम्, आयम् (c. 4. -यस्यति -यसितुं), घट् (c. 1. घटते -टितुं, c. 10. घटयति -यितुं), उद्योगं कृ, यत्नं कृ.

Exerted, *p. p.* चेष्टितः -ता -तं, उद्यतः -ता -तं, उद्युक्तः -क्ता -क्तं, प्रयुक्तः -क्ता -क्तं, व्यवसितः -ता -तं, यत्तः -त्ता -त्तं, वाहितः -ता -तं, प्रवर्त्तितः -ता -तं.

Exertion, *s.* चेष्टा -ष्टनं, उद्योगः, उद्यमः, उत्साहः, यत्नः, व्यवसायः, चेष्टितं, विचेष्टितं, प्रयत्नः, अध्यवसायः, आयासः, प्रयासः, प्रवृत्तिः *f.*, घटनं -ना, घटा, गुरणं, गूरणं, गोरणं, व्यापारः, ग्रहः, कर्म्मयोगः, उत्थानं, प्रयोगः, व्यायामः.

Exeunt omnes, निष्क्रान्ताः सर्व्वे.

To exfoliate, *v. n.* अध्यस्थिवद् वल्करूपेण गल् (c. 1. गलति -लितुं) or विगल्, दुष्टास्थिवत् or गलितास्थिवद् वल्करूपपरिपुटनं कृ.

Exfoliation, *s.* अध्यस्थि *n.*, अध्यस्थिपरिपुटनं, अध्यस्थिगलनं.

Exhalation, *s.* (Act or process of exhaling) उद्गारः, निश्वासः, प्रश्वासः, निःश्वासः, निःश्वसनं, उत्क्षेपः.—(Rising of vapour, &c.) बाष्पोद्गारः, वाष्पोन्नतिः *f.*, धूमोन्नतिः *f.*—(The vapour exhaled) वाष्पः, धूमः -मिका; 'sending forth exhalations,' उद्गारी -रिणी -रि (न्).

To exhale, *v. a.* उद्गॄ (c. 6. -गिरति -गरितुं -रीतुं), निश्वस् (c. 2. -श्वसिति -तुं), निःश्वस्, प्रश्वस्, प्रवा (c. 2. -वाति -तुं), मुच् (c. 6. मुञ्चति, मोक्तुं), प्रमुच्, उदीर् (c. 10. -ईरयति -यितुं), उत्क्षिप् (c. 6. -क्षिपति -क्षेप्तुं), उद्गम् in caus. (-गमयति -यितुं), निर्गम्.

Exhaled, *p. p.* उद्गीर्णः -र्णा -र्णं, निश्वसितः -ता -तं, उदीरितः -ता -तं.

Exhalement, *s.* उद्गारः, उद्गीर्णं, वाष्पः, धूमः -मिका.

To exhaust, *v. a.* (Drain off, dry up) शुष् in caus. (शोषयति -यितुं), उच्छुष्, विशुष्, संशुष्, शुष्कीकृ.—(Empty, draw out all the contents) शून्यीकृ, विरसीकृ, निःसारीकृ, सर्व्वसारं हृ (c. 1. हरति, हर्तुं), निःशेषीकृ, निरवशेषीकृ.—(Consume) क्षि (c. 1. क्षयति, c. 5. क्षिणोति or caus. क्षपयति -यितुं), क्षीणीकृ, नश् in caus. (नाशयति -यितुं), व्ययीकृ.—(Weary, fatigue) खिद् in caus. (खेदयति -यितुं), ग्लै in caus. (ग्लपयति -यितुं), परिग्लै, क्लम् in caus. (क्लमयति -यितुं), सद् in caus. (सादयति -यितुं), अवसद्.—(Drink up) आपा (c. 1. -पिबति -पातुं), परिपा.

Exhausted, *p. p.* (Drained) शोषितः -ता -तं, उच्छोषितः -ता -तं, शुष्कीकृतः -ता -तं.—(Consumed) क्षीणः -णा -णं, परिक्षीणः -णा -णं.—(Fatigued, wearied) श्रान्तः -न्ता -न्तं, परिश्रान्तः -न्ता -न्तं, क्लान्तः -न्ता -न्तं, अवसन्नः -न्ना -न्नं, खिन्नः -न्ना -न्नं, ग्लानः -ना -नं, परिग्लानः -ना -नं, क्लमी -मिनी -मि (न्), आहितक्लमः -मा -मं, श्रतः -ता -तं.—(Expended) व्ययितः -ता -तं; 'exhausted of strength,' गतसत्त्वः -त्त्वा -त्त्वं, गततेजाः -जाः -जः (स्), च्युतोत्साहः -हा -हं.

Exhaustion, *s.* (Act of draining, emptying) शोषणं, उच्छोषणं, शून्यीकरणं, सर्व्वसारहरणं.—(Consumption) क्षयः, परिक्षयः, नाशः, व्ययः.—(Fatigue) क्लान्तिः *f.*, श्रान्तिः *f.*, क्लमः, श्रमः, क्लमथः, अवसादः, ग्लानिः *f.*, खेदः, परिश्रान्तिः *f.* क्लमित्वं.—(State of being empty) शून्यता -त्वं.

Exhaustless, *a.* अक्षयः -या -यं, अक्षयी -यिणी -यि (न्), अनाशयः -श्या -श्यं.

To exhibit, *v. a.* दृश् in caus. (दर्शयति -यितुं), प्रदृश्, प्रकाश् in caus. (-काशयति -यितुं), सूच् (c. 10. सूचयति -यितुं), व्यक्तीकृ, प्रकटीकृ, प्रादुष्कृ, आविष्कृ, व्यञ्ज् (c. 7. -अनक्ति -अंक्तुं, c. 10. -अञ्जयति -यितुं), निर्दिश् (c. 6. -दिशति -देष्टुं), प्रदिश्, प्रसृ in caus. (-सारयति -यितुं), आहृ in caus. (-हारयति -यितुं), प्रत्यक्षीकृ.

Exhibited, *p. p.* दर्शितः -ता -तं, प्रकाशितः -ता -तं, व्यक्तीकृतः -ता -तं.

Exhibiter, *s.* दर्शकः, दर्शयिता *m.* (तृ), प्रदर्शकः, प्रकाशकः, निर्देष्टा *m.* (ष्टृ).

Exhibition, *s.* दर्शनं, प्रदर्शनं, प्रकाशनं, निर्देशः, सूचनं, व्यक्तीकरणं, व्यञ्जनं, व्यक्तिः *f.*, विवरणं, प्रकटीकरणं, प्रादुष्करणं, आविष्करणं, प्रकाशीकरणं, प्रेक्षणं.—(Maintenance in the university) राजविद्यालये वृत्तिः *f.*

Exhibitioner, *s.* राजविद्यालये वृत्तिभाक् *m.* (ज्) or वृत्तिभुक् *m.* (ज्).

To exhilarate, *v. a.* हृष् in caus. (हर्षयति -यितुं), प्रहृष्, परिहृष्, ह्लाद् in caus. (ह्लादयति -यितुं), आह्लाद्, प्रह्लाद्, नन्द् in caus. (नन्दयति -यितुं), अभिनन्द्; मुद् in caus. (मोदयति -यितुं), प्रमुद्, उल्लस् in caus. (-लासयति -यितुं), मद् in caus. (मादयति, मदयति -यितुं), रम् in caus. (रमयति -यितुं).

Exhilarated, *p. p.* प्रहर्षितः -ता -तं, आनन्दितः -ता -तं, प्रमुदितः -ता -तं.

Exhilarating, *a.* प्रहर्षकः -का -कं, आनन्दकारी -रिणी -रि (न्).

Exhilaration, *s.* हर्षः, प्रहर्षः, आनन्दः, प्रह्लादः, आह्लादः, प्रमोदः, उल्लासः, प्रफुल्लता, चित्तप्रसन्नता, मादः, प्रमदः.

To exhort, *v. a.* (Advise) उपदिश् (c. 6. -दिशति -देष्टुं), प्रबुध् (c. 10. -बोधयति -यितुं), प्रदिश् (c. 10. -देशयति -यितुं), मन्त्रणां दा.—(Animate) आश्वस् in caus. (-श्वासयति -यितुं), समाश्वस्.—(Instigate) उत्सह् in caus. (-साहयति -यितुं), प्रोत्सह्, समुत्सह्, चुद् (c. 10. चोदयति -यितुं), प्रचुद्, चेष्ट् in caus. (चेष्टयति -यितुं), प्रवृत् in caus. (-वर्त्तयति -यितुं), प्रयुज् (c. 10. -योजयति -यितुं), उद्युज्, प्रोत्सृ in caus. (-सारयति -यितुं), ईह् in caus. (ईहयति -यितुं).

Exhortation, *s.* उपदेशः, उपदेशवाक्यं, प्रबोधनं, प्रचोदनं, प्रबोधवाक्यं,

मन्त्रणं -णा, प्रवर्त्तकवाक्यं, विनयवाक्यं, प्रोत्साहः -हनं, प्रवर्त्तनं, प्रयोजनं, प्रेरणा.

Exhortative, exhortatory, *a.* उपदेशकः -का -कं, प्रबोधकः -का -कं, प्रचोदनः -ना -नं.

Exhorted, *p. p.* प्रबोधितः -ता -तं, प्रचोदितः -ता -तं, उपदिष्टः -ष्टा -ष्टं.

Exhorter, *s.* उपदेष्टा *m.* (ष्टृ), उपदेशी *m.* (न्), प्रचोदकः, प्रवर्त्तकः, प्रयोजकः, प्रोत्साहकः, उत्साहहेतुकः, प्रेरकः.

Exhumation, *s.* शवोत्खननं, मृतशरीरोत्खननं.

To exhume, *v. a.* शवं or मृतशरीरम् उत्खन् (c. 1. -खनति -नितुं).

Exhumed, *p. p.* उत्खातः -ता -तं, प्रोत्खातः -ता -तं, श्मशानबहिष्कृतः -ता -तं.

Exigence, exigency, *s.* (Urgent need) प्रयोजनं, अवश्यकता, आवश्यकत्वं, कार्य्यवशः,—(Occasion) अवसरः, समयः, प्रस्तावः.—(Distress) आपद् *f.*, विपद् *f.*, विपत्तिः *f.*; 'according to the exigency,' यथाप्रयोजनं, प्रयोजनवत्, अर्थवत्, यथासमयं, यथावसरं, प्रस्तावसदृशं; 'in this exigency,' इह समये.

Exile, *s.* प्रवासः -सनं, विवासः -सनं, निर्वासनं, विप्रवासः -सनं, उद्वासः -सनं, प्रव्राजनं, गृहभङ्गः, स्वदेशाद् दूरीभावः or निरसनं or निराकरणं, दूरसंस्थानं; 'the person exiled,' प्रवासी *m.* (न्), विप्रवासी *m.*

To exile, *v. a.* विवस् in caus. (-वासयति -यितुं), प्रवस्, निर्वस्, विप्रवस्; प्रव्रज् in caus. (-व्राजयति -यितुं), स्वदेशाद् बहिष्कृ or निराकृ or दूरीकृ or निरस् (c. 4. -अस्यति -असितुं) or अपानुद् (c. 6. -नुदति -नोत्तुं) or निःसृ in caus. (-सारयति -यितुं), देशान्तरीकृ.

Exiled, *p. p.* प्रवासितः -ता -तं, विवासितः -ता -तं, स्वदेशदूरीकृतः -ता -तं.

To exist, *v. n.* (Be) अस् (c. 2. अस्ति), भू (c. 1. भवति -वितुं), सम्भू, वृत् (c. 1. वर्त्तते -र्त्तितुं), प्रवृत्, विद् in pass. (विद्यते), जन् (c. 4. जायते), उत्पद् (c. 4. -पद्यते -पत्तुं).—(Live) जीव् (c. 1. जीवति -वितुं), प्राण् (c. 2. प्राणिति -तुं, rt. अन्).—(Remain) स्था (c. 1. तिष्ठति, स्थातुं), वृत्, आस् (c. 2. आस्ते).

Existence, *s.* जीवनं, जीवितं, जीवः -वा, वृत्तिः *f.*, वर्त्तनं, भवः, भावः, सम्भवः, वृत्तिता, अस्ति ind., सत्त्वं, सत्ता, प्राणपरिग्रहः, प्राणधारणं, असुधारणं, निश्वसनप्रश्वसनं, सद्भावः, अवस्था, स्थितिः *f.*

Existent, *a.* जीवी -विनी -वि (न्), जीवन् -वन्ती -वत् (त्), वर्त्तमानः -ना -नं, विद्यमानः -ना -नं, वर्त्तिष्णुः -ष्णुः -ष्णु, भविष्णुः -ष्णुः -ष्णु, ध्रियमाणः -णा -णं, सन् सती सत् (त्).

Exit, *s.* निष्क्रमः -मणं, निर्गमः, विनिर्गमः, निर्याणं, निष्क्रान्तिः *f.*, अपगमः, अपक्रमः-मणं, अपयानं.—(In dramatic language) निष्क्रान्तः -न्ता -न्तं.

To exonerate, *v. a.* (Unload) भाराद् मुच् (c. 6. मुञ्चति, मोक्तुं) or विमुच्; भारम् उत्तॄ in caus. (-तारयति -यितुं) or अपनी (c. 1. -नयति -नेतुं), निर्भारं -रां -रं कृ.—(Clear) शुध् (c. 10. शोधयति -यितुं), विशुध्; दोषाद् मुच्, निर्दोषं -षां -षं कृ.

Exonerated, *p. p.* भारमुक्तः -क्ता -क्तं, दोषमुक्तः -क्ता -क्तं, विशोधितः -ता -तं.

Exorable, *a.* वरदः -दा -दं, सुप्रसादितः -ता -तं, सान्त्वनीयः -या -यं.

Exorbitance, exorbitancy, *s.* अपरिमितत्वं, अमर्य्यादा, मर्य्यादातिक्रमः, निर्मध्यस्थ्यं, असमाध्यस्थ्यं, अमितत्वं, आधिक्यं, आतिरेक्यं, अधिकता, उद्रेकः, वैषम्यं, उत्क्रमः.

Exorbitant, *a.* अपरिमितः -ता -तं, अमितः -ता -तं, अतिमर्य्यादः -दा -दं, अमर्य्यादः -दा -दं, अतिमात्रः -त्रा -त्रं, अतिरिक्तः -क्ता -क्तं, उद्रिक्तः -क्ता -क्तं, असमध्यस्थः -स्था -स्थं, निर्मध्यस्थः -स्था -स्थं, उत्क्रान्तमर्य्यादः -दा -दं, अधिकः -का -कं, विषमः -मा -मं.

Exorbitantly, *adv.* अपरिमितं, अतिमर्य्यादं, अतिमात्रं, विषमं.

To exorcise, *v. a.* भूतोपहतजनात् शपनमन्त्रादिना भूतम् अपसृ in caus. (-सारयति -यितुं), अमुकजनं त्यक्त्वा दूरम् अपैहि इति शपथपूर्व्वं भूतं वद् (c. 1. वदति -दितुं).

Exorcism, *s.* भूतोपहतजनात् शापमन्त्रादिना भूतापसारणं.

Exorcist, *s.* शपनमन्त्रादिना भूतापसारी *m.* (न्) or भूतापसारकः.

Exordium, *s.* वाङ्मुखं, वाक्यारम्भः, आभाषः, परिभाषा, प्रकरणं, प्रस्तावः -वना, उपोद्घातः, प्रारम्भः, वन्दना.

Exossated, exosseous, *a.* निरस्थीकृतः -ता -तं, अस्थिरहितः -ता -तं.

Exoteric, *a.* बाह्यः -ह्या -ह्यं, साधारणः -णा -णी -णं, सुव्यक्तः -क्ता -क्तं.

Exotic, *a.* विदेशीयः -या -यं, विदेशी -शिनी -शि (न्), वैदेशिकः -की -कं, विदेशजः -जा -जं, परदेशी -शिनी -शि (न्), पारदेशिकः -की -कं, अन्यदेशीयः -या -यं, अन्यदेशोद्भवः -वा -वं, बहिर्भवः -वा -वं.

Exotic, *s.* (Plant) विदेशीयवृक्षः, अन्यदेशीयवृक्षः.

To expand, *v. a.* विस्तॄ in caus. (-स्तारयति -यितुं), वितन् (c. 8. -तनोति -नितुं), व्यातन्, प्रतन्, विततीकृ; विसृ in caus. (-सारयति -यितुं), प्रसृ, विकाश् in caus. (-काशयति -यितुं), प्रकाश्, प्रथ् (c. 10. प्रथयति -यितुं), विवृ (c. 5. -वृणोति -वरितुं -रीतुं, or caus. -वारयति -यितुं), विकस् in caus. (-कासयति -यितुं), वृध् in caus. (वर्धयति -यितुं), प्रवृध्, प्रपञ्च् (c. 10. -पञ्चयति -यितुं), व्यादा (c. 3. -ददाति -दातुं), कठोर (nom. कठोरयति -यितुं); 'expand itself,' व्याप (c. 5. -आप्नोति -आप्तुं).

To expand, *v. n.* विस्तॄ in pass. (-स्तीर्य्यते), वितन् in pass. (-तन्यते), विततीभू, विजृम्भ् (c. 1. -जृम्भते -म्भितुं), विवृ in caus. pass. (-वार्य्यते), प्रवृध् (c. 1. -वर्धते -र्धितुं), प्रसृप् (c. 1. -सर्पति -सर्प्तुं).—(As flowers) विकस् (c. 1. -कसति -सितुं), प्रविकस्, स्फुट् (c. 6. स्फुटति -टितुं), फुल्ल् (c. 1. फुल्लति -ल्लितुं).

Expanded, *p. p.* विततः -ता -तं, प्रविततः -ता -तं, ततः -ता -तं, सन्ततः -ता -तं, विस्तारितः -ता -तं, विस्तीर्णः -र्णा -र्णं, विस्तृतः -ता -तं, विवृतः -ता -तं, विसारितः -ता -तं, प्रसारितः -ता -तं, विसृतः -ता -तं, प्रसृतः -ता -तं, व्याप्तः -प्ता -प्तं, प्रथितः -ता -तं, प्रवृद्धः -द्धा -द्धं, व्यात्तः -त्ता -त्तं, विततीकृतः -ता -तं, विजृम्भितः -ता -तं, उज्जृम्भितः -ता -तं, प्रपञ्चितः -ता -तं.—(As a flower) विकसितः -ता -तं, फुल्लः -ल्ला -ल्लं, उत्फुल्लः -ल्ला -ल्लं, स्फुटितः -ता -तं.

Expanding, *a.* or *part.* विकाशी -शिनी -शि (न्) or विकासी, विकस्वरः -रा -रं -स्वरः -रा -रं, विकसन् -सन्ती -सत् (त्), प्रसारी -रिणी -रि (न्).

Expanse, *s.* (A spreading, extent) प्रपञ्चः, विकाशः, विस्तारः, प्रसरः, विताननं, सन्ततिः *f.*, तानं, प्रतानः, पाटः; 'expanse of heaven,' व्योम *n.* (न्), व्योमविस्तृतं, शून्यं; 'of water,' वारिपत्वरः.

Expansibility, *a.* विस्तारणीयता, विकाशनीयता, विस्तारक्षमता, व्यापकत्वं.

Expansible, *a.* विस्तारयितुं or विततितुं शक्यः -क्या -क्यं, विस्तारणीयः -या -यं, विस्तारक्षमः -मा -मं, विततीकरणीयः -या -यं.

Expansion, *s.* विस्तारः, विस्तृतिः *f.*, विस्तरः, विततिः *f.*, प्रततिः *f.*, सन्ततिः *f.*, तन्तिः *f.*, विकाशः -शनं, प्रकाशः -शनं, प्रसारः -रणं, प्रसरः, परिसरः, विवृतिः *f.*, विवारः, विसरणं, व्यादानं, विसर्पणं, प्रसर्पणं, प्रपञ्चः, व्याप्तिः *f.*, व्यापनं, व्यापकत्वं, विजृम्भणं, विहृतिः *f.*, व्यासः, परिक्षेपः, अतिरिक्तता.

Expansive, *a.* व्यापकः -का -कं, व्याप्तिमान् -मती -मत् (त्), विस्तारकः -का -कं, प्रसारी -रिणी -रि (न्), विसर्पी -र्पिणी -र्पि (न्), सान्तानिकः -की -कं.

To expatiate, *v. n.* सुविस्तरं or प्रपञ्चेन वद् (c. 1. वदति -दितुं) or व्याख्या (c. 2. -ख्याति -तुं), वाग्विस्तारं कृ, अनुयुक्तिं कृ.—(Rove at large) विहृ (c. 1. -हरति -हर्त्तुं), परिभ्रम् (c. 1. -भ्रमति, c. 4. -भ्राम्यति -भ्रमितुं).

To EXPATRIATE, *v.a.* प्रवस् in caus. (-वासयति -यितुं), विवस्, स्वदेशाद् वहिष्कृ or दूरीकृ or निराकृ or निःसृ in caus. (-सारयति -यितुं), देशान्तरीकृ.

EXPATRIATED, *p.p.* प्रवासितः -ता -तं, विवासितः -ता -तं, स्वदेशवहिष्कृतः -ता -तं.

EXPATRIATION, *s.* प्रवासः -सनं, विवासनं, प्रव्राजनं, स्वदेशवहिष्करणं.

To EXPECT, *v. a.* प्रतीक्ष् (c. 1. -ईक्षते -क्षितुं), अपेक्ष्, व्यपेक्ष्, सम्प्रतीक्ष्, उदीक्ष्, निरीक्ष्, प्रतिपाल् (c. 10. -पालयति -यितुं), आकांक्ष् (c. 1. -कांक्षति -क्षितुं), प्रत्याकांक्ष्, उत्दृश् (c. 1. -पश्यति -द्रष्टुं).

To EXPECT, *v. n.* प्रतीक्षां कृ, प्रत्याशां कृ, प्रतीक्षी -क्षिणी -क्षि भू.

EXPECTABLE, *a.* अपेक्ष्यः -क्ष्या -क्ष्यं, अपेक्षणीयः -या -यं, प्रतीक्ष्यः -क्ष्या -क्ष्यं.

EXPECTANT, *a.* प्रतीक्षी -क्षिणी -क्षि (न्), प्रतीक्षकः -का -कं, अपेक्षी -क्षिणी -क्षि (न्), अपेक्षकः -का -कं, व्यपेक्षः -क्षा -क्षं, प्रत्याशी -शिनी -शि (न्), आकांक्षी -क्षिणी -क्षि (न्), सप्रत्याशः -शा -शं, अर्थी -र्थिनी -र्थि (न्).

EXPECTATION, *s.* अपेक्षा, प्रतीक्षा -क्षणं, व्यपेक्षा, उदीक्षणं, सम्प्रतीक्षा, निरीक्षा, प्रत्याशा, आशा, व्यपाश्रयः, अभिनन्दा; 'in expectation,' अपेक्षया.

EXPECTED, *p. p.* अपेक्षितः -ता -तं, प्रतीक्षितः -ता -तं, साकांक्षितः -ता -तं, चित्तकलितः -ता -तं; 'to be expected,' अपेक्षणीयः -या -यं, आकांक्षणीयः -या -यं.

To EXPECTORATE, *v. a.* श्लेष्माणं or श्लेष्मकं निरस् (c. 4. -अस्यति -असितुं) or उत्क्षिप् (c. 6. -क्षिपति -क्षेप्तुं) or उद्गॄ (c. 6. -गिरति -गरितुं -रीतुं) or मुखाद् निःसृ in caus. (-सारयति -यितुं), श्लेष्मनिरसनं कृ, निष्ठीव् (c. 1. -ष्ठीवति -ष्ठेवितुं), उत्कास् (c. 1. -कासते -सितुं).

EXPECTORATED, *p.p.* निष्ठ्यूतः -ता -तं, मुखनिरस्तः -स्ता -स्तं, मुखनिःसारितः -ता -तं.

EXPECTORATION, *s.* श्लेष्मनिरसनं, निष्ठ्यूतिः *f.*, निष्ठेवनं, उत्कासनं, श्लेष्मोत्क्षेपः.

EXPECTORATIVE *a.* श्लेष्मवर्धकः -का -कं, कफवर्धकः -का -कं, कफकरः -री -रं.

EXPEDIENCE, EXPEDIENCY. *s.* युक्तता, युक्तिः *f.*, योग्यता, उपयुक्तत्वं, उपयोगिता, उपयोगः, औचित्यं, उपपत्तिः *f.*, याथातथ्यं, याथार्थ्यं, सफलता, सोपकारत्वं, सार्थत्वं.

EXPEDIENT, *a.* उपयोगी -गिनी -गि (न्), उपयुक्तः -क्ता -क्तं, सोपकारः -रा -रं, अर्थयुक्तः -क्ता -क्तं, अर्थकरः -री -रं, सार्थकः -का -कं, हितः -ता -तं, योग्यः -ग्या -ग्यं, उपकारकः -का -कं, सफलः -ला -लं.

EXPEDIENT, *s.* (Means) उपायः, अभ्युपायः, गतिः *f.*, साधनं, कर्म्मसाधनं, गुणः, अङ्गं, विधानं, उपकरणं, सम्भवः, योगः, उपपत्तिः *f.*, उपक्रमः. The six expedients of defence are सन्धिः, विग्रहः, यानं, आसनं, द्वैधं, आश्रयः. The four expedients for reducing an enemy are भेदः, दण्डः, साम, दानं.

EXPEDIENTLY, *adv.* युक्तं, यथायोग्य, यथोचितं, सोपकारं, सफलं, स्थाने.

To EXPEDITE, *v. a.* त्वर् in caus. (त्वरयति -यितुं), सन्त्वर्, त्वरितं or सत्वरं कृ or विधा (c. 3. -दधाति -धातुं), or सम्पद् in caus. (-पादयति -यितुं) or साध् (c. 10. साधयति -यितुं) or प्रवृत् in caus. -वर्त्तयति -यितुं), क्षेप (nom. क्षेपयति -यितुं), शीघ्र (nom. शीघ्रयति -यितुं). —(Despatch) सत्वरं प्रस्था in caus. (-स्थापयति -यितुं)

EXPEDITED, *p. p.* त्वरितं कृतः -ता -तं or सम्पादितः -ता -तं, वेगितः -ता -तं.

EXPEDITION, *s.* (Haste, speed) त्वरा, तूर्णिः *f.*, सत्वरता, त्वरणं, शीघ्रता, शैघ्र्यं, क्षिप्रता, द्रुतत्वं, वेगः -गिता, आवेगः, जवः, प्रजवः, लघुता, लाघवं, अविलम्बः, उद्योगः, क्षिप्रकारित्वं, शीघ्रनिर्वाहः, त्वरितगतिः *f.*, शीघ्रगमनं, आशुगमनं.—(March of an army, &c.) प्रस्थानं, प्रयाणं, यानं, गमनं, गतिः *f.*, यात्रा, अभियेणनं, अभिनिर्याणं.— (Enterprise) प्रवृत्तिः *f.*, उपक्रमः.

EXPEDITIOUS, *a.* त्वरितः -ता -तं, सत्वरः -रा -रं, त्वरावान् -वती -वत् (त्), त्वरान्वितः -ता -तं, शीघ्रः -घ्रा -घ्रं, क्षिप्रः -प्रा -प्रं, शीघ्रकारी -रिणी -रि (न्), क्षिप्रकारी &c., अविलम्बः -म्बा -म्बं -म्बी -म्बिनी -म्बि (न्), अविलम्बितः -ता -तं, अप्रलम्बः -म्बा -म्बं, द्रुतः -ता -तं, लघुः -घुः -घु, वेगी -गिनी -गि (न्), वेगवान् -वती -वत् (त्), जवी -विनी -वि (न्), तूर्णः -र्णा -र्णं, धावकः -का -कं, अदीर्घसूत्रः -त्रा -त्रं, शीघ्रगामी -मिनी -मि (न्), त्वरितगतिः -तिः -ति; 'being expeditious,' शीघ्रायमाणः -णा -णं, त्वरमाणः -णा -णं.

EXPEDITIOUSLY, *adv.* त्वरितं, सत्वरं, क्षिप्रं, शीघ्रं, अविलम्बितं, आशु, वेगतस्.

To EXPEL, *v. a.* (Banish) विवस् in caus. (-वासयति -यितुं), प्रवस्, निर्वस्, विप्रवस्; प्रव्रज् in caus. (-व्राजयति-यितुं), स्वदेशाद् वहिष्कृ or निराकृ or दूरीकृ.—(Drive away, eject, dismiss) निरस् (c. 4. -अस्यति -असितुं), अपास्, उदस्, निःसृ in caus. (-सारयति -यितुं), उत्सृ, अपसृ, निःसरणं कृ, अपानुद् (c. 6. -नुदति -नोत्तुं), निष्कस् in caus. (-कासयति -यितुं), निराकृ, वहिष्कृ, वहिःकृ, दूरीकृ, निष्क्रम् in caus. (क्रामयति -यितुं), उत्क्षिप् (c. 6. -क्षिपति -क्षेप्तुं), प्रतिक्षिप्, निर्धू (c. 5. -धूनोति -धवितुं), भ्रंश् in caus. (भ्रंशयति -यितुं) च्यु in caus. (च्यावयति -यितुं).

EXPELLED, *p. p.* निर्वासितः -ता -तं, विवासितः -ता -तं, प्रवासितः -ता -तं, स्वदेशवहिष्कृतः -ता -तं, निरस्तः -स्ता -स्तं, अपास्तः -स्ता -स्तं, निःसारितः -ता -तं, निष्क्रामितः -ता -तं, वहिष्कृतः -ता -तं, वहिःकृतः -ता -तं, निःकासितः -ता -तं, उदस्तः -स्ता -स्तं, अवकृष्टः -ष्टा -ष्टं, निर्धूतः -ता -तं, अवधूतः -ता -तं, च्यावितः -ता -तं; 'from society,' अपपात्रितः -ता -तं, अवपात्रितः -ता -तं, अपांक्तः -क्ता -क्तं.

EXPELLER, *s.* निर्वासनकारी *m.* (न्), अपसारकः, अपनोदकः, नुदः in comp.

To EXPEND, *v. a.* (Disburse) व्यय् (c. 1. व्ययति, c. 10. व्यययति -यितुं, rt. इ), व्ययीकृ, त्यज् (c. 1. त्यजति, त्यक्तुं), विसृज् (c. 6. -सृजति -स्रष्टुं), विनियुज् (c. 7. -युंक्ते -योक्तुं), अपचि (c. 5. -चिनोति -चेतुं).—(Lay out, consume) उपयुज् (c. 7. -युनक्ति -युंक्ते), प्रयुज्.—(Waste) विक्षिप् (c. 6. -क्षिपति -क्षेप्तुं), क्षि (c. 1. क्षयति, c. 5. क्षिणोति or caus. क्षपयति -यितुं), उपक्षि, क्षयं कृ.

EXPENDED, *p. p.* व्ययितः -ता -तं, व्ययीकृतः -ता -तं, व्ययीभूतः -ता -तं, अपचितः -ता -तं, विसर्ज्जितः -ता -तं, क्षयितः -ता -तं, विनियुक्तः -क्ता -क्तं, प्रयुक्तः -क्ता -क्तं.

EXPENDITURE, EXPENSE, *s.* व्ययः, धनव्ययः, अपव्ययः, व्ययीकरणं, अपचयः, अपचितिः *f.*, विसर्गः, उत्सर्गः -र्ज्जनं, त्यागः, परित्यागः, अर्थोत्सर्गः, अर्थत्यागः, क्षयः, उपक्षयः, संक्षयः, अवक्षयः, मोक्षणं, क्षेपः, विनियोगः, अपहारः, व्ययः; 'income and expenditure,' आयव्ययौ.

EXPENSELESS, *a.* निर्मूल्यः -ल्या -ल्यं, निर्व्ययः -या -यं, अल्पमूल्यः -ल्या -ल्यं.

EXPENSIVE, *a.* (Costly) बहुमूल्यः -ल्या -ल्यं, बहुव्ययः -या -यं, बहुधनव्ययेन or बहुमूल्येन क्रेयः -या -यं or साध्यः -ध्या -ध्यं, महार्घः -र्घा -र्घं, दुर्मूल्यः -ल्या -ल्यं, महार्हः -र्हा -र्हं, महाधनः -ना -नं, अर्घ्यः -र्घ्या -र्घ्यं.—(Extravagant) व्ययी -यिनी -यि (न्), अतिव्ययी &c., अपरिमितव्ययी &c., व्ययशीलः -ला -लं, अर्थनाशी -शिनी -शि (न्), अपचेता -त्री -तृ (तृ).

EXPENSIVELY, *adv.* बहुधनव्ययेन, बहुमूल्येन, बहुव्ययपूर्व्वं.

EXPENSIVENESS, *s.* बहुमूल्यता, दुर्मूल्यता, महार्घता, माहार्घ्यं.—(Extravagance) अतिव्ययः, महाव्ययः, बहुव्ययः, अर्थदूषणं.

EXPERIENCE, *s.* (Trial) परीक्षा -क्षणं, अनुभवः.—(Use, practice) अभ्यासः, पूर्व्वाभ्यासः, अभ्यसनं, उपभोगः, भोगः, भुक्तिः *f.*, आचारः.—

(Knowledge derived from trials) अनुभूतिः *f.*, अनुभवः, वेदनं, संवेदः, वेदित्वं, बोधः, प्रतीतिः *f.*, दर्शनं, ऊहा, परिपाकः, पाकः, परिपक्वता; 'by experience,' अनुभवेन, अनुभवात्, कार्य्यतस्; 'one's own experience,' स्वानुभवः; 'universal experience,' सर्व्वानुभूतिः *f.*

To EXPERIENCE, *v. a.* (Suffer, feel) अनुभू (c. 1. -भवति -वितुं), भुज् (c. 7. भुंक्ते, भोक्तुं), उपभुज्, अश् (c. 5. अश्नुते, अशितुं), उपाश्, समश्, उपागम् (c. 1. -गच्छति -गन्तुं), उपगम्, प्राप् (c. 5. -आप्नोति -आप्तुं), विद् (c. 10. वेदयते -यितुं), आसद् (c. 10. -सादयति -यितुं), दृश् (c. 1. पश्यति, द्रष्टुं).—(Make trial of) परीक्ष् (c. 1. -ईक्षते -क्षितुं); 'one who has not experienced a battle,' अनास्वादितविग्रहः.

EXPERIENCED, *p. p.* (Suffered) अनुभूतः -ता -तं, उपागतः -ता -तं, उपगतः -ता -तं, उपभुक्तः -क्ता -क्तं, अनुभूयमानः -ना -नं.—(Skilful by reason of much observation) बहुदृष्टः -ष्टा -ष्टं, बहुदृश्वा -श्वा -श्व (न्), बहुदर्शी -र्शिनी -र्शि (न्), परिपक्वबुद्धिः -द्धिः -द्धि, अविपक्वबुद्धिः &c., पक्वः -क्वा -क्वं, कोविदः -दा -दं, व्युत्पन्नः -न्ना -न्नं, अनुभवी -विनी -वि (न्), ऊहवान् -वती -वत् (त्).

EXPERIMENT, *s.* परीक्षा -क्षणं, परीक्षितं, कष्टिः *f.*, अनुभूतिः *f.*, अनुभवः.

To EXPERIMENT, *v. a.* परीक्ष् (c. 1. -ईक्षते -क्षितुं), जिज्ञा in des. (जिज्ञासते -सितुं), अनुभू.

EXPERIMENTAL, *a.* परीक्षकः -का -कं, अनुभवी -विनी -वि (न्).—(Derived from experience) परीक्षालब्धः -ब्धा -ब्धं, परीक्षामूलः -ला -लं, अनुभूतिमूलः -ला -लं.

EXPERIMENTALLY, *adv.* अनुभवेन -वात्, स्वानुभवेन, परीक्षापूर्व्वं, कार्य्यतस्.

EXPERIMENTER, EXPERIMENTALIST, *s.* परीक्षकः, परीक्षणकारी *m.* (न्), अनुभावी *m.* (न्).

EXPERT, *a.* कुशलः -ला -लं, निपुणः -णा -णं, दक्षः -क्षा -क्षं, विज्ञः -ज्ञा -ज्ञं, अभिज्ञः -ज्ञा -ज्ञं, प्रवीणः -णा -णं, चतुरः -रा -रं, पक्वः -क्वा -क्वं, परिपक्वः -क्वा -क्वं, सुप्रयोगवान् -वती -वत् (त्), पटुः -टुः -ट्वी -टु, विचक्षणः -णा -णं, कृती -तिनी -ति (न्), पेशलः -ला -लं, युक्तिमान् -मती -मत् (त्), विशारदः -दा -दं, विदग्धः -ग्धा -ग्धं, चतुरः -रा -रं; 'expert in arms,' शस्त्रकुशलः -ला -लं, शस्त्रविद् *m. f. n.*, शस्त्रज्ञः -ज्ञा -ज्ञं.

EXPERTLY, *adv.* निपुणं, चतुरं, सुप्रयोगेण, युक्त्या, सपाटवं, विज्ञवत्.

EXPERTNESS, *s.* दक्षता, दाक्ष्यं, चातुर्य्यं, चतुरता, नैपुण्यं, निपुणता, पटुत्वं, पाटवं, कौशल्यं, प्रवीणता, प्रावीण्यं, युक्तिः *f.*, सुप्रयोगः -गता, विज्ञता, अभिज्ञता, वैचक्षण्यं, योग्यता, विदग्धता, वैदग्ध्यं; 'of hand,' हस्तकौशल्यं, हस्तलाघवं, करदक्षता; 'of hands, feet, &c.,' हस्तपादादिक्षिप्रता.

EXPIABLE, *a.* शोधनीयः -या -यं, शोध्यः -ध्या -ध्यं, निष्करणीयः -या -यं, मोचनीयः -या -यं, मार्ज्जनीयः -या -यं, क्षमणीयः -या -यं, मृष्टव्यः -व्या -व्यं, प्रायश्चेत्यः -त्या -त्यं.

To EXPIATE, *v. a.* पापप्रायश्चित्तं कृ, पापनिष्कृतिं कृ, पापं निष्कृ or अपनुद् (c. 6. -नुदति -नोत्तुं) or शम् (c. 10. शमयति -यितुं) or हृ (c. 1. हरति, हर्त्तुं) or मृज् (c. 2. मार्ष्टि -र्ष्टुं), प्रायश्चित्तेन पापात् शुध् (c. 10. शोधयति -यितुं) or परिशुध् or विशुध् or मुच् (c. 6. मुञ्चति, मोक्तुं) or पू (c. 9. पुनाति, पवितुं) or पवित्रीकृ, पापक्षमां साध् (c. 10. साधयति -यितुं); 'it is expiated,' प्रायश्चित्तीयते.

EXPIATED, *p. p.* निष्कृतः -ता -तं, शोधितः -ता -तं, मृष्टः -ष्टा -ष्टं, निर्णिक्तः -क्ता -क्तं, पवित्रीकृतः -ता -तं, पावितः -ता -तं, परिपूतः -ता -तं, शान्तः -न्ता -न्तं.

EXPIATION, *s.* प्रायश्चित्तं, निष्कृतिः *f.*, शुद्धिः *f.*, शोधनं, मुक्तिः *f.*, मोचनं, शान्तिः *f.*, उपशान्तिः *f.*, प्रतीकारः, पावनं, अपमुक्तिः *f.*, अपनोदनं, पापशोधनं, पापविशुद्धिः *f.*, पापशान्तिः *f.*, पापनिर्हरणं, अघनाशनं, पापापमुक्तिः *f.*, पापप्रक्षालनं, पापनिर्णेजनं, पापमार्जना, निर्णिक्तकर्म्मः.

EXPIATORY, *a.* शोधकः -का -कं, पावकः -का -कं, पापघ्नः -घ्नी -घ्नं, अघमर्षणः -णी -णं, अघनाशकः -का -कं, अघनाशनः -ना -नं, शमकः -का -कं, शान्तिकः -की -कं.

EXPIRATION, *s.* (Breathing out) निश्वासः, निःश्वसनं, निःश्वासः, प्रश्वासः, प्राणोद्गारः, प्राणोत्क्षेपः, प्राणत्यागः.—(Exhalation) उद्गारः.—(Cessation, close) अवसानं, अन्तं, निवृत्तिः *f.*, विरतिः *f.*, उपरमः, समाप्तिः *f.*, शेषः, पर्य्यवसानं, अत्ययः, क्षयः.

To EXPIRE, *v. a.* (Breathe out) निःश्वस् (c. 2. -श्वसिति -तुं), निश्वस्, प्रश्वस्, प्राणं or श्वासम् उत्क्षिप् (c. 6. -क्षिपति -क्षेप्तुं) or उद्गम् in caus. (-गमयति -यितुं) or निर्गम् or उदीर् (c. 10. -ईरयति -यितुं).—(Exhale) उद्गॄ (c. 6. -गिरति -गरितुं -रीतुं), प्रवा (c. 2. -वाति -तुं), प्रमुच् (c. 6. -मुञ्चति -मोक्तुं).

To EXPIRE, *v. n.* (Breathe the last, die) प्राणत्यागं कृ, प्राणान् हा (c. 3. जहाति, हातुं) or त्यज् (c. 1. त्यजति, त्यक्तुं), श्वासत्यागं कृ, शेषप्राणं कृ, मृ (c. 6. म्रियते, मर्त्तुं), जीवनोत्सर्गं कृ, पञ्चत्वं गम् (c. 1. गच्छति, गन्तुं), नश् (c. 4. नश्यति, नशितुं).—(Close, end) निवृत् (c. 1. -वर्त्तते -र्त्तितुं), निर्वृत्, विरम् (c. 1. -रमति -रन्तुं), उपरम्, समाप् in pass. (-आप्यते), विगम्, अपया (c. 2. -याति -तुं), अवसद् (c. 1. -सीदति -सत्तुं).

EXPIRED, *p. p.* गतप्राणः -णा -णं, गतासुः -सुः -सु, उद्गतासुः -सुः -सु, परासुः -सुः -सु, प्राप्तपञ्चत्वः -त्वा -त्वं, प्रेतः -ता -तं, परेतः -ता -तं, संस्थितः -ता -तं.

EXPIRING, *part.* and *a.* कण्ठगतप्राणः -णा -णं, म्रियमाणः -णा -णं, मुमूर्षुः -र्षुः -र्षु, आसन्नमृत्युः -त्युः -त्यु.—(As a lamp) निर्वास्यन् -स्यन्ती -स्यत् (त्).

To EXPLAIN, *v. a.* व्याख्या (c. 2. -ख्याति -तुं), व्यक्तीकृ, स्पष्टीकृ, व्याकृ, विवृ (c. 5. -वृणोति -वरितुं -रीतुं), प्रकाश् (c. 10. -काशयति -यितुं), स्पष्ट (nom. स्पष्टयति -यितुं), व्याहृ (c. 1. -हरति -हर्त्तुं), समुद्दिश् (c. 6. -दिशति -देष्टुं), उद्दिश्, प्रबुध् (c. 10. -बोधयति -यितुं), सम्बुध्, विब्रू (c. 2. -ब्रवीति), प्रवच् (c. 2. -वक्ति -क्तुं), प्रवद् (c. 1. -वदति -दितुं), व्याचक्ष् (c. 2. -चष्टे), निरूप् (c. 10. -रूपयति -यितुं), परिशुध् (c. 10. -शोधयति -यितुं), वर्ण् (c. 10. वर्णयति -यितुं), कथ् (c. 10. कथयति -यितुं), प्रदृश् in caus. (-दर्शयति -यितुं), प्रकॄत् (c. 10. -कीर्त्तयति -यितुं), विवरणं कृ.

EXPLAINABLE, *a.* व्याख्येयः -या -यं, उद्देश्यः -श्या -श्यं, प्रवक्तव्यः -व्या -व्यं.

EXPLAINED, *p. p.* व्याख्यातः -ता -तं, व्याकृतः -ता -तं, स्पष्टीकृतः -ता -तं, विवृतः -ता -तं, प्रकाशितः -ता -तं, निरूपितः -ता -तं, द्योतितः -ता -तं, वर्णितः -ता -तं.

EXPLAINER, *s.* व्याख्याता *m.* (तृ), प्रवक्ता *m.* (क्तृ), प्रकाशकः, उद्देशकः.

EXPLANATION, *s.* व्याख्या -ख्यानं, विवृतिः *f.*, विवरणं, व्याकरणं, व्याकृतिः *f.*, स्पष्टीकरणं, प्रकाशनं, उद्देशः, समुद्देशः, निरूपणं, समाधानं.

EXPLANATORY, *a.* वाचकः -का -कं, उद्देशकः -का -कं, समुद्देशकः -का -कं, व्याख्याकारी -रिणी -रि (न्), विवरणकारी &c., अर्थकथकः -का -कं, प्रकाशकः -का -कं.

EXPLETIVE, *s.* पादपूरणं, अपार्थकं, वाक्यालङ्कारः, पादपूरकः शब्दः.

EXPLICABLE, *a.* *See* EXPLAINABLE.

To EXPLICATE, *v. a.* विवृ (c. 5. -वृणोति -वरितुं -रीतुं), व्याख्या (c. 2. -ख्याति -तुं), प्रकटीकृ.

EXPLICATION, *s.* विवृतिः *f.*, विवरणं, व्याख्या -ख्यानं, व्यक्तीकरणं, प्रकटीकरणं.

EXPLICATIVE, *a.* विवरणार्थकः -का -कं, प्रकाशकः -का -कं, वाचकः -का -कं.

EXPLICIT, *a.* व्यक्तः -क्ता -क्तं, सुव्यक्तः -क्ता -क्तं, स्पष्टः -ष्टा -ष्टं, सुस्पष्टः -ष्टा -ष्टं, सुप्रकाशः -शा -शं, स्पष्टार्थः -र्था -र्थं, भिन्नार्थः -र्था -र्थं, स्फुटः -टा -टं, प्रकटः -टा -टं.

EXPLICITLY, *adv.* व्यक्तं, सुव्यक्तं, स्पष्टं, सुस्पष्टं, सुप्रकाशं, स्पष्टार्थं, भिन्नार्थं, स्फुटं; 'explicitly shews,' स्पष्टयति.

EXPLICITNESS, *s.* व्यक्तत्वं -ता, सुव्यक्तता, स्पष्टता, सुस्पष्टता, सुप्रकाशता, स्पष्टार्थत्वं, भिन्नार्थत्वं, अवक्रता, वाचकता.

To EXPLODE, *v. n.* अन्तरग्निवातादिबलाद् महाशब्देन or महाशब्दपूर्व्वं विभिद् in pass. (-भिद्यते) or विदॄ in pass. (-दीर्य्यते) or स्फुट् (c. 6. स्फुटति -टितुं) or विदल् (c. 1. -दलति -लितुं).

To EXPLODE, *v. a.* (Decry with noise, shew disapprobation) उच्चैःस्वरेण निन्द् (c. 1. निन्दति -न्दितुं), कर्कशशब्देन अप्रसादं or अस्वीकारं सूच् (c. 10. सूचयति -यितुं) or अवज्ञास्पदं कृ.

EXPLODED, *p. p.* (Burst) महाशब्देन विदीर्णः -र्णा -र्णं or विभिन्नः -न्ना -न्नं or स्फुटितः -ता -तं, निरस्तः -स्ता -स्तं.—(Brought into disrepute) अधुनातनव्यवहारविरुद्धः -द्धा -द्धं, नूतनाचारविरुद्धः -द्धा -द्धं, अवज्ञातः -ता -तं, परिभूतः -ता -तं.

EXPLOIT, *s.* कर्म्म *n.* (न्), महाकर्म्म *n.*, चेष्टितं, चेष्टा, विचेष्टितं, चरित्रं, प्रवृत्तिः *f.*, अद्भुतकर्म्म *n.*, आश्चर्य्यकर्म्म *n.*

EXPLORATION, *s.* अन्वेषणा -णं, पर्य्येषणं, अनुसन्धानं, जिज्ञासा, अनुसरणं, परीक्षा -क्षणं, निरूपणं, समीक्षणं, संवीक्षणं, मार्गः -र्गणं, अनुयोगः, शोधनं.

To EXPLORE, *v. a.* अन्विष् (c. 4. -इष्यति, c. 6. -इच्छति -एषितुं -एष्टुं), अनुसन्धा (c. 3. -दधाति -धातुं), निरूप् (c. 10. -रूपयति -यितुं), ज्ञा in des. (जिज्ञासते -सितुं), मार्ग् (c. 1. मार्गति, c. 10. मार्गयति -यितुं), मृग् (c. 10. मृगयते -ति -यितुं), परीक्ष् (c. 1. -ईक्षते -क्षितुं), निरीक्ष्, संवीक्ष्.

EXPLORED, *p. p.* अन्वेषितः -ता -तं, अन्विष्टः -ष्टा -ष्टं, निरूपितः -ता -तं.

EXPLORER, *s.* अन्वेष्टा *m.* (ष्टृ), अन्वेषी *m.* (न्), अनुसन्धाता *m.* (तृ), परीक्षकः.

EXPLOSION, *s.* महाशब्दपूर्व्वं विदारणं or स्फोटनं or स्फुटनं or अकस्माद् विभङ्गः, समहाशब्दो विदारः, आकस्मिकविदारशब्दः, आकस्मिकविभङ्गशब्दः, ध्माशब्दः.

EXPLOSIVE, *a.* आकस्मिकविदारणकारी -रिणी -रि (न्), महाशब्दपूर्व्वविभङ्गकारी &c., ध्माशब्दकारी &c., विस्फारकः -का -कं, शीघ्रदाह्यः -ह्या -ह्यं.

To EXPORT, *v. a.* (Goods to a foreign country) वाणिज्यद्रव्याणि or वस्तूनि विदेशे or देशान्तरे or वहिर्देशे वह् (c. 1. वहति, वोढुं or caus. वाहयति -यितुं) or आवह् or उपवह् or निर्व्विवह् or तॄ in caus. (तारयति -यितुं) or सन्तॄ in caus. or आनी (c. 1. -नयति -नेतुं or caus. -नाययति -यितुं) or उपनी or प्रेर् (c. 10. ईरयति -यितुं).

EXPORTABLE, *a.* देशान्तरे or वहिर्देशे वाह्यः -ह्या -ह्यं or उपवाह्यः &c.

EXPORTATION, *s.* देशान्तरे or वहिर्देशे वाहनं or उपवाहनं or अभिवाहनं or तारणं or प्रेरणं.

EXPORTED, *p. p.* विदेशे or वहिर्देशे वाहितः -ता -तं or तारितः -ता -तं or सन्तारितः -ता -तं or प्रेरितः -ता -तं, देशान्तरीकृतः -ता -तं.

EXPORTS, *s. pl.* विदेशे or वहिर्देशे वाह्यानि वाणिज्यद्रव्याणि or वस्तूनि.

To EXPOSE, *v. a.* (Uncover) विवृ (c. 5. -वृणोति -णुते -वरितुं -रीतुं), अपवृ, अपावृ, उच्छद् (c. 10. -छादयति -यितुं).—(Make public) प्रकाश् (c. 10. -काशयति -यितुं), विकाश्, प्रकाशीकृ, प्रकटीकृ, व्यक्तीकृ, प्रत्यक्षीकृ, प्रादुष्कृ, आविष्कृ.—(Expose to view) प्रत्यक्षीकृ, सर्व्वदृग्गोचरं -रां -रं कृ.—(For sale) पण्यवीथिकायां प्रसृ in caus. (-सारयति -यितुं).—(Make liable) अधीनं -नां -नं कृ.—(To the air) वायुव्याप्यं -प्यां -प्यं कृ.—(To the sun) सूर्य्यव्याप्यं -प्यां -प्यं कृ.—(To contempt, ridicule) अवमानास्पदं कृ, अपहासस्थानं कृ, हास्यं -स्यां -स्यं कृ.—(To danger) भयस्थानं कृ, शङ्कास्पदं कृ; 'to expose the failings of others,' परछिद्राणि विवृ or अपवृ.

EXPOSED, *p. p.* विवृतः -ता -तं, अपावृतः -ता -तं, अनावृतः -ता -तं, अनाच्छादितः -ता -तं, प्रकाशीकृतः -ता -तं, प्रकटीकृतः -ता -तं, प्रसारितः -ता -तं; 'caught out in a crime,' दृष्टदोषः -षा -षं; 'exposed to the weather,' अभ्रावकाशिकः -की -कं; 'exposed for sale,' क्रये प्रसारितः -ता -तं, क्रय्यः -य्या -य्यं, पण्यः -ण्या -ण्यं, पण्यवीथिकायां प्रसारितः -ता -तं.

EXPOSITION, *s.* विवृतिः *f.*, विवरणं, व्याख्या -ख्यानं, स्पष्टीकरणं, प्रकाशनं, व्याकृतिः *f.*, व्याकरणं, व्यक्तीकरणं, चूर्णिकं.

EXPOSITOR, *s.* व्याख्याता *m.* (तृ), प्रकाशकः, प्रवक्ता *m.* (क्तृ), अर्थपरिशोधकः, अर्थविज्ञापकः, चूर्णिकृत् *m.*

EXPOSITORY, *a.* व्यञ्जकः -का -कं, प्रकाशकः -का -कं, उद्देशकः -का -कं.

To EXPOSTULATE, *v. a.* आपत्तिं कृ, अन्यायेन or असम्यक् or अनुचितं करोषि or अन्याय्यकर्म्म त्वया कृतम् इत्यादिनिन्दावाक्यैर् अकृत्यकारिणं कञ्चिज्जनं निवृ in caus. (-वारयति -यितुं), मैवं कार्षीः or मैवं कृथाः or नैतत् त्वया करणीयम् इत्यादिवाक्यैर् अन्यायकारिणा सह विचर् (c. 10. -चारयति -यितुं) or अन्याय्यकर्म्मणः कञ्चिज्जनं निवृत् in caus. (-वर्त्तयति -यितुं), प्रत्यादिश् (c. 6. -दिशति -देष्टुं).

EXPOSTULATION, *s.* आपत्तिः *f.*, अन्याय्यकर्म्म or असम्यक्कर्म्म or अयुक्तकर्म्म करोषि or कुकर्म्म त्वया कृतम् इत्यादिनिन्दार्थकं वाक्यं or इत्यादिवाक्यैर् अन्यायकारिणा सह विचारणं, निवर्त्तनार्थं वाक्यं, निषेधार्थकं प्रबोधवाक्यं, प्रतिवादः, प्रत्यादेशः.

EXPOSTULATORY, *a.* आपत्तिमयः -यी -यं, निन्दामयः -यी -यं, प्रत्यादेशकः -का -कं.

EXPOSURE, *s.* विवृतिः *f.*, विवरणं, प्रकाशनं, विकाशनं, व्यक्तीकरणं, प्रकटीकरणं, प्रत्यक्षीकरणं, दृग्गोचरीकरणं, प्रसारणं; 'to the air,' वायुव्यापकत्वं.

To EXPOUND, *v. a.* व्याख्या (c. 2. -ख्याति -तुं), व्याकृ, प्रवद् (c. 1. -वदति -दितुं), प्रवच् (c. 2. -वक्ति -क्तुं), स्पष्टीकृ, व्याहृ (c. 1. -हरति -हर्त्तुं), व्याचक्ष् (c. 2. -चष्टे), विवृ (c. 5. -वृणोति -वरितुं -रीतुं), प्रकाश् (c. 10. -काशयति -यितुं), निरूप् (c. 10. -रूपयति -यितुं), विब्रू (c. 2. -ब्रवीति).

EXPOUNDED, *p. p.* व्याख्यातः -ता -तं, व्याकृतः -ता -तं, विवृतः -ता -तं, प्रकाशितः -ता -तं, निरूपितः -ता -तं, स्पष्टीकृतः -ता -तं, व्याहृतः -ता -तं.

EXPOUNDER, *s.* व्याख्याता *m.* (तृ), प्रवक्ता *m.* (क्तृ), वक्ता *m.*, वादी *m.* (न्), प्रकाशकः, वाचकः, अर्थशोधकः; 'of the law,' धर्म्मप्रवक्ता *m.*

To EXPRESS, *v. a.* (Press out) निष्पीड् (c. 10. -पीडयति -यितुं), निपीड्, निष्कृष् (c. 1. -कर्षति -क्रष्टुं), निर्हृ (c. 1. -हरति -हर्त्तुं), निर्दुह् (c. 2. -दोग्धि -ग्धुं).—(Utter, declare) वद् (c. 1. वदति -दितुं), कथ् (c. 10. कथयति -यितुं), उदाहृ (c. 1. -हरति -हर्त्तुं), व्याहृ, उच्चर् (c. 10. -चारयति -यितुं), ज्ञा in caus. (ज्ञापयति -यितुं), विज्ञा, आविद् in caus. (-वेदयति -यितुं), कृत् (c. 10. कीर्त्तयति -यितुं), प्रकाश् (c. 10. -काशयति -यितुं), सूच् (c. 10. सूचयति -यितुं), बुध् (c. 10. बोधयति -यितुं).—(Represent, exhibit) सूच्, दृश् in caus. (दर्शयति -यितुं); 'by gestures, &c.,' नट् (c. 10. नाटयति -यितुं), अभिनी (c. 10. -नयति -नेतुं), रूप् (c. 10. रूपयति -यितुं); 'they express love,' शृङ्गारभावं नाटयन्ति; 'he expresses delight,' हर्षं नाटयति; 'in painting, &c.,' प्रतिरूपं कृ, प्रतिमूर्त्तिं कृ, प्रतिमानं कृ.—(Indicate) सूच्, उद्दिश् (c. 6. -दिशति -देष्टुं), निर्दिश्, लक्ष् (c. 10. लक्षयति -यितुं).

EXPRESS, *a.* (Clear) व्यक्तः -क्ता -क्तं, सुव्यक्तः -क्ता -क्तं, स्पष्टः -ष्टा -ष्टं, स्पष्टार्थः -र्था -र्थं, अवक्रः -क्रा -क्रं, अवक्रार्थः -र्था -र्थं, भिन्नार्थः -र्था -र्थं, असन्दिग्धार्थः -र्था -र्थं; 'in express terms,' स्पष्टार्थतस्.

EXPRESS, *s.* (Courier) वेगी *m.* (न्), प्रजवी *m.* (न्), जवी *m.*, तरस्वी *m.* (न्), उद्वेगः, त्वरितः, जवनः, जवः, धावकः, अध्वगः, वार्त्ताहरः.

EXPRESSED, *p. p.* (In words) उक्तः -क्ता -क्तं, कथितः -ता -तं, आवेदितः -ता -तं, अभिहितः -ता -तं.—(Shewn, indicated) दर्शितः -ता -तं

सूचितः -ता -तं.

Expressible, *a.* कथनीयः -या -यं, कथ्यः -थ्या -थ्यं, निर्वचनीयः -या -यं, आख्येयः -या -यं.—(To be pressed out) निष्कर्षणीयः -या -यं, निर्हरणीयः -या -यं.

Expression, *s.* (Declaration) वादः, कथनं, ज्ञापनं, विज्ञापनं, ख्यापनं, आवेदनं, अभिधानं, बोधनं, कीर्त्तनं, प्रवचनं.—(Utterance) उदाहरणं, व्याहरणं, उच्चारणं.—(Phrase, word) उक्तिः *f.*, वाक्यं, वचनं, उक्तं, वाक् *f.* (च्), शब्दः, अभिधेयं, वचः *n.* (स्), पदं; 'authorized expression,' आप्तोक्तिः.—(Style, manner) रीतिः *f.*, मार्गः, व्यापारः; 'style of expression,' वाग्व्यापारः.—(Feeling, tone) रसः.

Expressive, *a.* वाचकः, -का -कं, सूचकः -का -कं, उद्बोधकः -का -कं, अभिधायिकः -का -कं, उद्देशकः -का -कं, अर्थः -र्था -र्थं or अर्थकः -का -कं in comp.; as, 'expressive of tenderness,' करुणार्थकः -का -कं.—(Full of meaning) पूर्णार्थः -र्था -र्थं, अर्थवान् -वती -वत् (त्), सार्थः -र्था -र्थं, गुर्वर्थः -र्था -र्थं, साकूतः -ता -तं.

Expressively, *adv.* पूर्णार्थतस्, व्यक्तार्थतस्, सार्थं, साकूतं, सगौरवं.

Expressiveness, *s.* वाचकत्वं, पूर्णार्थत्वं, अर्थवत्त्वं, सार्थत्वं, गौरवं.

Expressly, *adv.* व्यक्तं, सुव्यक्तं, सुस्पष्टं, स्पष्टार्थतस्, व्यक्तार्थतस्, अवक्रं, असन्दिग्धार्थतस्.

To Exprobate, *v. a.* निन्द् (c. 1. निन्दति -न्दितुं), गर्ह् (c. 1. गर्हते -र्हितुं), विगर्ह्, कुत्स् (c. 10. कुत्सयति -यितुं), उपालभ् (c. 1. -लभते -लब्धुं), तिरस्कृ.

Exprobation, *s.* निन्दा, गर्हा, तिरस्कारः, दुर्वाक्यं, भर्त्सनवाक्यं, उपक्रोशः.

To Expugn, *v. a.* दुर्गं लङ्घ् (c. 10. लङ्घयति -यितुं), विजि (c. 1. -जयते -ति -जेतुं).

Expugnable, *a.* लङ्घनीयः -या -यं, आक्रमणीयः -या -यं, विजेतव्यः -व्या -व्यं.

Expugnation, *s.* दुर्गलङ्घनं, दुर्गाक्रमणं, विजयः, जयः.

Expulsion, *s.* अपसारणं, निःसारणं, निरसनं, निराकरणं, अपनोदः -दनं, निर्वासनं, विवासनं, प्रवासनं, प्रव्राजनं, वहिष्करणं, निष्कासनं, निःकासनं, प्रयापणं.—(The state) प्रवासः, विवासः.

Expulsive, *a.* अपनोदनः -ना -नं, निरसनः -ना -नं, निराकरिष्णुः -ष्णुः -ष्णु.

Expunction, *s.* लोपः, विलोपः -पनं, उच्छेदः, अपमार्जना, व्यामर्षः, विनाशः.

To Expunge, *v. a.* लुप् (c. 6. लुम्पति, लोप्तुं, c. 10. लोपयति -यितुं), विलुप्, उच्छिद् (c. 7. -छिनत्ति -छेत्तुं), व्यामृज् (c. 2. -मार्ष्टि -ष्टुं), अपमृज्, उन्मृज्, व्यामृश् (c. 6. -मृशति -मर्ष्टुं), विनश् in caus. (-नाशयति -यितुं), उद्धृ (c. 1. -हरति -हर्त्तुं).

Expunged, *p. p.* उच्छिन्नः -न्ना -न्नं, लुप्तः -प्ता -प्तं, व्यामृष्टः -ष्टा -ष्टं, उद्धृतः -ता -तं.

To Expurgate, *v. a.* शुध् (c. 10. शोधयति -यितुं), विशुध्, पू (c. 9. पुनाति -नीते, पवितुं), विपू, परिपू, निर्म्मलीकृ, मलं हृ (c. 1. हरति, हर्त्तुं), पवित्रीकृ, शुचीकृ, परिष्कृ.

Expurgated, *p. p.* विशोधितः -ता -तं, पावितः -ता -तं, पवित्रीकृतः -ता -तं.

Expurgation, *s.* शोधनं, विशोधनं, पावनं, पवित्रीकरणं, मलापकर्षणं, निर्म्मलीकरणं, परिष्करणं.

Expurgatory, *a.* शोधकः -का -कं, पावकः -का -कं, पावनः -ना -नं.

Exquisite, *a.* (Choice) उत्तमः -मा -मं, शिष्टः -ष्टा -ष्टं, विशिष्टः -ष्टा -ष्टं, उत्कृष्टः -ष्टा -ष्टं.—(Nice, accurate) सूक्ष्मः -क्ष्मा -क्ष्मं, समञ्जसः -सा -सं, शुद्धः -द्धा -द्धं.—(Highest) परमः -मा -मं, उत्तमः -मा -मं; 'exquisite delight,' परमानन्दः, परमहर्षः, रोमहर्षणं, पुलकः; 'causing exquisite pleasure,' परमानन्ददः -दा -दं, रुचिरमुद् *m. f. n.*—(Keen) तीक्ष्णः -क्ष्णा -क्ष्णं, तीव्रः -व्रा -व्रं; 'exquisite pain,' तीव्रवेदना.

Exquisitely, *adv.* (Nicely) सूक्ष्मं, सूक्ष्मत्वेन, ससौक्ष्म्यं, अञ्जसा.—(In a high degree) परमं, उत्तमं; 'exquisitely delighted,' परमहृष्टः -ष्टा -ष्टं, पुलकितः -ता -तं, हर्षरोमाञ्चितः -ता -तं.

Exquisiteness, *s.* (Nicety) सूक्ष्मता, सौक्ष्म्यं, सामञ्जस्यं.—(Keenness) तीक्ष्णता, तैक्ष्ण्यं, तीव्रता.—(Choiceness) उत्तमता, उत्कृष्टता.

To Exsiccate, *v. a.* शुष् in caus. (शोषयति -यितुं), उच्छुष्, विशुष्.

Exsiccation, *s.* शोषः -षणं, उच्छोषणं, परिशोषः, विशोषणं, नीरसीकरणं.

Exsiccant, exsiccative, *a.* शोषकः -का -कं, उच्छोषणः -णी -णं, विशोषणः -णी -णं.

Exspuition, *s.* निष्ठीवः -वनं, निष्ठेवनं, श्लेष्मनिरसनं, उद्गिरणं.

Extant, *a.* (Protruding) वहिःस्थः -स्था -स्थं, वहिर्भूतः -ता -तं.—(In existence) विद्यमानः -ना -नं, वर्त्तमानः -ना -नं, प्रकाशः -शा -शं.

Extasy, extatic. *See* Ecstacy, ecstatic.

Extemporaneous, extemporary, *a.* अचिन्तापूर्व्वः -र्व्वा -र्व्वं, अपूर्व्वचिन्तः -न्ता -न्तं, अचिन्तितः -ता -तं, अयत्नपूर्व्वः -र्व्वा -र्व्वं, अयत्नकृतः -ता -तं, अयत्नभूतः -ता -तं, आकस्मिकः -की -कं, अविचारितः -ता -तं, अकल्पितः -ता -तं, अध्यानपूर्व्वः -र्व्वा -र्व्वं, प्रस्तुतः -ता -तं, समयोपयुक्तः -क्ता -क्तं, प्रस्तावयोग्यः -ग्या -ग्यं.

Extempore, *adv.* पूर्व्वचिन्तां or पूर्व्वयत्नम् अकृत्वा, चिन्तां विना, पूर्व्वध्यानं विना, अचिन्तितं, अविचारितं, अनायासेन, द्रुतं.

To Extemporize, *v. n.* पूर्व्वचिन्ताम् अकृत्वा वद् (c. 1. वदति -दितुं), अकस्मात् or पूर्व्वविचारं विना वद्.

To Extend, *v. a.* तन् (c. 8. तनोति -नितुं), वितन्, व्यातन्, प्रतन्, विततीकृ, प्रसृ in caus. (-सारयति -यितुं), अतिसृ, विसृ; विस्तृ or विस्तॄ (c. 5. -स्तृणोति, c. 9. -स्तृणाति -स्तरितुं -रीतुं, c. 10. -स्तारयति -यितुं), प्रथ् (c. 10. प्रथयति -यितुं), आयम् (c. 1. -यच्छति -यन्तुं), प्रपञ्च् (c. 10. -पञ्चयति -यितुं), प्रचर् in caus. (-चारयति -यितुं).—(Extend the hand, &c.) हस्तं प्रसृ in caus. or प्रग्रह् (c. 9. -गृह्णाति -ग्रहीतुं).—(Enlarge) वृध् in caus. (वर्धयति -यितुं), संवृध्, विवृध्, विशालीकृ, विपुलीकृ, प्रचुरतरं -रां -रं कृ.—(Grant, impart) दा (c. 3. ददाति, दातुं), प्रदा, अनुदा, प्रयम्.—(Prolong) द्राघ (nom. द्राघयति -यितुं), दीर्घीकृ, दीर्घतरं -रां -रं कृ.

To Extend, *v. n.* तन् in pass. (तन्यते), वितन्, विततीभू, प्रसृ (c. 1. -सरति -सर्त्तुं), प्रसृप् (c. 1. -सर्पति -सर्प्तुं), विसृप्, आया (c. 2. -याति -तुं), आयम् (c. 1. -यच्छते -यन्तुं), प्रथ् (c. 1. प्रथते -थितुं), विप्रथ्, प्ररुह् (c. 1. -रोहति -रोढुं), विरुह्, विस्तृ in pass. (-स्तीर्य्यते), व्याप् (c. 5. -आप्नोति -आप्तुं), विप्रस्था (c. 1. -तिष्ठति -स्थातुं), प्रवृध् (c. 1. -वर्धते -र्धितुं), विजृम्भ् (c. 1. -जृम्भते -म्भितुं).

Extended, *p. p.* विततः -ता -तं, प्रविततः -ता -तं, आततः -ता -तं, सन्ततः -ता -तं, आयतः -ता -तं, समायतः -ता -तं, आयामितः -ता -तं, व्यायतः -ता -तं, प्रथितः -ता -तं, प्रसारितः -ता -तं, प्रसृतः -ता -तं, विसृतः -ता -तं, विस्तृतः -ता -तं, विस्तीर्णः -र्णा -र्णं, बहुविस्तीर्णः -र्णा -र्णं, आयतिमान् -मती -मत् (त्), विरूढः -ढा -ढं, प्ररूढः -ढा -ढं, प्रवृद्धः -द्धा -द्धं, परिगतः -ता -तं, विजृम्भितः -ता -तं.—(As the hand, &c.) प्रसारितः -ता -तं, उच्छ्रितः -ता -तं; 'having the fingers extended,' उच्छ्रिताङ्गुलिः -लिः -लि.

Extendible, extensible, *a.* विस्तारयितुं or वितनितुं शक्यः -क्या -क्यं, विस्तारणीयः -या -यं, प्रसारणीयः -या -यं, विस्तारणक्षमः -मा -मं, आयाम्यः -म्या -म्यं.

Extensibility, *s.* विस्तारणीयता, वितनितुक्षमता, आयाम्यता.

Extension, *s.* विस्तारः, विस्तृतिः *f.*, विस्तीर्णता, विस्तरः, विततिः *f.*, प्रततिः *f.*, आयतिः *f.*, आयामः, वितानः -नं, तानः, सन्ततिः *f.*, प्रसारणं, प्रसरणं, प्रसरः, विसरणं, प्रसर्पणं, विसर्पणं, प्रपञ्चः, व्याप्तिः *f.*, व्यापनं, वृद्धिः *f.*

प्रवृद्धिः f., प्रपञ्चः, न्यासः, विपुलता.

EXTENSIVE, a. विस्तीर्णः -र्णा -र्णं, विपुलः -ला -लं, विशालः -ला -लं, सुपर्य्याप्तः -प्ता -प्तं, बृहन् -हती -हत् (त्), पृथुः -थ्वी -थु, पृथुलः -ला -लं, प्रचुरः -रा -रं, विकटः -टा -टं, आयतः -ता -तं, आयतिमान् -मती -मत् (त्), असम्बाधः -धा -धं, अत्यन्तः -न्ता -न्तं.

EXTENSIVELY, adv. सुविस्तीर्णं, सुविस्तरं, सुविस्तरेण, विस्तरशस्, अतिमात्रं, विपुलं, प्रचुरं, सामान्यतस्.

EXTENSIVENESS, s. विस्तीर्णता, विस्तारः, विस्तृतिः f., विपुलता, विशालता, पृथुत्वं, बृहत्त्वं, परिसरः, आयतिः f., व्याप्तिः f., व्यापकत्वं.

EXTENT, s. (Bulk, width, length) विस्तारः, विशालता, विपुलता, बृहत्त्वं, आयतिः f., आयामः, प्रपञ्चः, सन्ततिः f., वितानकं, पाटः.—(Compass) परिमाणं, परिणाहः, परिसरः, परिधिः m.—(Degree, measure) मात्रं, परिमाणं, प्रमाणं, मात्रा.—(Limit) पर्य्यन्तं.—(Range) विषयः; 'to what extent?' कियत्पर्य्यन्तं, किम्पर्य्यन्तं, कियत्प्रमाणं; 'to such extent,' एतावत्; 'such an extent,' एतावत्त्वं; 'to a slight extent,' ईषत्, किञ्चित्, अल्पमात्रं, स्तोकं.

To EXTENUATE, v. a. (Lessen) न्यूनीकृ, न्यून् (c. 10. -नयति -यितुं), लघ (nom. लघयति -यितुं), कन (nom. कनयति -यितुं), अल्पीकृ, क्षीणीकृ, ह्रस (c. 10. ह्रासयति -यितुं).—(A crime) शम् (c. 10. शमयति -यितुं), उपशम्, पापापनुत्तिं कृ, पापक्षालनं कृ.

EXTENUATED, p. p. उपशान्तः -न्ता -न्तं, शमितः -ता -तं, न्यूनीकृतः -ता -तं.

EXTENUATION, s. पापोपशान्तिः f., पापशान्तिः f., उपशमः, पापापनोदनं, पापापनुत्तिः f., पापमार्जना, पापप्रक्षालनं, पापापेक्षा.

EXTERIOR, a. बाह्यः -ह्या -ह्यं, बाहीकः -का -कं, बहिःस्थः -स्था -स्थं, बहिर्भूतः -ता -तं, बहिर्भवः -वा -वं, बहिस् in comp.; as, 'an exterior object,' बहिरङ्गः.

EXTERIOR, s. बहिर्भागः, बाह्यभागः, बहिर्भावः, उपरिस्थभागः.

To EXTERMINATE, v. a. उच्छिद् (c. 7. -छिनत्ति -छेत्तुं), समूलं or आमूलम् उद्धृ (c. 1. -हरति -हर्त्तुं) or समुद्धृ or उत्पट् (c. 10. -पाटयति -यितुं), उन्मूल् (c. 10. -मूलयति -यितुं), नश् in caus. (नाशयति -यितुं), विनश्.

EXTERMINATED, p. p. उच्छिन्नः -न्ना -न्नं, विनाशितः -ता -तं, उद्धृतः -ता -तं, उत्पाटितः -ता -तं, उन्मूलितः -ता -तं, सादितः -ता -तं.

EXTERMINATION, s. उच्छेदः, समुच्छेदः, उच्छित्तिः f., सर्व्वनाशः, उद्धरणं, समूलोत्पाटनं, मूलादुद्धरणं, उन्मूलनं, समूलघातं, विनाशः, प्रलयः, लोपः, शोधनं.

EXTERMINATOR, s. उद्धर्त्ता m. (र्त्तृ), विनाशकः, उच्छेदी m. (न्).

EXTERMINATORY, a. उच्छेदी -दिनी -दि (न्), सर्व्वनाशकः -का -कं.

EXTERNAL, a. बाह्यः -ह्या -ह्यं, बाहीकः -का -कं, बहिःस्थः -स्था -स्थं, बहिर्वर्त्ती -र्त्तिनी -र्त्ति (न्), बहिर्भूतः -ता -तं, बहिर्भवः -वा -वं, बहिस् in comp.; as, 'an external part,' बहिरङ्गः.

EXTERNALLY, adv. बाह्यतस्, बहिस्, बहिर्भागे, उपरिभागे; 'produced externally,' बहिर्भवः -वा -वं.

EXTINCT, a. (Extinguished) शान्तः -न्ता -न्तं, शमितः -ता -तं, निर्वाणः -णा -णं.—(Abolished, at an end) नष्टः -ष्टा -ष्टं, विनष्टः -ष्टा -ष्टं, निवृत्तः -त्ता -त्तं, निर्वृत्तः -त्ता -त्तं, विगतः -ता -तं, निर्गतः -ता -तं, अवसितः -ता -तं, अवसन्नः -न्ना -न्नं, क्षीणः -णा -णं, परिक्षीणः -णा -णं, उच्छिन्नः -न्ना -न्नं, लुप्तः -प्ता -प्तं; 'becomes extinct,' शाम्यति.

EXTINCTION, EXTINGUISHMENT, s. (Quenching) निर्वाणं, निर्वापणं, शान्तिः f.—(Abolition, destruction) नाशः, विनाशः, प्रणाशः उच्छेदः, समुच्छेदः, उद्धरणं, लोपः, विलोपनं, क्षयः, संहारः; 'of race,' निर्वंशः.

To EXTINGUISH, v. a. (Quench) निर्वा in caus. (-वापयति -यितुं), शम् in caus. (शमयति -यितुं), उपशम्, प्रशम्.—(Destroy, put an end to) नश् in caus. (नाशयति -यितुं), विनश्, निवृत् in caus. (-वर्त्तयति -यितुं), उच्छिद् (c. 7. -छिनत्ति -छेत्तुं), निर्दह् (c. 1. -दहति -दग्धुं), लुप् (c. 6. लुम्पति, लोप्तुं, c. 10. लोपयति -यितुं), सद् in caus. (सादयति -यितुं); 'to be extinguished,' शम् (c. 4. शाम्यति, शमितुं), निर्वा (c. 4. -वायति).

EXTINGUISHABLE, a. शाम्यः -म्या -म्यं, शमनीयः -या -यं, निर्वाप्यः -प्या -प्यं, निर्वापणीयः -या -यं, नाश्यः -श्या -श्यं, नाशनीयः -या -यं, विलोपनीयः -या -यं.

EXTINGUISHED, p. p. (Quenched) निर्वाणः -णा -णं, निर्वापितः -ता -तं, शान्तः -न्ता -न्तं, संशान्तः -न्ता -न्तं, शमितः -ता -तं, प्रशमितः -ता -तं, शान्ताग्निः -ग्निः -ग्नि, शान्तार्च्चिः -र्च्चिः -र्च्चि.—(Destroyed) नष्टः -ष्टा -ष्टं, विनष्टः -ष्टा -ष्टं.

EXTINGUISHER, s. निर्वापकः, निर्वाणकारी m. (न्).—(Of a candle) दीपनिर्वापकः.

To EXTIRPATE, v. a. उन्मूल् (c. 10. -मूलयति -यितुं), समुन्मूल्, मूलात् or समूलम् उद्धृ (c. 1. -हरति -हर्त्तुं), समुद्धृ, उच्छिद् (c. 7. -छिनत्ति -छेत्तुं), उत्पट् (c. 10. -पाटयति -यितुं), व्यपरुह् in caus. (-रोपयति -यितुं), उद्वृह् (c. 6. -वृहति -वर्हितुं), निष्कुष् (c. 9. -कुष्णाति -कोषितुं).

EXTIRPATED, p. p. उन्मूलितः -ता -तं, उत्पाटितः -ता -तं, उच्छिन्नः -न्ना -न्नं, उद्धृतः -ता -तं, व्यपरोपितः -ता -तं, आवर्हितः -ता -तं, आवृहितः -ता -तं, निष्कुषितः -ता -तं, निर्वीजः -जा -जं.

EXTIRPATION, s. उन्मूलनं, उत्पाटनं, उच्छेदः, उद्धरणं, समूलोत्पाटनं समूलोद्धरणं, उच्छित्तिः f., व्यपरोपणं, निष्कोषणं, नाशः, विनाशः.

EXTIRPATOR, s. उद्धर्त्ता m. (र्त्तृ), उन्मूलयिता m. (तृ), उच्छेदी m. (न्).

To EXTOL, v. a. प्रशंस् (c. 1. -शंसति -सितुं), अभिप्रशंस्, स्तु (c. 2. स्तौति, स्तोतुं), अभिष्टु, संस्तु, विष्टु, परिसंस्तु, श्लाघ् (c. 1. श्लाघते -घितुं, c. 10. श्लाघयति -यितुं), कृत् (c. 10. कीर्त्तयति -यितुं), प्रथ् (c. 10. प्रथयति -यितुं), विख्या (c. 2. -ख्याति -तुं), प्रख्या.

EXTOLLED, p. p. प्रशंसितः -ता -तं, कीर्त्तितः -ता -तं, अभिष्टुतः -ता -तं.

EXTOLLER, s. प्रशंसकः, कीर्त्तयिता m. (तृ), अनुकीर्त्तनकृत् m., स्तावकः.

EXTORSIVE, a. बाधकः -का -कं, उपद्रवी -विणी -वि (न्), सबाधः -धा -धं.

To EXTORT, v. a. and n. बलात् or बलेन ग्रह् (c. 9. गृह्णाति, ग्रहीतुं), अन्यायत आदा (c. 3. -दत्ते -ददाति -दातुं), दा in caus. (दापयति -यितुं), विहा in caus. (-हापयति -यितुं), आहृ in caus. (-हारयति -यितुं), बाध् (c. 1. बाधते -धितुं), परिबाध्, उपधिं कृ.

EXTORTED, p. p. बलाद्गृहीतः -ता -तं, दापितः -ता -तं, विहापितः -ता -तं.

EXTORTER, EXTORTIONER, s. अन्यायेन परस्वादायी m. (न्), बलेन परस्वग्राहकः, बाधकः, उपद्रवी m. (न्), उपधिकः, औपधिकः, दुर्वृत्तः, दुरात्मा m. (न्), दस्युः m., लोठयिता m. (तृ).

EXTORTION, s. अन्यायेन or बलेन परस्वग्रहणं, बाधः-धनं, उपद्रवः, विप्लवः, अभिद्रोहः, उपधिकरणं, उपधिः m., बलात्कारः, निठुरता, दौरात्म्यं, हठः.

EXTRA, s. अधिकं, आधिक्यं, आतिरेक्यं, अति in comp.—(Beyond the usual quantity) अधिकः -का -कं, अतिरिक्तः -क्ता -क्तं, निरूपितपरिमाणातिरिक्तः -क्ता -क्तं.

To EXTRACT, v. a. निष्कृष् (c. 1. -कर्षति -क्रष्टुं), उत्कृष्, आकृष्; उद्धृ (c. 1. -हरति -हर्त्तुं), निर्हृ, उद्ग्रह् (c. 9. -गृह्णाति -ग्रहीतुं), निर्दुह् (c. 2. -दोग्धि -ग्धुं), निष्कुष् (c. 9 -कुष्णाति -कोषितुं), उत्खन् (c. 1. -खनति -नितुं), उद्वृह् (c. 6. -वृहति -वर्हितुं), उत्पद् in caus. (-पादयति -यितुं), निर्गम् in caus. (-गमयति -यितुं), 'the teeth,' दन्तान् उद्धृ.

EXTRACT, s. (That which is extracted) उद्धृतं, उद्धारः, निष्कर्षः,

चूर्णि: m.—(Essence) रस:, निर्यास:, निर्य्यूह:, कषाय:, अवलेह:; 'of flowers,' पुष्पनिर्यास:.—(Epitome) सङ्ग्रह:, सार:, संक्षेप:.

Extracted, *p. p.* उद्धृत: -ता -तं, निष्कर्षित: -ता -तं, निर्हृत: -ता -तं, निष्कुषित: -ता -तं, निर्गत: -ता -तं, उद्गृहीत: -ता -तं, व्यवस्थित: -ता -तं; 'having the teeth extracted,' उद्धृतदंष्ट्र: -ष्ट्रा -ष्ट्रं.

Extraction, *s.* उद्धार:, निर्हार:, निष्कर्षणं, अभ्यवकर्षणं, आकर्षणं, निष्कोषणं, व्यवस्थिति: *f.*—(Birth, lineage) जन्म *n.* (न्), जाति: *f.*, उत्पत्ति: *f.*, उद्भव:, सम्भव:, वंश:, कुलं; 'of high extraction,' महाकुल: -ला -लं; 'of royal extraction,' राजवंश्य: -श्या -श्यं.

Extra-judicial, *a.* व्यवहारविधिवहिर्भूत: -ता -तं, व्यवहारबाह्य: -ह्या -ह्यं, व्यवहारातिरिक्त: -क्ता -क्तं, व्यवहारातिचर: -रा -रं, व्यवहारातिक्रान्त: -न्ता -न्तं.

Extra-judicially, *adv.* व्यवहारविधिव्यतिरेकेण, व्यवहारम् अतिक्रम्य.

Extra-mundane, *a.* लोकवहिर्भूत: -ता -तं, लोकबाह्य: -ह्या -ह्यं, अतिसंसार: -रा -रं, अलौकिक: -की -कं, असांसारिक: -की -कं.

Extraneous, *a.* बाह्य: -ह्या -ह्यं, बाहीक: -का -कं, वहिर्भव: -वा -वं, वहिर्भूत: -ता -तं, वहि:स्थ: -स्था -स्थं, भिन्न: -न्ना -न्नं, विभिन्न: -न्ना -न्नं, अन्य: -न्या -न्यत्, पर: -रा -रं, विविक्त: -क्ता -क्तं, असहज: -जा -जं, असम्बन्धी -न्धिनी -न्धि (न्), विदेशीय: -या -यं.

Extraordinarily, *adv.* अपूर्व्वप्रकारेण, अद्भुतप्रकारेण, अद्भुतं, असाधारण्येन, वैलक्षण्येन, विचित्रं, आश्चर्य्यप्रकारेण, अप्रसिद्धं.

Extraordinariness, *s.* अद्भुतत्वं, आश्चर्य्यत्वं, अपूर्व्वत्वं, अप्रसिद्धत्वं, वैलक्ष्यं, वैलक्षण्यं, असाधारण्यं, विचित्रता.

Extraordinary, *a.* अपूर्व्व: -र्व्वा -र्व्वं, अदृष्टपूर्व्व: -र्व्वा -र्व्वं, असाधारण: -णी -णं, असामान्य: -न्या -न्यं, अप्रसिद्ध: -द्धा -द्धं, आश्चर्य्य: -र्य्या -र्य्यं, महाद्भुत: -ता -तं, अद्भुत: -ता -तं, अप्रकृत: -ता -तं, विचित्र: -त्रा -त्रं, विलक्षण: -णा -णं, अधिक: -का -कं, लोकोत्तर: -रा -रं, अधिकोत्तर: -रा -रं, विरल: -ला -लं.

Extravagance, *s.* (In expenditure) अतिव्यय:, अपव्यय:, महान् व्यय:, धनव्यय:, धनोत्सर्ग:, अर्थोत्सर्ग:, धनमोक्षणं, अर्थदण्डनं, व्ययापरिमितता, —(Excess in general) अतिक्रम:, उत्क्रम:, मर्य्यादातिक्रम:, नियमातिक्रम:, अमर्य्यादा, अपरिमितता, अत्यय:, अत्याचार:, व्यभिचार:.

Extravagant, *a.* (Prodigal) अतिव्ययी -यिनी -यि (न्), अपव्ययी &c., व्ययशील: -ला -लं, अपरिमितव्यय: -या -यं, अर्थघ्न: -घ्नी -घ्नं, धनापचेता -त्री -तृ (तृ), मुक्तहस्त: -स्ता -स्तं.—(Exceeding bounds) मर्य्यादातिक्रमी -मिणी -मि (न्), अतिक्रान्तमर्य्याद: -दा -दं, उत्क्रान्तमर्य्याद: -दा -दं, अमर्य्याद: -दा -दं, अतिमर्य्याद: -दा -दं, अपरिमित: -ता -तं, अत्याचारी -रिणी -रि (न्), व्यभिचारी -रिणी -रि (न्).

Extravagantly, *adv.* (Prodigally) अतिव्ययेन, महाव्ययेन, मुक्तहस्तेन. —(Beyond all bounds) अतिमर्य्यादं, अत्यन्तं, अतिमात्रं, अतिशयेन, अपरिमितं.

To Extravagate, *v. a.* मर्य्यादाम् अतिक्रम् (c. 1. -क्रामति -क्रमितुं), उत्क्रम्, व्युत्क्रम्.

Extravagation, *s.* मर्य्यादातिक्रम:, नियमातिक्रम:, उत्क्रम:, उल्लङ्घनं.

Extravasated, *a.* नाडिवहिर्भूत: -ता -तं, नाडिवहिष्कृत: -ता -तं, शिरावहिर्गत: -ता -तं.

Extravasation, *s.* नाडिवहिष्करणं, रक्तोत्सर्ग:, रक्तमोक्षणं.

Extreme, *a.* (Outermost) बाह्य: -ह्या -ह्यं.—(Greatest, utmost) परम: -मा -मं, महान् -हती -हत् (त्), अत्यन्त: -न्ता -न्तं, आत्यन्तिक: -की -कं, उत्तम: -मा -मं, पर: -रा -रं, अतिशय or अति prefixed; as, 'extreme pain,' अतिव्यथा.—(Last) चरम: -मा -मं, अन्तिम: -मा -मं, अन्त or शेष in comp.; 'extreme part,' शेषभाग:; 'extreme limit,' परमावधि: *m.*

Extreme, *s.* अन्त: -न्तं, पर्य्यन्तं, पार: -रं, उत्तमावधि: *m.*, परमावधि: *m.*, शेषभाग:.—(Excess) अत्यन्तता, आधिक्यं, आतिशय्यं.

Extremely, *adv.* अत्यन्तं, अतिशयेन, अतिमात्रं, नितान्तं, अत्यर्थं, एकान्तं -न्ततस्, परमं, परं, अतीव, बहु, अति or अतिशय prefixed; as, 'extremely passionate,' अत्यन्तकोपन: -ना -नं.

Extremity, *s.* (Utmost point) अन्त: -न्तं, अग्रं, अग्रभाग:, पर्य्यन्तं, प्रान्त:, सीमा, अवधि: *m.*, पार: -रं, उत्तमावधि: *m.*, परमावधि: *m.*, शेषावधि: *m.*, शेषभाग:; 'the lower extremities,' अध:काय:, शरीरस्य अधोभाग:.—(Utmost distress) अतिकृच्छ्रं, अत्यन्तक्लेश:, अत्यन्तदु:खं.

Extricable, *a.* उद्धरणीय: -या -यं, उद्धार्य्य: -र्य्या -र्य्यं, मोचनीय: -या -यं.

To Extricate, *v. a.* उद्धृ (c. 1. -हरति -हर्त्तुं), समुद्धृ, मुच् (c. 6. मुञ्चति, मोक्तुं, c. 10. मोचयति -यि॒तुं), विमुच्, प्रविमुच्, उत्तॄ in caus. (-तारयति -यितुं), निस्तॄ, सन्तॄ; मोक्ष् (c. 10. मोक्षयति -यितुं), त्रै (c. 1. त्रायते, त्रातुं), परित्रै, सन्त्रै, रक्ष् (c. 1. रक्षति -क्षितुं), विशुध् (c. 10. -शोधयति -यितुं).

Extricated, *p. p.* उद्धृत: -ता -तं, समुद्धृत: -ता -तं, उत्तीर्ण: -र्णा -र्णं, निस्तारित: -ता -तं, तारित: -ता -तं, मुक्त: -क्ता -क्तं, मोचित: -ता -तं त्राण: -णा -णं.

Extrication, *s.* उद्धार:, उद्धरणं, समुद्धरणं, मुक्ति: *f.*, मोचनं, विमोचनं, मोक्ष: -क्षणं, रक्षा, परिरक्षणं, त्राणं, निस्तार:, निस्तरणं, उत्तार:, उत्तरणं, तारणं, विशोधनं, शुद्धि: *f.*

Extrinsic, extrinsical, *a.* बाह्य: -ह्या -ह्यं, बाहीक: -का -कं, वहि:स्थ: -स्था -स्थं, वहिर्भव: -वा -वं, असहज: -जा -जं, असम्बन्धी -न्धिनी -न्धि (न्).

Extrinsically, *adv.* बाह्यतस्, वहिस्, वहिर्भागे, अनभ्यन्तरात्.

To extrude, *v. a.* वहिष्कृ, निरस् (c. 4. -अस्यति -असितुं), उत्सृ (c. 10. -सारयति -यितुं).

Extrusion, *s.* वहिष्करणं, नि:सारणं, अपसारणं, उत्सारणं, निरसनं.

Extuberance, *s.* अधिमांसं, स्फोट:, शोफ:, गण्ड:, उच्चभाग:.

Exuberance, *s.* समृद्धि: *f.*, सामृद्ध्यं, परिपूर्णता, बाहुल्यं, बहुत्वं, प्राचुर्य्यं, स्फीति: *f.*, स्फाति: *f.*, उत्सेक:, उद्रेक:, उपचय:, वृद्धि: *f.*, आधिक्यं.

Exuberant, *a.* समृद्ध: -द्धा -द्धं, बहुल: -ला -लं, परिपूर्ण: -र्णा -र्णं, प्रचुर: -रा -रं, वर्धिष्णु: -ष्णु: -ष्णु, स्फीत: -ता -तं, उत्सिक्त: -क्ता -क्तं, उद्रिक्त: -क्ता -क्तं, पीन: -ना -नं, पुष्कल: -ला -लं, अतिरिक्त: -क्ता -क्तं, उपचित: -ता -तं.

Exuberantly, *adv.* बाहुल्येन, बहुशस्, प्रचुरं, पुष्कलं, उद्रेकेण.

To exuberate, *v. n.* बहुलीभू, प्रचुरीभू, समृध् (c. 5. -ऋध्नोति -अर्धितुं).

Exudation, *s.* स्वेद:, प्रस्वेद:, स्वेदजलस्राव:, स्वेदविन्दुस्राव:, रस:, रसस्राव:, स्यन्दनं, स्रव: -वणं, प्रस्रवणं, स्राव:, निर्यास:, स्रुति: *f.*, घर्म्मपय: *n.* (स्), कषाय:, वेष्टक:.

To exude, *v. n.* स्विद् (c. 4. स्विद्यति, स्वेत्तुं), प्रस्विद्, स्वेदवत् प्रस्रु (c. 1. -स्रवति -स्रोतुं) or स्यन्द् (c. 1. स्यन्दते -न्दितुं).

To exude, *v. a.* स्वेदं प्रस्रु in caus. (-स्रावयति -यितुं) or नि:सृ in caus. (-सारयति -यितुं).

Exuded, *p. p.* प्रस्रुत: -ता -तं, स्यन्न: -न्ना -न्नं, नि:सृत: -ता -तं, निर्गत: -ता -तं.

To exulcerate, *v. a.* व्रणीकृ, व्रणं or क्षतं कृ or उत्पद् in caus. (-पादयति -यितुं).

Exulceration, *s.* व्रणकरणं, क्षतकरणं, व्रणोत्पत्ति: *f.*, व्रणोत्पादनं.

To exult, *v. n.* अत्यन्तं or अतिशयेन नन्द् (c. 1. नन्दति -न्दितुं) or आनन्द् or हृष् (c. 4. हृष्यति, हर्षितुं) or ह्लाद् (c. 1. ह्लादते -दितुं) उल्लस् (c. 1. -लसति -सितुं), परमहर्षेण इ (c. 2. एति -तुं), मद् (c. 4 माद्यति, मदितुं).

Exultation, *s.* परमानन्द:, परमहर्ष:, परमाह्लाद:, अत्यन्ताह्लाद:, माद: अत्यानन्द:, महोत्सव:.

EXULTING, *a.* परमहृष्टः -ष्टा -ष्टं, उल्लसितः -ता -तं, आत्मानन्दी -न्दिनी -न्दि (न्), सगर्व्वः -र्व्वा -र्व्वं, सदर्पः -र्पा -र्पं.

EXUPERABLE, *a.* लङ्घनीयः -या -यं, अधिगम्यः -म्या -म्यं, अतिक्रमणीयः -या -यं.

EXUSTION, *s.* निर्दाहः, निर्दहनं, परिदहनं, भस्मसात्करणं.

EYE, *s.* चक्षुः *n.* (स्), नयनं, लोचनं, नेत्रं, विलोचनं, अक्षि *n.*, ईक्षणं, प्रेक्षणं, दृष्टिः *f.*, दृक् *f.* (श्), दृशा, दृशिः *f.*, अक्षं, दैवदीपः, विश्वप्सुरः; 'pupil of the eye,' तारका, कनीनिका; 'corner of the eye,' अपाङ्गः, नयनोपान्तः; 'mind's eye,' ज्ञानचक्षुः *n.* (स्), ज्ञानदृष्टिः *f.*; 'evil-eye,' कुदृष्टिः *f.*; 'long eyes,' आकर्णलोचने; 'having good eyes,' सुलोचनः -ना -नी -नं, वामलोचनः -ना -नं, स्वक्षः -क्षी -क्षं; 'having large eyes,' फुल्लनयनः -ना -नी -नं, फुल्ललोचनः -ना -नी -नं; 'having sharp eyes,' सूक्ष्माक्षः -क्षी -क्षं; 'having red eyes,' अरुणेक्षणः -णा -णं; 'doing what is right in one's own eyes,' स्वेच्छाचारी -रिणी -रि (न्); 'before one's eyes,' प्रत्यक्षे, प्रत्यक्षेण, प्रत्यक्षतस्, समक्षं, साक्षात्, पश्यतस् ind. or expressed by the pres. part. of दृश्; as, 'he steals my goods before my eyes,' पश्यतो मम द्रव्याणि हरति; 'visible to the eye,' चक्षुर्ग्राह्यः -ह्या -ह्यं, दृष्टिगोचरः -रा -रं; 'with one's own eye,' स्वचक्षुषा; 'glance of the eye,' दृष्टिपातः, नयनपातः; 'in my eyes,' मां प्रति.—(View, regard) दृष्टिः *f.*, दर्शनं, प्रेक्षितं, वीक्षितं, निरीक्षा.—(Aperture) छिद्रं, रन्ध्रं; 'eye of a needle,' सूचीछिद्रं, सूचिरन्ध्रं.—(Catch for a book) कुडुपः.—(Bud) मुकुलं, कुटमलं, जालकं.

To EYE, *v. a.* निरीक्ष् (c. 1. -ईक्षते -क्षितुं), आलोक् (c. 10. -लोकयति -यितुं, c. 1. -लोकते -कितुं); 'to eye askance,' कटाक्षेण or अपाङ्गेन दृश् (c. 1. पश्यति, द्रष्टुं) or अवेक्ष्.

EYE-BALL, *s.* तारा, चक्षुःपिण्डः, नेत्रपिण्डः, नेत्रकोपः -पं, अक्षिगोलः, अक्षिकूटकः, विडालः; 'of an elephant,' इषीका.

EYE-BEAM, *s.* (Glance) नयनपातः, दृष्टिपातः, दृष्टिनिपातः, दृष्टिवाणः.

EYE-BROW, *s.* भ्रूः *f.*, भ्रूलता, कोदण्डः, चक्षुर्भ्रूः *f.*; 'the two eye-brows,' भ्रुवौ du.; 'space between them,' कूर्च्चः, भ्रुवोर्मध्यं; 'wrinkled eye-brow,' लोचकः.

EYED, *p. p.* and *a.* (Viewed) निरीक्षितः -ता -तं, आलोकितः -ता -तं; 'eyed askance,' कटाक्षितः -ता -तं.—(Having eyes) used in comp.; as, 'black-eyed,' कृष्णनयनः -नी -नं, असितनयनः -नी -नं, नीलाक्षः -क्षी -क्षं; 'fiery-eyed,' ज्वलितनयनः -नी -नं; 'one-eyed,' एकाक्षः -क्षा -क्षं, काणः -णा -णं, एकाक्षिविकलः -ला -लं.

EYE-DROP, *s.* बाष्पबिन्दुः *m.*, नयनबिन्दुः, अश्रुबिन्दुः, नेत्रजलं, नेत्राम्बु *n.*, नेत्रजं, नयनसलिलं, नयनवारि *n.* अश्रु *n.*

EYE-GLASS, *s.* उपनेत्रं, उपनयनं, सुलोचनं.—(Lens) दीप्तोपलः, अर्काश्मा *m.* (न्).

EYE-LASH, *s.* पक्ष्म *n.* (न्), अक्षिपक्ष्म *n.*, नेत्रच्छदलोम *n.* (न्), रश्मिः *m.*, रञ्जकः, उदानः.

EYE-LESS, *a.* अचक्षुः -क्षुः -क्षुः (स्), विचक्षुः -क्षुः -क्षुः (स्), अनक्षः -क्षा -क्षं, अनयनः -ना -नं, गताक्षः -क्षा -क्षं, दृष्टिहीनः -ना -नं, अदृक् *m. f. n.* (श्), नेत्रेन्द्रियविकलः -ला -लं.

EYELET, EYELET-HOLE, *s.* गवाक्षः, छिद्रं, रन्ध्रं.

EYE-LID, *s.* नेत्रच्छदः, नयनच्छदः, अक्षिपुटः, पुटः, नयनवर्त्म *n.* (न्), वर्त्म *n.*, आडम्बरः.

EYE-SALVE, *s.* चक्षुरञ्जनं, नेत्राञ्जनं, चक्षुर्विलेपनं, नयनलेपः.

EYE-SERVICE, *s.* केवलं प्रभुप्रत्यक्षेण कृता शुश्रूषा or परिचर्य्या.

EYE-SHOT, *s.* चक्षुर्विषयः, नयनविषयः, दृष्टिगोचरः -रं.

EYE-SIGHT, *s.* दृष्टिः *f.*, नयनदृष्टिः *f.*, नेत्रेन्द्रियं, चक्षुरिन्द्रियं, दर्शनशक्तिः *f.*

EYE-SORE, *s.* चक्षुःपीडा, नेत्रपीडाकरं or नयनक्लेशकं वस्तु.

EYE-SPOTTED, *p. p.* नयनाकारचिह्नैर् विचित्रितः -ता -तं.

EYE-TOOTH, *s.* पार्श्वदन्तः, नयनदन्तः, चक्षुर्दन्तः.

EYE-WINK, *s.* अक्षिसंज्ञा, नेत्रसङ्केतः, अक्षिसङ्कोचसंज्ञा, कटाक्षः.

EYE-WITNESS, *s.* स्वचक्षुषा साक्षी *m.* (न्), प्रत्यक्षदर्शी *m.* (न्), प्रत्यक्षदर्शनः, साक्षाद्द्रष्टा *m.* (ऋ), साक्षाद्दर्शी *m.*, देश्यः.

EYRIE, *s.* श्येनादिनीडः, श्येनकुलायः, प्रतुदादिपक्षिस्थानं.

F.

FABACEOUS, *a.* मौद्गीनः -ना -नं, माषीणः -णा -णं, शिम्बासगुणः -णा -णं.

FABLE, *s.* (Feigned story) पुरावृत्तकथा, पुरावृत्तोपाख्यानं, कूटार्थोपाख्यानं, उपाख्यानं, आख्यानं, आख्यायिका, कथा, परिकथा, इतिहासः.—(Fiction) कल्पनासृष्टिः *f.*, प्रबन्धकल्पना, मनःकल्पितं, व्यपदेशः.

To FABLE, *v. a.* and *n.* पुरावृत्तकथां रच् (c. 10. रचयति -यितुं), विरच्, मनसा कॢप् (c. 10. कल्पयति -यितुं) or सृज् (c. 6. सृजति, स्रष्टुं), मिथ्याकथा रच्.

FABLED, *p. p.* मनःकल्पितः -ता -तं, काल्पनिकः -की -कं, कूटार्थः -र्था -र्थं.

FABRIC, *s.* (Structure) निर्म्माणं, निर्म्मितिः *f.*, कल्पना.—(Edifice) हर्म्यं, शाला, भवनं, मन्दिरं, प्रासादः, धाम *n.* (न्), अट्टालिका.—(Form, texture) आकारः, आकृतिः *f.*, कृतिः *f.*

To FABRICATE, *v. a.* (Construct) निर्मा (c. 2. -माति -तुं, c. 3. -मिमीते, c. 4. -मीयते caus. -मापयति -यितुं), कृ (c. 8. करोति, कर्त्तुं caus. कारयति -यितुं), कॢप् (c. 10. कल्पयति -यितुं), विरच् (c. 10. -रचयति -यितुं), सृज् (c. 6. सृजति, स्रष्टुं), घट् (c. 1. घटते -टितुं).—(Invent) मनसा कॢप्, मिथ्या कॢप् or कृ.

FABRICATED, *p. p.* (Constructed) निर्म्मितः -ता -तं, रचितः -ता -तं, विरचितः -ता -तं, घटितः -ता -तं, कल्पितः -ता -तं.—(Invented) मनःकल्पितः -ता -तं, कृत्रिमः -मा -मं.

FABRICATION, *s.* (Construction) निर्म्माणं, निर्म्मितिः *f.*, रचना, विरचना, कल्पनं -ना, घटनं.—(Falsehood, forgery) मनःकल्पितं, मिथ्याकथा.

FABRICATOR, *s.* निर्म्माता *m.* (ऋ), निर्म्माणकारी *m.* (न्), रचकः, विरचकः.

FABULIST, *s.* पुरावृत्तकथाविरचकः, इतिहासरचकः, ऐतिहासिकः.

FABULOUS, *a.* (Fictitious) कृत्रिमः -मा -मं, मनःकल्पितः -ता -तं, काल्पनिकः -की -कं, अप्रसिद्धः -द्धा -द्धं, कूटार्थः -र्था -र्थं.—(Relating to fable) पुरावृत्तकथासम्बन्धी -न्धिनी -न्धि (न्), ऐतिहासिकः -की -कं, काथिकः -की -कं.

FABULOUSLY, *adv.* कृत्रिमप्रकारेण, कल्पनापूर्व्वं, इतिहासानुसारेण.

FAÇADE, *s.* (Of a building) हर्म्यमुखं, प्रासादमूर्द्धा *m.* (न्).

FACE, *s.* (Visage) मुखं, वदनं, आननं, वक्त्रं, आस्यं, वन्दनं, चुम्रं, श्मन् indec.; 'face like the moon,' वदनचन्द्रः, वदनेन्दुः *m.*—(Air, look) वदनं, दृष्टिः *f.*, आकारः, आभा.—(Surface) तलं, मुखं, पृष्ठं, पीठं; 'face of the earth,' भूतलं, पृथिवीतलं, क्षितिपीठं.—(State) अवस्था, स्थितिः *f.*, दशा, भावः, रूपं; 'before the face,' प्रतिमुखं, सम्मुखं -खे, अभिमुखं, साक्षात्, समक्षं, प्रत्यक्षं -क्षेण -क्षतस्, अग्रे, अग्रतस्; 'face to face,' सम्मुखं, मुखामुखि; 'in face of,' सम्मुखः -खा -खी -खं, सम्मुखीनः -ना -नं, अभिमुखः -खा -खी -खं; 'having the face averted,' विमुखः -खी -खं, पराङ्मुखः -खी -खं; 'to turn away the face,' विमुखीभू; 'to stand face to face,' सम्मुखीभू; 'to fall with one's face on the ground,' भूमौ न्यङ्मुखः or अधोमुखः

पत् (c. 1. पतति -तितुं); 'a wry face,' विकृताननं.

To FACE, *v. a.* सम्मुखीभू, अभिमुखीभू, प्रतिमुखीभू.—(Meet, oppose) अभिमुखं गम् (c. 1. गच्छति, गन्तुं), अभिवृत् (c. 1. -वर्त्तते -र्त्तितुं), पर्य्यवस्था (c. 1. -तिष्ठति -स्थातुं); 'one who faces the foe,' अभ्यमित्रीणः, अभ्यमित्रीयः, अभ्यमित्र्यः.—(Be opposite to) expressed by मुख or अभिमुख in comp.; 'to face the south,' दक्षिणामुखः -खी -खं भू; 'the north,' उदङ्मुखः -खी -खं भू, उत्तराभिमुखः -खी -खं भू; 'the east,' प्राङ्मुखः -खी -खं भू.—(Covered with additional cloth) अधिवस्त्रेण or अधिकपटेन छद् (c. 10. छादयति -यितुं).

FACED, *a.* अधिवस्त्रोपेतः -ता -तं, उत्तरवस्त्रान्वितः -ता -तं.—(Having a face) used in comp.; as, 'lovely faced,' सुमुखः -खी -खं, मुग्धाननः -नी -नं; 'lotus-faced,' आननाब्जः -ब्जा -ब्जं; 'moon faced,' चन्द्रमुखः -खी -खं.

FACELESS, *s.* निर्मुखः -खा -खी -खं, निर्वदनः -ना -नं, मुखहीनः -ना -नं.

FACET, *s.* (Small surface of a gem) कणः.

FACETIOUS, *a.* रसिकः -का -कं, रसी -सिनी -सि (न्), रसवान् -वती -वत् (त्), सरसः -सा -सं, परिहासशीलः -ला -लं, परिहासवेदी -दिनी -दि (न्), प्रहासी -सिनी -सि (न्), विनोदी -दिनी -दि (न्), विदूषकः -का -कं; 'facetious conversation,' सरसालापः, चित्रं.

FACETIOUSLY, *adv.* सरसं, हासकरणार्थं, विनोदार्थं, रसिकप्रकारेण.

FACETIOUSNESS, *s.* रसिकत्वं, रसवत्त्वं, सरसता, परिहासशीलता, विनोदकत्वं, हास्यता, हासोत्पादकत्वं, उल्लसता.

FACILE, *a.* सुखः -खा -खं, सुकरः -रा -रं, निरायासः -सा -सं, अनायासी -सिनी -सि (न्), सुसाध्यः -ध्या -ध्यं, सुगमः -मा -मं, सुखेन कार्य्यः -र्य्या -र्य्यं, अकठिनः -ना -नं.—(Complying) अनुकूलः -ला -लं.—(Easy of access) अभिगम्यः -म्या -म्यं.

To FACILITATE, *v. a.* सुकरं -रां -रं कृ, निरायासीकृ, सुखीकृ, दुःखानि or दुर्गाणि or विघ्नान् or शल्यानि विनी (c. 1. -नयति -नेतुं) or अपनी or हृ (c. 1. हरति, हर्त्तुं) or नश् (c. 10. नाशयति -यितुं), निर्विघ्नीकृ, निष्प्रत्यूहीकृ.

FACILITATED, *p. p.* सुकरीकृतः -ता -तं, हृतविघ्नः -घ्ना -घ्नं, हृतप्रत्यूहः -हा -हं.

FACILITY, *s.* सौकर्य्यं, सुकरत्वं, सौख्यं, सौगम्यं, सुगमत्वं, सुसाध्यता, अनायासः, निरायासत्वं, अकाठिन्यं, अकष्टत्वं, अवैषम्यं.

FACING, *part.* (Opposite to) अभिमुखः -खा -खी -खं, सम्मुखः -खा -खं, सम्मुखीनः -ना -नं, अभिमुखगतः -ता -तं, प्रतिमुखः -खा -खं; 'facing the north,' उत्तराभिमुखः -खा -खं, or expressed by मुख; as, 'facing the east,' प्राङ्मुखः -खा -खं; 'the west,' प्रत्यङ्मुखः; 'the south,' दक्षिणामुखः; 'the north,' उदङ्मुखः; 'with the head facing the east,' प्राक्शिरसः -सा -सं.

FACING, *s.* (Additional covering in front of a garment) वस्त्राग्रभागे स्यूतम् अधिकांशुकं or अधिवसनं.—(End of a sleeve) पिप्पलान्तं.—(Of a fortification) दुर्गमुखं.

FAC-SIMILE, *s.* प्रतिलिपिः *f.*, हस्ताक्षरप्रतिरूपं.

FACT, *s.* वस्तु *n.* भूतं, अर्थः, वृत्तं, कर्म्म *n.* (न्), कृतं, कृतवस्तु *n.*—(Reality) तत्त्वं, सत्त्वं, सत्ता, सत्यता, यथार्थता, याथार्थ्यं, प्रकृतत्वं; 'in fact,' वस्तुतस्, अर्थतस्, तत्त्वतस्, परमार्थतस्.

FACTION, *s.* (A party) पक्षः, शाखा, गणः, दलं; 'one of the opposite faction,' विपक्षः; 'one's own faction,' आत्मपक्षः; 'following a faction,' पक्षपातः -तिता, पक्षपातकृतस्नेहः, गणता.—(Political dissension) भेदः, द्वैधं, द्वन्द्वं, विरोधः, राजद्रोहः.

FACTIOUS, *a.* (Relating to faction) पाक्षः -क्षी -क्षं.—(Promoting faction, seditious) राज्यभेदकरः -री -रं, राजद्रोही -हिणी -हि (न्), कलहकारी -रिणी -रि (न्), भेत्ता -त्त्री -तृ (तृ), उपजापकः -का -कं, उपद्रवी -विणी -वि (न्).

FACTIOUSLY, *adv.* भेदकरणार्थं, कलहकरणार्थं, सोपजापं, उपजापकवत्.

FACTIOUSNESS, *s.* भेदकरणशीलता, राजद्रोहः, कलहकारित्वं, उपजापः.

FACTITIOUS, *a.* कृत्रिमः -मा -मं, कृतकः -का -कं, कल्पितः -ता -तं, काल्पनिकः -की -कं, रचितः -ता -तं, घटितः -ता -तं, शिल्पिकः -का -कं, शिल्पनिर्म्मितः -ता -तं, यांत्रिकः -की -कं.

FACTITIOUSLY, *adv.* कृत्रिमप्रकारेण, शिल्पेन, कल्पनापूर्व्वं.

FACTOR, *s.* वणिक्प्रतिनिधिः *m.*, देशान्तरे वाणिज्यकर्म्मनिर्वाहणे नियुक्तो जनः, नियोगी *m.* (न्), नियुक्तः, प्रतिपुरुषः.

FACTORAGE, *s.* वणिक्प्रतिनिधिगृहीतः शुल्कः, वणिक्कर्म्मनिर्वाहणार्थं नियोगिणे देयं पारितोषिकं.

FACTORY, *s.* (Manufactory) शिल्पगृहं, शिल्पशाला, यन्त्रगृहं, आवेशनं, प्रावेशनं, अन्वासनं पण्यनिर्म्माणशाला, वाणिज्यद्रव्यनिर्म्माणगृहं.

FACTOTUM, *s.* सर्व्वकर्म्मा *m. f.* (न्), सर्व्वकर्म्मकरः -री, सर्व्वकर्म्मीणः -णा.

FACULTY, *s.* (Power) शक्तिः *f.*, बलं, क्षमता, सामर्थ्यं, प्रभावः, आशक्तिः.—(Faculty of the mind) धीशक्तिः *f.*, मनःशक्तिः *f.*, निष्क्रमः, संस्कारः, चित्तसंस्कारः.—(Facility of performance) योग्यता, युक्तिः *f.*, सुप्रयोगता, कौशल्यं, पाटवं.—(Privilege) अधिकारः.—(The body of doctors) वैद्यगणः, चिकित्सकवर्गः.

FACUND, *a.* वाक्पटुः -टुः -टु, वाग्मी -ग्मिनी -ग्मि (न्). *See* ELOQUENT.

FACUNDITY, *s.* वाक्पटुता, वाक्पाटवं, पटुत्वं, वाग्विदग्धता.

To FADDLE, *v. n.* रम् (c. 1. रमते, रन्तुं), खेल् (c. 1. खेलति -लितुं), खेलां कृ.

To FADE, *v. n.* (Decay, wither) म्लै (c. 1. म्लायति, म्लातुं), परिम्लै, विशृ in pass. (-शीर्य्यते), क्षि in pass. (क्षीयते), सद् (c. 1. सीदति, सत्तुं), अवसद्, व्यवसद्, जॄ (c. 4. जीर्य्यति, जरितुं -रीतुं), नश् (c. 4. नश्यति, नशितुं), प्रणश्, विनश्, ध्वंस् (c. 1. ध्वंसते -सितुं), विध्वंस्, शद् (c. 1. शीयते, शत्तुं), ग्लै (c. 1. ग्लायति, ग्लातुं), म्ली (c. 4. -लीयते -लेतुं), गल् (c. 1. गलति -लितुं).—(Lose colour) विवर्णीभू, नीरक्तीभू.

FLORIST, *s.* पुष्पादिविद्याज्ञः, पुष्पलावः, ओषधिविद्याज्ञः, मालाकारः, मालिकः, माली *m.* (न्).

FLOTA, *s.* वृहन्नौकासमूहः, महावाणिज्यनौकासमूहः.

FLOTILLA, *s.* क्षुद्रनौकासमूहः, क्षुद्रनौकासङ्ग्रहः.

To FLOUNCE, *v. n.* सम्भ्रमोपहतत्वात् or संरम्भाविष्टत्वात् शरीराङ्गानि or शरीरम् इतस्ततः क्षिप् (c. 6. क्षिपति, क्षेप्तुं) or विक्षिप् or चल् in caus. (चालयति -यितुं) or विचल्.

FLOUNCE, *s.* (Sudden jerk of the body) अकस्माद् अङ्गविक्षेपः or शरीरविक्षेपः.—(A piece of cloth sewed round a gown with the lower border loose) स्त्रीवेशपरितः स्यूतः शिथिलाधोभागो वस्त्रखण्डः, स्त्रीवेशोपरि शोभार्थम् अधिकवस्त्रविन्यासः.

FLOUNCED, *p. p.* अधिकवस्त्रपंक्तिशोभितः -ता -तं, वेशोपरिस्थपटपंक्तिशोभितः -ता -तं.

FLOUNDER, *s.* समुद्रजः क्षुद्रमत्स्यभेदः.

To FLOUNDER, *v. n.* यथा वाजी पङ्के तथा पादादिविक्षेपेण लुट् (c. 6. लुठति -ठितुं), पङ्कपतितवद् निर्गमेच्छया शरीराङ्गानि इतस्ततः क्षिप् (c. 6. क्षिपति, क्षेप्तुं), विप्लु (c. 1. -प्लवते -प्लोतुं).

FLOUR, *s.* शक्तुः *m.*, गोधूमचूर्णं, गोधूमक्षोदः, चूर्णं, क्षोदः, अपूपः, पिष्टं, गुण्डिकः -का, समीदः, समिता.

To FLOURISH, *v. n.* (Thrive) ऋध् (c. 5. ऋध्नोति, c. 4. ऋध्यति, अर्धितुं), समृध्, एध् (c. 1. एधते -धितुं), समेध्, वृध् (c. 1. वर्धते -र्धितुं), विवृध्, संवृध्, समृद्धीभू.—(Use lofty language) गर्वितवाक्यम् आश्रि (c. 1. -श्रयति -यितुं).

To FLOURISH, *v. a.* (Embellish with flowers, &c.) पुष्पाद्यलङ्कारेण शुभ् (c. 10. शोभयति -यितुं) or रञ्ज् (c. 10. रञ्जयति -यितुं), अलङ्कृ, समलङ्कृ, चित्र् (c. 10. चित्रयति -यितुं).—(Brandish) भ्रम् in caus. (भ्रमयति, भ्रामयति -यितुं), उद्भ्रम्.

FLOURISH, *s.* (Show, embellishment) शोभा, अलङ्कारः, अलङ्क्रिया, रञ्जनं.—(Lofty language) गर्वितवाक्यं, दर्पवाक्यं.—(Brandishing) भ्रान्तिः *f.*, उद्भ्रमः, उद्भ्रान्तिः *f.*

FLOURISHED, *p. p.* (Embellished) अलङ्कृतः -ता -तं.—(Brandished) उद्भ्रान्तः -न्ता -न्तं.

FLOURISHING, *a.* समृद्धः -द्धा -द्धं, वर्धमानः -ना -नं, वर्द्धिष्णुः -ष्णुः -ष्णु, अधिकर्द्धिः -र्द्धिः -र्द्धि, उदयी -यिनी -यि (न्), शुभान्वितः -ता -तं, सुस्थः -स्था -स्थं.

To FLOUT, *v. a.* अवहस् (c. 1. -हसति -सितुं), अवक्षिप् (c. 6. -क्षिपति -क्षेप्तुं), गर्ह् (c. 1. गर्हते -र्हितुं), अवज्ञा (c. 9. -जानाति -ज्ञातुं), तिरस्कृ, मुखरीकृ.

FLOUTED, *p. p.* अवज्ञातः -ता -तं, मुखरीकृतः -ता -तं, गर्हितः -ता -तं.

To FLOW, *v. n.* (Run as water) स्रु (c. 1. स्रवति, स्रोतुं), प्रस्रु, परिस्रु, स्यन्द् (c. 1. स्यन्दते -न्दितुं), प्रस्यन्द्, सृ (c. 1. सरति, सर्तुं), प्रसृ, संसृ, क्षर् (c. 1. क्षरति -रितुं), री (c. 4. रीयते, रेतुं), गल् (c. 1. गलति -लितुं), जलं प्रवह् (c. 1. -वहति -वोढुं), पयस् (nom. पयस्यति).—(Glide along) प्रसृप् (c. 1. -सर्पति -सर्तुं), विसृप्, संसृप्, सृप्, विसृ, प्रसृ.—(As the tide) वेलावत् प्रसृ, वेला (nom. वेलायते).—(Proceed) प्रवृत् (c. 1. -वर्त्तते -र्त्तितुं), प्रसृ, प्रगम् (c. 1. -गच्छति -गन्तुं), प्रया (c. 2. -याति -तुं), प्रचल् (c. 1. -चलति -लितुं).—(Arise from) उत्पद् (c. 4. -पद्यते -पत्तुं), जन् (c. 4. जायते, जनितुं), प्रभू, प्रवृत्.—(Hang loose, as hair, &c.) विगलितः -ता -तं भू, प्रविततः -ता -तं भू, प्रसृपः -पा -पं भू, विस्रंस् (c. 1. -स्रंसते -सितुं), शिथिलीभू.

FLOW, *s.* (Stream, course) स्रवः -वणं, प्रवाहः, स्रोतः *n.* (स्), प्रस्रवः, प्रस्रवणं, प्रस्रावः, स्रावः, संसृतिः *f.*, प्रवृत्तिः *f.*, जलवाहनं, स्यन्दः -न्दनं, निस्यन्दः, अभिष्यन्दः, गलनं, गालः, क्षरणं, उदकप्रवाहः.—(Current) वेला, वेगः, रयः, धारः -रा, ओघः, पात्रसंस्कारः, अम्बुपद्धतिः *f.*, पात्रसङ्गारः, रायभाटी, ऊर्मी.—(Tide) वेला, समुद्रवेला, समुद्ररयः.—(Flow of words) वाक्सरणिः *f.*, वाक्चापल्यं; 'flow of tears,' अश्रुपातः, अश्रुप्रवाहः, धाराश्रु *n.*; 'flow of blood,' असृक्पातः, असृग्धारा.

FLOWER, *s.* पुष्पं, कुसुमं, सुमनाः *m.* -नः *n.* -नसः *f. pl.* (स्), फुल्लं, प्रसवः, प्रसूनं, प्रसूतं, सूनं; 'flower-gathering,' पुष्पचयः, पुष्पावचयः, पुष्पप्रचयः, पुष्पप्रचायः, कुसुमावचयः; 'flower-gatherer,' पुष्पचायी *m.* (न्), पुष्पावचायी *m.* (न्), पुष्पलावः; 'flower-seller,' पुष्पाजीवी *m.* (न्), मालाकारः, मालिकः.—(Prime, best part) सारः, उत्तमभागः, श्रेष्ठभागः; 'flower of age,' यौवनावस्था; 'flower of youth,' यौवनप्रौढिः *f.*, नवयौवनं, अक्षतयौवनं; 'of corn,' धान्यस्य सारभागः; 'in the flower of youth,' प्रौढयौवनः -ना -नं.—(Catamenia) पुष्पं, कुसुमं.

To FLOWER, *v. n.* (Blossom) पुष्प् (c. 4. पुष्प्यति, पुष्पितुं), कुसुम (nom. कुसुमयति -यितुं), फुल्ल् (c. 1. फुल्लति -ल्लितुं), स्फुट् (c. 6. स्फुटति -टितुं, c. 1. स्फोटते -टितुं), विकस् (c. 1. -कसति -सितुं).—(Be in the prime) प्रौढयौवनः -ना -नं भू.—(Froth) फेन (nom. फेनायते) मण्ड (nom. मण्डायते).

To FLOWER, *v. a.* पुष्पाद्यलङ्कारेण शुभ् (c. 10. शोभयति -यितुं).

FLOWER-ARMED, *a.* (The Hindu Cupid) कुसुमायुधः, कुसुमेषुः *m.*, पुष्पास्त्रः, पुष्पचापः.

FLOWER-DE-LUCE or FLOWER-DE-LIS, *s.* उत्पलभेदः, पद्मविशेषः.

FLOWERED, *p. p.* or *a.* पुष्पितः -ता -तं, कुसुमितः -ता -तं, विकसितः -ता -तं, फुल्लः -ल्ला -ल्लं.—(Embellished with flowers) पुष्पाद्यलङ्कारशोभितः -ता -तं.

FLOWERET, *s.* पुष्पकः -कं, क्षुद्रपुष्पं, क्षुद्रकुसुमं.

FLOWER-GARDEN, *s.* पुष्पोद्यानं, कुसुमोद्यानं, पुष्पवाटी -टिका, उद्यानं, कुसुमाकरः.

FLOWERING, *a.* फुल्लवान् -वती -वत् (त्), प्रफुल्लः -ल्ला -ल्लं, पुष्पी -ष्पिणी -ष्पि (न्), पुष्पवान् -वती -वत् (त्), पुष्पितः -ता -तं, कुसुमितः -ता -तं, कुसुमवान् -वती -वत् (त्), स्फुटितपुष्पः -ष्पा -ष्पं, विकासी -सिनी -सि

(न्), पुष्पदः -दा -दं.

FLOWERLESS, *a.* अपुष्पः -ष्पा -ष्पं, अपुष्पकः -का -कं, अपुष्पदः -दा -दं.

FLOWER-STALK, *s.* मञ्जरी, पुष्पवृन्तं, प्रसवबन्धनं.

FLOWERY, *a.* (Having flowers) पौष्पः -ष्पी -ष्पं, पुष्पी -ष्पिणी -ष्पि (न्), सपुष्पः -ष्पा -ष्पं, पुष्पितः -ता -तं, पुष्पशाली -लिनी -लि (न्), पुष्पमयः -यी -यं, कौसुमः -मी -मं, सौमनसः -सी -सं, सकुसुमः -मा -मं. —(As style) पुष्पितः -ता -तं, अलङ्कृतः -ता -तं, वागलङ्कारमयः -यी -यं, व्यञ्जनामयः -यी -यं.

FLOWING, *part.* or *a.* सृतः -ता -तं, स्रवन् -वन्ती -वत् (त्), प्रसृतः -ता -तं, स्यन्नः -न्ना -न्नं, स्यन्दी -न्दिनी -न्दि (न्), विसारी -रिणी -रि (न्), प्रसारी &c., विसृत्वरः -रा -रं, विसृमरः -रा -रं, रीणः -णा -णं, स्रुतः -ता -तं.

FLOWING, *s.* स्रवः -वणं, प्रस्रवः -वणं, प्रस्रावः, स्रावः, उदकप्रवाहः, वेला.

FLOWINGLY, *adv.* वाक्सरणिपूर्वं, वाक्चापल्येन, द्रुतं, द्रुतवाक्येन, अस्खलितवाक्येन, अविलम्बितं, अविलम्बितवाक्येन.

FLUCTUANT, *a.* ऊर्म्मिवद् इतस्ततो लोलमानः -ना -नं or विचलः -ला -लं.

To FLUCTUATE, *v. n.* (Roll or move to and fro) इतस्ततो लुट् (c. 6. लुठति -ठितुं) or लुल् (c. 1. लोलति -ते -लितुं) or चल् (c. 1. चलति -लितुं) or विचल्. —(Be unsteady, irresolute) दोल (nom. दोलायते -यितुं), विचल्, विचलीभू, अस्थिरः -रा -रं भू, अस्थिरीभू, अनवस्थितः -ता -तं भू, चञ्चलीभू, पातोत्पातं कृ, विकॢप् (c. 1. -कल्पते -ल्पितुं, c. 10. -कल्पयति -यितुं).

FLUCTUATING, *a.* दोलायमानः -ना -नं, विचलः -ला -लं, अप्रतिष्ठः -ष्ठा -ष्ठं, अनवस्थितः -ता -तं, अस्थिरः -रा -रं, चलः -ला -लं, चञ्चलः -ला -लं, लोलः -ला -लं, लोलमानः -ना -नं, चपलः -ला -लं, तरलायितः -ता -तं.

FLUCTUATION, *s.* अस्थैर्यं, अस्थिरता, अनवस्थितिः *f.*, विचलनं, चञ्चलता, चाञ्चल्यं, चलता, आन्दोलनं, दोलायमानता, अप्रतिष्ठा, चपलता, पातोत्पातः.

FLUE, *s.* (Passage for smoke) धूमपथः, धूममार्गः, धूमवर्त्म *n.* (न्), धूमनिर्गमपथः. —(Soft down) मृदुलोम *n.* (न्), मृदुपक्ष्म.

FLUENCY, *s.* (Of speech) वाक्सरणिः *f.*, वागद्रुतता, वाक्चापल्यं, वाक्क्षिप्रता, वाग्विभवः, वाक्पटुता, वाक्चातुर्य्यं, शब्दचातुर्य्यं, वाक्कौशलं वाक्शीघ्रता, वाग्बाहुल्यं.

FLUENT, *a.* (In speech) वागद्रुतः -ता -तं, द्रुतवाक् *m. f. n.* (च्), वाक्क्षिप्रः -प्रा -प्रं, वाक्त्वरितः -ता -तं, त्वरितवाक् *m. f. n.*, वाक्पटुः -टुः -टु, अस्खलितवाक्यः -क्या -क्यं, अस्खलद्वाक्यः -क्या -क्यं, अविलम्बितवाक्यः -क्या -क्यं, शब्दचतुरः -रा -रं.

FLUENTLY, *adv.* द्रुतवाक्येन, क्षिप्रवाक्येन, वाक्चापल्येन, अविलम्बितवाचा, अस्खलितवाचा, त्वरितवाचा, वाग्विभवेन, द्रुतं, शीघ्रं, अस्खलितं, अविलम्बितं.

FLUID, *a.* द्रवः -वा -वं, द्रुतः -ता -तं, विद्रुतः -ता -तं, द्राव्यः -व्या -व्यं, विलीनः -ना -नं, तरलः -ला -लं, पयस्यः -स्या -स्यं, विभाजनीयः -या -यं.

FLUID, *s.* द्रवः, रसः, द्रवद्रव्यं, द्रववस्तु *n.*, जलवद्द्रव्यं, वारि *n.*, जलं, पयः *n.* (स्).

FLUIDITY, *s.* द्रवता -त्वं, द्राव्यत्वं, द्रुतत्वं, विद्रुतत्वं, विलीनता, तारल्यं.

FLUKE, *s.* लङ्गरदन्तः, लङ्गरभुजः. *See* FLOOK.

FLUMMERY, *s.* मिथ्याप्रशंसा, मिथ्यास्तुतिः *f.*, कल्पितप्रशंसा अनर्थकस्तुतिः *f.*

FLUNG, *p. p.* क्षिप्तः -प्ता -प्तं, प्रक्षिप्तः -प्ता -प्तं, अस्तः -स्ता -स्तं; 'flung aside,' अपास्तः -स्ता -स्तं, अपसारितः -ता -तं, समाक्षिप्तः -प्ता -प्तं.

FLUNKEY, *s.* दासः, नीचकर्म्मकरः, तुच्छकर्म्मकरः, कापुरुषः, लटकः.

FLURRIED, *p. p.* आकुलितः -ता -तं, आकुलीकृतः -ता -तं व्याकुलः -ला -लं, ल्लितः -ता -तं, सम्भ्रान्तः -न्ता -न्तं, ससम्भ्रमः -मा -मं, विभ्रान्तमनाः -नाः -नः (स्), विक्षिप्तचित्तः -त्ता -त्तं, व्यग्रः -ग्रा -ग्रं, समाकुलः -ला -लं, चित्तवेगवान् -वती -वत् (त्), व्यस्तः -स्ता -स्तं, कातरः -रा -रं

FLURRY, *s.* आकुलत्वं, व्याकुलता, सम्भ्रमः, विभ्रमः, चित्तभ्रान्तिः *f.*, चित्तवेगः, व्यग्रता, आवेगः, संवेगः, व्यस्तता, कातरता, वैक्लव्यं, विस्मयः, मोहः.

To FLURRY, *v. a.* आकुलीकृ, व्याकुलीकृ, व्याकुल (nom. व्याकुलयति -यितुं), कातरीकृ, मुह् (c. 10. मोहयति -यितुं), विमुह्, चित्तवेगं जन् (c. 10. जनयति -यितुं).

To FLUSH, *v. n.* (Become suddenly red) अकस्माद् रक्तोत्पत्त्या अरुणमुखीभू or लोहिताननः -ना -नं भू or रक्तवदनः -ना -नं भू, अरुणीभू, रक्तीभू, लोहित (nom. लोहितायते), रञ्ज् in pass. (रज्यते) संरञ्ज्.

To FLUSH, *v. a.* (Redden suddenly) अकस्माद् अरुणीकृ or रक्तीकृ or अरुण (nom. अरुणयति -यितुं), सरागं -गां -गं कृ, रञ्ज् in caus. (रञ्जयति -यितुं). —(Elate) दृप् in caus. (दर्पयति -यितुं), उद्धतीकृ, गर्व्वितीकृ.

FLUSH, *a.* (Vigorous) प्रौढतेजाः -जाः -जः (स्), तेजस्वी -स्विनी -स्वि (न्), प्रौढः -ढा -ढं. —(Affluent) धनाढ्यः -ढ्या -ढ्यं, समृद्धः -द्धा -द्धं. —(Liberal) धनव्ययशीलः -ला -लं, मुक्तहस्तः -स्ता -स्तं.

FLUSH, *s.* कपोलरागः, कपोलरक्तता, मुखारुणिमा *m.* (न्), वदनरागः, नववर्णः. —(Abundance, affluence) बाहुल्यं, धनबाहुल्यं, समृद्धिः *f.*

FLUSHED, *p. p.* (Colored) अरुणितः -ता -तं, अरुणीकृतः -ता -तं, रञ्जितः -ता -तं, रक्तः -क्ता -क्तं, रागी -गिणी -गि (न्), कपोलरागवान् -वती -वत् (त्). —(Elated) उद्धतः -ता -तं, दर्पाध्मातः -ता -तं, दृप्तः -प्ता -प्तं; 'with victory,' जयगर्व्वितः -ता -तं.

FLUSHING, *s.* अरुणीभावः, वदनरक्तत्वं, रक्तवर्णः, लोहितवर्णः.

To FLUSTER, *v. a.* पानादिना मद् in caus. (मादयति -यितुं) or उन्मत्तीकृ or विमुह् (c. 10. -मोहयति -यितुं) or चित्तविभ्रमं जन् (c. 10. जनयति -यितुं).

FLUSTER, *s.* चित्तविभ्रमः, मद्यपानजः सम्भ्रमः, व्यग्रता, मोहः, व्याकुलता.

FLUTE, *s.* (Instrument) वेणुः *m.*, वंशः -शी, मुरली, मानेयी -यिका, मानिका, विवरनालिका, दर्दुरः, नन्दः; 'sound of the flute,' वेणुशब्दः, वेणुध्वनिः *m.*, घोजनं. —(Channel of a column) स्तम्भरेखा, स्तम्भसीता.

To FLUTE, *v. n.* (Play on the flute) वेणुं or वंशीं ध्मा (c. 1. धमति, ध्मातुं) or प्रध्मा or वद् in caus. (वादयति -यितुं) or संवद् or प्रवद्.

To FLUTE, *v. a.* स्तम्भपरितो दीर्घरेखाः कृ or निखन् (c. 1. -खनति -नितुं).

FLUTE-PLAYER, *s.* वेणुध्मः, वांशिकः, वैणविकः, मुरलीवादकः.

FLUTED, *p. p.* or *a.* स्तम्भवद् दीर्घरेखायुक्तः -क्ता -क्तं or रेखापंक्तियुक्तः -क्ता -क्तं.

To FLUTTER, *v. n.* (Flap the wings in mid air) विहायसा or व्योममध्ये पक्षास्फालनं कृ or पक्षस्पन्दनं कृ or पक्षौ स्फल् (c. 10. स्फालयति -यितुं) or आस्फल्. प्रक्षेपम् अकृत्वा आकाशमध्ये पक्षौ विचल् in caus. (-चालयति -यितुं) or चल्. —(Move about with bustle) इतस्ततः चल् or धाव् (c. 1. धावति -वितुं). —(Vibrate, beat, be agitated) स्पन्द् (c. 1. स्पन्दते -न्दितुं), कम्प् (c. 1. कम्पते -म्पितुं), विकम्प्, स्फुर् (c. 6. स्फुरति -रितुं), क्षुभ् (c. 4. क्षुभ्यति, क्षोभितुं), उच्छ्वस् (c. 2. -छ्वसिति -तुं rt. श्वस्), दोल् (nom. दोलायते -यितुं).

FLUTTER, *s.* (Vibration) स्पन्दनं, प्रतिस्पन्दनं, स्फुरणं, कम्पः -म्पनं विकम्पः, उच्छ्वासः, उच्छ्वसनं, इतस्ततो विचलनं or चलनं — (Hurry, agitation) सम्भ्रमः, वेगः, संवेगः, आवेगः, चित्तवेगः, क्षोभः.

FLUTTERING, *s.* पक्षास्फालनं, पक्षस्पन्दनं, पक्षकम्पनं, पक्षचालनं, स्फालनं.

FLUTTERING, *part.* or *a.* आस्फालितः -ता -तं, स्पन्दमानः -ना -नं, कम्पमानः -ना -नं, विचलः -ला -लं, विचलन् -लन्ती -लत् (त्), उच्छ्वासी -सिनी -सि (न्); 'in the breeze,' अनिलोद्धतः -ता -तं, पवनाहतः -ता -तं, पवनक्षिप्तः -प्ता -प्तं.

FLUVIAL, FLUVIATIC, *a.* नादेयः -यी -यं, नदीसम्बन्धी -न्धिनी -न्धि (न्).

FLUX, *s.* (Flow) स्रवः -वणं, प्रस्रवः -वणं, प्रस्रावः, प्रवाहः, स्यन्दः, क्षरणं, गलनं, गालः.—(Of the tide) वेला.—(Confluence) सङ्गमः, समागमः.—(Bloody flux) आमातिसारः, आमरक्तः.

To FLUX, *v. a.* विली in caus. (-लाययति -लापयति -यितुं), द्रवीकृ, द्रु in caus. (द्रावयति -यितुं), विद्रु, गल् in caus. (गालयति -यितुं), विलीनीकृ.

FLUXIBILITY, FLUXILITY, *s.* द्रवत्वं, द्राव्यत्वं, गलनीयता, विलीनता.

FLUXIBLE, *a.* द्राव्यः -व्या -व्यं, गलनीयः -या -यं, सुविलयः -या -यं.

FLUXION, *s.* स्रवः -वणं, प्रस्रवः -वणं, स्रावः, प्रवाहः, गलनं, क्षरणं.

To FLY, *v. n.* (As a bird in the air) डी (c. 4. डीयते, c. 1. डयते -यितुं), प्रडी, उड्डी, खे or वियति विसृप् (c. 1. -सर्पति -सर्प्तुं) or सृप्, आकाशेन गम् (c. 1. गच्छति, गन्तुं) or या (c. 2. याति -तुं), पत् (c. 1. पतति -तितुं), उत्पत्, प्रोत्पत्, समुत्पत्, सम्पत्.—(Move along swiftly) त्वरितं or सत्वरं or शीघ्रं गम् or चल् (c. 1. चलति -लितुं) or सृ (c. 1. सरति, सर्त्तुं) or प्रसृ.—(Run away) पलाय् (c. 1. पलायते -यितुं, rt. इ), विपलाय्, प्रपलाय्, सम्पलाय्, प्रद्रु (c. 1. -द्रवति -द्रोतुं), विद्रु, विप्रद्रु, प्रधाव् (c. 1. -धावति -वितुं), अपधाव्, अपक्रम् (c. 1. -क्रामति -क्रमितुं), अपगम्, निर्गम्, अपसृप् (c. 1. सर्पति -सर्प्तुं), अपया (c. 2. -याति -तुं), अपसृ (c. 1. -सरति -सर्त्तुं), अपे (c. 2. अपैति -तुं, rt. इ).—(Pass rapidly) शीघ्रम् अतिक्रम् or अती (c. 2. अत्येति -तुं, rt. इ) or अतिवृत् (c. 1. -वर्त्तते -र्त्तितुं); 'to fly away,' उड्डी, प्रडी, प्रोड्डी, निष्पत्; 'he flew away,' पलायितः; 'to fly at,' अभिपत्, आपत्, उपपत्, अभिद्रु, आद्रु, उपद्रु, अभिधाव्, आधाव्, प्रतिधाव्, 'to fly up,' उड्डी, उत्पत्, अधिरुह् (c. 1. -रोहति -रोढुं) 'to let fly,' मुच् (c. 6. मुञ्चति, मोक्तुं), सृज् (c. 6. सृजति, स्रष्टुं), पत् in caus. (पातयति -यितुं).

To FLY, *v. a.* (Avoid) वृज् (c. 10. वर्जयति -यितुं), विवृज्, त्यज् (c. 1. त्यजति, त्यक्तुं), परिहृ (c. 1. -हरति -हर्त्तुं).—(Cause to float in the air) आकाशे विसृप् in caus. (-सर्पयति -यितुं) or विसृ in caus. (-सारयति -यितुं).

FLY, *s.* (Insect) मक्षिका, मशकः, मक्षीका, माचिका, भम्भः, भम्भराली, भम्भराली.

FLY-BITTEN, *a.* मक्षिकादष्टः -ष्टा -ष्टं, मक्षिकादंशाङ्कितः -ता -तं.

To FLY-BLOW, *v. a.* मक्षिकावद् अण्डप्रसवेन आममांसं दुष् (c. 10. दूषयति -यितुं).

FLY-BOAT, *s.* प्रणालीप्रवनयोग्या लघुनौका, द्रुतगामिनी दीर्घनौका.

FLY-CATCHER, *s.* मक्षिकाखादकः पक्षिभेदः, मक्षिकाभुक् *m.* (ज्), मक्षिकानाशकः.

To FLY-FISH, *v. n.* मक्षिकां वडिशे निवेश्य मत्स्यान् ग्रह् (c. 9. गृह्णाति, ग्रहीतुं).

FLY-FLAP, *s.* मक्षिकानिवारणार्थं चामरं, अवचूलकं, रोमगुच्छः.

FLY-LEAF, *s.* मलपृष्ठं, पुस्तकस्य आद्यन्तयोः शून्यपत्रं.

FLYER, *s.* डीयमानः, खविसर्पी *m.* (न्), आकाशगामी. *See* FLIER.—(Wheel) तुलाचक्रं.

FLYING, *s.* (Act of) डीनं, डयनं, प्रडीनं, विसर्पणं, आकाशगमनं, पतनं; 'flying up and down,' डीनावडीनं.

FLYING, *part.* डीयमानः -ना -नं, खविसर्पी -र्पिणी -र्पि (न्), आकाशगतिः -तिः -ति, आकाशगामी -मिनी -मि (न्), आकाशयायी -यिनी -यि (न्), पतन् -तन्ती -तत् (त्), नभोगतिः -तिः -ति; 'flying up,' उड्डीयमानः -ना -नं.

FLYING-BRIDGE, *s.* नौसेतुः *m.*, चलसेतुः *m.*, जङ्गमसेतुः.

FLYING-FISH, *s.* आकाशगमनशीलो मत्स्यभेदः.

FOAL, *s.* अश्वशावः -वकः, किशोरः, घोटकवत्सः, बालः, बालघोटकः, अश्वतरीयः.

To FOAL, *v. n.* किशोरं or अश्वशावकं सू (c. 2. सूते, c. 4. सूयते, सोतुं) or प्रसू or जन् (c. 10. जनयति -यितुं) or प्रजा (c. 4. -जायते -जनितुं).

FOAM, *s.* फेनः, मण्डः -ण्डं, पराग्नः, परग्नः, कारुजः, उत्पीडः, उत्सेकः, उत्सेचनं.

To FOAM, *v. n.* फेन (nom. फेनायते -यितुं), मण्ड (nom. मण्डायते -यितुं), उत्सेचनं कृ, उत्पीडं कृ, फेनम् उत्पद् in caus. (-पादयति -यितुं) or निर्गम् in caus. (-गमयति -यितुं).

FOAMING, *part.* फेनायमानः -ना -नं, उत्सेचनकारी -रिणी -रि (न्).

FOAMY, *a.* फेनलः -ला -लं, फेनिलः -ला -लं, फेनवान् -वती -वत् (त्), फेनी -निनी -नि (न्), फेनोत्पादकः -का -कं.

FOB, *s.* घटीकोषः, घटीपिधानं, क्षुद्रघटीधारकः, कटिवस्त्रपार्श्वे कालमापनयन्त्राधारः or -कोषः.

To FOB, *v. a.* छल् (c. 10. छलयति -यितुं), वञ्च् in caus. (वञ्चयते -यितुं), छलं कृ.

FOCUS, *s.* अग्रांशुः *m.*, अग्रकरः, केन्द्रं, विन्दुः *m.*, अक्षः, तेजःसङ्घदेशः, नाभिः *m.f.*

FODDER, *s.* पशुभोजनं, गवादनं, गवादिभोजनं, अभ्यादनं, पशुखादनीयं शुष्कतृणादि, विघः -घा -घानं, विधिः *m.*

To FODDER, *v. a.* शुष्कतृणादि दा (c. 3. ददाति, दातुं) or भुज् (c. 10. भोजयति -यितुं).

FOE, *s.* शत्रुः *m.*, रिपुः *m.*, अरिः *m.*, अरातिः *m.*, वैरी *m.* (न्), विपक्षः, अमित्रः, प्रतिपक्षः, विरोधी *m.* (न्), प्रतिद्वन्द्वः, सपत्नः, अपकारी *m.* (न्), अहितः.

FŒTAL, FŒTUS, FŒCES. *See* FETAL, &c

FOG, *s.* (Mist) धूमिका, धूलिका, धूपिका, शीकरः, खवाष्पः, मृगतृष्णा -तृषा -ष्णिका, मृगतृट् *f.* (ष्), कूहा, कुहेडिका, कुज्झटिका, कुज्झटिः *f.* -टी -टिका, हिमझ्झटिः *f.*, रुझटिः *f.*, धूममहिषी.—(After grass) द्वितीयतृणं.

FOGGINESS, *s.* सधूमिकात्वं, धूमलता, सशीकरत्वं, कुज्झटिकावस्था, कुज्झटिकाकीर्णता, सान्धकारत्वं, शीकराकीर्णता.

FOGGY, *a.* सधूमिकः -का -कं, धूमिकावृतः -ता -तं, धूमलः -ला -लं, सशीकरः -रा -रं, शीकरीयः -या -यं, शीकरीयः -या -यं, कुज्झटिकाच्छन्नः -न्ना -न्नं, सान्धकारः -रा -रं, सकुज्झटिकः -का -कं, अभियः -या -यं.—(Dull) स्थूलः -ला -लं.

FOH, *exclam.* धिक्, शान्तं, अपेहि, अपसर.

FOIBLE, *s.* छिद्रं, दोषः, कलङ्कः, अपराधः, वैकल्यं, हानिः *f.*, हीनता.

To FOIL, *v. a.* (Frustrate) प्रतिहन् (c. 2. -हन्ति -न्तुं), व्याहन्, परास् (c. 4. -अस्यति -असितुं), खण्ड् (c. 10. खण्डयति -यितुं), उद्यमभङ्गं कृ, विफलीकृ, वृथा कृ.—(Blunt) कुण्ठीकृ, विकुण्ठीकृ; 'one who foils one's designs,' कार्य्यहन्ता *m.* (न्).

FOIL, *s.* (Defeat, frustration) प्रतिहतिः *f.*, खण्डनं, भङ्गः.—(Blunt sword) धाराहीनः खड्गः, क्रीडाखड्गः, युद्धक्रीडायां प्रयुक्तो लोहयष्टिः.—(Leaf of metal) धातुपत्रं; 'tin-foil,' त्रपुपत्रं.—(Foil of a jewel) रत्नप्रभावर्धकं, मणितेजोवर्धको धातुपत्रखण्डः.—(Any thing which sets off) प्रकाशकः -का -कं, कान्तिवर्धकः -का -कं, शोभकृत् *m.f.n.*

FOILED, *p. p.* प्रतिहतः -ता -तं, परास्तः -स्ता -स्तं, भग्नोद्यमः -मा -मं, विफलीकृतः -ता -तं, खण्डिताशंसः -सा -सं, अकृतार्थः -र्था -र्थं, हताशः -शा -शं, मनोहतः -ता -तं, विक्षिप्तः -प्ता -प्तं, विनिवृत्तकामः -मा -मं. तिरस्कृतः -ता -तं.

FOILER, *s.* कार्य्यहन्ता *m.* (न्), उद्यमभङ्गकारी *m.* (न्), कर्म्मध्वंसकारी *m.*

FOIN, *s.* यष्टिक्रीडायां यष्ट्याघातः or यष्टिप्रहारः, खड्गाघातः.

To FOIN, *v. a.* यष्टिक्रीडायां यष्टिना प्रहृ (c. 1. -हरति -हर्त्तुं) or आहन् (c. 2. -हन्ति -न्तुं).

To FOIST, *v. a.* छलेन or कपटेन निविश् in caus. (-वेशयति -यितुं) or अभिलिख् (c. 6. -लिखति -लेखितुं), मिथ्या कॢप् (c. 10. कल्पयति

-यितुं), कृत्रिमं -मा -मं कृ.

FOISTED, *p. p.* छलेन निवेशितः -ता -तं or अभिलिखितः -ता -तं.

FOISTINESS, *s.* पर्युषितत्वं, विरसत्वं, ईषत्पूतत्वं, पूतिगन्धिता, कुरसवत्त्वं.

FOLD, *s.* (For sheep or cattle) मेषस्थानं -नकं, व्रजः, व्रजाजिरं, मेषव्रजः, मेषशाला, गोष्ठं, गोस्थानकं.—(A double in cloth, &c.) पुटः, वस्त्रपुटः, ऊर्म्मिः *m.f.* -र्म्मिका -र्म्मी, भङ्गः, वस्त्रभङ्गः, तरङ्गः, व्यावर्त्तनं, चूणः. 'Fold,' in comp. is expressed by the affix धा; as, 'two-fold,' द्विधा, or by गुण; as, द्विगुणः -णा -णं.

To FOLD, *v. a.* (Double) पुटीकृ, पुट (nom. पुटयति -यितुं), द्विगुण (nom. द्विगुणयति -यितुं), द्विगुणीकृ, व्यावृत् (c. 10. -वर्त्तयति -यितुं) विपरिवृत्, व्यावर्त्तनं कृ, संवृ (c. 5. -वृणोति, c. 1. -वरति -रितुं -रीतुं), सम्पीड् (c. 10. -पीडयति -यितुं); 'fold the arms,' भुजौ सम्पीड्; 'in the arms,' भुजापीडं कृ.—(Confine sheep in a fold) मेषान् व्रजे निविश् in caus. (-वेशयति -यितुं) or निरुध् (c. 7. -रुणद्धि -रोद्धुं).

FOLDED, *p. p.* पुटितः -ता -तं, पुटीकृतः -ता -तं, द्विगुणितः -ता -तं, संवृतः -ता -तं, सम्पीडितः -ता -तं, व्यावर्त्तितः -ता -तं; 'folded or wrapped up,' वेष्टितः -ता -तं, वासनस्थः -स्था -स्थं; 'folded leaf,' दलकपाटः.

FOLDING, *s.* पुटीकरणं, व्यावर्त्तनं, संवृतिः *f.*; 'folding in the arms,' भुजापीडं कृ.

FOLDING-DOORS, *s.* द्विकपाटयुक्तं or द्विशाखायुक्तं द्वारं.

FOLIAGE, *s.* पत्रं -त्राणि *n. pl.*, पर्णं, दलं, वृक्षपत्रं, तरुच्छदः, तरुजं.

To FOLIATE, *v. a.* मुद्गराघातेन धातुं सूक्ष्मपत्राकारं कृ or धातुपत्रं कृ, उद्वर्त्तनं कृ.

FOLIATION, *s.* मुद्गराघातेन धातुपत्रकरणं, उद्वर्त्तनं.

FOLIO, *s.* पुस्तकपत्रं, महापत्रं, पृथुपत्रं, वृहत्पत्रं, विशालपत्रं, द्विपत्रं.

FOLK, *s.* लोकः, जनः, मनुष्यजातिः *f.*, नृजातिः *f.*, प्रजा, जगती.

To FOLLOW, *v. a.* (Go after) अनुगम् (c. 1. -गच्छति -गन्तुं), अन्वागम्, पश्चाद् गम्, अनुया (c. 2. -याति -तुं), समनुया, अन्वि (c. 2. -एति -तुं), अनुवृत् (c. 1. -वर्त्तते -र्त्तितुं), समनुवृत्, अनुसृ (c. 1. -सरति -सर्त्तुं), अनुव्रज् (c. 1. -व्रजति -जितुं), समनुव्रज्, अनुक्रम् (c. 1. -क्रामति -क्रमितुं), अनुचर् (c. 1. -चरति -रितुं), अन्वग्या, पुरस्कृ.—(Imitate) अनुकृ, अनुवृत्, अनुगम्.—(Observe, practise) अनुष्ठा (c. 1. -तिष्ठति -ष्ठातुं), आस्था, सेव् (c. 1. सेवते -वितुं), उपसेव्, निषेव्, समासेव्, आश्रि (c. 1. -श्रयति -यितुं), विधा (c. 3. -दधाति -धातुं).—(Adhere to, serve, honour) आश्रि, श्रु in des. (शुश्रूषते -षितुं), उपास् (c. 2. -आस्ते -आसितुं), भज् (c. 1. भजते, भक्तुं), परिचर्.—(Result from) उत्पद् (c. 4. -पद्यते -पत्तुं), जन् in pass. (जायते), अनुवृत्, उद्भू, अनुभू.

FOLLOWED, *p. p.* अनुगतः -ता -तं, अनुयातः -ता -तं, अनुगम्यमानः -ना -नं, अन्वीयमानः -ना -नं.—(Observed) अनुष्ठितः -ता -तं, सेवितः ता -तं, आश्रितः -ता -तं.

FOLLOWER, *s.* (One who goes after) अनुगामी *m.* (न्), पश्चाद्गामी, अनुगः -गतः, अनुयायी *m.* (न्), अनुवर्त्ती *m.* (न्), अनुचरः -चारी *m.* (न्), अनुगतिकः, अनुयात्रिकः, अभिसरः, पार्श्वपरिवर्त्ती *m.* (न्), पार्ष्णिग्राहः, उपधावनः.—(Adherent, disciple) अनुषक्ती, भक्तः, आश्रितः, भाक्तिकः, शिष्यः; 'follower of Krishna,' कृष्णाश्रितः.—(Attendant, defendant) परिजनः, अनुचरः, सेवकः, अनुजीवी *m.* (न्) -विकः, उपजीवी *m.*, परिवारः.—(Companion, associate) सहायः, सहचरः, सङ्गी *m.* (न्).

FOLLOWING, *part.* (Going after) अनुगः -गा -गं, अनुयायी -यिनी -यि (न्), अनुसारी -रिणी -रि (न्), अनुगामी -मी -मि (न्), अनुपदः -दा -दं, अन्वक्षः -क्षा -क्षं, अन्वङ् अनूची अन्वक् (च्), अनुपदं.—(Next after) परः -रा -रं.—(Succeeding) अनुयायी &c.

FOLLOWING, *s.* (Act of) अनुगमः -मनं, अनुसरणं, अनुवर्त्तनं, अनुव्रजनं.

FOLLY, *s.* मूर्खता, मौर्ख्यं, मूढता -त्वं, मोहः, मौढ्यं, बुद्धिहीनता, निर्बुद्धिता, अज्ञता, अविज्ञता, अनभिज्ञता, अज्ञानं, ज्ञानाभावः, प्रज्ञाहीनता.

To FOMENT, *v. a.* (Heat with warm lotions) स्विद् in caus. (स्वेदयति -यितुं), प्रस्विद्, घर्म्मोदकादिना or उष्णोदकादिना लिप् (c. 6. लिम्पति, लेप्तुं) or अनुलिप् or अञ्ज् (c. 7. अनक्ति, अंक्तुं) or दिह् (c. 2. देग्धि -ग्धुं) or सिच् (c. 6. सिञ्चति, सेक्तुं) or निषिच्.—(Encourage, excite) वृध् in caus. (वर्धयति -यितुं), संवृध् in caus., प्रवृत् in caus. (-वर्त्तयति -यितुं), तेजो दा, तेजोवृद्धिं कृ, उत्तिज् (c. 10. -तेजयति -यितुं), उत्तप् (c. 10. -तापयति -यितुं), उद्दीप् (c. 10. -दीपयति -यितुं); 'foment dissensions,' उपजप् (c. 1. -जपति -पितुं), कर्णे जप्, उपजापेन भेदं वृध् in caus.

FOMENTATION, *s.* (Act of heating with warm lotions, &c.) स्वेदनं, प्रस्वेदनं, घर्म्मोदकादिना विलेपनं or अनुलेपनं or सेचनं.—(The lotion itself) घर्म्मलेपः, घर्म्मानुलेपनं, उष्णोपदेहः.—(Encouragement) उद्दीपनं, उत्तेजनं, उत्तापः, संवर्धनं.

FOMENTED, *p. p.* स्वेदितः -ता -तं.—(Encouraged) उद्दीप्तः -प्ता -प्तं, संवर्धितः -ता -तं.

FOMENTER, *s.* (Of dissension) उपजापकः, कर्णेजपः, भेदकरः, कलिकारकः.

FOND, *a.* (Loving) अनुरक्तः -क्ता -क्तं, अनुरागवान् -वती -वत् (त्), अनुरागी -गिणी -गि (न्), सानुरागः -गा -गं, स्नेही -हिनी -हि (न्), स्नेहितः -ता -तं, कामी -मिनी -मि (न्), प्रणयी -यिनी -यि (न्).—(Attached to, delighting in) आसक्तः -क्ता -क्तं, प्रसक्तः -क्ता -क्तं, परः -रा -रं, तत्परः -रा -रं, रतः -ता -तं, सेवी -विनी -वि (न्), अभिलाषी -षिणी -षि (न्), आनन्दी -न्दिनी -न्दि (न्) -न्दितः -ता -तं, प्रमोदी -दिनी -दि (न्); 'fond of one's ease,' सुखाभिलाषी -षिणी -षि (न्); 'fond of embracing,' आलिङ्गनतत्परः -रा -रं; 'fond of noise,' ध्वनमोदी &c. Often expressed by प्रिय in comp.; as, 'fond of water,' जलप्रियः -या -यं; 'fond of mountains,' गिरिप्रियः -या -यं; 'fond of ornament,' प्रियमण्डनः -ना -नं; or by काम in comp.; as, 'fond of flesh,' मांसकामः -मा -मं; 'to be fond of,' अनुरागवान् -वती -वद् अस् or भू, सेव् (c. 1. सेवते -वितुं), अभिलष् (c. 1. -लषति -षितुं), रुच् (c. 1. रोचते -चितुं), with dat. of the person; अभिनन्द् (c. 1. -नन्दति -न्दितुं).—(Doting) अत्यनुरक्तः -क्ता -क्तं.—(Silly) मूढः -ढा -ढं, मुग्धः -ग्धा -ग्धं.

To FONDLE, *v. a.* आलिङ्ग् (c. 1. -लिङ्गति -ङ्गितुं), समालिङ्ग्, परिष्वञ्ज् (c. 1. -ष्वजते -ष्वंक्तुं), परिमृश् (c. 6. -मृशति -मष्टुं), लल् (c. 10. लालयति -यितुं), क्रोडीकृ, भुजापीडितं -तां -तं कृ, प्रेम कृ, अनुरागं कृ, अङ्कीकृ, अङ्के कृ, अङ्के पाल् (c. 10. पालयति -यितुं).

FONDLED, *p. p.* लालितः -ता -तं, क्रोडीकृतः -ता -तं, भुजापीडितः -ता -तं.

FONDLING, *s.* (Caressing) आलिङ्गनं, परिष्वङ्गः, लालनं, क्रोडीकरणं, अङ्कपाली -लिका -लिः *m.*, भुजापीडः.—(The person or thing fondled) प्रेमपात्रं, प्रेमभूमिः *f.*, अनुरागपात्रं.

FONDLY, *adv.* सानुरागं, वात्सल्येन, अतिस्नेहेन, अतिप्रीतिपूर्वं.—(Foolishly) मूढवत्.

FONDNESS, *s.* स्नेहः, प्रीतिः *f.*, अनुरक्तिः *f.*, अनुरागः, प्रेम *n.* (न्), प्रियता, वात्सल्यं, वत्सलता, प्रणयः, अभिरुचिः *f.*, रुचिः *f.*, सन्तोषः.

FONT, *s.* पूजाशालामध्ये जलसंस्कारकरणे प्रयुक्तः प्रस्तरमयो जलाधारः.—(Complete assortment of printing types of one size) समपरिमाणमुद्राक्षरपरिसंख्या.

FOOD, *s.* भोजनं, आहारः, भोज्यं, भक्ष्यं, खाद्यं, अन्नं, आद्यं, अदनं, खादनं.

आहार्य्यं, अभ्याहार्य्यं, आमिषं, जग्धिः *f.*, अशनं, भक्षणं, भक्तं, चाम्यं, जेमनं, जमनं, घनः *n.* (स्), घसिः *m.*, निघसः, विघसः, ग्रासः, प्सानं, प्रत्यदनं, आशः, देहयात्रा, जीवनकः, शरीरयात्रा, न्यादः, लेपः, लेहः; 'choice food,' परमान्नं, उत्तमान्नं, भोजनविशेषः; 'bad food,' कदन्नं; 'food and raiment,' ग्रासाच्छादनं, अन्नाच्छादनं, अशनाच्छादनं or -ने n. du., अन्नवस्त्रं, कशिपुः m. du.; 'food of the gods,' अमृतं, पीयूषं, पेयूषं, सुधा, लेह्यं; 'to eat food,' आहारं कृ. Food is divided by the Hindús into five kinds, भक्ष्यं, भोज्यं, लेह्यं, चोष्यं, पेयं.

Fool, *s.* मूर्खः, मूढः, अज्ञः, निर्बुद्धिः *m.*, निर्बोधः, अबुद्धिः *m.* -द्धिमान् *m.* (त्), अबुधः, अप्राज्ञः, अविज्ञः, अविद्वान् *m.* (स्), प्रमूढः, प्रज्ञाहीनः, अज्ञानी *m.* (न्), जडः, जडमतिः *m.*, अल्पधीः *m.*, मन्दबुद्धिः *m.*, मन्दः, बर्ब्बरः, कुराठकः, लटः.—(Buffoon, jester) विदूषकः, नर्म्मसचिवः, भण्डः.

To fool, *v. n.* खेला (nom. खेलायति), कुड् (c. 6. कुडति -डितुं), परिहासं कृ, लट् (c. 1. लटति -टितुं).

To fool, *v. a.* मुह् (c. 10. मोहयति -यितुं), सम्मुह्, वञ्च् (c. 10. वञ्चयते -यितुं), प्रलभ् (c. 1. -लभते -लब्धुं), छल् (c. 10. छलयति -यितुं).

Foolery, *s.* मूर्खकर्म्म *n.* (न्), मूर्खक्रिया, मूर्खता, बालकर्म्म *n.*, बालिश्यं.

Fool-hardiness, *s.* असमीक्ष्य साहसं, अविचारेण प्रगल्भता, अतिसाहसिकत्वं, जाल्मत्वं, अविमृश्यकारित्वं, अत्यन्तं हेतं, दर्पः, प्रमत्तता.

Fool-hardy, *a.* असमीक्ष्य साहसी -सिनी -सि (न्), अविमृश्य प्रगल्भः -ल्भा -ल्भं, जाल्मः -ल्मा -ल्मं, प्रमत्तवीरः -रा -रं, प्रमत्तशूरः -रा -रं.

Foolish, *a.* मूर्खः -र्खा -र्खं मूढः -ढा -ढं, अज्ञः -ज्ञा -ज्ञं, अनभिज्ञः -ज्ञा -ज्ञं, निर्बुद्धिः -द्धिः -द्धि, निर्बोधः -धा -धं, अबुद्धिमान् -मती -मत् (त्), अप्राज्ञः -ज्ञा -ज्ञं, अल्पबुद्धिः &c., दुर्बुद्धिः &c., अल्पधीः -धीः -धि, बुद्धिहीनः -ना -नं, प्रज्ञाहीनः -ना -नं, दुर्मेधाः -धाः -धः (स्), दुर्मतिः -तिः -ति, अज्ञानः -ना -नं -नी -निनी -नि (न्), अकोविदः -दा -दं, बालिशः -शा -शं, बालिशमतिः -तिः -ति, अस्तधीः -धीः -धि, वैधेयः -यी -यं, असकृतः -ता -तं.

Foolishly, *adv.* मूर्खवत्, मूढवत्, अज्ञवत्, अज्ञानात्, मौर्ख्यात्, अल्पबुद्ध्या.

Foolishness, *s.* मूर्खता, मौर्ख्यं, मूढता, मौढ्यं, अज्ञता, अनभिज्ञता, निर्बुद्धित्वं, मोहः, बुद्धिहीनता, अबोधता, अज्ञानं, ज्ञानाभावः, बालिशता, बालिश्यं.

Foolscap, *s.* मूर्खशिरोवेष्टनसंज्ञकः कार्पासविशेषः or पत्रविशेषः.

Foot, *s.* (Part of the body) पादः, पदं, चरणं -णः, अंह्रिः *m.*, अङ्घ्रिः *m.*, अधमाङ्गं, लग्नः; 'both feet,' पादौ du., चरणौ du., चरणयुगं; 'point of the foot,' पादाग्रं, पदिकं; 'foot and knee,' पदष्ठीवं.—(Bottom, base) तलं, अधोभागः, अधःस्थानं, मूलं, उपस्थः; 'foot of a tree,' तरुतलं, वृक्षतलं, वृक्षाङ्घ्रिः *m.*, पादः; 'foot of a mountain,' उपत्यका, शैलोपशल्यं, पर्व्वततलं, गिरिपादः, पर्व्वताधोभागः.—(Measure) मनुष्यपादपरिमाणं, सार्द्धचतुरङ्गुलिपरिमाणं; 'ornament for the feet,' नूपुरः, पादाङ्गदं, चरणाभरणं, पादकटकः, तुलाकोटिः *f.*, मञ्जीरं; 'water for ablution of the feet,' पाद्यं, पादोदकं; 'to go on foot,' पद्भ्यां or पादाभ्यां व्रज् (c. 1. व्रजति -जितुं) or चर् (c. 1. चरति -रितुं); 'going on foot,' पादचारः; 'foot by foot,' पादशस्, पदे पदे, पच्छस्; 'at the foot,' पादतस्; 'to set on foot,' प्रवृत् (c. 10. -वर्त्तयति -यितुं); 'set on foot,' प्रवर्त्तितः -ता -तं, उपक्रान्तः -न्ता -न्तं.

To foot, *v. a.* (Kick) पादेन प्रहृ (c. 1. -हरति -हर्तुं) or आहन् (c. 2. -हन्ति -न्तुं), पादाघातं कृ.—(Tread) क्रम् (c. 1. क्रामति, क्रमितुं), चरणपातं कृ.

To foot it, *v. n.* नृत् (c. 4. नृत्यति, नर्त्तितुं), पादादि सञ्चल् in caus. (-चालयति -यितुं).

Foot-ball, *s.* वाताध्मातो गोवस्तिर् यः सङ्क्रीडमानजनपादाघातेन इतस्ततो विक्षिप्यते, पादाहतकन्दुकक्रीडा.

Foot-board, *s.* पादफलकं, चरणफलकं, पादकाष्ठं.

Foot-boy, *s.* बालसेवकः, युवसेवकः, बालभृत्यः, युवप्रेष्यः.

Foot-bridge, *s.* सङ्क्रमः, सङ्क्रामः, सङ्क्रमसेतुः *m.*, दुर्गसञ्चरः -सञ्चारः.

Footed, *p. p.* पादाहतः -ता -तं.—(Having feet) पादी -दिनी -दि (न्), पदी &c.

Foot-fall, *s.* पदपातः, पादपातः, चरणपातः, पदन्यासः, पदविष्टम्भः.—(Trip) स्खलनं.

Foot-fight, *s.* पादातियुद्धं, पदातियुद्धं, पदिकयुद्धं, पदगयुद्धं.

Foot-guard, *s.* पादातिकसैन्यः, पदातिकसैनिकः, पदगरक्षकः.

Footing, *s.* (Ground for the feet) पादन्यासस्थानं, पादनिक्षेपस्थानं, पदविष्टम्भस्थानं, पदं, स्थानं, भूमिः *f.*, स्थलं, आस्पदं, वर्त्म *n.* (न्), पदवी -विः *f.*, अयनं, सरणिः *f.*, वर्त्तनं; 'firm footing,' प्रतिष्ठानं; 'place with no firm footing,' अस्थानं.—(Basis, foundation) मूलं, उपष्टम्भः, तलं.—(Support) उपस्तम्भः, उपघ्नः, आश्रयः, अवलम्बनं.—(Condition, position) अवस्था, स्थितिः *f.*, भावः, संस्थानं, वृत्तिः *f.*

Footless, *a.* पादहीनः -ना -नं, निष्पादः -दा -दं, चरणहीनः -ना -नं.

Foot-licker, *s.* पादसेवकः, चरणसेवकः, पदानुरागः, पीठमर्द्दः.

Foot-man, *s.* (Foot-soldier) पदातिः *m.* -तिकः, पादातिः *m.* -तिकः, पादातः, पदातः, पादात्, पत्तिः *m.*, पदगः, पन्नः, पदिकः, पादचारः -री *m.* (न्), पादाविकः, पदाजिः *m.*—(Running footman) जाङ्घिकः.—(Servant) सेवकः, प्रेष्यः, कुलसेवकः, परिचरः, किङ्करः.

Foot-mark, *s.* पादचिह्नं, पदचिह्नं, पदाङ्कः, पदपंक्तिः *f.*, पादमुद्रा, चरणपदवी, पदवी, पदं; 'of a horse,' खुरपदवी.

Foot-pace, *s.* पदपातः, पादगतिः *f.*, पदक्रमः, चरणक्रमः,

Foot-pad, *s.* मार्गणिकघ्नः, पादविकघ्नः, परिपन्थी *m.* (न्), होडा *m.* (ढ्).

Foot-pan, *s.* पाद्यपात्रं, पाद्यभाजनं, पाद्याधारः, पादोदकपात्रं.

Foot-path, *s.* पदविः *f.* -वी, पदगपथः, पदिकमार्गः, पादचारयोग्यः क्षुद्रपथः.

Foot-soldier, *s.* पदातिः *m.*, पत्तिः *m.*, पदातिकसैन्यः, पादातिकयोद्धा *m.* (ढ्). *See* Foot-man.

Foot-stalk, *s.* प्रसवबन्धनं, वृन्तं, मञ्जरी.

Foot-step, *s.* (Mark of the foot) पादचिह्नं, पदाङ्कः, पदपंक्तिः *f.*, पादमुद्रा, चरणपदवी.—(Tread) पदपातः, पादपातः, पादन्यासः, चरणपातः, पदविक्षेपः, पदविष्टम्भः.—(Course, track) पदविः -वी *f.*, अनुपदं, पद्धतिः *f.*, पथः, मार्गः, अयनं, वर्त्म *n.* (न्).—(Token) चिह्नं, लक्षणं.

Foot-stool, *s.* पादपीठं, चरणपीठं, पादासनं, पादपः, पदासनं.

Fop, *s.* दर्शनीयमानी *m.* (न्), दम्भी *m.* (न्), गर्व्वी *m.* (न्), आत्माभिमानी, रूपगर्व्वितः, सुवेशमानी *m.*, सुवेशिनम्मन्यः, छेकः.

Foppery, *s.* सुवेशमानिता, रूपमानिता, मूर्खता, मूर्खकर्म्म *n.* (न्).

Foppish, *a.* दम्भी -म्भिनी -म्भि (न्), वेशाभिमानी -निनी -नि (न्).

Foppishness, *s.* वेशाभिमानता, दम्भः, दाम्भिकत्वं, रूपगर्व्वितत्वं.

For, *conj.* (Because) यतस्, यत्, येन, यस्मात्, हि, इति हेतोः, तदर्थं, अनेन हेतुना. *See* Because.—(For as much as) यतस्, यत्, or expressed by the abl. c. of the abst. noun; as, 'for as much as he was a good man,' सज्जनत्वात्.

For, *prep.* (In exchange for) प्रति with abl. c., विनिमयेन; 'he exchanges beans for sesamum seed,' तिलेभ्यः प्रति माषान् ददाति; or expressed by the inst. c., as, तिलैर् माषान् परिवर्त्तयति; 'in exchange for one's life,' स्वप्राणविनिमयेन.—(Instead of, in place of) स्थाने, प्रति.—(Toward) प्रति, उद्दिश्य with

acc. c.—(On account of, by reason of) अर्थं, अर्थे, हेतोः, हेतौ, कृते, निमित्ते, कारणात् all affixed to the crude; as, 'for this cause,' तदर्थं, or expressed by उद्दिश्य with acc. c., or by the abl. c.; as, 'for anger he did it,' कोपात् तत् कृतवान्; 'for want of money,' धनाभावात्.—(Conducive to) अर्थं, अर्थे, or expressed by the dat. c., as, 'for the good of the world,' भूतये भुवः; 'for one's own advantage,' आत्मविवृद्धये.—(For the sake of) अर्थं, अर्थे, हेतोः, कृते, or by dat. c., as, 'for the satisfying of hunger,' क्षुधाशान्तये; 'for thy enjoyment,' तव भोगाय.—(In order to obtain) अर्थं, अर्थे or by dat. c., as, 'for fame,' प्रतिपत्तये, or even by inst. c., as, 'for hire,' भाटकेन.—(In return for) प्रति, or more usually expressed by the indec. part.; as, 'for so doing,' तत् कृत्वा.—(During a certain time) यावत्, पर्य्यन्तं; 'for life,' पुरुषस्यायुर् यावत्, यावज्जीवं, जीवनपर्य्यन्तं, or by prefixing आ with abl. c., as, आमरणात्, आजीवनान्तात् (*i. e.* until death); 'lasting for life,' आमरणान्तिकः -का -कं; 'for three days,' दिनत्रयपर्य्यन्तं; 'for a hundred years,' वर्षशतं यावत्. Sometimes expressed by the acc. c., as, 'for one month,' एकं मासं; 'for two months,' द्वौ मासौ; 'for a hundred years,' वर्षशतं, or even by the instr. c., as, 'for twelve years,' द्वादशभिर् वर्षैर्; 'for a few days,' कतिपयदिवसैः; 'for a long time,' चिरकालं, अनेककालं, चिरात्, चिरेण, चिराय; 'food for a year,' वर्षोपभोग्यम् अन्नं.—(In proportion to, considering) अपेक्ष्य, उद्दिश्य, प्रतीक्ष्य, अवेक्ष्य, all with acc. c.—(On the part of) अपेक्ष्य, उद्दिश्य, कृते; 'as for me,' मामपेक्ष्य, मामुद्दिश्य, मत्कृते.—(On the side of) सपक्षः -क्षा -क्षं; 'he is for us,' अस्माकं सपक्षो भवति.—(Notwithstanding, for all that) तथापि.—(As if) वत् affixed, इव; 'he shewed himself for dead,' मृतवत् or मृतम् इव आत्मानम् अदर्शयत्.—(According to) यथा, अनुसारेण, अनुरूपेण; 'for one's ability,' यथाशक्ति. 'For,' may be expressed by the acc. c. in such phrases as 'looking for,' 'waiting for,' &c.; as, 'he looks for me,' माम् अपेक्षते, or by other cases; as, 'we depend on God for success,' ईश्वराधीना सिद्धिः; 'I have great affection for her,' तस्याम् अनुरागवान् अस्मि or तया सह महान् स्नेहः, or by गत, as, 'through love for him,' तद्गतेन अनुरागेण, or by the crude form, as, 'search for money,' धनान्वेषणं, or even by the affix सात्, as, 'he built a house for the Brahman,' गृहं चकार द्विजातिसात्.—(For the most part) प्रायेण, प्रायस्, प्रायशस्, भूयिष्ठं.

FORAGE, *s.* (Food for horses and cattle) अश्वादनं, गवादनं, अश्वादिभोजनं.—(Provisions) यात्रिकं, पाथेयं, खाद्यद्रव्यं, भोज्यं, भोजनसम्भारः.—(Search for food) खाद्यद्रव्यान्वेषणं; 'going to forage,' प्रसारः -रणं, प्रसरणं.

To FORAGE, *v. n.* परिभ्रमणं कृत्वा खाद्यद्रव्याणि or अश्वादनम् अन्विष् (c. 4. -इष्यति -एषितुं), प्रसारं or अवस्कन्दं or उपद्रवं कृत्वा धान्यादिभोज्यम् अपहृ (c. 1. -हरति -हर्त्तुं).

FORAGER, *s.* भोजनार्थं परिभ्रमणकारी *m.* (न्) or अवस्कन्दकारी or प्रसारी *m.* (न्), युद्धसमये खाद्यद्रव्यान्वेषी *m.* (न्), or अश्वादिभोजनार्थं धान्यादिहारकः.

FORAGING, *s.* भोजनान्वेषणार्थं परिभ्रमणं or प्रसारणं or प्रसरणं or अवस्कन्दः or उपद्रवः, युद्धसमये खाद्यद्रव्यान्वेषणं; 'foraging army,' प्रचक्रं.

FORAY, *s.* उपद्रवः, अवस्कन्दः, विप्लवः, लोप्त्रार्थम् उपप्लवः.

To FORBEAR, *v. a.* and *n.* (Cease from) निवृत् (c. 1. -वर्त्तते -र्त्तितुं), विरम् (c. 1. -रमति -रन्तुं).—(Delay, pause) विलम्ब् (c. 1. -लम्बते -म्बितुं), विरम्, आकालान्तरात् त्यज् (c. 1. त्यजति, त्यक्तुं).—(Avoid) वृज् (c. 10. वर्जयति -यितुं), परिहृ (c. 1. -हरति -हर्त्तुं).—(Be patient) सह् (c. 1. सहते, सोढुं), क्षम् (c. 1. क्षमते -मितुं, क्षन्तुं).

FORBEARANCE, *s.* (Cessation from, avoidance) निवृत्तिः *f.*, विनिवृत्तिः *f.*, सन्निवृत्तिः *f.*, विरतिः *f.*, विरामः, उपरतिः *f.*, वर्जनं, त्यागः, परिहारः.—(Patience) क्षमा, क्षान्तिः *f.*, तितिक्षा, सहनं, सहनशीलता, सहिष्णुता, मर्षः, परामर्षः, अपकारेऽपि चित्तस्याविकारः.—(Restraint) संयमः, यमः, यामः, संयामः, वियामः, वियमः, दमः.

FORBEARING, *a.* सहनशीलः -ला -लं, सहिष्णुः -ष्णुः -ष्णु, तितिक्षुः -क्षुः -क्षु, क्षमी -मिणी -मि (न्), संयमवान् -वती -वत् (त्).

To FORBID, *v. a.* (Prohibit) प्रतिषिध् (c. 1. -षेधति -षेद्धुं, c. 10. -षेधयति -यितुं), निषिध्, प्रत्याख्या (c. 2. -ख्याति -तुं), अन्तःख्या, परिभाष् (c. 1. -भाषते -षितुं), मैवं कुरु or मैवं कार्षीर् इति आज्ञा in caus. (-ज्ञापयति -यितुं) or आदिश् (c. 6. -दिशति -देष्टुं).—(Prevent) वृ in caus. (वारयति -यितुं), निवृ, निरुध् (c. 7. -रुणद्धि -रोद्धुं), बाध् (c. 1. बाधते -धितुं); 'heaven forbid!' इत्थं न भूयात्, एतादृशं न भवतु, शान्तं.

FORBIDDANCE, *s.* निषेधः, प्रतिषेधः, प्रतिषेधोक्तिः *f.*, प्रत्याख्यानं, वारणं, निवारणं, निरोधः, बाधः, बाधकता.

FORBIDDEN, *p. p.* निषिद्धः -द्धा -द्धं, प्रतिषिद्धः -द्धा -द्धं, निवारितः -ता -तं.

FORBIDDING, *a.* बीभत्सजनकः -का -कं, घृणोत्पादकः -का -कं, अनिष्टः -ष्टा -ष्टं.

FORCE, *s.* (Strength) बलं, शक्तिः *f.*, सामर्थ्यं, समर्थता.—(Energy, might) तेजः *n.* (स्), वीर्य्यं, विक्रमः, पराक्रमः, ऊर्जः, शौर्य्यं.—(Violence) बलात्कारः, साहसं, प्रमाथः, प्रसभं.—(Momentum) वेगः, आपातः.—(Efficacy) प्रभावः, प्राबल्यं, गौरवं, सामर्थ्यं, प्रतापः.—(Validity) सिद्धिः *f.*, निष्पत्तिः *f.*; 'of force,' सिद्धः -द्धा -द्धं, निष्पन्नः -न्ना -न्नं; 'of no force,' असिद्धः -द्धा -द्धं, मोघः -घा -घं, निष्फलः -ला -लं; 'put in force,' प्रवर्त्तितः -ता -तं.—(Force of a word) शब्दशक्तिः *f.*, शब्दसामर्थ्यं -समर्थता, निरूढः, लक्षणं.—(Forces, troops) बलं, सैन्यं, सेना, सैन्याः *m. pl.*, अनीकं -कानि *n. pl.*, अनीकिनी, दण्डः; 'by force,' बलात्, बलेन, बलात्कारेण; 'taken by force,' बलाद्गृहीतः -ता -तं, कलहापहृतः -ता -तं.

To FORCE, *v. a.* (Compel). Expressed by the causal form usually in conjunction with बलात् or बलेन or बलात्कारेण or यत्नेन; as, 'to force a man to do any thing,' बलेन पुरुषं किञ्चित् कृ in caus. (कारयति -यितुं) or प्रवृत् in caus. (-वर्त्तयति -यितुं); 'to force to give,' दा in caus. (दापयति -यितुं); 'to force to go,' बलेन गम् in caus. (गमयति -यितुं).—(Impel, drive) प्रेर् (c. 10. प्रेरयति -यितुं), कृष् (c. 1. कर्षति, क्रष्टुं), समाकृष्, प्रणुद् (c. 6. -णुदति -णोत्तुं).—(Use force) बलात्कारं कृ, साहसं कृ, विक्रमं कृ, यत्नं कृ, प्रतियत्नं कृ.—(Force a town, storm) दुर्गं लङ्घ् (c. 10. लङ्घयति -यितुं) or भञ्ज् (c. 7. भनक्ति, भंक्तुं) or बलेन प्रविश् (c. 6. -विशति -वेष्टुं).—(Violate) धृष् (c. 10. धर्षयति -यितुं), बलात्कारेण अभिगम् (c. 1. -गच्छति -गन्तुं).—(Cause to produce fruit prematurely) प्राक्पूर्णकालात् फलोत्पत्तिं जन् (c. 10. जनयति -यितुं).

FORCED, *p. p.* (To do) बलात् कारितः -ता -तं.—(To pay) दापितः -ता -तं.—(Done by force) बलात्कृतः -ता -तं, बलात्कारितः -ता -तं, यत्नकृतः -ता -तं, यत्नपूर्ब्बः -र्ब्बा -र्ब्बं.—(Strained, unnatural, affected)

क्लिष्टः -ष्टा -ष्टं, प्रतियत्नपूर्व्वः -र्व्वा -र्व्वं, विलक्षः -क्षा -क्षं, कृत्रिमः -मा -मं; 'a forced idea,' क्लिष्टकल्पना; 'a forced smile,' वैलक्ष्यस्मितं.

FORCEDLY, *adv.* बलात्, यत्नपूर्व्वं, प्रतियत्नपूर्व्वं, वैलक्ष्येण, सवैलक्ष्यं.

FORCEFUL, *a.* बलवान् -वती -वत् (त्), शक्तः -क्ता -क्तं, साहसी -सिनी -सि (न्).

FORCELESS, *a.* निर्बलः -ला -लं, शक्तिहीनः -ना -नं, अशक्तः -क्ता -क्तं.

FORCE-MEAT, *s.* पुस्तं, निस्तनी, मिष्टान्नं, उपस्करः, व्यञ्जनं.

FORCEPS, *s.* सन्दंशः -शकं -शका, खण्डधारा, शल्योद्धरणयन्त्रं.

FORCIBLE, *a.* (Powerful) प्रबलः -ला -लं, बलवान् -वती -वत् (त्), शक्तिमान् -मती -मत् (त्), समर्थः -र्था -र्थं, तेजोवान् -वती -वत् (त्). —(Efficacious) सप्रभावः -वा -वं, प्रभविष्णुः -ष्णुः -ष्णु, अमोघः -घा -घं, अव्यर्थः -र्था -र्थं. —(Impressive) निर्बन्धेन or दार्ढ्येन or गौरवेण or सगौरवम् उक्तः -क्ता -क्तं, तीक्ष्णः -क्ष्णा -क्ष्णं. —(Violent, done by force) साहसिकः -की -कं, बलेन कृतः -ता -तं; 'forcible entry,' बलप्रवेशः or बलात्प्रवेशः; 'forcible removal,' बलापकर्षः.

FORCIBLENESS, *s.* बलवत्त्वं, शक्तिमत्त्वं, प्राबल्यं, सामर्थ्यं, तैक्ष्ण्यं, गौरवं.

FORCIBLY, *adv.* बलात्, बलेन, बलात्कारेण, बलवत्, प्रसभं, प्रसह्य, अभिषह्य, प्रमथ्य, बलापकर्षं, अवगृह्य. —(Impressively) निर्बन्धेन, दार्ढ्येन, गौरवेण, सगौरवं.

FORD, *s.* नदीतरस्थानं, नदीतरस्थलं, तरणस्थानं, उत्तरणस्थानं, ईषज्जलो नदीभागः, घट्टः.

To FORD, *v. a.* पद्भ्यां or पादाभ्यां or अश्वगजादिवाहनेन नदीम् ईषज्जलस्थाने तृ (c. 1. तरति -रितुं -रीतुं) or नदीपारं तृ.

FORDABLE, *a.* पद्भ्यां or पादाभ्यां or अश्वगजादिवाहनेन तार्य्यः -र्य्या -र्य्यं, सुतरः -रा -रं, पादस्पृश्यतलः -ला -लं, अल्पजलः -ला -लं.

FORDING, *s.* पद्भ्यां or पादाभ्यां or अश्वादिवाहनेन नदीतरणं or उत्तरणं.

FORE, *a.* पूर्व्वः -र्व्वा -र्व्वं, अग्रः -ग्रा -ग्रं, पूर्व्ववर्त्ती -र्त्तिनी -र्त्ति (न्), अग्रगामी -मिनी -मि (न्), पूर्व्वगतः -ता -तं; 'fore-part,' अग्रभागः, अग्रांशः; 'fore part of the thigh,' अग्रजङ्घा.

FORE, *adv.* पूर्व्वं, पूर्व्वे, अग्रे, अग्रतस्, पूर्व्वतस्, प्राक्; 'fore and aft,' नावोऽग्रभागात्प्रभृति पश्चिमभागपर्य्यन्तं.

To FORE-ADMONISH, *v. a.* अग्रे प्रबुध् (c. 10. -बोधयति -यितुं) or उपदिश् (c. 6. -दिशति -देष्टुं).

FORE-ARM, *s.* प्रकोष्ठः, प्रवेष्टः, कलाचिका, अग्रबाहुः *m.*, अग्रभुजः.

To FORE-ARM, *v. a.* अग्रे or पूर्व्वं सन्नह् (c. 4. -नह्यति -नद्धुं) or युद्धार्थं सज्जीकृ.

To FORE-BODE, *v. a.* अनिष्टघटनां पूर्व्वं सूच् (c. 10. सूचयति -यितुं) or अग्रे ज्ञा (c. 9. जानाति, ज्ञातुं) or प्रदृश् (c. 1. -पश्यति -द्रष्टुं), पूर्व्वलक्षणं दा, पूर्व्वचिह्नं दा, पूर्व्वलक्षणेन अनिष्टम् अनुमा (c. 2. -माति -तुं) or अवगम् (c. 1. -गच्छति -गन्तुं).

FOREBODER, *s.* अनिष्टसूचकः, अनिष्टप्रदर्शकः, पूर्व्वलक्षणज्ञः, पूर्व्वलिङ्गज्ञः, अग्रसूचकः.

FOREBODING, *s.* अनिष्टसूचनं -ना, अनिष्टप्रदर्शनं, पूर्व्वलक्षणाद् अनिष्टानुमानं.

To FORECAST, *v. a.* and *n.* अग्रे or पूर्व्वं चिन्त् (c. 10. चिन्तयति -यितुं) or प्रचिन्त् or निरूप् (c. 10. -रूपयति -यितुं) or उपायम् अनुसन्धा, (c. 3. -दधाति -धातुं), अग्रविवेचनां कृ, अग्रकल्पनां कृ.

FORECAST, *s.* अग्रचिन्तनं, अग्रनिरूपणं, पूर्व्वविवेचनं, पूर्व्वकल्पना, दीर्घदृष्टिः *f.*

FORECASTLE, *s.* नावः पूर्व्वभागः or अग्रभागः, अग्रकूपकपुरतो नौभागः.

To FORECLOSE, *v.* प्रतिबन्ध् (c. 9. -बध्नाति -बन्धुं), प्रतिषिध् (c. 1. -षेधति -षेद्धुं). —(Foreclose a mortgage) न्यासकारिणः ऋणमोक्षणक्षमताम् अपनी (c. 1. -नयति -नेतुं).

FORECLOSURE, *s.* प्रतिबन्धनं, प्रतिषेधः, अवरोधनं, ऋणमोक्षणक्षमताहरणं.

FOREDECK, *s.* नौकापृष्ठस्य पूर्व्वभागः or अग्रभागः, पूर्व्वपृष्ठं, अग्रपृष्ठं.

To FORE-DETERMINE, *v. a.* अग्रे निश्चि (c. 5. -चिनोति -चेतुं) or निर्णी (c. 1. -णयति -णेतुं).

FORE-DETERMINED, *p. p.* पूर्व्वनिश्चितः -ता -तं, पूर्व्वनिर्णीतः -ता -तं, अग्रविचारितः -ता -तं.

To FOREDOOM, *v. a.* अग्रे or पूर्व्वं निर्दिश् (c. 6. -दिशति -देष्टुं) or प्रक्लृप् (c. 10. -कल्पयति -यितुं) or विचर् in caus. (-चारयति -यितुं).

FOREFATHERS, *s. pl.* पूर्व्वाः *m. pl.*, पूर्व्वपुरुषाः *m. pl.*, पूर्व्वजाः *m. pl.*, पितृलोकः, पितरः *m. pl.*, पितृपितामहादि *n.*, वृद्धाः *m. pl.*; 'practice of forefathers,' वृद्धाचारः.

To FOREFEND, *v. a.* निवृ (c. 10. -वारयति -यितुं), प्रतिहन् (c. 2. -हन्ति -न्तुं), प्रतिकृ.

FOREFINGER, *s.* प्रदेशिनी, प्रदेशनी, देशिनी, देशी *m.* (न्), तर्ज्जनी, तरिता.

FOREFOOT, *s.* अश्वादिचतुष्पदजन्तूनां पूर्व्वपादः or सम्मुखीनपादः.

To FOREGO, *v. a.* अवसृज् (c. 6. -सृजति -स्रष्टुं), उत्सृज्, त्यज् (c. 1. त्यजति, त्यक्तुं), परित्यज्, हा (c. 3. जहाति, हातुं), उज्झ् (c. 6. उज्झति -ज्झितुं), प्रोज्झ्.

FOREGONE, *s.* त्यक्तः -क्ता -क्तं, परित्यक्तः -क्ता -क्तं, अवसृष्टः -ष्टा -ष्टं.

FOREGROUND, *s.* चित्रगतभूमेर् अग्रभागः or पूर्व्वभागः.

FOREHEAD, *s.* ललाटं, अलिकं, अलीकं, भालं, गोधिः *m.*, मुण्डः -ण्डं, ललाटतटं, ललाटपट्टं, लकं, निटलं, गण्डशैलः, महाशङ्खः; 'having a high forehead,' उच्चललाटः -टा -टं; 'the open forehead,' ललाटफलकं.

FOREIGN, *a.* विदेशीयः -या -यं, वैदेशिकः -की -कं, विदेशी -शिनी -शि (न्), पारदेशिकः -की -कं, परदेशी -शिनी -शि (न्), विदेशजः -जा -जं, अन्यदेशीयः -या -यं, अन्यदेशजः -जा -जं, अन्यदेशोद्भवः -वा -वं, भिन्नदेशीयः -या -यं; 'a foreign country,' विदेशः, वहिर्देशः, देशान्तरं, अन्यदेशः. —(Extraneous) वहिर्भवः -वा -वं, वहिर्भूतः -ता -तं, वहिःस्थः -स्था -स्थं, वाह्यः -ह्या -ह्यं. —(Not pertaining) असम्बन्धी -न्धिनी -न्धि (न्), अनन्वितः -ता -तं, असम्पर्कीयः -या -यं.

FOREIGNER, *s.* विदेशी *m.* (न्), विदेशीयः, वैदेशिकः, परदेशी *m.* (न्), पारदेशिकः, पारदेश्यः, भिन्नदेशीयः, वहिर्देशजः, विदेशादागतः, देशान्तरादागतः, वहिर्देशोद्भवः, वैदेश्यः.

FOREIGNNESS, *s.* वाह्यत्वं, वहिर्भूतत्वं, दूरत्वं, असम्बन्धः, असम्पर्कः.

To FORE-IMAGINE, *v. a.* अग्रे मन् (c. 4. मन्यते, मन्तुं) or चिन्त् (c. 10. चिन्तयति -यितुं).

To FORE-JUDGE, *v. a.* अग्रे or पूर्व्वं विचर् (c. 10. -चारयति -यितुं) or निर्णी (c. 1. -णयति -णेतुं).

To FORE-KNOW, *v. a.* अग्रे or पूर्व्वं ज्ञा (c. 9. जानाति, ज्ञातुं) or विद् (c. 2. वेत्ति, वेदितुं) or निरूप् (c. 10. -रूपयति -यितुं) or बुध् (c. 4. बुध्यते, बोद्धुं), भविष्यद् ज्ञा, प्रवेक्ष् (c. 1. -ईक्षते -क्षितुं), प्रदृश् (c. 1. -पश्यति -द्रष्टुं), पूर्व्वं लक्ष्यीकृ.

FOREKNOWLEDGE, *s.* अग्रज्ञानं, पूर्व्वज्ञानं, अग्रनिरूपणं, भविष्यज्ज्ञानं, भाविज्ञानं, प्रवेक्षणं, प्रदर्शनं, पूर्व्वलक्ष्यं, अग्रदृष्टिः *f.*, पूर्व्वदृष्टिः *f.*

FOREKNOWN, *p. p.* पूर्व्वज्ञातः -ता -तं, अग्रज्ञातः -ता -तं, अग्रनिरूपितः -ता -तं.

FORELAND, *s.* अन्तरीपः -पं, समुद्रमध्ये महाद्वीपवहिःस्थो भूमिभागः, उदग्रभूमिः *f.*, उदग्रभूः *f.*, उदग्रस्थलं, महाद्वीपनासिका, समुद्रनासिका.

FORELOCK, *s.* ललाटरुहः -हं, ललाटजः -जं, केशपाशी, ललाटकेशः, मस्तकाग्रकेशः, मस्तकाग्ररुहः केशपाशः or केशपक्षः.

FOREMAN, *s.* (Of a jury) द्वादशप्रमाणपुरुषप्रष्ठः, द्वादशमध्यस्थपुरुषमुख्यं, प्रधानमध्यस्थः, मुख्यप्रमाणपुरुषः. —(Superintendant) कार्य्याधिष्ठाता *m.* (तृ), अधिकर्म्मिकः, कार्य्याधीशः, कार्य्याध्यक्षः, कार्य्याधिकृतः, श्रेष्ठी *m.* (न्), कर्म्म कुर्व्वताम् अधिष्ठाता *m.*

FOREMAST, *s.* नौकाग्रस्थः कूपकः, नौकाग्रभागे गुणवृक्षकः, अग्रकूपकः.

FORE-MENTIONED, *a.* पूर्व्वोक्तः -क्ता -क्तं, पूर्व्वोदितः -ता -तं, प्रागुक्तः -क्ता -क्तं.

FOREMOST, *a.* अग्रः -ग्रा -ग्रं, मुख्यः -ख्या -ख्यं, प्रमुखः -खा -खं, अग्र्यः -ग्र्या -ग्र्यं, अग्रीयः -या -यं, प्राग्र्यः -ग्र्या -ग्र्यं, प्रधानः -ना -नं, प्रथमः -मा -मं, उत्तमः -मा -मं, उत्कृष्टः -ष्टा -ष्टं, श्रेष्ठः -ष्ठा -ष्ठं, सर्व्वश्रेष्ठः -ष्ठा -ष्ठं, सर्व्वाग्रस्थः -स्था -स्थं; 'first in rank,' प्रथमपदस्थः -स्था -स्थं.

FORENAMED, *a.* पूर्व्वोक्तः -क्ता -क्तं, पूर्व्वाभिहितः -ता -तं, पूर्व्वोदाहृतः -ता -तं.

FORENOON, *s.* पूर्व्वाह्णः, प्राह्णः, पूर्व्वाह्णकालः; 'in the forenoon,' प्राह्णे, पूर्व्वाह्णे, प्राह्णेतमां; 'relating to it,' प्राह्णेतनः -नी -नं, पूर्व्वाह्णेतनः -नी -नं.

FORENSIC, *a.* व्यावहारिकः -की -कं or व्यवहारिकः, व्यवहारी -रिणी -रि (न्), विचारसभासु व्यवहारितः -ता -तं, विचारस्थानसम्बन्धीयः -या -यं.

To FORE-ORDAIN, *v. a.* अग्रे or पूर्व्वं निरूप् (c. 10. -रूपयति -यितुं) or प्रक्लृप् (c. 10. -कल्पयति -यितुं) or निर्दिश् (c. 6. -दिशति -देष्टुं) or नियुज् (c. 7. -युनक्ति -योक्तुं) or विधा (c. 3. -दधाति -धातुं).

FORE-ORDAINED, *p. p.* अग्रनिरूपितः -ता -तं, पूर्व्वनिर्दिष्टः -ष्टा -ष्टं, पूर्व्वप्रकल्पितः -ता -तं.

FOREPART, *s.* अग्रभागः, पूर्व्वभागः, आदिभागः, प्रथमभागः, सम्मुखभागः

FORERANK, *s.* अग्रपदं, प्रथमपदं, प्रधानपदं, मुख्यपदं, श्रेष्ठपदविः *f.*

To FORE-RUN, *v. a.* अग्रे or अग्रतः or पुरः or प्राक् सृ (c. 1. सरति, सर्त्तुं) or गम् (c. 1. गच्छति, गन्तुं) or या (c. 2. याति -तुं) or वृत् (c. 1. वर्त्तते -र्त्तितुं).

FORE-RUNNER, *s.* अग्रेसरः, अग्रसरः, अग्रगः -गामी *m.* (न्), पुरोगः -गामी *m.*, प्राग्गामी *m.*, अग्रवर्त्ती *m.* (न्), अग्रगतः, पूर्व्वपुरुषः.

FORESAID, *p. p.* पूर्व्वोक्तः -क्ता -क्तं, पूर्व्वोदितः -ता -तं, प्रागुक्तः -क्ता -क्तं.

FORESAIL, *s.* नौकाग्रस्थकूपकालम्बितं वायुवसनं or वातवसनं.

To FORESAY, *v. a.* अग्रे or पूर्व्वं वद् (c. 1. वदति -दितुं) or प्रवद्, भविष्यद् वद्.

To FORESEE, *v. a.* प्रदृश् (c. 1. -पश्यति -द्रष्टुं), उत्दृश्, प्रवेक्ष् for प्रावेक्ष् (c. 1. -ईक्षते -क्षितुं), अग्रे or पूर्व्वं दृश्, अनागतं or परिणामं or भविष्यद् दृश् or समीक्ष्, अग्रे ज्ञा (c. 9. जानाति, ज्ञातुं) or निरूप् (c. 10. -रूपयति -यितुं).

FORESEEING, *part.* प्रपश्यन् -श्यन्ती -श्यत् (त्), अग्रदर्शी -र्शिनी -र्शि (न्), अनागतदर्शी &c., पूर्व्वदर्शी &c., भविष्यद्दर्शी &c., दूरदर्शी &c., अन्तरज्ञः -ज्ञा -ज्ञं, प्रवेक्ष्यन् &c. for प्रावेक्ष्यन् &c.

FORESEEN, *p. p.* प्रवेक्षितः -ता -तं, प्रदृष्टः -ष्टा -ष्टं, सन्दृष्टः -ष्टा -ष्टं, सन्दृश्यमानः -ना -नं, अग्रनिरूपितः -ता -तं.

To FORESHADOW, *v. a.* पूर्व्ववर्णनं कृ, पूर्व्वमूर्त्तिं कृ, अग्रे रूप् (c. 10. रूपयति -यितुं).

To FORESHAME, *v. a.* लज्ज् in caus. (लज्जयति -यितुं), कलङ्क (nom. कलङ्कयति -यितुं).

FORE-SHIP, *s.* नावः पूर्व्वभागः or अग्रभागः, नौकाग्रभागः.

To FORESHORTEN, *v. a.* मूर्त्तिं चित्रसमर्पणात् सम्मुखभागे ह्रस् (c. 10. ह्रासयति -यितुं) or संहृ (c. 1. -हरति -हर्त्तुं) or संक्षिप् (c. 6. -क्षिपति -क्षेप्तुं).

To FORESHOW, *v. a.* प्रदृश् in caus. (-दर्शयति -यितुं), अग्रे or पूर्व्वं दृश् or सूच् (c. 10. सूचयति -यितुं), भविष्यत् सूच् or वद् (c. 1. वदति -दितुं).

FORESHOWN, *p. p.* प्रदर्शितः -ता -तं, अग्रसूचितः -ता -तं, पूर्व्वसूचितः -ता -तं.

FORESIGHT, *s.* पूर्व्वदृष्टिः *f.*, अग्रदृष्टिः *f.*, प्रवेक्षणं, प्रदर्शनं, परिणामदृष्टिः *f.*, अग्रनिरूपणं, भविष्यद्दर्शनं, दूरदृष्टिः *f.*, दूरदर्शनं, दीर्घदृष्टिः *f.*, परिवेदना.

FORESKIRT, *s.* अग्रस्थो वस्त्राञ्चलः, परिधानस्य अग्राञ्चलः, अग्रतो वसनाग्रं.

To FORESPEAK, *v. a.* अग्रे वद् (c. 1. वदति -दितुं), प्रवद्, प्रव्याहृ (c. 1. -हरति -हर्त्तुं).

FORESPENT, *a.* क्षीणबलः -ला -लं, श्रान्तः -न्ता -न्तं, खिन्नः -न्ना -न्नं.

FORESPOKEN, *a.* पूर्व्वोक्तः -क्ता -क्तं, पूर्व्वोदितः -ता -तं, प्रागुक्तः -क्ता -क्तं.

FOREST, *s.* अरण्यं -ण्यी -ण्यानी, वनं -नी, अटविः -वी *f.*, गहनं, गहः, काननं, विपिनं, जङ्गलः -लं, दावः, दवः, कान्तारः -रं, कुञ्जं, रिक्कं, तल्कं; 'forest on fire,' दावः, दावाग्निः *m.*, मुखाग्निः, मङ्गिलः.

FOREST, *a.* वन्यः -न्या -न्यं, आरण्यः -ण्यी -ण्यं -ण्यकः -का -कं, जङ्गलः -ला -लं, जाङ्गलः -ली -लं; 'produced in a forest,' वनोद्भवः -वा -वं, अरण्यजः -जा -जं -जातः -ता -तं, अरण्यभवः -वा -वं, अरण्योत्पन्नः -न्ना -न्नं, अरण्यसम्भवः -वा -वं, अरण्य or वन in comp.; as, 'a forest tree,' वनपादपः, अरण्यवृक्षः, वनराजिः *m.*, वनस्पतिः *m.*, वन्यतरुः *m.*

To FORESTALL, *v. a.* (Take beforehand) अग्रे or पूर्व्वं or पूर्व्वतो ग्रह् (c. 9. गृह्णाति, ग्रहीतुं) or आदा (c. 3. -दत्ते -दातुं), अग्रे गृहीत्वा निवृ (c. 10. -वारयति -यितुं) or निषिध् (c. 1. -षेधति -षेद्धुं).—(Buy beforehand) पूर्व्वं क्री (c. 9. क्रीणाति, क्रेतुं), पूर्व्वक्रयं कृ, प्रख्या (c. 2. -ख्याति -तुं).

FORESTALLED, *p. p.* पूर्व्वगृहीतः -ता -तं, पूर्व्वक्रीतः -ता -तं, प्रख्यातः -ता -तं.

FORESTALLER, *s.* पूर्व्वक्रेता *m.* (तृ), अग्रक्रयी *m.* (न्), सर्व्वपण्यानि विक्रयस्थानानयनात् पूर्व्वं क्रीत्वा मूल्यवर्धकः.

FORESTER, *s.* (Inhabitant of a forest) वनवासी *m.* (न्), अरण्यवासी *m.*, वनस्थायी *m.* (न्), वनस्थः, वनेचरः, वनचरः, वनचारी *m.* (न्), वनवर्त्ती *m.* (न्), वनौकाः *m.* (स्), अरण्यौकाः *m.* (स्), वनाश्रयः, वनव्यवहारी *m.* (न्), आरण्यकः, अरण्यसद् *m.*—(Overseer of the forests) अरण्याध्यक्षः, अरण्यरक्षकः.

FORETASTE, *s.* पूर्व्वभुक्तिः *f.*, अग्रभुक्तिः *f.*, पूर्व्वभोजनं, पूर्व्वास्वादनं, अग्रोपभोगः, पूर्व्वोपभोगः, पूर्व्वानुभवः, पूर्व्वज्ञानं, अग्रज्ञानं.

To FORETASTE, *v. a.* अग्रे or पूर्व्वं or अग्रतो भुज् (c. 7. भुंक्ते, भोक्तुं) or उपभुज् or अनुभू or आस्वाद् (c. 1. -स्वादति -दितुं), पूर्व्वभुक्तिं कृ, पूर्व्वस्वादनं कृ.

FORETASTED, *p. p.* पूर्व्वभुक्तः -क्ता -क्तं, पूर्व्वास्वादितः -ता -तं, पूर्व्वानुभूतः -ता -तं.

GANESHA, *s.* (Son of Siva and Párvatí, the god of wisdom, and remover of difficulties and obstacles, addressed at the commencement of all undertakings, and at the opening of all compositions. He is called 'Ganesha,' as presiding over the troop of deities attendant on Siva) गणेशः, गणनाथः, गणाधिपः, गणनायकः, गणपतिः *m.*, गणाग्रणीः *m.*,

गणः, हेमाङ्गः, हेरम्बः, हस्तिमल्लः.—(As remover of obstacles) विघ्नेशः, विघ्नराजः, विघ्ननाशकः -शनः, विघ्नविनायकः, विनायकः, विघ्नहारी *m.* (न्).—(Elephant-faced) गजाननः, गजवदनः, गजास्यः.—(Elephant-toothed) गजदन्तः.—(One-toothed) एकदन्तः.—(Big-bellied) लम्बोदरः.—(Two-bodied) द्विदेहः.—(Having two mothers) द्वैमातुरः.

GANG, *s.* (Company of persons) गणः, जनसमूहः, जनसंसर्गः, जननिवहः, सङ्घः, सङ्गः; 'of thieves,' चौरगणः.

GANG-BOARD, *s.* नौकारोहणावरोहणार्थं दीर्घकाष्ठफलकं.

GANG-DAYS, *s.* भ्रमणदिवसाः *m. pl.*, परिक्रमदिवसाः, पर्य्यटनकालः.

GANGES, *s.* (The River) गङ्गा, गङ्गाका, गङ्गिका. The name Gangá is derived from the root *gam*, 'to go,' *i. e.* 'that which goes or flows on the earth,' whence also the name जगायना, 'going in the world.' (Daughter of Jahnu. The Ganges in its course from heaven disturbed the devotions of this saint, upon which he drank up its waters, but released them again at the intercession of the sage Bhagíratha. Hence the following names) जाह्नवी, जह्नुतनया, जह्नुसुता, भागीरथी, (Crest of Siva. The Ganges, in its descent from heaven, alighted on the head of Siva, where it wandered for a time in the tresses of his hair) हरशेखरा. (River of heaven) स्वर्णदी, सुरनदी, सुरनिम्नगा, स्वरापगा, स्वर्गगङ्गा, स्वर्वापी, खापगा, सिद्धापगा.—(Flowing in heaven, earth, and hell) त्रिपथगा, त्रिस्रोताः *f.* (स्).—(Flowing from the foot of Vishnu) विष्णुपदी.—(Mother of Bhíshma) भीष्मसूः *f.*—(The very auspicious one) महाभद्रा.

GANGLION, *s.* स्नायुस्फोटः -टकः, शिरास्फोटकः, नाडीविस्फोटः.

GANGRENE, *s.* कोथः, पूतिमांसं, विद्रधिः *m.*, क्षतं, नालीव्रणः, मांसपाकः, रक्तविद्रधिः *m.*, मांसपूतिः, शरीरस्य परभागे स्वस्थे सति एकभागस्य पूतीभावः.

To GANGRENE, *v. n.* मांसैकदेशे पूतीभू, पूतमांसीभू, कोथीभू.

GANGRENOUS, *a.* कोथवान् -वती -वत् (त्), कोथीयः -या -यं, पूतिमांसवान् &c.

GANGWAY, *s.* नौकायां गमनागमनपथः or आरोहणावरोहणपथः.

GANTLET, GANTLOPE, *s.* सेनायां दण्डार्हस्य दण्डविशेषः; 'to run the gantlet,' महापातकिवत् सैन्यानां यष्टिपाणीनां द्विपंक्तिमध्ये धाव् (c. 1. धावति -ते -वितुं) यावद् एकैकेन यष्ट्याघातः क्रियते.

GAOL, *s.* कारा, कारागारं, कारावेश्म *n.* (न्), बन्धनागारं, बन्धनालयः, बन्धनगृहं, बन्धनस्थानं, गुप्तिः *f.*

To GAOL, *v. a.* कारायां बन्ध् (c. 9. बध्नाति, बन्द्धुं) or निरुध् (c. 7. -रुणद्धि -रोद्धुं).

GAOL-DELIVERY, *s.* काराशुद्धिः *f.*, कारागारशोधनं, बन्धनागारविशोधनं.

GAOLER, *s.* कारागाराध्यक्षः, कारारक्षकः, बन्धनालयरक्षकः.

GAP, *s.* (In a wall) सन्धिः *m.*, गृहरन्ध्रं, सुरुङ्गा, कुड्यच्छेदः.—(Breach, chasm) भङ्गः, भेदः, छेदः, रन्ध्रं, छिद्रं, विवरं, विच्छेदः, गर्त्तः, खण्डः -ण्डनं.

To GAPE, *v. n.* जृम्भ् (c. 1. जृम्भते -म्भितुं), विजृम्भ्, प्रजृम्भ्, जभ् or जम्भ् (c. 1. जभते, जम्भते -म्भितुं), मुखं व्यादा (c. 3. -ददाति -दातुं) or विवृ in caus. (-वारयति -यितुं), जृम्भं कृ, ग्रै (c. 1. ग्रायति, ग्रातुं).—(Open in fissures) स्फुट् (c. 6. स्फुटति -टितुं), विदल् (c. 1. -दलति -लितुं), विदॄ in pass. (-दीर्य्यते).

GAPER, *s.* जृम्भी *m.* (न्), जृम्भकः, जृम्भणकारी *m.* (न्), मुखव्यादानकारी.

GAPING, GAPE, *s.* जृम्भः -म्भा -म्भणं -म्भिका, जृम्भितं, विजृम्भितं, विजृम्भणं, हम्मे *n.* (न्), हाफिका, उपपुम्भिका.—(Opening the mouth) मुखव्यादानं, मुखविवृतिः *f.*

GAPING, *part.* जृम्भः -म्भा -म्भं, जृम्भमाणः -णा -णं, जृम्भी -म्भिणी -म्भि (न्), जृम्भावान् -वती -वत् (त्), जृम्भितः -ता -तं, विजृम्भितः -ता -तं, व्यात्तमुखः -खा -खं, विवृतमुखः -खा -खं.

GAP-TOOTHED, *a.* विरलदन्ती -न्तिनी -न्ति (न्), विच्छिन्नदन्ती &c.

GARB, *s.* वेशः, वेषः, वासः *n.* (स्), परिधानं, परिच्छदः, अम्बरं, वस्त्रं, वसनं, आच्छादनं, सज्जा, प्रसाधनं.

GARBAGE, *s.* उच्छिष्टं, उच्छिष्टांशं, शेषान्नं, पशोर् अन्त्रादि, मलं.

To GARBLE, *v. a.* (Pick out the best parts of a book to serve a purpose) छलार्थं or वचनार्थं ग्रन्थस्य उत्तमवचनानि or उत्तमदेशान् उद्धृ (c. 1. -हरति -हर्त्तुं) or समुद्धृ or ग्रन्थचूर्णिं कृ, ग्रन्थं खण्ड् (c. 10. खण्डयति -यितुं).—(Pervert) साचीकृ, वक्रीकृ, विकृ, विकलीकृ.

GARBLED, *p. p.* साचीकृतः -ता -तं, छलेन विकलीकृतः -ता -तं or खण्डितः -ता -तं.

GARBOIL, *s.* कोलाहलः, तुमुलं, हलहलाशब्दः, हाहाकारः.

GARDEN, *s.* उद्यानं, आरामः, उपवनं, पुष्पवाटी -टिका, पुष्पवनं, वाटिका, वृक्षवाटिका, कुसुमाकरः, वेलं, तेवनं, पुष्पफलोपचयहेतुर् भूभागः; 'pleasure-garden,' क्रीडार्था भूमिः, क्रीडावाटिका, क्रीडावनं; 'garden near a house,' गृहवाटिका, गृहारामः; 'kitchen-garden,' शाकशाकटं, शाकशाकिनं, शाकवाटिका.

To GARDEN, *v. n.* उद्यानं कृ, पुष्पफलोत्पत्तियोग्यं भूमिभागं कृष् (c. 6. कृषति, क्रष्टुं), उद्यानकर्षणं कृ

GARDENER, *s.* उद्यानपालः -लकः, उद्यानरक्षकः, उद्यानसेवकः, मालिकः, माली *m.* (न्).

GARDENING, *s.* उद्यानकर्म्म, उद्यानकर्षणं, उद्यानसेवनं, पुष्पफलोत्पत्तिकर्म्म *n.* (न्)

GARDEN-PLOT, *s.* पुष्पफलोत्पत्तियोग्यो भूमिभागः, पुष्पस्थलं, स्थलं -ली.

GARDEN-STUFF, *s.* उद्यानजं, उद्यानोद्भिद् *m. f. n.*, उद्यानजं शाकादि.

GARDEN-WALL, *s.* उद्यानपरिसरः, वाटिकापरिसरः, उद्यानप्राकारः.

GARGARISM, *s.* आचाम्यं, आचमनीयं, कवलः, मुखमार्जनजलं.

To GARGARIZE, *v. a.* आचम् (c. 1. -चामति -चमितुं), जलम् उपस्पृश् (c. 6. -स्पृशति -स्प्रष्टुं).

GARGLE, *s.* आचाम्यं, आचमनीयं, कवलः, मुखधावनार्थं जलादि.

To GARGLE, *v. a.* जलम् आचम् (c. 1. -चामति -चमितुं) or उपस्पृश् (c. 6. -स्पृशति -स्प्रष्टुं), आचमनं कृ, उपस्पर्शं कृ, जलोपस्पर्शं कृ, जलादिना मुखं मृज् (c. 2. मार्ष्टि -र्ष्टुं) or धाव् (c. 10. धावयति -यितुं).

GARGLED, *p. p.* आचान्तः -न्ता -न्तं, उपस्पृष्टः -ष्टा -ष्टं.

GARISH, *a.* *See* GAIRISH.

GARLAND, *s.* माला, माल्यं, स्रक् *f.* (ज्), दाम *n.* (न्), हारः, आवलिः -ली *f.*, प्रालम्बः -म्बिका; 'of flowers,' कुसुममाला, पुष्पावली, कुसुमस्तवकः, कुसुमावतंसकं; 'of pearls,' मुक्तावली, देवच्छन्दः, शतयष्टिकः; 'other kinds of garlands,' गुत्सः, गुत्सार्द्धः, गोस्तनः.

To GARLAND, *v. a.* मालया or स्रजा अलङ्कृ, मालायुक्तं -क्तां -क्तं कृ.

GARLANDED, *p. p.* माली -लिनी -लि (न्), स्रग्वी -ग्विणी -ग्वि (न्), स्रग्धरः -रा -रं.

GARLIC, *s.* लशुनं, रशुनं, लशूनं, लसुनः, रसुनः, रसोनः -नकः, गृञ्जनः, महौषधं, महाकन्दः, अरिष्टः, सोनहः, उग्रगन्धः, दीर्घपत्रः, ग्रन्थिमूलं, म्लेच्छकन्दः, मुखदूषणः, राहूच्छिष्टः, तरिता

GARLIC-EATER, *s.* लशुनाशी *m.* (न्), लशुनभोजी *m.* (न्), लशुनादः.

GARLICKY, *a.* लशुनीयः -या -यं, रशुनीयः -या -यं.

GARMENT, *s.* वस्त्रं, वेशः, वेषः, वासस् *n.*, वसनं, परिधानं, परिच्छदः, अम्बरं, आच्छादनं, प्रच्छादनं, प्रसाधनं, संव्यानं, प्रवारः, अम्बरः; 'under-

garment,' अन्तरीयं, अन्तर्वासस्, अधोवसनं; 'upper,' उत्तरीयं, प्रावारः.

GARNER, *s.* कुशूलः, धान्यागारं, अन्नकोष्ठः, कोष्ठः -ष्ठकं, भाण्डागारं, व्रीह्यगारं, कडोलः -लकः, काण्डालः, पिटः, कूदरः.

To GARNER, *v. a.* कुशूले निविश् (c. 10. -वेशयति -यितुं) or सञ्चि (c. 5. -चिनोति -चेतुं).

GARNERED, *p. p.* कुशूलभूतः -ता -तं, कोष्ठभूतः -ता -तं, कुशूलीकृतः -ता -तं.

GARNET, *s.* रक्तवर्णो मणिविशेषः, पद्मरागविशेषः, सर्पमणिः *m.f.*

To GARNISH, *v. a.* शुभ् (c. 10. शोभयति -यितुं), उपशुभ्, भूष् (c. 10 भूषयति -यितुं), विभूष्, अलङ्कृ, समलङ्कृ, परिष्कृ, रञ्ज् (c. 10. रञ्जयति -यितुं).

GARNISH, *s.* अलङ्कारः, अलङ्क्रिया, शोभा -भनं, भूषणं, विभूषणं, आभरणं, सज्जा, प्रसाधनं. *See* GARNISHMENT.

GARNISHED, *p. p.* शोभितः -ता -तं, उपशोभितः -ता -तं, अलङ्कृतः -ता -तं, भूषितः -ता -तं, विभूषितः -ता -तं, परिष्कृतः -ता -तं, प्रसाधितः -ता -तं, कृतशोभः -भा -भं.

GARNISHMENT, GARNITURE, *s.* सज्जा, उपकरणानि *n. pl.*, शोभार्थम् अनुबन्धाः *m. pl.*

GARRET, *s.* उपरिस्थः कोष्ठः, व्योमः -मं, व्योमः -मं, अट्टः, अट्टालः, कूटागारं, चन्द्रशाला -लिका, वलभी.

GARRISON, *s.* दुर्गनिवासिन्यः सैन्याः *m. pl.*, दुर्गस्थाः सैन्याः, दुर्गस्थसैन्यं, दुर्गसैन्यं, दुर्गबलं, दुर्गरक्षिणः *m. pl.*, दुर्गरक्षकाः *m. pl.*, रक्षिणः *m. pl.*, रक्षकाः *m. pl.*, रक्षिवर्गः.

To GARRISON, *v. a.* नगररक्षार्थं दुर्गे सैन्यान् or रक्षकान् निविश् in caus. (-वेशयति -यितुं), नगररक्षणे सैन्यगुल्मं नियुज् (c. 7. युनक्ति -योक्तुं).

GARRISONED, *p. p.* रक्षकयुक्तः -क्ता -क्तं, रक्षार्थं सैन्ययुक्तः -क्ता -क्तं.

GARRULITY, *s.* वावदूकता, वाचालता, बहुवादित्वं, बहुभाषिता, अतिशयोक्तिः *f.* जल्पकता, जल्पाकत्वं, वाग्मित्वं, अतिभाषणं, अत्यालापः, अतिवादः.

GARRULOUS, *a.* वावदूकः -का -कं, वाचालः -ला -लं, बहुभाषी -षिणी -षि (न्), बहुवादी -दिनी -दि (न्), जल्पकः -का -कं, जल्पाकः -का -कं, वाग्मी -ग्मिनी -ग्मि (न्), गदयिलुः -लुः -लु, मुखरः -रा -रं, वक्ता -क्त्री -क्तृ (क्तृ).

GARTER, *s.* जङ्घाबन्धनी, पादबन्धनी, जङ्घाबन्धः, जङ्घावस्त्ररक्षणी.

GARUDA, *s.* (The bird on which the god Vishnu is carried, represented as being something between a man and a bird, and considered as the lord of the feathered tribe. He is the son of Kasyapa by Vinatá, and younger brother of Aruna) गरुडः, गरुत्मान् *m.* (-त्मत्), तार्क्ष्यः, खगेश्वरः, सुपर्णः, विष्णुरथः, वैनतेयः, विनतासूनुः *m.*, नागान्तकः, पन्नगाशनः, भुजगदारणः, सिताननः, दक्षाय्यः. The son of Garuda is called सम्पातिः -तिकः.

GAS, *s.* वायुः *m.*, बाष्पः, वातः, धूमः, धूमिका, अङ्गारजो वायुः *m.*

GASH, *s.* दीर्घच्छेदः, गम्भीरच्छेदः, दीर्घक्षतं, गम्भीरक्षतं, दीर्घगम्भीरस् त्वग्भेदः or त्वक्छेदः.

To GASH, *v. a.* दीर्घच्छेदं कृ, गम्भीरच्छेदं कृ, दीर्घगम्भीरं त्वग्भेदं कृ.

GASOMETER, *s.* वायुमापनयन्त्रं, अङ्गारजवायुनिर्म्माणस्थानं.

To GASP, *v. n.* मुखं व्यादाय कृच्छ्रेण श्वासप्रश्वासं कृ, कृच्छ्रेण श्वस् (c. 2. श्वसिति -तुं) or प्राण् (c. 2. प्राणिति -तुं), दुःश्वासं कृ, प्राणकृच्छ्रोपहतः -ता -तं भू.

GASP, *s.* दुःश्वासः, श्वासः, श्वसितं, दुःश्वसितं, उच्छ्वासः, उच्छ्वसितं, प्राणः.

GASPING, *part.* उच्छ्वसन् -सन्ती -सती -सत् (त्), कृच्छ्रेण श्वसन् &c., उच्छ्वसितः -ता -तं, कासश्वासः -सा -सं, दुःश्वासी -सिनी -सि (न्), श्वासकृच्छ्रोपहतः -ता -तं, पतिप्राणः -णा -णं

GASTRIC, *a.* जाठरः -री -रं, औदरिकः -की -कं, उदरीयः -या -यं, जठरीयः -या -यं; 'gastric juice,' कोष्ठाग्निः *m.*, अग्निः.

GASTRONOME, *s.* उदरपरायणः, उदरसेवी *m.* (न्), कुक्षिम्भरिः *m.*, सद्भोजनलम्पटः.

GASTRONOMY, *s.* सद्भोजनरसविद्या, परमान्नरसविद्या, उदरसेवा.

GASTROTOMY, *s.* उदरच्छेदः -दनं, जठरच्छेदः -दनं.

GATE, *s.* द्वारं, द्वाः *f.* (र्), प्रतीहारः, प्रतिहारः, अररः -री -रं, गृहमुखं, द्वारकण्टकः; 'back-gate,' पक्षद्वारं; 'private-gate,' अन्तर्द्वारं, प्रच्छन्नद्वारं; 'city-gate,' पुरद्वारं, नगरद्वारं, गोपुरं; 'raised place over it,' हस्तिनखः; 'outer-gate,' बहिर्द्वारं.

GATE-POST, *s.* द्वारस्तम्भः, द्वारस्थूणा, द्वारदारुः *m.*; 'its ornament,' तोरणः.

GATE-WAY, *s.* द्वारवर्त्म *n.* (न्), द्वारपथः, निःसरणं.

To GATHER, *v. a.* (Collect) चि (c. 5. चिनोति, चेतुं), अवचि, समाचि, सञ्चि, साचि, प्रचि, समानी (c. 1. -नयति -नेतुं), समुपानी, समादा (c. 3. -ददाति -दातुं), समाहृ (c. 1. -हरति -हर्तुं), उपसंहृ, समूह् (c. 1. ऊहते -हितुं), सङ्ग्रह् (c. 9. -गृह्णाति -ग्रहीतुं), ग्रह्, सम्भृ (c. 1. -भरति, c. 3. -बिभर्त्ति -भर्तुं), संवृ (c. 5. -वृणोति, c. 1. -वरति -रितुं), एकीकृ, एकत्र कृ.—(Gather flowers, &c.) पुष्पाणि चि or अवचि or लू (c. 9. लुनाति, लवितुं).—(Select) उद्धृ, समुद्धृ, वृ, उद्धृ.—(Deduce, infer) अनुमा (c. 2. -माति -तुं, c. 3. -मिमीते), ऊह् (c. 1. ऊहते -हितुं), अपोह्, अवगम् (c. 1. -गच्छति -गन्तुं).

To GATHER, *v. n.* (Congregate) सङ्गम् (c. 1. -गच्छति -गन्तुं), समागम्, समे (सम् and आ with rt. इ, समैति -तुं), एकत्र मिल् (c. 6. मिलति, मेलितुं), सम्मिल्, एकत्र आगम्.—(Increase) वृध् (c. 1. वर्धते -र्धितुं), उपचि in pass. (-चीयते).—(Form matter) पूय् (c. 1. पूयते -यितुं), पूयं बन्ध् (c. 9. बध्नाति, बन्धुं), पूयपूर्णः -र्णा -र्णं भू.

GATHER, *s.* (Fold) वस्त्रपुटः, ऊर्म्मिः *m. f.*, ऊर्म्मिका, व्यावर्त्तनं, चूणः.

GATHERED, *p. p.* चितः -ता -तं, सञ्चितः -ता -तं, अवचितः -ता -तं, उपचितः -ता -तं, समूढः -ढा -ढं, सङ्गृहीतः -ता -तं, लूनः -ना -नं.

GATHERER, *s.* अवचायी *m.* (न्), सञ्चयी *m.* (न्), सङ्ग्रहीता *m.* (तृ), सङ्ग्राहकः; 'gatherer of taxes,' करग्रहः, शुल्कग्राही *m.* (न्); 'of flowers,' पुष्पावचायी *m.*

GATHERING, *s.* (Act of collecting) चयनं, सञ्चयनं, चायः, अवचयः, अवचायः, लावः, सङ्ग्रहः -हणं, एकत्रकरणं; 'of flowers,' पुष्पचयः, कुसुमावचयः, पुष्पप्रचायः.—(Crowd, assembly) समूहः, सङ्घः, सञ्चयः, सङ्घातः, समागमः, समवायः, समाहारः, सन्नयः; 'of people,' जनसमूहः, जननिवहः, लोकसङ्घः.—(Abscess) विद्रधिः *m.*, पूयसम्पूर्णः स्फोटः. —(Gathering of clouds) घनचयः, घनौघः, घनजालं, घनघनौघः.

GAUDERY, *s.* अलङ्कारः, चित्रविचित्राभरणानि *n. pl.*, शोभाकरद्रव्याणि *n. pl.*

GAUDILY, *adv.* सविचित्रालङ्कारं, शोभाकरणार्थं, एकान्तशोभनं, चित्रविचित्रं; 'gaudily dressed,' उज्ज्वलवेशधारी -रिणी -रि (न्).

GAUDINESS, *s.* रक्तता, सरागत्वं, रागः, रङ्गः, चित्रता, चित्रविचित्रता, शोभा, एकान्तशोभा, अतिशोभा, वर्णः, नानावर्णत्वं, कर्बुरता, वाह्यद्युतिः *f.*

GAUDY, *a.* बहुवर्णः -र्णा -र्णं, नानावर्णः -र्णा -र्णं, चित्रः -त्रा -त्रं, चित्रविचित्रः -त्रा -त्रं, अतिशोभनः -ना -नं, एकान्तशोभनः -ना -नं, रक्तः -क्ता -क्तं, अतिरागी -गिणी -गि (न्), चित्रालङ्कारवान् -वती -वत् (त्), उज्ज्वलः -ला -लं.

GAUDY, *s.* (A feast) उत्सवः, उत्सवदिनं, पर्वाहः, उद्धर्षः.

To GAUGE, *v. a.* प्रमाणदण्डेन भाण्डभरकं मा (c. 2. माति -तुं, c. 10. मापयति -यितुं).

GAUGE, *s.* (Measure) परिमाणं, प्रमाणं, मानं, परिमाणविधिः *m.*, परिमाणरीतिः *f.*—(Instrument for measuring) मापनयन्त्रं, परिमाणदण्डः, प्रमाणदण्डः, भाण्डपूरकमापनार्थं यष्टिः *m.* *See* GAGE.

GAUGER, *s.* प्रमाणदण्डद्वारेण भाण्डभरकमापकः, परिमाणकर्त्ता *m.* (र्तृ).

GAUGING, *s.* प्रमाणदण्डेन भाण्डभरकमापनं or भाण्डपूरकपरिमापणं.

GAUNT, *a.* कृशः -शा -शं, परिकृशः -शा -शं, कृशाङ्गः -ङ्गी -ङ्गं, क्षीणशरीरः -रा -रं, क्षीणमांसः -सा -सं, क्षामः -मा -मं, शुष्काङ्गः &c., क्षुत्क्षामः &c.

GAUNTLET, *s.* लोहनिर्म्मितं हस्ताच्छादनं or हस्तत्राणं; 'to throw the gauntlet,' पूर्व्वोक्तहस्ताच्छादनं भूमौ प्रक्षिप्य युद्धार्थम् आह्वे (c. 1. -ह्वयति -ह्वातुं).

GAUR, *s.* (The country) गौडः; 'its inhabitants,' गौडाः *m. pl.*

GAUZE, *s.* विरलतन्तुः स्वच्छवस्त्रविशेषः, विरलांशुकं, सूक्ष्मांशुकं.

GAVOT, *s.* गवोत्संज्ञको लघुनृत्यविशेषः.

GAWK, *s.* मूर्खः, मूढः, स्थूलबुद्धिः *m.*, स्थूलधीः *m.*, जडधीः *m.*

GAWKY, *a.* स्थूलः -ला -लं, स्थूलशरीरः -रा -रं, दीर्घेष्पलः -ला -लं, दीर्घदेहः -हा -हं, अदक्षः -क्षा -क्षं, विरूपः -पी -पं.

GAY, *a.* (Merry) उल्लसः -सा -सं -सितः -ता -तं, आनन्दी -न्दिनी -न्दि (न्), हृष्टः -ष्टा -ष्टं, प्रहृष्टः -ष्टा -ष्टं, हृष्टहृदयः -या -यं, प्रफुल्लः -ल्ला -ल्लं, उल्लासितः -ता -तं, समुल्लसितः -ता -तं, विलासी -सिनी -सि (न्), कौलिकः -का -कं, मुदितः -ता -तं, प्रमोदी -दिनी -दि (न्), ललितः -ता -तं, परिहासशीलः -ला -लं, हासी -सिनी -सि (न्).—(Showy) नानावर्णः -र्णा -र्णं, बहुवर्णः -र्णा -र्णं, चित्रविचित्रः -त्रा -त्रं, अतिशोभनः -ना -नं.

GAYETY, *s.* उल्लसता, उल्लासः, आनन्दः, आह्लादः, सानन्दता, हर्षः, प्रहर्षः, प्रफुल्लता, मुदा, प्रमोदः, चित्तप्रसन्नता, प्रहसनं.—(Merry making) उत्सवः, महोत्सवः, उत्सवकरणं.

GAYLY, *adv.* सानन्दं, सहर्षं, प्रमोदेन, उल्लासेन, प्रहृष्टवत्.—(Showily) सबहुवर्णं, चित्रविचित्रं, अतिशोभनं; 'gayly dressed,' उज्ज्वलवेशधारी -रिणी -रि (न्).

To GAZE, *v. a.* and *n.* ईक्ष् (c. 1. ईक्षते -क्षितुं), प्रेक्ष्, निरीक्ष्, वीक्ष्, अभिवीक्ष्, समीक्ष्, आलोक् (c. 10. -लोकयति -यितुं, c. 1. -लोकते -कितुं), बद्धदृष्ट्या or स्थिरदृष्ट्या or अनिमिषनयनाभ्यां निरीक्ष् or दृश् (c. 1. पश्यति, द्रष्टुं), स्थिरदृष्टिं कृ, दृष्टिं or लक्ष्यं बन्ध् (c. 9. बध्नाति, बन्द्धुं).

GAZE, *s.* स्थिरदृष्टिः *f.*, बद्धदृष्टिः *f.*, अनिमिषदृष्टिः *f.*, दृष्टिः *f.*, आलोकनं, ईक्षणं, निरीक्षा, वीक्षणं, वीक्षितं, प्रेक्षणं, प्रेक्षितं, दर्शनं, लक्ष्यं -क्षणं; 'with fixed gaze,' बद्धदृष्टिः -ष्टिः -ष्टि, अनिमिषनयनः -ना -नं.

GAZEHOUND, *s.* दृष्टिमात्रेण शशकाद्यनुसरणशीलो मृगव्यकुक्कुरः.

GAZELLE, *s.* तनुशरीरो हरिणभेदः, मृगः -गी; 'gazelle-eyed,' मृगीदृक् *m. f. n.* (श्).

GAZETTE, *s.* वार्त्तिकपत्रं, समाचारपत्रं, संवादपत्रं, सन्देशपत्रं.

To GAZETTE, *v. a.* वार्त्तिकपत्रेण प्रकाश् (c. 10. -काशयति -यितुं).

GAZETTEER, *s.* अमुकदेशे यत्किञ्चिद् नगरग्रामगरणादि विद्यते तदाकारनामादिद्योतकं पुस्तकं.

GAZING, *part.* स्थिरदृष्ट्या प्रेक्षमाणः -णा -णं or आलोकयन् -यन्ती -यत् (त्); 'gazing up to heaven,' नभोदृष्टिः -ष्टिः -ष्टि; 'in various directions,' इतस्ततो दत्तदृष्टिः.

GAZING-STOCK, *s.* तिरस्कारविषयः, अवहासभूमिः *f.*, पारभवास्पदं, कौतुकं.

GEAR, *s.* उपकरणं, सामग्री -ग्र्यं, सज्जा, परिच्छदः, पारिणाह्यं, आभरणं, प्रसाधनं, प्रतिकर्म्म *n.* (न्); 'plough-gear,' हलोपकरणं.

GEESE, *s. pl.* हंसाः *m. pl.* *See* GOOSE.

GELATIN, *s.* क्वथितमांसनिर्म्मितं घनीभूतं or श्यानीभूतं स्वच्छद्रव्यं.

GELATINOUS, *a.* पूर्व्वोक्तश्यानद्रव्यगुणविशिष्टः -ष्टा -ष्टं, श्यानः -ना -नं, स्त्यानः -ना -नं, सान्द्रः -न्द्रा -न्द्रं, संलग्नशीलः -ला -लं, अवलेह्यः -ह्या -ह्यं

To GELD, *v. a.* वृषणाद् उत्कृत् (c. 6. -कृन्तति -कर्त्तितुं) or छिद् (c. 7. छिनत्ति, छेत्तुं), वृषणद्वयम् उत्पट् (c. 10. -पाटयति -यितुं).

GELDED, *p. p.* छिन्नवृषणः -णा -णं, छिन्नमुष्कः -ष्का -ष्कं, मुष्कशून्यः -न्या -न्यं.

GELDING, *s.* (Horse) अवृषणो ऽश्वः, छिन्नवृषणो वाजी *m.* (न्)

GELID, *a.* अतिशीतलः -ला -लं, अत्यन्तशिशिरः -रा -रं, हिमः -मा -मं.

GELIDITY, GELIDNESS, *s.* अतिशीतलता, अतिशैत्यं, शीतता, शिशिरत्वं.

GELLY, *s.* क्वथितमांसनिर्म्मितो घनीभूतः or श्यानीभूतः स्वच्छरसः.

GEM, *s.* (Precious stone) मणिः *m. f.* -णी, रत्नं, चारुशिला, प्रस्तरः, मणिरत्नं; 'necklace of gems,' मणिमाला, मणिसरः, रत्नावलिः *f.*; 'its central gem,' तरलः; 'mine of gems,' रत्नाकरः.—(Bud) मुकुलं, जालकं, पल्लवः -वं, कुड्मलं.

To GEM, *v. a.* मणिभिः or रत्नैर् अलङ्कृ or भूष् (c. 10. भूषयति -यितुं).

To GEM, *v. n.* (Bud) मुकुल् (c. 1. मुकुलति -लितुं), अङ्कुर (nom. अङ्कुरयति -यितुं).

To GEMINATE, *v. a.* द्विगुणीकृ, द्विगुण (nom. द्विगुणयति -यितुं), द्वैधीकृ, द्विकं -कां -कं कृ.

GEMINATION, *s.* द्विगुणीकरणं, द्वैगुण्यं, द्विरावृत्तिः *f.*, पुनरुक्तिः *f.*

GEMINI, *s. pl.* (Twins) यमौ m. du., यमजौ m. du.—(Constellation) द्वन्द्वः, मिथुनः, जितुमः.

GEMINOUS, *a.* द्विगुणः -णा -णं, द्विकः -का -कं, द्वैधः -धी -धं, द्विविधः -धा -धं, यमः -मा -मं, यमकः -का -कं.

GEMINY, *s.* मिथुनं, द्वन्द्वं, यमकं, यमलं, युगं, युग्मं, युगलं, द्वयं.

GEMMATE, *a.* मुकुलितः -ता -तं, मुकुलवान् -वती -वत् (त्), पल्लवितः -ता -तं.

GEMMED, *p. p.* रत्नवान् -वती -वत् (त्), मणिमान् -मती -मत् (त्), रत्नमयः -यी -यं, रत्नानुविद्धः -द्धा -द्धं, रत्नालङ्कृतः -ता -तं, मणिभूषितः -ता -तं.

GEMMY, *a.* मणिशः -शा -शं, रत्नज्योती -तिनी -ति (न्), मणिमयः -यी -यं.

GENDER, *s.* लिङ्गं, प्रकृतिः *f.*; 'masculine gender,' पुंलिङ्गं, पुरुषः; 'feminine gender,' स्त्रीलिङ्गं; 'a noun of invariable gender,' अजहल्लिङ्गः

To GENDER, *v. a.* जन् in caus. (जनयति -यितुं), सञ्जन्, प्रसू or प्रसु (c. 2. -सूते, c. 4. -सूयते -सोतुं), उत्पद् in caus. (-पादयति -यितुं).

To GENDER, *v. n.* स्त्रीपुरुषवत् सङ्गम् (c. 1. -गच्छति -गन्तुं) or मैथुनं कृ.

GENEALOGICAL, *a.* वंशावलीविषयः -या -यं, वंशान्वयविषयकः -का -कं, वंशक्रमसम्बन्धी -न्धिनी -न्धि (न्).

GENEALOGIST, *s.* अन्वयज्ञः, वंशावलिज्ञः, घटकः, कुलाचार्य्यः, वंशावलिरचकः, वंशपरम्पराज्ञः.

GENEALOGY, *s.* वंशावली -लिः *f.*, आवलिः *f.*, वंशान्वयः, अन्वयः, वंशश्रेणी, वंशक्रमः, वंशपरम्परा, वंशानुचरितं, वंशविततिः *f.*, वंशविवरणं; 'of kings,' राजावलिः *f.*, नृपावलिः, पार्थिवावलिः.

GENERAL, *a.* (Common to many, or all) साधारणः -णा -णी -णं, सामान्यः -न्या -न्यं, सर्व्वसामान्यः -न्या -न्यं, बहुसामान्यः -न्या -न्यं, सर्व्वसाधारणः -णी -णं, सर्व्वः -र्व्वा -र्व्वं, सार्व्वः -र्व्वी -र्व्वं, सार्व्वत्रिकः -की -कं, सर्व्वीयः -या -यं, सर्व्वजनीयः -या -यं, सार्व्वजनिकः -की -कं, सर्व्वजनीनः -ना -नं, विश्वजनीनः -ना -नं, विश्वजनीयः -या -यं, विश्वजन्यः -न्या -न्यं, सार्व्वलौकिकः -की -कं, लौकिकः -की -कं, व्यापकः -का -कं, सर्व्वव्यापकः -का -कं, सर्व्वमयः -यी -यं, औत्सर्गिकः -की -कं.—(Not particular) अविशेषकः -का -कं, अनवच्छेदावच्छेदकः -का -कं.—(Usual) प्रायिकः -की -कं, लोकसिद्धः -द्धा -द्धं, आचारिकः -की -कं, सर्व्वत्र प्रचलः -ला -लं or प्रचलितः -ता -तं; 'general practice,' जनरीतिः *f.*, लोकव्यवहारः; 'general order,' सामान्यशासनं; 'general opinion,' बहुमतं; 'general collection,' सर्व्वसङ्ग्रहः; 'general reader,' बहुपाठः, प्रपठाविद् *m.*; 'in general,' प्रायेण, प्रायशस्, बहुशस्. *See* GENERALLY.

GENERAL, *s.* (Of an army) सेनापतिः *m.*, वाहिनीपतिः *m.*, सेनानीः *m.*, सेनाधिपः, सेनाग्रगः, चमूपतिः *m.*, योधमुख्यः, सेनाध्यक्षः, सैन्याध्यक्षः, बलाध्यक्षः, दण्डनायकः, महासेनः; 'skilful general,' सांयुगीनः.—(Total, whole) साकल्यं, सामान्यं, साधारण्यं, समुदायः.

GENERALISSIMO, *s.* प्रधानसेनापतिः *m.*, अग्रसेनानीः *m.*, प्रधानसैन्याध्यक्षः.

GENERALITY, *s.* (State of being general) सामान्यं -न्यत्वं, साधारण्यं, साधारणत्वं.—(Greatest part) प्रधानभागः, अधिकभागः, बहुतरभागः, प्रधानांशः.

GENERALIZATION, *s.* अवच्छेदावच्छेदः, व्यापकत्वं, जातिनिर्देशः, बहुसामान्यकरणं, गणीकरणं.

To GENERALIZE, *v. a.* अवच्छेदावच्छेदं कृ, बहुव्यापकं -कां -कं कृ, बहुसामान्यं -न्यां -न्यं कृ, गणीकृ, जातिनिर्देशं कृ.

GENERALLY, *adv.* प्रायस्, प्रायशस्, प्रायेण, भूयस्, बहुशस्, बाहुल्येन, भूयिष्ठं, बहुतरं, साधारण्येन, सामान्यतस्, साकल्येन.

GENERALNESS, *s.* साधारणत्वं, सामान्यत्वं, व्यापकत्वं, बाहुल्यं, प्रसिद्धत्वं.

GENERALSHIP, *s.* सैनापत्यं, सेनापतित्वं.—(Skill in tactics) व्यूहपाण्डित्यं, रणपाण्डित्यं, सेनाव्यूहनैपुण्यं, बलविन्यासकौशल्यं, सेनानयप्रवीणता.

GENERALTY, *s.* साकल्यं, समस्तत्वं, सामान्यं, कार्त्स्न्यं, आखिल्यं, समुदायः.

To GENERATE, *v. a.* जन् in caus. (जनयति -यितुं), सञ्जन्, प्रसू or प्रसु (c. 1. -सवति, c. 2. -सूते, c. 4. -सूयते -सोतुं), सृ, उत्पद् in caus. (-पादयति -यितुं).

GENERATED, *p. p.* जातः -ता -तं, जनितः -ता -तं, उपजातः -ता -तं, सञ्जातः -ता -तं, उत्पादितः -ता -तं, समुत्पादितः -ता -तं, प्रसूतः -ता -तं, प्ररूढः -ढा -ढं, कृतजन्मा -न्मा -न्म (न्), उद्भवः -वा -वं, प्रभवः -वा -वं; 'generated in water,' जलोद्भवः -वा -वं.

GENERATION, *s.* (Production) जननं, प्रजननं, जन्म *n.* (न्), उत्पादनं, उत्पत्तिः *f.*, प्रसूतिः *f.*, प्रसवः, सम्भवः, उद्भवः, प्रभवः.—(Race) जातिः *f.*, वंशः, सन्तानः, सन्ततिः *f.*, कुलं, अन्वयः, प्रवरं.—(The people living at the same time) समवयस्काः or समकालजीविनः पुरुषाः *m. pl.*—(Series of descendants) वंशावली, वंशपरम्परा, वंशश्रेणी; 'extending to seven generations, साप्तपौरुषः -षी -षं; 'organ of generation,' उपस्थः.

GENERATIVE, *a.* जनकः -का -कं, उत्पादकः -का -कं, सावकः -विका -कं.

GENERATOR, *s.* जनयिता *m.* (तृ), जनिता *m.* (तृ), जननः, जनकः, जन्मदः -दाता *m.* (तृ), बीजप्रदः, बीजी *m.* (न्), उत्पादकः.

GENERIC, GENERICAL, *a.* सामान्यः -न्या -न्यं, साधारणः -णा -णी -णं, वर्गीयः -या -यं, जातीयः -या -यं, जातिसम्बन्धीयः -या -यं, व्यापकः -का -कं; 'generic property,' जातित्वं, जातिधर्म्मः, जातिस्वभावः, सामान्यं, समानाधिकरणं; 'generic characteristic,' जातिलक्षणं, सामान्यलक्षणं

GENERICALLY, *adv.* जातिमुद्दिश्य, वर्गमुद्दिश्य, जातितस्, सामान्यतस्.

GENEROSITY, *s.* (Liberality) औदार्य्यं, उदारता, दानशीलता, त्यागशीलता -त्वं, त्यागः, त्यागिता, बहुप्रदत्वं, अतिसर्ज्जनं, अतिदानं, वदान्यता, अकार्पण्यं, विलम्भः.—(Nobleness of soul) माहात्म्यं, औदार्य्यं, उदीर्णता.

GENEROUS *a.* (Liberal) उदारः -रा -री -रं, दानशीलः -ला -लं, त्यागशीलः -ला -लं, बहुप्रदः -दा -दं, बहुदः -दा -दं, अतिदाता -त्री -तृ (तृ), दायकः -का -कं, दानरतः -ता -तं, वदान्यः -न्या -न्यं, अकृपणः -णा -णं, स्थूललक्ष्यः -क्ष्या -क्ष्यं, उदात्तः -त्ता -त्तं.—(Noble-minded) उदारचेताः -ताः -तः (स्), उदारधीः -धीः -धि, उदारचरितः -ता -तं, माहात्मिकः -की -कं, महामनाः -नाः -नः (स्), महानुभावः -वा -वं, महेच्छः -च्छा -च्छं, उदीर्णः -र्णा -र्णं.—(Of honourable birth) सत्कुलीनः -ना -नं, महाकुलः -ला -लं.

GENEROUSLY, *adv.* उदारवत्, वदान्यवत्, औदार्य्येण, दानशीलत्वात्, माहात्म्येन.

GENEROUSNESS, *s.* औदार्य्यं, उदारता, माहात्म्यं. *See* GENEROSITY.

GENESIS, *s.* धर्म्मग्रन्थानां मध्यात् प्रथमग्रन्थः, जगत्सृष्टिविषयकं मूसालिखितम् आदिपुस्तकं.

GENET, *s.* (Horse) सुरूपी विदेशीयः क्षुद्रवाजी *m.* (न्).—(Civet) गन्धमार्जारः.

GENETHLIAC, *s.* (Birthday poem) जन्मदिवसमुद्दिश्य

GENIAL, *a.* (Contributing to propagation) सावकः -का -कं, प्रसवकारी -रिणी -रि (न्), प्रसूतिवर्धकः -का -कं.—(Contributing to life and cheerfulness) जीवदः -दा -दं, तेजोवर्धकः -का -कं, आनन्दकरः -रा -रं, रम्यः -म्या -म्यं, रमणीयः -या -यं, मनोरमः -मा -मं, सुखकरः -री -रं, प्रसन्नः -न्ना -न्नं, सुभगः -गा -गं, प्रसादकरः -रा -रं, रुचिरः -रा -रं.

GENIALLY, *adv.* प्रसन्नं, प्रसादेन, सप्रसादं, सानन्दं, प्रमोदेन, सहर्षं.

GENIALNESS, *s.* सुनन्दता, रम्यता, रमणीयत्वं, प्रसन्नता, सानन्दता.

GENICULATED, *a.* जानुपर्व्वाकारग्रन्थियुक्तः -क्ता -क्तं, ग्रन्थिलः -ला -लं.

GENITAL, *a.* प्रसवसम्बन्धी -न्धिनी -न्धि (न्), जननसम्बन्धी &c., यौनः -नी -नं.

GENITALS, *s. pl.* उपस्थः, शिश्नादि *n.*, भगादि *n.*, अधोङ्गं, जननाङ्गं.

GENITIVE, *a.* or *s.* (In grammar) सम्बन्धः, शेषः, षष्ठी विभक्तिः *f.*

GENITOR, *s.* जनयिता *m.* (तृ), जनिता *m.* (तृ), जनकः, जननः, जन्मदः.

GENIUS, *s.* (Natural disposition) स्वभावः, प्रकृतिः *f.*, शीलः, गुणः.—(Strength of mind, power of intellect) धीशक्तिः *f.*, बुद्धिशक्तिः *f.*, मनःशक्तिः *f.*, मनोयुक्तिः *f.*, बुद्धिसामर्थ्यं, बुद्धिप्रभावः, मतिसुप्रयोगता.—(Power of invention) कल्पनाशक्तिः *f.*—(Man endowed with talent) गुणी *m.* (न्), गुणवान् *m.* (त्), धीशक्तियुक्तः, बुद्धिशक्तिमान् *m.* (त्), युक्तबुद्धिः *m.*, बुद्धिमान् *m.* (त्), धीमान् *m.* (त्).—(Peculiar characteristic) विशेषणं, लक्षणं, स्वभावः, स्वधर्म्मः, वृत्तिः *f.*; 'poetical genius,' कविताशक्तिः *f.*

GENIUS, *s.* (Demon) भूतः, असुरः, दैत्यः, दानवः, प्रेतः, पिशाचः; 'evil genius,' दुर्दैवं; 'good genius,' सुदैवं, शुभदैवं.

GENTEEL, *a.* सभ्यः -भ्या -भ्यं, सभ्याचारी -रिणी -रि (न्), आर्य्यः -र्य्या -र्य्यं, आर्य्यव्यवहारः -रा -रं, आर्य्यवृत्तः -त्ता -त्तं, सद्वृत्तः -त्ता -त्तं, सुजनः -ना -नं, साधुवृत्तः -त्ता -त्तं, साधुव्यवहारः -रा -रं, सुशीलः -ला -लं, अग्राम्यः -म्या -म्यं, शिष्टाचारी -रिणी -रि (न्), महानुभावः -वा -वं.—(Elegant) विनीतः -ता -तं, चारुः -र्व्वी -रु, ललितः -ता -तं.

GENTEELLY, *adv.* सभ्यवत्, सुशीलवत्, आर्य्यवत्, सुजनवत्, सभ्याचारानुसारेण.

GENTEELNESS, *s.* सभ्यता, आर्य्यत्वं, सभ्याचारत्वं, आर्य्यवृत्तत्वं, सुशीलता, शिष्टाचारत्वं, सौजन्यं, सुजनता, साधुता, विनीतत्वं.

GENTIAN, *s.* (Plant) किरातः, किराततिक्तः, अनार्य्यतिक्तः, चिरातिक्तः, चिरतिक्तः, काण्डतिक्तकः, कैरातं, भूनिम्बः, भूतीकः.

GENTILE, *s.* अन्यदेशीयः, भिन्नदेशीयः, भिन्नदेशीयलोकः, अन्यदेशीयलोकः, देवतार्च्चकः, देवताभ्यर्च्चकः, देवार्च्चकः.—(Kindred) गोत्रजः; 'in grammar,' ज्ञातिवाचकः.

GENTILE, *a.* अन्यदेशीयः -या -यं, भिन्नदेशीयः -या -यं, जातीयः -या -यं.

GENTILISM, *s.* देवार्च्चकत्वं, देवतार्च्चनं -ना, देवताभ्यर्च्चनं, भिन्नदेशीयता.

GENTILITIAL, *a.* कौलिकः -की -कं, कुलजः -जा -जं, वंशिकः -की -कं, वंश्यः -श्या -श्यं, जातीयः -या -यं, दैशिकः -की -कं.

GENTILITY, *s.* (Politeness of manners) सभ्यता, सभ्याचारत्वं, सुशीलता, शिष्टाचारत्वं, आर्य्यत्वं, आर्य्यवृत्तत्वं, सौजन्यं, सुजनता, साधुवृत्तत्वं, सुविनीतता, महानुभावता.—(Good birth) कुलीनता, महाकुलत्वं, वंशविशुद्धता, कुलोत्कर्षः.

GENTLE, *a.* (Well-born) कुलीनः -ना -नं, सत्कुलीनः -ना -नं, महाकुल

-ला -लं, महाकुलप्रसूतः -ता -तं, साधुजः -जा -जं, साधुवंशजः -जा -जं, आर्य्यवंशजः -जा -जं, सुजन्मा -न्मा -न्म (न्); 'a maid of gentle birth,' कुलकन्यका.—(Mild, soft, bland) मृदुः -द्वी -दु, मृदुलः -ला -लं, मन्दः -न्दा -न्दं, कोमलः -ला -लं, सौम्यः -म्या -म्यी -म्यं, स्निग्धः -ग्धा -ग्धं, सुकुमारः -रा -री -रं, मसृणः -णा -णं, अनुग्रः -ग्रा -ग्रं, अकर्कशः -शा -शं, अपरुषः -षा -षं, अचण्डः -ण्डा -ण्डी -ण्डं, अखरः -रा -रं, असाहसिकः -की -कं, सुकरः -रा -री -रं; 'of a gentle disposition,' मृदुभावः -वा -वं, मृदुस्वभावः -वा -वं.—(Quiet, tame) शान्तः -न्ता -न्तं, उपशान्तः -न्ता -न्तं, शमी -मिनी -मि (न्), दान्तः -न्ता -न्तं; 'a gentle breeze,' मन्दानिलः, मृदुवातः; 'a gentle laugh,' मन्दहास्यं, मन्दस्मितं, ईषद्धासः; 'gentle remedy,' सौम्योपचारः, सामोपचारः; 'by gentle means,' साम्ना; 'gentle speech,' प्रियवाक्यं, प्रियोदितं.

GENTLE, *s.* (Maggot) अलिः *m.*, अली *m.* (न्), कोषकारी *m.* (न्).

GENTLEFOLK, *s.* आर्य्यलोकाः *m. pl.*, साधुजनाः *m. pl.*, आर्य्यमिश्राः *m. pl.*, कुलीनलोकः.

GENTLEMAN, *s.* आर्य्यः, आर्य्यजनः, आर्य्यमिश्रः, साधुः *m.*, साधुजनः, महाशयः, महानुभावः, कुलीनः, कुलीनजनः, सत्कुलीनः, सुजनः, सुजन्मा *m.* (न्), सज्जनः, सज्जातिः *m.*, महाजनः, सत्कुलजातः, सुविनीतः, श्री prefixed.

GENTLEMAN-COMMONER, *s.* राजविद्यालये अन्तेवासिनां मध्यात् प्रथमपदस्थः.

GENTLEMANLIKE, GENTLEMANLY, *a.* आर्य्यव्यवहारानुसारी -रिणी -रि (न्), सभ्याचारानुसारी &c., सभ्यः -भ्या -भ्यं, आर्य्यवृत्तः -त्ता -त्तं, सुशीलः -ला -लं, सुविनीतः -ता -तं, शिष्टाचारयोग्यः -ग्या -ग्यं; 'gentlemanly deportment,' आर्य्यवृत्तिः *f.*, सौजन्यं.

GENTLEMANLINESS, *s.* आर्य्यत्वं, सुशीलता, सौजन्यं, सुविनीतता.

GENTLENESS, *s.* मृदुता, म्रदिमा *m.* (न्), मार्द्दवं, मन्दता, कोमलता, सौम्यता -त्वं, स्निग्धता, सौकुमार्य्यं, सुकुमारता, अनुग्रता, अकार्कश्यं, अकर्कशत्वं, अपरुषता, अपारुष्यं, अचण्डता, असाहसं; 'of disposition,' भावमृदुता.

GENTLEWOMAN, *s.* आर्य्या, कुलीना स्त्री, सुशीला स्त्री, सुविनीता स्त्री.

GENTLY, *adv.* शनैस्, शनैः शनैस्, शनकैस्, मन्दं मन्दं, मृदु, अनुग्रं, अकर्कशं, अपरुषं, अचण्डं, साहसं विना.

GENTRY, *s.* आर्य्यलोकाः *m. pl.*, आर्य्याः *m. pl.*, साधुलोकाः *m. pl.*, कुलीनलोकाः *m. pl.*, कुलीनवर्गः, सुजनवर्गः, सुजनता, सौजन्यं.

GENUFLEXION, *s.* पूजार्थं जानुभ्यां नतिः *f.* or आनतिः *f.*, जानुनतिः *f.*

GENUINE, *a.* सत्यः -त्या -त्यं, प्रकृतः -ता -तं, वास्तवः -वी -वं -विकः -की -कं, अकल्पितः -ता -तं, अकृत्रिमः -मा -मं, अकपटः -टा -टं, निष्कपटः -टा -टं, निर्व्याजः -जा -जं, निर्व्यलीकः -का -कं, यथार्थः -र्था -र्थं, सारः -रा -रं.

GENUINELY, *adv.* सत्यं, निष्कपटं, कपटं विना, निर्व्याजं, निर्व्यलीकं, यथार्थं.

GENUINENESS, *s.* सत्यता, प्रकृतत्वं, अकृत्रिमता, अकल्पितत्वं, याथार्थ्यं, यथार्थता, निर्व्यलीकता, निर्व्याजत्वं, वास्तविकता, सारता.

GENUS, *s.* (In logic) परं.—(A class) जातिः *f.*, गणः, वर्गः, जातिमात्रं, गोत्रं.

GEOGRAPHER, *s.* भूपृष्ठविद्याज्ञः, भूगोलविद्याज्ञः, भूगोलशास्त्रज्ञः, भूपृष्ठलेखकः, भूगोलज्ञानी *m.* (न्), भूगोलस्य यत् किञ्चिद् देशसमुद्रनगरादि विद्यते तदाकारनामादिलेखकः, भूपृष्ठस्य देशसमुद्रपर्व्वतनद्यादिव्याख्याता *m.* (तृ), भूपृष्ठविवरणकृत्.

GEOGRAPHICAL, *a.* भूगोलविषयः -या -यं, भूपृष्ठविषयकः -का -कं, भूगोलशास्त्रविषयः -या -यं, भूपृष्ठसम्बन्धी -न्धिनी -न्धि (न्), भूगोलशास्त्रीयः -या -यं.

GEOGRAPHICALLY, *adv.* भूगोलशास्त्रानुसारेण, भूगोलशास्त्रवत्.

GEOGRAPHY, *s.* भूपृष्ठविद्या, भूगोलविद्या, भूपृष्ठविषयकं ज्ञानं, भूगोलस्य यत् किञ्चिद् देशसमुद्रनगरादि विद्यते तदाकारनामादिव्याख्या, भूपृष्ठस्य देशसमुद्रपर्व्वतनद्यादीनां ज्ञानं or विवरणं, भूगोलशास्त्रं.

GEOLOGICAL, *a.* पार्थिवांशविषयः -या -यं, पृथिवीविद्यासम्बन्धी -न्धिनी -न्धि (न्), पृथिवीसंस्थानविषयकः -का -कं.

GEOLOGIST, *s.* पार्थिवांशविद्याज्ञः, पृथिवीविद्याज्ञः, पृथिवीसंस्थानव्याख्याता *m.* (तृ), मृत्तिकाभावगुणादिविवरणकृत् *m.*

GEOLOGY, *s.* पार्थिवांशानां ज्ञानं or विद्या, पार्थिवांशविषयं ज्ञानं, पृथिवीविद्या, पार्थिवांशानां प्राचीनेतिहासः, पृथिवीसंस्थानविद्या, मृत्तिकासंस्थानविद्या, मृत्तिकाभावगुणादिविवरणविद्या.

GEOMETRAL, GEOMETRIC, GEOMETRICAL, *a.* क्षैत्रः -त्री -त्रं, क्षेत्रपरिमाणविषयः -या -यं, क्षेत्रगतः -ता -तं, क्षेत्रविद्यानुसारी -रिणी -रि (न्), रेखागणितसम्बन्धी -न्धिनी -न्धि (न्); 'geometrical proof,' क्षेत्रगतोपपत्तिः *f.*

GEOMETRICALLY, *adv.* क्षेत्रविद्यानुसारेण, रेखागणितशास्त्रवत् or -तस्.

GEOMETRICIAN, *s.* क्षेत्रविद्याज्ञः, रेखागणितविद् *m.*, क्षेत्रज्ञः, रेखागणितशास्त्रदर्शी *m.* (न्), क्षेत्रपरिमाणविद्यावान् *m.* (त्).

GEOMETRY, *s.* क्षैत्रं, क्षेत्रं, क्षेत्रविद्या, क्षेत्रपरिमाणविद्या, क्षेत्रपरिमाणविषया विद्या, रेखागणितं, रेखागणितशास्त्रं, रेखागणनाविद्या; 'proof by geometry,' क्षेत्रगतोपपत्तिः *f.*

GEORGIC, *s.* गोमेधादिविषयं गीतं, कृषिविद्याविषयकं काव्यं.

GERANIUM, *s.* बकमुखाकारवीजकोषः सुपुष्पवान् ओषधिभेदः.

GERFALCON, *s.* श्येनभेदः, कपोतारिः *m.*, घातिपक्षी *m.* (न्).

GERM, GERMEN, GERMIN, *s.* (The embryo of fruit, a bud) पल्लवः -वं, अङ्कुरः, अभिनवोद्भिद् *m.*, जालकं, क्षारकः, जोषिका, कुन्दुकं; 'of leaves,' मादिः *f.*—(Origin, that from which any thing springs) वीजं, योनिः *m.f.*, आदिः *m.*, आरम्भः, गर्भः, मूलं.

GERMAN, *a.* (Related) सम्बन्धी -न्धिनी -न्धि (न्), सम्पर्की -र्किणी -र्कि (न्); 'cousin german,' पितृव्यपुत्रः -त्री, मातुलपुत्रः -त्री.—(Belonging to Germany) जर्म्मणिदेशसम्बन्धी &c., जर्म्मणिदेशजः -जा -जं; 'language,' जर्म्मणिदेशभाषा.

GERMANDER, *s.* अनेकौषधीनां सामान्यनाम *n.* (न्), ओषधिगणसंज्ञा.

GERMANISM, *s.* जर्म्मणिदेशभाषासम्बन्धी सम्प्रदायः.

To GERMINATE, *v. n.* स्फुट् (c. 6. स्फुटति -टितुं), फुल्ल् (c. 1. फुल्लति -ल्लितुं), अङ्कुर (nom. अङ्कुरयति -यितुं), विकस् (c. 1. -कसति -सितुं), उद्भिद् in pass. (-भिद्यते), प्रोद्भिद्, प्ररुह् (c. 1. -रोहति -रोढुं), वृध् (c. 1. वर्धते -र्धितुं).

GERMINATING, *part.* उद्भिज्जः -ज्जा -ज्जं, उद्भिद् *m.f.n.*, उद्भिदः -दा -दं, प्ररोही -हिणी -हि (न्), अङ्कुरितः -ता -तं, फुल्लवान् -वती -वत्, प्रस्फुटः -टा -टं, स्फुटन् -टन्ती -टत् (त्).

GERMINATION, *s.* स्फुटनं, स्फुटता, उद्भेदः, प्रोद्भेदः, प्ररोहः, उद्वर्त्तनं.

GERUND, *s.* लाटीनभाषाव्याकरणे क्रियावाचकः शब्दः.

GESTATION, *s.* गर्भधारणं, गर्भपोषणं, गर्भवहनं, गर्भिणीभावः.

To GESTICULATE, *v. n.* अङ्गानि विक्षिप् (c. 6. -क्षिपति -क्षेप्तुं), हस्तादि विक्षिप् or सञ्चल् in caus. (-चालयति -यितुं), अङ्गविक्षेपं कृ, इङ्ग् (c. 1. इङ्गति -ङ्गितुं), नट् (c. 10. नाटयति -यितुं), अभिनयं कृ, आङ्गिककर्म्म कृ.

GESTICULATION, *s.* अङ्गविक्षेपः -पणं, हस्तादिविक्षेपः, अङ्गहारः, इङ्गितं, इङ्गितकरणं, अङ्गसञ्चालनं, हस्तादिसञ्चालनं, सङ्केतकरणं, शाणी, सूचा -चना, भावकरणं, आङ्गिककर्म्म *n.* (न्).

GESTICULATOR, *s.* अङ्गविक्षेपकः, हस्तादिविक्षेपकः, अङ्गसञ्चालकः, इङ्गितकारी *m.* (न्), सङ्केतकारी *m.* (न्).

GESTURE, *s.* इङ्गितं, अङ्गविक्षेपः, हस्तादिविक्षेपः, सङ्केतः, अङ्गहारः -रिः *m.*, चेष्टा, भावः, इङ्गः, अभिनयः, अभिनीतिः *f.*, सूचना.

To GESTURE, *v. a.* साङ्गविक्षेपं कृ, सहस्तविक्षेपं कृ, साभिनयं कृ.

To GET, *v. a.* (Obtain) आप् (c. 5. आप्नोति, आप्तुं), प्राप्, समाप्.

सम्प्राप्, समवाप्; लभ् (c. 1. लभते, लब्धुं), उपलभ्, अर्ज् (c. 1. अर्जति -र्जितुं, c. 10. अर्जयति -यितुं), उपार्ज्, आसद् (c. 10. -सादयति -यितुं), समासद्, अधिगम् (c. 1. -गच्छति -गन्तुं), गम्, प्रतिपद् (c. 4. -पद्यते -पत्तुं), आपद्, अभिपद्, आविश् (c. 6. -विशति -वेष्टुं), इ (c. 2. एति -तुं), अश् (c. 5. अश्नुते, अशितुं), उपाश्, समश्.—(Have) धा (c. 3. दधाति, धत्ते, धातुं), धृ in caus. (धारयति -यितुं), भृ (c. 3. बिभर्त्ति, भर्त्तुं), आप्.—(Beget) जन् (c. 10. जनयति -यितुं).—(Learn) शिक्ष् (c. 1. शिक्षते -क्षितुं), अधी (c. 2. अधीते, अध्येतुं rt. इ), अधिगम्.—(Induce, persuade) अनुनी (c. 1. -नयति -नेतुं), प्रोत्सह् (c. 10. -साहयति -यितुं), or expressed by the causal; as, 'he got him to return,' निवर्त्तयामास.—(Earn) उपार्ज्, लभ्.—(Receive, take) आदा (c. 3. -दत्ते -दातुं), ग्रह् (c. 9. गृह्णाति, ग्रहीतुं), उपलभ्.—(Procure, get ready) कॢप् (c. 10. कल्पयति -यितुं), परिकॢप्, सज्जीकृ, उत्पद् (c. 10. -पादयति -यितुं).—(Get together) समानी (c. 1. -नयति -नेतुं), सञ्चि (c. 5. -चिनोति -चेतुं), समादा, सङ्ग्रह्, एकीकृ, एकत्र कृ.—(Get over, get through, surmount) आरुह् (c. 1. -रोहति -रोढुं), अधिरुह्, अतिक्रम् (c. 1. -क्रामति -क्रमितुं), तीर् (c. 10. तीरयति -यितुं), पार् (c. 10. पारयति -यितुं), तॄ (c. 1. तरति -रितुं -रीतुं), निस्तॄ; 'get over a difficulty,' दुःखम् आरुह्, दुःखपारं गम् (c. 1. गच्छति, गन्तुं), दुःखस्यान्तं गम्.—(Get up, prepare) उपस्कृ, संस्कृ, पुरस्कृ, विरच् (c. 10. -रचयति -यितुं), सज्जीकृ.—(Get into debt) ऋणं कृ, ऋणग्रस्तः -स्ता -स्तं भू, ऋणवान् -वती -वद् भू.

To GET, *v. n.* (Arrive at) आगम् (c. 1. -गच्छति -गन्तुं), उपगम्, अभिगम्, प्राप् (c. 5. -आप्नोति -आप्तुं), अवाप्, आया (c. 2. -याति -तुं), उपस्था (c. 1. -तिष्ठति -स्थातुं).—(Get away) अपगम्, अपया, अपे (c. 2. अपैति -तुं, rt. इ), अपसृ (c. 1. -सरति -सर्त्तुं), अपक्रम् (c. 1. -क्रामति -क्रमितुं), चल् (c. 1. चलति -लितुं), प्रस्था.—(Get before) अग्रे or पूर्व्वं or पूर्व्वम् आगम् or प्राप्.—(Get clear) मुच् in pass. (मुच्यते).—(Get down) अवरुह् (c. 1. -रोहति -रोढुं), अवतॄ (c. 1. -तरति -रितुं -रीतुं), अधो या or गम्.—(Get in) विश् (c. 6. विशति, वेष्टुं), प्रविश्, निविश्, आविश्.—(Get off, escape) पलाय् (c. 1. पलायते -यितुं, rt. इ), विपलाय्, निःसृ, अपक्रम्, निर्गम्.—(Get off, alight) अवतॄ, अवरुह्.—(Get out) अपगम्, अपसृ, अपे.—(Get up) उत्था for उत्स्था.—(Get quit of) मुच् in pass.—(Get on) प्रगम्, प्रवृत् (c. 1. -वर्त्तते -र्त्तितुं), प्रसृ, प्रया, प्रचल्.—(Get drunk) मत्तः -त्ता -त्तं भू, उन्मत्तीभू; 'get out with you,' अपसर, अपैहि, अपेहि.

GETTER, *s.* प्रापकः, अवाप्ता *m.* (प्तृ), लब्धा *m.* (ब्धृ), अर्जकः, उपार्जकः, अधिगन्ता *m.* (न्तृ), लाभकृत् *m.*, आदाता *m.* (तृ), ग्राहकः, जनकः, उत्पादकः.

GETTING, *s.* लाभः, लब्धिः *f.*, आप्तिः *f.*, प्राप्तिः *f.*, प्रापणं, अवाप्तिः *f.*, सम्प्राप्तिः *f.*, अर्जनं, उपार्जनं, आसादनं, अधिगमः, आगमः, ग्रहणं.

GEWGAW, *s.* अल्पमूल्यकम् आभरणं, अल्पार्घं क्रीडाद्रव्यं, क्रीडनकं, कन्दुकं, खेलाद्रव्यं, कन्दर्पद्रव्यं.

GHASTFULLY, *adv.* पिशाचवत्, भूतवत्, प्रेतवत्, दारुणं, भयानकं, घोरं.

GHASTLINESS, *s.* रूपदारुण्यं, वदनघोरता, मुखरौद्रता, भूतसरूपता, भौतत्वं, करालत्वं, विकटत्वं.

GHASTLY, *a.* (Like a ghost) भूतसरूपः -पी -पं, प्रेतसरूपः -पी -पं, भौतिकः -की -कं, पैशाचिकः -की -कं, शवसवर्णः -र्णा -र्णं, प्रेतसवर्णः -र्णा -र्णं.—(Frightful) घोररूपः -पी -पं, घोराकृतिः -तिः -ति, दारुणः -णा -णं, भयानकः -का -कं, रौद्रः -द्री -द्रं, भीमदर्शनः -ना -नं, उग्रम्पश्यः -श्या -श्यं, करालमुखः -खी -खं.

GHAUT, *s.* (Landing-place) घट्टः -ट्टी, मज्जनं, गुल्फः.—(Malaya range of mountains) मलयः, मलयाचलः, मलयपर्व्वतः, मलयाद्रिः *m.*, दक्षिणाचलः, दक्षिणपर्व्वतः.

GHEE, *s.* घृतं, हविस् *n.*, सर्पिस् *n.*, हव्यं, हवनीयं, हविष्यं, आज्यं, तनूनपं, घृमः.

GHOST, *s.* (Soul) आत्मा *m.* (न्), अन्तरात्मा *m.* (न्).—(Disembodied spirit) प्रेतः, प्रेतनरः, परेतः, नारकः, नरकवासी *m.* (न्), नरकामयः.—(Goblin) वेतालः, रात्रिचरः, निशाचरः, निशाटः, भूतः -तं, श्मशानवासी *m.* (न्), राक्षसः; 'to give up the ghost,' प्राणत्यागं कृ, ईश्वरहस्ते जीवनं or प्राणं समृ in caus. (-अर्पयति -यितुं).

GHOSTLIKE, *s.* प्रेतसरूपः -पा -पी -पं, भूतसरूपः -पा -पी -पं.

GHOSTLINESS, *s.* प्रेतत्वं, भूतत्वं, परेतत्वं, आत्मता, पारमार्थिकत्वं.

GHOSTLY, *a.* (Spiritual) आत्मिकः -की -कं, आत्मविषयः -या -यं, पारमार्थिकः -की -कं, अशारीरिकः -की -कं, पारत्रिकः -की -कं.—(Pertaining to ghosts) भौतिकः -की -कं, प्रेतसम्बन्धी -न्धिनी -न्धि (न्).

GIANT, *s.* (A man of extraordinary size) बृहत्कायः, बृहच्छरीरः, विकटशरीरः, भीमविग्रहः, प्रकाण्डशरीरः, अखर्वः.—(A titan) दैत्यः, असुरः, राक्षसः, दानवः, दैतेयः, रक्षस् *n.*, इन्द्रारिः *m.*, सुरद्विट् *m.* (ष्), दितिसुतः, दनुजः, यातु *n.*, यातुधानः, पूर्व्वदेवः, शुक्रशिष्यः, कौणपः, नैर्ऋतः, निकषात्मजः, क्रव्याद् *m.*, निशाचरः.

GIANTESS, *s.* बृहत्काया, बृहच्छरीरा, विकटशरीरा स्त्री, राक्षसी.

GIANT-LIKE, GIANTLY, *a.* बृहत्कायः -या -यं, बृहच्छरीरः -रा -रं.

To GIBBER, *v. n.* जल्प् (c. 1. जल्पति -ल्पितुं), अस्पष्टं वद् (c. 1. वदति -दितुं).

GIBBERISH, *s.* अनर्थकवाक्यं, असम्बद्धवाक्यं, वृथाकथा, मृषार्थकवचनं, जल्पितं; 'one who talks it,' अनिबद्धप्रलापी *m.* (न्).

GIBBET, *s.* उद्बन्धनकाष्ठं, उद्बन्धनवृक्षः, वधस्थानं, घातस्थानं.

To GIBBET, *v. a.* रज्जुपाशेन उद्बन्ध् (c. 9. -बध्नाति -बन्धुं), उद्बन्धनं कृ.

GIBBOSITY, *s.* कुब्जता, न्युब्जता, कूर्म्मपृष्ठाकारत्वं, विम्बाकारता, आभोगः, खण्डमण्डलत्वं.

GIBBOUS, *a.* (Convex, protuberant) न्युब्जः -ब्जा -ब्जं, विम्बाकारः -रा -रं, कूर्म्मपृष्ठाकारः -रा -रं, गण्डाकारः -रा -रं, आभोगी -गिनी -गि (न्); 'as the moon,' खण्डमण्डलः -ला -लं.—(Hump-backed) कुब्जः -ब्जा -ब्जं, गडुरः -रा -रं.

GIBBOUSNESS, *s.* न्युब्जता, कूर्म्मपृष्ठाकारता, साभोगता. *See* GIBBOSITY.

GIB-CAT, *s.* जीर्णमार्जारः, अतिवृद्धो बिडालः.

To GIBE, *v. a.* and *n.* क्षिप् (c. 6. क्षिपति, क्षेप्तुं), अवक्षिप्, परिक्षिप्, अवहस् (c. 1. -हसति -सितुं), अवज्ञा (c. 9. -जानाति -ज्ञातुं), तिरस्कृ, मुखरीकृ.

GIBE, *s.* क्षेपः, अवक्षेपः, तिरस्कारः, अवहासः, दुर्वाक्यं, दुरुक्तं, कटुवाक्यं.

GIBER, *s.* क्षेपकः, अवक्षेपकः, दुर्मुखः, मुखरः, दुर्वक्ता *m.* (क्तृ).

GIBLETS, *s. pl.* हंसादेर् यत् पादमस्तकयकृदादि प्राक्शूलारोपणाद् अवच्छिन्नीभूय पृथक् पच्यते, हंसस्य पचनयोग्यं क्षुद्रकृदन्त्रादि, हंसखण्डकाः *m. pl.*

GIDDILY, *adv.* भ्रमररोगग्रस्तवत्, सभ्रमरं, चपलं, मनोलौल्यात्.

GIDDINESS, *s.* (Of the head, &c.) भ्रमरं, भ्रामरं, भ्रमिः *f.*, भ्रमः, विभ्रमः, विभ्रान्तिः *f.*, घूर्णिः *f.*, घूर्णनं, चक्षुरादिचापल्यं-चापलं, चक्षुरादिविभ्रान्तिः *f.*, प्रमादः.—(Of character) चपलता, चापल्यं, चञ्चलत्वं, चाञ्चल्यं, चलचित्तता, अस्थिरता, अस्थैर्यं, लोलता, अनवस्थितिः *f.*, अधीरत्वं, लौल्यं, मनोलौल्यं, विभ्रान्तिः *f.*, विभ्रमशीलता, तरलता, प्रमत्तता.

GIDDY, *a.* (In the head) भ्रामरी -रिणी -रि (न्), भ्रमी -मिणी -मि (न्), घूर्णरोगी -गिणी -गि (न्), भ्रमररोगी &c., विभ्रान्तः -न्ता -न्तं.—(Causing giddiness) भ्रमकरः -री -रं.—(In character) चपलः -ला -लं, चञ्चलः -ला -लं, विभ्रमशीलः -ला -लं, अस्थिरः -रा -रं, अनवस्थः -स्था -स्थं, अनवस्थितः -ता -तं, अधीरः -रा -रं, चपलबुद्धिः -द्धिः -द्धि, चपलात्मकः -का -कं, चलचित्तः -त्ता -त्तं, लोलः -ला -लं, लोलमनाः

-मा: -नः (न्), प्रमत्तः -त्ता -त्तं, प्रमादी -दिनी -दि (न्).—(Elated) उद्धतः -ता -तं, मत्तः -त्ता -त्तं; 'with power,' ऐश्वर्य्यमत्तः -त्ता -त्तं.

GIFT, *s.* दानं, प्रदानं, दत्तं, प्रदेयं, सम्प्रदानं, दायः, उपहारः, उपायनं, वितरणं, त्यागः, उत्सर्ज्जनं, विसर्गः, विसर्ज्जनं, विश्राणनं, अंहतिः *f.*, उपग्राह्यं, उपढौकनं, उपदा -दानकं, प्रदा, दादः, दा, दं, विहापितं, प्रतिपादनं, निर्वपणं, स्पर्शनं, प्रादेशनं, प्रदेशनं, अपवर्ज्जनं, उपचारः, प्रीतिदानं, प्राभृतं; 'a special gift,' सदायः, सुदायः, हरणं; 'nuptial gift,' यौतकं; 'desirable gift,' प्रवारणं, प्रहारणं; 'gift to deceased ancestors,' पितृदानं.—(Endowment) गुणः, शक्तिः *f.*

GIFTED, *p. p.* or *a.* (Endowed) सम्पन्नः -न्ना -न्नं, उपपन्नः -न्ना -न्नं, युक्तः -क्ता -क्तं, संयुक्तः -क्ता -क्तं, उपेतः -ता -तं, अन्वितः -ता -तं, शीलितः -ता -तं.—(With talents) गुणी -णिनी -णि (न्), गुणवान् -वती -वत् (त्), इष्टगुणसम्पन्नः -न्ना -न्नं, सद्गुणोपेतः -ता -तं.

GIG, *s.* (Any thing that whirls round in play) भ्रमरं, भ्रमरक्रीडनकं.—(A light carriage) द्विचक्रयुक्तं लघुयानं, लघुरथः.—(Boat) उपनौका, लघुनौका, क्षुद्रनौका.

GIGANTIC, *a.* बृहत्कायः -या -यं, बृहच्छरीरः -रा -रं -री -रिणी -रि (न्), भीमविग्रहः -हा -हं, अतिकायः -या -यं, विकटशरीरः -रा -रं, अतिमहान् -हती -हत् (त्), अतिबृहन् -हती -हत् (त्), राक्षसपरिमाणः -णा -णं, दैत्यपरिमाणः -णा -णं.

GIGGLE, *s.* असभ्यपरिहासः, अनर्थकहासः, कुहसितं, मूर्खहसितं.

To GIGGLE, *v. n.* असभ्यपरिहासं कृ, अनर्थकहासं कृ, मूर्खवत् or असभ्यं or कु हस् (c. 1. हसति -सितुं), कक्ख् (c. 1. कक्खति -क्खितुं), कख् (c. 1. कखति -खितुं).

GIGGLER, *s.* असभ्यपरिहासशीलः, निरर्थकहासकारी *m.* (न्).

To GILD, *v. a.* (Overlay with gold) सुवर्ण (nom. सुवर्णयति -यितुं), स्वर्णपत्रपिनद्धं -द्धां -द्धं कृ, सुवर्णोपेतं -तां -तं कृ.—(Illuminate) रञ्ज् (c. 10. रञ्जयति -यितुं), द्युत् (c. 10. द्योतयति -यितुं), विराज् (c. 10. -राजयति -यितुं), प्रकाश् (c. 10. -काशयति -यितुं).

GILDED, *p. p.* सुवर्णितः -ता -तं, रसितः -ता -तं, स्वर्णपत्रपिनद्धः -द्धा -द्धं, स्वर्णमण्डितः -ता -तं, स्वर्णपत्रसंवीतः -ता -तं or -प्रतिबद्धः -द्धा -द्धं, राजतान्वितः -ता -तं, रञ्जितः -ता -तं, राजितः -ता -तं, प्रद्योतितः -ता -तं.

GILDER, *s.* स्वर्णपत्रादिना रञ्जकः, स्वर्णपत्रपिनद्धकारी *m.* (न्).

GILDING, *s.* स्वर्णरञ्जनं, सुवर्णीकरणं, स्वर्णमण्डनं; 'of the leaves of a book,' पत्ररञ्जनं.

GILL, *s.* (Organ of respiration in fishes) मत्स्यानां श्वासेन्द्रियं, मत्स्यानां श्वासप्रश्वासार्थं मस्तकरन्ध्रं or शिरोरन्ध्रद्वयं.—(Of a fowl) कुक्कुटस्य मुखकमलः or मुखस्याधःस्थं लोलमांसं.—(Flesh on the lower part of the cheek) अधोगण्डमांसं, अधोगण्डः, अधःकपोलः, चिबुकमांसं.—(Measure) द्रवद्रव्याणां परिमाणविशेषः.

GILLY-FLOWER, *s.* अनेकौषधीनां सामान्यनाम *n.* (न्), ओषधिगणसंज्ञा.

GILT, *p. p.* or *a.* सुवर्णितः -ता -तं, रसितः -ता -तं, राजतान्वितः -ता -तं. *See* GILDED.

GILT, *s.* सुवर्णरञ्जनं, स्वर्णपत्रं; 'silver-gilt,' विमलं.

GILT-HEAD, *s.* (Fish) गडकः, शकुलगण्डः, शकुलार्भकः, शालः, कुम्भिलः.

GIMCRACK, *s.* निरर्थकयन्त्रं, क्रीडायन्त्रं, क्रीडाद्रव्यं, क्रीडनकं.

GIMLET, *s.* वेधनिका, आस्फोटनी, आस्फोटनी, आविधः

GIMP, *s.* कौशिकसूत्रनिर्म्मितः सूक्ष्मचेलकः.

GIN, *s.* (Spirit) शुण्डा, सुरा -री, वारुणी, शीधुः *m.* -धु *n.*, मदिरा, हाला, आसवं; 'gin-drinker,' सुरापः -पी, शुण्डापायी *m.* -यिनी; 'gin-drinking,' सुरापानं; 'gin-shop,' शुण्डापानं, पानगोष्ठिका.

—(Snare, trap) पाशः, उन्माथः, जालं, कूटयन्त्रं, वागुरा, पाशबन्धः.

GINGER, *s.* आर्द्रकं, शृङ्गवेरं, अङ्कुलोद्यः, गुल्ममूलं, अपाकशाकं; 'dry ginger,' शुष्कार्द्रं, शुण्ठिः *f.* -ण्ठी -ण्ठ्यं, विश्वभेषजं, विश्वं -श्वा, महौषधं, नागरं.

GINGER-BEER, *s.* आर्द्रकपानं, आर्द्रकरसः, आर्द्रकपानीयं, आर्द्रकसुरा.

GINGER-BREAD, *s.* आर्द्रकपिष्टकः, आर्द्रकपूपः, आर्द्रकमयं मिष्टान्नं.

GINGER-WINE, *s.* आर्द्रकमद्यं, आर्द्रकमदिरा, आर्द्रकसुरा.

GINGERLY, *adv.* सावधानं, अवधानेन, शनैः शनैस्, असहसा.

GINGHAM, *s.* रेखाचित्रितं कार्पासाम्बरं or तूलावस्त्रं.

GINGIVAL, *a.* दन्तमांससम्बन्धी -न्धिनी -न्धि (न्), दन्तशिरासम्बन्धी &c.

To GINGLE, *v. n.* शिञ्ज् (c. 2. शिंक्ते, c. 1. शिञ्जते -ञ्जितुं), विशिञ्ज्, क्वण् (c. 1. क्वणति -णितुं), किङ्किण (nom. किङ्किणायते), झञ्झनं कृ.

GINGLE, GINGLING, *s.* शिञ्जः -ञ्जा, शिञ्जितं, आशिञ्जितं, क्वणितं, किङ्किणिशब्दः, झञ्झनं, झनत्कारः.

GINGLING, *part.* क्वणन् -णन्ती -णत् (त्), शिञ्जा -ञ्जना -ञ्जि (न्).

GINNET, *s.* अश्वकः. *See* JENNET.

GIPSY, *s.* हस्तरेखानिरीक्षणानन्तरं दैवकथनादुपजीवी चक्राटः, सावनिचरः -रा *f.*, धूर्त्तः -र्त्ता *f.*, काकचरित्रः -त्रा.

GIRAFFE, *s.* तरक्षुरूपेण चित्रित उष्ट्रजातीयो दीर्घग्रीवो जन्तुभेदः.

To GIRD, *v. a.* (Bind round) बन्ध् (c. 9. बध्नाति, बन्धुं), परिबन्ध्.—(Bind on) आबन्ध्, पिनह् (c. 4. -नह्यति -नद्धुं), अवनह्, सन्नह्, पिनद्धं -द्धां -द्धं कृ, आकष् (c. 1. -कषते -षितुं); 'gird the loins,' कटिं बन्ध्.—(Encircle, invest) परिवेष्ट् (c. 1. -वेष्टते -ष्टितुं, c. 10. -वेष्टयति -यितुं), परिधा (c. 3. -दधाति -धत्ते -धातुं), परिवृ (c. 5. -वृणोति -वरितुं -रीतुं).

To GIRD, *v. n.* (Gibe) क्षिप् (c. 6. क्षिपति, क्षेप्तुं), अवक्षिप्, अवहस् (c. 1. -हसति -सितुं).

GIRD, *s.* आकर्षः, शूलं, अपतानकः, अपतन्त्रकः, आक्षेपकः, वेधाघातः.

GIRDED, *p. p.* बद्धः -द्धा -द्धं, पिनद्धः -द्धा -द्धं, आनद्धः -द्धा -द्धं, अवनद्धः -द्धा -द्धं, आबद्धः -द्धा -द्धं, परिवेष्टितः -ता -तं, परिहितः -ता -तं.

GIRDER, *s.* गृहतले बृहत्काष्ठं or स्थूलकाष्ठं or महादारुः *m.*

GIRDLE, *s.* (Belt) मेखला, रसना, कटिसूत्रं, कटिबन्धनं -नी, काञ्ची, कलापः, कक्षा, कक्ष्या, परिकरः, सारसं -सनं, वसनं, सप्तकी, शृङ्खली, रशना, शृङ्खला.—(Inclosure, circumference) वेष्टनं, परिवेष्टनं, आवेष्टनं, मण्डलं, वलयः, चक्रवालं.—(Zodiac) राशिचक्रं.

To GIRDLE, *v. a.* मेखलया बन्ध् (c. 9. बध्नाति, बन्धुं), वेष्ट् (c. 1. वेष्टते -ष्टितुं, c. 10. वेष्टयति -यितुं), परिवेष्ट्, परिवृ (c. 5. -वृणोति -वरितुं -रीतुं).

GIRDLER, *s.* मेखलाकारः, रसनाकर्त्ता *m.* (र्तृ), कटिसूत्रकारी *m.* (न्).

GIRL, *s.* कन्या, कुमारी, तरुणी, बाला, बालिका, पुत्री, दारिका, अनागतार्त्तवा, लग्निका, नग्निका, गौरी, वासूः *f.*

GIRLHOOD, *s.* कन्यात्वं, कुमारीत्वं, तरुणीत्वं, कौमार्य्यं, तारुण्यं.

GIRLISH, *a.* कन्यायोग्यः -ग्या -ग्यं, कुमारीयोग्यः -ग्या -ग्यं.

GIRLISHLY, *adv.* कन्यावत्, कुमारीवत्, तरुणीवत्, कन्यारूपेण.

GIRT, *p.p.* बद्धः -द्धा -द्धं, पिनद्धः -द्धा -द्धं, वेष्टितः -ता -तं, परिवेष्टितः -ता -तं; 'girt with a falchion,' बद्धनिस्त्रिंशः -शा -शं; 'sea-girt,' समुद्रमेखलः -ला -लं.

GIRTH, *s.* उदरत्राणं, अधोबन्धनं -नी, वरत्रा, वर्द्ध्रं, वर्द्ध्री, नद्ध्री, चूषा, कक्षा, कक्ष्या.

To GIRTH, *v. a.* वरत्रया बन्ध् (c. 9. बध्नाति, बन्धुं), उदरत्राणं पिनह् (c. 4. -नह्यति -नद्धुं).

GIST, *s.* अर्थः, मुख्यार्थः, परमार्थः, उत्तमार्थः, अग्रविषयः.

To GIVE, *v. a.* दा (c. 3. ददाति, दत्ते, दातुं), प्रदा, प्रादा, अभिदा, सम्प्रदा,

निदा, अनुदा, सन्दा, यम् (c. 1. यच्छति -ते, दातुं), प्रयम्, संयम्, प्रतियम्, सम्प्रयम्, दद् (c. 1. ददते -दितुं), प्रतिपद् (c. 10. -पादयति -यितुं), उपपद्, ऋ in caus. (अर्पयति -यितुं), सृ, निक्षिप् (c. 6. -क्षिपति -क्षेप्तुं), वितृ (c. 1. -तरति -रितुं -रीतुं), विश्रण् (c. 10. -श्राणयति -यितुं), त्यज् (c. 1. त्यजति, त्यक्तुं), विसृज् (c. 10. -सर्जयति -यितुं), ग्रह् in caus. (ग्राहयति -यितुं), आहृ (c. 1. हरति -हर्तुं), उपहृ, सङ्क्रम् in caus. (-क्रामयति -यितुं), दिश् (c. 6. दिशति, देष्टुं).—(Give away) प्रदा, प्रयम्.—(Give back) प्रतिदा, प्रतिपद्, प्रत्यर्प् (caus. of ऋ with प्रति), निर्यत् (c. 10. -यातयति -यितुं), प्रतिनिर्यत्, प्रतिरुह् in caus. (-रोपयति -यितुं).—(Give chase) अनुधाव् (c. 1. धावति -वितुं), अनुसृ (c. 1. -सरति -सर्तुं).—(Give forth) प्रकाश् (c. 10. -काशयति -यितुं), ख्या in caus. (ख्यापयति -यितुं), निविद् (c. 10. -वेदयति -यितुं).—(Give the hand for support) करालम्बनं कृ.—(Give in) अनुदा, अनुज्ञा (c. 9. -जानाति -नीते -ज्ञातुं), त्यज्.—(Give over) त्यज्, उत्सृज् (c. 6. -सृजति -स्रष्टुं), विरम् (c. 1. -रमति -रन्तुं) with abl. c., निवृत् (c. 1. -वर्त्तते -र्त्तितुं) with abl. c. 'To give over a sick man,' असाध्य इति परित्यज्य रोगातुरं मुच् (c. 6. मुञ्चति, मोक्तुं).—(Give out) निविद्, प्रकाश्, विघुष् (c. 10. -घोषयति -यितुं); 'emit,' उत्सृज्, मुच्, निःसृ in caus. (-सारयति -यितुं).—(Give up) त्यज्, परित्यज्, सन्त्यज्; हा (c. 3. जहाति, हातुं), विहा; उत्सृज्, विमुच्, उज्झ् (c. 6. उज्झति -ज्झितुं), प्रोज्झ्, प्रत्यादिश्.—(Give one's self up to) आसञ्ज् in pass. (-सज्यते or -सज्जते), सेव् (c. 1. सेवते -वितुं), आसेव्, आसक्तः -क्ता -क्तं भू, निरतः -ता -तं भू.—(Give ground) अपक्रम् (c. 1. -क्रामति -क्रमितुं), अवस्था (c. 1. -तिष्ठते -स्थातुं), परावृत्, निवृत्.—(Give way) पन्थानं दा, त्यज्, अपसृ (c. 1. -सरति -सर्तुं); 'give way,' अपसरत, पन्थानं त्यजत.—(Give in marriage) दा, प्रदा, उपादिश्; 'the girl is given in marriage to a husband,' कन्या वोढुः प्रदीयते.—(Give thanks) धन्यवादं कृ, धन्यं वद् (c. 1. वदति -दितुं), कुशलं वद्.—(Give ear) कर्णं दा.—(Give power) शक्तिं दा, क्षमतां कृ, नियुज् (c. 7. -युनक्ति -योक्तुं).—(Give utterance) उदीर् (c. 10. -ईरयति -यितुं), उच्चर् (c. 10. -चारयति -यितुं), उदाहृ.—(Give suck) धे in caus. (धापयति -यितुं), उपधे, पा in caus. (पाययति -यितुं).—(Give offence) रुष् in caus. (रोषयति -यितुं), विप्रियं कृ.

To GIVE, *v. n.* (Give way, sink) सद् (c. 1. सीदति, सत्तुं), अवसद्.—(Relent, be mitigated) शम् (c. 4. शाम्यति, शमितुं), प्रशम्, शान्तिं or सान्त्वनं या (c. 2. याति -तुं), शान्तीभू, शिथिलीभू.—(Recede) अपसृ (c. 1. -सरति -सर्तुं), निवृत् (c. 1. -वर्त्तते -र्त्तितुं), अपया.—(Cease) विरम् (c. 1. -रमति -रन्तुं), निवृत्, शम्.—(Give in to) अनुज्ञा (c. 9. -जानाति -ज्ञातुं), अनुमन् (c. 4. -मन्यते -मन्तुं).

GIVEN, *p. p.* दत्तः -त्ता -त्तं, प्रदत्तः -त्ता -त्तं, प्रत्तः -त्ता -त्तं, नीत्तः -त्ता -त्तं, निहितः -ता -तं, निक्षिप्तः -प्ता -प्तं, प्रतिपादितः -ता -तं, उपपादितः -ता -तं, विश्राणितः -ता -तं, अर्पितः -ता -तं, समर्पितः -ता -तं, वितीर्णः -र्णा -र्णं, विसर्जितः -ता -तं, विसृष्टः -ष्टा -ष्टं, उपन्यस्तः -स्ता -स्तं; 'well given,' सुदत्तः -त्ता -त्तं; 'given and taken,' दत्तादत्तः -त्ता -त्तं, दत्तापहृतः -ता -तं.—(Given up) त्यक्तः -क्ता -क्तं, परित्यक्तः -क्ता -क्तं, उत्सृष्टः -ष्टा -ष्टं.—(Addicted to) आसक्तः -क्ता -क्तं, रतः -ता -तं, निरतः -ता -तं; 'given quantity,' दृश्यः.

GIVER, *s.* दाता *m.* (तृ), प्रदाता, दायकः, दायी *m.* (न्), दानकर्त्ता *m.* (र्तृ), दाकः, दादी *m.* (न्), प्रदः or दः in comp., त्यागी *m.* (न्); 'giver and receiver,' दातृग्राहकौ m. du., दातृप्रतीच्छकौ m. du.

GIVING, *s.* दानं, प्रदानं, सम्प्रदानं, त्यागः, वितरणं, विसर्ज्जनं.

GIZZARD, *s.* कुक्कुटादीनां जठरः or उदरं or अन्तर्जठरं or पक्वाशयः.

GLACIAL, *a.* हिम्यः -म्या -म्यं, हैमः -मी -मं, हिमरूपः -पा -पं.

To GLACIATE, *v. n.* हिमीभू, हिमवत् संहतीभू or शीतीभू.

GLACIATION, *s.* शीतीकरणं, शीतीभावः, हिमीकरणं, हिमसंहतिः *f.*

GLACIER, *s.* हिमपर्व्वतोत्सङ्गे सुविस्तीर्णा हिमसंहतिः.

GLACIS, *s.* दुर्गबहिर्भागे प्रवणभूमिः *f.* or निम्नभूमिः or स्थानं क्रमशो ऽधोगम्यं.

GLAD, *a.* हृष्टः -ष्टा -ष्टं, प्रहृष्टः -ष्टा -ष्टं, हृष्टहृदयः -या -यं, हृष्टमानसः -सा -सं, हर्षयुक्तः -क्ता -क्तं, आनन्दी -न्दिनी -न्दि (न्), आनन्दितः -ता -तं, सानन्दः -न्दा -न्दं, प्रीतः -ता -तं, आह्लादितः -ता -तं, प्रह्लादितः -ता -तं, प्रह्लन्नः -न्ना -न्नं, तुष्टः -ष्टा -ष्टं, परितुष्टः -ष्टा -ष्टं, तृप्तः -प्ता -प्तं, प्रसादितः -ता -तं, प्रफुल्लः -ल्ला -ल्लं, उल्लसः -सा -सं -सितः -ता -तं, अभिरूषितः -ता -तं, मत्तः -त्ता -त्तं.—(Making glad) हर्षकः -का -कं, नन्दकः -का -कं, मोदकः -का -कं, आनन्दकरः -री -रं, हर्षकरः -री -रं, सुभगः -गा -गं, रमणीयः -या -यं.

To GLAD, GLADDEN, *v. a.* हृष् (c. 10. हर्षयति -यितुं), प्रहृष्, परिहृष्, नन्द् (c. 10. नन्दयति -यितुं), अभिनन्द्, ह्लाद् (c. 10. ह्लादयति -यितुं), आह्लाद्, प्रह्लाद्, रम् (c. 10. रमयति -यितुं), उल्लस् (c. 10. -लासयति -यितुं), तुष् (c. 10. तोषयति -यितुं), तृप् (c. 10. तर्पयति -यितुं), प्रमुद् (c. 10. -मोदयति -यितुं), प्री (c. 9. प्रीणाति, c. 10. प्रीणयति -यितुं).

GLADDENED, *p. p.* आह्लादितः -ता -तं, आनन्दितः -ता -तं, प्रमोदितः -ता -तं.

GLADDENING, *a.* हर्षकः -का -कं, हर्षणः -णा -णं, हर्षकरः -री -रं, नन्दकः -का -कं, आनन्दनः -ना -नं, आनन्ददः -दा -दं, प्रीतिदः -दा -दं.

GLADDER, GLADDENER, *s.* आनन्दकारी *m.* (न्), आनन्दकः, सुखदः.

GLADE, *s.* जङ्गलमध्ये or वनमध्ये पथः, वनपथः, वनमार्गः, वृक्षावृतः पथः, तरुगुल्मावृतो मार्गः.

GLADIATE, *a.* खड्गाकारः -रा -रं, अस्याकारः -रा -रं, खड्गाकृतिः -तिः -ति.

GLADIATOR, *s.* झल्लः, मल्लः, आसिकः, असिक्रीडकः, खड्गक्रीडकः, अस्त्रक्रीडकः, नैस्त्रिंशिकः.

GLADIATORIAL, *a.* झल्लसम्बन्धी -न्धिनी -न्धि (न्), असिक्रीडासम्बन्धी &c., आसिकः -की -कं.

GLADIATURE, *s.* असियुद्धं, खड्गयुद्धं, असिक्रीडा, खड्गक्रीडा.

GLADLY, *adv.* सानन्दं, सहर्षं, हर्षेण, हृष्टमनसा, हृष्टवत्, साह्लादं, आह्लादेन, प्रह्लादेन, प्रमोदेन, सन्तोषेण.

GLADNESS, *s.* हर्षः, आनन्दः, आह्लादः, प्रह्लादः, प्रमोदः, आमोदः, हृष्टिः *f.*, मुदा, हृष्टता, प्रहृष्टता, प्रफुल्लता, उल्लासः, उल्लसत्वं, चित्तप्रसन्नता, प्रीतिः *f.*, प्रीतता, तुष्टिः *f.*, सन्तुष्टिः *f.*, मोदः, उत्सवः.

GLADSOME, *a.* आनन्दी -न्दिनी -न्दि (न्), रम्यः -म्या -म्यं, सुभगः -गा -गं.

GLAIR, *s.* अण्डशुक्लं, अण्डगर्भपरिगतः शुक्लरसः, अण्डपयस् *n.*

GLANCE, *s.* (Of the eye) दृष्टिपातः, दृष्टिनिपातः, नयनपातः, दृष्टिविक्षेपः, कटाक्षः, नेत्रकटाक्षः, अपाङ्गदृष्टिः *f.*, अपाङ्गदर्शनं, वीक्षितं, प्रेक्षितं, अवलोकनं, काक्षः, दृष्टिबाणः.—(Slight view) ईषद्दर्शनं, ईषद्दृष्टिः *f.*, अर्द्धवीक्षणं, अर्द्धदृष्टिः *f.*; 'glance in return,' प्रतिसमीक्षणं.—(A shoot of light) स्फुरितं, स्फुरणं, द्युतिपातः, रश्मिः *m.*

To GLANCE, *v. n.* (As light) स्फुर् (c. 6. स्फुरति -रितुं), परिस्फुर्, लस् (c. 1. लसति -सितुं).—(Strike lightly and pass by) लघु हत्वा or ताडयित्वा अतिक्रम् (c. 1. -क्रामति -क्रमितुं) or अती (c. 2. अत्येति -तुं, rt. इ), द्रुतम् अतिक्रम्य घृष् (c. 1. घर्षति -र्षितुं).—(Glance with the eye) दृष्टिं पत् (c. 10. पातयति -यितुं) or विक्षिप् (c. 6. -क्षिपति -क्षेप्तुं), दृष्टिबाणं पत्, कटाक्ष (nom. कटाक्षयति -यितुं).—(Glance at, inspect slightly) ईषद् दृश् (c. 1. पश्यति, द्रष्टुं) or निरीक्ष् (c. 1. -ईक्षते -क्षितुं), अर्द्धवीक्षणं कृ.

GLANCING, *part.* स्फुरन् -रन्ती -रत् (त्), लसन् -सन्ती -सत् (त्), स्फुरितः -ता -तं.

GLANCINGLY, *adv.* लघु, ईषत्, अल्पमात्रं, साङ्केदर्शनं, लाघवेन, तिर्य्यक्, तिरस्, वक्रगत्या.

GLAND, *s.* शरीराभ्यन्तरे ग्रायसंज्ञकः पित्तश्लेष्माद्याशयो मृदुमांसपिण्डः, मांसग्रन्थिः *m.*

GLANDERS, *s.* अश्वानाम् उग्ररोगविशेषो यत्र नासिकारन्ध्रेण दुर्गन्धश्लेष्म or दुर्गन्धमलम् उत्सृज्यते.

GLANDULE, *s.* शरीराभ्यन्तरे श्लेष्माद्याशयो मृदुमांसपिण्डकः.

GLANDULOUS, GLANDULAR, *a.* पूर्व्वोक्तमांसपिण्डसम्बन्धी -न्धिनी -न्धि (न्).

GLANS, *s.* (Penis) मणिः *m.f.*

GLARE, *s.* तेजस् *n.*, अतितेजस्, अतिद्युतिः *f.*, द्युतिः *f.*, अतिप्रभा, भाः *f.* (स्), दृष्टिसन्तापका द्युतिः, नयनोपघातिनी प्रभा, हेतिः *f.*, उज्ज्वलद्युतिः *f.*, प्रखरदीप्तिः *f.*, खरदीप्तिः *f.*—(Fierce look) उग्रदृष्टिः *f.*, तीक्ष्णदृष्टिः, कोपज्वलिता दृष्टिः.

To GLARE, *v. n.* अतितेजसा द्युत् (c. 1. द्योतते -तितुं), उज्ज्वल् (c. 1. -ज्वलति -लितुं), ज्वल् in freq. (जाज्वल्यते), दीप् in freq. (देदीप्यते), अतितेजसा दृष्टिं सन्तप् (c. 10. -तापयति -यितुं) or उपहन् (c. 2. -हन्ति -न्तुं), स्फुर् (c. 6. स्फुरति -रितुं).—(Look with fierce eyes) तीक्ष्णदृष्टिं or कोपज्वलितां दृष्टिं पत् (c. 10. -पातयति -यितुं), रोषप्रदीप्ताक्षः -क्षा -क्षं भू.

GLAREOUS, *a.* अण्डशुक्लसगुणः -णा -णं, अण्डशुक्लधर्म्मा -र्म्मा -र्म्म (न्).

GLARING, *part.* or *a.* अतितेजसः -सी -सं, उज्ज्वलः -ला -लं, अतिद्योती -तिनी -ति (न्), अतितेजसा दृष्टिसन्तापकः -का -कं or नयनोपघाती -तिनी -ति (न्), भास्वान् -स्वती -स्वत् (त्), काशीनयः -यी -यं.—(Clear, notorious) सर्व्वप्रकाशः -शा -शं, सुप्रकाशः -शा -शं, पुरःस्फुरन् -रन्ती -रत् (त्); 'having eyes glaring with anger,' रोषप्रदीप्ताक्षः -क्षा -क्षं.

GLARINGLY, *adv.* सुप्रकाशं, सर्व्वप्रकाशं, सर्व्वप्रसिद्धं, अतितेजसा.

GLASS, *s.* (Transparent substance formed by fusing sand with alkalies) काचः, क्षारः, सिन्धं, अभ्रं -भ्रकं, स्फटिकः.—(Glass drinking-vessel) काचभाजनं, काचपात्रं, काचकूपी, पलिघः, पुलकः, पारी; 'glass jar,' काचघटी.—(Looking-glass, mirror) दर्पणः, मुकुरः, आदर्शः.

GLASS, *a.* काचमयः -यी -यं, काचनिर्म्मितः -ता -तं, काच in comp.

To GLASS, *v. a.* *See To* GLAZE.

GLASS-BLOWER, *s.* काचधमकः, क्षारधमकः, काचध्माकारः, काचनिर्म्माणकृत्.

GLASSFUL, *s.* काचपात्रपूरणं, काचभाण्डभरकः, काचभाण्डपूरकः.

GLASS-GRINDER, *s.* काचपरिष्कारकः, काचमार्ज्जकः, काचतेजस्कारी *m.* (न्).

GLASS-HOUSE, *s.* काचनिर्म्माणशाला, क्षारनिर्म्माणगृहं, काचशाला.

GLASSINESS, *s.* स्वच्छता, प्रसन्नता, प्रसत्तिः *f.*, विमलता, श्लक्ष्णता.

GLASS-LIKE, *a.* काचोपमः -मा -मं, काचसगुणः -णा -णं.

GLASS-MAN, *s.* काचविक्रेता *m.* (तृ), काचद्रव्यविक्रयी *m.* (न्), काचव्यवसायी *m.* (न्).

GLASS-WORK, *s.* काचनिर्म्माणं, काचनिर्म्माणशिल्पं, काचकर्म्म *n.* (न्).

GLASSY, *a.* काचोपमः -मा -मं, काचवत्प्रसन्नः -न्ना -न्नं, काचवद्विमलः -ला -लं, स्वच्छः -च्छा -च्छं, स्फटिकप्रभः -भा -भं, श्लक्ष्णः -क्ष्णा -क्ष्णं.

GLAUCOUS, *a.* समुद्रवर्णः -र्णा -र्णं, श्यामहरित् *m.f.n.*, घननीलः -ला -लं.

GLAVE, *s.* पृथुपत्रः खड्गः, कृपाणः, निस्त्रिंशः, असिः *m.*

To GLAZE, *v. a.* काच (nom. काचयति -यितुं), काचेन आच्छद् (c. 10. -छादयति -यितुं), काचान्वितं -तां -तं कृ, काचोपेतं -तां -तं कृ.—(Make smooth) श्लक्ष्ण (nom. श्लक्ष्णयति -यितुं), स्निग्धीकृ, श्लक्ष्णीकृ.

GLAZED, *p. p.* काचितः -ता -तं, काचान्वितः -ता -तं, काचाच्छादितः -ता -तं.

GLAZIER, *s.* काचव्यवसायी *m.* (न्), काचबन्धकः, काचबन्धा *m.* (न्धृ).

GLAZING, *s.* काचबन्धनं, काचाच्छादनं, काचकर्म्म *n.* (न्).

GLEAM, *s.* (Sudden shoot of light) द्युतिस्फुरणं, स्फुरितं, अकस्मात्स्फुरणं, प्रभास्फुरणं, क्षणप्रभा, क्षणद्युतिः *f.*, क्षणज्योतिस् *n.*, अचिरप्रभा, अचिरद्युतिः *f.*, अकस्माद्दीप्तिः *f.* द्युतिज्वाला.—(Beam) रश्मिः *m.*, किरणः, अंशुः *m.*—(Brightness) उज्ज्वलता, प्रभा, तेजस् *n.*

To GLEAM, *v. n.* स्फुर् (c. 6. स्फुरति -रितुं), प्रस्फुर्, परिस्फुर्, लस् (c. 1. लसति -सितुं), विद्युत् (c. 1. -द्योतते -तितुं), अकस्मात् or क्षणमात्रं प्रकाश् (c. 1. -काशते -शितुं) or ज्वल् (c. 1. ज्वलति -लितुं) or उज्ज्वल्.

GLEAMING, *part.* स्फुरन् -रन्ती -रत् (त्), लसन् -सन्ती -सत् (त्), स्फुरितः -ता -तं.

GLEAMY, *a.* क्षणमात्रद्योतमानः -ना -नं, क्षणप्रभः -भा -भं, कम्पितप्रभः -भा -भं, चञ्चलप्रभः -भा -भं, चञ्चलद्योती -तिनी -ति (न्), प्रकाशमानः -ना -नं, उज्ज्वलः -ला -लं.

To GLEAN, *v. a.* and *n.* उञ्छ् (c. 1. 6. उञ्छति -ञ्छितुं), शिल् or सिल् (c. 6. शिलति, सिलति -लितुं), ग्रस् or उग्रस् (c. 9. ग्रसाति, c. 10. ग्रासयति, उग्रसाति, उग्रासयति -यितुं), शेषधान्यानि or शस्यशेषं or अवशिष्टकणिशान् or लूनशस्यावशिष्टं चि (c. 5. चिनोति, चेतुं) or अपचि or उद्धृ (c. 1. -हरति -हर्तुं) or हृ or सङ्ग्रह् (c. 9. गृह्णाति -ग्रहीतुं).

GLEAN, *s.* धान्यशेषं, अवशिष्टकणिशसङ्ग्रहः, शेषधान्यसञ्चयः, लूनशस्यावशिष्टं.

GLEANED, *p. p.* हृतधान्यशेषः -षा -षं, हृतशस्यावशेषः -षा -षं, उद्धृतसर्व्वकणिशः -शा -शं, सङ्गृहीतसर्व्वशस्यः -स्या -स्यं.

GLEANER, *s.* शिलोञ्छवृत्तिः *m.f.*, उञ्छवृत्तिः *m.f.*, उञ्छशीलः -ला -लं, शिलोञ्छकारी *m.* (न्), शेषधान्यसङ्ग्राहकः, अवशिष्टकणिशसञ्चयी *m.* (न्), उच्छिष्टशस्यापचायी *m.* (न्).

GLEANING, *s.* (The act) उञ्छः, उञ्छनं, शिलोञ्छः, उञ्छशिलं, उञ्छसिलं, शिलोञ्छवृत्तिः *f.*, उञ्छवृत्तिः *f.*, शिलं, ऋतं, कटभङ्गः, अवशिष्टशस्यसङ्ग्रहः -हणं, लूनक्षेत्रशेषधान्यापचयः, उच्छिष्टकणिशचयः, शस्यशेषापहरणं, धान्यशआदानं.—(That which is gleaned) शस्यशेषं, शस्यावशिष्टं, लूनशस्योच्छिष्टं, लूनकेदारशेषधान्यानि *n. pl.*, कणिशावशेषः.

GLEBE, *s.* (Soil, ground) मृद् *f.*, मृत्तिका, स्थलं -ली, भूमिः *f.*, लोष्टं, मृल्लोष्टं.—(Land belonging to a beneficed clergyman) धर्म्माध्यापकभूमिः *f.*, धर्म्माध्यापकक्षेत्रं.

GLEBY, *a.* मृल्लोष्टमयः -यी -यं, मृत्पूर्णः -र्णा -र्णं, मार्त्तिकः -की -कं.

GLEE, *s.* हर्षः, आह्लादः, प्रह्लादः, आनन्दः, मुदा, प्रमोदः, आमोदः, मदः, उल्लासः, उत्सवः, महोत्सवः.

GLEEFUL, *a.* हृष्टः -ष्टा -ष्टं, आनन्दी -न्दिनी -न्दि (न्), हृष्टचित्तः -त्ता -त्तं.

To GLEEK, *v. n.* अवक्षिप् (c. 6. -क्षिपति -क्षेप्तुं), अवहस् (c. 1. -हसति -सितुं).

GLEET, *s.* मूत्रमार्गरोगः, मूत्रमार्गदोषः, मेहविकारः, प्रमेहविकारः, इक्षुमेहः मूत्रमार्गनिर्गतं पूयशोणितं, धातुप्रस्रावः.

To GLEET, *v. n.* शनैर् मूत्रमार्गात् स्रु (c. 1. स्रवति, स्रोतुं) or प्रस्रु.

GLEN, *s.* दरी -रा, कन्दरः -री, दरीभूः *f.*, अद्रिद्रोणी, निम्नभूमिः *f.*, प्रान्तरं.

GLENE, *s.* अक्षिपात्रं, अक्षिरन्ध्रं, नयनपात्रं, नयनकोष्ठः.

GLIB, *a.* (Smooth, slippery) स्निग्धः -ग्धा -ग्धं, श्लक्ष्णः -क्ष्णा -क्ष्णं, चिक्कणः -णा -णं.—(In speech) वाग्द्रुतः -ता -तं, वाक्चपलः -ला -लं, द्रुतवाक् *m.f.n.*, वाक्क्षिप्रः -प्रा -प्रं, वाक्पटुः -टुः -टु, त्वरितवाक् *m.f.n.*

To GLIB, *v. a.* (Castrate) वृषणद्वयम् उत्कृत् (c. 6. -कृन्तति -कर्त्तितुं).—(Make smooth) श्लक्ष्ण (nom. श्लक्ष्णयति -यितुं).

GLIBLY, *adv.* द्रुतं, श्लक्ष्णं, क्षिप्रं, वाक्चापल्येन, द्रुतवाचा, अविलम्बितं, अस्खलितवाक्येन, अस्खलितं.

GLIBNESS, *s.* (Smoothness) श्लक्ष्णता, स्निग्धता, चिक्कणत्वं.—(In speech)

वाक्चापल्यं, याग्द्रुतता, वाक्क्षिप्रता, वाक्पटुता, वाक्सरणिः *f.*

To GLIDE, *v. n.* सृप् (c. 1. सर्पति, सर्प्तुं), प्रसृप्, विसृप्, संसृप्, विसृ (c. 1. -सरति -सर्तुं), प्रसृ, संसृ, चल् (c. 1. चलति -लितुं).—(As a river) स्रु (c. 1. स्रवति, स्रोतुं), प्रस्रु, स्यन्द् (c. 1. स्यन्दते -न्दितुं), प्रस्यन्द्, री (c. 4. रीयते, रेतुं).—(Move slowly) शनैः शनैः सृ or चल्.

GLIDE, *s.* सर्पणं, संसर्पः, विसर्पणं, विसारः, स्रवः -वणं, प्रस्रवणं.

GLIDER, *s.* विसर्पी *m.* (न्), संसर्पी *m.*, विसारी *m.* (न्), विसर्पणकृत् *m.*

GLIDING, *part.* विसर्पन् -र्पन्ती -र्पत् (त्), विसर्पी -र्पिणी -र्पि (न्), संसर्पी &c., विसारी -रिणी -रि (न्), प्रसारी &c., विसृत्वरः -रा -रं, स्रवन् -वन्ती -वत् (त्), स्यन्दी -न्दिनी -न्दि (न्); 'in the air,' वियति विसर्पी &c.

GLIDING, *s.* सर्पणं, विसर्पः -र्पणं, संसर्पः -र्पणं, विसारः, संसृतिः *f.*, स्रवः -वणं, शनैः सरणं; 'in the air,' खसर्पणं, वियति विसर्पणं; 'gliding up,' उत्सर्पणं.

GLIDINGLY, *adv.* द्रुतं, अविलम्बितं, शनैः शनैः, विसृत्वरं.

GLIFF, *s.* ईषद्दर्शनं, ईषद्दृष्टिः *f.*, अर्द्धवीक्षणं, अर्द्धदृष्टिः *f.*

GLIKE, *s.* अपहासः, अवक्षेपः, तिरस्कारः, गर्हा, अवज्ञा.

GLIM, *s.* दीपः -पकः, दीपिका, प्रदीपः, दीपद्युतिः *f.*

To GLIMMER, *v. n.* मन्दतेजसा or मन्दप्रभया दीप् (c. 4. दीप्यते, दीपितुं) or प्रकाश् (c. 1. -काशते -शितुं) or द्युत् (c. 1. द्योतते -तितुं), ईषत् or मन्दं द्युत् or स्फुर् (c. 6. स्फुरति -रितुं), प्रस्फुर्, ईषत्स्फुरणं कृ, मन्दप्रभः -भा -भं भू, पाण्डुकिरणान् पत् (c. 10. पातयति -यितुं).

GLIMMER, *s.* मन्दतेजस् *n.*, मन्दद्युतिः *f.*, मन्दप्रभा, मन्ददीप्तिः *f.*, स्फुरणं, स्फुरितं, ईषत्स्फुरणं, ईषत्प्रभा, पाण्डुप्रभा.

GLIMMERING, *part.* ईषत्स्फुरितः -ता -तं, मन्दप्रभः -भा -भं, मन्दच्छायः -या -यं, मन्दतेजाः -जाः -जः (स्), पाण्डुद्युतिः -तिः -ति, पाण्डुरश्मिः -श्मिः -श्मि, पाण्डुकिरणः -णा -णं.

GLIMPSE, *s.* (Short or slight view) ईषद्दर्शनं, ईषद्दृष्टिः *f.*, अर्द्धदृष्टिः *f.*, अर्द्धवीक्षणं, क्षणदर्शनं, अचिरदर्शनं, मुहूर्त्तदर्शनं.—(Flash) क्षणप्रभा, अचिरप्रभा.

To GLISTEN, *v. n.* द्युत् (c. 1. द्योतते -तितुं), स्फुर् (c. 6. स्फुरति -रितुं).

GLISTENING, *part.* or *a.* स्फुरन् -रन्ती -रत् (त्), स्फुरितः -ता -तं.

To GLISTER, *v. n.* *See To* GLISTEN.

To GLITTER, *v. n.* द्युत् (c. 1. द्योतते -तितुं), प्रकाश् (c. 1. काशते -शितुं), स्फुर् (c. 6. स्फुरति -रितुं), दीप् (c. 4. दीप्यते, दीपितुं), राज् (c. 1. राजति -ते -जितुं), भा (c. 2. भाति -तुं), भ्राज् (c. 1. भ्राजति -जितुं), विभ्राज्, भास् (c. 1. भासते -सितुं), आभास्, प्रभास्, अवभास्, चकास् (c. 2. चकास्ति, चकासितुं), रुच् (c. 1. रोचते -चितुं), वर्चस् (nom. वर्चायते).

GLITTER, *s.* द्युतिः *f.*, दीप्तिः *f.*, प्रभा, तेजस् *n.*, ज्योतिस् *n.*, कान्तिः *f.*, रुचिः *f.*, द्युतिमत्त्वं, दीप्तिमत्त्वं, आभा, वर्चस् *n.*, छविः *f.*, छाया, उज्ज्वलता.

GLITTERING, *part.* or *a.* द्योती -तिनी -ति (न्), द्योतमानः -ना -नं, दीप्तिमान् -मती -मत् (त्), प्रभावान् -वती -वत् (त्), देदीप्यमानः -ना -नं, तेजोमयः -यी -यं, प्रकाशमानः -ना -नं, वर्चस्वी -स्विनी -स्वि (न्), धौतः -ता -तं, उज्ज्वलः -ला -लं, कान्तिमान् -मती -मत् (त्), सितः -ता -तं, स्फुरितप्रभः -भा -भं.

GLITTERINGLY, *adv.* दीप्त्या, तेजसा, वर्चसा, स्फुरत्तेजसा, स्फुरितं, उज्ज्वलं.

To GLOAT, *v. n.* अत्यभिलाषात् or अतिलोभाद् विवृताक्षो निरीक्ष् (c. 1. -ईक्षते -क्षितुं) or शून्यदृष्ट्या निरीक्ष् or विवृतनयनः -ना -नं भू.

GLOATING, *part.* or *a.* अतिलोभेन विवृताक्षः -क्षी -क्षं, लोभोत्फुल्लनयनः -ना -नं, अत्यभिलाषात् शून्यदृष्टिः -ष्टिः -ष्टि

GLOBATE, GLOBATED, *a.* गोलाकारः -रा -रं, गोलाकृतिः -तिः -ति, मण्डलाकारः -रा -रं, वर्त्तुलः -ला -लं, वर्त्तुलाकृतिः -तिः -ति, मण्डली -लिनी -लि (न्).

GLOBE, *s.* (A sphere) गोलः -ला -लं -लकः, मण्डलं, परिमण्डलं, वर्त्तुलः, पिण्डः, चक्रं.—(Earth) भूगोलः, भूमण्डलं, क्षितिमण्डलं, अवनिमण्डलं, इलागोलं, ब्रह्माण्डः.

To GLOBE, *v. a.* गोलीकृ, एकमण्डलीकृ, परिमण्डलीकृ, वर्त्तुलीकृ.

GLOBOSE, GLOBOUS, *a.* मण्डली -लिनी -लि (न्), वर्त्तुलः -ला -लं.

GLOBOSITY, *s.* गोलत्वं, गोलाकारत्वं, वर्त्तुलता, मण्डलत्वं, परिमण्डलता.

GLOBULAR, *a.* गोलाकारः -रा -रं, गोलाकृतिः -तिः -ति, मण्डलाकारः -रा -रं, मण्डली -लिनी -लि (न्), वर्त्तुलः -ला -लं, वृत्तः -त्ता -त्तं, गुडः -डा -डं, वटी -टिनी -टि (न्), निस्तलः -ला -लं.

GLOBULARLY, *adv.* गोलवत्, मण्डलवत्, गोलाकारेण, मण्डलरूपेण, वर्त्तुलं.

GLOBULE, *s.* गुलिका, गुली, बिन्दुः *m.*, अणुः *m.*, रेणुः *m. f.*, परमाणुः *m.*, क्षुद्रगोलः.

GLOBY, *a.* मण्डलाकारः -रा -रं, गोलाकारः -रा -रं, वर्त्तुलः -ला -लं.

To GLOMERATE, *v. a.* गोलीकृ, मण्डलीकृ, परिमण्डल (nom. परिमण्डलयति -यितुं), वर्त्तुलीकृ, पिण्डीकृ, एकौघीकृ, एकत्र कृ.

GLOMERATE, GLOMERATED, *a.* or *p. p.* पिण्डीभूतः -ता -तं, एकौघीभूतः -ता -तं, एकगोलीकृतः -ता -तं, एकत्रीभूतः -ता -तं.

GLOMERATION, *s.* (The act) पिण्डीकरणं, राशीकरणं.—(A collection) राशिः *m. f.*, पिण्डः, ओघः, सन्निपातः, सञ्चयः.

GLOMEROUS, *a.* पिण्डी -ण्डिनी -ण्डि (न्), पिण्डितः -ता -तं, पिण्डाकृतिः -तिः -ति.

GLOOM, *s.* अवतमसं, अन्धकारः, ईषदन्धकारः, तमस् *n.*, तिमिरं, तमिस्रं, तामिस्रं, तमसं, निष्प्रभता, सान्धकारता, ध्वान्तं, अन्धं, भूच्छाया.

To GLOOM, *v. n.* तिमिरीभू, अन्धीभू, तमस्वी -स्विनी -स्वि भू.

To GLOOM, *v. a.* तिमिर (nom. तिमिरयति -यितुं), तिमिरीकृ, कलुषीकृ.

GLOOMILY, *adv.* (Dimly) सावतमसं, सान्धकारं, निष्प्रभं, अप्रकाशं.—(Not cheerfully) सविषादं, सावसादं, विषण्णमनसा, सोद्वेगं.

GLOOMINESS, *s.* अवतमसं, ईषत्तिमिरं, ईषत्तमस्विता, निष्प्रभता, अप्रकाशत्वं, सान्धकारत्वं.—(Of mind) विषादः, विषण्णता, अवसन्नता, चित्तोद्वेगः, निरानन्दता.

GLOOMY, *a.* तमस्वी -स्विनी -स्वि (न्), ईषत्तमस्वी &c., तामसः -सी -सं, ईषत्तामसः -सी -सं, ईषदन्धकारः -रा -रं, सान्धकारः -रा -रं, सतिमिरः -रा -रं, तमोयुक्तः -क्ता -क्तं, तमस्कल्पः -ल्पा -ल्पं, तमोवृतः -ता -तं, तमोमयः -यी -यं, निष्प्रभः -भा -भं or निःप्रभः, निरालोकः -का -कं, अप्रकाशः -शा -शं, अस्पष्टः -ष्टा -ष्टं, अप्रभः -भा -भं, मलिनप्रभः -भा -भं, दुर्दर्शः, -र्शा -र्शं, मलिनः -ना -नं, अरोकः -का -कं, विगतः -ता -तं.—(Dejected, melancholy) विषण्णः -ण्णा -ण्णं, अवसन्नः -न्ना -न्नं, दीनचेतनः -ना -नं, निरानन्दः -न्दा -न्दं, म्लानः -ना -नं.

GLORIFICATION, *s.* (Act of giving glory) गुणप्रशंसा -सनं, गुणोत्कीर्त्तनं, उत्कीर्त्तनं, यशःकीर्त्तनं, अनुकीर्त्तनं, यशोवर्णना, स्तुतिवादः, गुणश्लाघा, धन्यवादः, वन्दना, प्रशंसाकरणं.—(Elevation to glory) ऊर्द्ध्वगतिः *f.*, स्वर्गारोहणं, स्वर्गगतिः *f.*, परमपदप्राप्तिः *f.*

GLORIFIED, *p. p.* उत्कीर्त्तितः -ता -तं, प्रशंसितः -ता -तं, कृतधन्यवादः -दा -दं.—(Elevated to glory) ऊर्द्ध्वगतः -ता -तं, स्वर्गारूढः -ढा -ढं.

To GLORIFY, *v. a.* गुणान् कृत् (c. 10. कीर्त्तयति -यितुं) or उत्कृत्, प्रशंस् (c. 1. -शंसति -सितुं), श्लाघ् (c. 1. श्लाघते -घितुं), स्तु (c. 2. स्तौति, स्तोतुं), धन्यं वद् (c. 1. वदति -दितुं), धन्यवादं कृ, यशः or कीर्त्तिं or महिमानं वर्ण् (c. 10. वर्णयति -यितुं) or प्रकाश् (c. 10. -काशयति -यितुं).—(Elevate to celestial glory) स्वर्गम् आरुह् in caus. (-रोपयति -यितुं), परमपदं प्राप् in caus. (-आपयति -यितुं).

GLORIOUS, *a.* (Illustrious) महायशाः -शाः -शः (स्), कीर्त्तिमान् -मती

-मत् (त्), यशस्वी -स्विनी -स्वि (न्) यशस्वान् -स्वती -स्वत् (त्), महोदयः, -या -यं, श्रीमान् -मती -मत् (त्), विश्रुतः -ता -तं, ख्यातः -ता -तं.—(Of great splendour) प्रतापवान् -वती -वत् (त्), प्रतापी -पिनी -पि (न्), तेजोमयः -यी -यं, तेजस्वी -स्विनी -स्वि (न्), ओजस्वी &c., वर्चस्वी &c., सुप्रभः -भा -भं, अतिशोभनः -ना -नं, तैजसः -सी -सं.—(Excellent, noble) उत्कृष्टः -ष्टा -ष्टं, उत्तमः -मा -मं, प्रशस्तः -स्ता -स्तं, 'conferring glory,' यशस्करः -री -रं, कीर्त्तिकरः -री -रं.

GLORIOUSLY, *adv.* प्रतापेन, सप्रतापं, सुप्रभं, उत्कृष्टं, उत्तमं, प्रशस्तं.

GLORY, *s.* (Splendour) तेजस् *n.*, द्युतिः *f.*, बृहद्द्युतिः *f.*, प्रतापः, तेजस्विता, ओजस्विता, प्रभा, शोभा, उज्ज्वलता.—(Praise) प्रशंसा, श्लाघा, स्तुतिः *f.*, स्तुतिवाक्यं, स्तोत्रं.—(Honour) मानं, पूजा.—(Fame, renown) कीर्त्तिः *f.*, यशस् *n.*, ख्यातिः *f.*, सुख्यातिः *f.*, विश्रुतिः *f.*, कीर्त्तनं, प्रथा, प्रतिपत्तिः *f.*, महिमा *m.* (न्), जनोदाहरणं.—(Celestial bliss) स्वर्गगतिः *f.*, स्वर्गभोगः, सद्गतिः *f.*, परमागतिः *f.*, परमपदं, अपवर्गः, सिद्धिः *f.*, मोक्षः.—(Of victory) जयश्रीः.—(Vain-glory) आत्मश्लाघा, दर्पः, गर्व्वः, अहङ्कारः, विकत्था.

To GLORY, *v. n.* (Boast) आत्मानं श्लाघ् (c. 1. श्लाघते -घितुं), दृप् (c. 4. दृप्यति, द्रप्तुं), गर्व्व् (c. 1. गर्व्वति -र्व्वितुं), विकत्थ् (c. 1. -कत्थते -त्थितुं), दम्भं कृ.—(Exult) अत्यन्तं नन्द् (c. 1. नन्दति -न्दितुं) or आनन्द्.

GLORYING, *s.* आत्मश्लाघा, विकत्था, अहङ्कारः, दर्पः, दम्भः, दर्पकरणं.

GLOSS, *s.* (Comment) टीका, भास्यं, भाष्यं, व्याख्या, विवरणं, वार्त्तिकं, टिप्पनी.—(Superficial lustre) बाह्यशोभा, कल्पितशोभा, बाह्यस्निग्धता, बाह्यकान्तिः *f.*, बाह्यरुचिः *f.*, आभा, छविः *f.*

To GLOSS, *v. a.* and *n.* (Explain, write a comment) टीकया व्याख्या (c. 2. -ख्याति -तुं) or व्याकृ or स्पष्टीकृ or व्याहृ (c. 1. -हरति -हर्त्तुं), टीकां लिख् (c. 6. लिखति, लेखितुं), टीकां कृ.—(Give a superficial lustre) बाह्यशोभां दा, बाह्यकान्तिं दा, स्निग्धीकृ, उपरिभागं शुभ् (c. 10. शोभयति -यितुं).

GLOSSARIAL, *a.* शब्दकोषविषयकः -का -कं, परिभाषाप्रकाशकः -का -कं.

GLOSSARIST, GLOSSATOR, GLOSSER, *s.* शब्दकोषलेखकः, शब्दसङ्ग्रहकारी *m.* (न्), कौशिकः, निर्वचनकृत् *m.*

GLOSSARY, *s.* कोषः, शब्दकोषः, शब्दसङ्ग्रहः, शब्दग्रन्थः, शब्दमालं, निर्वचनं, निघण्टुः *m.*, अभिधानं, परिभाषाप्रकाशको ग्रन्थः.

GLOSSINESS, *s.* बाह्यशोभा, बाह्यकान्तिः *f.* बाह्यरुचिः *f.*, स्निग्धता, स्नैग्ध्यं, चिक्कणता, कल्पितशोभा.

GLOSSOGRAPHER, *s.* टीकालेखकः, भाष्यलेखकः, टिप्पनीलेखकः.

GLOSSOGRAPHY, *s.* टीकालेखनं, शब्दकोषलेखनं, शब्दकोषरचनं.

GLOSSY, *a.* स्निग्धः -ग्धा -ग्धं, चिक्कणः -णा -णं, श्लक्ष्णः -क्ष्णा -क्ष्णं, बहिर्भागे शोभनः -ना -नं or रुचिरः -रा -रं or तेजितः -ता -तं or परिष्कृतः -ता -तं.

GLOTTIS, *s.* उपजिह्वा, प्रतिजिह्वा, अलिजिह्वा.

GLOVE, *s.* हस्ताच्छादनं, हस्तवारणं, हस्तपरिधानं, पाणिवस्त्रं, पाणिवेष्टनं, करवेष्टनं, हस्ताभरणं.

To GLOVE, *v. a.* हस्तं पूर्व्वोक्तवस्त्रेण आछद् (c. 10. -छादयति -यितुं).

GLOVER, *s.* हस्ताच्छादनकृत् *m.*, पाणिवस्त्रविक्रयी *m.* (न्).

To GLOW, *v. n.* दीप् (c. 4. दीप्यते, दीपितुं) or in freq. (देदीप्यते) ज्वल् (c. 1. ज्वलति -लितुं), दह् (c. 4. दह्यति, दग्धुं or in pass. दह्यते), तप् in pass. (तप्यते or c. 1. तपति, तप्तुं), सन्तप्, प्रतप्, अभितप्.—(Become red) अरुणीभू, रक्तीभू, रञ्ज् in pass. (रज्यते), संरञ्ज्; 'the east glows,' प्राची संरज्यते.

GLOW, *s.* तापः, उत्तापः, दीप्तिः *f.*, तेजस्, द्युतिः *f.*, दाहः, चण्डता, उष्णता, उज्ज्वलता.—(Redness of colour) रक्तता, अरुणिमा *m.* (न्), रागः; 'glow in the cheek,' कपोलरागः, मुखरागः.

GLOWING, *part.* or *a.* दीप्तः -प्ता -प्तं, दीप्यमानः -ना -नं, देदीप्यमानः -ना -नं, तप्तः -प्ता -प्तं, सन्तप्तः -प्ता -प्तं, उपतप्तः -प्ता -प्तं, अभितप्तः -प्ता -प्तं, उत्तप्तः -प्ता -प्तं, तापी -पिनी -पि (न्), तैजसः -सी -सं, चण्डः -ण्डा -ण्डं, प्रचण्डः -ण्डा -ण्डं, उज्ज्वलः -ला -लं, ज्वाली -लिनी -लि (न्), दह्यमानः -ना -नं; 'glowing with anger,' रोषप्रदीपितः -ता -तं, कोपज्वलितः -ता -तं; 'having glowing cheeks,' रक्तकपोलः -ला -लं; 'having glowing eyes,' दीप्ताक्षः -क्षा -क्षं.

GLOWINGLY, *adv.* तापेन, उत्तापेन, तेजसा, दीप्त्या, प्रचण्डं, उष्णं.

GLOW-WORM, *s.* प्रभाकृमिः *m.*, प्रभाकीटः, द्युतिमत्कीटः, खद्योतः.

To GLOZE, *v. a.* लल् (c. 10. लालयति -यितुं), सान्त्व् (c. 10. सान्त्वयति -यितुं).

GLOZE, *s.* लालनं, सान्त्वनं -ना, सान्त्ववाक्यं, चाटुः *m.*, मधुरवाक्यं.

GLOZER, *s.* लाली *m.* (न्), सान्त्ववादः, चाटुकारः, चाटुवादी *m.* (न्).

GLUE, *s.* लेपः, विलेपः, संलग्नीकरणार्थम् अतिश्यानद्रव्यं, सुधा.

To GLUE, *v. a.* पूर्व्वोक्तलेपद्वारेण संलग्नीकृ or संयुज् (c. 7. -युनक्ति -योक्तुं) or संश्लिष् (c. 10. -श्लेषयति -यितुं).

GLUED, *p. p.* संलग्नीकृतः -ता -तं, संयुक्तः -क्ता -क्तं, संश्लिष्टः -ष्टा -ष्टं.

GLUEY, *a.* श्यानः -ना -नं, सान्द्रः -न्द्रा -न्द्रं, चिक्कणः -णा -णं.

GLUM, *a.* वक्रभावः -वा -वं, सदावक्रः -क्रा -क्रं, प्रतीपः -पा -पं.

To GLUT, *v. a.* (Satiate) अत्यन्तं तृप् (c. 10. तर्पयति -यितुं) or सन्तृप् or पॄ in caus. (पूरयति -यितुं) or परिपॄ, अतितृप्तिं or अतिसौहित्यं जन् (c. 10. जनयति -यितुं).—(Swallow, gorge) ग्रस् (c. 1. ग्रसते -सितुं), उपग्रस्, गॄ (c. 6. गिरति, गरितुं -रीतुं).

GLUT, *s.* (More than enough) आतिरेक्यं, अतिरिक्तता, आधिक्यं, आतिशय्यं, उत्सेकः, उद्रेकः, उद्ग्रेकः.—(Too great plenty) अतिबाहुल्यं.—(Satiety) अतितृप्तिः *f.*, अतिसौहित्यं.

To GLUTINATE, *v. a.* लेपद्वारेण संलग्नीकृ or संयुज् (c. 7. -युनक्ति -योक्तुं).

GLUTINATION, *s.* लेपादिना संलग्नीकरणं or संयोजनं or संश्लेषणं.

GLUTINOUS, *a.* श्यानः -ना -नं, चिक्कणः -णा -णं, सान्द्रः -न्द्रा -न्द्रं, स्निग्धः -ग्धा -ग्धं, संलग्नशीलः -ला -लं, अनुलग्नशीलः -ला -लं.

GLUTINOUSNESS, *s.* श्यानता, सान्द्रता, स्निग्धता, स्नैग्ध्यं, संलग्नशीलता.

GLUTTED, *p. p.* अतितृप्तः -प्ता -प्तं, अतिपूरितः -ता -तं, अतिपूर्णः -र्णा -र्णं.

GLUTTON, *s.* अत्याहारी *m.* (न्), अपरिमिताहारी *m.*, अत्यन्तभोजी *m.* (न्), कुक्षिम्भरिः *m.*, उदरम्भरिः *m.*, औदरिकः, अतिलोभी *m.* (न्), गृध्रजनः, सर्व्वभुक् *m.*, वह्निः *m.*

To GLUTTONIZE, *v. n.* अत्यन्तं भुज् (c. 7. भुंक्ते, भोक्तुं), अत्याहारं कृ, गृध् (c. 4. गृध्यति, गर्धितुं), अतिभोजनं कृ.

GLUTTONOUS, GLUTTONISH, *a.* अत्याहारी -रिणी -रि (न्), बह्वाशी -शिनी -शि (न्), अतिभोजी -जिनी -जि (न्), अतिबुभुक्षुः -क्षुः -क्षु, बहुभोक्ता -क्त्री -क्तृ (क्तृ), अपरिमिताहारी &c., भक्षकः -का -कं, घस्मरः -रा -रं, अद्मरः -रा -रं, प्रघसः -सा -सं, कुक्षिम्भरिः -रिः -रि, उदरम्भरिः -रिः -रि, देहम्भरः -री -रं, औदरिकः -की -कं, लोलुभः -भा -भं, गृध्रः -ध्रा -ध्रं, गर्धी -र्धिनी -र्धि (न्), लोलः -ला -लं, आद्यूनः -ना -नं.

GLUTTONOUSLY, *adv.* अत्याहारेण, गृध्रजनवत्, औदरिकवत्, सातिभोजनं.

GLUTTONY, *s.* अत्याहारः, अतिभोजनं, अतिबुभुक्षा, अधिकभोजनं, अपरिमिताहारः, घस्मरता, गृध्रता, लोलता, लौल्यं, अतृप्तिः *f.*, उदरभरणं.

GLYPH, *s.* गृहनिर्म्माणे स्तम्भोपरि रेखाकारेण तक्षितो ऽलङ्कारः.

GLYPTOGRAPHY, *s.* रत्नोपरि तक्षणशिल्पं or तक्षणकर्म्म *n.* (न्) or लिखनं.

To GNARL, *v. n.* गर्ज् (c. 1. गर्जति -र्जितुं), रै (c. 1. रायति, रातुं), घुर्घुरां कृ.

GNARLED, *a.* ग्रन्थिलः -ला -लं, बहुग्रन्थिः -न्थिः -न्थि, पर्व्वविशिष्टः -ष्टा -ष्टं.

To GNASH, *v. a.* and *n.* क्ष्विड् or क्ष्विद् (c. 1. क्ष्वेडति, क्ष्वेदति -डितुं -दितुं), दन्तान् दन्तैर् घृष् (c. 1. घर्षति -र्षितुं) or निष्पिष् (c. 7. -पिनष्टि -पेष्टुं), सन्दंश (c. 1. -दशति -दंष्टुं), कटकट (nom. कटकटापयति -यितुं), क्ष्वेडनं कृ, दन्तघर्षणं कृ.

GNASHING, *s.* दन्तघर्षणं, क्ष्वेडनं, क्ष्वेडितं, कटकटशब्दः.

GNAT, *s.* मशकः, मसकः, सूक्ष्ममक्षिका, दंशकः; भम्भरालिका, सूचिवदनः, रणरणः, प्राचिका, रात्रिजागरदः.

GNAT-SNAPPER, *s.* मशकखादकः पक्षिभेदः, मशकनाशकः.

To GNAW, *v. a.* and *n.* चर्व् (c. 1. चर्वति -र्वितुं, c. 10. चर्वयति -यितुं), दंश् (c. 1. दशति, दंष्टुं), विदंश, सन्दंश, सम्मुखदन्तैर् अल्पाल्पं खाद् (c. 1. खादति -दितुं) or अश् (c. 9. अश्नाति, अशितुं) or भक्ष् (c. 10. भक्षयति -यितुं), क्रमशः खाद् or चर्वणं कृ or कर्त्तनं कृ.

GNAWED, *p. p.* चर्वितः -ता -तं, सम्मुखदन्तैः क्रमशः खादितः -ता -तं, विदश्यमानः -ना -नं, गलितः -ता -तं.

GNAWER, *s.* चर्वणकारी *m.* (न्), दंशनकृत् *m.*, सम्मुखदन्तैः खादकः.

GNAWING, *s.* चर्वणं, दंशनं, सम्मुखदन्तैर् अल्पाल्पखादनं or कर्त्तनं.

GNOME, *s.* पृथिव्यभ्यन्तरे वासी खन्याकरादिरक्षको भूतविशेषः.

GNOMON, *s.* (Of a dial) कीलः, मयूखः, शङ्कुः *m.*, नरः, ना *m.* (नृ).

GNOMONIC, *s.* घटीकीलनिर्म्माणसम्बन्धी -न्धिनी -न्धि (न्).

GNOMONICS, *s.* घटीकीलनिर्म्माणविद्या, कालमापकमण्डलनिर्म्माणशिल्पं, मुहूर्त्तदण्डादिपरिमापकमण्डलसम्बन्धिनी विद्या.

GNOSTIC, *s.* ग्नास्तिकसंज्ञकः प्राचीननास्तिकविशेषः.

To GO, *v. n.* गम् (c. 1. गच्छति, गन्तुं), या (c. 2. याति -तुं), इ (c. 2. एति -तुं), सृ (c. 1. सरति, सर्त्तुं), चर् (c. 1. चरति -रितुं), पद् (c. 4. पद्यते, पत्तुं), व्रज् (c. 1. व्रजति -जितुं), ऋ (c. 1. ऋच्छति, अर्त्तुं), चल् (c. 1. चलति -लितुं), गा (used only in 3d pret. अगात्), इङ्ग् (c. 1. इङ्गति -ङ्गितुं), अंह् (c. 1. अंहते -हितुं).—(Walk) क्रम् (c. 1. क्रामति, c. 4. क्राम्यति, क्रमितुं), पादाभ्यां गम् or चर्.—(Flow) स्रु (c. 1. स्रवति, स्रोतुं), स्यन्द् (c. 1. स्यन्दते -न्दितुं), री (c. 4. रीयते, रेतुं).—(Glide along) सृप् (c. 1. सर्पति, सर्प्तुं).—(Pass current, circulate) प्रचल्, प्रचर्.—(Fare) वृत् (c. 1. वर्त्तते -र्त्तितुं), स्था (c. 1. तिष्ठति, स्थातुं); 'How goes it with you?' कीदृशी स्थितिर् भवतः.—(Be about to do) expressed by काम with the infin.; as, 'What were you going to say?' किम् असि वक्तुकामः; 'What are you going to do?' किं कर्त्तुकामो ऽसि, or by the desid. form, as किं विवक्षसि, किं चिकीर्षसि.—(Go about, attempt) यत् (c. 1. यतते -तितुं), उद्यम् (c. 1. -यच्छति -यन्तुं), व्यवसो (c. 4. -स्यति -सातुं), उपक्रम्.—(Go against) आक्रम्, अभिक्रम्, अभिप्रया.—(Go aside) पार्श्वे चल्.—(Go astray) भ्रम् (c. 4. भ्राम्यति, भ्रमितुं), विभ्रम्, सत्पथात् च्यु (c. 1. च्यवते, च्योतुं) or भ्रंश् (c. 4. भ्रश्यति, भ्रंशितुं), उत्क्रम्, व्युत्क्रम्, व्यभिचर्, उन्मार्गेण गम्.—(Go away) अपगम्, व्यपगम्, गम्, अपया, व्यपया, प्रया, अपे (c. 2. अपैति -तुं, rt. इ), व्यपे, अपसृ, अपक्रम्, व्यपक्रम्, अपसृप्, चल्, प्रस्था, विप्रस्था, सम्प्रस्था.—(Go between) अन्तश्चर्, अन्तरि, अन्तर्वृत्, मध्ये वृत्, मध्ये स्था, मध्यस्थः -स्था -स्थं भू, मध्यवर्त्ती -र्त्तिनी -र्त्ति भू.—(Go by) अतिक्रम्, अती, व्यती, अतिवृत्; 'to go by sea,' समुद्रेण या.—(Go down) अधो गम्, अधो या, अवया, अवरुह् (c. 1. -रोहति -रोढुं).—(Go for nothing) तृणप्रायः -या -यं भू.—(Go forth) निर्गम्, निर्या, विनिर्या, निःसृ, विनिःसृ, निष्क्रम्, निरि, निश्चर्.—(Go forward) प्रगम्, अग्रे गम्, पुरो गम्, प्रया, प्रसृ, प्रस्था.—(Go in) विश् (c. 6. विशति, वेष्टुं), निविश्, प्रविश्, आविश्, आगम्, अन्तर्गम्, आया, उपस्था.—(Go in and out) गमनागमनं कृ.—(Go off, depart) अपगम्, अपया.—(Go off, die) प्रे, परे, अती, देहाद् अपगम्, लोकान्तरं गम्.—(Go off, explode) अन्तरग्निबलेन विभिद् in pass. (-भिद्यते), विदॄ in pass. (-दीर्य्यते).—(Go on, proceed) प्रगम्, प्रया, प्रसृ, प्रसृप्, प्रवृत्; 'the work goes on,' प्रसर्पति कर्म्म; 'the laugh goes on,' प्रवर्त्तते हासः.—(Go out, issue) निर्गम्, विनिर्गम्, निःसृ, विनिःसृ, निर्या, विनिर्या, अभिनिर्या, निष्क्रम्, विनिष्क्रम्, अभिनिष्क्रम्, निश्चर्, विनिश्चर्, निरि, वहिर्गम्.—(Go out, as a fire or light) निर्वा (c. 4. -वायति -वातुं) or in caus. pass. (-वाप्यते), शम् (c. 4. शाम्यति, शमितुं).—(Go over, read) अधी (c. 2. अधीते, rt. इ), अधिगम्, अधिगा used only in 3d pret. átm. (अध्यगीष्ट).—(Go over from one party to another) स्वपक्षं त्यक्त्वा परपक्षम् आश्रि (c. 1. -श्रयति -यितुं), स्वधर्म्माद् भ्रंश् (c. 4. भ्रश्यति, भ्रंशितुं).—(Go through, execute) निर्वह् (c. 10. -वाहयति -यितुं), प्रवृत् in caus. (-वर्त्तयति -यितुं), साध् (c. 10. साधयति -यितुं).—(Go through, undergo) उपगम्, उपागम्, सह् (c. 1. सहते, सोढुं), अनुभू.—(Go through, penetrate) प्रविश्, निविश्, विश्, व्यध् (c. 4. विध्यति, व्यद्धुं), निर्भिद् (c. 7. -भिनत्ति -भेत्तुं).—(Go to, go towards) आगम्, उपगम्, उपागम्, समुपगम्, अधिगम्, अभिगम्, आया, अभिया, उपया, उपाया, प्रत्याया, समाया, समुपया, उपस्था, अभिसृ, आवृत्, अभिवृत्, प्रतिवृत्, उपावृत्, अभ्यावृत्, आव्रज्, प्रतिव्रज्, अभिपद्, समापद्, प्रतिपद्, समुपपद्, ए (c. 2. ऐति -तुं, rt. इ with आ), अभ्ये, उपे, अभी, (अभ्येति), प्रती, आक्रम्, उपक्रम्, अभ्यृ.—(Go up) ऊर्द्ध्वं गम्, उदि (c. 1. -अयति -एतुं), उच्चैर् व्रज्.—(Go with) अनुया, समनुया, अन्वि, सह गम् or चर्, सहायीभू.—(Go on horseback) अश्ववाहनेन व्रज्.—(Go on foot) पादाभ्यां गम्.—(Go to bed) शय्यां गम्.—(Go to law) विवद् (c. 1. -वदते -दितुं).—(Go to sea) नौकाम् आरुह्.—(Go ashore) नौकायास् उत्तॄ (c. 1. -तरति -रितुं -रीतुं) or अवरुह्.

GO-BETWEEN, *s.* मध्यस्थः, मध्यवर्त्ती *m.* (न्), सन्धिजीवकः.—(Female) दूती, सञ्चारिका, सुरतताली.

GO-BY, *s.* पलायनं, अपक्रमः, निर्गमः, अपयानं, व्यपदेशः.

GO TO, *interj.* अपेहि, अपसर, एहि, यातु, धिक्.

GO-CART, *s.* शकटिका, बालकानां पादचारशिक्षार्थं चक्रयानविशेषः, क्रीडाशकटः.

GOAD, *s.* तोदनं, तोत्त्रं, प्रतोदः, अङ्कुशः, प्राजनं, सृणिः *f.*, प्रवयणं.

To GOAD, *v. a.* प्रतोदेन तुद् (c. 6. तुदति, तोत्तुं) or वितुद् or आतुद्.—(Incite) प्रेर् (c. 10. ईरयति -यितुं), प्रचुद् (c. 10. -चोदयति -यितुं), प्रणुद् (c. 6. -णुदति -णोत्तुं), प्रवृत् (c. 10. -वर्त्तयति -यितुं), प्रोत्सह् (c. 10. -साहयति -यितुं), उत्तिज् (c. 10. -तेजयति -यितुं).

GOADED, *p. p.* प्रतुन्नः -न्ना -न्नं, प्रेरितः -ता -तं, प्रोत्साहितः -ता -तं.

GOAL, *s.* अग्रं, अग्रभूमिः *f.*, अग्रस्थानं.—(Final end) अभिप्रायः, शेषाभिप्रायः, आशयः, उद्देशः, अर्थः, अन्तः, उत्तरं, फलमुत्तरं, परिणामः.

GOAT, *s.* छागः -गलः, छगलः, अजः, वस्तः, स्तुनकः, पर्णभोजनः, लम्बकर्णः, पयस्वलः, शिवाप्रियः, देवानाम्प्रियः; 'wild-goat,' वनाजः, वनछागः, अरण्यछागः; 'she-goat,' छागी, अजा; 'excrescence on a goat's neck,' मणिः *m. f.*; 'flock of goats,' आजकं; 'relating to a goat,' वास्तः -स्ती -स्तं.

GOAT-HERD, *s.* जाबालः, अजजीविकः, अजाजीवः -वी *m.* (न्), अजापालकः, छागपालकः, अजपः -पालकः, छागपोषकः.

GOATISH, *a.* अजवत् कामुकः -का -कं, अजगन्धः -न्धा -न्धं, छागगन्धः &c.

GOATISHLY, *adv.* अजावत्, छागवत्, कामुकवत्, कामुकं.

GOATSKIN, *s.* अजचर्म्म *n.* (न्), छागचर्म्म *n.*, छागाजिनं, अजाजिनं.

GOB, *s.* अल्पिका, अल्पपिण्डः, अल्पग्रासः, मुखपूरणं, कवलः.

To GOBBLE, *v. a.* ग्रस् (c. 1. ग्रसते -सितुं), उपग्रस्, गृध्रवत् सत्वरं भक्ष् (c. 10. भक्षयति -यितुं) or खाद् (c. 1. खादति -दितुं), गॄ (c. 6. गिरति, गरितुं -रीतुं).

To GOBBLE, *v. n.* शीघ्रनिगरणशब्दं कृ, दीर्घकण्ठपक्षिवत् शब्दं कृ.

GOBBLER, *s.* शीघ्रभोजी *m.* (न्), शीघ्राशी *m.* (न्), बह्वाशी *m.*, भक्षकः, घस्मरः.

GOBLET, *s.* कांस्यं, कंसः -सं, कंशः -शं, पानभाजनं, पानपात्रं; 'relating to one,' कंसीयः -या -यं.

GOBLIN, *s.* वेतालः, रात्रिचरः, रात्रिञ्चरः, रजनीचरः, क्षणदाचरः, नक्तञ्चरः -चारी *m.* (न्), निशाटः, भूतः, राक्षसः, पिशाचः, असुरः, प्रेतः, अपदेवता, क्रव्याद् *m.*, यक्षादि *m.*, विधुरः, कर्बुरः, कौणपः.

GOD, *s.* (The Supreme Being) ईश्वरः, परमेश्वरः, परेश्वरः, परमात्मा *m.* (न्).—(A god) देवः -वता, सुरः, अमरः, विबुधः, अनिमिषः, अजरः, चिरायुः *m.* (स्), सुचिरायुः *m.* (स्), भगवान् *m.* (त्).—(The Creator) सर्व्वस्रष्टा *m.* (ष्टृ), धाता *m.* (तृ), विधाता *m.*, जगत्कर्त्ता *m.* (र्तृ), विश्वसृक् *m.*, भूतादिः *m.*, सात् *n.*—(God of gods) ईश्वरेश्वरः; 'city god,' नगरदेवता.—(Self-existent) स्वयम्भूः *m.*

GODAVERÍ, *s.* (River) गोदावरी, तपनी, तपनात्मजा.

GOD-CHILD, *s.* धर्म्मपुत्रः -त्री, धर्म्मसुतः -ता.

GOD-DAUGHTER, *s.* धर्म्मपुत्री, धर्म्मसुता, जलसंस्कारकाले खीष्टीयधर्म्मशिक्षणार्थं स्वीकृता पुत्री.

GODDESS, *s.* देवी, सुरी, अमरा -री, अजरा -री, देवपत्नी, देवाङ्गना, भगवती.

GODFATHER, *s.* धर्म्मपिता *m.* (तृ), धर्म्मप्रतिभूः *m.*, जलसंस्कारकाले खीष्टीयधर्म्मशिक्षणाय प्रतिजानीते यो बालस्य कृत्रिमपिता.

GODHEAD, *s.* देवत्वं -ता, ईश्वरत्वं -ता, देवभूयं, भगवत्त्वं, ब्रह्मत्वं, ब्रह्मभूयं.

GODLESS, *a.* अनीश्वरः -रा -रं, अनीश्वरवादी -दिनी -दि (न्), नास्तिकः, अनीश्वरोचितः -ता -तं.—(Impious) निर्धर्म्मः -र्म्मा -र्म्मं, अधार्म्मिकः -की -कं, अतिदुष्टः -ष्टा -ष्टं.

GODLESSLY, *adv.* नास्तिकवत्, पापण्डवत्, अतिदुष्टं, धर्म्मव्यतिरेकेण.

GODLESSNESS, *s.* अनीश्वरत्वं, नास्तिकत्वं, निर्धर्म्मता, अतिदुष्टता.

GODLIKE, *a.* देवतुल्यः -ल्या -ल्यं, देवोपमः -मा -मं, देवरूपी -पिणी -पि (न्), दिव्यः -व्या -व्यं, देवार्हः -र्हा -र्हं, ईश्वरीयः -या -यं, ईश्वरमूर्त्तिः -र्त्तिः -र्त्ति.

GODLINESS, *s.* ईश्वरसेवा -वनं, ईश्वरभक्तिः *f.*, देवभक्तिः *f.*, ईश्वरश्रद्धा, ईश्वरपूजा, धर्म्मत्वं, धार्म्मिकता, धर्म्मसेवा, ब्रह्मण्यता, पुण्यशीलता.

GODLY, *a.* ईश्वरसेवी -विनी -वि (न्), ईश्वरभक्तः -क्ता -क्तं, ईश्वरपूजकः -का -कं, देवपूजकः -का -कं, पुण्यशीलः -ला -लं, पुण्यात्मा -त्मा -त्म (न्), भजनशीलः -ला -लं, भक्तिमान् -मती -मत् (त्), धर्म्मी -र्म्मिणी -र्म्मि (न्), धार्म्मिकः -की -कं, धर्म्मचारी -रिणी -रि (न्), ब्रह्मण्यः -ण्या -ण्यं.

GODLY, *adv.* ईश्वरभक्तवत्, देवपूजकवत्, धार्म्मिकवत्, पुण्यं.

GODMOTHER, *s.* धर्म्ममाता *f.* (तृ), जलसंस्कारकाले खीष्टीयधर्म्मशिक्षणाय प्रतिजानीते या बालकस्य कृत्रिममाता.

GODSEND, *s.* देवदत्तं, ईश्वरदत्तं, लक्ष्मीदत्तं, श्रीदत्तं, सौभाग्यं.

GODSHIP, *s.* ईश्वरत्वं -ता, देवत्वं -ता, देवभावः, देवभूयं, भगवत्त्वं.

GODSON, *s.* धर्म्मपुत्रः, धर्म्मसुतः, जलसंस्कारकाले खीष्टीयधर्म्मशिक्षणार्थं स्वीकृतः पुत्रः.

GODWIT, *s.* दीर्घमुखः पक्षिभेदः, दीर्घचञ्चुः *m.*, दीर्घजङ्घः, दीर्घपाद् *m.*

GOER, *s.* गामी *m.* (न्), गन्ता *m.* (न्तृ), यायी *m.* (न्), सरः, चारी *m.* (न्), क्रमिता *m.* (तृ), चलः, गमनकारी *m.* (न्); 'a quick goer,' अविलम्बितक्रमः, द्रुतक्रमः.

To GOGGLE, *v. n.* चक्षुषी इतस्ततो लुल् (c. 1. लोलति -लितुं, c. 10. लोलयति -यितुं), विवृताक्षः -क्षा -क्षं भू, तिर्य्यग्दृष्टिः -ष्टिः -ष्टि भू.

GOGGLE-EYE, *s.* लोलनयनं, लोलनेत्रं, फुल्लनयनं, विवृतचक्षुस् *n.*

GOGGLE-EYED, *a.* लोलनयनः -ना -नं, लोलाक्षिः -क्षिः -क्षि, उत्फुल्लनयनः -ना -नं, फुल्ललोचनः -ना -नं, तिर्य्यग्दृष्टिः -ष्टिः -ष्टि, वक्रदृष्टिः -ष्टिः -ष्टि, उन्नेत्रः -त्रा -त्रं, उद्नयनः -ना -नं

GOING, *part.* चरन् -रन्ती -रत् (त्), चलन् -लन्ती -लत् (त्), क्रामन् -मन्ती -मत् (त्), सरन् -रन्ती -रत् (त्), गामी -मिनी -मि (न्), सरः -रा -रं, सरणः -णा -णं, चरः -रा -रं; 'going in a straight line,' सरलयायी -यिनी -यि (न्).

GOING, *s.* गमः -मनं, सरणं, चरणं, चारः, चलनं, व्रजनं, गतिः *f.*, गतं, अयनं, क्रमः -मणं; 'going away,' अपगमः, व्यपगमः, उपयानं, अपसरणं, अपायः, प्रस्थानं; 'going out,' निष्क्रमः -मणं, निष्क्रान्तिः *f.*, निर्गमः, निर्याणं, बहिर्गमनं; 'going and coming,' गमागमः, गमनागमनं, गतागतं, यातायातं.

GOITRE, *s.* गडुः *m.*, गलिडः *m.*; 'having it,' गडुकण्ठः -ण्ठी -ण्ठं.

GOITROUS, *a.* गडुपीडितः -ता -तं, गडुकण्ठः -ण्ठी -ण्ठं.

GOLD, *s.* सुवर्णं, स्वर्णं, कनकं, काञ्चनं, हिरण्यं, हेम *n.* (न्), हेमं, रुक्मं, रुग्मं, भर्म *n.* (न्), भर्मं, जातरूपं, जाम्बूनदं, शातकुम्भं, शतकुम्भः, शातकौम्भं, चामीकरं, निष्कं, हाटकं, हिरणं, तपनीयं, महारजतं, कलधौतं, कलधूतं, कार्त्तस्वरं, अष्टापदः -दं, कर्बुरं, कर्व्वूरं, गाङ्गेयं, गौरं, दीप्तं, भास्करं, जासवं, तेजस्, शतखाण्डं, महाधातुः *m.*, सौमेरुकं, लोहोत्तमं, पिञ्जानं, सुरार्हं, दाक्षायणं, मानसिः *m.*, पुरटं, पुरुटं, वह्निबीजं, अकुप्यं, मनुसकं; 'pure gold,' कुमारं; 'virgin gold,' पिञ्जरं; 'false gold,' कूटस्वर्णं; 'gold for ornaments,' शृङ्गिकनकं; 'a heap of gold,' काञ्चनचयः; 'a piece of gold,' कनकभङ्गः; 'a gold coin,' सुवर्णमुद्रा; 'a weight of gold,' कनकपलः, सुवर्णः -र्णं.

GOLD, *a.* सुवर्ण or स्वर्ण or कनक or काञ्चन &c. in comp.; as, 'a gold bracelet,' सुवर्णकङ्कणं; 'gold stick,' कनकदण्डः; 'gold-mine,' कनकस्थली, काञ्चनकन्दरः; 'gold necklace,' हेमसूत्रकं, कनकसूत्रं. *See* GOLDEN.

GOLD-BEATER, *s.* स्वर्णपत्रकारः -कृत्, सुवर्णकारविशेषो यो मुद्गरादिना सुवर्णम् अतिसूक्ष्मीकरोति or अतिशयेन तनूकरोति or उद्वर्त्तयति.

GOLD-DRAWER, *s.* सुवर्णोद्वर्त्तनकारी *m.* (न्), कनकोद्वर्त्तनकृत् *m.*

GOLD-DUST, *s.* कनकपरागः, काञ्चनभूः *f.*, कनकरेणुः *m.*

GOLDEN, *a.* सौवर्णः -र्णी -र्णं, स्वर्णमयः -यी -यं, स्वर्णनिर्म्मितः -ता -तं, स्वर्णिकः -का -कं, सुवर्णवान् -वती -वत् (त्), काञ्चनः -नी -नं, काञ्चनमयः -यी -यं, कनकमयः -यी -यं, सुवर्णकृतः -ता -तं, रुक्मवान् -वती -वत् (त्), तापनीयः -यी -यं; 'golden ornament,' कनकभूषणं. *See* GOLD, *a.*

GOLDFINCH, *s.* कनकवर्णपक्षयुक्तो मधुररुतविशिष्टः क्षुद्रपक्षी *m.* (न्).

GOLD-FISH, *s.* चीनदेशजः कनकवर्णो मत्स्यभेदः.

GOLD-LEAF, *s.* स्वर्णपत्रं, कनकपत्रं, अष्टापदपत्रं, पत्रं.

GOLDSMITH, *s.* स्वर्णकारः, सुवर्णकारः, हेमकारः, रुक्मकारकः, नाडिन्धमः, हेमलः, कलादः, कणादः, गौप्तिकः, सुवर्णस्य विकारान्तरकृत् *m.*

GOLD-THREAD, *s.* कनकसूत्रं, हेमसूत्रं, सुवर्णतन्तुः *m.*

GOLF, *s.* कन्दुकक्रीडा, कन्दुकलीला, गुलिकाक्रीडा.

GONDOLA, *s.* वेनिश्नगरवासिभिः प्रयुक्तो लघुनौकाविशेषः.

GONDOLIER, *s.* पूर्व्वोक्तनौकावाहकः, पूर्व्वोक्तनौकादण्डधरः.

GONE, *p. p.* गतः -ता -तं, यातः -ता -तं, चलितः -ता -तं, सृतः -ता -तं, चरितः -ता -तं, व्रजितः -ता -तं, इतः -ता -तं, पन्नः -न्ना -न्नं; 'gone away,' अपगतः -ता -तं, व्यपगतः -ता -तं; 'gone out,' निर्गतः -ता

-तं, निष्क्रान्तः -न्ता -न्तं, बहिर्गतः -ता -तं.—(Past) वृत्तः -त्ता -त्तं, भूतः -ता -तं, अतीतः -ता -तं, अतिक्रान्तः -न्ता -न्तं.

GONFALON, GONFANON, *s.* पताका, ध्वजः, केतुः *m.*, वैजयन्ती.

GONG, *s.* कांस्यं, घनं, गभीरिका.

GONIOMETER, *s.* कोणपरिमापकयन्त्रं, अस्रमापनयन्त्रं.

GONORRHEA, *s.* रक्तपीरकः, रक्तपारकः, धातुक्षरणं, मूत्रमार्गरोगः.

GOOD, *a.* (Not bad, excellent) साधुः -धुः -ध्वी -धु, भद्रः -द्रा -द्रं, उत्तमः -मा -मं, प्रशस्तः -स्ता -स्तं, प्रशस्यः -स्या -स्यं, शस्तः -स्ता -स्तं, शस्यः -स्या -स्यं, शिष्टः -ष्टा -ष्टं, शुभः -भा -भं, कुशलः -ला -लं, कल्याणः -णा -णं, सन् सती सत् (त्), सत्तमः -मा -मं, श्रेष्ठः -ष्ठा -ष्ठं, सारः -रा -रं, सारवान् -वती -वत् (त्), आर्य्यः -र्य्या -र्य्यं, वरः -रा -रं, निर्दोषः -षा -षं, अदुष्टः -ष्टा -ष्टं, often expressed by सु prefixed; as, 'a good action,' सुक्रिया; 'a good man,' साधुजनः, सज्जनः; 'a good road,' सुपथः, सन्मार्गः.—(Virtuous) धार्म्मिकः -की -कं, सच्चरितः -ता -तं, सदाचारः -रा -रं, साधुवृत्तः -त्ता -त्तं, आर्य्यवृत्तः -त्ता -त्तं, शुभाचारः -रा -रं, सुकर्म्मा -र्म्मा -र्म्म (न्), सुकृती -तिनी -ति (न्), सुकृत् *m. f. n.*, सुचरितः -ता -तं, कुशली -लिनी -लि (न्), पुण्यः -ण्या -ण्यं, पुण्यकर्म्मा -र्म्मा -र्म्म (न्), पुण्यशीलः -ला -लं, पुण्यात्मा -त्मा -त्म (न्), वृत्तवान् -वती -वत् (त्).—(Suitable, fit) योग्यः -ग्या -ग्यं, युक्तः -क्ता -क्तं, उपयुक्तः -क्ता -क्तं, उचितः -ता -तं, समुचितः -ता -तं, हितः -ता -तं, सुहितः -ता -तं, sometimes expressed by the fut. pass. part.; as, 'good to eat,' खाद्यः -द्या -द्यं, खादनीयः -या -यं.—(Wholesome) पथ्यः -थ्या -थ्यं.—(Useful) उपयोगी -गिनी -गि (न्), सोपकारः -रा -रं.—(Kind) हितः -ता -तं, हितकामः -मा -मं, सुजनः -ना -नं, प्रियङ्करः -रा -रं, प्रियकारः -रा -रं, उपकारकः -का -कं.—(Tending to promote) उत्पादकः -का -कं.—(Sound, undamaged) अक्षतः -ता -तं, अदूषितः -ता -तं.—(Entire, complete) सम्पूर्णः -र्णा -र्णं, सकलः -ला -लं, कृत्स्नः -त्स्ना -त्स्नं.—(Considerable, great) बहुः -ह्वी -हु, अनल्पः -ल्पा -ल्पं, महान् -हती -हत् (त्), भूरिः -रिः -रि, प्रचुरः -रा -रं, सु or अति prefixed; as, 'a good deal vexed,' सुदुःखितः -ता -तं, अतिदुःखितः -ता -तं; 'a good distance,' सुदूरं; 'a good while ago,' सुदीर्घकाले गते.—(Valid) धर्म्यः -र्म्या -र्म्यं, अविशुद्धः -द्धा -द्धं. 'Good quality,' गुणः; 'endowed with good qualities,' गुणी -णिनी -णि (न्), सद्गुणः -णा -णं; 'good wishes,' कल्याणवचनं, आशीर्वचनं; 'good and bad,' शुभाशुभः -भा -भं, हिताहितः -ता -तं, सारासारः -रा -रं; 'beloved by the good,' आर्य्यजुष्टः -ष्टा -ष्टं; 'to make good,' सम्पद् (c. 10. -पादयति -यितुं), सम्पॄ (c. 10. -पूरयति -यितुं), साध् (c. 10. साधयति -यितुं); 'make good a promise,' प्रतिज्ञाम् अपवृज् (c. 10. -वर्जयति -यितुं); 'make good a debt,' ऋणं शुध् (c. 10. शोधयति -यितुं) or अपाकृ; 'a good fellow,' भद्रः; 'in good time,' उपयुक्तकाले.

GOOD, *s.* (Benefit, welfare) हितं, श्रेयस् *n.*, भद्रं, शुभं, कल्याणं, कुशलं, क्षेमं, मङ्गलं, भूतिः *f.*; 'for the good of the world,' लोकहिताय, भूतये भुवः; 'good and evil,' हिताहितं, शुभाशुभं, भद्राभद्रं, मङ्गलामङ्गलं; 'good and bad,' सारासारं.—(Utility) उपयोगः, अर्थः, फलं, लाभः.—(Virtue) पुण्यं, सुकृतं, सुचरितं, साधुवृत्तं, धर्म्मः; 'to do good,' हितं कृ, क्षेमं कृ, उपकृ.

GOOD, *adv.* सु prefixed, सुष्ठु; 'as good as,' समं; 'this is as good as a sixteenth part,' एतत् षोडशांशेन समं.

GOOD, *interj.* भद्रं, वार्डं, कामं, भवतु, अस्तु, एवमस्तु, तथेति.

GOOD-BREEDING, *s.* सभ्यता, विनयः, सुविनयः, सुशीलता; 'a man of good breeding,' सुविनीतः, सुशीलः.

GOOD-CONDITIONED, *a.* सुस्थः -स्था -स्थं, सुस्थितः -ता -तं, सुवृत्तः -त्ता -त्तं.

GOOD-FELLOW, *s.* भद्रः, भद्रजनः, साधुजनः, सहपायी *m.* (न्), रसिकजनः.

GOOD-FELLOWSHIP, *s.* उत्सवकारिणां संसर्गः, सुसङ्गः, सुसाहित्यं, सुमैत्र्यं.

GOOD-FORTUNE, *s.* सौभाग्यं, भाग्यं, कल्याणं, भद्रं, शुभं, मङ्गलं, माङ्गल्यं, कुशलं, कौशल्यं, दैवं, सुदैवं, श्रीः *f.*, लक्ष्मीः *f.*, शर्म्म *n.* (न्), सम्पद्, सम्पत्तिः *f.*, पुण्योदयः.

GOOD-FRIDAY, *s.* ख्रीष्टस्य क्रुशारोपणमुद्दिश्य महोपवासदिनं.

GOOD-HUMOUR, *s.* सद्भावः, सुस्वभावः, सुशीलता, चित्तप्रसन्नता, सत्प्रकृतिः *f.*

GOOD-HUMOURED, *a.* सुप्रकृतिः -तिः -ति, सत्प्रकृतिः -तिः -ति, हृष्टभावः -वा -वं, हृष्टचित्तः -त्ता -त्तं, प्रसन्नस्वभावः -वा -वं.

GOOD-HUMOUREDLY, *adv.* सद्भावेन, सुस्वभावात्, सुशीलवत्, हृष्टवत्.

GOOD-LOOKING, *a.* सुदृश्यः -श्या -श्यं, सुदर्शनः -ना -नं, सुरूपः -पी -पं.

GOOD-LUCK, *s.* सौभाग्यं. *See* GOOD-FORTUNE.

GOOD-MANNERS, *s.* विनयः, विनीतता, मर्य्यादा, सुशीलता, सभ्यता, सदाचारता, सुनीतिः *f.*, सुचरित्रं, सच्चरित्रं.

GOOD-NATURE, *s.* सद्भावः, सुस्वभावः, सुप्रकृतिः *f.*, सत्प्रकृतिः *f.*, सुशीलता, साधुशीलत्वं, साधुत्वं, आर्य्यता.

GOOD-NATURED, *a.* सुप्रकृतिः -तिः -ति, सत्प्रकृतिः -तिः -ति, सुशीलः -ला -लं, सुभाववान् -वती -वत् (त्), साधुशीलः -ला -लं, सुहृदयः -या -यं, सुहृदयवान् &c.

GOOD-SENSE, *s.* सुविवेकः, सुबोधः, बुद्धिमत्त्वं, विज्ञता, प्रज्ञता.

GOOD-WILL, *s.* हितता, सुहितता, हितेच्छा, प्रीतिः *f.*, हितकाम्या, सौहृद्यं प्रियता, अनुकूलता.

GOOD-WOMAN, *s.* गृहिणी, गृहमेधिनी, गृहव्यापारकुशला or -दक्षा.

GOODLINESS, *s.* रूपलावण्यं, सौन्दर्य्यं, शोभा, चारुता, रूपवत्त्वं.

GOODLY, *a.* (Graceful) सुन्दरः -रा -री -रं, चारुः -र्व्वी -रु, सुदृश्यः -श्या -श्यं, सुदर्शनः -ना -नं, सुरूपः -पी -पं, लावण्यवान् -वती -वत् (त्).—(Pleasant) रम्यः -म्या -म्यं, रमणीयः -या -यं, रुचिरः -रा -रं.

GOODMAN, *s.* गृही *m.* (न्), गेही *m.* (न्), कुटुम्बी *m.* (न्), स्वामी *m.* (न्).

GOODNESS, *s.* (Excellence) साधुता -त्वं, सत्त्वं, प्रशस्तता, प्राशस्त्यं, प्रशस्तिः *f.*, उत्तमता, श्रेष्ठता, उत्कृष्टता, सारत्वं, प्रकृष्टता, विशिष्टता, कौशलं, सौष्ठवं, आर्य्यता.—(Virtue, piety) पुण्यता, पुण्यशीलता, साधुशीलता, धर्म्मित्वं, सदाचारता, साधुवृत्तत्वं, धार्म्मिकत्वं, देवभक्तिः *f.*—(Kindness) सुजनत्वं, सौजन्यं, प्रियता, दया, कृपा.

GOODS, *s. pl.* (Property, effects) द्रव्यं, द्रव्याणि *n. pl.*, वस्तूनि *n. pl.*, विभवः, सामग्री -ग्र्यं, रिक्थं.—(Moveable household furniture) अस्थावरद्रव्याणि *n. pl.*, गृहोपस्करादि *n.*, गृहोपकरणानि.—(Merchandise) भाण्डानि *n. pl.*, भाण्डकं, पण्यं, पण्यानि *n. pl.*, विक्रेयपण्यं.

GOOSE, *s.* हंसः -सी, राजहंसः -सी, वरटः -टा -टी, वरला, चक्राङ्गः -ङ्गी, श्वेतपक्षः, श्वेतच्छदः, श्वेतगरुत् *m.*, सितपक्षः, शितिच्छदः, शितिपक्षः, जालपाद् *m.*, नीलाक्षः, मानसालयः, मानसौकाः *m.* (स्), मञ्जुगमना, धार्त्तराष्ट्रः, पुरुदंशकः, मल्लिकः, शावकः, सरःकाकः -की, कलहंसः -सी; 'ruddy goose,' चक्रः, चक्रवाकः, रथाङ्गः, कोकः, द्वन्द्वचरः -चारी; 'wild goose,' चक्राङ्गी; 'tame goose,' ग्राम्यहंसः.—(Fool) मूर्खः, निर्बुद्धिः *m.*

GOOSEBERRY, *s.* कण्टकितगुल्मोत्पन्नम् अम्लफलं.

GOOSEBERRY-FOOL, *s.* क्षीरेण सह क्वथितः पूर्वोक्तफलरसः.

GOR-BELLIED, *a.* महोदरः -रा -रं, स्थूलोदरः -रा -रं, लम्बोदरः -रा -रं, तुन्दी -न्दिनी -न्दि (न्), बृहत्कुक्षिः -क्षिः -क्षि, बृहन्नाभिः -भिः -भि.

GOR-BELLY, *s.* महोदरं, स्थूलोदरं, बृहत्तुन्दं, बृहत्कुक्षिः *m.*

GORE, *s.* (Blood) रक्तं, असृक् *n.* (ज्), लोहितं, रुधिरं, शोणितं, क्षतजं.—(Clotted blood) घनरक्तं, घनलोहितं, रक्तगुल्मः.—(Triangular piece of cloth sewed into a garment to widen it) वस्त्रपृथूकरणार्थं तन्निवेशितम् त्र्यस्राकारः पटखण्डः.

To GORE, *v. a.* (Pierce with a pointed instrument) शूलादिना त्वचं भिद् (c. 7. भिनत्ति, भेत्तुं) or निर्भिद् or छिद् (c. 7. छिनत्ति, छेत्तुं) or व्यध् (c. 4. विध्यति, व्यद्धुं).—(With the point of a horn) शृङ्गाग्रेण त्वचं निर्भिद् or व्यध्.

GORED, *p. p.* छिन्नत्वक् *m. f. n.*, क्षतचर्म्मा -र्म्मा -र्म्म (न्), विदारितत्वक् *m. f. n.*, उल्लिखितचर्म्मा &c., विद्धः -द्धा -द्धं.

GORGE, *s.* (Gullet) निगरणः, अन्नवाहिस्रोतस् *n.*, गलः, कण्ठः.—(Defile between mountains) सङ्कटं, सङ्कटपथः, दुर्गमार्गः, कन्दरः -री, पर्व्वतरन्ध्रं, रन्ध्रं, गह्वरः, गह्वारः, पर्व्वतमध्ये सम्बाधपथः.

To GORGE, *v. a.* (Swallow) गॄ (c. 6. गिरति, गरितुं -रीतुं), निगॄ, ग्रस् (c. 1. ग्रसते -सितुं).—(Fill with food) अन्नेन पॄ (c. 10. पूरयति -यितुं), or परिपॄ or अत्यन्तं तृप् (c. 10. तर्पयति -यितुं).

To GORGE, *v. n.* अन्नेन पॄ in pass. (पूर्य्यते) or अत्यन्तं पॄ.

GORGED, *p. p.* अन्नपूरितः -ता -तं, अतिपूरितः -ता -तं, अतितृप्तः -प्ता -प्तं.

GORGEOUS, *a.* तेजस्वी -स्विनी -स्वि (न्), तैजसः -सी -सं, महाप्रतापः -पा -पं, प्रतापी -पिनी -पि (न्), प्रतापवान् -वती -वत् (त्), अतिशोभनः -ना -नं, सुप्रभः -भा -भं, शुभ्रः -भ्रा -भ्रं, उज्ज्वलः -ला -लं, स्पर्धी -र्धिनी -र्धि (न्).

GORGEOUSLY, *adv.* अतितेजसा, महाप्रतापेन, अतितैजसं, सुप्रभं.

GORGEOUSNESS, *s.* अतितेजस् *n.*, सुप्रतापः, अतिशोभा, सुप्रभा, उज्ज्वलता.

GORGET, *s.* ग्रीवात्राणं, गलत्राणं, कण्ठावरणं, अर्द्धचन्द्राकृति कवचं.

GORGING, *s.* निगरणं, ग्रसनं, अत्याहारः, अतिभोजनं, अन्नपूरणं.

GORGON, *s.* सर्पाकारकेशविशिष्टा भयङ्करमूर्त्तिः स्त्री.

GORMAND, *s.* अत्याहारी *m.* (न्), अतिभोजी *m.* (न्). *See* GOURMAND.

To GORMANDIZE, *v. n.* अत्यन्तं भुज् (c. 7. भुंक्ते, भोक्तुं), अत्याहारं कृ, अतिभोजनं कृ.

GORMANDIZER, *s.* अत्याहारी *m.* (न्), बह्वाशी *m.* (न्), अतिभोजी *m.* (न्), अतिबुभुक्षुः *m.*, भक्षकः, घस्मरः, अस्मरः, कुक्षिम्भरिः *m.*, उदरम्भरिः *m.*, पात्रेसमितः.

GORMANDIZING, *s.* अत्याहारः, अतिभोजनं, घस्मरता, बह्वाशित्वं, गृध्नता.

GORY, *a.* रक्तविलिप्तः -प्ता -प्तं, रक्ताक्तः -क्ता -क्तं, असृग्लिप्तः -प्ता -प्तं, रक्तगुल्ममयः -यी -यं, रक्तमलिनः -ना -नं.

GOSHAWK, *s.* अतिगृध्नशीलः श्येनभेदः, श्येनकः.

GOSLING, *s.* हंसशावकः, वरटशावकः, हंसशिशुः *m.*

GOSPEL, *s.* सुसंवादः, मङ्गलसंवादः, मङ्गलसमाचारः, सुवार्त्ता, शुभवार्त्ता

GOSPELLER, *s.* ख्रीष्टसमाचाररचकः, सुसंवादलेखकः, सुसंवादप्रचारकः, ख्रीष्टोयधर्म्मप्रवक्ता *m.* (कृ).

To GOSPELIZE, *v. a.* सुसंवादं प्रचर् in caus. (-चारयति -यितुं).

GOSSAMER, *s.* ग्रीष्मसमये वायुप्रेरिता मर्कटवासतन्तवः *m. pl.*, वाततूलं.

GOSSIP, *s.* (Tattler) जल्पकः, जल्पाकः, उपजल्पी *m.* (न्), परार्थवादी *m.* (न्), परकार्य्यचर्च्चकः, वावदूकः, प्रलापी *m.* (न्), गायनः.—(Tattle) जल्पितं, जल्पः, प्रजल्पः, प्रलापः.—(Tippling companion) सहपायी *m.* (न्), पानमित्रं.

To GOSSIP, *v. n.* जल्प् (c. 1. जल्पति -ल्पितुं), प्रलप् (c. 1. -लपति -पितुं), संलप्, अनर्थककथां कृ, वृथाकथां कृ, कथोपकथनं कृ.

GOSSIPING, *s.* जल्पः -ल्पनं, जल्पितं, प्रजल्पः, संलापः, वाक्चापल्यं, आलस्यवचनं, गायनं, निरर्थककथा, वावदूकता, वाचालता.

GOT, GOTTEN, *p. p.* प्राप्तः -प्ता -प्तं, अवाप्तः -प्ता -प्तं, लब्धः -ब्धा -ब्धं, अधिगतः -ता -तं, आसादितः -ता -तं, आपन्नः -न्ना -न्नं, प्रपन्नः -न्ना -न्नं.

GOUGE, *s.* अर्द्धचन्द्राकारफलको मूष्मनविशेषः, तक्षणी.

To GOUGE, *v. a.* (The eye) लोचनम् उत्पट् (c. 10. -पाटयति -यितुं).

GOURD, *s.* अलाबूः *f.*, अलाबुः *f.*, आलाबुः, लाबुः, तुम्बी -म्बिः *f.*, तुम्बः -म्बकः -कं, चिचिण्डा, सुपवी, कुष्माण्डकः, कूष्माण्डकः, कर्कारुः *m.*, कर्कटः; 'bitter gourd,' तिक्तिका, कटुतुम्बी, इक्ष्वाकुः *f.*

GOURMAND, *s.* अत्याहारी *m.* (न्), बहुभक्षकः, बहुभोजी *m.* (न्), भक्षकः, कुक्षिम्भरिः *m.*, उदरम्भरिः *m.*, औदरिकः.

GOUT, *s.* वातः, वातरोगः, वातव्याधिः *m.*, वातगुल्मः, वातरक्तं, वातशुण्डा, वातशोणितं, पादशोथः, पादगण्डिरः, पादवल्मीकं.

GOUTINESS, *s.* वातुलता, वातूलत्वं, वातिकत्वं, सवातत्वं.

GOUTY, *a.* वातकी -किनी -कि (न्), वातरोगी -गिणी -गि (न्), वातुलः -ला -लं, वातूलः -ला -लं, वातग्रस्तः -स्ता -स्तं, वातिकः -की -कं, वाताग्रहः -हा -हं.

To GOVERN, *v. a.* शास् (c. 2. शास्ति, शासितुं), अनुशास्, प्रशास्, समनुशास्, यम् (c. 1. यच्छति, यन्तुं), नियम्, संयम, विनियम्, सन्नियम्, ईश् (c. 2. ईष्टे, ईशितुं), पाल् (c. 10. पालयति -यितुं), परिपाल्, विनी (c. 1. -नयति -नेतुं), प्रणी, वशीकृ, विधा (c. 3. -दधाति -धातुं), अध्यास् (c. 2. -आस्ते -आसितुं), गुप् (c. 1. गोपायति, c. 10. गोपयति -यितुं).—(Keep in subjection, restrain) वशीकृ, यम्, विनियम्, संयम्, निग्रह्, (c. 9. -गृह्णाति -ग्रहीतुं), विनिग्रह्, संहृ (c. 1. -हरति -हर्त्तुं), दम् (c. 10. दमयति -यितुं), यन्त्र् (c. 10. यन्त्रयति -यितुं), नियन्त्र्; 'to govern a country well,' राष्ट्रं सम्यक् पाल्; 'governing noun,' अन्वयी *m.* (न्).

To GOVERN, *v. n.* राज्यं कृ, राज्याधिकारं कृ, राज्यपालनं कृ, राज्यशासनं कृ, राजकार्य्यं कृ, राज्यव्यवहारं कृ, आधिपत्यं कृ.

GOVERNABLE, *a.* शास्यः -स्या -स्यं, शासनीयः -या -यं, वश्यः -श्या -श्यं, विधेयः -या -यं, प्रणेयः -या -यं, विनेयः -या -यं, विनीतः -ता -तं, आज्ञाधीनः -ना -नं.

GOVERNANCE, *s.* शासनं, शास्तिः *f.*, अनुशासनं, पालनं, प्रतिपालनं, आधिपत्यं, अधिकारः, नीतिः *f.*, विनयः, वशः, वशिता, संयमः, विनियमः, यमः.

GOVERNED, *p. p.* शासितः -ता -तं, अनुशासितः -ता -तं, प्रशासितः -ता -तं, पालितः -ता -तं, वशीकृतः -ता -तं, संयतः -ता -तं, विनियतः -ता -तं, नियमितः -ता -तं, निगृहीतः -ता -तं; 'governed by another,' पराधीनः -ना -नं, परतन्त्रः -न्त्रा -न्त्रं.

GOVERNESS, *a.* बालाध्यापका, बालोपदेशिका, बालोपदेशिनी, शिक्षाकरी.

GOVERNMENT, *s.* (Administration of government) राज्यं, राज्याधिकारः, राज्यधुरा, राजधुरा, राज्यनीतिः *f.*, राज्यपालनं, राज्यव्यवहारः, नीतिः *f.*, वैशस्त्यं.—(Control, regulation) शासनं, शास्तिः *f.*, अनुशासनं, वशः -शं, यमः, संयमः, विनियमः, निग्रहः, दमः -मनं, यन्त्रणं.—(Authority) अधिकारः, अधीकारः, आधिपत्यं, प्रभुत्वं, ईशत्वं, ऐश्वर्य्यं.—(Empire) राज्यं, राजत्वं, आधिपत्यं.—(The king's ministers) राजधुर्वहाः *m. pl.*, राजमन्त्रिणः *m. pl.*, राजसचिवाः *m. pl.*; 'form of government,' राज्यरीतिः *f.*, राज्यविधिः *m.*; 'government affairs,' राज्यव्यवहारः, राजकार्य्यं; 'good government,' सम्यक् पालनं; 'bad government,' असम्यक् पालनं.

GOVERNOR, *s.* अधिपतिः *m.*, अधिष्ठाता *m.* (तृ), अधिकारी *m.* (न्), अध्यक्षः, अधिपः, शासिता *m.* (तृ), प्रशासिता *m.*, शास्ता *m.*, शासकः, अनुशासकः, अधिकृतः, ईशिता *m.* (तृ), ईश्वरः, ईशः, पालयिता *m.* (तृ), नियमा *m.* (म्), राष्ट्रियः.

GOVERNORSHIP, *s.* आधिपत्यं, अधिष्ठातृत्वं, अध्यक्षता, अधिकारिता.

GOWN, *s.* शाटी, शाटकः, स्त्रीकटीवस्त्रं, कटिवस्त्रं, कटीपटः, पटवासः, चोटी, चलनकं.

GOWNED, *a.* सशाटकः -का -कं, कटिपस्त्रवेष्टितः -ता -तं.

GOWNSMAN, *s.* पण्डितवेशधारी *m.* (न्), पण्डितवेशः.—(In an university) राजविद्यालये अन्तेवासिवेशधारी *m.* (न्).

GRAB, *s.* ग्रहः, ग्रहणं, सङ्ग्रहः -हणं, सङ्ग्राहः, धरणं, धृतिः *f.*

GRABBED, *p. p.* अकस्मात् सङ्गृहीतः -ता -तं or धृतः -ता -तं.

To GRABBLE, *v. n.* (Grope) परामृश् (c. 6.- मृशति -म्रष्टुं).—(Lie prostrate on the belly) उदरेण भूमिं गम् (c. 1. गच्छति, गन्तुं), छिन्नदेहः -हा -हं भू, अवमूर्द्धशयः -या -यं भू.

To GROW, *v. n.* (As a plant) रुह् (c. 1. रोहति, रोढुं), प्ररुह्, संरुह्, स्फुट् (c. 6. स्फुटति -टितुं), फुल्ल् (c. 1. फुल्लति -ल्लितुं); 'the lotus does not grow on the top of mountains,' न पर्वताग्रे नलिनी प्ररोहति.—(Increase) वृध् (c. 1. वर्धते -र्धितुं), विवृध्, संवृध्, अभिवृध्, प्रवृध्, परिवृध्, संविवृध्, एध् (c. 1. एधते -धितुं), समेध्, ऋध् (c. 5. ऋध्नोति, c. 4. ऋध्यति, अर्धितुं), उपचि in pass. (-चीयते), प्यै (c. 1. प्यायते, प्यातुं), आप्यै, पुष् (c. 4. पुष्यति, पोष्टुं), स्फाय् (c. 1. स्फायते -यितुं), आस्फाय्, वृद्धिम् इ (c. 2. एति -तुं) or या (c. 2. याति -तुं), स्फीतीभू.—(Extend) विस्तॄ in pass. (-स्तीर्य्यते), व्याप् (c. 5. -आप्नोति -आप्तुं), विततीभू.—(Improve) आगमं कृ; 'in knowledge,' विद्यागमं कृ, विद्याप्राप्तिं कृ.—(Become) भू, सम्भू, जन् (c. 4. जायते); 'to grow fat,' स्थूलीभू, पीवरीभू, पुष्टीभू; 'to grow lean,' कृशीभू, कृशाङ्गः -ङ्गी -ङ्गं भू.—(Proceed from, arise) जन्, उपजन्, प्रजन्, सञ्जन्, विजन्, अभिजन्, उत्पद् (c. 4. -पद्यते -पत्तुं), उदि (c. 1. -अयति -एतुं), उद्भू, प्रभू, सम्भू.—(Grow up, arrive at manhood) प्रौढीभू, अतीतशैशवः -वा -वं भू.—(Grow old) जॄ (c. 4. जीर्य्यति, जरितुं -रीतुं), जीर्णीभू.

To GROW, *v. a.* (Cause to grow) रुह् in caus. (रोपयति -यितुं), निरुह्, संरुह्, वृध् in caus. (वर्धयति -यितुं).

GROWER, *s.* रोपयिता *m.* (तृ), वर्धकः; 'of trees,' वृक्षरोपयिता *m.*

GROWING, *part.* (As a plant, &c.) रोही -हिणी -हि (न्), रुहः -हा -हं, प्रजनिष्णुः -ष्णुः -ष्णु, उद्भवः -वा -वं or प्रभवः -वा -वं or भवः -वा -वं or जः जा जं or उत्थः -त्था -त्थं or जातः -ता -तं or भूः भूः भु in comp.; as, 'growing in water,' जलरुहः -हा -हं, जलरुट् *m. f. n.* (ह्), जलोद्भवः -वा -वं, जलजः -जा -जं -जातः -ता -तं, जलभूः -भूः -भु; 'growing on the rocks,' शिलाभवः -वा -वं, शिलोत्थः -त्था -त्थं, शिलाजः -जा -जं; 'growing on the head,' शिरोरुहः -हा -हं.—(Increasing) वर्धमानः -ना -नं, वर्धी -र्धिनी -र्धि (न्), वर्धनः -नी -नं, वर्धिष्णुः -ष्णुः -ष्णु, एधमानः -ना -नं, उपचीयमानः -ना -नं, विस्तीर्य्यमाणः -णा -णं, विजृम्भमाणः -णा -णं; 'growing in size,' वर्धमानशरीरः -रा -रं, प्रचीयमानावयवः -वा -वं; 'growing old,' जीर्य्यन् -र्य्यन्ती -र्य्यत् (त्).

GROWL, *s.* गर्जनं, गर्जितं, घुर्घुरा, घर्घरितं, भषणं, रायणं, रुतं.

To GROWL, *v. n.* गर्ज् (c. 1. गर्जति -र्जितुं), अभिगर्ज्, परिगर्ज्, गर्जनं कृ, घुर्घुरां कृ, भष् (c. 1. भषति -षितुं), रै (c. 1. रायति, रातुं), घुर् (c. 6. घुरति -रितुं).

GROWN, *p. p.* रूढः -ढा -ढं, वर्धितः -ता -तं, प्ररूढः -ढा -ढं, संवर्धितः -ता -तं, प्रवृद्धः -द्धा -द्धं, उपचितः -ता -तं, एधितः -ता -तं, समेधितः -ता -तं, समृद्धः -द्धा -द्धं, स्फीतः -ता -तं, आप्यायितः -ता -तं, बृंहितः -ता -तं.—(Produced) जातः -ता -तं, उत्पन्नः -न्ना -न्नं, उपजातः -ता -तं.—(Grown in size) वर्धितदेहः -हा -हं, प्ररूढकायः -या -यं.—(Full grown) प्रौढः -ढा -ढं, प्रौढशरीरः -रा -रं, प्रवृद्धः -द्धा -द्धं, गतशैशवः -वा -वं, अतीतशैशवकालः -ला -लं, वयःप्राप्तः -प्ता -प्तं, वृद्धः -द्धा -द्धं.

GROWTH, *s.* रूढिः *f.*, प्ररूढिः *f.*—(Increase) वृद्धिः *f.*, वर्धनं, विवृद्धिः *f.*, विवर्धनं, प्रवृद्धिः *f.*, ऋद्धिः *f.*, उपचयः, स्फातिः *f.*, स्फीतिः *f.*, अभ्युदयः, समुत्थानं, आप्यायनं, विस्तारः, व्याप्तिः *f.*—(Production) उत्पत्तिः *f.*, उत्पादनं, जन्म *n.* (न्), जननं, प्रजननं, उद्भवः, प्रभवः.—(Improvement) वृद्धिः, आगमः.—(Full growth) प्रौढिः *f.*, प्रौढता, प्रवृद्धता.

To GRUB, *v. n.* खन् (c. 1. खनति -नितुं); 'grub up,' उत्खन्, प्रोत्खन्.

GRUB, *s.* कीटः, कृमिः *m.*, कीटडिम्भः, कीटाण्डजं, कोशस्थः.—(Dwarf, short, thick man) वामनः, खर्वः, ह्रस्वस्थूलः.

GRUBBER, *s.* खनकः, खनिता *m.* (तृ).—(Instrument) खनित्रं, खात्रं.

To GRUBBLE, *v. n.* अन्धकारे हस्तेन परामृश् (c. 6. -मृशति -म्रष्टुं) or आलभ् (c. 1. -लभते -लब्धुं) or स्पर्शेन निरूप् (c. 10. -रूपयति -यितुं).

To GRUDGE, *v. a.* and *n.* (Envy) असूय (nom. असूयति -ते -यितुं), ईर्ष्य् (c. 1. ईर्ष्यति -र्ष्यितुं), स्पृह् (c. 10. स्पृहयति -यितुं), अभिलष् (c. 1. -लषति, c. 1. -लष्यति -षितुं), न सह् (c. 1. सहते, सोढुं), न मृष् (c. 4. मृष्यति, मर्षितुं), मात्सर्य्यं कृ.—(Give or take unwillingly) अकामतस् or अकामेन or अनिच्छातो दा or ग्रह् (c. 9. गृह्णाति, ग्रहीतुं).—(Do any thing reluctantly or grudgingly) अकामतस् or अनिच्छातस् or दुःखेन or कृच्छ्रेण or सासूयं or असूयया किञ्चित् कृ.—(Refuse) प्रत्याख्या (c. 2. -ख्याति -तुं).—(Complain, murmur) विलप् (c. 1. -लपति -पितुं).

GRUDGE, *s.* (Malice, ill-will) मात्सर्य्यं, असूया, अभ्यसूया, ईर्ष्या, द्रोहः, द्रोहचिन्तनं, दुष्टभावः.—(Enmity) वैरं, वैरिता, वैरभावः.—(Hatred) द्वेषः, विद्वेषः, विद्विष्टता, दीर्घद्वेषः, चिरद्वेषः, द्वेष्यता.

GRUDGINGLY, *adv.* सासूयं, असूयया, अभ्यसूयया, मात्सर्य्येण, समात्सर्य्यं, दुष्टभावेन, अकामतस्, अकामं -मेन, अनिच्छातस्, दुःखेन, कृच्छ्रेण, कातर्य्येण.

GRUEL, *s.* काम्बलिकः.—(Rice-gruel) यवागूः *f.*, श्राणा, तरला, विलेपी, उष्णिका, सिद्धजलं.—(Sour gruel) आरनालं -लकं, सौवीरं, कुल्माषं, कुल्माषः, कुल्माषाभिषुतं, अभिषवं, अभिषुतं, काञ्जिका -कं, काञ्चिकं, काञ्जीकं, कुञ्जलं, धान्याम्लं, अवन्तिसोमं.

GRUFF, *a.* कर्कशस्वभावः -वा -वं, कर्कशः -शा -शं, रूक्षः -क्षा -क्षं, परुषः -षा -षं, निष्ठुरः -रा -रं, कटुः -टुः -ट्वी -टु, कठोरः -रा -रं, कठिनः -ना -नं.—(As tone) मन्द्रः -न्द्रा -न्द्रं, आमन्द्रः -न्द्रा -न्द्रं, गम्भीरः -रा -रं; 'a gruff voice,' गम्भीरस्वरः.

GRUFFLY, *adv.* कर्कशं, रूक्षं, परुषं, निष्ठुरं, कठिनं, कठोरं, मन्द्रं.

GRUFFNESS, *s.* कर्कशत्वं -ता, कार्कश्यं, रूक्षता, रौक्ष्यं, परुषता, निष्ठुरत्वं, नैष्ठुर्य्यं, कटुत्वं, कठोरता, काठिन्यं, स्वभावकटुता.—(Of tone) मन्द्रता, गम्भीरता, गाम्भीर्य्यं.

To GRUMBLE, *v. n.* (Make a low, harsh sound) गर्ज् (c. 1. गर्जति -र्जितुं), परिगर्ज्, गर्जनं कृ, स्तन् (c. 1. स्तनति -नितुं), स्तनितं कृ, घुर् (c. 6. घुरति -रितुं), गुञ्ज् (c. 1. गुञ्जति -ञ्जितुं), मन्द्रशब्दं कृ, गम्भीरशब्दं कृ.—(Complain discontentedly) असन्तुष्टत्वाद् विलप् (c. 1. -लपति -पितुं) or परिदेव् (c. 1. -देवते -वितुं).

GRUMBLER, *s.* असन्तुष्टत्वात् सदापरिदेवी *m.* (न्), असन्तुष्टजनः.

GRUMBLING, *s.* गर्जनं, गर्जितं, परिगर्जनं, स्तनितं, स्तननं, मन्द्रशब्दः, गम्भीरशब्दः, गम्भीरनादः, गम्भीरध्वनिः *m.*, गभीरशब्दः.—(Sound of complaint) परिदेवनं -वितं, विलपनं.

GRUMBLING, *part.* गम्भीरनादी -दिनी -दि (न्), मन्द्रशब्दकारी -रिणी -रि (न्).

GRUME, *s.* गुल्मः, पिण्डः -ण्डं, घनता; 'of blood,' रक्तगुल्मः, घनलोहितं.

GRUMOUS, *a.* पिण्डीभूतः -ता -तं, घनीभूतः -ता -तं, श्यानः -ना -नं, सान्द्रः -न्द्रा -न्द्रं, गुल्मी -ल्मिनी -ल्मि (न्); 'grumous blood,' घनलोहितं.

To GRUNT, *v. n.* शूकरवद् घर्घरितं कृ or कण्ठनादं कृ or गम्भीरनादं कृ, गर्ज् (c. 1. गर्जति -र्जितुं), घुर्घुराशब्दं कृ.

GRUNT, GRUNTING, *s.* घर्घरितं, शूकरनादः, शूकरगर्जितं, शूकरस्य कण्ठनादः or गम्भीरनादः.

GRUNTLING, *s.* शूकरशावकः, शूकरशिशुः *m.*, बालशूकरः.

GUARANTEE, *s.* (One who is surety for another) प्रतिभूः *m.*, प्रतिनिधिः *m.*, मध्यस्थः.—(Security) प्रातिभाव्यं, पारिभाव्यं, प्रात्ययिकः, प्रत्ययकारिणी, लग्नकः, बन्धकः.

To GUARANTEE, *v. a.* प्रतिभूः or प्रतिनिधिः भू, प्रातिभाव्यं कृ, पारिभाव्यं कृ, लग्नकं or प्रात्ययिकं or बन्धकं दा, प्रत्ययं कृ.

To GUARD, *v. a.* and *n.* रक्ष् (c. 1. रक्षति -क्षितुं), अभिरक्ष्, परिरक्ष्, संरक्ष्, प्रतिरक्ष्, पाल् or पा (c. 10. पालयति -यितुं, c. 2. पाति -तुं), अनुपाल्, परिपाल्, प्रतिपाल्, सम्पाल्, अभिपाल्, उपपाल्, गुप् (c. 1. गोपायति, गोप्तुं, c. 10. गोपयति -यितुं), अनुगुप्, अभिगुप्, प्रगुप्, अभिसङ्गुप्, त्रै (c. 1. त्रायते, त्रातुं), परित्रै, सन्त्रै, अव् (c. 1. अवति -वितुं), पर्याप् in des. (-ईप्सति -प्सितुं), परिप्राप्.—(Ward off) वृ (c. 10. वारयति -यितुं), निवृ.—(Guard against) अवधा (c. 3. -धत्ते -धातुं), अवहितः -ता -तं भू, सावधानः -ना -नं भू, अवधानं कृ; 'guard against avarice,' लोभात् सावधानो भव.—(Keep guard) रक्षां कृ, रक्षार्थं जागृ (c. 2. जागर्त्ति, जागरितुं).

GUARD, *s.* (Act of guarding) रक्षणं, रक्षा, रक्षणः, पालनं, त्राणं, गुप्तिः *f.*, गोपनं, अवनं.—(A sentry) रक्षकः, रक्षी *m.* (न्), सैन्यः, सैनिकः, सेनारक्षः, परिचरः, उपरक्षणं, परिधिस्थः, रक्षिवर्गः, अनीकस्थः, सज्जनं; 'captain of the guards,' गुल्मस्थानाधिकारी *m.* (न्), गुल्मस्थानाधिपः, रक्षाधिकृतः.—(That which protects any part of the body from injury) त्राणं, त्रं affixed, वारणं; 'a finger-guard,' अङ्गुलित्राणं, अङ्गुलित्रं; 'guard for the arm in shooting,' गोधा, तलं -ला, ज्याघातवारणं; 'to stand on one's guard,' सावधानः -ना -नं or सचेतनः -ना -नं स्था or भू; 'be on your guard,' सावधानो भव, सावहितो भव.

GUARD-ROOM, *s.* उद्घाटः, रक्षकाणां वासागारं, सैन्यस्थानं, सैनिकशाला.

GUARDABLE, *a.* रक्षणीयः -या -यं, रक्ष्यः -क्ष्या -क्ष्यं, पालनीयः -या -यं.

GUARDED, *p. p.* रक्षितः -ता -तं, अभिरक्षितः -ता -तं, पालितः -ता -तं, उपपालितः -ता -तं, गुप्तः -प्ता -प्तं, गोपायितः -ता -तं, त्रातः -ता -तं, त्राणः -णा -णं, अवितः -ता -तं.—(Cautious) अवहितः -ता -तं, सावहितः -ता -तं, सावधानः -ना -नं.

GUARDEDLY, *adv.* सावधानं, अवधानेन, अवहितं, सावहितं, सुविमृश्य.

GUARDEDNESS, *s.* अवधानता, सावधानता, सावहितत्वं, समीक्ष्यकारित्वं.

GUARDER, *s.* रक्षकः, रक्षी *m.* (न्), परिरक्षी *m.*, रक्षिता *m.* (तृ), पालयिता *m.* (तृ), पालकः, पालः -ली *m.* (न्), गोप्ता *m.* (प्तृ), गोपः -पकः, गोपायकः, गोपी *m.* (न्), गोपिलः, त्राता *m.* (तृ), पः in comp.

GUARDFUL, *a.* सावधानः -ना -नं, अवहितः -ता -तं, सावहितः -ता -तं.

GUARDIAN, *s.* पालकः, प्रतिपालकः, रक्षकः, गोप्ता *m.* (प्तृ), पालः, नाथः, अध्यक्षः.—(Of an orphan) पितृस्थानः -नीयः, मातृपितृस्थानः, नाथः; 'guardian deity,' लोकपालः -लकः.

GUARDIANSHIP, *s.* रक्षणं, रक्षा, रक्षकत्वं, पालकत्वं, रक्षितृपदं.

GUARDSHIP, *s.* रक्षणं, रक्षा, पालनं, त्राणं, गुप्तिः *f.*, गोपनं.

GUDGEON, *s.* वडिशद्वारेण सुग्रहणीयः क्षुद्रमत्स्यभेदः.—(A person easily cheated) सुवञ्चनीयः, सुप्रतारणीयः.

GUERDON, *s.* फलं, प्रतिफलं, पारितोषिकं, वेतनं.

To GUESS, *v. a.* and *n.* अनुमा (c. 2. -माति, c. 4. -मायते, c. 3. -मिमीते -मातुं), तर्क् (c. 10. तर्कयति -यितुं), वितर्क्, ऊह् (c. 1. ऊहते -हितुं), अवगम् (c. 1. -गच्छति -गन्तुं), शङ्क् (c. 1. शङ्कते -ङ्कितुं), अनिर्णयपूर्व्वम् अनुभू, अनिश्चयपूर्व्वं निरूप् (c. 10. -रूपयति -यितुं) or प्रदृश् (c. 1. -पश्यति -द्रष्टुं) or विवेचनां कृ or मन् (c. 4. मन्यते, मन्तुं).

GUESS, *s.* अनुमानं, अनुमितिः *f.*, अनुमानोक्तिः *f.*, वितर्कः -र्कणं, ऊहा -हनं, शङ्का, अनुभवः, अनुभूतिः *f.*, अनिश्चयपूर्व्वं निरूपणं, अनिर्णयपूर्व्वा विवेचना, अदृढप्रमाणः परामर्शः, अवगतिः, उपलब्धिः *f.*, उपलम्भः.

GUESSED, *p. p.* अनुमितः -ता -तं, वितर्कितः -ता -तं, शङ्कितः -ता -तं.

GUESSER, *s.* अनुमाता *m.* (तृ), अनुमानकर्त्ता *m.* (र्त्तृ), वितर्ककः.

GUEST, *s.* अतिथिः *m. f.* -थी *f.*, अभ्यागतः, अभ्यागतजनः, गृहाभ्यागतः, गृहागतः, आगन्तुः *m. f.*, आगान्तुः, आगन्तुकः -का -कं, आवेशिकः -की -कं, प्राघुणः, प्राघुणिकः, प्राघूर्णः, माङ्गतिकः; 'proper for a guest,' आतिथ्यः -थ्यी -थ्यं, आतिथेयः -यी -यं.

GUEST-CHAMBER, *s.* अतिथिशाला, अतिथिसत्कारयोग्या शाला.

GUEST-RITE, *s.* अतिथिसत्कारः -सत्क्रिया, अतिथिक्रिया, अतिथिसेवा.

To GUGGLE, *v. n.* *See* GURGLE.

GUIDANCE, *s.* नयः, नायः, नीतिः *f.*, प्रणयनं, नेतृत्वं, विनियमः, पथदर्शनं.—(Direction) निर्देशः, निदेशः, उपदेशः, शास्तिः *f.*, शासनं, अनुशास्तिः *f.*, अनुशासनं, विधानं; 'good guidance,' सुनयः, सुनीतिः *f.*

To GUIDE, *v. a.* नी (c. 1. नयति, नेतुं), आनी, समानी, मार्गं or पथं दृश् (c. 10. दर्शयति -यितुं), गम् (c. 10. गमयति -यितुं).—(Direct) निर्दिश् (c. 6. -दिशति -देष्टुं), उपदिश्, उद्दिश्, शास् (c. 2. शास्ति, शासितुं), अनुशास्, समनुशास्, प्रणी, विनियम् (c. 1. -यच्छति -यन्तुं), विधृ (c. 10. -धारयति -यितुं), विधा (c. 3. -दधाति -धातुं).

GUIDE, *s.* नेता *m.* (तृ), नायकः, नेत्रः, विनेता *m.* (तृ), पथदर्शकः, मार्गदर्शकः, दर्शकः, दर्शयिता *m.* (तृ), प्रदर्शकः, निर्देष्टा *m.* (ष्टृ), निर्देशकः, उद्देशकः, उपदेशी *m.* (न्), उपदेशकः, देशकः, उपदेष्टा *m.* (ष्टृ), आदेष्टा *m.*, पथिकः, सञ्चारकः, शासिता *m.* (तृ), शास्ता *m.*, अनुशासकः, अध्यक्षः.

GUIDED, *p. p.* नीतः -ता -तं, आनीतः -ता -तं, समानीतः -ता -तं, नीयमानः -ना -नं, गमितः -ता -तं, शासितः -ता -तं, अनुशासितः -ता -तं, निर्दिष्टः -ष्टा -ष्टं.

GUIDE-POST, *s.* पथदर्शनार्थं or मार्गसूचनार्थं स्थूणा.

GUILD, *s.* श्रेणी -णिः *m.*, सहकारिजनसमूहः, नगरकार्य्यसम्पादनार्थं जनसंसर्गः, नागरसमाजः, वणिक्समाजः, निगमः, नैगमः, महाजनसंसर्गः.

GUILD-HALL, *s.* सहकारिणां वाणिजजनानां समागमशाला, निगमशाला, नगरकार्य्यसम्पादनार्थं महाचत्वरं.

GUILE, *s.* माया, कपटः -टं, छलं -लना, शठता, शाठ्यं, खलता, धूर्त्तता, व्याजः, विदग्धता, वैदग्ध्यं, छद्म *n.* (न्), कूटः -टं, कौटिल्यं, कैतवं, वक्रता, कापट्यं, वञ्चनं -ना, असारल्यं.

GUILEFUL, *a.* मायावान् -वती -वत् (त्), मायी -यिनी -यि (न्), मायामयः -यी -यं, मायान्वितः -ता -तं, मायावी -विनी -वि (न्), छली -लिनी -लि (न्), छलान्वितः -ता -तं, विदग्धः -ग्धा -ग्धं, कापटिकः -की -कं, वञ्चकः -का -कं, वञ्चनशीलः -ला -लं, शठः -ठा -ठं, खलः -ला -लं, कुटिलः -ला -लं, विजिह्मः -ह्मा -ह्मं, सव्याजः -जा -जं, धूर्त्तः -र्त्ता -र्त्तं, वक्रः -क्रा -क्रं, वक्रभावः -वा -वं.

GUILEFULLY, *adv.* मायया, स..., शाठ्येन, छलेन, खलवत्, शठवत्, धूर्त्तवत्, सव्याजं, कितववत्, कैतवेन, विदग्धं.

GUILEFULNESS, *s.* मायावत्त्वं, शठता, शाठ्यं, कौटिल्यं, वक्रता, विजिह्मता, विदग्धता, सव्याजत्वं, असारल्यं.

GUILELESS, *a.* अमायी -यिनी -यि (न्), अमायिकः -की -कं, मायाहीनः -ना -नं, निष्कपटः -टा -टं, कपटहीनः -ना -नं, निर्व्याजः -जा -जं, छलरहितः -ता -तं, शुद्धमतिः -तिः -ति, सरलः -ला -लं, अजिह्मः -ह्मा -ह्मं, अवक्रः -क्रा -क्रं, अकुटिलः -ला -लं, विमलात्मा -त्मा -त्म (न्), निर्व्यलीकः -का -कं, दक्षिणः -णा -णं, अकृत्रिमः -मा -मं, अकूर्चः -र्चा -र्चं.

GUILELESSLY, *adv.* मायां विना, मायया विना, मायाव्यतिरेकेण, कपटं विना, निष्कपटं, निर्व्याजं, सरलवत्.

GUILELESSNESS, *s.* मायाहीनता, सारल्यं, अवक्रता, अजिह्मता, शुद्धता.

GUILLOTINE, *s.* शिरश्छेदनयन्त्रं, अतितीक्ष्णयन्त्रं यदाघातेन निमेषमात्रेण शीर्षच्छेदः क्रियते.

To GUILLOTINE, *v. a.* पूर्व्वोक्तयन्त्रेण मस्तकं छिद् (c. 7. छिनत्ति, छेत्तुं).

GUILT, *s.* (Criminality) अपराधिता -त्वं, सापराधता, पापित्वं, सपापत्वं, अपराद्धता, दोषिता -त्वं, सदोषता, पापवत्त्वं, दोषवत्त्वं.—(Crime) पापं, अपराधः, दोषः, पातकं, दुष्कृतं, दुष्कर्म्म *n.* (न्), पापकर्म्म *n.*, कल्मषं, एनस् *n.*, आगस् *n.*, अघं, दुरितं, मन्तुः *m.*

GUILTILY, *adv.* सापराधं, सपापं, सदोषं, सपातकं, अपराद्धवत्.

GUILTINESS, *s.* अपराधिता, अपराद्धता, सापराधत्वं, पापित्वं, सपापता, दोषिता -त्वं, सदोषता, पापवत्ता, दोषवत्ता.

GUILTLESS, *a.* निष्पापः -पा -पं -पी -पिनी -पि (न्), अपापः -पा -पं, निरपराधः -धा -धं, अनपराधी -धिनी -धि (न्), निर्दोषः -षा -षं -षी -षिणी -षि (न्), पापहीनः -ना -नं, शुद्धः -द्धा -द्धं, शुद्धमतिः -तिः -ति, अनघः -घा -घं.

GUILTLESSLY, *adv.* निष्पापं, पापं विना, निरपराधं, अपराधेन विना.

GUILTLESSNESS, *s.* निष्पापत्वं, निर्दोषत्वं, निरपराधिता, शुद्धता.

GUILTY, *adv.* अपराधी -धिनी -धि (न्), अपराद्धः -द्धा -द्धं, सापराधः -धा -धं, कृतापराधः -धा -धं, प्राप्तापराधः -धा -धं, पापी -पिनी -पि (न्), पापवान् -वती -वत् (त्), पापकर्म्मा -र्म्मा -र्म्म (न्), सपापः -पा -पं, दोषी -षिणी -षि (न्), दोषवान् -वती -वत् (त्), सदोषः -षा -षं, पातकी -किनी -कि (न्), दुष्कृती -तिनी -ति (न्), एनस्वी -स्विनी -स्वि (न्), कृतैनाः -नाः -नः (स्), अनिष्कृतैनाः &c., कृतागाः -गाः -गः (स्), अभिपन्नः -न्ना -न्नं; 'rashly guilty,' विकुरः -रा -रं, चपलः -ला -लं.

GUINEA, *s.* सुवर्णमुद्राविशेषः, सुवर्णः.

GUINEA-HEN, *s.* चित्रशरीरविशिष्टा विदेशीयकुक्कुटी.

GUINEA-PIG, *s.* अत्यल्पशरीरो विदेशीयशूकरभेदः.

GUISE, *s.* वेशः, वेषः, वासस् *n.*, परिधानं, अम्बरं, वस्त्रं, वसनं, आकारः, रूपं, व्यवहारः, रीतिः *f.*; 'in the guise of a herdsman,' गोपवेशः: 'of a Brahmin,' द्विजरूपी *m.* (न्).

GUITAR, *s.* वीणा, वल्लकी, विपञ्ची -ञ्चिका, तन्त्री, रुद्री, सारङ्गी, शारङ्गी, पिनाकी, ततं, परिवादिनी.

GULF, *s.* (A bay) अखातं, खातं, समुद्रवङ्कः, पुटभेदः.—(Abyss) अगाधदरी, अगाधरन्ध्रं, अतलस्पर्शखातं, गम्भीररन्ध्रं, नरकः.—(Whirlpool) आवर्त्तः, जलावर्त्तः, जलगुल्मः, अवघूर्णः, घूर्णः, घूर्णजलं.

GULFY, *a.* घूर्णजलपूर्णः -र्णा -र्णं, जलगुल्ममयः -यी -यं.

To GULL, *v. a.* वञ्च् (c. 10. वञ्चयते -ति -यितुं), परिवञ्च्, छल् (c. 10.

छलयति -यितुं), प्रतॄ (c. 10. -तारयति -यितुं).

Gull, *s.* (Bird) जलकुक्कुटः -टी, विघ्नका, गङ्गाचिल्ली, टेघ्ट्टी, ध्वांक्षः —(One easily cheated) सुवञ्चनीयः, सुप्रतारणीयः.

Gull-catcher, *s.* वञ्चकः, प्रतारकः, छली *m.* (न्), कूटकारः.

Gulled, *p. p.* वञ्चितः -ता -तं, प्रलब्धः -ब्धा -ब्धं, प्रतारितः -ता -तं.

Gullery, *s.* वञ्चनं, छलं, कपटः -टं, प्रतारणा, व्याजः, कैतवं.

Gullet, *s.* निगरणस्रोतस् *n.*, निगरणः, अन्नवाहिस्रोतस् *n.*

Gullibility, *s.* सुवञ्चनीयता, सुखवञ्चनीयत्वं, सुप्रतारणीयता.

Gullible, *a.* सुवञ्चनीयः -या -यं, सुखेन प्रतारणीयः -या -यं.

Gully, *s.* नालः, प्रणालः -ली -लिका, खातं, कुल्या, जलमार्गः, उदकगमनमार्गः, जलवाहनी, परीवाहः, सारणिः -णी *f.*

To gully, *v. a.* भूमिम् उत्खन् (c. 1. -खनति -नितुं), प्रणालिकां कृ, कुल्यां कृ.

Gully-hole, *s.* कर्दमाटकरन्ध्रं, प्रणालिकारन्ध्रं, प्रणालीविवरं.

Gulosity, *s.* अतिभोजनं, अत्याहारः, घस्मरता, अतृप्तिः *f.*

To gulp, *v. a.* जलं बहुशो गॄ (c. 6. गिरति, गरितुं -रीतुं) or निगॄ or अवगॄ or ग्रस् (c. 1. ग्रसते -सितुं).—(Disgorge) उद्गॄ, उत्क्षिप् (c. 6. -क्षिपति -क्षेप्तुं).

Gulp, *s.* गरणं, गरा, गीर्णिः *f.*, गिरिः *f.*, निगारः, निगरणं, ग्रसनं, ग्रासः, एकवारे निगीर्णं यत्किञ्चित्.—(Disgorging) उद्गारः -रणं, उद्गिरणं, उद्वमः -मनं.

Gum, *s.* (Fleshy covering of the teeth) दन्तमांसं, दन्तवेष्टः -ष्टनं, दन्तशिरा, दन्तमूलं, वेला.—(Exudation from trees) निर्यासः, वृक्षनिर्यासः, वृक्षरसः.—(Adhesive substance) श्यानद्रव्यं, सान्द्रद्रव्यं.

To gum, *v. a.* पूर्व्वोक्तनिर्यासेन or श्यानद्रव्येण लिप् (c. 6. लिम्पति, लेप्तुं) or संयुज् (c. 7. -युनक्ति -योक्तुं) or संलग्नीकृ.

Gum-arabic, *s.* सूक्ष्मपत्रः, सूक्ष्मपत्ररसः.

Gum-boil, *s.* दन्तविस्फोटः, दन्तस्फोटः -टकः, दन्तव्रणः -णं, दन्तार्बुदः, स्निग्धव्रणः, वैदर्भः, उपकुशः.

Gumminess, *s.* सान्द्रत्वं, श्यानत्वं, स्निग्धता, संलग्नशीलता.

Gummy, *a.* वृक्षनिर्यासमयः -यी -यं, श्यानः -ना -नं, सान्द्रः -न्द्रा -न्द्रं.

Gun, *s.* अग्निबलेन गुलिकाप्रक्षेपणी लोहनाडिः or -डी, गुलिप्रक्षेपणी सुषिरनाली, गुलिकाप्रक्षेपार्थं शुषिरयन्त्रं, लोहसुषिः *f.*

Gunner, *s.* पूर्व्वोक्तनाडिद्वारा गुलिकाप्रक्षेपकः, लोहनाडिधारी *m.* (न्), अग्न्यस्त्रधारी *m.*, आग्नेयास्त्रप्रक्षेपकः.

Gunnery, *s.* अग्न्यस्त्रविद्या, लोहनाडिद्वारेण गुलिकाप्रक्षेपणविद्या.

Gunpowder, *s.* आग्नेयचूर्णं, शीघ्रदाह्यचूर्णं, आग्नेयक्षोदः, महाशब्दपूर्व्वम् अग्निसम्पर्कात् सद्योदाह्यचूर्णं.

Gun-shot, *s.* लोहगुलिकागोचरं, लोहगुलिविषयः, युद्धनाडिक्षेपणं.

Gun-smith, *s.* अग्न्यस्त्रकारः, आग्नेयशस्त्रकारः, आग्नेयनाडिनिर्म्माता *m.* (तृ), युद्धनाडिनिर्म्माणशिल्पज्ञः.

Gun-stock, *s.* आग्नेयनाडिदण्डः, लोहनाडिदारुः *m.*, नाडियारक्षः.

Gunwale, gunnel, *s.* नौपार्श्वधारा -रः, नौपार्श्वस्य उपरिकाष्ठं, नावुत्सङ्गः.

Gurge, *s.* जलावर्त्तः, जलभ्रमः, जलावघूर्णः, जलगुल्मः, घूर्णजलं.

To gurgle, *v. n.* जलवद् घर्घराशब्देन सु (c. 1. स्रवति, स्रोतुं), घर्घराशब्दं कृ, घर्घ or गर्ग (nom. घर्घायते, गर्गायते), गर्घ (c. 1. गर्घति -र्घितुं).

Gurgling, *s.* घर्घराशब्देन जलप्रस्रावः, घर्घरा.

To gush, *v. n.* प्रपत् (c. 1. -पतति -तितुं), निपत्, बहुशः प्रसु (c. 1. -स्रवति -स्रोतुं) or प्रस्यन्द् (c. 1. -स्यन्दते -न्दितुं) or क्षर् (c. 1. क्षरति -रितुं), वेगेन or वेगतो निःसृ (c. 1. -सरति -सर्त्तुं); 'tears gushed from (her) eyes,' जलं नेत्राभ्यां प्रापतत्.

Gush, gushing, *s.* बहुप्रस्रावः, जलप्रपातः, उत्सेकः, उत्सेचनं, उत्पीडः.

Gusset, *s.* वस्त्रनिवेशित उपवस्त्रखण्डः or अधिकवस्त्रखण्डः.

Gust, *s.* (Blast of wind) निर्घातः, प्रभञ्जनः, व्योममुद्गरः, वातरूपः, वायुगुल्मः, वायुवेगः, वात्या, प्रबलवायुः *m.*, प्रचण्डवायुः *m.*, चण्डवातः, तीव्रवातः, पवनाघातः, जयानिलः.—(Taste) स्वादः, आस्वादः, रसनेन्द्रियं, रुचिः *f.*, अभिरुचिः *f.*

Gustation, *s.* स्वादनं, आस्वादनं, प्राशनं, लेहनं.

Gustful, *a.* रुच्यः -च्या -च्यं, रुचिरः -रा -रं, सरसः -सा -सं.

Gustless, *a.* विरसः -सा -सं, निःस्वादुः -दुः -दु, अस्वादुः -दुः -दु.

Gusto, *s.* रुचिः *f.*, अभिरुचिः *f.*, रसः, सुरसः, आस्वादः.

Gusty, *a.* वातलः -ला -लं, वातवान् -वती -वत् (त्), वातीयः -या -यं, वातमयः -यी -यं, बहुपवनः -ना -नं, पवनक्षिप्तः -प्ता -प्तं.

Gut, *s.* नाडिः -डी *f.*, अन्तर्नाडी, नाली -लिः *f.*, धमनी -निः *f.*, शिरा, सिरा, अन्त्रं, पुरीतत् *m. n.*, कोष्ठः.—(Stomach) उदरं, जठरः -रं.

To gut, *v. a.* निरन्त्रीकृ, निरन्त्र (nom. निरन्त्रयति -यितुं), नाडीः or अन्त्राणि बहिष्कृ.—(Plunder) द्रव्याणि अपहृ (c. 1. -हरति -हर्त्तुं).

Gutta serena, *s.* तिमिरं; 'an eye affected with it,' तिमिरदोषहतं चक्षुः.

Gutted, *p. p.* निरन्त्रीकृतः -ता -तं, हृतसर्व्वद्रव्यः -व्या -व्यं.

Gutter, *s.* प्रणालः -ली -लिका, नालः, जलनिर्गमः, जलमार्गः, परीवाहः, जलवाहनी, सारणिः *f.* -णी, उदकगमनमार्गः.

To gutter, *v. a.* प्रणालीरूपेण उत्खन् (c. 1. -खनति -नितुं) or शुषिरीकृ.

To gutter, *v. n.* प्रणालीरूपेण उत्खन् in pass. (-खन्यते) or शुषिरीभू, प्रणालिकां कृ, ज्वलद्दीपिकारूपेण लवशः स्यन्द् (c. 1. स्यन्दते -न्दितुं).

Guttler, *s.* बहुभक्षकः, अतिभोजी *m.* (न्), कुक्षिम्भरिः *m.*

Guttural, *a.* कण्ठ्यः -ण्ठ्या -ण्ठ्यं, कण्ठस्थः -स्था -स्थं, ग्रैवः -वी -वं, ग्रैवेयः -यी -यं; 'guttural letter,' कण्ठ्यं; 'guttural sound,' कुहरं.

Guzarat, *s.* (The country) गुर्जरः.—(The people) गुर्जराः *m. pl.*

To guzzle, *v. a.* बहुशो गॄ (c. 6. गिरति, गरितुं -रीतुं) or निगॄ or ग्रस् (c. 1. ग्रसते -सितुं) or पा (c. 1. पिबति, पातुं), पानरतः -ता -तं भू.

Guzzler, *s.* अतिपायी *m.* (न्), अतिभोजी *m.* (न्), पानरतः.

Gymnasium, *s.* व्यायामशाला, मल्लयुद्धशाला, मल्लशाला, विहारः.

Gymnastic, *a.* व्यायामी -मिनी -मि (न्), व्यायामसम्बन्धी -न्धिनी -न्धि (न्), मल्लयुद्धसम्बन्धी &c., व्यायामशीलः -ला -लं.

Gymnastics, *s. pl.* व्यायामः, मल्लयुद्धं, व्यायामविद्या.

Gypsy, gypsey. *See* Gipsy.

To gyrate, *v. n.* परिवृत् (c. 1. -वर्त्तते -र्त्तितुं), भ्रम् (c. 4. भ्राम्यति, c. 1 भ्रमति -मितुं), घूर्ण् (c. 6. 1. घूर्णति -ते -र्णितुं), परिघूर्ण्, विघूर्ण्, व्याघूर्ण्.

Gyration, *s.* परिवर्त्तनं, आवर्त्तः, भ्रमः -मणं, भ्रमिः *f.*, घूर्णिः *f.*, घूर्णनं; 'of a bird,' परिडीनकं.

Gyre, *s.* चक्रावर्त्तः, चक्रगतिः *f.*, आवृत्तिः *f.*, मण्डलं, परिमण्डलं.

To gyve, *v. a.* निगडेन बन्ध् (c. 9. बध्नाति, बन्द्धुं), निगड (nom. निगडयति -यितुं), पाश (nom. पाशयति -यितुं).

Gyves, *s. pl.* निगडः -डं, पाशः, बन्धनं -नानि *n. pl.*, पादपाशः, शृङ्खला.

H.

Ha, *interj.* हा, हहा, आहा, अहो, आहो, अहहः, अहोवत्, ह, अह, आ, अयि, आश्चर्य्यं.

Habeas corpus, *s.* मिथ्यानिरोधनिषेधार्थकं पूर्व्वकालीनशासनपत्रं.

Haberdasher, *s.* वस्त्रादिविक्रेता *m.* (तृ), वसनादिविक्रेता *m.*, अंशुकादिविक्रयी *m.* (न्), क्षुद्रद्रव्यविक्रेता *m.*

Haberdashery, *s.* पूर्व्वोक्तव्यापारिणा विक्रीता वस्त्रादिद्रव्यसामग्री.

Habergeon, *s.* वक्षस्त्राणं, उरस्त्राणं, उरश्छदः, कण्ठस्थकवचं.

Habiliment, *s.* वेशः, परिधानं, परिच्छदः, वसनं, वस्त्रं, आभरणं, अम्बरं, वासस् *n.*, प्रसाधनं, आच्छादनं, सज्जा.

Habit, *s.* (Dress) वेशः, वेषः, वसनं, वस्त्रं, वासस् *n.*, परिधानं, परिच्छदः, अम्बरं.—(State, condition) अवस्था, स्थितिः *f.*, भावः, वृत्तिः *f.*, दशा, संस्थितिः *f.*, स्वभावः; 'habit of body,' शरीरस्थितिः *f.*, देहस्वभावः; 'habit of mind,' चित्तवृत्तिः *f.*—(Temperament, disposition) प्रकृतिः *f.*, शीलः -लता, स्वभावः, अन्तःकरणं.—(Custom, practice, established manner) आचारः, अभ्यासः, व्यवहारः, समाचारः, नित्यकृत्यं, नित्यक्रिया, रीतिः *f.*, व्यवहृतिः *f.*, शीलः, प्रचारः, चरितं, चर्य्या, क्रमः, नियमः, आवृत्तिः *f.*, व्यापारः, प्रवृत्तिः *f.*, मार्गः, अनुशीलनं; 'bad habit,' व्यसनं; 'having bad habits,' दुराचारः -रा -रं, पापसमाचारः -रा -रं, पापचर्य्यः -र्य्या -र्य्यं, दुर्वृत्तः -त्ता -त्तं, दुश्चरित्रः -त्रा -त्रं, व्यसनी -निनी -नि (न्).

To habit, *v. a.* वेष्ट् (c. 1. वेष्टते -ष्टितुं), परिवेष्ट्, आच्छद् (c. 10. -च्छादयति -यितुं), वस्त्र (nom. वस्त्रयति -यितुं), परिधा in caus. (-धापयति -यितुं).

Habitable, *a.* वासतेयः -यी -यं, वास्तव्यः -व्या -व्यं, वासयोग्यः -ग्या -ग्यं, वासक्षमः -मा -मं, आजीव्यः -व्या -व्यं, उपजीव्यः -व्या -व्यं.

Habitant, *s.* वासी *m.* (न्), निवासी *m.*, निलायी *m.* (न्), वासकृत्.

Habitation, *s.* वासः, वासस्थानं, निवासः, वसतिः *f.*, निवसतिः *f.*, गृहं, गेहः -हं, वेश्म *m.* (न्), निलयः -यनं, आलयः, आयतनं, निवेशनं, निकेतः -तनं, आगारः, भवनं, वसितं, समावासः, अवस्थानं, आवसथः, स्थानं, ओकस् *n.*, धाम *n.* (न्).

Habitual, *a.* आभ्यासिकः -की -कं, अभ्यस्तः -स्ता -स्तं, आचारिकः -की -कं, आचरितः -ता -तं, व्यावहारिकः -की -कं, व्यवहारिकः -की -कं, नित्यः -त्या -त्यं, स्वाभाविकः -की -कं, अनुशीलितः -ता -तं, नैयमिकः -की -कं, प्रायिकः -की -कं.

Habitually, *adv.* नित्यं, नित्यशस्, यथाव्यवहारं, यथारीति, साभ्यासं, अभ्यासेन, अभ्यासपूर्व्वं, यथाभ्यासं.

To habituate, *v. a.* अभ्यस् (c. 4. -अस्यति -असितुं), अभ्यासं कृ, अभ्यस्तं -स्तां -स्तं कृ, शिक्ष् (c. 10. शिक्षयति -यितुं), शील् (c. 10. शीलयति -यितुं); 'to be habituated,' अभ्यस्तः -स्ता -स्तं भू.

Habituated, *p. p.* अभ्यस्तः -स्ता -स्तं, शिक्षितः -ता -तं, कृताभ्यासः -सा -सं, शीलितः -ता -तं, अनुशीलितः -ता -तं, शीलः -ला -लं in comp.

Habitude, *s.* (Custom) व्यवहारः, आचारः, रीतिः *f.*, चरितं, चर्य्या, नित्यकृत्यं.—(Relation) सम्बन्धः, सम्पर्कः, प्रतीक्षा.—(Intercourse) संसर्गः.

To hack, *v. a.* (Mangle) व्यवच्छिद् (c. 7. -छिनत्ति -छेत्तुं), व्रश्च् (c. 6. वृश्चति, व्रश्चितुं), प्रव्रश्च्, विदॄ (c. 10. -दारयति -यितुं), बहुलवशः खण्ड् (c. 10. खण्डयति -यितुं) or छिद्, बहुखण्डशः कृ, खण्डं खण्डं कृ, बहुखण्डीकृ, क्षतविक्षतीकृ.

To hack, *v. n.* (For hire) अतिशरीरायासेन नीचकर्म्म कृ, निरन्तरायासं कृ, पण्यः -ण्या -ण्यं भू, सर्व्वप्रयोज्यः -ज्या -ज्यं भू, सर्व्वसाधारणीभू.

Hack, *s.* (Cut) प्रहारः, छेदः, आघातः, छुरिकाघातः.—(Horse kept for hire, worn out horse) कदश्वः, पण्याश्वः, भाटकीयवाजी *m.* (न्), साधारणवाजी *m.*, सर्व्वप्रयोज्यवाजी *m.*, पण्यघोटकः, अश्वकः; 'hack-carriage,' पण्यवाहनं, साधारणरथः.—(Drudge) निरन्तरायासी *m.* (न्), अतिदेहक्लेशेन नीचकर्म्मकारी *m.* (न्), हीनवृत्तिः *m.*, व्रातीनः.

Hacked, *p. p.* व्यवच्छिन्नः -न्ना -न्नं, क्षतविक्षतः -ता -तं, वृक्णः -क्णा -क्णं.

To hackle, *v. a.* वक्ष्यमाणयन्त्रेण शणं or अतसीं मृज् (c. 2. मार्ष्टि -र्ष्टुं) or सम्मृज्, or परिष्कृ or शुध् (c. 10. शोधयति -यितुं) or पृथक्कृ.

Hackle, *s.* अतसीमार्जनी, शणमार्जकः, शणशोधनी.

Hackney, *s.* (Horse) कदश्वः, अश्वकः, पण्याश्वः, पण्यघोटकः, साधारणवाजी *m.* (न्), भाटकीयवाजी *m.*—(Any thing much used, a drudge, a hireling) नीचकर्म्मणि नियुक्तः, नीचकर्म्मकारी *m.* (न्), निरन्तरायासी *m.* (न्), हीनवृत्तिः *m.*, वैतनिकः, पण्यः, साधारणः, सर्व्वप्रयोज्यः.—(Prostitute) पण्यस्त्री, साधारणस्त्री.

To hackney, *v. a.* नीचकर्म्मणि नियुज् (c. 7. -युनक्ति -योक्तुं, c. 10. -योजयति -यितुं), पण्यीकृ, साधारणीकृ, सर्व्वप्रयोज्यं -ज्यां -ज्यं कृ, जीर्णीकृ.

Hackney-coach, *s.* साधारणरथः, पण्यरथः, पण्यवाहनं, सर्व्वप्रयोज्यरथः.

Hackneyed, *p. p.* सर्व्वप्रयुक्तः -क्ता -क्तं, सर्व्वसाधारणः -णा -णी -णं, सर्व्वपण्यः -ण्या -ण्यं, अपकर्म्मनियुक्तः -क्ता -क्तं, जीर्णः -र्णा -र्णं.

Haddock, *s.* हड्डुक्संज्ञकः समुद्रीयमत्स्यभेदः.

Hades, *s.* प्रेतलोकः, अधोलोकः, अधोभुवनं, नरकः, पातालं.

Haft, *s.* (Handle) त्सरुः *m.*, तलः, वारङ्गः, मुष्टिः *m.* -ष्टी *f.*, दण्डः, कर्णः.

To haft, *v. a.* त्सरौ or तले or वारङ्गे निविश् (c. 10. -वेशयति -यितुं).

Hag, *s.* कुरूपी -पिणी, कुट्टिनी, डाकिनी, वृद्धा स्त्री, जरिणी.

Haggard, *a.* कृशाननः -ना -नं, क्षीणवदनः -ना -नं, क्षामवदनः -ना -नं, शुष्कवदनः -ना -नं, उग्रमुखः -खा -खं, उग्रदर्शनः -ना -नं.

Haggish, *a.* कुरूपिणी, अपरूपिणी, विरूपिणी, जरापरिणता.

To haggle, *v. a.* व्यवच्छिद् (c. 7. -छिनत्ति -छेत्तुं), क्षतविक्षतीकृ, खण्डशः कृ.

To haggle, *v. n.* (In bargaining) क्रयकाले विलप् (c. 1. -लपति -पितुं) or विचर् (c. 10. -चारयति -यितुं) or एतावन्न दातुम् इच्छामीति वादानुवादं कृ or न्यूनमूल्यं दित्सामीति वद् (c. 1. वदति -दितुं).

Haggler, *s.* क्रयकाले विलापी *m.* (न्) or एतावन्मूल्यं न दातुम् इच्छामीति वादानुवादकारी *m.* (न्).

Hagiographa, *s.* धर्म्मग्रन्थः, धर्म्मशास्त्रसंहिता, धर्म्मपुस्तकं.

Hah, *interj.* हा, अहो, अहोवत्, अहह, हाहा, आ, अयि, आश्चर्य्यं.

Hail, *s.* (Frozen rain) करका, करकावृष्टिः *f.*, शिला, शिलावृष्टिः *f.*, वर्षोपलः, पयोघनः, पयोगडः, घनकफः, मेघास्थि *n.*, मेघकफः, मेघगर्भः, धारा, तोयडिम्भः, मरुत्फलं, पिण्डाभं, धाराङ्कुरः, मटती, शिलीन्ध्रं, वार्पिला.

Hail, *exclam.* नमस्, स्वस्ति, कुशलं, कुशलं भूयात्, सुखं भूयात्, कल्याणं भूयात्, क्षेमं भवतु, शेवं, अभिवादये, अभिवन्दे.

To hail, *v. n.* (Pour down hail) करकासारं वृष् (c. 1. वर्षति -र्षितुं), शिला वृष्, उपलान् वृष् or पत् (c. 10. पातयति -यितुं).

To hail, *v. a.* (Call from a distance) दूराद् आह्वे (c. 1. -ह्वयति -ह्वातुं) or ह्वे or सम्बोधनं कृ or आक्रन्द् (c. 1. -क्रन्दति -न्दितुं) or आमन्त्र् (c. 10. -मन्त्रयते -यितुं) or समामन्त्र् or अभिभाष् (c. 1. -भाषते -षितुं) or आभाष्.—(Salute) वन्द् (c. 1. वन्दते -न्दितुं), अभिवन्द्, अभिवद् (c. 10. -वादयति -ते -यितुं), नमस्कृ, आमन्त्र्, उपास् (c. 2. -आस्ते -आसितुं).

Hailed, *p. p.* दूराद् आहूतः -ता -तं or अभिहितः -ता -तं or आमन्त्रितः -ता -तं, सम्बोधितः -ता -तं, आक्रन्दितः -ता -तं.

Hail-stone, *s.* शिला, वर्षोपलः, पयोघनः, करका, पयोगडः.

Hail-storm, *s.* करकासारः, करकावृष्टिः *f.*, शिलासारः.

Haily, *a.* करकामयः -यी -यं, शिलामयः -यी -यं, वर्षोपलमयः &c.

Hair, *s.* केशः, वालः, कचः, चिकुरः, वृजनः -जिनः, कुन्तलः.—(Of the head) केशः, शिरोरुहः, शिरोरुद् *m.*, शिरसिजः, मूर्द्धजः, कृशला.—(Of the body) लोम *n.* (न्), रोम *n.* (न्), तनुरुहः -हं, तनूरुहः -हं, तनुरुद् *m.* (ह्), तनुजं, अङ्कुरः; 'a head of hair,' कैश्यं, कैशिकं; 'a quantity of hair,' केशकलापः, केशपक्षः, केशोच्चयः, केशपाशः, कचपाशः, कचपक्षः, कचहस्तः, चिकुरपाशः, चिकुरपक्षः, चिकुरहस्तः; 'having much or fine hair,' केशी -शिनी -शि (न्), केशवान् -वती -वत् (त्), केशवः -वा -वं, केशिकः -की -कं; 'a fine head

of hair,' केशभारः, कबरीभारः -भरः; 'a braid of hair,' कबरी, केशगर्भः -र्भकः, केशवेशः; 'braided hair,' धम्मिल्लः, वेणिः -णी *f.*, वेणिका, प्रवेणिः -णी *f.*; 'a lock of hair,' अलकः -कं, चूर्णकुन्तलः, भ्रमरकः, काकपक्षः, शिखण्डः -ण्डकः, केशपाशी, चूडा, शिखा; 'clotted hair,' जटा, सटा; 'unentangled hair,' शीर्षण्यः, शिरस्यः; 'covered with hair,' लोमशः -शा -शं, बहुलोमा -मा -म (न्), रोमाक्रान्तः -न्ता -न्तं; 'point of hair,' बालाग्रं; 'erection of the hair,' रोमहर्षणं, उद्धर्षणं. *See* ERECTION.—(Filament of a plant) केशरः, केसरः.

HAIR-BELL, *s.* घण्टाकारपुष्पविशिष्ट ओषधिभेदः.

HAIR-BREADTH, *s.* एककेशान्तरं, एककचपरिमाणं, अत्यल्पान्तरं.

HAIR-BROOM, *s.* केशनिर्म्मिता मार्जनी, लोममयी शोधनी.

HAIR-BRUSH, *s.* केशमार्जनी, केशशोधनी, केशनिर्घर्षणकः.

HAIR-CLOTH, *s.* लोमनिर्म्मितं वस्त्रं, केशमयः पटः.

HAIR-CUTTER, *s.* केशच्छिद् *m.* छेत्ता *m.* (तृ), शिरोरुहच्छेदकः.

HAIR-DRESSER, *s.* केशरचकः, केशविरचकः, केशसंस्कारकृत् *m.*

HAIR-DRESSING, *s.* केशरचना, केशविरचनं -ना, केशसंस्कारः.

HAIRED, *a.* केशी -शिनी -शि (न्), केशवान् -वती -वत् (त्).

HAIRINESS, *s.* लोमशत्वं, रोमशत्वं, बहुलोमत्वं, लोमप्राचुर्य्यं.

HAIRLESS, *a.* अकेशः -शा -शं, विकेशः -शा -शं, केशहीनः -ना -नं, निर्लोमा -मा -म (न्), लोमरहितः -ता -तं, अविद्यमानलोमा &c.

HAIRY, *a.* लोमशः -शा -शं, रोमशः -शा -शं, बहुलोमा -मा -म (न्), प्रचुरलोमा &c., बहुकेशः -शा -शं, केशी -शिनी -शि (न्), केशकः -का -कं, केशिकः -की -कं, केशवः -वा -वं, बहुकेशवान् -वती -वत् (त्), लोमवान् &c., लोममयः -यी -यं, लोमपूर्णः -र्णा -र्णं.

HAKE, *s.* समुद्रीयमत्स्यभेदः.

HALBERD, *s.* युद्धे प्रयुक्तः काष्ठदण्डो लोहाग्रः शूलविशेषः, प्रासः, शक्तिः *f.*

HALBERDIER, *s.* पूर्व्वोक्तशूलधरः, शक्तिग्रहः, शाक्तीकः, प्रासिकः.

HALCYON, *s.* (Kingfisher) मत्स्यरङ्गः -ङ्गकः, सुचित्रकः, कुट्टकः.

HALCYON, *a.* प्रसन्नः -न्ना -न्नं, शान्तः -न्ता -न्तं, प्रशान्तः -न्ता -न्तं, निर्वेगः -गा -गं, निराकुलः -ला -लं, निर्वृतः -ता -तं, निर्वातः -ता -तं, सुखी -खिनी -खि (न्).

HALE, *a.* निरामयः -या -यं, नीरोगः -गा -गं, नीरुजः -जा -जं, नीरुक् *m.f.n.* (ज्), कल्यः -ल्या -ल्यं, आधिव्याधिरहितः -ता -तं, अक्षतः -ता -तं.

To HALE, *v. a.* कृष् (c. 1. कर्षति, क्रष्टुं), आकृष्, अपकृष्, अपहृ (c. 1. -हरति -हर्त्तुं).

HALF, *s.* अर्द्धं -र्द्धः, अर्द्धभागः, अर्द्धांशः; 'half an hour,' अर्द्धदण्डः; 'half a league,' अर्द्धक्रोशः; 'half a hundred,' अर्द्धशतं; 'half the body,' अर्द्धाङ्गं; 'a year and a half,' सार्द्धवत्सरः; 'a hundred and a half,' सार्द्धशतं; 'the best half,' उत्तमार्द्धं -र्द्धः; 'the last half,' अपरार्द्धं, पश्चार्द्धं; 'sharing a half,' अर्द्धभागी -गिनी -गि (न्), अर्द्धांशी -शिनी -शि (न्), अर्द्धी -र्द्धिनी -र्द्धि (न्); 'lasting half a month,' आर्द्धमासिकः -की -कं.

HALF, *a.* अर्द्धः -र्द्धा -र्द्धं, आर्द्धिकः -की -कं, अर्द्धिकः -का -कं; 'half assent,' अर्द्धाङ्गीकारः; 'half moon,' अर्द्धचन्द्रः.

HALF, *adv.* अर्द्धं, अर्द्धेन, सामि; 'half-man, half-woman,' अर्द्धेन पुरुषोऽर्द्धेन स्त्री; 'half-eaten,' अर्द्धभुक्तः -क्ता -क्तं, जग्धार्द्धः -र्द्धा -र्द्धं, सामिभुक्तः -क्ता -क्तं; 'half-drank,' अर्द्धपीतः -ता -तं, सामिपीतः -ता -तं; 'half-read,' अर्द्धवाचितः -ता -तं; 'half-spoken,' अर्द्धोक्तः -क्ता -क्तं; 'half-closed,' अर्द्धसंवृतः -ता -तं, मुकुलितः -ता -तं, निमीलितः -ता -तं.

HALF-BLOOD, *s.* or *a.* भिन्नोदरः -रा -रं, भिन्ननाभिः -भिः -भि, भिन्नगर्भः -र्भा -र्भं, असमानोदरः -रा -रं, भिन्नोदर्य्यः, अन्योदर्य्यः, भिन्नशरीरान्वयः.

HALF-BROTHER, *s.* वैमात्रः -त्रेयः, भ्राता द्वैमातुरः, अन्योदर्य्यः, सापत्नः.

HALF-DEAD, *a.* मृतकल्पः -ल्पा -ल्पं, मृतप्रायः -या -यं, मुमूर्षुः -र्षुः -र्षु, आसन्नमृत्युः -त्युः -त्यु, मरणोन्मुखः -खी -खं, अर्द्धमृतः -ता -तं, कण्ठगतप्राणः -णा -णं.

HALF-HEARD, *a.* अर्द्धश्रुतः -ता -तं, ईषच्छ्रुतः -ता -तं.

HALF-HOLIDAY, *s.* अर्द्धोत्सवः, अर्द्धमहोत्सवः, अर्द्धानध्यायः.

HALF-LEARNED, *a.* अल्पज्ञानी -निनी -नि (न्), किञ्चिज्ज्ञः -ज्ञा -ज्ञं, चुञ्चकः.

HALF-LOST, *a.* नष्टप्रायः -या -यं, आसन्ननाशः -शा -शं, नाशोन्मुखः -खी -खं.

HALF-MOON, *s.* अर्द्धचन्द्रः, चन्द्रार्द्धं, अर्द्धेन्दुः *m.*; 'shaped like a half-moon,' अर्द्धचन्द्राकारः -रा -रं, अर्द्धचन्द्राकृतिः -तिः -ति.

HALF-PAY, *s.* निवृत्तयुद्धस्य सैन्यस्य प्रकल्पितम् अर्द्धवेतनं.

HALF-PENNY, *s.* ताम्रमुद्रार्द्धं, ताम्रमुद्राविशेषः.

HALF-PIKE, *s.* लघुशूलः -लं, अदीर्घपरिमाणः शूलविशेषः, परिघः.

HALF-SEAS-OVER, *s.* ईषन्मत्तः -त्ता -त्तं, ईषदुन्मत्तः -त्ता -त्तं, ईषत्क्षीबः -बा -बं.

HALF-SISTER, *s.* वैमात्री, वैमात्रेयी, स्वसा द्वैमातुरी, अन्योदर्य्या.

HALF-SPHERE, *s.* अर्द्धमण्डलं, अर्द्धगोलः, मण्डलार्द्धं, भूगोलार्द्धं.

HALF-STARVED, *a.* अनाहारेण म्रियमाणः -णा -णं or मृतप्रायः -या -यं, क्षुधावसन्नः -न्ना -न्नं.

HALF-UTTERED, *a.* अर्द्धोक्तः -क्ता -क्तं, अर्द्धोदितः -ता -तं, अर्द्धकथितः -ता -तं.

HALF-WAY, *adv.* अर्द्धमार्गे, अर्द्धपथे, मध्यमार्गे, मध्यपथे.

HALF-WITTED, *a.* अल्पबुद्धिः -द्धिः -द्धि, अल्पधीः -धीः -धि, अल्पमेधाः -धाः -धः (स्).

HALF-YEAR, *s.* अर्द्धवत्सरः, वत्सरार्द्धं, अब्दार्द्धं, षण्मासः, अयनं.

HALF-YEARLY, *a.* षाण्मासिकः -की -कं, आर्द्धवर्षिकः -की -कं.

HALIBUT, *s.* वृहत्कायः समुद्रीयमत्स्यभेदः.

HALIDOM, *s.* शापः, शपथः, दिव्यं, सत्यं, प्रत्ययः.

HALITUOUS, *a.* प्राणसमभावः -वा -वं, वाष्पोपमः -मा -मं, धूमलः -ला -लं.

HALL, *s.* (Large room at the entrance of a house) शाला, वहिर्द्वारशाला, द्वारोपान्ते महाशाला, वाह्यकोष्ठः, कक्षा, कक्ष्या, किर्म्मी; 'a temporary hall,' मण्डपः -पा, जनाश्रयः; 'a judgment-hall,' विचारशाला.

HALLELUIAH, HALLELUJAH, *exclam.* ईश्वरस्य धन्यवादं or स्तुतिवादं कुरुत.

HALLELUIAH, *s.* ईश्वरस्य धन्यवादः or स्तुतिवादः or स्तुतिगानं.

HALLIARD, HALYARD, *s.* नौरज्जुः *m.*, नौगुणः, वातवसनोत्तोलनार्थं रज्जुः.

HALLOO, *interj.* भोः, भो, भोभो, हे, है, अये, अयि, अरे, रे, अहो, हंहो, हलहलाशब्दः.

To HALLOO, *v. n.* हलहलाशब्दं कृ, हलहला (nom. हलहलायते), भोः, हे, है इत्यादिशब्दैर् उत्क्रुश् (c. 1. -क्रोशति -क्रोष्टुं) or दूराद् आह्वे (c. 1. -ह्वयति -ह्वातुं), उच्चैःस्वरेण घुष् (c. 10. घोषयति -यितुं).

To HALLOO, *v. a.* (Set on by shouts) हे, है, हलहला इत्यादिशब्दैः कुक्कुरादीन् प्रचुद् (c. 10. -चोदयति -यितुं).

To HALLOW, *v. a.* (Make holy) पवित्रीकृ, पवित्रं -त्रां -त्रं कृ, पुण्यीकृ, पुण्यं -ण्यां -ण्यं कृ, पूज्यं -ज्यां -ज्यं कृ, शुद्धीकृ.—(Consecrate) संस्कृ, अभिसंस्कृ, अभिषिच् (c. 6. -षिञ्चति -षेक्तुं), प्रोक्ष् (c. 1. -उक्षति -क्षितुं), प्रतिष्ठा in caus. (-ष्ठापयति -यितुं), धर्म्मार्थं विनियुज् (c. 7. -युनक्ति -योक्तुं) or निर्दिश् (c. 6. -दिशति -देष्टुं).

HALLOWED, *p. p.* (Made holy, reverenced) पवित्रीकृतः -ता -तं, पवित्रितः -ता -तं, पूजितः -ता -तं, पूज्यः -ज्या -ज्यं, अर्चितः -ता -तं.—(Consecrated) संस्कृतः -ता -तं, कृतसंस्कारः -रा -रं, प्रतिष्ठितः -ता -तं, सुप्रतिष्ठितः -ता -तं, प्रोक्षितः -ता -तं, प्रणीतः -ता -तं, अभिषिक्तः -क्ता

-र्क्तं, धर्म्मार्थं विनियोजितः -ता -तं.

HALLUCINATION, *s.* मोहः, व्यामोहः, माया, भ्रमः, भ्रान्तिः *f.*, मतिविभ्रमः, मिथ्यामतिः *f.*, इन्द्रजालं, वञ्चना.

HALM, *s.* (Straw) तृणं, पलालः -लं -ली, पलः, धान्यकल्कं.

HALO, *s.* द्युतिमाला, अंशुमाला, सूर्य्यपरिगतं or चन्द्रपरिगतं द्युतिमण्डलं or दीप्तिमण्डलं or रश्मिवर्णमण्डलं, दीप्तिचक्रं, द्युतिवलयः, परिधिः *m.*, परिवेशः.

HALSER, *s.* नौरज्जुः *m.*, नौगुणः, नौबन्धनरज्जुः, नौबन्धनार्थं महागुणः.

HALT, *s.* (Stopping) अयानं, पथमध्ये स्थितिः *f.* or अवस्थितिः *f.*, स्थानं, आसनं, विश्रामः, यानविरतिः *f.*, विरामः, अवरतिः *f.*, स्तम्भः, यतिः *f.* —(Limping) लङ्गः.

HALT, *a.* (Lame) पङ्गुः -ङ्गुः -ङ्गु, खञ्जः -ञ्जा -ञ्जं, खोरः -रा -रं, गतिविकलः -ला -लं, पादविकलः -ला -लं.

To HALT, *v. n.* (Stop) पथमध्ये स्था (c. 1. तिष्ठति -ते, स्थातुं), संस्था, विष्ठा, अवस्था, or विरम् (c. 1. रमति -रन्तुं) or विश्रम् (c. 4. -श्राम्यति -श्रमितुं), स्तम्भ् (c. 1. स्तम्भते -म्भितुं).—(Limp) लङ्ग् (c. 1. लङ्गति -ङ्गितुं), खञ्जीभू, गतिविकलः -ला -लम् अस्.

HALTED, *p. p.* निवृत्तयानः -ना -नं, अवस्थितः -ता -तं, सन्निपन्नः -न्ना -न्नं.

HALTER, *s.* (Rope) कण्ठपाशः -शकः, कण्ठरज्जुः *m.*, पाशः, कण्ठलता, पलापः, प्रग्रहः, प्रग्राहः.

To HALTER, *v. a.* कण्ठपाशेन बन्ध् (c. 9. बध्नाति, बन्द्धुं), पाश (nom. पाशयति -यितुं).

To HALVE, *v. a.* अर्द्धीकृ, द्विसमभागीकृ, द्विधा कृ, द्विखण्डीकृ, द्व्यंशीकृ.

HALVED, *a.* अर्द्धकृतः -ता -तं, सामिकृतः -ता -तं, द्विसमभागीकृतः -ता -तं.

HALVES, *s. pl.* (To go halves) अर्द्धभागी -गिनी -गि भू, अर्द्धांशी -शिनी -शि भू.—(To cry halves) अर्द्धभागो ममेति वद् (c. 1. वदति -दितुं).

HAM, *s.* (Back of the knee) मन्दिरः, जङ्घोरुसन्धेः पश्चिमभागः.—(Thigh) सक्थि *n.*, जङ्घा, जाङ्घनी; 'seated on the hams,' कृतावसक्थिकः -का -कं.—(Dried hog's flesh) वल्लूरं, शूकरस्य शुष्कमांसं.

HAMADRYAD, *s.* वनदेवता, तरुदेवता, वृक्षाधिष्ठात्री देवता, वन्यस्त्री.

HAMLET, *s.* ग्रामः, क्षुद्रग्रामः, पल्लिः *f.*, पल्ली, पट्टः, खेटकः, निवसथः.

HAMMER, *s.* मुद्गरः, घनः, अयोघनः, अयोग्रं, मुषलः, मुसलः.

To HAMMER, *v. a.* मुद्गरेण आहन् (c. 2. -हन्ति -न्तुं) or तड् (c. 10. ताडयति -यितुं) or प्रहृ (c. 1. -हरति -हर्त्तुं).

To HAMMER, *v. n.* (Labour, work hard) महायत्नं कृ, महाकष्टेन मुहुर् मुहुर् उद्योगं कृ, पुनः पुनर् उत्साहं कृ or श्रम् (c. 4. श्राम्यति, श्रमितुं).

HAMMER-CLOTH, *s.* रथोपस्थपटलं, सूतासनाच्छादनं.

HAMMERER, *s.* मुद्गरेण ताडयिता *m.* (तृ), मुद्गरादिना कर्म्मकारी *m.* (न्).

HAMMERING, *s.* मुद्गरताडनं, मुद्गरप्रहरणं, मुद्गराघातः.

HAMMOCK, *s.* दोला -ली, दोलिका, प्रेङ्खा, खट्वा, प्रेङ्खोलनं.

HAMPER, *s.* पेटा -टी, पेटिका, पेटकः, करण्डः, डल्लकः.

To HAMPER, *v. a.* रुध् (c. 7. रुणद्धि, रोद्धुं), प्रतिरुध्, निरुध्, विरुध्, विहन् (c. 2. -हन्ति -न्तुं), व्याहन्, विघ्न (nom. विघ्नयति -यितुं), बाध् (c. 1. बाधते -धितुं), क्लेशं दा, शल्यं कृ.

HAMPERED, *p. p.* विरुद्धः -द्धा -द्धं, विघ्नितः -ता -तं, बाधितः -ता -तं.

HAMSTRING, *s.* मन्दिरशिरा, मन्दिरस्नायुः *m.*, जङ्घोरुसन्धिबन्धनं, ऊरुपर्व्व-बन्धनस्नायुः *m.*, जङ्घोरुबन्धनं.

To HAMSTRING, *v. a.* मन्दिरशिरां छिद् (c. 7. छिनत्ति, छेत्तुं), जङ्घोरुपर्व्वबन्धनं छित्त्वा गतिविकलं -लां -लं कृ.

HAMSTRUNG, *p. p.* छिन्नमन्दिरस्नायुः -युः -यु, छिन्नजङ्घोरुबन्धनः -ना -नं.

HANAPER, *s.* कोषः, राजकोषः, राजस्वकोषः, धनकोषः.

HAND, *s.* (Palm with the fingers) हस्तः, करः, पाणिः *m.*, पञ्चशाखः, भुजादलः, शयः, शमः, कुलिः *m.*, हरणः; 'the right hand,' अग्रहस्तः, अग्रकरः, अग्रपाणिः *m.*; 'the left hand,' वामहस्तः; 'the palm of the hand,' हस्ततलं, करतलं; 'the open hand,' प्रहस्तः, प्रपाणिः *m.*, चपेटः; 'back of the hand,' करपृष्ठं, अपहस्तः; 'hollow of the hand,' करपुटं, करकोषः, करपात्रं; 'both hands,' हस्तौ *m.* du., हस्तद्वयं, करद्वयं; 'a beautiful hand,' करकमलं, करपद्मं, करपल्लवः, करपङ्कजं; 'the hand below the wrist,' कलभं, हस्तपुच्छं; 'the clenched hand,' मुष्टिः *m. f.*, हस्तमुष्टिः; 'part of the hand sacred to the gods,' देवतीर्थं, दैवं; 'to the manes,' पितृतर्पणं, पितृतीर्थं, पित्र्यं; 'the hands and feet,' पाणिपादं; 'bound hand and foot,' संयमितकरचरणः -णा -णं; 'hand to hand,' हस्ताहस्ति, मुष्टीमुष्टि, बाहूबाहवि; 'hand in hand,' सहितं, सह, समं, योगतस्, सम्भूय, एकीभूय; 'with joined hands,' अभिगृहीतपाणिः -णिः -णि; 'with hands across,' व्यस्तपाणिः -णिः -णि; 'with one's own hand,' स्वहस्तेन; 'at hand,' उपस्थितः -ता -तं, आसन्नः -न्ना -न्नं, सन्निहितः -ता -तं; 'in hand, in one's possession,' हस्तस्थः -स्था -स्थं, हस्तस्थितः -ता -तं, हस्तवर्त्ती -र्त्तिनी -र्त्ति (न्), हस्तगतः -ता -तं; 'held in the hand,' करधृतः -ता -तं, करतलधृतः -ता -तं, करनिहितः -ता -तं, करप्राप्तः -प्ता -प्तं; 'in hand, ready to hand,' प्रस्तुतः -ता -तं, प्रत्युत्पन्नः -न्ना -न्नं, सिद्धः -द्धा -द्धं; 'matter in hand,' प्रस्तुतं; 'sword in hand,' खड्गपाणिः *m.*; 'staff in hand,' लगुडहस्तः; 'off hand,' अचिरेण, अविलम्बितं, आकस्मिकः -की -कं, प्रत्युत्पन्नः -न्ना -न्नं, अचिन्तापूर्व्वः -र्व्वा -र्व्वं; 'out of hand,' तत्काले, तत्क्षणात्, सपदि, सद्यस्; 'living from hand to mouth,' उत्पन्नभक्षी -क्षिणी -क्षि (न्); 'to take in hand,' आरभ् (c. 1. -रभते -रब्धुं), व्यवसो (c. 4. -स्यति -सातुं), उद्यवसो; 'to lend a hand,' उपकृ, साहाय्यं कृ, सहायत्वं कृ; 'to lay hands on,' धृ (c. 1. धरति, धर्त्तुं), ग्रह् (c. 9. गृह्णाति, ग्रहीतुं), हृ (c. 1. हरति, हर्त्तुं); 'to shake hands,' परस्परं पाणिं ग्रह, अन्योन्यं हस्तं or हस्तौ स्पृश् (c. 6. स्पृशति, स्प्रष्टुं); 'to have a hand in,' सहकारी -रिणी -रि भू or अस्; 'to get the upper hand,' अभिभू, प्रभू; 'to clap the hands,' करतालं कृ; 'to support with the hand,' करालम्बनं कृ; 'under-hand,' तिरस्, रहस्, छलेन.—(A measure) हस्तपरिमाणं, करतलपरिमाणं.—(Side, part) पार्श्वः, पक्षः, भागः; 'on the one hand,' एकतस्, एकत्र; 'on the other hand,' अन्यत्र, पुनर्; 'on all hands,' सर्व्वतस्, सर्व्वत्र.—(Action, performance) करणं, विधानं, प्रवृत्तिः *f.*, चेष्टा, क्रिया.—(Power, possession) शक्तिः *f.*, अधिकारः, आधिकारण्यं; 'fallen into one's hand,' हस्तगतः -ता -तं.—(Agent) कर्त्ता *m.* (र्तृ), कारः, कारकः, कर्म्मकरः.—(Index of a dial) कीलः, देशिनी, प्रदेशिनी, सूचिः *f.*, सूचिनी.—(Form of writing) स्वाक्षरं, स्वहस्ताक्षरं, लिपिः *f.*

To HAND, *v. a.* (Give with the hand) हस्तेन गृहीत्वा परहस्ते दा (c. 3. ददाति, दातुं) or प्रदा or ऋ in caus. (अर्पयति -यितुं) or समृ or प्रतिपद् (c. 10. -पादयति -यितुं).—(Guide or lead with the hand) हस्तेन नी (c. 1. नयति, नेतुं) or समानी or गम् in caus. (गमयति -यितुं).—(Support with the hand) करालम्बनार्थं हस्तं दा, करालम्बनं कृ.—(Hand down, transmit) क्रमागतं -तां -तं कृ, क्रमागतं -तां -तं, क्रमेण or पारम्पर्य्येण सञ्चर् (c. 10. -चारयति -यितुं) or सङ्क्रम् (c. 10. -क्रामयति -यितुं) or प्रतिपद्.

HAND-BARROW, *s.* हस्तसञ्चालितं वाहनं or यानं.

HAND-BELL, *s.* हस्तेन वादिता क्षुद्रघण्टा, घण्टिका, हस्तघण्टा.

HAND-BREADTH, *s.* एकहस्तपरिमाणं, एककरपरिमाणं, पाणितलं.

HANDCUFF, *s.* हस्तपाशः, पाणिबन्धनं, हस्तबन्धः, करबन्धनं.

To HANDCUFF, *v.a.* हस्तौ पाशेन बन्ध् (c. 9. बध्नाति, बन्द्धुं), पाणिबन्धनं कृ.

HANDCUFFED, *p.p.* बद्धहस्तः -स्ता -स्तं, यन्त्रितकरः -रा -रं, संयमितकरः -रा -रं.

HANDED, *p. p.* (Given into the hand) हस्ते दत्तः -त्ता -त्तं or अर्पितः -ता -तं.—(Led with the hand) हस्तेन नीतः -ता -तं.—(Supported with the hand) दत्तहस्तः -स्ता -स्तं, आलम्बितकरः -रा -रं.—(Handed down) पारम्पर्य्यक्रमागतः -ता -तं, क्रमायातः -ता -तं, पारम्पर्य्येण सञ्चारितः -ता -तं.

HANDFUL, *s.* मुष्टिः *m. f.*, हस्तपूरणं, पाणिपूरणं, गण्डूषः -षा, मुष्टिपरिमितं द्रव्यं; 'a handful of grass,' तृणमुष्टिः.

HAND-GALLOP, *s.* ईषत्पुलायितं, अर्द्धपुलायितं, ईषद्वल्गितं, अर्द्धवल्गितं.

HAND-GUN, *s.* हस्तद्वारेण प्रयुक्ता आग्नेयनाडिः, हस्तनाडिः.

HANDICRAFT, *s.* शिल्पं, शिल्पकर्म्म *n.* (न्), शिल्पिकं, शिल्पविद्या, हस्तकर्म्म *n.*, हस्तव्यापारः, हस्तव्यवसायः.

HANDICRAFTSMAN, *s.* शिल्पी *m.* (न्), शिल्पकारः, कर्म्मकारः, हस्तव्यापारी *m.* (न्), हस्तव्यवसायी *m.* (न्), पाणिघः.

HANDILY, *adv.* सदाक्ष्यं, दाक्ष्येण, दक्षं, करदाक्ष्येण, हस्तकौशल्येन, हस्तलाघवेन, कुशलं, निपुणं, चतुरं, सलाघवं, युक्त्या.

HANDINESS, *s.* दक्षता, दाक्ष्यं, हस्तकौशल्यं, करदक्षता, हस्तलाघवं, हस्तपादादिक्षिप्रता, युक्तिः *f.*, कौशल्यं, कुशलता, सुप्रयोगः -गता, नैपुण्यं, चातुर्य्यं, चतुरता, पटुता, क्षिप्रता.

HANDIWORK, *s.* हस्तकर्म्म *n.* (न्), हस्तव्यापारः, हस्तकृतं कर्म्म.

HANDKERCHIEF, *s.* नक्तकः, वरकं, मुखमार्जनी, गात्रमार्जनी; 'neck-handkerchief,' कण्ठवेष्टनं, गलावेष्टनं, कण्ठवस्त्रं.

To HANDLE, *v. a.* (Feel with the hand) स्पृश् (c. 6. स्पृशति, स्प्रष्टुं), संस्पृश्, परिस्पृश्, हस्तेन परामृश् (c. 6. -मृशति -म्रष्टुं) or परिमृश् or आलभ् (c. 1. -लभते -लब्धुं) or समालभ् or घट्ट (c. 10. घट्टयति -यितुं) or परिघट्ट्.—(Manage) प्रणी (c. 1. -णयति -णेतुं), विधा (c. 3. -दधाति -धातुं).—(Use) प्रयुज् (c. 7. -युनक्ति -युंक्ते -योक्तुं), उपयुज्.—(Treat) आचर् (c. 1. -चरति -रितुं), व्यवहृ (c. 1. -हरति -हर्त्तुं).—(Discuss) विचर् (c. 10. -चारयति -यितुं), विमृश्.

HANDLE, *s.* मुष्टिः *m. f.*, वारङ्गः, दण्डः, तलः, तालः, नालः, कर्णः.—(Of a sword, &c.) त्सरुः *m.*, सरुः *m.*, तलः, तालः.—(Of a plough) ईषादण्डः; 'become a handle,' नालयितः -ता -तं.

HANDLED, *p. p.* स्पृष्टः -ष्टा -ष्टं, संस्पृष्टः -ष्टा -ष्टं, परामृष्टः -ष्टा -ष्टं, परिमृष्टः -ष्टा -ष्टं, परिघट्टितः -ता -तं, करघट्टितः -ता -तं, करपरिघट्टितः -ता -तं.

HANDLESS, *a.* अहस्तः -स्ता -स्तं, विहस्तः -स्ता -स्तं, अकरः -रा -रं.

HAND-MAID, *s.* दासी, दासिका, चेटी, सेविका, परिचारिका.

HAND-MILL, *s.* यन्त्रपेषणी, हस्तेन सञ्चालिता पेषणी.

HAND-RAIL, *s.* (Of a staircase) सोपाने उभयतः स्थापिता क्षुद्रस्तम्भपंक्तिः.

HAND-SAW, *s.* हस्तसञ्चारितं करपत्रं, हस्तसञ्चालितः क्रकचः.

HANDSEL, *s.* प्रथमविक्रयः, आदिविक्रयः, प्रथमप्रयोगः, प्रथमव्यवहारः, प्रथमकर्म्म *n.* (न्), आदिक्रिया.

To HANDSEL, *v. a.* प्रथमं कृ or प्रयुज् (c. 7. -युनक्ति -युंक्ते -योक्तुं), प्रथमप्रयोगं कृ.

HANDSOME, *a.* (Beautiful) सुरूपः -पी -पं, रूपवान् -वती -वत् (त्), रूपी -पिणी -पि (न्), रूपोपेतः -ता -तं, सुगात्रः -त्री -त्रं, स्वङ्गः -ङ्गी -ङ्गं, वराङ्गः -ङ्गी -ङ्गं, दर्शनीयः -या -यं, सुदृश्यः -श्या -श्यं, चारुः -र्वी -रु, चारुदर्शनः -ना -नं, सौम्यः -म्या -म्यी -म्यं, सुन्दरः -रा -री -रं, शोभनः -ना -नं, कान्तः -न्ता -न्तं, लावण्यवान् -वती -वत् (त्), वामः -मा -मं, वामिलः -ला -लं, पुष्कलः -ला -लं, सिंहसंहननः -ना -नं; 'having a handsome countenance,' शुभाननः -ना -नं, चारुवदनः -ना -नं, सुमुखः -खा -खी -खं, आननाब्जः -ब्जा -ब्जं; 'a handsome woman,' रूपवती, प्रमदा. Often expressed by सु; as, 'having handsome teeth,' सुदन् -दती -दत् (त्); 'having handsome eyes,' सुनयनः -ना -नं, सुदृक् *m. f. n.* (श्); 'having a handsome waist,' सुमध्यमा.—(Generous, liberal) उदारः -रा -रं, वदान्यः -न्या -न्यं, स्थूललक्ष्यः -क्ष्या -क्ष्यं, अकृपणः -णा -णं.—(Ample, large) विपुलः -ला -लं, विशालः -ला -लं, प्रचुरः -रा -रं, बृहत् -हती -हत् (त्).

HANDSOMELY, *adv.* (With beauty or grace) चारु, सुन्दरं, सौन्दर्य्येण, लावण्येन, सलावण्यं, शोभनं, शोभया.—(Generously) उदारवत्, वदान्यवत्, अकृपणं.

HANDSOMENESS, *s.* सुरूपता, रूपवत्त्वं, रूपं, रूपलावण्यं, दर्शनीयता, सुदृश्यता, चारुता, सौम्यता, सौन्दर्य्यं, कान्तता, शोभा, वामता.

HAND-STROKE, *s.* कराघातः, हस्ताघातः, पाणिघातः, हस्तप्रहारः, हस्तपातः.

HAND-WEAPON, *s.* हस्तायुधं, हस्तशस्त्रं, हस्तास्त्रं, हस्तप्रहरणं.

HAND-WRITING, *s.* स्वहस्ताक्षरं, हस्ताक्षरं, स्वाक्षरं, हस्तलिखनं, हस्तलेखा.—(In general) लेखः -खा, लिखनं, लिपिः *f.*, लिविः *f.*, अक्षरसंस्थानं.

HANDY, *a.* दक्षः -क्षा -क्षं, करदक्षः -क्षा -क्षं, लघुहस्तः -स्ता -स्तं, चतुरः -रा -रं, कुशलः -ला -लं, निपुणः -णा -णं, क्षिप्रः -प्रा -प्रं, युक्तिमान् -मती -मत् (त्), सुप्रयोगवान् -वती -वत् (त्), पटुः -टुः -टु, लघुः -घुः -घु.—(Convenient, ready, near) उपयुक्तः -क्ता -क्तं, प्रस्तुतः -ता -तं, प्रत्युत्पन्नः -न्ना -न्नं, आसन्नः -न्ना -न्नं, निकटः -टा -टं, समीपस्थः -स्था -स्थं.

HANDY-BLOW, *s.* कराघातः, हस्ताघातः, पाणिघातः; 'handy-blows,' मुष्टीमुष्टि.

To HANG, *v. a.* उद्बन्ध् (c. 9. -बध्नाति -बन्द्धुं), उद्बन्धनं कृ, उद्बद्धं -द्धां -द्धं कृ, ऊर्द्ध्वं or उच्चैः or विहायसा बन्ध्, आन्दोल (nom. आन्दोलयति -यितुं); 'by a loop,' काच (nom. काचयति -यितुं).—(Put to death by hanging) रज्जुपाशेन उद्बन्ध्, उद्बन्धनेन हन् (c. 2. हन्ति -न्तुं or caus. घातयति -यितुं) or प्राणदण्डं कृ.—(With curtains, &c.) यवनिकादिना परिवेष्ट् (c. 1. -वेष्टते -ष्टितुं) or प्रच्छद् (c. 10. -छादयति -यितुं).

To HANG, *v. n.* (Be suspended) उद्बन्ध् in pass. (-बध्यते), ऊर्द्ध्वं or उच्चैर् बन्ध्.—(Dangle) लम्ब् (c. 1. लम्बते -म्बितुं), अवलम्ब्, प्रलम्ब्, लुल् (c. 1. लोलति -ते -लितुं), लुठ् (c. 6. लुठति -ठितुं), चञ्च् (c. 1. चञ्चति -ञ्चितुं).—(Swing) दोल (nom. दोलायते -यितुं), प्रेङ्ख् (c. 1. प्रेङ्खति -ङ्खितुं).—(Depend) अवलम्ब्, समालम्ब्, आश्रि (c. 1. -श्रयति -ते -यितुं), अधीनः -ना -नं भू.—(Cling to) अवलम्ब्, समालम्ब्, संलग्नीभू, अनुलग्नीभू, लग्नीभू, अनुबन्ध् in pass., सञ्ज् in pass. (सज्यते, सज्जते).—(Hang back) विलम्ब्.—(Hang by) अवलम्ब्; 'hanging by the mouth,' मुखेन अवलम्ब्य.—(Hang down) अवलम्ब्, प्रलम्ब्, अधो लम्ब्.—(Hang over, impend) उपस्था (c. 1. -तिष्ठति -स्थातुं), प्रत्युपस्था.—(Hang over, project) बहिर्लम्ब्.—(Hang one's self) आत्मदेहम् उद्बन्ध्, रज्जुपाशेन आत्मघातं कृ.—(Hang the head) शिरो नम् (c. 10. नामयति, नमयति -यितुं) or अवनम्.

HANGER, *s.* (One who hangs) उद्बन्धा *m.* (न्धृ), उद्बन्धनकृत्.—(Sort of sword) ह्रस्वपत्रः खड्गविशेषः, हस्तकृपाणः.

HANGER-ON, *s.* उपजीवी *m.* (न्), अनुजीवी *m.*, पराम्भोजी *m.* (न्), परपिण्डादः, पराधीनः, पात्रेसमितः, पीठमर्द्दः.

HANGING, *s.* उद्बन्धनं, ऊर्द्ध्वबन्धनं.—(Tapestry, drapery) यवनिका, चित्रयवनिका, यवनिका, प्रच्छदपटः, अपटी, परिच्छदः, वसनं, अम्बरं.

HANGING, *part.* (Dangling, being suspended) लम्बमानः -ना -नं,

लम्बः -म्बा -म्बं, प्रलम्बः -म्बा -म्बं, लम्बितः -ता -तं, अवलम्बितः -ता -तं, अवलम्बः -म्बा -म्बं, अवलम्बी -म्बिनी -म्बि (न्), विलम्बमानः -ना -नं; 'hanging the head,' नतमूर्द्धा -र्द्धा -र्द्ध (न्), अवनतशिराः -राः -रः (स्).

Hangman, *s.* दण्डपाशिकः, मृतपाः *m.*, घातुकपुरुषः, उद्बन्धनकर्म्माधिकृतः.

Hang-nail, *s.* नखाङ्कुरः, नखमूलाङ्कुरः, नखकीलः.

Hank, *s.* (A bundle of skeins) पञ्जिकासमूहः.—(Wooden ring) काष्ठवलयः.—(Check) संयमः, नियहः, यन्त्रणं, निरोधः.

To hanker after, *a.* अभिलष् (c. 1. -लषति, c. 4. -लष्यति -लषितुं), वाञ्छ् (c. 1. वाञ्छति -ञ्छितुं), अभिवाञ्छ्, स्पृह् (c. 10. स्पृहयति -यितुं), कांक्ष् (c. 1. कांक्षति -क्षितुं), आकांक्ष्, अनुकांक्ष्, उत्कण्ठ् (c. 1. -कण्ठते -ण्ठितुं), लुभ् (c. 4. लुभ्यति, लोब्धुं), कम् (c. 10. कामयते -यितुं), लभ् in des. (लिप्सते -प्सितुं), गृध् (c. 4. गृध्यति, गर्धितुं).

Hankering, *s.* स्पृहा, अभिलाषः, वाञ्छा, उत्कण्ठा, आकांक्षा.

Hap, hap-hazard, *s.* दैवं, दैवयोगः, दैवगतिः *f.*, दैवघटना, अदृष्टं, सङ्गतिः *f.*, दैवसङ्गतं, नियतिः *f.*

Hapless, *a.* दुर्भाग्यः -ग्या -ग्यं, अभाग्यः -ग्या -ग्यं, मन्दभाग्यः -ग्या -ग्यं, दैवहीनः -ना -नं, निर्दैवः -वा -वं, अधन्यः -न्या -न्यं, हतभाग्यः -ग्या -ग्यं.

Haply, *adv.* दैवात्, दैववशात्, दैवयोगेन, अदृष्टवशात्, अकस्मात्, अनिश्चितं, अचिन्तितं, अपिनाम, किल.

To happen, *v. n.* घट् (c. 1. घटते -टितुं), निपत् (c. 1. -पतति -तितुं), आपत्, सम्पद् (c. 4. -पद्यते -पत्तुं), उपपद्, समापद्, उत्पद्, उपस्था (c. 1. -तिष्ठति -स्थातुं), समुपस्था, सम्भू (c. 1. -भवति -वितुं), संवृत (c. 1. -वर्त्तते -र्त्तितुं), वृत्, आगम् (c. 1. -गच्छति -गन्तुं), उपागम्, दैवात् or अकस्माद् भू.

Happened, *p. p.* घटितः -ता -तं, उपस्थितः -ता -तं, समुपस्थितः -ता -तं, समापन्नः -न्ना -न्नं, उपपन्नः -न्ना -न्नं, उत्पन्नः -न्ना -न्नं, निपतितः -ता -तं, आपतितः -ता -तं, वृत्तः -त्ता -त्तं, संवृत्तः -त्ता -त्तं, आगतः -ता -तं, उपागतः -ता -तं, सम्भूतः -ता -तं.

Happily, *adv.* (Fortunately) सौभाग्येन -ग्यात्, कल्याणात्, दिष्ट्या, सुभगं.—(In a state of happiness) सुखं, सुखेन, यथासुखं, सौख्येन, स्वास्थ्येन.

Happiness, *s.* सुखं, सौख्यं, सुखित्वं, आनन्दः, आह्लादः, धन्यता, हर्षः, कल्याणं, शर्म्म *n.* (न्), श्रेयस्, निःश्रेयसं, क्षेमः -मं, स्वास्थ्यं, कुशलं, शुभं, मङ्गलं, माङ्गल्यं, कौशल्यं, भद्रं, सौभाग्यं, सम्पत्तिः *f.*, सम्पद् *f.*, निर्वृतिः *f.*, निवृतिः *f.*, श्रीः *f.*, पुण्योदयः, शस्तं, मतल्लिका, मचर्चिका, प्रकाण्डं, उद्घः, तल्लजः.

Happy, *a.* सुखी -खिनी -खि (न्), सुखयुक्तः -क्ता -क्तं, सुखभागी -गिनी -गि (न्), आनन्दी -न्दिनी -न्दि (न्), हृष्टः -ष्टा -ष्टं, प्रीतः -ता -तं, तुष्टः -ष्टा -ष्टं, प्रहृष्टः -ष्टा -ष्टं, प्रमोदी -दिनी -दि (न्), प्रमुदितः -ता -तं, विशोकः -का -कं, शोकहीनः -ना -नं, सुस्थः -स्था -स्थं, निर्वृतः -ता -तं, अकातरः -रा -रं, तृप्तः -प्ता -प्तं, मग्नः -ग्ना -ग्नं.—(Fortunate, prosperous) धन्यः -न्या -न्यं, सौभाग्यवान् -वती -वत् (त्), भाग्यवान् &c., पुण्यवान् &c., पुण्यः -ण्या -ण्यं, शर्म्मवान् &c., क्षेमवान् &c., क्षेमः -मा -मं, क्षेम्यः -म्या -म्यं, कुशली -लिनी -लि (न्), कुशलः -ला -लं, कल्याणः -णा -णं -णी -णिनी -णि (न्), शुभः -भा -भं, शुभान्वितः -ता -तं, शुभंयुः -युः -यु, भद्रः -द्रा -द्रं, श्रीमान् -मती -मत् (त्), श्रीयुक्तः -क्ता -क्तं, लक्ष्मीवान् &c., मङ्गलः -ला -लं, शिवः -वा -वं, भावुकः -का -कं, भविकः -का -कं, भव्यः -व्या -व्यं, श्वःश्रेयसः -सा -सं, शस्तः -स्ता -स्तं, लक्षणः -णा -णं, श्रीलः -ला -लं, समृद्धः -द्धा -द्धं, अधिकर्द्धिः -र्द्धिः -र्द्धि, वर्द्धिष्णुः -ष्णुः -ष्णु, निरापद् *m. f. n.*; 'a happy moment,' शुभलग्नः; 'a happy result,' शुभफलं, स्वर्गः; 'having a happy result,'

स्वन्तः -न्ता -न्तं; 'to be happy,' सुख (nom. सुखायते).

Harangue, *s.* वाक्यं, अलङ्कारमयं वाक्यं, रसिकवाक्यं.

To harangue, *v. n.* बहुजनसमाजे अलङ्कारमयं वाक्यं वद् (c. 1. वदति -दितुं), अभिवद्, अभिभाष् (c. 1. -भाषते -षितुं).

Haranguer, *s.* बहुजनसमाजे अलङ्कारमयवाक्यवक्ता *m.* (क्तृ), वागीशः, वागीश्वरः, प्रवचनपटुः, वाक्यद्वारेण विस्मयोत्पादकः or इन्द्रियमोहकः.

To harass, *v. a.* (Fatigue) खिद् (c. 10. खेदयति -यितुं), आयस् (c. 10. -यासयति -यितुं), सद् (c. 10. सादयति -यितुं), अवसद्, क्लम् (c. 10. क्लमयति -यितुं), परिक्लम्, श्रम् (c. 10. श्रमयति -यितुं), परिश्रम्, ग्लै in caus. (ग्लपयति -यितुं).—(Vex) बाध् (c. 1. बाधते -धितुं), प्रबाध्, परिबाध्, क्लिश् (c. 9. क्लिश्नाति, क्लेशितुं), संक्लिश्, पीड् (c. 10. पीडयति -यितुं), परिपीड्, उपपीड्, प्रपीड्, अभिपीड्, अभिनिपीड्, निपीड्, सम्पीड्, आपीड्, व्यथ् (c. 10. व्यथयति -यितुं), अर्द् (c. 10. अर्दयति -यितुं), समर्द्, दु (c. 5. दुनोति, दोतुं), प्रदु, तप् (c. 10. तापयति -यितुं), परितप्, सन्तप्, कृप् (c. 10. कर्पयति -यितुं), अभिकृप्, उपरुध् (c. 7. -रुणद्धि, रोद्धुं), मथ् (c. 1. मथति, c. 9. मथ्नाति, मन्थितुं), प्रमथ्, क्षि (c. 5. क्षिणोति, क्षेतुं), रध् (c. 10. रन्धयति -यितुं), उपहन् (c. 2. -हन्ति -न्तुं).

Harassed, *p. p.* खेदितः -ता -तं, खिन्नः -न्ना -न्नं, श्रान्तः -न्ता -न्तं, परिश्रान्तः -न्ता -न्तं, क्लान्तः -न्ता -न्तं, बाधितः -ता -तं, क्लिष्टः -ष्टा -ष्टं, क्लिशितः -ता -तं, क्लेशितः -ता -तं, परिक्लिष्टः -ष्टा -ष्टं, पीडितः -ता -तं, अर्दितः -ता -तं, अभ्यर्दितः -ता -तं, समर्दितः -ता -तं, अवसादितः -ता -तं, दूनः -ना -नं, उपहतः -ता -तं, व्यथितः -ता -तं, विडम्बितः -ता -तं, दूर्मनायमानः -ना -नं; 'to be harassed,' खिद् (c. 4. खिद्यते).

Harasser, *s.* खेदकरः, श्रमकरः, बाधकः, क्लेशकः, पीडकः, पीडाकरः.

Harassing, *a.* खेदजनकः -का -कं, क्लेशकरः -री -रं, दुःखकरः -री -रं.

Harbinger, *s.* अग्रेसरः, अग्रसरः, अग्रगः, अग्रगामी *m.* (न्), पुरोगः -गामी *m.* (न्), प्राग्गामी *m.*, अग्रवर्त्ती *m.* (न्), अग्रगतः, दूतः, वार्त्तावाहकः, वार्त्ताहरः, सन्देशहरः; 'harbinger of spring,' वसन्तदूतः.

Harbor, *s.* (For ships) खातं, नौबन्धनयोग्यं खातं, नौबन्धनखातं, नौरक्षणस्थानं, नौकाश्रयः.—(Shelter, place of rest) आश्रयः, समाश्रयः, संश्रयः, प्रतिश्रयः, आशयः, अवस्थानं, अवकाशः, वासस्थानं, निवासस्थानं, आवासस्थानं.

To harbor, *v. a.* आश्रयं कृ or दा, अवकाशं दा, वासस्थानं दा, वस् in caus. (वासयति -यितुं), निवस्, सत्कृ.—(Entertain in the mind) मनसि or मनसा धृ (c. 1. धरति, धर्त्तुं) or उपलभ् (c. 1. -लभते -लब्धुं) or ग्रह् (c. 9. गृह्णाति, ग्रहीतुं).

To harbor, *v. n.* आश्रि (c. 1. -श्रयति -यितुं), समाश्रि, वस् (c. 1. वसति, वस्तुं), निवस्.

Harborage, *s.* आश्रयः, समाश्रयः, संश्रयः, अवस्थानं, अवकाशः.

Harborer, *s.* आश्रयकर्त्ता *m.* (र्त्तृ), आश्रयः, आशयिता *m.* (तृ), अवस्थापकः, ग्रहीता *m.* (तृ).

Harborless, *a.* निराश्रयः -या -यं, आश्रयहीनः -ना -नं, निर्वासः -सा -सं.

Hard, *a.* (Firm, solid, compact) दृढः -ढा -ढं, घनः -ना -नं, कठिनः -ना -नं, कर्कशः -शा -शं, कठोरः -रा -रं, संहतः -ता -तं, अशिथिलः -ला -लं, अमसृणः -णा -णं, वज्रः -ज्रा -ज्रं, ग्रावा -वा -व (न्), वज्रमयः -यी -यं, दृढसन्धिः -न्धिः -न्धि, कर्करः -रा -रं, जरठः -ठा -ठं, गाढः -ढा -ढं, प्रगाढः -ढा -ढं, कीकसः -सा -सं, कक्खटः -टा -टं, कटोलः -ला -लं, क्रूरः -रा -रं, निष्ठुरः -रा -रं, द्रवेतरः -रा -रं.—(Hard to be understood) दुर्ज्ञेयः -या -यं.—(Difficult, not easy to be done) कठिनः -ना -नं, दुष्करः -रा -री -रं, दुःसाध्यः -ध्या -ध्यं, दुष्करः -रा -रं, असुकरः -री -रं, असुगमः -मा -मं, विषमः -मा -मं, कष्टः -ष्टा -ष्टं,

दुर्निवहः -हा -हं, आयासकृतः -ता -तं, दुःखसाध्यः -ध्या -ध्यं, दुःखेन कार्य्यः -र्य्या -र्य्यं or साध्यः -ध्या -ध्यं. Often expressed by दुर् or दुःख in comp.; as, 'hard to be borne,' दुःसहः -हा -हं; 'hard to obtain,' दुर्लभः -भा -भं, दुःखलभ्यः -भ्या -भ्यं, दुष्प्रापः -पा -पं, दुःखेन प्राप्यः -प्या -प्यं; 'hard to be crossed,' दुस्तरः -रा -रं, दुस्तार्य्यः -र्य्या -र्य्यं; 'hard to be broken,' दुर्भेद्यः -द्या -द्यं, दुःखभेद्यः -द्या -द्यं; 'hard to be relinquished,' दुस्त्यजः -जा -जं.—(Fatiguing, painful, laborious) कष्टकरः -री -रं, दुःखी -खिनी -खि (न्), दुःखकरः -रा -रं, क्लेशी -शिनी -शि (न्), क्लेशकः -का -कं.—(Severe, harsh) कठोरः -रा -रं, निष्ठुरः -रा -रं, उग्रः -ग्रा -ग्रं, उग्रदण्डः -ण्डा -ण्डं, तीक्ष्णः -क्ष्णा -क्ष्णं, क्रूरः -रा -रं, कर्कशः -शा -शं, रूक्षः -क्षा -क्षं.—(Unfavorable) अननुकूलः -ला -लं; 'hard fate,' दुर्दैवं.—(Sour, acid) अम्लरसः -सा -सं, शुक्तः -क्ता -क्तं.

HARD, *adv.* (Near, hard by) समीपं, निकटे, उपान्ते, आरात्, आसन्नः -न्ना -न्नं, सन्निकृष्टः -ष्टा -ष्टं.—(With difficulty) दुःखेन, कष्टेन, कृच्छ्रेण, आयासेन, कठिनं, विषमं, दुर् prefixed. (Violently, with force) बलेन, बलात्, बलवत्, तीव्रं, तीक्ष्णं, प्रसभं.—(Hard) शीघ्रं, सत्वरं, त्वरितं.

HARD-BOUND, *a.* दृढबद्धः -द्धा -द्धं, दृढग्रन्थिः -न्थिः -न्थि, बद्धकोष्ठः -ष्ठा -ष्ठं.

HARD-DRINKER, *s.* मद्यपानप्रसक्तः, पानरतः, अतिपायी *m.* (न्).

HARD-EARNED, *a.* श्रमेणोपार्ज्जितः -ता -तं, कृच्छ्रोपार्ज्जितः -ता -तं, कृच्छ्राप्तः -प्ता -प्तं.

To HARDEN, *v. a.* कठिनीकृ, घनीकृ, कठोरीकृ, दृढीकृ, कर्कशीकृ, स्तम्भीकृ, कठिनं -नां -नं कृ.

To HARDEN, *v. n.* कठिनीभू, घनीभू, कठोरीभू, दृढीभू, कर्कशीभू.

HARDENED, *p.p.* कठिनीकृतः -ता -तं, घनीकृतः -ता -तं, दृढीभूतः -ता -तं.

HARD-FEATURED, *a.* कठिनवदनः -ना -नं, कठिनमुखः -खी -खं, दुर्मुखः -खी -खं.

HARD-FISTED, *a.* कठिनमुष्टिः -ष्टिः -ष्टि, दृढमुष्टिः -ष्टिः -ष्टि.

HARD-HEARTED, *a.* कठिनहृदयः -या -यं, कठिनान्तःकरणः -णा -णं, पाषाणहृदयः -या -यं, अयोहृदयः -या -यं, निर्दयः -या -यं, निरनुक्रोशः -शा -शं, दुर्हृदयः -या -यं, अक्लिन्नहृदयः -या -यं, वज्रमयः -यी -यं.

HARD-HEARTEDNESS, *s.* कठिनहृदयता, हृदयकाठिन्यं, निरनुक्रोशता.

HARDIHOOD, *s.* वीर्य्यं, वीरता, धीरत्वं, धृतिः *f.*, धैर्य्यं, शौर्य्यं, शूरता, साहसं, निर्भयत्वं, प्रगल्भता, प्रागल्भ्यं, स्थैर्य्यं, स्थिरता.

HARDILY, *adv.* शूरवत्, वीरवत्, धीरवत्, धैर्य्येण, साहसेन, धीरं.

HARDINESS, *s.* (Boldness) शौर्य्यं, धीरत्वं, धैर्य्यं, धृतिः *f.*, वीरता.—(Of body) देहकाठिन्यं, शरीरदृढता, दृढदेहत्वं.

HARDLY, *adv.* (With difficulty) दुःखेन, कष्टेन, कृच्छ्रेण, कठिनं, कष्टं, आयासेन, दुर् prefixed.—(Scarcely, barely) कष्टं, कष्टेन, कृच्छ्रेण.—(Severely) निष्ठुरं, कठोरं, उग्रं, तीक्ष्णं, नैष्ठुर्य्येण.

HARD-MOUTHED, *a.* कठिनमुखः -खा -खं, दृढमुखः -खा -खं, कठोरमुखः -खा -खं.

HARDNESS, *s.* (Firmness, solidity) दृढता, दार्ढ्यं, द्रढिमा *m.* (न्), कठिनता, काठिन्यं, घनता, कठोरता, द्राढ्यं, कर्कशता, कार्कश्यं, निष्ठुरता.—(Difficulty to be understood) दुर्ज्ञेयता, अस्पष्टता.—(Difficulty to be effected) दुःसाध्यता, दुष्करत्वं, काठिन्यं, कठिनता, असौकर्य्यं, कष्टत्वं.—(Severity) निष्ठुरता, नैष्ठुर्य्यं, कठोरता, उग्रता, तीक्ष्णता, कर्कशता, कार्कश्यं.

HARDS, *s. pl.* शणोच्छिष्टं, शणावशिष्टं, शणशेषं, अतसीशणादेः शेषभागः.

HARDSHIP, *s.* क्लेशः, कायक्लेशः, देहक्लेशः, शरीरक्लेशः, श्रमः, आयासः, शरीरायासः, कष्टं, खेदः, परिश्रमः.—(Oppression) बाधः -धा, अभिद्रोहः, निष्ठुरता, उत्पातः.

HARDWARE, *s.* पिठरकटाहादीनि लौहभाण्डानि, लोहमयभाण्डं -ण्डानि *n.pl.*, लोहादिनिर्म्मितभाण्डानि.

HARDWAREMAN, *s.* लौहभाण्डविक्रयी *m.* (न्), पिठरकटाहादिभाण्डविक्रेता *m.* (तृ).

HARDY, *a.* (Bold, brave) शूरः -रा -रं, वीरः -रा -रं, प्रवीरः -रा -रं, प्रगल्भः -ल्भा -ल्भं, साहसी -सिनी -सि (न्), प्रतिभानवान् -वती -वत् (त्), प्रतिभावान् &c.—(In body) दृढदेहः -हा -हं, कठिनदेहः -हा -हं, दृढशरीरः -रा -रं.

HARE, *s.* शशः, शशकः, लम्बकर्णः, लोमकर्णः -र्णकः, मृदुलोमकः, मृदुरोमवान् *m.* (त्).

HAREBRAINED, *a.* चपलबुद्धिः -द्धिः -द्धि, चञ्चलबुद्धिः -द्धिः -द्धि, विभ्रान्तशीलः -ला -लं.

HAREHUNTING, *s.* शशकाखेटः, शशकानुसरणं.

HARELIP, *s.* शशकौष्ठः, छिन्नौष्ठः, शशकौष्ठरूपेण छिन्नौष्ठः.

HAREM, *s.* (Women's apartments) अन्तःपुरं, अवरोधः -धनं, अवरोधगृहं, अवरोधायनं, स्त्रीगृहं, स्त्र्यगारं, शुद्धान्तः, भोगगृहं, भोगावासः, कलत्रावासः, सुविदत्रं; 'guard of the harem,' शुद्धान्तपालकः.

HARESKIN, *s.* शशोर्णं, शशलोम *n.* (न्), शशचर्म्म *n.* (न्), शशकाजिनं.

HARICOT, *s.* शाकमूलादिना सह सिद्धं मांसं.

HARK, *interj.* शृणु, कर्णं देहि, अवधीयतां, निशामय.

HARLEQUIN, *s.* चित्रवेशो भण्डविशेषः, वैहासिकः, परिहासवेदी *m.* (न्).

HARLOT, *s.* वेश्या, गणिका, पण्यस्त्री, पण्याङ्गना, पण्याजनः, पणाङ्गना, वारस्त्री, वाराङ्गना, वारविलासिनी, वारसुन्दरी, पुंश्चली, भोग्या, बन्धकी, दारिका, भ्रष्टा, साधारणस्त्री, सामान्या स्त्री, व्यभिचारिणी, कुलटा, निशाचरी, ग्रामणीः, वेश्या, रूपाजीवा, कुम्भा, लञ्जिका, कर्कोटा, बन्धुरा, खपारण्डा; 'a company of harlots,' गाणिक्यं.

HARLOTRY, *s.* वेश्यात्वं, वेश्यावृत्तिः *f.*, वेश्याव्यवसायः, वैशिकं, पौंश्चल्यं, वारसेवा, वेश्यासेवा.

HARM, *s.* हिंसा -सनं, क्षतिः *f.*, परिक्षतिः *f.*, क्षतं, द्रोहः, अभिद्रोहः, अपायः, नाशः, अपकारः, अपकृतं, पीडा, व्यथा, अपचयः, अपचितिः *f.*, विहेठः -ठनं, हानिः *f.*, दूषणं, दोषः, अनिष्टं, अपहारः, क्षयः, अर्दना.

To HARM, *v. a.* हिंस् (c. 7. हिनस्ति, c. 1. हिंसति -सितुं), उपहिंस्, विहिंस्, अहिंस्; अपकृ; अर्द् (c. 10. अर्दयति -यितुं), समर्द्, पीड् (c. 10. पीडयति -यितुं), व्यथ् (c. 10. व्यथयति -यितुं), क्षण् (c. 8. क्षणोति -णितुं), परिक्षण्, क्षतिं कृ, परिक्षतिं कृ, दुष् (c. 10. दूषयति -यितुं), द्रुह् (c. 4. द्रुह्यति, द्रोग्धुं), उपहन् (c. 2. -हन्ति -न्तुं), बाध् (c. 1. बाधते -धितुं), रिष् (c. 1. रेषति, c. 4. रिष्यति, रेष्टुं).

HARMED, *p. p.* हिंसितः -ता -तं, विहिंसितः -ता -तं, क्षतः -ता -तं, परिक्षतः -ता -तं, विक्षतः -ता -तं, अर्दितः -ता -तं, पीडितः -ता -तं, निपीडितः -ता -तं, व्यथितः -ता -तं, दूषितः -ता -तं, अपकृतः -ता -तं, कृतापकारः -रा -रं, विहतः -ता -तं, रिष्टः -ष्टा -ष्टं.

HARMFUL, *a.* हिंस्रः -स्रा -स्रं, हिंसकः -का -कं, हिंसात्मकः -का -कं, हिंसाजनकः -का -कं, हिंसाकरः -री -रं, क्षतिकारकः -का -कं, क्षतिजनकः -का -कं, अपकारकः -का -कं, द्रोही -हिणी -हि (न्), भूतघ्नक् *m.f.n.* (ह्), नृशंसः -सा -सं, शारुकः -का -कं, शरारुः -रुः -रु, घातुकः -का -कं, उपघातकः -का -कं, सबाधः -धा -धं, रिष्वः -ष्वा -ष्वं.

HARMFULLY, *adv.* हिंसापूर्व्वं, क्षतिपूर्व्वं, सद्रोहं, सापकारं, सदूषणं.

HARMLESS, *a.* अहिंसकः -का -कं, अहिंस्रः -स्रा -स्रं, हिंसारहितः -ता -तं, अनपकारी -रिणी -रि (न्), अद्रोही -हिणी -हि (न्), अनुपघातकः -का -कं.—(Innocent) निर्दोषः -षा -षं, अदुष्टः -ष्टा -ष्टं, निष्पापः -पा -पं.

HARMLESSLY, *adv.* अहिंसया, अहिंसापूर्व्वं, अद्रोहेण, दोषं विना.

HARMLESSNESS, *s.* अहिंसा, अनपकारः, अद्रोहः, हिंसात्यागः, अहिंसकत्वं,

अनपकारकता.—(Innocence) निर्दोषत्वं, अदुष्टता, शुद्धत्वं, पापहीनता.

HARMONIC, HARMONICAL, *a.* एकतालः -ला -लं, एकस्वरः -रा -रं, एकतानः -ना -नं, समस्वरः -रा -रं, मधुरस्वरः -रा -रं, सङ्गतस्वरः -रा -रं.

HARMONICA, *s.* (Musical glasses) जलतरङ्गः.

HARMONICS, *s.* मधुरस्वराः *m. pl.*, सुस्वरविद्या, चारुस्वनविद्या.

HARMONIOUS, *a.* (Symphonious) एकतालः -ला -लं, एकस्वरः -रा -रं, सङ्गतस्वरः -रा -रं, समस्वरः -रा -रं, एकस्वनः -ना -नं, एकलयः -या -यं, एकतानः -ना -नं.—(Melodious) सुस्वरः -रा -रं, मधुरस्वरः -रा -रं, मधुरस्वनः -ना -नं, सुचारुस्वनः -ना -नं, श्रोत्राभिरामः -मा -मं, श्रोत्रसुखः -खा -खं, श्रुतिसुखः -खा -खं, सुखश्रवः -वा -वं, सुश्राव्यः -व्या -व्यं, सुशब्दः -ब्दा -ब्दं, मधुरः -रा -रं, मधुकः -का -कं.—(Consonant, agreeing) सदृशः -शी -शं, अविरुद्धः -द्धा -द्धं, अनुगुणः -णा -णं, अनुसारी -रिणी -रि (न्), तुल्यः -ल्या -ल्यं.

HARMONIOUSLY, *adv.* (With symphony) स्वरैक्येन, तालैक्येन, एकस्वरेण, स्वरसङ्गेन, सङ्गतस्वरेण.—(Melodiously) सुस्वरं, मधुरस्वरेण.—(Agreeably, in concord) सदृशं, अविरुद्धं, अनुसारेण.

HARMONIOUSNESS, *s.* तालैक्यं, स्वरैक्यं, स्वरसङ्गः, सुस्वरता, सुश्राव्यता, माधुर्य्यं, सादृश्यं, सदृशता, अविरुद्धता.

To HARMONIZE, *v. n.* (Agree) सदृशीभू, सदृशः -शी -शम् अस्, एकीभू, तुल्यीभू, अनुगुणीभू, न विरुध् (c. 7. -रुणद्धि -रोद्धुं).

To HARMONIZE, *v. a.* सदृशीकृ, सदृशं -शीं -शं कृ, एकीकृ, तुल्यीकृ.—(Make musical) तालैक्यं कृ, स्वरैक्यं कृ, सुस्वरीकृ, सुश्राव्यं -व्यां -व्यं कृ.

HARMONY, *s.* (Of sound, musical concord) तालैक्यं, स्वरैक्यं, स्वरसङ्गः, स्वरैकता, एकतालः, एकतानः, एकलयः; 'of singing, dancing, and music,' तौर्य्यत्रिकं, सङ्गीतं.—(Melody) सुस्वरता, सुश्राव्यता, स्वरमाधुर्य्यं, कलता, तालः.—(Agreement, concord) ऐक्यं, एकता, सङ्गः, योग्यता, सादृश्यं, अविरोधः, आनुरूप्यं, अनुसारिता, संयोगः, सन्धिः *m.*, दाक्षिण्यं; 'of sentiment,' सम्मतिः *f.*, एकचित्तता, चित्तैक्यं, मतैक्यं, परस्परानुमतिः *f.*, संवादः.—(Friendship, love) प्रीतिः *f.*, मैत्र्यं, स्नेहः, सौहृद्यं.

HARNESS, *s.* (Of a horse) अश्वसज्जा, अश्वपरिच्छदः, अश्वाभरणं, अश्वप्रसाधनं, रथ्यसज्जा.—(Accoutrements) सज्जा, सन्नाहः, परिच्छदः, परिधानं, पारिणाह्यं, प्रसाधनं.

To HARNESS, *v. a.* (Fix a horse to a chariot) अश्वं रथे नियुज् (c. 7. -युनक्ति -योक्तुं, c. 10. -योजयति -यितुं) or युज् or आयुज्; रथम् अश्वेन संयुज्.—(Put on the furniture of a horse) अश्वं सज्जीकृ or ससज्जं कृ, अश्वसज्जनं कृ.—(Accoutre) सज्ज् (c. 1. सज्जति -ज्जितुं), सन्नह् (c. 4. -नह्यति -नद्धुं), पिनह्.

HARNESSED, *p. p.* रथनियुक्तः -क्ता -क्तं, रथसंयोजितः -ता -तं, आयुक्तः -क्ता -क्तं, संसक्तयुगः -गा -गं, संयुक्तः -क्ता -क्तं, सज्जीकृतः -ता -तं, सज्जितः -ता -तं, ससज्जः -ज्जा -ज्जं.

HARNESS-MAKER, *s.* अश्वसज्जाकर्त्ता *m.* (र्त्तृ), अश्वपरिच्छदकारी *m.* (न्).

HARP, *s.* वल्लकी, वीणा, विपञ्ची -ञ्चिका, तन्त्री, रुद्री.

To HARP, *v. n.* (Play on the harp) वल्लकीं or वीणां वद् (c. 10. वादयति -यितुं); 'celebrate on the harp,' उपवीण (nom. उपवीणयति -यितुं); 'harp on a subject,' अतिप्रसङ्गं कृ, पुनरुक्तिं कृ, प्रपञ्चं कृ, दीर्घसूत्रः -त्रा -त्रं भू.

HARPER, *s.* वीणावादः -दकः, वैणिकः, वीणापाणिः, वल्लकीवादः.

HARPOON, *s.* तिमिवेधनार्थं शूलः, धीवरी, तिमिवेधनी, मकरवेधनी.

HARPOONER, *s.* तिमिवेधकः, मकरवेधकः, मीनराघाती *m.* (न्).

HARPSICHORD, *s.* तन्त्रवाद्यविशेषः, तन्त्री, वल्लकी, विपञ्चिका.

HARPY, *s.* कविकल्पितः स्त्रीमुखो गृध्रपक्षिशरीरः लुलुब्धशीलो जन्तुभेदः.—(Plunderer) अपहारकः, साहसिकः, विप्रलुम्पकः, उपद्रवी *m.* (न्).

HARRIDAN, *s.* वृद्धबन्धकी, जीर्णवेश्या, वृद्धा गणिका.

HARRIER, *s.* शशकाखेटकः कुक्कुरभेदः, शशकाखेटे शिक्षितो मृगव्यश्वा *m.* (न्).

HARROW, *s.* कोटिशः, कोटीशः, लोष्टभेदनः, लोष्टघ्नः, आकर्षणी, जित्यः.

To HARROW, *v. a.* कोटिशेन भूमिं कृष् (c. 6. कृषति, क्रष्टुं), पूर्व्वोक्तयन्त्रेण मृल्लोष्टानि भिद् (c. 7. भिनत्ति, भेत्तुं) or दृ in caus. (दारयति -यितुं).—(Lacerate, torment) विदृ in caus., सन्तप् (c. 10. -तापयति -यितुं), कृष् (c. 10. कर्षयति -यितुं).

HARROWER, *s.* कोटिशेन भूमिकर्षकः or मृल्लोष्टभेदकः.

HARROWING, *a.* विदारकः -का -कं, अरुन्तुदः -दा -दं, सन्तापकः -का -कं.

To HARRY, *v. a.* बाध् (c. 1. बाधते -धितुं), पीड् (c. 10. पीडयति -यितुं), क्लिश् (c. 9. क्लिश्नाति, क्लेशितुं), व्यथ् (c. 10. व्यथयति -यितुं).

HARSH, *a.* (Rough to the touch) रूक्षः -क्षा -क्षं, रुक्षः -क्षा -क्षं, परुषः -षा -षं, दुःखस्पर्शः -र्शा -र्शं, कर्कशः -शा -शं, विषमः -मा -मं, असमृणः -णा -णं.—(Rough to the ear) कर्णकटुः -टुः -टु, कर्कशस्वनः -ना -नं, कर्कशस्वरः -रा -रं, विस्वरः -रा -रं, कुश्राव्यः -व्या -व्यं, विकृतस्वरः -रा -रं.—(Rough to the taste, sour) शुक्तः -क्ता -क्तं, अम्लरसः -सा -सं, कषायः -या -यं, कषायान्वितः -ता -तं.—(Austere, severe, crabbed) निष्ठुरः -रा -रं, कर्कशः -शा -शं, उग्रः -ग्रा -ग्रं, कठिनः -ना -नं, क्रूरः -रा -रं, कटुः -टुः -टु, कठोरः -रा -रं, जरठः -ठा -ठं, कोटकः -का -कं, जाल्मः -ल्मा -ल्मं; 'harsh words,' कर्कशवाक्यं, परुषवचनं, परुषोक्तिः *f.*, शुक्तं, विकृष्टवचनं.

HARSHLY, *adv.* (Roughly) रूक्षं, परुषं, कर्कशं, विषमं.—(Discordantly) विस्वरं, कर्कशं, कर्कशस्वरेण, विकृतस्वरं.—(Severely, austerely) निष्ठुरं, नैष्ठुर्य्येण, कर्कशं, कार्कश्येन, सकार्कश्यं, कठिनं, काठिन्येन, उग्रं, कठोरं, कटु.

HARSHNESS, *s.* (Roughness to the touch) रूक्षता, रौक्ष्यं, परुषता, पारुष्यं, कार्कश्यं, वैषम्यं, दुःखस्पर्शत्वं.—(Roughness to the ear) कर्णकटुता, कर्कशता, विस्वरता, कुश्राव्यता.—(Roughness to the taste) शुक्तता, अम्लता, कषायत्वं, कटुता.—(Severity, austerity) निष्ठुरता, नैष्ठुर्य्यं, कर्कशता, कार्कश्यं, उग्रता, कठिनता, काठिन्यं, क्रूरता, कठोरता, कटुता, पारुष्यं, शुक्तता, व्यलीकता, जाल्मता.

HARSLET, HASLET, *s.* शूकरान्त्राणि *n. pl.*, शूकरस्य हृद्यकृदन्त्रादि.

HART, *s.* मृगः, हरिणः, कुरङ्गः -ङ्गकः -ङ्गमः, कृष्णसारः, एणः.

HARTSHORN, *s.* मृगशृङ्गं, मृगविषाणः; 'spirits of hartshorn,' मृगशृङ्गादिनिर्यासः, मृगशृङ्गादिनिष्कर्षितो रसः.

HARUM-SCARUM, *a.* चपलः -ला -लं, अस्थिरः -रा -रं, प्रमादी -दिनी -दि (न्).

HARVEST, *s.* (The season of gathering the corn) शस्यसङ्ग्रहकालः, शस्यच्छेदनकालः, शस्यकर्त्तनसमयः, शस्यलवनकालः, गोधूमकर्त्तनकालः, शस्यसञ्चयकालः, शस्यसङ्ग्रहः.—(Gathered corn) सङ्गृहीतशस्यं, लूनशस्यं, छिन्नशस्यं.

To HARVEST, *v. a.* शस्यसङ्ग्रहं कृ, शस्यं सङ्ग्रह् (c. 9. -गृह्णाति -ग्रहीतुं) or छिद् (c. 7. छिनत्ति, छेत्तुं) or लू (c. 9. लुनाति, लवितुं) or चि (c. 5. चिनोति, चेतुं), शस्यसञ्चयं कृ.

HARVEST-HOME, *s.* शस्यसङ्ग्रहकालमुद्दिश्य ग्राम्यजनसेवितो महोत्सवः.

HARVEST-LORD, *s.* शस्यच्छेत्तॄणां मध्यात् प्रधानच्छेत्ता *m.* (त्तृ), श्रेष्ठः शस्यसङ्ग्राहकः or शस्यसङ्ग्रहीता *m.* (तृ), प्रधानलवकः.

HARVEST-MAN, HARVESTER, *s.* शस्यच्छेत्ता *m.* (त्तृ), शस्यसङ्ग्राहकः, शस्यसङ्ग्रहीता *m.* (तृ), शस्यसञ्चयी *m.* (न्), शस्यलवकः, धान्यादिसञ्चयकारी *m.* (न्).

To HASH, *v. a.* खण्डं खण्डं कृ, खण्डशः कृ or छिद् (c. 7. छिनत्ति, छेत्तुं) or विच्छिद्, शकलीकृ, खण्डीकृ.

HASH, *s.* (Hashed meat) व्यञ्जनादिना सह सिद्धं छिन्नमांसं or खण्डमांसं.

HASP, *s.* कुडुपः, ग्रन्थिः *m.*, बन्धनी, बन्धनकुडुपः.

To HASP, *v. a.* पृष्ठोक्तकुडुपेन बन्ध् (c. 9. बध्नाति, बन्द्धुं).

HASSOCK, *s.* भजनशालायां पीठविशेषो यस्मिन् ईश्वरपूजको जानुद्वयं न्यस्य पूजां करोति, पादपः, विस्तरः.

HASTE, *s.* त्वरा, तूर्णिः *f.*, त्वरणं, त्वरितं, सत्वरता, सम्भ्रमः, शीघ्रता, शैघ्र्यं, क्षिप्रता, द्रुतत्वं, वेगः -गिता, आवेगः, जवः, प्रजवः, जूतिः *f.*, जूर्णिः *f.*, तरस् *n.*, रभसः, अविलम्बः, आशुकारित्वं, क्षिप्रकारित्वं, त्वरितगतिः *f.*, आशुगमनं, रंहतिः *f.*; 'in haste,' ससम्भ्रमं, सत्वरं; 'to make haste,' त्वर् (c. 1. त्वरते -रितुं); 'make haste,' त्वर्यतां.

To HASTE, HASTEN, *v. a.* त्वर् in caus. (त्वरयति -यितुं), सन्त्वर्, क्षेप (nom. क्षेपयति -यितुं), क्षिप्रीकृ, द्रुततरं -रां -रं कृ.

To HASTE, HASTEN, *v. n.* त्वर् (c. 1. त्वरते -रितुं), सन्त्वर्, अतित्वर्, शीघ्र (nom. शीघ्रायते), तरण (nom. तरण्यति); 'to move with haste,' आशु or सत्वरं or त्वरितं गम् (c. 1. गच्छति, गन्तुं) or चल् (c. 1. चलति -लितुं), द्रु (c. 1. द्रवति, द्रोतुं), धाव् (c. 1. धावति -वितुं); 'to hasten towards,' अभिद्रु, आद्रु, समाद्रु, समुपद्रु, प्रतिद्रु, अभिधाव्.

HASTILY, *adv.* सत्वरं, त्वरितं, क्षिप्रं, शीघ्रं, आशु, तूर्णं, ससम्भ्रमं, सरभसं, सहसा, द्रुतं, वेगतस्, अविलम्बितं, सपदि, झटिति.—(Passionately) क्रोधात्, कोपात्, क्रोधाविष्टत्वात्.

HASTINAPUR, *s.* (The city) हस्तिनापुरं, हस्तिनीपुरं, गजाह्वं -ह्वयं.

HASTINESS, *s.* (Haste, speed) सत्वरता -त्वं, शीघ्रता, शैघ्र्यं, क्षिप्रता, द्रुतता, आशुता.—(Precipitation) क्षिप्रकारिता, आशुकारित्वं, साहसं. —(Of temper) शीघ्रकोपित्वं.

HASTINGS, *s. pl.* प्रथमसतीलकः, प्राक्पूर्णकालात् स्वादनीयः सतिलकः.

HASTY, *a.* (Quick, expeditious) त्वरितः -ता -तं, त्वरावान् -वती -वत् (त्), त्वरायुक्तः -क्ता -क्तं, सत्वरः -रा -रं, त्वरान्वितः -ता -तं, तूर्णः -र्णा -र्णं, शीघ्रः -घ्रा -घ्रं, क्षिप्रः -प्रा -प्रं, द्रुतः -ता -तं, शीघ्रकारी -रिणी -रि (न्), क्षिप्रकारी &c., आशुकारी &c., अविलम्बः -म्बा -म्बं -म्बी -म्बिनी -म्बि (न्), अविलम्बितः -ता -तं.—(Rash) साहसी -सिनी -सि (न्).—(In temper) शीघ्रकोपी -पिनी -पि (न्), सुलभकोपः -पा -पं.

HAT, *s.* ऊर्णामयं शिरस्कं or शिरस्त्रं or शिरस्त्राणं or मस्तकाभरणं.

HAT-BAND, *s.* शिरस्कबन्धनं -नी, शिरस्कवेष्टनं.

HAT-BOX, HAT-CASE, *s.* शिरस्काधारः, शिरस्कभाण्डं, शिरस्कधारकः.

To HATCH, *v. a.* कुलायनिलायेन पक्षिशावकान् अण्डाद् उत्पद् (c. 10. -पादयति -यितुं) or जन् (c. 10. जनयति -यितुं) or डिम्बाद् निर्गम् (c. 10. -गमयति -यितुं) or उद्भू in caus. (-भावयति -यितुं), कुलायनिलायं कृ.—(Contrive) प्रचिन्त् (c. 10. -चिन्तयति -यितुं), परिचिन्त्, घट् (c. 1. घटते -टितुं).

To HATCH, *v. n.* अण्डात् or डिम्बाद् उत्पद् (c. 4. -पद्यते) or जन् (c. 4. जायते) or उद्भू or समुद्भू.

HATCH, *s.* (A brood) यः पक्षिशावकगण एकवारे डिम्बाद् उत्पद्यते or जायते, पक्षिशावकगणः.—(Contrivance, discovery) परिकल्पनं -ना, घटनं, विवृतिः *f.*—(Opening in a ship's deck) नौपृष्ठे द्वारं, नौकामुखं, नौकोदरनिःसरणपथः, नौकोदरद्वारं.

HATCHEL, *s.* शणसीमार्जकः, उमामार्जनी, उमाशोधनी, शणप्रसाधनी.

To HATCHEL, *v. a.* पृष्ठोक्तमार्जकयन्त्रेण शणमं शुध् (c. 10. शोधयति -यितुं).

HATCHER, *s.* परिकल्पकः, प्रचिन्तकः, परिचिन्तकः, घटकः.

HATCHET, *s.* टङ्कः, तङ्कः, कुठारः -री, वृक्षभिद् *f.*, वृक्षभेदी *m.* (न्), परशुः *m.f.*, पर्शुः, परश्वधः, छिदिः *f.*, स्वधितिः *m.f.*, इध्मप्रव्रश्चनं, पाषाणदारणः.

HATCHET-FACE, *s.* टङ्कमुखं, टङ्कधारोपमम् अतिक्षीणवदनं.

HATCHING, *s.* कुलायनिलायेन डिम्बात् or अण्डाद् शावकोत्पादनं or पक्षिशावकोत्पत्तिः *f.*, पक्षिशावकोद्भवः.

HATCHMENT, *s.* गृहस्योपरि स्थापितं मृतजनस्य कुलचिह्नफलकं.

HATCHWAY, *s.* नौपृष्ठे द्वारं, नौकोदरद्वारं, नौकोदरनिःसरणपथः, नौकोदरगमनागमनपथः.

To HATE, *v. a.* द्विष् (c. 2. द्वेष्टि -ष्टुं), विद्विष्, प्रद्विष्, गर्ह् (c. 1. गर्हते -र्हितुं), घृण् (c. 6. घृणते -णितुं), घृणां कृ, कुत्स् (c. 10. कुत्सयति -यितुं), गुप् in des. (जुगुप्सते -प्सितुं), ऋत् (irreg. ऋतीयते -यितुं), द्रुह् (c. 4. द्रुह्यति, द्रोहितुं, द्रोग्धुं), अभिद्रुह्, बाध् in des. (बीभत्सते -त्सितुं), द्वेषं कृ; 'he hates his enemy,' रिपुं द्वेष्टि, or रिपुं प्रति द्वेषं करोति.

HATE, *s.* द्वेषः, विद्वेषः, विद्विष्टता, घृणा, अप्रीतिः *f.*

HATED, *p.p.* द्विष्टः -ष्टा -ष्टं, विद्विष्टः -ष्टा -ष्टं, घृणितः -ता -तं, गर्हितः -ता -तं.

HATEFUL, *a.* द्वेष्यः -ष्या -ष्यं, द्वेषणीयः -या -यं, विद्विष्टः -ष्टा -ष्टं, गर्ह्यः -र्ह्या -र्ह्यं, गर्हणीयः -या -यं, गर्हितः -ता -तं, कुत्सितः -ता -तं, घृणार्हः -र्हा -र्हं, अप्रियतः -ता -तं.

HATEFULLY, *adv.* द्वेषणीयं, गर्हणीयं, गर्हितं, कुत्सितं, घृणार्हं.

HATEFULNESS, *s.* द्वेष्यता, द्वेषणीयता, गर्ह्यता, घृणार्हत्वं, कुत्सितत्वं.

HATER, *s.* द्वेषी *m.* (न्), विद्वेषी *m.*, विद्वेष्टा *m.* (तृ), प्रद्वेष्टा *m.*, द्विट् *m.* (ष्), विद्विट् *m.*, प्रद्विट् *m.*, द्वेषणः, विरोधी *m.* (न्), घृणाकारी *m.* (न्).

HATRED, *s.* द्वेषः, विद्वेषः, प्रद्वेषः, विद्विष्टता, घृणा, गर्हा -र्हणं, कुत्सा -त्सनं, अप्रीतिः *f.*, ऋतीया, विरोधः, द्वेष्यता, जुगुप्सा, बीभत्सः.

HATTER, *s.* ऊर्णामयशिरस्ककारः, शिरस्कविक्रेता *m.* (तृ).

HAUBERK, *s.* कञ्चुकः, कवचः, तनुत्रं, वारवाणः, वाणवारः.

HAUGHTILY, *adv.* सदर्पं, साटोपं, समानं, सगर्वं, सोन्मार्थं, सोन्मादं, प्रगल्भं, उद्धतं, सावहेलं, सावलेपं, दर्पेण, गर्वेण, धर्षेण.

HAUGHTINESS, *s.* मानं, अभिमानं -नता, मानिता, अभिमानिता, दर्पः, गर्वः, प्रगल्भता, प्रागल्भ्यं, अहङ्कारः, उद्धतिः *f.*, औद्धत्यं, उन्माथः, उन्मादः, अवहेला -लनं, अवलेपः, अवलिप्तता, सावलेपत्वं, चित्तसमुन्नतिः *f.*, चित्तोन्नतिः *f.*, उत्सिक्तता, आटोपः, साटोपत्वं, धर्षः, प्रतिभानं, शौटीर्य्यं.

HAUGHTY, *a.* मानी -निनी -नि (न्), मानवान् -वती -वत् (त्), अभिमानी &c., अभिमानवान् &c., गर्वी -र्विणी -र्वि (न्), गर्वितः -ता -तं, सदर्पः -र्पा -र्पं, साटोपः -पा -पं, दृप्तः -प्ता -प्तं, दृप्रः -प्रा -प्रं, प्रगल्भः -ल्भा -ल्भं, अहङ्कारी -रिणी -रि (न्), उद्धतः -ता -तं, मदोद्धतः -ता -तं, मदोदग्रः -ग्रा -ग्रं, उत्सिक्तः -क्ता -क्तं, शौटीरः -रा -रं, अवलिप्तः -प्ता -प्तं, प्रधर्षितः -ता -तं, प्रधृष्टः -ष्टा -ष्टं, ऊर्द्ध्वदृष्टिः -ष्टिः -ष्टि, सावहेलः -ला -लं, सोन्माथः -था -थं; 'to be haughty,' दृप् (c. 4. दृप्यति, दर्प्तुं, द्रप्तुं), प्रगल्भ् (c. 1. -गल्भते -ल्भितुं).

To HAUL, *v. a.* कृष् (c. 1. कर्षति, c. 6. कृषति, क्रष्टुं, कर्ष्टुं), आकृष्, हृ (c. 1. हरति -ते, हर्त्तुं).

HAUL, *s.* आकर्षः -र्षणं, कर्षः -र्षणं, आकृष्टिः *f.*, हरणं.

HAULED, *p.p.* कृष्टः -ष्टा -ष्टं, आकृष्टः -ष्टा -ष्टं, आकर्षितः -ता -तं, हृतः -ता -तं.

HAUM, *s.* शस्यनालः -ली, पलः, पलालः -लं, तृणं.

HAUNCH, *s.* उत्सङ्गः, कटिः *m.* -टी, जघनं, नितम्बः, क्रोडः, पालिः *f.*, प्रोथः, अङ्कः, श्रोणिः *f.* -णी, पश्चाद्भागः; 'haunch of venison,' मृगजघनं.

To HAUNT, *v. a.* and *n.* पुनःपुनः or वारं वारम् अभिगम् (c. 1. -गच्छति -गन्तुं) or अभ्यागम् or अभिसृ (c. 1. -सरति -सर्तुं, c. 10. -सारयति -यितुं) or अभिसारणं कृ, मुहुर्मुहुर् गमनागमनं कृ, नित्यगमनं कृ, नित्यम् आश्रि (c. 1. -श्रयति -ते -यितुं).

Haunt, *s.* स्थानं यत्र पुनःपुनर् अभिगमः or अभिसारणं क्रियते, गमनागमनस्थानं, नित्यगमनस्थानं, आश्रयः, समाश्रयः, आशयः, आयतनं, आलयः, निलयः.

Haunted, *p. p.* or *a.* पुनःपुनर् आश्रितः -ता -तं or अभिसारितः -ता -तं; 'by ghosts,' रात्रिचरसेवितः -ता -तं, प्रेतनरजुष्टः -ष्टा -ष्टं, वेतालनिषेवितः -ता -तं.

Haunter, *s.* अभिसारी *m.* (न्), गमनागमनकारी *m.*, पुनःपुनर् अभ्यागमकारी *m.*

Haunting, *s.* अभिसारणं, पुनःपुनर् अभिगमः or अभ्यागमः or गमनागमनं, नित्यगमनं.

Hautboy, *s.* शुषिरवाद्यविशेषः, वृहद्वंशः, सानेयी.

Hauteur, *s.* मानं, अभिमानं, अहङ्कारः, उद्धतिः *f.*, औद्धत्यं, चित्तोन्नतिः *f.*, चित्तसमुन्नतिः *f.*, दर्पः, गर्व्वः.

To **have**, *v. a.* (Hold in possession, possess) धा (c. 3. दधाति, धत्ते, धातुं), विधा, धृ (c. 10. धारयति -यितुं, c. 1. धरति, धर्त्तुं), भुज् (c. 7. भुंक्ते, भोक्तुं), परिभुज्, भृ (c. 3. बिभर्त्ति, भर्त्तुं), शील् (c. 10. शीलयति -यितुं), दध् (c. 1. दधते -धितुं), परिभोगं कृ.—(Obtain, gain) आप् (c. 5. आप्नोति, आप्तुं), प्राप्, अवाप्, लभ् (c. 1. लभते, लब्धुं), उपलभ्.—(Receive) ग्रह् (c. 9. गृह्णाति, ग्रहीतुं), आदा.—(Be urged by obligation) expressed by the fut. pass. part.; as, 'I have to go,' मया गन्तव्यं; 'I have to write a letter,' मया पत्रं लेखनीयं.—(Have in esteem) मन् (c. 10. मानयति -यितुं), सम्मन्.—(Have in contempt) अवज्ञा (c. 9. -जानाति -ज्ञातुं), अवमन्.—(Have on, wear) धृ, भृ, परिधा.—(Have a care) अवधानं कृ, सावधानः -ना -नं भू.

Haven, *s.* (For ships) नौबन्धनयोग्यं खातं, नौबन्धनस्थानं, नौरक्षणस्थानं, नौकाशयः.—(Shelter) आश्रयः, समाश्रयः, संश्रयः, आशयः, अवस्थानं, रक्षास्थानं.

Having, *part.* (Possessing) दधत् -धती -धत् (त्), दधानः -ना -नं, विदधत् -धती -धत् (त्), धारयन् -यन्ती -यत् (त्), धारी -रिणी -रि (न्), दधः -धा -धं, शाली -लिनी -लि (न्): often expressed by the affixes वत्, मत्, इन्, विन्, मिन्, वल; as, 'having wealth,' धनवान् -वती -वत् (त्), धनी -निनी -नि (न्); 'having wisdom,' धीमान् -मती -मत् (त्): also expressible by उपेतः -ता -तं, अन्वितः -ता -तं, युक्तः -क्ता -क्तं in comp.; as, 'having wealth,' धनोपेतः &c.

Having, *s.* (Possession) धरणं, धारणं, शालिता, अधिकारः, भुक्तिः *f.*, परिभोगः.—(Goods) विभवः, द्रव्यं, रिक्थं.

Havoc, *s.* महानाशः, महाक्षयः, संहारः, महाप्रलयः, महोत्पातः, सर्व्वनाशः, उच्छेदः, महाविप्लवः, विनाशः.

To **havoc**, *v. a.* महानाशं कृ, महाक्षयं कृ, महोत्पातं कृ, अत्यन्तं नश् (c. 10. नाशयति -यितुं), उच्छिद् (c. 7. -छिनत्ति -छेत्तुं).

Haw, *s.* हासंज्ञकं बीजगर्भं गुटिकाकारं क्षुद्रफलं.

To **haw**, *v. n.* (Hesitate in speaking) भिन्नस्वरेण or स्खलितस्वरेण वद् (c. 1. वदति -दितुं).

Hawk, *s.* (Bird) श्येनः, पत्री *m.* (न्), शशादनः, कपोतारिः *m.*, खगान्तकः, घातिपक्षी *m.* (न्), नीलपिच्छः, सत्काण्डः, कपोताद्यनुसरणे शिक्षितः श्येनः.—(Forcing up phlegm) उत्कासनं, श्लेष्मोत्क्षेपः.

To **hawk**, *v. a.* (Catch birds by means of hawks) श्येनादिभिः पक्षिणो ग्रह् (c. 9. गृह्णाति, ग्रहीतुं) or पक्ष्यनुसरणं कृ, श्यैनम्पातां कृ.—(Force up phlegm) उत्कास् (c. 1. -कासते -सितुं), श्लेष्माणम् उत्क्षिप् (c. 6. -क्षिपति -क्षेप्तुं) or निरस् (c. 4. -अस्यति -असितुं), श्लेष्मनिरसनं कृ.—(Sell goods by outcry in the streets) नगरमार्गेषु भ्रमणं कृत्वा घोषणपूर्व्वं द्रव्याणि विक्री (c. 9. -क्रीणाति -णीते -क्रेतुं).

Hawker, *s.* (Seller of goods by outcry in the streets of a town) नगरमार्गेषु घोषणपूर्व्वं तुच्छद्रव्यविक्रेता *m.* (तृ).—(Falconer) श्येनजीवी *m.* (न्), श्येनशिक्षकः, श्येनपोषकः, श्येनपालकः.

Hawk-eyed, *a.* श्येननयनः -ना -नं, सूक्ष्मदृष्टिः -ष्टिः -ष्टि, सूक्ष्मदर्शी -र्शिनी -र्शि (न्), दूरदर्शी &c.

Hawking, *s.* (Falconry) श्यैनम्पाता, श्येनादिभिः पक्षिग्रहणं, श्येनशिक्षा, श्येनपालनं.—(Forcing up phlegm) उत्कासनं, श्लेष्मोत्क्षेपः.—(Selling goods by outcry in the streets of a town) नगरमार्गेषु घोषणपूर्व्वं तुच्छद्रव्यविक्रयः.

Hawser, *s.* नौरज्जुः *m.*, क्षुद्ररज्जुः. *See* Halser.

Hawthorn, *s.* हासंज्ञकफलविशिष्टः कण्टकितगुल्मभेदः.

Hay, *s.* शुष्कतृणं, शुष्कघासः, शुष्कशष्पं, तृणं, घासः.

Haycock, *s.* शुष्कतृणचितिः *f.*, शुष्कघासस्तूपः, तृणचयः.

Hay-harvest, *s.* शुष्कतृणसङ्ग्रहः, शुष्कतृणसञ्चयकालः.

Hay-loft, *s.* शुष्कतृणसङ्ग्रहकोष्ठकं, शुष्कघासरक्षागारं.

Hay-maker, *s.* शुष्कतृणसङ्ग्राहकः, शुष्कतृणसञ्चयी *m.* (न्).

Hay-making, *s.* शुष्कतृणसङ्ग्रहः, शुष्कघाससञ्चयः -यनं.

Hay-market, *s.* तृणविक्रयस्थानं, घासविक्रयचत्वरं.

Hay-rick, **hay-stack**, *s.* शुष्कतृणराशिः *m.*, शुष्कतृणोत्करः, शुष्कघासचितिः *f.*, शुष्कतृणविस्तरः.

Hazard, *s.* (Chance) दैवं, दैवयोगः, दैवगतिः *f.*, दैवघटना, दैवसङ्गतं, दैववशः, अदृष्टं.—(Risk, danger) संशयः, शङ्का, सन्देहः, विकल्पः; 'a condition of hazard,' शङ्कास्पदं, संशयस्थानं; 'hazard of life,' जीवितसंशयः.—(Game at dice) द्यूतक्रीडा, अक्षादिक्रीडा, द्यूतकर्म्म *n.* (न्), द्यूतव्यवहारः, द्यूतं.

To **hazard**, *v. a.* संशयस्थं -स्थां -स्थं कृ, सन्देहस्थं -स्थां -स्थं कृ, सन्देहदोलस्थं -स्थां -स्थं कृ, शङ्कास्थं -स्थां -स्थं कृ, संशयापन्नं -न्नां -न्नं कृ, दैवाधीनं -नां -नं कृ, दैववशं -शां -शं कृ, शङ्कास्पदं कृ; 'one who hazards his life,' संशयितजीवितः.

Hazardable, *a.* दैवाधीनः -ना -नं, दैवायत्तः -त्ता -त्तं, संशयस्थः -स्था -स्थं.

Hazarded, *p. p.* संशयितः -ता -तं, दैववशङ्गमितः -ता -तं.

Hazarder, *s.* किञ्चित् संशयस्थं करोति यो जनः; 'a hazarder of life,' संशयितजीवितः.

Hazardous, *a.* सन्दिग्धः -ग्धा -ग्धं, सांशयिकः -की -कं, संशयस्थः -स्था -स्थं, सन्देहस्थः -स्था -स्थं, शङ्काक्रान्तः -न्ता -न्तं, भयाक्रान्तः -न्ता -न्तं, संशयापन्नः -न्ना -न्नं, भयहेतुकः -का -कं, दैवाधीनः -ना -नं, दैववशः -शा -शं, भयानकः -का -कं; 'a hazardous situation,' संशयस्थानं, भयस्थानं, शङ्कास्पदं.

Hazardously, *adv.* शङ्कया, सन्देहेन, संशयेन, ससंशयं, अनिष्टशङ्कया.

Hazardousness, *s.* सन्दिग्धता, भयाक्रान्तता, दैवाधीनता, दैवायत्तत्वं.

Haze, *s.* धूमिका, अवाष्प., मृगतृष्णा, कुहेडिका, कुहेली, कुज्झटिका.

To **haze**, *v. n.* कुज्झटिका (nom. कुज्झटिकायते), धूमिका (nom. धूमिकायते).

Hazel, *s.* ईषत्कपिशफलविशिष्टो गुल्मभेदः.

Hazel, *a.* वक्ष्यमाणफलसवर्णः -र्णा -र्णं, ईषत्कपिशः -शा -शं.

Hazel-nut, *s.* ईषत्ताम्रवर्णं दृढत्वक्परिवृतं पूर्व्वोक्तगुल्मफलं.

Haziness, *s.* सधूमिकत्वं, कुज्झटिकावस्था, सान्धकारत्वं, साभ्रता.

Hazy, *a.* सधूमिकः -का -कं, धूमिकावृतः -ता -तं, सकुज्झटिकः -का -कं, कुज्झटिकामयः -यी -यं, सान्धकारः -रा -रं, अभ्रियः -या -यं, साभ्रः -भ्रा -भ्रं, अन्धकः -का -कं.

He, *s.* सः (तद्), एषः (एतद्), असौ *m.* (अदस्), सकः; 'so and so,'

अमुकनामा *m.* (न्). Obs. The visarga of सः and एषः is dropped before *any consonant.*

Head, *s.* (Uppermost part of the human body) शिरस् *n.*, शीर्षं -र्षकं, मूर्द्धा *m.* (न्), मस्तकः -कं, मुण्डः -ण्डं -ण्डकं, मौलिः -ली *m. f.*, केनारः, चूडालं, वराङ्गं, उत्तमाङ्गं, सीमन्तः -न्तं, केशभूः *m.*—(A chief, leader) नायकः, मुखरः, अग्रगः, पतिः *m.*, अधिपतिः *m.*, अधिपः, अधिष्ठाता *m.* (तृ), श्रेष्ठः, श्रेष्ठी *m.* (न्), शिष्टः, प्रष्ठः, शिरोवर्त्ती *m.* (न्), मुख्य or प्रधान in comp.; as, 'head-minister,' मुख्यमन्त्री *m.* (न्), प्रधानमन्त्री *m.*; 'head-merchant,' विट्पतिः *m.*; 'head-scholar,' पट्टशिष्यः, श्रेष्ठशिष्यः; 'head of the police,' दण्डनायकः, दण्डपालकः; 'with Karna at their head,' कर्णमुखाः *m. pl.*, कर्णपुरोगमाः *m. pl.*—(Division of a subject) पदं, स्थानं, मार्गः, विषयः, अधिकरणं.—(Top, forepart) अग्रं, शिरस् *n.*, शीर्षकं; 'head of a spear,' शूलाग्रं; 'head of a boat,' मङ्गः; 'at the head of,' अग्रे or expressed by धुरि in such phrases as, 'a father at the head of all who possess sons,' पिता धुरि पुत्रिणां.—(The first place) अग्रस्थानं, उत्तमस्थानं.—(Source) प्रभवः, उद्भवः, उद्गमः, मूलं, हेतुः *m.*; 'of a river,' सरिन्मुखं, सरित्प्रभवः.—(Head of hair) कैशिकं, कैश्यं, केशपाशः, केशपक्षः; 'belonging to the head,' शीर्षण्यः -ण्या -ण्यं; 'to cut off the head,' शिरः or मस्तकं छिद् (c. 7. छिनत्ति, छेत्तुं); 'to be over head and ears in debt,' ऋणग्रस्तः -स्ता -स्तं भू, ऋणमग्नः -ग्ना -ग्नं भू; 'to get ahead of,' अतिक्रम् (c. 1. -क्रामति -क्रमितुं); 'to make head against,' प्रतिकूल (nom. प्रतिकूलयति -यितुं), पर्य्युपस्था (c. 1. -तिष्ठति -स्थातुं), प्रस्था, प्रया (c. 2. -याति -तुं).

To head, *v. a.* (Lead, act as a leader) नी (c. 1. नयति, नेतुं), अग्रे or पुरो गम् (c. 1. गच्छति, गन्तुं), अधिष्ठा (c. 1. -तिष्ठति -ष्ठातुं); 'headed by Karna,' कर्णमुखः -खा -खं or कर्णपुरोगमः -मा -मं.—(Cut off the head) शिरः or मस्तकं छिद् (c. 7. छिनत्ति, छेत्तुं), विमस्तक (nom. विमस्तकयति -यितुं), शीर्षच्छेदं कृ.—(Oppose) प्रतिकूल (nom. प्रतिकूलयति -यितुं).

Headache, *s.* शिरोवेदना, शीर्षवेदना, शीर्षव्यथा, शिरःपीडा, शिरोर्त्तिः *f.*, शिरःशूलं, शिरोरोगः; 'afflicted with it,' शीर्षवेदनः -ना -नं.

Head-band, *s.* मूर्द्धवेष्टनं, शिरोवेष्टनं, शिरोबन्धनं -नी, ललाटवेष्टनं, ललाटपट्टः -ट्टं, मस्तकबन्धनी.

Head-borough, *s.* गण्डोटः.

Head-dress, *s.* मस्तकाभरणं, मस्तकभूषणं, मुकुटं, मकुटं, किरीटः, शेखरः, मौलिः *m. f.*, चूडा.

Headed, *p. p.* मुखः -खा -खं or पुरोगमः -मा -मं in comp.; as, 'headed by Karna,' कर्णमुखः -खा -खं; 'two-headed,' द्विशीर्षकः -का -कं; 'three-headed,' त्रिशिराः -राः -रः (स्).

Head-foremost, *a.* अवाक्शिराः -राः -रः (स्), अधःशिराः &c., अधोमुखः -खा -खं, अवाङ्मुखः -खा -खं.

Headiness, *s.* साहसं, विषमसाहसं, गमकारित्वं, क्षिप्रकारिता, मदः.

Headland, *s.* अन्तरीपः -पं, समुद्रमध्ये महाद्वीपबहिःस्थो भूमिभागः, उदग्रभूमिः *f.*, महाद्वीपनासिका, भूमिनासिका, उदग्रस्थलं.

Headless, *a.* अशिरस्कः -स्का -स्कं, अशिराः -राः -रः (स्), मस्तकहीनः -ना -नं, अपमूर्द्धा -र्द्धा -र्द्ध (न्); 'a headless trunk,' कबन्धः -न्धं, अपमूर्द्धकलेवरं.

Headlong, *a.* (Head-foremost) अधोमुखः -खी -खं, अवाङ्मुखः -खी -खं, अवाङ् -वाची -वाक् (च्), अवाक्शिराः -राः -रः (स्), अधःशिराः &c.—(Rash) साहसी -सिनी -सि (न्), गमकारी -रिणी -रि (न्), क्षिप्रकारी &c.—(Precipitous) प्रवणः -णा -णं, पातुकः -का -कं.

Headlong, *adv.* अधोमुखेन, अवाङ्मुखं -खेन, अवाक्शिरसा, अधाक्.—(Rashly) साहसेन, सहसा, अनालोचितं.

Headmost, *a.* अग्रस्थः -स्था -स्थं, सर्व्वाग्रस्थः -स्था -स्थं, अग्र्यः -ग्र्या -ग्र्यं, प्राग्र्यः -ग्र्या -ग्र्यं, मुख्यः -ख्या -ख्यं, प्रमुखः -खा -खं, प्रधान in comp.

Headpiece, *s.* (Armour for the head) शिरस्त्राणं, शिरस्त्रं, शीर्षकं, शीर्षण्यं, शीर्षरक्षं.—(Force of understanding) धीशक्तिः *f.*, बुद्धिसामर्थ्यं.

Headship, *s.* मुख्यता, प्रमुखता -त्वं, प्रधानता, प्राधान्यं, श्रेष्ठता.

Headsman, *s.* घातकपुरुषः, घातकजनः, वध्यपुरुषः, वधकर्म्माधिकारी *m.* (न्), मृतपाः *m.*, दण्डपाशिकः, शिरश्छेदी *m.* (न्).

Headstall, *s.* अश्वस्य शिरोबन्धनी or मस्तकबन्धनं.

Headstrong, *a.* साहसी -सिनी -सि (न्), जाल्मः -ल्मा -ल्मं, गमकारी -रिणी -रि (न्), क्षिप्रकारी &c., चपलः -ला -लं, प्रमत्तः -त्ता -त्तं, अस्थिरः -रा -रं, प्रतीपः -पा -पं, धीरः -रा -रं, अवशः -शा -शं, निर्यन्त्रणः -णा -णं, उच्छृङ्खलः -ला -लं, दुर्दमः -मा -मं.

Heady, *a.* साहसी -सिनी -सि (न्), तीक्ष्णकर्म्मा -र्म्मा -र्म्म (न्), संरम्भी -म्भिणी -म्भि (न्), उच्चण्डः -ण्डा -ण्डं, शीघ्रकोपी -पिनी -पि (न्), अमर्षी -र्षिणी -र्षि (न्).

To heal, *v. a.* शम् (c. 10. शमयति -यितुं), प्रशम्, उपशम्, कित् in des. (चिकित्सति -त्सितुं), स्वस्थं -स्थां -स्थं कृ or सुस्थं कृ, निरामयं -यां -यं कृ, नीरोगं -गां -गं कृ, प्रतिकृ, भिषज् (nom. भिषज्यति), रोगाद् मुच् (c. 6. मुञ्चति, मोक्तुं), समुत्था in caus. (-त्थापयति -यितुं, rt. स्था), साध् (c. 10. साधयति -यितुं); 'heal a wound,' व्रणं रुह् in caus. (रोपयति -यितुं), व्रणरोपणं कृ.—(Reconcile) समाधा (c. 3. -दधाति -धातुं), सन्धा, प्रतिसमाधा.

To heal, *v. n.* शम् (c. 4. शाम्यति, शमितुं), उपशम्, स्वस्थः -स्था -स्थं भू, सुस्थः -स्था -स्थं भू.

Healed, *p. p.* शमितः -ता -तं, शान्तः -न्ता -न्तं, शान्तरोगः -गा -गं, उपशान्तः -न्ता -न्तं, प्रशान्तः -न्ता -न्तं, रोगमुक्तः -क्ता -क्तं, चिकित्सितः -ता -तं, सुस्थः -स्था -स्थं, स्वस्थः -स्था -स्थं, समुत्थितः -ता -तं, प्रतिकृतः -ता -तं; 'as a sore or wound,' रोपितः -ता -तं, रूढः -ढा -ढं, रूढव्रणः -णा -णं, शुष्कः -ष्का -ष्कं.

Healer, *s.* चिकित्सकः, रोगशान्तकः, रोगहृत् *m.*, भिषक् *m.* (ज्).

Healing, *a.* रोगशमकः -का -कं, शान्तिकरः -री -रं, शान्तिदः -दा -दं, शान्तिकः -की -कं, रोगहरः -रा -रं, रोगघ्नः -घ्नी -घ्नं.

Healing, *s.* (The act) चिकित्सा -त्सनं, शमः, शान्तिः *f.*, उपशमः, रोगशान्तिः *f.*, रोगशमः, रुक्प्रतिक्रिया, प्रतीकारः, सुस्थकरणं, समुत्थानं, भैषज्यं; 'of a sore,' व्रणरोपणं.

Health, *s.* स्वास्थ्यं, स्वस्थता, अरोगः, आरोग्यं, अरोगिता, सुस्थता, सुस्थितिः *f.*, अनामयं, निरामयता, रोगाभावः, कल्यत्वं -ता, कुशलं, शरीरकुशलं, शरीरसुखं, वार्त्तः, उत्पाली.—(Bad health) अस्वास्थ्यं, असुस्थता, शरीरदुःस्थितिः *f.*, रोगिता, सरोगता; 'health to you,' स्वस्ति, कुशलं ते.

Healthful, *a.* अरोगी -गिणी -गि (न्), नीरोगः -गा -गं, आरोग्यः -ग्यी -ग्यं, सुस्थः -स्था -स्थं, स्वस्थः -स्था -स्थं, निरामयः -या -यं. *See* Healthy.

Healthfully, *adv.* अरोगेण, सारोग्यं, निरामयं, स्वास्थ्येन, कुशलं.

Healthfulness, *s.* अरोगिता -त्वं, स्वास्थ्यं, निरामयता, कल्यत्वं.

Healthily, *adv.* सारोग्यं, सानामयं, शरीरस्वास्थ्येन, स्वस्थवत्.

Healthiness, *s.* स्वास्थ्यं, स्वस्थता, आरोग्यं, अरोगिता, सुस्थता, शरीरसुस्थितिः *f.*, निरामयत्वं, अनामयत्वं, कल्यत्वं -ता, रोगाभावः.

HEALTHLESS, *a.* अस्वस्थः -स्था -स्थं, असुस्थशरीरः -रा -रं, सरोगः -गा -गं.

HEALTHSOME, *a.* स्वास्थ्यजनकः -का -कं, रोगनिवर्त्तकः -का -कं, रोगघ्नः -घ्नी -घ्नं.

HEALTHY, *a.* सुस्थः -स्था -स्थं, सुस्थितः -ता -तं, अरोगी -गिणी -गि (न्), नीरोगः -गा -गं, नीरुजः -जा -जं, नीरुक् *m.f.n.* (ज्), निरामयः -या -यं, स्वस्थः -स्था -स्थं, महारोग्यः -ग्या -ग्यं, कल्यः -ल्या -ल्यं, कुशली -लिनी -लि (न्), निर्व्याधिः -धिः -धि, व्याधिहीनः -ना -नं, रोगहीनः -ना -नं, चक्रः -क्रा -क्रं, वार्त्तः -र्त्ता -र्त्तं, निष्पीडः -डा -डं.—(Causing health) स्वास्थ्यजनकः -का -कं, आरोग्यकरः -री -रं, अनामयकरः -री -रं.

HEAP, *s.* राशिः *m.* -शी *f.*, सञ्चयः, निचयः, चयः, चितिः *f.*, प्रचयः, पिण्डः, प्रकरः, उत्करः, निकरः, ओघः, पुञ्जः, पूगः, स्तूपः, स्तोमः, वृन्दं, समूहः, समवायः, सङ्घः, समुदायः, चायः, संस्थानं, सङ्ग्रहः, कूटः; 'a heap of grass,' तृणराशिः *m.*, तृणविस्तरः, तृण्या.

To HEAP, *v. a.* राशीकृ, आचि (c. 5. -चिनोति -चेतुं), समाचि, सञ्चि, समाक्षिप् (c. 6. -क्षिपति -क्षेप्तुं), पिण्डीकृ, पिण्ड् (c. 1. पिण्डते, c. 10. पिण्डयति -यितुं), ओघीकृ, वृन्दीकृ, एकत्रीकृ, एकत्र कृ, पुञ्जीकृ, पूगीकृ.

HEAPED, *p. p.* राशीकृतः -ता -तं, राशीभूतः -ता -तं, आचितः -ता -तं, उपचितः -ता -तं, समुपचितः -ता -तं, सञ्चितः -ता -तं, पिण्डितः -ता -तं, पिण्डीकृतः -ता -तं, पिण्डीभूतः -ता -तं, एकौघभूतः -ता -तं, पुञ्जितः -ता -तं, पूगीकृतः -ता -तं, सङ्कलितः -ता -तं, सङ्कूढः -ढा -ढं, पुञ्जिष्ठः -ष्ठा -ष्ठं, एकपिण्डीभूतः -ता -तं, एकत्रीभूतः -ता -तं, समूढः -ढा -ढं, पर्य्यस्तः -स्ता -स्तं; 'heaped with flowers,' कुसुमचितः -ता -तं.

HEAPER, *s.* राशिकर्त्ता *m.* (र्त्तृ), पिण्डकर्त्ता *m.*, सञ्चयकारी *m.* (न्).

HEAPY, *a.* पिण्डी -ण्डिनी -ण्डि (न्), निचयी -यिनी -यि (न्), उत्करीयः -या -यं.

To HEAR, *v. a.* and *n.* श्रु (c. 5. शृणोति, श्रोतुं), उपश्रु, समुपश्रु, अनुश्रु, परिश्रु, आकर्ण् (c. 10. -कर्णयति -यितुं), निशम् (c. 10. -शामयति -यितुं, c. 4. -शाम्यति -शमितुं), विनिशम्, सन्निशम्, श्रवणेन्द्रियेण or कर्णद्वारेण उपलभ् (c. 1. -लभते -लब्धुं) or बुध् (c. 1. बोधति -धितुं) or ग्रह् (c. 9. गृह्णाति, ग्रहीतुं), श्रवणं कृ; 'having heard,' श्रुत्वा, निशाम्य.

HEARD, *p. p.* श्रुतः -ता -तं, आकर्णितः -ता -तं; 'as heard,' यथाश्रुतं.

HEARER, *s.* श्रोता *m.* (तृ), श्रवणकर्त्ता *m.* (र्त्तृ), आकर्णयिता *m.* (तृ).

HEARING, *s.* श्रवणं, श्रुतिः *f.*, आकर्णनं, निशमनं, निशामनं; 'sense of hearing,' श्रोत्रं, श्रवणेन्द्रियं; 'out of hearing,' असंश्रवः -वा -वं, कर्णागोचरः -रा -रं; 'out of the hearing of the master,' गुरोर् असंश्रवे; 'within hearing,' कर्णगोचरः -रा -रं, कर्णश्रवः -वा -वं.

To HEARKEN, *v. n.* श्रु (c. 5. शृणोति, श्रोतुं), आकर्ण् (c. 10. -कर्णयति -यितुं), निशम् (c. 10. -शामयति -यितुं), श्रवणं कृ.

HEARKENER, *s.* श्रोता *m.* (तृ), श्रवणकारी *m.* (न्), निशमनकारी *m.*

HEARSAY, *s.* किंवदन्ती, जनश्रुतिः *f.*, जनवादः, जनरवः.

HEARSE, *s.* शववाहनं, शवयानं, प्रेतवहनार्थं खट्वा, प्रेतवहनसाधनं, कटः.

HEART, *s.* (The seat of life in an animal) हृदयं, हृद् *n.*, हृत्पिण्डं, रक्ताशयः, अग्रमांसं, बुक्काग्रमांसं, मर्म्म *n.* (न्), बुक्कः -क्का -क्कं, वृक्कः, कन्तुः *m.*, रिक्तं, भपत् *m.*—(Seat of feeling) चित्तं, चेतस्, हृदयं, अन्तःकरणं, अन्तःप्रकृतिः *f.*, अन्तरात्मा *m.* (न्), आत्मा *m.*, मनस् *n.*, अन्तर्भावः, मानसं, स्वान्तं.—(The breast) वक्षस् *n.*, वक्षस्स्थलं, वक्षःस्थलं.—(Vital part) मर्म्म *n.* (न्), मर्म्मस्थानं -स्थलं, हृदयस्थानं -स्थलं.—(Inner part of any thing) गर्भः, उदरं, अभ्यन्तरं or expressed by अन्तर् prefixed; as, 'the heart of the city,' अन्तर्नगरं.—(Courage, spirit) वीर्य्यं, शौर्य्यं, तेजस्, सत्त्वं, पौरुषं.—(Affection) स्नेहः, प्रणयः, हार्द्दं, भावः, रागः; 'my heart beats,' स्पन्दते or कम्पते हृदयं मे; 'it goes to my heart,' मर्म्म भिनत्ति or स्पृशति; 'to take heart,' आश्वस् (c. 2. -श्वसिति -तुं), समाश्वस्; 'to learn by heart,' अभ्यस् (c. 4. -अस्यति -असितुं), रूपं कृ; 'learnt by heart,' कण्ठस्थः -स्था -स्थं, अभ्यस्तः -स्ता -स्तं; 'learning by heart,' रूपं; 'to be out of heart,' दीनमनस्कः -स्का -स्कं भू; 'pure in heart,' निर्म्मलान्तःकरणः -णा -णं; 'with all one's heart,' कामं, प्रकामं; 'heart's desire,' मनोवाञ्छितं; 'from the heart,' अन्तःकरणेन; 'heart-searching,' चित्तज्ञः -ज्ञा -ज्ञं.

HEART-ACHE, *s.* हृदयव्यथा, हृदयवेदना, चित्तवेदना, अन्तःकरणवेदना, मनोदुःखं, मनःपीडा, हृदयशल्यं, मानसी व्यथा.

HEART-APPALLING, *a.* मर्म्मभेदी -दिनी -दि (न्), चित्तशङ्काजनकः -का -कं.

HEART-BREAKING, *a.* हृदयभेदी -दिनी -दि (न्), मर्म्मभिद् *m. f. n.*, हृदयाविध् *m. f. n.* (ध्), मर्म्मस्पृक् *m. f. n.* (श्).

HEART-BROKEN, *p. p.* भिन्नहृदयः -या -यं, विषण्णहृदयः -या -यं.

HEART-BURN, *s.* तीक्ष्णाग्निः *m.*, आम्लपित्तं, हृदयवेदना, हृद्रोगः.

HEART-DEAR, *a.* हृदयप्रियः -या -यं, हृद्यः -द्या -द्यं, हृदयङ्गमः -मा -मं.

HEART-EASE, *s.* हृदयसुखं, मनःसुखं, हृदयशान्तिः *f.*, हृत्सुखं, मनोनिर्वृतिः *f.*, चित्तनिर्वृतिः *f.*, मनोविश्रान्तिः *f.*, हृदयस्वास्थ्यं.

HEART-EASING, *a.* हृदयसुखजनकः -का -कं, मनःशान्तिकरः -री -रं.

HEART-FELT, *a.* हृद्गतः -ता -तं, हृदयजातः -ता -तं, चित्तभवः -वा -वं.

HEART-RENDING, *a.* मर्म्मभेदी -दिनी -दि (न्), मर्म्मच्छेदी &c., हृदयभेदी &c., हृदयभिद् *m. f. n.*, हृदयाविध् *m. f. n.* (ध्), मर्म्मस्पृक् *m. f. n.* (श्), मर्म्मपीडाकरः -री -रं, चित्तपीडाजनकः -का -कं, चित्तोद्वेगजनकः -का -कं, मनोदुःखकारी -रिणी -रि (न्).

HEART-ROBBING, *a.* मनोहरः -रा -रं, मनोहारी -रिणी -रि (न्), चित्तहारी &c., चित्तापहारी &c., चित्तहृत् *m.f.n.*, हृदयग्राही -हिणी -हि (न्).

HEART-SICK, *a.* आतुरचित्तः -त्ता -त्तं, उद्विग्नमनाः -नाः -नः (स्), विमनाः &c.

HEART'S-EASE, *s.* त्रिवर्णपुष्पविशिष्ट ओषधिभेदः.

HEART-SORE, *s.* मनोव्यथा, मनःपीडा, हृदयपीडा, मनोदुःखं.

HEART-STRINGS, *s.* हृत्पिण्डपरिगतं शिरादि.

HEART-STRUCK, *a.* हतचित्तः -त्ता -त्तं, विद्धहृदयः -या -यं, हृद्विद्धः -द्धा -द्धं.

HEART-SWELLING, *a.* चित्तक्षोभकारी -रिणी -रि (न्), हृदयकम्पकारी &c.

HEART-WHOLE, *a.* अक्षतहृदयः -या -यं, अभिन्नहृदयः -या -यं, अविकलचित्तः -त्ता -त्तं.

HEART-WOUNDED, *a.* क्षतहृदयः -या -यं, भिन्नहृदयः -या -यं, भिन्नमर्म्मा -र्म्मा -र्म्म (न्), विद्धमर्म्मा &c., विद्धहृदयः -या -यं.

HEART-WOUNDING, *a.* मर्म्मभेदी -दिनी -दि (न्), हृदयभेदी &c., हृदयाविध् *m.f.n.* (ध्).

To HEARTEN, *v. a.* आश्वस् (c. 10. -श्वासयति -यितुं), तेजः or विश्वासं or आशां कृ or दा or वृध् (c. 10. वर्धयति -यितुं).

HEARTH, *s.* अग्निकुण्डं, वितानं, चुल्लिः *f.* -ल्ली, अश्मन्तं, अन्तिका, उपचाय्यः, पक्षः.

HEARTILY, *adv.* कामं, प्रकामं, कामतस्, सर्व्वान्तःकरणेन, सर्व्वभावेन, चित्तसन्तोषेण, सन्तुष्टचेतसा, इच्छातस्, स्वेच्छातस्, निर्व्यलीकं, निष्कपटं.—(With vigour) सवीर्य्यं, हृष्टपुष्टवत्.

HEARTINESS, *s.* (Sincerity) सारल्यं, सरलता, सत्यशीलता, अमाया, अकापट्यं, चित्तनिर्म्मलता.—(Vigour, strength) तेजस् *n.*, सत्त्वं, वीर्य्यं, पौरुषं, सारता.

HEARTLESS, *a.* (Spiritless, without vigour) निस्तेजाः -जाः -जः (स्), निर्वीरः -रा -रं, निर्वीर्य्यः -र्य्या -र्य्यं, निःसत्त्वः -त्त्वा -त्त्वं, भीरुहृदयः -या -यं, क्लीवहृदयः -या -यं.—(Hard-hearted) कठिनहृदयः -या -यं, निर्दयः -या -यं, दयाहीनः -ना -नं, निष्करुणः -णा -णं.

HEARTLESSLY, *adv.* (In a spiritless manner) निर्वीर्य्यं, निर्वीरवत्,

सत्त्वं विना, क्लीववत्, भीरुहृदयेन.—(In a cruel manner) निर्दयं, निष्करुणं हृदयकाठिन्यात्.

Heartlessness, *s.* (Want of spirit) निर्वीर्य्यं, वीर्य्यहीनता, तेजोहीनता, अपौरुषं, हृदयभीरुता, क्लीवता. —(Cruelty) दयाहीनता, हृदयकाठिन्यं, निष्करुणता, कृपाराहित्यं.

Hearty, *a.* (Sincere) सरलः -ला -लं, निर्म्मलचित्तः -त्ता -त्तं, सत्यशीलः -ला -लं, मायाहीनः -ना -नं, निष्कपटः -टा -टं, निर्व्यलीकः -का -कं, —(Vigorous, in full health) वीर्य्यवान् -वती -वत् (त्), तेजोवान् &c., हृष्टपुष्टः -ष्टा -ष्टं, सुस्थः -स्था -स्थं, कल्यः -ल्या -ल्यं, सपौरुषः -षा -षं.

Heat, *s.* घर्म्मः, तापः, अभितापः, उपतापः, उत्तापः, सन्तापः, आतपः, दाहः, उष्णता, औष्ण्यं, उष्मः, उष्मा *m.* (न्), औष्म्यं, निदाघः, चण्डता, तिग्मता, तिग्मं, तैग्म्यं, अग्निः *m.*, अशिशिरता, ग्रीष्मः, इद्धं, तीक्ष्णं, खरं.—(Hot weather) ग्रीष्मः, निदाघः, घर्म्मः.—(Ardour, vehemence) उत्तापः, उच्चण्डता, प्रचण्डता, उग्रता, व्यग्रता, तीक्ष्णता, तैक्ष्ण्यं, उष्मः.—(Anger) चण्डता, तिग्मता, संरम्भः, मदः, उष्मः, क्रोधः, उग्रता. —(Course at a race) चर्य्या.—(Flush on the face) कपोलरागः. —(Heat of youth) यौवनदर्पः, यौवनमदः.—(As of a bitch, &c.) मदः. —(Morbid heat) स्पर्शः, तापकः; 'it emits heat,' उष्मायते.

To heat, *v. a.* तप् (c. 10. तापयति -यितुं, c. 1. तपति, तप्तुं), उत्तप्, प्रतप्, सन्तप्, उष्णीकृ, दीप् (c. 10. दीपयति -यितुं), ज्वल् (c. 10. ज्वलयति -यितुं), सन्धुक्ष् (c. 10. -धुक्षयति -यितुं), स्विद् (c. 10. स्वेदयति -यितुं), दह् (c. 1. दहति, दग्धुं).

Heated, *p. p.* तप्तः -प्ता -प्तं, सन्तप्तः -प्ता -प्तं, उपतप्तः -प्ता -प्तं, उत्तप्तः -प्ता -प्तं, तापी -पिनी -पि (न्), तापितः -ता -तं, दीप्तः -प्ता -प्तं, जाततापः -पा -पं, स्वेदितः -ता -तं.

Heater, *s.* जलादितापनार्थं तप्तलोहपिण्डः.

Heath, *s.* (Plant) जङ्गलरुहः क्षुद्रौषधिभेदः.—(Wild ground) जङ्गलभूमिः *f.*—(Common ground) सर्व्वसामान्यभूमिः *f.*

Heath-cock, *s.* जङ्गलदेशसेवी कुक्कुटभेदः.

Heathen, *s.* देवतार्च्चकः, देवार्च्चकः, देवताभ्यर्च्चकः, देवपूजकः, देवप्रतिमापूजकः, देवतोपासकः, देवतासेवकः, प्रतिमापूजकः, प्रतिमासेवकः.

Heathen, *a.* देवार्च्चकसम्बन्धी -न्धिनी -न्धि (न्), प्रतिमापूजकसम्बन्धी &c.

Heathenish, *a.* देवार्च्चकयोग्यः -ग्या -ग्यं, देवार्च्चकव्यवहारः -रा -रं, देवार्च्चकधर्म्मा -र्म्मा -र्म्म (न्), प्रतिमापूजकयोग्यः -ग्या -ग्यं, देवार्च्चकाचारः -रा -रं.—(Barbarous) क्रूराचारः -रा -रं, दुराचारः -रा -रं.

Heathenism, *s.* देवार्च्चा -र्च्चनं, देवतार्च्चनं -ना, देवताभ्यर्च्चा -र्च्चनं, प्रतिमापूजा, देवपूजा, देवार्च्चकाचारत्वं.

Heathy, *a.* जङ्गलः -ला -लं, जाङ्गलः -ली -लं, जङ्गलवृक्षावृतः -ता -तं.

Heating, *s.* तापनं, तपनं, सन्तापनं, उष्णीकरणं, दीपनं, घर्म्मकरणं.

Heating, *a.* तापकः -का -कं, तापनः -नी -नं, दीपनः -ना -नं.

To heave, *v. a.* (Lift, raise) उत्तुल् (c. 10. -तोलयति -यितुं), उद्धृ (c. 1. -हरति -हर्त्तुं), उन्नम् (c. 10. -नमयति -यितुं), उत्था in caus. (-थापयति -यितुं, rt. स्था), उन्नी (c. 1. -नयति -नेतुं), उद्यम् (c. 1. -यच्छति -यन्तुं), उत्क्षि (c. 1. -क्षयति -यितुं, rt. श्रि), उच्चीकृ.

To heave, *v. n.* (Palpitate) स्पन्द् (c. 1. स्पन्दते -न्दितुं), कम्प् (c. 1. कम्पते -म्पितुं), स्फुर् (c. 6. स्फुरति -रितुं).—(Swell gently) लुठ् (c. 6. लुठति -ठितुं), प्रलुठ्, उत्सृप् (c. 1. -सर्पति -सर्प्तुं).—(Pant) कृच्छ्रेण श्वासप्रश्वासं कृ, उद्धमं कृ; 'to heave a sigh,' दीर्घं निःश्वस् (c. 2. -श्वसिति -तुं), दीर्घनिश्वासं कृ or त्यज् (c. 1. त्यजति, त्यक्तुं); 'heaving a sigh,' दीर्घं निःश्वस्य.

Heave, *s.* उत्तोलनं, उद्धरणं, उन्नमनं, उन्नयः -यनं, उत्क्षेपः, उत्तारः.

Heaven, *s.* (Region of the blessed) स्वर्गः, स्वर् indecl., स्वर्लोकः, पुण्यलोकः, सुरलोकः, देवलोकः, त्रिदिवः -वं, दिवं, द्यौः *f.* (दिव्), द्यौ *f.* (द्यो), नाकः, देवनिकायः, देवालयः, सुरवर्त्म *n.* (न्), सुरपथं, शाश्वतं, सौरिकः, त्रिपिष्टपं, शक्रभवनं, सुखाधारः, सुखदं, त्रिदशालयः, त्रिदशावासः, अकुण्ठधिष्ण्यं; 'the heaven of Vishnu,' वैकुण्ठं.—(The sky) आकाशः, गगणं, नभस् *n.*, व्योम *n.* (न्), खं, अन्तरीक्षं, अम्बरं, दिगन्तरं, तारापथः, मेघवर्त्म *n.* (न्), ज्योतिश्चक्रं, ज्योतिषचक्रं; 'heaven and earth,' द्यावापृथिव्यौ *f. du.*, द्यावाभूम्यौ *f. du.*, दिवस्पृथिव्यौ *f. du.*, आकाशपृथिव्यौ *f. du.*, द्योभूम्यौ, स्वर्गमह्यौ, द्यावाक्षमे *f. du.*, रोदसी *n. du.* (स्), रोदस्यौ *f. du.*

Heaven-born, *a.* दिविजः -जा -जं, स्वर्गजातः -ता -तं, स्वर्गोत्पन्नः -न्ना -न्नं.

Heavenly, *a.* स्वर्गीयः -या -यं, स्वर्ग्यः -र्ग्या -र्ग्यं, दिव्यः -व्या -व्यं, दिविजः -जा -जं, दिविष्ठः -ष्ठा -ष्ठं, खस्थः -स्था -स्थं, नभःस्थः -स्था -स्थं, नभसीयः -या -यं, आन्तरीक्षः -क्षी -क्षं, वैहायसः -सी -सं; 'heavenly voice,' वैहायसी वाक्; 'heavenly bodies,' खस्थपदार्थाः *m. pl.*; 'heavenly nymph,' सुराङ्गना, स्ववेश्या.—(Excellent) परमः -मा -मं.

Heavenly, *adv.* दिव्यं, स्वर्गस्थवत्, स्वर्गीयप्रकारेण, दिव्यरूपेण.

Heavenwards, *s.* स्वर्गं प्रति, स्वर्गाभिमुखं, त्रिदिवं प्रति.

Heavily, *adv.* (With great weight) गौरवेण, सगौरवं, महाभारेण, अतिभारेण, सुभरं, गुरुभारेण.—(Slowly) मन्दं, विलम्बेन, शनैः शनैस्, विलम्बितं, मान्द्येन.—(Sorrowfully) विषादेन, सविषादं, विषण्णमनसा. —(Vehemently) अति or सु prefixed, भृशं, तीव्रं, तीक्ष्णं; 'heavily laden,' गुरुभारवान् -वती -वत् (त्), अतिभारी -रिणी -रि (न्), सुभरः -रा -रं.

Heaviness, *s.* (Ponderousness) गुरुत्वं, गौरवं, गरिमा *m.* (न्), भारवत्त्वं, भारित्वं, भारः.—(Slowness, dulness) मन्दता, मान्द्यं, जडता, जाड्यं, स्थूलता.—(Dejection) विषादः, विषण्णता, अवसादः, दीनता.

Heaving, *s.* (Palpitation) स्पन्दनं, कम्पनं, स्फुरणं.—(Swelling, undulation) उत्सर्पः -र्पणं, प्रलोठनं, लोठनं, लुठनं, लुलितं; 'of a wave,' ऊर्मिप्रलोठनं, ऊर्मिविभ्रमः.

Heaving, *part.* (Palpitating) स्पन्दमानः -ना -नं, कम्पमानः -ना -नं, स्फुरन् -रन्ती -रत् (त्), स्फुरितः -ता -तं.—(Swelling gently) प्रलोठितः -ता -तं, उत्सर्पी -र्पिणी -र्पि (न्), उत्सर्पितः -ता -तं, लुलितः -ता -तं, लोलः -ला -लं, लोलमानः -ना -नं.

IMITATION, *s.* अनुकारः, अनुकरणं, अनुक्रिया, अनुकृतिः *f.*, अनुकर्म्म *n.* (न्), अनुगमः, अनुगतिः *f.*, अनुवृत्तिः *f.*, अनुवर्त्तनं, अनुसरणं, अनुहारः, अनुसृष्टिः *f.*, अनुष्ठानं, विडम्बनं -ना.—(A copy, resemblance) प्रतिरूपं, अनुरूपं, आदर्शः, सादृश्यं, औपम्यं, उपमा, प्रतिमानं.

IMITATIVE, *a.* अनुकारी -रिणी -रि (न्), अनुकरणशीलः -ला -लं, अनुगामी -मिनी -मि (न्), अनुगमनशीलः -ला -लं, अनुगतिकः -की -कं, गतानुगतिकः -की -कं.

IMITATOR, *s.* अनुकारी *m.* (न्), अनुकारकः, अनुकर्त्ता *m.* (र्त्तृ), अनुगामी *m.* (न्), अनुगतिकः, अनुयायी *m.* (न्), अनुवर्त्ती *m.* (न्), अनुचारी *m.* (न्), गतानुगतिकः.

IMMACULATE, *a.* अनघः -घा -घं, निष्कल्मषः -षा -षं, अकल्मषः -षा -षं, निष्कलङ्कः -ङ्का -ङ्कं, अनेनाः -नाः -नः (स्), निर्मलः -ला -लं, विमलः -ला -लं, निर्दोषः -षा -षं, निरपराधः -धा -धं, अनिन्द्यः -न्द्या -न्द्यं.

IMMANENT, *a.* निष्ठः -ष्ठा -ष्ठं, अन्तर्भवः -वा -वं, अन्तरस्थः -स्था -स्थं.

IMMANITY, *s.* क्रूरता, दारुणता, क्रौर्य्यं, दारुण्यं, निष्ठुरता, नैष्ठुर्य्यं.

IMMARCESSIBLE, *a.* अम्लानी -निनी -नि (न्), अम्लानिः -निः -नि, अनश्वरः -रा -रं, अविनश्वरः -रा -रं, अक्षयः -या -यं, अनाश्यः -श्या -श्यं, अजरः -रा -रं.

To IMMASK, *v. a.* कपटवेशेन or छद्मवेशेन छद् (c. 10. छादयति -यितुं), or आकारगोपनं कृ, विडम्ब् (c. 10. -डम्बयति -यितुं).

IMMATERIAL, *a.* (Incorporeal, not consisting of matter) अमूर्त्तिकः -का -कं, अमूर्त्तः -र्त्ता -र्त्तं, अमूर्त्तिमान् -मती -मत् (त्), अमूर्त्तिमयः -यी -यं, अशरीरी -रिणी -रि (न्), अशारीरिकः -की -कं, अदैहिकः -की -कं, अदेही -हिनी -हि (न्), अवास्तवः -वी -वं, आत्मीयः -या -यं, आत्मिकः -की -कं, निरवयवः -वा -वं.—(Unimportant) अगुरुः -र्वी -रु, लघुः -घुः -घु, अल्पार्थः -र्था -र्थं, अगुर्वर्थः -र्था -र्थं, लघ्वर्थः -र्था -र्थं, अनावश्यकः -की -कं, अल्पप्रभावः -वा -वं, निष्प्रयोजनः -ना -नं.

IMMATERIALISM, *s.* देहभिन्नात्मवादः, आत्मास्तित्ववादः, आत्मास्तित्वमतं.

IMMATERIALIST, *s.* अमूर्त्तिवादी *m.* (न्), निराकारवादी *m.*, आत्मवादी.

IMMATERIALITY, *s.* अमूर्त्तिः *f.*, अमूर्त्तिमत्त्वं, मूर्त्तिहीनता, अशरीरिता, निरवयवत्वं, आत्मता -त्वं, अपाञ्चभौतिकता, निराकारत्वं, अमात्रवत्त्वं.

IMMATERIALLY, *adv.* अनावश्यकं, अल्पप्रभावेण, लघु, निष्प्रयोजनं.

IMMATURE, *a.* अपक्वः -क्वा -क्वं, अपरिपक्वः -क्वा -क्वं, अपक्त्रिमः -मा -मं, अविपक्त्रिमः -मा -मं, अपरिणतः -ता -तं, अपाकः -का -कं, अप्रौढः -ढा -ढं, अपूर्णः -र्णा -र्णं, अपूर्णकालः -ला -लं, असम्पूर्णः -र्णा -र्णं, असम्पूर्ण-

कालः -ला -लं, असम्पन्नः -न्ना -न्नं, असिद्धः -द्धा -द्धं, आपक्वः -क्वा -क्वं, अतिशीघ्रः -घ्रा -घ्रं, अपुष्कलः -ला -लं, अप्राप्तयौवनः -ना -नं.

IMMATURELY, *adv.* अपक्वं, अपरिपक्वं, प्राक्परिपाकात्, परिपाकात्पूर्व्वं, प्राक्पूर्णकालात्, पूर्णकालात्पूर्व्वं, अतिशीघ्रं.

IMMATURENESS, IMMATURITY, *s.* अपक्वता, अपरिपक्वता, अपक्तिः *f.*, अपाकः, अपरिपाकः, अविपाकः, अपरिणतत्वं, अपरिणामः, अपरिणतिः *f.*, अप्रौढता, अपूर्णता, असम्पूर्णता, असिद्धता, असिद्धिः *f.*, असम्पन्नता, अपुष्कलता, अपौष्कल्यं.

IMMEASURABLE, *a.* अप्रमेयः -या -यं, अपरिमेयः -या -यं, अमेयः -या -यं, दुष्प्रमेयः -या -यं, अपरिमाणः -णा -णं, अपरिमितः -ता -तं, अमितः -ता -तं.

IMMEASURABLENESS, *s.* अप्रमेयता, अपरिमेयत्वं, अमेयता, दुष्प्रमेयत्वं.

IMMEASURABLY, *adv.* अप्रमेयं, अपरिमेयं, अपरिमितं, अत्यन्तं.

IMMEDIATE, *a.* (Proximate) उपस्थः -स्था -स्थं, उपस्थायी -यिनी -यि (न्), उपस्थितः -ता -तं, सन्निहितः -ता -तं, अन्तिकः -का -कं, आसन्नः -न्ना -न्नं, निकटः -टा -टं.—(Without a medium or intervention) अनन्तरः -रा -रं, अव्यवहितः -ता -तं, अव्यवधानः -ना -नं, निरन्तरः -रा -रं.—(Without the intervention of time, instant) साद्यस्कः -स्की -स्कं, सद्यस्कः -स्का -स्कं, तात्कालिकः -की -कं, साम्प्रतिकः -की -कं, वर्त्तमानः -ना -नं, आकालिकः -की -कं, अचिरः -रा -रं, शीघ्रः -घ्रा -घ्रं, क्षणान्तरः -रा -रं.—(Direct) अवक्रः -क्रा -क्रं, अजिह्मः -ह्मा -ह्मं, अकुटिलः -ला -लं.

IMMEDIATELY, *adv.* सद्यस्, सपदि, आपाततस्, अनन्तरं, तत्क्षणात्, तत्काले, तत्क्षणे, झटिति, क्षणान्तरे, सम्प्रति, वर्त्तमानकाले, द्राक्, शीघ्रं, आशु, अकालक्षेपेण, अविलम्बितं; 'immediately after,' अनन्तरं, समनन्तरं; 'immediately on,' is expressed by मात्रात्; as, 'immediately on leaving the ship,' नौकातो निर्गममात्रात्; 'immediately on laying hands,' हस्तार्पणमात्रात्.

IMMEDIATENESS, *s.* आनन्तर्य्यं, नैरन्तर्य्यं, साद्यस्कता, सद्यस्कत्वं, शीघ्रता.

IMMEDICABLE, *a.* अचिकित्स्यः -त्स्या -त्स्यं, दुरुपचारः -रा -रं, औषधिपघातिगः -गा -गं.

IMMELODIOUS, *a.* विस्वरः -रा -रं, अस्वरः -रा -रं, कुस्वरः -रा -रं.

IMMEMORABLE, *a.* अस्मरणीयः -या -यं, अस्मर्त्तव्यः -व्या -व्यं, स्मरणायोग्यः -ग्या -ग्यं.

IMMEMORIAL, *a.* (Beyond memory) स्मरणातिगः -गा -गं, स्मृत्यतिगः -गा -गं, स्मरणातिक्रान्तः -न्ता -न्तं, अतिस्मृतिः -तिः -ति, अस्मार्त्तः -र्त्ती -र्त्तं, जनश्रुत्यतिगः -गा -गं, अतिप्राचीनः -ना -नं, विस्मरणीयः -या -यं; 'immemorial succession,' अनादिपरम्परा, अनागमः.

IMMENSE, *a.* (Unlimited) अत्यन्तः -न्ता -न्तं, अनन्तः -न्ता -न्तं, अपरिमितः -ता -तं, अपरिमाणः -णा -णं, अमितः -ता -तं, अप्रमेयः -या -यं, अपरिमेयः -या -यं, अमेयः -या -यं, दुष्प्रमेयः -या -यं, अतिमर्य्यादः -दा -दं, अतिमात्रः -त्रा -त्रं, आत्यन्तिकः -की -कं, नितान्तः -न्ता -न्तं.—(Very great) सुमहान् -हती -हत् (त्), अतिमहान् &c., अतिवृहन् -हती -हत् (त्); 'in bulk,' वृहच्छरीरः -रा -रं, वृहत्कायः -या -यं, अपरिमितशरीरः -रा -रं.

IMMENSELY, *adv.* अत्यन्तं, अतिमात्रं, अपरिमितं, नितान्तं, अतिशयेन, सुमहत्.

IMMENSITY, *s.* (Unlimited extension) अमितता, अपरिमितत्वं, अपरिमाणत्वं, अप्रमेयता, अमेयता.—(Infinity) अत्यन्तता, अनन्तता, आनन्त्यं, आत्यन्तिकत्वं.—(Vastness of size) सुमहत्त्वं, सुवृहत्त्वं, शरीरवृहत्त्वं.—(Infinite space) महाकाशं.

To IMMERGE, *v. a.* निमज्ज् (c. 10. -मज्जयति -यितुं), मज्ज्, अवगाह् (c 10. -गाहयति -यितुं), आप्लु (c. 10. -प्लावयति -यितुं), स्ना in caus. (स्नापयति, स्नपयति -यितुं), जले प्रविश् (c. 10. -वेशयति -यितुं), जले निविश्.

To IMMERGE, *v. n.* (Immerse one's self) निमज्ज् (c. 6. -मज्जति -ज्जितुं -मंक्तुं), मज्ज्, अवगाह् (c. 1. -गाहते -हितुं -गाढुं), व्यवगाह्, विगाह्, आप्लु (c. 1. -प्लवते -प्लोतुं), स्ना (c. 2. स्नाति -तुं), जलं प्रविश् (c. 6. -विशति -वेष्टुं).

To IMMERSE, *v. a.* See *To* IMMERGE.

IMMERSED, *p. p.* मग्नः -ग्ना -ग्नं, निमग्नः -ग्ना -ग्नं, प्रमग्नः -ग्ना -ग्नं, निमज्जमानः -ना -नं, अवगाहितः -ता -तं, अवगाढः -ढा -ढं, विगाढः -ढा -ढं, गाहितः -ता -तं, आप्लुतः -ता -तं, निष्णातः -ता -तं, निवेशितः -ता -तं, निविष्टः -ष्टा -ष्टं, अभिनिविष्टः -ष्टा -ष्टं, अभिनिवेशितः -ता -तं, लीनः -ना -नं, निष्ठः -ष्ठा -ष्ठं, निष्ठितः -ता -तं, निष्णः -ष्णा -ष्णं; 'immersed in sorrow,' शोकसागरमग्नः -ग्ना -ग्नं, शोकमग्नः -ग्ना -ग्नं; 'immersed in business,' कार्य्यनिष्ठः -ष्ठा -ष्ठं, कर्म्मनिविष्टः -ष्टा -ष्टं.

IMMERSION, *s.* निमज्जनं, मज्जनं, प्रमज्जनं, अवगाहनं, विगाहः -हनं, आप्लवः, आप्लावः -वनं, स्नानं, जलप्रवेशः, जलान्तःप्रवेशः, अभिषेकः, निष्णानं.

IMMETHODICAL, *a.* अक्रमकः -का -कं -मिकः -का -कं, अव्यवस्थितः -ता -तं, क्रमहीनः -ना -नं, क्रमविरुद्धः -द्धा -द्धं, अपर्य्यायः -या -यं.

IMMETHODICALLY, *adv.* अक्रमेण, क्रमेण विना, क्रमविरुद्धं, अक्रमतस्, अपर्य्यायतस्.

IMMETHODICALNESS, *s.* अक्रमः, क्रमहीनता, अव्यवस्थितत्वं, अपर्य्यायः.

IMMIGRANT, *s.* एकदेशत्यागानन्तरं देशान्तराधिवस्तुः *m.* or देशान्तराधिवासी *m.* (न्), अन्यदेशविवस्तुः *m.*

To IMMIGRATE, *v. n.* एकदेशं त्यक्त्वा देशान्तरे वस् (c. 1. वसति, वस्तुं) or अधिवस् with acc. c., or अध्यास् (c. 2. -आस्ते -आसितुं), अन्यदेशाधिवासनार्थम् एकदेशं त्यज् (c. 1. त्यजति, त्यक्तुं).

IMMIGRATION, *s.* देशान्तराधिवासनं, प्रदेशाधिवासनं, देशत्यागः.

IMMINENT, *a.* उपस्थायी -यिनी -यि (न्), उपस्थितः -ता -तं, उपस्थः -स्था -स्थं, समुपस्थितः -ता -तं, समुपगतः -ता -तं, समीपवर्त्ती -र्त्तिनी -र्त्ति (न्), निकटवर्त्ती &c., आसन्नवर्त्ती &c., उपनतः -ता -तं; 'imminent death,' कुपितान्तकः -का -कं.

To IMMINGLE, *v. a.* मिश्र् (c. 10. मिश्रयति -यितुं), विमिश्र्, सम्मिश्र्, मिश्रीकृ, एकीकृ.

IMMINGLED, *p.p.* मिश्रितः -ता -तं, सन्निपतितः -ता -तं, संसृष्टः -ष्टा -ष्टं.

IMMINUTION, *s.* ह्रासः, क्षयः, हानिः *f.*, न्यूनता, अपचयः.

IMMISCIBILITY, *s.* अमिश्रणीयता, अयोजनीयता, अयाव्यता, मिश्रणाक्षमता.

IMMISCIBLE, *a.* अमिश्रणीयः -या -यं, अयोजनीयः -या -यं, अयाव्यः -व्या -व्यं.

IMMISSION, *s.* निक्षेपणं, न्यसनं, प्रवेशनं, निवेशनं, प्रवेशकरणं.

To IMMIT, *v. a.* निक्षिप् (c. 6. -क्षिपति -क्षेप्तुं), निविश् (c. 10. -वेशयति -यितुं).

IMMITIGABLE, *a.* अशमनीयः -या -यं, अशाम्यः -म्या -म्यं, अनुपशाम्यः -म्या -म्यं.

IMMITTED, *p. p.* निक्षिप्तः -प्ता -प्तं, निवेशितः -ता -तं, प्रवेशितः -ता -तं.

To IMMIX, *v. a.* मिश्र् (c. 10. मिश्रयति -यितुं), विमिश्र्, मिश्रीकृ, सम्मिश्रीकृ.

IMMOBILITY, *s.* निश्चलत्वं, अचलत्वं, स्थिरता, स्थैर्य्यं, स्थावरत्वं, व्यवस्थितिः *f.*, अवस्थितिः *f.*, संस्थितिः *f.*, स्थायित्वं, स्थास्नुता, अकम्पः.

IMMODERATE, *a.* अपरिमितः -ता -तं, अत्यन्तः -न्ता -न्तं, अतिमात्रः -त्रा -त्रं, अतिमर्य्यादः -दा -दं, अमितः -ता -तं, अपरिमाणः -णा -णं, नितान्तः -न्ता -न्तं, अतिमितः -ता -तं, अधिकः -का -कं, अमर्य्यादः -दा -दं, आत्यन्तिकः -की -कं, सु or अति or अतिशय prefixed.

IMMODERATELY, *adv.* अपरिमितं, अत्यन्तं, अतिमात्रं, नितान्तं, अतिशयेन, अतिमर्य्यादं, अत्यर्थं, अति or सु or अतिशय prefixed.

IMMODERATION, *s.* अपरिमितत्वं, अमितत्वं, मर्य्यादातिक्रमः, अमर्य्यादा.

IMMODEST, *a.* निर्लज्जः -ज्जा -ज्जं, लज्जाहीनः -ना -नं, त्रपाहीनः -ना -नं, व्रीडाहीनः -ना -नं, अविनीतः -ता -तं, अलज्जः -ज्जा -ज्जं, विलज्जः -ज्जा -ज्जं, अनिभृतः -ता -तं, वियातः -ता -तं, प्रगल्भः -ल्भा -ल्भं, धृष्टः -ष्टा -ष्टं.—(Impure, obscene) अशुद्धः -द्धा -द्धं, अशुचिः -चिः -चि, अवाच्यः -च्या -च्यं, गर्ह्यः -र्ह्या -र्ह्यं.—(Unchaste) असद्वृत्तः -त्ता -त्तं, असाधुवृत्तः -त्ता -त्तं, व्यसनी -निनी -नि (न्), व्यभिचारी -रिणी -रि (न्), पांशुलः -ला -लं; 'an immodest woman,' बन्धकी, असती, पुंश्चली, असाध्वी, कुलटा, अभिसारिका, धर्षिणी.

IMMODESTLY, *adv.* अविनीतं, निर्लज्जं, वैयात्येन, अशुद्धं, प्रगल्भं, विनयविरोधेन, धृष्टवत्, अशुचि.

IMMODESTY, *s.* निर्लज्जत्वं, लज्जाहीनता, अलज्जा, अविनयः, अविनीतत्वं, वैयात्यं, प्रगल्भता, प्रागल्भ्यं, धृष्टता, अशुद्धता, अशुचिता, गर्ह्यता; 'in a woman,' पौंश्चल्यं, असतीत्वं, असाध्वीत्वं.

To IMMOLATE, *v. a.* क्रतौ हन् (c. 2. हन्ति -न्तुं), उपहारार्थं हन्, उत्सर्गार्थं हन् or शस् (c. 1. शसति -सितुं) or विशस् or प्रमी in caus. (-मापयति -यितुं), or उपहृ or उपहारीकृ or प्रोक्ष् (c. 1. -उक्षति -क्षितुं), उत्सर्गपूर्व्वं हन्, घातयित्वा उत्सर्गं कृ, हत्वा उत्सृज् (c. 6. -सृजति -स्रष्टुं), बलिं कृ, बलिदानं कृ.

IMMOLATED, *p. p.* उपहारार्थं हतः -ता -तं or प्रमीतः -ता -तं or शसितः -ता -तं, उपहृतः -ता -तं, उपहारीकृतः -ता -तं, प्रोक्षितः -ता -तं.

IMMOLATION, *s.* उपहारार्थं घातः or घातनं or निहननं, उत्सर्गार्थं मारणं or प्रमापणं or विशसनं or शसनं, शमनं, संसनं, प्रोक्षणं, परम्पराकं, उपहारः, उपहरणं, उत्सर्गकरणं, बलिदानं.

IMMORAL, *a.* निर्धर्म्मः -र्म्मा -र्म्मं -र्म्मा -र्म्मा -र्म्म (न्), अधार्म्मिकः -की -कं, धर्म्मविरुद्धः -द्धा -द्धं, धर्म्मापेतः -ता -तं, धर्म्मरोधी -धिनी -धि (न्), अधर्म्मी -र्म्मिणी -र्म्मि (न्), कुधर्म्मा -र्म्मा -र्म्म (न्), अपुण्यः -ण्या -ण्यं, असाधुः -ध्वी -धु, अशुचिः -चिः -चि, कुशीलः -ला -लं, विशीलः -ला -लं, दुःशीलः -ला -लं, दुश्चरित्रः -त्रा -त्रं, असच्चरित्रः -त्रा -त्रं, असत्कर्म्मा -र्म्मा -र्म्म (न्), दुष्टः -ष्टा -ष्टं, कर्म्मदुष्टः -ष्टा -ष्टं, दुर्वृत्तः -त्ता -त्तं, व्यभिचारी -रिणी -रि (न्), पापी -पिनी -पि (न्), पापकर्म्मा &c., व्यसनी -निनी -नि (न्), कुचरितः -ता -तं, अधर्म्मचारी -रिणी -रि (न्).

IMMORALITY, *s.* अधर्म्मः, अधर्म्मत्वं -ता, निर्धर्म्मत्वं, अधार्म्मिकत्वं, असाधुत्वं, अपुण्यता, अशुचिता, दुष्टता, दुर्वृत्तत्वं, व्यसनिता, व्यसनं, कुशीलता, दुश्चरित्रता, अधर्म्मचारित्वं, दुःशीलता, दौःशील्यं, व्यभिचारः.

IMMORTAL, *a.* (Exempt from death) अमरः -रा -रं, अमर्त्यः -र्त्या -र्त्यं, सदाजीवी -विनी -वि (न्), सदास्थायी -यिनी -यि (न्), मरणरहितः -ता -तं.—(Imperishable) निर्जरः -रा -रं, अजरः -रा -रं, अक्षयः -या -यं, अनश्वरः -रा -रं, अनाश्यः -श्या -श्यं, अविनाशी -शिनी -शि (न्), निरपायः -या -यं.—(Eternal) अनन्तः -न्ता -न्तं, नित्यः -त्या -त्यं, सनातनः -नी -नं, सदातनः -नी -नं, शाश्वतः -ती -तं, अनाद्यन्तः -न्ता -न्तं, सर्व्वकालीनः -ना -नं, अनन्तकालस्थायी -यिनी -यि (न्).

IMMORTALITY, *s.* अमरता -त्वं, अमर्त्यता, निर्जरता -त्वं, अजरता -त्वं, अक्षयता, अनश्वरता, अनाश्यता, अनन्तता, आनन्त्यं, अनन्त्यं, सदास्थायित्वं, नित्यता.

To IMMORTALIZE, *v. a.* अमरीकृ, निर्जरीकृ, अनश्वरीकृ, अक्षयीकृ, शाश्वतीकृ, नित्यीकृ, आनन्त्यं कृ or जन् (c. 10. जनयति -यितुं).

IMMORTALLY, *adv.* अमरं, अमरत्वेन, अमरवत्, अमर्त्यवत्, निर्जरं, अजरं, अक्षयं, अनश्वरं, अनन्तकाले -लं, अनन्तं, आनन्त्येन, सनातनं, शाश्वतं, निरपायं, अविनाशेन.

IMMOVABILITY, *s.* अचलता -त्वं, निश्चलत्वं, स्थावरत्वं, स्थिरता, अचरिष्णुता, स्तब्धता.

IMMOVABLE, *a.* अचलः -ला -लं, निश्चलः -ला -लं, स्थावरः -रा -रं, अचरः -रा -रं, अचरिष्णुः -ष्णुः -ष्णु, अजङ्गमः -मा -मं, अस्पन्दः -न्दा -न्दं, अच्युतः -ता -तं, स्थिरः -रा -रं, स्थायी -यिनी -यि (न्), स्तब्धः -ब्धा -ब्धं, स्थाणुः -णुः -णु, स्थास्नुः -स्नुः -स्नु, जङ्गमेतरः -रा -रं, स्तिमितः -ता -तं, अचेतन् -न्ती -त् (त्); 'immovables,' स्थावराणि.

IMMOVABLY, *adv.* अचलं, निश्चलं, स्थावरं, स्थिरं, स्तब्धं, स्थाणुवत्.

IMMUND, *a.* अशुचिः -चिः -चि, अपवित्रः -त्रा -त्रं, अशौची -चिनी -चि (न्).

IMMUNDICITY, *s.* अशुचिता -त्वं, अशौचं, आशौचं, अपवित्रता -त्वं, अशोधनं.

IMMUNITY, *s.* मुक्तिः *f.*, मोक्षः, विमोक्षः, विनिर्म्मोकः, निर्म्मोकः, विरहः, राहित्यं, रहितत्वं, शून्यता, अभावः, असम्भवः, or expressed by अ prefixed; as, 'immunity from danger,' अभयं; 'from exertion,' अनायासः; 'from taxes,' अकरत्वं.

To IMMURE, *v. a.* निरुध् (c. 7. -रुणद्धि -रोद्धुं), अवरुध्, रुध्; 'in a prison,' कारायां निरुध् or बन्ध् (c. 9. बध्नाति, बन्द्धुं), कारागुप्तं -प्तां -प्तं कृ.—(Inclose) परिवृ (c. 5. -वृणोति -वरितुं -रीतुं), परिवेष्ट् (c. 1. -वेष्टते -ष्टितुं, c. 10. -वेष्टयति -यितुं), संवेष्ट्, उपवेष्ट्.—(Surround with a wall) प्राकारेण परिवृ, प्राकारीयं -यां -यं कृ.

IMMURED, *p. p.* निरुद्धः -द्धा -द्धं, अवरुद्धः -द्धा -द्धं, अन्तर्गतः -ता -तं.

IMMUTABILITY, *s.* अविकार्य्यता -त्वं, अविकारत्वं, निर्व्विकारत्वं, अविकारः, स्थिरता, अमोघता, अपरिवर्त्तनं, नित्यता.

IMMUTABLE, *a.* अविकार्य्यः -र्य्या -र्य्यं, अविकारः -रा -रं, अविक्रियः -या -यं, निर्व्विकारः -रा -रं, विकाराक्षमः -मा -मं, विकारहीनः -ना -नं, स्थिरः -रा -रं, अमोघः -घा -घं, निर्व्विकल्पः -ल्पा ल्पं, नित्यः -त्या -त्यं, अपरिवर्त्तनीयः -या -यं.

IMMUTABLY, *adv.* अविकार्य्यं, अविकारेण, अविकार्य्यत्वेन, स्थिरं, नित्यं, निर्व्विकारं, निर्व्विकल्पं, अमोघं.

IMMUTATION, *s.* विकारः, विक्रिया, विकृतिः *f.*, वैकृत्यं, विपर्य्ययः, परिवर्त्तः

IMP, *s.* पिशाचः, भूतः, राक्षसः, असुरः, दैत्यः, दानवः, ग्रहः, यातुः *m.*, यातुधानः, विधुरः, क्रव्याद् *m.*, निशाटः, निशाचरः, कर्व्वरः, कर्ब्बुरः.

To IMP, *v. a.* (Graft) एकवृक्षशाखायां भिन्नवृक्षपल्लवं निविश् (c. 10. -वेशयति -यितुं).—(Lengthen) दीर्घतरं -रां -रं कृ, दीर्घीकृ.

IMPACABLE, *a.* अशाम्यः -म्या -म्यं, असान्त्वनीयः -या -यं, अतोषणीयः -या -यं.

IMPACT, *s.* स्पर्शः, संस्पर्शः, सम्पर्कः, उपघातः, आघातः, प्रतिघातः.

To IMPAIR, *v. a.* न्यूनीकृ, ह्रस् (c. 10. ह्रासयति -यितुं), अल्पीकृ, विकलीकृ, कन (nom. कनयति -यितुं), ऊन् (c. 10. ऊनयति -यितुं), न्यून्, क्षण् (c. 8. क्षणोति -णितुं), परिक्षण्, क्षीणीकृ, क्षतिं कृ, परिक्षतिं कृ, दुष् (c. 10. दूषयति -यितुं), उपहन् (c. 2. -हन्ति -न्तुं), लघ (nom. लघयति -यितुं), लुप् (c. 6. लुम्पति, लोप्तुं), लघूकृ, नश (c. 10. नाशयति -यितुं), विनश्.—(Enfeeble) शिथिलीकृ, अल्पबलीकृ, दुर्बलीकृ, बलं or तेजः or सत्त्वं हृ (c. 1. हरति, हर्त्तुं).

IMPAIRED, *p. p.* विकलः -ला -लं, विकलीभूतः -ता -तं, विकलीकृतः -ता -तं, अल्पीभूतः -ता -तं, अल्पीकृतः -ता -तं, न्यूनीकृतः -ता -तं, न्यूनीभूतः -ता -तं, क्षीणः -णा -णं, ह्रसितः -ता -तं, अपचितः -ता -तं, लुप्तः -प्ता -प्तं, शिथिलीकृतः -ता -तं, उपहतः -ता -तं, विशीर्णः -र्णा -र्णं; 'impaired in strength,' शिथिलबलः -ला -लं, क्षीणबलः -ला -लं, हतबलः -ला -लं, हतसत्त्वः -त्त्वा -त्त्वं.

IMPAIRING, IMPAIRMENT, *s.* न्यूनता -त्वं, न्यूनीकरणं, क्षयः, ह्रासः, हानिः *f.*, अल्पत्वं -ता, वैकल्यं, विकलीकरणं, शैथिल्यं, शिथिलीकरणं, अपचयः, क्षिया, अवसादः.

To IMPALE, *v. a.* IMPALED, IMPALEMENT. *See* EMPALE, &c.

IMPALPABILITY, *s.* अस्पृश्यता, अस्पर्शनीयता, दुःस्पृश्यता, अग्राह्यता,

अग्रहणीयत्वं, अव्यक्तता, अव्यक्तिः *f.*, अतिसूक्ष्मता.

Impalpable, *a.* अस्पृश्यः -श्या -श्यं, अस्पर्शनीयः -या -यं, दुःस्पर्शः -र्शा -र्शं, दुस्पृश्यः -श्या -श्यं, अग्राह्यः -ह्या -ह्यं, अग्रहणीयः -या -यं, दुरभिग्रहः -हा -हं, दुरालभः -भा -भं, स्पर्शाव्यक्तः -क्ता -क्तं, अव्यक्तः -क्ता -क्तं, अप्रत्यक्षः -क्षा -क्षं, इन्द्रियैरग्राह्यः -ह्या -ह्यं, इन्द्रियाग्राह्यः -ह्या -ह्यं, इन्द्रियागोचरः -रा -रं, अतिसूक्ष्मः -क्ष्मा -क्ष्मं.

Impalpably, *adv.* अस्पर्शनीयं, अस्पृश्यं, अव्यक्तं, अप्रत्यक्षं.

To **impannel**, *v. a.* (A jury) नामावलिपत्रे or नामपरिसंख्यापत्रे द्वादशप्रमाणपुरुषाणां or द्वादशमध्यस्थपुरुषाणां नामानि समारुह् in caus. (-रोपयति -यितुं) or अभिलिख् (c. 6. -लिखति -लेखितुं).

Imparasyllabic, *a.* असमानाक्षरः -रा -रं, अतुल्याक्षरः -रा -रं.

Imparity, *s.* असाम्यं, असमता, असमानता, असामान्यं, वैषम्यं, विषमता, विषमं, अतुल्यत्वं -ता, असमञ्जसं, असामञ्जस्यं, तारतम्यं.

To **impark**, *v. a.* वाटं कृ, वाटिकां कृ, भूमिभागं प्राचीरेण परिवृ (c. 5. -वृणोति -वरितुं -रीतुं) or वृतिपरिगतं कृ.

To **impart**, *v. a.* प्रदा (c. 3. -ददाति -दातुं), अभिदा, सम्प्रदा, निदा, दा, यम् (c. 1. यच्छति, दातुं), प्रयम्, सम्प्रयम्, प्रतिपद् (c. 10. -पादयति -यितुं), उपपद्, वितॄ (c. 1. -तरति -रितुं -रीतुं), आहृ (c. 1. -हरति -हर्तुं), उपहृ, ऋ in caus. (अर्पयति -यितुं), सम्, निक्षिप् (c. 6. -क्षिपति -क्षेप्तुं), सङ्क्रम् in caus. (-क्रामयति -यितुं), ग्रह् in caus. (ग्राहयति -यितुं), प्रदानं कृ. —(Impart information, make known) विज्ञा in caus. (-ज्ञापयति -यितुं), निविद् (c. 10. -वेदयति -यितुं), समाविद्, संवद् (c. 1. -वदति -दितुं), संवादं कथ् (c. 10. कथयति -यितुं), समाचारं कथ्; 'impart a secret,' रहस्यं प्रकाश् (c. 10. -काशयति -यितुं).

Imparted, *p. p.* प्रदत्तः -त्ता -त्तं, प्रत्तः -त्ता -त्तं, निदत्तः -त्ता -त्तं, नीत्तः -त्ता -त्तं, प्रतिपादितः -ता -तं, उपपादितः -ता -तं, वितीर्णः -र्णा -र्णं, अर्पितः -ता -तं, समर्पितः -ता -तं, निक्षिप्तः -प्ता -प्तं, निहितः -ता -तं, संक्रान्तः -न्ता -न्तं.—(Made known) निवेदितः -ता -तं, विज्ञापितः -ता -तं, विज्ञप्तः -प्ता -प्तं.—(As a secret, &c.) प्रकाशितः -ता -तं.—(As a disease) संचारितः -ता -तं, संक्रान्तः -न्ता -न्तं.

Imparter, *s.* दाता *m.* (तृ), प्रदाता *m.*, दायी *m.* (न्), प्रतिपादकः.

Impartial, *a.* अपक्षपाती -तिनी -ति (न्), विपक्षपातः -ता -तं, पक्षपातरहितः -ता -तं, पक्षपातहीनः -ना -नं, समदर्शी -र्शिनी -र्शि (न्), सर्व्वसमः -मा -मं, समः -मा -मं, निःसङ्गः -ङ्गा -ङ्गं, सङ्गहीनः -ना -नं, मुक्तसङ्गः -ङ्गा -ङ्गं, न्यायी -यिनी -यि (न्), न्यायवर्त्ती -र्त्तिनी -र्त्ति (न्), उदासीनः -ना -नं, उदासी -सिनी -सि (न्), उभयसाधारणः -णा -णी -णं, उभयसमः -मा -मं, उभयसामान्यः -न्या -न्यं, मध्यस्थः -स्था -स्थं, धार्म्मिकः -की -कं, निरपेक्षः -क्षा -क्षं, समानवृत्तिः -त्तिः -त्ति.

Impartiality, *s.* अपक्षपातः, पक्षपातहीनता, साम्यं, समता, सर्व्वसमता, उभयसमता, औदास्यं, उदासीनता, निःसङ्गता, सङ्गहीनता, न्यायः, धर्म्मन्यायः.

Impartially, *adv.* अपक्षपातेन, पक्षपातं विना, समं, साम्येन, असङ्गेन, सङ्गं विना, न्यायेन, न्यायतस्, उदासीनं, उदासीनवत्.

Impartible, *a.* अविभाज्यः -ज्या -ज्यं, अपाटनीयः -या -यं, अनंश्यः -श्या -श्यं.

Impassable, *a.* अतरणीयः -या -यं, अतार्य्यः -र्य्या -र्य्यं, दुस्तरः -रा -रं, दुस्तार्य्यः -र्य्या -र्य्यं, सुदुस्तरः -रा -रं, दुरुत्तरः -रा -रं, दुर्गः -र्गा -र्गं, दुर्गमः -मा -मं, अगम्यः -म्या -म्यं, अगमनीयः -या -यं, दुरत्ययः -या -यं, गहनः -ना -नं, सङ्कटः -टा -टं, सबाधः -धा -धं, गव्यूनः -ना -नं.

Impassableness, *s.* अतार्य्यत्वं, दुस्तार्य्यत्वं, अगम्यता, दुर्गम्यता.

Impassible, *a.* अचेतनः -ना -नं, निश्चेतनः -ना -नं, शोकदुःखाक्षमः -मा -मं, क्लेशदुःखादिहीनः -ना -नं, रागहीनः -ना -नं, अरागी -गिणी -गि (न्).

Impassibleness, *s.* अचैतन्यं, शोकदुःखाक्षमता, क्लेशदुःखादिहीनता.

To **impassion**, *v. a.* संरक्तीकृ, सरागीकृ, रागयन्तं -यती -वत् कृ.

Impassioned, *p. p.* संरक्तः -क्ता -क्तं, रागवान् -वती -वत् (त्), रागी -गिणी -गि (न्), रागान्वितः -ता -तं, सरागः -गा -गं, सानुरागः -गा -गं, अनुरागी -गिणी -गि (न्), सरसः -सा -सं, रसी -सिनी -सि (न्), रसिकः -का -कं, शृङ्गारी -रिणी -रि (न्), शृङ्गारितः -ता -तं.

Impatience, *s.* अमर्षः, अक्षमता, अक्षमा, अक्षान्तिः *f.*, असहिष्णुता -त्वं, विमर्षः, असहनं, असहत्वं, अतितिक्षा, अनुत्साहः.

Impatient, *a.* असहिष्णुः -ष्णुः -ष्णु, असहनः -ना -नं, असहः -हा -हं, असहमानः -ना -नं, असहनशीलः -ला -लं, अक्षमः -मा -मं, अक्षान्तिमान् -मती -मत् (त्), अक्षमी -मिणी -मि (न्), अक्षन्ता -न्त्री -न्तृ (न्), अमर्षणः -णा -णं, विमर्षी -र्षिणी -र्षि (न्), जातामर्षः -र्षा -र्षं, अतितिक्षुः -क्षुः -क्षु, उत्सुकः -का -कं, उत्कः -त्का -त्कं.

Impatiently, *adv.* सामर्षं, सविमर्षं, अमर्षेण, विमर्षेण, असहिष्णुवत्, अक्षान्त्या, असहनशीलत्वात्, सावेगं.

To **impawn**, *v. a.* आधीकृ, पण् (c. 1. पणते -णितुं), परिपण्, निक्षिप् (c. 6. -क्षिपति -क्षेप्तुं), न्यस् (c. 4. -अस्यति -असितुं).

To **impeach**, *v. a.* अभियुज् (c. 7. -युनक्ति -योक्तुं), व्यवहारसभायां or व्यवहारानुसारेण अभियुज् or अभिशंस् (c. 1. -शंसति -सितुं) or अभियोगं कृ or अभिशंसनं कृ or अपवद् (c. 1. -वदति -दितुं), दोषीकृ, उपालभ् (c. 1. -लभते -लब्धुं).

Impeachable, *a.* अभियोक्तव्यः -व्या -व्यं, व्यवहारसभायाम् अभियोज्यः -ज्या -ज्यं.

Impeached, *a.* व्यवहाराभियुक्तः -क्ता -क्तं, अभियुक्तः -क्ता -क्तं, व्यवहाराभिशस्तः -स्ता -स्तं.

Impeacher, *s.* अभियोगी *m.* (न्), अभियोक्ता *m.* (क्तृ), अभियोगकृत् *m.*, अपवादकः.

Impeachment, *s.* अभियोगः, व्यवहाराभियोगः, अभिशंसनं, व्यवहाराभिशंसनं, अपवादः, संशयः.

Impeccability, *s.* निष्पापत्वं, पापहीनता, पापाभावः, पापाक्षमता.

Impeccable, *a.* अपापः -पा -पं, निष्पापः -पा -पं, पापाक्षमः -मा -मं.

To **impede**, *v. a.* रुध् (c. 7. रुणद्धि, रोद्धुं), प्रतिरुध्, निरुध्, उपरुध्, संरुध्, विरुध्; विहन् (c. 2. -हन्ति -न्तुं), व्याहन्, प्रतिहन्, प्रतिबन्ध् (c. 9. -बध्नाति -बन्द्धुं), वृ (c. 10. वारयति -यितुं), निवृ, विनिवृ, आवृ, समावृ, प्रतिवृ, विघ्न (nom. विघ्नयति -यितुं), बाध् (c. 1. बाधते -धितुं), स्तम्भ् (c. 10. स्तम्भयति -यितुं, c. 9. स्तभ्नाति, स्तम्भितुं), विष्टम्भ्, प्रत्यूहीकृ, निषिध् (c. 1. -षेधति -षेद्धुं).

Impeded, *p. p.* रुद्धः -द्धा -द्धं, विरुद्धः -द्धा -द्धं, प्रतिरुद्धः -द्धा -द्धं, निरुद्धः -द्धा -द्धं, उपरुद्धः -द्धा -द्धं, विहतः -ता -तं, प्रतिहतः -ता -तं, पराहतः -ता -तं, वारितः -ता -तं, निवारितः -ता -तं, विघ्नितः -ता -तं, बाधितः -ता -तं, स्तम्भितः -ता -तं, स्तब्धः -ब्धा -ब्धं, विष्टब्धः -ब्धा -ब्धं, अन्तरितः -ता -तं, सार्गलः -ला -लं.

Impediment, *s.* विघ्नः, व्याघातः, अन्तरायः, प्रत्यूहः, प्रतिबन्धः, विष्टम्भः, प्रतिष्टम्भः, स्तम्भः -म्भनं, रोधः, संरोधः, विरोधः, अवरोधः, उपरोधः, निरोधः, विघातः -तं, विहननं, विहतिः *f.*, बाधा -धकः, वारणं, निवारणं, आवरणं.—(Impediment in speech) वाक्स्खलनं, वाग्भेदः, वाग्वैकल्यं; 'having an impediment in one's speech,' स्खलद्वाक्यः -क्या -क्यं, वाग्विकलः -ला -लं, भिन्नवाक् *m. f. n.*, कद्वदः -दा -दं.

Impedimental, *a.* (Causing impediment) व्याघातकः -का -कं, विघाती -तिनी -ति (न्), विघ्नकरः -री -रं, विघ्नकारी -रिणी -रि (न्), विरोधी -धिनी -धि (न्), प्रतिरोधी &c., औपरोधिकः -की -कं, विष्टम्भी -म्भिनी -म्भि (न्), निवारकः -का -कं.

To **impel**, *v. a.* (Drive, urge forward) प्रेर् (c. 10. -ईरयति -यितुं),

प्रणुद् (c. 6. -णुदति -णोत्तुं), प्रचुद् (c. 10. -चोदयति -यितुं), सञ्चुद्, परिचुद्, चुद्, कृष् (c. 1. कर्षति, क्रष्टुं), समाकृष्.—(Incite to action) प्रवृत् (c. 10. -वर्त्तयति -यितुं), प्रयुज् (c. 10. -योजयति -यितुं), नियुज्, उद्युज्, उत्सह् (c. 10. -साहयति -यितुं), प्रोत्सह्, प्ररुच् (c. 10. -रोचयति -यितुं), चेष्ट् (c. 10. चेष्टयति -यितुं), उत्तप् (c. 10. -तापयति -यितुं).

IMPELLED, *p. p.* प्रेरितः -ता -तं, प्रणोदितः -ता -तं, प्रणुन्नः -न्ना -न्नं, प्रचोदितः -ता -तं, प्रवर्त्तितः -ता -तं, प्रवृत्तः -त्ता -त्तं, नियोजितः -ता -तं, प्रयोजितः -ता -तं, प्रोत्साहितः -ता -तं, प्ररुचितः -ता -तं, समाकृष्टः -ष्टा -ष्टं, आकृष्टः -ष्टा -ष्टं.

IMPELLENT, *s.* प्रेरकः, प्रेरयिता *m.* (तृ), प्रणोदकः, प्रवर्त्तकः, प्रयोजकः, प्रोत्साहकः, प्रचोदकः.

To IMPEND, *v. n.* (Be near) उपस्था (c. 1. -तिष्ठति -ते -स्थातुं), प्रत्युपस्था, समुपस्था, समीपं स्था or वृत् (c. 1. वर्त्तते -र्त्तितुं), निकटे स्था or वृत्, उपगम् (c. 1. -गच्छति -गन्तुं), उपागम्, समुपगम्, उपनतः -ता -तं भू.—(Hang over) आलम्ब् (c. 1. -लम्बते -म्बितुं), प्रलम्ब्, अवलम्ब्, लम्ब्.—(Be about to fall) पत् in des. (पिपतिषति -षितुं, पित्सति -त्सितुं), आपत् (c. 1. -पतति -तितुं).

IMPENDENT, IMPENDING, *a.* उपस्थायी -यिनी -यि (न्), उपस्थितः -ता -तं, उपस्थः -स्था -स्थं, समुपस्थितः -ता -तं, समीपवर्त्ती -र्त्तिनी -र्त्ति (न्), निकटवर्त्ती &c., आसन्नवर्त्ती &c., उपनतः -ता -तं, समुपगतः -ता -तं, पतनोन्मुखः -खा -खं, पिपतिषुः -षुः -षु, पित्सुः -त्सुः -त्सु.

IMPENETRABILITY, *s.* अवेध्यता, अव्याध्यता, अभेद्यता, अच्छेद्यत्वं, अप्रवेश्यत्वं, वज्रता -त्वं, गहनत्वं; 'impenetrability,' as a property of matter, is expressed in scientific treatises by the word विरोधः.

IMPENETRABLE, *a.* (Not to be pierced) अवेध्यः -ध्या -ध्यं, अव्याध्यः -ध्या -ध्यं, अभेद्यः -द्या -द्यं, अभेदनीयः -या -यं, अच्छेद्यः -द्या -द्यं, अच्छेदनीयः -या -यं, अव्याप्यः -प्या -प्यं, अच्छिद्रणीयः -या -यं, कलिलः -ला -लं.—(Not to be entered) अप्रवेश्यः -श्या -श्यं, अप्रवेष्टव्यः -व्या -व्यं, गहनः -ना -नं.—(Very hard) वज्रमयः -यी -यं, वज्रः -ज्रा -ज्रं.

IMPENETRABLY, *adv.* अभेद्यं, अवेध्यं, अच्छेदनीयं, गहनं, वज्रवत्.

IMPENITENCE, IMPENITENCY. *s.* अननुतापः, अपश्चात्तापः, पश्चात्तापहीनता, पश्चात्तापाभावः, अननुशोकः, अखेदः, खेदहीनता, खेदराहित्यं, अप्रायश्चित्तं, अननुशयः, स्तब्धचित्तत्वं.

IMPENITENT, *a.* अननुतापी -पिनी -पि (न्), अननुतप्तः -प्ता -प्तं, पश्चात्तापहीनः -ना -नं, अननुतापशीलः -ला -लं, खेदहीनः -ना -नं, खेदरहितः -ता -तं, अननुशयी -यिनी -यि (न्), स्तब्धचित्तः -त्ता -त्तं, कठिनचित्तः -त्ता -त्तं.

IMPERATIVE, *a.* आज्ञापकः -का -कं, आदेशकः -का -कं, आदेशी -शिनी -शि (न्), नियोजकः -का -कं, प्रबोधकः -का -कं, अवश्यकर्त्तव्यः -व्या -व्यं; 'imperative mood,' विधिः *m.*, आज्ञावाचकः -कं.

IMPERCEPTIBLE, *a.* अव्यक्तः -क्ता -क्तं, अप्रत्यक्षः -क्षा -क्षं, अविभाव्यः -व्या -व्यं, अविभावनीयः -या -यं, अगम्यः -म्या -म्यं, अगोचरः -रा -रं.—(To the senses) अतीन्द्रियः -या -यं, इन्द्रियागोचरः -रा -रं, इन्द्रियागम्यः -म्या -म्यं, इन्द्रियातीतः -ता -तं.—(To the eye) परोक्षः -क्षा -क्षं, अलोकनीयः -या -यं, नयनागोचरः -रा -रं.—(To the ear) कर्णागोचरः -रा -रं.

IMPERCEPTIBLY, *adv.* अव्यक्तं, अप्रत्यक्षं -क्षेण, अविभावनीयं, अगोचरं; 'going imperceptibly,' अव्यक्तगतिः -तिः -ति.

IMPERFECT, *a.* (Not complete) असम्पूर्णः -र्णा -र्णं, अपूर्णः -र्णा -र्णं, अपरिपूर्णः -र्णा -र्णं, असम्पन्नः -न्ना -न्नं, असमाप्तः -प्ता -प्तं, असिद्धः -द्धा -द्धं, असमग्रः -ग्रा -ग्रं, अनिखिलः -ला -लं, अनिष्पन्नः -न्ना -न्नं, अपर्य्याप्तः -प्ता -प्तं, असंसिद्धः -द्धा -द्धं, अपक्वः -क्वा -क्वं, खण्ड in comp.—(Defective) न्यूनः -ना -नं, विकलः -ला -लं, हीनः -ना -नं, लुप्तः -प्ता -प्तं, दोषी -षिणी -षि (न्), सच्छिद्रः -द्रा -द्रं, ऊनः -ना -नं.—(Wanting some organ) अङ्गहीनः -ना -नं, न्यूनेन्द्रियः -या -यं, विकलेन्द्रियः -या -यं, विकलाङ्गः -ङ्गा -ङ्गं.—(Tense) अद्यतनभूतः, अनद्यतनः; the grammatical symbols are घी, लङ्; 'imperfect comparison,' लुप्तोपमा.

IMPERFECTION, *s.* (Defect) दोषः, छिद्रं, अगुणः, अपराधः, कलङ्कः, दूषणं, वैकल्यं, हानिः *f.*, हीनता, क्षतिः *f.*, न्यूनता, अपर्य्याप्तिः *f.*, अशुद्धता; 'in a gem,' पुलकः, खण्डः.

IMPERFECTLY, *adv.* असम्पूर्णं, असमग्रं, खण्डतस्, अनिखिलेन, असम्यक्, असम्यक्, अपर्य्याप्तं, विकलं, वैकल्येन.

IMPERFECTNESS, *s.* असम्पूर्णता, अपूर्णता, असम्पन्नता, असिद्धिः *f.*, असमग्रता.

IMPERFORATE, *a.* नीरन्ध्रः -न्ध्रा -न्ध्रं, निश्छिद्रः -द्रा -द्रं, अच्छिद्रितः -ता -तं.

IMPERIAL, *a.* माहाराजिकः -की -कं, आधिराजिकः -की -कं, महाराजकीयः -या -यं, महाराजयोग्यः -ग्या -ग्यं, साम्राजिकः -की -कं, महेश्वरीयः -या -यं.

IMPERIALIST, *s.* महाराजाधीनः, अधिराजाधीनः, महाराजानुचरः, महाराजानुपक्षी *m.* (न्); 'imperialist army,' महाराजसैन्यं.

To IMPERIL, *v. a.* संशयस्थं -स्थां -स्थं कृ, सन्देहस्थं -स्थां -स्थं कृ.

IMPERIOUS, *a.* (Commanding) आज्ञापकः -का -कं, आदेशकः -का -कं.—(Overbearing, haughty) धृष्टः -ष्टा -ष्टं, धर्षी -र्षिणी -र्षि (न्), भर्त्सनकारी -रिणी -रि (न्), उद्धतः -ता -तं, अवलिप्तः -प्ता -प्तं, सावहेलः -ला -लं, सोन्मादः -दा -दं, प्रगल्भः -ल्भा -ल्भं, दृप्तः -प्ता -प्तं.

IMPERIOUSLY, *adv.* धर्षेण, प्रगल्भं, सावहेलं, सावलेपं, सोन्मादं, साटोपं

IMPERIOUSNESS, *s.* धृष्टता, धर्षः, अवलिप्तता, अवलेपः, सावलेपत्वं, अवहेला, उद्धतिः *f.*, चित्तसमुन्नतिः *f.*, प्रगल्भता, प्रागल्भ्यं, उत्सिक्तता, साटोपत्वं.

IMPERISHABLE, *a.* अक्षयः -या -यं, अक्षय्यः -य्या -य्यं, अक्षयी -यिणी -यि (न्), अनश्वरः -रा -रं, अविनश्वरः -रा -रं, अविनाशी -शिनी -शि (न्), अनाश्यः -श्या -श्यं, अव्ययः -या -यं, अजरः -रा -रं, निर्जरः -रा -रं, अजर्य्यः -र्य्या -र्य्यं, अक्षरः -रा -रं, अक्षयणीयः -या -यं.

IMPERISHABLENESS, *s.* अक्षयता -त्वं, अनश्वरता, अनाश्यत्वं, अविनाश्यता, अजरत्वं, निर्जरत्वं, अव्ययीभावः.

IMPERMEABLE, *a.* अव्याप्यः -प्या -प्यं, अप्रवेश्यः -श्या -श्यं, अप्रवेशनीयः -या -यं.

IMPERMEABLENESS, *s.* अव्याप्यता, अप्रवेश्यता, अभेद्यत्वं.

IMPERSONAL, *a.* अकर्तृकः -का -कं, कर्तृत्वहीनः -ना -नं, अकर्तृवाच्यः -च्या -च्यं, भाववाचकः -का -कं; 'impersonal verb,' भाववाच्यं, अकर्तृवाचका क्रिया.

IMPERSONALLY, *adv.* अकर्तृकं, अकर्तृवाच्यक्रमेण, भाववाच्यानुसारेण.

IMPERTINENCE, IMPERTINENCY, *s.* (Rudeness) अविनयः, अविनीतता, अशिष्टता, परुषवचनं, दुरुक्तिः *f.*, वाक्पारुष्यं, कुशीलता, दुःशीलता, अशीलता, वामशीलता, धृष्टता, धर्षः, प्रगल्भता, चापल्यं, क्लेशदायकत्वं, उत्तरदायकत्वं.—(Meddling with others' affairs) पराधिकारचर्चा, पराधिकारप्रवेशः.—(State of not relating to the subject) निर्विषयता -त्वं, अप्रासङ्गिकत्वं, अप्रस्तुतत्वं, असम्बन्धः.—(Nonsense) आनर्थक्यं, अनर्थकता, असङ्गत्वं.

IMPERTINENT, *a.* (Rude) अविनीतः -ता -तं, अशिष्टः -ष्टा -ष्टं, धृष्टः -ष्टा -ष्टं, प्रगल्भः -ल्भा -ल्भं, दुःशीलः -ला -लं, अशीलः -ला -लं, कुशीलः -ला -लं, वामशीलः -ला -लं, चपलः -ला -लं, परुषवाक् *m. f. n.*, परुषवादी -दिनी -दि (न्), क्लेशदायकः -का -कं; 'giving impertinent answers,' उत्तरदायकः -का -कं.—(Meddling with others' affairs) पराधिकारचर्चकः -का -कं.—(Irrelevant) अप्रासङ्गिकः -की -कं, अप्रस्तुतः -ता -तं, निर्विषयः -या -यं, असम्बन्धी -न्धिनी -न्धि (न्),

असम्पर्कीयः -या -यं, निष्प्रयोजनः -ना -नं, प्रस्तुतबहिर्भूतः -ता -तं.—(Nonsensical) अनर्थकः -का -कं, असम्बद्धः -द्धा -द्धं.

IMPERTINENTLY, *adv.* (Rudely) अविनयेन, अविनीतवत्, धृष्टवत्, प्रगल्भवत्, अशिष्टवत्, कुशीलवत्, परुषोक्त्या.—(Officiously) अतिचर्चापूर्व्वं.—(Irrelevantly) असम्बद्धं, अप्रस्तुतं, अप्रासङ्गिकं, निष्प्रयोजनं.

IMPERTURBABLE, *a.* अक्षोभ्यः -भ्या -भ्यं, अक्षोभणीयः -या -यं, अवस्थितमतिः -तिः -ति, स्थिरमतिः -तिः -ति, समबुद्धिः -द्धिः -द्धि, अनाकुलचित्तः -त्ता -त्तं, अपारिप्लवः -वी -वं, अकातरः -रा -रं, अविखण्डितमनाः -नाः -नः (स्), निर्व्विकारः -रा -रं.

IMPERTURBATION, *s.* अक्षोभ्यता, अनाकुलचित्तता, अपारिप्लवत्वं, अव्यग्रता.

IMPERVIOUS, *a.* (Not to be penetrated or entered) अप्रवेश्यः -श्या -श्यं, अप्रवेशनीयः -या -यं, अगम्यः -म्या -म्यं, गहनः -ना -नं, सुगहनः -ना -नं, गहीयः -या -यं, गभीरः -रा -रं, गम्भीरः -रा -रं, कलिलः -ला -लं, सङ्कटः -टा -टं, सम्बाधः -धा -धं, कष्टः -ष्टा -ष्टं.—(Compact, without interstice) निबिडः -डा -डं, अविरलः -ला -लं, निर्व्विवरः -रा -रं, नीरन्ध्रः -न्ध्रा -न्ध्रं.—(Not to be pierced) अवेध्यः -ध्या -ध्यं, अव्याप्यः -प्या -प्यं, अभेद्यः -द्या -द्यं, अच्छेदनीयः -या -यं.

IMPERVIOUSNESS, *s.* अप्रवेश्यता, गम्भीरत्वं, गहनत्वं, अव्याप्यता, अगम्यता, अवेध्यता, नीरन्ध्रता, नैबिड्यं.

IMPETRABLE, *a.* अभ्यर्थनीयः -या -यं, प्रार्थनेन प्राप्यः -प्या -प्यं.

To IMPETRATE, *v. a.* प्रार्थनेन or अभ्यर्थनाद्वारेण प्राप् (c. 5. -आप्नोति -आप्तुं).

IMPETRATION, *s.* प्रार्थनया or याच्ञाद्वारेण प्राप्तिः *f.* or प्रापणं.

IMPETUOSITY, *s.* वेगः, आवेगः, महावेगः, संवेगः, अत्यन्तवेगः, संरम्भः, संरम्भत्वं, आपातः, तीक्ष्णता, तैक्ष्ण्यं, साहसं, उग्रता, उच्चण्डता, अमर्षः, क्षिप्रता, रभसः, कुतूहलं, तीव्रता.

IMPETUOUS, *a.* वेगवान् -वती -वत् (त्), वेगी -गिनी -गि (न्), महावेगः -गा -गं, भीमवेगः -गा -गं, उदीर्णवेगः -गा -गं, संरम्भी -म्भिणी -म्भि (न्), चण्डः -ण्डा -ण्डं, उच्चण्डः -ण्डा -ण्डं, तीक्ष्णः -क्ष्णा -क्ष्णं, तीक्ष्णकर्म्मा -र्म्मा -र्म्म (न्), अमर्षी -र्षिणी -र्षि (न्), अमर्षणः -णा -णं, अमर्षवान् -वती -वत् (त्), साहसी -सिनी -सि (न्), साहसिकः -की -कं, उग्रः -ग्रा -ग्रं, तीव्रः -व्रा -व्रं, प्रबलः -ला -लं, रोषणः -णा -णं, कुतूहली -लिनी -लि (न्).

IMPETUOUSLY, *adv.* महावेगेन, भीमवेगेन, अत्यन्तवेगेन, वेगतस्, सवेगं, संरम्भेण, आपाततस्, तीक्ष्णं, सामर्षं, उच्चण्डं, उग्रं, सरभसं, साहसेन, संरम्भवत्, सकुतूहलं, कौतूहलेन.

IMPETUOUSNESS, *s.* *See* IMPETUOSITY.

IMPETUS, *s.* वेगः, आवेगः, संवेगः, आपातः, अत्यन्तवेगः, गतिशक्तिः *f.*

IMPIETY, *s.* अधर्म्मः -र्म्मत्वं, वैधर्म्यं, निर्धर्म्मत्वं, धर्म्मलोपः, धर्म्महीनता, अभक्तिः *f.*, भक्तिहीनता, अभक्तत्वं, देवनिन्दा, दुष्टता, अपुण्यत्वं, असाधुता, पापिष्ठत्वं, सपापत्वं, पापं, दुष्कृतं, कुकर्म्म *n.* (न्).

To IMPINGE, *v. a.* आहन् (c. 2. -हन्ति -न्तुं), अभिहन्, अभ्याहन्, आपत् (c. 1. -पतति -तितुं), प्रपत्, संघट्ट् (c. 1. -घट्टते -ट्टितुं).

IMPIOUS, *a.* अधर्म्मी -र्म्मिणी -र्म्मि (न्), अधार्म्मिकः -की -कं, निर्धर्म्मः -र्म्मा -र्म्मं, धर्म्महीनः -ना -नं, धर्म्मालीकः -का -कं, अभक्तः -क्ता -क्तं, देवनिन्दकः -का -कं, भक्तिहीनः -ना -नं, दुष्टः -ष्टा -ष्टं, अपुण्यः -ण्या -ण्यं, असाधुः -ध्वी -धु, पापी -पिनी -पि (न्), पापिष्ठः -ष्ठा -ष्ठं, अनीश्वरबोधितः -ता -तं.

IMPIOUSLY, *adv.* अधर्म्मतस्, अधर्म्मेण, अपुण्यवत्, पापिष्ठवत्, देवनिन्दकवत्.

IMPIOUSNESS, *s.* *See* IMPIETY.

IMPLACABILITY, IMPLACABLENESS, *s.* अशाम्यता, असान्त्वनीयता, अतोषणीयता, अप्रसाद्यत्वं.

IMPLACABLE, *a.* अशाम्यः -म्या -म्यं, अतोषणीयः -या -यं, अशमनीयः -या -यं, असान्त्वनीयः -या -यं, अनाराध्यः -ध्या -ध्यं, अप्रसाद्यः -द्या -द्यं, दुःखेन शाम्यः -म्या -म्यं or आराध्यः -ध्या -ध्यं.—(Constant in hatred) दीर्घद्वेषी -षिणी -षि (न्), अतिद्वेषी &c.; 'implacable hatred,' दीर्घद्वेषः, बद्धवैरं.

IMPLACABLY, *adv.* अशमनीयं, अशाम्यं, अतोषणीयं, अनाराधनीयं.

To IMPLANT, *v. a.* निरुह् in caus. (-रोपयति -यितुं), निष्ठा in caus. (-ष्ठापयति -यितुं), प्रतिष्ठा, निष्ठं -ष्ठां -ष्ठं कृ, निधा (c. 3. -दधाति -धातुं), प्रणिधा, उपनिधा, निखन् (c. 1. -खनति -नितुं).

IMPLANTED, *p. p.* निष्ठः -ष्ठा -ष्ठं, निष्ठितः -ता -तं, प्रतिष्ठितः -ता -तं, सुप्रतिष्ठितः -ता -तं, निरूढः -ढा -ढं, निखातः -ता -तं, निहितः -ता -तं.

To IMPLEAD, *v. a.* अभियुज् (c. 7. -युनक्ति -योक्तुं), व्यवहारसभायाम् उत्तरप्रत्युत्तरे कृ.

IMPLEMENT, *s.* यन्त्रं, उपकरणं, साधनं, भाण्डं, कार्य्यसाधनं, सामग्र्यं -ग्री, द्रव्यं, पात्रं, उपस्करः, सम्भारः.

To IMPLICATE, *v. a.* सम्बन्ध् (c. 9. -बध्नाति -बन्द्धुं), अनुबन्ध्, संश्लिष् (c. 10. -श्लेषयति -यितुं), आश्लिष्, परिश्लिष्, संसृज् (c. 6. -सृजति -स्रष्टुं); 'he is implicated in many crimes,' बहुपापैः सम्बध्यते.

IMPLICATED, *p. p.* सम्बद्धः -द्धा -द्धं, अनुबद्धः -द्धा -द्धं, संश्लिष्टः -ष्टा -ष्टं, संसृष्टः -ष्टा -ष्टं, ग्रस्तः -स्ता -स्तं, अनुषङ्गी -ङ्गिणी -ङ्गि (न्), लिप्तः -प्ता -प्तं.

IMPLICATION, *s.* (Involution, connection) सम्बन्धः, अनुबन्धः, अभिसम्बन्धः, अनुषङ्गः, समन्वयः, सम्पर्कः, संसर्गः.—(Implying) विवक्षा, अर्थापत्तिः *f.*, अनुमानं, अपवाहः, उपलक्ष्यः.

IMPLICIT, *a.* अनाशङ्कितः -ता -तं, अवितर्कितः -ता -तं, अवैकल्पिकः -की -कं, अविचार्य्य कृतः -ता -तं, अवितर्क्य कृतः -ता -तं, अशङ्कात्मकः -का -कं, असांशयिकः -की -कं, अखण्डः -ण्डा -ण्डं.

IMPLICITLY, *adv.* अवितर्क्य, अविचार्य्य, अनाशङ्कापूर्व्वं, अशङ्कया, अवितर्केण, असंशयपूर्व्वं, अविकल्पेन.

IMPLIED, *p. p.* or *a.* विवक्षितः -ता -तं, अर्थसम्बद्धः -द्धा -द्धं, उपलक्षितः -ता -तं, आनुषङ्गिकः -की -कं; 'implied meaning,' विवक्षितार्थः, फलितार्थः, ध्वनितार्थः, ध्वनिः *m.*

To IMPLORE, *v. a.* प्रार्थ् (c. 10. -अर्थयते -ति -यितुं), अभ्यर्थ्, सम्प्रार्थ्, अर्थ्, विनयेन or अञ्जलिं कृत्वा प्रार्थ्, कृताञ्जलिः or निर्बन्धेन याच् (c. 1. याचति -चितुं), अभियाच्, संयाच्, प्रयाच्, सम्प्रयाच्, प्रसद् (c. 10. -सादयते -ति -यितुं), विनी (c. 1. -नयति -नेतुं), अनुनी, विनयेन स्वार्थं निविद् (c. 10. -वेदयति -यितुं), नाथ् (c. 1. नाथति -थितुं).

IMPLORED, *p. p.* अञ्जलिकर्म्मपूर्व्वं प्रार्थितः -ता -तं or अभ्यर्थितः -ता -तं, विनयेन or निर्बन्धेन याचितः -ता -तं or अभियाचितः -ता -तं, प्रसादितः -ता -तं, अनुनीतः -ता -तं.

IMPLORER, *s.* कृताञ्जलिः प्रार्थकः or प्रार्थयिता *m.* (तृ), निर्बन्धेन याचकः.

To IMPLY, *v. a.* वच् in des. (विवक्षति -क्षितुं), सूच् (c. 10. सूचयति -यितुं), संसूच्. Often expressed by अर्थ in comp., as, 'a speech which implies censure,' निन्दार्थो वादः.

IMPOLICY, *s.* कुनीतिः *f.*, दुर्णीतिः *f.*, दुर्णयः, अनीतिः *f.*, दुर्णीतं, अनयः.

IMPOLITE, *a.* अशिष्टः -ष्टा -ष्टं, असभ्यः -भ्या -भ्यं, अविनीतः -ता -तं, अशीलः -ला -लं, कुशीलः -ला -लं, विशीलः -ला -लं, दुःशीलः -ला -लं, दुर्मर्य्यादः -दा -दं, नष्टविनयः -या -यं, ग्राम्यः -म्या -म्यं, असुजनः -ना -नं, अनार्य्यः -र्य्या -र्य्यं.

IMPOLITENESS, *s.* अशिष्टता, असभ्यता, अविनयः, कुशीलता, दुःशीलता.

IMPOLITIC, *a.* (Not acquainted with good policy, not prudent)

अनीतिज्ञः -ज्ञा -ज्ञं, अनीतिविद् *m. f. n.*, अनीतिमान् -मती -मत् (त्), अनीतिकुशलः -ला -लं, दुर्नीतः -ता -तं, अविनीतः -ता -तं, अमतिमान् -मती -मत् (त्), अबुद्धिमान् &c., अबुधः -धा -धं, अविज्ञः -ज्ञा -ज्ञं, अविवेचकः -का -कं, अकोविदः -दा -दं.—(Not politic, adapted to injure the public interest) अहितः -ता -तं, नीतिविरुद्धः -द्धा -द्धं, प्रजार्थविरोधी -धिनी -धि (न्), अर्थविरोधी &c., अनर्थकरः -रा -रं, अनर्थजनकः -की -कं, अनिष्टकरः -री -रं, असमीक्ष्य कृतः -ता -तं, सापकारः -रा -रं, अयौक्तिकः -की -कं.

IMPOLITICLY, *adv.* नीतिविरुद्धं, अहितं -ताय, अर्थविरोधेन, असमीक्ष्य.

IMPONDERABLE, IMPONDEROUS, *a.* निर्भारः -रा -रं, अभारी -रिणी -रि (न्), अतोलनीयः -या -यं, अगुरुः -र्वी -रु, अतिसूक्ष्मः -क्ष्मा -क्ष्मं, अतिलघुः -घुः -घु.

To IMPORT, *v. a.* (Bring goods from a foreign country) वाणिज्यद्रव्याणि or वाणिज्यवस्तूनि विदेशात् or देशान्तरात् or वहिर्देशाद् आनी (c. 1. -नयति -नेतुं) or उपनी or आवह् (c. 1. -वहति -वोढुं) or उपवह् or आहृ (c. 1. -हरति -हर्तुं).—(Convey a meaning, imply) सूच् (c. 10. सूचयति -यितुं), संसूच्, उद्दिश् (c. 6. -दिशति -देष्टुं), वच् in des. (विवक्षति -क्षितुं), उद्बुध् (c. 10. -बोधयति -यितुं), or expressed by अर्थ in comp.; as, 'a speech which imports censure,' निन्दार्थो वादः.—(Be of weight or consequence) गुर्वर्थः -र्था -र्थं भू.

IMPORT, *s.* (Goods brought from a foreign country) विदेशात् or देशान्तरात् or वहिर्देशाद् आनीतानि वाणिज्यद्रव्याणि *n. pl.* or वाणिज्यवस्तूनि *n. pl.*, विदेशीयवस्तूनि *n. pl.*, विदेशजद्रव्याणि *n. pl.*, वहिर्देशवस्तूनि.—(Meaning) अर्थः, अभिप्रायः, अभिप्रेतं, विवक्षा, उद्देशः, आशयः; 'of like import,' समानार्थः -र्था -र्थं.—(Importance) गौरवं, गुरुत्वं, प्रभावः.

IMPORTABLE, *a.* विदेशाद् आनेयः -या -यं or आनेतव्यः -व्या -व्यं.

IMPORTANCE, *s.* (Consequence) गौरवं, गुरुत्वं -ता, गुर्वर्थत्वं, प्रभावः, भारः; 'of a thing,' द्रव्यगुरुता; 'of an act,' कार्य्यगुरुता.—(Of a person) उत्कर्षः, औत्कर्ष्यं, प्रधानता, सेव्यता, प्रतिपत्तिः *f.*, प्रागल्भ्यं, गर्व्वः, मानं.

IMPORTANT, *a.* गुरुः -र्वी -रु, गुर्वर्थः -र्था -र्थं, बह्वर्थः -र्था -र्थं, महार्थः -र्था -र्थं, परमार्थः -र्था -र्थं, गुरुप्रभावः -वा -वं, महाप्रभावः -वा -वं, बहुप्रभावः -वा -वं, परमप्रभावः -वा -वं, परमः -मा -मं, अलघुः -घुः -घु, महोपकारी -रिणी -रि (न्), भारी -रिणी -रि (न्), भारवान् -वती -वत् (त्), आवश्यकः -की -कं; 'important object,' गुर्वर्थः, परमार्थः, महार्थः; 'most important,' गरिष्ठः -ष्ठा -ष्ठं, गुरुतमः -मा -मं; 'more important,' गरीयान् -यसी -यः (स्).

IMPORTANTLY, *adv.* गुरु, परमप्रभावेण, परमं, अलघु.

IMPORTATION, *s.* (Act of bringing from a foreign country) विदेशात् or वहिर्देशात् or देशान्तराद् आनयः -यनं or उपनयः -यनं or आवाहनं or आवहनं or उपवाहनं.—(The commodities imported) विदेशाद् आनीतानि द्रव्याणि, देशान्तराद् आनीतवस्तूनि, विदेशीयवस्तुसमूहः.

IMPORTED, *p. p.* विदेशात् or वहिर्देशाद् आनीतः -ता -तं or उपनीतः -ता -तं.

IMPORTER, *s.* विदेशात् or वहिर्देशाद् वाणिज्यद्रव्यानेता *m.* (तृ).

IMPORTUNACY, *s.* निर्बन्धः, अतिनिर्बन्धः, अतियाचना -नं, अतिप्रार्थनं -ना, आग्रहः, अतिनिर्बन्धेन याचना or प्रार्थनं, वारं वारं प्रार्थना, नित्यप्रार्थनं, नित्ययाचना, नित्ययाचनेन परोद्वेजनं or परायासकरणं.

IMPORTUNATE, *a.* निर्बन्धशीलः -ला -लं, अतिनिर्बन्धशीलः -ला -लं, आग्रही -हिणी -हि (न्), आग्रहशीलः -ला -लं, अतियाचकः -का -कं, अतिप्रार्थकः -का -कं, निर्बन्धेन याचकः -का -कं, नित्यप्रार्थकः -का -कं, नित्यं याचनेन परोद्वेजकः -का -कं or परायासकरः -री -रं, वारं वारं प्रार्थकः -का -कं; 'importunate solicitation,' निर्बन्धः, आग्रहः.

IMPORTUNATELY, *adv.* निर्बन्धेन, अतिनिर्बन्धेन, आग्रहेण, साग्रहं, प्रसभं, मुहुर्मुहुः, पुनःपुनर्.

IMPORTUNATENESS, *s.* *See* IMPORTUNACY.

To IMPORTUNE, *v. a.* अतिनिर्बन्धेन or निर्बन्धेन प्रार्थ् (c. 10. -अर्थयति -यितुं) or अभ्यर्थ् or याच् (c. 1. याचति -चितुं) or अभियाच्, आग्रहेण प्रार्थ्, वारं वारं प्रार्थ्, अतियाचनेन परम् उद्विज् (c. 10. -वेजयति -यितुं), नित्यप्रार्थनेन परम् आयस् (c. 10. -यासयति -यितुं).

IMPORTUNED, *p. p.* निर्बन्धेन प्रार्थितः -ता -तं or याचितः -ता -तं, अतियाचितः -ता -तं.

IMPORTUNER, *s.* अतिप्रार्थकः, अतियाचकः, निर्बन्धेन प्रार्थकः, अतियाच्ञया परोद्वेजकः.

IMPORTUNITY, *s.* निर्बन्धः, अतिनिर्बन्धः, अतियाचना -नं, आग्रहः, वारं वारं प्रार्थना, पुनःपुनः प्रार्थनं. अतियाचनेन परोद्वेजनं. *See* IMPORTUNACY.

To IMPOSE, *v. a.* (Lay on) न्यस् (c. 4. -अस्यति -असितुं), निविश् (c. 10. -वेशयति -यितुं), समाविश्, नियुज् (c. 10. -योजयति -यितुं, c. 7. -युनक्ति -योक्तुं), धा (c. 3. दधाति, धातुं), निधा, विधा, आरुह् in caus. (-रोपयति -यितुं), स्था in caus. (स्थापयति -यितुं), उपस्था, अवस्था.—(Set over) अधिकृ, उपधिकृ, नियुज्, विनियुज्.—(Impose upon, deceive) प्रलभ् (c. 1. -लभते -लब्धुं), विप्रलभ्, वञ्च् (c. 10. वञ्चयते -ति -यितुं), परिवञ्च्, छल् (c. 10. छलयति -यितुं), अभिसन्धा, अतिसन्धा, दम्भ् (c. 5. दभ्नोति, दम्भितुं).

IMPOSED, *p. p.* न्यस्तः -स्ता -स्तं, निवेशितः -ता -तं, नियुक्तः -क्ता -क्तं, नियोजितः -ता -तं, विहितः -ता -तं, अधिकृतः -ता -तं; 'imposed upon,' वञ्चितः -ता -तं, प्रलब्धः -ब्धा -ब्धं, विप्रलब्धः -ब्धा -ब्धं, अतिसंहितः -ता -तं.

IMPOSING, *a.* विस्मयोत्पादकः -का -कं, आश्चर्य्यकरः -रा -रं, विस्मापकः -का -कं, अद्भुतः -ता -तं, गुरुः -र्वी -रु, महातेजाः -जाः -जः (स्).

IMPOSITION, *s.* (Act of laying on) न्यासः, न्यसनं, निवेशनं, आरोपणं, स्थापनं; 'of hands,' हस्तन्यासः.—(That which is imposed, a tax) करः, शुल्कः -ल्कं.—(Task given as a punishment) साहसं, व्रतं, शिष्येण दण्डार्थम् अधिककर्त्तव्यं किञ्चित्.—(Fraud, deception) दम्भः, वञ्चनं -ना, छलं, प्रलम्भः, विप्रलम्भः अभिसन्धिः *m.*, अतिसन्धानं.

IMPOSSIBILITY, *s.* अशक्यता, असाध्यता, अकर्त्तव्यता, अकरणीयता, अकार्य्यता.—(An impossibility, an absurdity) असाध्यं, असम्भवः, मृषार्थकं, शशविषाणं, शशशृङ्गं, खपुष्पं, गगणपुष्पं, गगणकुसुमं; 'impossibilities,' असाध्यानि *n. pl.*

IMPOSSIBLE, *a.* अशक्यः -क्या -क्यं, असाध्यः -ध्या -ध्यं, असाधनीयः -या -यं, असम्भवः -वा -वं, अकर्त्तव्यः -व्या -व्यं, अकरणीयः -या -यं, अकार्य्यः -र्य्या -र्य्यं, असङ्गतः -ता -तं, अघटितः -ता -तं, अघटमानः -ना -नं, अघटनीयः -या -यं, अगम्यः -म्या -म्यं, अप्राप्यः -प्या -प्यं, अपार्य्यः -र्य्या -र्य्यं, अपारणीयः -या -यं, अक्षमः -मा -मं.

IMPOST, *s.* करः, शुल्कः -ल्कं, राजकरं, कारः, राजग्राह्यभागः, राजस्वं, राजदेयं, राजधनं, शाल्किकः, तारिकं, तार्य्यं.

IMPOSTHUME, *s.* विद्रधिः *m.*, पूयसम्पूर्णः स्फोटः or विस्फोटः, सपूयव्रणं.

IMPOSTOR, *s.* (Deceiver) दम्भी *m.* (न्), दाम्भिकः, दम्भकः, कुहकः, कूटकारः, कूटकः, वञ्चकः, कपटी *m.* (न्), कापटिकः, धूर्त्तः, कितवः, प्रतारकः, छद्मवेशी *m.* (न्).—(In religion) धर्म्मध्वजी *m.* (न्), आर्य्य

लिङ्गी *m.* (न्), आर्य्यरूपः, धर्म्मोपधः, पाषण्डः, पाखण्डः, लिङ्गवृत्तिः *m.*, सर्व्वलिङ्गी *m.* (न्), छद्मतापसः, कपटधर्म्मी *m.* (न्).

IMPOSTURE, *s.* दम्भः, वञ्चनं -ना, प्रवञ्चना, प्रलम्भः, विप्रलम्भः, कूटः -टं, कपटः -टं, व्याजः, छलं -लना, कैतवं, कौटं, उपधिः *m.*, प्रतारणं -णा, कुहकः, अभिसन्धिः *m.*, अतिसन्धानं, छद्म *n.* (न्).

IMPOTENCE, IMPOTENCY, *s.* (Want of strength or power) वीर्य्यहानिः *f.*, शक्तिहीनता, अशक्तिः *f.*, अशक्तता, अवीर्य्यं, निर्बलता, बलहीनता, सत्त्वहानिः *f.*, निःसत्त्वं, सत्त्वाभावः, वीर्य्याभावः, असामर्थ्यं, असमर्थत्वं, अतेजस् *n.*, तेजोहीनता, क्लीवता, दौर्बल्यं, दुर्बलता, शक्तिवैकल्यं.—(Absence of virility) क्लीवत्वं, क्लैव्यं, अपुंस्त्वं, निष्पुरुषत्वं, अपौरुषं, नपुंसकत्वं, ध्वजभङ्गः, निर्बीजता, निष्फलत्वं, अजनकता.

IMPOTENT, *a.* (Without power) निर्बलः -ला -लं, बलहीनः -ना -नं, शक्तिहीनः -ना -नं, अशक्तः -क्ता -क्तं, अबलः -ला -लं, असमर्थः -र्था -र्थं, सामर्थ्यहीनः -ना -नं, निर्वीर्य्यः -र्य्या -र्य्यं, वीर्य्यहीनः -ना -नं, अवीरः -रा -रं, निःसत्त्वः -त्त्वा -त्त्वं, सत्त्वहीनः -ना -नं, निस्तेजाः -जाः -जः (स्), तेजोहीनः -ना -नं, गततेजाः &c., अकल्पः -ल्पा -ल्पं, दुर्बलः -ला -लं, अक्षमः -मा -मं, अपारगः -गा -गं.—(Wanting virility) क्लीवः -वा -वं, पुंस्त्वहीनः -ना -नं, पुंशक्तिहीनः -ना -नं, निष्पुरुषः -षा -षं, पुरुषशक्तिवर्जितः -ता -तं, नपुंसकः -का -कं, निर्बीजः -जा -जं, भग्नध्वजः -जा -जं, निष्फलः -ला -लं.

IMPOTENTLY, *adv.* निर्बलं, अबलं, दुर्बलं, अवीरवत्, निर्वीर्य्यवत्, क्लीववत्, निर्वीर्य्यं, बलं विना, वीर्य्यं विना, निःसत्त्वेन.

To IMPOUND, *v. a.* पशुपरिभ्रष्टपश्वादि अवरोधस्थाने निरुध् (c. 7. -रुणद्धि -रोद्धुं) or रक्ष् (c. 1. रक्षति -क्षितुं).

To IMPOVERISH, *v. a.* दरिद्रीकृ, निर्धनीकृ, क्षीणीकृ, धनं नश् (c. 10. नाशयति -यितुं), क्षीणधनं -नां -नं कृ.—(Enfeeble, exhaust strength) कृश (nom. क्रशयति -यितुं), कृशीकृ, तेजः or सत्त्वं or वीर्य्यं हृ (c. 1. हरति, हर्त्तुं) or नश्, दुर्बलीकृ, क्षि in caus. (क्षपयति -यितुं).

IMPOVERISHED, *p. p.* (Reduced to poverty) क्षीणधनः -ना -नं, निर्धनः -ना -नं, दरिद्रितः -ता -तं, दरिद्रीकृतः -ता -तं, दारिद्र्यगतः -ता -तं, धनच्युतः -ता -तं, क्षीणार्थः -र्था -र्थं, नष्टार्थः -र्था -र्थं, नष्टधनः -ना -नं, गतविभवः -वा -वं, प्रचलितविभवः -वा -वं, शिथिलवसुः -सुः -सु, विगतश्रीकः -का -कं, विनष्टलक्ष्मीकः -का -कं, निष्किञ्चनः -ना -नं, अकिञ्चनः -ना -नं.—(Exhausted of energy) क्षीणसत्त्वः -त्त्वा -त्त्वं, कृशीभूतः -ता -तं, गतवीर्य्यः -र्य्या -र्य्यं, च्युतोत्साहः -हा -हं.

IMPOVERISHMENT, *s.* दरिद्रता, दारिद्र्यं, दरिद्रीकरणं, धननाशः, धनहानिः *f.*, धनच्युतिः *f.*, सत्त्वहानिः *f.*, क्षीणता.

IMPRACTICABILITY, *s.* असाध्यता -त्वं, असाधनीयता, अकर्त्तव्यता, अकरणीयता, अकार्य्यता, अशक्यता -त्वं, कर्त्तुम् अशक्यता, असम्भवत्वं, असम्भाव्यता, अनुपपाद्यता, अघटनीयत्वं, अगम्यत्वं, दुष्करत्वं.

IMPRACTICABLE, *a.* असाध्यः -ध्या -ध्यं, असाधनीयः -या -यं, अकर्त्तव्यः -व्या -व्यं, अकरणीयः -या -यं, अकार्य्यः -र्य्या -र्य्यं, अशक्यः -क्या -क्यं, कर्त्तुम् अशक्यः -क्या -क्यं, अकृत्यः -त्या -त्यं, अघटनीयः -या -यं, असम्भवः -वा -वं, असम्भाव्यः -व्या -व्यं, असम्भावनीयः -या -यं, अनुपपाद्यः -द्या -द्यं, दुष्करः -रा -रं, अगम्यः -म्या -म्यं, अपार्य्यः -र्य्या -र्य्यं.

IMPRACTICABLY, *adv.* असाधनीयं, अकरणीयं, असम्भवेन, असम्भावनीयं.

To IMPRECATE, *v. a.* शप् (c. 1. शपति -ते, c. 4. शप्यति, शप्तुं), अभिशप्, परिशप्, आक्रुश् (c. 1. -क्रोशति -क्रोष्टुं), अमङ्गलं or अनिष्टम् आशंस् (c. 1. -शंसते -सितुं) or प्रार्थ् (c. 10. -अर्थयते -यितुं), गर्ह् (c. 1. गर्हते -र्हितुं), भर्त्स् (c. 10. भर्त्सयति -यितुं), धिक्कृ.

IMPRECATED, *p. p.* अभिशप्तः -प्ता -प्तं, आक्रुष्टः -ष्टा -ष्टं, धिक्कृतः -ता -तं.

IMPRECATION, *s.* शापः, अभिशापः, आक्रोशनं, अवक्रोशः, अभीषङ्गः, अभिषङ्गः, अनिष्टाशंसनं, अनिष्टप्रार्थना, मन्दप्रार्थना, मन्दवाञ्छा, भर्त्सनं, गालिः *m.*, धिक्करणं.

IMPRECATORY, *a.* अभिशापार्थकः -का -कं, आक्रोशकः -की -कं, अनिष्टाशंसकः -का -कं, अनिष्टप्रार्थकः -का -कं.

IMPREGNABLE, *a.* अलङ्घनीयः -या -यं, अलंघ्यः -घ्या -घ्यं, अनाक्रमणीयः -या -यं, अनाक्रम्यः -म्या -म्यं, दुराक्रमः -मा -मं, दुराक्रान्तः -मा -मं, अगम्यः -म्या -म्यं, दुर्गमः -मा -मं.—(Invincible) अजेयः -या -यं, दुर्जेयः -या -यं, अपराजितः -ता -तं.

To IMPREGNATE, *v. a.* (Infuse the principle of conception, make pregnant) सिच् (c. 6. सिञ्चति, सेक्तुं), निषिच्, आसिच्, रेतः सिच्, गर्भं ग्रह् in caus. (ग्राहयति -यितुं) or उत्पद् (c. 10. -पादयति -यितुं), गर्भवतीं कृ, ससत्त्वां कृ, आपन्नसत्त्वां कृ, अन्तरापत्यां कृ, सञ्जातगर्भां कृ, गर्भाधानं कृ, निषेकं कृ.—(Infuse particles of one thing into another) प्रक्षिप् (c. 6. -क्षिपति -क्षेप्तुं), निषिच्, प्रक्षेपं कृ, व्याप् (c. 5. -आप्नोति -आप्तुं), व्याप्तं -प्तां -प्तं कृ.

IMPREGNATED, *p. p.* सिक्तः -क्ता -क्तं, गृहीतगर्भा, उत्पन्नगर्भा, ससत्त्वा, आपन्नसत्त्वा, सञ्जातगर्भा.—(Infused) व्याप्तः -प्ता -प्तं.

IMPREGNATING, *part.* गर्भदः -दा -दं, सेचकः -का -कं, गर्भोत्पादकः -का -कं.

IMPREGNATION, *s.* सेकः, सेचनं, निषेकः, आसेकः, आसेचनं, गर्भग्रहणं, गर्भोत्पादनं, गर्भाधानं, गर्भधारणं, भ्रूणः.

IMPREGNATOR, *s.* सेक्ता *m.* (क्तृ), सेचकः, निषेककारी *m.* (न्), गर्भदः, गर्भोत्पादकः.

To IMPRESS, *v. a.* (Imprint, stamp, make a mark by pressure) मुद्र (nom. मुद्रयति -यितुं), मुद्रीकृ, अङ्क् (c. 10. अङ्कयति -यितुं), चिह्न (nom. चिह्नयति -यितुं), मुद्रितं -तां -तं कृ, लक्ष् (c. 10. लक्षयति -यितुं), प्रणिधा (c. 3. -दधाति -धातुं), न्यस् (c. 4. -अस्यति -असितुं), निविश् (c. 10. -वेशयति -यितुं), निपीड् (c. 10. -पीडयति -यितुं) अङ्कितं -तां -तं कृ.—(Fix deep in the mind, &c.) हृदये सुनिष्ठितं -तां -तं कृ, चित्तनिष्ठं -ष्ठां -ष्ठं कृ, हृत्स्थं -त्स्थां -त्स्थं कृ, हृद्गतं -तां -तं कृ, हृदयगतं -तां -तं कृ, हृदये कृ, हृदये निविश् or निष्ठा in caus. (-ष्ठापयति -यितुं); 'to be impressed,' निष्ठा (c. 1. -तिष्ठति -ष्ठातुं).—(Impress seamen) राजाज्ञया बलात्कारेण धृत्वा नाविकादिकर्म्मणि व्यापृ (c. 10. -पारयति -यितुं).

IMPRESS, *s.* मुद्रा, अङ्कः, चिह्नं, न्यासः, लक्षणं; 'having the impress of knowledge) ज्ञानमुद्रः -द्रा -द्रं.

IMPRESSED, *p. p.* (Imprinted) मुद्रितः -ता -तं, मुद्रीकृतः -ता -तं, कृतमुद्रः -द्रा -द्रं, मुद्राङ्कितः -ता -तं, अङ्कितः -ता -तं, कृताङ्कः -ङ्का -ङ्कं, चिह्नितः -ता -तं, समुद्रः -द्रा -द्रं, लक्षितः -ता -तं.—(Infixed) निष्ठितः -ता -तं निष्ठः -ष्ठा -ष्ठं, न्यस्तः -स्ता -स्तं, निहितः -ता -तं, प्रणिहितः -ता -तं निवेशितः -ता -तं; 'in the mind,' हृदयनिष्ठितः -ता -n, चित्तनिष्ठः -ष्ठा -ष्ठं, हृदयगतः -ता -तं, हृद्गतः -ता -तं, हृदयनिवेशितः -ता -तं, हृत्स्थः -त्स्था -त्स्थं.

IMPRESSIBLE, *s.* अङ्कनीयः -या -यं, अंक्यः -क्या -क्यं, चिह्नक्षमः -मा -मं.

IMPRESSION, *s.* (Mark, stamp) मुद्रा, अङ्कः, चिह्नं.—(Act of impressing) अङ्कनं.—(Impression on the mind) संस्कारः, चित्तसंस्कारः, मनःसंस्कारः.—(Idea, image in the mind) बुद्धिः *f.*, मतिः *f.*, अनुभवः, मनोगतं, मनसिजं, आभासः, भासः.—(Sensible effect) उत्पन्नं, निष्पन्नं, उत्पत्तिः *f.*, सम्पन्नं.—(Indentation) आघातचिह्नं, अभिघातचिह्नं, भङ्गः, छेदः.—(Number of books printed at once) एकवारे मुद्रितो ग्रन्थसमूहः.

IMPRESSIVE, *a.* हृदयङ्गमः -मा -मं, हृद्गमः -मा -मं, हृदयग्राही -हिणी -हि

(न्), चित्तहारी -रिणी -रि (न्), हृदयस्पृक् *m.f.n.* (श्), मर्म्मस्पृक् *m.f.n.*, विस्मयोत्पादकः -का -कं, हृद्भेदकः -का -कं, भावोत्पादकः &c.

Impressively, *adv.* हृदयङ्गमप्रकारेण, यथा हृदयं स्पृश्यते इति प्रकारेण.

Impressiveness, *s.* हृदयङ्गमत्वं, हृद्गमत्वं, हृदयस्पृक्त्वं, विस्मयोत्पादकत्वं.

Impressment, *s.* राजाज्ञया बलात्कारधरणानन्तरं नाविकादिकर्म्मणि प्रवर्त्तनं.

To imprint, *v. a.* मुद्र् (nom. मुद्रयति -यितुं), मुद्रीकृ, मुद्रितं -तां -तं कृ, अङ्क् (c. 10. अङ्कयति -यितुं), चिह्न् (nom. चिह्नयति -यितुं), प्रणिधा (c. 3. -दधाति -धातुं), न्यस् (c. 4. -अस्यति -असितुं), निविश् (c. 10. -वेशयति -यितुं); 'on the mind,' हृदयनिष्ठं -ष्ठां -ष्ठं कृ, हृदये मुद्रितमिव किञ्चित् कृ, हृदये निविश्.

Imprinted, *p. p.* मुद्रितः -ता -तं, मुद्रीकृतः -ता -तं, अङ्कितः -ता -तं, मुद्राङ्कितः -ता -तं, कृतमुद्रः -द्रा -द्रं.—(Infixed) निहितः -ता -तं, न्यस्तः -स्ता -स्तं, निहितः -ता -तं, प्रणिहितः -ता -तं, निवेशितः -ता -तं; 'on the mind,' हृदयनिष्ठः -ष्ठा -ष्ठं, हृदयगतः -ता -तं, हृद्गतः -ता -तं, हृदयनिवेशितः -ता -तं.

To imprison, *v. a.* कारायां or कारागारे निरुध् (c. 7. -रुणद्धि -रोद्धुं) or बन्ध् (c. 9. बध्नाति, बन्द्धुं), कारागृहं प्रविश् (c. 10. -वेशयति -यितुं), बन्धनालये रक्ष् (c. 1. रक्षति -क्षितुं) or अवरुध् or आसिध् (c. 1. -सेधति -सेद्धुं), कारागुप्तं -प्तां -प्तं कृ.

Imprisoned, *p. p.* कारागुप्तः -प्ता -प्तं, कारानिरुद्धः -द्धा -द्धं, कारायां बद्धः -द्धा -द्धं, कारावद्धः -द्धा -द्धं, कारागारप्रवेशितः -ता -तं, अवरुद्धदेहः -हा -हं, निरुद्धः -द्धा -द्धं, आसिद्धः -द्धा -द्धं, प्रतिबद्धः -द्धा -द्धं.

INCONSISTENCE, INCONSISTENCY, *s.* असङ्गति: *f.*, असङ्गम:, असङ्गतता, असाङ्गत्यं, असंस्थिति: *f.*, विरोध: -धनं, विरुद्धता, विपरीतता, वैपरीत्यं, अयोग्यता, असम्भवता, भेद:, विभेद:, असादृश्यं, विपर्य्यय:, अनन्वय:.—(Inconsistence in argument or narration, self contradiction) पूर्व्वापरविरोध:, पूर्व्वापरवैपरीत्यं, वचनविरोध:, विपरीतवचनं, विरोधोक्ति: *f.*, वचनभेद:, विभिन्नभेद:, विगीति: *f.*, विसंवाद:, बाध: -धा.

INCONSISTENT, *a.* असङ्गत: -ता -तं, असंस्थित: -ता -तं, विरुद्ध: -द्धा -द्धं, विपरीत: -ता -तं, विरोधी -धिनी -धि (न्), परस्परविरुद्ध: -द्धा -द्धं, परस्परविरोधी -धिनी -धि (न्), परस्परपराहत: -ता -तं, विसङ्गत: -ता -तं, अयोग्य: -ग्या -ग्यं, असम्भव: -वा -वं, अनन्वित: -ता -तं, क्लिष्ट: -ष्टा -ष्टं, सङ्कुल: -ला -लं, विगीत: -ता -तं, असदृश: -शी -शं, पूर्व्वापरविरुद्ध: -द्धा -द्धं, बाधित: -ता -तं; 'to make an inconsistent assertion,' विपरीतं वद् (c. 1. वदति -दितुं), विसंवद्, विप्रवद्.

INCONSISTENTLY, *adv.* असङ्गतं, विरोधेन, विरुद्धं, अयोग्यं, विपरीतं, वैपरीत्येन, परस्परविरुद्धं, विसङ्गतं, असदृशं, अयथा.

INCONSOLABLE, *a.* निर्विनोद: -दा -दं, दुर्विनोद: -दा -दं, असान्त्वनीय: -या -यं, असन्तोषणीय: -या -यं, अप्रबोधनीय: -या -यं, अनाश्वासनीय: -या -यं, अविनोदनीय: -या -यं, अशरण: -णा -णं, नि:शरण: -णा -णं, शोकाकुल: -ला -लं, अत्युत्कण्ठित: -ता -तं.

INCONSONANCE, *s.* अयोग्यता, अननुसार:, अनानुरूप्यं, असादृश्यं, विरोध:.

INCONSONANT, *a.* अयोग्य: -ग्या -ग्यं, अननुसारी -रिणी -रि (न्), असदृश: -शी -शं, अननुरूप: -पा -पं, विरुद्ध: -द्धा -द्धं, विरोधी -धिनी -धि (न्).

INCONSPICUOUS, *a.* अप्रकाशः -शा -शं, अव्यक्तः -क्ता -क्तं, अप्रत्यक्षः -क्षा -क्षं.

INCONSTANCY, *s.* अस्थिरता -त्वं, अस्थैर्य्यं, अधीरता, अधैर्य्यं, अधृतिः *f.*; चञ्चलत्वं -ता, चपलता, चाञ्चल्यं, चापल्यं, चलचित्तता, अस्थायित्वं, लोलता, लौल्यं, तारल्यं, सङ्कुसुकत्वं, अनवस्थितिः *f.*, अस्थेमा *m.* (न्), अनित्यता.

INCONSTANT, *a.* अस्थिरः -रा -रं, अस्थायी -यिनी -यि (न्), अस्थावरः -रा -रं, चञ्चलः -ला -लं, चपलः -ला -लं, अधीरः -रा -रं, चलचित्तः -त्ता -त्तं, चपलात्मकः -का -कं, सङ्कुसुकः -का -कं, चञ्चलहृदयः -या -यं, लोलः -ला -लं, तरलः -ला -लं, प्रकृतितरलः -ला -लं, अनवस्थः -स्था -स्थं, अनवस्थितः -ता -तं, अधृतिमान् -मती -मत् (त्), अनित्यः -त्या -त्यं.

INCONSTANTLY, *adv.* अस्थिरं, अस्थिरवत्, चञ्चलं, चञ्चलवत्, चपलं, चापल्येन, चपलवत्, अधीरं, अधीरवत्, लोलवत्, तरलं.

INCONSUMABLE, *a.* अनाश्यः -श्या -श्यं, अविनाश्यः -श्या -श्यं, अक्षयः -या -यं.

INCONTAMINATE, *a.* अदुष्टः -ष्टा -ष्टं, अदूषितः -ता -तं, अकलङ्कितः -ता -तं.

INCONTESTABLE, *a.* अविवदनीयः -या -यं, निर्व्विवादः -दा -दं, अप्रत्याख्येयः -या -यं, अविचार्य्यः -र्य्या -र्य्यं, अवितर्क्यः -र्क्या -र्क्यं, अवितर्कणीयः -या -यं, अबाध्यः -ध्या -ध्यं, असन्दिग्धः -ग्धा -ग्धं, निःसन्देहः -हा -हं, निश्चितः -ता -तं, सुनिश्चितः -ता -तं, नियतः -ता -तं.

INCONTESTABLY, *adv.* निर्व्विवादं, सुनिश्चितं, असन्दिग्धं, असंशयं, निःसंशयं, अत्र न संशयः, सुनियतं.

INCONTINENCE, INCONTINENCY, *s.* असंयमः, अयतेन्द्रियत्वं, असंयतेन्द्रियता, अजितेन्द्रियत्वं, अनवस्था, अनवस्थता, अनवस्थितिः *f.*, अनियतिः *f.*, अयमः, अदमः, अदान्तिः *f.*, व्यभिचारः, उपस्थासंयमः, लम्पटता, लाम्पट्यं, प्रतिषिद्धविषयेष्व् अतिप्रसङ्गः.

INCONTINENT, *a.* असंयतः -ता -तं, असंयतेन्द्रियः -या -यं, अयती -तिनी -ति (न्), अयतेन्द्रियः -या -यं, अजितेन्द्रियः -या -यं, अयतमैथुनः -ना -नं, असंयतोपस्थः -स्था -स्थं, अनवस्थितः -ता -तं, अनवस्थः -स्था -स्थं, व्यभिचारी -रिणी -रि (न्), व्यसनी -निनी -नि (न्), लम्पटः -टा -टं, निषिद्धविषयेष्व् अतिप्रसक्तः -क्ता -क्तं.

INCONTINENTLY, *adv.* असंयमेन, संयमं विना, लम्पटवत्, अजितेन्द्रियत्वात्.

INCONTROLLABLE, *a.* असंयमनीयः -या -यं, अदमनीयः -या -यं, अनिग्रहणीयः -या -यं, अवश्यः -श्या -श्यं, अनिवार्य्यः -र्य्या -र्य्यं, अशासनीयः -या -यं.

INCONTROVERTIBLE, *a.* अप्रत्याख्येयः -या -यं, अविवदनीयः -या -यं, अविचारणीयः -या -यं, अविवदनीयः -या -यं, निर्व्विवादः -दा -दं, अविवाद्यः -द्या -द्यं, अवितर्क्यः -र्क्या -र्क्यं, अवितर्कणीयः -या -यं, अबाध्यः -ध्या -ध्यं, अखण्डनीयः -या -यं, अविग्रहः -हा -हं, सुनिश्चितः -ता -तं, असन्दिग्धः -ग्धा -ग्धं.

INCONTROVERTIBLY, *adv.* निर्व्विवादं, सुनिश्चितं, असंशयं, निःसंशयं, अवितर्कणीयं.

INCONVENIENCE, INCONVENIENCY, *s.* (That which gives trouble or impedes) क्लेशः, कष्टं, पीडा, बाधा -धकः, व्यथा, कृच्छ्रं, दुःखं, शल्यं, उपरोधः, रोधः, विरोधः, आयासः, कण्टकः -कं, विडम्बनं -ना, अनिष्टं, असुखं, आयासहेतुः *m.*, क्लेशहेतुः *m.*, पीडाहेतुः *m.*, कष्टकारणं. —(Unsuitableness) अयोग्यता, अयुक्तिः *f.*, निर्युक्तिः *f.*, अयुक्तता, अनुपयुक्तता, अनुपयोगिता, अनुपपत्तिः *f.*, अनुचितता.

To INCONVENIENCE, *v. a.* क्लेशं दा or कृ, कष्टं कृ, दुःखं कृ, शल्यं कृ, उपरोधं कृ, बाध् (c. 1. बाधते -धितुं), पीड् (c. 10. पीडयति -यितुं), रुध् (c. 7. रुणद्धि, रोद्धुं), उपरुध्.

INCONVENIENT, *a.* अयोग्यः -ग्या -ग्यं, अनुपयुक्तः -क्ता -क्तं, अनुपयोगी -गिनी -गि (न्), अयुक्तः -क्ता -क्तं, अनुचितः -ता -तं, अनुपपन्नः -न्ना -न्नं, अहितः -ता -तं, अनुपकारी -रिणी -रि (न्), असमञ्जसः -सा -सं.—(Causing trouble or uneasiness) क्लेशकरः -री -रं, क्लेशदः -दा -दं, क्लेशकः -का -कं, कष्टकरः -री -रं, दुःखदः -दा -दं, पीडाकरः -री -रं, उपरोधी -धिनी -धि (न्), बाधकः -का -कं, आयासहेतुकः -का -कं, क्लेशहेतुकः -का -कं, कष्टकारकः -का -कं.

INCONVENIENTLY, *adv.* अयोग्यं, अयुक्तं, अनुपयुक्तं, अनुचितं, अनुपपन्नं, असमञ्जसं, असाम्प्रतं, यथा कष्टं or क्लेशः or उपरोधः or पीडा जायते तथा.

INCONVERSABLE, *a.* असंवादशीलः -ला -लं, अनालापी -पिनी -पि (न्), असंलापी &c., असंवादी &c., परिमितकथः -था -थं, वाग्यतः -ता -तं.

INCONVERSANT, *a.* अविज्ञः -ज्ञा -ज्ञं, अनभिज्ञः -ज्ञा -ज्ञं, असम्पन्नः -न्ना -न्नं.

INCONVERTIBILITY, *s.* अपरिवर्त्तनीयता, अपरिवर्त्तनयोग्यता, अविकार्य्यता.

INCONVERTIBLE, *a.* अपरिवर्त्तनीयः -या -यं, अपरिवर्त्तनयोग्यः -ग्या -ग्यं.

INCORPORAL, *a.* *See* INCORPOREAL.

To INCORPORATE, *v. a.* एकशरीरीकृ, एकीकृ, एकत्र कृ, सम्मिश्र् (c. 10. -मिश्रयति -यितुं), संयुज् (c. 7. -युनक्ति -योक्तुं), संश्लिष् (c. 10. -श्लेषयति -यितुं), संसृज् (c. 6. -सृजति -स्रष्टुं).

To INCORPORATE, *v. n.* एकशरीरीभू, एकीभू, एकत्र भू, सम्मिश्रीभू, संयुज् in pass. (-युज्यते).

INCORPORATE, *a.* शारीरिकः -की -कं, शरीरी -रिणी -रि (न्).

INCORPORATED, *p. p.* संयुक्तः -क्ता -क्तं, संश्लिष्टः -ष्टा -ष्टं, एकीकृतः -ता -तं, सहितः -ता -तं, कृतसंसर्गः -र्गा -र्गं, संसृष्टः -ष्टा -ष्टं, संहतः -ता -तं, सङ्गतवान् -वती -वत् (त्), एकत्रीभूतः -ता -तं.

INCORPORATION, *s.* संयोगः, संयोजनं, संसर्गः, सम्मिश्रणं, संश्लेषः.

INCORPOREAL, *a.* अशरीरी -रिणी -रि (न्), अशरीरवान् -वती -वत् (त्), अदेहवान् -वती -वत् (त्), विदेहः -हा -हं, अमूर्त्तिमान् -मती -मत् (त्), अनङ्गः -ङ्गा -ङ्गं, निरवयवः -वा -वं, अशारीरिकः -की -कं, देहशून्यः -न्या -न्यं, निराकारः -रा -रं, अदैहिकः -की -कं.

INCORPOREALLY, *adv.* अशरीरेण, निराकारेण, निरवयवं, विदेहं.

INCORPOREITY, *s.* अशरीरित्वं, अशरीरवत्त्वं, देहशून्यता, निरवयवता.

INCORRECT, *a.* अशुद्धः -द्धा -द्धं, अशोधितः -ता -तं, अयथार्थः -र्था -र्थं, असम्यङ् -मीची -म्यक् (क्), असमीचीनः -ना -नं, असमञ्जसः -सा -सं, अयाथार्थिकः -की -कं, अतथ्यः -थ्या -थ्यं, अनञ्जसः -सा -सं, वितथः -था -थं, अनृतः -ता -तं, असङ्गतः -ता -तं, अप्रकृतः -ता -तं, दोषी -षिणी -षि (न्), सदोषः -षा -षं, दोषवान् -वती -वत् (त्), अशुचिः -चिः -चि, असत्यः -त्या -त्यं.—(In conduct) दुर्वृत्तः -त्ता -त्तं, असाधुवृत्तः -त्ता -त्तं, दुराचारः -रा -रं, अधार्म्मिकः -की -कं, अशुचिकर्म्मा -र्म्मा -र्म्म (न्).

INCORRECTLY, *adv.* अशुद्धं, अयथार्थं, अयथावत्, वृथा, असम्यक्, अन्यथा, अनञ्जसा, असमञ्जसं, अशुचि, वितथं, अतथ्यं, अनृतं, असत्यं, असमीचीनं, असङ्गतं, असाधु, सदोषं.

INCORRECTNESS, *s.* अशुद्धिः *f.*, अशुद्धता, अविशुद्धिः *f.*, अशोधनं, अयथार्थता, अयाथार्थ्यं, असम्यक्त्वं, असमीचीनता, असामञ्जस्यं, अतथ्यता, असत्यता, वितथत्वं, अनृतं, अनृतत्वं, अशुचिता, अन्यथात्वं, अयाथातथ्यं, सदोषता, दोषवत्त्वं, असाधुता.

INCORRIGIBLE, *a.* असाध्यः -ध्या -ध्यं, अशोधनीयः -या -यं, अशोध्यः -ध्या -ध्यं, असाधनीयः -या -यं, समाधातुम् अशक्यः -क्या -क्यं, साधयितुम् अशक्यः -क्या -क्यं, अशासनीयः -या -यं, अप्रतिसमाधेयः -या -यं, अतिदुष्टः -ष्टा -ष्टं, शिक्षातीतः -ता -तं.

INCORRIGIBLENESS, INCORRIGIBILITY, *s.* असाध्यता, असाधनीयता, अशोधनीयता.

INCORRIGIBLY, *adv.* असाधनीयं, यथा समाधातुं न शक्यते तथा.

INCORRODIBLE, *a.* अगलनीयः -या -यं, अक्षयणीयः -या -यं, अनाश्यः -श्या -श्यं.

INCORRUPT, INCORRUPTED, *a.* अदुष्टः -ष्टा -ष्टं, अदूषितः -ता -तं, अविकृतः -ता -तं, अविकारितः -ता -तं, शुचिः -चिः -चि, शुद्धः -द्धा -द्धं, पवित्रः

-ष्या -र्थं, अभग्नः -ग्ना -ग्नं.

INCORRUPTIBILITY, *s.* अक्षयता -त्वं, अनश्वरता -त्वं, अनाश्यता, अदूष्यता, अभार्य्यता -त्वं, अभेद्यता, अहार्य्यता.

INCORRUPTIBLE, *a.* अक्षयः -या -यं, अक्षयणीयः -या -यं, अनश्वरः -रा -रं, अनाश्यः -श्या -श्यं, अदूष्यः -ष्या -ष्यं, अदूषणीयः -या -यं, अभार्य्यः -र्य्या -र्य्यं, अविकार्य्यः -र्य्या -र्य्यं.—(By bribe) अभेद्यः -द्या -द्यं, अहार्य्यः -र्य्या -र्य्यं.

INCORRUPTION, *s.* अदूषणं, अदुष्टता, अक्षयः, अनश्वरता, अविकारः, अनाशः.

INCORRUPTNESS, *s.* अदुष्टता, अक्षयता, अभ्रष्टता, अविकार्य्यता.—(Integrity) अभेद्यता, अहार्य्यता, शुचिता, सारल्यं, सच्चरित्रता.

To INCRASSATE, *v. a.* घनीकृ, स्थूलीकृ, सान्द्रीकृ, सशूक्ष्मीकृ, पीवरीकृ.

To INCRASSATE, *v. n.* घनीभू, स्थूलीभू, सान्द्रीभू, पीवरीभू.

INCRASSATION, *s.* घनीकरणं, स्थूलीकरणं, सान्द्रीकरणं, पीवरीकरणं, स्थूलता.

To INCREASE, *v. n.* वृध् (c. 1. वर्धते -र्धितुं), विवृध्, संवृध्, प्रवृध्, अभिवृध्, परिवृध्, संविवृध्, वृद्धिम् इ (c. 2. एति -तुं) or या (c. 2. याति -तुं) or प्राप् (c. 5. -आप्नोति -आप्तुं), एध् (c. 1. एधते -धितुं), समेध्, ऋध् (c. 4. ऋध्यति, c. 5. ऋध्नोति, अर्धितुं), समृध्, उपचि in pass. (-चीयते), प्रचि, परिचि, प्यै (c. 1. प्यायते, प्यातुं), आप्यै, स्फाय् (c. 1. स्फायते -यितुं), आस्फाय्, स्फीतीभू, प्रचुरीभू, अधिकीभू, अधिकतरीभू, बहुतरीभू, उपचयं or अभ्युदयम् इ.—(Extend) विस्तृ in pass. (-स्तीर्य्यते), वितन् in pass. (-तन्यते), प्रसृ (c. 1. -सरति -सर्त्तुं), प्रसृप् (c. 1. -सर्पति -सर्प्तुं), विजृम्भ् (c. 1. -जृम्भते -म्भितुं), विस्तारम् इ.—(Grow) रुह् (c. 1. रोहति, रोढुं), प्ररुह्; 'increase in knowledge,' विद्यागमं कृ, विद्याप्राप्तिं कृ.

To INCREASE, *v. a.* वृध् (c. 10. वर्धयति -यितुं), परिवृध्, संवृध्, विवृध्, वृद्धिं नी (c. 1. नयति, नेतुं), एध् (c. 10. एधयति -यितुं), समेध्, बृंह् (c. 10. बृंहयति -यितुं), परिबृंह्, उपबृंह्, समुपबृंह्, आप्यै (c. 10. -प्याययति -यितुं), समाप्यै, स्फाय् (c. 10. स्फावयति -यितुं), आस्फाय्, स्फीतीकृ, बंह् (nom. बंहयति -यितुं), सबंह्, प्रचुरीकृ, प्रचुरतरं -रां -रं कृ, अधिकीकृ अधिकतरं -रां -रं कृ, बहुतरीकृ, अधिकतरीकृ.—(Extend) विस्तृ (c. 10. -स्तारयति -यितुं), वितन् (c. 8. -तनोति -नितुं), तन्, विततीकृ, प्रसृ (c. 10. -सारयति -यितुं), विसृ.

INCREASE, *s.* वृद्धिः *f.*, विवृद्धिः *f.*, प्रवृद्धिः *f.*, वर्धनं, विवर्धनं, संवर्धनं, ऋद्धिः *f.*, समृद्धिः *f.*, स्फातिः *f.*, स्फीतिः *f.*, उपचयः, अभ्युदयः, बृंहणं, परिबृंहणं, उपबृंहणं, उत्सेकः, समुत्थानं, उन्नतिः *f.*, समुन्नतिः *f.*, आप्यायनं, विस्तारः, प्ररूढिः *f.*, आधिक्यं, अधिकता, प्रपञ्चः, बाहुल्यं.

INCREASED, *p. p.* वृद्धः -द्धा -द्धं, प्रवृद्धः -द्धा -द्धं, विवृद्धः -द्धा -द्धं, वर्धितः -ता -तं, विवर्धितः -ता -तं, संवर्धितः -ता -तं, उपचितः -ता -तं, एधितः -ता -तं, समेधितः -ता -तं, ऋद्धः -द्धा -द्धं, समृद्धः -द्धा -द्धं, स्फीतः -ता -तं, स्फातः -ता -तं, आप्यायितः -ता -तं, प्ररूढः -ढा -ढं, बृंहितः -ता -तं, परिबृंहितः -ता -तं, परिवृंहितः -ता -तं, उपबृंहितः -ता -तं, प्रथितः -ता -तं, प्रचुरीकृतः -ता -तं, विततः -ता -तं, विस्तीर्णः -र्णा -र्णं, विस्तृतः -ता -तं, विरूढः -ढा -ढं, प्रसारितः -ता -तं, विजृम्भितः -ता -तं.

INCREASING, *part.* वर्धमानः -ना -नं, वर्धी -र्धिनी -र्धि (न्), वर्धनः -ना -नं, वर्धिष्णुः -ष्णुः -ष्णु, एधमानः -ना -नं, समेधमानः -ना -नं, उपचीयमानः -ना -नं, प्रचीयमानः -ना -नं, विजृम्भमाणः -णा -णं, विस्तीर्य्यमाणः -णा -णं; 'increasing in bulk,' वर्धमानशरीरः -रा -रं, प्रचीयमानावयवः -वा -वं.

INCREASINGLY, *adv.* अधिकाधिकं, उत्तरोत्तरं, वर्धमानप्रकारेण.

INCREATE, INCREATED, *a.* असृष्टः -ष्टा -ष्टं, अभूतः -ता -तं, अजनितः -ता -तं.

INCREDIBILITY, *s.* अश्रद्धेयता, अविश्वास्यता, अविश्वसनीयत्वं, अप्रत्येतव्यता, अविश्वासपात्रता, अप्रामाणिकत्वं, प्रत्ययातीतत्वं, विश्वासातिगत्वं, विश्वासातीतता, अतिप्रत्ययता.

INCREDIBLE, *a.* अश्रद्धेयः -या -यं, अविश्वास्यः -स्या -स्यं, अविश्वसनीयः -या -यं, अप्रत्येतव्यः -व्या -व्यं, अप्रामाणिकः -की -कं, विश्वासातिगः -गा -गं, विश्वासपथातिगः -गा -गं, प्रत्ययातीतः -ता -तं, अतीतप्रत्ययः -या -यं, अतिप्रत्ययः -या -यं, अतिविश्वासः -सा -सं, विश्वासायोग्यः -ग्या -ग्यं, अतिकथः -था -थं.

INCREDIBLY, *adv.* अतिप्रत्ययं, अतिविश्वासं, अश्रद्धेयं, अविश्वसनीयं.

INCREDULITY, *s.* अश्रद्धा, अप्रत्ययः, अविश्वासः, अप्रतीतिः *f.*, अभक्तिः *f.*, अश्रद्धालुता, अप्रत्ययशीलता, अविश्वासशीलता, प्रत्ययाभावः.

INCREDULOUS, *a.* अप्रत्ययी -यिनी -यि (न्), अप्रत्ययशीलः -ला -लं, अविश्वासी -सिनी -सि (न्), अविश्वासशीलः -ला -लं, अविश्रम्भशीलः -ला -लं, अश्रद्धालुः -लुः -लु, अश्रद्दधानः -ना -नं, अश्रद्धावान् -वती -वत् (त्), शङ्काशीलः -ला -लं.

INCREDULOUSLY, *adv.* अप्रत्ययेन -यात्, अविश्वासेन, विश्वासं विना, साशङ्कं.

INCREMENT, *s.* वृद्धिः *f.*, वर्धनं, उपचयः, अभ्युदयः, उन्नतिः *f.*, आधिक्यं.

To INCREPATE, *v. a.* निन्द् (c. 1. निन्दति -न्दितुं), प्रतिनिन्द्, धिक्कृ.

INCREPATION, *s.* निन्दा, परीवादः, परिभाषणं, उपालम्भः, उपक्रोशः, धिक्कारः.

To INCRIMINATE, *v. a.* अभियुज् (c. 7. -युनक्ति -योक्तुं), दोषम् आरुह् in caus. (-रोपयति -यितुं), दोषारोपणं कृ.

To INCRUST, *v. a.* बाह्यत्वचा or त्वग्रूपपटलेन or घनपटलेन आच्छद् (c. 10. -च्छादयति -यितुं) or आवेष्ट् (c. 10. -वेष्टयति -यितुं), बाह्यभागे or बहिर्भागे or उपरिभागे घनीकृ or श्यानीकृ or संहतीकृ.

INCRUSTATION, *s.* त्वक् *f.* (च्), त्वग्रूपपटलं, बाह्यपटलं, बाह्यकोशः, बहिरावेष्टनं, बहिर्भागे घनता, वल्कं, शल्कं.

INCRUSTED, *p. p.* सपटलः -ला -लं, त्वगुपेतः -ता -तं, बहिर्भागे घनीभूतः -ता -तं.

To INCUBATE, *v. n.* कुलायनिलायं कृ, नीडनिलायं कृ, अण्डप्रसवानन्तरम् आपक्षिशावकोत्पत्तेर् नीडं निली (c. 4. -लीयते -लेतुं) or अण्डोपरि उपविश् (c. 6. -विशति -वेष्टुं).

INCUBATION, *s.* कुलायनिलायः -यिता, नीडनिलायः, अण्डोपरि or डिम्बोपरि उपवेशः -शनं.

INCUBUS, *s.* (Nightmare) कुस्वप्नः, दुःस्वप्नः, अजीर्णप्रयुक्तस्वप्नः, स्वप्नकल्पितो हृदयदेशोपरिस्थो महाभारः.

To INCULCATE, *v. a.* निर्बन्धेन or मुहुर्मुहुर् उपदिश् (c. 6. -दिशति -देष्टुं) or शिक्ष् (c. 10. शिक्षयति -यितुं) or हृदये निविश् (c. 10. -वेशयति -यितुं) or विनिविश् or चित्तनिष्ठं -ष्ठां -ष्ठं कृ.

INCULCATED, *p. p.* निर्बन्धेन or मुहुर्मुहुर् उपदिष्टः -ष्टा -ष्टं, मुहुरुपदेशेन मनोनिवेशितः -ता -तं or चित्तविनिवेशितः -ता -तं or चित्तनिष्ठितः -ता -तं.

INCULCATION, *s.* निर्बन्धेन उपदेशः, मुहुरुपदेशः, मुहुरुपदेशेन चित्तनिवेशनं or मनोनिवेशनं.

INCULPABLE, *a.* निर्दोषः -षा -षं, निरपराधः -धा -धं, अनिन्द्यः -न्द्या -न्द्यं.

To INCULPATE, *v. a.* निन्द् (c. 1. निन्दति -न्दितुं), दोषम् आरुह् in caus. (-रोपयति -यितुं), दोषीकृ.

INCULTURE, *s.* अपरिष्कारः, असंस्कारः, अपरिष्कृतिः *f.*, अकर्षणं, अकृषिः *f.*

INCUMBENT, *a.* (Lying on, resting on) अवलम्बी -म्बिनी -म्बि (न्), अवलम्बितः -ता -तं, आश्रितः -ता -तं, उपाश्रितः -ता -तं, उपस्थः -स्था -स्थं, उपस्थायी -यिनी -यि (न्), उपरिस्थः -स्था -स्थं.—(Obligatory, indispensable) अवश्यकर्त्तव्यः -व्या -व्यं, अवश्यकः -का -कं, आवश्यकः -की -कं, अवश्यकरणीयः -या -यं, sometimes expressed by the fut. pass. part. alone; as, 'it is incumbent upon you to go,' त्वया गन्तव्यं, or by the use of the verb अर्ह् (c. 1. अर्हति); as, 'it is incumbent upon you to marry the damsel,' त्वं

कन्यां वोढुम् अर्हसि.

INCUMBENT, *s.* (The person in possession of a benefice) धर्म्मवृत्तिभोगी *m.* (न्), धर्म्मवृत्तिधारी *m.* (न्), वृत्तिभोगी *m.*

To INCUR, *v. a.* आप् (c. 5. आप्नोति, आप्तुं), प्राप्, अवाप्, सम्प्राप्, समाप्, उपगम् (c. 1. -गच्छति -गन्तुं), उपागम्, अधिगम्, गम्, इ (c. 2. एति -तुं), ऋच्छ् (c. 1. ऋच्छति), आसद् (c. 10. -सादयति -यितुं), प्रतिपद् (c. 4. -पद्यते -पत्तुं), लभ् (c. 1. लभते, लब्धुं), अनुभू.—(Bring on) आवह् (c. 1. -वहति -वोढुं), उत्पद् (c. 10. -पादयति -यितुं).—(Be liable to) अधीनः -ना -नं भू, अर्हः -र्हा -र्हं भू, योग्यः -ग्या -ग्यं भू, or expressed by the fut. pass. part.; as, 'he incurs a penalty,' दण्ड्यः or दण्डनीयः or दण्डार्हः or दण्डयोग्यो भवति.

INCURABILITY, *s.* असाध्यता, अचिकित्स्यत्वं, अप्रतिसमाधेयता, अप्रतिकार्य्यता, दुरुपचारत्वं, निरुपचारत्वं, निरुपायत्वं, अनुपायत्वं, उपायहीनता, अशमनीयता, अनुपशमनीयता, अपरिहार्य्यता, साध्यताभावः.

INCURABLE, *a.* असाध्यः -ध्या -ध्यं, असाधनीयः -या -यं, अचिकित्स्यः -त्स्या -त्स्यं, अचिकित्सनीयः -या -यं, अचिकित्सितव्यः -व्या -व्यं, अचिकित्स्यः -त्स्या -त्स्यं, अप्रतीकार्य्यः -र्य्या -र्य्यं, अप्रतिसमाधेयः -या -यं, अशमनीयः -या -यं, अनुपशमनीयः -या -यं, दुरुपचारः -रा -रं, निरुपचारः -रा -रं, निरुपायः -या -यं, अनुपायः -या -यं, चिकित्सितुम् अशक्यः -क्या -क्यं, औषधिपथातिगः -गा -गं, अपरिहार्य्यः -र्य्या -र्य्यं.

INCURABLY, *adv.* अचिकित्सनीयं, असाधनीयं, दुरुपचारं, निरुपायं, अप्रतिसमाधेयं, यथा चिकित्सितुं न शक्यते तथा.

INCURIOSITY, *s.* अकौतुकं, अकौतूहलं, अकुतूहलं, अजिज्ञासा, अनुत्सुकता, अनौत्सुक्यं.

INCURIOUS, *a.* विकौतुकः -का -कं, अकुतूहली -लिनी -लि (न्), अनुत्सुकः -का -कं, अजिज्ञासुः -सुः -सु.

INCURRED, *p. p.* प्राप्तः -प्ता -प्तं, उपागतः -ता -तं, उपगतः -ता -तं, आसादितः -ता -तं, लब्धः -ब्धा -ब्धं, अनुभूतः -ता -तं.

INCURSION, *s.* अवस्कन्दः -न्दनं, उपद्रवः, अभिद्रवः, उपप्लवः, विप्लवः, अभिक्रमः -मणं, आक्रमः, अभिमर्दः, अभिग्रहः, अभिनिर्य्याणं; 'to make incursions,' अवस्कन्द् (c. 1. -स्कन्दति -स्कन्तुं), समवस्कन्द्, उपद्रु (c. 1. -द्रवति -द्रोतुं), अभिद्रु, समाद्रु, समुपद्रु, अभिधाव् (c. 1. -धावति -वितुं).

INCURSIVE, *a.* उपद्रवी -विणी -वि (न्), अवस्कन्दकारी -रिणी -रि (न्).

To INCURVATE, *v. a.* नम् (c. 10. नामयति -यितुं), आनम्, अवनम्, नतीकृ, वक्रीकृ, कुञ्च् (c. 1. कुञ्चति -ञ्चितुं), आवृज् (c. 10. -वर्जयति -यितुं), कुटिलीकृ.

INCURVATED, *p. p.* नामितः -ता -तं, वक्रीकृतः -ता -तं, कुञ्चितः -ता -तं.

INCURVATION, *s.* वक्रीकरणं, आनतिः *f.*, नतिः *f.*, आकुञ्चनं, अवकुञ्चनं.

INDEBTED, *a.* (In debt) ऋणी -णिनी -णि (न्), ऋणवान् -वती -वत् (त्), ऋणबद्धः -द्धा -द्धं, ऋणग्रस्तः -स्ता -स्तं, कृतर्णः -र्णा -र्णं.—(Obliged by something received) अनुगृहीतः -ता -तं, उपकृतः -ता -तं, उपकारबद्धः -द्धा -द्धं; 'I am indebted to you for your advice,' अनुगृहीतोऽहं तवोपदेशेन.

INDECENCY, *s.* अविनयः, अविनीतत्वं -ता, अमर्य्यादा, मर्य्यादातिक्रमः, विनयातिक्रमः, अयुक्तिः *f.*, अयोग्यता, अकर्त्तव्यता, अनुपयुक्तता, अनुपपत्तिः *f.*, अनुचितत्वं, अनौचित्यं, अशिष्टता, असभ्यता, अयाथार्थ्यं, भ्रंशः, भ्रंशः.—(In language) गर्ह्यता, गर्हितत्वं, अवाच्यता.

INDECENT, *a.* अविनीतः -ता -तं, अविनयवान् -वती -वत् (त्), विनयापेतः -ता -तं, अतिक्रान्तविनयः -या -यं, अतिक्रान्तमर्य्यादः -दा -दं, मर्य्यादाविरुद्धः -द्धा -द्धं, विनयविरुद्धः -द्धा -द्धं, अविनयः -या -यं, अमर्य्यादः -दा -दं, अयुक्तः -क्ता -क्तं, अयोग्यः -ग्या -ग्यं, अनुपयुक्तः -क्ता -क्तं, अकर्त्तव्यः -व्या -व्यं, अनुचितः -ता -तं, अनुपपन्नः -न्ना -न्नं, शिष्टाचारविरुद्धः -द्धा -द्धं, अशिष्टः -ष्टा -ष्टं, निर्लज्जः -ज्जा -ज्जं, लज्जाकरः -री -रं, अन्याय्यः -य्या -य्यं, न्यायविरुद्धः -द्धा -द्धं, असत्कृतः -ता -तं, असमञ्जसः -सा -सं, अयथार्थः -र्था -र्थं.—(In language) गर्ह्यः -र्ह्या -र्ह्यं, गर्हितः -ता -तं, अवाच्यः -च्या -च्यं, अवचनीयः -या -यं, दुरुक्तः -क्ता -क्तं, कुत्राव्यः -व्या -व्यं.

INDECENTLY, *adv.* अविनयेन, विनयविरोधेन, विनयविरुद्धं, मर्य्यादाविरुद्धं, विनयं विना, अविनीतवत्, अयुक्तं, अयोग्यं, अनुपयुक्तं, अन्यायतस्, अनुचितं, असत्कृतं, शिष्टाचारविरुद्धं, गर्हितं, गर्हणीयं.

INDECISION, *s.* अनिश्चयः, अनिर्णयः, सन्देहः, विकल्पः, संशयः, आशङ्का, शङ्का, वितर्कः.—(Indecision of character) अस्थिरमतित्वं, सन्दिग्धमतित्वं, विकल्पशीलता, सन्देहशीलता, अनिर्णयशीलता, चञ्चलता, चञ्चलमतित्वं, चलचित्तता, अनवस्थितिः *f.*, अधीरत्वं, आन्दोलितचित्तत्वं.

INDECISIVE, *a.* अनिश्चायकः -का -कं, अनिर्णायकः -का -कं, अनिर्णयनः -ना -नं, अनिश्चितः -ता -तं, अनिर्णीतः -ता -तं, सन्दिग्धः -ग्धा -ग्धं, संशयस्थः -स्था -स्थं, वैकल्पिकः -की -कं, सविकल्पः -ल्पा -ल्पं.—(Vacillating in character) अस्थिरमतिः -तिः -ति, सन्दिग्धमतिः -तिः -ति, चञ्चलशीलः -ला -लं, चलचित्तः -त्ता -त्तं, अनवस्थितमतिः -तिः -ति, आन्दोलितचित्तः -त्ता -त्तं, दोलायमानमतिः -तिः -ति.

INDECISIVELY, *adv.* अनिश्चयपूर्व्वं, अनिर्णयपूर्व्वं, अनिश्चितं, अनिर्णयेन.

INDECLINABLE, *a.* अव्ययः -या -यं, अव्ययी -यिनी -यि (न्), अविकार्य्यः -र्य्या -र्य्यं, अविभक्तिकः -का -कं; 'an indeclinable word,' अव्ययः -यं, अव्ययशब्दः; 'an indeclinable compound,' अव्ययीभावः.

INDECOROUS, *a.* अविनीतः -ता -तं, अविनयः -या -यं, विनयविरुद्धः -द्धा -द्धं, विनयापेतः -ता -तं, अयुक्तः -क्ता -क्तं, अन्याय्यः -य्या -य्यं, अयोग्यः -ग्या -ग्यं, अनुपयुक्तः -क्ता -क्तं, अनुचितः -ता -तं, मर्य्यादाविरुद्धः -द्धा -द्धं, अमर्य्यादः -दा -दं, असत्कृतः -ता -तं, अनियमः -मा -मं, शिष्टाचारविरोधी -धिनी -धि (न्), सभ्याचारविरोधी &c., अतिक्रान्तविनयः -या -यं.

INDECOROUSLY, *adv.* अविनीतवत्, अविनयेन, विनयविरुद्धं, मर्य्यादाविरोधेन, अशिष्टवत्, असभ्यवत्, दुःशीलवत्, कुशीलवत्, अयुक्तं, अयोग्यं, अनुपयुक्तं, अनुचितं, अन्यायतस्, अन्यायेन, असम्यक्, असत्कृतं.

INDECORUM, *a.* अविनयः, अविनीतता -त्वं, अमर्य्यादा, मर्य्यादातिक्रमः, विनयविरोधः, अन्यायः -य्यत्वं, अयुक्तिः *f.*, अयुक्तता, अनुपयुक्तता, अनुचितत्वं, अनौचित्यं, अयोग्यता, असत्कृतत्वं, असम्यक्त्वं, अनुपपत्तिः *f.*, असमञ्जसं, अयाथार्थ्यं, सदाचारविरोधः, शिष्टाचारातिक्रमः, असभ्यता, अशिष्टत्वं, कुशीलता, दुःशीलता, कुरीतिः *f.*, अनीतिः *f.*, कुनीतिः *f.*, अनयः, कुचर्य्या, व्यभिचारः, अनियमः, अपचारः, अकर्त्तव्यता.

INDEED, *adv.* खलु, नूनं, एवं, एव, सत्यं, सत्यमेव, अवश्यं, अर्थतस्, वस्तुतस्, तत्त्वतस्, परमार्थतस्, किल, वै, नाम, ध्रुवं, तावत्.

INDEFATIGABLE, *a.* अश्रान्तः -न्ता -न्तं, अविश्रान्तः -न्ता -न्तं, अपरिश्रान्तः -न्ता -न्तं, अक्लान्तः -न्ता -न्तं, अतन्द्रितः -ता -तं, निस्तन्द्रिः -न्द्रिः -न्द्रि, अविषादः -दा -दं, बहुश्रमः -मा -मं -मी -मिणी -मि (न्), महोत्साही -हिनी -हि (न्).

INDEFATIGABLENESS, *s.* अश्रान्तता, अश्रान्तिः *f.*, अक्लान्तिः *f.*, अतन्द्रा.

INDEFATIGABLY, *adv.* अश्रान्तं, अतन्द्रितं, अतन्द्रितस्, अक्लान्तमनसा.

INDEFEASIBLE, *a.* अलोप्यः -प्या -प्यं, अलोपनीयः -या -यं, अविनाश्यः -श्या -श्यं.

INDEFENSIBLE, *a.* अरक्षणीयः -या -यं, अप्रतिपालनीयः -या -यं, अपक्षपातक्षमः -मा -मं, अशोधनीयः -या -यं, अशोध्यः -ध्या -ध्यं, अपरिशुद्धिक्षमः -मा -मं, अप्रतिपादनीयः -या -यं, अव्यवस्थाप्यः -प्या -प्यं, अनुत्तरः -रा -रं.

INDEFINITE, *a.* अलक्षणः -णा -णं, अलक्षितः -ता -तं, अनियतः -ता -तं, अनियमितः -ता -तं, अनिर्दिष्टः -ष्टा -ष्टं, अनिश्चितः -ता -तं, अव्यवस्थितः -ता -तं,

IND

अपरिमितः -ता -तं, उपलक्षणः -णा -णं; 'indefinite tense,' अनद्यतनभूतः.

INDEFINITELY, *adv.* अपरिमितं, अमितं, अनियतं, अनिर्दिष्टं, अनिश्चितं.

INDELIBLE, *a.* अनाश्यः -श्या -श्यं, अविनाश्यः -श्या -श्यं, अलोप्यः -प्या -प्यं, अलोपनीयः -या -यं, अमार्ष्ट्यः -र्ष्ट्या -र्ष्ट्यं, अनपमृज्यः -ज्या -ज्यं, अक्षरः -रा -रं, अक्षय्यः -य्या -य्यं.

INDELIBLY, *adv.* अलोपनीयं, अनाश्यं, यथा अपमार्ष्टुं न शक्यते तथा.

INDELICACY, *s.* अविनयः, अविनीतता -त्वं, असभ्यता, अशिष्टता, अमर्य्यादा, मर्य्यादातिक्रमः, मर्य्यादाविरोधः, अशुद्धता, कुशीलता, दुःशीलता, सदाचारविरोधः, असङ्गत्वं -ता.

INDELICATE, *a.* अविनीतः -ता -तं, विनयविरुद्धः -द्धा -द्धं, मर्य्यादाविरुद्धः -द्धा -द्धं, असभ्यः -भ्या -भ्यं, अशिष्टः -ष्टा -ष्टं, अयुक्तः -क्ता -क्तं, अनुपयुक्तः -क्ता -क्तं, असङ्गतः -ता -तं, अनुचितः -ता -तं, असमञ्जसः -सा -सं, अयथार्थः -र्था -र्थं.—(Offensive to good manners) सदाचारविरुद्धः -द्धा -द्धं, शिष्टाचारविरुद्धः -द्धा -द्धं.—(In language) अवाच्यः -च्या -च्यं.

INDELICATELY, *adv.* अविनीतं, विनयविरुद्धं, मर्य्यादाविरोधेन, असभ्यवत्, अविनीतवत्, अशिष्टवत्, अयुक्तं, सदाचारविरुद्धं, दुःशीलवत्, असङ्गतं.

INDEMNIFIED, *p. p.* परितोषितः -ता -तं, प्रत्युपकृतः -ता -तं, रक्षितः -ता -तं.

To INDEMNIFY, *v. a.* (Secure against loss) अग्निचौरादिभ्यो रक्ष् (c. 1. रक्षति -क्षितुं), योगक्षेमं कृ, क्षेमप्रतिविधानं कृ.—(Make good loss, compensate) क्षतिं पृ (c. 10. पूरयति -यितुं) or सम्पृ, क्षतिपूरणं कृ, परितुष् (c. 10. -तोषयति -यितुं), पारितोषिकं दा, क्षतिपारितोषिकं कृ, क्षतिनिष्कृतिं दा, क्षतिं निष्कृ or अपाकृ or प्रतिकृ or शुध् (c. 10. शोधयति -यितुं) or परिशुध्, अपकारमपेक्ष्य प्रत्युपकृ.

INDEMNITY, *s.* योगक्षेमः, अग्निचौरादिभ्यो रक्षाकरणं क्षेमप्रतिविधानं, विधायकत्वं.—(Compensation) क्षतिपूरणं, क्षतिसम्पूरणं, हानिपूरणं, क्षतिमपेक्ष्य परितोषः, क्षतिपारितोषिकं, क्षतिनिष्कृतिः *f.*, दण्डनिष्कृतिः *f.*, दण्डनिस्तारः, प्रत्युपकारः, प्रत्युपकृतं, क्षतिशोधनं, अपकारशुद्धिः *f.*, उपहारः; 'paper of indemnity,' हानिपूरणपत्रं, दण्डाभयपत्रं, सदण्डपत्रं, अभयपत्रं.

INDEMONSTRABLE, *a.* असाध्यः -ध्या -ध्यं, अनुपपादनीयः -या -यं, असूच्यः -च्या -च्यं.

To INDENT, *v. a.* क्रकचरूपेण or दन्तपंक्तिरूपेण अङ्कुरं -रां -रं कृ, दन्तुरं -रां -रं कृ, सदन्तं -न्तां -न्तं कृ, सदन्तीकृ, भङ्गं कृ, भङ्गुरीकृ, सभङ्गं -ङ्गां -ङ्गं कृ, छेदं कृ, अवच्छेदं कृ, क्रकचदन्तरूपेण छिद् (c. 7. छिनत्ति, छेत्तुं) or विच्छिद्, ऊर्म्मिरूपं -पां -पं कृ, अङ्क् (c. 10. अङ्कयति -यितुं).

INDENTATION, *s.* भङ्गः, छेदः, अवच्छेदः, विच्छेदः, दन्तः, क्रकचदन्तरूपो भङ्गः, भङ्गकरणं, भङ्गुरीकरणं, अङ्कः, अङ्कनं.

INDENTED, *p. p.* or *a.* भङ्गुरः -रा -रं, सभङ्गः -ङ्गा -ङ्गं, दन्तुरः -रा -रं, दन्ती -न्तिनी -न्ति (न्), अनुक्रकचः -चा -चं, क्रकचदन्तरूपेण विच्छिन्नः -न्ना -न्नं, ऊर्म्मिमान् -मती -मत् (त्), अङ्कितः -ता -तं, क्रकचाकारः -रा -रं.

INDENTURE, *s.* नियमपत्रं, लेखपत्रं, लेख्यपत्रं, पत्रं, लेख्यं, प्रतिज्ञापत्रं.

INDEPENDENCE, *s.* अनधीनता, अनायत्तता, स्वाधीनता, स्वतन्त्रता, स्वातन्त्र्यं, स्वच्छन्दता, स्वाच्छन्द्यं, स्वैरिता, स्वैरता, आत्माधीनता, आत्मायत्तता, आत्मतन्त्रता, आत्माश्रयः, आत्माश्रितत्वं, आत्मसंश्रयः, अनायत्तवृत्तिता, स्वैरवृत्तित्वं, स्वच्छन्दवृत्तिता, यदृच्छा, अपराधीनता, अपरायत्तता, अपरवशत्वं, विवशत्वं, अवशत्वं, अपारतन्त्र्यं, अनवलम्बत्वं, व्युत्थानं.

INDEPENDENT, *a.* अनधीनः -ना -नं, अनायत्तः -त्ता -त्तं, स्वाधीनः -ना -नं, स्वतन्त्रः -न्त्रा -न्त्रं, स्वच्छन्दः -न्दा -न्दं, आत्माधीनः -ना -नं, आत्मायत्तः -त्ता -त्तं, आत्मतन्त्रः -न्त्रा -न्त्रं, आत्माश्रितः -ता -तं, आत्मसंश्रितः -ता -तं, अनुपाश्रितः -ता -तं, अनाश्रितः -ता -तं, अनपाश्रयः -या -यं, स्वैरी -रिणी -रि (न्), स्वैरवृत्तिः -त्तिः -त्ति, स्वैरः -री -रं, स्वैरचारी -रिणी -रि (न्), स्वच्छन्दवृत्तिः -त्तिः -त्ति, अनायत्तवृत्तिः -त्तिः -त्ति, अवशः -शा -शं, विवशः -शा -शं, अपरवशः -शा -शं, अपराधीनः -ना -नं, अपरायत्तः -त्ता -त्तं, अपरतन्त्रः -न्त्रा -न्त्रं, अनवलम्बः -म्बा -म्बं -म्बी -म्बिनी -म्बि (न्), यादृच्छिकः -की -कं, स्वेच्छाचारी -रिणी -रि (न्), यथेष्टचारी &c., अनपेक्षः -क्षा -क्षं, निरपेक्षः -क्षा -क्षं, अभुजिष्यः -ष्या -ष्यं; 'independent of any written title,' आगमनिरपेक्षः -क्षा -क्षं; 'independent woman,' स्वैरिणी, अवीरा.

INDEPENDENTLY, *adv.* अनधीनं, अनुपाश्रितं, अनाश्रितं, स्वाधीनवत्, स्वतन्त्रवत्, स्वातन्त्र्येण, स्वैरवत्, स्वच्छन्दवत्, विवशं, यदृच्छया, स्वेच्छया, यथेष्टं, यथाकामं; 'independently of any written title,' आगमनिरपेक्षं.

INDESCRIBABLE, *a.* अवर्णनीयः -या -यं, अनिर्देश्यः -श्या -श्यं, अव्याख्येयः -या -यं, अनिर्वचनीयः -या -यं, वर्णयितुम् अशक्यः -क्या -क्यं; 'this is indescribable,' तद् वर्णयितुं न शक्यते.

INDESIRABLE, *a.* अस्पृहणीयः -या -यं, अस्पृह्यः -ह्या -ह्यं, अप्रार्थनीयः -या -यं.

INDESTRUCTIBILITY, *s.* अनाश्यता, अविनश्वरत्वं, अक्षयता, अजरत्वं.

INDESTRUCTIBLE, *a.* अनाश्यः -श्या -श्यं, अविनाश्यः -श्या -श्यं, अविनश्वरः -रा -रं, अनश्वरः -रा -रं, अविनाशी -शिनी -शि (न्), अनाशनीयः -या -यं, अक्षयः -या -यं, अक्षयी -यिणी -यि (न्), अक्षय्यः -य्या -य्यं, अध्वंसनीयः -या -यं, अविध्वंसनीयः -या -यं, अजरः -रा -रं.

INDETERMINATE, *a.* अनियतः -ता -तं, अनिश्चितः -ता -तं, अनिर्णीतः -ता -तं, अनिर्धारितः -ता -तं, अनिर्दिष्टः -ष्टा -ष्टं, अव्यवस्थितः -ता -तं, अलक्षितः -ता -तं, अलक्षणः -णा -णं, अपरिमितः -ता -तं, वैकल्पिकः -की -कं, सन्दिग्धः -ग्धा -ग्धं, अविवक्षितः -ता -तं.

INDETERMINATELY, *adv.* अनियतं, अनिश्चितं, अनिश्चयपूर्व्वं, अनिर्णयपूर्व्वं.

INDETERMINATION, *s.* अनिश्चयः, अनिर्णयः, अनिर्धारणं, अनिष्पत्तिः *f.*, अनवधारणं.

INDEX, *s.* (That which points out, as the forefinger) देशी *m.* (न्), प्रदेशिनी, प्रदेशनी, देशकः, प्रदर्शकः, दर्शयिता *m.* (तृ), दर्शकः, प्रकाशकः.—(Table of contents) सूचीपत्रं, सूचिः *f.* -ची, अनुक्रमणिका, पत्रपञ्जी, निर्वचनं, निर्घण्टः; 'index of names,' नामावलिः *f.*; 'index of a letter, in algebra,' घातमापकः.

INDIA, *s.* (The country) भारतवर्षं, भरतवर्षं, भारतं, भारतदेशः, जम्बुः, जम्बु *n.*, जम्बुद्वीपः.

INDIAN, *a.* भारतवर्षीयः -या -यं, भारतदेशीयः -या -यं, भारतदेशजः -जा -जं, भारतवर्षसम्बन्धी -न्धिनी -न्धि (न्).

INDIAN-RUBBER, *s.* अतिस्थितिस्थापकविशिष्टो भारतदेशीयवृक्षनिर्यासः.

To INDICATE, *v. a.* सूच् (c. 10. सूचयति -यितुं), संसूच्, प्रदिश् (c. 6. -दिशति -देष्टुं), निर्दिश्, विनिर्दिश्, उद्दिश्, सन्दिश्, अपदिश्, आदिश्, दृश् (c. 10. दर्शयति -यितुं), अभिदृश्, निदृश्, प्रतिदृश्, लक्षीकृ, प्रकटीकृ, व्यक्तीकृ, आविष्कृ, बुध् (c. 10. बोधयति -यितुं), उद्बुध्, निरूप् (c. 10. -रूपयति -यितुं), प्रकाश् (c. 10. -काशयति -यितुं), आविद् (c. 10. -वेदयति -यितुं), निविद्, लक्ष् (c. 10. लक्षयति -यितुं).

INDICATED, *p. p.* सूचितः -ता -तं, निर्दिष्टः -ष्टा -ष्टं, उद्दिष्टः -ष्टा -ष्टं, दर्शितः -ता -तं, वेदितः -ता -तं, आवेदितः -ता -तं, लक्षितः -ता -तं.

INDICATION, *s.* लक्षणं, चिह्नं, लिङ्गं, सूचना, पूर्व्वलक्षणं, पूर्व्वलिङ्गं, पूर्व्वचिह्नं, पूर्व्वरूपं, रूपकं, व्यञ्जनं, प्रज्ञानं, अभिज्ञानं, संज्ञा, आकूतं, आकारः, इङ्गः, इङ्गितं, सङ्केतः, अवगतिः *f.*, अनुभवः, प्रमाणं.

INDICATIVE, *a.* सूचकः -का -कं, अनुसूचकः -का -कं, दर्शकः -का -कं, लाक्षणिकः -की -कं, लाक्षण्यः -ण्या -ण्यं, बोधकः -का -कं, उद्बोधकः -का -कं, वाचकः -का -कं, अभिव्यञ्जकः -का -कं, उद्देशकः -का -कं,

निर्देशकः -का -कं, देशकः -का -कं, देशी -शिनी -शि (न्), गमकः -का -कं, ज्ञापकः -का -कं, निवेदकः -का -कं; 'indicative mode,' कर्तृवाच्यं, स्वार्थः.

To INDICT, *v. a.* अभियोगपत्रेण or अपवादपत्रेण अभियुज् (c. 7. -युनक्ति -योक्तुं) or अभिशंस् (c. 1. -शंसति -सितुं) or अपवद् (c. 1. -वदति -दितुं).

INDICTABLE, *a.* अभियोक्तव्यः -व्या -व्यं, अभियोज्यः -ज्या -ज्यं, अभियोजनीयः -या -यं.

INDICTED, *p. p.* अपवादपत्रद्वारा अभियुक्तः -क्ता -क्तं or अभिशस्तः -स्ता -स्तं, लेख्याभियुक्तः -क्ता -क्तं.

INDICTER, *s.* अभियोक्ता *m.* (क्तृ), अभियोगपत्रलेखकः.

INDICTMENT, *s.* अभियोगपत्रं, अपवादपत्रं, अभियोगलेख्यं, लेख्यं, अभियोगः, अभिशंसनं.

INDIFFERENCE, *s.* (Unconcernedness) उदासीनता, औदास्यं, औदासीन्यं, निरुत्सुकता, अनुत्सुकता, अनौत्सुक्यं, विरक्तिः *f.*, विरक्तता, वैराग्यं, वैरक्त्यं, अनभिलाषः, अनीहा, निरीहता -त्वं, अनपेक्षा, अनवेक्षा, अनादरः, निरादरः, निःस्पृहता, अस्पृहा, निःस्नेहता, नैःस्नेह्यं, जडता, जाड्यं, निःसङ्गत्वं, असङ्गता, सङ्गहीनता, स्नेहहीनता, वितृष्णा, अमनोयोगः, प्रमादः, निर्वृतिः.—(Impartiality) अपक्षपातः -तिता, विपक्षपातत्वं, अपक्षता, स्नेहराहित्यं, असङ्गः.—(State in which there is no difference) अविशेषत्वं, निर्विशेषत्वं, अभिन्नता -त्वं.—(Neutrality) मध्यस्थता.

INDIFFERENT, *a.* (Unconcerned) उदासीनः -ना -नं, उदासी -सिनी -सि (न्), निरुत्सुकः -का -कं, अनुत्सुकः -का -कं, विरक्तः -क्ता -क्तं, निरीहः -हा -हं, अनपेक्षः -क्षा -क्षं, निरपेक्षः -क्षा -क्षं, अनभिलाषः -षा -षं, निरादरः -रा -रं, निःस्पृहः -हा -हं, विगतस्पृहः -हा -हं, निःस्नेहः -हा -हं, स्नेहहीनः -ना -नं, निःसङ्गः -ङ्गा -ङ्गं, सङ्गशून्यः -न्या -न्यं, गतसङ्गः -ङ्गा -ङ्गं, अनिच्छुकः -का -कं, विकौतुकः -का -कं, अव्यग्रः -ग्रा -ग्रं, जडः -डा -डं, समबुद्धिः -द्धिः -द्धि, समभावः -वा -वं, अमनोयोगी -गिनी -गि (न्), निर्वृतः -ता -तं.—(Impartial) विपक्षपातः -ता -तं, अपक्षपाती -तिनी -ति (न्), समदर्शी -र्शिनी -र्शि (न्), समदृष्टिः -ष्टिः -ष्टि, निःसङ्गः -ङ्गा -ङ्गं, गतसङ्गः -ङ्गा -ङ्गं.—(Having no difference, not different) निर्विशेषः -षा -षं, अविशेषः -षा -षं, अविशिष्टः -ष्टा -ष्टं, अभिन्नः -न्ना -न्नं.—(Neutral) मध्यस्थः -स्था -स्थं, मध्यवर्त्ती -र्त्तिनी -र्त्ति (न्), तटस्थः -स्था -स्थं, समपक्षः -क्षा -क्षं.—(Of a middling quality, bad) विगुणः -णा -णं, निर्गुणः -णा -णं, मध्यमः -मा -मं, सामान्यः -न्या -न्यं; 'an indifferent person,' उदासः, उदासिता *m.* (तृ), उदासी *m.* (न्), बहिरङ्गः.

INDIFFERENTLY, *adv.* निर्विशेषं -षेण, अविशेषेण, अविशिष्टं, निरपेक्षं, अनपेक्षया.—(Badly) विगुणं, निर्गुणं, यावत्तावत्.

INDIGENCE, INDIGENCY, *s.* दरिद्रता, दारिद्र्यं, दारिद्रं, निर्धनता -त्वं, अधनता, निष्किञ्चनत्वं, कार्पण्यं, दीनता, दैन्यं, दुर्गतिः *f.*, निःस्वता.

INDIGENOUS, *a.* स्वदेशीयः -या -यं, स्वदेशजः -जा -जं, स्वदेशजातः -ता -तं, देशजः -जा -जं, दैशिकः -की -कं, स्वदेशोद्भवः -वा -वं.

INDIGENT, *a.* दरिद्रः -द्रा -द्रं, निर्धनः -ना -नं, अधनः -ना -नं, अल्पधनः -ना -नं, निष्किञ्चनः -ना -नं, निष्काञ्चनः -ना -नं, दीनः -ना -नं, कृपणः -णा -णं, दुर्गतः -ता -तं, वित्तहीनः -ना -नं, अर्थहीनः -ना -नं, निःस्वः -स्वा -स्वं, दरिद्रायकः -का -कं.

INDIGENTLY, *adv.* दरिद्रवत्, निर्धनवत्, दारिद्र्येण, कृपणं, दीनं, सदैन्यं.

INDIGESTED, *a.* अजीर्णः -र्णा -र्णं, अपक्वः -क्वा -क्वं, अपरिपक्वः -क्वा -क्वं, अजातपाकः -का -कं, अक्वथितः -ता -तं, अदग्धः -ग्धा -ग्धं, असिद्धः -द्धा -द्धं, अरूपितः -ता -तं.—(Not regularly arranged) अव्यवस्थितः -ता -तं.

INDIGESTIBLE, *a.* अपाच्यः -च्या -च्यं, दुष्पाच्यः -च्या -च्यं, दुष्पचः -चा -चं, अपाक्यः -क्या -क्यं, अपक्तव्यः -व्या -व्यं, अपचनीयः -या -यं, दुर्जरः -रा -रं, अजर्य्यः -र्य्या -र्य्यं, अक्रमणीयः -या -यं, अपाकयोग्यः -ग्या -ग्यं.

INDIGESTION, *s.* अजीर्णिः *f.*, अजीर्णं, अजीर्णता, अजरणं, अपक्तिः *f.*, अपाकः, अपरिपाकः, पाककृच्छ्रं, मन्दाग्निः *m.*, तीक्ष्णाग्निः *m.*, अप्रदीप्ताग्निः *m.*, अग्नितीक्ष्णता, अवक्वाथः, अक्वाथः, अपक्वता, अपरिपक्वता, कुपित्तं, अरुचिः *f.*, अरोचकः, अन्नविकारः, अजीर्णविकारः, आमयाविता, परिणामशूलः.

INDIGNANT, *a.* समन्युः -न्युः -न्यु, अतिक्रुद्धः -द्धा -द्धं, अतिक्रोधी -धिनी -धि (न्), अतिकोपी -पिनी -पि (न्), कुपितः -ता -तं, कोपाकुलः -ला -लं, कृतमन्युः -न्युः -न्यु, कृतकोपः -पा -पं, आगतमन्युः -न्युः -न्यु, अतिरुष्टः -ष्टा -ष्टं, सरोषः -षा -षं, जातामर्षः -र्षा -र्षं, सामर्षः -र्षा -र्षं, जातरोषः -षा -षं, जनितरोषः -षा -षं, उपजातकोपः -पा -पं, इद्धमन्युः -न्युः -न्यु, संरम्भी -म्भिणी -म्भि (न्).

INDIGNANTLY, *adv.* सकोपं, सरोषं, सक्रोधं, सामर्षं, क्रोधेन, कोपाकुलवत्.

INDIGNATION, *s.* मन्युः *m.*, रोषः, क्रोधः, कोपः, अमर्षः, संरम्भः, अत्यन्तक्रोधः, गुरुकोपः, अतिरोषः, अवज्ञापृष्ठः क्रोधः, अवहेलापृष्ठः कोपः, गर्ज्जनं.

INDIGNITY, *s.* अपमानं, अवमानं, अवज्ञा -ज्ञानं, परिभवः, अनादरः, अवहेला -लं -लनं, परावज्ञा, उपेक्षा -क्षणं, गर्हा -र्हणं, अवधीरणं, कुत्सा -त्सनं, हेलनं, तिरस्कारः, न्यक्कारः.

INDIGO, *s.* नीलं.—(The plant) नीली, नीलिनी, नीलिका, काला, रञ्जनी, तूली, तूणी, द्रोणिका, द्रोणी, श्यामीका, स्थिररङ्गा, दोला, श्रीफली, ग्रामीणा, मधुपर्णिका, क्लीतकिका, तुत्था, पुङ्कसी, नीलपुष्पिका; 'indigo vat,' नीलपाचनभाण्डं, नीलसन्धानभाण्डं; 'maceration of indigo,' नीलपाचनं, नीलीसन्धानं.

INDIRECT, *a.* वक्रः -क्रा -क्रं, कुटिलः -ला -लं, जिह्मः -ह्मा -ह्मं, विजिह्मः -ह्मा -ह्मं, अनृजुः -जुः -जु, वक्रिमः -मा -मं, असरलः -ला -लं, तिर्य्यङ् तिरश्ची तिर्य्यक् (च्), वक्री -क्रिणी -क्रि (न्), विषमः -मा -मं; 'indirect flight,' विडीनं; 'indirect speech,' वक्रभणितं, वक्रोक्तिः *f.*

INDIRECTLY, *adv.* वक्रं, कुटिलं, जिह्मं, विजिह्मं, अनृजु, असरलं, तिर्य्यक्, तिरस्, विषमं.—(Not expressly) अव्यक्तं, वक्रोक्त्या.

INDIRECTNESS, *s.* वक्रता, कुटिलता, कौटिल्यं, जिह्मता, अनृजुता, असरलत्वं, असारल्यं, तिर्य्यक्त्वं, विषमता, वैषम्यं.

INDISCERNIBLE, *a.* अदृश्यः -श्या -श्यं, अदर्शनीयः -या -यं, अदृष्टिगोचरः -रा -रं, अविज्ञेयः -या -यं, अप्रत्यक्षः -क्षा -क्षं, अलक्ष्यः -क्ष्या -क्ष्यं, अप्रेक्ष्यः -क्ष्या -क्ष्यं, अप्रेक्षणीयः -या -यं, अलोकनीयः -या -यं, अविभाव्यः -व्या -व्यं, अव्यक्तः -क्ता -क्तं.

INDISCERPTIBILITY, *s.* अच्छेद्यता, अव्यवच्छेद्यत्वं, अभेद्यता, अविभेद्यता, अखण्डनीयता.

INDISCERPTIBLE, *a.* अच्छेद्यः -द्या -द्यं, अविभेद्यः -द्या -द्यं, अखण्डनीयः -या -यं.

INDISCOVERABLE, *a.* अनिरूपणीयः -या -यं, अज्ञेयः -या -यं, अविज्ञेयः -या -यं.

INDISCREET, *a.* अविनीतः -ता -तं, दुर्विनीतः -ता -तं, अविनयः -या -यं, अविनयवान् -वती -वत् (त्), अनीतिज्ञः -ज्ञा -ज्ञं, अविज्ञः -ज्ञा -ज्ञं, अविचक्षणः -णा -णं, अविचारी -रिणी -रि (न्), अविचारणशीलः -ला -लं, अविमृश्यकारी -रिणी -रि (न्), असमीक्ष्यकारी &c., अविवेचकः -का -कं, अबुद्धिमान् -मती -मत् (त्), अमतिमान् &c., अमनस्वी -स्विनी -स्वि (न्), अपरिणामदर्शी -र्शिनी -र्शि (न्), अनवहितः -ता -तं, विचारशून्यः -न्या -न्यं.

INDISCREETLY, *adv.* अविनयेन, विनयविरुद्धं, अविनीतवत्, अविज्ञवत्, अविमृश्य, असमीक्ष्य, अविचार्य्य, असमीक्षापूर्व्वं, अविचारपूर्व्वं, अविचारितं, अविवेचनापूर्व्वं, अनालोचितं, अविचक्षणवत्.

INDISCRETE, *a.* अविविक्तः -क्ता -क्तं, अभिन्नः -न्ना -न्नं, अविच्छिन्नः -न्ना -न्नं.

INDISCRETION, *s.* अविनयः, अविनीतता -त्वं, अनीतिः *f.*, दुर्णीतिः *f.*, दुर्णयः, अविज्ञता, असमीक्षा, असमीक्ष्यकारित्वं, अविचारः -रणा, अविवेचना, अविचक्षणता, अवैचक्षण्यं, असुबुद्धिमत्त्वं, अमनस्विता, अनवेक्षा, असावधानता, अल्पमता, प्रमादः ; 'indiscretion of youth,' यौवनदर्पः.

INDISCRIMINATE, *a.* अविविक्तः -क्ता -क्तं, निर्विशेषः -षा -षं, अविशेषः -षा -षं -षकः -का -कं, अविशेषणः -णा -णं, अविशेषणीयः -या -यं, विशेषहीनः -ना -नं, अपरिच्छिन्नः -न्ना -न्नं, अपरिच्छेदितः -ता -तं, अपृथक्कृतः -ता -तं, अकृतलक्षणः -णा -णं, अलक्षितः -ता -तं, अभेदः -दा -दं, अपरिच्छेदकः -का -कं, अव्यवस्थितः -ता -तं.—(Confused) सङ्कुलः -ला -लं, सङ्कीर्णः -र्णा -र्णं, अस्तव्यस्तः -स्ता -स्तं.

INDISCRIMINATELY, *adv.* अविशेषेण, निर्विशेषं -षेण, अविविक्तं, अभेदेन.—(Confusedly) सङ्कुलं, सङ्कीर्णं, क्रमं विना, अक्रमेण.

INDISCRIMINATING, INDISCRIMINATIVE, *a.* अविवेकी -किनी -कि (न्), निर्विवेकः -का -कं, अविशेषज्ञः -ज्ञा -ज्ञं, अविवेकदृश्वा -श्वा -श्व (न्), अविशेषणः -णा -णं, अपरिच्छेदकः -का -कं, अविभावकः -का -कं.

INDISCRIMINATION, *s.* अविवेकः, अविवेचना, अविज्ञता, अपरिच्छेदः, अविज्ञानं, अविभावनं, अविचारः, अव्यवच्छेदः, अविवेकत्वं.

INDISPENSABLE, *a.* अवश्यकः -का -कं, सावश्यकः -की -कं, अवश्यकर्त्तव्यः -व्या -व्यं, अवश्यकार्य्यः -र्य्या -र्य्यं, अवश्यकरणीयः -या -यं, अवश्यः -श्या -श्यं, अपरित्याज्यः -ज्या -ज्यं, अपरिहार्य्यः -र्य्या -र्य्यं, अपरिहरणीयः -या -यं, अत्याज्यः -ज्या -ज्यं, अवश्यभवितव्यः -व्या -व्यं, सर्व्वथा करणीयः -या -यं, नैत्यिकः -की -कं; 'indispensable act,' अवश्यकर्त्तव्यं, नित्यकृत्यं, नित्यकर्म्म *n.* (न्).

INDISPENSABLENESS, *s.* अवश्यकत्वं, आवश्यकता, अवश्यकर्त्तव्यता, अत्याज्यत्वं, अपरिहार्य्यता.

INDISPENSABLY, *adv.* अवश्यं, अवशं, विवशं, अत्यवश्यं, अपरिहरणीयं.

To INDISPOSE, *v. a.* वैरक्त्यं or अनिच्छां or अरुचिं जन् (c. 10. जनयति -यितुं) or उत्पद् (c. 10. -पादयति -यितुं), पराङ्मुखं -खां -खं कृ, विरञ्ज् (c. 10. -रञ्जयति -यितुं), विमुखीकृ, न प्रवृत् (c. 10. -वर्त्तयति -यितुं), प्रतिकूलं -लां -लं कृ, अननुकूलं -लां -लं कृ.—(Make unfit) अयोग्यं -ग्यां -ग्यं कृ, अनुपयुक्तं -क्तां -क्तं कृ.—(Disorder the health) अस्वस्थीकृ.

INDISPOSED, *p. p.* (Disinclined) पराङ्मुखः -खी -खं, विमुखः -खी -खं, विरक्तः -क्ता -क्तं, विरक्तभावः -वा -वं, विपरीतः -ता -तं, अनिच्छुः -च्छुः -च्छु, विमतः -ता -तं, अनभिलाषी -षिणी -षि (न्), प्रतिकूलः -ला -लं, अननुकूलः -ला -लं, अप्रवृत्तः -त्ता -त्तं.—(In health) अस्वस्थः -स्था -स्थं, अस्वस्थशरीरः -रा -रं, असुस्थः -स्था -स्थं, असुस्थशरीरः -रा -रं, अस्वास्थ्यः -स्थ्या -स्थ्यं, ईषद्रोगी -गिणी -गि (न्), ईषद्रोगार्त्तः -र्त्ता -र्त्तं.

INDISPOSITION, *s.* (Disinclination) विरक्तिः *f.*, विरागः, वैरक्त्यं, विमुखता, वैमुख्यं, पराङ्मुखता, अनिच्छा, अरुचिः *f.*, विमतिः *f.*, अनीहा, निरीहता, अस्पृहा, अप्रीतिः *f.*, प्रतिकूलता, विपरीतता, अप्रवृत्तिः *f.*—(Slight disorder of the health) अस्वास्थ्यं, अस्वस्थता, असुस्थता, शरीरास्वास्थ्यं, ईषद्रोगः, अल्परोगः, रोगः, ईषत्पीडा.

INDISPUTABLE, *a.* अविवदनीयः -या -यं, निर्विवादः -दा -दं, अविचारणीयः -या -यं, अविचार्य्यः -र्य्या -र्य्यं, अवितर्क्यः -र्क्या -र्क्यं, अवितर्कणीयः -या -यं, अप्रत्याख्येयः -या -यं, अबाध्यः -ध्या -ध्यं, अखण्डनीयः -या -यं, अनाशङ्कनीयः -या -यं, असन्दिग्धः -ग्धा -ग्धं, अविसंवादी -दिनी -दि (न्), सुनिश्चितः -ता -तं.

INDISPUTABLY, *adv.* निर्विवादं, अविवदनीयं, असंशयं, सुनिश्चितं.

INDISSOLUBILITY, *s.* (State of being not to be broken) अभेद्यता, दुर्भेद्यता, अलंघ्यता.—(State of being not to be melted) अद्राव्यता, अद्रवणीयत्वं, अगलनीयता, अक्षरणीयत्वं.

INDISSOLUBLE, *a.* (Not to be broken or violated) अभेद्यः -द्या -द्यं, दुर्भेद्यः -द्या -द्यं, अखण्डनीयः -या -यं, अलंघ्यः -घ्या -घ्यं, अनतिक्रमणीयः -या -यं.—(Not to be melted) अद्राव्यः -व्या -व्यं, अविद्राव्यः -व्या -व्यं, अविलयनीयः -या -यं, अविलयनशीलः -ला -लं, अगलनीयः -या -यं, अक्षरणीयः -या -यं, अपाय्यः -य्या -य्यं, अद्रवणीयः -या -यं.—(Very firm) सुदृढः -ढा -ढं, वज्रप्रायः -या -यं.

INDISSOLUBLY, *adv.* अभेद्यप्रकारेण, अलंघनीयं, सुदृढं, अतिदृढं, दृढबन्धनपूर्व्वं, यथा भेत्तुं न शक्यते तथाप्रकारेण.

INDISTINCT, *a.* अव्यक्तः -क्ता -क्तं, अनभिव्यक्तः -क्ता -क्तं, अस्पष्टः -ष्टा -ष्टं, अविस्पष्टः -ष्टा -ष्टं, अस्फुटः -टा -टं, अपरिस्फुटः -टा -टं, अप्रत्यक्षः -क्षा -क्षं, अप्रकाशः -शा -शं, अव्यञ्जनः -ना -नं, अभिन्नः -न्ना -न्नं.—(As speech) अस्पष्टः -ष्टा -ष्टं, अविस्पष्टः -ष्टा -ष्टं, क्लिष्टः -ष्टा -ष्टं, मदकलः -ला -लं ; 'indistinct speech,' अविस्पष्टं, क्लिष्टं, म्लेच्छः.—(Confused) सङ्कीर्णः -र्णा -र्णं, व्यस्तः -स्ता -स्तं, सङ्कुलः -ला -लं.—(Imperfect) विकलः -ला -लं.

INDISTINCTION, *s.* अभेदः, अविभेदः, अभिन्नता, अविच्छेदः, अपृथक्त्वं, अपरिच्छेदः, व्यस्तता, सङ्कीर्णता.

INDISTINCTLY, *adv.* अव्यक्तं, अस्पष्टं, अस्पष्टार्थं, अस्फुटं, अपरिस्फुटं, अप्रत्यक्षं -क्षतस् -क्षेण, अस्पष्टत्वेन, अव्यक्तत्वेन.

INDISTINCTNESS, *s.* अव्यक्तता -त्वं, अव्यक्तिः *f.*, अनभिव्यक्तिः *f.*, अस्पष्टता -त्वं, अस्फुटता, अपरिस्फुटता, अभिन्नता, अप्रत्यक्षता -त्वं, अप्रकाशत्वं.—(Confusion) व्यस्तता, सङ्कीर्णता.

INDISTINGUISHABLE, *a.* अव्यक्तः -क्ता -क्तं, अविज्ञेयः -या -यं, अविभावनीयः -या -यं, अविभाव्यः -व्या -व्यं, अदृश्यः -श्या -श्यं, अपरिच्छेदनीयः -या -यं, परिच्छेत्तुम् अशक्यः -क्या -क्यं, अदृष्टिगोचरः -रा -रं, अप्रत्यक्षः -क्षा -क्षं, अलक्ष्यः -क्ष्या -क्ष्यं, अलोकनीयः -या -यं.

To INDITE, *v. a.* लिख् (c. 6. लिखति, लेखितुं), अभिलिख्, लेखनं कृ, अभिलेखनं कृ.

INDITED, *p. p.* लिखितः -ता -तं, अभिलिखितः -ता -तं, रचितः -ता -तं.

INDIVIDUAL, *a.* अव्यापी -पिनी -पि (न्), अव्यापकः -का -कं, अव्याप्तः -प्ता -प्तं, अविभक्तः -क्ता -क्तं, व्यक्तः -क्ता -क्तं, एकः -का -कं.

INDIVIDUAL, *s.* (A single person) व्यक्तिः, एकजनः, जनः, लोकः.

INDIVIDUALITY, *s.* व्यक्तिता, व्यक्तिः *f.*, व्यक्तता -त्वं, अव्याप्तिः *f.*, अव्याप्तत्वं, अव्यापकत्वं, अविभक्तिः *f.*, अविभक्तता, पृथक्त्वं, पार्थक्यं, पृथगात्मिका, ममता, एकता, ऐक्यं.

INDIVIDUALLY, *adv.* पृथक्, पृथक् पृथक्, प्रत्येकं, एकैकं, एकतस्, एकैकशस्.

To INDIVIDUATE, *v. a.* पृथक्कृ, पृथक् पृथग् विभिद् (c. 7. -भिनत्ति -भेत्तुं).

INDIVISIBILITY, *s.* अच्छेद्यता, अविच्छेद्यत्वं, अभेद्यता, अविभाज्यता, अनंश्यता, असावयवत्वं, अवयवहीनता, निरवयवत्वं, छेत्तुम् अशक्यता.

INDIVISIBLE, *a.* अच्छेद्यः -द्या -द्यं, अविच्छेद्यः -द्या -द्यं, अविच्छेदनीयः -या -यं, अभेद्यः -द्या -द्यं, अविभाज्यः -ज्या -ज्यं, अनंश्यः -श्या -श्यं, अनंशनीयः -या -यं, अपृथक्करणीयः -या -यं, छेत्तुम् अशक्यः -क्या -क्यं, परिच्छेत्तुम् अयोग्यः -ग्या -ग्यं, निरवयवः -वा -वं.

INDIVISIBLY, *adv.* अच्छेदनीयं, अविच्छेद्यं, यथा छेत्तुं न शक्यते तथाप्रकारेण.

INDOCILE, *a.* अविनेयः -या -यं, अवश्यः -श्या -श्यं, अशिक्ष्यः -क्ष्या -क्ष्यं, अशिक्षणीयः -या -यं, अप्रणेयः -या -यं, अविधेयः -या -यं, अवशगः -गा -गं, अशिक्षणीयः -या -यं, अनायत्तः -त्ता -त्तं, अनधीनः -ना -नं, दुःशास्यः -स्या -स्यं, दुःशासनः -ना -नं, दुर्निग्रहः -हा -हं, दुर्दमः -मा -मं, दुर्दान्तः -न्ता -न्तं, प्रतीपः -पा -पं, स्वच्छन्दः -न्दा -न्दं, स्वैरी -रिणी -रि (न्), स्वैरचारी -रिणी -रि (न्), स्वेच्छाचारी &c., अगृह्यकः -का -कं.

INDOCILITY, *s.* अविनेयता, अविधेयता, अवश्यत्वं, अनायत्तत्वं, अनधीनता, प्रतीपता, दुर्दान्तता, अशिक्ष्यता, अशिक्षणीयत्वं, स्वैरिता, स्वाच्छन्द्यं.

To INDOCTRINATE, *v. a.* उपदिश् (c. 6. -दिशति -देष्टुं), शिक्ष् (c. 10. शिक्षयति -यितुं), ज्ञा in caus. (ज्ञापयति -यितुं), शास् (c. 2. शास्ति, शासितुं), अनुशास्.

INDOCTRINATED, *p. p.* शिक्षितः -ता -तं, उपदिष्टः -ष्टा -ष्टं, अध्यापितः -ता -तं.

INDOCTRINATION, *s.* उपदेशः -शनं, शिक्षा, शासनं, अनुशासनं, प्रतिबोधः.

INDOLENCE, *s.* आलस्यं, अलसता -त्वं, आलस्यशीलता, तन्द्रा -न्द्रिः *f.* -द्री, तन्द्रिका, तन्द्रालुता, मन्दता, मान्द्यं, जडता, जाड्यं, अनुद्योगः, अनुत्साहः, अव्यवसायः, अप्रवृत्तिः *f.*, कार्य्यविमुखता, कार्य्यप्रद्वेषः, अनुत्सुकता, कुण्ठता, मिद्धं.

INDOLENT, *a.* अलसः -सा -सं, आलस्यः -स्या -स्यं, आलस्यशीलः -ला -लं, तन्द्रालुः -लुः -लु, मन्दः -न्दा -न्दं, क्रियासु मन्दः -न्दा -न्दं, अनुद्योगी -गिनी -गि (न्), निरुद्योगः -गा -गं -गी -गिनी -गि (न्), निरुत्साहः -हा -हं, निरुद्यमः -मा -मं, अप्रयत्नः -त्ना -त्नं, प्रयत्नशून्यः -न्या -न्यं, लघुप्रयत्नः -त्ना -त्नं, अव्यवसायी -यिनी -यि (न्), जडः -डा -डं, कुण्ठः -ण्ठा -ण्ठं, कार्य्यद्वेषी -षिणी -षि (न्), कार्य्यविमुखः -खा -खं, उदासीनः -ना -नं, निश्चेष्टः -ष्टा -ष्टं; 'indolent tumour,' अर्बुदः -दं, मे

INDOLENTLY, *adv.* अलसवत्, अलसं, आलस्येन, मन्दं, अनुद्योगेन

INDOMITABLE, *a.* अदमनीयः -या -यं, अदम्यः -म्या -म्यं, दुर्दम्यः -म्या -म्यं, दुर्दमः -मा -मं, दुर्दान्तः -न्ता -न्तं, अशृण्यः -ण्या -ण्यं, अदीनचेताः -ताः -तः (स्).

To INDORSE, *v. a.* (Write on the back of a paper or bill) पत्रपृष्ठे or पत्रविपरीतभागे लिख् (c. 6. लिखति, लेखितुं), हुण्डिकापत्रदृढीकरणार्थं विपरीतभागे स्वनामाक्षराणि लिख्, लेख्यपत्रसत्याकरणार्थं पृष्ठभागे स्वाक्षरं लिख्.—(Corroborate, sanction) दृढीकृ, सत्याकृ, सत्यं कृ, प्रमाणीकृ, प्रमाणं दा, सप्रमाणं -णां -णं कृ.

INDORSED, *p. p.* पृष्ठभागे or विपरीतभागे लिखितः -ता -तं, सत्याकृतः -ता -तं, सत्यीकृतः -ता -तं, प्रमाणीकृतः -ता -तं, सप्रमाणः -णा -णं.

INDORSEMENT, *s.* पत्रदृढीकरणार्थं विपरीतभागे स्वनामाक्षरलिखनं, लेख्यपत्रप्रमाणीकरणार्थं पृष्ठभागे स्वाक्षरलिखनं.

INDRA, *s.* (The Hindu Jove or Jupiter Tonans, chief of the secondary deities. He presides over Swarga or Paradise, and is more particularly the god of the atmosphere and winds. He is also regent of the east quarter of the sky) इन्द्रः, महेन्द्रः, शक्रः, मघवा *m.* (न्), मघवान् *m.* (त्), ऋभुक्षी *m.* (न्), ऋभुक्षः, तुराषाट् *m.* (-षाह्), सङ्क्रन्दनः, देवः, वैकुण्ठः.—(As chief of the deities, he is called) देवपतिः *m.*, देवदेवः, देवराजः, देवताधिपः, सुरपतिः *m.*, सुराधिपः, सुरराजः, सुरेन्द्रः, अमरेशः -रेश्वरः, सुरप्रियः, सुरग्रामणीः, अमरभर्त्ता *m.* (र्तृ), अमराधिपतिः *m.*—(As lord of the atmosphere) दिवस्पतिः *m.*, वृषा *m.* (न्), आकाशेशः.—(As lord of the winds) मरुत्वान् *m.* (त्), मरुत्पालः, मरुतां भर्त्ता *m.* (र्तृ), मरुत्सखः.—(As lord of the eight Vasus or demigods Wind, Fire, &c.) वासवः.—(As the Thunderer) वज्री *m.* (न्), वज्रधरः, वज्रपाणिः *m.*, कुलिशभृत् *m.*—(As splitting mountains with his thunderbolt, or as clipping their wings) गोत्रभिद् *m.*, अद्रिभिद् *m.*, नगभिद् *m.*, गिरिभिद् *m.*, गिरिच्छिद् *m.*, पर्व्वतारिः *m.*—(As breaking cities, &c., into fragments) पुरन्दरः, पुरन्दः, आखण्डलः, विडोजाः *m.* (स्), विडौजाः.—(As ruling or destroying demons) पाकशासनः, वृत्रहा *m.* (न्), बलारातिः *m.*, बलभिद्, जम्भद्वेषी *m.* (न्), जम्भभिद् *m.* (ष्), नमुचिच्छिद् *m.*, नमुचिसूदनः, पुरुदंशाः *m.* (स्).—

(As lord of paradise) स्वर्गपतिः *m.*, स्वर्गभर्त्ता *m.* (र्तृ), स्वाराट् *m.* (ज्), स्वर्गराजः, इन्द्रलोकेशः, नाकनाथः, नाकनायकः, नाकपेधकः.—(As borne on the clouds, cloud-compeller) मेघवाहनः, घनवाहनः, घनाघनः, जीमूतवाहनः, पर्जन्यः.—(As lord of a hundred sacrifices; the performance of a hundred aswamedhas elevating the sacrificer to the rank of Indra) शतक्रतुः *m.*, शतमखः, शतमन्युः *m.*—(As having a thousand eyes, in consequence of the curse of Gautama, who covered him over with a thousand disgraceful marks, and afterwards changed them to eyes) सहस्राक्षः, सहस्रनयनः, सहस्रदृक् *m.* (श्), सहस्रनेत्रः.—(As husband of Sachí) शचीपतिः *m.*—(As destroyer of his own father-in-law Puloma, to prevent his curse for the violation of his daughter) पुलोमभिद् *m.*, पुलोमच्छिद् *m.* (द्) पुलोमजित् *m.*, पुलोमारिः *m.*—(As the victorious leader of the celestial armies) जिष्णुः *m.*, सुनासीरः.—(As the good preserver) सुत्रामा *m.* (न्), सुत्रामा.—(As the best of deities) लेखर्षभः.—(As much invoked) पुरुहूतः.—(As having green horses) हरिहयः.—(As borne on a white horse) श्वेतवाः *m.* (ह्), श्वेतवाहः.—(As presiding over the site of a house) वास्तोष्पतिः *m.*—(As suffering from the curse of the saint Chyavana) दुश्च्यवनः.—(As listening to the old) वृद्धश्रवाः *m.* (स्).—(His wife is called) शची -चिः, इन्द्राणी, शक्राणी, मघोनी, इन्द्रशक्तिः *f.*, पुलोमजा, पौलोमी.—(His son) जयन्तः, पाकशासनिः *m.*, ऐन्द्रिः *m.*—(His daughter) देवसेना.—(His paradise) स्वर्गः, इन्द्रलोकः, सुरलोकः, सुरसद्म *m.* (न्), सुरेन्द्रलोकः, अमर्त्यभुवनं, नाकः, ऋभुक्षः.—(His pleasure garden or elysium) नन्दनं, नन्दनवनं.—(His city) अमरावती, देवपुः *f.* (र्).—(His palace) वैजयन्तः.—(His car) विमानः, व्योमयानं, सहस्रहर्य्यश्वः.—(His horse) उच्चैःश्रवाः *m.* (स्), देवाश्वः, श्वेतहयः.—(His charioteer) मातलिः, मातुलिः, शक्रसारथिः *m.*—(One of his doorkeepers) देवनन्दी *m.* (न्).—(His thunderbolt) वज्रः -ज्रं, कुलिशं, अशनिः *m. f.*, वज्राशनिः *m.*, भिदुरं, ह्रादिनी, पविः *m.*, शतकोटिः *m.*, शम्बः, शम्भः, दम्भोलिः *m.*, स्वरुः *m.*, इन्द्रप्रहरणं, अभ्रोत्थं.—(His elephant) ऐरावतः, ऐरावणः, अभ्रमातङ्गः, अभ्रमुप्रियः, अभ्रमुवल्लभः, श्वेतहस्ती *m.* (न्), इन्द्रकुञ्जरः.—(His bent bow, visible to mortals as the rainbow) शक्रधनुस्, इन्द्रायुधं, शक्रशरासनं.—(His unbent bow, invisible to mortals) रोहितं.—(His musicians) गन्धर्व्वाः *m. pl.*; 'their chief,' चित्ररथः.

INDUBITABLE, *a.* असंशयः -या -यं, निःसंशयः -या -यं, असन्दिग्धः -ग्धा -ग्धं, निःसन्देहः -हा -हं, सुनिश्चितः -ता -तं, अशङ्कितः -ता -तं, अनाशङ्कनीयः -या -यं.

INDUBITABLY, *adv.* असंशयं, असन्दिग्धं, सुनिश्चितं, अत्र न संशयः.

To INDUCE, *v. a.* अनुनी (c. 1. -नयति -नेतुं), आनी, नी.—(Incite to any action by argument, &c.) सुहेतुवादेन or आदृत्या कस्मिंश्चित् कर्म्मणि प्रवृत् (c. 10. -वर्त्तयति -यितुं) or नियुज् (c. 10. -योजयति -यितुं) or प्रयुज्, प्रोत्सह् (c. 10. -साहयति -यितुं), उत्सह्, समुत्सह्, आकृष् (c. 1. -कर्षति -क्रष्टुं), प्रलुभ् (c. 10. -लोभयति -यितुं). Sometimes the sense of 'induce' may be expressed by the causal form; as, 'to induce to return,' निवृत् in caus. (-वर्त्तयति -यितुं); 'he induces her to go home,' तां गृहं गमयति.—(Bring on, produce) आवह् (c. 1. -वहति -वोढुं), उत्पद् (c. 10. -पादयति -यितुं), जन् (c. 10. जनयति -यितुं).

Induced, *p.p.* अनुनीतः -ता -तं, प्रवर्त्तितः -ता -तं, प्रवृत्तः -त्ता -त्तं, प्रोत्साहितः -ता -तं, आकृष्टः -ष्टा -ष्टं, आकर्षितः -ता -तं.—(Brought on) उत्पादितः -ता -तं.

Inducement, *s.* प्रोत्साहः -हनं, प्रलोभनं, प्रवर्त्तः -र्त्तनं, प्रवर्त्तकं, प्ररोचनं, उत्तेजनं, प्रेरणं -णा, अभ्युपायनं.—(Motive) हेतुः *m.*, प्रयोजनं -जकं, प्रयोगः, कारणं, निमित्तं -त्तकं, निदानं, निबन्धनं, करणं.

To **induct**, *v. a.* नियमानुसारेण नवाधिकारं प्रविश् (c. 10. -वेशयति -यितुं), दीक्षाकर्म्मपूर्व्वं नवाधिकारे नियुज् (c. 10. -योजयति -यितुं).

Inducted, *p. p.* नियमानुसारेण or दीक्षाकर्म्मपूर्व्वं नवपदप्रवेशितः -ता -तं.

Induction, *s.* (A kind of argument) अनुमानं, अनुमा, अनुमितिः *f.*, ऊहनं, अभ्यूहः, अपवाहः, व्याप्तिः *f.*, सिद्धान्तः, अर्थापत्तिः *f.*, परामर्शः, कल्पनं -ना, उपलक्षः, अनुभवः, अवगमः.—(Reasoning from particulars to generals) विशेषपरीक्षापूर्व्वं साधारणानुमानं or साधारणनिश्चयः.—(Introduction into a new office) नियमानुसारेण or दीक्षाकर्म्मपूर्व्वं नवाधिकारप्रवेशनं or नवपदप्रवेशकरणं.

Inductive, *a.* आनुमानिकः -की -कं, व्यापकः -का -कं; 'reasoning,' अनुमानोक्तिः *f.*

To **indue**, *v. a.* *See* Endue.

To **indulge**, *v. a.* (Gratify, yield to humour) अनुवृत् (c. 1. -वर्त्तते -र्त्तितुं), अनुरुध् (c. 4. -रुध्यते -रोद्धुं), अनुकूल (nom. अनुकूलयति -यितुं) लल् (c. 10. लालयति -यितुं), अनुविधा in pass. (-धीयते), अनुकूलीभू.—(Favour) अनुग्रह् (c. 9. -गृह्णाति -ग्रहीतुं), अनुकूल.—(Permit) अनुज्ञा (c. 9. -जानाति -ज्ञातुं), अनुमन् (c. 4. -मन्यते -मन्तुं), अनुमुद् (c. 1. -मोदते -दितुं), क्षम् (c. 1. क्षमते, क्षन्तुं), क्षान्तिं कृ.—(Permit to be, not to oppose) न विरुध् (c. 7. -रुणद्धि -रोद्धुं), न प्रतिरुध्, न प्रतिकूल (nom. प्रतिकूलयति -यितुं), न प्रतिकृ, न यम् (c. 1. यच्छति यन्तुं), न निग्रह्, न निषिध् (c. 1. -षेधति -षेद्धुं), उपेक्ष् (c. 1. -ईक्षते -क्षितुं); 'indulge one's humour,' छन्दो ऽनुवृत्; 'one's passions, इन्द्रियाणि न संयम् or न निग्रह्.

INSTEP, *s.* पिच्चिण्डिका, पिच्चण्डिका, पिण्डिका, पिण्डिः *f.*, पिण्डी, पादपिण्डः, पादोपरिभागः, पादाग्रं.

To INSTIGATE, *v. a.* प्रोत्सह् (c. 10. -साहयति -यितुं), उत्सह्, समुत्सह्, नियुज् (c. 10. -योजयति -यितुं), प्रयुज्, उद्युज्, प्रेर् (c. 10. प्रेरयति -यितुं, rt. ईर्), चुद् (c. 10. चोदयति -यितुं), प्रचुद्, सञ्चुद्, प्रवृत् (c. 10. -वर्त्तयति -यितुं), चेष्ट् (c. 10. चेष्टयति -यितुं), प्रणुद् (c. 6. -णुदति -णोत्तुं), प्ररुच् (c. 10. -रोचयति -यितुं), उत्तिज् (c. 10. -तेजयति -यितुं), उत्था in caus. (-थापयति -यितुं, rt. स्था), उद्दीप् (c. 10. -दीपयति -यितुं). The loc. or dat. c. is required of the thing to which one is instigated. *See* INCITE.

INSTIGATED, *p. p.* प्रोत्साहितः -ता -तं, नियोजितः -ता -तं, प्रयोजितः -ता -तं, प्रयुक्तः -क्ता -क्तं, उद्युक्तः -क्ता -क्तं, प्रेरितः -ता -तं, चोदितः -ता -तं, प्रचोदितः -ता -तं, प्रवर्त्तितः -ता -तं, प्रवृत्तः -त्ता -त्तं, प्रणोदितः -ता -तं, उत्तेजितः -ता -तं, प्ररुचितः -ता -तं, उत्थापितः -ता -तं.

INSTIGATION, *s.* प्रोत्साहः -हनं, प्रेरणं -णा, नियोजनं, प्रवर्त्तनं, प्रचोदनं, उत्तेजनं, समुत्तेजनं, प्रणोदः -दनं, प्ररोचनं, सञ्चारणं, नियोगः, प्रयोजनं, प्रयोजककर्तृत्वं.

INSTIGATOR, *s.* प्रोत्साहकः, प्रेरकः, नियोजकः, प्रयोजकः, प्रवर्त्तकः, सञ्चारकः, प्रचोदकः, उत्तेजकः, प्रणोदकः, उत्साहहेतुकः, प्रयोजककर्त्ता *m.* (र्त्तृ), प्रवर्त्तनकारी *m.* (न्); 'to an evil act,' कुप्रवर्त्तकः.

To INSTIL, *v. a.* (Infuse by drops) लवशः or कणशो निषिच् (c. 6. -षिञ्चति -षेक्तुं) or आसिच् or निक्षिप् (c. 6. -क्षिपति -क्षेप्तुं) or प्रक्षिप्—(Infuse gradually into the mind) अल्पशः or अल्पाल्पं or शनैः शनैर् उपदिश् (c. 6. -दिशति -देष्टुं or चित्ते निविश् (c. 10. -वेशयति -यितुं) or प्रविश् with acc. c.

INSTILLATION, *s.* लवशो निषेकः or निक्षेपणं or प्रक्षेपणं, शनैर् उपदेशनं.

INSTILLED, *p. p.* लवशः or शनैः शनैः or क्रमे क्रमे निषिक्तः -क्ता -क्तं or निक्षिप्तः -प्ता -प्तं or निवेशितः -ता -तं or प्रवेशितः -ता -तं, क्रमेणोपदिष्टः -ष्टा -ष्टं.

INSTINCT, *s.* (Natural knowledge) सहजज्ञानं, सहजबुद्धिः *f.*, उपज्ञा, स्वाभाविकबुद्धिः *f.*, स्वाभाविकज्ञानं, प्राकृतिकबुद्धिः *f.*, अन्तर्बुद्धिः *f.*, नैसर्गिकबुद्धिः *f.*, पशुबुद्धिः *f.*

INSTINCT, *a.* (Excited, animated) उत्तेजितः -ता -तं, उद्दीप्तः -प्ता -प्तं, दीप्तः -प्ता -प्तं, दीपितः -ता -तं, उद्दीपितः -ता -तं, तेजितः -ता -तं, जीवितः -ता -तं, सजीवीकृतः -ता -तं.

INSTINCTIVE, *a.* (Prompted by instinct, spontaneous) सहजः -जा -जं, सहजज्ञानप्रयुक्तः -क्ता -क्तं, सहजज्ञानसिद्धः -द्धा -द्धं, स्वाभाविकः -की -कं, साहजिकः -की -कं, प्राकृतिकः -की -कं, उपज्ञासूचितः -ता -तं, स्वाभाविकबुद्धिसूचितः -ता -तं, प्रकृतिसिद्धः -द्धा -द्धं, नैसर्गिकः -की -कं, स्वभावप्रेरितः -ता -तं, सांसिद्धिकः -की -कं.

INSTINCTIVELY, *adv.* स्वभावतस्, स्वभावेन, सहजज्ञानात्, स्वाभाविकज्ञानात्, प्राकृतिकज्ञानात्, निसर्गतस्, स्वतस्, स्वयं.

To INSTITUTE, *v. a.* (Establish, ordain, enact) स्था in caus. (स्थापयति -यितुं), प्रतिष्ठा, संस्था, अवस्था, व्यवस्था, विधा (c. 3. -दधाति -धातुं), प्रतिनिधा, क्लृप् (c. 10. कल्पयति -यितुं), प्रक्लृप्, परिक्लृप्, आदिश् (c. 6. -दिशति -देष्टुं), सन्दिश्, निर्दिश्, प्रचुद् (c. 10. -चोदयति -यितुं), प्रतिपद् (c. 10. -पादयति -यितुं), नियुज् (c. 7. -युंक्ते -योक्तुं); 'is instituted,' कल्प्यते, प्रकल्प्यते.—(Instruct) उपदिश्, निर्दिश्.—(Begin, set on foot) प्रवृत् (c. 10. -वर्त्तयति -यितुं), आरभ् (c. 1. -रभते -रब्धुं).

INSTITUTE, *s.* (Established law, ordinance, precept) व्यवस्था, विधिः *m.*, विधानं, नियमः, शास्त्रविधानं, कल्पः, सूत्रं, निदर्शनं, शास्त्रनिदर्शनं, शास्त्रमर्य्यादा, नियोगः, चोदना, चरितं -त्रं.—(Institutes of religion or law) शास्त्रं, धर्म्मशास्त्रं.—(Compendium of institutes) धर्म्मसंहिता, संहिता.

INSTITUTED, *p. p.* प्रकल्पितः -ता -तं, कल्पितः -ता -तं, विहितः -ता -तं, स्थापितः -ता -तं, प्रतिष्ठापितः -ता -तं, संस्थापितः -ता -तं, प्रचोदितः -ता -तं, निर्दिष्टः -ष्टा -ष्टं, प्रवर्त्तितः -ता -तं.

INSTITUTION, *s.* (Act of establishing) कल्पनं, प्रकल्पनं, स्थापनं, प्रतिष्ठापनं, संस्थापनं, व्यवस्थापनं, अवस्थापनं, विधानं, नियोजनं.—(Law enjoined by authority) विधिः *m.*, विधानं, व्यवस्था, नियमः, कल्पः, निदर्शनं, नियोगः, सूत्रं.—(Organised society) मठः, सभा, श्रेणी -णिः *m. f.*, संसर्गः; 'literary institution,' विद्यालयः, विद्यावेश्म *n.* (न्), विद्याशाला; 'religious institution,' धर्म्मशाला.—(System) स्थितिः *f.*, संस्थितिः *f.*, संस्थानं, मार्गः, रीतिः *f.*

INSTITUTIONAL, *a.* वैधिकः -की -कं, नैयमिकः -की -कं, शास्त्रीयः -या -यं.

INSTITUTOR, *s.* स्थापकः, संस्थापकः, प्रतिष्ठापकः, व्यवस्थापकः, प्रयोजकः,

प्रयत्नकः, विधायकः, विधायी *m.* (न्), विधाता *m.* (तृ), आरम्भकः, स्थापनकारी *m.* (न्).

To INSTRUCT, *v. a.* (Teach) उपदिश् (c. 6. -दिशति -देष्टुं), शिक्ष् (c. 10. शिक्षयति -यितुं), अनुशिक्ष्, अभिशिक्ष्, अधी in caus. (अध्यापयति -यितुं rt. इ), शास् (c. 2. शास्ति, शासितुं), अनुशास्, पठ् (c. 10. पाठयति -यितुं), निदृश् (c. 10. -दर्शयति -यितुं), उपदेशं कृ, विद्यां दा.—(Educate) विनी (c. 1. -नयति -नेतुं), अनुनी.—(Inform) ज्ञा in caus. (ज्ञापयति, ज्ञपयति -यितुं), विज्ञा, निविद् (c. 10. -वेदयति -यितुं), बुध् (c. 10. बोधयति -यितुं), सूच् (c. 10. सूचयति -यितुं), अनुसूच्.—(Direct, enjoin) आदिश्, निर्दिश्, समादिश्, प्रदिश्, सन्दिश्, आज्ञा in caus., समाज्ञा, नियुज् (c. 7. -युनक्ति -योक्तुं, c. 10. -योजयति -यितुं), चुद् (c. 10. चोदयति -यितुं), प्रचुद्, सञ्चुद्.

INSTRUCTED, *p. p.* (Taught) उपदिष्टः -ष्टा -ष्टं, शिक्षितः -ता -तं, अध्यापितः -ता -तं, शासितः -ता -तं, अनुशासितः -ता -तं, शिष्टः -ष्टा -ष्टं, अनुशिष्टः -ष्टा -ष्टं, लब्धविद्यः -द्या -द्यं, प्राप्तविद्यः -द्या -द्यं, गृहीतविद्यः -द्या -द्यं, पाठितः -ता -तं.—(Informed) ज्ञापितः -ता -तं, विज्ञापितः -ता -तं, विज्ञप्तः -प्ता -प्तं, बोधितः -ता -तं.—(Directed) आदिष्टः -ष्टा -ष्टं, निर्दिष्टः -ष्टा -ष्टं, प्रचोदितः -ता -तं, आज्ञप्तः -प्ता -प्तं.

INSTRUCTION, *s.* (Teaching) उपदेशः -शनं, शिक्षा -क्षणं, अध्यापनं, शासनं, अनुशासनं, पाठः -ठनं, विद्यादानं, बोधनं, प्रतिबोधः.—(Direction, order) आज्ञा, आदेशः, निदेशः, निर्देशः, शासनं, शास्तिः *f.*, चोदनं -ना, नियोगः.—(Precept) विधिः *m.*, विधानं, नियमः, सूत्रं, कल्पः, निदर्शनं.

INSTRUCTIVE, *a.* उपदेशकः -का -कं, उपदेशी -शिनी -शि (न्), उपदेशकरः -रा -रं, उपदेशावहः -हा -हं, उपदेशप्रदः -दा -दं, बोधकः -का -कं, निदर्शी -शिनी -शि (न्), शिक्षाकरः -रा -रं, ज्ञानोत्पादकः -का -कं, उपदेश in comp.

INSTRUCTOR, *s.* उपदेशकः, उपदेशी *m.* (न्), उपदेष्टा *m.* (ष्टृ), अध्यापकः, शिक्षकः, शिक्षाकरः, उपाध्यायः, गुरुः *m.*, शिक्षागुरुः *m.*, आचार्य्यः, उपदेशकृत् *m.* -कारी *m.* (न्), शिक्षादाता *m.* (तृ), विद्यादाता *m.*, ज्ञापकः.

INSTRUCTRESS, *s.* उपदेशिका, उपदेष्ट्री, उपदेशिनी, अध्यापिका, आचार्य्या, शिक्षिका, उपदेशकर्त्री, शिक्षाकर्त्री, शिक्षादात्री.

INSTRUMENT, *s.* (Tool, implement) यन्त्रं, उपकरणं, साधनं, कर्म्मसाधनं, कार्य्यसाधनं, सामग्र्यं -ग्री, द्रव्यं, उपस्करः, विलालः; 'astronomical instrument,' ज्योतिषयन्त्रं.—(Means, instrumental cause) कारणं, करणं, हेतुः *m.*, निमित्तं -त्तकं, निमित्तकारणं, प्रयोजनं.—(Agent, doer) कारकः, कर्त्ता *m.* (र्त्तृ), साधकः, प्रयोजकः, प्रयोज्यः, कार्य्यसाधकः, हेतुकः, कारकहेतुः *m.*—(Musical instrument) वादित्रं, वाद्यं, तूर्य्यं, आतोद्यं, तालितं; 'a wind instrument,' शुषिरं, शुषिरवाद्यं, शङ्खः -ङ्खं; 'stringed instrument,' ततं, तन्तुवाद्यं; 'instrument for martial music,' रणवाद्यं; 'sounded by the mouth,' मुखवाद्यं; 'covered with skin,' चर्म्मवाद्यं. *See* DRUM. (Deed, writing) साधनपत्रं, लेखः, लेखपत्रं, पत्रं, पत्रकं, लेख्यं, लेख्यप्रसङ्गः, करणं.

INSTRUMENTAL, *a.* (Serving to effect some end) कारणिकः -की -कं, हैतुकः -का -कं, हेतुकः -की -कं, कारकः -रिका -कं, साधकः -धिका -कं, साधिकः -का -कं, कार्य्यसाधक &c., कारणभूतः -ता -तं, साधनभूतः -ता -तं, साधनीभूतः -ता -तं, कारणीभूतः -ता -तं, प्रसाधकः -का -कं, प्रयोजकः -का -कं, उपकारी -रिणी -रि (न्), कारी &c., कारकवान् -वती -वत् (त्), सम्पादकः -का -कं.—(Not vocal) वाद्यजः -जा -जं, वाद्यजनितः -ता -तं, वाद्यसिद्धः -द्धा -द्धं, वाद्यसम्बन्धी -न्धिनी -न्धि (न्), वाद्योत्पन्नः -न्ना -न्नं.—(Instrumental case in grammar) करणं, तृतीया विभक्तिः.

INSTRUMENTALITY, *s.* कारणत्वं -ता, कारकत्वं, हेतुता -त्वं, निमित्तत्वं, साधकत्वं, साधनत्वं, कर्तृत्वं, कर्तृकत्व, करणत्वं, प्रयोजकत्वं.

INSTRUMENTALLY, *adv.* कारणतस्, हेतुतस्, कारणत्वेन, निमित्ततस्, करणतस्.

INSUAVITY, *s.* असृदुता, असौम्यता, अस्निग्धता, कर्कशत्वं, परुषता, चण्डता.

INSUBJECTION, *s.* अनधीनता, अनायत्तता, अवशता, अविधेयता, अवश्यत्वं.

INSUBORDINATE, *a.* अवशः -शा -शं, अविनीतः -ता -तं, अविधेयः -या -यं.

INSUBORDINATION, *s.* अविनयः, अविनीतता, अविधेयता, आज्ञाभङ्गः, आज्ञाव्यतिक्रमः, शासनभङ्गः, अवशत्वं, स्वाम्यनधीनता, दुःशीलता.

INSUBSTANTIAL, *a.* अवास्तवः -वी -वं -विकः -की -कं, निःसारः -रा -रं, असारः -रा -रं, सारहीनः -ना -नं, निःसत्त्वः -त्त्वा -त्त्वं, सत्त्वहीनः -ना -नं, असन् -सती -सत् (त्), वायुसमः -मा -मं, असत्यः -त्या -त्यं.

INSUBSTANTIALITY, *s.* अवस्तुता, अवास्तवत्वं, अवस्तु *n.*, वस्त्वभावः, असारत्वं, सारहीनता, सत्त्वहीनता, असत्यता.

INSUFFERABLE, *a.* असह्यः -ह्या -ह्यं, असहनीयः -या -यं, दुःसहः -हा -हं, निःसहः -हा -हं, अक्षन्तव्यः -व्या -व्यं, अक्षमणीयः -या -यं, सहनाशक्यः -क्या -क्यं.

INSUFFERABLENESS, *s.* असह्यता, असहनीयता, निःसहत्वं, दौःसह्यं.

INSUFFERABLY, *adv.* असहनीयं, यथा सोढुं न शक्यते तथाप्रकारेण.

INSUFFICIENCY, *s.* (Deficiency, state of not being enough) न्यूनता, हीनता, क्षीणता, अल्पत्वं, विरहः, अयथेष्टता, अप्राचुर्य्यं, अपर्य्याप्तिः *f.*, अबाहुल्यं, अभावः, अनिर्वाहः.—(Inadequateness) अनुपयुक्तत्वं, अयोग्यता, अक्षमता -त्वं, अनौचित्यं, अनुचितत्वं, अपर्य्याप्तिः *f.*, असमर्थता, असामर्थ्यं.

INSUFFICIENT, *a.* (Not enough, deficient) अनलम् indec., अयथेष्टः -ष्टा -ष्टं, अपर्य्याप्तः -प्ता -प्तं, न्यूनः -ना -नं, हीनः -ना -नं, क्षीणः -णा -णं, अपूर्णः -र्णा -र्णं, अप्रचुरः -रा -रं, निर्वाहाक्षमः -मा -मं, निर्वाहासमर्थः -र्था -र्थं.—(Inadequate) अनुपयुक्तः -क्ता -क्तं, अयोग्यः -ग्या -ग्यं, अक्षमः -मा -मं, असमर्थः -र्था -र्थं, अपर्य्याप्तः -प्ता -प्तं, अनुचितः -ता -तं.

INSUFFICIENTLY, *adv.* (Not enough) अनलं, अयथेष्टं, अप्रचुरं.—(Inadequately) अनुपयुक्तं, अयोग्यं, अक्षमं, अपर्य्याप्तं, अनुचितं, अपर्य्याप्तं.

INSUFFLATION, *s.* (Act of breathing on) श्वासप्रक्षेपः, प्राणप्रक्षेपः, श्वासन्यासः.

INSULAR, *a.* (Belonging to an island) द्वीप्यः -प्या -प्यं, द्वैप्यः -प्या -प्यं, द्वैपः -पी -पं, द्वीपी -पिनी -पि (न्), द्वीपीयः -या -यं, द्वीपसम्बन्धी &c., उपद्वीपसम्बन्धी &c.—(Surrounded by water) द्वीपाकारः -रा -रं, उपद्वीपाकारः -रा -रं, द्वीपरूपः -पा -पं, जलवेष्टितः -ता -तं, जलपरिगतः -ता -तं.

INSULARITY, *s.* द्वीपाकारत्वं, द्वीपरूपता, द्वीपता -त्वं, जलवेष्टितत्वं.

To INSULATE, *v. a.* पृथक् स्था in caus. (स्थापयति -यितुं), पृथक्कृ, अन्यवियुक्तं -क्तां कृ, अन्यविच्छिन्नं -न्नां कृ, अन्यविच्छिष्टं -ष्टां कृ.

INSULATED, *p. p.* or *a.* अनन्यसंलग्नः -ग्ना -ग्नं, अनन्यसंसक्तः -क्ता -क्तं, अनन्यसंयुक्तः -क्ता -क्तं, अन्यविच्छिष्टः -ष्टा -ष्टं, अन्यविभिन्नः -न्ना -न्नं, पृथक्स्थितः -ता -तं.

INSULATION, *s.* अन्यवियोगः, अन्यविभेदः, अनन्यसंयोगः, अन्यविच्छेदः.

INSULT, *s.* अवक्षेपः, अपमानवाक्यं, अवमानवाक्यं, तिरस्कारवाक्यं, तिरस्कारः, अपमानं, अवज्ञा -ज्ञानं, परिभवः, अपमानक्रिया, अवलेपः, अवहेला -लनं, अपवादः, परीवादः, वाक्पारुष्यं, परिभाषणं, निन्दा, दुर्वचस् *n.*, धर्षणं, अनार्य्यं, खलोक्तिः *f.*, अनादरः, अनादरक्रिया, भर्त्सना, निर्भर्त्सना, क्षेपः.

To INSULT, *v. a.* अवज्ञा (c. 9. -जानाति -ज्ञातुं), अवमन् (c. 4. -मन्यते

-मन्तुं), अपमन्, अपमानं कृ, अवज्ञां कृ, अनार्य्यं कृ, तिरस्कृ, परिभू, लघूकृ, तुच्छीकृ, कदर्थीकृ, अवक्षिप् (c. 6. -क्षिपति -क्षेप्तुं), अधिक्षिप्, परिक्षिप्, आक्षिप्, अवगुर् (c. 6. -गुरते -रितुं), आधर् (c. 10. -धारयति -यितुं), अपवद् (c. 1. -वदति -ते -दितुं), परिवद्, कुत्स् (c. 10. कुत्सयति -यितुं); 'he insulted her,' तेन तस्या अनार्य्यं कृतं.

INSULTED, *p. p.* परिभूतः -ता -तं, अवज्ञातः -ता -तं, अवमानितः -ता -तं, अपमानितः -ता -तं, विमानितः -ता -तं, क्षिप्तः -प्ता -प्तं, अवक्षिप्तः -प्ता -प्तं, आक्षिप्तः &c., गर्हितः -ता -तं, अवधीरितः -ता -तं, तिरस्कृतः -ता -तं, निन्दितः -ता -तं, धर्षितः -ता -तं.

INSULTER, *s.* अपमानकर्त्ता *m.* (र्तृ), अवमन्ता *m.* (न्तृ), अवज्ञानकृत्, अनार्य्यकृत्.

INSULTING, *a.* अपमानकारी -रिणी -रि (न्), अपमानसूचकः -का -कं, अपमानार्थकः -का -कं, अवमानी -निनी -नि (न्), परिभवी -विणी -वि (न्), परिभावी &c., परिभावुकः -का -कं, अवक्षेपकः -का -कं, तिरस्कारमयः -यी -यं, निन्दार्थः -र्था -र्थं, कुत्सावादी -दिनी -दि (न्).

INSULTINGLY, *adv.* सापमानं, सतिरस्कारं, सावक्षेपं, अवज्ञापूर्व्वं.

INSUPERABLE, *a.* अनतिक्रमणीयः -या -यं, अनतिक्रम्यः -म्या -म्यं, दुरतिक्रमः -मा -मं, अलंघनीयः -या -यं, अलंघ्यः -घ्या -घ्यं, दुर्लंघ्यः -घ्या -घ्यं, अनधिगम्यः -म्या -म्यं, दुरधिगम्यः &c., दुरधिगमः -मा -मं, दुरत्ययः -या -यं, दुस्तरः -रा -रं, दुःसाध्यः -ध्या -ध्यं, दुरारोहः -हा -हं, अजेयः -या -यं, दुर्जयः -या -यं.

INSUPERABLENESS, *s.* अलंघ्यता, अनतिक्रम्यता, अनधिगम्यता, अजेयता.

INSUPERABLY, *adv.* अलंघनीयं, अनतिक्रमणीयं, दुर्जयं, दुरारोहं.

INSUPPORTABLE, *a.* असह्यः -ह्या -ह्यं, असहनीयः -या -यं, दुःसहः -हा -हं, दुःसहनीयः -या -यं, अक्षन्तव्यः -व्या -व्यं, न क्षन्तव्यः -व्या -व्यं, निःसहः -हा -हं, दुर्वहः -हा -हं, दुरुद्वहः -हा -हं.

INSUPPORTABLENESS, *s.* असह्यता, असहनीयता, दुःसह्यता, अक्षन्तव्यता.

INSUPPORTABLY, *adv.* असहनीयं, दुःसहनीयं, यथा सोढुं न शक्यते तथा.

INSUPPRESSIBLE, *a.* अनिग्रहीतव्यः -व्या -व्यं, दुर्निग्रहः -हा -हं, दुर्निवारः -रा -रं.

INSURANCE, *s.* योगक्षेमः, क्षेमप्रतिविधानं, क्षेमकरणं, क्षेमविधानं, विधायकत्वं सत्याकरणं, सत्याकृतिः *f.*, सत्यापनं; 'against fire,' अग्निजनाशात् क्षेमप्रतिविधानं; 'against thieves, &c.,' चौरादिभ्यः क्षेमप्रतिविधानं or क्षेमकरणं or रक्षा -क्षणं or अहार्य्यत्वं or अनाश्यत्वं.

To INSURE, *v. a.* योगक्षेमं कृ, क्षेमं कृ or विधा (c. 3. -दधाति -धातुं) or प्रतिविधा, सत्याकृ, सत्यीकृ, स्थिरीकृ, दृढीकृ, अहार्य्यत्वं कृ, अनाश्यत्वं कृ, अभेद्यत्वं कृ; 'the merchant insures his goods,' वणिग् द्रव्याणि सत्याकरोति.

INSURED, *p. p.* सत्याकृतः -ता -तं, क्षेमयुक्तः -क्ता -क्तं, रक्षितः -ता -तं.

INSURGENT, *s.* राजप्रतियोधी *m.* (न्), राजयुध्वा *m.* (न्), राजविरोधी *m.* (न्), राजप्रतिरोधी *m.*, उपद्रवी *m.* (न्), विप्लवकृत् *m.*, राजद्रोही *m.* (न्), उपद्रवकारी *m.* (न्), प्रजाविप्लवकारी *m.*, प्रकृतिक्षोभकारी *m.*

INSURMOUNTABLE, *a.* दुरारोहः -हा -हं, अनारोहः -हा -हं, अलंघनीयः -या -यं, अनधिगम्यः -म्या -म्यं, दुरधिगमः -मा -मं, अनतिक्रम्यः -म्या -म्यं, दुस्तरः -रा -रं. *See* INSUPERABLE.

INSURMOUNTABLENESS, *s.* दुरारोहत्वं, अलंघनीयता, अनधिगम्यत्वं, दौस्तर्य्यं.

INSURRECTION, *s.* राजयुद्धं, उपद्रवः, उपप्लवः, प्रजाविप्लवः, राज्योपद्रवः, राजप्रकोपः, प्रकोपः, प्रकृतिक्षोभः, राज्यक्षोभः, प्रजाक्षोभः, राजद्रोहः, राजविरुद्धसम्भूयसमुत्थानं.

INSURRECTIONARY, *a.* उपद्रवी -विणी -वि (न्), राजविरुद्धः -द्धा -द्धं, राजप्रतीपः -पा -पं, राजप्रतिकूलः -ला -लं, राजविपरीतः -ता -तं, विप्लवसम्बन्धी -न्धिनी -न्धि (न्).

INSUSCEPTIBILITY, *a.* अग्राहकत्वं, अग्रहणशीलता, ग्रहणाक्षमता, वेदनाशक्तिः *f.*

INSUSCEPTIBLE, *a.* अग्राही -हिणी -हि (न्), अग्राहकः -का -कं, अग्रहणशीलः -ला -लं, ग्रहणाक्षमः -मा -मं, ग्रहणशक्तिरहितः -ता -तं, वेदनशक्तिहीनः -ना -नं.

INTANGIBLE, *s.* अस्पृश्यः -श्या -श्यं, अस्पर्शनीयः -या -यं, अस्प्रष्टव्यः -व्या -व्यं, दुःस्पर्शः -र्शा -र्शं, दुःस्पृश्यः -श्या -श्यं, अस्पर्शवेद्यः -द्या -द्यं, स्पर्शागम्यः -म्या -म्यं, स्पर्शागोचरः -रा -रं, स्पर्शायोग्यः -ग्या -ग्यं, दुरालभः -भा -भं, अनालभ्यः -भ्या -भ्यं.

INTANGIBLENESS, *s.* अस्पृश्यता, अस्पर्शनीयता, स्पर्शावेद्यता, स्पर्शागम्यता.

INTEGER, INTEGRAL, *s.* (A whole number) पूर्णाङ्कः, अभिन्नाङ्कः, अभिन्नः, सम्पूर्णाङ्कः, रूपं.

INTEGRAL, *a.* अभिन्नः -न्ना -न्नं, पूर्णः -र्णा -र्णं, सम्पूर्णः -र्णा -र्णं, अविकलः -ला -लं, अखण्डः -ण्डा -ण्डं, अन्यूनः -ना -नं, अत्रुटितः -ता -तं, साङ्गः -ङ्गा -ङ्गं.—(In algebra) पूरितः -ता -तं, पूर्णः -र्णा -र्णं; 'integral calculus,' पूरितगणितं; 'differential and integral calculus,' वैलक्षण्यपूरितगणितं; 'integral existence,' अधिकरणं.

To INTEGRATE *v. a.* सम्पूर्णीकृ, सम्पृ (c. 10. -पूरयति -यितुं), प्रतिसंकृ.

INTEGRATION, *s.* (In algebra) पूरितं, पूर्णीकरणं, सम्पूर्णीकरणं.

INTEGRITY, *s.* (Entireness) सम्पूर्णता, पूर्णता, अभिन्नता, अभिन्नभावः, अखण्डता, अवैकल्यं, अन्यूनता, साकल्यं, सामग्र्यं, समस्तता, समस्तिः *f.*, समुदायः, साङ्गता.—(Probity, soundness, incorruptness) अभेद्यता, सारल्यं, सरलता, शुचिता, मायाहीनता, ऋजुता, शुद्धता, अदुष्टता, न्यायिता, अजिह्मता, अवक्रता, अशठता, सत्यता, सत्यशीलता, विमलता, नैर्मल्यं, साधुता; 'of strict integrity,' अभेद्यः -द्या -द्यं, सरलः -ला -लं, अहार्य्यः -र्य्या -र्य्यं. *See* HONEST.

INTEGUMENT, *s.* वेष्टनं, आवेष्टनं, परिवेष्टनं, पटलं, कञ्चुकः, आच्छादनं, छादनं, छदनं, आवरणं, प्रावरणं, वासनं, शिरा, पुटः -टं, कोशः, पिधानं, शरीरावरणं.

INTELLECT, *s.* बुद्धिः *f.*, धीः *f.*, मेधा, मतिः *f.*, मनस् *n.*, प्रज्ञा, चित् *f.*, चेतना, चेतस् *n.*, चित्तं, ज्ञानं, बोधः, संवित् *f.*, संविज्ञिः *f.*, मनीषा, उपलब्धिः *f.*, प्रतिभा, ज्ञप्तिः *f.*, प्रतिपद् *f.*, शेमुषी, धिषणा, प्रेक्षा, ज्ञानदृष्टिः *f.*, ध्यानं, बोधशक्तिः *f.*, चिच्छक्तिः *f.*, ज्ञानशक्तिः *f.*, संज्ञा.

INTELLECTION, *s.* बोधः -धनं, ज्ञानं, ग्रहणं, बुद्धिग्रहः, आकलनं.

INTELLECTUAL, INTELLECTIVE, *a.* (Relating to the understanding) मानसिकः -की -कं, मानसः -सी -सं, बुद्धिसम्बन्धी -न्धिनी -न्धि (न्), बुद्धिविषयः -या -यं, चित्तसम्बन्धी &c., ज्ञानसम्बन्धी &c.—(Existing in the intellect, perceived by it) मनसिजः -जा -जं, मनोजः -जा -जं, मनोगतः -ता -तं, मनोभवः -वा -वं, चिद्भवः -वा -वं, चिन्तितः -ता -तं, मानसिकः &c., बुद्धिगम्यः -म्या -म्यं, धीगम्यः -म्या -म्यं.—(Endowed with intellect) बुद्धिमान् -मती -मत् (त्), धीमान् &c., मतिमान् &c., मेधावी -विनी -वि (न्), मनीषी -षिणी -षि (न्), सुबुद्धिः -द्धिः -द्धि, मेधिरः -रा -रं, चिच्छक्तिविशिष्टः -ष्टा -ष्टं; 'possessing all intellectual qualities,' सर्व्वधीगुणः -णा -णं, अविकलधीगुणः &c.; 'intellectual faculty,' धीशक्तिः *f.*, निष्क्रमः. *See* INTELLIGENT.

INTELLECTUALLY, *adv.* बुद्ध्या, बोधेन, मनसा, ज्ञानतस्, बुद्धिपूर्व्वं.

INTELLIGENCE, *s.* (Understanding, skill, cleverness) बुद्धि *f.*, ज्ञानं, धीः *f.*, मेधा, चेतना, चैतन्यं, चित् *f.*, चिच्छक्तिः *f.*, विज्ञता, कुशलता, कौशल्यं, चातुर्य्यं, वैचक्षण्यं, विदग्धता, वैदग्ध्यं.—(Information, tidings) वार्त्ता, समाचारः, सन्देशः, वृत्तान्तः, संवादः, वाचिकं, उदन्तः, किंवदन्ती, सूचना; 'good intelligence' सुवार्त्ता, शुभवार्त्ता; 'secret

INT

intelligence,' गूढभाषितं.—(A spiritual being) चेतनः, सचेतनव्यक्तिः *f.*, बुद्धिरूपव्यक्तिः.

INTELLIGENCER, *s.* (Messenger) वार्त्तिकः, वार्त्तायनः, वार्त्ताहरः, वार्त्तावहः, सन्देशहरः, आख्यायकः.—(Newspaper) वार्त्तिकपत्रं, समाचारपत्रं.

INTELLIGENT, *a.* बुद्धिमान् -मती -मत् (त्), धीमान् &c., मतिमान् &c., मेधावी -विनी -वि (न्), मनस्वी &c., सबुद्धिः -द्धिः -द्धि, सुबुद्धिः &c., कुशलबुद्धिः &c., सुधीः -धीः -धि, शुद्धधीः &c., कृतधीः &c., सुबोधः -धा -धं, मेधिरः -रा -रं, सज्ञानः -ना -नं, ज्ञानी -निनी -नि (न्), ज्ञानवान् &c., प्रज्ञावान् &c., प्राज्ञः -ज्ञा -ज्ञं, मनीषी -षिणी -षि (न्), प्रेक्षावान् &c., कोविदः -दा -दं, ज्ञाता -त्री -तृ (तृ), विदुरः -रा -रं, विन्दुः -न्दुः -न्दु, मर्म्मज्ञः -ज्ञा -ज्ञं.—(Clever) विज्ञः -ज्ञा -ज्ञं, विचक्षणः -णा -णं, कुशलमतिः -तिः -ति, निपुणमतिः &c., चतुरः -रा -रं, चतुरबुद्धिः &c., अभिज्ञः -ज्ञा -ज्ञं, विदग्धः -ग्धा -ग्धं, विदग्धबुद्धिः &c., कल्याणबुद्धिः &c.

INTELLIGENTLY, *adv.* विज्ञवत्, सुबुद्ध्या, सुबुद्धिपूर्व्वं, बुद्धिकौशल्येन, विदग्धवत्, विचक्षणवत्, अभिज्ञवत्, चतुरं, वैचक्षण्येन, सवैचक्षण्यं, सचातुर्य्यं.

INTELLIGIBLE, *a.* बोध्यः -ध्या -ध्यं, बोधनीयः -या -यं, बुद्धिगम्यः -म्या -म्यं, बुद्धिग्राह्यः -ह्या -ह्यं, सुगम्यः -म्या -म्यं, सुग्राह्यः -ह्या -ह्यं, स्पष्टः -ष्टा -ष्टं, विस्पष्टः -ष्टा -ष्टं, सुस्पष्टः -ष्टा -ष्टं, स्पष्टार्थः -र्था -र्थं, ज्ञेयः -या -यं, संवेद्यः -द्या -द्यं, भिन्नार्थः -र्था -र्थं.

INTELLIGIBLENESS, INTELLIGIBILITY, *s.* बोध्यता, बोधनीयता, बुद्धिगम्यता, सुगम्यता, सुग्राह्यता, स्पष्टत्वं, सुस्पष्टत्वं, सुज्ञेयता.

INTELLIGIBLY, *adv.* स्पष्टं, सुस्पष्टं, विस्पष्टं, स्पष्टार्थतस्, भिन्नार्थतस्.

INTEMPERANCE, *s.* असंयमः -मनं, अयमः, असंयतत्वं, मर्य्यादातिक्रमः, अमर्य्यादा, अपरिमितत्वं, अमितत्वं, अनियमः, नियमातिक्रमः, अतिक्रमः, अत्याचारः, अदमः, अनिग्रहः, आधिक्यं, उद्रेकः, उत्सेकः, अतिरिक्तता, आतिशय्यं.—(In pleasures, enjoyments, or habits) भोगामितत्वं, अपरिमितभोगित्वं, असंयताचारत्वं, अनियतवृत्तिता, अजितेन्द्रियत्वं, अयतेन्द्रियत्वं.—(In eating) अत्याहारः, अतिभोजनं, अतिभक्षणं, भोजनासक्तिः *f.*, अयताहारत्वं, असंयताहारत्वं, आहारादिविषये असंयमः.—(In drinking) अतिपानं, पानासक्तता, पानप्रसक्तत्वं.

INTEMPERATE, *a.* (Not moderate or restrained within limits) असंयतः -ता -तं, असंयमी -मिनी -मि (न्), असंयमशीलः -ला -लं, अमितः -ता -तं, अपरिमितः -ता -तं, अतिमर्य्यादः -दा -दं, अमर्य्यादः -दा -दं, अयतः -ता -तं, अतिक्रान्तमर्य्यादः -दा -दं, अतिक्रान्तनियमः -मा -मं, अनियमवान् -वती -वत् (त्), अतिमितः -ता -तं, अपरिमाणः -णा -णं, अधिकः -का -कं, उद्रिक्तः -क्ता -क्तं, अतिरिक्तः -क्ता -क्तं, अतिशयी -यिनी -यि (न्), अदान्तः -न्ता -न्तं.—(In pleasures or habits) -गिनी -गि (न्), अपरिमितभोगः -गा -गं, असंयताचारः -रा -रं, चारः -रा -रं, अयतवृत्तिः -त्तिः -त्तिः, असमयतवृत्तिः -त्तिः -त्ति, अत्याचारी -रिणी -रि (न्), अयतेन्द्रियः -या -यं, अजितेन्द्रियः -या -यं, अनियतेन्द्रियः -या -यं.—(In eating) अतिभोजी -जिनी -जि (न्), अमितभोजी &c., अत्याहारी &c., अयताहारः -रा -रं, अपरिमिताहारः -रा -रं. *See* GLUTTONOUS. (In drinking) अतिपायी -यिनी -यि (न्), पानासक्तः -क्ता -क्तं, पानप्रसक्तः -क्ता -क्तं.

INTEMPERATELY, *adv.* असंयमेन, असंयतं, अपरिमितं, अमितं, अतिमर्य्यादं, मर्य्यादातिक्रमेण, नियमातिक्रमेण, अपरिमाणेन, अतिशयेन, अतिरिक्तं, आधिक्येन.

INTEMPERATURE, *s.* गुणवैषम्यं, गुणाधिक्यं, गुणातिरेक्यं, अपरिमितत्वं, वैषम्यं.

INTENABLE, *a.* अप्रतिपादनीयः -या -यं, अव्ययस्थापनीयः -या -यं, अरक्षणीयः -या -यं.

To INTEND, *v. a.* (Mean, purpose) अभिप्रे (अभिप्रैति -तुं), अभिप्रायं कृ, कृ in des. (चिकीर्षति -र्षितुं), उद्दिश् (c. 6. -दिशति -देष्टुं), मनसा उद्दिश्, अभिसन्धा (c. 3. -दधाति -धातुं), इष् (c. 6. इच्छति, एषितुं), उपलक्ष् (c. 10. -लक्षयति -यितुं), परिक्लृप् (c. 10. -कल्पयति -यितुं), मनः or मतिं or बुद्धिं कृ or प्रकृ, with loc. or dat. case; as, 'he intends going,' मनो गमनाय करोति. Sometimes expressible by the des. form of a verb; as, 'to intend to go,' गम् in des. (जिगमिषति -षितुं); 'to intend to do,' कृ in des.; 'to intend to say,' वच् in des. (विवक्षति -क्षितुं).

INTENDANCY, *s.* अध्यक्षता -त्वं, अधिष्ठातृत्वं, अधिकारिता, अधीशता.

INTENDANT, *s.* अध्यक्षः, अधिष्ठाता *m.* (तृ), अधिकारी *m.* (न्), उपद्रष्टा *m.* (ष्टृ).

INTENDED, *p. p.* अभिप्रेतः -ता -तं, चिकीर्षितः -ता -तं, उद्दिष्टः -ष्टा -ष्टं, मनसोद्दिष्टः -ष्टा -ष्टं, उपलक्षितः -ता -तं, सङ्कल्पितः -ता -तं, इष्टः -ष्टा -ष्टं, कृताभिप्रायः -या -यं, परिकल्पितः -ता -तं; 'intended to be said,' विवक्षितः -ता -तं; 'not intended,' अनभिप्रेतः -ता -तं.

INTENDING, *part.* अभिप्रेत्य, उद्दिश्य, मनसोद्दिश्य, अभिसन्धाय.

INTENDMENT, *s.* अभिप्रायः, अभिप्रेतं, आशयः, अर्थः, उद्देशः, अभिसन्धिः *m.*

INTENSE, *a.* अत्यन्तः -न्ता -न्तं, आत्यन्तिकः -की -कं, गाढः -ढा -ढं, तीव्रः -व्रा -व्रं, तीक्ष्णः -क्ष्णा -क्ष्णं, उग्रः -ग्रा -ग्रं, चण्डः -ण्डा -ण्डं, प्रचण्डः -ण्डा -ण्डं, उच्चण्डः -ण्डा -ण्डं, प्रकृष्टः -ष्टा -ष्टं, प्रबलः -ला -लं, प्रगाढः -ढा -ढं, नितान्तः -न्ता -न्तं, भृशः -शा -शं, सुभृशः -शा -शं, निर्भरः -रा -रं, अतिशयी -यिनी -यि (न्), अतिशायनः -ना -नं, कठोरः -रा -रं, परमः -मा -मं, महान् -हती -हत् (त्), परः -रा -रं, उदीर्णः -र्णा -र्णं, उद्धतः -ता -तं, कठिनः -ना -नं, तैजसः -सी -सं, व्यग्रः -ग्रा -ग्रं, भूरिः -रिः -रि, अति or अतिशय or सु prefixed; 'intense darkness,' घनतिमिरं; 'intense heat,' अतिदाहः, गुरुतापः, अलघूष्मा *m.* (न्); 'intense pain,' तीव्रवेदना; 'intense study,' अत्यन्ताभिनिवेशः, अतिप्रवेशः, व्यासङ्गः.

INTENSELY, *adv.* अत्यन्तं, अतिशयेन, तीव्रं, तीक्ष्णं, अतितैक्ष्ण्येन, प्रचण्डं, नितान्तं, भृशं, सुभृशं, निर्भरं, कठोरं, गाढं, अतिशयेन, उग्रं, परमं, अतीव, अति or अतिशय or सु prefixed; 'intensely passionate,' अत्यन्तकोपनः -ना -नं, अतिकोपनः -ना -नं

INTENSITY, INTENSENESS, *s.* अत्यन्तता, आत्यन्तिकत्वं, तीव्रता, तीक्ष्णता, तैक्ष्ण्यं, उग्रता, चण्डता, प्रचण्डता, गाढता, प्रगाढता, नितान्तत्वं, प्रबलता, प्राबल्यं, कठोरता, भृशता, भ्रशिमा *m.* (न्), प्रकृष्टता, प्रकर्षः, तैजसं, काठिन्यं, व्यग्रता, उद्रेकः, उदीर्णता, उत्कर्षः, अतिभूमिः *f.*, आतिशय्यं, 'intensity of application to study,' अभिनिवेशः, अत्यन्ताभिनिवेशः, व्यासङ्गः.

INTENSION, *s.* विततिः *f.*, आततिः *f.*, वृद्धिः *f.*, प्रकर्षः, उत्कर्षः, प्रकृष्टता.

INTENSIVE, *a.* (Serving to give force or emphasis) शक्तिकरः -रा -रं, प्रकर्षकरः -रा -रं, उत्कर्षज्ञापकः -का -कं, अर्थविशेषकारकः -का -कं, वर्धकः -का -कं, वृद्धिकरः &c.

INTENT, *a.* (Having the mind fixed closely on one object) एकाग्रः -ग्रा -ग्रं, एकचित्तः -त्ता -त्तं, एकतानः -ना -नं, एकाग्रचित्तः -त्ता -त्तं, एकनिष्ठः -ष्ठा -ष्ठं, अनन्यमनाः -नाः -नः (स्), अनन्यवृत्तिः -त्तिः -त्ति, अनन्यविषयः -या -यं, अनन्यविषयात्मा -त्मा -त्म (न्), अनन्यमनस्कः -स्का -स्कं, एकायनः -ना -नं.—(Intent on any object) आसक्तः -क्ता -क्तं, आसक्तचित्तः -त्ता -त्तं, आसक्तचेताः -ताः -तः (स्), अभिनिविष्टः -ष्टा -ष्टं, अभिनिवेशी -शिनी -शि (न्), निविष्टः -ष्टा -ष्टं, प्रविष्टः -ष्टा -ष्टं, परायणः -णा -णं, परः -रा -रं, तत्परः -रा -रं, रतः -ता -तं, निरतः -ता -तं, अभियुक्तः -क्ता -क्तं, आयुक्तः -क्ता -क्तं, सक्तः -क्ता -क्तं, संसक्तः -क्ता -क्तं,

निष्ठः -ष्ठा -ष्ठं, निश्चितः -ता -तं, आविष्टः -ष्टा -ष्टं, आविष्टचित्तः -त्ता -त्तं, आविष्टमना: &c., अभिमुखः -खा -खं, नियतः -ता -तं, व्यग्रः -ग्रा -ग्रं, व्यग्रमना: &c., तन्मनस्कः -स्का -स्कं, आहितः -ता -तं, कृतनिश्चयः -या -यं; 'intent on reading,' अध्ययनपरः -रा -रं, अध्ययनाभिमुखः -खा -खं.

INTENT, *s.* अभिप्रायः, अभिप्रेतं, आशयः, उद्देशः, अर्थः, तात्पर्य्यं; 'with what intent?' किमुद्दिश्य; 'to all intents,' सर्व्वार्थतस्.

INTENTION, *s.* (Design) अभिप्रायः, अभिप्रेतं, चिकीर्षितं, चिकीर्षा, आशयः, सङ्कल्पः, उद्देशः, आकांक्षा, बुद्धिः *f.*, मतिः *f.*, मतं, इङ्गितं, छन्दः, तात्पर्य्यं, आकूतं, इच्छा, चेष्टा, कल्पना, परिकल्पना, परिकल्पितं, उपलक्षितं, निश्चितं.—(End, aim, object) अर्थः, आशयः, अभिसन्धिः *m.*, कार्य्यं, कार्य्यवस्तु *n.*, प्रयोजनं, अर्थवत्ता.—(Meaning) विवक्षितं, विवक्षा; 'purity of intention,' चित्तशुद्धिः *f.*, अन्तःकरणशुद्धिः *f.*; 'change of intention,' बुद्धिभेदः, मतिभेदः; 'declared intention,' ईरिताकूतं; 'with what intention?' किमुद्दिश्य.—(Fixedness of attention) एकाग्रता. *See* INTENTNESS.

INTENTIONAL, *a.* मतिपूर्व्वः -र्व्वा -र्व्वं, बुद्धिपूर्व्वः &c., ज्ञानपूर्व्वः &c., बुद्धिपुरःसरः -रा -रं, अभिप्रायपूर्व्वः &c., ऐच्छिकः -की -कं, बुद्धिकृतः -ता -तं, कामकृतः -ता -तं, कामिकः -की -कं, काम्यः -म्या -म्यं, यथाकामः -मा -मं, साभिप्रायः -या -यं, सङ्कल्पकृतः -ता -तं, साङ्कल्पिकः -की -कं, यथाकल्पः -ल्पा -ल्पं, ज्ञानकृतः -ता -तं, अर्थवान् -वती -वत् (त्), सार्थः -र्था -र्थं, चिकीर्षितः -ता -तं, अभिप्रेतः -ता -तं.

INTENTIONALLY, *adv.* बुद्धिपूर्व्वं, बुद्धिपुरःसरं, मतिपूर्व्वं, अभिप्रायपूर्व्वं, साभिप्रायं, ज्ञानपूर्व्वं, बुद्ध्या, इच्छातस्, कामतस्, यथाकामं, प्रकामं, मत्या, मनःपूर्व्वकं, तात्पर्य्यतस्, यथाकल्पं, ज्ञानतस्, इच्छापूर्व्वं.

INTENTIONED, *a.* (In composition). Expressed by आशय, बुद्धि &c. in comp.; as, 'well-intentioned,' शुभाशयः -या -यं; 'ill-intentioned,' दुराशयः -या -यं, द्रोहबुद्धिः -द्धिः -द्धि.

INTENTIVE, *a.* कृतावधानः -ना -नं, अवहितः -ता -तं, समाहितः -ता -तं.

INTENTLY, *adv.* एकाग्रं, एकाग्रचेतसा, अनन्यमनसा, आसक्तचेतसा, निविष्टमनसा, अभिनिवेशेन, अभिनिवेशपूर्व्वं, साभिनिवेशं, निष्ठापूर्व्वं, निर्बन्धेन, ऐकाग्र्यं, मनोयोगेन, समनोयोगं, व्यग्रं, व्यग्रवत्.

INTENTNESS, *s.* एकाग्रता, एकचित्तता -त्वं, अनन्यचित्तता, अभिनिवेशः, चित्ताभिनिवेशः, अभिनिविष्टता, आसक्तिः *f.* -क्तता, निवेशः, प्रवेशः, निविष्टता, ऐकाग्र्यं, अभियुक्तता, परता, निष्ठा, निश्चितत्वं, एकनिष्ठता, आविष्टत्वं, अनन्यवृत्तिः *f.*, मनोयोगः; 'intentness of soul,' आत्मैकाग्र्यं, चित्तैकाग्र्यं.

To INTER, *v. a.* भूमौ or श्मशाने निखन् (c. 1. -खनति -नितुं -खातुं) or स्था in caus. (स्थापयति -यितुं) or समृ in caus. (-अर्पयति -यितुं) or निधा (c. 3. -दधाति -धातुं), भूमिगतं -तां -तं कृ.

INTERCALAR, INTERCALARY, *a.* अधिकः -का -कं, निवेशितः -ता -तं, सौराब्दपूरकः -का -कं; 'intercalary month,' अधिकमासः, अधिमासः, मलमासः, मलिम्लुचः, अनामकः, अधिमासशेषः, पुरुषोत्तममासः, असंक्रान्तिकमासः; 'intercalary day,' अधिकदिवसः, अधिदिवसः; 'intercalary verse,' अधिकश्लोकः.

To INTERCALATE, *v. a.* (A month) अधिकमासं निविश् (c. 10. -वेशयति -यितुं), अधिमासं निविश्.—(A day) अधिकदिवसं निविश्.

INTERCALATION, *s.* (Of a month) अधिकमासनिवेशनं.—(Of a day) अधिकदिवसनिवेशनं, अधिदिवसनिवेशनं.

To INTERCEDE, *v. n.* (Intervene, pass between) अन्तर्गम् (c. 1. -गच्छति -गन्तुं), अन्तर्वृत् (c. 1. -वर्त्तते -र्त्तितुं), अन्तःस्था (c. 1. -तिष्ठति -स्थातुं), मध्ये वृत्, मध्ये स्था, उपस्था.—(Mediate between two parties) मध्यस्थो भू or अस्, मध्यवर्त्ती भू, माध्यस्थ्यं कृ, मध्यस्थवृत्तिम् आस्था, सन्धा (c. 3. -दधाति -धातुं), सन्धानं कृ.—(Plead in favor of another) परार्थं प्रार्थ् (c. 10. -अर्थयते -ति -यितुं), परार्थप्रार्थनं कृ, परार्थं वद् (c. 1. वदति -दितुं) or प्रतिवद्, परार्थविनतिं कृ, परार्थं विनी (c. 1. -नयति -नेतुं) or अनुनी or निवेदनं कृ, परार्थनिवेदनं कृ.

INTERCEDER, *s.* मध्यस्थः, मध्यवर्त्ती *m.* (न्), परार्थप्रार्थकः, परार्थप्रार्थनकृत् *m.*, परार्थवादी *m.* (न्), परार्थं निवेदनकृत् *m.*

To INTERCEPT, *v. a.* रुध् (c. 7. रुणद्धि, रोद्धुं), अवरुध्, विरुध्, प्रतिरुध्, उपरुध्, निरुध्, संरुध्, गतिरोधं कृ, गतिभङ्गं कृ, विछिद् (c. 7. -छिनत्ति -छेत्तुं), गतिविच्छेदं कृ, गतिच्छेदं कृ, वियुज् (c. 10. -योजयति -यितुं), निवृ (c. 10. -वारयति -यितुं), खण्ड् (c. 10. खण्डयति -यितुं), प्रतिबन्ध् (c. 9. -बध्नाति -बन्द्धुं).

INTERCEPTED, *p. p.* रुद्धः -द्धा -द्धं, अवरुद्धः -द्धा -द्धं, विच्छिन्नः -न्ना -न्नं.

INTERCEPTER, *s.* रोधकः, गतिभङ्गकारी *m.* (न्), विच्छेदकारी *m.*

INTERCEPTION, *s.* गतिरोधः -धनं, गतिभङ्गः, गतिविच्छेदः, गतिच्छेदः, रोधः -धनं, अवरोधः, विच्छेदः, निवारणं, प्रतिबन्धः, स्तम्भनं, विघ्नः.

INTERCESSION, *s.* (Mediation between two parties) माध्यस्थ्यं, माध्यस्थं, मध्यस्थत्वं, सन्धानकरणं.—(Pleading in favor of another) परार्थप्रार्थना -नं, परार्थं प्रार्थनं, परार्थवादः, परार्थनिवेदनं, परार्थं निवेदनं; 'to make intercession.' *See To* INTERCEDE.

INTERCESSOR, *s.* (Mediator) मध्यस्थः, मध्यवर्त्ती *m.* (न्), मध्यस्थायी *m.* (न्), मध्यस्थितः.—(Pleader for another) परार्थप्रार्थकः, परार्थं प्रार्थयिता *m.* (तृ), परार्थं प्रार्थनकृत् *m.*, परार्थवादी *m.* (न्), परार्थं निवेदनकारी *m.*

INTERCESSORY, *a.* परार्थप्रार्थकः -का -कं, परार्थप्रार्थनविषयः -या -यं.

To INTERCHANGE, *v. a.* परस्परं परिवृत् (c. 10. -वर्त्तयति -यितुं) or विनिमे (c. 1. -मयते -मातुं) or निमे or विनिमयं कृ, परस्परपरिवर्त्तनं कृ, परस्परविनिमयं कृ, व्यतिकरं कृ, परस्परं दानप्रतिदानं कृ or आदानप्रदानं कृ, व्यतिहृ (c. 1. -हरति -हर्त्तुं).

INTERCHANGE, *s.* परिवर्त्तनं, परस्परपरिवर्त्तनं, विनिमयः, परस्परविनिमयः, परिवृत्तिः *f.*, परीवर्त्तः, निमयः, विमयः, निमेयः, वैमेयः, व्यतिकरः, व्यतिहारः, व्यतीहारः, परावृत्तिः *f.*, विपर्य्ययः, परस्परं दानप्रतिदानं, आदानप्रदानं.

INTERCHANGEABLE, *a.* परिवर्त्तनीयः -या -यं, विनिमातव्यः -व्या -व्यं, विनिमयार्हः -र्हा -र्हं.—(Following each other in succession) परस्परानुगामी -मिनी -मि (न्), अन्योन्यपृष्ठानुगामी &c.

INTERCHANGEABLY, *adv.* विनिमयेन, विपर्य्ययेण, पर्य्यायेण, परिवर्त्तनेन, परिवृत्य.

INTERCISION, *s.* विच्छेदः, छेदः, अवच्छेदः, भङ्गः, रोधः, अवरोधः.

To INTERCLUDE, *v. a.* अवरुध् (c. 7. -रुणद्धि -रोद्धुं), विछिद् (c. 7. -छिनत्ति -छेत्तुं).

INTERCOSTAL, *a.* पञ्जरमध्यस्थः -स्था -स्थं, वंक्रिमध्यवर्त्ती -र्त्तिनी -र्त्ति (न्), पर्शुकाभ्यन्तरस्थः -स्था -स्थं.

INTERCOURSE, *s.* संसर्गः, परस्परसंसर्गः, अन्योन्यसंसर्गः, संसर्गिता, सङ्गतिः *f.*, साङ्गत्यं, सङ्गमः, सङ्गः, समागमः, उपगमः, गमनागमनं, परस्परालापः, आलापः, सम्भाषः, सम्पर्कः, साहित्यं, आनुगत्यं, साहचर्य्यं, सङ्घट्टनं, परिचयः; 'intercourse of society,' लोकव्यवहारः, लोकसंसर्गः, लोकयात्रा; 'of the sexes,' स्त्रीपुरुषसङ्गः, मिथुनीभावः, मैथुनं.

INTERCUTANEOUS, *a.* त्वगन्तर्भूतः -ता -तं, त्वगन्तर्गतः -ता -तं, त्वगन्तःस्थः -स्था -स्थं.

To INTERDICT, *v. a.* अन्तःख्या (c. 2. -ख्याति -तुं), प्रत्याख्या, निषिध् (c. 1. -षेधति -षेद्धुं, c. 10. -षेधयति -यितुं), प्रतिषिध्, निवृ (c. 10.

-वारयति -यितुं), निषेधं कृ, बाध् (c. 1. बाधते -धितुं).

INTERDICT, INTERDICTION, *s.* निषेधः, प्रतिषेधः, आसेधः, प्रत्याख्यानं, वारणं, निवारणं, निरोधः, विरोधनं, बाधः, निषिद्धत्वं.

INTERDICTED, *p.p.* निषिद्धः -द्धा -द्धं, प्रतिषिद्धः -द्धा -द्धं, अन्तःस्यातः -ता -तं.

INTERDICTORY, *a.* निषेधकः -का -कं, निषेधार्थकः -का -कं, निषेधकरः -रा -रं.

INTEREST, *s.* (Advantage, good) अर्थः, हितं, लाभः, फलं, कल्याणं, कुशलं, मङ्गलं, क्षेमः -मं, श्रेयस्, भूतिः *f.*; 'for the public interest,' लोकहिताय; 'one's own interest,' स्वार्थः, स्वहितं, स्वलाभः, स्वकार्य्यं, आत्महितं, आत्मवृद्धिः; 'for one's own interest,' आत्महिताय, आत्मविवृद्धये; 'regard to one's own interest,' स्वार्थापेक्षा, स्वार्थदृष्टिः *f.*, स्वहितावलोकनं, स्वार्थलिप्सा; 'regardful of one's own interest,' स्वार्थपरः -रा -रं, स्वार्थसाधनतत्परः -रा -रं, स्वार्थपरायणः -णा -णं, स्वार्थलिप्सुः -प्सुः -प्सु, स्वार्थार्थी -र्थिनी -र्थि (न्), स्वहितैषी -षिणी -षि (न्), स्वलाभपरायणः -णा -णं; 'regardless of it.' *See* DISINTERESTED.—(Concern, lively feeling about) स्नेहः, अवेक्षा, अपेक्षा, प्रतीक्षा, अनुरागः, रागः, स्पृहणीयत्वं, स्पृहा, सम्बन्धः, अभिसम्बन्धः, अभिमन्यानं.—(Partiality for, bias in favor of) सङ्गः, पक्षपातः, स्नेहः; 'void of all interest in,' वीतसङ्गः -ङ्गा -ङ्गं, मुक्तसङ्गः &c., निःसङ्गः &c., विपक्षपातः -ता -तं.—(Gratification) विनोदः.—(Power to interest or please) विनोदकत्वं, मनोरञ्जकता, हृद्गमत्वं, रसः.—(Influence) गौरवं, गुरुत्वं, प्रभावः, प्राबल्यं, अधिकारः, भारः.—(Share, portion, participation in loss or gain) भागः, अंशः, विभागः, लाभालाभविभागित्वं, लाभालाभसम्बन्धः. (Interest on money, usury) वृद्धिः *f.*, वार्धुष्यं, भागः, कलान्तरं, कारिका, कारिता, कुसीदवृद्धिः *f.*; 'compound interest,' चक्रवृद्धिः *f.*; 'simple interest,' सरलवृद्धिः *f.*; 'bearing interest,' सवृद्धिकः -का -कं, भागिकः -की -कं, भाग्यः -ग्या -ग्यं; 'bearing no interest,' अवृद्धिकः -की -कं; 'interest at the rate of five per cent.,' शते विंशभागः, पञ्चकं शतं, पञ्चोत्तरं; 'at four per cent.,' शते पञ्चविंशभागः; 'at two per cent.,' द्विकं शतं.

To INTEREST, *v. a.* (Excite interest, partiality, or concern) स्नेहं or अनुरागं or स्पृहां or पक्षपातम् उत्पद् (c. 10. -पादयति -यितुं) or जन् (c. 10. जनयति -यितुं), अनुरञ्ज् (c. 10. -रञ्जयति -यितुं), अनुरक्तं -क्तां कृ, सानुरागं -गां कृ, सङ्गम् उत्पद्.—(Engage the attention, amuse) विनुद् (c. 10. -नोदयति -यितुं), मनः or चित्तं विनुद् or रञ्ज् (c. 10. रञ्जयति -यितुं), हृदयं गम् (c. 1. गच्छति, गन्तुं), चित्तविनोदं कृ.—(Give a share in) भागं or अंशं दा, संविभागित्वं or समांशित्वं दा, भागिनं -गिनीं कृ, अंशिनं -शिनीं कृ.—(Have a share in) भागं or अंशं लभ् (c. 1. लभते, लब्धुं) or आप् (c. 5. -आप्नोति -आप्तुं), भागी -गिनी -गि भू or अस्.—(Have concern in) सम्बन्ध् in pass. (-बध्यते), सम्बद्धः -द्धा -द्धं भू.—(Interest one's self for another) परहितैषी -षिणी -षि भू or अस्, परहितेप्सुः -प्सुः -प्सु भू, परहितार्थी -र्थिनी -र्थि भू.

INTERESTED, *p. p.* or *a.* (Having one's affections or concern excited) जातस्नेहः -हा -हं, जातानुरागः -गा -गं, अनुरञ्जितः -ता -तं, अनुरक्तः -क्ता -क्तं, विरक्तः -क्ता -क्तं, अभिसंहितः -ता -तं.—(Having partiality for) सङ्गी -ङ्गिनी -ङ्गि (न्), पक्षपाती -तिनी -ति (न्), सपक्षपातः -ता -तं, सङ्गयुक्तः -क्ता -क्तं.—(Having the attention engaged) आसक्तः -क्ता -क्तं, निविष्टः -ष्टा -ष्टं, अभिनिविष्टः -ष्टा -ष्टं, निरतः -ता -तं.—(Amused) विनोदितः -ता -तं.—(Made a sharer in) भागी -गिनी -गि (न्), संविभागी &c.—(Concerned in a cause or in consequences) सम्बन्धी -न्धिनी -न्धि (न्), सम्बद्धः -द्धा -द्धं, अर्थसम्बद्धः -द्धा -द्धं, लाभालाभसम्बद्धः -द्धा -द्धं, अभिसम्बद्धः &c.—(Self-interested) स्वलाभासक्तः -क्ता -क्तं, स्वफलासक्तः -क्ता -क्तं, सकामः -मा -मं, सार्थः -र्था -र्थं, स्वार्थदर्शी -र्शिनी -र्शि (न्), कामात्मा -त्मा -त्म (न्), स्वार्थापेक्षकः -का -कं.

INTERESTING, *a.* (Engaging the attention, exciting the passions, amusing) विनोदकः -का -कं, विनोददः -दा -दं, हृदयङ्गमः -मा -मं, हृद्गमः -मा -मं, अनुरागजनकः -का -कं, मनोरञ्जकः -का -कं, चित्तवेधकः -का -कं, मनोहरः -रा -रं, हृदयग्राही -हिणी -हि (न्), हृदयस्पृक् *m. f. n.* (श्).

To INTERFERE, *v. n.* (Intermeddle) परव्यापारान् or परकार्य्याणि प्रविश् (c. 6. -विशति -वेष्टुं) or चर्च् (c. 1. चर्चति -र्चितुं), परव्यापारचर्चां कृ, परकार्य्यप्रवेशं कृ, परनियोगचर्चां कृ, पराधिकारचर्चां कृ, परकार्य्यनिरूपणं कृ, परकार्य्येषु व्यापृ in pass. (-प्रियते) or व्यापृतः -ता -तम् अस्.—(Clash, come into collision) परस्परं विरुध् (c. 7. -रुणद्धि -रोद्धुं) or संघट्ट् (c. 1. -घट्टते -ट्टितुं), परस्परविरोधं कृ, परस्परविपर्य्यासं कृ.

INTERFERENCE, *s.* (Intermeddling) परव्यापारप्रवेशः, परकार्य्यप्रवेशः, परव्यापारचर्चा, पराधिकारचर्चा, परनियोगचर्चा, परकार्य्यनिरूपणं.—(Mediation, interposition) माध्यस्थ्यं, मध्यस्थत्वं, अन्तर्गमनं, अन्तरागमनं.—(Clashing, collision) परस्परविरोधः, परस्परसमाघातः.

INTERFLUENT, *s.* मध्यस्रवन् -वन्ती -वत् (त्), मध्यस्यन्दी -न्दिनी -न्दि (न्).

INTERFUSED, *a.* मध्यविस्तीर्णः -र्णा -र्णं, मध्यप्रसारी -रिणी -रि (न्).

INTERIM, *s.* मध्यकालः, अन्तर्गतकालः, अन्तरितकालः, अन्तरं, कालान्तरं, कालाभ्यन्तरं; 'in the interim,' अत्रान्तरे.

INTERIOR, *a.* अन्तरस्थः -स्था -स्थं, आन्तरिकः -की -कं, आन्तरः -री -रं, अन्तर्भूतः -ता -तं, अन्तर्गतः -ता -तं, अन्तःस्थः -स्था -स्थं, अन्तर्वर्त्ती -र्त्तिनी -र्त्ति, अन्तर्भवः -वा -वं, आभ्यन्तरः -री -रं, अन्तरङ्गः -ङ्गा -ङ्गं, अन्तरतमः -मा -मत, गर्भस्थः -स्था -स्थं, अन्तर् in comp.—(Inland) मध्यदेशस्थः -स्था -स्थं.

INTERIOR, *s.* (The inside) अभ्यन्तरं, अन्तर्भागः, अन्तःप्रदेशः, अन्तरङ्गं, गर्भः, उदरं, मध्यभागः, विलं, विवरं; 'interior of a boiler,' स्थालीविलं; 'interior of a house,' गृहाभ्यन्तरं, अन्तर्गृहं, अन्तर्भवनं, भवनोदरं, गर्भागारं; 'interior of a country,' देशमध्यं, मध्यदेशः.

INTERJACENCY, *s.* मध्यस्थितिः *f.*, मध्यवर्त्तनं, मध्यवर्त्तित्वं, अन्तर्वर्त्तनं.

INTERJACENT, *a.* मध्यस्थितः -ता -तं, मध्यवर्त्ती -र्त्तिनी -र्त्ति (न्), अन्तर्वर्त्ती &c.

To INTERJECT, *v. a.* मध्ये क्षिप् (c. 6. क्षिपति, क्षेप्तुं) or प्रक्षिप्, अन्तःक्षिप्.

INTERJECTION, *s.* (Throwing between) मध्यप्रक्षेपः -पणं, मध्यक्षेपः -पणं, अन्तःक्षेपणं.—(Exclamation) उद्गारः.

To INTERLACE, *v. a.* व्यामिश्र् (c. 10. -मिश्रयति -यितुं), अन्यद् अन्येन मिश्र्.

To INTERLARD, *v. a.* मध्ये निविश् (c. 10. -वेशयति -यितुं), अन्तर् निविश्.—(Mix, diversify) विमिश्र् (c. 10. -मिश्रयति -यितुं), सम्मिश्र्, सम्मिश्रीकृ, विचित्रीकृ.

To INTERLEAVE, *v. a.* (Insert a leaf) पत्रं निविश् (c. 10. -वेशयति -यितुं), पत्रनिवेशनं कृ.—(Insert a blank leaf between two other leaves) पुस्तकपत्रद्वयमध्ये शून्यपत्रं निविश्.

To INTERLINE, *v. a.* अक्षरपंक्तिद्वयमध्ये लिख् (c. 6. लिखति, लेखितुं) or अभिलिख्.

INTERLINEAR, INTERLINEARY, *a.* अक्षरपंक्तिद्वयमध्ये लिखितः -ता -तं.

INTERLOCUTION, *s.* संवादः, संलापः, सम्भाषा -षणं, द्वयोः संवादः, उत्तरप्रत्युत्तरं, उक्तिप्रत्युक्ती *f.* du., परस्परालापः, सङ्कथा, सम्प्रवदनं, कथोपकथनं.

INTERLOCUTOR, *s.* संवादी *m.* (न्), सांवादिकः, संवादकारी *m.* (न्).

सम्भाषकः, उत्तरप्रत्युत्तरकृत् *m.*, उक्तिप्रत्युक्तिकृत् *m.*, कथोपकथकः.—(An actor who in the intervals of the scenes explains the progress of the story) विष्कम्भः -म्भकः.

INTERLOCUTORY, *a.* संवादरूपः -पा -पं, सांवादिकः -की -कं, संवादात्मकः -का -कं, संलापीयः -या -यं, उत्तरप्रत्युत्तररूपः -पा -पं.

To INTERLOPE, *v. n.* अधर्म्मतः पराधिकारं प्रविश् (c. 6. -विशति -वेष्टुं) or आविश् or अन्तर्गम् (c. 1. -गच्छति -गन्तुं) or अन्तरागम्, स्वाधिकारम् अतिक्रम्य पराधिकारप्रवेशं कृ.

INTERLOPER, *s.* पराधिकारप्रवेशकः -प्रवेष्टा *m.* (ष्टृ), पराधिकारान्तर्गामी *m.* (न्), पराधिकारमध्यवर्त्ती *m.* (न्), अनधिकारी *m.* (न्).

INTERLUDE, *s.* अङ्कद्वयान्तर्गतं कौतुकं, विलासिका.

INTERLUNAR, INTERLUNARY, *a.* अमावास्याकालिकः -की -कं, अमासम्बन्धी -न्धिनी -न्धि (न्).

INTERMARRIAGE, *s.* परस्परविवाहः, अन्योन्यविवाहः, विवाहव्यवहारः, परस्परदारपरिग्रहः, परस्परकन्याव्यवहारः, परिवर्त्तनविवाहः, प्रत्युद्वाहः; 'confusion of castes through intermarriage,' सङ्करः, साङ्कर्य्यं.

To INTERMARRY, *v. n.* परस्परं विवह् (c. 1. -वहति -वोढुं) or उद्वह्, परस्परविवाहं कृ, परस्परविवाहव्यवहारं कृ, परस्परदारपरिग्रहं कृ, परस्परकन्याव्यवहारं कृ, परस्परदारपरिणयनं कृ.

To INTERMEDDLE, *v. a.* परकार्य्याणि चर्च् (c. 1. चर्चति -र्चितुं), परव्यापारचर्चां कृ, परव्यापारान् प्रविश् (c. 6. -विशति -वेष्टुं), परव्यापारप्रवेशं कृ, परकार्य्याणि निरूप् (c. 10. -रूपयति -यितुं), परकार्य्यनिरूपणं कृ, पराधिकारचर्चां कृ, परनियोगचर्चां कृ, परकार्य्येषु व्यापृ in pass. (-प्रियते), परव्यापारान्तर्गमनं कृ.

INTERMEDDLER, *s.* परकार्य्यचर्चकः, परव्यापारप्रवेशकः, पराधिकारचर्चकः, परकार्य्यनिरूपकः, परकार्य्यव्यापारी *m.* (न्), परव्यापारान्तर्गामी *m.* (न्).

INTERMEDIATE, INTERMEDIAL, *a.* मध्यः -ध्या -ध्यं, मध्यमः -मा -मं, मध्यस्थितः -ता -तं, मध्यवर्त्ती -र्त्तिनी -र्त्ति (न्), मध्यगः -गा -गं, अन्तरालस्थः -स्था -स्थं, अन्तरालस्थितः -ता -तं, उभयमध्यस्थितः -ता -तं, अन्तर्गतः -ता -तं, अन्तरितः -ता -तं, व्यवधायकः -का -कं, व्यवहितः -ता -तं, विचालः -ला -लं, अन्तराल in comp.; 'intermediate space,' अन्तरं, अभ्यन्तरं, अन्तरालं; 'intermediate time,' कालान्तरं, अन्तरं; 'intermediate point of the compass,' अपदिशं, विदिक् *f.* (श्), उपदिक् *f.*; 'in an intermediate direction,' मध्यदिशि.

INTERMEDIATELY, *adv.* मध्यदिशि, मध्यमदिशि, मध्ये, सान्तरालं, अन्तरेण.

INTERMENT, *s.* भूमिखननं, निखननं, भूमिसमर्पणं, भूमौ खननं.

INTERMINABLE, *a.* अनन्तः -न्ता -न्तं -न्तकः -का -कं, निरवधिः -धिः -धि, अत्यन्तः -न्ता -न्तं, अपर्य्यन्तः -न्ता -न्तं, असीमः -मा -मं, निस्सीमः -मा -मं, अमितः -ता -तं, अपरिमितः -ता -तं, अविरतः -ता -तं, अनवरतः -ता -तं, असमापनीयः -या -यं.

INTERMINABLENESS, *s.* निरवधिता, अनन्तता, आनन्त्यं, सीमाहीनता.

INTERMINABLY, *adv.* अविरतं, अनारतं, अनवरतं, अनन्तं, अत्यन्तं, निरन्तरं.

To INTERMINGLE, *v. a.* सम्मिश्र् (c. 10. -मिश्रयति -यितुं), सम्मिश्रीकृ, व्यामिश्र्, विमिश्र्, संकृ (c. 6. -किरति -करितुं -रीतुं), सङ्कीर्णीकृ, सङ्करीकृ, सङ्कुलीकृ, संसृज् (c. 6. -सृजति -स्रष्टुं).

To INTERMINGLE, *v. n.* सम्मिश्रीभू, व्यामिश्रीभू, सम्मिल् (c. 6. -मिलति -मेलितुं).

INTERMINGLED, *p. p.* व्यामिश्रः -श्रा -श्रं, सम्मिश्रः -श्रा -श्रं, सम्मिश्रीकृतः -ता -तं, व्यामिश्रीभूतः -ता -तं, मिश्रितः -ता -तं, सङ्कीर्णः -र्णा -र्णं, संसृष्टः -ष्टा -ष्टं, सम्पृक्तः -क्ता -क्तं, करम्बः -म्बा -म्बं -म्बितः -ता -तं, विभिन्नः -न्ना -न्नं.

INTERMISSION, *s.* विरतिः *f.*, विरामः, अवरतिः *f.*, उपरतिः *f.*, निवृत्तिः *f.*, विनिवृत्तिः *f.*, निर्वृत्तिः *f.*, निवर्त्तनं, निर्वर्त्तनं, छेदः, विच्छेदः, उपशमः, अपशमः, क्षयः; 'without intermission,' अविरतं, अनवरतं, निरन्तरं.

To INTERMIT, *v. a.* (Cause to cease) निवृत् (c. 10. -वर्त्तयति -यितुं), निर्वृत्, विरम् (c. 10. -रमयति -यितुं), उपरम्, शम् (c. 10. शमयति -यितुं), विच्छिद् (c. 7. -छिनत्ति -छेत्तुं).

To INTERMIT, *v. n.* विरम् (c. 1. -रमति -रन्तुं), उपरम्, निवृत् (c. 1. -वर्त्तते -र्त्तितुं), निर्वृत्, विनिवृत्, शम् (c. 4. शाम्यति, शमितुं), अपया (c. 2. -याति -तुं), विगम् (c. 1. -गच्छति -गन्तुं), विच्छिद् in pass. (-छिद्यते), प्रत्यूह् (c. 1. -ऊहते -हितुं).

INTERMITTED, *p. p.* विरतः -ता -तं, उपरतः -ता -तं, निवृत्तः -त्ता -त्तं, शान्तः -न्ता -न्तं, शमितः -ता -तं, प्रशान्तः -न्ता -न्तं, विगतः -ता -तं, विच्छिन्नः -न्ना -न्नं.

INTERMITTENT, INTERMISSIVE, *a.* विरमन् -मन्ती -मत् (त्), सविरामः -मा -मं, सविच्छेदः -दा -दं.—(As a fever) विषमः -मा -मं, अन्तरितः -ता -तं; 'intermittent fever,' विषमज्वरः; 'occurring on alternate days,' एकान्तरः -रा -रं.

INTERMITTINGLY, *adv.* सविच्छेदं, सच्छेदं, विषमं, सविरामं, पर्य्यायेण.

To INTERMIX, *v. a.* सम्मिश्र् (c. 10. -मिश्रयति -यितुं), व्यामिश्र्, विमिश्र्, मिश्र्, सम्मिश्रीकृ, मिश्रीकृ. *See* INTERMINGLE.

INTERMIXED, *p. p.* मिश्रीभूतः -ता -तं, सम्मिश्रीकृतः -ता -तं, व्यामिश्रः -श्रा -श्रं, मिश्रितः -ता -तं, सङ्कुलितः -ता -तं, युक्तः -क्ता -क्तं. *See* INTERMINGLED.

INTERMIXTURE, *s.* मिश्रणं, व्यामिश्रणं, सम्मिश्रणं, मिश्रीकरणं, सम्मिश्रीकरणं, व्यतिकरः, संसर्गः, सङ्कुलनं, सम्पर्कः, सन्निपातः, साङ्कर्य्यं, सङ्करः, सङ्करीकरणं, योगः, संयोगः, मिलनं, सम्मिलनं.

INTERMONTANE, *a.* पर्व्वतमध्यस्थितः -ता -तं, गिरिमध्यस्थः -स्था -स्थं.

INTERMUNDANE, *a.* भुवनमध्यस्थितः -ता -तं, जगन्मध्यवर्त्ती -र्त्तिनी -र्त्ति (न्).

INTERMURAL, *a.* प्राकारान्तर्वर्त्ती -र्त्तिनी -र्त्ति (न्), प्राचीरान्तर्वर्त्ती &c.

INTERMUTATION, *s.* परिवर्त्तनं, परस्परपरिवर्त्तनं, विनिमयः, व्यतिहारः.

INTERNAL, *a.* अन्तरस्थः -स्था -स्थं, अन्तर्भूतः -ता -तं, अन्तर्वर्त्ती -र्त्तिनी -र्त्ति (न्), अन्तर्भवः -वा -वं, अन्तर्गतः -ता -तं, आन्तरः -री -रं, आभ्यन्तरः -री -रं, अभ्यन्तरस्थः -स्था -स्थं, आन्तरिकः -की -कं, अन्तरतमः -मा -मं, गर्भस्थः -स्था -स्थं, अन्तःस्थः -स्था -स्थं, अन्तरङ्गः -ङ्गा -ङ्गं, अभ्यन्तर in comp., अन्तर् in comp.; 'internal feelings,' अन्तरात्मा *m.* (न्), अन्तःकरणं, अन्तःशरीरं, अन्तःप्रकृतिः *f.*; 'internal consciousness,' अन्तःसंज्ञा; 'internal heat,' अन्तर्दाहः, अन्तर्ज्वलनं; 'internal nature,' अन्तर्भावः; 'internal store,' अन्तःसारः.

INTERNALLY, *adv.* (Inwardly) अन्तर्, अन्तरे, अभ्यन्तरे, मध्ये; 'internally bad,' अन्तर्दुष्टः -ष्टा -ष्टं.—(Mentally) मनसा, बुद्ध्या, अन्तःकरणेन.

INTERNATIONAL, *a.* देशानां परस्परव्यवहारसम्बन्धी -न्धिनी -न्धि or परस्परसंसर्गसम्बन्धी &c.

INTERNODE, *s.* (In botany) ग्रन्थिद्वयमध्यं, पर्व्वद्वयमध्यं.

INTERNUNCIO, *s.* उभयपक्षदूतः, उभयपक्षवार्त्ताहरः.

To INTERPOLATE, *v. a.* छलेन or कपटेन निविश् (c. 10. वेशयति -यितुं) or क्षिप् (c. 6. क्षिपति, क्षेप्तुं) or निक्षिप् or अन्तःक्षिप्, मिथ्या अभिलिख् (c. 6. -लिखति -लेखितुं), मिथ्या क्लृप् (c. 10. कल्पयति -यितुं), कृत्रिमलेख्यं कृ.

INTERPOLATED, *p. p.* छलेन निवेशितः -ता -तं or क्षिप्तः -प्ता -प्तं or अन्तःक्षिप्तः -प्ता -प्तं, मिथ्याभिलिखितः -ता -तं, कपटेन कल्पितः -ता -तं, मिथ्याकल्पितः -ता -तं.

INTERPOLATION, *s.* छलेन निवेशनं or क्षेपणं or अन्तःक्षेपणं, कपटेन or

मिथ्या अभिलिखनं or कल्पनं, मिथ्याकल्पनं.—(Matter interpolated) छलेन निवेशितं वाक्यं or लेख्यं, मिथ्याभिलिखितं, मिथ्याकल्पितं.

INTERPOLATOR, *s.* छलेन निवेशनकारी *m.* (न्) or क्षेपणकर्त्ता *m.* (र्तृ)

To INTERPOSE, *v. a.* अन्तर्धा (c. 3. -दधाति -धत्ते -धातुं), व्यवधा, मध्ये स्था in caus. (स्थापयति -यितुं), अन्तः स्था, अन्तर्गतं -तां कृ, अन्तर्गम् (c. 10. -गमयति -यितुं), व्यवहितं -तां कृ, अन्तरितं -तां कृ.—(Introduce) मध्ये प्रविश् (c. 10. -वेशयति -यितुं) or निविश्.

To INTERPOSE, *v. n.* मध्ये स्था (c. 1. तिष्ठति, स्थातुं) or वृत् (c. 1. वर्त्तते -र्त्तितुं), अन्तर्गम् (c. 1. -गच्छति -गन्तुं), अन्तरि (c. 2. -एति -तुं), मध्यवर्त्ती -र्त्तिनी -र्त्ति भू.—(Intrude) मध्ये प्रविश् (c. 6. -विशति -वेष्टुं).

INTERPOSED, *p. p.* व्यवहितः -ता -तं, अन्तर्गतः -ता -तं, अन्तरितः -ता -तं, मध्ये स्थापितः -ता -तं or प्रवेशितः -ता -तं, प्रत्याकलितः -ता -तं.

INTERPOSER, *s.* मध्यवर्त्ती *m.* (न्), मध्यस्थः -स्थायी *m.* (न्), अन्तर्गामी *m.*

INTERPOSITION, *s.* मध्यस्थता, मध्यवर्त्तित्वं, माध्यस्थ्यं, अन्तरायः, अन्तर्गमनं, अन्तरागमनं, व्यवधानं, व्यवहितत्वं, अन्तर्गतकृत्यं, अन्तर्गतयत्नः, व्यवधायकत्वं, अनुसरणं.

To INTERPRET, *v. a.* व्याख्या (c. 2. -ख्याति -तुं), अर्थं व्याख्या or विवृ (c. 5. -वृणोति -वरितुं -रीतुं) or प्रकाश् (c. 10. -काशयति -यितुं), अर्थं बुध् (c. 10. बोधयति -यितुं) or प्रबुध् or व्यक्तीकृ or स्पष्टीकृ or व्याकृ or निरूप् (c. 10. -रूपयति -यितुं), व्याहृ (c. 1. -हरति -हर्त्तुं), विब्रू (c. 2. -ब्रवीति), व्याचक्ष् (c. 2. -चष्टे), परिशुध् (c. 10. -शोधयति -यितुं), प्रवच् (c. 2. -वक्ति -क्तुं), अर्थं कृ, विवरणं कृ.—(Translate) भाषान्तरीकृ.

INTERPRETABLE, *a.* व्याख्येयः -या -यं, विवरणीयः -या -यं, व्याख्यायोग्यः -ग्या -ग्यं.

INTERPRETATION, *s.* व्याख्या -ख्यानं, विवरणं, विवृतिः *f.*, व्याकरणं, व्याकृतिः *f.*, स्पष्टीकरणं, निरूपणं, वार्त्तिकं, अर्थकरणं, अर्थबोधनं, अर्थबोधकं वाक्यं; 'of dreams,' स्वप्नविचारः, शाकुनिकं; 'of a sloka,' श्लोकलापनं.—(Meaning given, commentary) अर्थः, व्याख्या, टीका, भाष्यं; 'doubtful interpretation,' सन्दिग्धार्थः; 'far-fetched interpretation,' क्लिष्टार्थः.—(Translation) भाषान्तरं.

INTERPRETATIVE, *a.* वाचकः -का -कं, व्याख्याकारी -रिणी -रि (न्), विवरणकारी &c., अर्थबोधकः -का -कं, अर्थकथकः -का -कं, प्रकाशकः -का -कं.

INTERPRETED, *p. p.* व्याख्यातः -ता -तं, विवृतः -ता -तं, व्याकृतः -ता -तं, प्रकाशितः -ता -तं, स्पष्टीकृतः -ता -तं, निरूपितः -ता -तं, व्याहृतः -ता -तं, वर्णितः -ता -तं, कृतविवरणः -णा -णं.—(Translated) भाषान्तरीकृतः -ता -तं.

INTERPRETER, *s.* व्याख्याता *m.* (तृ), व्याख्याकारी *m.* (न्), विवरणकर्त्ता *m.* (र्तृ), अर्थबोधकः, अर्थशोधकः, अर्थप्रकाशकः, अर्थप्रवक्ता *m.* (क्तृ), अर्थविज्ञापकः, वाचकः, फलवक्ता *m.*; 'of dreams,' स्वप्नविचारी *m.* (न्), स्वप्नप्रकाशकः.—(Translator, one who speaks two languages) द्विभाषावादी *m.* (न्), भाषान्तरवक्ता *m.*, द्विभाषी *m.* (न्), भाषाद्वयवक्ता *m.*—(Commentator) भाष्यकरः, भाष्यकारः.

INTERREGNUM, *s.* अनायकत्वं, अराजकत्वं, अराजकं, अनायकं, राजद्वयमध्यगत अराजककालः or अनायककालः.

To INTERROGATE, *v. a.* प्रच्छ् (c. 6. पृच्छति, प्रष्टुं), अनुप्रच्छ्, परिप्रच्छ्, समनुप्रच्छ्, अभिप्रच्छ्, प्रश्नं कृ, पृच्छनं कृ, अनुयुज् (c. 7. -युनक्ति -युंक्ते -योक्तुं), प्रश्नेन परीक्ष् (c. 1. -ईक्षते -क्षितुं), प्रश्नोत्तरक्रमेण परीक्ष्, ज्ञा in des. (जिज्ञासते -ते -सितुं).

INTERROGATED, *p. p.* पृष्टः -ष्टा -ष्टं, अभिपृष्टः -ष्टा -ष्टं, अनुयुक्तः -क्ता -क्तं.

INTERROGATION, *s.* प्रश्नः, पृच्छा -च्छनं, प्रच्छनं -ना, अनुयोगः, पर्य्यनुयोगः, जिज्ञासा, कथङ्कथिकता; 'note of interrogation,' प्रश्नचिह्नं, प्रश्नसूचकचिह्नं.

[illegible], *a.* पृच्छकः -का -कं, प्रश्नकारकः -का -कं, प्रश्नरूपः -पा -पं, प्रश्नार्थकः -का -कं, प्रश्नात्मकः -का -कं, प्रश्नसूचकः -का -कं.

INTERROGATIVE, *s.* (Word used in asking questions) प्रश्नार्थकसर्व्वनाम *n.* (न्). Interrogative words are such as किं, किमु, किंस्वित्.

INTERROGATIVELY, *adv.* प्रश्नरूपेण, प्रश्नक्रमेण, अनुयोगरूपेण, प्रश्नतस्, अनुयोगतस्.

INTERROGATOR, *s.* प्रष्टा *m.* (ष्टृ), पृच्छकः, प्रच्छकः, प्रश्नकर्त्ता *m.* (र्तृ), अनुयोक्ता *m.* (क्तृ), जिज्ञासुः *m.*, कथङ्कथिकः, कथङ्कथितः.

INTERROGATORY, *s.* (A question) प्रश्नः, अनुयोगः, पृच्छा -च्छनं.

INTERROGATORY, *a.* *See* INTERROGATIVE, *a.*

To INTERRUPT, *v. a.* भञ्ज् (c. 7. भनक्ति, भंक्तुं), विछिद् (c. 7. -छिनत्ति -छेत्तुं), छिद्, खण्ड् (c. 10. खण्डयति -यितुं), भिद् (c. 7. भिनत्ति, भेत्तुं), लुप् (c. 6. लुम्पति, लोप्तुं, c. 10. लोपयति -यितुं), विलुप्, बाध् (c. 1. बाधते -धितुं), विहन् (c. 2. -हन्ति -न्तुं), व्याहन्, प्रतिहन्, निवृ (c. 10. -वारयति -यितुं), प्रतिबन्ध् (c. 9. -बध्नाति -बन्द्धुं), विघ्न (nom. विघ्नयति -यितुं), भङ्गं कृ, विच्छेदं कृ, खण्डनं कृ; 'he will interrupt my meditation by his complaints,' परिदेवनैः समाधिं मे भंक्ष्यति.

INTERRUPTED, *p. p.* विच्छिन्नः -न्ना -न्नं, भग्नः -ग्ना -ग्नं, खण्डितः -ता -तं, सविच्छेदः -दा -दं, सच्छेदः -दा -दं, सभङ्गः -ङ्गा -ङ्गं, लुप्तः -प्ता -प्तं, बाधितः -ता -तं, व्याहतः -ता -तं, प्रतिहतः -ता -तं, विघ्नितः -ता -तं.

INTERRUPTEDLY, *adv.* सविच्छेदं, सच्छेदं, सभङ्गं, विच्छिन्नं, खण्डतस्.

INTERRUPTER, *s.* विच्छेदकारी *m.* (न्), भङ्गकारी *m.*, भंक्ता *m.* (क्तृ), खण्डनकृत्, व्याघातकृत्, विघ्नकर्त्ता *m.* (र्तृ), बाधकः.

INTERRUPTION, *s.* भङ्गः, विच्छेदः, छेदः, खण्डनं, अन्तरायः, व्याघातः, विघ्नः, बाधः -धा, प्रतिहतिः *f.*, रोधः, प्रतिरोधः, निवारणं, स्तम्भः, प्रतिबन्धः.

To INTERSECT, *v. a.* and *n.* परस्परं छिद् (c. 7. छिनत्ति, छेत्तुं) or परिछिद् or विच्छिद्, परस्परच्छेदं कृ, परिच्छेदं कृ.

INTERSECTED, *p. p.* परिच्छिन्नः -न्ना -न्नं, परस्परछिन्नः -न्ना -न्नं, विच्छिन्नः -न्ना -न्नं.

INTERSECTION, *s.* परिच्छेदः, विच्छेदः, छेदः, परस्परच्छेदः -दनं, परस्परविच्छेदः.

To INTERSPERSE, *v. a.* अन्यद्रव्यमध्ये इतस्ततः प्रक्षिप् (c. 6. -क्षिपति -क्षेप्तुं) or कॄ (c. 6. किरति, करितुं -रीतुं) or विकॄ or अवकॄ or सङ्कॄ, अन्यद्रव्यैः सह मिश्र् (c. 10. मिश्रयति -यितुं) or सम्मिश्र् or व्यामिश्र्, प्रतिमध्यावकिरणं कृ.

IRREGULARLY, *adv.* अविधितस्, अविधानतस्, अविधिवत्, विधिविरुद्धं, विधिविरोधेन, नियमविरुद्धं, अनियमतस्, अयथाविधि, अक्रमेण, क्रमविरुद्धं, विसूत्रं, अव्यवस्थितं, अयथाशास्त्रं.

IRRELATIVE, *a.* असम्बन्धी -न्धिनी -न्धि (न्), निःसम्बन्धः -न्धा -न्धं, सम्बन्धहीनः -ना -नं, असङ्गः -ङ्गा -ङ्गं, निःसङ्गः -ङ्गा -ङ्गं, अविषयकः -का -कं, अनानुषङ्गिकः -की -कं.

IRRELEVANCY, *s.* अप्रासङ्गिकत्वं, अप्रस्तुतता, अप्रसङ्गः, अविषयत्वं, निर्विषयता, अनन्वयः, अन्वयाभावः, असम्बन्धः, असम्पर्कः, असङ्गतत्वं, अप्रयुक्तिः *f.*

IRRELEVANT, *a.* अप्रासङ्गिकः -की -कं, अप्रस्तुतः -ता -तं, निर्विषयः -या -यं, अनन्वितः -ता -तं, असम्बन्धी -न्धिनी -न्धि (न्), अप्रसक्तः -क्ता -क्तं, प्रसङ्गवाह्यः -ह्या -ह्यं, प्रस्तुतवहिर्भूतः -ता -तं, असङ्गतः -ता -तं, अप्रकृतः -ता -तं, अप्राकरणिकः -की -कं, असम्पर्कीयः -या -यं, अनुपपन्नः -न्ना -न्नं, अप्रयुक्तः -क्ता -क्तं, अयौक्तिकः -की -कं.

IRRELEVANTLY, *adv.* अप्रस्तुतं, निर्विषयं, प्रस्तुतवहिस्, असम्बद्धं, असम्बन्धेन, असङ्गतं, अप्रयुक्तं, असम्पर्केण, अप्रसक्तं.

IRRELIGION, *s.* अधर्म्मः -र्म्मत्वं, वैधर्म्यं, निर्धर्म्मत्वं, धर्म्मलोपः, धर्म्महीनता, अपूजा, अभक्तिः *f.*, भक्तिहीनता, अभक्तत्वं, देवनिन्दा, अपुण्यत्वं, दुष्टता, पापिष्ठत्वं, सपापत्वं, दुष्कृतं.

IRRELIGIOUS, *a.* अधर्म्मी -र्म्मिणी -र्म्मि (न्), अधार्म्मिकः -की -कं, निर्धर्म्मः -र्म्मा -र्म्मं, अधर्म्मिष्ठः -ष्ठा -ष्ठं, धर्म्महीनः -ना -नं, त्यक्तधर्म्मा -र्म्मा -र्म्म (न्), अपूजकः -का -कं, अभक्तः -क्ता -क्तं, भक्तिहीनः -ना -नं, देवनिन्दकः -का -कं, दुष्टः -ष्टा -ष्टं, अपुण्यः -ण्या -ण्यं, असाधुः -ध्वी -धु, पापी -पिनी -पि (न्),

IRRELIGIOUSLY, *adv.* अधर्म्मतस्, अधर्म्मेण, अधार्म्मिकवत्, अपुण्यवत्, पापिष्ठं.

IRREMEABLE, *a.* अपुनरागम्यः -म्या -म्यं, अप्रत्यागम्यः &c., अपरावर्त्यः -र्त्या -र्त्यं.

IRREMEDIABLE, *a.* अप्रतिकार्य्यः -र्य्या -र्य्यं, अशक्यप्रतीकारः -रा -रं, अप्रतिकारः -रा -रं, अविद्यमानप्रतीकारः -रा -रं, निरुपायः -या -यं, अनुपायः -या -यं, निरुपायी -यिनी -यि (न्), उपायहीनः -ना -नं, उपायातीतः -ता -तं, अशक्योपायः -या -यं, अचिकित्स्यः -त्स्या -त्स्यं, अचिकित्सनीयः -या -यं, चिकित्सितुम् अशक्यः -क्या -क्यं, असमाधेयः -या -यं, अप्रतिसमाधेयः -या -यं.

IRREMEDIABLENESS, *s.* निरुपायत्वं, अप्रतिकार्य्यत्वं, प्रतीकारहीनता, असमाधेयता.

IRREMEDIABLY, *adv.* निरुपायं, यथा प्रतिकर्त्तुं न शक्यते तथाप्रकारेण, यथा उपायो न विद्यते तथा.

IRREMISSIBLE, *a.* अक्षन्तव्यः -व्या -व्यं, अमोचनीयः -या -यं, क्षमानर्हः -र्हा -र्हं.

IRREMOVABLE, *a.* अनपादेयः -या -यं, अनपहरणीयः -या -यं, अपरिहार्य्यः -र्य्या -र्य्यं, अनिःसारणीयः -या -यं, अनपनेतव्यः -व्या -व्यं, अचलः -ला -लं, स्थिरः -रा -रं.

IRREPARABLE, *a.* असाध्यः -ध्या -ध्यं, असमाधनीयः -या -यं, असन्धेयः -या -यं, असमाधेयः -या -यं, अप्रतिसमाधेयः -या -यं, अप्रतिकार्य्यः -र्य्या -र्य्यं, अप्रतिकारः -रा -रं, अशक्यप्रतीकारः -रा -रं, अचिकित्सनीयः -या -यं, अनुद्धार्य्यः -र्य्या -र्य्यं, अनुद्धरणीयः -या -यं.

IRREPARABLENESS, *s.* असाध्यता, अप्रतिकार्य्यत्वं, असमाधेयता, अनुद्धार्य्यत्वं.

IRREPARABLY, *adv.* असमाधनीयं, यथा प्रतिकारो न विद्यते तथा, अचिकित्सनीयं, अप्रतिसमाधेयं.

IRREPREHENSIBLE, *a.* अनिन्द्यः -न्द्या -न्द्यं, अनिन्दनीयः -या -यं, निर्दोषः -षा -षं, दोषशून्यः -न्या -न्यं, अगर्ह्यः -र्ह्या -र्ह्यं, अविगर्ह्यः -र्ह्या -र्ह्यं.

IRREPREHENSIBLENESS, *s.* अनिन्द्यता, अनिन्दनीयता, दोषशून्यता, निर्दोषत्वं.

IRREPREHENSIBLY, *adv.* अनिन्दनीयं, निरपराधं, अनपराधेन, दोषं विना.

IRREPRESSIBLE, *a.* अनिग्रहीतव्यः -व्या -व्यं, दुर्निग्रहः -हा -हं, अनियन्तव्यः -व्या -व्यं, अनिवार्य्यः -र्य्या -र्य्यं, असंहरणीयः -या -यं, अयन्त्रणीयः -या -यं.

IRREPROACHABLE, *a.* अनिन्द्यः -न्द्या -न्द्यं, अनिन्दनीयः -या -यं, अनिन्दितः -ता -तं, अगर्ह्यः -र्ह्या -र्ह्यं, अविगर्ह्यः &c., अविगर्हितः -ता -तं, अपरिवाद्यः -द्या -द्यं, अनपवाद्यः -द्या -द्यं, अनवद्यः -द्या -द्यं, निरवद्यः -द्या -द्यं, निर्दोषः -षा -षं, निरपराधः -धा -धं, अपरिभाषणीयः -या -यं, अकुत्सितः -ता -तं, अनवगीतः -ता -तं, निष्कलङ्कः -ङ्का -ङ्कं, अदूष्यः -ष्या -ष्यं, अवाच्यः -च्या -च्यं, निर्वाच्यः -च्या -च्यं, अवचनीयः -या -यं, अदुर्वृत्तः -त्ता -त्तं.

IRREPROACHABLENESS, *s.* अनिन्द्यता, अनिन्दनीयता, अगर्ह्यत्वं, अपरिवाद्यता.

IRREPROACHABLY, *adv.* अनिन्दनीयं, अनिन्दितं, अगर्हणीयं, अविगर्हितं.

IRRESISTIBLE, *a.* अप्रतिकार्य्यः -र्य्या -र्य्यं, अप्रतीकार्य्यः &c., अनिवार्य्यः

-र्य्या -र्य्यं, अनिवारणीयः -या -यं, अनिवारः -रा -रं, दुर्निवारः -रा -रं, अवार्य्यः -र्य्या -र्य्यं, निर्वार्य्यः -र्य्या -र्य्यं, अनवग्रहः -हा -हं, दुर्निग्रहः -हा -हं, असंहार्य्यः -र्य्या -र्य्यं, दुर्धरः -रा -रं, निर्धारणीयः -या -यं, निर्धार्य्यः -र्य्या -र्य्यं, अबाध्यः -ध्या -ध्यं, अबाधनीयः -या -यं, अनतिक्रमणीयः -या -यं, अप्रतिहतः -ता -तं, अप्रतिद्वन्द्वः -न्द्वा -न्द्वं, अप्रतिदमनः -ना -नं.

IRRESISTIBLENESS, *s.* अप्रतिकार्य्यत्वं, अनिवार्य्यता, अनिवारणीयता, अवारणीयत्वं, दुर्निग्रहत्वं, अबाध्यत्वं.

IRRESISTIBLY, *adv.* अनिवारणीयं, अवारणीयं, अप्रतिकार्य्यं, दुर्निग्रहं, यथा निवारयितुं न शक्यते तथाप्रकारेण.

IRRESOLUTE, *a.* अस्थिरमतिः -तिः -ति, अस्थिरचित्तः -त्ता -त्तं, अस्थिरबुद्धिः -द्धिः -द्धि, अस्थिरमनस्कः -स्का -स्कं, चञ्चलबुद्धिः -द्धिः -द्धि, चञ्चलवृत्तिः -त्तिः -त्ति, चलचित्तः -त्ता -त्तं, विकल्पशीलः -ला -लं, विकल्पयन् -यन्ती -यत् (त्), संशयात्मा -त्मा -त्म (न्), सन्दिग्धमतिः -तिः -ति, संशयापन्नमानसः -सा -सं, चपलात्मकः -का -कं, अधीरः -रा -रं, अदृढमनस्कः -स्का -स्कं, अनवस्थितः -ता -तं, धैर्य्यहीनः -ना -नं, तरलः -ला -लं.

IRRESOLUTELY, *adv.* अस्थिरं, अधीरं, स्थैर्य्यपूर्व्वं, धैर्य्यपूर्व्वं, अधैर्य्येण, अस्थैर्य्येण, अस्थिरचेतसा, चञ्चलबुद्ध्या, विकल्पशीलत्वात्, चञ्चलं, चपलवत्.

IRRESOLUTION, *s.* अस्थैर्य्यं, अस्थिरता, अधैर्य्यं, अधीरता, चित्तास्थैर्य्यं, विकल्पशीलता, बुद्धिचाञ्चल्यं, चञ्चलबुद्धिः *f.*, अस्थिरबुद्धिः *f.*, चलचित्तता, चञ्चलत्वं, अदृढता, अधृतिः *f.*, अधारणा, चपलता, चापल्यं, अनवस्थितिः *f.*

IRRESPECTIVE, *a.* निरपेक्षः -क्षा -क्षं, अनपेक्षः -क्षा -क्षं, अपेक्षाहीनः -ना -नं, निर्व्यपेक्षः -क्षा -क्षं, अप्रतीक्षकः -का -कं.

IRRESPECTIVELY, *adv.* निरपेक्षं, अनपेक्षं, अनपेक्ष्य, अप्रतीक्ष्य, अनुद्दिश्य.

IRRESPONSIBILITY, *s.* अनुयोगानधीनता, अपृच्छाधीनता, प्रश्नायोग्यत्वं, अननुयोज्यता.

IRRESPONSIBLE, *a.* अननुयोगाधीनः -ना -नं, अनुयोगानधीनः -ना -नं, अपृच्छाधीनः -ना -नं, अप्रश्नयोग्यः -ग्या -ग्यं, पृच्छानर्हः -र्हा -र्हं, अननुयोज्यः -ज्या -ज्यं, अननुयोक्तव्यः -व्या -व्यं.

IRRESTRAINABLE, *a.* अनिवार्य्यः -र्य्या -र्य्यं, अनिग्रहीतव्यः -व्या -व्यं, दुर्निग्रहः -हा -हं, अनिवर्त्तयितव्यः -व्या -व्यं, अनिवर्त्तनीयः -या -यं.

IRRETRIEVABLE, *a.* अपुनःप्राप्यः -प्या -प्यं, पुनरप्राप्यः -प्या -प्यं, अपुनर्लभ्यः -भ्या -भ्यं, पुनरलभ्यः -भ्या -भ्यं, अनुद्धरणीयः -या -यं, अनुद्धार्य्यः -र्य्या -र्य्यं, असमाहार्य्यः -र्य्या -र्य्यं, अप्रतिसमाधेयः -या -यं.

IRRETRIEVABLENESS, *s.* अपुनःप्राप्यता, अनुद्धरणीयता, अप्रतिसमाधेयत्वं.

IRRETRIEVABLY, *adv.* अनुद्धरणीयं, यथा प्रतिसमाधातुं न शक्यते तथा.

IRREVERENCE, *s.* अपूजा, अपमानं, अवमानं, अनादरः, अवज्ञानं, अवज्ञा, असम्मानं, परिभवः, परिभूतिः *f.*, परिभावः, अवधीरणं, उपेक्षा, अमर्य्यादा.

IRREVERENT, *a.* अपूजकः -का -कं, अपमानी -निनी -नि (न्), अवमानी &c., अपमानकारी &c., अवज्ञाकारी &c., अनादरकारी &c., परिभावी -विनी -वि (न्), अनादरी -रिणी -रि (न्), अनादरबुद्धिः -द्धिः -द्धि.

IRREVERENTLY, *adv.* अपूजया, अपूजापूर्व्वं, सावमानं, सावज्ञानं, अनादरेण.

IRREVERSIBLE, *a.* अपरावर्त्यः -र्त्या -र्त्यं, अपरावर्त्तनीयः -या -यं, अनिवर्त्यः -र्त्या -र्त्यं, अनिवर्त्तनीयः -या -यं, परावर्त्तनाशक्यः -क्या -क्यं, परावर्त्तनानर्हः -र्हा -र्हं, अलोप्यः -प्या -प्यं, अलोपनीयः -या -यं, अखण्डनीयः -या -यं, अखण्ड्यः -ण्ड्या -ण्ड्यं.

IRREVERSIBLENESS, *s.* अपरावर्त्यत्वं, अपरावर्त्तनीयता, अलोप्यता, अखण्ड्यत्वं.

IRREVERSIBLY, *adv.* अपरावर्त्तनीयं, यथा परावर्त्तितुं न शक्यते तथा.

IRREVOCABLE, *a.* अपरावर्त्यः -र्त्या -र्त्यं, अविकार्य्यः -र्य्या -र्य्यं, अनन्यथाकरणीयः -या -यं.

IRREVOCABLY, *adv.* अपरावर्त्तनीयं, अपरिवर्त्तनीयं, अनन्यथाकरणीयं.

To IRRIGATE, *v. a.* सिच् (c. 6. सिञ्चति, सेक्तुं), अभिषिच्, अवसिच्, जलेन प्लु (c. 10. प्लावयति -यितुं) or क्लिद् (c. 10. क्लेदयति -यितुं) or अभ्युक्ष् (c. 1. -उक्षति -क्षितुं) or प्रोक्ष्, अभितृप् (c. 1. -तर्पति -र्पितुं), प्रणालिकासिञ्चनं कृ.

IRRIGATED, *p. p.* सिक्तः -क्ता -क्तं, जलसिक्तः &c., सलिलसिक्तः &c., जलप्लावितः -ता -तं, समुक्षितः -ता -तं.

IRRIGATION, *s.* सेकः, सेचनं, सिञ्चनं, निषेकः, अवसेकः, अवसेचनं, जलप्लावनं, क्लेदनं, अभ्युक्षणं, प्रोक्षणं, प्रणालिकासिञ्चनं.

IRRIGUOUS, *a.* जलसिक्तः -क्ता -क्तं, सिक्तः -क्ता -क्तं, जलाढ्यः -ढ्या -ढ्यं, अनूपः -पा -पं, बहूदकः -का -कं, सजलः -ला -लं, आर्द्रः -र्द्रा -र्द्रं, समुन्नः -न्ना -न्नं.

IRRISION, *s.* उपहासः, अवहासः, अपहासः, परिहासः, हास्यं, अवहेला.

IRRITABILITY, *s.* शीघ्रकोपित्वं, कोपशीलता, क्रोधशीलता, सुक्रोधनीयता, चण्डस्वभावः, उच्चण्डता, सुखोत्तापनीयत्वं.

IRRITABLE, *a.* (Easily made angry) शीघ्रकोपी -पिनी -पि (न्), सुलभकोपः -पा -पं, सुलभक्रोधः -धा -धं, शीघ्रक्रोधी &c., सुलभमन्युः -न्युः -न्यु, सुक्रोधनीयः -या -यं, सुप्रकोपणीयः -या -यं, कोपशीलः -ला -लं, क्रोधशीलः -ला -लं, सन्तापशीलः -ला -लं, कोपिष्ठः -ष्ठा -ष्ठं, क्रोधिष्ठः -ष्ठा -ष्ठं, चण्डस्वभावः -वा -वं, पित्तस्वभावः -वा -वं, पित्तवेगी -गिनी -गि (न्), उच्चण्डः -ण्डा -ण्डं, उग्रस्वभावः -वा -वं.—(Easily excited) शीघ्रोत्तेजनीयः -या -यं, सुखोत्तापनीयः -या -यं.

To IRRITATE, *v. a.* कुप् (c. 10. कोपयति -यितुं), प्रकुप्, सङ्कुप्, क्रुध् (c. 10. क्रोधयति -यितुं), कोपं जन् (c. 10. जनयति -यितुं), क्रोधं जन्. (Excite) उत्तप् (c. 10. -तापयति -यितुं), सन्तप्, उत्तिज् (c. 10. -तेजयति -यितुं).

IRRITATED, *p. p.* प्रकोपितः -ता -तं, प्रकुपितः -ता -तं, कुपितः -ता -तं, जातकोपः -पा -पं, जातक्रोधः -धा -धं, जातामर्षः -र्षा -र्षं, उपजातक्रोधः -धा -धं, इद्धमन्युः -न्युः -न्यु.—(Excited) उत्तेजितः -ता -तं, समुत्तेजितः -ता -तं, उत्तापितः -ता -तं, उत्तप्तः -प्ता -प्तं.

IRRITATING, *part.* or *a.* कोपजनकः -का -कं, क्रोधजनकः -का -कं, उत्तापकः -का -कं, सन्तापकः -का -कं, चित्तोत्तापकारी -रिणी -रि (न्).

IRRITATION, *s.* (The act) प्रकोपः -पणं, क्रोधकरणं, कोपकरणं.—(State) कोपः, क्रोधः, अमर्षः, विमर्षः, मन्युः *m.*, क्रोधावेशः, क्रुद्धता, रागावेशः.—(Excitement) उत्तापः, उत्तप्तता, सन्तापः, सन्तप्तता, उत्तेजनं, समुत्तेजनं, दाहः; 'irritation of the throat,' कासः, क्षवथुः *m.*

IRRITATIVE, *a.* उत्तापकः -का -कं, सन्तापकः -का -कं, दाहजनकः -का -कं.

IRRUPTION, *s.* अवस्कन्दः -न्दनं, उपद्रवः, अभिद्रवः, उपप्लवः, विप्लवः, अभिक्रमः -मणं, आक्रमः, अभिमर्द्दः, अभिग्रहः, अवलुम्पनं; 'to make an irruption,' अवस्कन्द् (c. 1. -स्कन्दति -स्कन्तुं), समवस्कन्द्, आस्कन्द्, उपद्रु (c. 1. -द्रवति -द्रोतुं), अभिद्रु, समाद्रु, अभिधाव् (c. 1. -धावति -वितुं).

ISCHURETIC, *a.* मूत्रावरोधघ्नः -घ्नी -घ्नं, मूत्रावष्टम्भनाशकः -का -कं.

ISCHURY, *s.* मूत्रावरोधः, मूत्रावष्टम्भः, मूत्रकृच्छ्रं, विष्टम्भः, मूत्रानुबन्धः विबन्धः, आनाहः.

ISINGLASS, *s.* अभ्रं -भ्रकं, मत्स्यान्त्रनिर्म्मितम् अतिसंलग्नभावं श्यानद्रव्यं.

ISLAND, *s.* द्वीपः -पं, अन्तरीपं, उपद्वीपं, पयोगडं; 'one of alluvial formation,' पुलिनं.

ISLAND, *a.* द्वीप्यः -प्या -प्यं, द्वैप्यः -प्या -प्यं, द्वैपः -पी -पं, द्वीपसम्बन्धी -न्धिनी -न्धि (न्), द्वीपस्थः -स्था -स्थं.

ISLANDER, *s.* द्वीपवासी *m.* (न्), द्वीपनिवासी *m.*, द्वीपी *m.* (न्), द्वीपस्थः, द्वीपवासः, द्वैपः, द्वीप्यः.

ISLE, *s.* द्वीपः -पं, अन्तरीपं. *See* ISLAND.

ISLET, *s.* क्षुद्रद्वीपः -पं, अल्पद्वीपः -पं, उपद्वीपः -पं.

ISOCHRONAL, ISOCHRONOUS, *a.* समकालिकः -की -कं, समसंख्यकालः -ला -लं.

To ISOLATE, *v. a.* वियुज् (c. 7. -युनक्ति -योक्तुं), विछिद् (c. 7. -छिनत्ति -छेत्तुं), अवछिद्, अन्यभेदं कृ, अन्यविभेदं कृ, अन्यवियोगं कृ, परविश्लेषं कृ, पृथक् स्था in caus. (स्थापयति -यितुं). *See To* INSULATE.

ISOLATED, *p. p.* असक्तः -क्ता -क्तं, निःसङ्गः -ङ्गा -ङ्गं, गतसङ्गः -ङ्गा -ङ्गं, वियुक्तः -क्ता -क्तं, विभिन्नः -न्ना -न्नं, परविभिन्नः -न्ना -न्नं, अन्यविश्लिष्टः -ष्टा -ष्टं, व्यासक्तः -क्ता -क्तं, अनन्यसंसक्तः -क्ता -क्तं, अन्यासक्तः -क्ता -क्तं, पृथक्स्थितः -ता -तं, स्वतन्त्रः -न्त्रा -न्त्रं. *See* INSULATED.

ISOLATION, *s.* असङ्गः, परवियोगः, परविभेदः, विच्छेदः, अवच्छेदः, व्यासङ्गः, विभिन्नता, पृथक्त्वं. *See* INSULATION.

ISOSCELES, *a.* समद्विभुजः -जा -जं, समद्विबाहुः -हुः -हु, समद्विपार्श्वः -र्श्वा -र्श्वं; 'isosceles triangle,' समद्विबाहुकत्रिभुजः, तुल्यद्विबाहुकत्रिभुजः द्विसमत्रिभुजः -जा; 'angles at the base of an isosceles triangle,' तुल्यद्विबाहुकत्रिभुजस्य भूलग्नकोणौ *m.* du.

ISSUE, *s.* (Egress) निःसरणं, निस्सरणं, निर्गमः, निर्गतिः *f.*, निर्याणं, निष्क्रमणं, विनिर्गमः, बहिर्गमनं, बहिस्सरणं, निःसारः -रणं, अपसारः, अपसरणं, प्रवहः.—(Event, consequence, last result) गतिः *f.*, उद्गतं, अनुवृत्तं, संवृत्तं, उत्पन्नं, फलं, फलमुत्तरं, परिणामः, शेषः, अन्तः, सिद्धिः *f.*, प्रयुक्तिः *f.*, अन्वयः, निष्पन्नं; 'happy issue,' सद्गतिः *f.*, शुभगतिः *f.*, शुभफलं; 'expectation of a favourable issue,' शुभफलाकांक्षा.—(Progeny) प्रजा, अपत्यं, सन्तानं, सन्ततिः *f.*, अन्वयः, तन्तुः *m.* (Flux) आमातिसारः, रक्तातिसारः, रक्तशुद्धिः *f.*—(Ulcer, fontanel) कृत्रिमव्रणः.

To ISSUE, *v. n.* (Flow out) प्रस्रु (c. 1. -स्रवति -स्रोतुं), निःसृ, सु.—(Pass out, go out) निःसृ (c. 1. -सरति -सर्तुं), विनिःसृ, निर्गम् (c. 1. -गच्छति -गन्तुं), विनिर्गम्, निर्या (c. 2. -याति -तुं), विनिर्या, निष्क्रम् (c. 1. -क्रामति -क्रमितुं), विनिष्क्रम्, अभिनिष्क्रम्, निश्चर् (c. 1 -चरति -रितुं), विनिश्चर्, निरि (c. 2. -एति -तुं), बहिर्गम्.—(Proceed, arise) उत्पद् (c. 4. -पद्यते -पत्तुं), जन् (c. 4. जायते, जनितुं), प्रवृत् (c. 1. -वर्त्तते -र्त्तितुं), प्रभू.—(Close, end) निष्पद्, विगम्, समाप् in pass. (-आप्यते), निवृत्, अपया.

To ISSUE, *v. a.* (Send out) निःसृ (c. 10. -सारयति -यितुं), प्रचल् (c. 10. -चालयति -यितुं), प्रचर् (c. 10. -चारयति -यितुं), प्रचलीकृ.—(Make public) प्रकाश् (c. 10. -काशयति -यितुं), ख्या in caus. (ख्यापयति -यितुं), घुष् (c. 10. घोषयति -यितुं), विघुष्, प्रसिद्धीकृ.

ISSUED, *p. p.* निःसृतः -ता -तं, निर्गतः -ता -तं, प्रसुतः -ता -तं, उत्पन्नः -न्ना -न्नं.

ISSUELESS, *s.* असन्तानः -ना -नं, अनपत्यः -त्या -त्यं, अप्रजः -जा -जं, अप्रसूतः -ता -तं, निःसन्तानः -ना -नं, निरन्वयः -या -यं, निर्वंशः -शा -शं

ISTHMUS, *s.* संयोगभूमिः *f.*, योगभूमिः *f.*, सम्बन्धभूमिः *f.*

IT, *pron.* तद्, एतद्, इदं. Sometimes 'it' is not expressed, but is inherent in the verb; as, 'it is well ascertained that the figure of the earth is globular,' पृथिवी गोलाकारा भवति इति सुनिश्चितं.

ITALIAN, *a.* इटालिदेशसम्बन्धी -न्धिनी -न्धि (न्), इटालिदेशजः -जा -जं, इटालिदेशीयः -या -यं, इटालिदेशस्थः -स्था -स्थं.

ITALICS, *s. pl.* इटालिकसंज्ञको मुद्राक्षरविशेषः.

ITCH, *s.* (The disease) कण्डूः *f.*, कण्डुः *f.*, खर्जूः *f.*, कच्छूः *f.*, कच्छुः *f.*, सुकण्डुः *f.*, सुकण्डूः *f.*, खसः, पाम *n.* -मा *f.* (न्), कण्डूतिः *f.*—(An itching) कण्डूतिः *f.*, कण्डूयनं, कण्डूया.—(Eager desire) अतिस्पृहा, अतिशयेच्छा, अत्यभिलाषः.

To ITCH, *v. n.* कण्डू (nom. कण्डूयति -ते), कण्डूयां कृ, कण्डूतिं कृ, स्पन्द् (c. 1. स्पन्दते -न्दितुं), स्फुर् (c. 6. स्फुरति -रितुं), कण्डूलः -ला -लं भू —(Desire eagerly) अतिशयेन इष् (c. 6. इच्छति, एषितुं) or अभिलष् (c. 1. -लषति -षितुं), गृध् (c. 4. गृध्यति, गर्धितुं).

ITCHY, *a.* कण्डूलः -ला -लं, कच्छुरः -रा -रं, कण्डूरोगी -गिणी -गि (न्), पामनः -ना -नं.

ITEM, *adv.* (Also) अपरञ्च, अपिच, अथच, चैव, पुनरपि.

ITEM, *s.* (Article, separate particular) पदं, विषयः, प्रकरणं, अधिकरणं.

To ITERATE, *v. a.* (Utter again) पुनर् वद् (c. 1. वदति -दितुं), मुहुर् वद्, अनुवद्, पुनरुक्तिं कृ.—(Do again) पुनः कृ, मुहुः कृ, पुनःपुनः कृ.

ITERATION, *s.* पुनरुक्तिः *f.*, पौनरुक्त्यं, पुनर्वचनं, अनुवादः, मुहुर्भाषा.—(Doing again) पुनःकरणं, पुनरावृत्तिः *f.*, द्विरावृत्तिः *f.*

ITERATIVE, *a.* पुनर्वादी -दिनी -दि (न्), पुनःकारी -रिणी -रि (न्).

ITINERANT, *a.* अटमानः -ना -नं, पर्यटनकारी -रिणी -रि (न्), अध्वगः -गा -गं -गामी -मिनी -मि (न्), भ्रमणकारी &c., परिभ्रमी -मिणी -मि (न्), अवनिचरः -रा -रं, यात्रिकः -की -कं, चक्राटः -टा -टं.

ITINERARY, *s.* मार्गवृत्तान्तपुस्तकं, मार्गक्रमणलेखः, प्रवासवृत्तान्तलेखः.

To ITINERATE, *v. n.* देशभ्रमणं कृ, देशपर्यटनं कृ, परिभ्रम् (c. 4. -भ्राम्यति -भ्रमितुं), पर्यट् (c. 1. -अटति -टितुं).

ITS, *pron.* तदीयः -या -यं, तस्य gen. c. (तद्), अस्य gen. c. (इदं).

ITSELF, *pron.* तद् एतद्, स्वयं.

IVORY, *s.* हस्तिदन्तः, करिदन्तः, गजदन्तः, दन्तिदन्तः -न्तं.

IVORY, *a.* दान्तः -न्ती -न्तं, हस्तिदन्ती -न्तिनी -न्ति (न्), हस्तिदन्तनिर्म्मितः -ता -तं, दन्तिदन्तमयः -यी -यं.

IVY, *s.* वृक्षगृहादिरोही लताविशेषः, तरुरुहा, तरुरोहिणी.

J.

To JABBER, *v. n.* जल्प् (c. 1. जल्पति -ल्पितुं), उपजल्प्, त्वरितं वद् (c. 1 वदति -दितुं), अव्यक्तं or अस्पष्टं वद्, वद् in freq. (वावद्यते), प्रलप् (c. 1. -लपति -पि॰), चटचट (nom. चटचटायते), अनर्थकवचनं कृ.

JABBERER, *s.* जल्पकः, जल्पाकः, जल्पी *m.* (न्), उपजल्पी *m.*, वाचालः, वाचाटः, वावदूकः, बहुभाषी *m.* (न्), अस्पष्टवक्ता *m.* (क्तृ).

JABBERING, *s.* जल्पः -ल्पनं, प्रजल्पः, जल्पितं, वावदूकता, प्रलापः, विप्रलापः, प्रलपितं, त्वरितवचनं, अस्पष्टवचनं, अव्यक्तवचनं, निरर्थकवचनं.

JACK, *s.* (Instrument for pulling off boots) पादुकानिष्कर्षणयन्त्रं.—(Instrument for turning a spit) यन्त्रं यद्वारेण पाकशूलः परिवर्त्तते.—(A fish) जलसूचिः *m.*—(Coat of mail) कवचः -चं, तनुत्रं.—(Horse, wooden frame) मञ्चः, वृषः, उपस्तम्भः, आधारः.—(Male of certain animals) expressed by पुं prefixed.—(Flag at the end of a bow-sprit) नौकाग्रवहिःप्रलम्बो ध्वजपटः.—(Bread-fruit tree) पनसः, पनसनालिका, कण्टकिफलः.

JACK-A-LANTERN, *s.* पिशाचदीपिका, भूतदीपिका, मिथ्यादीप्तिः *f.*

JACKAL, *s.* शृगालः, सृगालः, जम्बुकः, जम्बूकः, गोमायुः *m.*, वञ्चकः, क्रोष्टा *m.* (ष्टु), गोमी *m.* (न्), क्रव्या *m.* (न्), भूरिमायः, घोरवासनः, हूरवः, मृगधूर्त्तकः, भीरुः *m.*, फेरुः, फेरण्डः, फेरवः.—(Female) शृगाली, क्रोष्ट्री, शिवा.

JACKANAPES, *s.* वानरवृत्तिः *m.*, कपिस्वभावः, मर्कटशीलः, वानरचरित्रः.

JACKASS, *s.* गर्दभः, रासभः, खरः, धूसरः, चक्रीवान् *m.* (त्), बालेयः.

JACK-BOOTS, *s. pl.* चर्म्मनिर्म्मितं जङ्घोपरीयं or जङ्घात्राणं, बृहत्पादुका.

JACK-DAW, *s.* काकजातीयः पक्षिभेदः, काकविशेषः, काकः, वायसः.

JACKET, *s.* कञ्चुकः, कञ्चुलिका, निचोलः -लकः, चोलः -लकः, निचुलः, अङ्गिका, कूर्पासकः.

JACK-KETCH, *s.* घातुकपुरुषः, दण्डपाशिकः, मृतपाः *m.*, उद्बन्धकः.

JACK-PUDDING, *s.* भण्डः, भाण्डः, वैहासिकः, परिहासवेदी *m.* (न्), विदूषकः

JACOBIN, *s.* हीनवर्गपक्षपाती *m.* (न्), राजद्रोही *m.* (न्), राजयुध्वा *m.* (न्).

JACOB'S-STAFF, *s.* (Pilgrim's staff) कार्पटिकदण्डः, कार्पटिकयष्टिः *m.f.* —(A staff concealing a weapon) कूटायुधं, कूटास्त्रं, अन्तर्गूढप्रनिशिताग्रो बहिःकाष्ठमयो दण्डः.

JADE, *s.* (Sorry horse) कदश्वः, अश्वतरः, अश्वकः.—(A name of reproach for a woman) बन्धकी, कुलटा, भ्रष्टा, पापीयसी. *See* JADISH.

To JADE, *v. a.* खिद् (c. 10. खेदयति -यितुं), आयस् (c. 10. -यासयति -यितुं), श्रम् (c. 10. श्रमयति -यितुं), क्लम् (c. 10. क्लमयति -यितुं), सद् (c. 10. सादयति -यितुं), अवसद्, क्लिश् (c. 9. क्लिश्नाति, क्लेशितुं), तप् (c. 10. तापयति -यितुं), कृष् (c. 10. कर्षयति -यितुं), कष्टं कृ.

To JADE, *v. n.* (Become weary) खिद् in pass. (खिद्यते), आयस् (c. 4. -यस्यति -यसितुं), श्रम् (c. 4. श्राम्यति, श्रमितुं), क्लम् (c. 4. क्लाम्यति, क्लमितुं), सद् (c. 1. सीदति, सत्तुं), अवसद्, कष्ट (nom. कष्टायते).

JADED, *p. p.* खिन्नः -न्ना -न्नं, खेदितः -ता -तं, श्रान्तः -न्ता -न्तं, परिश्रान्तः -न्ता -न्तं, श्रमार्त्तः -र्त्ता -र्त्तं, क्लिष्टः -ष्टा -ष्टं, ग्लानः -ना -नं.

JADISH, *a.* (Bad) दुष्टः -ष्टा -ष्टं, पापीयान् -यसी -यः (स्), कुत्सितः -ता -तं, कु or कद् or दुर् prefixed.—(Unchaste, applied to a woman) बन्धकी, असती, असाध्वी, व्यभिचारिणी, पुंश्चली, धृष्टा, धर्षिणी, अविनीता, कामगा.

JAG, JAGG, *s.* (Notch) छेदः, अवच्छेदः, विच्छेदः, भङ्गः, दन्तः, क्रकचदन्तरूपो भङ्गः or छेदः.

To JAGG, *v. a.* जर्ज्जरीकृ, क्रकचदन्तरूपेण छिद् (c. 7. छिनत्ति, छेत्तुं) or विच्छिद् or अवच्छिद्, छेदं कृ, अवच्छेदं कृ, क्रकचरूपेण भङ्गुरं -रां -रं कृ, or भङ्गुरीकृ or जर्ज्जरं -रां -रं कृ, जर्ज्जरीकं -कां -कं कृ.

JAGGED, *p. p. a.* जर्ज्जरः -रा -रं, जर्ज्जरीकः -का -कं, क्रकचदन्तरूपेण विच्छिन्नः -न्ना -न्नं or दन्तुरः -रा -रं or दन्ती -न्तिनी -न्ति (न्), अनुक्रकचः -चा -चं, क्रकचधाराकारः -रा -रं, भङ्गुरः -रा -रं, विषमधारः -रा -रं.

JAGGEDNESS, *s.* जर्ज्जरता, जर्ज्जरीकता, दन्तुरत्वं, भङ्गुरत्वं.

JAGGY, *a.* दन्तुरः -रा -रं, अनुक्रकचः -चा -चं. *See* JAGGED.

JAIL, *s.* कारा, कारागारं, कारागृहं, कारावेश्म *n.* (न्), बन्धनागारं, बन्धनालयः, बन्धनगृहं, बन्धनस्थानं, निरोधस्थानं, बन्दिशाला, गुप्तिः *f.*, चारः.

JAILER, *s.* काराररक्षकः, कारागृहाध्यक्षः, कारागाराधिपतिः *m.*, बन्धनालयरक्षकः, गुप्तिपालकः, बन्दिपालः.

JAKES, *s.* शौचकूपः, पायुक्षालनवेश्म *n.* (न्), अवस्करस्थानं.

JAM, *s.* मिष्टफलं, मिष्टान्नं, खाद्यवं, सन्धितफलं, सन्धितं.

To JAM, *v. a.* सम्पीड् (c. 10. -पीडयति -यितुं), सम्मृद् (c. 9. -मृद्नाति -मर्द्दितुं), सम्बाध् (c. 1. -बाधते -धितुं), सङ्कुलीकृ, सङ्कटीकृ.

JAMB, *s.* उपस्तम्भः, अवष्टम्भः -म्भनं, स्तम्भः, गृहस्तम्भः, आधारः.

JAMMED, *p. p.* सम्पीडितः -ता -तं, सम्मर्द्दितः -ता -तं, सम्बाधः -धा -धं, सङ्कुलः -ला -लं, सङ्कटः -टा -टं, चूर्णितः -ता -तं.

To JANGLE, *v. n.* वाग्युद्धं कृ, वाक्कलहं कृ, विवद् (c. 1. -वदते -दितुं), विप्रलापं कृ, व्यवक्रोशनं कृ, विरोधोक्तिं कृ, कलह (nom. कलहायते).

JANGLE, *s.* (Wrangling) वाग्युद्धं, वाक्कलहः, विप्रलापः, व्यवक्रोशनं.—(Discordant sound) झञ्झा -झनं.

JANGLER, *s.* वाक्कलहकारी *m.* (न्), वाग्युद्धप्रियः, व्यवक्रोशनप्रियः.

JANGLING, *s.* (Wrangling) वाक्कलहः, व्यवक्रोशनं, विवादः.—(Discordant sound) झञ्झा -झनं, क्वः, कर्कशस्वनः.

JANITOR, *s.* द्वारपालः, द्वाररक्षकः, द्वारस्थः, प्रतिहारः, प्रतीहारः.

JANTILY, *adv.* चपलं, चापल्येन, चपलशीलत्वात्, लघु, स्वभावलाघवात्.

JANTINESS, *s.* चापल्यं, चपलशीलता, लघुता, स्वभावलाघवं.

JANTY, *a.* चपलः -ला -लं, चपलशीलः -ला -लं, लघुस्वभावः -वा -वं.

JANUARY, *s.* पौषमाघं, पौषः, माघः, उत्तरपौषः, पूर्व्वमाघः, पुष्यः, तैषः, तिष्यः -ष्यकः, प्रथममासः.

JAPAN, *s.* जापान्नामा चित्रकुङ्कुमविशेषः.

To JAR, *v. n.* (Make a grating sound) कर्कशशब्दं कृ, झञ्झा (nom. झञ्झायते), परस्परघर्षणजं झञ्झाशब्दं कृ.—(Clash) सङ्घट्ट् (c. 1. -घट्टते -ट्टितुं), परस्परसमाघातं कृ, परस्परसङ्घट्टनं कृ.—(Quarrel) विवद् (c. 1. -वदते -दितुं), कलह (nom. कलहायते).

JAR, *s.* (Grating sound) कर्कशशब्दः, परस्परघर्षणजः कटुशब्दः, परस्परसङ्घट्टनजो झञ्झाशब्दः, झञ्झनं.—(Clash) सङ्घट्टः -ट्टनं, समाघातः, परस्परसमाघातः, परस्परविरोधः.—(An earthen vessel) घटः, कुम्भः, कलशः -शी -शं, मणिकं, अलिञ्जरः, आलुः *f.*, कर्करी, कुण्डी, मृत्तिकापात्रं, मृद्भाण्डं, मृण्मयपात्रं, उदपात्रं, जलपात्रं.—(Bottom of a jar) सूर्प्यग्रहः.—(A little open, half open, said of a door) ईषदुद्घाटितः -ता -तं, अर्द्धोद्घाटितः -ता -तं.

JARGON, *s.* अनर्थकभाषा, असम्बद्धभाषा, पिशाचभाषा, राक्षसी भाषा, मिश्रितभाषा.

JARRING, *part.* or *a.* परस्परपराहतः -ता -तं, परस्परविरोधी -धिनी -धि (न्), अन्योन्यविरुद्धः -द्धा -द्धं.—(Making a harsh sound) कर्कशशब्दकारी -रिणी -रि (न्).

JASMIN, *s.* कुन्दः -न्दं, जाती -तिः *f.*, जाटी -टा, जातीकुसुमं, मालती, यूथी, यूथिका, स्वर्णयूथी, मल्लिका, जीवनी, सुगन्धः, माधुर्यं, सुमनाः *f.* (स्), मकरन्दः, मुद्गरः; 'double jasmin,' शिशुगन्धा; 'relating to the jasmin,' कौन्दः -न्दी -न्दं; 'the jasmin creeper,' कौन्दी लता.

JASPER, *s.* सूर्य्यकान्तः, जास्पराख्यो मणिविशेषः.

JAUNDICE, *s.* पाण्डुः *m.*, पाण्डुरोगः, पाण्डुरः, पाण्डुकः, कामला -लः, कुम्भकामला, हलीमकं; 'incipient jaundice,' पाण्डुच्छाया.

JAUNDICED, *a.* (Having the jaundice) पाण्डुरोगी -गिणी -गि (न्), पाण्डुरोगग्रस्तः -स्ता -स्तं.—(Prejudiced) साचीकृतः -ता -तं, वक्रदृष्टिः -ष्टिः -ष्टि.

To JAUNT, *v. n.* परिभ्रमणं कृ, पर्य्यटनं कृ, विहारं कृ, विहारार्थम् इतस्ततः परिभ्रम् (c. 4. -भ्राम्यति -भ्रमितुं), विहृ (c. 1. -हरति -हर्त्तुं), विहारार्थं पर्य्यट् (c. 1. -अटति -टितुं).

JAUNT, *s.* विहारः, विहरणं, भ्रमणं, विहारार्थं परिभ्रमणं or पर्य्यटनं.

JAUNTINESS, *s.* *See* JANTINESS.

JAVELIN, *s.* शल्यं, शलाका, शङ्कुः *m.*, प्रासः, क्षिपणिः *m.*, शक्तिः *f.*, पाणिमुक्तं, करमुक्तं, मुक्तकं, मुक्तामुक्तं, शूलः -लं, अस्त्रं, दूरवेधी *m.* (न्), कासूतरी.

JAW, *s.* हनुः *m. f.*, हनूः *f.*; 'the lower jaw,' पीचं, कुञ्जः, चिबुकं, चिबुः *m.*; 'big-jawed,' महाहनुः -नुः -नु; 'locked jaw,' हनुग्रहः, हनुस्तम्भः; 'jaw-tooth,' दाढा, दंष्ट्रा.—(Mouth) मुखं, वक्त्रं; 'jaws of death,' मृत्युवक्त्रं.—(Scolding, abuse) आक्रोशः, क्रुष्टं, तर्ज्जनं, वाक्पारुष्यं, भर्त्सनं.

To JAW, *v. n.* (Scold) आक्रुश् (c. 1. -क्रोशति -क्रोष्टुं), तर्ज् (c. 10. तर्ज्जयति -यितुं).

JAW-BONE, *s.* हन्वस्थि *n.*, चिबुकास्थि *n.*, पीचास्थि *n.*

JAWED, *a.* हनुमान् -मती -मत् (त्), हनूमान् &c., हनुविशिष्टः -ष्टा -ष्टं.

JAY, *s.* चाषः, चासः, मणिकण्ठः, नीलकण्ठः, किकिः *m.*, किकिदिविः *m.*, किकीदिवः, किकीदीविः *m.*, चालः.

JEALOUS, *a.* (Apprehensive of rivalship, uneasy at another's success) मत्सरी -रिणी -रि (न्), मत्सरः -रा -रं, समत्सरः -रा -रं.

परगुणमात्सर: -रा -रं, परोत्कर्षद्वेषी -षिणी -षि (न्), परोत्कर्षासहन: -ना -नं, परोत्कर्षासूयक: -का -कं, परोत्कर्षशङ्की -ङ्किनी -ङ्कि (न्), अन्यशुभाशङ्की -ङ्किनी -ङ्कि (न्), परप्रशंसासहन: -ना -नं, परशुभामर्षण: -णा -णं, ईर्ष्यी -र्ष्यिणी -र्ष्यि (न्) सेर्ष्य: -र्ष्या -र्ष्यं, असूयक: -का -कं, साभ्यसूय: -या -यं, कृतेर्ष्य: -र्ष्या -र्ष्यं, स्पर्धी -र्धिनी -र्धि (न्), वक्रदृष्टि: -ष्टि: -ष्टि. —(Suspicious in love) प्रेमविपर्य्यासशङ्की &c., प्रेमसंशयी -यिनी -यि (न्), प्रेमशङ्की &c., प्रेमव्यत्ययाशङ्की, प्रीतिविपर्य्ययाशङ्की &c.; 'a husband of a wife,' परपुरुषाशङ्की, परपुरुषशङ्कित:, जारशङ्कित:; 'a wife of a husband,' परस्त्रीशङ्किता, परस्त्रीशङ्किनी.—(Suspiciously fearful) शङ्काशील: -ला -लं, शङ्कास्वभाव: -वा -वं.—(Careful for the honour of) अभिमानी -निनी -नि (न्), कृताभिमान: -ना -नं, कृतादर: -रा -रं, साभिमान: -ना -नं, आदृत: -ता -तं.

Jealously, *adv.* समत्सरं, मात्सर्य्येण, सेर्ष्यं, असूयया, सासूयं, साभ्यसूयं, परोत्कर्षासूयया, परोत्कर्षशङ्कया, प्रेमविपर्य्यासशङ्कया, शङ्काशीलवत्, वक्रदृष्ट्या, स्पर्धया.

Jealousy, jealousness, *s.* मात्सर्य्यं, मत्सर: -रता, ईर्ष्या, असूया, स्पर्धा, परगुणमात्सर्य्यं, परोत्कर्षासहिष्णुता, परोत्कर्षद्वेष:, परोत्कर्षासूया, परोत्कर्षशङ्का, परप्रशंसासहनं, परशुभाशङ्का, अन्यशुभद्वेष:, सापत्न्यं, सापत्नभाव:, दृष्टिवक्रता.—(Suspiciousness in love) प्रेमशङ्का, प्रीतिशङ्का, प्रेमसंशय:, प्रेमविपर्य्यासशङ्का, प्रेमव्यत्ययशङ्का, प्रीतिव्यत्यासशङ्का; 'of a husband respecting a wife,' परपुरुषशङ्का, व्यभिचारशङ्का, अन्यपुरुषाशङ्का, जारशङ्का; 'of a wife respecting a husband,' परस्त्रीशङ्का.—(Suspicious fear) शङ्का, शङ्काशीलता.—(Concern for the honour of) अभिमानचिन्ता.

To jeer, *v. a.* अवहस् (c. 1. -हसति -सितुं), अपहस्, अवहासभूमिं कृ, अपहासास्पदीकृ, अवक्षिप् (c. 6. -क्षिपति -क्षेप्तुं), अवज्ञा (c. 9. -जानाति -ज्ञातुं), तिरस्कृ, मुखरीकृ, गर्ह् (c. 1. गर्हते -र्हितुं), अवगर्ह्, भर्त्स् (c. 10. भर्त्सयते -ति -यितुं).

Jeer, *s.* उपहास:, अवहास:, अपहास:, परिहास:, क्षेप:, अवक्षेप:, अवज्ञा, अवमानं, अवहेला, व्यञ्जनं -ना, व्यंग्य:.

Jeerer, *s.* उपहासक:, परिहासकर्त्ता *m.* (र्तृ), क्षेपक:, अवक्षेपक:.

Jeeringly, *adv.* उपहासेन, सोपहासं, परिहासेन, सावक्षेपं, हास्यपूर्व्वं.

Jejune, *a.* रूक्ष: -क्षा -क्षं, रूक्ष: -क्षा -क्षं, नीरस: -सा -सं, विरस: -सा -सं, रसहीन: -ना -नं, शुष्क: -ष्का -ष्कं, शून्य: -न्या -न्यं, नि:सार: -रा -रं, नि:सत्त्व: -त्त्वा -त्त्वं.

Jejuneness, *s.* रूक्षता, रौक्ष्यं, नीरसता, विरसता, रसाभाव:, शुष्कता, शून्यता, सारहीनता, सत्त्वहीनता.

Jelly, *s.* (Of animal substance) मांसघननिष्क्वाथ:, क्वथितमांसनिर्म्मितो घनीभूत: स्वच्छरस:, मांसस्य श्यानरस: or घनरस:.—(Of fruit) फलानां शर्करादिना सह निष्क्वथितानां घनरस:, फलपाक:.—(Glutinous substance) श्यानद्रव्यं, सान्द्रद्रव्यं.

Jennet, *s.* *See* Genet.

To jeopard, *v. a.* संशयस्थं -स्थां कृ, संशयितं -तां कृ, सन्देहस्थं -स्थां कृ, शङ्कास्थं -स्थां कृ, संशयापन्नं -न्नां कृ, सन्देहदोलस्थं -स्थां कृ, भयस्थं -स्थां कृ, शङ्कास्पदीकृ; 'one who jeopards his life,' संशयितजीवित:.

Jeoparded, *p. p.* संशयित: -ता -तं, संशयक्रमित: -ता -तं, शङ्कास्पदीकृत: -ता -तं.

Jeopardous, *a.* सांशयिक: -की -कं, सन्दिग्ध: -ग्धा -ग्धं, भयाक्रान्त: -न्ता -न्तं.

Jeopardy, *s.* (Hazard) संशय:, शङ्का, सन्देह:, भयं, विकल्प:, आतङ्क:, भयहेतु: *m.*; 'any thing exposed to jeopardy,' भयस्थानं, संशयस्थानं, शङ्कास्पदं; 'jeopardy of life,' जीवितसंशय:, प्राणसन्देह:, प्राणनाशसंशय:, प्राणबाध:; 'brought into jeopardy,' संशयित: -ता -तं; 'to be in jeopardy,' संशयस्थ: -स्था -स्थं भू, शङ्कास्पदीभू.

To jerk, *v. a.* (Give a sharp or sudden twitch or push) लघुप्रहारं कृ, लघ्वाघातं कृ, आकस्मिकप्रहारं कृ, लघुप्रहारेण तड् (c. 10. ताडयति -यितुं) or आहन् (c. 2. -हन्ति -न्तुं).—(Throw with a sharp sudden motion, or by stopping the arm half way) लघुप्रहारेण or आकस्मिकप्रहारेण क्षिप् (c. 6. क्षिपति, क्षेप्तुं), बाहुवेगम् अर्द्धेन स्तम्भयित्वा क्षिप्, अकस्मात् क्षिप्.

Jerk, *s.* लघुप्रहार:, लघ्वाघात:, आकस्मिकप्रहार:, लघुक्षेप:, आकस्मिकक्षेप:, लघुप्रहारेण क्षेप:, बाहुवेगस्तम्भनपूर्व्व: क्षेप:.

Jerkin, *s.* कञ्चुक:, कञ्चुलिका, अङ्गिका, कूर्पासक:, क्षुद्रनिचोल:.

Jessamine, *s.* *See* Jasmin.

Jest, *s.* हास्यं, परिहास:, परीहास:, हासिका, नर्म्म (न्), परिहासवाक्यं, परिहासोक्ति: *f.*, विनोदोक्ति: *f.*, विनोदभाषणं, क्षेप:, लालिका, टट्टरी, व्याहार:.—(Object of laughter) उपहासस्थानं, उपहासास्पदं, हास्यास्पदं, उपहासपात्रं, विनोदास्पदं.—(Fun) खेला, क्रीडा, कौतुकं, केलि: *m. f.*: 'in jest,' परिहासेन.

To jest, *v. n.* हस् (c. 1. हसति -सितुं), विहस्, प्रहस्, सम्प्रहस् संविहस्, परिहासं कृ, विनोदं कृ, परिहासवाक्यं वद् (c. 1. वदति -दितुं), विनोदवाक्यं वद्, भण्ड् (c. 1. भण्डते -ण्डितुं), क्रीड् (c. 1. क्रीडति -ते -डितुं), प्रक्रीड्, विक्रीड्, परिक्रीड्, विलस् (c. 1. -लसति -सितुं), खेला (nom. खेलायति); 'speak in jest,' परिहासेन वद्.

Jester, *s.* परिहासकारी *m.* (न्), परिहासवेदी *m.* (न्), हास्यकारी *m.*, विनोदकारी *m.*, विनोदभाषी *m.* (न्), वैहासिक:, विदूषक:.—(Buffoon) भण्ड:, वैहासिक:, चाटुपटु: *m.*, चाटुवटु: *m.*, रवण:, नट:, क्रीडामृग:.—(Companion of a king) नर्म्मसचिव:, विदूषक:, नर्म्मद:, राजविनोदी *m.* (न्).

Jesting, *s.* परिहासकरणं, नर्म्मकरणं, नर्म्मद्युति: *f.*, विनोद:, भाण्डं.

Jestingly, *adv.* परिहासेन, हास्येन, परिहासमात्रेण, विनोदेन, विनोदार्थं.

Jet, *s.* (Spouting of water) जलोत्क्षेप:, जलोत्सेक:.—(Black stone) कृष्णप्रस्तर:, कृष्णवर्ण: प्रस्तरविशेष:.

Jet-black, *s.* घनकृष्ण: -ष्णा -ष्णं, सुकृष्ण: -ष्णा -ष्णं, अतिकृष्ण: -ष्णा -ष्णं.

Jetsam, jetson, jettison, *s.* नौव्यसनकाले नौकालघुकरणार्थं समुद्रमध्ये क्षिप्तद्रव्याणि.

Jetty, *s.* भूमिबहिर्गत: समुद्रस्थसेतु:, काष्ठस्तम्भनिर्म्मित:, क्षुद्रसेतु:.

Jetty, *a.* (Black as jet) कृष्णवर्ण: -र्णा -र्णं, कृष्णप्रस्तरसवर्ण: -र्णा -र्णं.

Jew, *s.* यिहुदीय:, यिहुदीयदेशज:, यिहुदीयदेशवासी *m.* (न्).

Jewel, *s.* (Precious stone) मणि: *m. f.*, मणी, रत्नं, प्रस्तर:, मणिरत्नं, चारुशिला; 'jewel in a snake's head,' फणमणि:; 'necklace of jewels,' मणिमाला, रत्नावलि: *f.*; 'having jewels in the ears,' मणिकर्ण: -र्णा -र्णं.—(A term of endearment) रत्नं; 'a jewel of a woman,' स्त्रीरत्नं.

Jewel-house, jewel-office, *s.* मणिशाला, रत्नशाला, राजकीयरत्नागारं.

Jewel-mine, *s.* रत्नाकर:, रत्नखनि: *f.*, मणिभूमि: *f.*, रत्नभूमि:.

Jewelled, *p. p.* or *a.* रत्नवान् -वती -वत् (त्), मणिमान् -मती -मत् (त्), मणिखचित: -ता -तं, रत्नमय: -यी -यं, मणिमय: -यी -यं, मणिश: -शा -शं.

Jeweller, *s.* मणिकार:, रत्नकार: -रक:, रत्नजीवी *m.* (न्), वैकटिक:; 'jeweller's shop,' रत्नशाला.

Jewelry, *s.* रत्नानि *n. pl.*, रत्नादि भूषणं or अलङ्कार:, कोश:, कोष:.

Jewess, *s.* यिहुदीया, यिहुदीया स्त्री, यिहुदीयदेशजा.

Jewish, *a.* यिहुदीय: -या -यं, यिहुदीयदेशसम्बन्धी -न्धिनी -न्धि (न्), यिहुदीयधर्म्मा -र्म्मा -र्म्म (न्).

JEW'S HARP, *s.* मुखवाद्यं, वक्त्रतालः -लं.

JIB, *s.* नौकाग्रस्थवसनं, अग्रस्थवसनं, नौकाग्रबहिःस्थं वातवसनं.

JIFFY, *s.* निमेषः, क्षणः, पलं; 'in a jiffy,' निमेषमात्रेण, एकपदे, सपदि.

JIG, *s.* लघुनृत्यं, लघुनर्त्तनं, लघुतालसहितो नृत्यविशेषः.

To JIG, *v. n.* पूर्व्वोक्तप्रकारेण नृत् (c. 4. नृत्यति, नर्त्तितुं), लघु नृत्.

JILT, *s.* प्रतारिका, वञ्चिका, विप्रलम्भिका, सङ्केतलंघिनी, सङ्केतितान्यगामिनी, चपला, चपलशीला, एकपुरुषम् आश्वासयित्वा अन्यं गच्छति or गृह्णाति या स्त्री, प्रेमसिद्ध्याशां जनयित्वा खण्डयति या स्त्री.

To JILT, *v. a.* or *n.* प्रेमविषये एकपुरुषम् आश्वासयित्वा अन्यं गम् (c. 1. गच्छति, गन्तुं) or ग्रह् (c. 9. गृह्णाति, ग्रहीतुं), प्रेमसिद्ध्याशां जनयित्वा खण्ड् (c. 10. खण्डयति -यितुं), सङ्केतं लंघ् (c. 10. लंघयति -यितुं), प्रेमविषये वञ्च् (c. 10. वञ्चयते -ति -यितुं) or प्रतृ (c. 10. -तारयति -यितुं) or विप्रलभ् (c. 1. -लभते -लब्धुं).

JILTED, *p. p.* खण्डितः -ता -तं, खण्डितप्रेमसिद्ध्याशः -शा -शं.

To JINGLE, *v. n.* शिञ्ज् (c. 2. शिंक्ते, c. 1. शिञ्जते -ञ्जितुं), विशिञ्ज्, क्वण् (c. 1. क्वणति -णितुं), झणझण (nom. झणझणायते), किङ्किण (nom. किङ्किणायते), झञ्झनं कृ, विरु (c. 2. -रौति -रवितुं).

JINGLE, *s.* शिञ्जा -ञ्जः, शिञ्जितं, व्याशिञ्जितं, झञ्झनं, झञ्झा, झनत्कारः, झङ्कारः, झं, क्वणनं, क्वणितं, किङ्किणिशब्दः, झणझणशब्दः.

JINGLING, *part.* or *a.* शिञ्जी -ञ्जिनी -ञ्जि (न्), झञ्झनकारी -रिणी -रि (न्), क्वणन् -णन्ती -णत् (त्), क्वणितः -ता -तं.

JOB, *s.* (Piece of work) कर्म्म *m.* (न्), कार्य्यं, कृत्यं, क्रिया, व्यापारः. —(Mean business) क्षुद्रकर्म्म *n.*, नीचकर्म्म *n.*, अधमक्रिया.—(Work done for private profit or ends) स्वार्थप्रयुक्तं कर्म्म, स्ववृद्ध्यर्थं कर्म्म, स्वार्थमात्रापेक्षकं कर्म्म, स्वार्थमात्रोद्देशकं कर्म्म or कार्य्यं, स्वार्थकर्म्म *n.*

To JOB, *v. n.* क्षुद्रकर्म्म कृ, नीचकर्म्म कृ, स्वार्थप्रयुक्तं कर्म्म कृ, स्वार्थमात्रमपेक्ष्य or स्वार्थमात्रमुद्दिश्य कार्य्यं कृ.—(Buy and sell as a broker) परार्थं क्रयविक्रयं कृ or पण् (c. 1. पणते -णितुं, पणायति -यितुं), पणायां कृ. —(Deal in, hire) प्रयुज् (c. 7. -युनक्ति -युंक्ते -योक्तुं), प्रयोगं कृ.

JOBBER, *s.* (One who does small jobs) क्षुद्रकर्म्मकारी *m.* (न्), नीचकर्म्मकृत्, तुच्छकर्म्मव्यवसायी *m.* (न्), अल्पकर्म्मव्यापारी *m.*—(Broker) परार्थं क्रयविक्रयकारी *m.* or क्रयविक्रयप्रयोजकः, घटकः.—(One who does a work for his own ends) स्वार्थप्रयुक्तकर्म्मव्यवसायी *m.*, स्वार्थप्रवर्त्तकः, स्ववृद्ध्यर्थं कार्य्यव्यापारी.—(Dealer) क्रयविक्रयिकः, पणिकः, विपणी *m.* (न्).

JOBBING, *s.* क्षुद्रकर्म्मव्यवसायः, नीचकर्म्मप्रवृत्तिः *f.*, स्वार्थप्रयुक्तकार्य्यप्रवृत्तिः *f.*, स्वार्थप्रवर्त्तनं, स्ववृद्धिप्रवर्त्तनं.

JOB-HORSE, *s.* पण्याश्वः, प्रयोज्यवाजी *m.* (न्), भाटकीयवाजी *m.*, अश्वकः.

JOCKEY, *s.* अश्वविद् *m.*, अश्वशिक्षकः, अश्वप्रेरकः, अश्वारूढः, अश्वशिक्षाजीवी *m.* (न्), अश्वोपजीवी *m.* (न्), अश्वज्ञः, हयज्ञः, अश्वविद्याविशारदः, हयविद्याविशारदः, अश्वकोविदः.

To JOCKEY, *v. a.* अश्वशिक्षकवत् प्रतृ (c. 10. -तारयति -यितुं) or वञ्च् (c. 10. वञ्चयते -ति -यितुं) or प्रलभ् (c. 1. -लभते -लब्धुं).

JOCKEYISM, JOCKEYSHIP, *s.* अश्वविद्या, अश्वारोहणविद्या, अश्वशिक्षा.

JOCOSE, *a.* परिहासशीलः -ला -लं, परिहासकः -का -कं, प्रहासी -सिनी -सि (न्), रसिकः -का -कं, रसी -सिनी -सि (न्), सरसः -सा -सं, कौतुकी -किनी -कि (न्), सकौतुकः -का -कं, विनोदी -दिनी -दि (न्). *See* JOCULAR.

JOCOSELY, *adv.* परिहासेन, प्रहासेन, सरसं, सकौतुकं, रसिकवत्.

JOCOSENESS, *s.* परिहासशीलता, प्रहासः, रसिकत्वं, सरसता, कौतुकं.

JOCULAR, *a.* परिहासकः -का -कं, रसिकः -का -कं, विनोदी -दिनी -दि (न्), विनोदकारी -रिणी -रि (न्), हास्यकारी &c., विनोदात्मकः -का -कं, हास्यावहः -हा -हं. *See* JOCOSE.

JOCULARITY, *s.* परिहासकत्वं, प्रहसनं, प्रहसितं, हासिका, रसिकता, विनोदः, कौतुकं, उल्लसता, हर्षः, उत्सवः.

JOCULARLY, *adv.* परिहासेन, सकौतुकं, विनोदार्थं, हर्षेण, हृष्टवत्.

JOCUND, *a.* प्रमोदी -दिनी -दि (न्), उल्लसः -सा -सं, प्रहृष्टः -ष्टा -ष्टं, हृष्टहृदयः -या -यं, आनन्दी -न्दिनी -न्दि (न्), आनन्दवृत्तिः -त्तिः -त्ति.

JOCUNDITY, *s.* उल्लसता, प्रहर्षः, आनन्दः, मुदा, हृष्टचित्तत्वं.

JOCUNDLY, *adv.* हर्षेण, सहर्षं, प्रमोदेन, सानन्दं, उल्लासेन, हृष्टवत्.

To JOG, *v. a.* कफोणिना तड् (c. 10. ताडयति -यितुं) or चल् (c. 10. चालयति -यितुं), ईषत् तड् or चल्, इङ्गितं कृ.

To JOG, *v. n.* (Jog on slowly) शनैः शनैः or मन्दं मन्दं or क्रमे क्रमे चल् (c. 1. चलति -लितुं) or चर् (c. 1. चरति -रितुं) or सृ (c. 1 सरति, सर्त्तुं).

JOG, JOGGING, *s.* चालनं, ईषच्चालनं, ईषत्क्षोभः, ईषदाघातः, ईषत्प्रहारः ईषत्ताडनं, इङ्गितं.

To JOGGLE, JOGGLING. *See* JOG, JOGGING.

To JOIN, *v. a.* युज् (c. 7. युनक्ति, युंक्ते, योक्तुं, c. 10. योजयति -यितुं), संयुज्, आयुज्, समायुज्, सन्धा (c. 3. -दधाति -धातुं), उपसन्धा, सम्बन्ध् (c. 9. -बध्नाति -बन्द्धुं), संश्लिष् (c. 10. -श्लेषयति -यितुं), श्लिष्, संहन् (c. 2. -हन्ति -न्तुं), सङ्क्रम् (c. 10. -गमयति -यितुं), संलग्नीकृ, एकीकृ, एकत्र कृ. —(Tie together) ग्रन्थ् (c. 9. ग्रथ्नाति, ग्रन्थितुं), योक्त्र (nom. योक्त्रयति -यितुं).

To JOIN, *v. n.* (Be in contact, unite) संयुज् in pass. (-युज्यते), समायुज्, सन्धा in pass. (-धीयते), संश्लिष् in pass. (-श्लिष्यते), संहन् in pass. (-हन्यते), सङ्गम् (c. 1. -गच्छति -गन्तुं), समे (समेति -तुं, rt. इ), संलग्नीभू, एकीभू, संसक्तीभू, एकत्र भू, सम्मिल् (c. 6. -मिलति -मेलितुं).

JOINED, *p. p.* युक्तः -क्ता -क्तं, संयुक्तः -क्ता -क्तं, संयोजितः -ता -तं, समायुक्तः -क्ता -क्तं, संयुतः -ता -तं, योजितः -ता -तं, समायुतः -ता -तं, युतः -ता -तं, संश्लिष्टः -ष्टा -ष्टं, श्लिष्टः -ष्टा -ष्टं, संहतः -ता -तं, अभिसंहतः -ता -तं, संसक्तः -क्ता -क्तं, समासक्तः -क्ता -क्तं, सम्बद्धः -द्धा -द्धं, बद्धः -द्धा -द्धं, लग्नः -ग्ना -ग्नं, संलग्नः -ग्ना -ग्नं, विलग्नः -ग्ना -ग्नं, संहितः -ता -तं, सन्धितः -ता -तं, उपाहितः -ता -तं, सङ्गतः -ता -तं, समितः -ता -तं, मिलितः -ता -तं, एकीकृतः -ता -तं, घटितः -ता -तं; 'with joined hands,' संश्लिष्टाभ्यां पाणिभ्यां, बद्धाञ्जलिः -लिः -लि, अवहिताञ्जलिः -लिः -लि, अभिगृहीतपाणिः -णिः -णि.

JOINER, *s.* सूत्रधारः, काष्ठतक्षकः, तक्षकः, तक्षा *m.* (न्), त्वष्टा *m.* (तृ).

JOINERY, *s.* काष्ठतक्षणं, त्वष्टिः *f.*, तक्षणं, सूत्रधारकर्म्म *n.* (न्), तक्षकक्रिया.

JOINING, *s.* संयोगः, योगः, सन्धानं, सन्धिः *m.*, श्लेषः, संश्लेषः, संघातः, सङ्गः, सङ्गमः, समागमः, समासक्तिः *f.*, संसक्तिः.

JOINT, *s.* (Of the body) सन्धिः *m.*, ग्रन्थिः *m.*, अस्थिसन्धिः *m.*, अस्थिग्रन्थिः *m.*, परग्रन्थिः *m.*, पर्व्व *n.* (न्), अस्थिपर्व्व *n.*, मर्म्म *n.* (न्), काण्डः -ण्डं, जीवस्थानं, परुस् ind.; 'the knee-joint,' जानुसन्धिः *m.*, जङ्घोरुसन्धिः; 'the thigh-joint,' ऊरुपर्व्व *n.*; 'the thumb-joint,' अङ्गुष्ठपर्व्व *n.*; 'of the neck,' ग्रीवासन्धिः *m.*, सन्धिः; 'of the shoulder,' चिरु *n.*; 'to put out of joint,' विसन्धीकृ.—(Knot of a plant) ग्रन्थिः *m.*, पर्व्व *n.* (न्).

JOINT, *a.* (Shared by two or more) संविभक्तः -क्ता -क्तं, अविभक्तः -क्ता -क्तं, अंशितः -ता -तं, साधारणः -णा -णी -णं, सामान्यः -न्या -न्यं, अनेकस्वामिकः -का -कं, usually expressed by सह in comp.; as, 'joint proprietor,' सहस्वामी *m.* (न्), सहाधिकारी *m.* (न्); 'joint

possessor,' सहभोजी *m.* (न्); 'joint-heir,' समाधिकारी.—(United in the same office) एकाधिकारी *m.* (न्), एककार्य्यकारी *m.* (न्), सद्वितीयः -या -यं.—(Combined) सङ्घातवान् -वती -वत् (त्), सम्भूयकारी -रिणी -रि (न्).

To JOINT, *v. a.* (Form with joints) सन्धिविशिष्टं -ष्टां कृ, ग्रन्थियुक्तं -क्तां कृ.—(Divide in the joints) सन्धिभेदं कृ, सन्धिभग्नं कृ.

JOINTED, *p. p.* or *a.* (Formed with joints) ग्रन्थिलः -ला -लं, ग्रन्थिमान् -मती -मत् (त्), सन्धिविशिष्टः -ष्टा -ष्टं, सन्धियुक्तः -क्ता -क्तं.—(Divided in the joints) भिन्नसन्धिः -न्धिः -न्धि, विसन्धितः -ता -तं.

JOINT-HEIR, *s.* समांशी *m.* (न्), समभागी *m.* (न्), समाधिकारी *m.* (न्), समांशहारी *m.* (न्), भागी *m.* (न्), संविभागी, भागहरः, समभागहारी *m.*, भागधेयः, सहाधिकारी *m.* *See* COHEIR.

JOINTLY, *adv.* संयोगतस्, योगतस्, सहितं, समं, सह, सम्भूय, एकचित्तीभूय, अपृथक्, युगपत्, सार्द्धं.

JOINTURE, *s.* विधवाधनं, स्त्रीधनं, स्त्रीवृत्तिः *f.*, भर्त्तृदत्तं, स्वामिदत्तं.

JOIST, *s.* गृहतलालम्बी दीर्घदारुः, हर्म्यतलोत्तम्भकं दीर्घकाष्ठं.

JOKE, *s.* परिहासः, हास्यं, हासिका, परिहासवाक्यं, परिहासोक्तिः *f.*, रसः, रसिकवाक्यं, नर्म्म *n.* (न्), विनोदः, विनोदोक्तिः *f.*, लालिका, श्लेषः, टट्टरी, व्याहारः, प्रपचः, कौतुकं; 'in joke,' परिहासेन; 'jokes to the bridegroom,' जघृलः.

To JOKE, *v. a.* हस् (c. 1. हसति -सितुं), प्रहस्, विहस्, संविहस्, व्यतिहस्, सम्प्रहस्, परिहस्, परिहासं कृ, हास्यं कृ, परिहासवाक्यं वद् (c. 1. वदति -दितुं), विनोदं कृ, विनोदवाक्यं वद्, भरड् (c. 1. भरडते -डितुं), विलस् (c. 1. -लसति -सितुं), खेला (nom. खेलायति), नर्म्म कृ; 'speak in joke,' परिहासेन वद्.

JOKER, *s.* परिहासवेदी *m.* (न्), परिहासकः, हास्यकारी *m.* (न्), विनोदभाषी *m.* (न्), वैहासिकः, विदूषकः, विलासी *m.* (न्).

JOLE, *s.* गण्डः -ण्डं, कपोलः, गण्डस्थलः -ली; 'cheek by jole,' गण्डागण्डि.

JOLLITY, JOLLINESS, *s.* उत्सवकरणं, उत्सवः, समुत्सवः, उल्लसता, उल्लासः, आनन्दः, आह्लादः, हर्षः, प्रहर्षः, प्रमोदः, प्रहसनं, प्रहासः, प्रहसितं, प्रहृष्टता, प्रफुल्लता, सानन्दता, आमोदः, मुदा.

JOLLY, *a.* उत्सवकारी -रिणी -रि (न्), सोत्सवः -वा -वं, हृष्टः -ष्टा -ष्टं, प्रहृष्टः -ष्टा -ष्टं, आनन्दी -न्दिनी -न्दि (न्), सानन्दः -न्दा -न्दं, हृष्टहृदयः -या -यं, हर्षणः -णा -णं, उल्लसः -सा -सं, उल्लसितः -ता -तं, उल्लासी -सिनी -सि (न्), प्रहासी -सिनी -सि (न्), प्रमोदी -दिनी -दि (न्), मुदितः -ता -तं, प्रफुल्लः -ल्ला -ल्लं, हासी &c., परिहासशीलः -ला -लं, विलासी -सिनी -सि (न्), कृतकौतुकः -का -कं, सुमनाः -नाः -नः (स्).

JOLLY-BOAT, *s.* वृहन्नौकासम्बन्धिनी क्षुद्रनौका.

To JOLT, *v. a.* क्षुभ् (c. 10. क्षोभयति -यितुं), क्षोभं कृ, विषमभूमिगमनप्रयुक्तं क्षोभं कृ, आकस्मिकक्षोभं कृ.

To JOLT, *v. n.* विषमभूमिगमनत्वात् क्षुभ् (c. 4. क्षुभ्यति, क्षोभितुं).

JOLT, *s.* क्षोभः, रथक्षोभः, विषमभूमिगमनप्रयुक्तः क्षोभः, आकस्मिकक्षोभः.

JOLTED, *p. p.* क्षुब्धः -ब्धा -ब्धं, विक्षुब्धः -ब्धा -ब्धं, क्षोभितः -ता -तं.

JOLTHEAD, *s.* स्थूलबुद्धिः *m.*, मन्दबुद्धिः *m.*, मूर्खः, बटुकः.

JONQUIL, *s.* उत्पलजातीयो नानावर्णः पुष्पभेदः.

To JOSTLE, *v. a.* जनसम्मर्द्दे स्कन्धेन ताडयित्वा क्षुभ् (c. 10. क्षोभयति -यितुं) or निरस् (c. 4. -अस्यति -असितुं) or निःसृ (c. 10. -सारयति -यितुं) or निराकृ or सम्बाध् (c. 1. -बाधते -धितुं).

JOSTLING, *s.* जनसम्मर्द्दे परस्परसंक्षोभः or परस्परसंघातः, परस्परघर्षणं, परस्परसम्मर्द्दः, स्कन्धताडनं, प्रतिघातः.

JOT, *s.* लवः, लवमात्रं, कणमात्रं, बिन्दुमात्रं, लवलेशः, लेशः, अणुः *m.*, परमाणुः *m.*, कणिका, रजःकणः, तिलमात्रं.

To JOT, *v. a.* स्मरणार्थं किञ्चित् लिख् (c. 6. लिखति, लेखितुं) or अभिलिख्.

JOTTING, *s.* स्मरणार्थं किञ्चिल्लिखनं, स्मरणार्थलिखितं.

JOURNAL, *a.* (Diary) दिनवृत्तपत्रं, दिनव्यवहारलेख्यं, आह्निकव्यवहारपुस्तकं, दिनचर्य्यालेखः, दैनिकवृत्तान्तपुस्तकं, दिनचरित्रलेखः, आह्निकपत्रकं, दैनिकपत्रकं, पत्रिका, पत्रिः -त्री *f.*, पद्धतिपत्रिका.—(Newspaper published daily) प्रतिदिनं प्रकाशीकृतं समाचारपत्रं, वार्त्तापत्रं, वार्त्तिकपत्रं.

JOURNALIST, *s.* आह्निकपत्रलेखकः, दैनिकपत्रलिख् *m.* (ख्).—(Conductor of a newspaper) समाचारपत्रप्रकाशकः, वार्त्तापत्रलेखकः.

JOURNEY, *s.* अध्वा *m.* (न्), अध्वगमनं, मार्गः, मार्गगमनं, मार्गक्रमणं, यात्रा, यात्राकरणं, यानं, प्रयाणं, प्रस्थानं, प्रस्थितिः *f.*, व्रज्या, भ्रमणं, देशभ्रमणं, पर्यटनं, प्रवासः, प्रवासगमनं; 'a long journey,' दीर्घाध्वा *m.* -ध्व *n.* (न्); 'a day's journey,' एकाहगमः -मनं; 'to return from a journey,' प्रवासात् आगम् (c. 1. -गच्छति -गन्तुं); 'a pleasant journey to you,' शिवास् ते पन्थानः सन्तु.

To JOURNEY, *v. n.* अध्वना or मार्गेण गम् (c. 1. गच्छति, गन्तुं) or या (c. 2. याति -तुं) or व्रज् (c. 1. व्रजति -जितुं) or चर् (c. 1. चरति -रितुं), मार्गगमनं कृ, अध्वगमनं कृ, यात्रां कृ, देशभ्रमणं कृ, देशाद्देशं भ्रम् (c. 4. भ्राम्यति, भ्रमितुं) or परिभ्रम् or पर्यट् (c. 1. -अटति -टितुं).

JOURNEYER, *s.* अध्वगः -गामी *m.* (न्), अध्वनीनः, अध्वन्यः, यात्रिकः, यायी *m.* (न्), पथिकः, सारणिकः, पादविकः.

JOURNEYING, *s.* अध्वगमनं, मार्गगमनं, यात्राकरणं, देशभ्रमणं.

JOURNEYMAN, *s.* वेतनार्थं कर्म्मकारः or कर्म्मकरः or शिल्पकारः or शिल्पकर्म्मकारः, हस्तकर्म्मकारः, वैतनिकः, वेतनार्थी *m.* (न्), व्रातीनः.

JOURNEY-WORK, *s.* शिल्पकर्म्म *n.* (न्), हस्तकर्म्म *n.*, वैतनिककर्म्म *n.*, शिल्पं.

JOVE, *s.* (The god). *See* INDRA.

JOVIAL, *a.* उत्सवकारी -रिणी -रि (न्), नित्योत्सवी -विनी -वि (न्), सदोत्सवी &c., कृतोत्सवः -वा -वं, उल्लासी -सिनी -सि (न्), सदानन्दी -न्दिनी -न्दि (न्), प्रहृष्टः -ष्टा -ष्टं, परिहासशीलः -ला -लं, सदाप्रमोदी -दिनी -दि (न्), उत्सवप्रियः -या -यं.

JOVIALLY, *adv.* सोत्सवं, महोत्सवेन, सदानन्दपूर्व्वं, उल्लसवत्, प्रहृष्टवत्.

JOVIALITY, JOVIALNESS, *s.* उत्सवकरणं, नित्योत्सवः, सदानन्दः, नित्यानन्दः, उल्लसता, नित्योल्लासः, हर्षः, प्रहर्षः, आह्लादः, प्रहसनं, हास्यं, प्रहासः, प्रहृष्टता.

JOWL, *s.* (Cheek) गण्डः, कपोलः. *See* JOLE.

JOWLER, *s.* मृगव्यकुक्कुरः, मृगव्यश्वा *m.* (न्), मृगदंशकः.

JOY, *s.* आनन्दः, हर्षः, आह्लादः, प्रह्लादः, प्रमोदः, आमोदः, नन्दः, ह्लादः -दनं, मोदः, मुदा, मुद् *f.*, तुष्टिः *f.*, हृष्टता, प्रहर्षः, प्रहृष्टता, मदः, प्रमदः, मादः, तुष्टिः *f.*, तोषः, परितोषः, सन्तोषः, सन्तुष्टिः *f.*, विलासः, उल्लासः, उल्लसता -त्वं, प्रफुल्लता, प्रीतिः *f.*, प्रीतता, सुखं, सौख्यं, चित्तप्रसन्नता, शर्म्म *n.* (न्), नन्दथुः *m.*, धन्यता, आनन्दथुः *m.*, उत्सवः, रभसः, उत्साहः.—(The cause of joy) नन्दनः -ना -नं, आनन्ददः -दा -दं; 'joy and sorrow,' हर्षोद्वेगौ.

To JOY, *v. n.* नन्द् (c. 1. नन्दति -न्दितुं), आनन्द्, हृष् (c. 4. हृष्यति, हर्षितुं), ह्लाद् (c. 1. ह्लादते -दितुं), उल्लस् (c. 1. -लसति -सितुं), रम् (c. 4. रमते, रन्तुं), तुष् (c. 4. तुष्यति, तोष्टुं), मद् (c. 4. माद्यति, मदितुं).

To JOY, *v. a.* (Cause joy) नन्द् (c. 10. नन्दयति -यितुं), हृष् (c. 10. हर्षयति -यितुं), प्रहृष्.—(Give one joy, congratulate) अभिनन्द्, अभिवन्द् (c. 1. -वन्दते -न्दितुं), धन्यवादं कृ. *See To* CONGRATULATE.

JOYFUL, *a.* आनन्दी -न्दिनी -न्दि (न्), आनन्दितः -ता -तं, सानन्दः -न्दा

-न्दं, हृष्टः -ष्टा -ष्टं, प्रहृष्टः -ष्टा -ष्टं, हृष्टमानसः -सा -सं, हृष्टहृदयः -या -यं, प्रहर्षितः -ता -तं, हर्षितः -ता -तं, प्रहर्षणः -णा -णं, हर्षमाणः -णा -णं, हर्षणः -णा -णं, आह्लादी -दिनी -दि (न्), ह्लादी &c., प्रह्लादितः -ता -तं, आह्लादितः -ता -तं, ह्लादितः -ता -तं, प्रमोदी -दिनी -दि (न्), प्रमुदितः -ता -तं, मुदितः -ता -तं, मुदान्वितः -ता -तं, हर्षान्वितः -ता -तं, प्रमुद् *m.f.n.*, प्रफुल्लः -ल्ला -ल्लं, हर्षयुक्तः -क्ता -क्तं, तुष्टः -ष्टा -ष्टं, परितुष्टः -ष्टा -ष्टं, उल्लसः -सा -सं, उल्लासी -सिनी -सि (न्), उल्लसितः -ता -तं, प्रीतः -ता -तं, प्रह्वः -ह्वा -ह्वं, आनन्दमयः -यी -यं, हर्षाक्रान्तः -न्ता -न्तं, हर्षाविष्टः -ष्टा -ष्टं, सुखी -खिनी -खि (न्), मग्नः -ग्ना -ग्नं, विशोकः -का -कं.—(Causing joy) हर्षकः -का -कं, हर्षदः -दा -दं, हर्षावहः -हा -हं, आनन्ददः -दा -दं, आनन्दकरः -री -रं, मोदकः -का -कं, सुभगः -गा -गं.

JOYFULLY, *adv.* सानन्दं, सहर्षं, साह्लादं, हर्षेण, प्रहर्षेण, प्रह्लादेन, प्रमोदेन, सामोदं, उल्लासेन, सोल्लासं, आनन्दपूर्वं, हृष्टमनसा, हृष्टवत्, सन्तोषेण.

JOYFULNESS, *s.* सानन्दत्वं, हृष्टता, प्रहृष्टता, प्रफुल्लता, आनन्दः. *See* JOY.

JOYLESS, *a.* निरानन्दः -न्दा -न्दं, आनन्दहीनः -ना -नं, आनन्दशून्यः -न्या -न्यं, अहर्षः -र्षा -र्षं, अहृष्टः -ष्टा -ष्टं, अहर्षितः -ता -तं, हर्षहीनः -ना -नं, आह्लादहीनः -ना -नं, निराह्लादः -दा -दं, अनाह्लादी -दिनी -दि (न्), असुखी -खिनी -खि (न्), असुखः -खा -खं.—(Giving no joy) असुखदः -दा -दं, असुखावहः -हा -हं, अनानन्ददः -दा -दं, अहर्षदः -दा -दं.

JOYLESSNESS, *s.* निरानन्दत्वं, आनन्दहीनता, निराह्लादत्वं, हर्षशून्यता.

JOYOUS, *a.* आनन्दी -न्दिनी -न्दि (न्), सानन्दः -न्दा -न्दं, प्रहृष्टः -ष्टा -ष्टं, आनन्दवृत्तिः -त्तिः -त्ति, प्रसन्नचित्तः -त्ता -त्तं, उल्लासी -सिनी -सि (न्). *See* JOYFUL.

JOYOUSLY, *adv.* सानन्दं, सहर्षं, साह्लादं, हृष्टचेतसा, प्रसन्नमनसा.

JOYOUSNESS, *s.* हृष्टता, प्रहृष्टता, सानन्दत्वं, चित्तप्रसन्नता, प्रफुल्लता.

JUBILANT, *a.* जयशब्दकारी -रिणी -रि (न्), जयशब्दोच्चारी -रिणी -रि (न्), जयध्वनिकारी &c., जयप्रशंसाकारी &c., जयशब्दघोषी -षिणी -षि (न्).

JUBILEE, *s.* महोत्सवः, महोत्सवकालः, समुत्सवः, उत्सवः, उत्सवकालः.

JUCUNDITY, *s.* रम्यता, रमणीयता, प्रियता, नन्दकत्वं, कान्तत्वं.

JUDAIC, JUDAICAL, *a.* यिहुदीयः -या -यं, यिहुदीयव्यवहारः -रा -रं.

JUDGE, *s.* (Officer who hears and determines causes) धर्म्माध्यक्षः, धर्म्माधिकारी *m.* (न्), न्यायाधीशः, न्यायाधिपतिः *m.*, प्राड्विवाकः, विचारकर्त्ता *m.* (र्तृ), विचारकः, दण्डनायकः, व्यवहर्त्ता *m.* (र्तृ), अक्षदर्शकः, आक्षपाटिकः, स्थेयः, आधिकरणिकः, निर्णेता *m.* (तृ), निर्णयकारः.—(One who has skill to decide on the merits of any thing, a connoisseur) गुणग्राही *m.* (न्), गुणग्राहकः, गुणज्ञः, अभिज्ञः, विज्ञः, ज्ञानी *m.* (न्), परीक्षकः, तद्विद् *m.*, रसज्ञः, विवेकी *m.* (न्), विवेचकः, विवेकदृश्वा *m.* (न्), परिच्छेदकः.

To JUDGE, *v. n.* (Form an opinion, determine) विचर् (c. 10. -चारयति -यितुं), विचारं कृ, निर्णी (c. 1. -णयति -णेतुं), निर्णयं कृ, निश्चि (c. 5. -चिनोति -चेतुं), निश्चयं कृ, निर्धृ (c. 10. -धारयति -यितुं), अवधृ, निर्धारणं कृ.—(Weigh, consider, deliberate) मनसा विचर्, वितर्क् (c. 10. -तर्कयति -यितुं), वितर्कं कृ, विमृश् (c. 6. -मृशति -म्रष्टुं), विगण् (c. 10. -गणयति -यितुं), विकॢप् (c. 10. -कल्पयति -यितुं), समर्थ (nom. समर्थयति -यितुं), समर्थनां कृ, मनसा विवेचनं कृ.—(Discriminate) विज्ञा (c. 9. -जानाति -नीते -ज्ञातुं), परिच्छिद् (c. 7. -छिनत्ति -छेत्तुं), विविच् (c. 7. -विनक्ति -वेक्तुं, c. 10. -वेचयति -यितुं), विभू (c. 10. -भावयति -यितुं), विचर्, विवेकं कृ, परिच्छेदं कृ.—(Examine) परीक्ष् (c. 1. -ईक्षते -क्षितुं), परीक्षां कृ.—(Determine causes judicially, pass sentence) विचर्, विचारं कृ, निर्णी, निर्णयं कृ, प्रणयनं कृ, व्यवहारदर्शनं कृ, तीर् (c. 10. तीरयति -यितुं), न्यायं कृ.

To JUDGE, *v. a.* (Examine, bring under investigation) परीक्ष् (c. 1. -ईक्षते -क्षितुं), अनुसन्धा (c. 3. -दधाति -धातुं), अनुयुज् (c. 7. -युनक्ति -युंक्ते -योक्तुं), परीक्षितं -तां कृ.—(Judicially) विचर् (c. 10. -चारयति -यितुं), निर्णी (c. 1. -णयति -णेतुं), तीर् (c. 10. तीरयति -यितुं), विचारणं कृ, निर्णयं कृ.—(Censure, impute fault) निन्द् (c. 1. निन्दति -न्दितुं), दोषीकृ, दोषारोपणं कृ, अपवद् (c. 1. -वदति -दितुं), दोषप्रसङ्गं कृ.—(Consider, reckon) तर्क् (c. 10. तर्कयति -यितुं), मन् (c. 4. मन्यते, मन्तुं).

JUDGESHIP, *s.* धर्म्माध्यक्षत्वं, न्यायाधीशत्वं, धर्म्माधिकारः -रिता.

JUDGMENT, *s.* (Discrimination) विवेकः, विवेचनं, परिच्छेदः, विचारः -रणं -णा, विज्ञानं, विभावनं, विवेकदृश्वत्वं, अवबोधः, विविक्तिः *f.*—(Exercise of judgment after deliberation) विचारः -रणं -णा, विवेचना, सम्प्रधारणा.—(Knowledge derived from the comparison of ideas) अनुभवः, अनुभूतिः, अनुमानं, अनुमितिः *f.* तर्कः, परामर्शः, ज्ञानं.—(Notion, opinion) बुद्धिः *f.*, मतिः *f.*, मतं, सङ्कल्पः, बोधः; 'according to one's judgment,' यथाबुद्धि, यथामति.—(The faculty concerned in weighing the merits or advantages of any thing) गुणागुणविषयका बुद्धिः, हिताहितविषयका बुद्धिः or धीशक्तिः.—(Determination, decision) निर्णयः, निश्चयः, निश्चितं, विचारः, सङ्कल्पः, निर्धारणं, अवधारणं, निश्चितिः *f.*—(Judicial sentence) निर्णयपादः, निर्णयः, विचारः, दण्डाज्ञा, आधर्षणं, तीरणं, तीरितं.—(Divine ordinance) ईश्वरविधिः *m.*, ईश्वरविधानं, ईश्वरनियमः, ईश्वरशासनं.

JUDGMENT-DAY, *s.* विचारदिनं, विचारदिवसः, न्यायकरणदिवसः.

JUDGMENT-HALL, *s.* विचारसभा, धर्म्मसभा, न्यायसभा, विचारशाला.

JUDGMENT-SEAT, *s.* धर्म्मासनं, न्यायासनं, विचारासनं.

JUDICATORY, *s.* (Court of justice) धर्म्मसभा, विचारसभा, विचारस्थानं, न्यायसभा, व्यवहारमण्डपः, व्यवहारदर्शनशाला, राजद्वारं, धर्म्माधिकरणं, न्यायागारं, सदस् *n.*

JUDICATURE, *s.* (Power of administering justice) व्यवहारदर्शनाधिकारः, विचाराध्यक्षता, न्यायाधिकारः, न्यायकरणाधिकारः, धर्म्माधिकरणं, विचारकरणाधिकारः; 'simple judicature,' व्यवहारमातृका.—(Court of judicature) धर्म्मसभा. *See* JUDICATORY.

JUDICIAL, *a.* (Pertaining to the practice of courts of justice) व्यावहारिकः -की -कं, व्यवहारिकः -की -कं, व्यवहारी -रिणी -रि (न्), व्यवहारसम्बन्धी -न्धिनी -न्धि (न्), व्यवहारविषयः -या -यं; 'judicial proceedings or investigation,' व्यवहारः, व्यवहारदर्शनं, क्रिया, विचारः.—(Pertaining to the administration of justice) व्यवहारदर्शनसम्बन्धी &c., न्यायकरणसम्बन्धी &c.—(Proceeding from court of justice) व्यवहारदर्शनप्रयुक्तः -क्ता -क्तं, न्यायदर्शनप्रयुक्तः -क्ता -क्तं.—(Inflicted as a penalty) दण्डरूपः -पा -पं, शिक्षाहेतुकः -का -कं.

JUDICIALLY, *adv.* विचारानुसारेण, विचारानुक्रमेण, धर्म्मानुसारात्, व्यवहारानुक्रमेण, यथाव्यवहारं, विचारसभासकाशात्.

JUDICIARY, *a.* विचारकः -का -कं, व्यावहारिकः -की -कं, निर्णायकः -का -कं, व्यवहारदर्शनसम्बन्धी -न्धिनी -न्धि (न्), धर्म्मसभासम्बन्धी &c.

JUDICIOUS, *a.* (According to sound judgment) विवेकानुसारी -रिणी -रि (न्), सुयुक्तः -क्ता -क्तं, युक्तः -क्ता -क्तं, उपयुक्तः -क्ता -क्तं, यथोचितः -ता -तं, उचितः -ता -तं, समञ्जसः -सा -सं, न्याय्यः -य्या -य्यं, सङ्गतः -ता -तं, सविवेकः -का -कं.—(Acting with judgment,

Life, *s.* (Existence) जीवनं, जीवितं, जीवः -वा, प्राणनं, प्राणः, प्राणपरिग्रहः, सत्त्वं, सत्ता, जन्म *n.* (न्), जीवातुः *m.*, जीवथः, जीवदशा, उत्कर्षः.—(Vitality, principle of life) प्राणः -णाः *m. pl.*, जीवात्मा *m.* (न्), आत्मा *m.*, जीवः -वितं, जीवित्वं, चेतना, चैतन्यं, प्राणवायुः *m.*, प्राणात्मा *m.*, भूतात्मा *m.*, पञ्चप्राणाः *m. pl.*—(Possession of breath) असुधारणं, प्राणधारणं, प्राणपरिग्रहः.—(Drawing breath) श्वासप्रश्वासं, श्वासनिःश्वासं, निश्वसनप्रश्वसनं; 'endowed with life,' जीवी -विनी -वि (न्), जीवभृतः -ता -तं, सजीवः -वा -वं, प्राणी -णिनी &c., प्राणभृत् *m. f. n.*, सचेतनः -ना -नं; 'giving life,' प्राणदः -दा -दं, प्राणप्रदः -दा -दं, जीवदः -दा -दं; 'destroying life,' प्राणहरः -रा -रं, प्राणहारी -रिणी &c., जीवितहारी &c., प्राणान्तिकः -की -कं; 'the giving or saving of life,' प्राणदानं, जीवदानं; 'abandonment of life,' जीवोत्सर्गः, प्राणत्यागः, प्राणोत्सर्गः, जीवितत्यागः, प्राणपरित्यागः, देहत्यागः, देहन्यासः; 'fear of losing life,' जीवितसंशयः; 'peril of life,' प्राणबाधः; 'love of life,' जीविताशा, जिजीविषा, प्राणिणिषा; 'wishing for life,' जिजीविषुः -षुः -षु, प्राणिणिषुः -षुः -षु; 'dread of life, impatience of life,' जीवनत्रासः, जीवनद्वेषः, मुमूर्षा; 'impatient of life,' मुमूर्षुः -र्षुः -र्षु; 'deprived of life,' हतप्राणः -णा -णं, हतजीवितः -ता -तं, नष्टप्राणः -णा -णं, नष्टजीवितः -ता -तं; 'support or maintenance of life,' प्राणयात्रा, प्राणधारणं, प्राणरक्षणं; 'reckless of life,' जीवितव्ययी -यिनी &c., प्राणव्ययी &c.; 'recklessness of life,' जीवितव्ययः; 'the end or object of life,' जीवनहेतुः *m.*; 'means of life,' जीवनोपायः; 'a happy life,' सुजीवितं.—(Age, duration of life, term of life) आयुस् *n.*, आयुः -यु *m. n.*, वयस् *n.*, परमायुस्, जीवितकालः, जन्म *n.* (न्), जन्मकालः, आयुःपरिमाणं, जीवपरिमाणं, आयुर्मर्य्यादा, कालविशेषावच्छिन्नं जीवनं; 'advanced in life,' गतायूः -यूः -यु (स्) प्रवयाः -याः -यः (स्); 'conferring long life,' आयुष्यः -ष्या -ष्यं, आयुष्करः -रा -री -रं; 'end of life,' आयुःशेषः; 'for life, during life, all one's life,' यावज्जीवं, जीवनपर्य्यन्तं, आमरणात्, यावज्जन्म, जन्मपर्य्यन्तं, यावद्देहं; 'in all one's life,' जन्मतः प्रभृति, जन्मत आरभ्य, जन्मारभ्य, जन्मावधि, आजन्मतः, जन्मतः; 'lasting all one's life,' यावज्जीविकः -का -कं, आमरणान्तिकः -का -कं.—(Life in the world, the present life) इहलोकवासः, इहलोकवर्त्तनं, भूलोकवासः, इहकालः, इहजन्म *n.* (न्), संसारः, संसरणं, संसृतिः *f.*, गुणत्रयाभ्यासः; 'active or secular life,' प्रवृत्तिः *f.*, प्रवृत्तिमार्गः, संसारमार्गः, लोकव्यवहारः, प्रवर्त्तनं; 'retired life,' निवृत्तिः *f.*, निवृत्तिमार्गः; 'engaging in public life,' लोकव्यवहारप्रवृत्तिः *f.*; 'in this life,' इह, इहकाले, इहलोके; 'the vicissitudes of life,' संसारचक्रं, कालचक्रं, कालावृत्तिः *f.*—(Conduct, manner of living) वृत्तिः *f.*, व्यवहारः, आचारः, आचरणं, रीतिः *f.*, स्थितिः *f.*, चेष्टितं, चर्य्या, प्रवृत्तिः *f.*, स्थितिः *f.*; 'virtuous life,' धर्म्माचरणं.—(Vivacity) तेजस् *n.*, रसः, रसिकत्वं, तीक्ष्णता, सत्त्वं, वीर्य्यं.—(Narrative of a life, memoir) चरित्रं, चरितं, चरित्ररचना, चरिताख्यानं, आख्यानं.—(State, condition) अवस्था, दशा, भावः, स्थितिः *f.*, वृत्तिः *f.*, गतिः *f.*; 'the two states of life,' अवस्थाद्वयं;

these are 'happiness,' सुखावस्था, सुखदशा and 'misery,' दुःखावस्था, दुःखदशा; 'the three states of life,' अवस्थात्रयं; these are 'waking state,' जाग्रदवस्था; 'dreaming state,' स्वप्नावस्था and 'state of sound sleep,' सुषुप्त्यवस्था.

LIFE-GIVING, *a.* जीवदः -दा -दं, जीवदायकः -का -कं, जीवदाता -त्री -तृ (तृ), तेजस्करः -री -रं, तेजोवर्धकः -का -कं, वीर्य्यदः -दा -दं.

LIFE-GUARD, *s.* राजशरीररक्षकः, राजदेहरक्षी *m.* (न्), राजपरिचरः, राजपरिधिस्थः.

LIFELESS, *a.* निर्जीवः -वा -वं, अजीवः -वा -वं, अप्राणी -णिनी -णि (न्), प्राणहीनः -ना -नं, गतप्राणः -णा -णं, नष्टप्राणः -णा -णं, निःप्राणः -णा -णं, प्राणरहितः -ता -तं, प्राणविरहितः -ता -तं, अचेतनः -ना -नं, विचेतनः -ना -नं, चैतन्यरहितः -ता -तं, व्यसुः -सुः -सु, गतासुः -सुः -सु, अचेष्टः -ष्टा -ष्टं.—(Spiritless) निस्तेजाः -जाः -जः (स्), तेजोहीनः -ना -नं, विरसः -सा -सं, रसहीनः -ना -नं, निस्सत्त्वः -त्त्वा -त्त्वं, सत्त्वहीनः -ना -नं.

LIFETIME, *s.* जीवितकालः, आयुस् *n.*, वयस् *n.*, जन्मकालः, आयुष्यं; 'during life-time,' यावज्जीवं, जीवपर्य्यन्तं, जन्मपर्य्यन्तं.

To LIFT, *v. a.* (Raise) उत्तुल् (c. 10. -तोलयति -यितुं), उच्छ्रि (c. 1. उच्छ्रयति -यितुं, rt. श्रि), समुच्छ्रि, प्रोच्छ्रि, उन्नम् (c. 10. -नमयति -यितुं), उद्यम् (c. 1. -यच्छति -यन्तुं), उत्था in caus. (-थापयति -यितुं, rt. स्था), उत्क्षिप् (c. 6. -क्षिपति -क्षेप्तुं), समुत्क्षिप्, उद्धन् (c. 2. -हन्ति -न्तुं), उन्नी (c. 1. -नयति -नेतुं), उत्कृष् (c. 1. -कर्षति -क्रष्टुं), उद्धृ (c. 1. -हरति -हर्त्तुं), उद्वृह् (c. 6. -वृहति -वर्हितुं), उत्तोलनं कृ, ऊर्द्ध्वीकृ.—(Raise in rank) पदवृद्धिं कृ, उत्कृष्टपदे प्रतिपद् (c. 10. -पादयति -यितुं), संवृध् (c. 10. -वर्धयति -यितुं), प्रतिपत्तिं कृ or दा.—(Fill with pride or joy) दृप् (c. 10. दर्पयति -यितुं), उल्लस् (c. 10. -लासयति -यितुं), उद्धतं -तां कृ; 'to be lifted up with pride,' दृप् (c. 4. दृप्यति, दर्प्तुं), उद्धतीभू, उद्धतचित्तः -त्ता -त्तं भू.

LIFT, *s.* उत्तोलनं, उत्थापनं, उन्नमनं, उन्नामः, उन्नयनं, उच्छ्रयः, समुच्छ्रयः, उत्कर्षः.—(Help) साहाय्यं, उपकारः, उपकृतं.

LIFTED, *p. p.* उत्तोलितः -ता -तं, उत्थापितः -ता -तं, उच्छ्रितः -ता -तं, समुच्छ्रितः -ता -तं, उन्नतः -ता -तं, उद्यतः -ता -तं, उद्धृतः -ता -तं, समुद्धृतः -ता -तं, उद्धतः -ता -तं, उत्कर्षितः -ता -तं, उद्वर्हितः -ता -तं, उत्क्षिप्तः -प्ता -प्तं, उद्वाहितः -ता -तं; 'having the hands lifted up,' अभ्युच्छ्रितपाणिः -णिः -णि, उत्थितहस्तः -स्ता -स्तं; 'having his weapon lifted up,' उद्यतायुधः -धा -धं; 'having the arms lifted up,' उद्बाहुः -हुः -हु.

LIGAMENT, *s.* (Any thing that unites or ties) बन्धनं, बन्धः, योक्त्रं, सेत्रं, यन्त्रणं, पाशः, निगडः, शृङ्खला -लं, वारः, प्रसितिः *f.*—(In anatomy) सन्धिबन्धनं, सन्धिबन्धः, ग्रन्थिबन्धनं, अस्थिबन्धनं.

LIGATURE, *s.* बन्धः -न्धनं, पट्टः, पट्टकः, आवेष्टनं, परिवेष्टनं, वेष्टनं, रज्जुः *m. f.*, कवलिका.

LIGHT, *s.* द्युतिः *f.*, दीप्तिः *f.*, तेजस्, ज्योतिस् *n.*, ज्योतिः *f.*, प्रभा, प्रकाशः, आभा, छविः *f.*, आलोकः, रुचिः *f.*, रुक् *f.* (च्), कान्तिः *f.*, छटा, निभा, भा, भास् *f.*, विभा, छाया, त्विषा, त्विट् *f.* (ष्), शोचिस् *n.*, शोभा, वर्चस् *n.*, महस् *n.*, द्योतः, दृशानं, मरीचिः *m. f.*, कलिका; 'light of the moon or stars,' ज्योत्स्ना, कौमुदी, दीपिका; 'shining by its own light,' स्वप्रकाशः -शा -शं, स्वयंज्योतिः -तिः -ति; 'day-light,' सूर्य्यप्रकाशः, सूर्य्यरश्मिः *m.* दिनालोकः.—(Any thing that gives light, candle) दीपः -पकः, प्रदीपः, दीपिका.—(Knowledge) ज्ञानं, बोधः, अवगमः, प्रकाशः.—(Public notice) प्रकाशः, प्रकाशता, प्राकट्यं, प्रसिद्धिः *f.*, लोकप्रसिद्धिः *f.*, लौकिकं, प्रख्यातिः *f.*—(Light of a picture) प्रकाशितचित्रांशः, चित्रस्य प्रकाशितभागः, चित्रस्थं प्रकाशितस्थलं.—(Point of view) दृष्टिः *f.*, लक्ष्यं, दृष्टिसूत्रं, दृष्टिपातमार्गः, दृष्टिपातसूत्रं, लक्ष्यसूत्रं; 'to throw light upon,' प्रकाश् (c. 10. -काशयति -यितुं), विकाश्; 'throwing light upon,' प्रकाशकः -का -कं; 'to bring to light,' प्रकटीकृ, प्रकाशीकृ, स्पष्टीकृ, आविष्कृ, प्रादुष्कृ, विवृ (c. 5. -वृणोति -वरितुं -रीतुं); 'to come to light,' आविर्भू, प्रादुर्भू, प्रकाशीभू, प्रसिद्धिं गम् (c. 1. गच्छति, गन्तुं). In scientific treatises 'light' is called प्रकाशः.

LIGHT, *a.* (Having little weight) लघुः -घुः -घ्वी -घु, अगुरुः -रुः -र्वी -रु, अल्पभारः -रा -रं, लघुभारः -रा -रं, अल्पप्रमाणः -णा -णं, लघुप्रमाणः -णा -णं, गौरवहीनः -ना -नं, सुवहः -हा -हं, सुवाह्यः -ह्या -ह्यं, सुखवाह्यः -ह्या -ह्यं.—(Not oppressive, easy to be endured) लघुः -घ्वी -घु, सुसह्यः -ह्या -ह्यं, सुसहनीयः -या -यं, अक्लेशकः -का -कं, अल्पक्लेशकरः -री -रं; 'very light,' लघिष्ठः -ष्ठा -ष्ठं.—(Easy) सुखः -खा -खं, सुकरः -रा -री -रं, निरायासः -सा -सं, सुगमः -मा -मं, अकष्टः -ष्टा -ष्टं, अकठिनः -ना -नं, अविषमः -मा -मं, सुसाध्यः -ध्या -ध्यं, लघुः &c.—(Easy of digestion) सुपाक्यः -क्या -क्यं, सुपचनीयः -या -यं, सुपचः -चा -चं, सुखपच्यः -च्या -च्यं.—(Active, nimble) चपलः -ला -लं, लघुशरीरः -रा -रं, लघुगतिः -तिः -ति.—(Not dense) अस्थूलः -ला -लं, अघनः -ना -नं, शिथिलावयवः -वा -वं, विरलावयवः -वा -वं.—(Not steady, gay, airy) लघुचित्तः -त्ता -त्तं, लघुचेताः -ताः -तः (स्), लघुस्वभावः -वा -वं, चञ्चलः -ला -लं, चपलः -ला -लं, प्रकृतितरलः -ला -लं, अस्थिरः -रा -रं, लोलः -ला -लं, अनवस्थः -स्था -स्थं, गौरवहीनः -ना -नं, गाम्भीर्य्यहीनः -ना -नं.—(Trivial, inconsiderable) लघुः &c., लघुप्रभावः -वा -वं, अल्पप्रभावः &c., लघ्वर्थः -र्था -र्थं, अल्पार्थः -र्था -र्थं, तुच्छः -च्छा -च्छं, अगण्यः -ण्या -ण्यं, तृणप्रायः -या -यं.—(Light in color) पाण्डुः -ण्डुः -ण्डु, श्वेतः -ता -तं or expressed by ईषत्, आ prefixed; 'light red,' श्वेतरक्तः -क्ता -क्तं, ईषद्रक्तः -क्ता -क्तं; 'light blue,' आनीलः -ला -लं; 'light brown,' श्वेतपिङ्गः -ङ्गा -ङ्गं; 'light blue,' श्वेतनीलः -ला -लं.—(Bright, not dark) दीप्तिमान् -मती -मत् (त्), द्युतिमान् &c., प्रभावान् &c., दीप्तः -प्ता -प्तं, सप्रकाशः -शा -शं, प्रकाशमयः -यी -यं, तेजोमयः &c., तैजसः -सी -सं, प्रकाशयुक्तः -क्ता -क्तं, रुचिरः -रा -रं, शोभनः -ना -नं; 'the light half of the month when the moon increases,' शुक्लः, शुक्लपक्षः, शुद्धपक्षः.—(To make light of) लघूकृ, तुच्छीकृ, तृणाय मन् (c. 4. मन्यते, मन्तुं).

LIGHT, *adv.* लघु, लाघवेन, सलाघवं, अगुरु, लघु prefixed in comp.

To LIGHT, *v. a.* (Make light, illuminate) प्रकाश् (c. 10. -काशयति -यितुं), विकाश्, द्युत् (c. 10. द्योतयति -यितुं), प्रद्युत्, विद्युत्, दीप् (c. 10. दीपयति -यितुं), उद्दीप्, प्रदीप्, विदीप्, प्रकाशितं -तां कृ, द्योतितं -तां कृ, सप्रकाशं -शां कृ.—(Give light) प्रकाशं दा, प्रकाशनं कृ, द्योतनं कृ, तेजः कृ or दा.—(Kindle, set on fire) ज्वल् (c. 10. ज्वलयति, ज्वालयति -यितुं), प्रज्वल्, उज्ज्वल्, संज्वल्, समिन्ध् (c. 7. -इन्द्धे -इन्धितुं), सन्धुक्ष् (c. 10. -धुक्षयति -यितुं), तप् (c. 10. तापयति -यितुं), सन्तप्, दीप्, प्रदीप्, उद्दीप्, आदीप्.

To LIGHT, *v. n.* (Fall on) आपत् (c. 1. -पतति -तितुं), निपत्, आसद् (c. 10. -सादयति -यितुं), अकस्माद् आसद् or उपस्था (c. 1. -तिष्ठति -स्थातुं) or आगम् (c. 1. -गच्छति -गन्तुं) or उपागम्.—(Descend) अवरुह् (c. 1. -रोहति -रोढुं), अवतॄ (c. 1. -तरति -रितुं -रीतुं), अवया (c. 2. -याति -तुं), अधो गम्, अवपत्.—(Settle, rest upon) अध्यास् (c. 2. -आस्ते -आसितुं), निली (c 4. -लीयते -लेतुं), निषद् (c. 1. -षी-

इति -यतुं), अधिवस् (c. 1. -वसति -वस्तुं), अवस्था, संस्था, अधीनं कृ. —(Kindle) समिन्ध् in pass. (-इध्यते), ज्वल् (c. 1. ज्वलति -लितुं).

LIGHT-ARMED, *a.* लघ्वायुधः -धा -धं, लघुशस्त्री -स्त्रिणी -स्त्रि (न्), लघ्वस्त्रधारी -रिणी -रि, लघुशस्त्रभृत् *m.f.n.*

LIGHTED, *p.p.* इद्धः -द्धा -द्धं, समिद्धः -द्धा -द्धं, ज्वलितः -ता -तं, सन्तप्तः -प्ता -प्तं, सन्धुक्षितः -ता -तं, प्रज्वालितः -ता -तं.—(Lighted up, illuminated) प्रकाशितः -ता -तं, विकाशितः -ता -तं, द्योतितः -ता -तं, प्रद्योतितः -ता -तं, उद्द्योतितः -ता -तं, उद्दीपितः -ता -तं, भासितः -ता -तं, विभासितः -ता -तं, उद्भासितः -ता -तं, उज्ज्वलितः -ता -तं.

To LIGHTEN, *v.n.* (Flash, as lightning) स्फुर् (c. 6. स्फुरति -रितुं), विद्युत् (c. 1. -द्योतते -तितुं), अकस्मात् प्रकाश् (c. 1. -काशते -शितुं) or चल् (c. 1. चलति -लितुं) or उज्ज्वल्, विद्युद्वत् कम्प् (c. 1. कम्पते -म्पितुं).

To LIGHTEN, *v.a.* (Make bright) प्रकाश् (c. 10. -काशयति -यितुं), विकाश्, द्युत् (c. 10. द्योतयति -यितुं), दीप् (c. 10. दीपयति -यितुं), विदीप्. —(Make less heavy) लघूकृ, लघ् (nom. लघयति -यितुं), न्यूनभारं -रां -रं कृ, अल्पभारीकृ, भारन्यूनतां कृ.—(Alleviate) शम् (c. 10. शमयति -यितुं), प्रशम्, उपशम्, लघूकृ.

LIGHTENED, *p.p.* (Made less heavy) लघूकृतः -ता -तं, न्यूनभारः -रा -रं, शमितः -ता -तं, प्रशमितः -ता -तं.

LIGHTER, *s.* (More light) लघुतरः -रा -रं, लघीयान् -यसी -यः (स्), न्यूनभारः -रा -रं.—(One that lights or kindles) प्रकाशकः, प्रकाशदः, दीपकः, उद्दीपकः, द्युतिदः, द्युतिकरः, अग्निदः. (Large, flat-bottomed boat) तरालुः *m.*, तरान्धुः *m.*, तरणिः -णी *f.* वहित्रं, उडुपः -पं.

LIGHTERMAN, *s.* नाविकः, पोतवाहः, तरिकः, पृष्ठीकृतनौकाकर्णधारः.

LIGHT-FINGERED, *a.* लघुहस्तः -स्ता -स्तं, चपलहस्तः &c., पाणिचपलः -ला -लं.

LIGHT-FOOTED, *a.* लघुपादः -दा -दं, लघुगतिः -तिः -ति, द्रुतगतिः -तिः -ति.

LIGHT-HEADED, *a.* (Delirious) रोगोपहतज्ञानः -ना -नं, रोगोपहतत्वाद् भ्रान्तचित्तः -त्ता -त्तं or भ्रान्तबुद्धिः -द्धिः -द्धि or विक्षिप्तबुद्धिः -द्धिः -द्धि or क्षिप्तचित्तः &c., बुद्धिविभ्रमात् प्रलापकारी -रिणी &c.—(Thoughtless, volatile) चपलचित्तः &c., लघुचित्तः &c.

LIGHT-HEADEDNESS, *s.* चित्तविभ्रमः, ज्ञानभ्रान्तिः *f.*, बुद्धिभ्रान्तिः, बुद्धिविभ्रमः.

LIGHT-HEARTED, *a.* लघुचित्तः -त्ता -त्तं, लघुचेताः -ताः -तः (स्), हृष्टचित्तः &c., हृष्टहृदयः -या -यं, हृष्टमानसः -सी -सं, उन्मनः -ना -नं, आनन्दी -न्दिनी -न्दि (न्), सुमनस्कः -स्का -स्कं.

LIGHT-HOUSE, *s.* दीपस्तम्भः, दीपगृहं, आकाशदीपः, समुद्रयायिनां पथदर्शनार्थम् उन्नतभूभागे निर्म्मितं दीपगृहं.

LIGHTING, *part.* प्रकाशयन् -यन्ती -यत् (त्), उद्भासयन् -यन्ती -यत् (त्), द्योतयमानः -ना -नं, उद्दीपकः -का -कं, प्रदीपकः -का -कं.—(Resting on) निपणः -णा -णं, निलीयमानः -ना -नं, सन्निपतमानः -ना -नं.

LIGHTLESS, *a.* निष्प्रभः -भा -भं, अप्रकाशः -शा -शं, निरालोकः -का -कं.

LIGHTLY, *adv.* (With little weight) लघु, लाघवेन, सलाघवं, अगुरु, अल्पभारेण, अल्पप्रमाणेन.—(Easily) सुखेन, अनायासेन, अकष्टेन, अक्लेशेन, अयत्नेन.—(Without reason) हेतुना विना, कारणेन विना. —(Nimbly) लघुगत्या, चपलं.—(With levity) लघुचेतसा, चञ्चलं, चञ्चलवत्, अस्थिरं; 'to think lightly of,' लघूकृ, तुच्छीकृ.

LIGHTNESS, *s.* (Want of weight) लघुता -त्वं, लाघवं, लघिमा *m.* (न्), अगुरुता, गौरवहीनता, भारलघुता, भारहीनता, अल्पभारत्वं, भाराभावः, सुवाह्यता, भाररहितत्वं.—(Easiness) सुखत्वं, अनायासः, निरायासत्वं, सुकरत्वं, सुसाध्यता, लघुता, सुगमत्वं, अकष्टत्वं, अकाठिन्यं.—(State of being easy to be borne) लघुता, सुसह्यता, सुसहनीयता.—(Nimbleness) शरीरलघुता, लघुशरीरत्वं, लघुगतित्वं, द्रुतत्वं.—(Levity) चञ्चलत्वं, चाञ्चल्यं, चपलता, चापल्यं, लोलता, लौल्यं, अस्थिरता, अस्थैर्य्यं, अनवस्थितिः *f.*, अगुरुता, अगौरवं.—(Trivialness) लघुता, लाघवं, तुच्छता, अल्पप्रभावत्वं, तुच्छता; 'lightness of hand,' हस्तलाघवं, हस्तचापल्यं.

LIGHTNING, *s.* विद्युत् *f.*, तडित् *f.*, सौदामिनी, सौदाम्नी, सौदामनी, मेघज्योतिस् *n.*, मेघवह्निः *m.*, मेघदीपः, घनज्वाला, क्षणप्रभा, अचिरप्रभा, क्षणद्युतिः *f.*, ह्रादिनी, ह्रदिनी, शतह्रदा, शम्पा, सम्पा, चपला, चञ्चला, क्षणिका, आकालिकी, चला, ऐरावती, छटाभा, रोहिणी, अशुभा, असुभा, वज्रस्फुलिङ्गः -ङ्गं, घनवल्लिका, वीणा, महोल्का, वातिभोः *m.*, चटुला, रुक् *f.* (च्), नीलाञ्जना; 'forked lightning,' विद्युल्लता, तडिल्लता, द्यौत्यं; 'flash of lightning,' विद्युत्प्रकाशः, विद्युत्स्फुरणं, सौदामिनीस्फुरणं, विद्युत्कम्पः, विद्युद्दाम *n.* (न्), विद्युज्ज्वाला; 'the falling of lightning' विद्युत्पातः; 'struck by lightning,' वज्रहतः -ता -तं, विद्युत्पातोपहतः &c.; 'relating to lightning,' वैद्युतः -ती -तं.

LIGHTS, *s. pl.* फुप्फुसः, पुप्पुसः, फुप्फुसः, रक्तफेनजः.

LIGHTSOME, *a.* (Not dark, luminous) दीप्तिमान् -मती -मत् (त्), तेजोमयः -यी -यं, सप्रकाशः -शा -शं, प्रकाशमयः -यी -यं, सुप्रकाशः -शा -शं, तेजस्वी -स्विनी -स्वि (न्), प्रभावान् &c., द्युमान् -ना -नं.—(Cheerful, gay) उल्लासः -सा -सं, हृष्टः -ष्टा -ष्टं, प्रहृष्टः -ष्टा -ष्टं, सानन्दः -न्दा -न्दं, आनन्दी -न्दिनी &c., आनन्ददः -दा -दं, हर्षदः -दा -दं.

LIGHTSOMENESS, *s.* (Brightness) सप्रकाशता, दीप्तिमत्त्वं, दीप्तता.—(Cheerfulness) उल्लासः, उत्साहः, आनन्दता, हृष्टता, हर्षः.

LIGHT-SPIRITED, *a.* लघुचेताः &c., हृष्टहृदयः -या -यं, हृष्टचित्तः -त्ता -त्तं.

LIGNEOUS, *a.* काष्ठी -ष्ठिनी -ष्ठि (न्), काष्ठमयः -यी -यं, दारुमयः &c., दारवः -वी -वं, काष्ठकः -का -कं, काष्ठरूपः -पा -पं, काष्ठघटितः -ता -तं.

LIGNIFEROUS, *a.* काष्ठदः -दा -दं, काष्ठदायकः -का -कं, काष्ठोत्पादकः -का -कं.

LIGNIFORM, *a.* काष्ठरूपः -पा -पं, काष्ठाकारः -रा -रं, काष्ठाकृतिः -तिः -ति.

To LIGNIFY, *v.a.* काष्ठसात्कृ, दारुसात्कृ, काष्ठरूपीकृ, दारुरूपीकृ.

LIKE, *a.* (Resembling) सदृशः -शी -शं, सदृक्षः -क्षा -क्षं, सदृक् *m.f.n.* (श्), तुल्यः -ल्या -ल्यं, सम: -मा -मं, सजातीयः -या -यं, समानः -ना -नं, सन्निभः -भा -भं, अनुकारी -रिणी -रि (न्), निर्विशेषः -षा -षं, प्रातिभासिकः -की -कं. The following can only be used in comp. at the end of a word: -कल्पः -ल्पा -ल्पं, निभः -भा -भं, प्रतिमः -मा -मं, उपमितः -ता -तं, प्रख्यः -ख्या -ख्यं, सङ्काशः -शा -शं, रूपः -पा -पं, विधः -धा -धं, सौकाशः -शा -शं, निकाशः -शा -शं, प्रतीकाशः &c., प्रतिकाशः &c., प्रतिकाशः &c., प्रतीकाशः &c., भूतः -ता -तं; 'like the moon,' चन्द्रनिभः -भा -भं, चन्द्रोपमः -मा -मं; 'like, but with a degree of inferiority,' कल्पः -ल्पा -ल्पं. The prepositions स and अनु are often used indifferently with सम, समान, and तुल्य to express 'like'; e.g. 'of like form,' सरूपः -पा -पं, अनुरूपः -पा -पं, समरूपः -पा -पं, तुल्यरूपः &c., तुल्याकृतिः -तिः -ति, तुल्याकारः -रा -रं; 'of like properties or qualities,' सगुणः -णा -णं, अनुगुणः -णा -णं, समगुणः -णा -णं, तुल्यगुणः &c., समानगुणः &c., सधर्म्मा -र्म्मा -र्म्म (न्), अनुधर्म्मा &c., समानधर्म्मा &c., समभावः -वी -वं; 'of like tribe, class, or kind,' सजातिः -तिः -ति, सजातीयः -या -यं, समानजातिः &c., समानजातीयः &c., सवर्णः -र्णा -र्णं, तुल्यवर्णः &c., सविधः -धा -धं, सवर्गः -र्गा -र्गं, सवर्गीणः -णा -णं, सवर्गीयः -या -यं; 'like this or that,' ईदृशः -शी -शं, ईदृक् *m.f.n.* (श्), ईदृक्षः -क्षा -क्षं, एतादृशः &c., एतादृक् &c., एतादृक्षः &c., तादृशः &c.,

तादृक् &c., तादृक्ष: &c.; 'like what?' कीदृश: &c., कीदृक् &c., कीदृक्ष: &c.; 'like which,' यादृश: &c., यादृक् &c., यादृक्ष: &c.; 'like me,' मादृश: &c., मादृक् &c., मादृक्ष: &c.; 'like thee,' त्वादृश: &c., त्वादृक् &c., त्वादृक्ष: &c.; 'like your honor,' भवादृश: &c., भवादृक् &c., भवादृक्ष: &c. 'To be like,' अनुकृ, सदृश: -शी -शं भू, तुल्य: -ल्या -ल्यं भू, सदृशीभू, तुल्यीभू. The following examples illustrate the use and construction of some of the above words. 'The son is very like the father,' पुत्रो बहुधा पितरं अनुकरोति or पुत्र: पितृरूपो भवति, 'like another son,' पुत्रनिर्विशेष: -षा -षं; 'there never has been, nor ever will be, any one like him,' अनेन सदृशो न भूतो न भविष्यति; 'there is nobody like him,' तेन सदृश: कश्चिदपि नास्ति or न तस्य तुल्य: कश्चन or न कोपि तस्य सम:; 'like the sun,' आदित्यसदृश: -शी -शं, आदित्येन तुल्य: &c.; 'a crime like that of Brahmanicide,' ब्रह्महत्यासमं पापं; 'like me,' मम सम: or मम तुल्य: or मम अनुरूप: or मद्रूप: &c. or मद्विध: -धा -धं. —(Probable) सत्यसङ्काश: -शा -शं, सम्भाव्य: -व्या -व्यं.

Like, *s.* (Match, equal) तुल्य: -ल्या, तुल्यगुण: -णा, सदृश: -शी, तुल्यरूप: -पी, समानगुण: -णा, यमक: -का, युग्मक: -का; 'his like will never be again,' अनेन सदृशो न कदाचिद् भविष्यति.—(Likes and dislikes) प्रियाप्रियाणि *n. pl.*, प्रियाप्रियं.

Like, *adv.* (In the same manner) वत् affixed, इव, यथा, तथा, निर्विशेषं -षेण; 'like a dream,' स्वप्नवत्; 'like the moon,' चन्द्रवत्, चन्द्र इव, चन्द्रो यथा; 'cherished like another son,' पुत्रनिर्विशेषं लालित:; 'like king, like people,' यथा राजा तथा प्रजा; 'in like manner,' तथैव, तद्वत्, तथा, एवं, एवम्प्रकारेण, तथाविधेन, एवंविधेन, एवमेव; 'to act like,' अनुकृ.

To like, *v. a.* (Approve of, be pleased with) रुच् (c. 1. रोचते -चितुं) used impersonally, रुच् (c. 10. रोचयति -यितुं), अनुरुच्, अभिरुच्, अभिमन् (c. 4. -मन्यते -मन्तुं), अनुमन्, सम्मन्, मन्, अभिनन्द् (c. 1. -नन्दति -नन्दितुं), प्रतिनन्द्, नन्द्, अनुमुद् (c. 1. -मोदते -दितुं), अभिरुष् (c. 4. -रुष्यते -ति -रोषुं), प्रशंस् (c. 1. शंसति -सितुं), प्री (c. 4. प्रीयते), जुष् (c. 6. जुषते, जोषितुं), तुष् (c. 4. तुष्यति, तोष्टुं), सन्तुष्, अभिलष्, दय् (c. 1. दयते -यितुं), अनुरञ्ज् (c. 4. -रज्यते), स्निह् (c. 4. स्निह्यति, स्नेहितुं), प्रिय: -या -यं भू or अस्, अभिमत: -ता -तं भू, इष्ट: -ष्टा -ष्टं भू, प्रीत: -ता -तं भू, दयित: -ता -तं भू. Obs. Since some of the above verbs have a neuter sense, and some of these again are susceptible of an active sense if used in other forms, the construction of the sentence must vary accordingly; thus, 'I like that,' तद् मह्यं or मम रोचते or अहं तद् रोचयामि or तद् मया प्रशस्यते or अहं तद् अनुमन्ये or तद् मया अनुमतं or तद् मम अभिमतं; 'he does not like the gift,' दत्तं नाभिनन्दति or दत्तेन न तुष्यति; 'they like their king,' स्वराजानम् अनुरुष्यन्ते; 'he likes his brother's wife,' भ्रातुर् भार्य्यायाम् अनुरज्यते; 'women like everybody,' सर्व्वे स्त्रीणां प्रिया:.

To like, *v. n.* रुच् (c. 1. रोचते -चितुं), इष् (c. 6. इच्छति, एषितुं), अभिलष् (c. 1. -लषति, c. 4. -लष्यति -षितुं); 'as you like,' यथा भवते रोचते, यथाकामं; 'doing what one likes,' कामकारी -रिणी -रि (न्), कामचार: -रा -रं; 'going where one likes,' कामगामी -मिनी &c.; 'eating what one likes,' कामभक्ष: -क्षा -क्षं; 'taking what form one likes,' कामरूप: -पा -पं.

Liked, *p. p.* अभिमत: -ता -तं, अनुमत: -ता -तं, यथाभिमत: -ता -तं, अनुमोदित: -ता -तं, प्रिय: -या -यं, प्रीत: -ता -तं, इष्ट: -ष्टा -ष्टं, मनोनीत: -ता -तं, दयित: -ता -तं, अनुरक्त: -क्ता -क्तं, मत: -ता -तं.

Likelihood, likeliness, *s.* सम्भाव्यता -त्वं, सम्भावनीयता, योग्यता -त्वं, सम्भावना, सम्भव:, अभ्युपगम्यता, अभ्युपगम:, अनुमेयता -त्वं, सत्यसादृश्यं, सत्यसङ्काशत्वं -ता, आभास:.

Likely, *a.* सम्भाव्य: -व्या -व्यं, सम्भावनीय: -या -यं, सम्भावित: -ता -तं, योग्य: -ग्या -ग्यं, सत्यसङ्काश: -शा -शं, सत्यसन्निभ: -भा -भं, सत्यसदृश: -शी -शं, अनुमेय: -या -यं, अभ्युपगम्य: -म्या -म्यं; 'it is likely,' युज्यते, उपपद्यते.

Likely, *adv.* सम्भावनीयं, यथायोग्यं, यथासम्भवं, प्रायस्, प्रायशस्.

Likeminded, *a.* समानशील: -ला -लं, समस्वभाव: -वा -वं, समभाव: -वा -वं.

To liken, *v. a.* उपमा (c. 2. -माति, c. 3. -मिमीते -मातुं), सदृशीकृ, समीकृ, तुल्यीकृ, समानीकृ, समान (nom. समानयति -यितुं); 'to whom shall I liken him,' केन तम् उपमास्यामि.

Likened, *p. p.* उपमित: -ता -तं, उपमेत: -ता -तं, समीकृत: -ता -तं.

Likeness, *s.* (Resemblance) सादृश्यं, सदृशता -त्वं, सारूप्यं, सरूपता, समरूपता, अनुरूपता, आनुरूप्यं, समता, साम्यं, समानता, तुल्यता -त्वं, तुला, तौल्यं, औपम्यं, उपमा, उपमानं -नता, उपमिति: *f.*, प्रतिमानं -नता, प्रतिमता, आनुगुण्यं, अनुकार:, अनुहार:, आनुधर्म्यं, रूपसमता, स्वभावसमता.—(Form, appearance) आकृति: *f.*, आकार:, रूपं, मूर्त्ति: *f.*, संस्कार:.—(A picture or image resembling a person or thing) उपमा, उपमिति: *f.*, उपमानं, प्रतिमा, प्रतिमानं, प्रतिरूपं -पकं, प्रतिकृति: *f.*, प्रतिमूर्त्ति: *f.*, प्रतिकाय:, प्रतिनिधि: *m.*, प्रतिच्छन्द:, प्रतियातना, प्रतिबिम्बं, चित्रं, आकृति: *f.*; 'a speaking likeness,' आकृति: संवादिनी.

Likewise, *adv.* (In like manner) तथा, तथैव, तद्वत्, एवं, एवमेव.—(Moreover) अपिच, अपरञ्च, किञ्च, चैव, तथा, एवं.

Liking, *s.* (Fondness for, delight in, pleasure) रुचि: *f.*, अभिरुचि: *f.*, सन्तोष:, तोष:, तुष्टि: *f.*, सन्तुष्टि: *f.*, परितोष:, अनुराग:, अनुरक्ति: *f.*, अभिमतता, अनुमति: *f.*, अनुमोदनं, इच्छा, अभिलाष:, अभिलषितं, प्रियता, प्रीति: *f.*, छन्दं, छन्दस् *n.*; 'that husband was not to her liking,' स भर्त्ता तस्या: सन्तोषाय नाभवत्; 'likings and dislikings,' प्रियाप्रियाणि.—(State of body) शरीरस्थिति: *f.*, देहस्थिति: *f.*, शरीरभाव:.

Lilac, *s.* लैलकाख्य: पारसीकदेशीयो गुल्मप्रभेद:.

Lily, *s.* पद्म: -द्मं, पद्मिनी, उत्पलं, कमलं, कुमुदं, नलिनं, पङ्कजं, कुवलयं, इन्दीवरं, सौगन्धिकं, अब्जं, नीलाम्बुजन्म *n.* (न्), रक्तसन्ध्यकं, हल्लकं, कैरवं. These names properly apply to the water lily. *See* Lotus.

Limation, *s.* लोहमार्ज्जनेन घर्षणं or परिष्कार: or परिष्करणं, मार्ज्जनं.

Limature, *s.* (Filings) लोहचूर्णं, कृष्णचूर्णं, लोहजं, लोहकिट्टं.

Limb, *s.* अङ्गं, अवयव:, गात्रं, अपघन:, प्रतीक:; 'limb by limb,' अवयवशस्, गात्रं गात्रं; 'over every limb,' सर्व्वाङ्गीण: -णा -णं, प्रत्यङ्गं; 'having large limbs,' बृहदङ्ग: -ङ्गी -ङ्गं; 'kneading of the limbs,' गात्रसंवाह: -हनं, अङ्गमर्द्दनं.—(Edge, border) कोटि: *f.*, प्रान्त:, सीमा.

To limb, *v. a.* अङ्गाद् अङ्गम् अवछिद् (c. 7. -छिनत्ति -छेत्तुं), अवयवशो निकृत् (c. 6. -कृन्तति -कर्त्तितुं), गात्राणि पृथक्कृ, व्यङ्गीकृ.

Limbed, *a.* अङ्गी -ङ्गिनी -ङ्गि (न्), साङ्ग: -ङ्गा -ङ्गं, अवयवी -विनी -वि (न्), सावयव: -वा -वं; 'large-limbed,' बृहदङ्ग: -ङ्गी -ङ्गं, बृहदवयव: -वा -वं, महाङ्ग: -ङ्गा -ङ्गं; 'slender-limbed,' कृशाङ्ग: -ङ्गी -ङ्गं.

क्षीणाङ्गः &c., तन्वङ्गः &c.

LIMBER, *a.* (Flexible) मृदुः -दुः -द्वी -दु, शिथिलः -ला -लं, कोमलः -ला -लं, अदृढः -ढा -ढं, आयम्यः -म्या -म्यं, नम्यः -म्या -म्यं, आनम्यः -म्या -म्यं.

LIMBER, *s.* (Of a cannon) युद्धयन्त्रवाहनं, युद्धयन्त्रधुरा.

LIMBERNESS, *s.* शैथिल्यं, शिथिलता -त्वं, मृदुता, कोमलता, नम्यता.

LIMBLESS, *a.* निरवयवः -वा -वं, अनङ्गः -ङ्गा -ङ्गं, निरङ्गः -ङ्गा -ङ्गं, अङ्गहीनः -ना -नं, अङ्गशून्यः -न्या -न्यं, अवयवहीनः -ना -नं.

LIMBMEAL, *adv.* अवयवशस्, गात्रं गात्रं, खण्डशस्, खण्डं खण्डं.

LIMBO, *s.* (Hell) नरकः, निरयः.—(Prison) कारागारं, बन्धनागारं.

LIME, *s.* (Calcareous earth used for mortar) चूर्णं, कर्करः -रं, सुधा, छुरा, लेपः, विलेपः; 'nodule of lime,' चूर्णखण्डः, कर्करखण्डः.—(Bird-lime) पक्षिबन्धनलेपः, अतिश्यानद्रव्यं येन पक्षिणो बध्यन्ते, उदपेषविशेषः.—(Lime-tree, citrus acida) जम्बीरः, गुरुवल्लीघ्नः, यक्ष्मशोधी -धनः *m.*

To LIME, *v. a.* पूर्व्वोक्तश्यानद्रव्येण लिप् (c. 6. लिम्पति, लेप्तुं) or विलिप्.

LIME-BURNER, *s.* चूर्णकारः, चूर्णकर्त्ता *m.* (र्तृ), चूर्णदाहकः, चूर्णदाहकृत्.

LIME-KILN, *s.* चूर्णदहनस्थानं, चूर्णपचनस्थानं, चूर्णपाकः.

LIME-STONE, *s.* चूर्णखण्डः -ण्डं, कर्करखण्डः, कर्करं, चूर्णोपलः, कर्करोपलः

LIME-WATER, *s.* चूर्णसंसृष्टं जलं, चूर्णजलं, कर्करजलं.

LIMIT, *s.* सीमा *f.*, सीमा *m.* (न्), परिसीमा *f. m.*, अवधिः *m.*, अन्तः -न्तं, पर्य्यन्तः -न्तं, समन्तः, प्रान्तः, मर्य्यादा, परिच्छेदः, अवच्छेदः, वेला, नेमः, पर्य्याप्तिः *f.*, परिमाणं, परिमितिः *f.*, अवसानं, पर्यवसानं, परिसरः, शेषः, आघाटः, चक्रवाटः, पारः -रं; 'that forms a limit,' अवधिभूतः -ता -तं.

To LIMIT, *v. a.* (Bound) प्रान्त (nom. प्रान्तयति -यितुं), समन्त (nom. समन्तयति -यितुं) or पर्य्यन्त, परिछिद् (c. 7. -छिनत्ति -छेत्तुं), अवच्छिद्, परिच्छिन्नं कृ, सावधिकं -कां कृ, सोपाधिकं -कां कृ, समर्य्यादं -दां कृ, ससीमं -मां कृ.—(Confine within certain bounds, circumscribe) परिमा (c. 2. -माति, c. 3. -मिमीते -मातुं), परिमितं -तां कृ, मितं -तां कृ, सपरिमाणं -णां कृ, संयम् (c. 1. -यच्छति -यन्तुं), नियम्, निग्रह् (c. 9. गृह्णाति -ग्रहीतुं), संहृ (c. 1. -हरति -हर्त्तुं), निबन्ध् (c. 9. -बध्नाति -बन्द्धुं), निरूप् (c. 10. -रूपयति -यितुं).

LIMITABLE, *a.* परिमेयः -या -यं, परिच्छेदनीयः -या -यं, निरूपणीयः -या -यं.

LIMITATION, *s.* (The act of bounding) सीमाकरणं, मर्य्यादाकरणं, अवधिकरणं, पर्य्यन्तकरणं, परिच्छेदः -दनं, अवच्छेदः -दनं, परिमाणकरणं.—(A state of restriction) परिमितता -त्वं, सावधिकता, समर्य्यादत्वं, सोपाधिकत्वं, ससीमत्वं, अवधिता, अवधिः *m.*, पर्य्यन्तं -न्तत्वं, अव्याप्तित्वं, निबन्धनं, बन्धः -न्धनं.

LIMITED, *p. p.* परिमितः -ता -तं, मितः -ता -तं, समर्य्यादः -दा -दं, सावधिकः -का -कं, सोपाधिकः -का -कं, ससीमः -मा -मं, सपरिमाणः -णा -णं, परिच्छिन्नः -न्ना -न्नं, नियतः -ता -तं, संयतः -ता -तं, निबद्धः -द्धा -द्धं, बद्धः -द्धा -द्धं, संहृतः -ता -तं, अव्याप्तः -प्ता -प्तं, अव्याप्यः -प्या -प्यं, अव्यापी -पिनी -पि (न्), सङ्कुचितः -ता -तं, सबाधः -धा -धं; 'of limited meaning,' मितार्थः -र्था -र्थं.

LIMITER, *s.* मर्य्यादाकारी *m.* (न्), सीमाकर्त्ता *m.* (र्तृ), परिच्छेदकः, अवधिकृत्.

LIMITLESS, *a.* अपरिमितः -ता -तं, अमितः -ता -तं, अनन्तः -न्ता -न्तं, निरवधिः -धिः -धि.

To LIMN, *v. a.* लिख् (c. 6. लिखति, लेखितुं), आलिख्, विलिख्, अभिलिख्, चित्रं लिख्, चित्र् (c. 10. चित्रयति -यितुं).

LIMNER, *s.* चित्रकरः, चित्रकारः, चित्रलिख् *m.* (ख्), चित्रकर्म्मविद् *m.*

LIMOUS, *a.* पङ्किलः -ला -लं, पङ्की -ङ्किनी -ङ्कि (न्), सकर्द्दमः -मा -मं.

To LIMP, *v. n.* लङ्ग् (c. 1. लङ्गति -ङ्गितुं), खञ्ज् (c. 1. खञ्जति -ञ्जितुं), खोर् (c. 1. खोरति -रितुं), खोल् (c. 1. खोलति -लितुं), खोड् (c. 1. खोडति -डितुं), खोट् (c. 1. खोटति -टितुं), खुण्ड् (c. 1. खुण्डते -ण्डितुं), वङ्ग् (c. 1. वङ्गति -ङ्गितुं).

LIMP, *s.* लङ्गः, खञ्जनं, लङ्गगतिः *f.*, खञ्जगतिः *f.*

LIMP, *a.* मृदुः -दुः -द्वी -दु, शिथिलः -ला -लं, कोमलः -ला -लं.

LIMPER, *s.* लङ्गगतिः *m.*, लङ्गगामी *m.* (न्), खञ्जगतिः *m.*, खञ्जः.

LIMPID, *a.* स्वच्छः -च्छा -च्छं, स्वच्छजलः -ला -लं, अच्छः -च्छा -च्छं, निर्म्मलः -ला -लं, विमलः -ला -लं, अमलः -ला -लं, निर्म्मलजलः -ला -लं, सुजलः -ला -लं.

LIMPIDNESS, LIMPIDITY, *s.* स्वच्छता, निर्म्मलता, विमलता, सुजलता, जलनैर्म्मल्यं.

LIMPING, *part.* or *a.* खञ्जः -ञ्जा -ञ्जं, पङ्गुः -ङ्गुः -ङ्गु, खोरः -रा -रं, खोलः -ला -लं, खोडः -डा -डं, लङ्गगतिः -तिः -ति, खञ्जगतिः &c., लङ्गगामी -मिनी -मि (न्), विकलगतिः &c.

LIMPINGLY, *adv.* खञ्जवत्, पङ्गुवत्, सलङ्गं, लङ्गगत्या, खञ्जगत्या.

LIMSY, LIMPSY, *a.* शिथिलः -ला -लं, मृदुः -दुः -दु, कोमलः -ला -लं.

LIMY, *a.* चूर्णमयः -यी -यं, सचूर्णः -र्णा -र्णं, कर्करीयः -या -यं, प्रचुरचूर्णः -र्णा -र्णं, कर्करमयः -यी -यं.—(Viscous) सान्द्रः -न्द्रा -न्द्रं, श्यानः -ना -नं, चूर्णसगुणः -णा -णं, चूर्णोपमः -मा -मं.

LIN, *s.* (Flax) अतसी, उमा, क्षुमा, क्षौमी, शणं.

LINCH-PIN, *s.* अक्षाग्रकीलः -लकः, अक्षाग्रशङ्कुः *m.*, अक्षाग्रशलाका, अणिः *m.*, आणिः *m. f.*, उद्घः.

LINCTURE, *s.* (Medicine) अवलेहः, अवलेह्यं, लेह्यं, अवलेह्यौषधं.

LINE, *s.* रेखा, लेखा, सरणिः -णी, धारणी, राजिः -जिका *f.*, राजी, पंक्तिः *f.*, पद्धतिः *f.*, आलिः -ली *f.*, आवलिः -ली *f.*, पालिः -ली *f.*, ततिः *f.*, श्रेणिः -णी *m. f.*—(Ruled line) वर्त्तिः *f.*, रेखा, लेखा, अङ्कः.—(Row, range) पंक्तिः *f.*, श्रेणिः -णी, राजिः -जी *f.*, पद्धतिः *f.* आवलिः -ली *f.*, माला, हारः; 'in a line,' पंक्तिक्रमेण; 'in the same line,' समरेखः -खा -खं, एकरेखः &c.—(Line of troops) दण्डः, पंक्तिः *f.*, व्यूहः, विन्यासः, सैन्यपंक्तिः *f.* बलविन्यासः; 'an array of troops in line,' दण्डव्यूहः; 'line of infantry,' पत्तिपंक्तिः *f.*, पत्तिश्रेणी.—(String, cord) सूत्रं, रज्जुः *m. f.*, गुणः, तन्तुः *m.*—(Cord extended to direct any operation) सूत्रं; 'by line and rule,' यथासूत्रं.—(Line of the face, &c.) मुखरेखा, वदनरेखा, रेखा; 'a lucky line,' आयुष्यरेखा, पद्मरेखा, स्वस्तिकः.—(Line of print, &c.) पंक्तिः *f.*—(Line of a stanza) पदं.—(Outline) पाण्डुरेखा, बहिर्लेखा.—(Contour) आकारः, आकृतिः *f.*, परिधिः *m.*—(Rampart, trench) प्राकारः, वप्रः, दुर्गवप्रः, परिखा, परिकूटं.—(Method, disposition) क्रमः, अनुक्रमः, पर्य्यायः, मार्गः, परम्परा, विन्यासः, परिपाटिः -टी *f.*—(Series) श्रेणी -णिः *m. f.*, पंक्तिः *f.*, परम्परा, पारम्पर्य्यं, आवलिः -ली *f.*, माला, आनुपूर्व्यं; 'in regular line,' क्रमशस्, अनुक्रमशस्, अनुपूर्व्वशस्, पारम्पर्य्येण.—(Line of a family) वंशावलिः *f.*, वंशपरम्परा, वंशपारम्पर्य्यं, कुलपरम्परा.—(Line of conduct) मार्गः, पथः, व्यवहारः, रीतिः *f.*, सृतिः *f.*; 'correct line of conduct,' सुमार्गः, सुपथः; 'incorrect line,' उन्मार्गः, विमार्गः, विपथः, कुपथः, कुसृतिः *f.*—(Line of study) अध्ययनमार्गः, अध्ययनक्रमः.—(Department) देशः, विषयः, अङ्गं.—(Direction, course) दिक् *f.* (श्), पथः, मार्गः; 'line of direction in mechanics,' गुरुत्वलम्बः; 'it goes in a different line,' भिन्नदिशं गच्छति.—(Fishing-line) वरण्डः, वडिशसूत्रं, मत्स्यग्रहणसूत्रं.—(Equator) विषुवच्चक्रं, विषुमण्डलं, विषुवद्वृत्तं, विषुवद्वृत्तं, विषुवरेखा, नाडीवृत्तं, नाडीमण्डलं, भूगोलरेखा, भूपरिधिः *m.*, भूचक्रं, भूमध्यरेखा.—(To draw lines) लिख् (c. 6.

लिखति, लेखितुं), उल्लिख्, प्रोल्लिख्, रेखां कृ; 'to draw lines on the ground,' रेखादिना भूमिम् उल्लिख् or अङ्क् (c. 10. अङ्कयति -यितुं); 'act of drawing lines,' रेखाकरणं, प्रोल्लेखनं, उल्लिखनं; 'drawing lines,' उल्लिखन् -खन्ती -खत् (त्), प्रोल्लिखन् &c.

To LINE, *v. a.* (Cover on the inside) अन्तर् or अन्तर्भागे छद् (c. 10. छादयति -यितुं) or आछद्, अन्तश्छादनं कृ, अभ्यन्तरे छद्, अन्तःपटलं कृ, अन्तःपुटं कृ.—(Place in a line) पंक्तिक्रमेण स्था in caus. (स्थापयति -यितुं).

LINEAGE, *s.* अन्वयः, वंशः, सन्ततिः *f.*, सन्तानः, कुलं, अन्ववायः, गोत्रं, वंशविततिः *f.*, वंशपरम्परा, आवली -लिः *f.*, वंशावलिः, परम्परा, जातिः *f.*, जननं, अभिजनः; 'of royal lineage,' राजवंश्यः -श्या -श्यं; 'of high lineage,' महाकुलः -ला -लं.

LINEAL, *a.* (Compound of lines) रेखामयः -यी -यं, रेखारूपः -पा -पं, अङ्कितः -ता -तं.—(Derived from ancestors in a direct line) परम्परागतः -ता -तं, परम्परायातः -ता -तं, परम्पराप्राप्तः -प्ता -प्तं, क्रमागतः -ता -तं, क्रमायातः -ता -तं, क्रमप्राप्तः -प्ता -प्तं, वंशक्रमागतः -ता -तं, परम्परीणः -णा -णं, पारम्परिकः -की -कं; 'a lineal descendant,' सन्तानः, सन्ततिः *f.*; 'lineal descent,' क्रमागमः, वंशक्रमागमः, क्रमागतत्वं, अन्वयागमः.

LINEALLY, *adv.* क्रमागमेन, वंशक्रमेण, पारम्पर्य्येण, परम्परतस्; 'lineally descended,' वंशक्रमागतः -ता -तं, वंशक्रमायातः -ता -तं, अन्वयागतः -ता -तं, कुलक्रमायातः -ता -तं.

LINEAMENT, *s.* (Feature) रेखा, वदनरेखा, मुखरेखा, वदनाकृतिः *f.*, वदनाकारः, मुखावयवः, रूपचिह्नं, रूपलक्षणं, अङ्गचिह्नं, अङ्गलक्षणं.—(Outline) बहिर्लेखा, बाह्यरेखा, वस्तु *n.*, वस्तुमात्रं; 'of just lineaments,' सुरेखः -खा -खं.

LINEAR, *a.* पांक्तः -क्ती -क्तं, पांक्तेयः -यी -यं, पंक्तिरूपः -पा -पं, पंक्तिमयः -यी -यं, रेखामयः -यी -यं, रेखारूपः &c., रेखासम्बन्धी -न्धिनी -न्धि (न्).

LINED, *p. p.* अन्तर्भागे छादितः -ता -तं, अन्तराच्छादितः -ता -तं, अन्तरावृतः &c.

LINEN, *a.* (Made of flax or hemp) क्षौमः -मी -मं, क्षोमः -मी -मं, क्षौमकः -की -कं, शाणः -णी -णं, अतसीमयः -यी -यं, शणमयः &c.

LINEN, *s.* क्षौमवस्त्रं, क्षौमपटः, शाणवस्त्रं, शाणपटः, क्षौमी, क्षौमवस्त्रं, क्षौमपटः, क्षौमाम्बरं.

LINEN-DRAPER, *s.* क्षौमवस्त्रविक्रेता *m.* (तृ), क्षौमपटविक्रयी *m.* (न्), वस्त्रविक्रयोपजीवी *m.* (न्), वस्त्रक्रयविक्रयिकः, वस्त्रवाणिज्यकारी *m.* (न्).

LING, *s.* (Plant) जङ्गलरुहं तृणं, जङ्गलरोही तृणभेदः.

To LINGER, *v. n.* विलम्ब् (c. 1. -लम्बते -म्बितुं), मन्द (nom. मन्दायते), चिर (nom. चिरयति, चिरायति), अवस्था (c. 1. -तिष्ठति -स्थातुं), कालं क्षिप् (c. 6. क्षिपति, क्षेप्तुं), विलम्बनं कृ, कालक्षेपं कृ.—(Hesitate) विकॢप् (c. 1. -कल्पते -ल्पितुं, c. 10. -कल्पयति -यितुं), विचर् (c. 10. -चारयति -यितुं), विकल्पं कृ, विचारणं कृ.—(Remain long in any state) चिरेण or चिरं or चिरकालं or दीर्घकालं स्था or अवस्था or वृत् (c. 1. -वर्त्तते -र्त्तितुं), सुचिरं स्था; 'on a bed of sickness,' चिररोगी -गिणी भू.—(Proceed slowly) मन्दं मन्दं चल् (c. 1. चलति -लितुं) or चर् (c. 1. चरति -रितुं).

LINGERER, *s.* विलम्बी *m.* (न्), विलम्बकारी *m.*, मन्दगामी *m.* (न्), मन्दगतिः *m.*, चिरक्रियः, कालक्षेपकः, कालयापकः, दीर्घसूत्री *m.* (न्).

LINGERING, *part.* मन्दायमानः -ना -नं, मन्दयमानः -ना -नं, विलम्बी -म्बिनी -म्बि (न्), विलम्बितः -ता -तं, चिरायमाणः -णा -णं.—(Remaining long) चिरस्थः -स्था -स्थं, चिरस्थायी -यिनी -यि (न्), चिरस्थितः -ता -तं, चिरकालस्थः -स्था -स्थं, दीर्घकालीनः -ना -नं, चिरकालीनः -ना -नं.

LINGERINGLY, *adv.* विलम्बेन, विलम्बात्, सविलम्बं, मन्दं मन्दं, मन्दगत्या, कालक्षेपेण, सकालक्षेपं, दीर्घसूत्रवत्, दीर्घसूत्रतया.

LINGET, *s.* (Mass of metal) धातुपिण्डः, लोहपिण्डः.

LINGUADENTAL, *a.* जिह्वादन्त्यः -न्त्या -न्त्यं, जिह्वादान्तः -न्ती -न्तं.

LINGUAL, *a.* जिह्वासम्बन्धी -न्धिनी -न्धि (न्), जैह्विकः -की -कं, जिह्वा in comp.

LINGUIFORM, *a.* जिह्वारूपः -पा -पं, जिह्वाकारः -रा -रं, जिह्वाकृतिः -तिः -ति.

LINGUIST, *s.* भाषाज्ञः, बहुभाषाज्ञः, नानाभाषाज्ञः, अनेकभाषाज्ञः, बहुभाषावेत्ता *m.* (त्तृ), नानाभाषानिपुणः, शाब्दिकः, शब्दव्युत्पन्नः, बहुभाषावादी *m.* (न्), उच्चारणज्ञः.

LINIMENT, *s.* स्नेहनं, उपदेहः, लेपः, आलेपः, प्रलेपः, विलेपनं, अनुलेपनं अभ्यङ्गः, अभ्यञ्जनं, मर्द्दनौषधं.

LINING, *s.* अन्तश्छादनं, अन्तराच्छादनं, अन्तर्वेष्टनं, अन्तःपटलं, अन्तःपुटः -टं, आस्तरः -रणं, अन्तरास्तरणं.

LINK, *s.* (Of a chain) शृङ्खलासन्धिः *m.*, शृङ्खलसन्धिः, शृङ्खलाग्रन्थिः *m.*—(A chain, any thing connecting) शृङ्खलः -ला, सन्धिः *m.*, बन्धनं, पाशः, संयोगः, सम्बन्धः.—(Part of a connected series) अन्वयः, समन्वयः, प्रबन्धः.—(Torch) उल्का, उल्मुकं, ज्वलनकाष्ठं, अग्निकाष्ठं.

To LINK, *v. a.* सन्धा (c. 3. -दधाति -धत्ते -धातुं), संयुज् (c. 7. -युनक्ति -योक्तुं, c. 10. -योजयति -यितुं), सम्बन्ध् (c. 9. -बध्नाति -बन्द्धुं), संश्लिष् (c. 10. -श्लेषयति -यितुं), योक्त्र (nom. योक्त्रयति -यितुं), ग्रन्थ् (c. 9. ग्रथ्नाति, ग्रन्थितुं), शृङ्खलारूपेण सन्धा.

LINK-BOY, *s.* उल्काभृत्, उल्काधारी *m.* (न्), ज्वलनकाष्ठभृत्.

LINKED, *p. p.* सन्धितः -ता -तं, संयुक्तः -क्ता -क्तं, सम्बद्धः -द्धा -द्धं, अनुसम्बद्धः &c., अनुबद्धः &c., अन्वितः -ता -तं, समन्वितः -ता -तं, सान्वयः -या -यं.

LINNET, *s.* लिणताख्यो मधुररुतविशिष्टः क्षुद्रपक्षी.

LINSEED, *s.* अतसीबीजं, उमाबीजं, क्षुमाबीजं, अतसी, उमा, क्षुमा, मसीना, मसृणा, चणका, सुवर्चला, मालिका.

LINSEY-WOOLSEY, *a.* क्षौमोर्णः -र्णा -र्णं, क्षौमोर्णः &c., शाणोर्णः &c.

LINSTOCK, *s.* अग्निदयष्टिः *m.*, अग्निदकाष्ठं, अग्निदशलाका, अग्निदण्डः, ज्वलनदण्डः, ज्वलनकाष्ठं, शलाका.

LINT, *s.* विकेशिका, व्रणशोषणार्थं क्षौमवस्त्रखण्डः or क्षौमपटखण्डः or शाणवस्त्रखण्डः.

LINTEL, *s.* द्वारोपरिस्थकाष्ठं, द्वारोपरिस्थदारुः *m.*, द्वारोपरिस्थितं काष्ठं, द्वाराग्रकाष्ठं.

LION, *s.* सिंहः, केसरी *m.* (न्), केशरी *m.*, हरिः *m.*, मृगेन्द्रः, मृगराजः, मृगराट् *m.* (ज्), मृगपतिः *m.*, पशुराजः, पशुपतिः *m.*, वनराजः, मृगरिपुः *m.*, मृगारिः *m.*, गजारिः *m.*, कुञ्जरारातिः *m.*, द्विरदान्तकः, हस्तिकक्ष्यः, भीमनादः, भीमविक्रान्तः, भारिः *m.*, हरित् *m.*, हर्य्यक्षः, पञ्चास्यः, पञ्चमुखः, पञ्चाननः, पञ्चवक्त्रः, पञ्चशिखः, सटाङ्कः, जटिलः; 'a lion's mane,' केशरः, केसरः, सिंहकेशरः; 'lion's mouth,' सिंहमुखं, मृगेन्द्रमुखं; 'lion's roar,' सिंहनादः -दकः, सिंहध्वनिः *m.*; 'abounding with lions,' सिंहाढ्यः -ढ्या -ढ्यं; 'he plays the lion,' सिंहायते.—(Sign in the zodiac) सिंहः. *See* LEO.—(Object of curiosity) कौतुकं.

LIONESS, *s.* सिंही, केशरिणी, केसरिणी, मृगराज्ञी, वनराज्ञी.

LION-LIKE, LIONLY, *a.* सैंहः -ही -हं, सैंहिकः -की -कं, सिंहस्वभावः -वा -वं.

LIP, *s.* ओष्ठः, अधरः, दशनच्छदः, रदनच्छदः, रदच्छदः, दन्तच्छदः, दच्छदः, दशनवासस् *n.*, वाग्दलं, ओष्ठपल्लवं, अधरपुटं, ओष्ठपुटः -टं; 'the upper lip,' is properly ओष्ठः; 'the lower lip,' अधरः.—

(The lips) ओष्ठाधरौ *m.* du., ओष्ठौ *m.* du., अधरौ du., दन्तच्छदौ, रदनच्छदौ, दशनच्छदौ, दशनवाससी *n.* du.; 'red or cherry lip,' बिम्बोष्ठः or बिम्बौष्ठः, बिम्बाधरः; 'having red lips,' बिम्बोष्ठः -ष्ठा -ष्ठं or बिम्बौष्ठः; 'nectar of the lips,' अधरामृतं; 'drinking the nectar of the lips,' अधरपानं; 'to bite the lips,' ओष्ठं or अधरं or ओष्ठाधरौ दंश् (c. 1. दशति, दंष्टुं) or सन्दंश्, दन्तैर् ओष्ठं खाद् (c. 1. खादति -दितुं), अधरावलोपं कृ, ओष्ठदंशनं कृ; 'biting the lips,' सन्दष्टोष्ठः -ष्ठा -ष्ठं, दष्टदच्छदः -दा -दं, सन्दष्टौष्ठपुटः -टा -टं.—(Edge of a cup, &c.) पात्रकण्ठः, पात्रमुखं, पात्रधारः, पात्रकर्णः, पात्रपार्श्वः.

Lip-devotion, *s.* ओष्ठभक्तिः *f.*, अधरभक्तिः *f.*, ओष्ठपूजा, अधरपूजा.

Lipless, *a.* ओष्ठहीनः -ना -नं, अधरहीनः -ना -नं, निरोष्ठः -ष्ठा -ष्ठं.

Lipothymous, *a.* मूर्च्छितः -ता -तं, मूर्च्छालः -ला -लं, नष्टचेतनः -ना -नं.

Lipothymy, *s.* मूर्च्छा -र्च्छनं -ना, मोहः, सम्मोहः, प्रमोहः, प्रलयः, चेतनाहानिः *f.*, चैतन्यहानिः *f.*, चैतन्यनाशः.

Lipped, *a.* ओष्ठवान् -वती -वत् (त्), ओष्ठी -ष्ठिनी -ष्ठि (न्), ओष्ठ or अधर in comp.; as, 'red lipped,' बिम्बोष्ठः -ष्ठा -ष्ठं or बिम्बौष्ठः &c., बिम्बाधरः -रा -रं.

Lippitude, *s.* चुल्लत्वं, पिल्लत्वं, चिल्लत्वं, क्लिन्नाक्षता, नयनक्लिन्नता.

Lip-salve, *s.* ओष्ठलेपः, ओष्ठप्रलेपः, ओष्ठस्नेहनं, अधराभ्यञ्जनं.

Liquefaction, *s.* (The act) द्रावः -वणं, विद्रावः -वणं, द्रवीकरणं, विलयः -यनं, लयः -यनं, गलनं, गालनं, परिगलनं, विगलनं, क्षरणं, जलसात्करणं.—(The state) द्रवत्वं, द्रावितत्वं, विलीनता, गलितत्वं, द्रुतत्वं, विद्रुतता.

Liquefiable, liquable, *a.* द्राव्यः -व्या -व्यं, विद्राव्यः -व्या -व्यं, विलयनीयः -या -यं, गलनीयः -या -यं, द्रवणीयः -या -यं or द्रावणीयः सुविलयः -या -यं, विलयनशीलः -ला -लं, द्रावणार्हः -र्हा -र्हं, द्रवार्हः -र्हा -र्हं, क्षरणीयः -या -यं, क्षरभावः -वा -वं, याव्यः -व्या -व्यं.

Liquefied, *p. p.* द्रुतः -ता -तं, विद्रुतः -ता -तं, द्रावितः -ता -तं, विद्रावितः -ता -तं, द्रवीकृतः -ता -तं, द्रवीभूतः -ता -तं, लीनः -ना -नं, विलीनः -ना -नं, निलीनः -ना -नं, गलितः -ता -तं, गालितः -ता -तं, परिगलितः -ता -तं, विगलितः -ता -तं.

To liquefy, *v. a.* विली in caus. (-लाययति -लापयति -यितुं), विद्रु (c. 10. -द्रावयति -यितुं), द्रु, द्रवीकृ, गल् (c. 10. गालयति -यितुं), विगल्, गलितीकृ, विलीनीकृ, जलसात्कृ, आर्द्रीकृ.

To liquefy, *v. n.* विली (c. 1. -लीयते -लेतुं), प्रविली, प्रली, द्रु (c. 1. द्रवति, द्रोतुं), विद्रु, गल् (c. 1. गलति -लितुं), विगल्, क्षर् (c. 1. क्षरति -रितुं), द्रवीभू, विलीनीभू, जलसाद्भू.

Liquid, *a.* द्रवः -वा -वं, द्रुतः -ता -तं, द्रवरूपः -पा -पं, सद्रवः -वा -वं, विद्रुतः -ता -तं, विलीनः -ना -नं, लीनः -ना -नं, गलितः -ता -तं, तरलः -ला -लं, विह्वलः -ला -लं, प्रवाही -हिणी -हि (न्), प्रवाहधर्म्मकः -का -कं, पयस्यः -स्या -स्यं.

Liquid, *s.* द्रवः, द्रवद्रव्यं, द्रवपदार्थः, द्रववस्तु *n.*, सद्रवपदार्थः, रसः, आर्द्रद्रव्यं, आर्द्रवस्तु *n.*, जलं, वारि *n.*, पयस् *n.*

To liquidate, *v. a.* शुध् (c. 10. शोधयति -यितुं), परिशुध्, मुच् (c. 6. मुञ्चति, मोक्तुं, c. 10. मोचयति -यितुं), विमुच्, मोक्ष् (c. 10. मोक्षयति -यितुं), निमृज् (c. 6. मृजति, मष्टुं, c. 10. मार्जयति -यितुं), निस्तॄ (c. 10. -तारयति -यितुं), अपनी (c. 1. -नयति -नेतुं), विनी, अपवृज् (c. 10. -वर्जयति -यितुं), अपाकृ, साध् (c. 10. साधयति -यितुं), 'settle a debt,' ऋणं शुध् or अपनी or विनी or अपाकृ or अपवृज् or साध्, ऋणशोधनं कृ, ऋणसिद्धिं कृ, ऋणमुक्तिं कृ.

Liquidated, *p. p.* शोधितः -ता -[illegible]तः -ता -तं, परिशुद्धः -द्धा -द्धं, सिद्धः -द्धा -द्धं, साधितः -ता -तं, ऋणमुक्तः -क्ता -क्तं, ऋणमोचितः -ता -तं, अपाकृतः -ता -तं, विगणितः -ता -तं, निस्तारितः -ता -तं, उत्तीर्णः -र्णा -र्णं.

Liquidation, *s.* शोधनं, परिशोधनं, शुद्धिः *f.*, परिशुद्धिः *f.*, मुक्तिः *f.*, विमुक्तिः *f.*, मोक्षः -क्षणं, परिमोक्षणं, निस्तारः, उत्तरणं, अपाकरणं, सिद्धिः *f.*, साधनं, अपनयनं; 'of a debt,' ऋणशोधनं, ऋणसिद्धिः *f.*, ऋणापाकरणं, ऋणमुक्तिः *f.*, ऋणापनयनं, ऋणापनोदनं, विगणनं, निरादेशः.

Liquidity, liquidness, *s.* द्रवत्वं -ता, द्राव्यत्वं -ता, विद्रुतत्वं, विलीनता, गलितत्वं, द्रवभावः, रसता, प्रवाहधर्म्मः.

Liquor, *s.* (Fluid) द्रवः, द्रवद्रव्यं, द्रवपदार्थः, सद्रवपदार्थः, द्रववस्तु *n.*, रसः, जलं.—(Drink) पेयं, पानीयं, पेयद्रव्यं.—(Spirituous liquor) मद्यं, मदिरा, मदः, सुरा -री, वारुणी, शुण्डा, शीधुः *m.* -धु, सीधुः *m.*, हाला, आसवं, कल्यं -ल्या, कश्यं; 'drinker of spirituous liquor,' सुरापः -पी *f.*, मद्यपः -पी *f.*, शीधुपः -पी *f.*, शुण्डापायी *m.* -यिनी *f.*

Liquor-shop, *s.* मदिरागृहं, मद्यविक्रयस्थानं, शुण्डापानं.

Liquorice, *s.* मधुयष्टिका, यष्टिमधु *n.*, मधूकं, मधूली. *See* Licorice.

To lisp, *v. a.* or *n.* गद्गद् (nom. गद्गदति), गद्गदवाचा वद् (c. 1. वदति -दितुं), बालकवद् उच्चर् (c. 10. -चारयति -यितुं), भग्नदन्तैर् इव उच्चर्, भग्नदन्तोच्चारणं कृ, भग्नस्वरेण or भिन्नस्वरेण वद् or उच्चर्, अस्पष्टवाचा or अस्फुटवाचा उच्चर्, अस्पष्टोच्चारणं कृ, अस्फुटोच्चारणं कृ, जल्प् (c. 1. जल्पति -ल्पितुं).

Lisp, lisping, *s.* गद्गदः, गद्गदवाक् *f.* (च्), गद्गदपदं, गद्गदवाक्यं, भग्नदन्तोच्चारणं, भग्नस्वरोच्चारणं, भिन्नस्वरोच्चारणं, अस्फुटोच्चारणं, अस्पष्टोच्चारणं, बालकवद् उच्चारणं.

Lisped, *p. p.* भग्नदन्तोच्चारितः -ता -तं, अस्पष्टोच्चारितः -ता -तं.

Lisper, lisping, *a.* अस्फुटवाक् *m. f. n.* (च्), अस्पष्टवाक् *m. f. n.*, गद्गदवाक् *m. f. n.*, अस्फुटजल्पः -ल्पा -ल्पं, चित्रजल्पः &c., लोहलः -ला -लं, भग्नदन्तोच्चारणकृत्.

Lispingly, *adv.* अस्फुटवाचा, अस्पष्टवाचा, गद्गदवाचा, बालकवत्.

List, *s.* (Catalogue) आवलिः -ली *f.*, अनुक्रमणिका, परिसंख्या, परिसंख्यापत्रं, परिगणना, सूचिः -ची *f.*, सूचिपत्रं; 'a list of names,' नामावलिः -ली *f.*, नामावलिपत्रं, नामपरिसंख्यापत्रं; 'list of errata,' शुद्धिपत्रं.—(Strip of cloth) पट्टः -ट्टकः, पटखण्डः, वस्त्रखण्डः.—(Border or edge of cloth) वस्त्रधारः, वस्त्रप्रान्तः, वसनप्रान्तः, वस्त्रान्तः, वसनान्तः, वस्तिः *m.*, तरी, दशा.—(Ground enclosed as a field of combat) रङ्गभूमिः *f.*, रणभूमिः, रङ्गाङ्गनं, रङ्गः, युद्धभूमिः *f.*, युद्धक्षेत्रं, रणाजिरं, मल्लभूमिः *f.*, मल्लभूः *f.*—(Liking, desire) इच्छा, रुचिः *f.*, अभिरुचिः *f.*, स्पृहा.

To list, *v. a.* (Enroll) नामावलिपत्रे or नामपरिसंख्यापत्रे नामानि समारुह् in caus. (-रोपयति -यितुं) or आरुह् or अभिलिख् (c. 6. -लिखति -लेखितुं) or लिख्.—(Cover with strips of cloth) पट्टैर् or पटखण्डैर् छद् (c. 10. छादयति -यितुं) or आछद्, पट्टबन्धनं कृ.—(Sew together strips of cloth) पटखण्डान् संसिव् (c. 4. -सीव्यति, सेवितुं) or निषिव्.—(Hearken) आकर्ण् (c. 10. -कर्णयति -यितुं), कर्णं दा.

To list, *v. n.* (Desire, choose) इष् (c. 6. इच्छति, एषितुं), अभिलष् (c. 1. -लषति -षितुं), रुच् (c. 1. रोचते) used impersonally; 'doing as one lists,' कामचारी -रिणी -रि (न्), कामचारः -री -रं, 'going as one lists,' कामगामी -मिनी &c., कामगः -गा -गं; 'as one lists,' कामतस्, कामचारतस्. *See* Like.

To Listen, *v. n.* आकर्ण् (c. 10. -कर्णयति -यितुं), श्रु (c. 5. शृणोति,

श्रोतुं), आश्रु, उपश्रु, निशम् (c. 10. -शामयति -यितुं), कर्णं दा (c. 3. ददाति, दातुं), श्रवणं कृ.—(Heed, lend the mind) अवधा (c. 3. -धत्ते -धातुं), मनो धा, सावधानः -ना -नं भू, अवहितः -ता -तं भू or अस्, अवधानं कृ; 'listen,' शृणु, कर्णं देहि, अवधीयतां.—(Obey, follow admonition) श्रु in des. (शुश्रूषते -षितुं), अनुविधा in pass. (-धीयते), अनुवृत् (c. 1. -वर्त्तते -र्त्तितुं).

LISTENER, *s.* श्रोता *m.* -त्री *f.* (तृ), श्रवणकर्त्ता *m.* -र्त्री *f.* (र्तृ), निशमनकारी *m.* -रिणी *f.* (न्).

LISTLESS, *a.* अनुत्सुकः -का -कं, निरुत्सुकः -का -कं, अनिच्छुः -च्छुः -च्छु, अनिच्छुकः -का -कं, निरिच्छः -च्छा -च्छं, निःस्पृहः -हा -हं, निरीहः -हा -हं, उदासीनः -ना -नं, उदासी -सिनी -सि (न्), निरपेक्षः -क्षा -क्षं, विरक्तः -क्ता -क्तं, वीतरागः -गा -गं, विकौतुकः -का -कं, अनभिलाषः -षा -षं, अनवधानः -ना -नं, अनवहितः -ता -तं, निरुद्योगः -गा -गं, निरुद्यमः -मा -मं, अप्रयत्नः -त्ना -त्नं, अप्रयत्नशीलः -ला -लं, अनास्थः -स्था -स्थं, आस्थाहीनः -ना -नं, मुग्धबुद्धिः -द्धिः -द्धि, जडः -डा -डं, जडबुद्धिः &c., अव्यग्रः -ग्रा -ग्रं, निःसक्तः -क्ता -क्तं, ग्लानः -ना -नं, प्रमादी -दिनी &c. *See* LANGUID.

LISTLESSLY, *adv.* अनुत्सुकं, निरुत्सुकं, अनिच्छया, अनौत्सुक्येन, उदासीनवत्, अनभिलाषेण, अनवधानेन, अनवहितं, अनपेक्षया, जडवत्, अव्यग्रं. *See* LANGUIDLY.

LISTLESSNESS, *s.* अनुत्सुकता, अनौत्सुक्यं, निरुत्सुकता, अनिच्छा, अनीहा, निरीहता -त्वं, अस्पृहा, निःस्पृहता, अनभिलाषः, उदासीनता, औदास्यं, विरक्तिः *f.*, विरक्तता, वैराग्यं, अननुरागः, अनपेक्षा, अनवेक्षा, अनुत्साहः, अनुद्योगः, अप्रयत्नः -त्नता, अनास्था, आस्थाहीनता, मुग्धबुद्धित्वं, जडता, जाड्यं, अव्यग्रता, मान्द्यं, ग्लानिः *f.* *See* LANGUOR.

LITANY, *s.* ख्रीष्टीयमतधारिभिर् व्यवहृतः प्रार्थनामार्गः, ख्रीष्टीयसमाजव्यवहारिता प्रार्थना.

LITERAL, *a.* (Not figurative) मूलार्थकः -का -कं, मुख्यार्थकः -का -कं, मुख्यः -ख्या -ख्यं, अरूपकः -का -कं, अव्यञ्जकः -का -कं, विवक्षितः -ता -तं, शक्यः -क्या -क्यं; 'literal occupation,' मुख्यत्वं, मुख्यार्थः, मूलार्थः, प्रकृतार्थः.—(Following the letter or exact words) मूलशब्दानुसारी -रिणी -रि (न्), मूलशब्दानुयायी -यिनी &c., मूलपदानुसारी &c., शब्दार्थानुसारी &c., अवयवार्थानुसारी &c., शब्दानुसारी &c., यथाशब्दः -ब्दा -ब्दं, शाब्दिकः -की -कं.—(Consisting of letters) अक्षरी -रिणी &c., अक्षरमयः -यी -यं.

LITERALITY, *s.* मुख्यत्वं -ता, मुख्यार्थत्वं, मूलार्थत्वं, मुख्यार्थः, मूलार्थः, प्रकृतार्थः, शब्दार्थः, अव्यञ्जनं -ना, अरूपकं.

LITERALLY, *adv.* (Not figuratively) मूलार्थानुसारेण, मुख्यार्थानुसारेण, मूलार्थतस्.—(Close to the letter or exact words) शब्दतस्, ग्रन्थतस्, यथाशब्दं, शब्दानुसारेण -रतस्, मूलशब्दानुसारेण, मूलपदानुसारात्, शब्दार्थतस्.—(Letter by letter) अक्षरशस्.

LITERARY, *a.* (Pertaining to literature) विद्यासम्बन्धी -न्धिनी -न्धि (न्), विद्याविषयः -या -यं, अक्षरसम्बन्धी &c., शास्त्रिकः -की -कं, शास्त्रीयः -या -यं, विद्याप्रकरणसम्बन्धी &c., साहित्यसम्बन्धी &c.—(Versed in literature, fond of it) विद्यावान् -वती -वत् (त्), शास्त्राभिज्ञः -ज्ञा -ज्ञं, विद्याप्रियः -या -यं, विद्यासेवी -विनी &c., विद्यानुसेवी &c., विद्यानुरागी -गिणी &c., विद्याव्यवसायी -यिनी &c., विद्यानुपाली -लिनी &c., विद्याविशिष्टः -ष्टा -ष्टं, विद्यासम्पन्नः -न्ना -न्नं.

LITERATE, *a.* पण्डितः -ता -तं, विद्यावान् -वती -वत् (त्), विद्यासम्पन्नः -न्ना -न्नं, व्युत्पन्नः -न्ना -न्नं, विद्वान् -दुषी -द्वत् (स्), विपश्चित् *m.f.n.*, साक्षरः -रा -रं.

LITERATI, *s. pl.* पण्डितमण्डली -लं, पण्डितसमाजः, विद्वत्समाजः, पण्डितगणः, पण्डितवर्गः, पण्डितसमूहः, विद्वद्वृन्दं.

LITERATURE, *s.* (Learning) विद्या, शास्त्रं, शास्त्रविद्या, अक्षरं, साहित्यं, वाङ्मयं.—(Collective body of literary productions) शास्त्रसमुदायः, शास्त्रसमवायः, शास्त्रसमूहः, often expressible by शास्त्र in the sing. number; as, 'poetical literature,' काव्यशास्त्रं; 'branch of literature,' अङ्गं, उपशास्त्रं.

LITHE, *a.* शिथिलः -ला -लं, मृदुः -दुः -द्वी -दु, सुखनमनीयः -या -यं.

LITHENESS, *s.* शिथिलता, शैथिल्यं, सुनमनीयता, मृदुता, कोमलता.

To LITHOGRAPH, *v. a.* प्रस्तरोपरि or शिलोपरि लिख् (c. 6. लिखति, लेखितुं) or आलिख्, प्रस्तरं रेखादिना मुद्रीकृ or मुद्र् (nom. मुद्रयति -यितुं) or अङ्क् (c. 10. अङ्कयति -यितुं).

LITHOGRAPH, *s.* प्रस्तरमुद्रा, शिलामुद्रा, पाषाणमुद्रा, प्रस्तरालेख्यं, पट्टः.

LITHOGRAPHER, *s.* प्रस्तरलेखकः, प्रस्तरलिक् *m.* (ख्), प्रस्तरमुद्राकृत्, शिलामुद्राकृत्, शिलालेखकः, प्रस्तरालेख्यकृत्.

LITHOGRAPHY, *s.* प्रस्तरलिखनविद्या, प्रस्तरमुद्राङ्कनविद्या, शिलालिखनविद्या, शिलामुद्राङ्कनं, पाषाणलिखनं.

LITHONTRIPTIC, LITHONTRYPTIC, LITHONTHRYPTIC, *a.* अश्मरीघ्नः -घ्नी -घ्नं, अश्मरीहरः -रा -रं, मूत्राश्मनाशकः -का -कं.

LITHOTOMY, *s.* मूत्राश्मोच्छेदः, वस्तिस्थशर्करोच्छेदः, उच्छेदनद्वारा मूत्राश्मनिष्कर्षणं, वस्तिच्छेदनं, मूत्राधारच्छेदः.

LITHOTRIPSY, *s.* अश्मरीघर्षणं, अश्मरीमर्द्दनं, अश्मरीसम्मर्द्दः, अश्मरीसम्पेषः.

LITIGANT, *a.* विवादी -दिनी -दि (न्), विवदमानः -ना -नं, विवादार्थी -र्थिनी -र्थि (न्), व्यवहारी -रिणी &c., व्यावहारिकः -की -कं, व्यवहारिकः &c., कार्य्यवान् -वती -वत् (त्), कार्य्यी -र्य्यिणी &c., विवदन् -दन्ती -दत् (त्).

LITIGANT, *s.* व्यवहर्त्ता *m.* (र्त्तृ), विवादी *m.* (न्), विवादार्थी, वादी *m.*, अर्थी *m.*, कार्य्यवान् *m.* (त्), कार्य्यी *m.*

To LITIGATE, *v. n.* विवद् (c. 1. -वदते -दितुं), व्यवहृ (c. 1. -हरति -ते -हर्त्तुं), विवादं कृ, विवादार्थी -र्थिनी भू or अस्.

To LITIGATE, *v. a.* विवादास्पदीकृ, व्यवहारास्पदीकृ, वादग्रस्तं -स्तां कृ.

LITIGATED, *p. p.* विवादास्पदीकृतः -ता -तं, विवादास्पदीभूतः -ता -तं, विवादानुगतः -ता -तं, वादानुगतः -ता -तं, वादग्रस्तः -स्ता -स्तं, विवादग्रस्तः -स्ता -स्तं.

LITIGATION, *s.* विवादः, विवादकरणं, वादः, वादकरणं, व्यवहारः, व्यवहारकरणं, रिक्थं; 'under litigation,' विवादास्पदीभूतः -ता -तं, वादग्रस्तः -स्ता -स्तं. *See* LITIGATED.

LITIGIOUS, *a.* विवादी -दिनी -दि (न्), विवादशीलः -ला -लं, विवादप्रियः -या -यं, विवादार्थी -र्थिनी &c., वादप्रियः -या -यं, विवादप्रवणः -णा -णं, विवादबुद्धिः -द्धिः -द्धि, विवादासक्तः -क्ता -क्तं, विवादरतः -ता -तं.

LITIGIOUSNESS, *s.* विवादशीलता, विवादार्थित्वं, विवादासक्तिः *f.*, विवादबुद्धिः *f.*

LITTER, *s.* (Bed borne on the shoulders) शिबिका, याप्ययानं, डयनं, डलकं, प्रवहणं, डुला, शिरस्का.—(Bed of straw) तृणशय्या, तृणशयनं, तृणसंस्तरः, तृणास्तरणं.—(Brood of young animals) शावकगणः, यः शावकगण एकवारे जायते, शावकसमूहः; 'of pigs,' शूकरशावकगणः.—(Shreds scattered about) इतस्ततो विकीर्णा वस्त्रखण्डाः.—(Confusion of things scattered about) द्रव्यविक्षिप्तता, द्रव्यविकीर्णता, द्रव्यव्यस्तता, द्रव्यसङ्करः, साङ्कर्य्यं, अस्तव्यस्तता.

To LITTER, *v. a.* (Bring forth a number of young ones) शावकगणं सू (c. 2. सूते, c. 4. सूयते, सोतुं) or प्रसू or जन् (c. 10. जनयति -यितुं) or प्रजन् (c. 4. -जायते -जनितुं) or उत्पद् (c. 10. -पादयति

-यितुं), प्रसवं कृ.—(Cover with straw) तृणावृतं -तां कृ, तृणास्तीर्णं -र्णां कृ, तृणास्तृतं -तां कृ, सतृणं -णां कृ, तृणास्तरणं कृ.—(Scatter about confusedly) इतस्ततो विकृ (c. 6. -किरति -करितुं -रीतुं) or व्याकृ or विक्षिप् (c. 6. -क्षिपति -क्षेप्तुं), अस्तव्यस्तीकृ.

LITTERED, *p. p.* (Covered with straw) तृणावृतः -ता -तं, तृणास्तीर्णः -र्णा -र्णं, तृणास्तृतः -ता -तं.—(Scattered about) इतस्ततो विकीर्णः -र्णा -र्णं or व्याकीर्णः -र्णा -र्णं, अस्तव्यस्तः -स्ता -स्तं, बहुधा विक्षिप्तः -प्ता -प्तं, बहुधास्तीर्णः -र्णा -र्णं.

LOTH, *a.* अनिच्छुः -च्छुः -च्छु. *See* LOATH.

LOTION, *s.* औषधीयजलं, धावनौषधं, प्रक्षालनौषधं, धावनं -नी.

LOTTERY, *s.* गुटिकापातः, पाटकः, गुटिकापातपूर्व्वा विभागकल्पना.

LOTUS, LOTOS, *s.* (Flower) पद्मः -द्मं, कमलं, उत्पलं, कुमुदं, कुमुद् *n.*, नलिनं, कुवलयं, अरविन्दं, महोत्पलं, पङ्कजं, पङ्केरुहं, सरसिजं, सरसीरुहं, सरोजं, सरोरुहं, जलेजातं, अम्भोजं, वार्य्युद्भवं, अम्बुजं, अम्भोरुहं, पुण्डरीकं, मृणाली *m.* (न्), शतपत्रं, सहस्रपत्रं, कुशेशयं, इन्दिरालयं, तामरसं, पुष्करं, सारसं, रविप्रियं, विसप्रसूनं, कुवलं, कुवं, कुटपं, पुटकं, श्रीपर्णः, श्रीकरं, श्रयाह्वं.—Other varieties, red, white, and blue, are हल्लकं, रक्तसन्ध्यकं, रक्तसरोरुहं, रक्तकमलं, रक्तोत्पलं, कोकनदं, सिताम्भोजं, कल्हारं, सौगन्धिकं, इन्दीवरं, इन्दीवार, कैरवं, नीलाम्बुजन्म *n.* (न्), नीलोत्पलं, नीलकमलं, मूर्यकमलं, स्थलकमलं, स्थलपद्मं.—(The plant as distinguished from the flower) पद्मिनी, कमलिनी, नलिनी, कुमुद्वती; 'stalk of a lotus,' नालः -ला -ली -लं, पद्मनालं, नालिः *f.*, पद्मिनी, कुमुद्वती, नलिनी, पद्मतन्तुः *m.*; 'fibres or film attached to the stalk,' मृणालः -लं, विसं, विशं, विषं, नलिनीरुहः; 'root,' शालूकं, शालूकं, शिफाकन्दः -न्दं, करहाटः; 'seed,' कमलाक्षः, पद्माक्षः, पद्मबीजं; 'seed-vessel or pericarp,' बीजकोशः, कर्णिका, कर्णिकारः, वराटकः; 'filament,' केशरः, केसरः, किञ्जल्कः, किञ्जलः, किञ्जं; 'petal,' पद्मछदः, कमलच्छदः, पद्मान्तरः; 'new leaf,' संवर्त्तिः *f.*, संवर्त्तिका, नवदलं, नवपत्रं; 'abounding with lotuses,' कुमुद्वान् -द्वती -द्वत् (त्), कुमुदिकः -की -कं; 'place abounding with lotuses,' कुमुदिनी, कुमुद्वती, कुमुदाकरः, कुमुदवनं, कुमुदानामः, कुमुद्वती, पद्मिनी, पद्माकरः, पद्मिनीखण्डं, पद्मखण्डं, कमलिनी, कमलाकरः, नलिनी, कुवलयिनी, अरविन्दिनी, पुष्करिणी; 'an assemblage or quantity of lotus flowers,' पद्मिनी, नलिनी, बिसिनी, मृणालिनी, कमलिनी, उत्पलिनी, कुमुद्वती, पुटकिनी, पद्मखण्डं, षण्डः -ण्डं, शण्डं; 'lotus-like,' उत्पलाभः -भा -भं; 'lotus-shaped,' पद्माकारः -रा -रं; 'lotus-eyed,' उत्पलचक्षुः -क्षुः -क्षुः (स्); 'smelling like the lotus,' पद्मगन्धः -न्धा -न्धं, उत्पलगन्धिः -न्धि -न्धि.

LOUD, *a.* महास्वनः -ना -नं, महाध्वनिकः -का -कं, उच्चः -च्चा -च्चं, उच्चैःस्वरकः -का -कं, महास्वरकः -का -कं, महाध्वनिकरः -री -रं, महाशब्दकः -का -कं, महाशब्दी -ब्दिनी -ब्दि (न्), महाशब्दकारः -रा -रं, अतिशब्दनः -ना -नं, अतिशब्दवान् -वती -वत् (त्), महास्वनवान् &c., स्वनवान् &c., शब्दनः -ना -नं, महानादी -दिनी -दि (न्), तुमुलः -ला -लं, तुमुलकारी -रिणी &c., उच्चालः -ला -लं.—(Clamorous) घोषणः -णा -णं, घोषकरः -री -रं, बहुघोषः -षा -षं, महाघोषः -षा -षं; 'a loud sound or noise,' उच्चैःस्वरः, उच्चस्वरः, महाशब्दः, महास्वनः, महाघोषः, उच्चैर्घुष्टं, प्रणादः; 'loud speaking,' उच्चभाषणं; 'louder,' उच्चैस्तरः -रा -रं; 'loudest,' उच्चैस्तमः -मा -मं.

LOUD, LOUDLY, *adv.* उच्चैस्, उच्चकैस्, प्रोच्चैस्, उच्चैस्तमाम्, उच्चैःस्वरेण, उच्चशब्देन, महास्वरेण, महाशब्देन, अतिशब्देन, महाशब्दपूर्व्वं, स्वनवत्, उच्चैःकारं; 'speaking loud,' उच्चभाषी -षिणी -षि (न्); 'crying loud,' उच्चरावी -विणी &c.

LOUDNESS, *s.* उच्चता -त्वं, महाशब्दकारित्वं, महाशब्दकत्वं, शब्दमहत्त्वं, महाशब्दः, उच्चस्वरः, महाध्वनिः *m.*, उच्चालता.

LOUD-VOICED, *a.* उच्चस्वरः -रा -रं, उच्चस्वरवान् -वती -वत् (त्).

To LOUNGE, *v. n.* आलस्यं कृ, अलसीभू, आलस्यात् कालं क्षिप् (c. 6. क्षिपति, क्षेप्तुं) or कालक्षेपं कृ or कालहरणं कृ or कालव्ययं कृ, उदास् (c. 2. -आस्ते -आसितुं), निर्व्यापारत्वात् सुखेन शी (c. 2. शेते, शयितुं).

LOUNGER, *s.* अलसजनः, आलस्यकारी *m.* (न्), मुखनिरीक्षकः, लालाटिकः, कालक्षेपकः, अव्यापारी *m.* (न्), कार्य्यपटुः, उदासीनः, निर्व्यापारत्वात् सुखशायी *m.* (न्); 'woman with a lounging gait,' मन्दगमना.

LOUSE, *s.* यूकः -का, केशकीटः, केशटः, षट्पदः -दी, आपालिः *m.*, रोमविध्वंसः, [illegible]; 'egg of a louse,' लिक्षा.

To LOUSE, *v. a.* [illegible] यूक (nom. यूकयति -यितुं), यूकवर्जितं -तां कृ.

LOUSINESS, *s.* यूकत्वं -ता, बहुयूकता, यूकपूर्णता, यूकबाहुल्यं.

LOUSY, *a.* यूकाढ्यः -ढ्या -ढ्यं, सयूकः -का -कं, बहुयूकः -का -कं, यूकपूर्णः -र्णा -र्णं, यूकाकलितः -ता -तं, यूकोपद्रुतः -ता -तं, यूकी -किनी -कि (न्).

LOUT, *s.* ग्राम्यजनः, वृषलः, स्थूलजनः, स्थूलबुद्धिः *m.*, मूढजनः.

LOUTISH, *a.* स्थूलबुद्धिः -द्धिः -द्धि, स्थूलस्वभावः -वा -वं, ग्राम्यबुद्धिः &c., स्थूलः -ला -लं, ग्राम्यः -म्या -म्यं, ग्रामिकः -का -कं, अशिष्टः -ष्टा -ष्टं, असभ्यः -भ्या -भ्यं.

LOUTISHLY, *adv.* स्थूलजनवत्, ग्राम्यजनवत्, [illegible], बुद्धिस्थौल्यात्.

LOUTISHNESS, *s.* स्थूलता -त्वं, स्थौल्यं, बुद्धिस्थूलता, ग्राम्यता, अशिष्टता.

LOUVRE, *s.* धूमरन्ध्रं, धूमनिर्गमः, धूमायनं, वातायनं, छिद्रं.

LOVABLE, *a.* स्नेहार्हः -र्हा -र्हं, प्रियगुणकः -का -कं, प्रियगुणविशिष्टः -ष्टा -ष्टं, स्नेहोत्पादकशीलः -ला -लं, प्रीत्युत्पादकशीलः -ला -लं, प्रियः -या -यं.

LOVAGE, *s.* अजमोदा, यवानी -निका, यमानी -निका, इन्दुलेखा, भूतीकं.

To LOVE, *v. a.* (Have affection for) प्रेम कृ, प्री (c. 4. प्रीयते, प्रेतुं), स्नेहं कृ, प्रीतिं कृ, स्निह् (c. 4. स्निह्यति, स्नेहितुं), कम् (c. 10. कामयते -ति -यितुं), [illegible] (c. 1. [illegible] -यितुं), अनुरञ्ज् (c. 4. -रज्यते), अनुरागं कृ, अनुरक्तः -क्ता -क्तं भू, अनुरागवान् -वती भू, अनुरुध् (c. 4. -रुध्यते -रोद्धुं), भज् (c. 1. भजति, भक्तुं); 'he loves God,' ईश्वरे प्रेम करोति, ईश्वरभक्तिं करोति; 'they love him,' तस्मिन् प्रीयन्ते; 'he loves his brother more than me,' मत्तो ऽधिकं भ्रातरि प्रीयते or स्नेहं करोति; 'I love my son,' पुत्रेण सह मम महान् स्नेहः; 'she loves him,' तस्मिन् अनुरागवती भवति; 'he loves his wife,' भार्य्यायाम् अनुरज्यते or अनुरक्तो ऽस्ति; 'they love the king,' राजानम् अनुरज्यन्ते; 'women love every body,' सर्वे स्त्रीणां प्रियाः.

To LOVE, *v. n.* (Delight in) आनन्द् (c. 1. -नन्दति -न्दितुं), अभिनन्द्, हृष् (c. 4. हृष्यति, हर्षितुं), प्री (c. 4. प्रीयते, प्रेतुं), तुष् (c. 4. तुष्यति, तोष्टुं), रुच् (c. 1. रोचते -चितुं).

LOVE, *s.* (Fond or affection) प्रीतिः *f.*, प्रेम *n.* (न्), स्नेहः, अनुरागः, [illegible] *f.*, प्रणयः, वात्सल्यं, वत्सलता, रागः, हार्द्दं, प्रश्रयः, अनुरोधः, भक्तिः *f.*, [illegible], [illegible], प्रीतिभावः, स्नेहभावः; 'love for God,' ईश्वरभक्तिः *f.*; 'undivided love,' अनन्यभक्तिः. (Love of the sexes, passion) प्रेम *n.* स्त्रीपुरुषप्रेम, शृङ्गारः, शृङ्गारभावः, कामः, कामिता, [illegible], मन्मथः, रागः, अनुरागः, रतिः *f.*, रसः, चित्तचित्रं, [illegible], [illegible], [illegible] *m.* (Cupid) कामः, मन्मथः, मदनः, कन्दर्पः, स्मरः, मनसिजः, मनोभवः, चित्तभूः *m.*, चेतोभूः, चित्तजन्मा *m.* (न्), [illegible], अनङ्गः, शमान्तकः, जराभीरुः *m.* *See* KÁMADEVA. 'In love, under the influence of love,' कामार्त्तः -र्त्ता -र्त्तं, कामातुरः -रा -रं, मदनाग्रस्थः -स्था -स्थं, मदनवशः -शा -शं, जातमन्मथः -था -थं, जातकामः -मा -मं, स्मराकुलः -ला -लं, कामासक्तः -क्ता -क्तं, कामसमाविष्टः -ष्टा -ष्टं, कामग्रहः -ह्वा -ह्वं, शृङ्गारी -रिणी -रि (न्), शृङ्गारितः -ता -तं; 'to fall in love with, be in love with,' अनुरागवान् -वती भू with loc. or gen. of the person, जातानुरागः -गा भू, मोहितः -ता -तं भू; 'to make love,' विवाहार्थं प्रेम कृ, विवाहहेतुकप्रेम कृ, विवाहार्थं चित्ताराधनं कृ.—(Delight in) रुचिः *f.*,

[illegible] life,' जीविताशा.—(Airs [illegible]) [illegible], विलासः, विभ्रमः.

LOVE-BROKER, *s.* घटकः, प्रेमघटकः, मदनदूतः -ती *f.*, दूतिका *f.*

LOVED, *p. p.* प्रीतः -ता -तं, दयितः -ता -तं, स्निग्धः -ग्धा -ग्धं, प्रियः -या -यं, हृद्यः -द्या -द्यं, हृदयप्रियः -या -यं, इष्टः -ष्टा -ष्टं, मनोषितः -ता -तं, सुभगः -गा -गं.

LOVE-KNOT, *s.* प्रेमग्रन्थिः *m.*, प्रीतिग्रन्थिः *m.*, शृङ्गारग्रन्थिः *m.*

LOVE-LETTER, *s.* मदनलेखः, अनङ्गलेखः, मन्मथलेखः, शृङ्गारपत्रं, प्रेमपत्रं, अनङ्गपत्रं, प्रीतिपत्रं.

LOVELINESS, *s.* कान्तता, कान्तिः *f.*, सौन्दर्य्यं, सुन्दरता, अतिसौन्दर्य्यं, लावण्यं, रूपलावण्यं, चारुता, सौम्यता, लालित्यं, वामता, मुग्धता, कमनीयता, अभिरामता, दीप्तिः *f.*, शोभा, रमणीयता, मनोहरत्वं -ता, रम्यता, सुभगता, सश्रीकता.

LOVELY, *a.* कान्तः -न्ता -न्तं, सुन्दरः -रा -री -रं, अतिसुन्दरः &c., लावण्यवान् -वती -वत् (त्), सुरूपः -पी -पं, सुरूपवान् &c., चारुः -र्वी -रु, चारुमान् -मती &c., ललितः -ता -तं, सौम्यः -म्या -म्यं, मुग्धः -ग्धा -ग्धं, वामः -मा -मं, मनोरमः -मा -मं, मनोहरः -रा -रं, रम्यः -म्या -म्यं, रमणीयः -या -यं, कमनीयः -या -यं, सुभगः -गा -गं, मनोज्ञः -ज्ञा -ज्ञं, अभिरामः -मा -मं.

LOVELY-FACED, *a.* मुग्धाननः -ना -नं, चारुमुखः -खी -खं, सुमुखः &c.

LOVE-MATCH, *s.* प्रीतिविवाहः, प्रेमविवाहः, प्रीतिसम्बन्धः, प्रेमसम्बन्धः.

LOVE-QUARREL, *s.* प्रीतिकलहः, प्रेमकलहः, प्रणयकोपः.

LOVER, *s.* प्रणयी *m.* (न्), प्रियः, कान्तः, नायकः, रमणः, रमकः, रमः, दयितः, वल्लभः, कामी *m.* (न्), हृदयेशः, प्राणेशः, जीवितेशः, प्राणपतिः *m.*, प्रियतमः, बन्धुः *m.*, इष्टः; 'lover of knowledge,' विद्यानुरागी *m.* (न्), ज्ञानेप्सुः *m.*

LOVE-SHAFT, *s.* मदनशरः, स्मरशरः, कामशरः, कन्दर्पबाणः, मदनेषुः *m.* The god of love is fabled by the Hindús as having five arrows, each tipped with the blossom of a flower. *See* KÁMADEVA.

LOVE-SICK, *a.* कामरोगी -गिणी -गि (न्), मदनरोगी &c., कामातुरः -रा -रं, कामार्त्तः -र्त्ता -र्त्तं, कामपीडितः -ता -तं, मदनपीडितः &c., कामविह्वलः -ला -लं.

LOVE-SONG, *s.* मदनगीतं, प्रेमगीतं, शृङ्गारगीतं, शृङ्गारगानं.

LOVE-TALE, *s.* कामकथा, शृङ्गारकथा, मदनकथा, प्रेमकथा, शृङ्गाराख्यानं, प्रेमाख्यानं.

LOVE-TOKEN, *s.* प्रीतिलक्षणं, प्रेमलक्षणं, प्रीतिदानं, प्रेमस्मारकं.

LOVE-TRICK, *s.* प्रेमक्रीडा, अनङ्गक्रीडा, हावः, भावः, ललितं, विलासः.

LOVING, *a.* प्रणयी -यिनी -यि (न्), प्रणयवान् -वती -वत् (त्), कामी -मिनी &c., स्नेही -हिनी &c., अनुरक्तः -क्ता -क्तं, अनुरागवान् -वती &c., प्रकामः -मा -मं, प्रीतिमान् -मती &c., वत्सलः -ला -लं, प्रीतियुक्तः -क्ता -क्तं.—(Delighting in, attached to) अनुरागी -गिणी &c., आनन्दी -न्दिनी &c., प्रमोदी -दिनी &c., मोदी &c., प्रियः -या -यं, आसक्तः -क्ता -क्तं, सेवी -विनी &c., रतः -ता -तं, निरतः -ता -तं.

LOVING-KINDNESS, *s.* कृपा, दया, कारुण्यं, वात्सल्यं, करुणार्द्रता, अनुकम्पा, प्रसादः, अनुग्रहः, स्नेहः, हितेच्छा.

LOVINGLY, *adv.* सप्रणयं, प्रणयेन, सानुरागं, स्नेहेन, सस्नेहं, प्रीतिपूर्व्वं, प्रीत्या, वात्सल्येन, सवात्सल्यं.

LOW, *a.* (Not high) नीचः -चा -चं, नीचकः -का -कं, नीचस्थः -स्था -स्थं, निम्नः -म्ना -म्नं, अधरः -रा -रं, अनुच्चः -च्चा -च्चं, अतुङ्गः -ङ्गा -ङ्गं,

अधःस्थः -स्था -स्थं, अधस्तनः -नी -नं; 'low ground,' **निम्नभूमिः** *f.*—(Short, low in stature) **ह्रस्वः -स्वा -स्वं, नीचः -चा -चं, न्यङ्, नीची, न्यक् (ञ्च्), ह्रस्वतनुः -नुः -नु, अल्पतनुः -नुः -नु.**—(Not loud) **नीचस्वरः -रा -रं, नीचशब्दकः -का -कं, नीचः -चा -चं, नीचकः -का -कं.**—(Deep or grave in sound) **मन्दः -न्दा -न्दं, मन्द्रः -न्द्रा -न्द्रं, आमन्द्रः -न्द्रा -न्द्रं, मन्थरः -रा -रं, धीरः -रा -रं, गम्भीरः -रा -रं, गभीरः -रा -रं.**—(Mean, inferior, base) **अधमः -मा -मं, अवरः -रा -रं, नीचः -चा -चं, नीचकः -का -कं, हीनः -ना -नं, निकृष्टः -ष्टा -ष्टं, अपकृष्टः -ष्टा -ष्टं, अवमः -मा -मं, जघन्यः -न्या -न्यं, जघन्यवृत्तिः -त्तिः -त्ति, प्रतिकृष्टः -ष्टा -ष्टं, खलः -ला -लं, क्षुद्रः -द्रा -द्रं, दुष्टः -ष्टा -ष्टं, दुर्वृत्तः -त्ता -त्तं, वार्पलः -ली -लं, प्राकृतः -ती -तं, न्यङ्, नीची, न्यक् (ञ्च्), कृपणः -णा -णं, अर्व्वा -र्व्वती -र्व्वत् (त्), चरमः -मा -मं, ऊनकः -का -कं, ऊनकः -का -कं, आणकः -का -कं, इतरः -रा -रं, अनार्य्यः -र्य्या -र्य्यं, रेफः -फा -फं, रेपः -पा -पं, रेफाः -फाः -फः (स्), रेपाः &c., याप्यः -प्या -प्यं, खेटः -टा -टं, अवद्यः -द्या -द्यं, खुल्लः -ल्ला -ल्लं, खुल्लकः -का -कं, कुपूयः -या -यं, गर्ह्यः -र्ह्या -र्ह्यं, अश्लीलः -ला -लं; 'a low man,' **प्राकृतजनः, निहीनजनः, पृथग्जनः, इतरजनः, अपसदः, दुर्वृत्तः, अधमाचारः, दुराचारः, पामरः, जाल्मः, विवर्णः**; 'low language,' **अश्लीलं, खलोक्तिः** *f.*, **अश्लीलाक्षेपः.**—(Of low rank or birth) **हीनजातिः -तिः -ति, न्यग्जातिः -तिः -ति, नीचजातिः -तिः -ति, अन्त्यजातीयः -या -यं, हीनजन्मा -न्मा -न्म (न्), दुष्कुलीनः -ना -नं, अकुलीनः -ना -नं, नीचकुलजातः -ता -तं, हीनकुलः -ला -लं.**—(Depressed, dejected) **विषण्णः -ण्णा -ण्णं, विषादी -दिनी &c., अवसन्नः -न्ना -न्नं, दीनमनस्कः -स्का -स्कं, विमनाः -नाः -नः (स्), दुर्मनाः &c., विमनस्कः -स्का -स्कं, क्लान्तः -न्ता -न्तं, खिन्नः -न्ना -न्नं, उद्विग्नः -ग्ना -ग्नं, ग्लानः -ना -नं.**—(Moderate) **परिमितः -ता -तं, अल्पः -ल्पा -ल्पं, स्वल्पः -ल्पा -ल्पं.**—(In price) **अल्पमूल्यः -ल्या -ल्यं.** (Not rich, not nourishing, as diet) **निस्सत्त्वः -त्त्वा -त्त्वं, कर्शकः -का -कं, कृशकारी -रिणी &c., अपोषकः -का -कं, अपौष्टिकः -की -कं.**

Low, *adv.* **नीचैस्, नीचकैस्, नीचैः, अधम, अनुच्चं, नीच** in comp.; as, 'going low,' **नीचगः -गा -गं.**—(In a low tone) **नीचस्वरेण.**

To LOW, *v. n.* (As cattle) **हम्भारवं कृ, हम्भ** (nom. **हम्भायते**), **रम्भ्** (c. 1. **रम्भते -म्भितुं**), **रेभ** (c. 1. **रेभते -भितुं**), **गर्ज्** (c. 1. **गर्जति -र्जितुं**), **नद्** (c. 1. **नदति -दितुं**), **नर्द्** (c. 1. **नर्दति -र्दितुं**), **गर्ज्** (c. 1. **गर्जति -र्जितुं**).

Low-born, *a.* **हीनजातिः -तिः -ति, न्यग्जातिः** &c., **नीचकुलजातः -ता -तं, हीनकुलप्रसूतः -ता -तं, अनुच्चकुलजातः -ता -तं, हीनजन्मा -न्मा -न्म (न्), अन्त्यजातीयः -या -यं, अधमवंशोद्भवः -वा -वं, अवरवर्णजः -जा -जं, अधमवंशीयः -या -यं, अधमजातीयः -या -यं, अवरजः -जा -जं.**

Lower, *a.* (Less high) **अधरः -रा -रं, अधरस्थः -स्था -स्थं, अधःस्थः -स्था -स्थं, अधोभवः -वा -वं, अधस्तनः -नी -नं, नीचस्थः -स्था -स्थं, अधमः -मा -मं, अवाङ् -वाची -वाक् (च्), अवाचीनः -ना -नं, अवमः -मा -मं, जघन्यः -न्या -न्यं, अपकृष्टः -ष्टा -ष्टं, अधम्** in comp.; as, 'the lower part,' **अधोभागः**; 'lower part of the body,' **अधःकायः**; 'the lower region,' **अधोलोकः, अधोभुवनं, अवाची**; 'lower garment,' **अधोंशुकं, अन्तरीयं, उपसंव्यानं, परिधानं**; 'the lower line,' **अधःस्थपंक्तिः** *f.*, **अधरपंक्तिः**; 'the lower classes,' **अन्त्यजातीयाः** *m. pl.*, **अधमजातीयाः** *m. pl.*, **हीनजातीयाः** *m. pl.*, **अवरवर्णाः** *m. pl.*

To LOWER, *v. a.* (Cause to descend, let down) **अधःकृ, अधःपत्** (c. 10. **-पातयति -यितुं**), **अवपत्, अवतॄ** (c. 10. **-तारयति -यितुं**), **नीचीकृ.**—(Abase, humble) **अपकृष्** (c. 1. **-कर्षति -क्रष्टुं**), **नम्** (c. 10. **नमयति -यितुं**), **अवनम्, नम्रीकृ, भ्रंश्** (c. 10. **भ्रंशयति -यितुं**), **दर्पं** or **गर्व्वं भञ्ज्** (c. 7. **भनक्ति, भंक्तुं**), **गौरवं हृ** (c. 1. **हरति, हर्त्तुं**), **तिरोभू** (c. 10. **-भावयति -यितुं**), **पत्.**—(Diminish) **न्यूनीकृ, अल्पीकृ, ऊन्** (c. 10. **ऊनयति -यितुं**), **न्यून्, कन्** (nom. **कनयति -यितुं**), **ह्रस्** (c. 10. **ह्रासयति -यितुं**), **लघ** (nom. **लघयति -यितुं**).

To LOWER, *v. n.* (Grow less, sink) **न्यूनीभू, पत्** (c. 1. **पतति -तितुं**), **नम्रीभू.**

To LOWER, *v. n.* (Be dark and gloomy, be clouded) **मेघावृतः -ता -तं भू, मेघाच्छन्नः -न्ना -न्नं भू, मेघ** (nom. **मेघायते**), **अभ्र** (nom. **अभ्रायते**), **तमोवृतः -ता -तं भू, मलिनीभू, कलुषीभू.**—(Frown, look black) **भ्रूभङ्गं कृ, भ्रूसङ्कोचनं कृ, मलिनमुखः -खी -खं भू.**

Lower, *s.* (Gloominess, cloudiness) **साभ्रता, मेघाच्छन्नता, मेघतिमिरं, तमोवृतत्वं, मेघसंहतिः** *f.*, **दुर्दिनं.**—(Of countenance) **मुखमालिन्यं, मलिनमुखत्वं.**

Lowered, *p. p.* (Let down) **पातितः -ता -तं, अवपातितः -ता -तं, अधःकृतः -ता -तं.**—(Humbled) **भग्नदर्पः -र्पा -र्पं, आत्तगर्व्वः -र्व्वा -र्व्वं, गतगौरवः -वा -वं, हृतगौरवः -वा -वं, आत्तगौरवः -वा -वं.**—(Diminished) **न्यूनीकृतः -ता -तं, अल्पीकृतः -ता -तं, ह्रसितः -ता -तं.**

Lowering, *a.* (Gloomy, cloudy) **मेघाच्छन्नः -न्ना -न्नं, तमोवृतः -ता -तं, दुर्दिनग्रस्तः -स्ता -स्तं, मलिनः -ना -नं, अभियः -या -यं, मलिनमुखः -खी -खं.**

Lowermost, lowest, *a.* **अवरः -रा -रं, अधरः -रा -रं, अवरतमः -मा -मं, अधरतमः -मा -मं, अधमः -मा -मं, नीचः -चा -चं, नीचतमः -मा -मं, अतिनीचः -चा -चं, अधःस्थः -स्था -स्थं, अधरस्थः -स्था -स्थं, अवरस्थः -स्था -स्थं**; 'at the lowest price,' **अवरमूल्यमपेक्ष्य, न्यूनमूल्यमपेक्ष्य.**

Lowing, *s.* (Of cattle) **हम्भा, हम्भारवः, रम्भः, रम्भितं, रेभणं, गोनादः, गोरावः.**

Lowing, *part.* **हम्भारवविरावी -विणी -वि (न्), हम्भायमानः -ना -नं.**

Lowland, *s.* **निम्नभूमिः** *f.*, **निम्नभूः** *f.*, **निम्नदेशः, नीचभूमिः, नीचप्रदेशः.**

Lowlander, *s.* **निम्नदेशवासी** *m.* (**न्**), **नीचदेशस्थः, निम्नदेशीयः.**

Lowlily, *adv.* **नम्रचेतसा, नम्रं, विनम्रं, अदर्पेण, निरभिमानेन, नम्रशीलत्वात्, सविनयं, सनिर्वेदं, गर्व्वं विना, गर्व्वत्यागपूर्व्वं.**

Lowliness, *s.* **नम्रता, बुद्धिनम्रता, विनम्रता, विनयः, विनतिः** *f.*, **नम्रशीलता, गर्वहीनता, दर्पशून्यता, दम्भहीनता, निरभिमानं, अनभिमानं, अनहङ्कारः, अगर्व्वः, दीनता, निर्वेदः, दैन्यं, आनतिः** *f.*, **सन्नतिः** *f.*, **अपकर्षः, अपकृष्टता, नम्रवृत्तिः** *f.*

Lowly, *a.* **नम्रः -म्रा -म्रं, नम्रबुद्धिः -द्धिः -द्धि, नम्रशीलः -ला -लं, नम्रवृत्तिः -त्तिः -त्ति, नम्रमनाः -नाः -नः (स्), नम्रमनस्कः -स्का -स्कं, विनतचेताः -ताः -तः (स्), विनतः -ता -तं, विनयी -यिनी -यि (न्), सविनयः -या -यं, निरभिमानः -ना -नं, अनभिमानी -निनी** &c., **अनहङ्कारः -रा -रं -री -रिणी** &c., **निरहङ्कारः -रा -रं, निरहम्मानी -निनी** &c., **अभिमानहीनः -ना -नं, अगर्व्वः -र्व्वा -र्व्वं, वीतगर्व्वः -र्व्वा -र्व्वं, गर्व्वरहितः -ता -तं, वीतदम्भः -म्भा -म्भं, दर्पहीनः** &c., **निर्विण्णः -ण्णा -ण्णं, अनुद्धतः -ता -तं, अपकृष्टः -ष्टा -ष्टं, अप्रगल्भः -ल्भा -ल्भं, अप्रौढः -ढा -ढं, नीचः -चा -चं.**

Lowly, *adv.* **सविनयं, अनुद्धतं, सापकर्षं, नम्रवत्.** *See* Lowlily.

Low-minded, *a.* **दुष्टचेताः -ताः -तः (स्), खलात्मा -त्मा -त्म (न्), दुरात्मा** &c.

Lowness, *s.* **नीचता, निम्नता, अनुच्चता, अतुङ्गता**; 'lowness of ground,' **भूमिनिम्नता.**—(Meanness) **नीचता, अधमता, अपकृष्टता, निकृष्टता, अपकर्षः, जघन्यता, हीनता, खलता, क्षुद्रता, दुष्टता, कृपणता, कार्पण्यं, दुर्वृत्तता, अनार्य्यता, अनुत्कर्षः.**—(Of spirits) **विषादः, विषण्णता, अवसादः, अवसन्नता, उद्वेगः, निर्विण्णता, क्लान्तिः** *f.*, **ग्लानिः** *f.*, **म्लानिः, दीनता, वैमनस्यं, विमनस्कता, दौर्मनस्यं, दुर्मनस्कता.**—(Of sound) **नीचता, मन्दता, मन्द्रता, गम्भीरता, गाम्भीर्य्यं.**—(Of price) **मूल्यन्यूनता, अल्पमूल्यत्वं.**

Low-priced, *a.* अल्पमूल्यः -ल्या -ल्यं, न्यूनमूल्यः &c., सुमूल्यः &c.

Low-spirited, *a.* विषादी -दिनी -दि (न्), विषण्णः -ण्णा -ण्णं, अवसन्नः -न्ना -न्नं, उद्विग्नमनाः -नाः -नः (स्), दुर्मनाः &c., क्लान्तमनाः &c., खिन्नमनाः &c., दीनमनाः &c., विमनाः &c., दुर्मनस्कः -स्का -स्कं, विमनस्कः &c. उद्विग्नमनस्कः &c., दीनचेतनः -ना -नं, उदासवृत्तिः -त्तिः -त्ति.

Loyal, *a.* भक्तः -क्ता -क्तं, दृढभक्तिः -क्तिः -क्ति, भक्तिमान् -मती -मत् (त्), भक्तियुक्तः -क्ता -क्तं, सानुरागः -गा -गं, अनुरक्तः -क्ता -क्तं; 'to a sovereign or superior,' राजभक्तः &c., प्रभुभक्तः &c., राजानुरक्तः &c., राजसेवी -विनी &c., राजभक्तिनिष्ठः -ष्ठा -ष्ठं, स्वामिभक्तः &c., राजाज्ञावर्त्ती -र्त्तिनी &c., राजासक्तः -क्ता -क्तं, प्रजाधर्म्मनिष्ठः ष्ठा -ष्ठं, प्रजाधर्म्मपरायणः -णा -णं, प्रजाधर्म्मतत्परः -रा -रं.—(As a wife) पतिव्रता, साध्वी, सती, सुचरित्रा, एकपत्नी, स्वीया.—(As a husband) स्वदारनिरतः, स्वदारैकतानः, अनन्यनारीसामान्यः, अनुकूलः.

Loyalist, *s.* *See* Loyal.

Loyally, *adv.* दृढभक्त्या, राजभक्त्या, राजभक्तवत्, राजभक्तिपूर्व्वं, सानुरागं, राजानुरक्तवत्, स्वराजनिष्ठापूर्व्वं.

Loyalty, *s.* भक्तिः *f.*, राजभक्तिः *f.*, प्रभुभक्तिः, स्वामिभक्तिः, राजभक्तता, दृढा भक्तिः, राजानुरागः, राजानुरक्तिः *f*, स्वराजासक्तिः *f.*, स्वराजनिष्ठा, प्रजाधर्म्मनिष्ठा, प्रजाधर्म्मतात्पर्य्यं; 'test of loyalty,' उपधा.—(In a wife) पातिव्रत्यं, साध्वीत्वं, सतीत्वं. (In a husband) स्वदारनिरतिः *f.*, स्वदारनिष्ठा, अनुकूलता.

Lozenge, *s.* (A quadrangular figure having two acute and two obtuse angles) चतुष्कोणविशेषो यस्य द्विकोणाव् अन्तर्लक्षौ द्विकोणौ वहिर्लक्षौ.—(Sweetmeat) पटकं, मोदकं, लड्डुकं.

Lubber, *s.* स्थूलजनः, स्थूलबुद्धिः *m.*, स्थूलधीः *m.*, अलसजनः, स्थूलशरीरः; 'land-lubber,' स्थलवासी *m.* (न्), स्थलचरः.

Lubberly, *a.* स्थूलः -ला -लं, स्थूलस्वभावः -वा -वं, अदक्षः -क्षा -क्षं. (Relating to dry land) स्थलीयः -या -यं.

Lubberly, *adv.* सस्थौल्यं, स्थूलजनवत्, अदक्षं, अदक्षवत्.

Lubric, *a.* चिक्कणः -णा -णं, स्निग्धः -ग्धा -ग्धं, मेदुरः -रा -रं.

To lubricate, *v. a.* अभ्यञ्ज् (c. 7. -नक्ति -अंक्तुं), स्नेहेन अञ्ज्, स्नेहाक्तं -क्तां कृ, स्निग्धीकृ, चिक्कणीकृ, श्लक्ष्ण (nom. श्लक्ष्णयति -यितुं).

Lubricated, *p. p.* अभ्यक्तः -क्ता -क्तं, स्नेहाक्तः -क्ता -क्तं, व्याघारितः -ता -तं.

Lubrication, *s.* अभ्यञ्जनं, स्नेहाभ्यञ्जनं, स्निग्धीकरणं, चिक्कणीकरणं.

Lubricity, *s.* स्निग्धता, स्निग्ध्यं, स्नेहः -हनं, चिक्कणता, मेदुरता.

Lubricous, *a.* स्निग्धः -ग्धा -ग्धं, स्नेही -हिनी -हि (न्), चिक्कणः -णा -णं, चिक्किणः -णा -णं, मेदुरः -रा -रं.

Lucent, *a.* द्योती -तिनी -ति (न्), प्रकाशमानः -ना -नं, द्योतमानः &c.

Lucid, *a.* (Bright) दीप्तिमान् -मती -मत् (त्), तेजोमयः -यी -यं, तैजसः -सी -सं, उज्ज्वलः -ला -लं, तेजस्वी -स्विनी -स्वि (न्), कान्तिमान् &c., शोभनः -ना -नं, सुप्रभः -भा -भं.—(Pellucid) स्वच्छः -च्छा -च्छं, निर्मलः -ला -लं, विमलः -ला -लं, अमलः -ला -लं, विशदः -दा -दं, प्रसन्नः -न्ना -न्नं, शुद्धः -द्धा -द्धं.—(Perspicuous) स्पष्टः -ष्टा -ष्टं, स्पष्टार्थः -र्था -र्थं, प्रसन्नः -न्ना -न्नं, व्यक्तः -क्ता -क्तं, भिन्नार्थः -र्था -र्थं.

Lucidly, *adv.* स्पष्टं, सुस्पष्टं, व्यक्तं, सुव्यक्तं, स्पष्टार्थं, भिन्नार्थं, विशदं.

Lucidness, *s.* (Brightness) दीप्तिः *f.*, कान्तिः *f.*, तेजस् *n.*, उज्ज्वलता, छविः *f.*, द्युतिः *f.*, दीप्तिमत्त्वं. (Clearness) स्पष्टता, सुस्पष्टता, व्यक्तता, प्रसादः, स्पष्टार्थत्वं, वैशद्यं, स्वच्छता.

Lucifer, *s.* (Planet Venus) शुक्रः, उशना: *m.* (स्), भार्गवः.

Lucifer-match, *s.* शलाका, ज्वलनशलाका, अग्निदशलाका, ज्वलतृणं, ज्वलनतृणं, अग्निदतृणं, अग्निदं.

Luciferous, lucific, *a.* अग्निदः -दा -दं, प्रकाशजनकः -का -कं, प्रकाशकः -का -कं, दीप्तिकरः -रा -रं, प्रकाशोत्पादकः -का -कं.

Luciform, *a.* तेजोगुणकः -का -कं, प्रकाशगुणकः -का -कं, तेजोमयः -यी -यं.

Luck, *s.* दैवं, भाग्यं, भागः, भागधेयं, दैवयोगः, दैवगतिः *f.*, दैवदशा, दैविकं; दिष्टं, अदृष्टं, नियतिः *f.*, विधिः *m.*, कालनियोगः, भवितव्यता, दिष्टं, सङ्गतिः *f.*; 'good luck,' सौभाग्यं, सुभाग्यं, कुशलं -लता, कौशल्यं, शुभं, कल्याणं, भद्रं, मङ्गलं, माङ्गल्यं, पुण्योदयः, शर्म्म *n.* (न्), सद्गतिः *f.*, सम्पत्तिः *f.*, सम्पद् *f.*, अयः, श्रीः *f.*, लक्ष्मीः *f.*; 'bad luck,' दौर्भाग्यं, दुर्भाग्यं, दुर्दैवं, विपत्तिः *f.*, दुर्गतिः *f.*, अशुभं, अमङ्गलं; 'good luck to you,' दिष्ट्या, दिष्ट्या वर्धसे; 'good and ill luck,' शुभाशुभं, भद्राभद्रं, मङ्गलामङ्गलं.

Luckily, *adv.* सौभाग्येन -ग्यात्, सुभाग्येन -ग्यात्, दैववशात्, भाग्यवशात्, कल्याणात्, कौशल्यात्, माङ्गल्येन, शुभेदयात्, दिष्ट्या, दिष्ट्या, शुभं.

Luckiness, *s.* सौभाग्यं, सुभाग्यत्वं, धन्यता, कल्याणता, माङ्गल्यं, पुण्यवत्त्वं, कौशल्यं, मङ्गलं.

Luckless, *a.* दुर्भाग्यः -ग्या -ग्यं, मन्दभाग्यः &c., मन्दभागी -गिनी -गि (न्), अभाग्यः -ग्या -ग्यं, अभागी -गिनी &c., भाग्यहीनः -ना -नं, हीनभाग्यः -ग्या -ग्यं, दुर्भगः -गा -गं, निर्दैवः -वा -वं, दैवहीनः -ना -नं, अधन्यः -न्या -न्यं, विपन्नः -न्ना -न्नं.

Lucklessly, *adv.* दुर्भाग्येन -ग्यात्, दुर्दैवात्, दौर्भाग्यवशात्, दुर्दैववशात्.

Lucky, *a.* सौभाग्यवान् -वती -वत् (त्), भाग्यवान् &c., धन्यः -न्या -न्यं, मङ्गलः -ला -लं, कल्याणः -णा -णं, भागी -गिनी -गि (न्), शर्म्मवान् &c., पुण्यवान् &c., श्रीमान् &c., कुशलः -ला -लं, शुभः -भा -भं, भद्रः -द्रा -द्रं, सुभद्रः -द्रा -द्रं, शुभंयुः -युः -यु, अयवान् &c., सुभगः -गा -गं, शिवः -वा -वं, शर्म्मयुक्तः -क्ता -क्तं, लक्ष्मीवान् &c., भाग्यशाली -लिनी &c., सभाग्यः -ग्या -ग्यं; 'lucky moment,' शुभलग्नं, लग्नवेला.

Lucrative, *a.* लाभकारः -रा -रं, लाभदः -दा -दं, लाभकृत् *m. f. n.*, लाभदायकः -का -कं, सफलः -ला -लं, फलदः -दा -दं, अर्थदः -दा -दं, अर्थकरः -री -रं, लाभजनकः -का -कं, फलोत्पादकः -का -कं, फलदायकः -का -कं, हितावहः -हा -हं.

Lucratively, *adv.* सफलं, साफल्येन, सलाभं, लाभपूर्वं, सार्थं.

Lucrativeness, *s.* साफल्यं, सफलता -त्वं, सलाभत्वं, सार्थता, फलदता.

Lucre, *s.* लाभः, अर्थः, वृद्धिः *f.*, धनलाभः, प्राप्तिः *f.*, फलं, धनोपार्जनं, अर्थलब्धिः *f.*, अर्जनं, योगक्षेमः, द्रव्यं, द्रव्यांशः, लाभांशः, आयः, फलोदयः.

To lucubrate, *v. n.* निशाध्ययनं कृ, रात्र्यध्ययनं कृ, निशाभ्यासं कृ, रात्रौ or निशि विद्याभ्यासं कृ or विद्यासेवां कृ.

Lucubration, *s.* (Nocturnal study) निशाध्ययनं, रात्र्यध्ययनं, निशाभ्यासः.—(That which is composed by night) निशाभ्यासेन रचितो ग्रन्थः.

Luculent, *a.* प्रसन्नः -न्ना -न्नं, विशदः -दा -दं, स्वच्छः -च्छा -च्छं, स्पष्टः -ष्टा -ष्टं, निर्मलः -ला -लं, सुप्रभः -भा -भं, तेजोमयः -यी -यं.

Ludicrous, *a.* हास्यजनकः -का -कं, हासकरः -रा -रं, हास्यः -स्या -स्यं, अवहास्यः &c., उपहास्यः &c., हास्योत्पादकः -का -कं, हासोत्पादकः -का -कं, हासकरः -रा -रं, परिहासकरः -रा -रं, असङ्गतः -ता -तं, कौतुकजनकः -का -कं.

Ludicrously, *adv.* असङ्गतं, हास्यप्रकारेण, यथा हासो जायते तथा.

Ludicrousness, *s.* हास्यता, हास्यजनकता, उपहास्यता, हास्योत्पादकत्वं, असङ्गतत्वं, कौतुकजनकत्वं, अवहास्यत्वं.

Lues venerea, *s.* उपदंशः, 'afflicted with it,' उपदंशी -शिनी (न्).

To luff, *v. a.* प्रतिवातं नौकां परिवृत् (c. 10. -वर्त्तयति -यितुं).

To lug, *v. a.* (Drag with force) बलेन कृष् (c. 1. कर्षति, c. 6.

कृषति, क्रष्टुं, कर्ष्टुं), बलात् or प्रसभम् आकृष् or अपकृष् or हृ (c. 1. हरति, हर्त्तुं) or अपहृ.

Luggage, *s.* परिच्छदः, पथिकपरिच्छदः, यात्रिकसामग्री, सामग्र्यं, यात्रिकभाण्डानि *n. pl.*, वस्त्रभाण्डानि *n. pl.*, वस्त्रपात्राणि *n. pl.*

Lugger, *s.* त्रिकूपकविशिष्टा दीर्घवातवसना क्षुद्रनौका.

Lugubrious, *a.* शोकसूचकः -का -कं, शोकात्मकः -का -कं, शोकमयः -यी -यं, दुःखवोधकः -का -कं, कारुणिकः -की -कं, खेदसूचकः -का -कं, शोकी -किनी -कि (न्).

Lukewarm, *a.* ईषदुष्णः -ष्णा -ष्णं, कवोष्णः -ष्णा -ष्णं, मन्दोष्णः &c., कदुष्णः &c., कोष्णः &c., अनुष्णः &c., ईषत्तप्तः -प्ता -प्तं.—(Not zealous) मन्दोत्साहः -हा -हं, मन्दोद्योगः -गा -गं, निरुत्सुकः -का -कं, अतीक्ष्णः -क्ष्णा -क्ष्णं, अव्यग्रः -ग्रा -ग्रं, ईषच्छ्रद्धः -द्धा -द्धं, उदासीनः -ना -नं.

Lukewarmly, *a.* ईषदुष्णं, ईषत्तापेन, कवोष्णं, अनुत्तापेन, मन्दोद्योगेन.

Lukewarmness, *s.* कवोष्णता, मन्दोष्णता, कोष्णता -त्वं, ईषदुष्णता, कदुष्णत्वं, अनुष्णत्वं, ईषत्तापः, ईषत्तप्तता.—(Want of zeal) मन्दोत्साहः, मन्दोद्योगः, ईषच्छ्रद्धता, ईषदुत्तापः, अनौत्सुक्यं, अतीक्ष्णता, उदासीनता.

To lull, *v. a.* (Compose to sleep) स्वप् (c. 10. स्वापयति -यितुं), संस्वप्, सम्प्रस्वप्.—(Quiet, soothe) शम् (c. 10. शमयति -यितुं), प्रशम्, उपशम्, सान्त्व or शान्त्व (c. 10. सान्त्वयति -यितुं), अभिशान्त्व, परिशान्त्व, उपसान्त्व, लल् (c. 10. लालयति -यितुं), प्रमद् (c. 10. -मादयति -यितुं), प्रसन्नीकृ.

To lull, *v. n.* (Subside, become calm) शम् (c. 4. शाम्यति, शमितुं), प्रशम्, उपशम्, निवृत् (c. 1. -वर्त्तते -र्त्तितुं), विरम् (c. 1. -रमति -रन्तुं), विगम् (c. 1. -गच्छति -गन्तुं), प्रमद् [illegible], सम्प्रसद्, विश्रम् (c. 4. -श्राम्यति -श्रमितुं), [illegible] निर्वातीभू, [illegible], [illegible], [illegible].

Lull, *s.* (Temporary quiet after storm) शान्तिः *f.* [illegible], [illegible] *f.*, वायुनिवृत्तिः *f.*, निर्वातः, विरामः, विरतिः *f.*, [illegible], [illegible], निवृत्तिः *f.*, [illegible], उपशमः, [illegible], वायुशमः, [illegible] [illegible].

Lullaby, *s.* बालकस्वापकरणार्थकं गीतं, बालस्वापकगीतं, लालनगीतं, [illegible], बालसान्त्वनगीतं, शिशुशमकगीतं.

Lulled, *p. p.* (Put to sleep) स्वापितः -ता -तं.—(Quieted) शमितः -ता -तं, [illegible] -न्ता -न्तं, उपशान्तः -न्ता -न्तं, प्रमादितः -ता -तं, उप[illegible] -ता -तं.

Luller, *s.* शमकः, शान्तिकरः, शान्तिदः, सान्त्वनकृत्, लाली *m.* (न्).

Lumbago, *s.* गृध्रसी, गृध्रसी, कटिवातः, श्रोणिवातः, कटिवेदना.

Lumbar, lumbal, *a.* कटिसन्धी -न्धिनी -न्धि (न्), श्रोणिसन्धी &c.

Lumber, *s.* निरर्थकद्रव्यं, अनर्थकद्रव्यं, बाधकद्रव्यं, क्लेशकद्रव्यं, बाधकं, भारः, अतिभारः.

To lumber, *v. a.* निरर्थकद्रव्यैः पॄ (c. 10. पूरयति -यितुं), निरर्थकद्रव्याणि इतस्ततो विकॄ (c. 6. -किरति -करितुं -रीतुं) or विक्षिप् (c. 6. -क्षिपति -क्षेप्तुं).

Lumber-room, *s.* निरर्थकद्रव्यकोष्ठः, बाधकद्रव्यकोष्ठकं.

Luminary, *s.* ज्योतिस् *n.*, ज्योतिष्मान् *m.* (त्), भास्वान् *m.* (त्), प्रतिभावान् *m.* (त्), खद्योतनः, भास्करः, प्रभाकरः, खोल्कः, गगणेचरः, खेचरः, खचरः, प्रकाशकपदार्थः, प्रकाशयुक्तपदार्थः, तेजोराशिः *m.*

Luminous, *a.* तेजोमयः -यी -यं, दीप्तिमान् -मती -मत् (त्), प्रदीप्तिमान् &c., प्रभावान् &c., भास्वान् &c., भानुमान् &c., प्रकाशयुक्तः -क्ता -क्तं, विशदः -दा -दं.—(Shining by its own light) स्वप्रकाशः -शा -शं; 'the sun is a luminous body,' सूर्य्यः स्वप्रकाशः.

Luminously, *adv.* तेजसा, दीप्त्या, प्रभया, स्वप्रकाशेन, विशदं.

Lump, *s.* पिण्डः -ण्डं, स्थूलं, घनः, स्थूलभागः, स्थूलांशः, गण्डः, गण्डका, शर्करा, घनौघः.—(Collection, heap) राशिः *m.*, ओघः, सङ्घः, पूगः, स्तोमः, पुञ्जः, वृन्दं, समूहः, सञ्चयः, सञ्चयः, स्तूपः, उत्करः.—(Gross) साकल्यं, समुदायः, समासः; 'a lump of flesh,' मांसपिण्डः, लोथकः; 'of earth,' मृत्पिण्डः; 'having lumps in the neck,' गण्डमाली -लिनी -लि (न्); 'in the lump,' साकल्येन.

To lump, *v. a.* पिण्डीकृ, पिण्ड् (c. 1. पिण्डते, c. 10. पिण्डयति -यितुं), एकपिण्डीकृ, राशीकृ, एकराशीकृ, ओघीकृ, एकौघीकृ, घनीकृ, स्थूलीकृ, वृन्दीकृ, पुञ्जीकृ, पूगीकृ, एकत्रीकृ.

Lumped, *p. p.* पिण्डीकृतः -ता -तं, पिण्डीभूतः -ता -तं, पिण्डितः -ता -तं.

Lumpish, *a.* स्थूलः -ला -लं, स्थूलस्वभावः -वा -वं, स्थूलबुद्धिः -द्धिः -द्धि.

Lumpishly, *adv.* स्थूलवत्, स्थौल्येन, मस्थौल्यं, स्थूलजनवत्, बुद्धिस्थौल्यात्.

Lumpishness, *s.* स्थूलता, स्थौल्यं, स्वभावस्थूलता, बुद्धिस्थौल्यं.

Lumpy, *a.* पिण्डी -ण्डिनी -ण्डि (न्), पिण्डितः -ता -तं, सपिण्डः -ण्डा -ण्डं, पिण्डलः -ला -लं, पिण्डीभूतः -ता -तं, पिण्डमयः -यी -यं, पिण्डपूर्णः -र्णा -र्णं.

Lunacy, *s.* उन्मत्तता, उन्मादः, उन्मादवायुः *m.*, बुद्धिभ्रमः, मतिभ्रमः, बुद्धिभ्रंशः, चित्तविभ्रमः, चित्तविप्लवः, बुद्धिविक्षेपः, बुद्धिक्षिप्तता, मदः, ग्रामार्थं, अपस्मारः.

Lunar, lunary, *a.* चान्द्रः -न्द्री -न्द्रं, चान्द्रिकः -की -कं, चान्द्रमसः -सी -सं, चन्द्रमसम्बन्धी -न्धिनी -न्धि (न्), सौम्यः -म्या -म्यं, सौमिकः -की -कं, ऐन्दवः -वी -वं; 'lunar month,' चान्द्रमासः; 'lunar asterism or mansion,' नक्षत्रं, दाक्षायिणी; 'the twenty-seven lunar asterisms collectively,' दाक्षायिण्यः *f. pl.*, नक्षत्रचक्रं; 'lunar day,' तिथिः *m. f.* Of these lunar days there are fourteen for the waxing, and fourteen for the waning moon; the first lunar day is called प्रतिपद् *f.*, पक्षतिः -ती *f.*; the day of new moon is called अमावसी, अमावस्या, अमा; 'the day of full moon,' पूर्णिमा, पौर्णिमा, पौर्णमासी, पूर्णेन्दुः *m.* The eleventh तिथि of each शुक्लपक्षः or waxing, and कृष्णपक्षः or waning moon, is regarded as sacred to Vishnu; and the following are the names given by Major Candy for the two एकादशी of each month: चैत्रः, 1. कामदा, 2. पापमोचनी; वैशाखः, 1. मोहिनी, 2. वरूथिनी; ज्यैष्ठः, 1. निर्जला, 2. अपरा; आषाढः, 1. शयनी, 2. योगिनी; श्रावणः, 1. पुत्रदा, 2. कामिका; भाद्रः, 1. परिवर्त्तिनी, 2. अजा; आश्विनः, 1. पाशाङ्कुशा, 2. इन्दिरा; कार्त्तिकः, 1 बोधिनी, 2. रमा; मार्गशीर्षः, 1. मोक्षदा, 2. फलदा; पौषः, 1. प्रजावर्धिनी, 2. सफला; माघः, 1. जयदा, 2. षट्तिला; फाल्गुनः, 1. आमलकी, 2. विजया. The एकादशी of the शुक्लपक्षः of the months आषाढः and कार्त्तिकः are both particularly sacred. On the first, or शयनैकादशी, Vishnu goes to sleep, and on the second awakes. (Difference of solar and lunar days) क्षयतिथिः *f.*; 'inauspicious lunar day,' घाततिथिः *f.*, दग्धतिथिः *f.*; 'observance of the fasts and rites of the several lunar days,' तिथिपालनं; 'lunar eclipse,' चन्द्रग्रहणं; 'lunar measurement,' चान्द्रमानं; 'the lunar dynasty,' सोमवंशः.—(Resembling the moon). *See* Luniform.

Lunated, *a.* अर्द्धचन्द्राकारः -रा -रं, अर्द्धचन्द्राकृतिः -तिः -ति.

Lunatic, *a.* उन्मत्तः -त्ता -त्तं, उन्मादी -दिनी -दि (न्), उन्मादवान् -वती -वत् (त्), सोन्मादः -दा -दं, उन्मदः -दा -दं, विक्षिप्तः -प्ता -प्तं, विक्षिप्तबुद्धिः -द्धिः -द्धि, विक्षिप्तमनाः -नाः -नः (स्), हतबुद्धिः &c., भ्रष्टबुद्धिः &c., बुद्धिभ्रष्टः -ष्टा -ष्टं, नष्टेन्द्रियः -या -यं, वातुलः -ला -लं, अपस्मारी -रिणी &c.

LUNATION, *s.* चन्द्रपरिवर्त्तनं, चन्द्रावृत्तिः *f.*, चन्द्रपरिवृत्तिः *f.*

LUNCH, LUNCHEON, *s.* उपाहारः, अभ्याहारः, लघ्वाहारः, लघुभोजनं, अल्पभोजनं, अर्द्धभोजनं, अर्द्धाहारः, अर्द्धाशनं, अर्द्धशनं, ग्रासः, ग्रासपरिमिताहारः.

LUNE, *s.* (In geometry) चन्द्रखण्डं.—(Leash). *See* the word.

LUNGS, *s.* फुप्फुसः, पुप्फुसः, पुम्फुसः, फुम्फुसः, रक्तफेनजः.

LUNIFORM, *a.* चन्द्राकारः -रा -रं, चन्द्राकृतिः -तिः -ति, चन्द्ररूपः -पा -पं.

LUPINE, *s.* द्विदलं, कलायः, शमीधान्यं, त्रिपुटः, सतीलकः.

LURCH, *s.* अकस्मात् एकपार्श्वे नौकापरिवर्त्तनं or नौकापरिवृत्तिः *f.*—(To leave a person in the lurch) दुर्दशाग्रस्तं कञ्चित्त्यक्त्वा त्यज् (c. 1. त्यजति, त्यक्तुं) or परित्यज्.

To LURCH, *v. n.* (Roll suddenly on one side) नाविकभाषायाम् ऊर्म्मिप्रलोठनात् एकपार्श्वे अकस्मात् परिवृत् (c. 1. -वर्त्तते -र्त्तितुं).

LURCHER, *s.* (Poacher) कौटिकः, कौटिलिकः, कूटोपायेन वनपक्षिग्राहकः.—(Dog) कौटिकश्वा *m.* (न्), कौटिककुक्कुरः.

LURE, *s.* (For hawks) श्येनामिषं.—(Any thing which entices, allurement) प्रलोभनं, विलोभनं, आकर्षणं, आकृष्टिः *f.*, आमिषं, लोभः, आमिषदर्शनं.

To LURE, *v. a.* (Call hawks by holding out a bait) आमिषदर्शनेन श्येनादीन् आकृष् (c. 1. -कर्षति -क्रष्टुं), आमिषं दर्शयित्वा श्येनान् आह्वे (c. 1. -ह्वयति -ह्वातुं) or श्येनाह्वानं कृ.—(Allure) प्रलुभ् (c. 10. -लोभयति -यितुं), लुभ्, आकृष्, मुह् (c. 10. मोहयति -यितुं), लल् (c. 10. लालयति -यितुं).

LURED, *p. p.* आकृष्टः -ष्टा -ष्टं, प्रलोभितः -ता -तं, लालितः -ता -तं.

LURID, *a.* मलिनमुखः -खा -खी -खं, मलिनप्रभः -भा -भं, मलिनः -ना -नं, मलिनतेजाः -जाः -जः (स्), तमोवृतः -ता [illegible] -पा -पं, दुर्दिनग्रस्तः -स्ता -स्तं.

To LURK, *v. n.* निभृतं or निभृते or गूढनिभृतं or प्रच्छन्नं स्था (c. 1. तिष्ठति, स्थातुं) or वृत् (c. 1. वर्त्तते -र्त्तितुं), गूढः -ढा -ढं वृत् or भू, गुप् in pass. (गुप्यते).

LURKER, *s.* निभृतवर्त्ती *m.* (न्), प्रच्छन्नस्थायी *m.* (न्), निभृत स्थायी *m.*

LURKING-PLACE, *s.* गुप्तिः *f.*, गुप्तिस्थानं, गोपनस्थानं, निभृतस्थानं, गूढस्थानं.

LUSCIOUS, *a.* अतिमधुरः -रा -रं, अतिमिष्टः -ष्टा -ष्टं, अतिस्वादुः -दुः -द्वी -दु, स्वादिष्टः -ष्टा -ष्टं, सुमधुरः -रा -रं, सुस्वादुः &c., मधुरसः -सा -सं, मधुमान् -मती -मत् (त्), अतितृप्तिजनकः -का -कं, आतृप्तिजनकः -का -कं.

LUSCIOUSLY, *adv.* अतिमधुरं, अतिमिष्टं, अतिमाधुर्य्येण, सुमधुरं.

LUSCIOUSNESS, *s.* अतिमाधुर्य्यं, सुमाधुर्य्यं, अतिमधुरता, अतिमिष्टता, अतिस्वादुता, माधुर्य्यं, तृप्तिजनकत्वं.

LUSORY, *a.* विनोदी -दिनी -दि (न्), सविनोदः -दा -दं, लीलायितः -ता -तं, सलीलः -ला -लं, लीलाखेलः -ला -लं, सकौतुकः -का -कं, क्रीडा in comp.

LUST, *s.* (Carnal desire) कामः, कामिता, कामुकत्वं, कामना, कामाग्निः *m.*, कामानलः, रतार्थित्वं, मैथुनार्थित्वं, मैथुनेच्छा, मदनः, मदनेच्छा, रताभिलाषः, रमणेच्छा, विषयाभिलाषः.—(Eager desire) लालसा, अत्यभिलाषः, अतिस्पृहा, अतिशयेच्छा, अतीच्छा, लोभः, अतिलोभः, वाञ्छा, आकांक्षा, कांक्षा, लिप्सा, तृष्णा, अतिलिप्सा.—(Depraved affections) दुष्टवासना, दुर्वासना, कुवासना, असद्वासना; 'inflamed with lust,' कामाग्निदीप्तः -प्ता -प्तं.

To LUST, *v. n.* (Have carnal desire) कामार्त्तः -र्त्ता -र्त्तं भू, कामुकः -का -कं भू, रतार्थी -र्थिनी -र्थि भू, मैथुनार्थी &c. भू, मैथुनाभिलाषी -षिणी -षि भू, मैथुनम् अभिलष् (c. 1. -लषति -षितुं), कम् (c. 10. कामयते -यितुं), अभिकम्, विषयाभिलाषी भू; 'to lust after a woman,' कामतः स्त्रीसङ्गम् अभिलष्.—(Desire eagerly) अत्यन्तम् अभिलष् or इष् (c. 6. इच्छति, एषितुं) or वाञ्छ् (c. 1. वाञ्छति -ञ्छितुं) or अभिवाञ्छ्, अतिशयेन स्पृह् (c. 10. स्पृहयति -यितुं) or कांक्ष् (c. 1. कांक्षति -क्षितुं) or आकांक्ष् or अभिकांक्ष् or लभ् in des. (लिप्सते -प्सितुं), लुभ् (c. 4. लुभ्यति, लोब्धुं).

LUSTFUL, *a.* कामुकः -का -कं, कामी -मिनी -मि (न्), कामवृत्तिः -त्तिः -त्ति, कामप्रवणः -णा -णं, कामासक्तः -क्ता -क्तं, सकामः -मा -मं, कामनः -ना -नं, कमनः -ना -नं, कम्रः -म्रा -म्रं, कमिता -त्री -तृ (तृ), कामयिता &c., रतार्थी -र्थिनी &c., मैथुनार्थी &c., सुरतार्थी &c., मैथुनाभिलाषी -षिणी &c., सम्भोगाभिलाषी &c., रताभिलाषी &c., मैथुनेच्छुः -च्छुः -च्छु, व्यवायी -यिनी &c., अनुकः -का -कं, अभीकः -का -कं, अभिकः -का -कं, लापुकः -का -कं, अभिलाषुकः -का -कं, व्यवायपरायणः -णा -णं, लम्पटः, स्त्रीलम्पटः, स्त्रीव्यसनी *m.* (न्), स्त्रीसङ्गाभिलाषी &c., स्त्रीसम्भोगाभिलाषी, स्त्रीरतः, स्त्रीपरः.—(Under the influence of lust) कामार्त्तः -र्त्ता -र्त्तं, कामातुरः -रा -रं, कामान्धः -न्धा -न्धं, कामान्वितः -ता -तं, कामाविष्टः -ष्टा -ष्टं, कामग्रस्तः -स्ता -स्तं, कामाधीनः -ना -नं, कामयुक्तः -क्ता -क्तं, कामाक्रान्तः -न्ता -न्तं, कामजितः -ता -तं, जातकामः -मा -मं, कामोपहतः -ता -तं.

LUSTFULLY, *adv.* सकामं, कामुकवत्, कामपूर्वं, कामतस्, लम्पटवत्.

LUSTFULNESS, *s.* कामुकत्वं -ता, कामिता, सकामता, रतार्थित्वं, मैथुनार्थित्वं.

LUSTILY, *adv.* बलवत्, महाबलेन, सवीर्य्यं, ससत्त्वं, वीर्य्येण, मांसलवत्, दृढाङ्गवत्, तेजसा, पौरुषेण, सपराक्रमं.

LUSTINESS, *s.* बलवत्त्वं, सबलता, मांसलता, दृढाङ्गता, शरीरदृढता, ससत्त्वता, वीर्य्यवत्त्वं, वीर्य्यं, सत्त्वं, अंशलता, पुष्टशरीरता, वज्रदेहत्वं, व्यूढोरस्कत्वं, अतिपुष्टता, हृष्टपुष्टता.

LUSTRAL, *a.* शुद्धिकरः -री -रं, शुचिकरः -रा -रं, शोधकः -का -कं, पावकः -का -कं, पावनः -ना -नं; 'lustral water,' शान्त्युदकं, पावनोदकं; 'vessel containing it,' शान्त्युदकुम्भः.

To LUSTRATE, *v. a.* शुध् (c. 10. शोधयति -यितुं), परिशुध्, विशुध्, पू (c. 9. पुनाति, पवितुं), अभिपू, निपू, पवित्रीकृ, शोधनं कृ.

LUSTRATION, *s.* शुद्धिकरणं, शोधनं, शुचिकरणं, शुद्धिः *f.*, पावनं, पवित्रीकरणं, मलापकर्षणं; 'lustration of arms, a ceremony performed by a king before taking the field,' लोहाभिहारः, लोहाभिसारः, नीराजनं -ना.

LUSTRE, *s.* तेजस् *n.*, द्युतिः *f.*, प्रभा, शोभा, रुचिः *f.*, ओजस् *n.*, ओजस्विता, प्रतापः, बृहद्द्युतिः *f.*, उज्ज्वलता, उद्योतः, छविः *f.*, कान्तिः *f.*, दीप्तिः *f.*, रुच् *f.* (क्), भास् *f.*, प्रकाशः -शनं, रागः; 'of metal or a gem,' ओजस् *n.*, तेजस् *n.*

LUSTROUS, *a.* तेजस्वी -स्विनी -स्वि (न्), सुप्रभः -भा -भं, कान्तिमान् -मती -मत् (त्), द्युतिमान् &c., दीप्तिमान् &c., ओजस्वी &c., प्रतापी -पिनी &c., प्रतापवान् &c., शोभनः -ना -नं, प्रभावान् &c., उज्ज्वलः -ला -लं.

LUSTRUM, *s.* युगं, वर्षपञ्चकं, वत्सरपञ्चत्वं, अब्दपञ्चकत्वं.

LUSTY, *a.* मांसलः -ला -लं, दृढाङ्गः -ङ्गा -ङ्गं, दृढशरीरः -रा -रं, पृथुशरीरः -रा -रं, बलवान् -वती -वत् (त्), महाबलः -ला -लं, महाबाहुः -हुः -हु, अंशलः -ला -लं, अंसलः -ला -लं, वज्रदेहः -हा -हं, व्यूढोरस्कः -स्का -स्कं, महाकायः -या -यं, स्थूलशरीरः -रा -रं, मेदस्वी -स्विनी -स्वि (न्), वीर्य्यवान् -वती &c., सवीर्य्यः -र्य्या -र्य्यं, ससत्त्वः -त्त्वा -त्त्वं, हृष्टपुष्टः -ष्टा -ष्टं, बृहदङ्गः -ङ्गा -ङ्गं, बृहच्छरीरः &c.

LUTANIST, *s.* वैणिकः, वीणावादः -दकः, वीणापाणिः *m.*

LUTANOUS, *a.* (Living in mud) पङ्कस्थः -स्था -स्थं, कर्द्दमस्थः -स्था -स्थं,

पङ्कवासी -सिनी &c., पङ्कजः -जा -जं.—(Pertaining to it) पङ्किलः -ला -लं, पङ्की -ङ्किनी &c., कार्द्दमः -मी -मं.—(Of the colour of mud) पङ्कवर्णः -र्णा -र्णं.

LUTE, *s.* वीणा, वल्लकी, विपञ्ची -ञ्चिका, तन्त्री *m.* (न्), रुद्री, षट्कर्णः, सारङ्गी, शारङ्गी, पिनाकी.; 'with seven strings,' परिवादिनी; 'the wire of a lute,' तन्त्री, तन्त्रं; 'the neck,' वीणादण्डः, प्रवालः; 'a piece of wood under the neck called the belly,' ककुभः, प्रसेवकः; 'the tie,' उपनाहः, वीणानुबन्धः, निबन्धनं; 'the whole body of the lute, comprising the gourd, neck, and belly,' कोलम्बकः; 'the quill or bow,' कोणः, परिवादः, शारिका, रणः.

To LUTE, *v. a.* पङ्केन लिप् (c. 6. लिम्पति, लेप्तुं), पङ्कलेपेन संलग्नीकृ.

LUTER, LUTIST, *a.* वीणावादः -दकः. *See* LUTANIST.

LUTE-STRING, *s.* वीणातन्त्रं, तन्त्री, वीणातारः -रा.

LUTULENT, *a.* पङ्किलः -ला -लं, पङ्की -ङ्किनी -ङ्कि (न्), कार्द्दमः -मी -मं.

To LUXATE, *v. a.* विसन्धीकृ, सन्धित्रोटनं कृ, अस्थिसन्धिं or अस्थिग्रन्थिं त्रुट् (c. 10. त्रोटयते -यितुं) or विसन्धा (c. 3. -दधाति -धातुं) or भञ्ज् (c. 7. भनक्ति, भंक्तुं), सन्धिभङ्गं कृ, सन्धिविश्लेषं कृ, सन्धिच्युतिं कृ.

LUXATED, *p. p.* विसन्धितः -ता -तं, त्रुटितसन्धिः -न्धिः -न्धि, च्युतसन्धिः &c., सन्धिच्युतः -ता -तं, सन्धिविश्लिष्टः -ष्टा -ष्टं, स्थानभ्रष्टः -ष्टा -ष्टं.

LUXATION, *s.* सन्धित्रोटनं, सन्धिविश्लेषः, सन्धिच्युतिः *f.*, विसन्धीकरणं.

LUXURIANCE, LUXURIANCY, *s.* अतिवृद्धिः *f.*, अधिकवृद्धिः *f.*, अतिवर्धनं, अत्यन्तवर्धनं, नितान्तवृद्धिः *f.*, वृद्धिबाहुल्यं, समृद्धिः *f.*, साम्रद्धं, वृद्ध्याधिक्यं, अतिस्फीतिः *f.*, अतिस्फातिः *f.*, उद्रेकः, उत्सेकः, आप्यायनं.

LUXURIANT, *a.* अतिवर्धिष्णुः -ष्णुः -ष्णु, अतिवर्धमानः -ना -नं, अतिवर्धितः -ता -तं, अतिवर्धी -र्धिनी -र्धि (न्), अतिवर्धनः -नी -नं, अतिस्फीतः -ता -तं, अतिपीनः -ना -नं, अतिसमृद्धः -द्धा -द्धं, अतिपुष्कलः -ला -लं, अतिबहुलः -ला -लं, अतिप्रचुरः -रा -रं, उत्सिक्तः -क्ता -क्तं, उद्रिक्तः -क्ता -क्तं, अतिरिक्तः -क्ता -क्तं.

LUXURIANTLY, *adv.* अतिवृद्ध्या, अतिवृद्धिपूर्वं, बाहुल्येन, अतिबहुलं, अतिबहुशस्, अतिप्रचुरं, अतिप्राचुर्येण, अतिपुष्कलं, अतिरिक्तं, उद्रेकेण.

To LUXURIATE, *v. n.* (Grow exuberantly) अत्यन्तं वृध् (c. 1. वर्धते -र्धितुं) or ऋध् (c. 5. ऋध्नोति, c. 4. ऋध्यति, अर्धितुं) or समृध् or प्यै (c. 1. प्यायते, प्यातुं) or आप्यै or स्फाय् (c. 1. स्फायते -यितुं), अतिबहुलीभू, अतिप्रचुरीभू, अतिवृद्धिम् इ (c. 2. एति -तुं), अतिस्फीतिम् इ.—(Live or feed luxuriously) अतिविलासेन or अतिसुखेन or सुखोपभोगेन वृत् (c. 1. वर्त्तते -र्त्तितुं) or चर् (c. 1. चरति -रितुं) or विहृ (c. 1. -हरति -हर्त्तुं) or भ्रम् (c. 4. भ्राम्यति, भ्रमितुं).

LUXURIOUS, *a.* (Contributing to luxury, furnished with luxuries) सुखभोगवान् -वती -वत् (त्), सुखभोगकरः -रा -रं, सुखभोगावहः -हा -हं, अतिसुखावहः -हा -हं, अतिसुखी -खिनी -खि (न्), सुखभोगसाधकः -का -कं, सुखभोगमयः -यी -यं, अतिसुखमयः &c., सुखोपभोगदः -दा -दं, सविलासः -सा -सं, विलासी -सिनी &c., विलासमयः &c., विलासयुक्तः -क्ता -क्तं, विलाससुखमयः &c.—(Indulging in luxury) विलासी -सिनी &c., विलासासक्तः -क्ता -क्तं, भोगासक्तः -क्ता -क्तं, सुखभोगासक्तः &c., सुखभोगपरायणः -णा -णं, विषयासक्तः -क्ता -क्तं, विषयोपभोगव्यग्रः -ग्रा -ग्रं, वैषयिकः -की -कं, देहम्भरः -रा -रं, आत्मम्भरिः -रिः -रि, विषयोपसेवी -विनी &c., सुखसेवी &c.

LUXURIOUSLY, *adv.* विलासेन, सुखेन, अतिसुखेन, अतिविलासपूर्वं, सविलासं, सुखोपभोगेन, सुखोपभोगपूर्वं, सुखासक्तवत्, परमान्नोपभोगेन.

LUXURIOUSNESS, *s.* विलासित्वं -ता, सविलासत्वं, सुखोपभोगः, सुखभोगः, अतिसुखिता, सुखासक्तिः *f.*, सुखभोगासक्तिः *f.*, भोगासक्तिः *f.*, विषयभोगासक्तिः *f.*, विषयभोगः, विषयसेवा, विषयोपसेवा, सुखसेवा, सुखास्वादः.

LUXURY, *s.* विलासः, विलासित्वं -ता. *See* LUXURIOUSNESS. (That which gratifies the senses or appetite) सुखं, सुखसाधनं, भोगः, भोगसाधनं, सौख्यं, सुखसाहित्यं, विषयसुखं, विषयसुखसाहित्यं, आमिषं, सामिषं.—(Dainty) स्वाद्वन्नं, परमान्नं, विशिष्टान्नं, उत्तमान्नं, मिष्टान्नं, भोजनविशेषः, विशिष्टभोजनं, विशिष्टामिषं.

LYE, *s.* क्षारोदकं, क्षारजलं, क्षारितजलं, क्षारसंसृष्टं जलं.

LYING, *part.* (Reclining) शायी -यिनी -यि (न्), शयः -या -यं, शयानः -ना -नं, शयितः -ता -तं, पतन् -तन्ती -तत् (त्), पतितः -ता -तं, संविष्टः -ष्टा -ष्टं, उपविष्टः -ष्टा -ष्टं; 'lying on a bed,' शयने संविष्टः -ष्टा -ष्टं; 'lying prostrate,' अधर्मूर्द्धशयः -या -यं, क्षिप्तदेहः -हा -हं; 'lying with the face upwards,' उत्तानशयः -या -यं.—(Act of lying) शयनं, पतनं, संवेशः.—(Lying in) प्रसवकालः, प्रसवावस्था, सूतिकालः, प्रसूतिकालः; 'lying-in chamber,' सूतिकागृहं, सूतिगृहं, सूतिकाभवनं, सूतिगृहं, सूतीगृहं, अरिष्टशय्या, अरिष्टं, गर्भः, अपवरकः.

LYING, *s.* (Telling falsehood) मृषावादः, मिथ्यावादः, मिथ्याभाषणं, मिथ्याकथनं, असत्यभाषणं, मृषाभाषिता -षणं, मृषाभिधानं, मिथ्योक्तिः *f.*, असत्योक्तिः *f.*, अनृतवादः.

LYING, *part.* or *a.* (Addicted to falsehood) मिथ्यावादी -दिनी -दि (न्), मृषावादी &c., असत्यवादी &c., अनृतवादी &c., असत्यभाषी -षिणी &c., अनृतभाषी &c., अनृतवाक् *m. f. n.* (च्), असत्यः -त्या -त्यं, निःसत्यः -त्या -त्यं.

LYMPH, *s.* मेदस् *n.*, वसा, चर्म्माम्भस् *n.*, त्वगम्भस् *n.*, त्वगुदकं, चर्म्मोदकं, चर्म्मसारः, त्वक्सारः, असृक्करः, उदकधातुः *m.*

LYMPHATE, LYMPHATED, *a.* उन्मत्तः -त्ता -त्तं, वातुलः -ला -लं.

LYMPHATIC, *s.* मेदोवहं, मेदोवाहिनी, चर्म्माम्भोवाहिनी, त्वक्सारवाहिनी, शरीरान्तर्गतजलवाहिनी.

LYNX, *s.* वनविडालः, वनमार्जारः, सूक्ष्मदृष्टिः क्षुद्रव्याघ्रविशेषः.

LYRE, *s.* वल्लकी, वीणा, विपञ्ची -ञ्चिका, तन्त्री. *See* LUTE.

LYRIC, LYRICAL, *a.* वैणिकः -की -कं, वीणावादनसहितः -ता -तं.

LYRIST, *s.* वल्लकीवादकः, वल्लकीपाणिः *m.*, वैणिकः.

LYTHRUM, *s.* (A plant) अग्निज्वाला, सुभिक्षा, धातकी, धातृपुष्पिका.

M

MACAROON, *s.* बादामनिर्म्मितो मिष्टपिष्टकविशेषः.

MACAW, MACAO, *s.* शुकः, कीरः, वक्रचञ्चुः *m.*, वक्रतुण्डः.

MACE, *s.* (Club, ensign of authority) वेत्रं, गदा, यष्टिः *m. f.*, यष्टिकः, दण्डः -ण्डं, मुषलः, मुसलः, लगुडः, लगुरः, मुद्गरः, वातर्डिः *m.*—(The spice) जातीकोशं, जातिकोशं, जातीकोषं, जातिकोषं, जातिः -ती *f.*, जातिफलं, जातीफलं, फलं, जातीपत्री, जातिपत्रं, जातिपुष्पं, गन्धत्वचं, राजभोग्यं.

MACE-BEARER, *s.* वेत्रधरः, वेत्रधारी *m.* (न्), वेत्री *m.* (न्), वेत्रपाणिः *m.*, गदाधरः, गदी *m.* (न्), गदापाणिः *m.*, गदाहस्तः, दण्डधरः, दण्डी *m.* (न्), दण्डहस्तः लगुडहस्तः, दण्डधारी *m.*, दण्डिकः, दण्डभृत् *m.*, यष्टिग्रहः, याष्टीकः.

To MACERATE, *v. a.* (Make lean, waste) कृश (nom. कृशयति -यितुं), कृशीकृ, परिकृशीकृ, क्षि in caus. (क्षपयति -यितुं), क्षीणं -णां -णं कृ, क्षीणीकृ, ग्लै in caus. (ग्लपयति -यितुं), मांसक्षयं कृ.—(Steep) जलसेकेन or जलप्लावनेन कोमलीकृ, चिरकालं जलेन समाप्लु (c. 10. -प्लावयति -यितुं) or जलसमाप्लुतं -तां कृ or जलसिक्तं -क्तां कृ or आर्द्रीकृ; 'to macerate indigo,' नीलसन्धानं कृ, नीलपाचनं कृ.

MACERATED, *p.p.* (Made lean) कृशीकृतः -ता -तं, परिकृशः -शा -शं, क्षीणः -णा -णं.—(Steeped) जलसेकेन कोमलीकृतः -ता -तं or मृदूकृतः -ता -तं.

MACERATION, *s.* (Making thin, mortification) कृशीकरणं, क्षीणकरणं, कर्शनं, क्लेशकरणं, क्लेशदानं, मांसक्षयः, मांसशोषणं, शरीरपाकः, शरीरशोषः, कायक्लेशः, क्लेशः, कायकृच्छ्रं.—(Steeping) जलसेकेन कोमलीकरणं, आर्द्रीकरणं; 'of indigo,' नीलसन्धानं, नीलपाचनं.

To MACHINATE, *v. a.* परिक्लृप् (c. 10. -कल्पयति -यितुं), उपायं क्लृप् or घट (c. 1. घटते -टितुं) or विधा (c. 3. -दधाति -धातुं) or अनुसन्धा or संविधा, मन्त्र (c. 10. मन्त्रयति -यितुं), सम्प्रधृ (c. 10. -धारयति -यितुं), कल्पनां कृ, परिकल्पनां कृ, अनुसन्धानं कृ.—(Plot) द्रुह् (c. 4. द्रुह्यति, द्रोग्धुं), कपटप्रबन्धं कृ, कपटप्रबन्धेन द्रोहं कृ.

MACHINATION, *s.* कल्पना, परिकल्पना -नं, क्लृप्तिः *f.*, मन्त्रणा, कुकल्पना, कुमन्त्रणा, कुयुक्तिः *f.*, कुप्रयुक्तिः *f.*, कुसृष्टिः *f.*, कुसङ्कल्पः, कपटप्रयोगः, कपटप्रबन्धः, घटनं -ना, कुघटना, विधानं, संविधानं, अनुसन्धानं, दुष्टकार्य्यसाधनार्थम् उपायचिन्तनं, द्रोहचिन्तनं; 'against the king,' राजद्रोहः, राजशरीराभिद्रोहः.

MACHINATOR, *s.* परिकल्पकः, परिकल्पनाकृत् *m.*, कुमन्त्रणाकृत्, कुकल्पनाकारी *m.* (न्), घटकः, उपायचिन्तकः, द्रोहचिन्तकः.

MACHINE, *s.* यन्त्रं, उपकरणं, विलालः, साधनं, साधनयन्त्रं.

MACHINERY, (Collective mechanism) यन्त्रसाहित्यं, यन्त्रशक्तिसाहित्यं, यान्त्रं, यान्त्रिकं, यन्त्रत्वं.—(Machines in general) यन्त्रसामग्र्यं, यन्त्रसमूहः, यन्त्रसमुदायः, यान्त्रं, यन्त्रविद्या.

MACHINIST, *s.* यन्त्रकारः -रकः, यन्त्रकृत् *m.*, यन्त्रनिर्म्माणशिल्पज्ञः, यन्त्रविद्यानिपुणः, यन्त्रविद्, कलाज्ञः.

MACILENCY, *s.* कृशता, कार्श्यं, कृशाङ्गता, क्षीणता, क्षामता, मांसक्षीणता.

MACILENT, *a.* कृशः -शा -शं, क्षीणः -णा -णं, क्षीणमांसः -सा -सं.

MACROCOSM, *s.* जगत्सर्वं, जगत्कृत्स्नं, विश्वजगत् *n.*, विश्वं, त्रिभुवनं.

MACROLOGY, *s.* दीर्घसूत्रता, अतिविस्तीर्णवाक्यं, अतिविस्तरः.

MACTATION, *s.* उपहारार्थं घातनं or निहननं or प्रमापणं, विशसनं.

MACULA, *s.* कलङ्कः, लाञ्छनं, चिह्नं, विन्दुः *m.*, कलुषं, अङ्कः.

To MACULATE, *v. a.* कलङ्क (nom. कलङ्कयति -यितुं), मलिन (nom. मलिनयति -यितुं), कलुष (nom. कलुषयति -यितुं), चिह्न (nom. चिह्नयति -यितुं), लाञ्छ (c. 1. लाञ्छति -ञ्छितुं).

MACULATE, MACULATED, *a.* कलङ्कितः -ता -तं, कलङ्की -ङ्किनी -ङ्कि (न्), कलुषितः -ता -तं, लाञ्छितः -ता -तं, चिह्नितः -ता -तं.

MAD, *a.* उन्मत्तः -त्ता -त्तं, उन्मादः -दा -दं, उन्मादवान् -वती -वत् (त्), उन्मादी -दिनी -दि (न्), सोन्मादः -दा -दं, उन्मदः -दा -दं, उन्मदिष्णुः -ष्णुः -ष्णु, मत्तः -त्ता -त्तं, वातुलः -ला -लं, वातूलः -ला -लं, प्रमदः -दा -दं, सुन्मदः -दा -दं, सुन्मादः -दा -दं, हतबुद्धिः -द्धिः -द्धि, नष्टबुद्धिः &c., विक्षिप्तबुद्धिः &c., भ्रष्टबुद्धिः &c., बुद्धिभ्रष्टः -ष्टा -ष्टं, हतज्ञानः -ना -नं, विप्लुतचित्तः -त्ता -त्तं, भ्रान्तचित्तः -त्ता -त्तं, विक्षिप्तमतिः -तिः -ति, विक्षिप्तः -प्ता -प्तं, मूढचेताः -ताः -तः (स्), नष्टेन्द्रियः -या -यं.—(Proceeding from madness) उन्मादप्रयुक्तः -क्ता -क्तं, उन्मादसूचकः -का -कं, बुद्धिभ्रंशसूचकः -का -कं.—(Furious) मदोत्कटः -टा -टं, मदोदग्रः -ग्रा -ग्रं, कोपाकुलः -ला -लं, संरब्धः -ब्धा -ब्धं; 'a mad dog,' अलर्कः, अलकः; 'a mad fellow,' प्रमदजनः; 'to go mad,' उन्मद् (c. 4. -माद्यति -मदितुं), उन्मत्तीभू; 'drive mad,' उन्मद् (c. 10. -मादयति -यितुं).

MADAM, *s.* आर्य्या, आर्य्यिका, आर्य्यका, भवती, भाविनी.—(As a complimentary title) आर्य्ये voc. c., भवति voc. c.

MAD-BRAIN, MAD-BRAINED, *a.* विक्षिप्तबुद्धिः -द्धिः -द्धि, विप्लुतबुद्धिः &c.

MAD-CAP, *s.* प्रमदजनः, उन्मत्तजनः, साहसिकः, साहसकर्म्मी *m.* (न्).

To MADDEN, *v. a.* उन्मद् (c. 10. -मादयति -यितुं), मद्, उन्मत्तीकृ, मत्तीकृ.

To MADDEN, *v. n.* उन्मद् (c. 4. -माद्यति -मदितुं), उन्मत्तीभू, मत्तीभू, मद्.

MADDENED, *p. p.* उन्मादितः -ता -तं, उन्मत्तीकृतः -ता -तं, संरब्धः -ब्धा -ब्धं.

MADDENING, *a.* उन्मादकः -का -कं, उन्मादजनकः -का -कं, उन्मादनः -ना -नं.

MADDER, *s.* (The plant) मञ्जिष्ठा, विकसा, विकषा, मण्डूकपर्णी, ताम्रवल्ली, योजनवल्ली, योजनपर्णी, भण्डीरी, भण्डिरी, भण्डी, जिङ्गी, समङ्गा, कालमेषिका, चित्राङ्गी, कालमञ्जिका.

MADE, *p. p.* कृतः -ता -तं, निर्म्मितः -ता -तं, कल्पितः -ता -तं, प्रकल्पितः -ता -तं, रचितः -ता -तं, विरचितः -ता -तं, घटितः -ता -तं, विहितः -ता -तं; 'made of,' मयः -यी -यं, निर्म्मितः -ता -तं, घटितः -ता -तं in comp.; as, 'made of wood,' काष्ठमयः -यी -यं, काष्ठघटितः -ता -तं, काष्ठनिर्म्मितः -ता -तं; 'made known,' निवेदितः -ता -तं, आवेदितः -ता -तं, सूचितः -ता -तं, आख्यातः -ता -तं, ज्ञापितः -ता -तं, विज्ञापितः -ता -तं; 'made ready,' सज्जीकृतः -ता -तं; 'made favorable,' प्रसादीकृतः -ता -तं; 'made up, as the mind,' स्थिरीकृतः -ता -तं, स्थिरः -रा -रं; 'made up, reconciled,' सन्धितः -ता -तं, शान्तविवादः -दा -दं; 'made up, settled,' सिद्धः -द्धा -द्धं, साधितः -ता -तं, निष्पन्नः -न्ना -न्नं; 'made over,' सङ्क्रामितः -ता -तं, सञ्चारितः -ता -तं, प्रतिपादितः -ता -तं; 'made light of,' लघूकृतः -ता -तं; 'made good,' साधितः -ता -तं; 'made to do any thing,' expressed by the caus. pass. part.; as, 'made to pay,' दापितः -ता -तं; 'made to go,' गमितः -ता -तं; 'made to know,' ज्ञापितः -ता -तं; 'one who has made an agreement,' कृतसङ्केतः -ता -तं.

MADEFACTION, *s.* आर्द्रीकरणं, क्लेदनं, संक्लेदनं, समुन्दनं, क्लिन्नीकरणं.

To MADEFY, *v. a.* आर्द्रीकृ, क्लिद् (c. 10. क्लेदयति -यितुं), संक्लिद्, परिक्लिद्.

MADHOUSE, *s.* उन्मत्तालयः, उन्मत्तपालनगृहं, उन्मत्तस्थानं.

MADLY, *adv.* उन्मत्तवत्, सोन्मादं, मत्तवत्, वातुलवत्, चित्तविभ्रमात्, चित्तविप्लवात्, उन्मादेन, प्रामाद्यात्, प्रमदजनवत्.

MADMAN, *s.* उन्मत्तजनः, मत्तजनः, प्रमदजनः, उन्मादकः, वातुलः.

MADNESS, *s.* उन्मत्तता, उन्मादः, सोन्मादता, मत्तता, वातुलता, विक्षिप्तता, बुद्धिविक्षिप्तता, बुद्धिविक्षेपः, बुद्धिभ्रमः, मतिभ्रमः, चित्तविभ्रमः, चित्तविप्लवः, बुद्धिनाशः, बुद्धिभ्रंशः, मतिभ्रंशः, मदः, प्रमदता, प्रामाद्यं, उन्मादवायुः *m.*

MÆNORRHAGIA, *s.* (A disease) योन्यर्शस् *n.*, प्रदरः, प्रदरामयः.

MAGAZINE, *s.* (Storehouse) भाण्डागारं, भाण्डगृहं, कोषागारं.—(Of arms, ammunition, &c.) युद्धद्रव्यागारं, शस्त्रागारं, अस्त्रागारं, युद्धभाण्डागारं, आयुधागारं.—(A miscellany published periodically) काले काले प्रकाशितो नानाविषयसङ्ग्रहः or नानावस्तुविषयको ग्रन्थः.

MAGGOT, *s.* कीटः, कृमिः *m.*, अलिः *m.*, कीटाण्डजं.

MAGGOTY, *s.* कीटपूर्णः -र्णा -र्णं, कृमिपूर्णः -र्णा -र्णं, कृमिमयः -यी -यं.

MAGI, MAGIANS, *s. pl.* पूर्व्वदेशीयपण्डिताः *m. pl.*, प्राग्देशीयविद्वज्जनाः.

MAGIC, *s.* अभिचारः, अभिचारविद्या, माया, मायाविद्या, योगः, सम्प्रयोगः, वशक्रिया, मूलकर्म्म *n.* (न्), चित्रकर्म्म *n.*, जालं, जालकर्म्म *n.*, इन्द्रजालं, अभिमन्त्रणं, कार्म्मणं, कार्म्मणत्वं, पिशाचविद्या, कुविद्या, मोहः, कुहकः, कुसृतिः *f.*, संवदनं -ना, मन्त्रः, मन्त्रमोहनं.

MAGIC, MAGICAL, *a.* आभिचारिकः -की -कं, अभिचारिकः -की -कं, अभिचारी -रिणी -रि (न्), मायामयः -यी -यं, मायी -यिनी -यि (न्), मायावी -विनी &c., मायिकः -की -कं, ऐन्द्रजालिकः -की -कं, मोही -हिनी &c., कौसृतिकः -की -कं.

MAGICALLY, *adv.* अभिचारेण, अभिचारविद्यानुसारात्, मायया, ऐन्द्रजालं.

MANY, a. बहुः -हुः -ह्वी -हु, बहुलः -ला -लं, अनेकः -का -कं, प्रचुरः -रा -रं, भूरिः -रिः -रि, बहुसंख्यकः -का -कं, भूयान् -यसी -यः (स्), भूयिष्ठः -ष्ठा -ष्ठं, नैकः -का -कं, अनल्पः -ल्पा -ल्पं, पुष्कलः -ला -लं, विपुलः -ला -लं, प्राज्यः -ज्या -ज्यं, प्रभूतः -ता -तं, पुरुः -रुः -रु, पुरुहः -हा -हं, पुरुहुः -हुः -हु, अदभ्रः -भ्रा -भ्रं, बहुतिथः -था -थं, स्फिरः -रा -रं, नाना in comp., [illegible] यावत् indec., यावत्संख्यकः -का -कं, [illegible] or यति indec.; 'so many,' तावान् -वती -वत् (त्), or तावत् indec., तावत्संख्यकः -का -कं, तत्संख्यकः -का -कं, ततयः m. f. ततीनि n. or तति indec.; 'how many?' कियान् -यती -यत् (त्) or कियत् indec., कतिः -तिः -ति or plur. कतयः, कतीनि; 'of how many sorts?' कतिविधः -धा -धं; 'in many places,' बहुत्र, अनेकत्र 'in many ways,' बहुधा, अनेकधा; 'in how many ways?' कतिधा; 'many times,' बहुशस्, अनेकशस्, बहुवारं, बहुकृत्वस्, मुहुर् मुहुः, भूयस्, पुनः पुनर्.

MANY, s. (A multitude) समूहः, समवायः, समुदायः, समाजः, संघातः, ओघः, निवहः, वृन्दं; 'the interests of the many,' समूहकार्य्यं.

MANY-COLORED, a. नानावर्णः -र्णा -र्णं, नानारङ्गः -ङ्गा -ङ्गं, बहुवर्णः -र्णा -र्णं, चित्रविचित्रः -त्रा -त्रं, बहुरङ्गी -ङ्गिणी -ङ्गि (न्).

MANY-CORNERED, a. बहुकोणः -णा -णं, अनेककोणविशिष्टः -ष्टा -ष्टं.

MANY-FIBERED, a. बहुतन्त्री -न्त्रिणी -न्त्रि (न्), बहुसूत्री -त्रिणी &c.

MANY-FLOWERED, a. बहुपुष्पः -ष्पा -ष्पं, प्रचुरकुसुमः -मा -मं.

MANY-HEADED, a. बहुशिराः -राः -रः (स्), बहुशिरस्कः -स्का -स्कं, बहुमस्तकः -का -कं, अनेकमस्तकः -का -कं, बहुमूर्द्धा -र्द्धा -र्द्ध (न्).

MANY-LEAVED, a. बहुपर्णः -र्णा -र्णं, बहुपत्रः -त्रा -त्रं, प्रचुरपर्णः &c.

MANY-FOOTED, a. बहुपादः -दा -दं, बहुपाद् m. f. n., बहुजङ्घः -ङ्घा -ङ्घं.

MANY-STREAMED, a. बहुप्रवाहः -हा -हं, बहुस्रोताः -ताः -तः (स्).

MANY-STRINGED, a. बहुतन्त्री -न्त्रिणी -न्त्रि (न्), बहुतन्त्रिकः -का -कं.

MANY-TONGUED, a. बहुजिह्वः -ह्वा -ह्वं, अनेकजिह्वः -ह्वा -ह्वं.

MAP, s. देशालेख्यपत्रं, भूपृष्ठालेख्यपत्रं, देशालेख्यं, देशसमुद्राद्यालेख्यं, भूगोलस्य देशसमुद्रनगराद्यालेख्यं, देशचित्रं, भूपृष्ठभङ्गिप्रदर्शनपत्रं, भूपृष्ठदेशालेख्यं.

To MAP, v. a. भूपृष्ठदेशान् लिख् (c. 6. लिखति, लेखितुं) or आलिख् or चित्र् (c. 10. चित्रयति -यितुं), देशालेख्यं कृ, भूपृष्ठालेख्यं कृ.

To MAR, v. a. दुष् (c. 10. दूषयति -यितुं), नश् (c. 10. नाशयति -यितुं), हन् (c. 2. हन्ति -न्तुं), व्याहन्, विहन्, क्षतिं कृ.

MARASMUS, s. क्षयः, क्षयरोगः, क्षयथुः m., यक्ष्मा m. (न्), जक्ष्मा m., शोषः.

To MARAUD, v. n. युद्धसमये गोधान्यादिग्रहणार्थम् इतस्ततो भ्रम् (c. 4. भ्राम्यति, भ्रमितुं) or परिभ्रम्, लोप्त्रार्थं परिभ्रम् or उपद्रवं कृ or विप्लवं कृ or उपद्रु (c. 1. -द्रवति -द्रोतुं).

MARAUDER, s. लोप्त्रार्थं परिभ्रमणकारी m. (न्), उपद्रवी m. (न्), विप्लवकारी m., उपद्रवकारी m., उपप्लवकृत्, लुण्टाकः.

MARAUDING, s. युद्धकाले गोधान्याद्यपहरणार्थम् इतस्ततः परिभ्रमणं, विप्लवः उपप्लवः, उपद्रवः, विप्लवकरणं.

MARBLE, s. मार्बलाख्यो नानावर्णः प्रस्तरः, दृषत्प्रस्तरः, चारुप्रस्तरः, पाषाणः, ग्रावा m. (न्), शिला, उपलः.

MARBLE, a. (Made of marble) पूर्व्वोक्तप्रस्तरमयः -यी -यं, पाषाणनिर्म्मितः -ता -तं.—(Variegated) प्रस्तररेखानुकारेण चित्रितः -ता -तं.

MARBLE-HEARTED, a. पाषाणहृदयः -या -यं, वज्रहृदयः &c., वज्रचित्तः -त्ता -त्तं.

MARCASITE, s. आवर्त्तः, सुवर्णमाक्षिकं, सुवर्णमुखी.

MARCESCENT, a. विशीर्य्यमाणः -णा -णं, क्षीयमाणः -णा -णं, म्लायमानः -ना -नं.

MARCH, s. (The month) फाल्गुनः -निकः, चैत्रः -त्रिकः, फाल्गुनोत्तरार्द्धं, चैत्रपूर्व्वार्द्धं, पूर्व्वचैत्रः, उत्तरफाल्गुनः, तपस्यः, मधुः m., तृतीयमासः.—(Movement of soldiers, &c.) गमनं, यानं, यात्रा, सैनिकगमनं, सैनिकयात्रा, गमः, गतिः f., सैनिकगतिः f., व्रज्या, सरणं, संसरणं.—(Marching onwards, progression) प्रयाणं, प्रस्थानं, प्रस्थितिः f., प्रगमनं,

अग्रगमनं.—(Marching against) अभिषेणनं, अभिनिर्य्याणं; 'setting out on a march,' यात्राकरणं; 'toilsome march,' दुर्गसञ्चरः, दुर्गसञ्चारः, सञ्चारः.

To MARCH, *v. n.* यात्रां कृ, गमनं कृ, सैनिकवद् गमनं कृ or प्रगम् (c. 1. -गच्छति -गन्तुं) or प्रया (c. 2. -याति -तुं) or प्रस्था (c. 1. -तिष्ठति -ते -स्थातुं) or व्रज् (c. 1. व्रजति -जितुं) or चर् (c. 1. चरति -रितुं) or चल् (c. 1. चलति -लितुं) or प्रचल्; 'to march against,' अभिनिर्या (c. 2. -याति -तुं), अभिप्रया, प्रतिव्रज्, अभिप्रस्था, प्रत्यभिप्रस्था, अभिगम्, प्रतिगम्; 'one who marches slow,' मन्दगामी *m.* (न्), मन्थरः; 'fast,' अतिजवः, जंघालः, जंघिलः.

To MARCH, *v. a.* अभिषेण (nom. अभिषेणयति -यितुं), सेनां प्रस्था in caus. (-स्थापयति -यितुं) or चल् (c. 10. चलयति -यितुं) or प्रतिगम् (c. 10. -गमयति -यितुं), यात्रां कृ (c. 10. कारयति -यितुं).

MARCHES, *s. pl.* (Confines) देशसीमा, देशसमन्ताः *m. pl.*, देशप्रान्ताः *m. pl.*

MARE, *s.* अश्वा, अश्विनी, वाजिनी, तुरगी, तुरङ्गी, तुरङ्गिणी, वडवा, वडवा, घोटिका, अर्व्वती, पाभी, प्रसूः *f.*, प्रसूका.

MARGARITE, *s.* (Pearl) मुक्ता, मुक्तिका, मौक्तिकं, शुक्तिबीजं, शुक्तिजं.

MARGIN, *s.* प्रान्तः, अन्तः -न्तं, सीमा, उपान्तं, पर्य्यन्तं, कच्छः, धारः -रा, तटं, समन्तः, उत्सङ्गः, कोटिः *f.*, परिसरः; 'of a river,' तीरं, कूलं, तटं, कच्छः, कच्छान्तः; 'on the margin,' प्रान्ततस्.—(Of a book) समासः, पुस्तकप्रान्तः.

MARGINAL, *a.* प्रान्तस्थः -स्था -स्थं, समासस्थः &c., समासलिखितः -ता -तं.

MARGINALLY, *adv.* (Along the margin) प्रान्ततस्, प्रान्ते, अनुप्रान्तं.

MARINE, *a.* सामुद्रः -द्री -द्रं, समुद्रीयः -या -यं, समुद्रियः -या -यं, सामुद्रिकः -की -कं, समुद्रसम्बन्धी -न्धिनी -न्धि (न्), समुद्रविषयः -या -यं, सैन्धवः -वी -वं, सिन्धुकः -का -कं, समुद्रजः -जा -जं, समुद्रोद्भवः -वा -वं, जलधिसम्भवः -वा -वं, सागरसम्बन्धी &c.; 'marine engagement,' नौयुद्धं.

MARINE, *s.* (A soldier that serves on board a ship) नौयोद्धा *m.* (द्धृ), नौसैन्यः, नाविकसैन्यः, समुद्रीयसैनिकः.—(Navy) युद्धनौसमूहः.—(Naval affairs) नाविकविषयः, नाविककर्म्म *n.* (न्), नाविकप्रकरणं, जलयानविषयः, जलयानप्रकरणं.

MARINER, *s.* नाविकः, नाविकजनः, समुद्रयायी *m.* (न्), समुद्रगः, समुद्रगामी *m.*, पोतवाहः, निर्यामः, जलपथोपजीवी *m.* (न्), उदधिक्राः *m.* (स्), समुद्रीयजनः.

MARITAL, *a.* भर्तृसम्बन्धी -न्धिनी -न्धि (न्), पतिसम्बन्धी &c., भर्तृविषयः -या -यं, पतिविषयः &c., स्वामिविषयः &c.

MARITIME, *a.* (Relating to the sea) सामुद्रः -द्री -द्रं, समुद्रियः -या -यं, समुद्र in comp. *See* MARINE, *a.* (Naval) नाविकः -की -कं, नाव्यः -व्या -व्यं, नौ in comp.—(Bordering on the sea) समुद्रतटस्थः -स्था -स्थं, समुद्रतीरस्थः -स्था -स्थं.

MARJORAM, *s.* तुलसी, मरुवकः, समीरणः, प्रस्थपुष्पः, फणिज्झकः, पर्णासः, जम्भीरः, कठिञ्जरः, कुठेरकः, अर्ज्जकः.

MARK, *s.* (Sign, token by which a thing is known) चिह्नं, लक्षणं, लाञ्छनं, लिङ्गं, अङ्कः -ङ्कं, अभिज्ञानं, व्यञ्जनं, व्यञ्जकः -कं, लक्ष्यं, लक्ष्म *n.* (न्), लक्ष्मणं, ललामं.—(Spot) कलङ्कः, अङ्कः, चिह्नं, विन्दुः *m.*, विप्रुट् (ष्), विप्रुट्, गडुः.—(Mark on the body) सामुद्रं, सामुद्रचिह्नं, सामुद्रिकलक्षणं, तिलः -लकः, तिलकालकः; 'an interpreter of marks on the body,' सामुद्रिकः; 'an auspicious mark,' सुलक्षणं, सुचिह्नं; 'having auspicious marks,' सुलक्षणी -णिनी -णि (न्), सुलक्षणिकः -का -कं; 'having thirty-two auspicious marks,' द्वात्रिंशल्लक्षणोपेतः -ता -तं; 'an inauspicious mark,' कुलक्षणं, अपलक्षणं, दुर्लक्षणं, दुश्चिह्नं; 'having inauspicious marks,' कुलक्षणी -णिनी &c., कुलक्षणः -णा -णं.—(Butt for shooting at) लक्ष्यं, वाणलक्ष्यं, लक्षं, वेध्यं, व्याध्यः, शरव्यं, दृष्टिगुणः, प्रतिकायः; 'hitting the mark,' लक्ष्यभेदः; 'to hit the mark,' लक्ष्यं भिद् (c. 7. भिनत्ति, भेत्तुं) or व्यध् (c. 4. विध्यति, व्यद्धुं), लक्ष्यवेधनं कृ.—(Line) रेखा, लेखा.

To MARK, *v. a.* (Stamp, impress with a mark) चिह्न (nom. चिह्नयति -यितुं), अङ्क् (c. 10. अङ्कयति -यितुं), लक्ष् (c. 10. लक्षयति -यितुं), मुद्र (nom. मुद्रयति -यितुं), लाञ्छ् (c. 1. लाञ्छति -ञ्छितुं), अङ्कं कृ, चिह्नं कृ, लक्षणं कृ, लक्षीकृ.—(Stain) कलङ्क (nom. कलङ्कयति -यितुं), मलिन (nom. मलिनयति -यितुं), कलङ्कीकृ, लाञ्छ्.—(Draw a line) लिख् (c. 6. लिखति, लेखितुं), आलिख्, रेखां कृ.—(Notice, observe) लक्ष्, आलक्ष्, उपलक्ष्, अवेक्ष् (c. 1. ईक्षते -क्षितुं), निरीक्ष्, वीक्ष्, समीक्ष्, प्रेक्ष्.—(Mark out, define) परिच्छिद् (c. 7. -छिनत्ति -छेत्तुं), परिच्छेदं कृ, निर्दिश् (c. 6. -दिशति -देष्टुं), लक्ष्, लक्षीकृ.—(Mark out, trace the outline) बाह्यरेखां लिख् or अङ्क् or कृ, वहिर्लेखां कृ.

To MARK, *v. n.* (Note, take notice) आलोच् (c. 10. -लोचयति -यितुं), आलक्ष् (c. 10. -लक्षयति -यितुं), निरूप् (c. 10. -रूपयति -यितुं), समीक्ष् (c. 1. -ईक्षते -क्षितुं), समीक्षां कृ, बुध् (c. 4. बुध्यते, बोद्धुं), विमृश् (c. 6. -मृशति -मर्ष्टुं), परामर्शं कृ, विवेचनं कृ.

MARKED, *p. p.* चिह्नितः -ता -तं, अङ्कितः -ता -तं, लक्षितः -ता -तं, उपलक्षितः -ता -तं, लाञ्छितः -ता -तं, कृतलक्षणः -णा -णं, कृताङ्कः -ङ्का -ङ्कं, कृतलाञ्छनः -ना -नं, मुद्रितः -ता -तं, मुद्राङ्कितः -ता -तं.—(Defined) परिच्छिन्नः -न्ना -न्नं, निर्दिष्टः -ष्टा -ष्टं, लक्षितः -ता -तं.

MARKER, *s.* चिह्नकर्त्ता *m.* (र्तृ), अङ्कनकृत् *m.*, अङ्कयिता *m.* (तृ), लक्षयिता *m.*

MARKET, *s.* पण्यवीथी -थिका, पण्यशाला, विक्रयशाला, विक्रयस्थानं, क्रयविक्रयस्थानं, पण्यस्थानं, आपणः, हट्टः, विपणिः *m.* -णी *f.*, निगमः, अवटङ्कः, क्रयारोहः, पुटटी, निपद्या, निघंटं, पणग्रन्थिः *m.*, पण्याजीवं -वकं; 'a free market,' कचङ्गनं.—(Sale) विक्रयः, विपणः.

To MARKET, *v. n.* क्रयविक्रयं कृ, पण् (c. 1. पणते -णितुं, पणायति -यितुं), पणायां कृ.

MARKET-DAY, *s.* क्रयविक्रयदिवसः, हट्टदिवसः, हट्टवारः.

MARKET-PLACE, *s.* चत्वरं, चतुष्पथं, क्रयविक्रयचत्वरं, पणायाचत्वरं, पणाया, पणायास्थानं, विपणिः -णी *m. f.* *See* MARKET.

MARKET-RATE, MARKET-PRICE, *s.* आपणिकः, पण्यभावः, पण्यमूल्यं, अर्घबलाबलं.

MARKET-TOWN, *s.* ग्राममुखः, मुख्यग्रामः, नगरमुखः, मुख्यनगरं -री, कर्ब्बटः -टं.

MARKETABLE, *a.* विक्रेयः -या -यं, विक्रयणीयः -या -यं, पण्यः -ण्या -ण्यं, पणितव्यः -व्या -व्यं, पण्यार्हः -र्हा -र्हं, क्रेयः -या -यं, क्रयविक्रययोग्यः -ग्या -ग्यं.

MARKING, *s.* अङ्कनं, मुद्राङ्कनं, चिह्नाङ्कनं, चिह्नकरणं, अङ्ककरणं, लिखनं.

MARKING-INK, *s.* दहनमसिः *f.*, दहनमसिका, दहनरसः, वस्त्राङ्कनमसिः.

MARKING-NUT, *s.* दहनं, निर्दहनं, भल्लिका, भल्लातः -तकी, भल्ली.

MARKSMAN, *s.* लक्ष्यवेधी *m.* (न्), लक्ष्यभेदी *m.*, लब्धलक्षः, सुसन्धानी *m.* (न्), सुप्रयोगवाणः, सुप्रयोगविशिखः, शराभ्यासकुशलः, धनुर्विद्, आयुधविद्.

MARL, *s.* मार्लाख्यो मृत्तिकाविशेषः, चिक्कणमृत्तिका, पांशुः *m.*

To MARL, *v. a.* पूर्व्वोक्तमृत्तिकया लिप् (c. 6. लिम्पति, लेप्तुं).

MARMALADE, *s.* मिष्टफलं, मिष्टान्नं, शर्करादिसंसृष्टा नारङ्गत्वक् *f.* (च्).

MARMOREAN, *a.* चारुप्रस्तरमयः -यी -यं, पाषाणनिर्म्मितः -ता -तं.

MARMOSET, *s.* सूक्ष्मवानरः, सूक्ष्ममर्कटः, क्षुद्रप्लवङ्गः.

MAROON, *a.* (Dark red) घनरक्तः -क्ता -क्तं, घनारुणः -णा -णं, कपिशः -शा -शं.

MARPLOT, *s.* कार्य्यविघातकः, कार्य्यविनाशकः, कार्य्यबाधकः.

MARQUEE, *s.* पटमण्डपः, पटवासः, बृहत्पटवेश्म *n.* (न्), वस्त्रगृहं.

MARQUESS, *s.* उपाग्रणीः *m.*, उपनायकः, उपाधिपः, कुलीनपदमध्याद् द्वितीयपदस्थः, द्वितीयकुलीनपदभाक् *m.* (ज्).

MARQUISATE, *s.* पूर्व्वोक्तकुलीनजनस्य अधिकारः, उपाधिपत्यं.

MARRED, *p. p.* दूषितः -ता -तं, विहतः -ता -तं, व्याहतः -ता -तं, नाशितः -ता -तं, विनाशितः -ता -तं, घातः -ता -तं, विघातः -ता -तं.

MARRER, *s.* दूषकः, दूषयिता *m.* (तृ), नाशकः, विनाशकः, विघातकः.

MARRIAGE, *s.* विवाहः, उद्वाहः -हनं, उद्वहनं, परिणयः -यनं, पाणिग्रहः -हणं, पाणिग्राहः, पाणिपीडनं, हस्तकरणं, दारपरिग्रहः, दारसङ्ग्रहः, दारक्रिया, दारकर्म्म *n.* (न्), दाराधिगमनं, उपयमः, उपयामः, लग्नकार्य्यं, मैथुनं, वाधुक्यं, निवेशः; 'marriage-rite,' विवाहविधिः *m.*, विवाहक्रिया, विवाहसंस्कारः; 'giving in marriage,' दारिकादानं, दारिकाप्रदानं; 'marriage contract,' वाङ्निश्चयः; 'marriage-settlement,' शुल्कः -ल्कं; 'auspicious season for marriage,' लग्नावधिः *f.*, लग्नमुहूर्त्तः -र्त्तं; 'marriage-string, or ring hung round the neck of the bride, who wears it till she becomes a widow, when it is broken,' मङ्गलसूत्रं, माङ्गल्यतन्तुः *m.*, सौभाग्यतन्तुः *m.*, कौतुकं; 'marriage gifts,' यौतकं, औद्वाहिकं, पारिणाय्यं, हरणं, सुदायः -यं; 'marriage festival,' विवाहोत्सवः, विवाहमहोत्सवः; 'ablution at marriage,' मङ्गलस्नानं; 'compliments at marriage,' जम्बूलः, जम्बूलमालिका; 'second marriage,' द्वितीयविवाहः, द्वितीयसम्बन्धः. The following are different forms of marriage, explained in Manu, chap. iii verses 27 et seq.: आसुरविवाहः, आर्षविवाहः, गान्धर्व्वविवाहः, दैवविवाहः, पैशाचविवाहः, प्राजापत्यविवाहः, ब्राह्मविवाहः, राक्षसविवाहः, प्रीतिविवाहः. The स्वयंवरः is a form of marriage in which a girl chooses her own husband.

MARRIAGEABLE, *a.* विवाह्यः -ह्या -ह्यं, उद्वाह्यः &c., वोढव्यः -व्या -व्यं, विवाहयोग्यः -ग्या -ग्यं, विवाहोचितः -ता -तं, विवाहोपयुक्तः -क्ता -क्तं, विवाहकालप्राप्तः -प्ता -प्तं, विवाहवयस्कः -स्का -स्कं, परिणेयः -या -यं; 'as a girl,' दृष्टरजाः *f.* (स्), सञ्जाताङ्गवा, आगताङ्गवा, ऋतुयुक्ता, ऋतुमती, मध्यमा, मध्या, पतीयन्ती.

MARRIED, *p. p.* विवाहितः -ता -तं, उद्वाहितः -ता -तं, ऊढः -ढा -ढं, उपोढः -ढा -ढं, समूढः -ढा -ढं, कृतविवाहः -हा -हं, जातविवाहः -हा -हं, कृतोद्वाहः -हा -हं, कृतदारपरिग्रहः -हा -हं, परिणीतः -ता -तं, कृतोपयमः -मा -मं, जातोपयमः -मा -मं, निविष्टः -ष्टा -ष्टं, प्रन्नः -न्ना -न्नं. 'a married man,' सभार्य्यः, सपत्नीकः, स्त्रीमान् *m.* (त्), कृतदारः, सदारः, कृतदारपरिग्रहः, कुटुम्बी *m.* (न्), सकुटुम्बः, भार्य्योढः; 'a married woman,' सभर्त्तृका, सपतिका, पतिवत्नी, सधवा, सुवासिनी; 'newly married woman,' नववधूः *f.*, नववरिका; 'twice-married woman,' पुनर्भूः *f.*, दिधिषूः *f.*, दिधीषूः *f.*, दिधिषुः *f.*; 'one who is married before his elder brother,' परिवेत्ता *m.* (त्तृ).

MARROW, *s.* मज्जा, वपा, वसा, मेदस् *n.*, मेदः, मज्जा *m.* (न्), मज्जनं, सारः, अस्थिसारः, देहसारः, बीजं, स्निग्धा, वपाकृत् *m.*, अस्थिकृत्, अस्थिजं, अस्थिस्नेहः, हड्डुजं, शुक्रकरः, तेजस् *n.*, मधुरं, जीवनं, मणिच्छिद्रा. (Pith, essence) सारः, गर्भः, सारता, श्रेष्ठांशः.

MARROW-BONE, *s.* मज्जापूर्णम् अस्थि, मेदोयुक्तम् अस्थि.

MARROWLESS, *a.* मज्जाहीनः -ना -नं, मेदोहीनः -ना -नं, वपाशून्यः -न्या -न्यं, गतसारः -रा -रं, असारः -रा -रं, निःसारः -रा -रं.

MARROWY, *a.* मज्जावान् -वती -वत् (त्), सारवान् &c., मेदस्वी -स्विनी -स्वि (न्).

To MARRY, *v. a.* (Unite a man and woman in wedlock) विवाहसंस्कारेण स्त्रीपुरुषौ संयुज् (c. 7. -युनक्ति -योक्तुं, c. 10. -योजयति -यितुं) or सम्बन्ध् (c. 9. -बध्नाति -बन्द्धुं) or विवाहसंयुक्तौ कृ, विवाहसंस्कारं कृ. —(Take for wife) विवह् (c. 1. -वहति -ते -वोढुं), उद्वह्, समुद्वह्, उदावह्, परिणी (c. 1. -णयति -णेतुं), उपयम् (c. 1. -यच्छते -ति -यमते -यन्तुं), पाणिं ग्रह् (c. 9. गृह्णाति, ग्रहीतुं), कन्यां परिग्रह् or प्रतिग्रह् or सङ्ग्रह्, दारपरिग्रहं कृ, दारसङ्ग्रहं कृ, दाराधिगमनं कृ, कन्यापरिणयं कृ, भार्य्यां विद् (c. 6. विन्दते -ति, वेत्तुं) or अनुविद्; 'he should marry a wife,' कन्यां विवहेत or उपयच्छेत, कन्यायाः पाणिं गृह्णातु. —(Take for husband) पतिं विद् or वृ (c. 5. वृणोति, वरितुं -रीतुं), भर्त्रा संयुज् in pass. (-युज्यते), पतिवरणं कृ, भर्त्तृवरणं कृ. —(Dispose of in marriage) विवाहार्थं कन्यां दा or प्रदा.

To MARRY, *v. n.* भर्त्रा or भार्य्यया संयुज् in pass. (-युज्यते) or युज्, विवाहं कृ, उद्वाहं कृ, परिणयं कृ, पाणिग्रहणं कृ, दारपरिग्रहं कृ, उपयमं कृ.

MARS, *s.* (The planet, fabled as the son of the earth) मङ्गलः, मङ्गलग्रहः, भौमः, अङ्गारकः, कुजः, भूमिजः, भूसुतः, महीसुतः, क्षितिसुतः, आवनेयः, धरात्मजः, धरासुतः, धरापुत्रः, नवदीधितिः *m.*, आषाढभवः, शिवघर्म्मजः, गगणोल्मुकः, खोल्मुकः, लोहितः -तकः, लोहिताङ्गः, रक्ताङ्गः, रुधिरः, आरः, पराक्ष्वरः, ऋणान्तकः, चरः, वः. (In mythology, the god of war). *See* KÁRTIKEYA.

MARSH, *s.* कच्छः, कच्छभूः *f.*, कच्छभूमिः *f.*, अनूपभूः *f.*, अनूपभूमिः *f.*, सजलभूमिः *f.*, जलाढ्यभूः *f.*, आर्द्रभूमिः *f.*, पङ्कः.

To MARSHAL, *v. a.* विन्यस् (c. 4. -अस्यति -असितुं), व्यूह् (c. 1. -ऊहते -हितुं), विरच् (c. 10. -रचयति -यितुं), रच्, क्रमेण स्था in caus. (स्थापयति -यितुं), व्यवस्था, विधा (c. 3. -दधाति -धातुं), संविधा, प्रतिविधा.

MARSHAL, MARSHALLER, *s.* विधाता *m.* (तृ), संविधाता *m.*, व्यवस्थापकः, विरचकः, व्यूहरचकः, विन्यासकृत् *m.*

MARSHY, *a.* अनूपः -पा -पं, आनूपः -पी -पं, कच्छः -च्छा -च्छं, जलाढ्यः -ढ्या -ढ्यं, जलप्रचुरः -रा -रं, जलमयः -यी -यं, सजलः -ला -लं, जलप्रायः -या -यं, आप्यः -प्या -प्यं, आर्द्रः -र्द्रा -र्द्रं.

MART, *s.* विक्रयस्थानं, क्रयविक्रयस्थानं, पण्यस्थानं, आपणः, विपणिः *m.* -णी *f.*, निगमः, निषद्या, पण्यवीथी -थिका, अवटङ्कः.

MARTIAL, *a.* (Relating to war) युद्धसम्बन्धी -न्धिनी -न्धि (न्), रणसम्बन्धी &c., युद्धविषयः -या -यं, रणविषयकः -का -कं, साङ्ग्रामिकः -की -कं, सामरिकः -की -कं, साम्परायिकः -की -कं. —(Suited to war) रणयोग्यः -ग्या -ग्यं, युद्धोपयुक्तः -क्ता -क्तं, रणोपयोगी -गिनी &c. —(Given to war) रणप्रियः -या -यं, रणासक्तः -क्ता -क्तं, रणवीरः -रा -रं, रणकामी -मिनी &c.; 'martial music,' रणवाद्यं.

MARTINET, *a.* उग्रदण्डः, उग्रशासनः, तीक्ष्णदण्डः, दण्डबुद्धिः *m.*, उद्यतदण्डः, तीक्ष्णशासनः, निष्ठुरबुद्धिः *m.*, निष्ठुरः.

MARTINGAL, MARTINGALE, *s.* तलिका, तलसारकः, अधोबन्धनं.

MARTYR, *s.* साक्षी *m.* (न्), स्वधर्म्मार्थं प्राणत्यागी *m.* (न्) or देहत्यागी *m.* or जीवितत्यागी *m.*, स्वमतार्थं त्यक्तप्राणः or अर्पितप्राणः, स्वधर्म्मप्रमाणार्थं न्यस्तप्राणः or न्यस्तदेहः or न्यस्तजीवितः or जीवोत्सर्गी *m.* or साक्षी *m.*

To MARTYR, *v. a.* स्वधर्म्मार्थं हन् (c. 2. हन्ति -न्तुं or caus. घातयति -यितुं).

MARTYRDOM, *s.* स्वधर्म्मार्थं प्राणत्यागः or जीवितत्यागः, स्वमतार्थं जीवोत्सर्गः or प्राणोत्सर्गः, स्वधर्म्मप्रमाणार्थं देहन्यासः or प्राणन्यासः or प्राणार्पणं.

MARTYRED, *p. p.* स्वधर्म्मार्थं, हतः -ता -तं or व्यापादितः -ता -तं, स्वधर्म्मप्रमाणार्थं हतजीवितः -ता -तं or नष्टप्राणः -णा -णं.

Martyrology, *s.* साक्षिचरित्रशास्त्रं, स्वधर्म्मार्थं प्राणत्यागिनां चरित्रविवरणं or चरित्रलिखनं.

Marvel, *s.* कौतुकं, अद्भुतं, अद्भुतवस्तु *n.*, आश्चर्य्यवस्तु *n.*, आश्चर्य्यं, चमत्कारः, चित्रवस्तु *n.*, चित्रं, विस्मयजनकवस्तु, उत्पातः, उपसर्गः.

To marvel, *v. n.* विस्मितः -ता -तं भू, विस्मयान्वितः -ता -तं भू, सविस्मयः -या -यं भू, विस्मि (c. 1. -स्मयते -स्मेतुं) with instr. loc. or acc. c., साश्चर्य्यः -र्य्या -र्य्यं भू, चमत्कृतः -ता -तं भू, आश्चर्य्यं ज्ञा (c. 9. जानाति, ज्ञातुं) or मन् (c. 4. मन्यते, मन्तुं).

Marvellous, *a.* साश्चर्य्यः -र्य्या -र्य्यं, अद्भुतः -ता -तं, विस्मयजनकः -का -कं, विस्मयोत्पादकः -का -कं, आश्चर्य्यकरः -रा -रं, आश्चर्य्यकारकः -का -कं, आश्चर्य्यजनकः -का -कं, चमत्कारजनकः -का -कं, चित्रः -त्रा -त्रं, विचित्रः -त्रा -त्रं, तातः -ता -तं; ‘a marvellous tale,’ चित्रोक्तिः *f.*; ‘a marvellous action,’ अद्भुतकर्म्म *n.* (न्), आश्चर्य्यकर्म्म.

Marvellously, *adv.* अद्भुतं, अद्भुतप्रकारेण, विचित्रं, साश्चर्य्यप्रकारेण, यथा विस्मयो जायते तथा.

Marvellousness, *s.* अद्भुतता -त्वं, आश्चर्य्यत्वं, विचित्रता, साश्चर्य्यत्वं, वैचित्र्यं, विस्मयजनकता, अपूर्व्वत्वं.

Marwar, *s.* (The province) मरुः *m.*, मरुभूः *f.*—(The inhabitants) मरवः *m. pl.*, मरुभुवः *m. pl.*

Masculine, *a.* पौरुषः -षी -षं, पौरुषेयः -यी -यं, पुरुषजातीयः -या -यं, पुंजातीयः -या -यं, पुं in comp., पुरुष in comp., अक्लीबः -बा -बं.—(Having the qualities of a man, resembling a man) पुरुषस्वभावः -वा -वं, पुरुषवृत्तिः -त्तिः -त्ति, पुरुषशीलः -ला -लं, पुरुषधर्म्मकः -का -कं, पुरुषप्रकृतिः -तिः -ति, पुम्प्रकृतिः -तिः -ति; ‘the masculine gender,’ पुंलिङ्गं, पुमान् *m.* (पुंस्), पुरुषः; ‘a masculine woman,’ वृषभी.

Masculinely, *adv.* पुरुषवत्, नरवत्, सपौरुषं, पौरुषेण, पुंवत्.

Masculineness, *s.* पुंस्त्वं, पुरुषत्वं -ता, पौरुषं, पौरुषता, पुरुषशीलता, पुरुषस्वभावः, पुरुषप्रकृतिः *f.*

Mash, *s.* उदपेषः -षणं, उदकपेषः, सम्पेषः -षणं, नानाद्रव्यसम्पेषः, नानाद्रव्यमिश्रणं, जलमिश्रित नानासम्पिष्टद्रव्यं, नानासम्मिश्रद्रव्यपिण्डः.

To mash, *v. a.* सम्पिष् (c. 7. -पिनष्टि -पेष्टुं), सम्मृद् (c. 9. -मृद्गाति -मर्द्दितुं), सम्पेषणं कृ, सम्मर्दनं कृ, चूर्ण् (c. 10. चूर्णयति -यितुं), सञ्चूर्ण्, क्षुद् (c. 7. क्षुणत्ति, क्षोत्तुं), सम्पेषणपूर्व्वं पिण्डीकृ.

Mashed, *p. p.* सम्पिष्टः -ष्टा -ष्टं, सम्मर्द्दितः -ता -तं, सञ्चूर्णितः -ता -तं, क्षुण्णः -ण्णा -ण्णं, सम्पेषणानन्तरं पिण्डीभूतः -ता -तं.

Mask, *s.* (Cover for the face) कृत्रिममुखं, छद्ममुखं, छद्मास्यं, कपटमुखं, उपमुखं.—(Pretext, subterfuge) छद्म *n.* (न्), कपटः -टं, व्यपदेशः, अपदेशः, व्याजः, छलं, कूटं.—(Masquerade) छद्मवेशः, कपटवेशः, कृत्रिमवेशः, छद्मवेशधारणं, विडम्बनं.

To mask, *v. a.* (Disguise with a mask) कृत्रिममुखेन छद् (c. 10. छादयति -यितुं) or गुह् (c. 1. गूहति -हितुं), मुखगोपनं कृ.—(Conceal) छद्, आच्छद्, गुप् (c. 1. गोपायति, गोप्तुं), गोपनं कृ, अपवृ (c. 10. -वारयति -यितुं).

To mask, *v. n.* विडम्बनं कृ, छद्मवेशी -शिनी -शि भू, कपटवेशी &c. भू.

Masked, *p. p.* (Having the face covered) गुप्तमुखः -खी -खं, छद्ममुखी -खिनी -खि (न्), कृत्रिममुखी &c.—(Disguised) छद्मवेशी -शिनी &c., कपटवेशी &c., छद्मवेशधारी -रिणी &c., कपटवेशः -शा -शं, छद्मवेशः &c., कपटरूपी -पिणी &c., विडम्बितवेशी &c., अलक्षितः -ता -तं.—(Concealed) गुप्तः -प्ता -प्तं, गोपितः -ता -तं, आच्छादितः -ता -तं.

Masker, *s.* छद्मवेशी *m.* (न्), कपटवेशी *m.*, छद्मवेशभृत्, छद्मरूपी *m.*, विडम्बितवेशः, कृत्रिमवेशधारी *m.*, विडम्बनकृत्.

Mason, *s.* लेपकः, लेपी *m.* (न्), लेपकरः, गृहनिर्माता *m.* (तृ), सुधाजीवी *m.* (न्), लेपजीवी *m.*, अलेपकः, प्रस्तरन्यासकृत्, इष्टकान्यासजीवी *m.*

Masonry, *s.* लेपकर्म्म *n.* (न्), इष्टकान्यासकर्म्म *n.*, सुधाकर्म्म *n.*, गृहनिर्म्माणं, गृहकरणं, गृहनिर्म्माणे प्रस्तरन्यासः or प्रस्तरादिविन्यासः.—(Brickwork, any thing made of stone, brick, &c.) इष्टकाकर्म्म *n.*, प्रस्तरकर्म्म *n.*, प्रस्तरनिर्म्मितं प्राकारादि.

Masquerade, *s.* छद्मवेशधारणं, वेशधारणं, छद्मवेशक्रीडा, छद्मवेशसमारम्भः, छद्मवेशः, कपटवेशिनां यात्रा, विडम्बनं, विडम्बनक्रीडा.

To masquerade, *v. n.* छद्मवेशी -शिनी -शि भू, कपटवेशी &c. भू, छद्मवेशं धृ (c. 10. धारयति -यितुं), विडम्ब् (c. 10. -डम्बयति -यितुं), विडम्बनं कृ.

Masquerader, *s.* छद्मवेशी *m.* (न्), वेशधारी *m.*, विडम्बनकर्त्ता *m.* (र्त्तृ). *See* Masker.

Mass, *s.* (Lump) पिण्डः -ण्डं, घनः, ओघः, घनौघः, स्थूलं, गण्डः -ण्डका; ‘a mass of iron,’ लोहपिण्डः.—(Heap) राशिः *m.*, सञ्चयः, निचयः, प्रचयः, समुच्चयः, चयः, चितिः *f.*, चायः, निकरः, उत्करः, ओघः, पुञ्जः, पूगः, स्तूपः, स्तोमः.—(Collection) समूहः, सङ्घः, सङ्घातः, संहतिः *f.*, समुदायः, वृन्दं, संहारः, समाहारः, सन्नयः, निवहः; ‘in masses,’ सङ्घशस्.—(Gross, bulk) साकल्यं, सामग्र्यं, समुदायः; ‘in the mass,’ साकल्येन.

Massacre, *s.* महामारणं, महाघातः, महावधः, निषूदनं, विशसनं, निहननं, संहारः, विमर्द्दनं, निकृन्तनं, प्रमापणं, निशारणं.

To massacre, *v. a.* अतिनैष्ठुर्य्येण हन् (c. 2. हन्ति -न्तुं, c. 10. घातयति -यितुं) or निहन् or मृ (c. 10. मारयति -यितुं) or सूद् (c. 10. सूदयति -यितुं) or निसूद् or विनिसूद् or विशस् (c. 1. -शसति -सितुं) or निकृत् (c. 6. -कृन्तति -कर्त्तितुं).

Massacred, *p. p.* अतिनैष्ठुर्य्येण हतः -ता -तं or विनिहतः -ता -तं or घातितः -ता -तं or निषूदितः -ता -तं or विशसितः -ता -तं.

Massiveness, massiness, *s.* स्थूलता -त्वं, स्थौल्यं, स्थूलाकारता, बृहत्त्वं, गुरुत्वं -ता, सभारता -त्वं, भारिता -त्वं, भारवत्त्वं, पिण्डाकारता, महत्त्वं, स्थानता.

Massive, massy, *a.* स्थूलः -ला -लं, स्थूलाकारः -रा -रं, स्थूलरूपः -पा -पं, भारी -रिणी -रि (न्), भारवान् -वती -वत् (त्), सभारः -रा -रं, गुरुः -र्व्वी -रु, पिण्डितः -ता -तं, पिण्डाकारः -रा -रं, बृहन् -हती -हत् (त्), बृहत्परिमाणः -णा -णं, स्थूलपरिमाणः -णा -णं, स्थानः -ना -नं.

Mast, *s.* (Of a ship) कूपकः, कूपः, गुणवृक्षकः, गुणवृक्षः, नौकूपकः.

Mast-head, *s.* गुणवृक्षकाग्रं, गुणवृक्षाग्रं, कूपकाग्रं.

Master, *s.* (One who rules or has servants under him) स्वामी *m.* (न्), प्रभुः *m.*, पतिः *m.*, ईश्वरः, ईशः, नाथः, अधिपतिः *m.*, अधिपः, अधिभूः *m.*, ईशिता *m.* (तृ), नायकः, भर्त्ता *m.* (र्त्तृ), आर्य्यः, भरण्डः, भरण्युः *m.*, सेव्यः; ‘master of a family,’ कुलपतिः *m.*, कुटुम्बी *m.* (न्), कौटुम्बिकः; ‘serving two masters,’ उभयवेतनः -ना -नं, उभयस्वामिकः -का -कं; ‘one’s own master,’ स्वाधीनः -ना -नं, स्वतन्त्रः -न्त्रा -न्त्रं.—(Owner) अधिकारी *m.* (न्), स्वामी *m.*, ईश्वरः, पतिः *m.*, प्रभुः *m.*, परिवृढः.—(Superintendent, director) अध्यक्षः, अधिष्ठाता *m.* (तृ) अधिकृतः, अधिकारी *m.*, अधिपतिः *m.*, अधिपः, अधीशः, नायकः, नेता *m.* (तृ); ‘master of the horse,’ अश्वाध्यक्षः; ‘master of the house,’ गृहपतिः, भवनपतिः; ‘master of the mint,’ टङ्कपतिः *m.*, रूप्याध्यक्षः; ‘master of the sports,’ केलिसचिवः, नर्म्मसचिवः.—(Chief, head) नायकः, पतिः *m.*, अधिपतिः *m.*, अधिष्ठाता *m.* (तृ), अग्रगः, अग्रणीः *m.*, मुख्यः, श्रेष्ठः, मुख्य or प्रधान in comp.—(Teacher, director of a school) अध्यापकः.

शिक्षकः, शिक्षागुरुः *m.*, **गुरुः** *m.* **आचार्य्यः, शिक्षादाता** *m.* (तृ), विद्यादाता *m.*, **विद्यागुरुः** *m.*, **आर्य्यः, उपाध्यायः, उपदेशकः, शिक्षाकरः.** (Well skilled in) **निपुणः, कुशलः, सम्पन्नः, व्युत्पन्नः, पण्डितः, कृती** *m.* (न्), **पारगतः.**—(Of a ship) **नौकाधिपतिः** *m.*, **नौपतिः** *m.*

To MASTER, *v. a.* (Subdue) **वशीकृ, स्ववशीकृ, स्वाधीनीकृ, जि** (c. 1. **जयति -ते, जेतुं**), **विजि, दम्** (c. 10. **दमयति -यितुं**), **आयत्तीकृ, पराभू, अभिभू, प्रभू.**—(Make one's self master of a subject) **वशीकृ, पारं गम्** (c. 1. **गच्छति, गन्तुं**), **सर्व्वतत्त्वानि ज्ञा** (c. 9. **जानाति, ज्ञातुं**); 'you must master the Sanskrit language,' **भवद्भिः संस्कृतयाक्यानि वशीकर्त्तव्यानि.**

MASTER-BUILDER, *s.* **प्रधानस्थपतिः** *m.*, **मुख्यस्थपतिः** *m.*

MASTERED, *p. p.* **वशीकृतः -ता -तं, स्ववशीभूतः -ता -तं, स्वहस्तगतः -ता -तं.**

MASTER-KEY, *s.* **प्रधानोद्घाटकयन्त्रं, अग्रकुञ्चिका, मुख्योद्घाटनं.**

MASTERLY, *a.* **अत्युत्तमः -मा -मं, अत्युत्कृष्टः -ष्टा -ष्टं, अनुपमः -मा -मं, अनुपमेयः -या -यं, निरुपमः -मा -मं, सर्व्वोत्तमः -मा -मं, सर्व्वोत्कृष्टः -ष्टा -ष्टं, सर्व्वजित्** *m.f.n.*, **सर्व्वश्रेष्ठः -ष्ठा -ष्ठं, असामान्यः -न्या -न्यं, अतुलनीयः -या -यं, सुनिपुणः -णा -णं, अतिकुशलः -ला -लं.**

MASTERLY, *adv.* **परमयुक्त्या, सुनिपुणवत्, अतिकुशलवत्, अत्युत्तमं, अत्युत्कृष्टं.**

MASTERPIECE, *s.* **अत्युत्तमकर्म्म** *n.* (न्), **अनुपमकर्म्म** *n.*, **अत्युत्कृष्टकर्म्म, उत्तमकर्म्म** *n.*, **परमकर्म्म** *n.*, **प्रधानकर्म्म** *n.*, **सर्व्वोत्कृष्टकर्म्म** *n.*

MASTERSHIP, *s.* **प्रभुत्वं -ता, स्वाम्यं, स्वामित्वं, आधिपत्यं, ऐश्वर्य्यं, अधिकारित्वं, भर्तृत्वं, प्रधानत्वं, प्राधान्यं, श्रेष्ठता, श्रैष्ठ्यं.**

MASTER-STROKE, *s.* **उत्तमकर्म्म** *n.* (न्), **परमकर्म्म** *n.*, **अत्युत्तमक्रिया.**

MASTERY, *s.* (Dominion) **ऐश्वर्य्यं, आधिपत्यं, प्रभुत्वं, ईशत्वं, स्वामित्वं, स्वाम्यं, अधिकारः, भर्तृता.**—(Ownership) **स्वाम्यं, अधिकारित्वं -ता, प्रभुता, स्वत्वं.**—(Pre-eminence) **श्रेष्ठत्वं, श्रैष्ठ्यं, प्रधानत्वं, प्राधान्यं, उत्कर्षः, उत्कृष्टता, मुख्यता, प्रकृष्टता, प्रभुत्वं, आधिक्यं, परमपदं.**—(Victory) **विजयः.**—(Great skill) **अतिकौशल्यं, अतिनैपुण्यं, अतिपाटवं, परमयुक्तिः** *f.*, **परमोत्कर्षः**; 'to have the mastery,' **प्रभू, अभिभू.**

MASTICABLE, *a.* **चर्व्यः -र्व्या -र्व्यं, चर्वणीयः -या -यं, चर्वितव्यः -व्या -व्यं.**

To MASTICATE, *v. a.* **चर्व्** (c. 1. **चर्वति -र्वितुं**, c. 10. **चर्वयति -यितुं**), **चर्वणं कृ, दन्तैः पिष्** (c. 7. **पिनष्टि, पेष्टुं**), **विदंश्** (c. 1. **-दशति -दंष्टुं**).

MASTICATED, *p. p.* **चर्वितः -ता -तं, कृतचर्वणः -णा -णं, दन्तपिष्टः -ष्टा -ष्टं.**

MASTICATION, *s.* **चर्वणं, चर्वणक्रिया, चर्वणकर्म्म** *n.* (न्), **दन्तपेषणं, पेषणं.**

MASTICATORY, *a.* **चर्वणसाधकः -का -कं, चर्वणोपयोगी -गिनी -गि** (न्).

MASTICATORY, *s.* (Substance to be chewed) **चर्वणीयं, चर्व्यद्रव्यं, चर्व्यं.**

MASTICH, MASTIC, *s.* **मास्तिचाख्यो वृक्षनिर्य्यासः.**—(Cement) **लेपविशेषः.**

MASTIFF, *s.* **बृहत्कुक्कुरः, अतिसाहसशीलः कुक्कुरभेदः.**

MASTLESS, *a.* **कूपकहीनः -ना -नं, अकूपकः -का -कं, हृतकूपकः -का -कं.**

MAT, *s.* **कटः, किलिञ्जकः, पादपाशी, आस्तरणं, तृणपूली, तलाची, चटरः, यानं, चञ्चा.**

To MAT, *v. a.* (Lay with mats) **कटैर् आस्तॄ** (c. 9. **-स्तृणाति -स्तरितुं -रीतुं**), **कटान् विस्तॄ, कटास्तरणं कृ.**—(Interweave, entangle) **संक्षिप्** (c. 10. **-क्षेपयति -यितुं**), **आक्षिप्, ग्रन्थ्** (c. 9. **ग्रथ्नाति**, c. 1. **ग्रन्थति -न्थितुं**); 'to mat the hair,' **जटिलीकृ.**

MATCH, *s.* (One who is equal to another in strength) **तुल्यबलः -ला, तुल्यशक्तिः** *m.f.*, **समानबलः -ला, तुल्यविक्रमः -मा**; 'to be a match for,' **अलङ्कृ.**—(One that tallies with another) **यमः -मा -मं, यमकः -का -कं, यमलः -ला -लं, युग्मकः, समः -मा, समानः -ना, समकक्षः -क्षा, समानकक्षः -क्षा, समतोलः -ला.**—(Union by marriage) **विवाहसम्बन्धः, सम्बन्धः, विवाहः, प्रेमसम्बन्धः**; 'scheming to match,' [illegible] **सन्दर्भः.**—(Contest) **युद्धं**, [illegible] **समाह्वयः**, [illegible]—(For lighting fires) [illegible] **ज्वलतृणं, ज्वलनतृणं, अरणिः -णी** *m. f.*

To MATCH, *v. a.* (Equal, make equal) **समीकृ, समानीकृ, सदृशीकृ, समान** (nom. **समानयति -यितुं**), **उपमा** (c. 2. **-माति -तुं**), **प्रतिमा, तुल्** (c. 10. **तुलयति -यितुं**), **तुल्यीकृ.**—(Show an equal) **समं** or **तुल्यं** or **युग्मकं दृश्** (c. 10. **दर्शयति -यितुं**) or **निर्दिश्** (c. 6. **-दिशति -देष्टुं**), **प्रतिमां** or **उपमां** or **उपमानं** or **प्रतिरूपं दृश्.**—(Oppose as equal in contest) **प्रतियुध्** in caus. (**-योधयति -यितुं**), **तुल्यबलं** or **तुल्यविक्रमं कञ्चित् पुरस्कृ.**—(Adapt) **युज्** (c. 10. **योजयति -यितुं**), **समायुज्.**—(Give in marriage) **विवाहार्थं दा** or **प्रदा.**

To MATCH, *v. n.* (Correspond, tally) **युज्** in pass. (**युज्यते**), **उपयुज्, तुल्यः -ल्या -ल्यं भू, तुल्यीभू, समीभू, समानीभू, सदृशीभू, अनुरूपः -पा -पं भू** or **अस्, प्रतिरूपीभू, उपमितः -ता -तं भू.**—(Be united in marriage) **विवाहसम्बन्धं कृ, प्रेमसम्बन्धं कृ.**—(Be a match for) **अलङ्कृ, अलम्भू, अलन्तमः -मा -मं भू.**

MATCHED, *p. p.* (Equalled, evenly matched) **तुल्यः -ल्या -ल्यं, तुल्यीभूतः -ता -तं, तुल्यबलः -ला -लं, तुल्यशक्तिः -क्तिः -क्ति, तुल्यविक्रमः -मा -मं, समतोलः -ला -लं, समानतोलः -ला -लं, समानकक्षः -क्षा -क्षं, सप्रतिमः -मा -मं, सप्रतिरूपः -पा -पं, उपमितः -ता -तं.**—(Married) **कृतविवाहः -हा -हं, कृतोपयमः -मा -मं.**

MATCHLESS, *a.* **अतुल्यः -ल्या -ल्यं, अनुपमः -मा -मं, निरुपमः -मा -मं, अप्रतिमः -मा -मं, अतुलनीयः -या -यं, अतुलः -ला -लं, निस्तुलः -ला -लं, अनुपमेयः -या -यं, अप्रतिमेयः -या -यं, अप्रतिरूपः -पा -पं, अगम्यरूपः -पा -पं, अद्वितीयः -या -यं, असदृशः -शी -शं, सर्व्वोत्तमः -मा -मं, सर्व्वश्रेष्ठः -ष्ठा -ष्ठं, सर्व्वजित्** *m.f.n.*, **विषमः -मा -मं, अपूर्ब्बः -र्ब्बा -र्ब्बं.**

MATCHLESSLY, *adv.* **अतुल्यं, अनुपमं, अप्रतिमेयं, निरुपमं, सर्व्वश्रेष्ठं.**

MATCHLESSNESS, *s.* **अतुल्यता, अनुपमेयता, अप्रतिमेयता, अनुपमता, अनौपम्यं.**

MATCHLOCK, *s.* **अन्तरग्निबलेन लोहगुलिकाप्रक्षेपणी सुषिरनाडी.**

MATCH-MAKER, *s.* (Maker of matches for burning) **शलाकाकारी** *m.* (न्), **ज्वलशलाकाकृत्** *m.*—(Contriver of marriages) **घटकः, विवाहघटकः, प्रेमघटकः, प्रेमविषये मध्यस्थः.**

MATE, *s.* (Companion, associate) **सहायः, सहचरः -री** *f.*, **सहवर्त्ती** *m.* **-र्त्तिनी** *f.*, **सहवासी** *m.* **-सिनी, सखा** *m.* **-खी** *f.*, **सहभावी** *m.* **-विनी** *f.*, **सङ्गी** *m.* **-ङ्गिनी** *f.*, **मित्रं.**—(Husband) **भर्त्ता** *m.* (र्तृ), **स्वामी** *m.* (न्), **पतिः** *m.*—(Wife) **स्त्री, वधूः** *f.*, **पत्नी, भार्य्या, जाया, वल्लभा, प्रिया, दयिता, प्रियतमा.**—(The male or female of animals which associate for propagation) **सहचरः** *m.* **-री** *f.* In poetry the above words for husband and wife are used in this sense: 'the elephant's mate,' **करिणी** *f.*, **हस्तिनी** *f.*—(An assistant) **सहकारी** *m.* **-रिणी** *f.* (न्), **सहायः**; 'in a ship,' **नौपतिसहायः.**

To MATE, *v. a.* *See To* MATCH, *v. a.*

MATER-FAMILIAS, *s.* **कुटुम्बिनी** *f.*, **गृहिणी, गेहिनी, स्वामिनी, कौटुम्बिकी.**

MATERIAL, *a.* (Consisting of matter, not spiritual) **भौतिकः -की -कं, आधिभौतिकः -की -कं, भूतात्मकः -का -कं, भूतमयः -यी -यं, पाञ्चभौतिकः -की -कं, पञ्चभूतात्मकः -का -कं, अनात्मीयः -या -यं, अनात्मिकः -की -कं, अपारमार्थिकः -की -कं, मूर्त्तिमान् -मती -मत्** (त्), **मूर्त्तः -र्त्ता -र्त्तं, द्रव्यमयः -यी -यं, विषयात्मकः -का -कं, प्राकृतिकः -की -कं,**

प्राकृतः -ती -तं, घनः -ना -नं; 'the material world,' भूतसृष्टिः *f.*, भूतसर्गः, भूतसंसारः; 'material universe,' ब्रह्माण्डः -ण्डं; 'material body,' स्थूलशरीरं.—(Substantial) वास्तविकः -की -कं, वास्तवः -वी -वं, सारवान् -वती &c., मूर्त्तिमान् &c., घनः -ना -नं.—(Important) गुरुः -र्वी -रु, गुर्व्वर्थः -र्था -र्थं, गुरुप्रभावः -वा -वं, परमार्थः -र्था -र्थं, अलघुः -घुः -घु, मुख्यः -ख्या -ख्यं, आवश्यकः -की -कं, प्रधान in comp.; 'material cause,' उपादानं, उपादानकारणं, समवायिकारणं.

MATERIAL, *s.* साधनं, उपकरणं, द्रव्यं, साधनद्रव्यं, पदार्थः, वस्तु *n.*, मूर्त्तिः *f.*, सारः, घनः, मात्रा; 'materials, collectively,' साधनं -नानि *n. pl.* सामग्र्यं -ग्री, द्रव्यसामग्र्यं, सम्भारः, द्रव्यसम्भारः, उपकरणसम्भारः, सज्जा, परिच्छदः; 'writing-materials,' लेखसाधनं, लिपिसज्जा; 'the material of cloth,' वस्त्रयोनिः *f.*

MATERIALISM, *s.* देहात्मवादः, अनात्मवादः, अनात्ममतं, लोकायतं, चार्वाकमतं.

MATERIALIST, *s.* देहात्मवादी *m.* (न्), अनात्मवादी *m.*, लौकायतिकः, लोकायतिकः, विषयी *m.* (न्), विषयायी *m.* (न्), चार्वाकमतावलम्बी *m.* (न्), चार्वाकमतधारी *m.*

MATERIALITY, *s.* भौतिकत्वं, आधिभौतिकत्वं, मूर्त्तिमत्त्वं, अनात्मिकत्वं.

MATERIALLY, *adv.* वस्तुतस्, अर्थतस्, सारतस्, प्रकृतितस्, पदार्थतस्, तत्त्वतस्, अवश्यं, विशेषतस्.

MATERIALNESS, *s.* *See* MATERIALITY. (Importance) गौरवं, गुरुत्वं.

MATERNAL, *a.* मातृकः -की -कं, मातृसम्बन्धी -न्धिनी -न्धि (न्), मातृयोग्यः -ग्या -ग्यं, मातृधर्म्मकः -का -कं; 'maternal affection,' अपत्यस्नेहः, वात्सल्यं; 'maternal duty,' मातृधर्म्मः.

MATERNITY, *s.* मातृत्वं -ता, मातृभावः, मातृकत्वं, मातृधर्म्मः, जननीत्वं.

MATHEMATIC, MATHEMATICAL, *a.* (Relating to mathematics) गणितसम्बन्धी -न्धिनी -न्धि (न्), गणितविषयः -या -यं, गणितविद्यासम्बन्धी &c., संख्यापरिमाणविद्यासम्बन्धी &c., रेखावीजादिगणितविषयः -या -यं.—(According to the principles of mathematics) गणिततत्त्वानुसारी -रिणी &c., गणितानुरूपः -पा -पं, गणितविद्यानुसारी &c.

MATHEMATICALLY, *adv.* गणितविद्यानुसारेण, गणितानुरूपेण, गणितशास्त्रवत्.

MATHEMATICIAN, *s.* गणितविद्याज्ञः, संख्यापरिमाणविद्याज्ञः, रेखावीजादिगणितविद् *m.*, गणितशास्त्रज्ञः, क्षेत्रपरिमापकविद्यावान् *m.* (त्), गणनाविद्याज्ञः, गणितज्ञः.

MATHEMATICS, *s. pl.* गणितं, गणितविद्या, संख्यापरिमाणविद्या, गणनाविद्या, रेखावीजादिगणितं, रेखावीजादिगणितविद्या, पाटीवीजादिगणितविद्या, रेखादिगणितं, वीजादिगणितं, गणितशास्त्रं, वीजादिगणितशास्त्रं, क्षेत्रादिपरिमाणविद्या, मानविद्या.

MATIN, *a.* (Relating to the morning) प्रातःकालिकः -की -कं, प्रातःकालीनः -ना -नं, औषसिकः -की -कं, प्रगेतनः -नी -नं, वैयुष्टः -ष्टी -ष्टं.

MATINS, *s. pl.* प्रातःकृत्यं, प्रातर्भजनं, प्रातःस्मरणं, प्रातःपूजा.

MATRICE, *s.* (Womb) गर्भाशयः, योनिः *m. f.*, गर्भकोशः, जरायुः *m.*—(Of a type) मुद्राक्षरसंस्कारः, मुद्राक्षरगर्भः, मुद्राक्षराकारः.

MATRICIDE, *s.* (The act) मातृहत्या, मातृवधः, मातृघातः, जननीवधः.—(The killer) मातृहन्ता *m.* (तृ), मातृहा *m.* (न्), मातृघातुकः, मातृघातकः, मातृघाती *m.* (न्), मातृघ्नः.

To MATRICULATE, *v. a.* संस्कारपूर्व्वं or नामाभिलिखनपूर्व्वं विद्यालयं प्रविश् (c. 10. -वेशयति -यितुं).

MATRICULATED, *p. p.* संस्कारपूर्व्वं विद्यालयप्रवेशितः -ता -तं.

MATRICULATION, *s.* संस्कारपूर्व्वं or नामाभिलेखनपूर्व्वं विद्यालयप्रवेशनं.

MATRIMONIAL, *a.* वैवाहिकः -की -कं, उद्वाहिकः -का -कं, औद्वाहिकः -की -कं, उद्वाही -हिनी -हि (न्), विवाही &c., विवाहसम्बन्धी -न्धिनी &c., पाणिग्रहणिकः -की -कं.

MATRIMONIALLY, *adv.* विवाहनियमानुसारेण, विवाहरीत्यनुरूपेण, विवाहविधिवत्.

MATRIMONY, *s.* विवाहः, उद्वाहः, परिणयः, पाणिग्रहः -हणं, पाणिग्राहः, उपयमः, उपयामः, विवाहावस्था, विवाहितावस्था.

MATRIX, *s.* गर्भाशयः, गर्भकोशः, योनिः *m. f.* *See* MATRICE.

MATRON, *s.* कुटुम्बिनी, गृहिणी, गेहिनी, कौटुम्बिकी, जननी, मध्यमवयस्का, पुत्रवती, प्रजावती, पुत्रिणी, सुतिनी, पतिपुत्रवती, प्रौढा, प्रौढस्त्री, वीरा, पुरन्ध्री -न्ध्रिः *f.*, त्रयी, विज्ञाता.

MATRONLY, *a.* कुटुम्बिनीयोग्यः -ग्या -ग्यं, पुरन्ध्रियोग्यः &c., गृहिणीयोग्यः &c., पुत्रिणीयोग्यः &c., गम्भीरा, धीरा, मध्यमवयस्का.

MATTED, *p. p.* or *a.* (Laid with mats) कटी -टिनी -टि (न्), कटास्तीर्णः -र्णा -र्णं; 'matted hair,' जटा, सटा, जटिः, जुटकं, जूटः; 'having matted hair,' जटी -टिनी &c., जटिलः -ला -लं, जटावान् -वती -वत् (त्).

MATTER, *s.* (Body, substance, not spirit, that which is visible) मूर्त्तिः *f.*, वस्तु *n.*, द्रव्यं, अनात्मद्रव्यं, अनात्मा, अनात्मीयवस्तु *n.*, अनात्मिकवस्तु *n.*, भूतात्मकवस्तु *n.*, पाञ्चभौतिकवस्तु *n.*, मूर्त्तिमद्वस्तु *n.*, साकारवस्तु *n.*, घनवस्तु *n.*, घनद्रव्यं, घनः, दृश्यस्पृश्यवस्तु *n.*, सारः, विषयः, शरीरं.—(Cause of the material world or substratum of the universe) प्रकृतिः *f.*, प्रधानं, माया.—(Material cause, materials, that of which any thing is composed) साधनं, साधनवस्तु *n.*, साधनभूतवस्तु, प्रकृतिः *f.*, सारः, उपकरणं, कारणं, उपादानं, उपादानकारणं.—(Thing) द्रव्यं, वस्तु *n.*, अर्थः, पदार्थः.—(Subject) विषयः, प्रकरणं, वस्तु *n.*, अर्थः, पदं, प्रस्तावः, प्रसङ्गः, सारः, वृत्तान्तः, विधिः *m.*, आस्पदं; 'matter in hand,' प्रस्तुतं; 'an important matter,' परमार्थः, गुर्व्वर्थः; 'an unimportant matter,' लघ्वर्थः, लघुविषयः, अल्पविषयः, स्वल्पविषयः; 'matter of dispute,' विवादास्पदं, विवादविषयः, वादविषयः; 'what is the matter?' को वृत्तान्तः.—(Cause) प्रयोजनं, हेतुः *m.*, प्रयोगः, कारणं.—(Import, consequence) अर्थः, गौरवं, गुरुत्वं, प्रभावः; 'of no matter,' अनर्थकः -का -कं, निरर्थकः -का -कं, निष्प्रभावः -वा -वं, अगुरुः -र्वी -रु.—(Business, affair) कर्म्म *n.* (न्), कार्य्यं, विषयः, व्यापारः, अर्थः, प्रयोगः.—(Pus, purulent matter) पूयं, पूयरक्तं, पूयशोणितं, दूष्यं, मलजं, क्षतजं, प्रसितं, अवक्लेदः.

To MATTER, *v. n.* (Be of importance) expressed by अर्थ in comp. or प्रभाव in comp.; as, 'it matters not,' निरर्थकं or अनर्थकं भवति; 'to matter but little,' लघ्वर्थः -र्था -र्थं or अल्पार्थः -र्था -र्थं or लघुप्रभावः -वा -वं भू; 'to matter greatly,' गुर्व्वर्थः -र्था -र्थं or गुरुप्रभावः -वा -वं भू, प्रभू.—(Form purulent matter) पूय् (c. 1. पूयते -यितुं), सपूयः -या -यं भू, पूयपूर्णः -र्णा -र्णं भू, पूयगर्भः -र्भा -र्भं भू.

MATTERY, *a.* (Purulent) पूययुक्तः -क्ता -क्तं, सपूयः -या -यं, पूयपूर्णः -र्णा -र्णं, पूयगर्भः -र्भा -र्भं, पूयस्रावी -विणी -वि (न्), पूयविशिष्टः -ष्टा -ष्टं.

MATTOCK, *s.* खनित्रं, खात्रं, शैलभित्तिः *f.*, पाषाणदारणः, टङ्कः, खनहननी.

MATTRESS, *s.* तूलिका, तूला -ली, आस्तरणं, वीरपट्टी, तूलादिनिर्म्मितम् आस्तरणं, आस्तरः, प्रस्तरः, संस्तरः, स्तरिमा *m.* (न्), शयनीयं.

To MATURATE, *v. a.* पच् (c. 1. पचति, पक्तुं, c. 10. पाचयति -यितुं), पाकं कृ or जन् (c. 10. जनयति -यितुं), सपूयं -यां कृ.

To MATURATE, *v. n.* पक्कः -क्का -क्कं भू, परिपक्वीभू, पूयपूर्णः -र्णा -र्णं भू.

सपूयः -या -यं भू, पूयगर्भः -र्भा -र्भं भू, पूय् (c. 1. पूयते -यितुं).

Maturation, *s.* पाकः, परिपाकः, विपाकः, पचनं, पक्वता, परिपक्वता, पाचा -चिका, पचा, पूयत्वं, सपूयत्वं, पूयपूर्णता, पूयसंस्रावः, पूयस्रावः.

Maturative, *a.* पाकलः -ला -लं, पाचलः -ला -लं, पाचनः -ना -नं, पचिष्णुः -ष्णुः -ष्णु, उत्पचिष्णुः &c., पक्तृगुः &c., पाककरः -रा -रं, पाकजनकः -का -कं, पूयजनकः -का -कं.

Mature, *a.* पक्वः -क्वा -क्वं, सुपक्वः &c., परिपक्वः &c., पक्त्रिमः -मा -मं, विपक्त्रिमः -मा -मं, पाकिमः -मा -मं, पक्वतापन्नः -न्ना -न्नं, पक्वदशाप्राप्तः -प्ता -प्तं, पक्वदशापन्नः -न्ना -न्नं, परिणतः -ता -तं, पाकोन्मुखः -खा -खं, फलोन्मुखः -खा -खं; 'ready to drop,' विनाशोन्मुखः -खा -खं.—(Brought to perfection, complete) सम्पन्नः -न्ना -न्नं, सिद्धः -द्धा -द्धं, सम्पूर्णः -र्णा -र्णं, प्रौढः -ढा -ढं; 'mature deliberation,' सुसमीक्षा -क्षणं, सुविचारः -रणं.

To Mature, *v. a.* पच् (c. 1. पचति, पक्तुं, c. 10. पाचयति -यितुं), पक्वं -क्वां कृ, पक्वीकृ, परिपक्वं -क्वां कृ, परिपक्वीकृ, पाकं कृ or जन् (c. 10. जनयति -यितुं), पक्वतां or परिपाकं कृ or जन्, परिणामं कृ or जन्, सिद्धं -द्धां कृ, सिद्धीकृ, साध् (c. 10. साधयति -यितुं), सम्पन्नं -न्नां कृ, सम्पद् (c. 10. -पादयति -यितुं).

To Mature, *v. n.* पक्वः -क्वा -क्वं भू, परिपक्वः -क्वा -क्वं भू, पच् in pass. (पच्यते), परिपच्, पक्वतां or पक्वदशां or परिणामं या (c. 2. याति -तुं) or इ (c. 2. एति -तुं) or गम् (c. 1. गच्छति, गन्तुं), परिणतः -ता -तं भू, पाकोन्मुखः -खा -खं भू, सिद्धः -द्धा -द्धं भू, सम्पन्नः -न्ना -न्नं भू.

Matured, *p. p.* पक्वः -क्वा -क्वं, परिपक्वः -क्वा -क्वं, परिणतः -ता -तं, पक्वतापन्नः -न्ना -न्नं, सिद्धः -द्धा -द्धं, प्रौढः -ढा -ढं, सम्पन्नः -न्ना -न्नं, सम्पूर्णः -र्णा -र्णं.

Maturely, *adv.* सपाकं, सपरिणामं, परिपक्वं, सम्पन्नं, सम्पूर्णं.—(With full deliberation) सुसमीक्ष्य, सुविमृश्य, सुविचार्य्य.

Maturescent, *a.* पाकोन्मुखः -खा -खं, आपक्वः -क्वा -क्वं, परिणामोन्मुखः &c., पचतिकल्पः -ल्पा -ल्पं, पचतिदेशीयः -या -यं, पचतिदेश्यः -श्या -श्यं.

Maturity, Matureness, *s.* पाकः, परिपाकः, पक्वता, पक्तिः *f.*, परिपक्वता, विपाकः, सुपक्वता, सुपक्तिः, परिणतिः *f.*, परिणामः, परिणतता -त्वं, पक्वभावः, पक्वदशा, पक्वावस्था, परिणतावस्था, पचा, पाचा -चिका, प्रौढिः *f.*, प्रौढता, सिद्धता, सिद्धिः *f.*, सम्पन्नता, सम्पूर्णता.

Matutinal, Matutine, *a.* प्रातःकालीनः -ना -नं, प्रातःकालिकः -की -कं, औषिकः -की -कं, औषसः -सी -सं, उषस्यः -स्या -स्यं, प्रगेतनः -नी -नं, वैयुष्टः -ष्टी -ष्टं, प्राबोधिकः -की -कं, औदयिकः -की -कं, प्रातःकालसम्बन्धी -न्धिनी -न्धि (न्).

Maudlin, *a.* ईषन्मत्तः -त्ता -त्तं, मत्तकल्पः -ल्पा -ल्पं, मत्तदेशीयः -या -यं.

Maul, *s.* वृहन्मुद्गरः, काष्ठमुद्गरः, स्थूलमुद्गरः, घनः.

To Maul, *v. a.* स्थूलवेत्रेण तड् (c. 10. ताडयति -यितुं) or आहन् (c. 2. -हन्ति -न्तुं) or प्रहृ (c. 1. -हरति -हर्तुं), वेत्राघातं कृ, वेत्राघातेन क्षतविक्षतीकृ.

Mauled, *p. p.* वज्रादिप्रहारेण परिक्षतः -ता -तं or अतिक्षुण्णः -ण्णा -ण्णं.

Mausolean, *a.* चिताचूडकसम्बन्धी -न्धिनी -न्धि (न्), चैत्यसम्बन्धी &c.

Mausoleum, *s.* चिताचूडकं, चैत्यं, चित्यं, चैत्रः, समाधिः *m.*

Mauvaise-honte, *s.* सभाभीतिः *f.*, सभाकम्पः, जनभीतिः, लोकभीतिः, जनलज्जा.

Maw, *s.* पशूनां जठरः or उदरं.—(Of fowls) उपजठरः.

Mawkish, *a.* विरसः -सा -सं, नीरसः -सा -सं, अरसिकः -का -कं.

Mawkishly, *adv.* विरसं, वैरस्येन, सवैरस्यं, रसं विना, अरसिकं.

Mawkishness, *s.* विरसता -त्वं, वैरस्यं, अरसता, अरसिकत्वं, फल्गुता.

Maxillar, Maxillary, *a.* हनुसम्बन्धी -न्धिनी -न्धि (न्) हनु in comp.

Maxim, *s.* सूत्रं, वचनं, वाक्यं, तत्त्वं, विधिः *m.*, विधानं, नियमः, स्थितिः *f.* आदेशः, निदेशः, निर्देशः, कल्पः, न्यायः, नीतिः *f.*, क्रमः, चोदना, निगमः, सिद्धान्तः, मतं.

Maximum, *s.* उत्तमसंख्या, परमसंख्या, अधिकसंख्या, उत्तमपरिमाणं.

May, *s.* (The month) वैशाखोत्तरार्द्धं, ज्यैष्ठपूर्वार्द्धं, वैशाखः, माधवः, राधः, ज्यैष्ठः, शुक्रः, पञ्चममासः.

May, *v. auxil.* (Be possible) सम्भू, शक् in pass. (शक्यते), शक्यः -क्या -क्यं भू or expressed by the potential.—(Have liberty, be allowed) expressed by the potential; as, 'he may do that,' स तत् कुर्य्यात्. *See also* Permitted, Allowed, &c. (May be) स्यात्.

May-day, *s.* पूर्वोक्तपञ्चममासस्य प्रथमदिवसः.

May-pole, *s.* क्रीडादण्डविशेषो यत्परितो मण्डलनृत्यं क्रियते.

Mayor, *s.* नगराध्यक्षः, पुराध्यक्षः, नगराधिकारी *m.* (न्).

Mayoralty, *s.* नगराध्यक्षता -त्वं, पुराध्यक्षता, नगराधिकारः -रिता, नगराध्यक्षपदं, नगराध्यक्षाधिकारः.

Mayoress, *s.* नगराधिकारिणी, नगराध्यक्षस्त्री, नगराध्यक्षपत्नी.

Maze, *s.* (Labyrinth) गहनं, सुगहनस्थानं, दुर्निर्गमस्थानं, अशक्यनिर्गमः प्रदेशः, भ्रमजनकः प्रदेशः, दुर्गतिः *f.*—(Intricacy, perplexity) वक्रता, कौटिल्यं, विषमता, वैषम्यं, क्लिष्टता, काठिन्यं, दुःशोध्यता, व्यग्रता.

Mazy, *a.* गहनः -ना -नं, सुगहनः -ना -नं, दुर्निर्गमः -मा -मं, वक्रः -क्रा -क्रं, अतिवक्रः -क्रा -क्रं, भ्रमजनकः -का -कं, भ्रान्तिजनकः -का -कं, दुःशोध्यः -ध्या -ध्यं.

Me, *pron.* acc. c. मां; 'by me,' मया; 'to me,' मह्यं; 'of me,' मम.

Meacock, *s.* गेहशूरः, गेहनर्दी *m.* (न्), कापुरुषः, स्त्रीविधेयः.

Mead, *s.* मधु *n.*, मधुपानीयं, मधुनीरं, मधुपयस् *n.*

Mead, Meadow, *s.* क्षेत्रं, केदारः, यवसस्थानं, शाद्वलस्थानं, गोचरः, गोप्रचारः; 'meadow-grass,' यवसः, क्षेत्रियं; 'relating to a meadow,' केदारः -री -रं, क्षेत्रिकः -की -कं.

Meadowy, *a.* यवसमयः -यी -यं, यवसीयः -या -यं, शाद्वलः -ला -लं.

Meager, Meagre, *a.* कृशः -शा -शं, परिकृशः -शा -शं, कृशाङ्गः -ङ्गी -ङ्गं, क्षीणः -णा -णं, क्षीणशरीरः -रा -रं, क्षीणमांसः -सा -सं, शुष्कमांसः -सा -सं, शुष्काङ्गः &c., क्षामः -मा -मं, क्षामशरीरः &c., अपुष्टः -ष्टा -ष्टं, विपुष्टः -ष्टा -ष्टं, तनुः -नुः -न्वी -नु, वितनुः &c., प्रतनुः &c., शातः -ता -तं.—(Barren as soil) रूक्षः -क्षा -क्षं, वन्ध्यः -न्ध्या -न्ध्यं; 'a barren soil,' मरुस्थलं -ली.—(As style) विरसः -सा -सं, फल्गुः -ल्गुः -ल्गु.

Meagerly, *adv.* परिकृशं, सकार्श्यं, कार्श्येन, क्षीणतया, रूक्षं.

Meagerness, Meagreness, *s.* कृशता -त्वं, कार्श्यं, परिकृशता, कृशाङ्गता, क्षीणता, क्षामता, शरीरक्षीणता, मांसक्षीणता, शुष्कता, मांसशुष्कता, अपुष्टता, विपुष्टता, असमांसत्वं -ता, तनुता, शुष्काङ्गता, मांसहीनता, रूक्षता.

Meal, *s.* (Flour) शक्तुः *m.*, क्षोदः, पिष्टं, चूर्णं, गोधूमचूर्णं, गोधूमक्षोदः, अपूपः, क्षोदितं, गुण्डिकः -का, समीदः; 'barley-meal,' यवक्षोदः.—(Repast) आहारः, भोजनं, भक्षणं, भक्षिका, अशनं, प्राशनं, अभ्याहारः, अन्नं; 'good meal,' सुभोजनं, इच्छाभोजनं; 'poor meal,' कुभोजनं; 'light meal,' लघ्वाहारः, अल्पाहारः, फलाहारः; 'morning meal,' प्रातर्भोजनं, प्रातरशनं, प्रातराशः; 'meal at noon,' माध्याह्निकं; 'at night, रात्रिभोजनं; 'meal supplied by another,' परान्नं; 'row or party at a meal,' पंक्तिः *f.*; 'to make a meal,' आहारं कृ, भोजनं कृ; 'one who has made a meal,' कृताहारः -रा -रं, कृतभोजनः -ना -नं; 'making one's meals at irregular hours,' विषमभोजनं; 'meal-time,' भोजनकालः, अन्नकालः.

Mealiness, *s.* सचूर्णता -त्वं, क्षोदितत्वं, कोमलता, शक्तुपूर्णता, मृदुता.

Mealman, *s.* शक्तुविक्रयी *m.* (न्), चूर्णविक्रेता *m.* (तृ), क्षोदविक्रयोपजीवी *m.*

Mealy, *a.* चूर्णमयः -यी -यं, क्षोदमयः -यी -यं, सचूर्णः -र्णा -र्णं, शक्तुपूर्णः -र्णा -र्णं, कोमलः -ला -लं, मृदुलः -ला -लं, मसृणः -णा -णं.

Mealy-mouthed, *a.* मृदुभाषी -षिणी -षि (न्), कोमलमुखः -खी -खं, मृदुमुखः &c.

Mean, *a.* (Base, low-minded) नीचः -चा -चं, दीनः -ना -नं, कृपणः -णा -णं, अपकृष्टः -ष्टा -ष्टं, निकृष्टः -ष्टा -ष्टं, कुत्सितः -ता -तं, क्षुद्रः -द्रा -द्रं, तुच्छः -च्छा -च्छं, हीनः -ना -नं, कदर्य्यः -र्य्या -र्य्यं, अनार्य्यः &c., जघन्यः -न्या -न्यं, खलः -ला -लं, दुष्टः -ष्टा -ष्टं, अधमः -मा -मं, प्राकृतः -ती -तं, पामरः -री -रं, अधमवृत्तिः -त्तिः -त्ति, जघन्यवृत्तिः &c., दीनवृत्तिः &c., पामरवृत्तिः &c., हीनवृत्तिः &c., कृपणबुद्धिः -द्धिः -द्धि, कु or का prefixed, as, 'a mean man,' कुपुरुषः, कापुरुषः.—(Low in rank or birth,' हीनजातिः -तिः -ति, अधमजातिः &c., अधमजातीयः -या -यं, अन्त्यजातीयः -या -यं, जघन्यजातिः &c., नीचजातिः &c., अकुलीनः -ना -नं, अकुलः -ला -लं, दुष्कुलीनः -ना -नं, अधमवर्णजातः -ता -तं.—(Contemptible, worthless,) गर्ह्यः -र्ह्या -र्ह्यं, गर्हितः -ता -तं, कुत्सितः -ता -तं, तुच्छः -च्छा -च्छं, निर्गुणः -णा -णं, तृणप्रायः -या -यं, क्षुल्लकः -का -कं, लघुः -घुः -घ्वी -घु, लघुप्रभावः -वा -वं.—(Middle, moderate in size) मध्यः -ध्या -ध्यं, मध्यमः -मा -मं, मध्यपरिमाणः -णा -णं, मध्यमप्रमाणः -णा -णं, न स्थूलो न सूक्ष्मः &c.—(Intermediate, intervening) मध्यः &c., मध्यमः &c., मध्यस्थः -स्था -स्थं, मध्यस्थितः -ता -तं, मध्यवर्त्ती -र्त्तिनी -र्त्ति (न्), अन्तर्गतः -ता -तं, व्यवहितः -ता -तं; 'in the mean time,' अनन्तरं -रे, तदनन्तरं, अत्रान्तरे, इतोमध्ये.—(In geometry or mathematics) मध्यः &c., मध्यमः &c., समः -मा -मं; 'mean anomaly,' मध्यकेन्द्रं; 'mean motion of a planet,' मध्यमगतिः *f.*

Mean, *s.* (Middle place, middle rate, medium) मध्यता -त्वं, समता, साम्यं, मध्यमपरिमाणं, सामान्यपरिमाणं, समपरिमाणं, सामान्यपक्षः, समपक्षः.—(Intervening time) मध्यकालः, अभ्यन्तरकालः, अन्तरकालः, कालान्तरं, कालाभ्यन्तरं, अन्तरं, अन्तर्गतकालः, मध्यान्तरं, मध्यावसरः, मध्यावधिः *m.*, अवधिः *m.*—(In geometry, &c.) समं, मध्यं.—(Instrument, means or medium through which any thing is done) साधनं, उपायः, कारणं, उपकरणं, करणं, द्वारं, द्वार् *f.*, अभ्युपायः, हेतुः *m.*, विधानं, कर्म्मसाधनं, कार्य्यसाधकं, कार्य्यसाधनं, सम्भवः, अङ्गं, उपचारः, योगः, गतिः *f.*, उपपत्तिः *f.*, साहाय्यं, साधनसामग्री -ग्र्यं, सामग्री, साहित्यं; 'by means of,' उपायेन, द्वारेण, द्वारा, हेतुना, हेतोः, कारणेन; 'by means of a lever,' उत्तोलनदण्डोपायेन or उत्तोलनदण्डद्वारेण -द्वारा; 'by lawful means,' धर्म्मोपायेन, धर्म्मोपायैः or expressed by the indecl. part.; as, 'by means of numerous experiments,' अनेकवारं परीक्ष्य; 'means of subsistence,' जीवनोपायः, जीवनहेतुः *m.*, उपजीवकं -विका, उपजीवनं; 'by all means, in all ways,' सर्व्वथा, सर्व्वथैव, सर्व्वप्रकारेण; 'by all means, certainly,' अवश्यं, अवश्यमेव; 'by any means,' कथमपि, कथञ्चन, कथञ्चित्, यथाकथञ्चित्, कथं कथमपि; 'by no means,' न कथञ्चन, न कथञ्चित्.—(Means, resources, income) विभवः, द्रव्यं, धनं, अर्थः, आयः, आगमः, धनागमः, सम्भवः, शक्तिः *f.*, बलं, सामर्थ्यं; 'according to one's means,' यथाविभवं, यथासम्भवं, यथाशक्ति, यथासामर्थ्यं; 'having small means,' अल्पधनः -ना -नं, अल्पविभवः -वा -वं.

To mean, *v. a.* (Intend) अभिप्रे (c. 2. अभिप्रैति -तुं, rt. इ), अभिप्रायं कृ, उद्दिश् (c. 6. -दिशति -देष्टुं), मनसा उद्दिश्, अभिसन्धा (c. 3. -दधाति -धातुं), इष् (c. 6. इच्छति, एषितुं), उपलक्ष् (c. 10. -लक्षयति -यितुं) or expressed by the des. form of a verb; as, 'to mean to do,' कृ in des. (चिकीर्षति -र्षितुं); 'to mean to go,' गम् in des. (जिगमिषति -षितुं); 'to mean to say,' वच् in des. (विवक्षति -क्षितुं), or by काम with the infin.; as, 'what do you mean to say?' किं वक्तुकामो ऽसि; 'what do you mean to do?' किं कर्त्तुकामो ऽसि; 'where do you mean to go?' कुत्र गन्तुकामो ऽसि.—(Signify, indicate) सूच् (c. 10. सूचयति -यितुं), उद्दिश्, निर्दिश्, बुध् (c. 10. बोधयति -यितुं), उद्बुध्.

To mean, *v. n.* (Have meaning) अर्थवान् -वती -वद् भू, सार्थः -र्था -र्थं भू, वच् in des. (विवक्षति -क्षितुं), अर्थं सूच् (c. 10. सूचयति -यितुं) or expressed by अर्थ *i.e.* signification, meaning) in comp.: as, 'a speech that means to convey censure,' निन्दार्थो वादः.

Meander, *s.* वक्रता, वक्रगतिः *f.*, वक्रिमा *m.* (न्), जिह्मता, जैह्म्यं, जिह्मगतिः *f.*, कुटिलता, कौटिल्यं, कुटिलगतिः *f.*, तिर्य्यक्त्वं, तिर्य्यग्गतिः *f.*, असमानगतिः, विसर्पणं, सर्पः -र्पणं, सर्पगतिः *f.*; 'of a river's bank,' रोधोवक्रता.

To meander, *v. n.* विसृप् (c. 1. -सर्पति -सर्प्तुं), विसर्पणं कृ, वक्रं or जिह्मं गम् (c. 1. गच्छति, गन्तुं), कुटिलं or तिर्य्यग् या (c. 2. याति -तुं), सर्पवद् या.

Meandering, *part.* or *a.* वक्रः -क्रा -क्रं, वक्रिमः -मा -मं, वक्रगतिः -तिः -ति, वक्रगामी -मिनी -मि (न्), जिह्मः -ह्मा -ह्मं, जिह्मगतिः &c., जिह्मगामी &c., कुटिलः -ला -लं, कुटिलगतिः &c., कुटिलगामी &c., तिर्य्यङ् तिरश्ची तिर्य्यक् (च्), तिर्य्यग्गतिः &c., तिर्य्यग्गामी &c., विसर्पी -र्पिणी &c., सर्पगतिः &c., वक्रतीरः -रा -रं, वक्ररोधाः -धाः -धः (स्), असमानगतिः &c., विषमगतिः &c.

Meaning, *s.* (Intention) अभिप्रायः, अभिप्रेतं, आशयः, उद्देशः, आकांक्षा, अर्थः, तात्पर्य्यं, आकूतं, इच्छा, छन्दः, छन्दस् *n.*, सङ्कल्पः, बुद्धिः *f.*, मतिः *f.*, मतं, इङ्गितं, उपलक्षितं, हृदयं, भावः.—(What is intended to be said) विवक्षितं, विवक्षा.—(Sense, signification) अर्थः, अभिप्रायः, विवक्षितं, विवक्षा, आकांक्षा, छन्दस् *n.*, विषयः; 'meaning or force of a word,' पदार्थः, भावार्थः, शक्तिः *f.*, विग्रहः; 'original meaning,' मुख्यार्थः, मुख्यत्वं, मूलार्थः; 'literal meaning,' अवयवार्थः, पदार्थः; 'metaphorical meaning,' गौणार्थः, गौणत्वं; 'latent or hidden meaning,' मर्म्म *n.* (न्), अन्तर्गर्भः; 'deep in meaning,' गूढार्थः -र्था -र्थं, निगूढार्थः -र्था -र्थं, गुर्वर्थगह्वरः -रा -रं; 'having little meaning,' अल्पार्थः -र्था -र्थं, अल्पविषयः -या -यं,

Meaning, *part.* or *a.* अभिप्रेत्य, उद्दिश्य, अभिसन्धाय.—(Significant) अर्थवान् -वती -वत् (त्), सार्थः -र्था -र्थं, पूर्णार्थः -र्था -र्थं, अर्थान्वितः -ता -तं, साकूतः -ता -तं, उद्बोधकः -का -कं, वाचकः -का -कं.

Meaningless, *a.* अर्थहीनः -ना -नं, निरर्थकः -का -कं, अनर्थकः -का -कं.

Meaningly, *adv.* सार्थं, साकूतं, अर्थवत्, पूर्णार्थतस्, गुर्वर्थतस्.

Meanly, *adv.* (Poorly, in a low way) कृपणं, कार्पण्येन, सकार्पण्यं, कुत्सितं, दीनं, सदैन्यं, अपकृष्टं, निकृष्टं, कृपणवत्, निकृष्टवत्, खलवत्, अधमवत्, अधमप्रकारेण, जघन्यवत्, तुच्छवत्, कदर्य्यवत्, अनार्य्यवत्; 'meanly born,' हीनजातिः -तिः -ति, अधमजातिः &c. (Moderately) परिमितं, अभृशं.—(Contemptuously) सावमानं, अनादरेण, सलाघवं, लाघवेन, लघु.

Meanness, *s.* (Baseness, lowness) कृपणता -त्वं, कार्पण्यं, दीनता -त्वं.

दैन्यं, अपकृष्टता, निकृष्टता, नीचता, क्षुद्रता, अधमता, हीनता, तुच्छता, कदर्य्यता, अनार्य्यता, जघन्यता, खलता, दुष्टता, पामरता, अधमवृत्तिता, हीनवृत्तित्वं, मनोहीनता, बुद्धिकार्पण्यं, कृपणबुद्धित्वं, अनुदारता; 'of birth,' हीनजातित्वं, अधमजातित्वं, अकुलीनता, दुष्कुलीनता.—(Contemptibleness) गर्ह्यता, तुच्छत्वं, लघुता, लाघवं, कुत्सितत्वं, निर्गुणता.

MEAN-SPIRITED, *a.* कृपणबुद्धिः -द्धिः -द्धि, कृपणमतिः &c., दीनबुद्धिः &c.

MEANS, *s. pl.* (Resources) विभवः.—(Instrument) साधनं, उपायः. *See* MEAN, *s.*

MEANT, *p.p.* अभिप्रेतः -ता -तं, उद्दिष्टः -ष्टा -ष्टं, विवक्षितः -ता -तं.

MEANWHILE, *adv.* अनन्तरं -रे, तदनन्तरं, अत्रान्तरे, इतोमध्ये, अतोमध्ये, मध्यकाले, अभ्यन्तरकाले, यावत्.

MEASLED, *a.* वक्ष्यमाणरोगग्रस्तः -स्ता -स्तं, गोयरोपहतः -ता -तं.

MEASLES, *s. pl.* रक्तस्फोटोत्पत्तिलक्षितो रोगविशेषः. The Mahrattí words गोवरः, and शुभा, may perhaps be used.

MEASURABLE, *a.* मेयः -या -यं, प्रमेयः -या -यं, परिमेयः -या -यं, मापनीयः -या -यं, माप्यः -प्या -प्यं, मातव्यः -व्या -व्यं, परिमाणयोग्यः -ग्या -ग्यं.

MEASURE, *s.* मानं, प्रमाणं, परिमाणं, मात्रं, पोतुः *m.*, पोतवं, पौतवं, द्रुवयं, पाय्यं, 'of short measure,' अल्पप्रमाणः -णा -णं; 'measure of capacity,' प्रतीमाणं, प्रस्थः; 'of weight,' तुलामानं; 'of length,' अङ्गुलिमानं; 'of time,' कालपरिमाणं. The following are some of the measures of capacity: मुष्टिः *m.* = a handful, कुञ्चिः *f.* = 8 handfuls, कुडवः = 12 handfuls, प्रस्थः = 48 handfuls or 4 kudavas, आढकः = 4 prasthas, द्रोणः = 4 ádhakas, खारी = 16 dronas, कुम्भः = 20 dronas, वाहः = 10 kumbhas, निकुञ्चकः = ¼ of a kudava, गोष्पदं = the measure of a cow's foot. The following are measures of weight: रक्तिका or रतिः = 2¼ grains, गुञ्जा = $2\frac{3}{16}$ grains, or ⅛ of a másha, काकिणी = ¼ of a masha, माषः = 17 grains, पलं = 2 máshas, धरणः -णं = 10 palas, कर्षः or अक्षः = 16 máshas or 280 grains troy, तोलः = 210 grains, तुला = 100 palas or 145 ounces troy, भारः = 2000 palas, आचितं = 10 bháras. The following are measures of length: यवः = 1 barley-corn, अङ्गुलः = 8 barley-corns, प्रादेशः = 10 angulas or the span of the thumb and forefinger, वितस्तिः *f.* or गोकर्णः = 12 angulas or the span of the thumb and little finger, रत्निः -त्नी *m. f.* = 18 angulas or a cubit measured from the elbow to the end of the closed fist, अरत्निः *m.* = 21 angulas or a cubit measured from the elbow to the tip of the little finger, हस्तः = 24 angulas or a cubit measured from the elbow to the tip of the middle finger, गजः = 2 cubits or between 2 and 3 feet, व्यामः = a fathom or 3½ hastas or the space between the tips of the fingers of either hand when the arms are extended, काकिणी = ¼ of a danda, दण्डः = a pole or 4 cubits, निवर्त्तनं = 200 square cubits or 20 rods, गोचर्म्म *n.* = a hide of land 300 feet long by 10 broad, क्रोशः = a kos or 4000 cubits, गव्यूतिः *m. f.* or गव्यूतं = 2 kos or 2000 dandas or 8000 cubits, योजनं = 4 kos. The following are measures of time, निमेषः or निमिषः = a twinkling of the eye, काष्ठा = 18 twinklings, कला = 30 kashthás or 8 seconds, क्षणः = 30 kalás or 4 minutes, दण्डः or घटिका = 6 kshanas or the 60th part of a day or 24 minutes, मुहूर्त्तः -र्त्तं = 12 kshanas or the

... a day or 30 muhúrtas, ... short measures of time, ... minute.—(Rule, standard by which any thing is measured) परिमाणं, प्रमाणं.—(Proportion) मानं, परिमाणं, प्रमाणं, मितिः *f.*, परिमितिः, तारतम्यं; 'according to measure,' प्रमाणतस्.—(Portion allotted) भागः, विभागः, अंशः.—(Degree) प्रमाणं, परिमाणं, पर्य्यन्तं, मात्रं; 'in some measure,' किञ्चित्, अल्पमात्रं, ईषत्.—(Limit) पर्य्यन्तं, अन्तः -न्तं, मर्य्यादा, सीमा; 'beyond measure,' अतिमात्रं, अतिमर्य्यादं, नितान्तं, अतिशयेन, अतीव, अति prefixed.—(Moderation) परिमितिः *f.*, परिमितता; 'in measure,' परिमितं.—(Quantity, measure of a vowel, &c.) मात्रा.—(Musical time) तालः, मात्रा; 'in musical measure,' स्वरबद्धः -द्धा -द्धं.—(Metre, measure of verse) छन्दः, छन्दस्, वृत्तं, वर्णवृत्तं, वेदः, पद्यं; 'false measure,' छन्दोभङ्गः.—(Means to an end, step) उपायः, उपचारः, साधनं, अभ्युपायः, योगः, प्रयोगः, युक्तिः *f.*, विधानं, क्रिया, कर्म्म *n.* (न्), कार्य्यं, कारणं, करणं; 'mild measures,' सामोपचारः, सौम्योपचारः, सामोपायः; the four measures of war are 'causing dissension,' भेदः; 'force of arms,' दण्डः; 'bribery,' दानं; 'conciliation,' साम *n.* (न्); 'to take measures,' उपायप्रयोगं कृ.—(Common measure in arithmetic, &c.) अपवर्त्तः; 'having no common measure,' निरपवर्त्तः -र्त्ता -र्त्तं.

To MEASURE, *v. a.* मा (c. 2. माति, c. 3. मिमीते, c. 4. मायते, मातुं, c. 10. मापयति -यितुं), प्रमा, परिमा, तुल् (c. 10. तुलयति -यितुं), तूल् (c. 10. तूलयति -यितुं), मापनं कृ, परिमाणं कृ.—(Ascertain the degree or extent) मानं or परिमाणं निरूप् (c. 10. -रूपयति -यितुं) or ज्ञा (c. 9. जानाति, ज्ञातुं) or परीक्ष् (c. 1. -ईक्षते -क्षितुं), परिमाणनिरूपणं कृ.—(Compute) गण् (c. 10. गणयति -यितुं), विगण्, प्रगण्. (Make a comparison of measurement) उपमा.—(Allot) विभज् (c. 1. -भजति -भक्तुं) or परिकॢप् (c. 10. -कल्पयति -यितुं).

To MEASURE, *v. n.* (Be of a certain extent or size) expressed by परिमाण or परिमित or मित in comp.; as, 'a line which measures eight inches,' अष्टाङ्गुलपरिमिता रेखा; 'to measure an inch,' अङ्गुलपरिमितः -ता -तं भू, अङ्गुलमितः -ता -तं भू, अङ्गुलपरिमाणः -णा -णं भू.

MEASURED, *p. p.* मितः -ता -तं, प्रमितः -ता -तं, परिमितः -ता -तं, सम्मितः -ता -तं, उन्मितः -ता -तं, मापितः -ता -तं.—(Uniform) समानः -ना -नं, समः -मा -मं, धीरः -रा -रं.—(In music) तालबद्धः -द्धा -द्धं.—(Limited) मितः -ता -तं, परिमितः -ता -तं, निबद्धः -द्धा -द्धं, नियतः -ता -तं.

MEASURELESS, *a.* अमेयः -या -यं, अपरिमेयः -या -यं, अप्रमेयः -या -यं, अमितः -ता -तं, अपरिमितः -ता -तं, अपरिमाणः -णा -णं.

MEASUREMENT, *s.* मापनं, परिमाणं, मितिः *f.*, परिमितिः *f.*, प्रमितिः *f.*, प्रमाणं, मानं, मानपरीक्षा, परिमाणपरीक्षा, माननिरूपणं, मापकरणं; 'rough measurement,' स्थूलमानं; 'exact measurement,' सूक्ष्ममानं.

MEASURER, *s.* मापकः, परिमापकः, मापनकर्त्ता *m.* (र्त्तृ), मापनकृत्, माननिरूपकः, परिमाणनिरूपकः, परिमाणपरीक्षकः.

MEASURING, *s.* मापनं; 'measuring-line,' प्रमाणसूत्रं; 'rod,' प्रमाणदण्डः.

MEAT, *s.* (Flesh) मांसं, खाद्यमांसं, मांसाहारः, आमिषं, आमिषाहारः; 'butcher's meat,' सौनं, शौनं, सौनिकं, शौनिकं.—(Food) अन्नं, भोजनं, आहारः, खाद्यं, भक्ष्यद्रव्यं, खाद्यद्रव्यं; 'meat and drink,'

अन्नोदकं, अन्नजलं, अन्नपानं; 'seller of meat,' मांसिकः, सौनिकः, शौनिकः, कौटिकः, वैतंसिकः.

MEAT-OFFERING, *s.* नैवेद्यं, अन्ननिवेदनं, अन्नोपहारः, अन्नोपहरणं.

MECHANIC, MECHANICAL, *a.* (Pertaining to machines) यान्त्रः -न्त्री -न्त्रं, यान्त्रिकः -की -कं, यन्त्री -न्त्रिणी -न्त्रि (न्), यन्त्रीयः -या -यं, यन्त्रसम्बन्धी -न्धिनी &c., यन्त्रविषयः -या -यं, शिल्पिकः -की -कं, शिल्पी -ल्पिनी &c., यन्त्रविद्यासम्बन्धी &c., शिल्पविद्यासम्बन्धी &c.—(Constructed or performed by the rules of mechanics) यन्त्रविद्यानुसारी -रिणी &c., यन्त्रशास्त्रानुरूपः -पा -पं, शिल्पशास्त्रानुसारी &c., यन्त्रशास्त्रसिद्धः -द्धा -द्धं, शिल्पविद्याकृतः -ता -तं, यन्त्रविद्यानद्धः &c., शिल्पविद्यानिर्मितः -ता -तं, यौक्तिकः -की -कं; 'mechanical art,' शिल्पं, कला.—(Skilful in mechanical art) यन्त्रविद्यानिपुणः, शिल्पविद्याज्ञः, शिल्पकर्म्मकुशलः.—(Employed in mechanical pursuits) शिल्पी *m.* (न्), शिल्पकर्म्मकारी *m.*, शिल्पजीवी *m.*, शिल्पोपजीवी *m.* (न्), शिल्पिकः.—(Moving like a machine) यन्त्रगतिकः -का -कं, यन्त्रगतिः -तिः -ति, यन्त्रप्रायः -या -यं, यन्त्रतुल्यः -ल्या -ल्यं.

MECHANIC, *s.* (Artisan) शिल्पी *m.* (न्), शिल्पकारः, शिल्पकर्म्मकारः, शिल्पिकः, शिल्पोपजीवी *m.* (न्), शिल्पकर्म्मोपजीवी *m.*, कर्म्मकारः, कर्म्मारः, कारुः *m.* -रुकः.

MECHANICALLY, *adv.* यन्त्रविद्यानुसारेण, शिल्पविद्यानुसारेण, यन्त्रशास्त्रानुरूपेण, शिल्पिकं, शिल्पवत्.—(By the mere laws of motion) यन्त्रगतिमात्रौपम्यात्, यन्त्रतुल्यगत्या, अबुद्धिपूर्व्वं, अमतिपूर्व्वं.

MECHANICIAN, *s.* यन्त्रविद्याज्ञः, शिल्पशास्त्रज्ञः, यन्त्रविद्यानिपुणः.

MECHANICS, *s.* यन्त्रविद्या, शिल्पविद्या, यन्त्रशास्त्रं, शिल्पशास्त्रं, शिल्पिशास्त्रं, यान्त्रं, गतिविद्या, यन्त्रगतिविद्या, यन्त्रनिर्व्वन्धः.

MECHANISM, *s.* (Construction of a machine) यन्त्ररचना, यन्त्रविधानं, कला, युक्तिः *f.* *See* MACHINERY. (Action of a machine) यन्त्रचेष्टा, यन्त्रगतिः *f*, यन्त्रक्रिया, यन्त्रव्यापारः; 'a piece of mechanism,' कारुजः.

MECHANIST, *s.* यन्त्रनिर्म्माता *m.* (तृ), यन्त्रकर्त्ता *m.*, यन्त्रविद्यानिपुणः.

MECONIUM, *s.* (Of poppies) खसखसरसः, खसखसनिर्यासः, खसखसस्रावः.—(First fæces of infants) सद्योजातबालकानां प्रथमोच्चारः.

MEDAL, *s.* मुद्रा, प्रतिमामुद्रा, कीर्त्तिमुद्रा, कीर्त्तिदमुद्रा, मानसूचकमुद्रा, निदर्शनमुद्रा.

MEDALIST, *s.* (Person skilled in medals) मुद्राविद्याज्ञः, मुद्राविद् *m.*, मुद्रापरीक्षकः.—(One who has gained a medal) कीर्त्तिमुद्राधारी *m.* (न्), कीर्त्तिमुद्रावान् *m.* (त्).

MEDALLION, *s.* प्राचीनकालिकमुद्रा, प्राचीनमुद्रा, महामुद्रा.

To MEDDLE, *v. n.* (Interfere or intrude officiously) परकार्य्याणि चर्च् (c. 1. चर्चति -र्च्चितुं), परव्यापारचर्च्चां कृ, परनियोगचर्च्चां कृ, पराधिकारचर्च्चां कृ, अनुपचारेण or अनधिकारपूर्व्वं परकार्य्याणि निरूप् (c. 10. -रूपयति -यितुं) or परकार्य्यनिरूपणं कृ or परकार्य्येषु व्यापृ in pass. (-प्रियते) or व्यापृतः -ता -तं भू, पराधिकारं प्रविश् (c. 6. -विशति -वेष्टुं), परकार्य्यप्रवेशं कृ, परव्यापारप्रवेशं कृ, चर्च्चां कृ.—(Have to do with) व्यापृ in pass., व्यापृतः -ता -तं भू.—(Handle) स्पृश् (c. 6. स्पृशति, स्प्रष्टुं).

MEDDLER, *s.* परकार्य्यचर्चकः, पराधिकारचर्चकः, पराधिकारप्रवेशकः, परकार्य्यनिरूपकः, परचेष्टानिरूपकः, परकार्य्यव्यापारी *m.* (न्), पराधिकारव्यापारी *m.*, परव्यापारात्मगामी *m.*

MEDDLESOME, *a.* पराधिकारचर्च्चाशीलः -ला -लं, परचेष्टानिरूपणशीलः &c.

MEDDLING, *a.* परकार्य्यचर्चकः -का -कं, परकार्य्यनिरूपकः -का -कं, पराधिकारप्रवेशकः -का -कं, पराधिकारव्यापारी -रिणी -रि (न्).

MEDDLING, *s.* पराधिकारचर्चा, अनधिकारचर्चा, पराधिकारप्रवेशः, परकार्य्यप्रवेशः, परव्यापारचर्चा, पराधिकारव्यापारः, परनियोगव्यापारः, परकार्य्यनिरूपणं, परचेष्टानिरूपणं, चर्चा.

To MEDIATE, *v. n.* मध्यस्थः -स्था -स्थं भू or अस्, मध्यवर्त्ती -र्त्तिनी -र्त्ति भू, माध्यस्थ्यं कृ, मध्ये वृत् (c. 1. वर्त्तते -र्त्तितुं) or स्था (c. 1. तिष्ठति, स्थातुं), मध्ये गम् (c. 1. गच्छति, गन्तुं), अन्तर्गम्.

To MEDIATE, *v. a.* माध्यस्थ्येन सन्धिं कृ or सन्धा (c. 3. -दधाति -धातुं).

MEDIATE, *a.* मध्यस्थः -स्था -स्थं -स्थायी -यिनी यि (न्), मध्यवर्त्ती -र्त्तिनी &c., मध्यः -ध्या -ध्यं, मध्यमः -मा -मं, अन्तर्गतः -ता -तं, अन्तर्वर्त्ती &c.

MEDIATELY, *adv.* अन्यद्वारेण, अन्यद्वारा, परद्वारेण, माध्यस्थ्येन, माध्यस्थेन, उपकरणद्वारेण, अनुरूपेण.

MEDIATION, *s.* माध्यस्थ्यं, माध्यस्थं, मध्यस्थत्वं -ता, मध्यवर्त्तित्वं, मध्यवर्त्तनं, मध्यस्थितिः *f.*, अन्तर्गमनं, अन्तरागमनं, अनुरूपं.

MEDIATOR, *s.* मध्यस्थः, मध्यवर्त्ती *m.* (न्), मध्यस्थायी *m.*, माध्यस्थः, मध्यस्थितः, चरपुरुषः.

MEDIATORIAL, *a.* मध्यस्थसम्बन्धी -न्धिनी -न्धि (न्), मध्यस्थविषयः -या -यं, माध्यस्थिकः -की -कं.

MEDIATORSHIP, *s.* मध्यस्थता -त्वं, माध्यस्थ्यं, मध्यस्थपदं, मध्यस्थाधिकारः, मध्यस्थकर्म्म *n.* (न्).

MEDICABLE, *a.* औषधोपचारसाध्यः -ध्या -ध्यं, वैद्योपचारसाध्यः &c., भेषजप्रयोगसाध्यः &c., औषधोपायसाध्यः &c., उपक्रमसाध्यः &c., वैद्योपक्रमसाध्यः &c., उपक्रमणीयः -या -यं, चिकित्स्यः -त्स्या -त्स्यं.

MEDICAL, *a.* वैद्यः -द्यी -द्यं, वैद्यकः -की -कं, वैद्यक्रियासम्बन्धी -न्धिनी न्धि (न्), वैद्यकसम्बन्धी &c., वैद्यकविषयः -या -यं, चिकित्सासम्बन्धी &c., औषधीयः -या -यं, औषधोपचारसम्बन्धी &c., भेषजप्रयोगसम्बन्धी &c., आयुर्वेदसम्बन्धी &c., आयुर्वेदी -दिनी &c., आयुर्वेदमयः -यी -यं, वैद्यशास्त्रीयः -या -यं; 'medical science,' वैद्यकशास्त्रं, वैद्यशास्त्रं, आयुर्वेदः -दं; 'medical treatment,' वैद्योपचारः, औषधोपचारः, भेषजोपचारः, औषधप्रयोगः, भेषजप्रयोगः; 'medical man,' वैद्यः, चिकित्सकः, चिकित्साजीवी *m.* आयुर्वेदी.

MEDICALLY, *adv.* वैद्यकशास्त्रानुसारेण, वैद्यकधर्म्मानुसारेण, वैद्यशास्त्रमुद्दिश्य, वैद्योपचारमुद्दिश्य, उपचारोद्देशेन.

MEDICAMENT, *s.* औषधं, भेषजं, भैषजं, भैषज्यं, अगदः, औषधीयद्रव्यं, भेषजद्रव्यं, द्रव्यं, आयुर्द्रव्यं, जायुः *m.*, जारी, जाली, जीवनः, तालिका.

MEDICASTER, *s.* मिथ्याचिकित्सकः, दुश्चिकित्सकः, छद्मवैद्यः, अशास्त्रवैद्यः.

To MEDICATE, *v. a.* (Impregnate with medicinal substances) औषधीकृ, औषधादिना मिश्र् (c. 10. मिश्रयति -यितुं) or संसृज् (c. 6. -सृजति -स्रष्टुं) or संस्कृ, औषधसंस्कृतं -तां कृ, औषधगुणकं -कां कृ, औषधगुणविशिष्टं -ष्टां कृ.—(Dose with drugs) औषधं दा, भेषजं दा, भिषज् (nom. भिषज्यति).

MEDICATED, *p. p.* औषधसंस्कृतः -ता -तं, औषधीयद्रव्यसंसृष्टः -ष्टा -ष्टं, औषधादिमिश्रितः -ता -तं.

MEDICATION, *s.* औषधसंस्कारः, औषधसंस्करणं, औषधीकरणं, औषधीयद्रव्यसंसर्गः, औषधीयद्रव्यमिश्रणं.

MEDICINAL, *a.* (Having healing properties) औषधीयः -या -यं, भैषजः -जी -जं, भेषजीयः -या -यं, औषधोपयोगी -गिनी -गि (न्), रोगान्तकः -का -कं, रोगशमकः -का -कं, रोगहरः -रा -रं, रोगहारी -रिणी &c., रोगघ्नः -घ्नी -घ्नं.—(Pertaining to medicine) औषधसम्बन्धी &c., भेषजसम्बन्धी &c.

MEDICINE, *s.* (Substance having the property of mitigating disease) औषधं, भेषजं, भैषजं, भेषज्यं, अगदः, औषधीयद्रव्यं, जायुः *m.*, रोगिवल्लभः; 'administering medicine,' औषधोपचारः, भेषजोपचारः, औषधप्रयोगः, भेषजप्रयोगः; 'mild medicines,' सामोपचारः, साम्योपचारः.—(The practice of medicine) वैद्योपचारः, चिकित्सा, उपचारः, उपचर्य्या, उपचार्य्यः, वैद्यक्रिया, उपक्रमः, वैद्योपक्रमः, रुक्प्रतिक्रिया, परासा.—(Science of medicine) वैद्यकं, आयुर्वेदः -दं; 'a treatise on medicine,' वैद्यकशास्त्रं, वैद्यशास्त्रं; 'a compounder of medicines,' योगविद् *m.*

MEDIEVAL, *a.* मध्यकालीनः -ना -नं, मध्यकालिकः -का -कं.

MEDIOCRE, MEDIOCRAL, *a.* मध्यमः -मा -मं, मध्यः -ध्या -ध्यं, मध्यमगुणः -णा -णं, मध्यमभावः -वा -वं, साधारणगुणः -णा -णं, अवरगुणः -णा -णं, अप्रधानगुणः -णा -णं, विगुणः -णा -णं, प्राकृतः -ती -तं.

MEDIOCRITY, *s.* मध्यमता, मध्यता, मध्यमभावः, मध्यमावस्था, मध्यमदशा, साधारण्यं, साधारणभावः, साधारणदशा, सामान्यता, मध्यममानं, मध्यमपक्षः.—(Moderation) परिमितता.

To MEDITATE, *v. n.* ध्यै (c. 1. ध्यायति, ध्यातुं), अनुध्यै, अभिध्यै, सन्ध्यै, प्रध्यै, चिन्त् (c. 10. चिन्तयति -यितुं), सञ्चिन्त्, विचिन्त्, भू (c. 10. भावयति -यितुं), सम्भू, विमृश् (c. 6. -मृशति -म्रष्टुं), मनसा विचर् (c. 10. -चारयति -यितुं), समाधा (c. 3. -धत्ते -धातुं), वितर्क् (c. 10. -तर्कयति -यितुं), ध्यानं कृ, अभिध्यानं कृ, अन्तर्ध्यानं कृ, चिन्तां कृ, चिन्तापरः -रा -रं भू, ध्यानपरः -रा -रं भू, विचारणां कृ, विवेचनं कृ.—(Intend) मनः कृ, बुद्धिं कृ, मतिं कृ. *See To* INTEND.

To MEDITATE, *v. a.* प्रचिन्त् (c. 10. -चिन्तयति -यितुं), परिचिन्त्, चिन्त्, मन्त्र् (c. 10. मन्त्रयति -यितुं), परिकॢप् (c. 10. -कल्पयति -यितुं), कॢप्, मनसा परिकॢप् or कल्पनां कृ; 'to meditate a plan,' उपायचिन्तां कृ, उपायकल्पनां कृ; 'to meditate doing,' कृ in des. (चिकीर्षति -र्षितुं). *See To* INTEND.

MEDITATED, *p. p.* ध्यातः -ता -तं, चिन्तितः -ता -तं, प्रचिन्तितः -ता -तं, भावितः -ता -तं, मनोगुप्तः -प्ता -प्तं, कल्पितः -ता -तं, परिकल्पितः -ता -तं, घटितः -ता -तं; 'being meditated upon,' ध्यायमानः -ना -नं, अभिध्यायमानः -ना -नं; 'to be meditated upon,' ध्येयः -या -यं, ध्यानीयः -या -यं, ध्यातव्यः -व्या -व्यं.

MEDITATION, *s.* ध्यानं, अभिध्यानं, आध्यानं, अन्तर्ध्यानं, समाधिः *m.*, समाधानं, चिन्ता, चिन्तनं, भावना, सम्भावनं -ना, ध्यानपरता, विचारणं -णा, विमर्शः, मनोगुप्तं, आत्मैकाग्रता, ध्याम *n.* (न्); 'religious and abstract meditation,' योगः, ध्यानयोगः, अन्तर्ध्यानं, समाधिः *m.*, समाधियोगः, समाधानं; 'considered as one of the five sacraments,' अयुतः; 'absorbed in meditation,' ध्याननिष्ठः -ष्ठा -ष्ठं, ध्यानस्थः -स्था -स्थं, ध्यानपरः -रा -रं, समाधिस्थः -स्था -स्थं, समाधिनिष्ठः &c., अधिरूढसमाधियोगः -गा -गं; 'posture suited to religious meditation,' ब्रह्मासनं.

MEDITATIVE, *a.* ध्यानशीलः -ला -लं, चिन्ताशीलः -ला -लं, ध्यानपरः -रा -रं, ध्यानतत्परः -रा -रं, चिन्तापरः -रा -रं, चिन्तापरायणः -णा -णं, चिन्तावान् -वती -वत् (त्), समाधिमान् -मती &c., ध्यानी -निनी -नि (न्), भावितात्मा -त्मा -त्म (न्), सचिन्तः -न्ता -न्तं, ध्यायन् -यन्ती -यत् (त्), ध्यानयुक्तः -क्ता -क्तं.

MEDITERRANEAN, MEDITERRANEOUS, *a.* (Inclosed with land) भूवेष्टितः -ता -तं, भूमिवेष्टितः -ता -तं, भूमध्यस्थः -स्था -स्थं, भूवलयितः -ता -तं, भूवलयाकृतः -ता -तं.—(Remote from the sea, inland) समुद्रदूरस्थः -स्था -स्थं, मध्यदेशीयः -या -यं, मध्यदेशस्थः -स्था -स्थं, समुद्रासमीपः -पा -पं.

MEDIUM, *s.* (Means, instrument) साधनं, द्वारं, द्वार् *f.*, अङ्गं, हेतुः *m.*, कारणं, करणं, निमित्तं -त्तकं, निमित्तकारणं, योगः, कर्म्मसाधनं.—(Channel, vehicle) मार्गः, पथः, वाहनं, द्वारं, अङ्गं; 'through the medium of the ear,' श्रवणमार्गेण, श्रुतिमार्गेण, श्रवणद्वारेण, श्रवणद्वारा; 'the medium by which medicine is administered,' भेषजाङ्गं; 'air is the medium of sound,' वायुः शब्दवाहनं or शब्दवाहकः.—(Instrumentality) कारणत्वं -ता, कारकत्वं, हेतुता, निमित्तत्वं, साधकत्वं, कर्तृत्वं, कर्त्तृकत्वं.—(Middle place, mean) मध्यता -त्वं, समता, साम्यं, मध्यमपक्षः, सामान्यपक्षः.

MEDLEY, *s.* सङ्करः, नानाद्रव्यसाङ्कर्य्यं, सन्निपातः, द्रव्यसङ्कुलं, नानाद्रव्यसन्निपातः, सङ्कीर्णद्रव्यसमूहः, प्रकीर्णद्रव्यसमूहः, प्रकीर्णकं, सङ्कीर्णकं, सम्मिश्रद्रव्यसन्निपातः, नानासम्मिश्रद्रव्यसमूहः, नानाद्रव्यसम्मिश्रणं.

MEDLEY, *a.* सान्निपातिकः -की -कं, सन्निपतितः -ता -तं, सङ्कीर्णः -र्णा -र्णं, प्रकीर्णः -र्णा -र्णं, सम्मिश्रः -श्रा -श्रं, अस्तव्यस्तः -स्ता -स्तं, क्षिप्तविक्षिप्तः -प्ता -प्तं, सङ्करीकृतः -ता -तं, नानाजातीयः -या -यं, सङ्करजातीयः -या -यं.

MEDULLAR, MEDULLARY, *a.* मज्जासम्बन्धी -न्धिनी -न्धि (न्), मेदोसम्बन्धी &c., मज्जामयः -यी -यं, अस्थिसारसम्बन्धी &c., मेदस्वी &c.

MEED, *s.* (Recompense) फलं, प्रतिफलं, प्रतिकृतिः *f.*, प्रतिक्रिया, पारितोषिकं.

MEEK, *a.* विनीतः -ता -तं, विनयी -यिनी -यि (न्), सौम्यः -म्या -म्यं, सौम्यवृत्तिः -त्तिः -त्ति, नम्रबुद्धिः -द्धिः -द्धि, नम्रवृत्तिः -त्तिः -त्ति, नम्रशीलः -ला -लं, नम्रचेताः -ताः -तः (स्), निर्विण्णः -ण्णा -ण्णं, निर्विण्णचेताः &c., मृदुस्वभावः -वा -वं, सविनयः -या -यं, सहनशीलः -ला -लं, विनतः -ता -तं, गर्व्वहीनः -ना -नं, दर्पहीनः -ना -नं, अगर्व्वः -र्व्वा -र्व्वं, निरहङ्कारः -रा -रं, दीनचेताः &c., अनुद्धतः -ता -तं, अनभिमानी -निनी &c., अनहङ्कारी &c., वश्यात्मा -त्मा -त्म (न्), वश्यः -श्या -श्यं, सुवश्यः &c.

MEEK-EYED, *a.* मृदुनेत्रः -त्रा -त्रं, मृदुलोचनः -ना -नं, सौम्यनेत्रः &c.

MEEKLY, *adv.* सविनयं, विनीतवत्, विनयात्, नम्रचेतसा, निर्विण्णचेतसा, नम्रं, विनम्रं, मृदुस्वभावेन, अगर्व्वेण, अनभिमानेन, अनहङ्कारेण, सनिर्वेदं, अनुद्धतं, सदैन्यं.

MEEKNESS, *s.* विनयः, विनीतता, विनीतिः *f.*, सौम्यता, नम्रता, निर्विण्णता, स्वभावमृदुता, बुद्धिनम्रता, नम्रशीलता, वश्यता, सुवश्यता, दीनता, दैन्यं, अगर्व्वः, गर्व्वहीनता, दर्पहीनता, अनभिमानं -नता, अनौद्धत्यं, माधुर्य्यं, शान्तिः *f.*, विनतिः, सहनशीलता.

MEET, *a.* (Proper, fit) युक्तः -क्ता -क्तं, उचितः -ता -तं, उपयुक्तः -क्ता -क्तं, योग्यः -ग्या -ग्यं, समञ्जसः -सा -सं, उपपन्नः -न्ना -न्नं, सङ्गतः -ता -तं.

To MEET, *v. a.* and *n.* (Come together, encounter) समागम् (c. 1. -गच्छति -गन्तुं), सङ्गम्, उपागम्, मिल् (c. 6. मिलति, मेलितुं), सम्मिल्, समे (c. 2. समैति -तुं, rt. इ), आसद् (c. 10. -सादयति -यितुं), समासद्, प्रतिमुखं or अभिमुखं गम् or या (c. 2. याति -तुं), अभिया, उपाया, सम्मुखीभू.—(Go to meet) प्रतिगम्, प्रत्युद्गम्, अभिगम्, प्रत्युद्या, अभिया, प्रत्याया, प्रतिव्रज् (c. 1. व्रजति -जितुं), प्रतिवृत् (c. 1. -वर्त्तते -र्त्तितुं), अभिवृत्, प्रत्युद्गमं कृ; 'gone to meet,' प्रत्युद्गतः -ता -तं.—(Rise to meet) प्रत्युत्था (c. 1. -तिष्ठति -स्थातुं, rt. स्था); 'risen to meet,' प्रत्युत्थितः -ता -तं; 'rising to meet,' प्रत्युत्थानं.—(Assemble) समागम्, सङ्गम्, मिल्, सम्मिल्, एकत्र मिल्, एकत्र गम् or आगम्, समे समभ्ये, समावृत्, समूहीभू.—(Encounter in a hostile manner) संयुध् (c. 4. -युध्यते -योद्धुं), युद्धं कृ, युद्धाय समुपागम्, समाघातं कृ, युद्धारम्भं कृ, रणाभियोगं.—(Meet with, find) आसद्, अधिगम्, प्राप् (c. 5. -आप्नोति -आप्तुं), सम्प्राप्, समाप्, अवाप्, आप्, लभ् (c. 1. लभते

लब्धुं), विद् (c. 6. विन्दति, वेदितुं), अभिविद्; 'hard to meet with,' दुरासदः -दा -दं, दुरधिगमः -मा -मं, दुरधिगम्यः -म्या -म्यं, दुष्प्रापः -पा -पं, दुष्प्राप्यः -प्या -प्यं, दुर्लभः -भा -भं.—(In age) उपगम्, उपागम्, गम्, आप्, प्राप्, इ, अनुभू; 'they met with their death,' विनाशम् उपगताः.—(Meet as waters) सङ्गम्, सम्प्लु (c. 1. -प्लवते -प्लोतुं), सम्भेदं कृ.

Meeting, *s.* (Coming together) सङ्गमः, समागमः, सङ्गः, सङ्गतिः *f.*, सङ्गतं, मिलनं, मेलनं, सम्मिलनं, सम्मेलनं, मेलकः, संयोगः, योगः, एकत्र मिलनं, एकत्र गमनं.—(Assembly, convention) सभा, समाजः, मेला, मेलः, मेलकः, संसद् *f.*, सदस् *n.*, परिषद्, समज्या, मनुष्यसभा, गोष्ठी, समितिः *f.*, आस्थानं -नी, लोकसंघः, जनसमागमः, जनमेला, मण्डलं, जनसमवायः, जनसमुदायः, जनसमूहः; 'dismissal of a meeting,' सभाविसर्जनं; 'person present at a meeting,' सभासद् *m.*, सभास्तारः, सभ्यः, सदस्यः.—(Confluence) सम्भेदः, सङ्गमः, सङ्गः.

Meeting-house, *s.* मनुष्यसभा, सभा, सभागृहं, सभास्थानं, सभामन्दिरं, समागमगृहं, समागमस्थानं.

Meetly, *adv.* यथायोग्यं, यथोचितं, युक्तं, उपयुक्तं, उचितं, यथार्हं.

Meetness, *s.* योग्यता, युक्तता, उपयुक्तता, उचितत्वं, औचित्यं.

Megalosaurus, *s.* महामकरः, बृहन्मकरः.

Megrim, *s.* शिरोवेदना, शिरःपीडा, अर्द्धशिरःपीडा, अर्द्धमस्तकशूलः.

Meiosis, *s.* (Figure of rhetoric) न्यूनालङ्कारः, न्यूनीकरणालङ्कारः.

Melanagogue, *s.* कृष्णपित्तघ्नं, कृष्णपित्तनाशकम् औषधं.

Melancholic, *s.* सदाविषादी *m.* (न्), नित्यविषादी *m.*, कुपितवायुग्रस्तः.

Melancholily, *adv.* सविषादं, अवसादेन, सोद्वेगं, सावसादं, उद्विग्नवत्.

Melancholy, *a.* (Depressed in spirits) विषण्णः -ण्णा -ण्णं, अवसन्नः -न्ना -न्नं, विषादी -दिनी -दि (न्), उद्विग्नः -ग्ना -ग्नं, उद्विग्नमनाः -नाः -नः (स्), विमनाः &c., दुर्मनाः &c., अन्तर्मनाः &c., उन्मनाः &c., क्लान्तमनाः &c., दीनमनाः &c., दीनमनस्कः -स्का -स्कं, विमनस्कः &c., दीनचेतनः -ना -नं, म्लानः -ना -नं, क्लान्तः -न्ता -न्तं, ग्लानः -ना -नं, खिन्नः -न्ना -न्नं, खेदयुक्तः -क्ता -क्तं, खेदी -दिनी &c., उदासीनः -ना -नं, चिन्तापरः -रा -रं, चिन्ताकुलः -ला -लं.—(Habitually depressed) सदाविषादी -दिनी &c., नित्यविषादी &c., सदाखेदी &c., नित्यविषण्णः &c., नित्यावसन्नः &c., सदावसन्नः &c., विषण्णवृत्तिः -त्तिः -त्ति, खेदवृत्तिः &c.—(Mournful, expressing or causing sorrow) विषादसूचकः -का -कं, खेदसूचकः -का -कं, विषादात्मकः -का -कं, खेदात्मकः -का -कं, शोकसूचकः -का -कं, शोकजनकः -का -कं, खेदजनकः -का -कं, दुःखकरः -रा -रं; 'to be melancholy,' विषद् (c. 1. -षीदति -षत्तुं), अवसद्, विषण्णीभू, खिद् in pass. (खिद्यते), ग्लै (c. 1. ग्लायति, ग्लातुं), उद्विग्नीभू, दुर्मनस् (nom. दुर्मनायते), उन्मनस्.

Melancholy, *s.* विषादः, विषण्णता, अवसादः, अवसन्नता, खेदः, खिन्नता, उद्वेगः, उद्विग्नता, ग्लानिः *f.*, म्लानिः *f.*, क्लान्तिः *f.*, निर्विण्णता, निर्वेदः, दीनता, दैन्यं, उदासीनता, औदासीन्यं, उत्कण्ठा, चिन्तोद्विग्नता, चिन्ता, विषादवृत्तिः *f.*, विषण्णवृत्तित्वं, विमनस्कता, वैमनस्यं.

Melée, *s.* (Confused fight) रणसङ्कुलं, युद्धसङ्कुलं, सङ्कुलयुद्धं.

Melilot, *s.* त्रिपर्णभेदः, त्रिपत्रग्निशिष्ट ओषधिप्रभेदः.

To meliorate, *v. a.* भद्रतरं -रां कृ, भद्रतरीकृ. *See To* improve.

Melioration, *s.* वृद्धिः *f.*, वर्धनं, श्रेयस्त्वं, भद्रतरभावः. *See* Improvement.

Melliferous, *a.* मधुप्रदः -दा -दं, मधुजनकः -का -कं, मधूत्पादकः &c.

Mellification, *s.* मधुकरणं, मधूत्पादनं, मधूत्पत्तिः *f.*, मधुकारित्वं.

Mellifluence, *s.* मधुस्रावः, मधुप्रवाहः, अमृतस्रावः, सुधाप्रवाहः.

Mellifluous, mellifluent, *a.* मधुस्रावी -विणी -वि (न्), अमृतस्रावी &c., मधुरः -रा -रं, मधुमयः -यी -यं.—(As applied to speech) मधुराक्षरः -रा -रं, मधुरवाक्यः -क्या -क्यं.

Mellifluousness, *s.* मधुरता -त्वं, माधुर्य्यं, स्वादुता, वाक्यमाधुर्य्यं.

Mellow, *a.* पक्वः -क्वा -क्वं, परिपक्वः -क्वा -क्वं, पक्वमृदुः -द्वी -दु, मृदुपक्वः -क्वा -क्वं, पक्त्रिमः -मा -मं, विपक्त्रिमः -मा -मं.—(Soft) मृदुः -दुः -द्वी -दु, कोमलः -ला -लं, मृदुलः -ला -लं, स्निग्धः -ग्धा -ग्धं, ललितः -ता -तं, सुखस्पर्शः -र्शा -र्शं.—(To the ear) मृदुशब्दः -ब्दा -ब्दं, कोमलशब्दः &c., मृदुनादः -दा -दं, मञ्जुलः -ला -लं, मञ्जुस्वनः -ना -नं.

To mellow, *v. a.* पच् (c. 1. पचति, पक्तुं, c. 10. पाचयति -यितुं), पक्वं -क्वां कृ, मृदुपक्वं -क्वां कृ, परिपक्वं -क्वां कृ, परिपक्वीकृ, मृदूकृ, कोमलीकृ.

To mellow, *v. n.* पक्वः -क्वा -क्वं भू, परिपक्वः -क्वा -क्वं भू, पक्वीभू, पक्वतां or पक्वदशां या (c. 2. याति -तुं) or इ (c. 2. एति -तुं), मृदुपक्वः -क्वा -क्वं भू, मृदूभू, कोमलीभू.

Mellowed, *p. p.* पाकेन मृदूकृतः -ता -तं or कोमलीकृतः -ता -तं.

Mellowness, *s.* पक्वता, परिपक्वता, मृदुता, पक्वमृदुता, कोमलता, मार्दवं, म्रदिमा *m.* (न्), पाकः, परिपाकः, पक्तिः *f.*, पक्वदशा, पक्वभावः.—(Of sound) शब्दमृदुता, नादमार्दवं.

Melodious, *a.* मधुरः -रा -रं, सुश्राव्यः -व्या -व्यं, सुस्वरः -रा -रं, सुखश्रवः -वा -वं, सुचारुस्वनः -ना -नं, मञ्जुस्वनः -ना -नं, श्रोत्रसुखः -खा -खं, श्रोत्राभिरामः -मा -मं, श्रुतिसुखः -खा -खं, मधुरस्वरः -रा -रं, मधुराक्षरः -रा -रं, मधुकः -का -कं, सुशब्दः -ब्दा -ब्दं, मञ्जुलः -ला -लं.

Melodiously, *adv.* मधुरं, सुस्वरं, मधुरस्वरेण, सुचारुस्वरेण, माधुर्य्येण.

Melodiousness, *s.* मधुरता, माधुर्य्यं, सुश्राव्यता, सुस्वरता, स्वरमधुरता, स्वरमाधुर्य्यं, श्रोत्राभिरामता.

Melody, *s.* सुस्वरः, सुस्वरानुपूर्व्यं, सुस्वरानुपूर्वी, सुस्वरानुक्रमः, स्वरमाधुर्य्यं, स्वरानुक्रममाधुर्य्यं, माधुर्य्यं, मधुरता, सुश्राव्यता, कलता -त्वं, तालः, तालैक्यं, प्रतितालः.

Melon, *s.* (Water-melon) तरम्बुजं, लतापनसः, सेतुः *m.*, कालिङ्गं, कालिन्दकं, गोडुम्बः.

To melt, *v. a.* विली in caus. (-लाययति -लापयति -यितुं), विद्रु (c. 10. -द्रावयति -यितुं), द्रवीकृ, गल् (c. 10. गालयति -यितुं), विद्रावणं कृ, गालनं कृ, विद्रुतीकृ, विलीनीकृ, आर्द्रीकृ, सार्द्रीकृ.—(Soften to love or tenderness) करुणार्द्रीकृ, दयार्द्रीकृ, भावार्द्रीकृ, सार्द्रीकृ, सार्द्रीकृ, वत्सल (nom. वत्सलयति -यितुं), वत्सलीकृ.

To melt, *v. n.* विली (c. 4. -लीयते -लेतुं), प्रविली, प्रली, द्रु (c. 1. द्रवति, द्रोतुं), विद्रु, गल् (c. 1. गलति -लितुं), विगल्, क्षर् (c. 1. क्षरति -रितुं), द्रवीभू, आर्द्रीभू, सार्द्रीभू, विलीनीभू, विद्रुतीभू.—(Be softened to love or tenderness) दयार्द्रीभू, करुणार्द्रीभू, आर्द्रहृदयः -या -यं भू, क्लिन्नहृदयः -या -यं भू, सार्द्रीभू, वत्सल (nom. वत्सलायते), वत्सलीभू.

Melted, *p. p.* द्रुतः -ता -तं, द्रावितः -ता -तं, विद्रुतः -ता -तं, विद्रावितः -ता -तं, द्रवीभूतः -ता -तं, लीनः -ना -नं, विलीनः -ना -नं, निलीनः -ना -नं, गलितः -ता -तं, गालितः -ता -तं, क्षरितः -ता -तं, परिगलितः -ता -तं, द्रवीकृतः -ता -तं, द्रवमाणः -णा -णं, अवदीर्णः -र्णा -र्णं, आर्द्रीकृतः -ता -तं, सार्द्रीकृतः -ता -तं.—(Softened to tenderness) करुणार्द्रीकृतः -ता -तं, दयार्द्रीभूतः -ता -तं, क्लिन्नहृदयीकृतः -ता -तं, वत्सलीकृतः -ता -तं.

Melter, *s.* द्रावकः, विद्रावकः, द्रावकरः, विलयनकृत्, द्रवकर्ता *m.* (र्तृ).

Melting, *s.* द्रावः -वणं, विद्राव -वणं, विलयः -यनं, द्रवत्वं, गलनं, गालनं, गलितत्वं, द्रवीकरणं, क्षरणं, विलीनता, आर्द्रीकरणं, सार्द्रीकरणं.

Melting, *part.* or *a.* द्रवमाणः -णा -णं, गलन् -लन्ती -लत् (त्), क्षरन् &c., गाली -लिनी -लि (न्), वात्सल्यजनकः -का -कं.

Member, s. (Limb of the body) अङ्गं, अवयवः, शरीराङ्गं, शरीरावयवः, गात्रं, पक्षः, प्रतीकः, अपघनः; 'a minor member of the body,' प्रत्यङ्गं; 'having members,' अङ्गी -ङ्गिनी -ङ्गि, अवयवी &c., साङ्गः -ङ्गा -ङ्गं.—(Of a discourse, &c.) अङ्गं, प्रकरणं, खण्डः -ण्डं, देशः, पदं, परिच्छेदः, विच्छेदः.—(Part, division) अङ्गं, भागः, विभागः, अंशः, अवयवः; 'member by member,' अवयवशस्; 'forming a member,' अङ्गभूतः -ता -तं.—(Of a community or association) गणाभ्यन्तरः, संसर्गाभ्यन्तरः.—(Of an assembly) सभासद्, सभ्यः, सभास्थः, सभास्तारः, सभाभ्यन्तरः, सामाजिकः, सदस्यः.—(Individual) व्यक्तिः f., एकजनः.—(Of a compound word) पदं; 'first member of a compound,' उपपदं; 'last member,' उत्तरपदं.

Membered, a. अङ्गी -ङ्गिनी -ङ्गि (न्), साङ्गः -ङ्गा -ङ्गं, अवयवी &c.

Membrane, s. त्वक् f. (च्), आवरणत्वक् f., आवरकत्वक् f., तनुत्वक् f., समस्तत्वक् f., चर्म्म n. (न्), अन्तश्चर्म्म n., किल्लिका, किल्ली, आवरणं.

Membraneous, membranous, a. तनुत्वङ्मयः -यी -यं, आवरणत्वङ्मयः -यी -यं, तनुत्वगावृतः -ता -तं.

Membrum virile, s. शिश्नः, पुंलिङ्गं, पुंश्चिह्नं, पुरुषाङ्गं, नराङ्गं, लिङ्गं, ध्वजः, इन्द्रियं, जघन्यं, चर्म्मदण्डः -ण्डं.

Memento, s. स्मरणार्थकवस्तु n., स्मृतिजनकचिह्नं, स्मरणं.

Memoir, s. वृत्तान्तः, वृत्तान्तरचना, वृत्तान्तोपाख्यानं, वृत्तान्तलिखनं, चरित्रं, चरित्ररचना, चरित्रोपाख्यानं, चरित्रलिखनं, इतिहासः.

Memorable, a. स्मरणीयः -या -यं, स्मरणयोग्यः -ग्या -ग्यं, स्मरणार्हः -र्हा -र्हं, स्मर्तव्यः -व्या -व्यं, स्मरणोपयुक्तः -क्ता -क्तं, चिरस्मरणीयः &c., अविस्मरणीयः &c.

Memorandum, s. स्मरणं, स्मरणपत्रं, स्मारकपत्रं, स्मरणार्थकचिह्नं, पत्रकं.

Memorative, memorial, a. स्मारकः -का -कं, स्मार्त्तः -र्त्ती -र्त्तं, स्मृतिजनकः -का -कं, स्मरणार्थकः -का -कं, स्मृतिकरः -रा -रं.

Memorial, s. स्मरणार्थकविषयः, स्मरणार्थकवस्तु n., स्मारकविषयः, स्मारकवस्तु, स्मरणार्थकचिह्नं, स्मार्त्तविषयः, स्मार्त्तवस्तु n., स्मरणं.—(Petition) निवेदनपत्रं, विज्ञापनपत्रं, प्रार्थनपत्रं.

Memorialist, s. निवेदनकर्त्ता m. (र्त्तृ), विज्ञापनकृत् m., प्रार्थकः, प्रार्थयिता m., अर्थी m. (न्), प्रार्थनपत्रलेखकः.

To memorialize, v. a. निवेदनपत्रेण प्रार्थ् (c. 10. -अर्थयति -यितुं), निवेदनपत्रं लिख् (c. 6. लिखति, लेखितुं), निवेदनं कृ.

Memory, s. स्मरणं, स्मृतिः f., संस्मृतिः f., संस्मरणं, अनुस्मृतिः f., अविस्मृतिः f., संस्कारः, स्मरणशक्तिः f., धारणा -णं; 'retentiveness of memory,' धारणा, धारणाशक्तिः f.; 'having a good or retentive memory,' स्मृतिमान् -मती -मत् (त्), स्मरणशीलः -ला -लं, वृत्तस्मरणशीलः -ला -लं, अधिगतार्थस्मरणशीलः -ला -लं, अधिगतार्थाविस्मरणशीलः -ला -लं; 'to commit to memory,' हृदये कृ, मनसि कृ, अभ्यस् (c. 4. -अस्यति -असितुं), रूपं कृ; 'committed to memory,' कण्ठस्थः -स्था -स्थं, हृदयस्थः -स्था -स्थं, हृत्स्थः &c., अभ्यस्तः -स्ता -स्तं; 'within memory,' स्मार्त्तः -र्त्ती -र्त्तं.—(Time to which memory may extend) स्मार्त्तकालः, स्मरणकालः, स्मृतिकालः.

Men, s. pl. पुरुषाः m. pl., नराः m. pl., मनुष्याः m. pl., मानुषाः m. pl.

To menace, v. a. भर्त्स् (c. 10. भर्त्सयति -ते -यितुं), अवभर्त्स्, निर्भर्त्स्, अभिभर्त्स्, अभिनिर्भर्त्स्, परिभर्त्स्, तर्ज् (c. 10. तर्जयति -यितुं), अभितर्ज्, सन्तर्ज्, अपगुर् (c. 6. -गुरते -रितुं), भर्त्सनं कृ, तर्जनं कृ, भयप्रदर्शनं कृ.

Menace, s. भर्त्सनं -ना, निर्भर्त्सनं -ना, तर्जनं, भयप्रदर्शनं, भयदर्शनं, परोदितं, अपकारगीः f. (र्).

Menaced, p. p. भर्त्सितः -ता -तं, अभिभर्त्सितः -ता -तं, तर्जितः -ता -तं.

Menacer, s. भर्त्सनकारी m. (न्), निर्भर्त्सनकृत् m., भयप्रदर्शकः.

Menagery, menagerie, s. पशुपक्षिसमूहः, पश्वादिसमूहः, विदेशीयजन्तुपालिका, विदेशीयपशुशाला, विदेशीयपशुपालनस्थानं, नानाजातीयपशुसमूहः, भिन्नजातीयजन्तुसमूहः, वितंसः, वीतंसः.

Mensagogue, s. ऋतुवर्धकम् or ऋतुप्रवाहकम् or ऋतुजनकम् औषधं, पुष्पाजेयौषधं.

To mend, v. a. (Repair) सन्धा (c. 3. -दधाति -धत्ते -धातुं), समाधा, प्रतिसमाधा, प्रतिकृ, प्रतिसमाकृ, पूर्ववत् कृ, साध् (c. 10. साधयति -यितुं), उद्धृ (c. 1. -हरति -हर्त्तुं), जीर्णोद्धारं कृ, जीर्णोद्धरणं कृ, सुस्थं -स्थां कृ, स्वस्थं -स्थां कृ, सन्धानं कृ, प्रतिसमाधानं कृ.—(Correct) शुध् (c. 10. शोधयति -यितुं), परिशुध्, विशुध्, संशुध्.—(Help) उपकृ.—(Improve) वृध् (c. 10. वर्धयति -यितुं), संवृध्, अधिकीकृ.

To mend, v. n. (Grow better) भद्रतरः -रा -रं भू, भद्रतरीभू, अधिकीभू, वृध् (c. 1. वर्धते -र्धितुं), वृद्धिं गम् (c. 1. गच्छति, गन्तुं) or इ (c. 2. एति -तुं), श्रेयान् -यसी -यो भू, सुस्थः -स्था -स्थं भू, स्वस्थः -स्था -स्थं भू.

Mendable, a. सन्धेयः -या -यं, समाधेयः -या -यं, प्रतिसमाधेयः -या -यं, साध्यः -ध्या -ध्यं, उद्धार्य्यः -र्य्या -र्य्यं, उद्धरणीयः -या -यं, प्रतिकार्य्यः -र्य्या -र्य्यं.

Mendacious, a. असत्यवादी -दिनी -दि (न्), मिथ्यावादी &c., असत्यभाषी -षिणी, अनृतभाषी &c. *See* Lying, Liar.

Mendacity, s. असत्यभाषणं, मिथ्यावादः, अनृतभाषणं, मृषावादः.

Mended, p. p. समाहितः -ता -तं, प्रतिसमाहितः -ता -तं, सन्धितः -ता -तं, साधितः -ता -तं, उद्धृतः -ता -तं, जीर्णोद्धृतः -ता -तं, प्रतिकृतः -ता -तं.

Mender, s. सन्धानकर्त्ता m. (र्त्तृ), सन्धानकृत् m., सन्धाता m. (तृ), प्रतिसमाधाता m., साधकः, उद्धर्त्ता m. (र्त्तृ), जीर्णोद्धर्त्ता.

Mendicancy, s. भिक्षुकता, भिक्षोपजीविता, भैक्ष्यं, भैक्षजीविका.

Mendicant, s. (Beggar) भिक्षार्थी m. (न्), भिक्षुकः -की f., भिक्षुः m., भिक्षाकः -की, भिक्षोपजीवी m. (न्), भैक्षजीवी m., भिक्षाशी m. (न्), भिक्षाहारः, भैक्षभुक् m. (ज्), भैक्षाशी m., भिक्षाचरः, भिक्षणशीलः, वनीयकः, याचकः, याचनकः. *See* Beggar. (Religious mendicant) भिक्षुः m., परिव्राजकः -जिका, परिव्राजः, परिव्राट् m. (ज्), प्रव्रजितः, पाराशरी m. (न्), पराशरी m., योगी m. (न्), सन्न्यासी m. (न्), यती m. (न्). Other kinds of religious mendicants are दण्डी m. (न्), त्रिदण्डी m. (न्), वैरागी m. (न्), भैरवयोगी m., दिगम्बरः, मस्करी m. (न्), अघोरपन्थाः m. (न्), कर्म्मन्दी m. (न्).

Mendicity, s. भिक्षुकता -त्वं, भैक्ष्यं, भैक्षोपजीवनं, भैक्षजीविका, भैक्षचर्य्या, भैक्षचरणं, भिक्षाशित्वं, भिक्षाटनं, भिक्षावृत्तिः f., भिक्षुकवृत्तिः f., भिक्षा, प्रव्रज्या, परिव्रज्या -ज्यं, व्रज्या, याचनावृत्तिः f., याचकवृत्तिः f., याञ्चा, याचना, पैण्डिन्यं.

Mending, s. सन्धानं, सन्धानकरणं, समाधानं, प्रतिसमाधानं, साधनं, उद्धारः, उद्धरणं, जीर्णोद्धारः, जीर्णोद्धरणं, सुस्थकरणं, प्रतिकरणं.

Menial, a. गृहदाससम्बन्धी -न्धिनी -न्धि (न्), प्रेष्यसम्बन्धी &c., अपकृष्टः -ष्टा -ष्टं, वार्षलः -ली -लं, व्रातीनः -ना -नं; 'menial offices,' प्रेष्यकर्म्म n. (न्), भृत्यकर्म्म n.; 'menial service,' प्रेष्यभावः, दास्ययोगः.

Menial, s. गृहदासः -सी f., प्रेष्यः -ष्या, भृत्यः, चेटः -टी f., सेवकः -की, अपकृष्टः, अपकृष्टकर्म्मकरः, किङ्करः; 'menials,' परिजनः, परिच्छदः, दासवर्गः.

Meniscus, s. अर्द्धचन्द्राकारः, अर्द्धचन्द्राकृतिः f.

Menology, s. (Register of months) मासविवरणं, मासपत्रिका.

Men-pleaser, s. लोकरञ्जकः, जनरञ्जकः, जनानुसारी m. (न्), लोकानुसारी.

Mensal, a. भोजनपात्रसम्बन्धी -न्धिनी -न्धि (न्), भोजनाधारसम्बन्धी &c.

Menses, s. pl. ऋतुः m., आर्त्तवं, पुष्पं, कुसुमं, रजस् n., योनिरञ्जनं, स्त्री-

धर्म्मः, कला, मलं, योनिमलं; 'first appearance of the menses,' ऋतुदर्शनं, रजोदर्शनं; 'ceremonies on the event,' ऋतुशान्तिः *f.*, ऋतूत्सवः; 'suppression of them,' रजोबन्धः.

MENSTRUAL, *a.* (Monthly) मासिकः -की -कं, मास्यः -स्या -स्यं, मासीयः -या -यं, मासीनः -ना -नं, प्रातिमासिकः -की -कं, मासानुमासिकः -की -कं.

To MENSTRUATE, *v. n.* ऋतुमती भू, पुष्पवती भू, रजस्वला भू.

MENSTRUATION, *s.* ऋतुप्रवाहः, ऋतुस्रावः; 'woman in this state.' *See* the next.

MENSTRUOUS, *a.* (Woman) ऋतुमती, पुष्पवती, रजस्वला, मलिनी, स्त्रीधर्म्मिणी, उदक्या, आत्रेयी -यिका, अविः -वी, वृषली, अस्पर्शा, सरजाः, चाण्डाली, ब्रह्मघातिनी, रजकी, शूद्री.—(Relating to the menses) आर्त्तवः -वी -वं, ऋतुसम्बन्धी -न्धिनी -न्धि (न्), ऋतु in comp.

MENSTRUUM, *s.* (Solvent) द्रावकरसः, द्रावणं, विद्रावकरसः, विद्रावणं. —(Medium for mixing medicines) योगवाही *m.* (न्).

MENSURABILITY, *s.* मेयता, प्रमेयता, परिमेयता, मापनीयत्वं.

MENSURABLE, *a.* मेयः -या -यं, प्रमेयः -या -यं, परिमेयः -या -यं, मापनीयः -या -यं, माप्यः -प्या -प्यं, मापनक्षमः -मा -मं.

MENSURAL, *a.* मानसम्बन्धी &c., मानविषयः -या -यं, परिमाणविषयः &c.

To MENSURATE, *v. a.* मा (c. 2. माति -तुं, c. 10. मापयति -यितुं). *See* *To* MEASURE.

MENSURATION, *s.* मापनं, परिमाणं, प्रमाणं, मानं, मितिः *f.*, मापकरणं.

MENTAL, *a.* मानसः -सी -सं, मानसिकः -की -कं, मनस्कः -स्का -स्कं, मनसिजः -जा -जं, मनोजः -जा -जं, मनोगतः -ता -तं, मनोभवः -वा -वं, मनःस्थः -स्था -स्थं, बुद्धिस्थः &c., चिद्भवः -वा -वं, चित्तगतः -ता -तं, चित्तजः -जा -जं, मनोमयः -यी -यं, मनःकल्पितः -ता -तं, बुद्धिकल्पितः -ता -तं, मनःसम्बन्धी -न्धिनी &c.; 'mental suffering,' मनस्तापः, मनःपीडा; 'mental abstraction,' योगः, अन्तर्धानं, चित्तवृत्तिनिरोधः.

MENTALLY, *adv.* मनसा, बुद्ध्या, चिन्तया, बुद्धिमात्रेण; 'mentally blind,' अन्धधीः -धीः -धि, अन्धबुद्धिः -द्धिः -द्धि, अन्धीकृतात्मा -त्मा -त्म (न्).

MENTION, *s.* अभिधानं, अभिधा, आख्यानं, कथनं, उपादानं, ग्रहणं, नामग्रहणं, नामनिर्देशः, निवेदनं, कीर्त्तनं, सङ्कीर्त्तनं, उच्चारणं, उद्देशः, उल्लेखः -खनं, श्रुतिः *f.*; 'no mention whatever,' न गन्धलेशः; 'to make mention.' *See* the next.

To MENTION, *v. a.* ख्या (c. 2. ख्याति -तुं), आख्या, कथ् (c. 10. कथयति -यितुं), सङ्कथ्, निविद् (c. 10. -वेदयति -यितुं), अभिधा (c. 3. -दधाति -धातुं), कृत् (c. 10. कीर्त्तयति -यितुं), अनुकृत्, उच्चर् (c. 10. -चारयति -यितुं), निर्दिश् (c. 6. -दिशति -देष्टुं), उद्दिश्, उद्देशं कृ, अभिधानं कृ. —(By name) नाम ग्रह् (c. 9. गृह्णाति, ग्रहीतुं), नामग्रहणं कृ, नामनिर्देशं कृ; 'it will be mentioned,' वक्ष्यते.

MENTIONED, *p. p.* उक्तः -क्ता -क्तं, प्रोक्तः -क्ता -क्तं, कथितः -ता -तं, आख्यातः -ता -तं, अभिहितः -ता -तं, निवेदितः -ता -तं, कीर्त्तितः -ता -तं, स्मृतः -ता -तं; 'by name,' नामाभिहितः -ता -तं; 'before mentioned,' पूर्व्वोक्तः -क्ता -क्तं, पूर्व्वोदितः -ता -तं; 'about to be mentioned,' वक्ष्यमाणः -णा -णं.

MENTOR, *s.* उपदेष्टा *m.* (ष्टृ), उपदेशकः, मन्ता *m.* (न्तृ), अभिमन्ता *m.*

MEPHITIC, MEPHITICAL, *a.* पूतिगन्धी -न्धिनी -न्धि (न्), पूतिगन्धः -न्धा -न्धं, पूतिगन्धात्मकः -का -कं, दुर्गन्धी &c., दूषकगन्धी &c., पूतिगन्धमयः -यी -यं, दुर्गन्धमयः -यी -यं, पूतिविषः -षा -षं, विषात्मकः -का -कं.

MERACIOUS, *a.* तेजोमयः -यी -यं, सत्त्वपूर्णः -र्णा -र्णं, रसिकः -का -कं.

MERCANTILE, *a.* वाणिजिकः -की -कं, वाणिजः -जी -जं, वाणिज्यसम्बन्धी -न्धिनी -न्धि (न्), वणिक्पथसम्बन्धी &c., वणिक्सम्बन्धी &c., व्यवहारसम्बन्धी &c., आपणिकः -का -कं, पण्यायासम्बन्धी &c., नैगमः -मी -मं.

MERCATURE, *s.* क्रयविक्रयः, वाणिज्यं, पण्याया, वणिक्पथं.

MERCENARILY, *adv.* लाभलोभात्, लाभापेक्षया, स्वार्थापेक्षया, लाभदृष्ट्या, लाभबुद्ध्या, फललोभात्, वेतनार्थं, फलार्थं, अर्थतस्, भृतकवत्, सकामं.

MERCENARINESS, *s.* लाभलोभः, फललोभः, लाभदृष्टिः *f.*, वेतनार्थित्वं, लाभबुद्धिः *f.*, फलाशा, धनलोभः, धनलुब्धता, स्वार्थापेक्षा, सकामता, सकामबुद्धिः *f.*, वेतनापेक्षा.

MERCENARY, *a.* (Hired, hireling) भृतकः -का -कं, वैतनिकः -की -कं, वेतनार्थी -र्थिनी -र्थि (न्), वस्निकः -का -कं, भृतिभुक् *m. f. n.* (ज्), भरण्यभुक् *m. f. n.*, भृत्यः -त्या -त्यं, वेतनभृत् *m. f. n.*—(Actuated by hope of gain, greedy of gain) लाभलोभी -भिनी &c., लाभार्थी -र्थिनी &c., लाभदृष्टिः -ष्टिः -ष्टि, लाभबुद्धिः -द्धिः -द्धि, धनलोभी &c., धनलुब्धः -ब्धा -ब्धं, धनार्थी &c., फलदर्शी -र्शिनी &c., सार्थः -र्था -र्थं, स्वार्थदर्शी &c., स्वार्थापेक्षकः -का -कं, सकामः -मा -मं, कामात्मा -त्मा -त्म (न्); 'from mercenary motives,' अर्थतस्, स्वार्थतस्, लाभलोभात्, फललोभात्.

MERCENARY, *s.* (A hireling) भृतकः, भृतिभुक् *m.* (ज्), भरण्यभुक् *m.*, वैतनिकः, वस्निकः, वेतनार्थी *m.* (न्), वेतनभुक् *m.*, भृत्यः; 'soldier,' भृतकसैन्यः.

MERCER, *s.* कौशाम्बरविक्रयी *m.* (न्), कौशेयवणिक् *m.* (ज्), कौशिकवणिक्, दुकूलविक्रेता *m.* (तृ), कौशिकवस्त्रव्यवसायी *m.* (न्).

MERCERY, *s.* कौशाम्बरं, कौशिकवस्त्रादि *n.*, कौशिकवस्त्रादिव्यवसायः.

MERCHANDISE, *s.* (Goods) पण्यं, पण्यद्रव्यं, पण्यद्रव्याणि *n. pl.*, पण्यानि *n. pl.*, विक्रेयद्रव्याणि, विट्पण्यं, भाण्डकं, पण्यभाण्डकं, पण्यभाण्डानि *n. pl.*, वाणिजभाण्डानि, वाणिजद्रव्यं, वाणिजपण्यं, पणः, पणसः. —(Trade) वाणिज्यं -ज्या, वणिक्पथं, क्रयविक्रयः, पण्याया, व्यापारः, व्यवहारः, व्यवसायः.

To MERCHANDISE, *v. n.* वाणिज्यं कृ, क्रयविक्रयं कृ, व्यापारं कृ.

MERCHANT, *s.* वणिक् *m.* (ज्), वाणिजः -जिकः, वाणिजजनः, महाजनः, सार्थवाहः, सार्थिकः, क्रयविक्रयिकः, आपणिकः, पणिकः, व्यवसायी *m.* (न्), व्यापारी *m.*, व्यवहारी *m.*, व्यवसायकः, वाणिज्योपजीवी *m.* (न्), श्रेष्ठी *m.* (न्), साधुः *m.*, साधुजनः, नैगमः; 'voyaging merchant,' पोतवणिक्, सांयात्रिकः; 'man of the mercantile or third class,' वैश्यः, विट् *m.* (श्); 'company of merchants,' सार्थः, निगमः.

MERCHANTABLE, *a.* पण्यः -ण्या -ण्यं, विक्रेयः -या -यं, पण्यार्हः -र्हा -र्हं.

MERCHANT-MAN, *s.* (Ship employed in trade) वाणिजनौः *f.*, वाणिजनौका.

MERCIFUL, *a.* दयालुः -लुः -लु, दयावान् -वती -वत् (त्), कृपालुः -लुः -लु, कृपावान् &c., दयाशीलः -ला -लं, कृपाशीलः -ला -लं, सदयः -या -यं, सकरुणः -णा -णं, करुणाशीलः -ला -लं, कारुणिकः -की -कं, सानुकम्पः -म्पा -म्पं, अनुकम्पी -म्पिनी -म्पि (न्), सानुक्रोशः -शा -शं, हृदयालुः -लुः -लु, दयामयः -यी -यं, कृपामयः &c., करुणामयः &c., दयाबुद्धिः -द्धिः -द्धि, दयादृष्टिः -ष्टिः -ष्टि, क्षमाशीलः -ला -लं, क्षमावान् &c., अनुकम्पाशीलः -ला -लं, घृणी -णिनी &c., करुणार्द्रः -र्द्रा -र्द्रं, वत्सलः -ला -लं, कृपाकरः -रा -रं, दयायुक्तः -क्ता -क्तं.

MERCIFULLY, *adv.* सदयं, सकारुण्यं, सानुकम्पं, कृपया, दयया, सानुक्रोशं, दयापूर्व्वं, कृपापूर्व्वं, दयाबुद्ध्या, कारुण्येन -ण्यात्, क्षमापूर्व्वं, वात्सल्यात्.

MERCIFULNESS, *s.* दयालुता, कृपालुता, कारुण्यं, दयाशीलता, कृपाशीलता, सदयत्वं, सानुकम्प्यता, सानुक्रोशता, क्षमाशीलता, दया, कृपा, अनुकम्पा, करुणा, घृणा, वात्सल्यं.

MERCILESS, *a.* निर्दयः -या -यं, अदयः -या -यं, निष्कृपः -पा -पं, निर्घृणः

-णा -णं, निष्करुणः -णा -णं, अकरुणः -णा -णं, दयाहीनः -ना -नं, दयारहितः -ता -तं, दयाशून्यः -न्या -न्यं, कृपाहीनः -ना -नं, वीतघृणः -णा -णं, निष्ठुरः -रा -रं.

Mercilessly, *adv.* निर्दयं, निष्कृपं, निष्करुणं, निष्ठुरं, अतिनैष्ठुर्य्येण.

Mercurial, *a.* (Containing mercury or quicksilver) पारदमयः -यी -यं, पारदात्मकः -का -कं, सपारदः -दा -दं.—(Volatile, sprightly) चञ्चलः -ला -लं, चपलः -ला -लं, चञ्चलबुद्धिः -द्धिः -द्धि, प्रकृतितरलः -ला -लं, तरलप्रकृतिः -तिः -ति, क्षणिकबुद्धिः &c., अस्थिरः -रा -रं.

Mercury, *s.* (The planet, fabled as the son of Soma, or the moon, by Rohiní) सौम्यः, सोमभूः *m.*, बुधः, रौहिणेयः, रोधनः, बोधनः, राजपुत्रः, तुङ्गः, श्यामाङ्गः, एकाङ्गः, एकदेहः, प्रहर्षणः, पञ्चार्चिस् *m.*, अविद्याजः.—(Quicksilver) पारदः, पारः -रतः, रसः, रसधातुः *m.*, सिद्धधातुः, दिव्यरसः, चपलः, दारदः. *See* Quicksilver. (A preparation of mercury used in medicine) घनसारः, चन्द्रोदयः, चतुर्मुखः; 'Calx or oxid of mercury,' रसभस्म *n.* (न्), पारदभस्म *n.*; 'white sublimate or muriate of mercury,' रसकर्पूरः; 'sulphuret of mercury,' कज्जली.—(Interpreter or preceptor of the gods) बृहस्पतिः *m.*

Mercy, *s.* (Disposition to forgive, clemency) दया, कृपा, दयाशीलता, कृपाशीलता, क्षमाशीलता, दयालुता, कृपालुता, दयाबुद्धिः *f.*, क्षमाबुद्धिः *f.*—(Compassion) अनुकम्पा, कारुण्यं, करुणा, घृणा, अनुक्रोशः, कृपा, दया.—(Grace, favor) अनुग्रहः, प्रसादः, प्रसन्नता, अनुरोधः.—(Pardon) क्षमा, पापमार्जनं, पापशुद्धिः *f.*, निष्कृतिः *f.*; 'ocean or fountain of mercy,' दयासागरः, दयासमुद्रः, दयानिधिः *m.*, करुणाकरः; 'vessel or recipient of mercy,' दयापात्रं, कृपापात्रं, दयाभाजनं, अनुकम्पनीयः -या, अनुग्राह्यः -ह्या; 'to shew or have mercy,' दयां कृ, अनुकम्प् (c. 1. -कम्पते -म्पितुं), दय् (c. 1. दयते -यितुं), क्षम् (c. 1. क्षमते -मितुं, क्षन्तुं); 'mercy!' त्राहि, त्रायस्व, क्षमस्व, क्षम्यतां.

Mercy-seat, *s.* करुणासनं, ईश्वरासनं, परमेश्वरासनं, ईश्वरप्रसादासनं.

Mere, *a.* (Only, pure) मात्र in comp., मात्रकः -का -कं, केवलः -ला -ली -लं, केवली -लिनी -लि (न्), शुद्धः -द्धा -द्धं; 'a mere man,' मनुष्यमात्रः; 'mere touch,' स्पर्शमात्रं; 'mere words,' वाङ्मात्रं; 'by mere talk,' वाक्यमात्रेण; 'a mere grammarian,' केवलवैयाकरणः; 'a mere logician,' केवलनैयायिकः.

Mere, *s.* (A lake) सरस् *n.*, ह्रदः, सरोवरः, पयोराशिः *m.*—(Boundary) सीमा, परिसीमा, अन्तः, समन्तः, पर्य्यन्तं.

Merely, *adv.* मात्रं, मात्रेण -त्रात्, केवलं, कुट्टारं, खलु; 'by merely inspecting,' निरीक्षणमात्रेण; 'from caste merely,' जातिमात्रात्.

Meretricious, *a.* (Relating to harlots) वेश्यासम्बन्धी -न्धिनी -न्धि (न्), वाराङ्गनीयः -या -यं, पण्याङ्गनीयः -या -यं.—(Having a false show, gaudy) कृत्रिमशोभावान् -वती -वत् (त्), कृत्रिमशोभामयः -यी -यं, मिथ्याशोभनः -ना -नं, कृत्रिमालङ्कारमयः -यी -यं, मिथ्यालङ्कारवान् &c., मिथ्यारागी -गिणी &c.

Meretriciously, *adv.* वेश्यारूपेण, कृत्रिमशोभापूर्व्वं, मिथ्याशोभापूर्व्वं.

To merge, *v. a.* (Immerge) मज्ज् (c. 10. मज्जयति -यितुं), निमज्ज्, मग्नं -ग्नां कृ, अवगाह् (c. 10. -गाहयति -यितुं), गाह्.—(Cause to be swallowed up or lost) ग्रस्तं -स्तां कृ, विलीनं -नां कृ, निपीतं -तां कृ, नश् (c. 10. नाशयति -यितुं), नष्टं -ष्टां कृ.

To merge, *v. n.* मज्ज् (c. 6. मज्जति -ज्जितुं, मंक्तुं), अवगाह् (c. 1. -गाहते -हितुं -गाढुं), ग्रस्तः -स्ता -स्तं भू, निपीतः -ता -तं भू, नश् (c. 4. नश्यति -शितुं), मग्नः -ग्ना -ग्नं भू, विली (c. 4. -लीयते -लेतुं).

Merged, *p. p.* मग्नः -ग्ना -ग्नं, निमग्नः -ग्ना -ग्नं, अवगाढः -ढा -ढं, लीनः -ना -नं, विलीनः -ना -नं, निलीनः -ना -नं, लुप्तः -प्ता -प्तं.

Meridian, *s.* (Midday, noon) मध्याह्नः, मध्याह्नकालः, मध्यन्दिनं, दिनमध्यं.—(Meridian of the place in geography and astronomy) याम्योत्तरवृत्तं, खमध्यं; 'meridians of right ascension,' क्रान्तिसूत्राणि *n. pl.*; 'distance from the first meridian,' रेखान्तरं, देशान्तरं; 'distance between the meridians,' स्पष्टपरिधिः *m.*—(Height, highest point) उच्चता, उच्चपदं, अग्रं, मध्यं.

Meridian, *a.* (Relating to midday) माध्याह्निकः -की -कं, माध्यन्दिनः -नी -नं, मध्याह्नकालीनः -ना -नं.—(Pertaining to the meridian line) याम्योत्तरवृत्तसम्बन्धी -न्धिनी -न्धि (न्), खमध्यसम्बन्धी &c.—(Highest) उच्चतमः -मा -मं, उत्तमः -मा -मं.

Meridional, *a.* दक्षिणदिक्स्थः -स्था -स्थं, दक्षिणमुखः -खा -खं, दक्षिणाभिमुखः &c., दाक्षिणिकः -की -कं, दक्षिणदेशीयः -या -यं.

Merit, *s.* (Desert) गुणः, योग्यता, उपयोगः, उपयुक्तता, पात्रता.—(Excellence, great merit) गुणोत्कर्षः, गुणप्रकर्षः, गुणवैशेष्यं, गुणिता, गुणपूगं, सगुणता, गुणौघं, गुणवत्ता, गुणता, गुणमहत् *n.*, उत्कर्षः, उत्कृष्टता, श्रेष्ठता, शस्यं, प्रशस्यं, सारता -त्वं; 'appreciating merit,' गुणग्रहणं; 'one who does so,' गुणग्राही *m.* (न्), गुणग्राहकः, गुणज्ञः.—(Merits, good or bad) गुणागुणं, गुणदोषौ *m.* du., गुणदोषं, सारासारं, पुण्यापुण्यं, धर्म्माधर्म्मं; 'testing one's merits,' गुणागुणपरीक्षा, गुणदोषपरीक्षणं.—(Merit acquired through works, according to the Hindu notion) पुण्यं, श्रेयस् *n.*, सुकृतं, धर्म्मः, वृषः, तपस् *n.*, नियमः, पुण्यसामग्री, सञ्चितं; 'acquisition of merit,' पुण्यार्जनं, पुण्यसम्पादनं, श्रेयःसम्पादनं; 'acquired by merit,' पुण्यार्जितः -ता -तं, पुण्यविजितः -ता -तं; 'reward of merits,' पुण्यफलं; 'good fortune, as the result of merits,' पुण्योदयः; 'merit acquired in some former birth,' पूर्व्वपुण्यं; 'mightiness of merit,' पुण्यप्रतापः; 'person of great merit,' पुण्यनिधिः *m.*, श्रेयोनिधिः *m.*, पुण्यसागरः, पुण्यराशिः *m.*, पुण्यात्मा *m.* (न्), पुण्यजनः; 'a work giving an account of the merits of any holy place or object,' माहात्म्यं.

To merit, *v. a.* अर्ह् (c. 1. अर्हति -ते -र्हितुं), अर्हः -र्हा -र्हं or उपयुक्तः -क्ता -क्तं or योग्यः -ग्या -ग्यं or उचितः -ता -तं भू or अस्; 'he merits a kingdom,' राज्यम् अर्हति; 'he merits punishment,' दण्डार्हो भवति or अस्ति; 'to merit confidence,' विश्वासपात्रं भू. *See To* deserve.

Merited, *p. p.* उपयुक्तः -क्ता -क्तं, योग्यः -ग्या -ग्यं, अर्हितः -ता -तं.

Meritorious, *a.* (Deserving a reward) वेतनार्हः -र्हा -र्हं, दक्षिणार्हः &c., प्रतिफलार्हः &c.—(Deserving of honor) श्लाघ्यः -घ्या -घ्यं, श्लाघनीयः -या -यं, प्रशंसनीयः -या -यं, शंस्यः -स्या -स्यं, प्रशस्तः -स्ता -स्तं, श्लाघार्हः -र्हा -र्हं, प्रशंसार्हः &c.—(Having great merit) गुणवान् -वती -वत् (त्), गुणसम्पन्नः -न्ना -न्नं, गुणी -णिनी -णि (न्), गुणान्वितः -ता -तं, श्रेष्ठः -ष्ठा -ष्ठं, उत्तमगुणविशिष्टः -ष्टा -ष्टं.—(Having great religious merit) पुण्यवान् -वती &c., पुण्यशाली -लिनी &c., पुण्यरूपः -पा -पं, पुण्यात्मकः -का -कं, कृतपुण्यपुञ्जः -ञ्जा -ञ्जं; 'meritorious act,' पुण्यकं, व्रतः -तं, नियमः, तपस् *n.*

Meritoriously, *adv.* यथा वेतनम् or प्रतिफलम् अर्हति तथा, श्लाघनीयं.

Meritoriousness, *s.* योग्यता, उपयुक्तता, वेतनार्हता, वेतनयोग्यता, उपयोगिता, पात्रता, गुणिता, गुणसम्पन्नता, श्लाघ्यता, पुण्यता, पुण्यवत्त्वं.

Merlin, *s.* (Kind of hawk) श्येनभेदः, कपोतारिः *m.*

Mermaid, *s.* मत्स्यकन्या, मत्स्यकुमारी -रिका, कविकल्पितः कन्योर्द्ध्वकायो मत्स्याधःकायो जन्तुविशेषः, समुद्रीयस्त्री.

Merrily, *adv.* सहर्षं, सानन्दं, उल्लासेन, उल्लसितं, सहासं, सहास्यं, सहसितं, परिहासेन, हृष्टमनसा, सकौतुकं, प्रफुल्लमनसा, उल्लसवत्, हृष्टवत्, प्रमोदेन.

Merriment, *s.* उल्लसता, उल्लासः, हर्षः, प्रहर्षः, आनन्दः, सानन्दता, प्रफुल्लता, हास्यं, प्रहसनं, हासिका, परिहासः, परीहासः, आह्लादः, मुदा, प्रमोदः, कौतुकं, प्रहृष्टता, हृष्टता, क्रीडा, क्रीडाकौतुकं, विलासः, लीला, खेला, हास्यविनोदः, उत्सवः, चर्भटी.

Merriness, *s.* हृष्टता, प्रहृष्टता, उल्लसता, उल्लासिता, हास्यमुखता, हास्यवृत्तिः *f.*, सानन्दता, प्रफुल्लता, सदानन्दिता.

Merry, *a.* हृष्टः -ष्टा -ष्टं, हृष्टहृदयः -या -यं, प्रहृष्टः -ष्टा -ष्टं, प्रहृष्टचित्तः -त्ता -त्तं, उल्लसः -सा -सं, उल्लासी -सिनी -सि (न्), उल्लासवृत्तिः -त्तिः -त्ति, परिहासशीलः -ला -लं, हास्यवृत्तिः -त्तिः -त्ति, हास्यमुखः -खी -खं, हास्यवदनः -ना -नं, सहसाननः -ना -नं, आनन्दी -न्दिनी &c., आनन्दवृत्तिः -त्तिः -त्ति, हासी -सिनी &c., प्रमोदी -दिनी &c., मुदान्वितः -ता -तं, मुदितः -ता -तं, विलासी &c., विनोदी &c., सुमनाः -नाः -नः (स्), कौतुकी &c., उपजातकौतुकः -का -कं.—(Causing mirth) हास्यजनकः -का -कं, हास्योत्पादकः -का -कं, विनोदकः -का -कं; 'to make merry,' उत्सवं कृ; 'to be merry,' उल्लस् (c. 1. -लसति -सितुं), सुमन (nom. सुमनायते), कौतुकं कृ.

Merry-andrew, *s.* भण्डः, वैहासिकः, विदूषकः, परिहासवेदी *m.* (न्).

Merry-making, *s.* उत्सवः, उत्सवकरणं, महोत्सवः, विलासकरणं.

Mersion, *s.* मज्जनं, सम्मज्जनं, निमज्जनं, विगाहः -हनं, अवगाहनं.

Meru, *s.* (The sacred mountain, in the centre of the seven continents, at the extremity of the world's axis, where the gods reside, corresponding to Mount Olympus of the Greeks) मेरुः *m.*, सुमेरुः *m.*, सुरालयः, देवालयः, हेमाद्रिः *m.*, रत्नसानुः *m.*

Mesenteric, *a.* [illegible]सम्बन्धी -न्धिनी &c., मध्यान्त्रिकः -की -कं.

Mesentery, *s.* अन्त्रवेष्टनी, अन्त्रावरणत्वक् *f.* (च्), मध्यान्त्रावरणत्वक् *f.*, [illegible] *f.*; 'enlargement of the mesentery,' क्लोम *m.* (न्).

Mesh, *s.* (Interstice of a net) जालान्तरं, जालछिद्रं, जालरन्ध्रं.

To mesh, *v. a.* जाले or पाशे पत् (c. 10. पातयति -यितुं), जाले पातयित्वा बन्ध् (c. 9. बध्नाति, बन्द्धुं), जालबद्धं -द्धां कृ.

Meshy, *a.* जालरूपः -पा -पं, जालाकारः -रा -रं, जालमयः -यी -यं, जालवन्निर्मितः -ता -तं, जालवत् बहुछिद्रमयः -यी -यं.

Meslin, *s.* (Mixture of grain) मिश्रधान्यं, धान्यमिश्रणं, मिश्रान्नं.

Mess, *s.* (Dish or quantity of food) अन्नभागः, अन्नपात्रं, अन्नं, सिद्धान्नं, यत् खाद्यद्रव्यम् एकपुरुषस्य परिवेष्यते.—(Food prepared for a number of persons in common) गणान्नं.—(Set of persons who eat together) पंक्तिः *f.*, सहभोजिपंक्तिः *f.*, सहभोजनपंक्तिः *f.*, गणान्नपंक्तिः *f.*, जग्धिपंक्तिः *f.*, सहभोजिगणः, सहभोजिनः *m. pl.*, पंक्तिभोजिनः *m. pl.*, गणचक्रकं, गणचक्रं; 'not admissible into the same mess,' अपांक्तेयः -या -यं, अपांक्तः -क्ता -क्तं, अपांक्त्यः -क्त्या -क्त्यं.—(Medley, litter) सङ्करः, नानाद्रव्यसाङ्कर्य्यं, नानाद्रव्यसन्निपातः, नानाद्रव्यसम्मिश्रणं, सङ्कीर्णकं, सङ्कुलकं.—(Plight) दुर्दशा, दुर्गतिः *f.*, कर्दमः; 'in a mess,' दुर्दशाग्रस्तः -स्ता -स्तं.

To mess, *v. n.* (Eat in company) पंक्तिभोजनं कृ, एकपंक्तिभोजनं कृ, सहभोजनं कृ, एकत्र भोजनं कृ or आहारं कृ.

To mess, *v. a.* (Make into a mess) सङ्करीकृ, सम्मिश्रीकृ.

Message, *s.* सन्देशः, सन्दिष्टं, वार्त्ता, दूत्यं, दौत्यं, वृत्तान्तः, वाचिकं निर्देशः, निर्दिष्टं, वचनोपन्यासः, आदेशः, [illegible], आज्ञा, [illegible], शास्तिः *f.*, वक्तव्यं, वचनं, प्रैषः; 'sending on a message,' प्रतिशासनं.

Messed, *p. p.* सङ्करीकृतः -ता -तं, सम्मिश्रितः -ता -तं, सन्निपतितः -ता -तं.

Messenger, *s.* दूतः, सन्देशहरः, वार्त्ताहरः, वार्त्तायनः, वाचिकहरः, आख्यायकः, अध्वगः, प्रयोज्यः, सञ्चारकः, चारः, [illegible], समाचारहारकः, कार्य्यङ्करः, निसृष्टार्थः; 'female messenger,' दूती *f.*, दूतिका, सञ्चारिका.

Messiah, *s.* (The Anointed) अभिषिक्तः, अभिषिक्तत्राता *m.* (तृ).

Messmate, *s.* पंक्तिभोजी *m.* (न्), एकपंक्तिः *m.*, समपंक्तिः, सहभोजी *m.*

Messuage, *s.* वासगेहं -हः, वासगृहं, गृहवाटिका, वास्तुवाटी.

Met, *p. p.* समागतः -ता -तं, सङ्गतः -ता -तं, समुपागतः -ता -तं, मिलितः -ता -तं, अभिमुखागतः -ता -तं, सम्मुखागतः -ता -तं, अभियातः -ता -तं.—(Met as a guest) प्रत्युद्गतः -ता -तं, प्रत्युद्यातः -ता -तं.—(Met with) आसादितः -ता -तं, समासादितः -ता -तं, प्राप्तः -प्ता -प्तं, अधिगतः -ता -तं; 'hard to be met with,' दुर्लभः -भा -भं. *See* To meet. 'Easy to be met with,' सुलभः &c.

Metacarpal, *a.* करभसम्बन्धी -न्धिनी -न्धि (न्), पोलुसम्बन्धी &c.

Metacarpus, *s.* करभः, पोलुः *m.*, करभास्थि *n.*, प्रपाणिः *m.*, [illegible].

Metachronism, *s.* न्यूनकालनिरूपणं, न्यूननिरूपितकालः.

MONSTER, *s.* (Something unnatural) अद्भुतं, अद्भुतविषयः, अद्भुतवस्तु *n.*, अपूर्व्वविषयः, महोद्भुतं.—(Something deformed) अपरूपवस्तु *n.*, विरूपविषयः, अपरूपं, अपरूपता, वैरूप्यं.—(A being enormously large or very frightful) राक्षसशरीरः, भीमशरीरः, विकटाकारः, विकटरूपः, घोररूपी *m.* (न्), सुबृहत्परिमाणः.—(Horribly wicked person) राक्षसः, रावणः, घोरकर्म्मा *m.* (न्).

MONSTROSITY, *s.* *See* MONSTER.

MONSTROUS, *a.* (Unnatural, extraordinary, out of the course of nature) अद्भुतः -ता -तं, महोद्भुतः -ता -तं, अपूर्व्वः -र्व्वा -र्व्वं, विलक्षणः -णा -णं, विलक्षः -क्षा -क्षं, सृष्टिमार्गबहिर्गतः -ता -तं, सृष्टिरीतिबाह्यः -ह्या -ह्यं, सृष्टिक्रमबाह्यः &c.—(Deformed) अपरूपः -पा -पं, विरूपः -पा -पं.—(Enormously large) राक्षसशरीरः -रा -रं, अतिबृहच्छरीरः -रा -रं, विकटशरीरः &c., अतिमहान् -हती -हत् (त्), सुमहान् &c., अतिबृहन् -हती &c., सुबृहत्परिमाणः -णा -णं.—(Frightful) घोररूपी -पिणी &c., घोराकृतिः -तिः -ति, विकटाकारः -रा -रं, भीमदर्शनः -ना -नं, रौद्रदर्शनः &c., करालरूपः -पा -पं.—(Atrocious) दारुणः -णा -णं, अघोरः -रा -रं, विकटः -टा -टं.

MONSTROUSLY, *adv.* अद्भुतं, विकटं, दारुणं, भृशं, अतिशयं -येन, अतीव.

MONSTROUSNESS, *s.* अद्भुतता, अघोरता, घोरता, दारुणता, विकटता.

MONTH, *s.* मासः, मास् *m.*, पक्षद्वयं, पक्षयुगं, नाक्षत्रं, यव्यः, वर्षांशः, वर्षाङ्गः. The following are the twelve Hindu months, 1. चैत्रः, corresponding to the last half of March and the first half of April, 2. वैशाखः, April, May, 3. ज्येष्ठः, May, June, 4. आषाढः, June, July, 5. श्रावणः, July, August, 6. भाद्रः or भाद्रपदः, August, September, 7. आश्विनः or आश्वयुजः, September, October, 8. कार्त्तिकः, October, November, 9. मार्गशीर्षः, November, December, 10. पौषः, December, January, 11. माघः, January, February, 12. फाल्गुनः, February, March.—(Lunar month) चान्द्रमासः; 'half of a lunar month,' पक्षः; 'light or first half of the month,' शुक्लपक्षः, शुद्धपक्षः, सितपक्षः, पूर्व्वपक्षः, प्रथमपक्षः, देवपक्षः; 'dark or second half of the month,' कृष्णपक्षः, तमिस्रः, तमिस्रपक्षः, उत्तरपक्षः, अपरपक्षः, बहुलः; 'last day of the half-month,' पक्षान्तः, पक्षावसरः.—(Solar month) सौरमासः, सौरः; 'a month old,' मासजातः -ता -तं, मासीनः -ना -नं.

MONTHLY, *a.* मासिकः -की -कं, मासीनः -ना -नं, मास्यः -स्या -स्यं, प्रातिमासिकः -की -कं, मासानुमासिकः -का -कं; 'half-monthly,' आर्द्धमासिकः -की -कं, पाक्षिकः -की -कं; 'monthly allowance,' मासिकं.

MONTHLY, *adv.* प्रतिमासं, मासे मासे, मासि मासि, अनुमासं.

MONUMENT, *s.* (Memorial) स्मरणार्थकचिह्नं.—(Tomb, monument to the dead) चित्यं, चैत्यं, चिताचूडकं, चैत्रः, स्तूपः, समाधिः *m.*

MONUMENTAL, *a.* (Memorial) स्मरणार्थकः -का -कं.—(Belonging to a tomb) चैत्यसम्बन्धी -न्धिनी -न्धि (न्).

MOOD, *s.* (Temper of mind) वृत्तिः *f.*, चित्तवृत्तिः *f.*, मनोवृत्तिः *f.*, भावः, मनोभावः, प्रकृतिः *f.*, मनःस्थितिः *f.*, मनोवस्था; 'cheerful mood,' आनन्दवृत्तिः *f.*, हास्यवृत्तिः *f.*—(In grammar) वाच्यं, अर्थः.—(In logic) प्रकारः, रूपं.

MOODINESS, *s.* उदासीनता, क्रोधशीलता, विषण्णता, कार्कश्यं, वक्रता.

MOODY, *a.* क्रोधवशात् उदासीनः -ना -नं or उदासवृत्तिः -त्तिः -त्ति or विषण्णः -ण्णा -ण्णं, क्रोधशीलः -ला -लं, उत्कण्ठितः -ता -तं, दीनमनाः -नाः -नः (स्), उद्विग्नमनाः &c., चित्तोद्विग्नः -ग्ना -ग्नं, कर्कशभावः वा -वं, वक्रभावः &c., रुष्टः -ष्टा -ष्टं.

MOON, *s.* चन्द्रः -न्द्रकः, चन्द्रमाः *m.* (स्), सोमः -मा *m.* (न्), इन्दुः *m.*, विधुः *m.*—(Marked like a hare or rabbit) शशी *m.* (न्), शशाङ्कः, शशधरः, शशभृत् *m.*, शशबिन्दुः *m.*, शशलाञ्छनः.—(Marking the night) रजनीकरः, निशाकरः, क्षपाकरः, निशाकेतुः *m.*—(Lord of the night) निशापतिः *m.*, क्षपानाथः, यामिनीपतिः *m.*, निशीथिनीनाथः, रजनीनाथः.—(Gem of the night) रात्रिमणिः *m.*, निशामणिः.—(Lord of the constellations) नक्षत्रनाथः, नक्षत्रपः, ऋक्षेशः, उडुपः, उडुपतिः, उडुराट् *m.* (ज्), दाक्षायणीपतिः *m.*, ताराधिपतिः *m.*, भपतिः *m.*—(The repository and producer of nectar or ambrosia, which is supposed to be distilled in its rays) अमृतसूः *m.*, अमृतदीधितिः *m.*, अमृताधारः, अमृतसुत् *m.*, सुधानिधिः *m.*, सुधाधारः, सुधाभृतिः *m.*, सुधासूतिः *m.*, सुधांशुः, सुधाकरः, सुधाङ्कः, पीयूषरुचिः *m.*, पीयूषमहाः *m.* (स्), पीयूषनिधिः *m.*—(Having cool rays or radiance) शीतांशुः *m.*, शीतमयूखः, शीतमरीचिः *m.*, शीतभानुः *m.*, हिमांशुः *m.*, हिमकरः, हिमरश्मिः *m.*, हिमद्युतिः *m.*, शीतरुक् *m.* (च्), शीतगुः *m.*, हिमश्रयः, प्रालेयांशुः *m.*, तुहिनांशुः *m.*—(Having white rays or pale radiance) शुभ्रांशुः *m.*, सितांशुः, सितरश्मिः *m.*, सितदीधितिः *m.*, श्वेतधामा *m.* (न्), श्वेतरोचीः *m.* (स्), शुचिरोचीः *m.* (स्), छायाभृत् *m.*—(Marked like a deer) मृगाङ्कः, मृगचिह्नः *m.*, हरिणाङ्कः, हरिणकलङ्कः, मृगलाञ्छनः, मृगधरः, अमृगधरः.—(Containing many digits) कलानिधिः *m.*, कलापूर्णः, कलावान् *m.* (त्), कलाभृत् *m.*, कलापतिः *m.*—(Forming the crest of Śiva) शिवशेखरः, हरशेखरः, हरचूडामणिः *m.*—(Brother of Lakshmí, as having been reproduced with that goddess from the ocean when it was churned by the gods and asuras) लक्ष्मीसहजः, श्रीसहोदरः.—(Husband of Rohiní) रोहिणीपतिः *m.*, रोहिणीशः, रोहिणीवल्लभः.—(The butter of the ocean, or produced by the churning of the ocean) अब्धिनवनीतकः.—(Friend, companion or lord of the lotuses, many of these flowers opening their petals in the night and closing them in the day) कुमुदबान्धवः, कुमुदबन्धुः *m.*, कुमुदपतिः, कुमुदेशः, कुमुदप्रियः, कुमुदिनीपतिः *m.*, कुमुदिनीनायकः, अब्जः.—(Lord of plants or herbs) ओषधीनाथः, ओषधीपतिः *m.*, ओषधीशः.—(Drawn by white horses) श्वेतवाजी *m.* (न्), श्वेतवाहनः.—(Drawn by ten horses) दशवाजी *m.*—(Dispeller of darkness) तमोहरः, तमोनुद् *m.*, तमोनुदः, तमोघ्नः, तमोपहः, तिमिररिपुः *m.*—(Regulating the days of the month) तिथिप्रणीः *m.*, पर्व्वधिः *m.* (Garlanded with stars) तारापीडः.—(King of kings) राजराजः.—(Broken-bodied, having been cut in two by the trident of Śiva, as a punishment for having violated the wife of Vrihaspati) भग्नात्मा *m.*—(Lord of Brahmans) द्विजपतिः *m.*, द्विजराजः.—(Lord of the moonlight) कौमुदीपतिः *m.* Other names for the moon of less obvious derivation are जैवातृकः, ग्लौः, कैरवी *m.* (न्), कलापिनी, हरिः *m.*, मास् *m.*, चन्द्रः; 'the autumnal moon,' शरच्चन्द्रः; 'orb or disk of the moon,' चन्द्रबिम्बः, चन्द्रमण्डलं, चन्द्रगोलः -लं; 'day of the moon,' तिथिः.

See LUNAR; 'digit of the moon,' चन्द्रकला, चन्द्ररेखा, इन्दुरेखा, चन्द्रलेखा; 'full moon,' पूर्णचन्द्रः, पूर्णिमा, पूर्णेन्दुः. *See* FULL MOON; 'new moon,' नवशशी *m.* (न्), नवचन्द्रः, अमा, अमावसी, अमावासी, अमावस्या, अमावास्या, अमामसी, प्रतिपच्चन्द्रः, दर्शः, सूर्येन्दुसङ्गमः, कुहूः *f.*, तिथिक्षयः, नष्टेन्दुकला; 'moon of the first quarter,' बालचन्द्रः; 'day of new moon,' मासान्तः; 'full or new moon, or the last day of a lunar fortnight,' पञ्चदशी, पक्षान्तः; 'the first day of the moon's increase or wane, or of a lunar fortnight,' प्रतिपद् *f.*; 'fortnight of the waxing moon,' शुक्लपक्षः, सितपक्षः, शुद्धपक्षः; 'fortnight of the waning moon,' कृष्णपक्षः, तमिस्रपक्षः, उत्तरपक्षः; 'the full or change of the moon, or the junction of the 15th and 1st of a half-month,' पर्व्वसन्धिः *m.*, प्रतिपत्पञ्चदश्योरन्तरं; 'moon a little gibbous, or one digit less than full,' अनुमतिः *f.*, कलाहीनः; 'moon a little horned,' सिनीवाली; 'half moon,' चन्द्रार्द्धं; 'a false moon,' चन्द्राभासः; 'having a face like the moon,' चन्द्रमुखी *f.*, शशिवदना; 'rise of the moon,' चन्द्रोदयः; 'spot's on the moon's disk,' लाञ्छनं, कलङ्कः; 'the wife of the moon,' रोहिणी, चन्द्रकान्ता.

MOON-BEAM, *s.* चन्द्रपादः, शशिपादः, चन्द्रकिरणः, चन्द्ररश्मिः *m.*, शशिकिरणः, शशिकरः, शशिमयूखः, अंशुः *m.*, सोमांशुः *m.*, चन्द्रांशुः *m.*, चन्द्रिका, चन्द्रमरीचिः *m.*, पूर्णानकं.

MOONLESS, *a.* चन्द्रहीनः -ना -नं, शशिहीनः &c., नष्टचन्द्रः -न्द्रा -न्द्रं.

MOONLIGHT, *s.* चन्द्रप्रभा, शशिप्रभा, चन्द्रप्रकाशः, चन्द्रिका, चन्द्रिमा, ज्योत्स्ना, चन्द्रज्योतिस् *n.*, चन्द्रातपः, चन्द्रगोलिका, कौमुदी, चन्द्रशाला, दीपिका, चान्द्री, मालती, तुहिनं, अमृततरङ्गिणी, कैरवी, हरिचन्दनं, मुदी, चन्द्रकः.

MOONLIGHT, *a.* ज्यौत्स्नः -त्स्नी -त्स्नं, ज्योत्स्नायुक्तः -क्ता -क्तं; 'a moonlight night,' ज्योत्स्नी, ज्यौत्स्नी -त्स्निका.

MOON-PLANT, *s.* चन्द्रवल्लरी, सोमवल्लरी -रिः *f.*, सोमवल्लिका, सोमलता, सोमः, वयस्था, वयःस्था, ब्रह्मी, ब्राह्मी, मत्स्याक्षी.

MOONSHINE, *s*, चन्द्रप्रभा, चन्द्रद्युतिः *f.*, चन्द्रदीप्तिः. *See* MOONLIGHT.

MOON-STONE, MOON-GEM, *s.* चन्द्रकान्तः, चन्द्रमणिः *m.*, सोमकान्तः, चन्द्रोपलः, चन्द्रिकाद्रावः.

MOONSTRUCK, *a.* विक्षिप्तबुद्धिः -द्धिः -द्धि, विप्लुतबुद्धिः &c., हतबुद्धिः &c.

MOONY, *a.* अर्द्धचन्द्रध्वजाङ्कितः -ता -तं, अर्द्धचन्द्रध्वजविशिष्टः -ष्टा -ष्टं.

MOOR, *s.* जङ्गलभूमिः *f.*, खिलभूमिः *f.*, अनुपभूः *f.*, कच्छः, कच्छभूः.

To MOOR, *v. a.* रज्जुना or रज्ज्वा नौकां बन्ध् (c. 9. बध्नाति, बन्धुं).

MOORED, *p. p.* रज्जुना or गुणेन बद्धः -द्धा -द्धं, रज्जुबद्धः &c.

MOOR-LAND, *s.* अनूपभूमिः *f.*, कच्छभूमिः *f.*, खिलभूः *f.* *See* MOOR.

MOORY, *a.* अनूपः -पा -पं, आनूपः -पी -पं, कच्छः -च्छा -च्छं, खिलः -ला -लं.

MOOSE, *s.* (Kind of deer) शम्बरः, सम्बरः.

To MOOT, *v. a.* (Discuss) विचर् (c. 10. -चारयति -यितुं), वितर्क् (c. 10. -तर्कयति -यितुं), विवद् (c. 1. -वदति -ते -दितुं), विवादास्पदीकृ, विचारास्पदीकृ, वितर्कास्पदीकृ.—(Bring forward) उपन्यस् (c. 4. -अस्यति -असितुं).

MOOT, MOOT-CASE, MOOT-POINT, *s.* विचारविषयः, विचारपदं, विचारास्पदं, विचारस्थलं, विवादास्पदं, विवादविषयः, सन्दिग्धविषयः, अनिष्पन्नविषयः, अमिद्धान्तः.

MOOTED, *p. p.* विचारितः -ता -तं, वादग्रस्तः -स्ता -स्तं, विचारास्पदीकृतः &c.

MOP, *s.* मार्जनी, सम्मार्जनी, शोधनी, विमार्गः, परिष्कारकः.

To MOP, *v. a.* मृज् (c. 2. मार्ष्टि -ष्टुं), सम्मृज्, शुध् (c. 10. शोधयति -यितुं).

To MOPE, *v. n.* विषद् (c. 1. -षीदति -षत्तुं), अवसद्, उदास् (c. 2. -आस्ते -आसितुं), विषण्णीभू, उद्विग्नीभू, दुर्मनस् (nom. दुर्मनायते), उन्मनस्, ग्लै (c. 1. ग्लायति, ग्लातुं).

MOPING, MOPISH, *a.* विषण्णः -ण्णा -ण्णं, अवसन्नः -न्ना -न्नं, उदासीनः -ना -नं, उदासी -सिनी -सि (न्), दुर्मनाः -नाः -नः (स्), उद्विग्नमनाः &c., उन्मनाः &c.

MOPPET, MOPSEY, *s.* पटपुत्रिका, वस्त्रपुत्रिका, वस्त्रखण्डमयी पुत्तलिका.

MORAL, *a.* (Virtuous) सदाचारः -रा -रं, सदाचारी -रिणी -रि (न्), धार्म्मिकः -की -कं, धर्म्माचारी &c., धर्म्मचारी &c., साधुः -धुः -ध्वी -धु, साधुवृत्तः -त्ता -त्तं, सुचरितः -ता -तं, सच्चरितः -ता -तं, साध्वाचारः -रा -रं, धर्म्यः -र्म्या -र्म्यं, धर्म्मी &c., सुधर्म्मा -र्म्मा -र्म्म (न्), धर्म्मभृत् *m. f. n.*, न्यायाचारः &c., वृत्तवान् -वती -वत् (त्), सव्यसनी &c., पुण्यः -ण्या -ण्यं, सात्त्विकः -की -कं, नीतिमान् &c.—(Relating to the practice of men, or to actions good or evil) लोकव्यवहारसम्बन्धी &c., लोकाचारविषयकः -का -कं, सदसदाचारसम्बन्धी &c., सदसद्व्यवहारविषयः -या -यं, विधिनिषेधान्वितः -ता -तं.—(Subject to moral laws, bound by precepts and prohibitions) विधिनिषेधाधीनः -ना -नं, विधिनिषेधायत्तः -त्ता -त्तं, विधिनिषेधवान् &c., नियमाधीनः &c.—(Supported by reason or probability, founded on experience) अनुमानसिद्धः -द्धा -द्धं, युक्तिसिद्धः &c., आनुमानिकः -की -कं, यौक्तिकः -की -कं, अनुभूतिसिद्धः &c., युक्तिभाव्यः -व्या -व्यं, अनुमानमूलः -ला -लं; 'moral philosophy,' नीतिशास्त्रं, नीतिविद्या, व्यवहारशास्त्रं, नीतिः *f.*

MORAL, *s.* (Moral doctrine taught by a fiction) तात्पर्य्यं, तात्पर्य्यार्थः, अभिप्रायः, भावार्थः, तात्त्विकं, ध्वनितार्थः, गर्भः.

MORALIST, *s.* (Teacher of moral duties) नीतिशास्त्रोपदेशकः, नीत्युपदेष्टा *m.* (ष्टृ), नीतिशिक्षकः, धर्म्मोपदेशी *m.* (न्), नीतिविवेचकः, सदसद्विवेचकः, नीतिशास्त्रज्ञः, नीतिविद्याज्ञः, कर्त्तव्याकर्त्तव्योपदेशकः.—(Mere moral person) नीतिमार्गावलम्बी *m.*, केवलनीतिमार्गाश्रयी.

MORALITY, *s.* (System of moral duties) नीतिः *f.*, नीतिविद्या, नीतिशास्त्रं, व्यवहारशास्त्रं, नयः, नयविद्या, नयशास्त्रं, अर्थशास्त्रं, विनयविद्या, शीलविद्या, सदसद्विचारः, सदसद्विवेकः, कर्त्तव्याकर्त्तव्यविचारः, कर्त्तव्याकर्त्तव्यविवेकः; 'as invented by Vrihaspati,' बार्हस्पत्यं.—(Practice of moral duties, virtue) धर्म्मानुष्ठानं, धर्म्माचरणं, धर्म्माचारता, धर्म्मः, धर्म्मत्वं, सदाचारत्वं, सच्चरितं, सुचरितं, साधुशीलता, पुण्यता, पुण्यशीलत्वं, साधुवृत्तं.—(Conformity to the principles of rectitude) धर्म्मानुसारित्वं, न्यायानुसारः, न्यायः, धर्म्यता, धर्म्मत्वं.

To MORALIZE, *v. a.* (Apply to the purposes of moral instruction) हितोपदेशास्पदीकृ, धर्म्मोपदेशास्पदीकृ, नीतिशिक्षास्पदीकृ.

To MORALIZE, *v. n.* (Make moral reflections) हितोपदेशं कृ, धर्म्मोपदेशं कृ, नीत्युपदेशं कृ, हितोपदेशं लिख् (c. 6. लिखति, लेखितुं).

MORALIZER, *s.* हितोपदेशकः, धर्म्मोपदेष्टा *m.* (ष्टृ), नीतिशिक्षकः.

MORALLY, *adv.* (According to the rules of morality) नीतिशास्त्रतस्, नीतिशास्त्रवत्, नीतितस्.—(Virtuously) धर्म्मेण, धर्म्मतस्, न्यायतस्.—(According to reason or the usual course of things) अनुमानेन, युक्त्या, अनुमानतस्, युक्तितस्, यथासम्भवं.

MORALS, *s.* (System of morality) नीतिः *f.*, नीतिशास्त्रं, नीतिविद्या. *See* MORALITY. (Conduct) आचारः, आचरणं, आचरितं, चरितं, व्यवहारः, वृत्तिः *f.*, प्रवृत्तिः *f.*, वृत्तं, रीतिः *f.*; 'good morals,' विनयः, सदाचारः, सच्चरितं, सुचरितं, साधुचरितं, शीलः, सुशीलः.

MORASS, *s.* कच्छः, कच्छभूः *f.*, अनूपः, अनूपभूः *f.*, जलाढ्यभूमिः *f.*, पङ्किलभूः *f.*, अाप्यभूः *f.*

MORBID, *a.* अस्वस्थः -स्था -स्थं, असुस्थः &c., रोगी -गिणी -गि (न्), रोगवान् -वती -वत् (त्), सरोगः -गा -गं, विकारी &c., विकृतः -ता -तं, व्याधितः -ता -तं.

MORBIDNESS, *s.* अस्वस्थता, अस्वास्थ्यं, असुस्थता, सरोगता, रोगित्वं.

MORBIFIC, MORBIFICAL, *a.* रोगजनकः -का -कं, रोगकरः -रा -रं, अस्वास्थ्यजनकः &c., व्याधिकरः -रा -रं, अनारोग्यकरः &c., रोगदः -दा -दं.

MORBOSE, *a.* रोगजनितः -ता -तं, रोगजः -जा -जं, असुस्थः -स्था -स्थं.

MORDACIOUS, *a.* दंशकः -का -कं, दंशनकारी -रिणी -रि (न्).

MORDACITY, *s.* दंशकता, दंशनशीलता, दंशनं, दंशनगुणः.

MORDICANT, *a.* खादकः -का -कं, अरुष्करः -री -रं, दंशकः &c.

MORE, *a.* अधिकः -का -कं, अधिकतरः -रा -रं, अधिकसंख्यकः -का -कं, भूयान् -यसी -यः (स्), भूयिष्ठः -ष्ठा -ष्ठं, उत्तरः -रा -रं, अतिरेकी -किणी -कि (न्), अतिरिक्तः -क्ता -क्तं, परः -रा -रं, परतरः -रा -रं; often expressed by the comparative affixes तर and ईयस्; as, 'more in number,' बहुतरः -रा -रं, बंहीयान् &c.; 'more or less,' न्यूनाधिकः -का -कं, न्यूनातिरेकः -का -कं; 'more than a thousand,' परःसहस्रः -स्रा -स्रं; 'more than a hundred,' परं शतं.

MORE, *s.* आधिक्यं, अधिकता, आतिरेक्यं, अतिरिक्तता, उद्रेकः, आतिशय्यं; 'more or less,' न्यूनाधिक्यं, न्यूनातिरेक्यं, न्यूनातिरिक्तं; 'neither more nor less,' अन्यूनानतिरिक्तं; 'no more,' कृतं, अलं with inst. c.; as, 'no more of this ceremony!' कृतम् आदरेण, अलम् आदरेण; 'what more need I say?' किम् अन्यत्, किम् बहुना.

MORE, *adv.* अधिकं, अधिकतरं, भूयस्, भूयिष्ठं, अतिरिक्तं, परं; or often expressed by the comparative affixes तर and ईयस्; as, 'more heavy,' गुरुतरः -रा -रं, गरीयान् -यसी -यः (स्); 'more and more,' उत्तरोत्तरं, अधिकाधिकं; 'how much more?' किम्पुनर्, किमुत, सुतरां.—(Any more, again) पुनर्, भूयस्.

MOREOVER, *s.* अपिच, अपरञ्च, अपरं, परं, परञ्च, परन्तु, अपरन्तु, अन्यच्च, किञ्च, अधिकन्तु, अधिकं, पुनश्च, अपितु, अपि, अथ.

MORIBUND, *a.* मुमूर्षुः -र्षुः -र्षु, मृतकल्पः -ल्पा -ल्पं, मृतप्रायः -या -यं.

MORINGA, *s.* *See* MORUNGA.

MORION, *s.* शिरस्त्रं, शिरस्त्राणं, शिरस्कं, मस्तकरक्षणी, शीर्षकं.

MORN, MORNING, *s.* प्रभातं, प्रातःकालः, प्रातःसमयः, प्रभातकालः, प्रत्यूषकालः, प्रत्यूषः, प्रत्यूषस् *n.*, प्रत्युषः, प्रत्युषस् *n.*, उषः, उषस् *n.*, उषाकालः, विभातं -तकं, भातः, व्युष्टं, अरुणः, अरुणोदयः, कल्यं, काल्यं, अहर्मुखं, दिवसमुखं, दिनारम्भः, दिनादिः *m.*, निशावसानं, निशान्तः -न्तं, क्षपान्तः, रात्रिविगमः, प्राबोधिकं, वासरसङ्गः.—(As opposed to afternoon) पूर्व्वाह्णः or पूर्व्वाह्नः, प्राह्णः, पूर्व्वाह्नकालः, प्राह्णकालः; 'in the morning,' प्रातर्, प्रभाते, प्रातःकाले, प्रभातकाले, प्रत्यूषे, उषा, प्रगे, प्राह्णे, पूर्व्वाह्णे, निशान्ते, पूर्व्वेद्युस्; 'to be chanted in the morning,' प्रातर्गेयः -या -यं; 'early in the morning,' सुप्रातर्, अतिप्रभाते, अतिप्रगे; 'to-morrow morning,' श्वः प्रभाते; 'good morning,' सुप्रभातं; 'morning, noon, and evening,' त्रिकालं.

MORNING, *a.* प्रातर् in comp., प्रातःकालीनः -ना -नं, प्रातःकालिकः -की -कं, प्रभातीयः -या -यं, प्राभातिकः -की -कं, प्रगेतनः -नी -नं, प्राह्णेतनः -नी -नं, पूर्व्वाह्णेतनः -नी -नं, उषस्यः -स्या -स्यं, औषिकः -की -कं, औषसः -सी -सं, वैयुष्टः -ष्टी -ष्टं; 'morning duties,' प्रातःकृत्यं; 'morning ablution,' प्रातःस्नानं; 'morning meal,' प्रातराशः, प्रातर्भोजनं.

MORNING-GOWN, *s.* प्रातःकाले भृतो लघुप्रावारः, प्रातर्वसनं, प्रातर्वस्त्रं.

MORNING-STAR, *s.* प्रभातसूचकतारा, प्रभाततारा, शुक्रः.

MORNING-TWILIGHT, *s.* प्रातःसन्ध्या, प्राक्सन्ध्या, पूर्व्वसन्ध्या, प्रभातसन्ध्या.

MOROSE, *a.* कर्कशस्वभावः -वा -वं, कटुस्वभावः -वा -वं, कर्कशभावः -वा -वं, कर्कशशीलः -ला -लं, वक्रभावः -वा -वं, सदावक्रः -क्रा -क्रं, रूक्षस्वभावः -वा -वं, नैकृतिकः -की -कं, प्रतीपः -पा -पं, उदासीनः -ना -नं, उदासवृत्तिः -त्तिः -त्ति, अरुन्तुदः -दा -दं, दुःशीलः -ला -लं, वामशीलः &c.

MOROSELY, *adv.* कर्कशस्वभावात्, कटुस्वभावात्, कर्कशं, कार्कश्येन, वक्रभावेन, सदावक्रवत्, दुःशीलत्वात्, रूक्षस्वभावात्.

MOROSENESS, *s.* कार्कश्यं, कर्कशता, कर्कशशीलता, कटुता, कटुशीलता, दुःशीलता, दौःशील्यं, वक्रता, वक्रशीलता, स्वभाववक्रता, स्वभावकार्कश्यं, स्वभावकटुता, उदासीनता, उदासवृत्तित्वं, प्रतीपता, वामशीलता, निकृतिः *f.*, शुक्रता.

MORROW, *s.* (The day next after the present) परदिवसः, परदिनं, श्वस्तनदिवसः, आगामिदिवसः, कल्यं; 'to-morrow, on the morrow,' श्वस्, परेद्युस्, परदिने, परदिवसे, परेद्यवि, कल्ये, कल्ये, अन्येद्युस्.—(The next day subsequent to any day) उत्तरदिवसः, उत्तरदिनं, उत्तरेद्युस्; 'the day after to-morrow,' परश्वस्; 'to-morrow morning,' श्वः प्रभाते.

MORSEL, *s.* (Mouthful, small piece of food) ग्रासः, पिण्डः, कवलः; 'a morsel as big as an egg,' अण्डपरिमाणो ग्रासः.—(Piece, bit) खण्डः -ण्डकः, क्षुद्रभागः, लवः, शकलः, भिन्नं, भिन्नं, भित्तिः *f.*; 'a dainty morsel,' सुग्रासः.

MORSURE, *s.* दंशनं, विदंशनं, दंशः, दंशकरणं.

MORTAL, *a.* (Subject to death) मरणाधीनः -ना -नं, मर्त्यः -र्त्या -र्त्यं, मर्त्तव्यः -व्या -व्यं, नाशाधीनः -ना -नं, कालाधीनः -ना -नं, मृत्य्वधीनः -ना -नं, मरणधर्म्मकः -का -कं, मृत्युधर्म्मकः -का -कं, मृत्युवशः -शा -शं, मरणवशः &c., अन्तवान् -वती -वत् (त्), अनित्यः -त्या -त्यं.—(Deadly) प्राणघातकः -का -कं, प्राणहरः -रा -रं, प्राणान्तिकः -की -कं, प्राणान्तकः &c., जीवान्तकः &c., प्राणहारी -रिणी -रि (न्), प्राणनाशकः -का -कं, मारात्मकः -का -कं, मृत्युजनकः -का -कं, मर्म्मभेदी -दिनी &c., मर्म्मान्तिकः &c., अन्तकरः -रा -रं.—(Belonging to man, human) मानुषः -षी -षं -षिकः -की -कं, मनुष्यजातीयः -या -यं, मनुष्यधर्म्मकः -का -कं, पौरुषेयः -यी -यं; 'mortal state,' मानुषदशा.

MORTAL, *s.* (A human being) मर्त्यः, मनुष्यः, मानुषः, मानवः, प्राणी *m.* (न्), प्राणभृत् *m.*, जन्मी *m.* (न्), जन्मवान् *m.*, शरीरी *m.*, देही *m.*, देहभृत् *m.*, तनुभृत् *m.*, चेतनः, मृत्युपात्रं, मरणपात्रं.

MORTALITY, *s.* (Subjection to death) मरणाधीनता, मर्त्यता, मृत्युवशता, नाशाधीनता, मृत्युधर्म्मः, मरणधर्म्मः, अनित्यता.—(Human nature) मनुष्यता -त्वं, मानुष्यं, मानुषत्वं -ता, पुरुषता.—(Death, death of great numbers) मृत्युः *m.*, मरणं, क्षयः, नाशः, बहुनाशः, बहुजननाशः.

MORTALLY, *adv.* प्राणनाशेन, प्राणघातेन, सनाशं, सप्राणघातं, सप्राणनाशं; 'mortally wounded,' भिन्नमर्म्मा -र्म्मा -र्म्म (न्).

MORTAR, *s.* (Vessel in which substances are pounded) उलूखलं, उडूखलः -लं, उदूखलं; 'pestle and mortar,' उलूखलमुषले; 'pounded in a mortar,' उलूखलिकः -की -कं.—(Cement) सुधा, लेपः, विलेपः, चूर्णलेपः, कर्कररेपः, उदपेषः; 'very hard,' वज्रलेपः.

MORTGAGE, *s.* आधिः *m.*, स्थावराधिः *m.*, क्षेत्राधिः, स्थावरधनाधिः *m.*, आधानं, आधमनं, क्षेत्रन्यासः, स्थावरधनन्यासः, भूमिन्यासः, उपन्यासः, स्थावरबन्धकः, बन्धकः, उपनिधिः *m.*, भूमिनिक्षेपः.

To MORTGAGE, *v. a.* आधीकृ, क्षेत्रादि स्थावरधनं न्यस् (c. 4. -अस्यति

-यसितुं) or निक्षिप् (c. 6. -क्षिपति -क्षेप्तुं), न्यासं दा, बन्धकं दा, न्यासीकृ.

MORTGAGED, *p. p.* आधीकृतः -ता -तं, न्यासीकृतः -ता -तं, न्यस्तः -स्ता -स्तं, उपन्यस्तः &c.; 'to be mortgaged,' आधेयः -या -यं.

MORTGAGEE, *s.* आधिधारी *m.* (न्), न्यासधारी *m.* (न्), आधिग्राही *m.* (न्), बन्धकग्राही *m.*, बन्धकधारी *m.*, आधिग्राहकः.

MORTGAGER, *s.* आधिदाता *m.* (तृ), बन्धकदाता *m.*, आधीकर्त्ता *m.* (र्तृ).

MORTIFEROUS, *a.* मृत्युजनकः -का -कं, मरणावहः -हा -हं, प्राणघातकः &c.

MORTIFICATION, *s.* (In surgery, local extinction of life) मांसनाशः, मांसातिपाकः, मांसपाकः, चेतनानाशः, जीवित्वनाशः, मांसकोथः, मांसविद्रधिः *m.*, मांसपूतिः *f.*—(Subjugation of the passions and appetites) दमः, दान्तिः *f.*, दमनं, संयमः -मनं, इन्द्रियदमः, इन्द्रियजयः, इन्द्रियपराजयः, इन्द्रियसंयमः, जितेन्द्रियत्वं, इन्द्रियवशीकरणं, कामावसायः, वीतकामत्वं, विषयपराङ्मुखता.—(By penance, &c.) तपस्, तपश्चर्य्या, तपस्या, कृच्छ्रं, कायक्लेशः, वैराग्यं.—(Humiliation, vexation) अभिभवः, अभिभूतिः *f.*, मानभङ्गः, मानखण्डनं, अभिमानखण्डनं, मानहानिः *f.*, तेजोभङ्गः, दर्पभङ्गः, अपकर्षः -र्षणं, व्यथा, दुःखं, क्लेशः, विडम्बना.—(Disappointment) आशाभङ्गः, मनोभङ्गः, आशानाशः, इच्छानाशः, इच्छाविनाशः, इच्छाक्षयः, उत्साहभङ्गः.

MORTIFIED, *p. p.* (In surgery) नष्टमांसः -सा -सं, नष्टचेतनः -ना -नं, कोथवान् -वती -वत् (त्), अतिपक्वः -क्वा -क्वं.—(Subdued) दान्तः -न्ता -न्तं, दमितः -ता -तं, संयमितः -ता -तं, वशीकृतः -ता -तं, जितः -ता -तं; 'one whose passions are mortified,' जितेन्द्रियः, यतेन्द्रियः, संयतेन्द्रियः, वीतकामः, वीतरागः, वीतस्पृहः, विरक्तः, वैरागी *m.* (न्), जितकामः, जितकामक्रोधादिः *m.*—(Humiliated, vexed) अभिभूतः -ता -तं, पराभूतः -ता -तं, खण्डितः -ता -तं, भग्नमानः -ना -नं, क्लिष्टः -ष्टा -ष्टं, सव्यथः -था -थं, उद्विग्नः -ग्ना -ग्नं, विडम्बितः -ता -तं.

To MORTIFY, *v. a.* (Destroy the vitality of) जीवित्वं or चैतन्यं नश् (c. 10. नाशयति -यितुं), चेतनानाशं कृ, चैतन्यनाशं कृ.—(Subdue) दम् (c. 10. दमयति -यितुं), वशीकृ, जि (c. 1. जयति, जेतुं), पराजि; 'one's passions,' इन्द्रियाणि दम्, इन्द्रियदमनं कृ; 'the body,' शरीरक्लेशं कृ.—(Humble) अभिभू, अपकृष् (c. 1. -कर्षति -क्रष्टुं), मानं भञ्ज् (c. 7. भनक्ति, भंक्तुं) or खण्ड् (c. 10. खण्डयति -यितुं), अभिमानखण्डनं कृ, मानविध्वंसं कृ.—(Vex) क्लिश् (c. 9. क्लिश्नाति, क्लेशितुं), व्यथ् (c. 10. व्यथयति -यितुं), तप् (c. 10. तापयति -यितुं).

To MORTIFY, *v. n.* (Lose vitality, as flesh) नष्टचैतन्यः -न्या -न्यं भू, नष्टजीवित्वः -त्वा -त्वं भू, नष्टमांसः -सा -सं भू, मांसैकदेशे पूतीभू, कोथीभू.—(Practise austerities) तप् (c. 4. तप्यते), तपस् तप्, तपस् (nom. तपस्यति), तपश्चर्य्यां कृ, वैराग्याचरणं कृ, शरीरक्लेशं कृ, ब्रह्मचर्य्यं कृ.

MORTIFYING, *a.* मानभञ्जकः -का -कं, दर्पभञ्जकः &c., व्यथाकरः -रा -रं.

MORTISE, *s.* काष्ठच्छिद्रं, काष्ठसन्धिः *m.*, काष्ठग्रहणी, काष्ठधरणी, दारुच्छिद्रं, दारुसीवनं, काष्ठसीवनं, काष्ठरन्ध्रं.

To MORTISE, *v. a.* अन्यकाष्ठधरणार्थम् एककाष्ठाग्रं छिद् (c. 7. छिनत्ति, छेत्तुं), काष्ठद्वयसन्धानं कृ, काष्ठद्वयं सन्धा (c. 3. -दधाति -धातुं).

MORTMAIN, *s.* अन्यादेयभोगः, परादेयभोगः, अदेयभोगः.

MORUNGA, *s.* (Plant) शोभाञ्जनः, शोभनकः, शोभाञ्जनः, सोभाञ्जनः, शिग्रुः *m.*, तीक्ष्णगन्धः -न्धकः, अक्षीवः, आक्षीवः, काक्षीवः, मोचकः; 'its root,' शिग्रुमूलं; 'seed,' शिग्रुजं, शिग्रुबीजं.

MOSAIC, *a.* नानावर्णप्रस्तरखचितः -ता -तं, नानाविधप्रस्तरखुरितः -ता -तं, नानावर्णकुट्टिमप्रथितः &c.; 'mosaic work,' चित्रकर्म्म *n.* (न्).

MOSQUE, *s.* यावनधर्म्ममण्डपः, यावनधर्म्ममन्दिरं, यावनप्रासादः.

MOSS, *s.* शिलावल्का, शैवलः, शैवालः, शेवलः, शेवालः, शेपालः, शैवं, कावारं, शूकरी, शूकरी, शूकराक्रान्ता, वराहक्रान्ता.

MOSS-GROWN, *a.* शैवलावृतः -ता -तं, शैवलाच्छादितः -ता -तं, कृतशैवलः &c.

MOSSY, *a.* शैवालमयः -यी -यं, सशैवालः -ला -लं, शैवालयुक्तः -क्ता -क्तं, शैवालितः -ता -तं, शेवालविशिष्टः -ष्टा -ष्टं, शैवली -लिनी -लि (न्).

MOST, *a.* भूयिष्ठः -ष्ठा -ष्ठं, अधिकतमः -मा -मं, अधिकतरः -रा -रं, अधिकः -का -कं, अधिकसंख्यकः -का -कं, परमः -मा -मं, उत्तमः -मा -मं; 'the most part,' भूयान् -यसी -यः (स्), भूयिष्ठः &c., बहुतरः -रा -रं, बहुतमः -मा -मं; 'for the most part,' भूयिष्ठं, प्रायस्, प्रायशस्, बाहुल्येन, बहुशस्.

MOST, *adv.* भूयिष्ठं, आधिक्यं, अधिकतरं, अधिकतमं, भूयस्, परमं; often expressed by the superlative affixes तम and इष्ठ, as, 'most excellent,' श्रेष्ठतमः -मा -मं, श्रेष्ठः -ष्ठा -ष्ठं; 'most heavy,' गुरुतमः -मा -मं, गरिष्ठः &c., or by अति or सु or अत्यन्त or अतिशय prefixed; as, 'most powerful,' अतिबलवान् &c.

MOST, *s.* अधिकभागः, भूयिष्ठभागः, परभागः, परमभागः, बहुतरभागः, बहुतमभागः, अधिकपक्षः, उत्तमभागः, उत्तमपक्षः, अधिकांशः.

MOSTLY, *adv.* भूयिष्ठं, प्रायस्, प्रायशस्, प्रायेण, बहुशस्, बाहुल्येन, बहुधा, भूयस्, सामान्यतस्, बहुतरं, साधारण्येन.

MOTE, *s.* अणुः *m.*, अणुरेणुः *m.*, त्रसरेणुः *m. f.*, रिक्षा, लिक्षा, कणः, कणिका, पारिमाण्डल्यं, अणुरेणुजालं, जालसूर्य्यमरीचिस्थं रजस्, जालकान्तरप्रविष्टादित्यरश्मिस्थितं यद्रजस्, ध्वंसी *m.* (न्), भ्रमागमः.

MOTH, *s.* पतङ्गः, पतङ्गमः, पतङ्गिका, शलभः, शरभः, कीटः; 'moth-like,' शालभः -भी -भं.

MOTH-EATEN, *a.* कीटभक्षितः -ता -तं, कीटखादितः -ता -तं.

MOTHER, *s.* माता *f.* (तृ), जननी, जनयित्री, जनिका, प्रजनिका, प्रजायिनी, प्रसविनी, प्रसवित्री, प्रसवकर्त्री, प्रसूः *f.*, सूः *f.*, अम्बा, अम्बिका, अम्बालिका, जनी, प्रसवस्थली, धात्री, मा, उत्पादिका; 'mother of a son or of offspring,' पुत्रिणी, पुत्रवती, सुतिनी, सुतवती, प्रजावती, अपत्यवती; 'of one child,' एकोदरा; 'of seven children,' सुतसप्तका; 'who has recently had a child,' प्रसूतिका, सूतिका, प्रसूता; 'step-mother,' विमाता *f.* (तृ), सपत्नी माता; 'mother-in-law,' श्वश्रूः *f.*; 'mother and father,' मातापितरौ *m.* du., मातरपितरौ; 'mother of a hero,' वीरप्रसविनी; 'mother's house,' मातृगृहं; 'mother's family,' मातृकुलं; 'born of a different mother,' भिन्नोदरः -रा -रं, अन्योदरः &c., असोदरः &c.

MOTHER, *a.* (Native) स्वाभाविकः -की -कं, साहजिकः -की -कं, सहजः -जा -जं, जन्म or जाति in comp.; as, 'mother-tongue,' जन्मभाषा, जातिभाषा; 'mother-country,' जन्मभूमिः *f.*

MOTHER-IN-LAW, *s.* श्वश्रूः *f.*, गुरुपत्नी; 'mother and father in law,' श्वश्रूश्वशुरौ *m.* du.

MOTHER-OF-PEARL, *s.* शुक्तिवधूः *f.*, शुक्तिपुटं, मुक्तास्फोटः, मुक्तागारं.

MOTHERHOOD, *s.* मातृत्वं -ता, जननीत्वं, मातृभावः, पुत्रिणीत्वं, सुतिनीत्वं.

MOTHERLESS, *a.* अमातृकः -का -कं, मातृहीनः -ना -नं, मृतमातृकः &c., मातृरहितः -ता -तं, गतमातृकः -का -कं, हीनमातृकः &c.

MOTHERLY, *a.* मातृसन्निभः -भा -भं, मातृसदृशः -शी -शं, मातृकल्पः -ल्पा -ल्पं, मातृतुल्यः -ल्या -ल्यं, मातृकः -का -कं, मातृ in comp.

MOTHERLY, *adv.* मातृवत्, मातृरूपेण, मातृभावेन, मातृधर्म्मानुसारेण.

MOTION, *s.* गतिः *f.*, गमनं, चलनं, चारः, चरणं, सञ्चरणं, सरणं, चोपनं, चेलितं, चेलिका; 'swift motion,' त्वरितगतिः *f.*; 'slow motion,' मन्दगतिः *f.*, मन्दगमनं; 'backward motion,' विपरीतगतिः *f.*—(Animal action) चेष्टा, चेष्टितं.—(Gesture) इङ्गितं, इङ्गः, अङ्ग-

विक्षेपः, आङ्गिकचेष्टा.—(Agitation) क्षोभः, अन्तःक्षोभः, वेगः.—(Impulse, feeling) वेगः, मनोवेगः, मनोवृत्तिः *f.*, मनोविकारः, रागः, चित्तरागः, चित्तक्षोभः, भावः, वासना, बुद्धिः *f.*, कल्पना, रसः.—(Proposition made) कर्त्तव्योपन्यासः, उपन्यासः, कर्त्तव्यसूचकवाक्यं, वाक्यं.—(Stool) रेकः, रेचनं -ना, उच्चारः, उच्चरितं; 'to put in motion,' चल् (c. 10. चालयति -यितुं).

To MOTION, *v. a.* इङ्गितं कृ, सङ्केतं कृ, अङ्गविक्षेपं कृ, अङ्गसञ्चालनं कृ.

MOTIONLESS, *a.* अचलः -ला -लं, निश्चलः -ला -लं, निश्चेष्टः -ष्टा -ष्टं, अचेष्टः &c., निश्चेष्टः &c., गतिहीनः -ना -नं, गतिशून्यः -न्या -न्यं, निष्कम्पः -म्पा -म्पं, अस्पन्दः -न्दा -न्दं, निष्पन्दः &c., स्थिरः -रा -रं, स्तब्धः -ब्धा -ब्धं, अगतिकः -का -कं, सन्नः -न्ना -न्नं.

MOTIVE, *a.* (Causing motion, &c.) चालकः -का -कं, प्रवर्त्तकः -का -कं, सञ्चारकः -का -कं, प्रयोजकः -का -कं, व्यापारी -रिणी -रि (न्), हेतुकः -का -कं, कारणिकः -की -कं.

MOTIVE, *s.* (That which incites to action, cause) प्रयोजनं, हेतुः *m.*, कारणं, निमित्तं -त्तकं, प्रवृत्तिनिमित्तं, प्रवर्त्तकं, प्रयोजकं, प्रयोगः, उत्तेजनं, उत्तेजकं, निदानं, निबन्धनं, कार्य्यं; 'without motive,' अकस्मात्, निष्प्रयोजनं, असति प्रयोजने, अकारणात्, हेतुना विना; 'relation between the motive and the effect,' प्रयोज्यप्रयोजकभावः.

MOTLEY, *a.* चित्रविचित्रः -त्रा -त्रं, नानाविधः -धा -धं, नानाप्रकारः -रा -रं, नानावर्णः -र्णा -र्णं, नानारूपः -पा -पं, भिन्नरूपः -पा -पं, नानाङ्गी -ङ्गिणी -ङ्गि (न्), बहुरङ्गी &c., विविधः &c.

MOTOR, MOTORY, *a.* चालकः -का -कं, सञ्चारकः -का -कं, सारकः &c.

MOTTLED, *a.* चित्रितः -ता -तं, चित्रः -त्रा -त्रं, कर्बुरितः -ता -तं.

MOTTO, *s.* वाक्यं, वचनं, लेखः, श्लोकः, कविता, विज्ञापनलेखः, मुद्रालेखः.

MOULD, *s.* (Earth, soil) मृत्तिका, मृद् *f.*, मृदा, पांशुः *m.*, भूमिः *f.*, स्थलं; 'black mould,' नीलमृत्तिका.—(Concretion formed from damp) कलङ्कः, शुक्लकलङ्कः, क्लेदजकलङ्कः, क्लेदजमलं.—(Cast) संस्कारः, साकारः, आकृतिः *f.*, मूर्त्तिः *f.*, संस्थानं, संधानः, रूपं.

To MOULD, *v. a.* (Cause to contract mould) सकलङ्कं -ङ्कां कृ, कलङ्केन दुष् (c. 10. दूषयति -यितुं), कलङ्क (nom. कलङ्कयति -यितुं), क्लेदजमलेन दुष्.—(Fashion, form) संस्कृ, कृप् (c. 10. कल्पयति -यितुं), रूप् (c. 10. रूपयति -यितुं), सरूपं -पां कृ, रच् (c. 10. रचयति -यितुं), संस्कारं कृ.

To MOULD, *v. n.* (Contract mould) सकलङ्कः -ङ्का -ङ्कं भू, क्लेदयाप्रत्वात् शुक्लकलङ्कं or शुक्लमलं बन्ध् (c. 9. बध्नाति, बन्धुं), कलङ्कावृतः -ता -तं भू.

MOULDED, *p. p.* कल्पितः -ता -तं, संस्कृतः -ता -तं.—(Kneaded) मर्दितः &c.

To MOULDER, *v. n.* चूर्णीभू, क्षि in pass. (क्षीयते), विशॄ in pass. (-शीर्य्यते), विशीर्णीभू, जॄ (c. 4. जीर्य्यति), शनैः शनैः क्षि or नश् (c. 4. नश्यति), अल्पाल्पशः क्षीणीभू or न्यूनीभू.

MOULDERING, *part.* शनैः शनैः क्षीयमाणः -णा -णं, अल्पाल्पं विशीर्य्यमाणः &c.

MOULDINESS, MOLDINESS, *s.* सकलङ्कता, समलता, मलिनता, कलङ्कयत्वं.

MOULDING, MOLDING, *s.* संस्कारः.—(Projecture of a wall) भित्तिशीर्षं -र्षकं.

MOULDY, *a.* सकलङ्कः -ङ्का -ङ्कं, समलः -ला -लं, मलिनः -ना -नं, कलङ्कावृतः -ता -तं, कलङ्कमयः -यी -यं, कलङ्कवान् -वती -वत् (त्), मलावृतः &c., शुक्लकलङ्कावृतः &c.

To MOULT, MOLT, *v. n.* (Shed the feathers) पक्षान् or वार्षिकपक्षान् पत् (c. 10. पातयति -यितुं) or मुच् (c. 6. मुञ्चति, मोक्तुं, c. 10. मोचयति -यितुं) or निर्मुच्, वार्षिकपक्षपातं कृ, पक्षनिर्मोकं कृ, पक्षगलनं कृ, पक्षपरिवर्त्तनं कृ.

MOULTED, *p. p.* गलितपक्षः -क्षा -क्षं, मुक्तपक्षः &c., पतितपर्णः -र्णा -र्णं.

MOULTING, *s.* पक्षपातः, पक्षपतनं, वार्षिकपक्षपतनं, पक्षनिर्मोकः, पक्षगलनं, वार्षिकपक्षगलनं, वार्षिकपक्षपरिवर्त्तनं.

MOUND, *s.* (Bank, rampart) वप्रः -प्रं, चयः, सेतुः *m.*, पिण्डनः, पिण्डलः, प्राकारः, धूलिकुट्टिमं, धूलिकेदारः.—(Elevation, hillock, heap of earth) मृत्तिकाचयः, उन्नतभूभागः, क्षुद्रपर्वतः, नाकुः *m.*, वामलूरः.

To MOUNT, *v. n.* (Rise on high) ऊर्द्ध्वं गम् (c. 1. गच्छति, गन्तुं), उपरि गम्, उच्चैर् गम्, ऊर्द्ध्वगमनं कृ, उपरिगमनं कृ.—(Mount on horseback) अश्वम् आरुह् (c. 1. -रोहति -रोढुं) or अधिरुह् or अध्यारुह् or समारुह् or अभिरुह् or अधिक्रम् (c. 1. -क्रामति -क्रमितुं), अश्वारोहणं कृ; 'to mount along side,' अन्वारुह्, समन्वारुह्.

To MOUNT, *v. a.* (Raise on high) ऊर्द्ध्वीकृ, उच्चीकृ, ऊर्द्ध्वं गम् (c. 10. गमयति -यितुं), उच्चैः कृ.—(Climb, ascend, as a hill or a horse) आरुह् (c. 1. -रोहति -रोढुं), अधिरुह्, अध्यारुह्, समारुह्, अभिरुह्, अधिक्रम् (c. 1. -क्रामति -क्रमितुं), अवस्कन्द् (c. 1. -स्कन्दति -स्कन्तुं), आरोहणं कृ.—(Place upon) आरुह् in caus. (-रोपयति -यितुं), समारुह्.

MOUNTAIN, *s.* पर्वतः, गिरिः *m.*, शैलः, अद्रिः *m.*, महीधरः, भूधरः, वसुधाधरः, धरणीधरः, धराधरः, महीध्रः, जगतीधरः, भूभृत् *m.*, भूध्रः, क्ष्माभृत् *m.*, क्षितिधरः, उर्व्वीधरः, कुध्रः, धरः, धरणीकीलकः, शिखरी *m.* (न्), पृथुशेखरः, तुङ्गशेखरः, सानुमान् *m.* (त्), ककुद्मान् *m.* (त्), ककुद्मी *m.* (न्), नगः, शिलोच्चयः, गोत्रः, अहार्य्यः, ग्रावा *m.* (न्), बलाहकः, पृथुनितम्बः; 'crest or peak of a mountain,' शिखरं, गिरिशिखरं, पर्वतशृङ्गं, पर्वताग्रं, पर्वतमस्तकः, ककुद् *f.*; 'brow of a mountain,' गिरिमूर्द्धा *m.* (न्); 'side or ridge,' कटकः, नितम्बः; 'mountain with three peaks,' त्रिकूटः, त्रिककुद् *m.*; 'Western mountain, behind which the sun sets,' अस्तः, चरमाचलः, चरमाद्रिः *m.*, चरमक्ष्माभृत् *m.*, पश्चिमपर्वतः; 'Eastern mountain, over which the sun rises,' उदयः, उदयपर्वतः, उदयगिरिः *m.*, उदयशैलः, उदयाचलः, उदयाद्रिः *m.*, पूर्व्वपर्वतः; 'hill near a mountain,' पादः, प्रत्यन्तपर्वतः; 'land at the foot of a mountain,' उपत्यका; 'on the top,' अधित्यका; 'range of mountains,' कुलपर्वतः, कुलाचलः, कुलगिरिः *m.*, कुलशैलः. There are seven principal ranges of mountains given, viz. महेन्द्रः, मलयः, सह्यः, शुक्तिमान्, ऋक्षः, विन्ध्यः, पारिपात्रः -त्रकः or पारियात्रः -त्रकः. Other names of celebrated mountains or mountain ranges are हिमवान्, हिमालयः, हिमाद्रिः *m.*, हेमकूटः, आम्रकूटः, माल्यवान् *m.* (त्), निषधः, मैनाकः also called हिरण्यनाभः and हिमवत्सुतः, गन्धमादनः, चित्रकूटः, क्रौञ्चः or क्रोञ्चः.

MOUNTAIN, *a.* पार्वतः -ती -तं, पर्वतीयः -या -यं, पार्वतीयः -या -यं, गैरः -री -रं, गैरिकः -की -कं, गैरेयः -यी -यं, शैलः -ली -लं, पार्वतेयः -यी -यं, पर्वत or गिरि in comp.; as, 'mountain torrent,' गिरिनदी.

MOUNTAINEER, *s.* पर्वतवासी *m.* (न्), गिरिवासी *m.*, पर्वतीयजनः, पार्वतीयः, गिरिजः, शैलजनः, गिरिभूः *m.*, शैलाटः.

MOUNTAINOUS, *a.* पार्वतीयः -या -यं, पार्वतेयः -यी -यं, पर्वतीयः -या -यं, सपर्वतः -ता -तं, पर्वतमयः -यी -यं, सशैलः -ला -लं, समहीधरः -रा -रं.

MOUNTEBANK, *s.* छद्मवैद्यः, मिथ्यावैद्यः, कितवः, धूर्त्तः, कापटिकः.

MOUNTED, *p. p.* आरूढः -ढा -ढं, आरोपितः -ता -तं, रोपितः -ता -तं, समारोपितः -ता -तं, समारूढः &c., अधिरूढः &c., रूढः &c.; 'on horseback,' अश्वारूढः, अश्वारोही *m.* (न्), हयारूढः, तुरगारूढः.

MOUNTING, *s.* (Rising) ऊर्द्ध्वगमनं, उपरिगमनं.—(Ascending, getting on horseback) आरोहः -हणं, अधिरोहणं, समारोहः -हणं.—

(Placing on horseback) आरोपणं, समारोपणं, आरूढीकरणं.

To MOURN, *v. n.* शुच् (c. 1. शोचति -चितुं), अनुशुच्, परिशुच्, शोकं कृ, शोकार्त्तः -र्त्ता -र्त्तं भू, शोचनं कृ, खिद् (c. 4. खिद्यते, खेत्तुं), परिखिद्, दुःख (nom. दुःखायते, दुःखीयते), विलप् (c. 1. -लपति -पितुं), प्रलप्, लप्, उद्विज् (c. 6. -विजते -जितुं), व्यथ् (c. 1. व्यथते -थितुं), प्रव्यथ्, सम्प्रव्यथ्, तप् in pass. (तप्यते), परितप्, सन्तप्, रुद् (c. 2. रोदिति -तुं), परिदेव् (c. 1. -देवते -वितुं), दु (c. 4. दूयते); 'mourn exceedingly,' शुच् in freq. (शोशुच्यते).

To MOURN, *v. a.* (Grieve for) अनुशुच् (c. 1. -शोचति -चितुं), परिदेव् (c. 1. -देवयति -ते -वितुं), विलप् (c. 1. -लपति -पितुं), क्रन्द् (c. 1. क्रन्दति -न्दितुं), आक्रन्द्, रुद् (c. 2. रोदिति -तुं), अभिक्रुश् (c. 1. -क्रोशति -क्रोष्टुं).

MOURNED, *p. p.* शोचितः -ता -तं, अनुशोचितः &c., विलपितः -ता -तं.

MOURNER, *s.* शोचकः, अनुशोचकः, शोकी *m.* (न्), खेदी *m.* (न्), परिदेवी *m.* (न्), परिदेवकः, विलपनकृत् *m.*, विलापी *m.*, शोककर्त्ता *m.* (र्त्तृ), अनुतापी *m.*, खिद्यमानः.—(One who wears a funeral dress) अमङ्गलवेषी *m.* (न्).

MOURNFUL, *a.* (Expressing sorrow) शोकसूचकः -का -कं, खेदसूचकः &c., शोकबोधकः -का -कं शोकार्पकः -का -कं.—(Sorrowful, said of persons) शोकी -किनी -कि (न्), शोकार्त्तः -र्त्ता -र्त्तं, शोकान्वितः -ता -तं, सशोकः -का -कं, खेदी &c., खेदयुक्तः -क्ता -क्तं; खिन्नः -न्ना -न्नं, उद्विग्नः -ग्ना -ग्नं, उद्विग्नमनाः -नाः -नः (स्), विषादी &c., दुःखी &c., दुःखान्वितः -ता -तं, दुर्मनाः &c., विमनाः &c., समन्युः -न्युः -न्यु.—(Causing sorrow, lamentable) शोकजनकः &c., शोकदः -दा -दं, शोचनीयः -या -यं, शोच्यः -च्या -च्यं, शोचितव्यः -व्या -व्यं, शोकावहः -हा -हं, दुःखावहः &c., खेदजनकः -का -कं, शोकार्हः -र्हा -र्हं, शोचनार्हः &c.

MOURNFULLY, *adv.* सशोकं, सखेदं, सदुःखं, सोद्वेगं, शोकेन, शोकपूर्व्वं.

MOURNFULNESS, *s.* शोकः, सशोकता, दुःखं, दुःखिता, उद्वेगः, उद्विग्नता, खेदः, शोच्यता, शोचनीयता, शोकजनकता.

MOURNING, *s.* (Sorrow, lamentation) शोकः, शोचनं, अनुशोचनं, खेदः, विलपनं, विलापः, परिदेवनं -ना, रोदनं, रुदनं, क्रन्दनं, आक्रन्दनं, दुःखं.—(Dress worn by mourners) अमङ्गलवेषः, अशुभवेषः, अमङ्गलकालीनवेषः, अशुभकालीनवेषः, शोकसूचकवेषः. According to the Hindu notion defilement is contracted by the death of a relation; hence the following terms, expressive of a season of mourning, imply a season of impurity; as, अशौचं, आशौचं, कालाशौचं, अघाहः; 'one in such a state,' आशौची -चिनी -चि (न्).

MOUSE, *s.* मूषिकः -का, मूषकः, आखुः *m.*, इन्दुरः, इन्दुरुः *m.*, गिरिः *f.*, गिरिका, दीना, विलेशयः, वज्रदन्तः, धान्यारिः *m.*, चिक्का.

MOUSE-TRAP, *s.* मूषिकग्रहणार्थं कूटयन्त्रं, मूषिकोन्माथः, मूषिकपञ्जरः.

MOUTH, *s.* मुखं, वदनं, आस्यं, वक्त्रं, आननं, लपनं, तुण्डं -ण्डः, तुण्डिः -ण्डी *m. f.*, ऊधन् indec.; 'the corner of the mouth,' सृक्कन् *n.*, सृक्कं, सृक्वन् *n.*, सृक्वं, सृक्कि *n.*, सृक्वि *n.*, सृक्विन् *n.*, सृक्किन्, सृक्किणी *f.*, सृक्विणी; 'the two corners,' सृक्कणी *n.* du., ओष्ठप्रान्तौ *m.* du.; 'dryness of the mouth,' मुखशोषः; 'washing the mouth,' मुखमार्जनं, मुखप्रक्षालनं; 'rincing the mouth,' आचमनं; 'to open the mouth', मुखं व्यादा; 'to stop the mouth,' वाक्स्तम्भं कृ; 'from the mouth,' मुखतस्; 'relating to the mouth,' मुखतीयः -या -यं.—(Aperture, orifice) मुखं, छिद्रं, द्वारं, प्रमुखं.—(Mouth of a river) सम्भेदः, सङ्गमः, सिन्धुसङ्गमः.

To MOUTH, *v. a.* and *n.* (Speak with a big pompous voice) उच्चैःस्वरेण or गर्व्वितस्वरेण वद् (c. 1. वदति -दितुं), उद्धतस्वरेण वद्.—(Chew, devour) चर्व् (c. 1. चर्वति -र्वितुं, c. 10. चर्वयति -यितुं), ग्रस् (c. 1. ग्रसति -सितुं), भक्ष् (c. 10. भक्षयति -यितुं).

MOUTHFUL, *s.* ग्रासः, पिण्डः, मुखपूरणं, कवलः, कवकः, गण्डूषः -षा, गडोलः, गण्डोलः, गुडेरः -रकः, सिनः; 'three mouthfuls of water,' जलगण्डूषत्रयं.

MOUTHLESS, *a.* मुखहीनः -ना -नं, मुखरहितः -ता -तं, निर्मुखः -खा -खं.

MOUTHPIECE, *s.* मुखनाली, पुटः, जिह्वाली; 'of a flute,' दर्दुरपुटः.—(One who speaks for others) मुखं.

MOVABLE, *a.* चरः -रा -रं, चरिष्णुः -ष्णुः -ष्णु, चलः -ला -लं, चलनः -ना -नं, चलिष्णुः &c., जङ्गमः -मा -मं, गमनशीलः -ला -लं, गमनयोग्यः -ग्या -ग्यं, गमनशक्यः -क्या -क्यं, अस्थावरः -रा -रं, त्रसः -सा -सं, जगत् -गती -गत् (त्), इङ्गः -ङ्गा -ङ्गं, चलनक्षमः -मा -मं; 'movable and immovable,' चराचरः -रा -रं, चलाचलः -ला -लं.

MOVABLENESS, *s.* चरिष्णुता, चलिष्णुता, गमनशीलता, चलनयोग्यता, गतिशीलत्वं, अस्थावरता, चरभावः, चलभावः, गमनशक्तिः *f.*

MOVABLES, *s. pl.* अस्थावराणि *n. pl.*, अस्थावरद्रव्यं -व्याणि *n. pl.*, चरद्रव्याणि, चलद्रव्याणि, जङ्गमद्रव्याणि, अस्थावरधनं.

To MOVE, *v. a.* (Put in motion, cause to change place) चल् (c. 10. चालयति -यितुं), विचल्, सञ्चल्, सृ (c. 10. सारयति -यितुं), चर् (c. 10. चारयति -यितुं), सञ्चर्, स्थानान्तरं गम् (c. 10. गमयति -यितुं), स्थानान्तरीकृ.—(Impel) प्रेर् (c. 10. -ईरयति -यितुं), नुद् (c. 6. नुदति, नोत्तुं), प्रणुद्, चुद् (c. 10. चोदयति -यितुं), प्रचुद्, सञ्चुद्.—(Draw) कृष् (c. 1. कर्षति, c. 6. कृषति -ते, क्रष्टुं), समाकृष्.—(Incite to action, influence) प्रवृत् (c. 10. -वर्त्तयति -यितुं), प्रयुज् (c. 10. -योजयति -यितुं), प्रोत्सह् (c. 10. -साहयति -यितुं), उत्सह्, चेष्ट् (c. 10. चेष्टयति -यितुं), प्ररुच् (c. 10. -रोचयति -यितुं), प्रेर्.—(Excite tenderness, pity, &c.) करुणां जन् (c. 10. जनयति -यितुं), कारुण्यं or दयाम् उत्पद् (c. 10. -पादयति -यितुं), हृदयं व्यध् (c. 4. विध्यति, व्यद्धुं), हृदयं स्पृश् (c. 6. स्पृशति, स्प्रष्टुं), हृदयम् आर्द्रीकृ.—(Affect) उपहन् (c. 2. -हन्ति -न्तुं); 'with grief,' शोकोपहतं -तां कृ.—(Agitate) क्षुभ् (c. 10. क्षोभयति -यितुं), विक्षुभ्, व्याक्षुभ्.—(Make a proposal) उपन्यस् (c. 4. -अस्यति -असितुं), कर्त्तव्योपन्यासं कृ, कर्त्तव्योपस्थापनं कृ, कर्त्तव्योद्भावनं कृ.—(Move away, move off) अपसृ, अपानुद्, अपनुद्, व्यपनुद्.—(Move a piece at chess) शारिं परिणी (c. 1. -णयति -णेतुं) or समन्ताद् नी, शारिपरिणायं कृ.

To MOVE, *v. n.* चल् (c. 1. चलति -लितुं), सृ (c. 1. सरति, सर्त्तुं), प्रसृ, चर् (c. 1. चरति -रितुं), गम् (c. 1. गच्छति, गन्तुं), या (c. 2. याति -तुं), इ (c. 2. एति -तुं), इङ्ग् (c. 1. इङ्गति -ङ्गितुं), चुप् (c. 1. चोपति -पितुं), संह् (c. 1. संहते -हितुं), गतिविशिष्टः -ष्टा -ष्टं भू.—(Change place) स्थानान्तरं गम्, स्थलान्तरं गम् or या.—(Change residence) गृहान्तरं गम्, वासान्तरं गम्.—(Have vital action) चेष्ट् (c. 1. चेष्टते -ष्टितुं), आत्मानं चेष्ट्, चेष्टां कृ.—(Begin a march) प्रस्थानं कृ, प्रस्था (c. 1. -तिष्ठति -स्थातुं); 'move on,' प्रसृ, प्रगम्, प्रया, चल्; 'move off,' अपसृ, अपया, अपक्रम् (c. 1. -क्रामति, क्रमितुं), अपगम्; 'move about,' इतस्ततः सृ or चल्, परिसृ.

MOVE, *s.* चलनं, सरणं, गमनं, चेष्टा, इङ्गितं, स्थानान्तरं, स्थानान्तरगमनं.—(At chess, &c.) परिणायः, परीणायः, शारिनयनं, खेला -लनं.

MOVED, *p. p.* चालितः -ता -तं, चलितः -ता -तं, चारितः -ता -तं, सञ्चारितः -ता -तं, सारितः -ता -तं, प्रचलितः -ता -तं, स्थानान्तरगतः -ता -तं, स्थानान्तरप्राप्तः -प्ता -प्तं, स्थलान्तरापन्नः -न्ना -न्नं.—(Impelled) प्रेरितः

-ता -तं, प्रणोदितः -ता -तं, प्रणुन्नः -न्ना -न्नं, प्रचोदितः -ता -तं.—(Drawn) कृष्टः -ष्टा -ष्टं, कर्षितः -ता -तं.—(Incited) प्रवर्त्तितः -ता -तं, प्रयोजितः -ता -तं, नियोजितः -ता -तं, प्रोत्साहितः &c., प्रवृत्तः -त्ता -त्तं.—(Excited to pity) जातकारुण्यः -ण्या -ण्यं, जातदयः -या -यं, दयास्पृष्टहृदयः -या -यं.—(Affected) स्पृष्टः -ष्टा -ष्टं, उपहतः -ता -तं.—(Agitated) क्षुब्धः -ब्धा -ब्धं, क्षोभितः -ता -तं.

MOVEMENT, *s.* चलनं, सरणं, चारः, चरणं, सञ्चरणं, गतिः *f.*, गमनं, गमः, चोपनं, चेष्टा, चेष्टितं, इङ्गितं, स्थानान्तरं, स्थलान्तरं, स्थानान्तरगमनं, स्थानभेदः.—(Agitation) क्षोभः, कम्पः.—(In music) ग्रामः, तालः, मूर्च्छना.

MOVER, *s.* (That which gives motion) चालकः, सारकः, सञ्चारकः.—(That which moves) चरः, चलः, चलनः.—(Proposer) उपन्यासकृत्, कर्त्तव्योपन्यासकृत्, कर्त्तव्योपस्थापकः.—(One who impels to action) प्रवर्त्तयिता *m.* (तृ), प्रवर्त्तकः, प्रयोजकः, प्रेरकः.

MOVING, *a.* (Exciting the affections) करुणाजनकः -का -कं, कारुण्योत्पादकः &c., दयाजनकः &c., करुणात्मकः &c., हृदयवेधकः &c., हृदयङ्गमः -मा -मं, हृदयस्पृक् (श्), मर्म्मस्पृक्, हृदयभेदी -दिनी -दि (न्), चित्तवेधकः &c., चित्तद्रावकः &c., भावार्द्रकारी &c., चित्तार्द्रकारी &c.

MOVING, *part.* चलन् -लन्ती -लत् (त्), सरन् &c., चरन् &c., चलः -ला -लं, चरः -रा -रं, सरः -रा -रं, सरणः -णा -णं, चलनः -ना -नं, जङ्गमः -मा -मं, कम्पनः -ना -नं, गतिमान् -मती -मत् (त्), गामी -मिनी &c., चारी &c., सारी &c., यायी &c., सर्पी &c., गत्वरः -रा -रं, सृत्वरः -रा -रं; 'moving in the air,' आकाशगामी &c.

MOVINGLY, *adv.* यथा हृदयं स्पृश्यते तथा, यथा करुणा जायते तथा, यथा कारुण्यम् उत्पद्यते तथा.

MOW, *s.* (Of hay or grain) तृणराशिः *m.*, धान्यराशिः *m.*, धान्यचितिः *f.*, धान्यचयः, धान्यसञ्चयः, तृणोत्करः, धान्योत्करः.

To MOW, *v. a.* दात्रेण or लवित्रेण छिद् (c. 7. छिनत्ति, छेत्तुं) or अवछिद् or लू (c. 9. लुनाति, लवितुं) or कृत् (c. 6. कृन्तति, कर्त्तितुं) or अवकृत्, दो or दा (c. 4. द्यति, c. 2. दाति -तुं).

MOWED, MOWN, *p. p.* दात्रछिन्नः -न्ना -न्नं, दात्रलूनः -ना -नं, लवित्रछिन्नः &c., कर्त्तितः -ता -तं, अवकर्त्तितः &c., छिन्नः &c., लूनः &c.

MOWER, *s.* तृणच्छेदकः, तृणच्छिद्, तृणलवकः, तृणलविता *m.* (तृ), निर्दाता *m.*

MOWING, *s.* तृणच्छेदः -दनं, तृणलवनं, तृणकर्त्तनं, तृणलावः.

MUCH, *a.* बहुः -हुः -ह्वी -हु, बहुलः -ला -लं, प्रचुरः -रा -रं, विपुलः -ला -लं, बहुसंख्यकः -का -कं, भूरिः -रिः -रि, भृशः -शा -शं, सुभृशः &c., गाढः -ढा -ढं, प्रगाढः &c., वाढः &c., उद्गाढः &c., निर्भरः -रा -रं, भरः, अत्यन्तः -न्ता -न्तं, अत्यर्थः -र्था -र्थं, अतिरिक्तः -क्ता -क्तं, अतिमात्रः -त्रा -त्रं, नितान्तः -न्ता -न्तं, प्राज्यः -ज्या -ज्यं, पुष्कलः -ला -लं, भूयान् -यसी -यः (स्), भूयिष्ठः -ष्ठा -ष्ठं, प्रभूतः -ता -तं, उत्कटः -टा -टं, पुरुः -रुः -रु, पुरुहः -हा -हं, पुरुहुः -हुः -हु, अदभ्रः -भ्रा -भ्रं, स्फिरः -रा -रं, अतिवेलः -ला -लं, अति or अतिशय or सु prefixed; as, 'much pain,' अतिव्यथा, अतिशयवेदना; 'much time,' बहुकालः, दीर्घकालः; 'as much,' यावान् -वती -वत् (त्), यतिः -तिः -ति; 'so much,' तावान् &c., एतावान् &c., इयान् -यती &c., ततिः -तिः -ति; 'so much time,' तावत्कालं; 'how much?' कियान् &c., कियत्प्रमाणः -णा -णं, कतिः -तिः -ति, कतिथः -था -थं, कतिपयः &c.; 'how much time?' कियत्कालं, कियन्तं कालं.

MUCH, *adv.* बहु, भृशं, भूरि, गाढं, निर्भरं, अत्यन्तं, अतिशयं -येन, अत्यर्थं, नितान्तं, प्रगाढं, उद्गाढं, अतिमात्रं, एकान्ततस्, तीव्रं, अतितरां, सुतरां, महा in comp., सुमहत्, बलवत्, अति or अतिशय or सु prefixed; 'as much,' यावत्; 'so much,' तावत्, एतावत्, तावन्मात्रं, इयत्; 'how much?' कियत्, कति; 'how much more?' किमुत, किम्पुनर्, सुतरां.

MUCH, *s.* बहुत्वं, बाहुल्यं, प्राचुर्य्यं, भूयस् *n.*, बहुभागः; 'much of what we know about the heavens is founded on calculation,' आकाशीयज्ञानम्भूयो गणितेन जायते; 'to make much of,' बहु मन् (c. 4. मन्यते, मन्तुं).

MUCHNESS, *s.* बहुत्वं -ता, बाहुल्यं, प्राचुर्य्यं, प्राज्यता, प्रचुरता -त्वं, विपुलता.

MUCILAGE, *s.* मेदस् *n.*, वसा, वपा, अस्थिस्नेहः, अस्थिमेदस् *n.*, कफः, श्लेष्मा *m.* (न्), श्लेष्मकः, चिक्कणवस्तु *n.*, मेदुरवस्तु, स्निग्धवस्तु.

MUCILAGINOUS, *a.* चिक्कणः -णा -णं, चिक्किणः -णा -णं, मेदुरः -रा -रं, श्लेष्मणः -णा -णं, कफमयः -यी -यं, कफगुणकः -का -कं, मेदस्वी -स्विनी -स्वि (न्), स्निग्धः -ग्धा -ग्धं, श्लेष्मलः -ला -लं.

MUCK, *s.* (Dung) पुरीषं, गोमयं, अमेध्यं.—(Dirt) मलं, अमेध्यं, पङ्कः, कुपङ्कः, कर्दमः, कल्कं, जम्बालः -लं, कलुषं; 'To run a muck,' उन्मत्तवद् अभिधाव्य यान् कांश्चित् सम्मुखीभूतजनान् अभिहन् (c. 2.-हन्ति-न्तुं).

To MUCK, *v. a.* अमेध्येन or मलेन लिप् (c. 6. लिम्पति, लेप्तुं), पङ्केन लिप्.

MUCK-HEAP, MUCK-HILL, *s.* अमेध्यराशिः *m.*, मलराशिः *m.*, मलसञ्चयः.

MUCK-SWEAT, *s.* भृशस्वेदः, अतिस्वेदः, निर्भरस्वेदः, अत्यन्तस्वेदः.

MUCK-WORM, *s.* अमेध्यकीटः, मलजः कीटः, पङ्कजः कृमिः.

MUCKY, *a.* समलः -ला -लं, मलवान् -वती -वत् (त्), मलिनः -ना -नं, मलमयः -यी -यं, पङ्की -ङ्किनी -ङ्कि (न्), मलपङ्की &c., पङ्किलः -ला -लं, अमेध्यः -ध्या -ध्यं, कलुषी &c., सकर्दमः -मा -मं.

MUCOUS, MUCULENT, *a.* (Slimy, like mucus) चिक्कणः -णा -णं, चिक्किणः -णा -णं, मेदुरः -रा -रं, श्लेष्मगुणकः -का -कं, कफसगुणः -णा -णं, श्लेष्मसगुणः -णा -णं, श्लेष्मलः -ला -लं, श्लेष्मणः -णा -णं, श्लैष्मिकः -की -कं.—(Secreting mucus) कफोत्पादकः -का -कं, श्लेष्मोत्पादकः &c., मलोत्पादकः &c., कफादिमलोत्पादकः &c., श्लेष्मजनकः -का -कं, श्लेष्मकरः -रा -रं, कफकरः &c.

MUCOUSNESS, *s.* श्लेष्मत्वं, सश्लेष्मत्वं, सकफत्वं, चिक्कणता, मेदुरता.

MUCUS, *s.* (Viscid substance secreted by a mucous membrane) श्लेष्मा *m.* (न्), श्लेष्मादिमलं, कफादिमलं, मलं, इन्द्रियमलं; 'of the nose,' सिंहानं, सिंहाणं, सिङ्घाणं -णकं, शिङ्घाणकं, नासामलं, नासिकामलं; 'of the throat,' कफः, श्लेष्मा *m.* (न्), क्लेदनः, क्लेदकः; 'of the urethra, &c.,' पुष्पिका; 'of the bowels,' आमः.

MUD, *s.* पङ्कः, कर्दमः, जम्बालः -लं, जलकल्कः, निषद्वरः, चिकिलः, शादः, परिक्षा, दलाढ्यः, चुलुकः, विजपिलं, द्रापः; 'soft mud,' पङ्ककर्वटः; 'free from mud,' निष्पङ्कः -ङ्का -ङ्कं.

MUDDINESS, *s.* पङ्कता, सपङ्कता, पङ्किलत्वं, सकर्दमता, सजम्बालता, कलुषता, कालुष्यं, समलता, मालिन्यं, मलवत्त्वं, आविलत्वं.

To MUDDLE, *v. a.* कलुष (nom. कलुषयति -यितुं), मलिन (nom. मलिनयति -यितुं), आविल (nom. आविलयति -यितुं), दुष् (c. 10. दूषयति -यितुं), कलुषीकृ, समलीकृ, मलिनीकृ, आविलीकृ.—(Intoxicate slightly) ईषदुन्मत्तीकृ, ईषन्मूढीकृ.

MUDDLED, *p. p.* कलुषितः -ता -तं, मलिनितः -ता -तं, दूषितः -ता -तं.

MUDDY, *a.* पङ्किलः -ला -लं, पङ्की -ङ्किनी -ङ्कि (न्), सपङ्कः -ङ्का -ङ्कं, पङ्कमयः -यी -यं, बहुपङ्कः -ङ्का -ङ्कं, प्रचुरपङ्कः &c., सकर्दमः -मा -मं, कार्दमः -मी -मं, सजम्बालः -ला -लं, मलपङ्की &c., पङ्कभारकः -का -कं.—(Turbid, foul) कलुषः -षा -षं -षी -षिणी -षि (न्), आविलः -ला -लं, मलिनः -ना -नं, समलः -ला -लं, मलवान् -वती &c., मलीमसः -सा -सं, मलदूषितः -ता -तं.

MUDDY-HEADED, MUDDLE-HEADED, *a.* स्थूलबुद्धिः -द्धिः -द्धि, जडबुद्धिः &c.

MUD-WALL, *s.* पङ्कभित्तिः *f.*, पङ्कनिर्म्मितः प्राकारः.

MUFF, *s.* शीतकाले स्त्रीलोकभृतं लोममयं हस्ताच्छादनं or हस्तावरणं or हस्तत्राणं.

MUFFIN, *s.* शिथिलपिष्टकविशेषो यो नवनीताक्तो भूत्वा खाद्यते.

To MUFFLE, *v. a.* मुखग्रीवादि वस्त्रेण बन्ध् (c. 9. बध्नाति, बन्द्धुं) or आवृ (c. 5. -वृणोति -वरितुं -रीतुं) or आच्छद् (c. 10. -छादयति -यितुं) or अवरुध् (c. 7. -रुणद्धि -रोद्धुं) or परिवेष्ट् (c. 1. -वेष्टते -ष्टितुं, c. 10. -वेष्टयति -यितुं) or आवेष्ट्.

MUFFLED, *p. p.* वस्त्रबद्धः -द्धा -द्धं, वस्त्रपरिवेष्टितः -ता -तं, वस्त्रावरुद्धः &c., वस्त्राच्छादितः -ता -तं, वस्त्रावृतः -ता -तं, आच्छन्नः -न्ना -न्नं, समाच्छन्नः &c.

MUFFLER, *s.* मुखाच्छादनं, मुखावरणं, मुखाच्छादनवस्त्रं, मुखावगुण्ठनं.

MUG, *s.* पानपात्रं, पानभाजनं, कांस्यं, कंसः -सं, कंशः, कांश्यं, मृत्कांस्यं, जलपात्रं, जलभाजनं, जलाधारः.

MUGGY, MUGGISH, *a.* उष्णक्लिन्नः -न्ना -न्नं, आर्द्रग्रीष्मः -ष्मा -ष्मं, आर्द्रनिर्वातः -ता -तं, क्लिन्ननिर्वातः -ता -तं.

MULBERRY, *s.* तूदः, तूपः, क्रमुकः, ब्रह्मदारुः *m.*, पाहातः, टङ्कानकः.

MULCT, *s.* दण्डः, धनदण्डः, अर्थदण्डः, पणः, साहसं, दण्डलेशः.

To MULCT, *v. a.* दण्ड् (c. 10. दण्डयति -यितुं), धनं दा in caus. (दापयति -यितुं), साध् (c. 10. साधयति -यितुं), दण्डं प्रणी (c. 1. -णयति -णेतुं).

MULE, *s.* अश्वतरः -री, वेशरः, वेसरः, वेगसरः, खेसरः, प्रखरः, अतिभारगः, मयः, निघृष्वः.

MULETEER, MULE-DRIVER, *s.* अश्वतरपालः -लकः, अश्वतरप्रेरकः, अश्वतरप्रणोदकः, वेशरपः, वेशरपालः.

MULIEBRITY, *s.* स्त्रीता -त्वं, नारीत्वं, स्त्रीभावः, नारीभावः, स्त्रैणं.

MULISH, *a.* अश्वतरस्वभावः -वा -वं, अश्वतरवत् प्रतीपः -पा -पं.

To MULL, *v. a.* व्यञ्जनादिना वास् (c. 10. वासयति -यितुं), वासितं -तां कृ.

MULLER, *s.* शिलापट्टः, शिलापुत्रः -त्रकः, शिला, पेषणं -णिः -णी *f.*, पेषाकः, पेषणशिला, गृहकच्छपः, क्षोदः.

MULLIGRUBS, *s.* अन्त्रशूलं, अन्त्रवेदना, उदरव्यथा, परिणामशूलः -लं.

MULLION, *s.* वातायने or वातायनमध्ये व्यवधायकप्रस्तरः.

MULTANGULAR, *a.* बहुकोणः -णा -णं, बह्वस्रः -स्रा -स्रं, अनेककोणः &c.

MULTIFARIOUS, *a.* बहुविधः -धा -धं, अनेकविधः &c., विविधः &c., पृथग्विधः &c., नानाविधः &c., व्याविधः &c., बहुप्रकारः -रा -रं, अनेकप्रकारः &c., नानारूपः -पा -पं, बहुरूपः &c., भिन्नरूपः &c.

MULTIFORM, *a.* बहुरूपः -पा -पी -पं, नानारूपः &c., अनेकरूपः &c., अनेकाकारः -रा -रं, नानाकारः &c., बहुप्रकारः &c., बहुविधः -धा -धं, नानाप्रकारः &c., नानाकृतिः -तिः -ति.

MULTIFORMITY, *s.* रूपबाहुल्यं, आकारबाहुल्यं, बहुरूपता, नानारूपता, अनेकरूपता, अनेकाकारता, बहुविधता.

MULTILATERAL, *a.* बहुपार्श्वः -र्श्वा -र्श्वं, अनेकपार्श्वः -र्श्वा -र्श्वं.

MULTILINEAL, *a.* बहुरेखः -खा -खं, बहुपंक्तिः -क्तिः -क्ति.

MULTINOMINAL, *a.* बहुनामकः -का -कं, बहुसंज्ञकः -का -कं.

MULTIPAROUS, *a.* बहुप्रसवः -वा -वं, बहुप्रजः -जा -जं.

MULTIPLE, *s.* (In Arithmetic or Algebra) गुणाकारः.

MULTIPLIABLE, MULTIPLICABLE, *a.* गुणनीयः -या -यं, गुण्यः -ण्या -ण्यं, गुणनशक्यः -क्या -क्यं, हननीयः -या -यं, घातव्यः -व्या -व्यं, वध्यः -ध्या -ध्यं, गुणनक्षमः &c.

MULTIPLICAND, *s.* गुणनीयं, गुण्यं, गुण्याङ्कः, हननीयं, वध्याङ्कः, पूरणीयं, पूरणीयाङ्कः.

MULTIPLICATION, *s.* (In Arithmetic, &c.) गुणनं, हननं, घातः, वधः, पूरणं, गुणत्वं -ता, अङ्कपूरणं, हतं, अभ्यासः, अङ्कवृद्धिः *f.*, संख्यावृद्धिः *f.*, प्रत्युत्पन्नं, गुणाकारः -रं. The Hindus have different methods of multiplication; as, 'cross multiplication,' वज्राभ्यासः, वज्रवधः, वज्रघातः; 'duodecimal multiplication,' गोमूत्रिका; 'multiplication by a figure divided into squares,' कपाटसन्धिः *m.*; 'multiplication according to the places,' स्थानगुणनं; 'by sub-multiples of the multiplier,' विभागगुणनं; 'by dividing the multiplier into parts, and taking the sums of the products of the multiplier,' खण्डगुणनं; 'by the whole multiplier at once,' स्वरूपगुणनं.—(Act of increasing) बहुलीकरणं, प्रचुरीकरणं, वर्धनं, वृद्धिः *f.*

MULTIPLICATIVE, *a.* गुणकः -का -कं, गुणकारः -री -रं, गुणनकारी &c.

MULTIPLICITY, *s.* बाहुल्यं, बहुत्वं -ता, बहुलत्वं -ता, अनेकत्वं -ता, अनैक्यं, प्रचुरत्वं, प्राचुर्य्यं, प्रभूतत्वं; 'multiplicity of meanings,' अर्थबाहुल्यं, बह्वर्थत्वं, अनेकार्थत्वं; 'of occupations,' उद्योगबाहुल्यं; 'of objects,' विषयबाहुल्यं.

MULTIPLIED, *p. p.* or *a.* (In Arithmetic) गुणितः -ता -तं, गुणीकृतः -ता -तं, हतः -ता -तं, पूरितः -ता -तं, आहतः -ता -तं, प्रत्युत्पन्नः -न्ना -न्नं, गुण in comp.; 'a thousand multiplied by seventy-one,' एकसप्ततिगुणितं सहस्रं; 'multiplied by two,' द्विगुणः -णा -णं, द्विगुणितः -ता -तं, द्विगुणीकृतः -ता -तं, द्विगुणीभूतः -ता -तं; 'a number multiplied by itself,' स्वगुणा संख्या; 'is multiplied,' हन्यते.—(Increased) बहुलीकृतः -ता -तं, प्रचुरीकृतः &c., बहुलीभूतः &c., वर्धितः -ता -तं, वर्धितसंख्यः -ख्या -ख्यं.

MULTIPLIER, MULTIPLICATOR, *s.* गुणकः, पूरकः, अङ्कपूरकः, गुणकाङ्कः, गुणः, प्रवृत्तिः *f.*

NOR, *adv.* न, न च, sometimes expressed by the prohibitive मा, or sometimes simply by वा in conjunction with a negative. *See* NEITHER, *conj.*

NORMAL, *a.* (Regular) वैधिकः -की -कं, यथाविधिः -धिः -धि, यथाक्रमः -मा -मं.—(Relating to rudiments, teaching rudiments) मूलविद्यासम्बन्धी -न्धिनी &c., विद्योपक्रमसम्बन्धी &c., विद्यारम्भोपदेशकः -का -कं, मूलविद्याशिक्षकः -का -कं.

NORTH, *s.* उत्तरा, उत्तरदिक् *f.* (श्), उत्तरदिशा, उत्तराशा, उदीची, कौवेरी, सौम्या. Kuvera, according to the Hindús, is the Regent of the North.

NORTH, *a.* उत्तरः -रा -रं, उत्तरस्थः -स्था -स्थं, उदीचीनः -ना -नं, उदङ् -दीची -दक् (च्), कौवेरः -री -रं; 'north-road,' उत्तरापथः; 'north-country,' उदीच्यः.

NORTH-EAST, *s.* प्रागुत्तरा, प्रागुदीची, पूर्व्वोत्तरं -रा, ऐशानी, अपराजिता; 'north-eastwards,' प्रागुत्तरेण, पूर्व्वोत्तरेण; 'north-east of the city,' प्रागुत्तरेण नगरात्.

NORTH-EAST, NORTH-EASTERLY, NORTH-EASTERN, *a.* प्रागुत्तरः -रा -रं, पूर्व्वोत्तरः -रा -रं, प्रागुदङ् -दीची -दक् (च्), प्रागुदीचीनः -ना -नं, प्रागुत्तरस्थः -स्था -स्थं, पूर्व्वोत्तरस्थः &c.

NORTHERLY, NORTHERN, *a.* उत्तरदिश्यः -श्या -श्यं, उत्तरः -रा -रं, उदीचीनः -ना -नं, उत्तरसम्बन्धी -न्धिनी -न्धि (न्); 'in a northerly direction,' उत्तरदिशि.

NORTH-POLE, NORTH-STAR, *s.* ध्रुवः, मेरुः *m.*, औत्तानपादिः *m.*

NORTHWARD, *a.* उत्तरदिश्यः -श्या -श्यं, उत्तरदिक्स्थः -स्था -स्थं, उदङ्मुखः -खी -खं, उत्तरस्थः -स्था -स्थं.

NORTHWARDS, *adv.* उत्तरेण -रात्, उत्तरतस्, उत्तरदिशि, उत्तरत्र.

NORTH-WEST, *s.* वायवी, वायुकोणः, वायुदिशा.

NORTH-WEST, NORTH-WESTERLY, NORTH-WESTERN, *a.* वायुकोणस्थः -स्था -स्थं, वायुदिक्स्थः &c., वायवः -वी -वं, वायवीसम्बन्धी -न्धिनी -न्धि (न्).

NORTH-WIND, *s.* उत्तरवायुः *m.*, उत्तरदिग्वायुः *m.*, उत्तरदिक्पवनः.

NOSE, *s.* नासा -सिका, नसा, नस्या, घ्राणं, घोणा, गन्धवहा, गन्धवाहः, गन्धज्ञा, गन्धनाली, प्रतिः *f.*, नाः *f.* (स्), नस्तः, नासिक्यं, नासिक्यकं, सिङ्घिनी, विकूणिका, तनुभस्त्रा, नक्रं, नकुटं, नकुटकं; 'aquiline nose,' शुकनासिका; 'having a sharp nose,' खरणसः -सा -सं, खरणाः -णाः -णः (स्); 'having a nose like a hoof,' खुरणसः -सा -सं, खुरणाः -णाः -णः (स्); 'having a flat nose,' नतनासिकः -का -कं, अवटीटः -टा -टं, अवनाटः -टा -टं, अवभ्रटः -टा -टं; 'having a prominent nose,' प्रलम्बघोणः -णा -णं; 'having a large nose,' उग्रनासिकः -का -कं; 'tip of the nose,' नासिकाग्रं, नासाग्रं; 'mucus of the nose,' नासिकामलं; 'running at the nose,' नासिकास्रावः, नासापरिस्रावः; 'thickening of the membrane of the nose,' नासानाहः; 'dryness of the nose,' नासाशोषः; 'breathing through the nose,' नासिकन्धमः -मा -मं; 'drinking through the nose,' नासिकन्धयः -यी -यं; 'led by the nose, as cattle, &c.' नस्तितः, नस्तोतः, नस्योतः.

NOSE-BRIDLE, *s.* (Rein passed through the nose of an ox) नास्यं, नासिकारज्जुः *m.f.*

NOSE-CUT, *a.* छिन्ननासः -सा -सं, छिन्ननासिकः -का -कं, छिन्ननाः -नाः -नः (स्).

NOSED, *a.* (Having a nose). *See* under NOSE.

NOSEGAY, *s.* कुसुमस्तवकः, पुष्पस्तवकः, पुष्पगुच्छः -च्छकः, गुच्छः -च्छकः, गुत्सः -त्सकः, गुप्त्रः, गुलुच्छः, समाली, कुटी, प्रकरः.

NOSELESS, *a.* अनासिकः -का -कं, विनासिकः -का -कं, विनसः -सा -सं, गतनासिकः -का -कं, निर्नासिकः &c., नासिकाहीनः -ना -नं, नासिकाशून्यः -न्या -न्यं, विखः -खा -खं, विखुः -खुः -खु, विख्यः -ख्या -ख्यं, विखुः &c., विखुः &c., विग्रः -ग्रा -ग्रं.

NOSOLOGY, *s.* रोगनिदानशास्त्रं, निदानविद्या, रोगवर्गीकरणविद्या.

NOSOPOETIC, *a.* रोगकरः -रा -रं, व्याधिजनकः -का -कं, रोगोत्पादकः &c.

NOSTRIL, *s.* नासारन्ध्रं, नासिकारन्ध्रं, नासाग्ररन्ध्रं, नासाविवरं, नासिकाच्छिद्रं, नासापुटं, नासाबिलं; 'air breathed through the nostrils,' स्वरः.

NOSTRUM, *s.* गूढौषधं, गुप्तौषधं, अप्रकाशितौषधं, मिथ्यौषधं.

NOT, *adv.* In absolute negation, denial, or refusal, 'not' is rendered by न, नो, ना, नहि. When prohibitive, by मा, मास्म, or sometimes by अलं or कृतं with instr. c. When privative, it is expressed by अ, अन्, निर्, वि prefixed; as, 'there is not,' नास्ति; 'he will not go,' न गमिष्यति; 'do not go,' मा गच्छ; 'do not grieve,' अलं शोकेन; 'not regardful,' अनपेक्षः -क्षा -क्षं, निरपेक्षः &c.; 'not at all,' अलेशं, न किञ्चिदपि; 'not so,' नैवं. In prohibitive phrases मा

may be used with the 3d pret., the augment being cut off; as, 'do not grieve' मा॰शोचीः; 'do not fear,' मा॰भैषीः. The interrogative 'is not?' is rendered by ननु.

NOTABLE, *a.* (Memorable) स्मरणीयः -या -यं, स्मरणार्हः -र्हा -र्हं.—(Remarkable, distinguished, notorious) विशिष्टः -ष्टा -ष्टं, विशेष in comp., प्रसिद्धः -द्धा -द्धं, लोकप्रसिद्धः &c., ख्यातः -ता -तं, लोकख्यातः &c., उत्कृष्टः -ष्टा -ष्टं.

NOTABLENESS, *s.* स्मरणीयता, प्रसिद्धता, लोकप्रसिद्धता, विशिष्टता.

NOTABLY, *adv.* प्रसिद्धं, लोकप्रसिद्धं, स्मरणीयं, विशिष्टप्रकारेण.

NOTARY, *s.* कायस्थः, लेखकः, लिपिकारः, लिपिजीवी *m.* (न्), लेख्यपत्रप्रमाता *m.* (तृ), पत्रप्रमाणजीवी.

NOTATION, *s.* अङ्कनं, अङ्ककरणं, चिह्नकरणं.—(In music) प्रस्तरः.

NOTCH, *s.* छेदः, अवच्छेदः, विच्छेदः, छिद्रं; 'of a bow,' अटनी -निः *f.*

To NOTCH, *v. a.* छिद् (c. 7. छिनत्ति, छेत्तुं), अवछिद्, छेदं कृ, अवच्छेदं कृ.

NOTCHED, *p. p.* अवछिन्नः -न्ना -न्नं, छिन्नः &c., सच्छेदः -दा -दं, सावच्छेदः &c.

NOTE, *s.* (Mark, token) चिह्नं, लक्षणं, अङ्कः -ङ्कं, लाञ्छनं, अभिज्ञानं, लक्ष्यं, कलङ्कः.—(Mark made as a memorandum) स्मरणार्थकचिह्नं, स्मरणचिह्नं, स्मरणं.—(Annotation, comment) टीका, भाष्यं, व्याख्या, टिप्पनी, वार्त्तिकं; 'with notes,' सटीकः -का -कं.—(Sound in music) स्वरः, मातृका, मूर्च्छना, कठः, क्वणः, विरिब्धः, विरावः; 'a false note,' अपस्वरः, विस्वरः, अपक्वणः; 'a high note,' तारः; 'a cracked note,' काकस्वरः; 'key note,' वादी *m.* (न्). The notes in music are निषादः or निषदः or निषधः, ऋषभः, गान्धारः, षड्जः, मध्यमः, पञ्चमः, धैवतः, घर्घरः.—(Note of birds) रुतं, वाशितं, वाशनं.—(Notice, heed) अवेक्षा -क्षणं, अपेक्षा, मनोयोगः, लक्षं -क्ष्यं.—(Reputation) कीर्त्तिः *f.*, ख्यातिः *f.*, प्रतिष्ठा, यशस् *n.*, गौरवं; 'of little note,' अल्पकीर्त्तिः -र्त्तिः -र्त्ति, अल्पिष्ठकीर्त्तिः &c. *See* NOTED. (Short letter) पत्रकं, पत्रं, लेखः, लेख्यं.—(Note of hand) पत्रलेख्यं.

To NOTE, *v. a.* (Observe) लक्ष् (c. 10. लक्षयति -यितुं), आलक्ष्, उपलक्ष्, अवेक्ष् (c. 1. -ईक्षते -क्षितुं), अपेक्ष्, अवेक्षां कृ, आलोक् (c. 10. -लोकयति -यितुं), निरूप् (c. 10. -रूपयति -यितुं), आलोच् (c. 10. -लोचयति -यितुं), आलोचनं कृ.—(Set down in writing, make a note of) अङ्क् (c. 10. अङ्कयति -यितुं), चिह्न् (c. 10. चिह्नयति -यितुं), स्मरणार्थकचिह्नं कृ, स्मरणपुस्तके or लेख्यपत्रे समारुह् in caus. (-रोपयति -यितुं) or आरुह्, अभिलिख् (c. 6. -लिखति -लेखितुं).

NOTE-BOOK, *s.* स्मरणपुस्तकं, स्मारकपुस्तकं, अङ्कनपुस्तकं.

NOTED, *p. p.* or *a.* (Observed) लक्षितः -ता -तं, आलक्षितः &c., उपलक्षितः &c., अवेक्षितः &c.—(Set down in writing) लेख्यारूढः -ढा -ढं, लेख्यारोपितः -ता -तं, स्मरणपुस्तकारोपितः &c.—(Celebrated) प्रसिद्धः -द्धा -द्धं, ख्यातः -ता -तं, विख्यातः &c. प्रथितः -ता -तं, विश्रुतः -ता -तं, लब्धशब्दः -ब्दा -ब्दं, लब्धप्रतिष्ठः -ष्ठा -ष्ठं.

NOTHING, *s.* (Not any thing) न किञ्चित्, न किमपि, न किञ्चन.—(Not any thing at all) न किञ्चिदपि, अलेशमपि, न कियदपि, न सूक्ष्ममपि, न स्तोकमपि.—(Non-existence, nonentity) अभावः, नास्तित्वं, नास्ति indec. असत्त्वं, अवस्तु *n.*, अवस्तुता, शून्यता -त्वं, शून्यं, असम्भवः, अविद्यमानता.—(Trifle, thing of no value) अल्पविषयः, स्वल्पविषयः, सुलघुविषयः, अल्पार्थविषयः; 'good for nothing,' व्यर्थः -र्था -र्थं, निरर्थकः -का -कं, किमर्थः -र्था -र्थं, अकिञ्चित्करः -रा -रं.

NOTHING, *adv.* न किञ्चित्, न किमपि, न किञ्चिदपि, न किञ्चन, अलेशमपि, अलेशम्, न कियदपि, न मनागपि, न मनाक्, असूक्ष्ममपि, अस्तोकमपि.

NOTHINGNESS, *s.* शून्यता, शून्यं, अवस्तुत्वं, नास्तित्वं, अभावः. *See* NONENTITY.

NOTICE, *s.* (Observation by the eye or other senses) अवलोकनं, आलोकनं, आलोचनं -ना, निरीक्षा, अवेक्षा -क्षणं, निरूपणं, दर्शनं, सन्दर्शनं, दृष्टिः *f.*, लक्षं.—(Regard, heed) अवेक्षा -क्षणं, अपेक्षा, प्रतीक्षा, अवधानं, मनोयोगः, विचारः.—(Intelligence, intimation) सन्देशः, निवेदनं, सूचना -नं, विज्ञप्तिः *f.*, उद्देशः, समुद्देशः -शनं, संवादः, बोधनं, बोधः.—(Mention) अभिधानं, कथनं, ग्रहणं, निर्देशः, उद्देशः.—(Proclamation) घोषः -षणं -णा, विघोषणं -णा, ख्यापनं; 'written notice,' घोषणपत्रं, निवेदनपत्रं, विज्ञापनपत्रं, सूचनपत्रं, बोधनपत्रं, प्रसिद्धिपत्रं.—(Respectful treatment) आदरः, सत्कारः, सत्क्रिया, मानं, सम्मानं, सम्भावना, पूजा, प्रतीतिः *f.*

To NOTICE, *v. a.* (Observe) लक्ष् (c. 10. लक्षयति -यितुं), आलक्ष्, समालक्ष्, संलक्ष्, आलोक् (c. 10. -लोकयति -यितुं), अवलोक्, आलोच् (c. 10. -लोचयति -यितुं), निरूप् (c. 10. -रूपयति -यितुं), अवेक्ष् (c. 1. -ईक्षते -क्षितुं), अपेक्ष्, निरीक्ष्, अवेक्षां कृ.—(Heed) अवधा (c. 3. -धत्ते -धातुं), मनो धा, सावधानः -ना -नं भू, अवेक्ष्, अपेक्ष्.—(Mention) अभिधा (c. 3. -दधाति -धातुं), निर्दिश् (c. 6. -दिशति -देष्टुं), उद्दिश्, कथ् (c. 10. कथयति -यितुं), निर्देशं कृ, उद्देशं कृ.—(Treat with attention or honor) सत्कृ, सम्मन् (c. 10. -मानयति -यितुं), सम्भू (c. 10. -भावयति -यितुं), आदृ (c. 6. -द्रियते -दर्त्तुं), आदरं कृ.

NOTICEABLE, *a.* लक्ष्यः -क्ष्या -क्ष्यं, लक्षणीयः -या -यं, आलक्ष्यः &c., अवेक्षणीयः &c., प्रतीक्षणीयः &c., प्रतीक्षणार्हः -र्हा -र्हं, निरूपणार्हः &c.

NOTICED, *p. p.* आलक्षितः -ता -तं, अवेक्षितः -ता -तं, उद्दिष्टः -ष्टा -ष्टं.

NOTIFICATION, *s.* घोषणं -णा, विघोषणं -णा, विज्ञापनं -ना, विज्ञप्तिः *f.*, ज्ञप्तिः *f.*, ज्ञापनं, ख्यापनं, निवेदनं, आवेदनं, बोधनं, सूचनं -ना.—(Written notice). *See* under NOTICE.

NOTIFIED, *p. p.* विज्ञप्तः -प्ता -प्तं, विज्ञापितः -ता -तं, ज्ञप्तः &c., ज्ञापितः -ता -तं, निवेदितः &c., घोषितः &c., विघोषितः &c., प्रख्यातः &c., सूचितः &c.

To NOTIFY, *v. a.* ज्ञा in caus. (ज्ञापयति, ज्ञपयति -यितुं), विज्ञा, निविद् (c. 10. -वेदयति -यितुं), आविद्, बुध् (c. 10. बोधयति -यितुं), प्रख्या (c. 2. -ख्याति -तुं, caus. ख्यापयति -यितुं), ख्या, सूच् (c. 10. सूचयति -यितुं), घुष् (c. 10. घोषयति -यितुं), विघुष्, आघुष्, कृत् (c. 10. कीर्त्तयति -यितुं), प्रकाश् (c. 10. -काशयति -यितुं).

NOTION, *s.* बुद्धिः *f.*, मतिः *f.*, मनःकल्पना, बुद्धिकल्पना, कल्पना, बुद्धिकल्पितं, सङ्कल्पः, मनोगतं, मनसिजं, वासना, भावना, सम्भावना, बोधः, भासः, आभासः, प्रतिभासः; 'under the notion,' बुद्ध्या.—(Sentiment, opinion) मतं, मतिः *f.*, बुद्धिः *f.*

NOTIONAL, *a.* मनोगतः -ता -तं, मनसिजः -जा -जं, मनोजः &c., मनोभवः -वा -वं, काल्पनिकः -की -कं, मनःकल्पितः -ता -तं, सङ्कल्पजः -जा -जं, मनःसृष्टः -ष्टा -ष्टं.

NOTORIETY, NOTORIOUSNESS, *s.* प्रसिद्धिः *f.*, लोकप्रसिद्धिः *f.*, लोकप्रसिद्धता, प्रसिद्धत्वं, प्रकाशता, प्रकाशः, ख्यातिः *f.*, विख्यातिः *f.*, प्रख्यातिः *f.*, विश्रुतिः *f.*, लोकविश्रुतिः, प्राकट्यं, लौकिकता -त्वं, रूढिः *f.*, प्रथा, सम्प्रथा, प्रथितिः *f.*, सम्प्रतीतिः *f.*—(In a bad sense) वाच्यता, कुकीर्त्तिः *f.*, कुख्यातिः *f.*, कुप्रतिष्ठा, कुप्रसिद्धिः *f.*

NOTORIOUS, *a.* प्रसिद्धः -द्धा -द्धं, लोकप्रसिद्धः &c., लोकविश्रुतः -ता -तं, लोकप्रथितः -ता -तं, लोकविदितः &c., लोकसिद्धः &c., लौकिकः -की -कं, सार्वलौकिकः &c., ख्यातः -ता -तं, विख्यातः &c., प्रथितः &c., विश्रुतः &c., विज्ञातः &c., रूढः -ढा -ढं, प्रकटः -टी -टं, प्रकटितः -ता -तं.—(In a bad sense) ख्यातगर्हणः -णा -णं, वाच्यः -च्या -च्यं, कुकी

ख्यातिमान् -मती -मत् (त्), कुख्यातः -ता -तं, कुख्यातिमान् &c., कुप्रसिद्धः &c.; 'a notorious offender,' महापातकी *m.* (न्).

Notoriously, *adv.* प्रसिद्धं, लोकप्रसिद्धं, प्रकाशं, प्रकटं, ख्यातगर्हणं.

Notus, *s.* (South wind) दक्षिणवायुः, दक्षिणदिग्वायुः *m.*

Notwithstanding, *conj.* तथापि, परन्तु, परं, किन्तु, अथापि, तथापि, तदपि.

Nought. *See* Naught, Nothing.

Noun, *s.* नाम *n.* (न्), विशेष्यं, संज्ञा, सत्त्वं, द्रव्यवाचकः, पदार्थवाचकः, आख्या, शब्दः, सङ्केतशब्दः; 'noun of action,' कारकः, क्रिया; 'of agency,' कर्तृवाच्यं; 'animate,' प्राणिवाचकः; 'abstract,' भाववाचकः; 'collective,' सङ्घवाचकः; 'communicative,' अपादानवाच्यं; 'denominative,' क्रियावाचकः; 'ending in a vowel,' अजन्तः; 'gentile,' जातिवाचकः; 'inanimate,' अप्राणिवाचकः; 'instrumental,' कारणवाच्यं; 'inflected, or of any case,' कारकं; 'passive,' कर्मवाचकः, कर्मणिवाच्यशब्दः, सम्प्रदानवाच्यं; 'possessive,' अधिकरणवाच्यं; 'proper,' नामवाचकः; 'simple,' भाववाच्यं, लिङ्गं; 'verbal,' क्रियावाचकः.

To nourish, *v. a.* पुष् (c. 10. पोषयति -यितुं, c. 1. पोषति -षितुं, c. 9. पुष्णाति), परिपुष्, पाल् (c. 10. पालयति -यितुं), प्रतिपाल्, भृ (c. 1. भरति, c. 3. बिभर्त्ति, भर्त्तुं), सम्भृ, अन्नेन सन्तुष् (c. 10. -तोषयति -यितुं) or तुष् or सन्तृप् (c. 10. -तर्पयति -यितुं) or तृप् or संवृध् (c. 10. -वर्धयति -यितुं) or वृंह् (c. 10. वृंहयति -यितुं) or आप्यै (c. 10. -प्याययति -यितुं) or जीव् (c. 10. जीवयति -यितुं), पोषणं कृ, पालनं कृ, पालनपोषणं कृ.

Nourishable, *a.* पोषणीयः -या -यं, पोष्यः -ष्या -ष्यं, पालनीयः -या -यं, वृंहणीयः -या -यं, भरणीयः -या -यं, भरण्यः -ण्या -ण्यं, भार्य्यः &c., सम्भार्य्यः &c.

Nourished, *p. p.* पुष्टः -ष्टा -ष्टं, पोषितः -ता -तं, पुषितः &c., पालितः &c., प्रतिपालितः &c., भृतः -ता -तं, सम्भृतः &c., भरितः &c., वृंहितः &c.

Nourisher, *s.* पोष्टा *m.* (ष्टृ), पोषयिता *m.* (तृ), पालयिता *m.*, प्रतिपालयिता *m.*, पालकः, भर्त्ता *m.* (र्त्तृ), पालनकर्त्ता *m.*, अन्नदाता *m.*, वृंहकः, अन्नदः.

Nourishing, *a.* पोषकः -का -कं, पालकः -का -कं, प्रतिपालकः &c., पौष्टिकः -की -कं, पुष्टिदः -दा -दं, वृंहणः -णा -णी -णं, धातुपोषकः &c.

Nourishment, *s.* (Act of nourishing) पोषः -षणं, पालनं, प्रतिपालनं, भरणं, भरिमा *m.* (न्), भृतिः *f.*, सम्भृतिः *f.*, आप्यायनं, वृंहणं, पुष्टिदानं, अन्नदानं.—(Food, aliment) आहारः, भोजनं, भक्ष्यं, खाद्यं, अन्नं, आहार्य्यं, अभ्याहार्य्यं, अभ्यवहारः, अभ्यवहार्य्यं, शरीरयात्रा, देहयात्रा, जीवनं -नकः, पौष्टिकं, भृतिः *f.*, सम्भृतिः *f.*, सम्भारः.

Novel, *a.* नवः -वा -वं, अभिनवः -वा -वं, नवीनः -ना -नं, नूतनः -ना -नं, नूत्नः -त्ना -त्नं, नव्यः -व्या -व्यं, प्रत्यग्रः -ग्रा -ग्रं, अपूर्व्वः -र्व्वा -र्व्वं, अभूतपूर्व्वः &c., अदृष्टपूर्व्वः &c., अश्रुतपूर्व्वः &c., अप्राचीनः -ना -नं, अद्भुतः -ता -तं, अलौकिकः -की -कं, विलक्षणः -णा -णं.

Novel, *s.* (Fictitious tale) कल्पितकथा, परिकथा, उपकथा, कथा, उपाख्यानं, आख्यानं, कूटार्थकथा, कूटार्थोपाख्यानं, मिथ्याकथा, प्रबन्धकल्पना.

Novelty, *s.* नवता, नवीनता, नूतनता -त्वं, नव्यता, नाव्यं, अभिनवता, प्रत्यग्रता, अपूर्व्वता -त्वं, अद्भुतत्वं, अलौकिकत्वं, विलक्षणता, वैलक्षण्यं.—(A novelty) नववस्तु *n.*, नूतनवस्तु *n.*, कौतुकं, आश्चर्य्यवस्तु.

November, *s.* मार्गशीर्षपूर्व्वार्द्धं, कार्त्तिकोत्तरार्द्धं, मार्गशीर्षः, मार्गशिरः, मार्गः, अग्रहायणः, आग्रहायणः, आग्रहायणिकः, सहाः *m.* (स्), कार्त्तिकः, कार्त्तिकिकः, बाहुलः, ऊर्जः.

Novennial, *a.* नववर्षीयः -या -यं, नववर्षीणः -णा -णं, नववार्षिकः -की -कं.

Novercal, *a.* वैमात्रिकः -की -कं, वैमात्रीयः -या -यं, विमातृयोग्यः -ग्या -ग्यं.

Novice, *s.* नवशिष्यः, नवछात्रः, नूतनशिष्यः, नवीनशिष्यः, प्राथमकल्पिकः, शैक्षः, क्रियाकारः, नवाभ्यासी *m.* (न्), नवीनाभ्यासी *m.*, नूतनाभ्यासी, विद्यारम्भकः.

Novitiate, *s.* (State) नवशिष्यत्वं, नवछात्रता -त्वं, नवछात्रदशा, नवाभ्यासित्वं, नूतनाभ्यासित्वं.—(Period of being a novice) नवाभ्यासकालः, नवीनाभ्यासित्वकालः, विद्यारम्भकालः.

Now, *adv.* (At the present time) इदानीम्, अधुना, सम्प्रति, साम्प्रतं, अद्य, एतर्हि, इहसमये, वर्त्तमानकाले, तत्काले, सद्यस्काले, साम्प्रतकाले, अधुनातनकाले, प्रस्तुतकाले; 'now and then,' कदाचित्, कदापि, कदाचन, कर्हिचित्, जातु, काले काले, वारं वारं, अनुकालं; 'till now,' अद्यापि, अद्यावधि; 'from now,' अद्यारभ्य, अद्यप्रभृति, इतःपरं; 'just now,' अव्यवहितदीर्घकाले, नूतनकाले; 'it was but now,' नन्विदानीम्.—(As an inceptive or connective particle) अथ, अथो.—(After this) ततस्, अतस्.

Now-a-days, *adv.* साम्प्रतकाले, अधुनातनकाले, वर्त्तमानकाले, अद्य.

No way, no ways, no wise, *adv.* न कथञ्चन, न कथञ्चित्, न कथमपि, न सर्व्वथा, न सर्व्वथैव.

Nowhere, *adv.* न क्वापि, न कुत्रापि, न क्वचित्, न कुत्रचित्.

Noxious, *a.* हिंस्रः -स्रा -स्रं, हिंसकः -का -कं, हिंसालुः -लुः -लु, हिंसात्मकः -का -कं, अपकारी -रिणी -रि (न्), अपकारकः -का -कं, अनिष्टकारी &c., अहितकारी &c., नृशंसः -सा -सं, शरारुः -रुः -रु, शारुकः -का -कं, दंशेरः -रा -रं, घातुकः -का -कं, उपघातकः &c., नंशुकः &c., अपायजनकः &c., दुष्टः -ष्टा -ष्टं, दूषकः -का -कं, बाधकः -का -कं, कुत्सितः -ता -तं.

Noxiousness, *s.* हिंस्रता, अपकारकत्वं, दूषकता, दुष्टता, घातुकत्वं.

Nozzle, *s.* नासाग्रं, नासिकाग्रं, नस्तः, प्रोथः -थं, पोत्रं, मुखं, अग्रं; 'nozzled as an ox,' नस्तितः.

Nubile, *a.* विवाह्यः -ह्या -ह्यं, विवाहयोग्यः -ग्या -ग्यं, उद्वाह्यः &c.

Nubilous, *a.* साभ्रः -भ्रा -भ्रं, अभ्रियः -या -यं, समेघः -घा -घं, मेघाकीर्णः -र्णा -र्णं, मेघाच्छन्नः -न्ना -न्नं, मेघाच्छादितः -ता -तं. *See* Cloudy.

Nucleus, *s.* समुच्चयास्पदं, सञ्चयास्पदं, हृदयं, गर्भः, वीजं.

Nudation, *s.* नग्नीकरणं, विवस्त्रीकरणं, निर्वस्त्रीकरणं.

Nude, *a.* नग्नः -ग्ना -ग्नं, विवस्त्रः -स्त्रा -स्त्रं, निर्वस्त्रः &c. *See* Naked.

To nudge, *v. a.* चल् (c. 10. चालयति -यितुं), अरत्निना तड् (c. 10. ताडयति -यितुं).

Nudity, *s.* नग्नता -त्वं, विवस्त्रत्वं, वस्त्रशून्यता, अपरिच्छदं. *See* Nakedness.

Nugacity, *s.* अनर्थकत्वं -ता, मोघता, निष्फलता, लाघवं, लघुता.

Nugatory, *a.* (Vain) निरर्थकः -का -कं, अनर्थकः -का -कं, तृणप्रायः -या -यं, व्यर्थः -र्था -र्थं.—(Of no force) मोघः -घा -घं, निष्फलः -ला -लं, विफलः &c., फलहीनः -ना -नं, अनिष्पन्नः -न्ना -न्नं, निर्बलः -ला -लं, प्रभावहीनः &c., निष्प्रभावः &c., लुप्तः -प्ता -प्तं, निष्प्रमाणः &c.

Nuisance, *s.* कष्टं, बाधा, बाधकः, पीडा, व्यथा, विडम्बना, कण्टकः -कं, उत्पातः; 'public nuisance,' लोककण्टकः; 'domestic,' गृहोत्पातः.

Null, *a.* मोघः -घा -घं, व्यर्थः -र्था -र्थं, अनिष्पन्नः -न्ना -न्नं, लुप्तः -प्ता -प्तं, निरर्थकः -का -कं, अनर्थकः -का -कं, निष्फलः -ला -लं, विफलः -ला -लं, निष्प्रभावः -वा -वं, निर्बलः -ला -लं, निर्जीवः -वा -वं, वृथा indec. मुधा indec.

To nullify, *v. a.* मोघीकृ, व्यर्थीकृ, अथरीकृ, निष्फलीकृ, निष्फल (nom. निष्फलयति -यितुं), विफलीकृ, लुप् (c. 6. लुम्पति, लोप्तुं, c. 10. लोप-

यति -यितुं), खण्ड् (c. 10. खण्डयति -यितुं), निर्बलीकृ, निष्प्रभावीकृ, मुधा कृ, वृथा कृ.

NULLITY, *s.* (Want of force) मोघता, व्यर्थता, निरर्थकता, अनर्थकता, आनर्थक्यं, अनिष्पन्नता, लुप्तता, निष्फलता.—(Nonentity) अभावः, नास्तित्वं, अवस्तु *n.*, शून्यता.

NUMB, *a.* सुप्तः -प्ता -प्तं, सुप्तत्वक् *m.f.n.* (च्), जडः -डा -डं, स्तब्धः -ब्धा -ब्धं, स्तब्धचेष्टः -ष्टा -ष्टं, स्तम्भितचेष्टः &c., कुण्ठः -ण्ठा -ण्ठं, गतिशक्तिहीनः -ना -नं, स्पन्दनरहितः -ता -तं, स्तम्भितचेतनः -ना -नं, अचेतनः -ना -नं, चैतन्यरहितः &c.; 'with cold,' शीताकुलः -ला -लं.

To NUMB, *v. a.* जडीकृ, स्तब्धीकृ, चैतन्यं स्तम्भ् (c. 10. स्तम्भयति -यितुं, c. 5. स्तभ्नोति, स्तम्भितुं), चैतन्यस्तम्भं कृ, चेतनास्तम्भनं कृ, चैतन्यं हृ (c. 1. हरति, हर्तुं), त्वक्सुप्तिं कृ, शीताकुलीकृ.

NUMBED, *p. p.* सुप्तः -प्ता -प्तं, जडीकृतः -ता -तं. *See* NUMB, *a.*

NUMBER, *s.* संख्या.—(Assemblage of two or more units) राशिः *m.*, संख्या; 'even number,' समसंख्या; 'odd,' विषमसंख्या; 'whole number,' अभिन्नं; 'five in number,' पञ्चसंख्यः -ख्या -ख्यं, पञ्चसंख्यकः -का -कं.—(Amount) संख्या, गणना, परिगणना, समुदायः, परिमाणं.—(Multitude, collection) गणः, समूहः, समवायः, भङ्गः, सङ्घातः, सञ्चयः, वृन्दं, सङ्ग्रहः, स्तोमः, राशिः *m.*, पुञ्जः, पूगः; 'a number of young women,' तरुणीगणः; 'a number of men,' पुरुषसमूहः, पुरुषसमवायः.—(A great number, many) बाहुल्यं, बहुत्वं, बहुः -हुः -ह्वी -हु, बहुलः -ला -लं, बहुसंख्यकः -का -कं, अनेकः &c., प्रचुरः -रा -रं; 'in great number,' बहुशस्, अनेकशस्.—(Figure, arithmetical sign) अङ्कः, संख्या.—(Science of numbers) अङ्कविद्या, गणनाविद्या, गणितं, व्यक्तं; 'table of numbers,' अङ्कपत्रं, अङ्कजालं, सारणी.—(Verse) पद्यं, छन्दस् *n.*, कविता, पद्यरचना.—(In grammar) वचनं; 'singular number,' एकवचनं; 'dual,' द्विवचनं; 'plural,' बहुवचनं, अनेकवचनं.

To NUMBER, *v. a.* (Count) संख्या (c. 2. -ख्याति -तुं), परिसंख्या, सम्परिख्या, गण् (c. 10. गणयति -यितुं), विगण्, प्रगण्, अङ्क् (c. 10. अङ्कयति -यितुं), कल् (c. 10. कलयति -यितुं), गणनां कृ, गणीकृ.—(Affix a number) अङ्क, अङ्कं स्था in caus. (स्थापयति -यितुं) or लिख् (c. 6. लिखति, लेखितुं).

NUMBERED, *p. p.* संख्यातः -ता -तं, गणितः -ता -तं, अङ्कितः &c., कलितः &c., गणीभूतः -ता -तं, गणीकृतः -ता -तं, परिगणितः &c.

NUMBERER, *s.* संख्याकृत् *m.*, गणकः, अङ्कगणकः, गणनाकारी *m.* (न्).

NUMBERING, *s.* गणनं -ना, परिगणनं -ना, संख्यानं, संख्याकरणं, गणितं.

NUMBERLESS, *a.* असंख्येयः -या -यं, असंख्यः -ख्या -ख्यं, अगणनीयः -या -यं, अगण्यः -ण्या -ण्यं, असंख्यातः -ता -तं, गणनातीतः -ता -तं, कोट्यवधिः -धिः -धि.

NUMBLES, *s. pl.* (Entrails of a deer) मृगान्त्रं, मृगान्त्राणि *n. pl.*

NUMBNESS, *s.* त्वक्सुप्तिः *f.*, त्वक्स्वापः, सुप्तिः *f.*, स्वापः, जडता, जाड्यं, चैतन्यस्तम्भः, चेतनास्तम्भः, चैतन्यस्तब्धता, चैतन्यराहित्यं, गतिशक्तिहीनता, कुण्ठता, मिद्धं.

NUMERABLE, *a.* संख्येयः -या -यं, गणनीयः -या -यं, गण्यः -ण्या -ण्यं, गणेयः -या -यं, गणितव्यः -व्या -व्यं, परिगणनीयः -या -यं.

NUMERAL, *a.* (Pertaining to or consisting of numbers) सांख्यः -ख्यी -ख्यं, संख्यात्मकः -का -कं, संख्याविषयः -या -यं, संख्यासम्बन्धी -न्धिनी &c., संख्यावाचकः &c., गणनासम्बन्धी &c., अङ्की -ङ्किनी &c., अङ्कात्मकः &c.

NUMERAL, *s.* (Figure) अङ्कः, संख्या, संख्याचिह्नं, गणनाचिह्नं.

NUMERALLY, *adv.* संख्यानुसारात् -रेण, यथासंख्यं, संख्यायाः.

NUMERARY, *a.* समुकसंख्यासम्बन्धी -न्धिनी &c., समुकसंख्यः -ख्या -ख्यं.

NUMERATION, *s.* संख्यानं, संख्यता, गणना, परिगणना, संख्यापरिमाणं.

NUMERATOR, *s.* (Of a fraction) अंशः, लवः, भागः, हारः, हारकः; 'numerator and denominator together,' राशिः *m.*

NUMERICAL, *a.* सांख्यः -ख्यी -ख्यं, यथासंख्यः -ख्या -ख्यं, संख्यापेक्षकः -का -कं, संख्योद्देशकः -का -कं, संख्यासम्बन्धी &c. *See* NUMERAL, *a.*

NUMERICALLY, *adv.* यथासंख्यं, संख्यामपेक्ष्य, संख्यामुद्दिश्य, यथागणनं, गणनां कृत्वा, संख्यां कृत्वा or गणयित्वा.

NUMEROUS, *a.* बहुः -हुः -ह्वी -हु, बहुलः -ला -लं, बहुसंख्यकः -का -कं, बहुसंख्यः -ख्या -ख्यं, महासंख्यः &c., अनेकः -का -कं, प्रचुरः -रा -रं, भूरिः -रिः -रि, भूयिष्ठः -ष्ठा -ष्ठं, भूयान् -यसी -यः (स्), नैकः -का -कं, पुष्कलः -ला -लं, प्राज्यः -ज्या -ज्यं, विपुलः -ला -लं.

NUMEROUSLY, *adv.* बहुशस्, अनेकशस्, बाहुल्येन, सङ्घशस्.

NUMEROUSNESS, *s.* बहुत्वं, बाहुल्यं, अनेकत्वं -ता, अनैक्यं, बहुसंख्यत्वं.

NUMISMATIC, *a.* मुद्राविषयः -या -यं, नाणकविषयकः &c., मुद्रासम्बन्धी &c.

NUMISMATICS, *s.* मुद्राविद्या, नाणकविद्या, मुद्राविषयका विद्या.

NUMSKULL, *s.* स्थूलबुद्धिः *m.*, स्थूलधीः *m.*, अल्पबुद्धिः, जडधीः.

NUN, *s.* मठनिवासिनी, मठवासिनी, संसारत्यागिनी, लोकत्यागिनी, सङ्गपरित्यागिनी, सन्यासिनी, तपस्विनी, वैरागिणी, तपोनिष्ठा, तपस्यासक्ता, धर्मभगिनी, ब्रह्मचारिणी, योगिनी.

NUNCIO, *s.* रोमीयधर्माध्यक्षसकाशाद् दूतः, महाधर्माध्यक्षदूतः.

NUNCUPATIVE, NUNCUPATORY, *a.* साक्षात् कथितः -ता -तं, अलिखितः &c.

NUNNERY, *s.* धर्मभगिनीमठः, तपस्विनीमठः, ब्रह्मचारिणीमठः.

NUPTIAL, *a.* वैवाहिकः -की -कं, उद्वाहिकः -का -कं, औद्वाहिकः -की -कं, पाणिग्रहणिकः -की -कं, विवाहीयः -या -यं, विवाही -हिनी -हि (न्), उद्वाही &c., विवाहसम्बन्धी &c., विवाह in comp.; 'nuptial feast,' विवाहमहोत्सवः; 'nuptial gift,' यौतकं, औद्वाहिकं, पारिणाय्यं, हरणं, सुदायः -यं.

NUPTIALS, *s. pl.* विवाहः, उद्वाहः, परिणयनं, विवाहविधिः *m.*, विवाहक्रिया, विवाहसंस्कारः, पाणिग्रहणं.

NURSE, *s.* धात्री, धात्रेयी -यिका, अङ्कपाली, उपमाता *f.* (तृ), मातृका, प्रतिपालिका, पालयित्री, धन्या, पयुः *f.*—(In sickness) उपचारकर्त्री, उपचारिका, रुग्नपरिचारिका, रोगार्त्तपालिका, रोगसेविका.—(Fosterer, cherisher) पालकः, प्रतिपालकः, पालयिता *m.* (तृ), पोषकः, पोष्टा *m.* (ष्टृ).

To NURSE, *v. a.* (Foster, take care of a child, &c.) पाल् (c. 10. पालयति -यितुं), प्रतिपाल्, अङ्के पाल्, क्रोडे पाल्, पुष् (c. 1. पोषति, c. 9. पुष्णाति, c. 10. पोषयति -यितुं) or परिपुष्, क्रोडीकृ, अङ्कीकृ.—(Attend upon a sick person) रोगिणम् उपचर् (c. 1. -चरति -रितुं) or परिचर् or पाल् or प्रतिपाल् or सेव् (c. 1. सेवते -वितुं) or उपसेव्.—(Suckle) दुग्धं or स्तन्यं or स्तनं दा (c. 3. ददाति, दातुं) or पा in caus. (पाययति -यितुं) or धे in caus. (धापयति -यितुं), स्तनदानेन or स्तन्यदानेन पुष् or पाल्.—(Nourish, cherish) भृ (c. 1. भरति, c. 3. बिभर्त्ति, भर्त्तुं), सम्भृ, पाल्.

NURSED, *p. p.* पालितः -ता -तं, अङ्के पालितः -ता -तं or प्रतिपालितः &c., पोषितः -ता -तं, पुष्टः -ष्टा -ष्टं, भरितः -ता -तं.—(In sickness, &c.) उपचरितः -ता -तं.

NURSERY, *s.* बालस्थानं, बालगृहं, बालकस्थानं, पालनस्थानं, पोषणस्थानं.

NURSERY-MAN, *s.* पुष्पाजीवी *m.* (न्), पुष्पशाकोत्पत्तिजीवी *m.* (न्).

NURSING, *s.* पालनं, अङ्केपालनं, अङ्कपालिका, प्रतिपालनं, पोषणं, भरणं, चुलुम्पः, लालनं, क्रोडीकरणं.—(In sickness, &c.) उपचारः.

NURSLING, *s.* स्तनन्धयः -या, स्तनपः -पा -पाः *m.*, स्तनपायी *m.* (न्), बालः.

NURTURE, *s.* (Nourishment, food) आहारः, भक्ष्यं, शरीरयात्रा, भृतिः *f.*, सम्भृतिः *f.*, पौष्टिकं.—(Education, bringing up) शिक्षा, उपदेशः, अभ्यासः, पुष्टिः *f.*, पोषः -षणं, पालनं, प्रतिपालनं, भरिमा *m.* (न्).

To NURTURE, *v. a.* (Nourish) पुष् (c. 10. पोषयति -यितुं), परिपुष्, पाल् (c. 10. पालयति -यितुं), प्रतिपाल्, भृ (c. 1. भरति, c. 3. बिभर्त्ति, भर्त्तुं), पालनं कृ, पोषणं कृ.—(Educate) शिक्ष् (c. 10. शिक्षयति -यितुं), विनी (c. 1. -नयति -नेतुं).

To NUSTLE, *v. a.* अङ्के पाल् (c. 10. पालयति -यितुं), अङ्कीकृ, क्रोडीकृ.

NUT, *s.* खाद्यबीजगर्भम् अण्डाकृति दृढफलं or घनफलबीजं.

NUTANT, *a.* प्रणतशिराः -राः -रः (स्), अवनतशिराः &c., नतशिराः &c.

NUT-BROWN, *a.* पूर्व्वोक्तफलवत् श्यावः -वा -वं or श्यामः -मा -मं.

NUT-CRACKERS, *s. pl.* सन्दंशः, सन्दंशकं, सन्दंशिका.

NUTMEG, *s.* जातिकोशं, जातिफलं, जातिः -ती *f.*, जातीकोशं, जातीकोषं, जातीफलं, समुद्रान्तं, पुन्नागः, छिद्रात्मकं, लयं, तृणं. *See* MACE.

NUTRIMENT, *s.* (Food) आहारः, भोजनं, पौष्टिकं. *See* NOURISHMENT.

NUTRITION, *s.* (Act) पोषणं, पुष्टिः *f.*, पोषः, आप्यायनं. *See* NOURISHMENT.

NUTRITIOUS, NUTRITIVE, *a.* पौष्टिकः -की -कं, पुष्टिदः -दा -दं, पोषकः -का -कं, धातुपोषकः &c., धातुवर्धकः -का -कं, पुष्टिकरः -री -रं, पुष्टिकारकः -का -कं, पुष्टिजनकः &c., धातुभृत् *m. f. n.*, बलवर्धकः &c., बलवर्धनः -ना -नं, बृंहणः -णा -णी -णं.

NUTSHELL, *s.* बीजकवचः -चं, बीजकञ्चुकः, बीजपुटः.

NUX-VOMICA, *s.* (Poisonous fruit) वरखरा.

NYCTALOPS, *s.* रात्रिदृष्टिः *m. f.*, निशादृष्टिः *m. f.*, रात्रिदृक् *m.* (श्).

NYCTALOPY, NYCTALOPIA, *s.* रात्रिदृष्टिः *f.*, निशादृष्टिः *f.*

NYMPH, *s.* अप्सराः *f.* (स्), अप्सरा, जलवनदेवता, जलदेवता, वनदेवता, जलदेवी, वनदेवी, जलवनदेवी, नदीदेवता, यक्षिणी, विद्याधरी.—(Beautiful woman, lass) सुन्दरी, मुग्धा, प्रमदा, तन्वङ्गी, कन्या.

NYMPH-LIKE, *a.* अप्सरायोग्यः -ग्या -ग्यं, अप्सरस्तुल्यः -ल्या -ल्यं.

NYMPHOMANIA, *s.* (A disease) अतिचरणा.

O.

O! *exclam.* (Vocative) भोः, भोस्, भो, भोभो, हे.—(To inferiors) रे, अरे, अररे, है, अहो.—(Expressive of surprise, grief, anger, &c.) आ, आः, हा, अहह, अहहा, हन्त, अहो, अहोवत्.

OAF, *s.* स्थूलबुद्धिः *m.*, स्थूलजनः, मन्दबुद्धिः, जडबुद्धिः, मूर्खः, मूढः, बर्बरः.

OAFISH, *a.* स्थूलस्वभावः -वा -वं, मन्दस्वभावः &c., अबुद्धिः -द्धिः -द्धि.

OAK, *s.* सिन्दूरः, सिन्दूरवृक्षः, वनवृक्षभेदः, वन्यपादपभेदः, वनराजिः.

OAKEN, *s.* सिन्दूरकाष्ठमयः -यी -यं, सिन्दूरवृक्षनिर्म्मितः -ता -तं.

OAKUM, *s.* जीर्णरज्जुखण्डः, शणखण्डः, खण्डितरज्जुः *m. f.*, शणसूत्रकं.

OAR, *s.* क्षेपणिः -णी *f.*, क्षिपणिः -णी, अपणी, नौकादण्डः, नौदण्डः, अरित्रं, आरित्रं, तरण्डः, तरित्रः.

OARED, *a.* दण्डवान् -वती -वत् (त्), दण्डी -ण्डिनी -ण्डि (न्); 'four-oared,' चतुर्दण्डवान् &c., चतुर्दण्डी &c.

OARSMAN, *s.* नौकादण्डधरः -धारी *m.* (न्), नौदण्डचालकः.

OASIS, *s.* मरुभूमिमध्यगतं शाद्वलस्थलं, मरुमध्यस्थं शाद्वलस्थानं.

OAT, *s.* ओट्संज्ञकः शस्यभेदः or धान्यभेदः.

OATEN, *a.* पूर्व्वोक्तशस्यमयः -यी -यं, पूर्व्वोक्तधान्यचूर्णमयः &c.

OATH, *s.* शपथः, शापः, शपः -पनं, अभिशापः, परिशापः, दिव्यं, सत्यं, समयः, प्रत्ययः, अभीषङ्गः, अभिषङ्गः, परिग्रहः, क्रिया; 'to take an oath,' शप् (c. 1. शपति -ते, c. 4. शप्यति -ते, शप्तुं), अभिशप्, शपथं कृ, शपथं शप्; 'he took an oath,' शपथं शेपे; 'to administer an oath,' शप् (c. 10. शापयति -यितुं); 'made to take an oath,' शापितः -ता -तं; 'with an oath,' सशपथं, शपथपूर्व्वं, शपथपुरःसरं.

OATH-BREAKING, *s.* शपथभङ्गः, दिव्यभङ्गः, मिथ्याशपथः, मिथ्यादिव्यं.

OAT-MEAL, *s.* ओट्संज्ञकशस्यचूर्णं, पूर्व्वोक्तधान्यक्षोदः.

OBDURACY, *s.* स्तब्धचित्तता, चित्तस्तब्धता, स्तब्धता, कठिनचित्तत्वं, चित्तकाठिन्यं, कठिनता, दृढता, दार्ढ्यं, अननुतापशीलता, अनुतापविमुखता, आग्रहः, आग्रहशीलता, पापाग्रहः, पापात्यागः.

OBDURATE, *a.* स्तब्धचित्तः -त्ता -त्तं, कठिनचित्तः &c., दृढचित्तः &c., अननुतापशीलः -ला -लं, अनुतापविमुखः -खा -खं, अनुतापपराङ्मुखः -खा -खं, दुराग्रही -हिणी -हि (न्), पापाग्रही &c., पापात्यागी &c.

OBDURATELY, *adv.* स्तब्धचित्तत्वात्, कठिनचित्तत्वात्, सकाठिन्यं.

OBEDIENCE, *s.* आज्ञानुवर्त्तनं, आज्ञानुसरणं, आज्ञाकरणं, आज्ञापालनं, आज्ञानुवृत्तिः *f.*, आज्ञानुकूलता, आज्ञानुकूल्यं, आज्ञाग्राहित्वं, आज्ञाधारणं, आज्ञाधीनता, आज्ञानुरोधः, आज्ञासेवनं, आदेशकरणं, निदेशकरणं, आज्ञापरता, आज्ञानुविधायिता, वश्यता, वश्यता, शुश्रूषा -षणं, अनुवर्त्तनं, अनुवृत्तिः *f.*, अनुकूलता, आनुकूल्यं, वशवर्त्तनं, मान्यता, आज्ञामाननं, वशीभूतता.

OBEDIENT, *a.* आज्ञानुवर्त्ती -र्त्तिनी -र्त्ति (न्), आज्ञापालकः -का -कं, आज्ञाधीनः -ना -नं, आज्ञानुयायी &c., आज्ञानुसारी &c., आज्ञाकरः -री -रं, आज्ञाकारी &c., आदेशकारी &c., निदेशकारी &c., आदेशकरः &c., वचनकरः &c., वचस्करः &c., आज्ञासेवी &c., आज्ञापरः -रा -रं, अनुशासनपरः &c., वशः -शा -शं, वश्यः -श्या -श्यं, वशवर्त्ती &c., वशानुगः -गा -गं, शुश्रूषुः -षुः -षु, आज्ञावहः -हा -हं, आज्ञावाहकः -का -कं, आज्ञासम्पादकः &c., आज्ञासम्पादी &c., आज्ञाधारी &c., अनुवर्त्ती &c., अनुविधायी &c., विधायी &c., अनुकूलः -ला -लं, सेवी &c., आज्ञाग्राही &c., वचनग्राही &c., निदेशग्राही &c., आश्रवः -वा -वं, अधीनः -ना -नं; 'obedient to a parent,' पितृवाक्परः -रा -रं, पितृवचनकरः -रा -रं, पितृवशः -शा -शं, पितृवशानुगः &c.

OBEDIENTLY, *adv.* शुश्रूषया, सानुवर्त्तनं, आज्ञानुवर्त्तनपूर्व्वं, सानुकूल्यं, आज्ञानुसारेण -रतस्, आज्ञानुवर्त्तनेन, यथादिष्टं, यथादेशं, यथाज्ञं, यथानुज्ञं.

OBEISANCE, *s.* नमस्कारः, प्रणामः, प्रणतिः *f.*, प्रणिपातः, प्रणिपतनं, नमस् indecl., नमस्या, सन्नतिः *f.*, नतिः *f.*, नमनं, विनयः, विनीतिः *f.*, उपसङ्ग्रहः; 'from inferiors to superiors,' अञ्जलिः *m.*, अञ्जलिकर्म्म *n.* (न्), अञ्जलिबन्धनं, वन्दनं; 'from a Brahman,' आशीर्वादः; 'from an inferior to a religious preceptor, Guru, &c.,' अभिवादनं, अभिवन्दनं; 'from Hindús of inferior caste,' दण्डवत्; 'to an idol, &c.,' वन्दनं.—(Profound obeisance with all the members of the body) साष्टाङ्गप्रणामः, साष्टाङ्गनमस्कारः, अष्टाङ्गपातः, अष्टाङ्गप्रणामः; 'to make obeisance,' नमस्कृ, प्रणम् (c. 1. -णमति -णन्तुं), शिरसा प्रणम्, कायं प्रणम्, प्रणिपत् (c. 1. -पतति -तितुं), साष्टाङ्गपातं प्रणिपत्; 'having made obeisance,' प्रणम्य.

OBELISK, *s.* सूच्याकारः स्तम्भः, दीर्घप्रस्तरमयः स्तम्भविशेषः.

OBERRATION, *s.* भ्रमणं -णा, परिभ्रमणं, पर्य्यटनं, इतस्ततो भ्रमणं.

OBESE, *a.* मेदस्वी -स्विनी -स्वि (न्), पीनः -ना -नं, पीवरः -रा -रं, स्थूलः -ला -लं, स्थूलकायः -या -यं, मांसलः ला -लं.

OBESENESS, OBESITY, *s.* मेदस्विता, मेदोवृद्धिः *f.*, स्थूलता, पीनता.

To OBEY, *v. a.* आज्ञाम् or वचनम् अनुवृत् (c. 1. -वर्त्तते -र्त्तितुं), यथादिष्टम् अनुष्ठा (c. 1. -तिष्ठति -ष्ठातुं), यथाज्ञं विधा (c. 3. -दधाति -धातुं) or कृ, श्रु in des. (शुश्रूषते -षितुं), अनुविधा in pass. (-धीयते), अनुरुध् in pass. (-रुध्यते), सेव् (c. 1. सेवते -वितुं), उपसेव्, आज्ञां or

वचनं प्रतीष् (c. 6. -इच्छति -एषितुं) or सम्प्रतीष्, उपचर् (c. 1. -चरति -रितुं), उपाचर्, उपास् (c. 2. -आस्ते -आसितुं), पर्य्युपास्, समुपास्, अभ्युपे (c. 2. अभ्युपैति -तुं, rt. इ), मन् (c. 10. मानयति -यितुं), आज्ञां पाल् (c. 10. पालयति -यितुं) or ग्रह् (c. 9. गृह्णाति, ग्रहीतुं) or प्रतिग्रह्, अनुकूल (nom. अनुकूलयति -यितुं), उपजीव् (c. 1. -जीवति -वितुं), आज्ञानुवर्त्तनं कृ.—(Submit to the control of another) परवशीभू, परवशं गम् (c. 1. गच्छति, गन्तुं).

OBEYED, *p. p.* शुश्रूषितः -ता -तं, यथादिष्टम् अनुष्ठितः -ता -तं or विहितः -ता -तं, मानितः -ता -तं, पर्य्युपासितः -ता -तं, सेवितः -ता -तं.

To OBFUSCATE, *v. a.* मलिनीकृ, तिमिर (nom. तिमिरयति -यितुं), तिमिरीकृ, कलुषीकृ, मलिन (nom. मलिनयति -यितुं).

OBFUSCATED, *p. p.* मलिनीकृतः -ता -तं, तिमिरीकृतः &c., कलुषीकृतः &c.

OBFUSCATION, *s.* कलुषीकरणं, मलिनीकरणं, निष्प्रभता, साम्धकारता.

OBIT, *s.* मृतक्रिया, मृतकर्म्म *n.* (न्), अन्त्यकर्म्म *n.* *See* OBSEQUIES.

OBITUARY, *s.* (List of the dead) मृतसंख्यापत्रं, मृतपरिसंख्या, मृतनामावलिपत्रं.—(Account of the dead) मृतवर्णनं -ना, मृतचरित्रं, मृतविवरणं.

OBJECT, *s.* (That about which any power or faculty is employed, or by which something is presented to the mind) विषयः, अर्थः, इन्द्रियार्थः, गोचरः, पात्रं, भाजनं, भूमिः *f.*, आस्पदं, स्थानं. The first four of these words refer properly to objects of sense, of which five are given, viz. 'form,' रूपं; 'sound,' शब्दः; 'odour,' गन्धः; 'flavor,' रसः; 'touch,' स्पर्शः. The other words are used elegantly in composition, thus, 'an object of confidence,' विश्वासपात्रं, विश्वासभूमिः *f.*, विश्वासास्पदं, विश्वासस्थानं; 'of affection,' स्नेहभूमिः *f.*, प्रीतिपात्रं; 'of favor,' प्रसादभूमिः *f.*; 'of compassion,' कृपापात्रं, दयाभाजनं; 'of disgrace,' अभिभवास्पदं; 'of blame,' निन्दापात्रं, निन्दाविषयः; 'of praise,' स्तुतिभाजनं; 'of honor,' मानभाजनं; 'of charity or liberality,' दानपात्रं; 'of dispute or litigation,' व्यवहारविषयः, व्यवहारस्थानं; 'of taxation,' शुल्कस्थानं; 'deserving object of charity, &c.,' सुपात्रं, पात्रं; 'undeserving,' कुपात्रं, अपात्रं; 'visible object,' चक्षुर्विषयः.—(Purpose, end, that to which the mind is directed) अभिप्रायः, आशयः, अभिप्रेतं, अर्थः, विषयः, उद्देशः, तात्पर्य्यं, कार्य्यं, कार्य्यवस्तु *n.*, प्रयोजनं, प्रयोगः, अभिसन्धिः *m.*, प्रार्थितं, इष्टं, पदार्थः, लक्ष्यं, लक्षं, हेतुः *m.*, निमित्तं, अयभूमिः; 'accomplishment of one's object,' स्वार्थसिद्धिः *f.*, कार्य्यसिद्धिः *f.*, इष्टसिद्धिः *f.*, कृतार्थता, चरितार्थता, इष्टापत्तिः *f.*, आशाप्राप्तिः *f.*; 'one who has accomplished his object,' कृतार्थः -र्था -र्थं, चरितार्थः &c., प्राप्तार्थः &c., कृतकृत्यः -त्या -त्यं, आशाप्राप्तः -प्ता -प्तं; 'I have gained my object,' कृतार्थोऽस्मि, चरितार्थोऽस्मि; 'one's own private object or end,' स्वार्थः, स्वहितं, स्वसाधनं; 'highest object,' परमार्थः; 'important object,' गुर्वर्थः; 'the four objects of human pursuit collectively,' चतुर्वर्गः, चतुर्भद्रं; these are 'virtue,' धर्म्मः; 'wealth,' अर्थः; 'love,' कामः; 'final beatitude,' मोक्षः; 'the three objects without the last,' त्रिवर्गः, त्रिगणं; 'with what object,' किमर्थं, किमुद्दिश्य.—(In grammar) कर्म्म *n.* (न्), कर्म्मपदं.

To OBJECT, *v. a.* or *n.* बाध् (c. 1. बाधते -धितुं), बाधार्थं हेतुं वद् (c. 1. वदति -दितुं), विरुद्धहेतुं वद्, बाधां कृ, बाधार्थं वचनं वद्, विरुद्धवचनं वद्, अपवद्, विसंवद्, विपरीतं वद्, अपरीकृ, वितण्ड् (c. 1. -तण्डते -ण्डितुं), पर्य्युदस् (c. 4. -अस्यति -असितुं), निरस्, विरोधार्थं वचनं वद्, विरुध् (c. 7. -रुणद्धि -रोद्धुं), प्रतिरुध्, न सम्मन् (c. 4. -मन्यते -मन्तुं), न अनुमन्, न प्रतिग्रह् (c. 9. -गृह्णाति -ग्रहीतुं), न अनुमुद् (c. 1. -मोदते -दितुं), न स्वीकृ, अस्वीकारं कृ, असम्मतिं कृ, असम्मतः -ता -तं भू, अननुमोदनं कृ, उद्ग्राहं कृ, परवाक्यं खण्ड् (c. 10. खण्डयति -यितुं), व्याघातं कृ, आपत्तिं कृ.

OBJECTED TO, *p. p.* पर्य्युदस्तः -स्ता -स्तं, अपवादितः -ता -तं, अस्वीकृतः -ता -तं.

OBJECTION, *s.* बाधा -धः -धकं, विरुद्धहेतुः *m.*, बाधार्थकहेतुः *m.*, विरोधार्थकहेतुः *m.*, विरुद्धवचनं, उद्ग्राहः, कक्षा, अपवादः, शङ्का, आशङ्का, अपवादः, विपरीतवचनं, वाक्यखण्डनं, वाक्यविरोधः, व्याघातः, प्रतिबन्धः, आपत्तिः *f.*, विप्रतिपत्तिः *f.*, प्रत्यवायः, वितण्डा, आक्षेपः, पर्य्युदासः; 'making an objection,' विरुद्धहेतुवादः, कक्षावादः; 'settling an objection,' समाधिः *m.*, समाधानं.

OBJECTIONABLE, *a.* बाध्यः -ध्या -ध्यं, बाधनीयः -या -यं, सबाधः -धा -धं, परिहरणीयः -या -यं, परिहार्य्यः -र्य्या -र्य्यं, वर्जनीयः -या -यं, वर्ज्यः -र्ज्या -र्ज्यं, अपवाद्यः -द्या -द्यं, सदोषः -षा -षं, प्रतिषेधार्हः -र्हा -र्हं, निषेधार्हः &c., शङ्कनीयः -या -यं, आशङ्कनीयः &c., प्रतिबन्धार्हः &c.; 'objectionable person or thing,' परिहारः.

OBJECTIONABLENESS, *s.* बाध्यता, सबाधत्वं, बाधः, सदोषता.

OBJECTIVE, *a.* (Pertaining to the object) स्वाधारस्थितः -ता -तं, स्वाधारनिष्ठः -ष्ठा -ष्ठं, विषयाश्रितः -ता -तं, विषयनिष्ठः &c., पदार्थाश्रितः -ता -तं, विषयसम्बन्धी -न्धिनी &c., पात्रनिष्ठः &c., पात्रसम्बन्धी &c.—(In grammar) कर्म्मपदविषयः -या -यं.

OBJECTOR, *s.* बाधकः, विरुद्धहेतुवादी *m.* (न्), कक्षावादी, अपवादकः.

To OBJURGATE, *v. a.* निन्द् (c. 1. निन्दति -न्दितुं), उपालभ् (c. 1. -लभते -लब्धुं), आक्रुश् (c. 1. -क्रोशति -क्रोष्टुं), समाक्रुश्, भर्त्स् (c. 10. भर्त्सयते -ति -यितुं), क्षिप् (c. 6. क्षिपति, क्षेप्तुं), अवक्षिप्, आक्षिप्, अधिक्षिप्, धिक्कृ.

OBJURGATION, *s.* निन्दा, उपालम्भः, तिरस्कारः, भर्त्सनवाक्यं, निर्भर्त्सनं, क्षेपः, अवक्षेपः, धिक्कारः, परीवादः.

OBJURGATORY, *a.* निन्दकः -का -कं, निन्दार्थकः -का -कं, तिरस्कारार्थकः &c.

OBLATION, *s.* (Offering to the gods, &c.) बलिः *m.*, उपहारः, देवोपहारः, उपहरणं, हुतं, हव्यं, होमः, हुतहोमं, आहुतिः *f.*, आहवः -वनं, हवनं, उपायनं, देवोपायनं, कव्यं, निर्वपणं, अवदानं, सत्रं, चरुः *m.*, प्रयागः, इष्टिः *f.*, वैतानं, वितानः -नं, सवः, पात्रोरः, कुण्डपाय्यः.—(Of eatable articles, &c.) नैवेद्यं, निवेदनं.—(Of curds) पृषदाज्यं.—(Of rice-milk and sugar) परमान्नं, पायसः.—(A respectful oblation of rice, &c. with water) अर्घ्यं, अर्घः; 'the presentation of it,' अर्घदानं.—(Oblation to all the deities) वैश्वदेवं, वैश्वदेवकर्म्म *n.*—(To the manes) कव्यं. *See* MANES. (To the gods and manes) हव्यकव्यं; 'dressed oblation,' हव्यपाकः; 'grand and extraordinary oblation,' महाबलिः *m.*, महानैवेद्यं; 'proper for an oblation,' हव्यः -व्या -व्यं; 'to make an oblation to fire,' अनले होमं कृ.

OBLECTATION, *s.* आनन्दः, आह्लादः, हर्षः, प्रमोदः, मदः.

To OBLIGATE, *v. a.* बन्ध् (c. 9. बध्नाति, बन्द्धुं), निबन्ध्, वशं -शां -शं कृ, नियमेन बन्ध्, नियमपूर्व्वं or प्रतिज्ञापूर्व्वं, बन्ध्.

OBLIGATION, *s.* (Binding power, as of a vow, promise, debt, &c., incumbency) अवश्यकता -त्वं, आवश्यकता, अवश्यकर्त्तव्यता -त्वं, अवश्यकार्य्यता, कर्त्तव्यता, विधेयता, अवश्यम्भावः, आवश्यं, भारः, ऋणं; 'under the obligation of a debt,' ऋणी -णिनी -णि (न्); 'free from obligation,' अनृणी &c., अवतीर्णः -र्णा -र्णं, उत्तीर्णः

&c., ऋणमुक्तः -क्ता -क्तं; 'religious obligation,' व्रतं, यमः, नियमः, विषयः; 'under a religious obligation,' व्रती &c., व्रतस्थः -स्था -स्थं; 'observing or taking on one's self a religious obligation,' व्रताचरणं, व्रतसङ्ग्रहः; 'violating it,' व्रतलोपः -पनं.—(Engagement, compact) नियमः, समयः, प्रतिज्ञा -ज्ञानं, संविद् *f.*, संस्कारः, उपगमः, अभ्युपगमः, अभ्युपायः, सन्धा, सन्धानं, सन्धिः *m.*, संश्रवः.—(Bound state) बद्धता, निबद्धता.—(Favor, any act by which a person becomes bound to another) उपकारः, अनुग्रहः, उपकृतं, सुकृतं, हितं, प्रियं, उपचारः, कृतोपकारः; 'to lay under an obligation,' उपकृ, उपकारेण बद्धं -द्धां कृ, उपकारबद्धं -द्धां कृ.

OBLIGATORY, *a.* अवश्यकः -का -कं, आवश्यकः -की -कं, अवश्यकर्त्तव्यः -व्या -व्यं, अवश्यः -श्या -श्यं, अवश्यकार्य्यः -र्य्या -र्य्यं, अवश्यमन्तव्यः -व्या -व्यं, अवश्यमाननीयः -या -यं, अवश्यपालनीयः -या -यं.

To OBLIGE, *v. a.* (Constrain, compel). Expressed by the causal form usually in conjunction with बलात् or बलेन or बलात्कारेण; as, 'to oblige a man to do any thing,' बलेन पुरुषं किञ्चित् कृ in caus. (कारयति -यितुं) or प्रवृत् in caus. (-वर्त्तयति -यितुं); 'to oblige to pay,' दा in caus. (दापयति -यितुं); 'to oblige to go,' बलेन गम् (c. 10. गमयति -यितुं); 'he obliged me to take the book,' शास्त्रं मां ग्राहयामास. The root अर्ह् is sometimes used in this sense. *See To* COMPEL. (Bind) बन्ध् (c. 9. बध्नाति, बन्द्धुं), निबन्ध्.—(By a compact or agreement) नियमेन or नियमपूर्व्वं or प्रतिज्ञापूर्व्वं बन्ध्.—(By a favor or kindness) उपकारेण बन्ध् or बद्धं -द्धां कृ, उपकारबद्धं -द्धां कृ.—(Favor, do a favor to) अनुग्रह् (c. 9. -गृह्णाति -ग्रहीतुं), अनुग्रहं कृ, अनुरुध् (c. 4. -रुध्यति -ते -रोद्धुं), उपकृ, उपकारं कृ, साहाय्यं कृ, हितं कृ, प्रियं कृ; 'to be obliged.' *See* the next.

OBLIGED, *p. p.* (Compelled) expressed by the pass. part. of the causal form. *See* COMPELLED, CONSTRAINED. (Bound) बद्धः -द्धा -द्धं; 'by a favor,' उपकारबद्धः &c.—(Favored, indebted) अनुगृहीतः -ता -तं, उपकृतः -ता -तं; 'I am obliged to you for your advice,' अनुगृहीतोऽस्मि or अनुगृहीतोऽहं तवोपदेशेन.

OBLIGING, *a.* (Having the disposition to do favors) उपकारशीलः -ला -लं, उपकारी -रिणी -रि (न्), परोपकारी &c., उपकारबुद्धिः -द्धिः -द्धि, अनुग्राही &c., अनुरोधी &c., अनुकूलः -ला -लं, प्रियङ्करः -रा -रं, सुशीलः -ला -लं.

OBLIGINGLY, *adv.* उपकारशीलत्वात्, उपकारबुद्ध्या, सानुग्रहं, अनुग्रहेण, अनुरोधेन, सानुकूल्यं, प्रीत्या, सुशीलवत्, सुशीलत्वात्.

OBLIGINGNESS, *s.* उपकारशीलता, परोपकारशीलता, परोपकारिता, अनुग्रहः, अनुग्रहशीलता, अनुरोधः, अनुकूलता, आनुकूल्यं, सुशीलता.

OBLIQUE, *a.* (Not direct) वक्रः -क्रा -क्रं, वक्रिमः -मा -मं, कुटिलः -ला -लं, जिह्मः -ह्मा -ह्मं, विजिह्मः &c., तिर्य्यङ् -रश्ची -र्य्यक् (च्), असरलः -ला -लं, अनृजुः -जुः -जु, वक्री -क्रिणी -क्रि (न्), विषमः -मा -मं. (As language, &c.) वक्रः -क्रा -क्रं, अस्पष्टः -ष्टा -ष्टं, उपरोधी &c.; 'oblique speech,' वक्रोक्तिः *f.*, वक्रभणितं.—(In grammar) कारकविभक्तिकः -का -कं; 'oblique case,' कारकं, कारकविभक्तिः *f.*, कारकं.—(Oblique vision) वक्रदृष्टिः *f.*; 'having it,' वक्रदृष्टिः -ष्टिः -ष्टि, तिर्य्यग्दृष्टिः &c.

OBLIQUELY, *adv.* वक्रं, कुटिलं, तिर्य्यक्, तिरस्, जिह्मं, विजिह्मं, असरलं.

OBLIQUENESS, OBLIQUITY, *s.* वक्रता, कुटिलता, कौटिल्यं, जिह्मता, तिर्य्यक्त्वं, असरलता, असारल्यं, अनृजुता -त्वं, विषमता; 'of vision,' वक्रदृष्टिः *f.*, दृष्टिवक्रता, वक्रदृष्टित्वं, तिर्य्यग्दृष्टित्वं.—(Deviation from moral rectitude) विमार्गगमनं, विपथगमनं, उत्पथगमनं, कुपथगमनं, सत्पथभ्रंशः, सत्पथत्यागः, असदाचारः, व्यभिचारः.

To OBLITERATE, *v. a.* अपमृज् (c. 2. -मार्ष्टि -र्ष्टुं), व्यामृज्, प्रमृज्, अवमृज्, व्यामृश् (c. 6. -मृशति -म्रष्टुं), अवमृश्, व्यामर्षं कृ, अवमर्षणं कृ, उच्छिद् (c. 7. -छिनत्ति -छेत्तुं), लुप् (c. 6. लुम्पति, लोप्तुं), लोपं कृ, विनश् (c. 10. -नाशयति -यितुं), उन्मूल् (c. 10. -मूलयति -यितुं); 'is obliterated from the memory,' विस्मार्य्यते.

OBLITERATED, *p. p.* अपमृष्टः -ष्टा -ष्टं, व्यामृष्टः &c., उन्मृष्टः &c., उच्छिन्नः -न्ना -न्नं, लुप्तः -प्ता -प्तं, विशीर्णः -र्णा -र्णं.

OBLITERATION, *s.* मार्जना, अपमार्जना, व्यामर्षः, अवमर्षणं, लोपः.

OBLIVION, *s.* विस्मृतिः *f.*, विस्मरणं, अस्मृतिः *f.*, अस्मरणं, स्मृतिनाशः, स्मृतिहानिः *f.*, व्यामोहः.—(Remission of offences) दोषविस्मरणं, सकलापराधमोचनं.

OBLIVIOUS, *a.* (Causing forgetfulness) विस्मारकः -का -कं, विस्मृतिजनकः -का -कं, विस्मृतिकारकः &c.—(Forgetful) विस्मरणशीलः -ला -लं.

OBLIVIOUSNESS, *s.* विस्मरणशीलता, विस्मृतिः *f.* *See* FORGETFULNESS.

OBLONG, *a.* आयतः -ता -तं, आयतिमान् -मती -मत् (त्), दीर्घचतुरस्रः -स्रा -स्रं, दीर्घचतुरस्राकारः -रा -रं, दीर्घाकारः &c.

OBLONG, *a.* (The figure) आयतः -तं, दीर्घचतुरस्रः -स्रं.

OBLOQUY, *s.* निन्दा, परीवादः, परिभाषणं, अपवादः, निन्दोक्तिः *f.*, परुषोक्तिः *f.*, दुर्व्वाक्यं, दुरुक्तं, वाच्यता, तिरस्कारः.

OBMUTESCENCE, *s.* मौनं, अभाषणं, वाक्स्तम्भः, वाग्रोधः, गतवाक्त्वं.

OBNOXIOUS, *a.* (Liable, subject) योग्यः -ग्या -ग्यं, अधीनः -ना -नं, वशः -शा -शं, अर्हः -र्हा -र्हं, उपयुक्तः -क्ता -क्तं, पात्र in comp., आस्पद in comp., विषय in comp., अधिकारी -रिणी &c.; 'obnoxious to punishment,' दण्डयोग्यः &c., दण्ड्यः -ण्ड्या -ण्ड्यं, दण्डनीयः -या -यं, दण्डार्हः -र्हा -र्हं; 'to disease,' रोगाधीनः -ना -नं, रोगपात्रं, रोगास्पदं; 'to death,' मरणाधीनः &c., मरणपात्रं; 'to blame,' निन्दाविषयः -या -यं.—(Odious, offensive) द्वेष्यः -ष्या -ष्यं, द्वेषणीयः -या -यं, द्वेषी &c., अप्रियः -या -यं, विप्रियः &c., अनिष्टः -ष्टा -ष्टं, असन्तोषकरः -रा -रं, अप्रीतिकरः &c.

OBNOXIOUSLY, *adv.* द्वेषणीयं, अप्रियं, विप्रियं, व्यलीकं, विरुद्धं.

OBNOXIOUSNESS, *s.* (Liability) योग्यता, अधीनता, वशता.—(Odiousness) द्वेष्यता, द्वेषणीयता, अप्रियता, अनिष्टता.

OBSCENE, *a.* अवाच्यः -च्या -च्यं, गर्ह्यः -र्ह्या -र्ह्यं, गर्हितः -ता -तं, अशुद्धः -द्धा -द्धं, अवचनीयः -या -यं, अनक्षरः -रा -रं, अपवित्रः -त्रा -त्रं, कुत्सितः -ता -तं, बीभत्सः -त्सा -त्सं, दुरुक्तः -क्ता -क्तं, कुश्राव्यः -व्या -व्यं; 'obscene word,' अपशब्दः, दुर्व्वचनं.—(Ill-omened) अशुभः -भा -भं, अमङ्गलः -ला -लं, अभद्रः -द्रा -द्रं, अमङ्गलसूचकः -का -कं.

OBSCENELY, *adv.* अवाच्यं, गर्हितं, गर्हणीयं, अशुद्धं, कुत्सितं.

OBSCENENESS, OBSCENITY, *s.* अवाच्यता, गर्ह्यता, अशुद्धता -त्वं, कुत्सितत्वं, बीभत्सता; 'of language,' दुर्व्वचनं, दुर्व्वाक्यं, दुर्भाषणं, दुरुक्तिः *f.*, अपशब्दः.

OBSCURATION, *s.* (Act) कलुषीकरणं, तिमिरीकरणं, मलिनीकरणं, प्रकाशहरणं, कान्तिहरणं.—(State) निष्प्रभता, सान्धकारता, तेजःक्षयः, तेजोहानिः *f.*, प्रभाक्षयः, प्रकाशक्षयः.—(Of a planet) अस्तः -स्तं.

OBSCURE, *a.* (Dark, dim) निष्प्रभः -भा -भं, निःप्रभः &c., अप्रभः &c., मलिनः -ना -नं, मलिनप्रभः &c., निस्तेजाः -जाः -जः (स्), तेजोहीनः -ना -नं, अप्रकाशः -शा -शं, सान्धकारः -रा -रं, सतिमिरः -रा -रं, तमस्वी -स्विनी -स्वि (न्), दुर्दर्शः -र्शा -र्शं.—(Not easily understood, not clear) गूढः -ढा -ढं, गूढार्थः -र्था -र्थं, गूढार्थकः -का -कं, निगूढः

-ढा -ढं, दुर्ज्ञेयः -या -यं, दुर्गमः -मा -मं, दुर्बोधः -धा -धं, बोधागम्यः -म्या -म्यं, व्याख्यागम्यः &c., अव्याख्येयः -या -यं, अस्पष्टः -ष्टा -ष्टं, अव्यक्तः -क्ता -क्तं, अस्फुटः -टा -टं, गहनार्थः &c., कठिनः -ना -नं.—(Not noted) अप्रसिद्धः -द्धा -द्धं, अख्यातः -ता -तं, अविख्यातः &c., अल्पप्रतिष्ठः -ष्ठा -ष्ठं, अल्पकीर्त्तिः -र्त्तिः -र्त्ति.

To OBSCURE, *v. a.* (Darken) निष्प्रभीकृ, तिमिरीकृ, मलिनीकृ, तिमिर (nom. तिमिरयति -यितुं), मलिन (nom. मलिनयति -यितुं), प्रछद् (c. 10. -छादयति -यितुं), कलुषीकृ, तेजो हृ (c. 1. हरति, हर्त्तुं), प्रकाशं हृ, कान्तिं हृ, प्रभां हृ, प्रकाशक्षयं कृ.—(With clouds) मेघावृतं -तां कृ, मेघाच्छन्नं -न्नां कृ.—(Make difficult to be understood) गूढीकृ, निगूढीकृ, दुर्ज्ञेयं -यां कृ, दुर्गमीकृ, अस्पष्टीकृ.

OBSCURED, *p. p.* तमोवृतः -ता -तं, नष्टप्रभः -भा -भं, मलिनप्रभः &c., हतप्रभः &c., क्षीणप्रभः &c., नष्टप्रकाशः -शा -शं, हतप्रकाशः &c., तमोभूतः -ता -तं, कलुषीकृतः -ता -तं, नष्टतेजाः -जाः -जः (स्), नष्टतेजस्कः -स्का -स्कं, हततेजाः &c., नष्टकान्तिः -न्तिः -न्ति, क्षीणकान्तिः &c., विगततेजाः &c., मलिनितः -ता -तं, मलिनः -ना -नं, क्षततेजाः &c., क्षतप्रभः &c., क्षतकान्तिः &c., क्षतौजाः &c., हतौजाः &c., हतज्योतीः -तीः -तिः (स्), अरोकः -का -कं.

OBSCURELY, *adv.* (Darkly) सान्धकारं, निष्प्रभं, सतिमिरं, अप्रकाशं.—(Not clearly) अस्पष्टं, अव्यक्तं, गूढं, निगूढं, दुर्ज्ञेयं.

OBSCURITY, OBSCURENESS, *s.* (Darkness) निष्प्रभता, सान्धकारता, तिमिरं, तमिस्रं, तमस् *n.*, अन्धकारः, तेजोहीनता, तेजोहानिः *f.*, अप्रकाशत्वं, अल्पप्रकाशः, प्रभाहीनता, प्रभाहानिः *f.*, अवतमसं.—(Darkness of meaning) गूढार्थता, गूढता, निगूढता, दुर्ज्ञेयता, दुर्बोधता, अस्पष्टता, अव्यक्तता -त्वं, गहनता, दुर्गमता, बोधागम्यता, व्याख्यागम्यता, अव्याख्या -ख्यानं.—(State of being unknown to fame) अप्रसिद्धिः *f.*, अप्रसिद्धता, अख्यातिः *f.*, अविख्यातिः *f.*, अल्पप्रतिष्ठा, अल्पकीर्त्तिः *f.*, कीर्त्तिन्यूनता, कीर्त्त्यभावः.

To OBSECRATE, *v. a.* निर्बन्धेन प्रार्थ् (c. 10. -अर्थयति -ते -यितुं), विनयेन प्रार्थ्.

OBSECRATION, *s.* निर्बन्धपूर्व्वं प्रार्थनं or प्रार्थना, विनयेन प्रार्थनं.

OBSEQUIAL, *a.* और्द्ध्वदेहिकः -की -कं, आन्तकर्म्मिकः -की -कं, उत्तरक्रियासम्बन्धी -न्धिनी -न्धि (न्), अन्त्येष्टिसम्बन्धी &c., अन्त्येष्टियोग्यः -ग्या -ग्यं.

OBSEQUIES, *s. pl.* उत्तरक्रिया, उत्तरकर्म्म *n.* (न्), उत्तरकार्य्यं, प्रेतक्रिया, प्रेतकर्म्म *n.*, प्रेतकृत्यं, प्रेतकार्य्यं, प्रेतसंस्कारः, अन्त्यकर्म्म *n.*, अन्त्यक्रिया, अन्तकर्म्म *n.*, अन्त्येष्टिः *f.*, अन्त्येष्टिक्रिया, शवकर्म्म *n.*, मृतकर्म्म *n.*, मृतक्रिया, मृतकार्य्यं, मृतसंस्कारः, अतीतसंस्कारः, और्द्ध्वदेहिका -कं, मृतसत्क्रिया, अन्तसत्क्रिया, मृतकं, श्राद्धं, श्राद्धादिकर्म्म *n.*, पारलौकिकं, अशुभकर्म्म *n.*, अशुभकार्य्यं. The श्राद्धं consists of obsequial oblations to the manes of deceased ancestors. *See* MANES; 'monthly obsequies,' अन्वाहार्य्यं -र्य्यकं, अनुहार्य्यः, मासिकं.

OBSEQUIOUS, *a.* अत्यनुकूलः -ला -लं, अत्यनुरोधी -धिनी -धि (न्) वशवर्त्ती &c., छन्दोनुवर्त्ती &c., छन्दोनुरोधी &c., अनुवर्त्ती &c., अनुविधायी &c., वशंवदः -दा -दं, वशानुगः -गा -गं, विनतः -ता -तं, नम्रः -म्रा -म्रं, आज्ञाकारी &c.

OBSEQUIOUSLY, *adv.* अत्यनुकूलं, अत्यनुरोधेन, छन्दोनुरोधपूर्व्वं.

OBSEQUIOUSNESS, *s.* अत्यनुकूलता, अत्यानुकूल्यं, अत्यनुरोधः -धनं, छन्दोनुरोधः, छन्दोनुवृत्तिः *f.*, छन्दोनुवर्त्तनं, छन्दोनुवृत्तं.

OBSERVABLE, *a.* दृश्यः -श्या -श्यं, दर्शनीयः -या -यं, दृष्टिगोचरः -रा -रं, लक्ष्यः -क्ष्या -क्ष्यं, आलोकनीयः -या -यं, प्रेक्ष्यः -क्ष्या -क्ष्यं, प्रेक्षणीयः -या -यं.—(That may be practised) व्यवहार्य्यः -र्य्या -र्य्यं, व्यवहर्त्तव्यः -व्या -व्यं.

OBSERVANCE, *s.* (Act of keeping or performing) पालनं, रक्षणं, सेवनं, निषेवनं, धारणं, आचरणं, अनुष्ठानं.—(Practising) आचरणं, अनुष्ठानं, करणं, विधानं, अभ्यासः, निषेवनं.—(Following) अनुसारः, अनुसरणं.—(Custom, practice) व्यवहारः, आचारः, चर्य्या, चरितं, रीतिः *f.*—(Religious observance) व्रतं, नियमः, यमः, नियामः, विधिः *m.*, विधानं.—(Respect) आदरः, सत्कारः, मानं.

OBSERVANT, *a.* (Taking notice) निरीक्षकः -का -कं, प्रेक्षकः -का -कं.—(Keeping, practising, following) पालकः -का -कं, निषेवकः -का -कं, अनुष्ठायी -यिनी -यि (न्), धारी &c., अनुसारी &c., आस्थितः -ता -तं, निष्ठितः -ता -तं, आश्रितः -ता -तं.—(Of orders) आज्ञापालकः.—(Of benefits received) कृतवेदी &c., कृतज्ञः -ज्ञा -ज्ञं.

OBSERVATION, *s.* (Act of looking at or taking notice) निरीक्षणं, निरीक्षा, अवेक्षणं, अवेक्षा, अवलोकनं, आलोकनं, आलोचनं, निरूपणं, सन्दर्शनं, दृष्टिः *f.*, लक्ष्यं, लक्षं.—(Result of taking notice) लिखितं, चर्चा. *See* NOTE, NOTICE; 'in one's observation,' प्रत्यक्षे -क्षतस्.

OBSERVATORY, *s.* ताराङ्गणं, ग्रहनक्षत्रादिदर्शनस्थानं.

To OBSERVE, *v. a.* and *n.* (See, look at) दृश् (c. 1. पश्यति, द्रष्टुं), अनुदृश्, प्रतिदृश्, अभिदृश्, परिदृश्, प्रदृश्, सम्प्रदृश्, सन्दृश्, लक्ष् (c. 10. लक्षयति -यितुं), आलक्ष्, समालक्ष्, संलक्ष्, उपलक्ष्, समुपलक्ष्, ईक्ष् (c. 1. ईक्षते -क्षितुं), समीक्ष्, वीक्ष्, प्रेक्ष्, निरीक्ष्, अवेक्ष्, प्रत्यवेक्ष्, अभिप्रेक्ष्, सम्प्रेक्ष्, उदीक्ष्, आलोक् (c. 10. -लोकयति -यितुं, c. 1. -लोकते -कितुं), समालोक्, अवलोक्, विलोक्, आलोच् (c. 10. -लोचयति -यितुं), निरूप् (c. 10. -रूपयति -यितुं), विलोकनं कृ, अवलोकनं कृ.—(With the intellect) उपलभ् (c. 1. -लभते -लब्धुं), विज्ञा (c. 9. -जानाति -नीते -ज्ञातुं), विभू (c. 10. -भावयति -यितुं), विभावनं कृ, अनुभू.—(Keep, perform, practise) पाल् (c. 10. पालयति -यितुं), प्रतिपाल्, परिपाल्, अनुपाल्, सम्पाल्, अभिपाल्, रक्ष् (c. 1. रक्षति -क्षितुं), अभिरक्ष्, परिरक्ष्, संरक्ष्, आचर् (c. 1. -चरति -रितुं), समाचर्, अनुष्ठा (c. 1. -तिष्ठति -ष्ठातुं), आस्था, समास्था, समुपास्था, विधा (c. 3. -दधाति -धातुं), सेव् (c. 1. सेवते -वितुं), निषेव्, उपसेव्, समासेव्; 'observe propriety,' विनयं रक्ष्.—(Utter, make a remark) वाक्यं वद् (c. 1. वदति -दितुं) or प्रवद्, चर्चां कृ.—(Adhere to) आश्रि (c. 1. -श्रयति -यितुं), अवलम्ब् (c. 1. -लम्बते -म्बितुं), उपास् (c. 2. -आस्ते -आसितुं).

OBSERVED, *p. p.* (Noticed by the eye) दृष्टः -ष्टा -ष्टं, ईक्षितः -ता -तं, निरीक्षितः -ता -तं, प्रेक्षितः -ता -तं, आलोकितः -ता -तं, आलोचितः -ता -तं, निरूपितः -ता -तं.—(Kept, performed) पालितः -ता -तं, आचरितः &c., अनुष्ठितः &c., सेवितः &c., निषेवितः &c., अनुसृतः &c.

OBSERVER, *s.* (Looker on) प्रेक्षकः, वीक्षकः, प्रेक्षणिकः, द्रष्टा *m.* (ष्टृ), दर्शी *m.* (न्), आलोचकः. *See* OBSERVANT.

OBSERVINGLY, *adv.* सुनिरूपणपूर्व्वं, चर्चया, मनोयोगेन, सावधानं.

OBSOLETE, *a.* अव्यवहारितः -ता -तं, निरूढः -ढा -ढं, नैरूढः -ढी -ढं, कालान्तरितः -ता -तं, गतकालिकः -का -कं, लुप्तः -प्ता -प्तं, अप्रचलः -ला -लं, अप्रचलितः -ता -तं, अचलितः -ता -तं, अप्रचरितः -ता -तं, अव्यवहार्य्यः -र्य्या -र्य्यं, अनुपस्थितः -ता -तं, अनुपलब्धः -ब्धा -ब्धं, विकटः -टा -टं.

OBSOLETENESS, *s.* अव्यवहार्य्यता, अव्यवहारितत्वं, लुप्तता, अप्रचलितत्वं, अप्रचारः, लोपः, अनुपस्थितिः *f.*, अनुपलब्धिः *f.*

OBSTACLE, *s.* विघ्नः, अन्तरायः, व्याघातः, प्रत्यूहः, प्रतिबन्धः -न्धकं, रोधः -धनं, अवरोधः, उपरोधः, विरोधः, संरोधः, निरोधः, स्तम्भः -म्भनं, प्रतिष्टम्भः, विष्टम्भः, विघातः -तं, विष्कम्भः, बाधा -धः -धकः, व्यवधानं, विप्कम्भः; 'removal of obstacles,' विघ्नसिद्धिः *f.*, विघातसिद्धिः *f.*,

विघ्ननाशः -शनं, विघ्नहरणं; 'causing obstacles,' विघ्नकरः -रा -रं, विघ्नकारी -रिणी -रि (न्).

To oust *v. a.* निःसृ (c. 10. -सारयति -यितुं), वहिष्कृ, वहिःकृ, निराकृ, अपास् (c. 4. -अस्यति -असितुं), निरस्, स्थानाद् भ्रंश् (c. 10. भ्रंशयति -यितुं), निष्कस् (c. 10. -कासयति -यितुं).

Ousted, *p. p.* निःसारितः -ता -तं, वहिष्कृतः -ता -तं, स्थानभ्रष्टः -ष्टा -ष्टं.

Out, *adv.* (Without, not in) वहिस्, निर्, वि, विनिर्, अप prefixed, governing the abl. c.; 'to go out,' वहिर्गम्, निर्गम्, विनिर्गम्, अपगम्; 'to draw out,' निष्कृष्; 'to be out,' वहिर्भू; 'having gone out into the open air,' प्रकाशे निर्गत्य.—(Denoting disclosure or discovery) expressed by the prep. वि, अप, प्र, परि, नि, निर्, अव &c., in combination with various roots; as, 'to give out,' प्रकाश्, विकाश्, निविद्, विघुष्; 'to find out,' परिज्ञा, अभिज्ञा, निरूप्, उपलभ्, निर्णी; 'to be out, be disclosed,' विवृतः -ता -तं भू, प्रकाशितः -ता -तं भू; 'the secret is out,' रहस्यं भिन्नं or विभिन्नं or प्रकाशितं.—(Denoting extinction) expressed by निर्, with the root वा; as, 'to put out,' निर्वा in caus.; 'to go out,' निर्वा, निर्वाणः -णा -णं भू.—(In a state of exhaustion or being empty) क्षीणः -णा -णं, परिक्षीणः -णा -णं, शून्यः -न्या -न्यं, गतः -ता -तं, विगतः -ता -तं.—(Out of employment) क्षीणवृत्तिः -त्तिः -त्ति, निर्व्यापारः -रा -रं, अव्यापारी -रिणी &c., व्यापारशून्यः -न्या -न्यं.—(Out of office) अधिकारभ्रष्टः -ष्टा -ष्टं, भ्रष्टाधिकारः -रा -रं, च्युताधिकारः &c.—(To the end) अवसानपर्य्यन्तं, अन्तं or शेषं यावत्, साद्यन्तं; 'hear me out,' मद्वचनम् अवसानपर्य्यन्तं शृणु.—(Loudly) उच्चैस्, उच्चैःस्वरेण, मुक्तकण्ठं; 'to speak out,' उच्चैःस्वरेण वद्.—(Openly) प्रकाशं, व्यक्तं, प्रकटं. —(In error) अपराद्धः -द्धा -द्धं, भ्रान्तः -न्ता -न्तं, सापराधः -धा -धं. —(Deficient) न्यूनः -ना -नं, क्षीणः -णा -णं.—(Out of, in the sense of from) usually expressed by the abl. c. alone, or in combination with a root and some of the prep. वहिस्, निर्, विनिर्, अप &c. *See* From. (Out of, in the sense of beyond) expressed by अति prefixed; as, 'out of one's power,' अतिशक्ति; 'out of the power of man,' अतिमानुषः -षी -षं; 'to pass out of one's sight,' चक्षुर्विषयम् अतिक्रम्; or by the fut. pass. part.; as, 'out of one's power,' अशक्यः -क्या -क्यं, असाध्यः -ध्या -ध्यं, असाधनीयः -या -यं; 'out of one's reach,' अपारणीयः -या -यं, अपार्य्यः -र्य्या -र्य्यं, अप्राप्यः -प्या -प्यं, अविषयः -या -यं, विषयातिक्रान्तः -न्ता -न्तं; or by अगोचर in comp.; as, 'out of hearing,' कर्णागोचरः -रा -रं.—(Out of, denoting exclusion, cessation, deviation from, omission, absence, dereliction, &c.) variously expressed by अ, निर्, वि, अप, गत, विगत, अतीत, त्यक्त, विरुद्ध &c.; as, 'out of use,' अव्यवहारितः -ता -तं; 'out of tune,' विस्वरः -रा -रं, अस्वरः &c.; 'out of fashion,' लोकव्यवहारविरुद्धः -द्धा -द्धं; 'out of time,' गतकालिकः -का -कं; 'out of season,' अप्राप्तकालः -ला -लं, अकालिकः &c.; 'out of the road,' त्यक्तमार्गः -र्गा -र्गं, पथभ्रष्टः &c.; 'out of one's mind,' बुद्धिभ्रष्टः &c., हतबुद्धिः &c., नष्टबुद्धिः &c.; 'out of order,' विधिविरुद्धः &c., विधिघ्नः -घ्नी -घ्नं, अयथाविधिः &c., विसूत्रः -त्रा -त्रं; 'out of place,' अस्थानः -ना -नं; 'out of health,' अस्वस्थः -स्था -स्थं; 'out of hope,' निराशः -शा -शं; 'out of patience,' अक्षमः -मा -मं.—(Out of, denoting in consequence of) expressed by the abl. c., as, 'out of anger,' कोपात्; 'out of unsteadiness of mind,' अस्थिरचित्तत्वात्.—(Out of hand) सद्यस्, तत्काले, तत्क्षणे. *See* Immediately.

Out, *interj.* (Out upon you, out upon it) अपेहि, दूरमपसर, अपेहि, अपसर, धिक्, हा.

To out-act, *v. n.* अतिचर् (c. 1. -चरति -रितुं), कर्म्मणा or कार्य्येण अतिक्रम् (c. 1. -क्रामति -क्रमितुं), अधिकं कृ.

To out-balance, *v. a.* *See* *To* outweigh.

To outbid, *v. a.* अधिकमूल्यं दित्सामीति or दातुमिच्छामीति वद (c. 1. वदति -दितुं).

Outbidder, *s.* अधिकमूल्यदित्सुः *m.*, अधिकमूल्यं दित्सामीति वादी *m.* (न्).

To outbrave, *v. a.* अधिकं भर्त्स् (c. 10. भर्त्सयति -ते -यितुं), अधिकभर्त्सनेन पराभू.

Outbreak, *s.* उद्भेदः, प्रोद्भेदः, स्फोटः -टनं, सवेगो निर्गमः.

Outcast, *a.* or *s.* (Expelled from society or one's own class or caste) जातिभ्रष्टः -ष्टा -ष्टं, जातिवहिष्कृतः -ता -तं, जातिवाह्यः -ह्या

-ती, जातिहीनः -ना -नं, हीनजातिः -तिः -ति, जातिपतितः -ता -तं, वर्णभ्रष्टः &c., वर्णहीनः &c., हीनवर्णी र्णा -र्णि, वर्णापेतः -ता -तं, पंक्तिबाह्यः &c., अपांक्तः -क्ती -क्तं, अपांक्तेयः -या -यं, पंक्तिदूषकः -का -कं, पतितः -ता -तं, लोकबाह्यः &c., प्रस्कन्नः -न्ना -न्नं, व्रात्यः -त्या, जुगुप्सितः -ता.—(Of a degraded or low caste or class) चाण्डालः -ली, चण्डालः -ली, अपसदः, विवर्णः -र्णा -र्णं, नीचः -चा -चं, निहीनः -ना -नं, नीचजातिः -तिः -ति, न्यग्जातिः &c., अन्त्यजातीयः -या -यं, अधमजातीयः &c., अधमवर्णः &c., अधमाचारः -रा -रं, दुराचारः &c., दुर्वृत्तः -त्ता -त्तं, आचारहीनः &c., आचारवर्जितः -ता -तं, पृथग्जनः, पामरः, जाल्मः.

OUTBURST, *s.* उद्भेदः, प्रोद्भेदः. *See* OUTBREAK, ERUPTION.

OUTCRY, *s.* (Clamor, loud cry) कोलाहलः, उत्क्रोशः, उत्क्रुष्टं, उच्चैःस्वरः, उच्चैर्घुष्टं, संहूतिः *f.*, बहुभिः कृता संहूतिः, चित्कारः, चीत्कारः, कलकलः, तुमुलं; 'popular outcry,' लोकापवादः, जनापवादः, लोकरवः, जनरवः, जनरावः.—(Cry of pain) आर्त्तनादः.

To OUTDO, *v. a.* अतिक्रम् (c. 1. -क्रामति -क्रमितुं), अतिचर् (c. 1. -चरति -रितुं), अतिशी (c. 2. -शेते -शयितुं), अतिरिच् in pass. (-रिच्यते), अभिभू. *See To* SURPASS.

OUT-DOOR, *a.* द्वारवहिःस्थः -स्था -स्थं, द्वारवहिर्भूतः -ता -तं.

OUTER, OUTERMOST, *a.* वहिःस्थः -स्था -स्थं, वाह्यः -ह्या -ह्यं, वहिर्भूतः -ता -तं, वहिर्भवः -वा -वं, वहिर्वर्त्ती -र्त्तिनी -र्त्ति (न्), वाहीकः -का -कं, वहिर्भागस्थः &c., वहिस् in comp.; as, 'outer part,' वहिर्भागः; 'outer door,' वहिर्द्वारं. *See* OUTMOST.

OUTFIT, *s.* (Equipment for a voyage, &c.) सज्जा, सम्भारः, सोपकारद्रव्यसम्भारः, सम्भृतिः *f.*, सामग्री -ग्र्यं, उपकरणसामग्री, परिच्छदः, परिच्छदसामग्री, सन्नाहः.—(Of a ship) नौकासज्जा.

To OUTGO, *v. a.* अतिगम् (c. 1. -गच्छति -गन्तुं), अती (c. 2. अत्येति -तुं, rt. इ), अतिचर् (c. 1. -चरति -रितुं), अतिक्रम (c. 1. -क्रामति -क्रमितुं).

OUTGOING, *s.* (Expenditure) व्ययः, अपव्ययः, अपचयः, उपक्षयः, विनियोगः, अपहारः; 'incomings and outgoings,' आयव्ययौ *m.* du.

To OUTGROW, *v. a.* अतिवृध् (c. 1. -वर्धते -र्धितुं), अधिकं वृध्, अतिशयवृद्धिं कृ, अधिकवृद्धिं कृ, अधिकवर्धनं कृ.

OUT-HOUSE, *s.* वाह्यगृहं, वहिर्गृहं, वहिःस्थगृहं, उपगृहं.

OUTLANDISH, *a.* (Foreign) विदेशीयः -या -यं, वैदेशिकः -की -कं, अन्यदेशीयः &c., विदेशजः -जा -जं, दूरदेशीयः -या -यं, परदेशीयः &c., दूरदेशवासी -सिनी -सि (न्), दूरवासी &c.—(Rustic, barbarous) ग्रामीयः &c., ग्राम्यः -म्या -म्यं, असभ्यः -भ्या -भ्यं, अशिष्टः -ष्टा -ष्टं, असत्कृतः -ता -तं.

OUTLAW, *s.* व्यवहारवाह्यः, न्यायरक्षणवहिःस्थः, राजरक्षणवाह्यः, धर्म्मवहिःस्थः, पाषण्डः.

To OUTLAW, *v. a.* धर्म्मद्वाराद् वहिष्कृ, धर्म्माद् वहिष्कृ, न्यायद्वाराद् वहिष्कृ, व्यवहारवाह्यं -ह्यां कृ, धर्म्मवाह्यं -ह्यां कृ.

OUTLAWED, *p. p.* धर्म्मद्वारवहिष्कृतः -ता -तं, न्यायरक्षणवहिष्कृतः -ता -तं, व्यवहारवहिर्भूतः -ता -तं, राजरक्षणवहिर्भूतः &c.

OUTLAWRY, *s.* न्यायरक्षणवहिष्करणं, व्यवहारवहिष्करणं, राजरक्षणवहिष्करणं, धर्म्मवहिष्करणं, धर्म्मद्वारवहिष्करणं.

OUTLAY, *s.* व्ययः, अपव्ययः, धनव्ययः, अपचयः, उत्सर्गः, धनोत्सर्गः, धनत्यागः, क्षयः, उपक्षयः. *See* EXPENDITURE.

OUTLET, *s.* द्वारं, निर्गमद्वारं, मुखं, निर्गममार्गः, निर्गमपथः, निर्गमः; 'having a hundred outlets,' शतमुखः -खा -खं.

OUTLINE, *s.* (Exterior line) वाह्यरेखा, वहिर्लेखा.—(Slight sketch of a figure or subject) पाण्डुलेख्यं, पाण्डुरेखा, पाण्डुलेख्यमात्रं, आलेख्यं, लघ्वालेख्यं, वस्तुमात्रं, वस्तु *n.*, आकारः.—(Of a picture) चित्रारम्भः.

To OUTLINE, *v. a.* वाह्यरेखामात्रं लिख् (c. 6. लिखति, लेखितुं), पाण्डुलेख्यं कृ, पाण्डुरेखाम् अङ्क् (c. 10. अङ्कयति -यितुं).

To OUTLIVE, *v. a.* अतिजीव् (c. 1. -जीवति -वितुं), अधिककालं जीव्, दीर्घतरकालं जीव्, भृ (c. 6. म्रियते, मर्त्तुं), म्रियमाणः -णा -णं भू.

OUTLYING, *a.* वहिःस्थः -स्था -स्थं, वहिर्वर्त्ती -र्त्तिनी -र्त्ति (न्).

To OUTMARCH, *v. a.* अतिया (c. 2. -याति -तुं), अतिव्रज् (c. 1. -व्रजति -जितुं), अतिगम् (c. 1. -गच्छति -गन्तुं), शीघ्रतरयात्रां कृ, अग्रे या or यात्रां कृ.

OUTMOST, *a.* अतिवहिःस्थः -स्था -स्थं, अतिवाह्यः -ह्या -ह्यं, मध्यातिदूरस्थः &c. *See* OUTER.

To OUTNUMBER, *v. a.* अधिकसंख्यकः -का -कं भू or अस्, बहुतरसंख्यः -ख्या -ख्यं भू, अधिकीभू, बहुतरीभू.

OUTPOST, *s.* उपरक्षणं, वहिःस्थं सैन्यस्थानं or सैनिकस्थानं.

To OUTPOUR, *v. a.* उत्सिच् (c. 6. -सिञ्चति -सेक्तुं), उत्सृज् (c. 6. -सृजति -स्रष्टुं).

OUTPOURING, *s.* उत्सेकः, उत्सेचनं, अवसेचनं, उत्सर्गः, मोक्षणं.

To OUTRAGE, *v. a.* अभिद्रुह् (c. 4. -द्रुह्यति -द्रोहितुं -द्रोग्धुं), द्रुह्, धृष् (c. 10. धर्षयति -यितुं), प्रधृष्, उपद्रवं कृ, उपमर्दनं कृ, साहसं कृ, प्रमथ् (c. 1. -मथति -थितुं, c. 10. -माथयति -यितुं), प्रमाथं कृ, पारुष्यं कृ, उपघातं कृ, बलात्कारं कृ, न्यक्कृ, अवलेपं कृ, अत्याहितं कृ, दुष् (c. 10. दूषयति -यितुं).

OUTRAGE, *s.* साहसं, महासाहसं, अतिसाहसं, अभिद्रोहः, द्रोहः, प्रमाथः, धर्षः -र्षणं, उपमर्दः, अत्याहितं, उपद्रवः, उपघातः, बलात्कारः, अवलेपः, न्यक्कारः, न्यक्करणं, उद्रेकः, उत्सेकः, अत्ययः, अत्याचारः, उत्पातः, अतिक्रमः, मर्य्यादातिक्रमः, अन्यायः.

OUTRAGED, *p. p.* धर्षितः -ता -तं, प्रधर्षितः -ता -तं, अभिद्रुग्धः -ग्धा -ग्धं, प्रमाथितः -ता -तं, कृतसाहसः -सा -सं, उपमर्दितः -ता -तं, कृतोपद्रवः -वा -वं, न्यक्कृतः -ता -तं, अत्ययितः &c.

OUTRAGEOUS, *a.* अतिसाहसिकः -की -कं, अतिसाहसी -सिनी -सि (न्), अतिसाहसकर्म्मा -र्म्मा -र्म्म (न्), उग्रः -ग्रा -ग्रं, अत्युग्रः &c., उच्चण्डः -ण्डा -ण्डं, अत्याचारी &c., प्रमाथी &c., राक्षसी &c., राक्षसकर्म्मा &c., राक्षसः -सी -सं, राक्षसयोग्यः -ग्या -ग्यं, दारुणः -णा -णं, घोरः -रा -रं, अतिदुष्टः -ष्टा -ष्टं, अतिदुराचारः &c.

OUTRAGEOUSLY, *adv.* अतिसाहसपूर्व्वं, अतिसाहसं कृत्वा, अत्युग्रं, उपद्रवपूर्व्वं, सोपद्रवं, दारुणं, अतिदारुणं, घोरं, अतिदुष्टं, अत्याचारपूर्व्वं.

OUTRAGEOUSNESS, *s.* अतिसाहसिकत्वं, अत्युग्रता, दारुणता, घोरता, अतिदुष्टता -त्वं, राक्षसयोग्यता, उत्सिक्तता.

OUTRÉ, *a.* अतिमर्य्यादः -दा -दं, लोकव्यवहारविरुद्धः -द्धा -द्धं.

To OUTREACH, *v. a.* अतिगम् (c. 1. -गच्छति -गन्तुं), अतिक्रम् (c. 1. -क्रामति -क्रमितुं).

OUTRIDER, *s.* अश्वारूढः परिचरः or अनुचरः or परिचिस्थः.

OUTRIGHT, *adv.* (At once) सद्यस्, तत्काले, तत्क्षणे, सपदि, सम्प्रति, झटिति, अविलम्बितं.—(Completely) सु or अति prefixed, सर्व्वतस्, सम्यक्, अखिलेन, सामूलं, साद्यन्तं.—(Plainly) सुव्यक्तं, सुस्पष्टं, अवक्रं.

To OUTROOT, *v. a.* उन्मूल् (c. 10. -मूलयति -यितुं), समुन्मूल्, उच्छिद् (c. 7. -छिनत्ति -छेत्तुं), उत्पट् (c. 10. -पाटयति -यितुं). *See To* ERADICATE.

To OUTRUN, *v. a.* अतिधाव् (c. 1. -धावति -वितुं), पश्चात् त्यक्त्वा पूर्व्वं or अग्रे धाव् or पूर्व्वम् उपस्था (c. 1. -तिष्ठति -स्थातुं).

OUTSET, *s.* आरम्भः, प्रारम्भः, प्रथमारम्भः, आगमः, उपक्रमः, प्रक्रमः, आदिः *m.*, उपोद्घातः; 'at the very outset,' प्रथमारम्भे, आदौ, आदावेव, प्रथमदर्शनात्; 'the outset and termination,' आगमनिर्गमौ *m.* du., आद्यन्तं.

To OUTSHINE, *v. a.* अतिरुच् (c. 1. -रोचते -ति -चितुं), अधिकं प्रकाश् (c. 1. -काशते -शितुं) or शुभ् (c. 1. शोभते -भितुं), अधिकप्रभां दा, अधिकशोभां दा, अधिकतेजो दा, अधिकप्रकाशं दा; 'the sun outshines the moon,' सूर्य्यश् चन्द्रम् अतिरोचति तेजसा.

OUTSIDE, *s.* (The exterior) वहिर्भागः, वाह्यभागः, उपरिस्थभागः; 'on the outside,' वहिर्भागे, वहिस्.—(Outer side of an enclosure, &c.) वहिःप्रदेशः, वहिर्देशः.—(The utmost limit) परमावधिः *m.*, उत्तमावधिः *m.*

OUTSIDE, *adv.* (On the outside of) वहिस्, वहिर्भागे, अन्तरं -रेण; 'outside the fort,' दुर्गाद् अन्तरं or अन्तरेण.

OUTSIDE, *a.* वहिस् in comp., वाह्यः -ह्या -ह्यं, वहिःस्थः -स्था -स्थं.

OUTSKIRT, *s.* उपान्तः -न्तं, पर्य्यन्तः -न्तं, समन्तः, अन्तः -न्तं, प्रान्तः, सीमा, सीमाप्रदेशः, उत्सङ्गः, परिसरः, धारः; 'of a town,' नगरोपान्तं, नगरप्रान्तः, नगरपरिसरः; 'of a village,' ग्रामान्तः, उपकण्ठं, उपशल्यं; 'of a wood,' वनान्तः, वनधारः.

To OUTSPREAD, *v. a.* विस्तृ (c. 10. -स्तारयति -यितुं), विसृ (c. 10. -सारयति -यितुं), प्रसृ, वितताकृ.

OUTSPREAD, *p.p.* विततः -ता -तं, प्रविततः &c., विस्तारितः -ता -तं, विस्तीर्णः -र्णा -र्णं, विस्तृतः -ता -तं, प्रसारितः &c., विसारितः &c.

OUTSTANDING, *a.* अशोधितः -ता -तं, असिद्धः द्धा -द्धं, असाधितः -ता -तं.

To OUTSTARE, *v. a.* अधिकप्रागल्भ्येन निरीक्ष्य लज्जां गम् (c. 10. गमयति -यितुं), प्रगल्भजनम् अधिकप्रागल्भ्येन निरीक्ष् (c. 1. -ईक्षते -क्षितुं).

To OUTSTRETCH, *v. a.* प्रसृ (c. 10. -सारयति -यितुं), प्रग्रह् (c. 9. -गृह्णाति -ग्रहीतुं).

OUTSTRETCHED, *p.p.* प्रसारितः -ता -तं, प्रसृतः -ता -तं, उच्छ्रितः &c., अभ्युच्छ्रितः &c.; 'with outstretched neck,' उद्ग्रीवः -वा -वं; 'arm,' उद्बाहुः -हुः -हु, अभ्युच्छ्रितबाहुः &c.

To OUTSTRIP, *v. a.* अतिक्रम् (c. 1. -क्रामति -क्रमितुं), अतिचर् (c. 1. -चरति -रितुं), अतिगम् (c. 1. -गच्छति -गन्तुं), अती (c. 2. अत्येति -तुं, rt. इ), लङ्घ् (c. 10. लङ्घयति -यितुं); 'outstripping the wind,' अत्यनिलः -ला -लं.

OUTSTRIPPED, *p.p.* अतिक्रान्तः -न्ता -न्तं, अतीतः -ता -तं, अन्तरितः -ता -तं.

To OUTVIE, *v. a.* अतिक्रम् (c. 1. -क्रामति -क्रमितुं), अभिभू, परिभू, अतिभू.

OUTWARD, *a.* (External) वाह्यः -ह्या -ह्यं, वहिःस्थः -स्था -स्थं, वहिःस्थितः -ता -तं, वाह्लीकः -का -कं, वहिर्भवः -वा -वं, वहिर्भूतः -ता -तं, वहिर्वर्त्ती -र्त्तिनी -र्त्ति (न्), वहिस् in comp.—(Visible) दृश्यः -श्या -श्यं, दृष्टः -ष्टा -ष्टं, आविर्भूतः -ता -तं.—(Not real) अवास्तवः -वी -वं.—(Tending out) वहिर्दिश्यः -श्या -श्यं.

OUTWARD, OUTWARDS, *adv.* वहिर्भागं प्रति, वहिस्, वहिर्दिशि, वहिर्देशं प्रति.

OUTWARDLY, *adv.* वाह्यतस्, वहिस्, वहिरङ्गे, वहिरङ्गतस्, वहिर्भागे, वहिर्भागतस्.—(Not really) अवस्तुतस्.

To OUTWEIGH, *v. a.* अधिकभारी -रिणी -रि भू or अस्, अतिभारी &c. भू, गुरुतरभारी &c. भू, गुरुतरः -रा -रं भू, भारेण वृध् (c. 1. वर्धते -र्धितुं).

To OUTWIT, *v. a.* अतिसन्धा (c. 3. -दधाति -धातुं), प्रतॄ (c. 10. -तारयति -यितुं).

OUTWORK, *s.* दुर्गवहिःस्थितं प्राकारप्राचीरादि, वाह्यपरिक्रिया.

OVAL, *a.* अण्डाकारः -रा -रं, अण्डाकृतिः -तिः -ति, अण्डसरूपः -पा -पं.

OVAL, *s.* अण्डाकारः, अण्डाकृतिः *f.*, कक्ष्यः, अधिककलक्षितं.

OVARIOUS, *a.* अण्डमयः -यी -यं, अण्डयुक्तः -क्ता -क्तं, अण्डरूपः -पा -पं

OVARY, *s.* अण्डाशयः, अण्डाधारः, डिम्बाशयः, डिम्बकोषः.

OVATE, OVATED, *a.* अण्डाकृतिः -तिः -ति, अण्डाकारः -रा -रं.

OVEN, *s.* चुल्ली -ल्लिः *f.*, कन्दुः *m.f.*, आपाकः, उखा; 'baked in an oven,' कन्दुपक्वः -क्वा -क्वं, कान्दवः -वी -वं.

OVER, *prep.* (Above in place, position, rank, or value) अधि, उपरि, ऊर्द्ध्व prefixed; as, 'placed over,' अधिकृतः -ता -तं, अधिरोपितः -ता -तं; 'standing over,' अधिष्ठितः -ता -तं, अधिष्ठाता *m.* (तृ), ऊर्द्ध्वस्थितः &c.; 'situated over,' उपरिस्थः -स्था -स्थं; 'heaped over,' उपरिचितः -ता -तं; 'a tooth growing over another,' अधिदन्तः. When उपरि is not compounded with another word it governs the gen. c.; as, 'over all,' उपरि सर्व्वेषां. Sometimes उपरि is repeated; as, उपर्य्युपरि सर्व्वेषां.—(From side to side, across) expressed by various prepositions, such as अति, अधि, उत्, सम्, अभि, वि &c.; as, 'to cross over,' अतितॄ, उत्तॄ, समुत्तॄ, सन्तॄ, अतिक्रम्, समतिक्रम्, व्यतिक्रम्, संक्रम्, अती; 'to leap over,' उल्लङ्घ्, विलङ्घ्, अभिलङ्घ्, उत्प्लु. Sometimes expressed by पारं in comp.; as, 'to cross over a river,' नदीपारं गम्; 'crossing over,' पारगः -गा -गं.—(Denoting superiority) expressed by प्र, अधि, उत्, वि, ऊर्द्ध्व &c. prefixed; as in the following words signifying pre-eminence, or 'advantage over,' प्रधानता, प्रमुखता, अधिकत्वं, आधिक्यं, उत्कर्षः, उन्नतिः *f.*, विशिष्टता, ऊर्द्ध्वस्थितिः *f.*—(Upon the whole surface or through the whole extent) expressed by परि, वि prefixed; as, 'to wander over the earth,' पृथिवीं परिभ्रम् or पर्य्यट् or विभ्रम्.—(Over against) अभि, अभितस्, प्रति, अभिमुखं -खेन, सम्मुखं -खेन, प्रतिमुखं -खेन.

OVER, *adv.* (On the opposite side) पारे -रं; 'the boat is over the river,' पारगता नौका.—(From one to another by passing) expressed by the prepositions प्रति, नि, सम् &c., in combination with roots; as, 'to deliver over,' प्रतिपद्, निक्षिप्, संक्रम्.—(Above the top, running over). *See* OVERFLOWING. (More than the proper quantity, over and above) अधिकं, अधिकतरं, अतिरिक्तं, परं, भूयस्.—(Beyond) अति prefixed.—(Remaining, left over) उद्वृत्तः -त्ता -त्तं, उद्वर्त्तः -र्त्ता -र्त्तं, शिष्टः -ष्टा -ष्टं, उच्छिष्टः &c., अवशिष्टः &c., अन्तरं, अन्तरितः -ता -तं; 'a part over,' कलान्तरं; 'that which is over,' उद्वृत्तं, शिष्टं, अवशिष्टं. or expressed by परि; as, 'one over,' एकावशिष्टं, एकपरि.—(Throughout) अधि prefixed, साद्यन्तं, आद्यन्तं; 'to read over,' अधिगम्, अधी, or expressed by पार; as, 'one who reads over the Vedas,' वेदपारगः; 'to get over, complete,' पार (nom. पारयति -यितुं), तीर (nom. तीरयति -यितुं), पारं गम्.—(Too much, excessively) अति or अतिशय or एकान्त prefixed, अतिशयेन, अधिकं, अतीव, एकान्ततस्.—(Over again) पुनर्; 'over and over again,' पुनःपुनर्, मुहुर्मुहुस्, वारं वारं.—(To be over). *See To* CEASE, *v. n.*—(To give over). *See To* GIVE, *v. a.*—(To turn over). *See* OVERTURN. For other senses of 'over,' *see* the verbs, &c., which follow.—(Past) वृत्तः -त्ता -त्तं, भूतः -ता -तं, अतीतः -ता -तं, गतः -ता -तं, अतिक्रान्तः -न्ता -न्तं, व्यतीतः -ता -तं.

To OVERABOUND, *v. n.* अतिरिक्तः -क्ता -क्तं भू, अतिबहुलीभू.

To OVERACT, *v. a.* अतिशयेन कृ, अधिकं कृ, अत्याचर् (c. 1. -चरति -रितुं).

To OVERAWE, *v. a.* सम्भ्रमेण उपहन् (c. 2. -हन्ति -न्तुं), त्रासयित्वा नियह् (c. 9. -गृह्णाति -ग्रहीतुं) or निषिध् (c. 1. -षेधति -षेद्धुं), अतिशयेन त्रस् (c. 10. त्रासयति -यितुं), आकुलीकृ, व्याकुलीकृ.

OVERAWED, *a.* सम्भ्रमोपहतः -ता -तं, सम्भ्रमाकुलितः -ता -तं.

To OVERBALANCE, *v. a.* *See To* OUTWEIGH.

OVERBALANCE, *s.* अधिकभारः, अतिभारः, अधिकतरभारः, सुभारः.

To OVERBEAR, *v. a.* (Bear down) निपत् (c. 10. -पातयति -यितुं), दम् (c. 10. दमयति -यितुं), प्रदम्, वशीकृ, धृष् (c. 10. धर्षयति -यितुं).

OVERBEARING, *a.* धृष्टः -ष्टा -ष्टं, धर्षितः -ता -तं, प्रधृष्टः &c., प्रधर्षितः -ता -तं, धर्षी -र्षिणी -र्षि (न्), उद्धतः -ता -तं, अवलिप्तः -प्ता -प्तं, धृष्णुः -ष्णुः -ष्णु; 'to be overbearing,' धृष् (c. 5. धृष्णोति, धर्षितुं).

OVERBOARD, *adv.* नौकावहिस्, नौकोपरिष्टात्, नौपृष्ठतस्, नौपार्श्वात्, नौपार्श्वतस्, नौकातस्, समुद्रमध्ये, मध्येसमुद्रं, मध्येऽर्णवं.

To OVERBURDEN, *v. a.* अतिभारं न्यस् (c. 4. -अस्यति -असितुं), अतिभारेण पीड् (c. 10. पीडयति -यितुं), अतिभारयुक्तं -क्तां कृ.

OVERBURDENED, *p.p.* अतिभारी -रिणी -रि (न्), अतिभारवान् -वती -वत् (त्), अतिभाराक्रान्तः -न्ता -न्तं, अतिभारयुक्तः -क्ता -क्तं.

To OVERCAST, *v. a.* मेघावृतं -तां कृ, मेघाच्छन्नं -न्नां कृ, मेघैः प्रच्छद् (c. 10. -छादयति -यितुं) or आच्छद्, कलुषीकृ, तिमिरीकृ, साभ्रं -भ्रां कृ, समेघं -घां कृ.

OVERCAST, *a.* मेघावृतः -ता -तं, मेघाच्छन्नः -न्ना -न्नं, मेघाच्छादितः -ता -तं, तमोवृतः -ता -तं, घनोपरुद्धः -द्धा -द्धं, घनारुद्धः &c., घनावरुद्धः &c.

OVERCAUTIOUS, *a.* अत्यवहितः -ता -तं, एकान्तावहितः &c., स्ववहितः &c.

To OVERCHARGE, *v. a.* (In an account) अतिमूल्यं or अधिकमूल्यं प्रार्थ् (c. 10. -अर्थयते -ति -यितुं). *See To* OVERBURDEN, OVERLOAD.

OVERCHARGE, *s.* (Asking too much) अतिमूल्यप्रार्थनं, अधिकमूल्यप्रार्थनं.

To OVERCLOUD, *v. a.* मेघावृतं -तां कृ. *See To* OVERCAST, *v. a.*

To OVERCOME, *v. a.* (Subdue) जि (c. 1. जयति -ते, जेतुं), पराजि, निर्जि, विजि, सञ्जि, अभिभू, प्रभू, पराभू, वशीकृ, दम् (c. 10. दमयति -यितुं), प्रदम् धृष् (c. 10. धर्षयति -यितुं), प्रधृष्, हन् (c. 2. हन्ति -न्तुं), पर्यामृश् (c. 6. -मृशति -म्रष्टुं), अलङ्कृ.—(Surmount, get the better of) अतिक्रम् (c. 1. -क्रामति -क्रमितुं), अधिक्रम्, अधिरुह् (c. 1. -रोहति -रोढुं), अध्यारुह्, आरुह्, अती (c. 2. अत्येति -तुं, rt. इ), व्यती, अतिशी (c. 2. -शेते -शयितुं), तॄ (c. 1. तरति -रितुं -रीतुं), पार् (c. 10. पारयति -यितुं), अभिभू.— (Exhaust, distress) सद् (c. 10. सादयति -यितुं), अवसद्, खिद् (c. 10. खेदयति -यितुं), व्याकुल् (c. 10. -कुलयति -यितुं).

OVERCOME, *p. p.* (Subdued) जितः -ता -तं, पराजितः -ता -तं, विजितः -ता -तं, अभिभूतः -ता -तं, पराभूतः &c., वशीकृतः &c., वशीभूतः &c., दमितः -ता -तं, दान्तः -न्ता -न्तं.—(Distressed, agitated) आक्रान्तः -न्ता -न्तं, आर्त्तः -र्त्ता -र्त्तं, आतुरः -रा -रं, ग्रस्तः -स्ता -स्तं, आकुलः -ला -लं, व्याकुलः -ला -लं, परिगतः -ता -तं; 'with hunger,' क्षुधाक्रान्तः &c., क्षुधार्त्तः -र्त्ता -र्त्तं, क्षुधातुरः -रा -रं; 'with sorrow,' शोकार्त्तः &c., शोकाकुलः -ला -लं; 'with shame,' ह्रीजितः -ता -तं, लज्जापरिगतः -ता -तं.

OVER-COMPASSIONATE, *a.* एकान्तकरुणः -णा -णं, अतिकारुणिकः -की -कं.

OVER-CONFIDENT, *s.* अतिविश्वासी -सिनी -सि (न्), एकान्तविश्वासी &c.

To OVERDO, *v. a.* अतिशयेन कृ, अधिकं कृ.—(Cook too much) अतिशयेन पच् (c. 1. पचति, पक्तुं), अतिपाकं कृ, अतिपक्वं -क्वां कृ.

OVERDONE, *p. p.* (Cooked too much) अतिपक्वः -क्वा -क्वं.—(Too much wearied) अतिश्रान्तः -न्ता -न्तं, अतिश्रमार्त्तः -र्त्ता -र्त्तं.

To OVER-EAT, *v. a.* अतिभोजनं कृ, अत्यशनं कृ, अतिसौहित्यं कृ.

To OVER-ESTIMATE, *v. a.* अधिकं or अतिशयेन मन् (c. 4. मन्यते, मन्तुं).

OVER-EXCITEMENT, *s.* अत्युत्तापः, अत्युद्योगः, अत्युत्कम्पः.

OVER-FATIGUE, *s.* अतिश्रान्तिः *f.*, अतिश्रमः, अतिक्लेशः, अतिशयखेदः.

To OVER-FLOW, *v. n.* (Run over the brim) उत्सेचनं कृ, उत्सेकं कृ, अतिपूर्णः -र्णा -र्णं भू, अत्यन्तपूर्णः -र्णा -र्णं भू, परिपूर्णः &c. भू, परिपूर्णीभू, जलोत्सेकं कृ, जलोत्सेचनं कृ, जलाप्लावनं कृ, उपचितः -ता -तं भू, उपचितजलः -ला -लं भू, समाप्लुतः -ता -तं भू, सम्प्लुतजलः -ला -लं भू, स्फाय् (c. 1. स्फायते -यितुं), स्फीतः -ता -तं भू, स्फीतजलः -ला -लं भू.—(Be exuberant) अतिबहुलीभू, अतिप्रचुरीभू, अतिरिक्तः -क्ता -क्तं भू, उद्रिक्तः &c. भू, पुष्कलीभू, वृध् (c. 1. वर्धते -र्धितुं), प्रवृद्धः -द्धा -द्धं भू; 'overflows with tears,' वाष्पायते; 'their eyes overflowed with tears,' तेषां नेत्राणि समाप्लुतानि वारिणा.

To OVERFLOW, *v. a.* जलेन प्लु (c. 10. प्लावयति -यितुं) or आप्लु or परिप्लु or संप्लु, जलप्लुतं -तां कृ, जलप्लावितं -तां कृ, जलाप्लावितं -तां कृ, जलव्याप्तं -प्तां कृ, जलाप्लावनं कृ, जलप्लावनं कृ.

OVERFLOW, *s.* उत्सेकः, उत्सेचनं, जलप्लावः -वनं, जलाप्लावनं, जलपरिप्लवः, जलोच्छ्वासः, जलोत्सेकः, जलवृद्धिः *f.*, जलौघः, जलप्रवृद्धिः *f.*, जलागमः.

OVERFLOWED, *p. p.* जलप्लावितः -ता -तं, जलाप्लावितः &c., आप्लावितः &c., जलप्लुतः -ता -तं, जलपरिप्लुतः &c., आप्लुतः &c., परिप्लुतः &c., जलव्याप्तः -प्ता -प्तं, व्याप्तः &c.; 'is overflowed,' प्लाव्यते.

OVERFLOWING, *part.* or *a.* (So full as to run over) उत्सेचनकारी -रिणी -रि (न्), उत्सिच्यमानः -ना -नं, उत्सिक्तः -क्ता -क्तं, अतिपूर्णः -र्णा -र्णं, अत्यन्तपूर्णः &c., परिपूर्णः &c., पर्य्याकुलः -ला -लं; 'with water,' सम्प्लुतोदकः -का -कं, सम्प्लुतजलः -ला -लं, जलोत्सिच्यमानः &c.—(Exuberant) अतिबहुलः -ला -लं, बहुलः &c., पुष्कलः -ला -लं, प्रचुरः -रा -रं, उद्रिक्तः -क्ता -क्तं, अतिरिक्तः &c., उपचितः -ता -तं; 'eyes overflowing with tears,' अश्रुसमाप्लुतानि नेत्राणि; 'having overflowing eyes,' उपप्लुताक्षः -क्षी -क्षं; 'overflowing its bounds,' उद्वेलः -ला -लं.

OVERFLOWING, *s.* उत्सेकः, उत्सेचनं, जलाप्लावनं, जलोत्सेकः, प्रवृद्धिः *f.*, वृद्धिः, अतिरिक्तता, उद्रिक्तता, परिपूर्णता, अतिपूर्णता, उपचयः, आतिशय्यं, आधिक्यं, अतिबाहुल्यं; 'of a river beyond its banks,' विदारः. *See* OVERFLOW. 'To fill to overflowing,' प्लु (c. 10. प्लावयति -यितुं), परिप्लु.

To OVERGROW, *v. a.* or *n.* अतिवृध् (c. 1. -वर्धते -र्धितुं), अधिकं वृध्, अत्यन्तं or अतिमात्रं वृध् or रुह् (c. 1. रोहति, रोढुं) or प्ररुह्.

OVERGROWN, *p.p.* or *a.* अतिवर्धितः -ता -तं, कालप्ररूढः -ढा -ढं, अतिरूढः &c.

OVERGROWTH, *s.* अतिवृद्धिः *f.*, अतिवर्धनं, अधिकवृद्धिः, कालप्ररूढिः *f.*

To OVERHANG, *v. n.* वहिर्लम्ब् (c. 1. -लम्बते -म्बितुं), प्रलम्ब्, अवलम्ब्, वहिःप्रलम्ब्, वहिःस्था (c. 1. -तिष्ठति -स्थातुं).

OVERHASTY, *a.* अतिसाहसी -सिनी -सि (न्), एकान्तसाहसी &c.

To OVERHAUL, *v. a.* इतस्ततः समाकृष्य परीक्ष् (c. 1. -ईक्षते -क्षितुं) or निरूप् (c. 10. -रूपयति -यितुं), पुनःपुनः परिवर्त्त्य परीक्ष्, पुनः परीक्ष्.

OVERHEAD, *adv.* मस्तकोपरि, शीर्षोपरि, उपरिष्टात्, उपरिस्थाने, ऊर्द्ध्वस्थाने, ऊर्द्ध्वं, ऊर्द्ध्वं, उच्चं, विहायसा.

To OVERHEAR, *v. a.* प्रच्छन्ने स्थित्वा द्वयोः संलापं श्रु (c. 5. शृणोति, श्रोतुं) or उपश्रु or आकर्ण् (c. 10. -कर्णयति -यितुं), अकस्माद् आकर्ण्.

OVERHEARD, *p.p.* आकर्णितः -ता -तं, अकस्माद् आकर्णितः &c., श्रुतः -ता -तं.

To OVERJOY, *v. a.* अत्यन्तम् आनन्द् (c. 10. -नन्दयति -यितुं) or प्रहृष् (c. 10. -हर्षयति -यितुं), अतिशयेन प्रहृष्.

OVERJOY, *s.* अत्यानन्दः, परमानन्दः, परमहर्षः, परमाह्लादः.

OVERJOYED, *p. p.* परमहृष्टः -ष्टा -ष्टं, परमसंहृष्टः &c., परमानन्दितः -ता -तं, परमाह्लादितः -ता -तं, हर्षाकुलः -ला -लं, हर्षविह्वलः -ला -लं, रोमाञ्चितः -ता -तं, हर्षरोमाञ्चितः -ता -तं, पुलकितः -ता -तं, हर्षपुलकितः -ता -तं, उल्लासितः -ता -तं, उल्लसितः -ता -तं, उल्लासी -सिनी -सि (न्), परमप्रीतः -ता -तं, हृष्टचित्तः -त्ता -त्तं, प्रहृष्टः &c., प्रहृष्टमनाः -नाः -नः

(स्), अतिहर्षयुक्तः -क्ता -क्तं, अतिहृष्टः &c.; 'to be overjoyed,' परमम् आनन्द् (c. 1. -नन्दति -न्दितुं), परमानन्दं कृ.

OVERLAID, *p.p.* आच्छन्नः -न्ना -न्नं, पिहितः -ता -तं, पिनद्धः -द्धा -द्धं; 'with gold,' सुवर्णपत्रपिनद्धः -द्धा -द्धं.

OVERLARGE, *a.* अतिबृहन् -हती -हत् (त्), अतिमहान् -हती &c., अतिस्थूलः -ला -लं, अतिविपुलः &c., एकान्तस्थूलः &c., अतिरिक्तः -क्ता -क्तं.

To OVERLAY, *v. a.* (An infant) शय्यास्तरणभारेण पीडयित्वा शिशुप्राणघातं कृ.—(Cover, spread over) छद् (c. 10. छादयति -यितुं), आच्छद्, पिधा (c. 3. -दधाति -धातुं), अपिधा.—(Oppress with too great a weight) अतिभारेण पीड् (c. 10. पीडयति -यितुं).

To OVERLEAP, *v. a.* लङ्घ् (c. 10. लङ्घयति -यितुं), उल्लङ्घ्, विलङ्घ्, लङ्घनं कृ, उत्प्लु (c. 1. -प्लवते -प्लोतुं).

OVERLENIENT, *a.* अतिमृदुः -दुः -द्वी -दु, एकान्तमृदुः &c.

To OVERLOAD, *v. a.* अतिभारं न्यस् (c. 4. -अस्यति -असितुं) or आरुह् in caus. (-रोपयति -यितुं), अतिभाराक्रान्तं -न्तां कृ, अत्यन्तं or अतिशयेन पॄ (c. 10. पूरयति -यितुं), अतिपूर्णं -र्णां कृ.

OVERLOADED, *p. p.* अतिभाराक्रान्तः -न्ता -न्तं, अतिभारार्त्तः -र्त्ता -र्त्तं, अतिभारी -रिणी -रि (न्), अतिपूर्णः -र्णा -र्णं, अतिपूरितः &c. *See* OVERBURDENED.

OVERLOADING, *s.* अतिभारन्यासः, अतिभारारोपणं, आक्रमः -मणं.

To OVERLOOK, *v. a.* (View from a high place) उन्नतस्थानाद् अवलोक् (c. 10. -लोकयति -यितुं, c. 1. -लोकते -कितुं) or निरीक्ष् (c. 1. -ईक्षते -क्षितुं) or अवेक्ष् or अभिवीक्ष्.—(Superintend, preside over) अधिष्ठा (c. 1. -तिष्ठति -ष्ठातुं), कार्य्यावेक्षणं कृ, कार्य्यदर्शनं कृ, कार्य्येक्षणं कृ, कार्य्याणि अवेक्ष्, अध्यक्षः -क्षा -क्षं भू.—(Let pass, excuse) उपेक्ष्, अवसृज् (c. 6. -सृजति -स्रष्टुं), मुच् (c. 6. मुञ्चति, मोक्तुं), क्षम् (c. 1. क्षमते -ति, क्षन्तुं), दोषाच्छादनं कृ, दोषक्षालनं कृ, उपेक्षां कृ, उपेक्षणं कृ.

OVERLOOKED, *p.p.* (Viewed from above) उन्नतस्थानाद् or उन्नतप्रदेशाद् अवलोकितः -ता -तं.—(Superintended) अधिष्ठितः -ता -तं, अवेक्षितः -ता -तं.—(Passed over, excused) उपेक्षितः -ता -तं, अवसृष्टः -ष्टा -ष्टं.

OVERLOOKER, *s.* अवेक्षिता *m.* (तृ), अध्यक्षः, उपद्रष्टा *m.* (ष्टृ), कार्य्यद्रष्टा.

OVERMUCH, *a.* अति or अतिशय prefixed, अधिकः -का -कं, अत्यन्तः -न्ता -न्तं, एकान्तः -न्ता -न्तं, अतिमात्रः -त्रा -त्रं, अतिमर्य्यादः -दा -दं, अतिरिक्तः -क्ता -क्तं.

OVERMUCH, *s.* अतिबाहुल्यं, आधिक्यं, अधिकता, अतिरिक्तता, एकान्तत्वं.

OVERMUCH, *adv.* अति prefixed, अतिशयेन, अत्यन्तं, अतिमर्य्यादं, एकान्ततस्.

OVER-OFFICIOUS, *a.* अत्युपचारी -रिणी -रि (न्), अत्युपकारी &c., अत्युपचारः &c.

To OVERPASS, *v. a.* अतिक्रम् (c. 1. -क्रामति -क्रमितुं), अतिचर् (c. 1. -चरति -रितुं).

OVERPAST, *p.p.* अतिक्रान्तः -न्ता -न्तं, अतीतः -ता -तं, गतः -ता -तं.

To OVERPAY, *v. a.* अतिमूल्यं or अधिकमूल्यं दा (c. 3. ददाति, दातुं).

OVERPLUS, *s.* उद्वर्त्तः, उद्वृत्तं, अवशिष्टं, उच्छिष्टं, शिष्टं, परभागः.

To OVERPOWER, *v. a.* अभिभू, पराभू, पराजि (c. 1. -जयते -जेतुं), निर्जि, दम् (c. 10. दमयति -यितुं), प्रदम्, आक्रम् (c. 1. -क्रामति -क्रमितुं), पराक्रम्, वशीकृ. *See To* OVERCOME.

OVERPOWERED, *p. p.* पराजितः -ता -तं, आक्रान्तः -न्ता -न्तं. *See* OVERCOME.

To OVERRATE, OVERPRIZE, *v. a.* अधिकं or अतिशयेन मन् (c. 4. मन्यते, मन्तुं, c. 10. मानयति -यितुं), अधिकमूल्यं or अतिमूल्यं कृ.

To OVERREACH, *v. a.* अतिसन्धा (c. 3. -दधाति -धातुं), अभिसन्धा, प्रलभ् (c. 1. -लभते -लब्धुं), विप्रलभ्, प्रतॄ (c. 10. -तारयति -यितुं).

OVERREACHED, *p.p.* अतिसंहितः -ता -तं, प्रलब्धः -ब्धा -ब्धं, प्रतारितः -ता -तं.

OVERREACHING, *s.* अतिसन्धानं, अतिसन्धिः *m.*, प्रलम्भः, प्रतारणं -णा.

OVERRIPE, *a.* अतिपक्वः -क्वा -क्वं, कालप्ररूढः -ढा -ढं, विनाशोन्मुखः &c.

To OVERRULE, *v. a.* अधिकृ, प्रभू, अधिष्ठा (c. 1. -तिष्ठति -ष्ठातुं), विनियम् (c. 1. -यच्छति -यन्तुं), नियम्, सन्नियम्, संयम्, यम्, शास् (c. 2. शास्ति, शासितुं), अनुशास्, अधिकारं कृ.

OVERRULER, *s.* अधिकारी *m.* (न्), अधिष्ठाता *m.* (तृ), प्रभुः *m.*, अनुशास्ता.

To OVERRUN, *v. a.* आक्रम् (c. 1. -क्रामति -क्रमितुं), अधिक्रम्, उपद्रु (c. 1. -द्रवति -द्रोतुं), उपद्रवं कृ, उपप्लवं कृ.

OVERRUN, *p. p.* आक्रान्तः -न्ता -न्तं, आक्रमितः -ता -तं, उपद्रुतः -ता -तं, उपप्लुतः &c., आकीर्णः -र्णा -र्णं, आस्तीर्णः &c., व्याप्तः -प्ता -प्तं.

To OVERSEE, *v. a.* उपदृश् (c. 1. -पश्यति -द्रष्टुं), अवेक्ष् (c. 1. -ईक्षते -क्षितुं), कार्य्यावेक्षणं कृ, कार्य्यदर्शनं कृ, कार्य्येक्षणं कृ, अधिष्ठा (c. 1. -तिष्ठति -ष्ठातुं).

OVERSEER, *s.* अध्यक्षः, उपद्रष्टा *m.* (ष्टृ), अवेक्षिता *m.* (तृ), कार्य्यावेक्षिता *m.*, अधिष्ठाता *m.*, अधिकर्म्मिकः, कार्य्यद्रष्टा *m.*, कार्य्याधीशः, अधिकारी *m.* (न्), अधिकृतः; 'of a village,' स्थायुकः.

To OVERSET, *v. a.* पर्य्यस् (c. 4. -अस्यति -असितुं), परिवृत् (c. 10. -वर्त्तयति -यितुं), आक्षिप् (c. 10. -क्षेपयति -यितुं), निपत् (c. 10. -पातयति -यितुं), अधः कृ.

To OVERSET, *v. n.* परिवृत् (c. 1. -वर्त्तते -र्त्तितुं). *See To* UPSET.

To OVERSHADOW, *v. a.* छायया छद् (c. 10. छादयति -यितुं) or प्रच्छद्, छायां कृ, छायावृतं -तां कृ, वितानीकृ.

OVERSHADOWED, *p. p.* छायावृतः -ता -तं, छायाच्छादितः &c., छायाच्छन्नः -न्ना -न्नं.

To OVERSHOOT, *v. a.* लक्ष्यम् अतिक्रम् (c. 1. -क्रामति -क्रमितुं) or लङ्घ् (c. 10. लङ्घयति -यितुं) or उल्लङ्घ्, लक्ष्यातिक्रमं कृ, लक्ष्योल्लङ्घनं कृ, लक्ष्यातिक्षेपं कृ.

OVERSIGHT, *s.* (Error) दृष्टिदोषः, भ्रमः, भ्रान्तिः *f.*, प्रमादः.

To OVERSLEEP, *v. a.* अतिशयेन or अतिदीर्घं or सुदीर्घं स्वप् (c. 2. स्वपिति, स्वप्तुं), अतिनिद्रां कृ, अतिस्वापं कृ.

To OVERSPREAD, *v. a.* आक्रम् (c. 1. -क्रामति -क्रमितुं), आच्छद् (c. 10. -छादयति -यितुं), आवृ (c. 5. -वृणोति -वरितुं -रीतुं), समावृ, अवतन् (c. 5. -तनोति -नितुं), वितन्, वितानीकृ, अवकॄ (c. 6. -किरति -करितुं -रीतुं), समवकॄ, आकॄ, पॄ (c. 10. पूरयति -यितुं).

OVERSPREAD, *p. p.* आक्रान्तः -न्ता -न्तं, समाक्रान्तः &c., आच्छादितः -ता -तं, आच्छन्नः -न्ना -न्नं, प्रच्छादितः &c., आवृतः -ता -तं, आकीर्णः -र्णा -र्णं, आस्तीर्णः &c., व्याप्तः -प्ता -प्तं, संवीतः &c., परिवीतः &c., पूरितः &c., गाहितः &c., श्रितः &c., वितानीकृतः &c., पूर्णः -र्णा -र्णं.

To OVERSTATE, *v. a.* अतिशयेन or वागाधिक्येन वद् (c. 1. वदति -दितुं), अत्युक्तिं कृ, अतिशयोक्तिं कृ.

To OVERSTEP, *v. a.* अतिक्रम् (c. 1. -क्रामति -क्रमितुं), लङ्घ् (c. 10. लङ्घयति -यितुं), उल्लङ्घ्, विलङ्घ्, अभिलङ्घ्.

OVERSTOCK, *s.* अतिसञ्चयः, अधिकसञ्चयः, अतिसम्भारः, अतिसङ्ग्रहः.

To OVERSTOCK, *v. a.* अतिशयेन सम्भृ (c. 1. -भरति -भर्तुं) or उपकॢप् (c. 10. -कल्पयति -यितुं) or पॄ (c. 10. पूरयति -यितुं), अतिसम्भारं कृ, अतिसञ्चयं कृ, अधिकसम्भारं कृ, अतिपूर्त्तिं कृ, अधिकपूर्त्तिं कृ.

OVERSTOCKED, *p.p.* अतिसम्भृतः -ता -तं, अतिपूरितः -ता -तं, अतिपूर्णः -र्णा -र्णं.

To OVERSTRAIN, *v. n.* अतियत्नं कृ, अतिप्रयत्नं कृ, अतिशयेन यत् (c. 1. यतते -तितुं).

OVERT, *a.* प्रकाशः -शा -शं, स्पष्टः -ष्टा -ष्टं, व्यक्तः -क्ता -क्तं, विस्पष्टः -ष्टा -ष्टं, अभिव्यक्तः &c., विवृतः -ता -तं, प्रकटः -टा -टं, अगूढः -ढा -ढं, आविर्भूतः &c., प्रत्यक्षः -क्षा -क्षं.

To OVERTAKE, *v. a.* ग्रह् (c. 9. गृह्णाति, ग्रहीतुं), प्राप् (c. 5. -आप्नोति -आप्तुं), सम्प्राप्, धृ (c. 1. धरति, धर्त्तुं), ग्रस् (c. 1. ग्रसते -सितुं), आक्रम् (c. 1. -क्रामति -क्रमितुं), पश्चाद्धावन् or पश्चाद् अनुधाव्य आक्रम् or आक्रमणं कृ.—(Come upon unexpectedly) अकस्माद् आसद् (c. 10. -सादयति -यितुं) or प्राप्.

OVERTAKEN, *p. p.* प्राप्तः -प्ता -प्तं, सम्प्राप्तः -प्ता -प्तं, ग्रस्तः -स्ता -स्तं, धृतः -ता -तं, गृहीतः -ता -तं, आक्रान्तः -न्ता -न्तं, आक्रमितः -ता -तं.—(Come upon suddenly) अकस्माद् आसादितः -ता -तं.

To OVERTASK, OVERTAX, *v. a.* अतिभारं न्यस् (c. 4. -अस्यति -असितुं) or ऋ in caus. (अर्पयति -यितुं), अधिकभारं न्यस्.

To OVERTHROW, *v. a.* (Defeat) पराजि (c. 1. -जयते -जेतुं), विजि, निर्जि, जि, पराहन् (c. 2. -हन्ति -न्तुं), अभिभू, पराभू, परास् (c. 4. -अस्यति -असितुं), दम् (c. 10. दमयति -यितुं), प्रदम्, पर्य्यामृश् (c. 6. -मृशति -म्रष्टुं), वशीकृ.—(Turn upside down, upset, subvert) पर्य्यस्, पराक्षिप् (c. 6. -क्षिपति -क्षेप्तुं), आक्षिप् (c. 10. क्षेपयति -यितुं), परिवृत् (c. 10. -वर्त्तयति -यितुं), संक्षुभ् (c. 10. -क्षोभयति -यितुं), पत् (c. 10. पातयति -यितुं), निपत्.—(Destroy, &c.). *See* OVERTURN.

OVERTHROW, *s.* (Defeat) पराजयः, अपजयः, जयः, पराभवः, अभिभवः, अभिभूतिः *f.*, परिभवः.—(Ruin, destruction) नाशः, विनाशः, प्रणाशः, क्षयः, ध्वंसः, विध्वंसः, प्रध्वंसः, उच्छेदः, समुच्छेदः, सादः -दनं घातः, विघातः, भङ्गः, भेदः, व्यसनं; 'of an army,' बलव्यसनं.—(Upsetting, subverting) पर्य्यासः, पर्य्यसनं, परिवर्त्तनं, पातनं, निपातनं.

OVERTHROWN, *p. p.* पराजितः -ता -तं, जितः &c., पराभूतः &c., अभिभूतः &c., पराहतः &c., परास्तः -स्ता -स्तं, उपास्तः &c., नष्टः -ष्टा -ष्टं, नाशितः -ता -तं, विनाशितः &c., हतः &c., भग्नः -ग्ना -ग्नं, पातितः -ता -तं, निपातितः &c., ध्वंसितः &c., जातव्यसनः -ना -नं.

OVERTLY, *adv.* प्रकाशं, स्पष्टं, विस्पष्टं, व्यक्तं, प्रकटं, आविस्, प्रादुस्, अगूढं, प्रत्यक्षं -क्षेण -क्षतस्.

OVERTURE, *s.* (Opening) विवृतिः *f.*, विवरणं, प्रकाशः -शनं.—(Proposal) उपन्यासः, निवेदनं, प्रसङ्गः, अभिधानं; 'secret overture,' उपजपः -जापः.—(Musical or dramatic prelude) पूर्व्वरङ्गः, प्रस्तावना, प्रकरणं, उपोद्घातः, नान्दी; 'player or speaker of it,' नान्दीवादी, नान्दीकरः.

To OVERTURN, *v. a.* परावृत् (c. 10. -वर्त्तयति -यितुं), परिवृत्, अपवृत्, पर्य्यस् (c. 4. -अस्यति -असितुं), पराक्षिप् (c. 6. -क्षिपति -क्षेप्तुं), आक्षिप् (c. 10. -क्षेपयति -यितुं), पत् (c. 10. पातयति -यितुं), निपत्, उत्सद् (c. 10. सादयति -यितुं), संक्षुभ् (c. 10. -क्षोभयति -यितुं), अधोमुखीकृ, अधरोत्तरीकृ, अधः कृ, न्युब्जीकृ.—(Destroy, &c.) नश् (c. 10. नाशयति -यितुं), विनश्, प्रणश्, ध्वंस् (c. 10. ध्वंसयति -यितुं), विध्वंस्, प्रध्वंस्, उच्छिद् (c. 7. -छिनत्ति -छेत्तुं), हन् (c. 2. हन्ति -न्तुं, c. 10. घातयति -यितुं), सद्.

OVERTURN, *s.* पर्य्यासः, पर्य्यसनं, परिवर्त्तनं, परावर्त्तनं, पातनं, निपातनं, उत्सादनं, क्षोभः, संक्षोभः, ध्वंसः, ध्वंसनं, प्रध्वंसः. *See* OVERTHROW.

OVERTURNED, *p. p.* पर्य्यस्तः -स्ता -स्तं, पराक्षिप्तः -प्ता -प्तं, परावर्त्तितः -ता -तं, परिवर्त्तितः &c., परावृत्तः -त्ता -त्तं, अपवृत्तः &c., पातितः &c., निपातितः &c., उत्सादितः &c., संक्षोभितः &c., अधःकृतः &c., ध्वंसितः &c. *See* OVERTHROWN.

OVERTURNING, *s.* परावर्त्तनं, परिवर्त्तनं, पर्य्यसनं, उत्सादनं. *See* OVERTURN.

To OVERVALUE, *v. a.* अधिकं or अतिशयेन मन् (c. 4. मन्यते, मन्तुं, c. 10. मानयति -यितुं), अधिकमूल्यं or अतिमूल्यं कृ or स्था in caus. (स्थापयति -यितुं).

OVERWEENING, *a.* अत्यभिमानी -निनी -नि (न्), अतिमानी &c., अत्यहङ्कारी &c., अत्यहंयुः -युः -यु, आत्मश्लाघी &c.

OVERWEENINGLY, *adv.* अत्यभिमानेन, अत्यहङ्कारेण, अत्यभिमानपूर्व्वं.

OVERWEIGHT, *s.* अतिभारः, अधिकभारः, भाराधिक्यं, अतिशयभारः.

To OVERWHELM, *v. a.* (Crush, beat down) अवमृद् (c. 9. -मृद्नाति -मर्दितुं), प्रमृद्, आमृद्, अवपत् (c. 10. -पातयति -यितुं), निपत्, पुष् (c. 10. पोषयति -यितुं), निष्पिष् (c. 7. -पिनष्टि -पेष्टुं), सम्पिष्, विनिष्पिष्.—(Overspread) आछद् (c. 10. छादयति -यितुं), समाछद्, आवृ (c. 5. -वृणोति -वरितुं -रीतुं), समावृ, आक्रम् (c. 1. क्रामति -क्रमितुं), अवकॄ (c. 6. -किरति -करितुं -रीतुं), समवकॄ, अवाकॄ; 'he overwhelms them with arrows,' तान् अवाकिरति शरैः.—(Immerge, submerge) मस्ज् (c. 10. मज्जयति -यितुं), निमस्ज्, अवगाह् (c. 10. -गाहयति -यितुं), समाप्लु (c. 10. -प्लावयति -यितुं, c. 1. -प्लवते), समभिप्लु, अभिप्लु, परिप्लु, अभिपरिप्लु, उपप्लु, विप्लु, समाप्लुतं -तां कृ, परिप्लुतं -तां कृ, समभिप्लुतं &c. कृ, मग्नं -ग्नां कृ.

OVERWHELMED, *p. p.* मर्दितः -ता -तं, अवमर्दितः &c., अवपातितः &c., सम्पिष्टः -ष्टा -ष्टं, आछन्नः -न्ना -न्नं, आच्छादितः -ता -तं, आवृतः -ता -तं, आक्रान्तः -न्ता -न्तं, समाक्रान्तः &c., आकीर्णः -र्णा -र्णं, मग्नः -ग्ना -ग्नं, निमग्नः &c., प्रमग्नः &c., गाहितः &c., अभिप्लुतः &c., अभिपरिप्लुतः &c., समभिप्लुतः &c., उपप्लुतः &c., परिप्लुतः &c., समाप्लुतः &c., सम्प्लुतः &c., उपद्रुतः &c., ग्रस्तः -स्ता -स्तं, परिगतः &c., आकुलः -ला -लं; 'with care,' चिन्तामग्नः &c., चिन्ताकुलः &c.; 'with shame,' ह्रीपरिगतः &c.

OVERWHELMING, *part.* or *a.* अवमर्द्दी -र्द्दिनी -र्द्दि (न्), उपप्लवी &c., विप्लवकारी &c., उपप्लवकारकः -का -कं.

OVERWISE, *a.* अतिप्राज्ञः -ज्ञा -ज्ञं, अतिज्ञानी -निनी -नि (न्), एकान्तप्राज्ञः &c., अतिपण्डितः -ता -तं, पण्डितम्मन्यः -न्या -न्यं.

To OVERWORK, *v. a.* अतिशयेन or एकान्ततः or अधिकम् आयस् (c. 10. -यासयति -यितुं), अत्यायामं or अतिक्लेशं कृ or दा.

OVERWORK, *s.* अत्यायामः, अतिक्लेशः, एकान्तक्लेशः, अतिश्रमः.

OVERWORKED, *p. p.* अत्यायासितः -ता -तं, अतिक्लेशितः &c., अतिक्लिष्टः -ष्टा -ष्टं.

OVERWROUGHT, *a.* अतिसंस्कृतः -ता -तं, अतिपरिष्कृतः &c., अतिसिद्धः -द्धा -द्धं.

OVERZEALOUS, *a.* अत्युत्सुकः -का -कं, अत्यासक्तः -क्ता -क्तं, अतिव्यग्रः -ग्रा -ग्रं, अत्युद्यमः -मा -मं, अतिचण्डः -ण्डा -ण्डं, अत्युत्कण्ठितः &c.

OVIFORM, *a.* अण्डाकारः -रा -रं, अण्डाकृतिः -तिः -ति, अण्डरूपः -पा -पं.

OVIPAROUS, *a.* अण्डजः -जा -जं, अण्डजनकः -का -कं, अण्डप्रजः -जा -जं, अण्डप्रसूः -सूः -सु, अण्डोत्पादकः -का -कं, द्विजः -जा -जं, द्विजन्मा -न्मा -न्म (न्), द्विजातिः -तिः -ति, अयोनिजः &c.; 'any oviparous animal,' द्विजः, द्विजातिः &c.

To OWE, *v. a.* (Owe money) धृ (c. 10. धारयति -यितुं) with acc. and dat.; as, 'he owes a hundred pieces of money to Devadatta,' देवदत्ताय शतं मुद्रा धारयति; 'he repaid me the money which he owed me,' धारयन् मह्यं वसूनि प्रत्यपद्यत.—(Be indebted) ऋणी -णिनी -णि भू, ऋणवान् -वती -वद् भू, ऋणबद्धः -द्धा -द्धं भू, ऋणं कृ.—(Be obliged) अनुगृहीतः -ता -तं भू; 'I owe you many thanks for your advice,' अनुगृहीतोऽस्मि तवोपदेशेन. The sense of 'owe' may be expressed by the fut. pass.

part.; as, 'I owe him money,' मया तस्मै धनं प्रतिदेयं or प्रतिदातव्यं, or by changing the construction of the sentence thus, 'I owe my deliverance to you,' भवान् मम रक्षाकारणम् इति ज्ञातव्यं. *See* the next word.

OWING, *part.* (Due) देयः -या -यं, प्रतिदेयः -या -यं, दातव्यः -व्या -व्यं, प्रतिदातव्यः &c., दानीयः -या -यं, शोधनीयः -या -यं.—(Following as effect and cause) प्रयुक्तः -क्ता -क्तं, जनितः -ता -तं, उत्पादितः &c., उद्भवः -वा -वं, प्रभवः &c., कारणभूतः -ता -तं; 'my deliverance is owing to you,' भवान् मम रक्षाकारणं or मम रक्षणं भवत्प्रयुक्तं.—(Imputable) आरोपणीयः -या -यं, अध्यारोपणीयः -या -यं, सम्बन्धनीयः &c.

OWL, *s.* उलूकः, उलूकः, पेचकः, कौशिकः, वायसारातिः *m.*, दिवान्धः, दिवाभीतः, निशाटः, निशाचरः, नक्तञ्चरः, निशादर्शी *m.* (न्), नक्तचारी *m.* (न्), रजनीचरः, काकभीरुः *m.*, कायहूकः, घूकः, वक्रनासिकः, रक्तनासिकः.

OWL-LIGHT, *s.* ईषत्प्रकाशः, मन्दप्रकाशः, मन्दप्रभा, निशादिः *m.*

OWN, *a.* स्वः स्वा स्वं, आत्म in comp., स्व in comp., स्वकीयः -या -यं, आत्मीयः -या -यं, स्वीयः -या -यं, स्वकः -का -कं, निजः -जा -जं, नैजः -जी -जं प्रातिस्विकः -की -कं, आत्मसम्बन्धी -न्धिनी -न्धि (न्), आत्माधीनः -ना -नं, आत्मभूतः -ता -तं; 'my own,' मदीयः -या -यं; 'thy own,' त्वदीयः -या -यं; 'our own,' अस्मदीयः -या -यं; 'of one's own self or own accord,' स्वयं.—(Belonging to no other) अनन्यसम्बन्धी &c., अनन्यस्वामिकः -का -कं, अनन्याधीनः -ना -नं, अनन्यवर्त्ती &c. Compounds with स्व and आत्म, are most frequent to express 'own,' as applicable to the first, second, or third person; thus, 'one's own act,' स्वकर्म्म *n.* (न्), आत्मकर्म्म, स्वयकृतं; 'one's own son,' स्वपुत्रः, आत्मजः, स्वजः; 'own nature,' स्वभावः; 'own fancy,' स्वच्छन्दस् *n.*; 'own duty,' स्वधर्म्मः; 'own country,' स्वदेशः; 'own caste or tribe,' स्वजातिः *f.*; 'own family,' स्वकुलं; 'own advantage,' स्वार्थः, आत्महितं; 'for one's own sake,' आत्मार्थं -र्थे; 'one's own wife,' स्वकीया, स्वीया, स्वभार्य्या; 'to make one's own,' आत्मसात्कृ.

To OWN, *v. a.* (Have the legal right to) अधिकारी -रिणी -रि भू or अस्, स्वामी &c. भू, ईश्वरः -रा -री -रं भू; 'to own land,' क्षेत्राधिकारी &c. भू, क्षेत्रस्वामी &c. भू; or expressed by the use of अस् or भू with the gen. c., or with मदीयः -या -यं, आत्मीयः -या -यं, स्वकीयः -या -यं, आत्माधीनः -ना -नं, स्वाधीनः &c.; as, 'I own that land,' तत् क्षेत्रं मदीयम् अस्ति or आत्माधीनं or मम भवति; 'the king owns this money,' एतद् धनं राजाधीनम् अस्ति. *See To* BELONG. (Acknowledge to belong to one's self, claim to one's self) स्वीकृ, आत्मसात्कृ, स्वीयमिति वद् (c. 1. वदति -दितुं), ममेति वद्, स्वत्वम् अभिमन्, स्वत्वं ज्ञा (c. 10. ज्ञापयति -यितुं, c. 9. जानाति) or अभिज्ञा or बुध् (c. 10. बोधयति -यितुं), स्वकीयं -यां कृ, आत्मीयं -यां कृ.—(Confess, acknowledge) स्वीकृ, अङ्गीकृ, उरीकृ, अनुग्रह् (c. 9. -गृह्णाति -ग्रहीतुं), ग्रह्, अभिमन् (c. 4. -मन्यते -मन्तुं), अभिज्ञा (c. 9. -जानाति -ज्ञातुं), प्रतिज्ञा, प्रत्यभिज्ञा, समभिज्ञा, अनुभाष् (c. 1. -भाषते -षितुं), स्वीकारं कृ.

OWNED, *p. p.* (Confessed, acknowledged) स्वीकृतः -ता -तं, अङ्गीकृतः &c., अभिज्ञातः -ता -तं, प्रतिज्ञातः &c.—(The legal right vested in) स्वत्वविशिष्टः -ष्टा -ष्टं; 'owned by me,' मत्स्वत्वविशिष्टः &c.

OWNER, *s.* अधिकारी *m.* -रिणी *f.* (न्), स्वामी *m.* -मिनी *f.* (न्), ईश्वरः -रा -री, पतिः *m.*, प्रभुः *m.*, अधिभूः *m.*, अधिपः, ईशिता *m.* (तृ), नेता *m.* (तृ), नायकः, परिवृढः, भरण्डः; 'of cattle,' गवीश्वरः; 'of land,' क्षेत्राधिकारी *m.*

OWNERSHIP, *s.* स्वाम्यं, स्वामित्वं, स्वत्वं, अधिकारः -रिता -त्वं, प्रभुत्वं -ता, ऐश्वर्य्यं, नायकत्वं.

OWNING, *s.* (Confession) स्वीकारः, स्वीकरणं, अङ्गीकारः, अङ्गीकरणं.

OX, *s.* (Male of the bovine genus) गौः *m.* (गो), वृषभः, वृषः, ऋषभः, बलीवर्द्दः, उक्षा *m.* (न्), वहतः -तिः -तुः *m.*, ककुद्मान् *m.* (त्), अनड्वान् *m.* (डुह्), शङ्करः, शाङ्करः, धाकः, विसनः; 'stupid as an ox,' गोमूढः; 'relating to an ox,' औक्षः -क्षी -क्षं.—(Draft ox) शङ्कुः.

OXEN, *pl.* गावः *m.pl.*; 'herd of oxen,' गोकुलं, गोवृन्दं, औक्षकं, गोसमूहः, पशुगणः, गव्या, गोत्रा, पाशवं, उक्ष्णां संहतिः *f.*, गवां व्रजः; 'yoke of oxen,' गोयुगं, गोगोयुगं; 'property in oxen,' गोधनं; 'carriage drawn by oxen,' गोयानं.

OX-FLY, *s.* गोमक्षिका, गोमशकः.

OXYD, OXIDE, *s.* रीतिः *f.*; 'of iron,' सारं; 'of mercury,' रसभस्म *n.* (न्).

To OXYDATE, OXYDIZE, *v. a.* जारणं कृ, साधनं कृ, भस्मीकृ, आतञ्चनं कृ, प्रतीवापं कृ; 'oxydized iron,' सारणं.

OXYDATION, *s.* जारणं, साधनं, आतञ्चनं, प्रतीवापः, भस्मीकरणं.

OXYGEN, *s.* The word used in modern treatises is अम्लकरः.

OYEZ, OYES, शृणुत शृणुत आर्य्याः.

OYSTER, *s.* शुक्तिः *f.*, शुक्तिका, तोयशुक्तिका, पटोलकः, पुष्टिका, मुक्तास्फोटः, मुक्तागारं, मुक्ताप्रसूः *f.*; 'oyster-shell,' शुक्तिपुटं, शुक्तिपेशी.

OYSTER-WOMAN, OYSTER-WENCH, *s.* शुक्तिविक्रयिणी, शुक्तिविक्रेत्री.

P.

PABULAR, PABULOUS, *a.* पौष्टिकः -की -कं, पोषकः -का -कं, पुष्टिकरः &c.

PABULUM, *s.* भोजनं, आहारः, भोज्यं, भक्ष्यं, पौष्टिकं. *See* FOOD.

PACE, *s.* (A step) पदपातः, पादपातः, पदक्रमः, पदन्यासः, पादन्यासः, पदविक्षेपः, पादविक्षेपः, पदनिक्षेपः, पदक्रमः, पदं, क्रमः.—(Gait) गतिः, गमनं, चारः, चरणं, चलनं, अयनं.—(Of horses) धारः -रा, चारः, वारकः पदविक्षेपः, अयनं; 'a horse with a good pace,' सुखायनः, सुखचारः. A horse's paces are, 'walk,' आस्कन्दितं; 'trot,' धौरितकं; 'sidling,' रेचितं; 'gallop,' वल्गितं; 'vaulting,' प्लुतं.—(Of an elephant) गजव्रजं.—(Degree of celerity) क्रमः, पदक्रमः, गतिवेगः; 'a quick pace,' द्रुतपदं; 'at a good pace,' चित्रपदक्रमं; 'going at a quick pace,' द्रुतगामी -मिनी -मि (न्), द्रुतक्रमः -मा -मं, अविलम्बितक्रमः &c.

To PACE, *v. n.* क्रम् (c. 1. क्रामति, c. 4. क्राम्यति, क्रमितुं), क्रमे क्रमे चल् (c. 1. चलति -लितुं) or व्रज् (c. 1. व्रजति -जितुं) or चर् (c. 1. चरति -रितुं) or गम् (c. 1. गच्छति, गन्तुं) or पदन्यासं कृ; 'to pace up and down,' इतस्ततः क्रम् or चल् or भ्रम् (c. 4. भ्राम्यति, भ्रमितुं), परिक्रमं कृ; 'pacing to and fro,' चङ्क्रम्यमाणः -णा -णं.

To PACE, *v. a.* पदन्यासेन मा (c. 2. माति -तुं, c. 10. मापयति -यितुं).

PACED, *a.* (Having a particular gait) गति in comp., गतिक in comp.; as, 'slow-paced,' मन्दगतिः -तिः -ति, मन्दगतिकः -का -कं.

PACIFIC, PACIFICATORY, *a.* शमकः -का -कं, शान्तिकः -की -कं, शमी -मिनी -मि (न्), शमकारी &c., शमकारकः -का -कं, उपशमकः &c., प्रशमकः &c., शान्तिकरः -रा -रं, शान्त्यात्मकः &c., सान्त्वोपचारकः &c., सान्त्वोपायकः &c.

PACIFICATION, *s.* शमनं, प्रशमनं, उपशमनं, शान्तिः *f.*, उपशान्तिः *f.*, प्रशान्तिः *f.*, शान्तिकरणं, सान्त्वनं -ना, साम *n.* (न्), सान्त्वोपचारः,

सामोपायः, सामोपायप्रयोगः, कलहशान्तिः *f.*, विग्रहशान्तिः, क्रोधशान्तिः, क्रोधहरणं.—(Making peace) सन्धिकरणं, ऐक्यकरणं.—(Peace made) सन्धिः *m.*

PACIFICATOR, PACIFIER, *s.* सन्धिकर्त्ता *m.* (र्त्तृ), शमकः. *See* PACIFIC.

PACIFIED, *p. p.* शान्तः -न्ता -न्तं, शमितः -ता -तं, उपशान्तः &c., प्रशान्तः &c., कृतशान्तिः -न्तिः -न्ति, शान्तक्रोधः -धा -धं, गतक्रोधः &c.; 'to be pacified,' शम् (c. 4. शाम्यति, शमितुं), प्रसद् (c. 1. -सीदति -सत्तुं), तुष् (c. 4. तुष्यति, तोष्टुं).

To PACIFY, *v. a.* शम् (c. 10. शमयति -यितुं), प्रशम्, उपशम्, सान्त्व् or शान्त्व् (c. 10. सान्त्वयति -यितुं), उपसान्त्व्, अभिशान्त्व्, परिशान्त्व्, प्रसद् (c. 10. -सादयति -यितुं), अभिप्रसद्, साम् (c. 10. सामयति -यितुं), तुष् (c. 10. तोषयति -यितुं), सन्तुष्, परितुष्, सम्परितुष्.

PACK, *s.* (Bundle, bale) भाण्डकं, भाण्डं, भारः, कूर्चः, पोटलिका, पोट्टली, गुच्छः -च्छकः, वासनं, वरण्डः -ण्डकः.—(Of hounds or dogs) श्वगणः, कुक्कुरगणः, श्वसंघः, कुक्कुरसमूहः, शुनीरः; 'one who keeps a pack of hounds,' श्वागणिकः.—(Number of persons) गणः, जनसमूहः, संघः, मण्डलं, सङ्गः.—(Heap) राशिः *m.*, समूहः, सञ्चयः, वृन्दं, समवायः.

To PACK, *v. a.* (Bundle up, press together) पुट् (c. 10. पुटयति -यितुं), पुटीकृ, सम्पुटीकृ, वासनीकृ, भाण्डीकृ, कूर्चीकृ, कूर्चं कृ, गुच्छीकृ, पोटलिकां कृ, कोशीकृ.—(In a box) भाण्डे निविश् (c. 10. -वेशयति -यितुं) or निधा (c. 3. -दधाति -धातुं), कोशे or कोषे निविश् or निधा.—(Put together or unite with fraudulent design) कुकर्म्मसम्पादनार्थं संयुज् (c. 10. -योजयति -यितुं) or सङ्क्रम् (c. 10. -गमयति -यितुं) or एकीकृ.—(A jury or assembly of any kind) स्वार्थसम्पादनार्थं स्वपक्षपातिनो धर्म्मसभां प्रविश् or स्वपक्षपातिनः सभ्यपदे or सभासदधिकारे नियुज्.—(Pack off, dismiss) प्रस्था in caus. (-स्थापयति -यितुं), अपसृ (c. 10. -सारयति -यितुं).

To PACK, *v. n.* (Be pressed together, or bundled together) पुटीभू, सम्पुटीभू, वासनीभू.—(Be placed in a box) भाण्डस्थः -स्था -स्थं भू, कोषस्थः &c. भू.—(Depart in haste) त्वरितम् अपगम् (c. 1. -गच्छति -गन्तुं).

PACKAGE, *s.* भाण्डकं, भाण्डं, वासनं, वरण्डः -ण्डकः, कूर्चः, पोटलिका.

PACK-CLOTH, *s.* वासनं, वासनपटः, वेष्टनं, वेष्टनपटः.

PACKED, *p. p.* (Bound together in a bundle) पुटीकृतः -ता -तं, सम्पुटीकृतः &c., कूर्चीकृतः &c.—(In a box) भाण्डस्थः -स्था -स्थं, वासनस्थः &c., भाण्डीकृतः &c., वासनीकृतः &c.

PACKET, *s.* (Small package) कूर्चः, पोटलिका, पोट्टली, समुद्गका.—(Ship employed in carrying despatches) पत्रवाहिनी नौः, राजपत्रवाहका नौः, लेखहारिणी नौका, वेगवती नौका; 'steam-packet,' वाष्पीयनौः *f.*

PACK-HORSE, *s.* स्थूरी *m.* (न्), स्थौरी *m.*, स्थूरी *m.*, स्थोरी *m.*, पृष्ठ्यः.

PACK-SADDLE, *s.* पर्य्याणं, पर्य्ययणं, पल्ययनं, पल्यानं.

PACK-THREAD, *s.* शाणसूत्रं, शणसूत्रं, सनसूत्रं, शाणतन्तुः *f.*, पवित्रकं.

PACT, PACTION, *s.* समयः, नियमः, संविद् *f.*, उपगमः, सङ्केतः.

PACTIONAL, PACTITIOUS, *a.* सामयिकः -की -कं, साङ्केतिकः -की -कं.

PACTOLUS, *s.* (A fabulous river) जम्बुः *m.*, जम्बुनदी.

PAD, *s.* (An easy paced horse) सुखायनः, सुखचारः.—(Foot-pad) मार्गवणिकप्रः, पादविकप्रः, परिपन्थी *m.* (न्), पारिपन्थिकः.—(Bolster, cushion) उपधानं -नीयं, विष्टरः, निस्तरः, बालिशं, आस्तरणं, उपवर्हः, आविलं, पट्टः, पटः.—(Hair or other soft substance) लोमादि मृदुवस्तु.

To PAD, *v. a.* (Stuff or furnish with hair or other soft substance) लोमादिमृदुवस्तुना आस्तॄ (c. 5. -स्तृणोति -स्तरितुं -रीतुं), मृदुलोमादिना पॄ (c. 10. पूरयति -यितुं) or युज् (c. 10. योजयति -यितुं) or समायुज्.

To PAD, *v. n.* (Travel slowly) क्रमे क्रमे or शनैः शनैर् व्रज् (c. 1. व्रजति -जितुं).

PADDED, *p. p.* or *a.* मृदुलोमादिपूरितः -ता -तं, मृदुवस्तुपूरितः -ता -तं.

PADDING, *s.* मृदुलोमादि *n.*, लोमादिमृदुवस्तु *n.*, पूरणं, भरणं.

To PADDLE, *v. n.* (Beat the water with an oar) नौकादण्डेन जलं क्षिप् (c. 6. क्षिपति, क्षेप्तुं) or तड् (c. 10. ताडयति -यितुं), जलक्षेपणं कृ.—(Play in the water) जले क्रीड् (c. 1. क्रीडति -डितुं), जलक्रीडां कृ.—(Finger) अङ्गुलिचेष्टां कृ, अङ्गुलिव्यापारं कृ.

To PADDLE, *v. a.* (Propel by a paddle) नौकादण्डेन चल् (c. 10. चालयति -यितुं).

PADDLE, *s.* (Oar) नौकादण्डः, क्षेपणिः -णी *f.*, क्षिपणिः -णी *f.*, अरित्रं, नौचालनी. *See* OAR.—(Blade of the oar) क्षेपणिफलकं.

PADDLE-BOX, *s.* क्षेपणिकोशः, क्षेपणिकोषः, क्षेपण्याधारः.

PADDLE-WHEEL, *s.* क्षेपणिचक्रं, नौचालनचक्रं, नौचालनी.

PADDOCK, *s.* वाटी, वाटिका, वाटः -टं, वियीतः, प्राचीरपरिवृतं क्षेत्रं.

PADLOCK, *s.* तालकं, तालः -ला, तालयन्त्रं, प्रतिताली, द्वारकीलः.—(Clasp) कुडपः.

To PADLOCK, *v. a.* तालकेन बन्ध् (c. 9. बध्नाति, बन्द्धुं), तालबद्धं -द्धां कृ.

PÆAN, PEAN, *s.* जयगानं, जयशब्दः, जयध्वनिः *m.*, जयगीतं.

PAGAN, *s.* देवतार्चकः, देवतापूजकः, प्रतिमापूजकः, मूर्त्तिपूजकः, देवतासेवी *m.* (न्), असद्धर्म्मसेवी *m.* (न्), असद्धर्मावलम्बी *m.* *See* IDOLATER.

PAGAN, *a.* प्रतिमापूजकसम्बन्धी -न्धिनी -न्धि (न्), मूर्त्तिपूजकसम्बन्धी.

PAGANISM, *s.* प्रतिमापूजा, मूर्त्तिपूजा, देवतार्चा, देवतार्चनं -ना, मूर्त्तिसेवा -वनं, असद्धर्म्मावलम्बनं. *See* IDOLATRY, HEATHENISM.

PAGE, *s.* (Of a book) पृष्ठं, फलकः -कं, पत्रं, पत्रिका.—(Boy attendant) पार्श्वानुचरः, पार्श्वपरिचरः, बालसेवकः, बालानुचरः.

To PAGE, *v. a.* पृष्ठाङ्कनं कृ, पत्राङ्कनं कृ, पृष्ठसंख्याङ्कनं कृ.

PAGEANT, *s.* (Statue in show, &c.) शोभामूर्त्तिः *f.*, शोभाप्रतिमा.—(Show, spectacle) कौतुकं, चमत्कारः, चमत्कृतिः *f.*, चमत्करणं, आडम्बरं, प्रेक्षा, प्रेक्षणं, शोभा, यात्रा.

PAGEANT, *a.* कौतुकी -किनी -कि (न्), आडम्बरी &c., चमत्कारकः -का -कं, शोभनः -ना -नं, अतिशोभनः &c., यात्रिकः -की -कं.

PAGEANTRY, *s.* कौतुकं, चमत्कारः, आडम्बरं, शोभा. *See* PAGEANT, *s.*

PAGINAL, *a.* पृष्ठ्यः -ष्ठ्या -ष्ठ्यं, पुस्तकपत्रसम्बन्धी &c.

PAGODA, *s.* देवतामन्दिरं, देवताभवनं, देवतायतनं, देवमन्दिरं.

PAID, *p. p.* शोधितः -ता -तं, परिशोधितः &c., परिशुद्धः -द्धा -द्धं, अपाकृतः -ता -तं, सिद्धः -द्धा -द्धं, साधितः -ता -तं, विगणितः -ता -तं, निस्तारितः -ता -तं, निरादिष्टः -ष्टा -ष्टं, गृहीतवेतनः -ना -नं.

PAIL, *s.* पात्रं, भाजनं, काष्ठपात्रं, जलपात्रं, जलभाजनं; 'for milk,' दोहनं -नी, गोदोहनी, दुग्धभाण्डं. *See* MILK-PAIL.

PAIN, *s.* दुःखं, पीडा, वेदना -नं, व्यथा, आर्त्तिः *f.*, तापः, सन्तापः, परितापः, बाधा, विबाधा, आबाधा, यातना, कृच्छ्रं, कष्टं, क्लेशः, खेदः, उद्वेगः, यन्त्रणं, दुःखं, दुःखितं, असुखं, तोदः -दनं, रायणं, विघातकं, विराधनं, प्रसूतिजं, आमनस्यं, आमानस्यं, अमानस्यं, आभीलं; 'bodily pain as opposed to mental,' शरीरपीडा, वेदना, कृच्छ्रं, व्याधिः *m.*; 'pain in the head,' शिरोवेदना, शिरःपीडा, शिरोर्त्तिः *f.*; 'in the teeth,' दन्तवेदना; 'sharp pain,' शूलः -लं, तीव्रवेदना; 'creeping or flying pain,' वेगः; 'rheumatic pains in the bones,' अस्थिशूलः -लं; 'in the loins,' कटिवेदना; 'pains of hell,'

, याम्ययातना; 'of labor,' प्रसववेदना, गर्भवेदना, ; 'of death,' प्राणान्तवेदना; 'suffering pain,' दुःखभागी -गिनी -गि (न्), दुःखभोगी &c., दुःखी &c.,; 'accession of pain,' दुःखसंयोगः; 'causing pain,' पीडाकरः -रा -रं, दुःखकरः &c.; 'act of causing pain,' पीडाकरणं, पीडनं; 'freed from pain,' दुःखातीतः -ता -तं.—(Mental pain, disquietude) मनोदुःखं, मनःपीडा, मनस्तापः, मनोव्यथा, मानसी व्यथा, चित्तवेदना, चित्तोद्वेगः, आधिः *m.*—(Pains, toil, effort) यत्नः, प्रयत्नः, कष्टं, आयासः, प्रयासः, उद्योगः, उत्साहः, व्यवसायः, चेष्टा, उद्यमः, श्रमः, परिश्रमः, क्लेशः, आस्था; 'to take pains,' यत् (c. 1. यतते -तितुं), प्रयत्, व्यवसो (c. 4. -स्यति -सातुं), उद्यम् (c. 1. -यच्छति -यन्तुं), चेष्ट् (c. 1. चेष्टते -ष्टितुं), विचेष्ट्, घट् (c. 1. घटते -टितुं), उद्योगं कृ, यत्नं कृ, उत्साहं कृ.—(Penalty) दण्डः, साहसं, शिष्टिः *f.*, शिक्षा.

To PAIN, *v. a.* पीड् (c. 10. पीडयति -यितुं), आपीड्, उपपीड्, दुःख् (c. 10. दुःखयति -यितुं), व्यथ् (c. 10. व्यथयति -यितुं), तप् (c. 10. तापयति -यितुं), सन्तप्, परितप्, उपतप्, बाध् (c. 1. बाधते -धितुं), उद्विज् (c. 10. -वेजयति -यितुं), क्लिश् (c. 9. क्लिश्नाति, क्लेशितुं, क्लेष्टुं), अर्द् (c. 10. अर्दयति -यितुं), दुःखं कृ or दा, पीडां कृ, व्यथां कृ.

PAINED, *p. p.* पीडितः -ता -तं, दुःखितः -ता -तं, व्यथितः &c., आर्त्तः -र्त्ता -र्त्तं in comp., दुःखार्त्तः &c., दुःखी -खिनी खि (न्), दुःखान्वितः -ता -तं, दुःखोपेतः &c., बाधितः -ता -तं, तापितः &c., सन्तापितः &c., तप्तः -प्ता -प्तं, सन्तप्तः &c., उद्वेजितः &c., क्लेशितः &c., क्लिष्टः &c., आतुरः -रा -रं, अर्दितः &c., अभ्यर्दितः &c., अनुभूतवेदनः -ना -नं, कृच्छ्रगतः &c., क्लेशी &c., कष्टी &c., कष्टः -ष्टा -ष्टं, आधिमान् -मती -मत् (त्), दूनः -ना -नं, सव्यथः -था -थं, सवेदनः -ना -नं; 'being pained,' पीड्यमानः -ना -नं, तप्यमानः &c., आतप्यमानः &c., क्लिश्यमानः &c., धूपायितः -ता -तं; 'to be pained,' पीड् in pass. (पीड्यते), दुःख (nom. दुःखायते, दुःखीयति), दुःखीभू, व्यथ् (c. 1. व्यथते -थितुं), प्रव्यथ्, तप् in pass. (तप्यते), परितप्, सन्तप्, क्लिश् (c. 4. क्लिश्यते).

PAINFUL, *a.* (Causing pain) पीडाकरः -रा -रं, दुःखकरः -रा -रं, पीडाकारकः -का -कं, पीडाजनकः -का -कं, दुःखजनकः &c., दुःखदः -दा -दं, दुःखप्रदः -दा -दं, दुःखावहः -हा -हं, वेदनाकारकः -का -कं, वेदनाजनकः &c., व्यथाकरः &c., व्यथकः -का -कं, कष्टकरः &c., कष्टकारकः &c., कष्टावहः -हा -हं, क्लेशकरः &c., क्लेशदः &c., क्लेशावहः -हा -हं, क्लेशकः -का -कं, बाधकः -का -कं, उद्वेजकः -का -कं, सन्तापकः -का -कं, दूदः -दा -दं.—(Full of pain) दुःखमयः -यी -यं, दुःखी -खिनी -खि (न्), क्लेशी &c., सबाधः -धा -धं, सव्यथः -था -थं, सवेदनः -ना -नं.—(Requiring labor or toil) कष्टसाध्यः -ध्या -ध्यं, श्रमसाध्यः &c., दुःसाध्यः &c., दुष्करः -रा -रं, कठिनः -ना -नं.

PAINFULLY, *adv.* (With pain) सव्यथं, सवेदनं, सबाधं, सदुःखं, सक्लेशं, सोद्वेगं, सकष्टं, दुःखपूर्व्वं.—(With toil) श्रमेण, सश्रमं, आयासेन, सायासं, कृच्छ्रेण, सकृच्छ्रं.

PAINFULNESS, *s.* दुःखकारकत्वं, पीडाजनकत्वं, कष्टकारकत्वं, दुःखिता, सदुःखत्वं, दुःखं, सक्लेशत्वं, सोद्वेगता, कष्टं, सकष्टत्वं, सकष्टता.

PAINLESS, *a.* दुःखहीनः -ना -नं, दुःखरहितः -ता -तं, व्यथाहीनः -ना -नं, दुःखशून्यः -न्या -न्यं, निर्दुःखी -खिनी -खि (न्), निर्व्यथः -था -थं.

PAINS, *s. pl.* यत्नः, प्रयत्नः, उद्योगः, कष्टं. *See* PAIN.

PAINSTAKER, *s.* उद्योगी *m.* (न्), उत्साही *m.*, उद्यमी *m.*, व्यवसायी.

PAINSTAKING, *a.* कृतप्रयत्नः -त्ना -त्नं, कृतयत्नः &c., प्रयत्नवान् -वती -वत् (त्), यत्नशीलः -ला -लं, प्रयत्नशीलः -ला -लं, उद्योगशीलः &c., उद्यमशीलः &c., उद्योगी -गिनी -गि (न्), व्यवसायी &c., कृतश्रमः -मा -मं, प्रसितः -ता -तं. *See* INDUSTRIOUS.

To PAINT, *v. a.* (Draw in colors) चित्र् (c. 10. चित्रयति -यितुं), लिख् (c. 6. लिखति, लेखितुं), आलिख्, अभिलिख्.—(Cover or besmear with color) रञ्ज् (c. 10. रञ्जयति -यितुं), वर्ण् (c. 10. वर्णयति -यितुं), लिप् (c. 6. लिम्पति, लेप्तुं), रङ्गेण लिप्, रञ्जनं कृ.—(Describe) वर्ण्, अनुवर्ण्, उपवर्ण्, संवर्ण्, वर्णनं कृ, विलिख्.

PAINT, *s.* रङ्गः, वर्णकः -का, चित्रं, लेपः, विलेपः, रञ्जनलेपः, रञ्जनं.

PAINTED, *p. p.* चित्रितः -ता -तं, चित्रगतः -ता -तं, चित्रार्पितः -ता -तं, आलिखितः &c., अभिलिखितः &c., आलेख्यगतः &c., आलेख्यसमर्पितः &c., वर्णितः -ता -तं, वर्णगतः &c., रञ्जितः &c., चित्रः -त्रा -त्रं; 'painted on the surface,' चित्रतलः -ला -लं.

PAINTER, *s.* चित्रकरः, चित्रकारः, चित्रलेखकः, चित्रलिक् (ख्), चित्रकृत् *m.*, चित्रकः, चित्रकर्म्मविद् *m.*, रङ्गाजीवः -वी *m.* (न्), रञ्जकः, वर्णी *m.* (न्), वर्णधारकः, वर्णाटः, लेखकः, आलेखकः, आलेख्यकृत् *m.*, पटकारः, तौलिकः, तौलिकिकः; 'painter's brush,' तूलिः *f.*, तूलिका, ईषिका, वर्त्तिका.

PAINTING, *s.* (The act) चित्रलिखनं, चित्रलेखनं, चित्रलिपिः *f.*, लिपिः *f.*, आलेखनं, लेखनं, लिखनं, चित्रकरणं, रञ्जनं, वर्णनं.—(The art or business) चित्रकर्म्म *n.* (न्), चित्रविद्या, चित्रक्रिया.—(A painting or picture) चित्रलेखा, चित्रं, आलेख्यं, चित्रलिखितं, चित्रगतं.—(Painting the body) पत्रलेखा, पत्राङ्गुलिः *f.*, पत्रावली -लिः *f.*, वर्णः,

PAIR, *s.* मिथुनं, द्वयं, द्वन्द्वं, युगं, युग्मं, युगलं, यमलं, यामलं, यमः, यमकं, युतकं; 'a pair of doves,' पारावतमिथुनं; 'a pair of oxen,' गोमिथुनं, गोयुगं; 'a pair of birds,' पक्षिणोर् मिथुनं, पक्षिमिथुनं, पक्षिद्वयं; 'a married pair,' दम्पती *m.* du., भार्य्यापती *m.* du., स्त्रीपुरुषौ. The word द्वन्द्वः is used to denote that form of grammatical combination which unites two or more words of similar or opposite signification; thus, 'hand and foot,' पाणिपादं; 'affection and hatred,' रागद्वेषौ *m.* du.

To PAIR, *v. n.* (Suit, fit) युज् in pass. (युज्यते), संयुज्, उपयुज्.—(Be joined in pairs) स्त्रीपुरुषवत् or दम्पतिवत् सङ्गम् (c. 1. -गच्छति -गन्तुं) or संयुज्, मैथुनार्थं सङ्गम्, मैथुनं कृ.

To PAIR, *v. a.* संयुज् (c. 7. -युनक्ति -योक्तुं, c. 10. -योजयति -यितुं), युज्, संयोगं कृ, मिथुनसंयोगं कृ, मैथुनार्थं संयुज्.

PALACE, *s.* राजगृहं, राजमन्दिरं, नृपगृहं, नृपमन्दिरं, राजवेश्म *n.* (न्), नृपवेश्म *n.*, राजधाम *n.* (न्), नृपधाम *n.*, राजभवनं, राजसदनं, राजप्रासादः, राजहर्म्यं, राजवसतिः *f.*, नृपतिवसतिः *f.*, राजशाला, राजधानी, प्रासादः, हर्म्यं, मन्दिरं -रा, भवनं, सौधं, अट्टालः -लिका, विमानं, शाला, विशिर्पं, विच्छर्दकः, माडिः *m.*, उपकार्य्या, उपकारी -रिका; 'palace-court,' राजसभा; 'palace-yard,' राजाङ्गनं.

PALÆSTRA, *s.* मल्लभूः *f.*, मल्लभूमिः *f.*, यक्षराट् *m.* (ज्), मल्लयात्रा.

PALANKEEN, PALANQUIN, *s.* शिबिका, डयनं, डलकं, याप्ययानं, नरयानं, प्रवहणं, इत्या, शिरस्का.

PALATABLE, *a.* रुचिकरः -री -रं, रुच्यः -च्या -च्यं, आस्वाद्यः -द्या -द्यं, स्वादुः -द्वी -दु, सुरसः -सा -सं, सरसः -सा -सं, रसिकः -का -की -कं, मुखप्रियः -या -यं.

PALATABLENESS, *s.* रुच्यता -त्वं, आस्वाद्यता, स्वादुता, सरसता, रसिकत्वं.

PALATAL, PALATIAL, PALATIC, *a.* (Pertaining to the palate) तालव्यः -व्या -व्यं, तालुसम्बन्धी &c.; 'a palatal letter,' तालव्यं.

PALATE, *s.* तालु *n.*, तालुका, काकुदं -दः; 'soft palate,' शुण्डिका,

7 F

शूना, सूना, अलिजिह्वा, अधोजिह्विका. *See* Uvula.

Palatial, *a.* राजप्रासादीयः -या -यं, प्रासादीयः &c., राजगृहयोग्यः -ग्या -ग्यं. राजमन्दिरयोग्यः &c.

Palaver, *s.* चाटूक्तिः *f.*, चाटुकारः, सान्त्वोक्तिः *f.*, मधुरवाक्यं, मिथ्योक्तिः.

To palaver, *v. a.* चाटूक्त्या सान्त्व् (c. 10. सान्त्वयति -यितुं), मिथ्या सान्त्व्.

Pale, *a.* पाण्डुः -ण्डुः -ण्डु, पाण्डुरः -रा -रं, पाण्डरः -रा -रं, विपाण्डुरः &c., विवर्णः -र्णा -र्णं, गतवर्णः &c., नीरक्तः -क्ता -क्तं, रागहीनः -ना -नं; 'pale in color,' पाण्डुवर्णः &c.; 'having a pale face,' विवर्णवदनः -ना -नं.—(Dim, not bright) मन्दप्रभः -भा -भं, हततेजाः -जाः -जः (स्), मन्दच्छायः -या -यं, निस्तेजाः &c., हतकान्तिः -न्तिः -न्ति, न्यूनकान्तिः &c., न्यूनप्रभः &c., मलिनप्रभः &c., म्लानतेजाः &c., म्लानकान्तिः &c.—(Light in color) expressed by ईषत्, आ, श्वेत; as, 'pale red,' ईषद्रक्तः -क्ता -क्तं, आरक्तः &c., श्वेतरक्तः &c.; 'pale blue,' आनीलः -ला -लं, श्वेतनीलः &c.

Pale, *s.* (Stake) शङ्कुः *m.*, कीलः, स्थाणुः *m.*, शल्यं, शूलं.—(Inclosure, limit) आवरणं, वृतिः *f.*, वेष्टनं, आवेष्टनं, अवरोधकं, वारणं, वरणः, वलयः.

To pale, *v. a.* शङ्कुवलयेन परिवृ (c. 5. -वृणोति -वरितुं -रीतुं) or परिवेष्ट् (c. 1. -वेष्टते -ष्टितुं) or अवरुध् (c. 7. -रुणद्धि -रोद्धुं).

Pale-eyed, *a.* पाण्डुनेत्रः -त्रा -त्रं, पाण्डुनयनः &c., न्यूनप्रभाक्षः &c.

Pale-faced, *a.* विवर्णवदनः -ना -नं, पाण्डुमुखः -खी -खं, म्लानवदनः &c.

Paleness, *s.* पाण्डुता -त्वं, पाण्डुरता -त्वं, पाण्डुवर्णः, पाण्डुरागः, विवर्णता, वैवर्ण्यं, मुखवैवर्ण्यं, नीरक्तता, रागहीनता.—(Dimness) प्रभाहानिः *f.*, तेजोहानिः *f.*, न्यूनप्रभा, न्यूनकान्तिः *f.*

Palette, *s.* *See* Pallet.

Palfrey, *s.* स्त्रीलोकारोहणयोग्यः क्षुद्रघोटकः.

Palindrome, *s.* अनुलोमविलोमश्लोकः, मुरजबन्धः.

Paling, *s.* शङ्कुपंक्तिः *f.*, आवरणं, आवारः, वारणं -णी, कटच्छन्नं.

Palisade, *s.* दुर्गपरिगता स्तम्भपंक्तिः or शङ्कुपंक्तिः शङ्कुवलयः, यष्टिवलयः, स्तम्भवलयः, दुर्गावरोधका स्तम्भपंक्तिः, दुर्गावरोधकं.

Palish, *a.* ईषत्पाण्डुः -ण्डुः -ण्डु, आपाण्डुः &c., आपाण्डुरः -रा -रं.

Pall, *s.* (Mantle of state) राजप्रावारः, राजकीयप्रावारः.—(Cloak) प्रावारः, प्रच्छदपटः, आच्छादनपटः.—(For a dead body) शवाच्छादनं.

To pall, *v. n.* विरसीभू, विरसः -सा -सं भू, अरुचिरः -रा -रं भू.

To pall, *v. a.* विरसीकृ, अरुचिं or बीभत्सं जन् (c. 10. जनयति -यितुं).

Palladium, *s.* पुरदेवता, नगरदेवता.—(Defence) रक्षा -क्षणं.

Pallet, *s.* (Board for mixing colors) वर्णपत्रं -त्रः, रङ्गपत्रं.—(Small bed) खट्वा, क्षुद्रखट्वा, तल्पः, क्षुद्रतल्पः.

To palliate, *v. a.* (As a fault, crime, &c.) दोषं or पापं शम् (c. 10. शमयति -यितुं) or उपशम् or छद् (c. 10. छादयति -यितुं) or आच्छद् or मृज् (c. 2. मार्ष्टि -र्ष्टुं), पापशमनं कृ, दोषमार्जनं कृ, दोषक्षालनं कृ, पापापनोदनं कृ, पापाच्छादनं कृ, न्यूनीकृ.

Palliated, *p. p.* शमितः -ता -तं, आच्छादितः -ता -तं, न्यूनीकृतः &c.

Palliation, *s.* (Of a fault or crime) पापशमनं, पापशान्तिः *f.*, दोषाच्छादनं, पापशान्तिः *f.*, पापमार्जना, दोषक्षालनं, दोषप्रक्षालनं, पापापनोदनं, पापापनुत्तिः *f.*, दोषन्यूनीकरणं, उपशमः, उपशमनं, लघूकरणं, उपशान्तिः *f.*

Palliative, *a.* (Extenuating) पापशमनः -ना -नं, दोषशमकः -का -कं, दोषाच्छादकः &c.—(Mitigant) शान्तिकः -की -कं. *See* Mitigant.

Palliative, *s.* (That which extenuates) पापशमनं, दोषशमनं, शान्तिकं.—(That which mitigates pain) वेदनाशान्तिकं, वेदनाशमकम् औषधं, क्लेशापहं, शूलघ्नं, उपशमनं.

Pallid, *a.* पाण्डुः -ण्डुः -ण्डु, पाण्डुवर्णः -र्णा -र्णं, पाण्डुरः -रा -रं, विपाण्डुरः -रा -रं, विवर्णः -र्णा -र्णं &c. *See* Pale.

Pallor, *s.* पाण्डुता -त्वं, पाण्डुरता -त्वं, विवर्णता. *See* Paleness.

Palm, *s.* (Of the hand) तलः -लं, हस्ततलः -लं, करतलः -लं, तालः -लिका, प्रतलः, प्रहस्तः, प्रपाणिः *m.*, चपेटः, चर्पटः, चपटः, फर्फरीकं, अलघुषः, गोछालः; 'the palms joined,' संहतलः, सिंहतलः, संहततलः; 'the hollowed palm,' प्रसृतः, प्रसृतिः *f.*, चुलुकः; 'the hollowed palms joined,' अञ्जलिः *m.*; 'having the palms hollowed and placed one above the other in sign of reverence,' कृताञ्जलिः -लिः -लि, कृताञ्जलिपुटः -टा -टं, बद्धाञ्जलिः &c.—(Tree) तालः, तृणद्रुमः, दीर्घतरुः *m.*, दीर्घद्रुः *m.*, गुच्छपत्रः, लेख्यपत्रकः, द्रुमश्रेष्ठः, द्रुमेश्वरः, दुरारोहः; 'date-palm,' खर्जूरः -री -खर्जूरवृक्षः; 'cocoa-nut palm,' नारिकेलः &c. *See* Cocoa-nut. 'Palm-leaf,' तालपत्रं, तालपर्णं; 'fibres,' तालजटा, तालप्रलम्बः; 'spirituous juice of the palm,' ताली, तालकी.

To palm, *v. a.* (Conceal in the palm) करतले गुप्, करतलगुप्तं -प्तां कृ, हस्ततलस्थं -स्थां कृ.—(Impose by fraud) छल् (c. 10. छलयति -यितुं), छलेन प्रचलीकृ, वञ्च् (c. 10. वञ्चयते -ति -यितुं), प्रतॄ &c.

Palma-christi, *s.* (Castor-oil tree) एरण्डः -ण्डकः, उरुवूकः, उरुवुकः, रुवूकः, रुवुकः, रुवुकः, रुवुः *m.*, रुचकः, व्यडम्बकः, व्यडम्बनः, व्यडम्बरः, व्याघ्रपुच्छः, गन्धर्वहस्तकः, चञ्चुः *m.*, मण्डः, अमण्डः, आमण्डः, वर्धमानः, पञ्चाङ्गुलः.

Palmate, palmated, *a.* हस्ततलाकारः -रा -रं, करतलाकृतिः -तिः -ति.

Palmer, *s.* तालपत्रभृत् कार्पटिकविशेषः or यात्रिकविशेषः.

Palmer-worm, *s.* लोमावृतः कीटविशेषः or कृमिप्रभेदः.

Palmified, *a.* जालपादः -दा -दं, जालपाद् *m. f. n.*, जालाकारपादः &c.

Palmister, *a.* हस्तरेखादिनिरीक्षणाद् दैवकथकः or शुभाशुभदर्शकः, करतलरेखानिरीक्षणेन भविष्यत्सूचकः, सामुद्रिकः, सामुद्रविद् *m.*, हस्तरेखाविद्.

Palmistry, *s.* हस्तरेखादिनिरीक्षणाद् दैवकथनं or शुभाशुभदर्शनं, करतलरेखादिनिरीक्षणेन भविष्यत्सूचनं, हस्तरेखाविद्या, हस्तसामुद्रिकं, सामुद्रविद्या.

Palmy, *a.* (Bearing or abounding with palms) तालवान् -वती -वत् (त्), तालावृतः -ता -तं, तालसङ्कीर्णः -र्णा -र्णं.—(Flourishing) समृद्धः -द्धा -द्धं, वर्धिष्णुः -ष्णुः -ष्णु, श्रीमान् -मती &c., अधिकर्द्धिः -र्द्धिः -र्द्धि.

Palmyra, *s.* (Tree) तृणद्रुमः, तृणराजः, आसवद्रुः *m.*, महोन्नतः. *See* Palm.

Palpability, palpableness, *s.* स्पृश्यता, स्पर्शनीयता, स्पर्शेन्द्रियग्राह्यता, स्पर्शगोचरता.—(Clearness) व्यक्तता, प्रत्यक्षता.

Palpable, *a.* (Perceptible by the touch) स्पृश्यः -श्या -श्यं, स्पर्शनीयः -या -यं, स्पर्शेन्द्रियग्राह्यः -ह्या -ह्यं, स्पर्शगोचरः -रा -रं, स्पर्शवेद्यः -द्या -द्यं, स्पर्शज्ञेयः -या -यं, त्वगिन्द्रियज्ञेयः &c., मूर्त्तिभेद्यः -द्या -द्यं.—(Gross, thick) स्थूलः -ला -लं, घनः -ना -नं; 'palpable darkness,' घनान्धकारः.—(Plain, clear) व्यक्तः -क्ता -क्तं, स्पष्टः -ष्टा -ष्टं, प्रत्यक्षः -क्षा -क्षं, सुग्राह्यः &c.

Palpably, *adv.* व्यक्तं, सुव्यक्तं, स्पष्टं, सुस्पष्टं, प्रत्यक्षतस्, प्रत्यक्षेण, स्फुटं, प्रादुस्.

To palpitate, *v. n.* स्पन्द् (c. 1. स्पन्दते -न्दितुं), प्रतिस्पन्द्, परिस्पन्द्, कम्प् (c. 1. कम्पते -म्पितुं), विकम्प्, वेप् (c. 1. वेपते -पितुं), स्फुर् (c. 6. स्फुरति -रितुं), क्षुभ् (c. 4. क्षुभ्यति, क्षोभितुं), उच्छ्वस् (c. 2. -श्वसिति -तुं, rt. श्वस्), पिठ् (c. 1. पेठति -ठितुं); 'my heart palpitates,' वेपते मे हृदयं.

Palpitating, *part.* स्पन्दमानः -ना -नं, वेपमानः -ना -नं, कम्पमानः -ना -नं, स्फुरितः -ता -तं, उच्छ्वासी -सिनी -सि (न्).

Palpitation, *s.* स्पन्दनं, प्रतिस्पन्दनं, वेपनं, वेपथुः *m.*, कम्पः -म्पनं,

स्फुरणं, क्षोभः; 'of the heart,' हृदयवेपनं, हृदयकम्पः, हृत्कम्पः.

Palsical, palsied, *a.* पक्षाघाती -तिनी -ति (न्), पक्षवायुग्रस्तः -स्ता -स्तं कम्पवायुग्रस्तः &c., अङ्गग्रहवायुग्रस्तः &c.

Palsy, *s.* (Paralysis) स्तम्भः, संस्तम्भः, विष्टम्भः, अवष्टम्भः, स्वापः, सुप्तिः *f.* —(Hemiplegia) पक्षाघातः, पक्षवायुः *m.*, अङ्गग्रहवायुः *m.*, अङ्गग्रहः, भङ्गः.—(Shaking palsy) कम्पवायुः *m.*, कम्पवातः.

To palsy, *v. a.* स्तम्भं or स्वापं जन् (c. 10. जनयति -यितुं), स्तम्भीकृ, जडीकृ.

Paltriness, *s.* तुच्छता, लघुता, लाघवं, असारता, कुत्सितत्वं, क्षुद्रता.

Paltry, *a.* तुच्छः -च्छा -च्छं, लघुः -घुः -घ्वी -घु, क्षुद्रः -द्रा -द्रं, कुत्सितः -ता -तं, असारः -रा -रं, सारहीनः -ना -नं, तृणप्रायः -या -यं, लघुप्रभावः -वा -वं, क्षुल्लकः -का -कं, अपकृष्टः -ष्टा -ष्टं, अधमः -मा -मं, or expressed by कु prefixed; as, 'a paltry action,' कुकर्म्म *n.* (न्).

To pamper, *v. a.* परमान्नेन तृप् (c. 10. तर्पयति -यितुं) or सन्तृप् or पॄ (c. 10. पूरयति -यितुं) or परिपॄ or भृ (c. 3. बिभर्त्ति, c. 1. भरति, भर्त्तुं) or संवृध् (c. 10. -वर्धयति -यितुं) or पुष् (c. 10. पोषयति -यितुं) or आप्यै (c. 10. -प्याययति -यितुं), अत्यन्तं पुष् or आप्यै.

Pampered, *p. p.* अतिपुष्टः -ष्टा -ष्टं, सुपुष्टः &c., अतिपोषितः -ता -तं, सुपोषितः &c., दृढपुष्टः &c., परमान्नपोषितः &c., परमान्नभृतः &c.

Pampering, *s.* अतिपोषणं, परमान्नपोषणं, परमान्नसंवर्धनं, भरणं, अतिभरणं, परमान्नभृतिः *f.*, आप्यायनं, सुपोषणं.

Pamphlet, *s.* पत्रिका, पुस्तकं -की, क्षुद्रपुस्तकं, लघुपुस्तकं.

Pan, *s.* पात्रं, भाजनं, भाण्डं, आधारः, कटाहः, पिठरः, स्थाली, कन्दुः -न्दूः *m.f.*, खेदनी -निका; 'frying pan,' अम्बरीषं, भ्राष्टः, ऋजीषं.

Panacea, *s.* सर्व्वरोगशमकभेषजं, सर्व्वरोगघ्नभेषजं, सर्व्वरोगप्रतीकारकम् औषधं, सर्व्वौषधिचूर्णं, त्रैलोक्यचिन्तामणिः *m.*

Pan-cake, *s.* कन्दुपक्वपिष्टकः, अम्बरीषपक्वपिष्टकः, भृष्टपिष्टकः.

Pancratic, pancratical, *a.* मल्लयुद्धकुशलः -ला -लं, मल्लयुद्धनिपुणः -णा -णं.

Pancratium, *s.* मल्लयुद्धं, मल्लक्रीडा, बाहुयुद्धं, बाहुप्रहरणं.

Pandect, *s.* विद्यासङ्ग्रहः.—(Of laws) संहिता, स्मृतिशास्त्रसंहिता.

Pandemic, *a.* सार्व्वलौकिकः -की -कं, सर्व्वव्यापकः -का -कं, सर्व्वजनव्यापकः &c., सार्व्वजनिकः -की -कं, सर्व्वजनीनः -ना -नं, विश्वजनीनः -ना -नं, सर्व्वसाधारणः -णी -णं.

Pandemonium, *s.* पिशाचसभं, सर्व्वपिशाचसभा, सर्व्वभूतसभा.

Pander, *s.* विटः, कुट्टनी *m.* (न्), रतताली *m.* (न्), सञ्चारकः, दूतः, वेश्याचार्य्यः, कौट्टिन्यकर्त्ता *m.* (र्तृ), सन्धानकर्त्ता *m.*, लाम्पट्यप्रयोजकः.

To pander, *v. a.* or *n.* परकामान् सम्पद् (c. 10. -पादयति -यितुं) or प्रयुज् (c. 10. -योजयति -यितुं), कौट्टिन्यं कृ, लाम्पट्यं प्रयुज्.

Pandering, panderism, *s.* कौट्टिन्यं, विटकर्म्म *n.* (न्), लाम्पट्यप्रयोजकत्वं.

Pandiculation, *s.* जृम्भणं, विजृम्भणं, हाफिका. *See* Yawning.

Pandit, *s.* (Learned Brahman) पण्डितः. *See* Pundit.

Pane, *s.* (Of glass) काचशिला, काचमयसमानशिला.

Panegyric, *s.* स्तुतिवादः, स्तुतिवाक्यं, प्रशंसावादः, स्तुतिपाठः, वन्दिपाठः, स्तुतिः *f.*, गुणस्तुतिः *f.*, गुणोत्कीर्त्तनं, गुणगानं, स्तोत्रं, श्लाघा, वन्दना, वर्णना. *See* Encomium.

Panegyrical, *a.* स्तुतिमयः -यी -यं, प्रशंसकः -का -कं, प्रशंसाकरः -री -रं, गुणवर्णकः -का -कं, गुणश्लाघी -घिनी -घि (न्). *See* Laudatory.

Panegyrist, *s.* स्तुतिपाठकः, वन्दी *m.* (न्), वन्दिजनः, स्तोता *m.* (तृ), वर्णकः.

Panel, *s.* (Of a door) कपाटः -टी -टं, द्वारकपाटः, कवाटः -टा -टं, द्वारशाखा.—(Whole body of the jury) शापितप्रमाणपुरुषगणः, स्येयगणः.

Pang, *s.* व्यथा, यातना, वेदना, शूलः -लं, अतिवेदना, अतिव्यथा; 'of childbirth,' गर्भवेदना, प्रसववेदना.

Panic, *s.* (Sudden fright) आकस्मिकभयं, आकस्मिकत्रासः, अकस्मात्-त्रासभयं, निष्कारणभयं, विद्रवः, विभ्रमः, त्रासः; 'general panic in a country,' पाकः; 'struck with panic,' भयविप्लुतः -ता -तं; 'as an army,' विप्लुः -प्लुा -प्लुं, विप्लुतः -ता -तं, समुत्पिञ्जः &c., समुत्पिञ्जलः &c.—(Sort of seed or grain) अणुः *m.*, प्रियङ्गुः -ङ्गूः *f.*, कङ्गुः -ङ्गूः *f.*, कङ्गुनी; 'field of it,' अणव्यं.

Pánini, *s.* (The grammarian) पाणिनिः *m.*, पाणिनः, दाक्षीपुत्रः, दाक्षेयः, सालातुरीयः, शालातुरीयः; 'connected with him,' पाणिनीयः -या -यं.

Panjáb, *s.* (The country) पञ्चनदः, वाहीकः; 'the Chenáb river,' चन्द्रभागा.

Pannel, *s.* (Kind of saddle) पर्य्याणं.—(Of a door). *See* Panel.

Pannier, *s.* (Basket) करण्डः, डलकं, डल्लकं, कण्डोलः, पेटकः.

Panoplied, *a.* संवर्मितः -ता -तं, कवचसंवृतः -ता -तं, कृतसन्नाहः -हा -हं.

Panoply, *s.* सर्व्वाङ्गकवचः -चं, सर्व्वशरीरवर्म्म *n.* (न्), सर्व्वगात्रत्राणी.

Panorama, *s.* चतुर्दिग्दर्शकचित्रं, सर्व्वदिग्दर्शकचित्रं.

To pant, *v. n.* (Palpitate) स्पन्द्, परिस्पन्द्, कम्प्, विकम्प्, वेप्, उच्छ्वस्.—(Have the breast heave with difficult respiration) कृच्छ्रेण श्वस् (c. 2. श्वसिति -तुं), कृच्छ्रेण श्वासप्रश्वासं कृ, उद्धमं कृ, उद्ध्मा (c. 1. -धमति -ध्मातुं), प्राणकृच्छ्रोपहतः -ता -तं भू.—(Long for) अभिलष्, आकांक्ष्, अभिवाञ्छ् &c.

Pant, *s.* स्पन्दनं, प्रतिस्पन्दनं, कम्पः -म्पनं, वेपनं, उद्धमः.

Pantaloon, *s.* (Kind of trowsers) अशिथिलकञ्चुकविशेषः, जङ्घाच्छादनयोग्यम् अशिथिलवस्त्रं, जङ्घापरिधानं.—(Buffoon) भण्डः, विदूषकः.

Pantheism, *s.* जगदीश्वरमतं, जगदीश्वरवादः, अद्वैतमतं, अद्वैतवादः, अभेदमतं, अभेदवादः, विराट्स्वरूपमतं.

Pantheist, *s.* जगदीश्वरवादी *m.* (न्), जगदीश्वरमतावलम्बी *m.*, जगदीश्वरमताश्रयी *m.*, अद्वैतवादी *m.*, अभेदवादी *m.*, अद्वैतमतावलम्बी *m.*

Pantheistic, pantheistical, *a.* जगदीश्वरमतसम्बन्धी -न्धिनी &c., जगदीश्वरमतविषयकः -का -कं, अद्वैतमतसम्बन्धी &c., अद्वैतमतविषयकः &c.

Pantheon, *s.* सर्व्वदेवतामन्दिरं, सर्व्वदेवालयं, सर्व्वदेवतायतनं, सर्व्वदेवभवनं.

Panther, *s.* द्वीपी *m.* (न्), अतिक्रूरशीलो वनमार्जारभेदः or क्षुद्रव्याघ्रभेदः.

Panting, *s.* उच्छ्वासः, दुःश्वासः, श्वासकृच्छ्रं, प्राणकृच्छ्रं, उद्धमः, स्पन्दनं.

Panting, *part.* उच्छ्वसन् -सन्ती &c., कृच्छ्रेण श्वसन् &c., स्पन्दमानः -ना -नं, कम्पमानः &c. *See* Gasping, Heaving.

Pantomime, *s.* (One that represents by dumb show) मुग्धाभिनयी *m.* (न्), मुग्धाभिनेता *m.* (तृ), मुग्धनर्त्तकः, मुग्धनाटकः, केवलाभिनयी *m.* (न्), हस्तपादादिसञ्चालनमात्रेण अभिनयी *m.* or अभिनेता *m.*, रङ्गावतारी *m.*—(Representation by dumb show) मुग्धनाट्यं, मुग्धनृत्यं, मुग्धाभिनयः, हस्तपादादिसञ्चालनं, हस्तपादादिसञ्चालनाभिनयः, लास्यं, ताण्डवं.

Pantomime, pantomimic, *a.* मुग्धनाट्यसम्बन्धी &c., मुग्धाभिनयविषयकः &c.

Pantry, *s.* कोष्ठः -ष्ठकं, खाद्यद्रव्यागारः -रं, खाद्यकोष्ठकं, कुटिः -टी *m.f.*

Pap, *s.* (Nipple) स्तनाग्रं, स्तनमुखः -खं, कुचाग्रं.—(Breast) स्तनः, कुचः, कुचतटं; 'the paps,' स्तनौ *m.* du.—(Soft food for infants) बालकपोषणयोग्यं मृद्वन्नं, मृद्वाहारः, मृदुखाद्यं, बालकाहारः.

Papa, *s.* पिता *m.* (तृ), तातः &c. *See* Father.

Papal, *a.* रोमीयधर्म्माधिपतिसम्बन्धी -न्धिनी &c., रोमीयधर्म्माध्यक्षसम्बन्धी.

Papaverous, *a.* खसखसगुणोपेतः -ता -तं, खसखसतुल्यगुणः -णा -णं.

Paper, *s.* (The substance) कार्पासं, कार्पासिकपत्रं.—(For writing) पत्रं, लिखनपत्रं, लेखनपत्रं, लेख्यपत्रं.—(Written sheet) पत्रं, पत्रकं,

पत्रिका, लेख:.—(Document, deed) पत्रं -त्री, लेख्यं, लेख्यपत्रं, साधनपत्रं, लेख्यप्रसङ्गः.

PAPER, *a.* (Made of paper) कार्पासिकः -की -कं, कार्पासः -सी -सं.

To PAPER, *v. a.* चित्रकार्पासेन or कार्पासिकपत्रेण छद् (c. 10. छादयति -यितुं) or आछद् or आस्तृ (c. 5. -स्तृणोति -स्तरितुं, -रीतुं).

PAPER-MAKER, *s.* कार्पासकृत्, कार्पासकारः, कार्पासिकपत्रकृत्.

PAPESCENT, *a.* मज्जामयः -यी -यं, समज्जः -ज्जा -ज्जं.

PAPILIO, *s.* चित्रपतङ्गः, पतङ्गः. *See* BUTTERFLY.

PAPILLARY, PAPILLOUS, *a.* स्तनाग्रसदृशः -शी -शं, कुचाग्रोपमः -मा -मं.

PAPIST, *s.* रोमीयधर्म्मावलम्बी *m.* (न्), रोमीयधर्म्मनिष्ठितः, रोमीयधर्म्मस्थः. रोमीयमतधारी *m.* (न्).

PAPPY, *a.* मज्जामयः -यी -यं, मज्जावान् -वती -वत् (त्), मज्जागुणकः -का -कं, समज्जः -ज्जा -ज्जं, मृदुः -द्वी -दु, आर्द्रमृदुः &c., कोमलः -ला -लं.

PAPULÆ, *s. pl.* दद्रुः *m.*, खर्ज्जूः *f.*, वरटी, वरण्डकः, रक्तस्फोटः.

PAPULOSE, PAPULOUS, *a.* दद्रुणः -णा -णं, सस्फोटः -टा -टं.

PAR, *s.* (State of equality) समता, साम्यं, समभावः, समानता, तुल्यता, साम्यता; 'that is at par,' समानकक्षः -क्षा -क्षं, समकक्षः &c.; 'that is above par,' अधिकोत्तरः -रा -रं.

PARABLE, *s.* दृष्टान्तः, दृष्टान्तरूपकथा, उत्प्रेक्षा, उपमा, समासोक्तिः *f.*, समासोक्तिरूपकथा, निदर्शनं, उदाहरणं, हितोपदेशः.

PARABOLA, *s.* (A conic section) समकलच्छिन्नं.

PARABOLIC, PARABOLICAL, *a.* (Allegorical, expressed by parable) दृष्टान्तरूपः -पा -पं, दृष्टान्तोक्तः -क्ता -क्तं, दार्ष्टान्तिकः -की -कं.—(Having the form of a parabola) समकलच्छिन्नाकारः -रा -रं.

PARABOLICALLY, *adv.* दृष्टान्तरूपेण, दृष्टान्ततस्, दृष्टान्तपूर्व्वं.

PARACENTRIC, PARACENTRICAL, *a.* मण्डलत्यागी -गिनी -गि (न्).

PARADE, *s.* (Ostentation) कौतुकं, दम्भः, आडम्बरं. *See* the word. —(Place for military exercise) खलूरिका, प्रेक्षणं.—(Military exercise) अस्त्रशिक्षा, योग्या, युद्धाभ्यासः, शस्त्राभ्यासः, सैन्यव्यायामः. —(Procession) यात्रा, सैन्ययात्रा.

To PARADE, *v. a.* (Exhibit ostentatiously) दम्भार्थं or कौतुकार्थं or प्रेक्षार्थं दृश् (c. 10. दर्शयति -यितुं) or प्रदृश् or प्रकाश्.—(Marshal soldiers) सैन्यान् अस्त्रशिक्षार्थं or युद्धाभ्यासार्थं व्यूह् or विन्यस्.

To PARADE, *v. n.* (Go about in military procession) प्रेक्षार्थं or अस्त्रशिक्षार्थं यात्रां कृ.

PARADIGM, *s.* (Example) प्रतिमा, प्रतिरूपं, उपमा.—(In grammar) निदर्शनार्थप्रदर्शितविभक्तिः *f.*, निदर्शनार्थप्रदर्शितक्रियारूपं.

PARADISE, *s.* स्वर्गः, आनन्दलोकः, आनन्दभुवनं, नन्दनं, सुखलोकः, सुखभुवनं, सुखाधारः, सुखदं, सुखधाम *n.* (न्), अमर्त्यभुवनं, स्वर्लोकः, त्रिदिवः -वं, दिवं, द्यौः *f.* (दिव्), द्यौ *f.* (द्यो), नाकः, अपरलोकः, ताविषः, द्युभुवः, वैकुण्ठं; the last word refers properly to the paradise of Vishnu, that of Indra is स्वर्गः.

PARADISIACAL, *a.* स्वर्गीयः -या -यं, स्वर्ग्यः -र्ग्या -र्ग्यं, स्वर्गयोग्यः -ग्या -ग्यं, आनन्दलोकसम्बन्धी -न्धिनी &c., स्वर्गसम्बन्धी &c.

PARADOX, *s.* लोकविरुद्धाभासः, असत्याभासः, अयुक्ताभासः, लोकविरुद्धमतं.

PARADOXICAL, *a.* (Said of opinions) लोकमतविरुद्धः -द्धा -द्धं, अयुक्ताभासरूपः -पा -पं.—(Of persons) लोकविरुद्धाभासवादी *m.* (न्), लोकविरुद्धाभाससेवी *m.* (न्), लोकविरुद्धमतावलम्बी *m.*, अयुक्ताभासवादी *m.*

PARAGON, *s.* (Model) प्रतिमा, प्रमाणं, प्रमाता *m.* (तृ), उपमा, प्रतिरूपं, उत्तमप्रमाणं.—(An unequalled object) अनुपमवस्तु *n.*, निरुपमवस्तु *n.*, अद्वितीयवस्तु *n.*, अप्रतिरूपवस्तु.

PARAGRAPH, *s.* परिच्छेदः, विच्छेदः, खण्डः, लेखपरिच्छेदः, लेखखण्डः, वाक्यपरिच्छेदः, वाक्यखण्डः, वाक्यं.

PARALIPOMENA, *s.* शेषग्रन्थः, उपग्रन्थः, परिशिष्टं, उत्तरखण्डः.

PARALLAX, *s.* (In astronomy) शीघ्रः, लम्बनं, स्थानभेदः.

PARALLEL, *a.* (In geometry) एकदिङ्मुखसमान्तरः -रा -रं, एकदिग्गतसमान्तरः -रा -रं, समान्तरः -रा -रं, सरलसमान्तरः -रा -रं; 'two parallel lines,' एकदिग्गतसमान्तररेखाद्वयं, सरलसमान्तररेखाद्वयं, सरलरेखाद्वयं.—(Like, similar) समः -मा -मं, समानः -ना -नं, तुल्यः -ल्या -ल्यं, सदृशः -शी -शं, अनुरूपः -पा -पं, समभावः -वा -वं, समरूपः -पा -पं.

PARALLEL, *s.* (A line equidistant from another) समान्तररेखा; 'of latitude,' स्वपरिधिः *m.*, अक्षवृत्तं, अक्षांशवृत्तं.—(Likeness, conformity) सादृश्यं, सदृशता, सारूप्यं, अनुरूपता, आनुरूप्यं, समरूपता, समता, साम्यं, समानता.—(Comparison) उपमा, औपम्यं.

To PARALLEL, *v. a.* (Make parallel) समान्तरीकृ, समान्तरं -रां कृ.—(Compare) उपमा, तुल्, साधारणीकृ, समीकृ.—(Correspond, be equal to) समीभू, सदृशीभू, अनुरूपः -पा -पम् अस् or भू.

PARALLELISM, *s.* समान्तरता -त्वं, समान्तरभावः.—(Resemblance) सादृश्यं, सदृशता, अनुरूपता, आनुरूप्यं, समता, तुल्यता.

PARALLELOGRAM, *s.* दीर्घचतुरस्रं, दीर्घचतुर्भुजः, आयतचतुरस्रं, दीर्घचतुष्कोणः, समद्विभुजः, समसमद्विभुजः.

PARALLELOGRAMIC, PARALLELOGRAMICAL, *a.* दीर्घचतुरस्रः -स्रा -स्रं, समद्विभुजः -जा -जं.

PARALLELOPIPED, *s.* (In geometry) समखातः.

PARALOGISM, PARALOGY, *s.* आभासः, सिद्धान्ताभासः, हेत्वाभासः, पक्षाभासः, मिथ्याहेतुः *m.*, अयुक्तिः *f.*

PARALYSIS, *s.* स्तम्भः, अवष्टम्भः, विष्टम्भः, संस्तम्भः, सुप्तिः *f.*, त्वक्सुप्तिः *f.*, स्वापः, जाड्यं; 'of the thigh,' ऊरुस्तम्भः.—(Paralytic stroke) पक्षाघातः, पक्षवायुः *m.*, अर्द्धाङ्गवायुः *m.*, अर्द्धाङ्गं, भङ्गः.

PARALYTIC, PARALYTICAL, *a.* (Affected with paralysis) पक्षाघाती -तिनी -ति (न्), पक्षाघातरोगी &c., पक्षवायुग्रस्तः -स्ता -स्तं, अर्द्धाङ्गरोगी &c., सुप्तत्वक् *m. f. n.* (च्).

To PARALYZE, *v. a.* स्तम्भं जन् (c. 10. जनयति -यितुं), स्तम्भीकृ, स्तम्भ् (c. 5. स्तभ्नोति, c. 9. स्तभ्नाति, c. 10. स्तम्भयति -यितुं), विष्टम्भ्, जडीकृ, जाड्यं कृ, स्वापं जन्.

PARALYZED, *p. p.* स्तम्भितः -ता -तं, स्तम्भीकृतः -ता -तं, जडीकृतः -ता -तं, स्तब्धः -ब्धा -ब्धं, विष्टब्धः &c., अवष्टब्धः &c., निस्तब्धः &c., स्तम्भितः -ता -तं. *See* NUMB, *a.*

PARAMOUNT, *a.* परमः -मा -मं, सर्व्वश्रेष्ठः -ष्ठा -ष्ठं, श्रेष्ठः &c., अधिकः -का -कं, सर्व्वाधिकः &c., प्रमुखः -खा -खं, प्रधान in comp.; 'possessing paramount dominion,' साम्राज्यिकः -की -कं, सार्व्वभौमः -मी -मं; 'paramount sovereign,' सम्राट् *m.* (ज्), सर्व्वेश्वरः, सर्व्वेशः, सर्व्वस्वामी *m.* (न्); 'sway of a lord paramount,' साम्राज्यं.

PARAMOUR, *s.* (Gallant) जारः, उपपतिः *m.*, पापपतिः *m.*, रमणः, विटः, चेटकः.—(Mistress) उपपत्नी, उपपत्नी, जारिणी.

PARAPET, *s.* वक्षःपर्य्यन्तः प्राकारः, भित्तिः *f.*, परिसरः.

PARAPHERNALIA, *s. pl.* (Articles which a wife brings with her) स्त्रीधनं, यौतकं, यौवाहिकं, पारिणाय्यं.—(Appendages, trappings) परिच्छदः, सामग्र्यं, पारिणाह्यं, उपकरणं, व्यञ्जनं.

PARAPHRASE, *s.* टीका, सविस्तरव्याख्या, सविस्तरभावार्थः, सविस्तरार्थकथनं, सविस्तरविवरणं, मूलशब्दविस्तारः, भाष्यं, टिप्पनी.

To PARAPHRASE, *v. a.* विस्तरशस् or विस्तरेण or मूलशब्दविस्तारेण व्याख्या (c. 2. -ख्याति -तुं) or भाषान्तरीकृ or मूलार्थविवरणं कृ or मूलशब्दव्याख्यां कृ, मूलशब्दविस्तारं कृ, मूलशब्दाधिक्यं कृ.

PARAPHRASED, *p. p.* मूलशब्दविस्तारेण व्याख्यातः -ता -तं or विवृतः -ता -तं.

PARAPHRAST, *s.* मूलशब्दविस्तारेण व्याख्याता *m.* (तृ), टीकालेखकः.

PARAPHRASTIC, PARAPHRASTICAL, *a.* अधिकशब्दकः -का -कं, मूलाधिकशब्दकः &c., मूलशब्दविस्ताररूपः -पा -पं, विस्ताररूपः -पा -पं.

PARAPHRASTICALLY, *adv.* मूलशब्दविस्तारेण, मूलशब्दाधिक्यपूर्व्वं.

PARAQUET, PARAQUITO, *s.* क्षुद्रशुकः, अल्पशरीरः कीरभेदः.

PARASITE, *s.* (One who dines with others or sponges on his neighbor) परान्नः, परान्नभोजी *m.* (न्), परान्नभक्षी *m.*, परान्नपुष्टः, परान्नरुचिः *m.*, परपाकरुचिः *m.*, परपिण्डादः, पात्रेसमितः, पीठकेलिः *m.*, पीठमर्द्दः.—(In botany, a plant which attaches itself to others) वृक्षरुहा, तरुरुहा, तरुरोहिणी, तरुभुक् *m.* (ज्), वृक्षादनी, पराश्रया, वन्दा, वन्दाका, वन्दका, जीवन्तिका, आकाशवल्ली, खवल्ली, उपदी.

PARASITIC, PARASITICAL, *a.* (As a plant) वृक्षरुहः -हा -हं, तरुरुहः &c., तरुरोही -हिणी -हि (न्), तरुभुक् *m. f. n.* (ज्), पराश्रयः -या -यं.—(Sponging on others) पराश्रयी &c., परान्नपुष्टः -ष्टा -ष्टं.

PARASOL, *s.* आतपत्रं, आतपवारणं, छत्रं, उष्णवारणः -णं, जनत्रा; 'royal one,' नृपछत्रं, नृपलक्ष्म *n.* (न्).

To PARBOIL, *v. a.* ईषत् क्वथ्, अर्द्धेन क्वथ्, ईषत् स्थाल्यां पच् or श्रा.

PARBOILED, *p. p.* अर्द्धक्वथितः -ता -तं, ईषत्क्वथितः &c., अर्द्धश्राणः -णा -णं.

PARCEL, *s.* (Small bundle) पोटलिका, पोट्टली, कूर्च्चः, वीटिका.—(Portion, part) भागः, विभागः, अंशः, वण्टः -ण्टकः, उद्धारः, भाजितं, खण्डः.—(Quantity) राशिः *m.*, सञ्चयः, निचयः, चयः, सङ्घः, समूहः.—(Number of persons) गणः, समूहः, वृन्दं, मण्डलं.

To PARCEL, *v. a.* विभज् (c. 1. -भजति -ते -भक्तुं), प्रविभज्, विभागशः or अंशांशि कृप् (c. 10. कल्पयति -यितुं) or विन्यस् (c. 4. -अस्यति -असितुं), वण्ट् (c. 10. वण्टयति -यितुं).

PARCENARY, *s.* समांशिता, समाधिकारिता, अविभक्तदायभोगः.

PARCENER, *s.* समांशी *m.* (न्), समभागी *m.*, समाधिकारी *m.*, अंशकः.

To PARCH, *v. a.* तप् (c. 1. तपति, तप्तुं, c. 10. तापयति -यितुं), सन्तप्, दह् (c. 1. दहति, दग्धुं), परिदह्, भ्रज्ज् (c. 6. भृज्जति -ते, भ्रष्टुं, भर्ष्टुं), भृज् (c. 1. भर्जते -र्जितुं).

PARCHED, *p. p.* तप्तः -प्ता -प्तं, उपतप्तः &c., अभितप्तः &c., तापितः -ता -तं, दग्धः -ग्धा -ग्धं, भृष्टः -ष्टा -ष्टं, भ्रष्टः &c., भर्जितः -ता -तं, निर्जलः -ला -लं, शोषितजलः &c.; 'having the throat parched with thirst,' पिपासाक्षामकण्ठः -ण्ठा -ण्ठं.

PARCHMENT, *s.* चर्म्मपटः, चर्म्मपत्रं -त्रकं, क्लिन्नी, क्लिन्निका, लेखनचर्म्म *n.* (न्), लिखनचर्म्म *n.*, चर्म्म *n.*

To PARDON, *v. a.* क्षम् (c. 1. क्षमते -ति, क्षन्तुं), संक्षम्, मुच् (c. 6. मुञ्चति, मोक्तुं), विमुच्, अवसृज्, मृष्, मृज्, अनुज्ञा, सह्, निर्यत्, क्षमां कृ, अपराधक्षमां कृ, अपराधमोचनं कृ, पापमुक्तिं कृ; 'deign to pardon my offence,' अपराधं मे क्षन्तुम् अर्हसि. *See To* FORGIVE.

PARDON, *s.* क्षमा, क्षान्तिः *f.*, मोचनं, विमोचनं, पापमोचनं, अपराधमुक्तिः *f.*, अपराधमोचनं, दोषमुक्तिः *f.*, अपराधक्षमा, अपराधमार्जना -नं, पापमार्जना, निष्कृतिः *f.*, दया, कृपा; 'to beg pardon,' क्षम् (c. 10. क्षमयति -यितुं), क्षमां प्रार्थ्, क्षमस्व or क्षम्यताम् इति वद्.

PARDONABLE, *a.* क्षमव्यः -व्या -व्यं, क्षमणीयः -या -यं, क्षमार्हः -र्हा -र्हं, क्षमायोग्यः -ग्या -ग्यं, क्षमोचितः -ता -तं, सहव्यः -व्या -व्यं, सहनीयः -या -यं, उपेक्षणीयः -या -यं.

PARDONABLY, *adv.* यथाक्षन्तव्यं, यथाक्षमणीयं, यथासहव्यं, क्षमणीयं.

PARDONED, *p. p.* क्षान्तः -न्ता -न्तं, दोषमुक्तः -क्ता -क्तं, दण्डमुक्तः &c., क्षमनुक्तः &c., मुक्तदण्डः -ण्डा -ण्डं, मुक्तदोषः -षा -षं, मुक्तशासनः -ना -नं मुक्तापराधः -धा -धं, दण्डमोचितः -ता -तं.

To PARE, *v. a.* (Clip, chip, cut off) तक्ष् (c. 1. तक्षति -क्षितुं), त्वक्ष् (c. 1. त्वक्षति -क्षितुं), तनूकृ, छिद्, अवछिद्, अवकृत्, कृत्, लू, खण्ड्, खण्डीकृ, विदलीकृ, क्लृप्; 'to pare the nails,' नखखण्डनं कृ, नखरच्छेदनं कृ, नखकल्पनं कृ.—(Peel, skin) त्वच् (nom. त्वचयति -यितुं), निस्त्वचीकृ, त्वक्परिपुटनं कृ, निस्तुषीकृ.

PARED, *p. p.* तष्टः -ष्टा -ष्टं, त्वष्टः &c., तनूकृतः -ता -तं, क्लृप्तः -प्ता -प्तं, छिन्नः -न्ना -न्नं, अवछिन्नः &c., खण्डितः -ता -तं, उल्लिखितः -ता -तं. 'pared nails,' खण्डकः; 'having pared nails,' क्लृप्तनखः -खा -खं.

PAREGORIC, *a.* दुःखशमकः -का -कं, उपशमकः &c., शान्तिदः -दा -दं.

PARENT, *s.* (He or she that produces) जननः *m.* -नी *f.*, जनकः *m.* जनिका *f.*, जनयिता *m.* -त्री *f.* (तृ), जन्मदः, धाता *m.* (तृ), सम्भूः *m.*, जः, पिता *m.*, माता *f.* *See* FATHER, MOTHER. 'Parents,' मातापितरौ *m. du.*, मातरपितरौ *m. du.*, तातजनयित्र्यौ *f. du.*, जनकजनन्यौ *f. du.*; 'parent of all,' विश्वधाता *m.*—(Cause, source) कारणं, हेतुः *m.*, उत्पादकः, जन्महेतुः *m.*, प्रभवः.

PARENTAGE, *s.* जन्म *n.* (न्), जातिः *f.*, वंशः, कुलं, उत्पत्तिः *f.*; 'of royal parentage,' राजवंश्यः -श्या -श्यं, नृपात्मजः -जा -जं, राजवीजी &c.; 'of honorable parentage,' महाकुलः -ला -लं.

PARENTAL, *a.* (Pertaining to parents) मातापितृसम्बन्धी -न्धिनी &c., जननसम्बन्धी &c., पैतृकः -की -कं.—(Becoming parents) मातापितृयोग्यः -ग्या -ग्यं, मातापितृसन्निभः -भा -भं; 'parental affection,' अपत्यस्नेहः, पुत्रस्नेहः, सुतस्नेहः, वात्सल्यं, वत्सलता.

PARENTHESIS, *s.* निवेशितवाक्यं, प्रक्षिप्तवाक्यं, अप्रधानवाक्यं, प्रासङ्गिकवाक्यं, उपवाक्यं, प्रक्षिप्ताप्रधानवाक्यं, अनन्वितवाक्यं.

PARENTHETIC, PARENTHETICAL, *a.* प्रासङ्गिकः -की -कं, अनन्वितः -ता -तं, अप्रधान in comp., मूलवाक्यानन्वितः &c.

PARENTHETICALLY, *adv.* प्रसङ्गतस्, प्रसङ्गक्रमेण, मूलवाक्यानन्वितं.

PARENTLESS, *a.* मातापितृहीनः -ना -नं, मातापितृरहितः -ता -तं.

PARER, *s.* तष्टा *m.* (तृ), त्वष्टा *m.*; 'nail-parer,' नखरच्छेदनी.

PARHELION, *s.* सूर्य्याभासः, मिथ्यासूर्य्यः, कृत्रिमसूर्य्यः.

PARING, *s.* (The act) तक्षणं, त्वक्षणं.—(That which is pared off) तष्टं, तक्षितं, विदलं, शकलं, खण्डः, भिन्नं.

PARISH, *s.* पुरोहिताधीनः प्रदेशः or ग्रामः, धर्म्माध्यापकाधीनो देशः or ग्रामः, पौरोहित्यदेशः, पौरोहित्यभूमिः *f.*; 'parish-priest,' ग्रामयाजकः, ग्रामपुरोहितः.

PARISHIONER, *s.* ग्रामवासी *m.* (न्), ग्रामस्थः, ग्रामेवासी *m.*, ग्रामिकः, ग्रामीयः, पुरोहिताधीनदेशस्थः.

PARITY, *s.* समता, साम्यं, समानता, तुल्यता -त्वं, तौल्यं, साम्यता, समभावः, कक्षा; 'parity of reason,' न्यायसाम्यं, न्यायसमता, समानन्यायत्वं, तुल्यन्यायत्वं; 'by parity of reason,' न्यायसाम्यात्.

PARK, *s.* उद्यानं, राजोद्यानं, क्रीडावनं, क्रीडावाटिका, आक्रीडः -डं, प्रमदवनं, साधारणवनं, साधारणोद्यानं, कृत्रिमवनं, मृगयास्थानं, मृगयालयं, मृगयाभूमिः *f.*; 'open space in a town,' सन्निवेशः, निकर्षणं.

PARKER, PARK-KEEPER, *s.* उद्यानपालः -लकः, उद्यानरक्षकः

PARLANCE, *s.* सम्भाषणं, संवादः, संलापः, आलापः, कथोपकथनं.

To PARLEY, *v. n.* (Confer) सम्भाष्, संवद्, संलप्; 'with an enemy,' युद्धमध्ये शत्रुणा सह सम्भाष्, सन्धिप्रसङ्गं कृ.

PARLEY, *s.* सम्भाषा -षणं, संलापः, वादः, संवादः; 'in war,' युद्धमध्ये शत्रुणा सह सम्भाषा, सन्धिसम्भाषणं, सन्धिप्रसङ्गः.

PARLIAMENT, *s.* विचारसभा, सम्मन्त्रणसभा, वादशाला, संवादशाला, मन्त्रशाला, महासभा, शिष्टसभा, प्रजाप्रतिनिधिसभा.

PARLOR, *s.* आलापशाला, संलापशाला, कथोपकथनशाला, उपवेशनशाला.

PAROCHIAL, *a.* पुरोहिताधीनदेशसम्बन्धी -न्धिनी &c., पौरोहित्यदेशसम्बन्धी &c., ग्रामिकः -की -कं, ग्रामीयः -या -यं, ग्राम्यः -म्या -म्यं.

PARODY, *s.* विनोदार्थानुकरणकविता, हास्यकरणार्थम् अनुकरणकाव्यं.

To PARODY, *v. a.* विनोदार्थं or हास्यकरणार्थं शब्दपरिवर्त्तनं कृ.

PAROLE, PAROL, *s.* वचनं, प्रतिज्ञा, अङ्गीकारः, स्वीकारः, उरीकारः.

PARONOMASIA, PARONOMASY, *s.* श्लेषः, श्लेषवाक्यं, द्व्यर्थवाक्यं.

PARONYCHIA, *a.* नखव्यथः, कुनखः *m.*, चिप्पं, नखरोगः.

PAROTIS, *s.* (The parotid gland) लालाशयः, लालाधारः.

PAROXYSM, *s.* आवेशः, अवतारः -तरणं, आक्रमः -मणं, वेगः; 'of anger,' क्रोधावेशः; 'of lust,' कामावेशः. *See* FIT, *s.*

PARRICIDAL, PARRICIDIOUS, *a.* (Pertaining to parricide) पितृहत्यासम्बन्धी &c., पितृवधविषयकः -का -कं, पितृहत्यारूपः -पा -पं, पितृवधात्मकः -का -कं.—(Committing parricide) पितृघ्नः -घ्नी -घ्नं, पितृघातकः &c.

PARRICIDE, *s.* (One who murders his father) पितृहा *m.* (न्), पितृहन्ता *m.* (न्तृ), पितृघ्नः, पितृघाती *m.* (न्), पितृघातकः, पितृघातुकः,—(Murder of a father) पितृहत्या, पितृवधः, पितृघातः, पितृहिंसा.

PARROT, *s.* शुकः, कीरः, वक्रचञ्चुः *m.*, वक्रतुण्डः, रक्ततुण्डः, चिमिः *m.*, चिरिः *m.*, रक्तपादः, कुमारः, किङ्किरातः, फलाशनः, फलादनः, दाडिमप्रियः, मेधावी *m.* (न्); 'a flock of parrots,' शौकं.

To PARRY, निवृ (c. 10. -वारयति -यितुं), वृ, प्रतिहन् (c. 2. -हन्ति -न्तुं), प्रतिषिध् (c. 1. -षेधति -षेद्धुं), प्रतिघातं कृ, वारणं कृ.

To PARSE, *v. a.* पदभञ्जनं कृ, पदच्छेदं कृ, लिङ्गनिर्देशं कृ, शब्दान्वयनिरूपणं कृ.

PARSEE, *s.* (Persian) पारसीकः, पारसिकः.

PARSIMONIOUS, *a.* अल्पव्ययी -यिनी -यि (न्), व्ययशङ्कितः -ता -तं, व्ययपराङ्मुखः -खा -खं, परिमितव्ययी &c., मितव्ययी &c., कृपणः -णा -णं, अर्पपरः &c. *See* MISERLY.

PARSIMONIOUSLY, *adv.* अल्पव्ययेन, अल्पव्ययपूर्व्वं, सकार्पण्यं, कृपणवत्.

PARSIMONIOUSNESS, PARSIMONY, *s.* अल्पव्ययः, स्वल्पव्ययः, कार्पण्यं, कृपणता -त्वं, व्ययशङ्का, व्ययपराङ्मुखता, परिमितव्ययः, मितव्ययः, दृढमुष्टित्वं.

PARSING, *s.* पदभञ्जनं, पदच्छेदः, शब्दान्वयनिरूपणं, लिङ्गनिर्देशः.

PARSLEY. *s.* (Apium involucratum) अजमोदा.

PARSON, *s.* ग्रामपुरोहितः, ग्रामयाजकः, ग्रामधर्म्माध्यक्षः, ग्रामगुरुः *m.*, ग्रामाचार्य्यः, धर्म्माध्यापकः, उपाध्यायः.

PARSONAGE, *s.* धर्म्माध्यापकगृहं, ग्रामपुरोहिताध्युषितं गृहादि.

PART, *s.* (Portion, piece) भागः, अंशः, खण्डः -ण्डकः, विभागः, शकलः -लं, भिन्नं, भित्तं, भित्तिः *f.*, लवः, दलं, विदलं, अर्द्धः.—(A portion or division considered by itself, but not really separated) देशः, प्रदेशः, उद्देशः, एकदेशः, भागः, अङ्गं, अवयवः; 'part of a wood,' वनैकदेशः, वनोद्देशः.—(Component part, member) अङ्गं, अवयवः; 'inward part,' अन्तरङ्गं.—(Particular division) प्रकरणं, विषयः, अङ्गं; 'minor part,' प्रत्यङ्गं.—(Share, portion allotted) विभागः, भागः, अंशः, उद्धारः, भाजितं, भाज्यं, वण्टः -ण्टकः.—(Interest, concern in) सम्बन्धः, अभिसम्बन्धः.—(Side, party) पक्षः; 'to take one's part,' पक्षं ग्रह् or उद्ग्रह्, पक्षोद्ग्राही or पक्षपाती &c. भू.—(Particular business or duty) कर्म्म *n.* (न्), कार्य्यं, धर्म्मः, स्वकर्म्म *n.*, स्वधर्म्मः, वृत्तिः *f.*, प्रवृत्तिः *f.*, गुणः.—(Character in a drama) भूमिका, वृत्तिः *f.*; 'act the part of a dear friend towards the rival wives,' कुरु प्रियसखीवृत्तिं सपत्नीजने.—(Parts, qualities) गुणाः *m. pl.*, बुद्धिः *f.*—(Parts, region) देशः, प्रदेशः, उद्देशः; 'for the most part,' प्रायस्, प्रायशस्, प्रायेण, भूयस्, भूयिष्ठं, बाहुल्येन, बहुशस्, बहुतरं; 'by parts, in parts,' अंशतस्, भागतस्, भागशस्, अवयवशस्; 'in part, partly,' अंशतस्, भागतस्, किञ्चित्, ईषत्; 'in two parts,' द्विधा; 'in four parts,' चतुर्धा; 'in many parts,' बहुधा; 'in how many parts?' कतिधा; 'in good part,' सानुग्रहं, प्रसन्नं, हितं, प्रियं, अनुकूलं.

To PART, *v. a.* (Disunite, divide, separate) वियुज्, विश्लिष्, भिद्, विभिद्, विच्छिद्, विविच्, पृथक्कृ, शकलीकृ.—(Distribute, divide into shares) विभज्, प्रविभज्, संविभज्, पृथक् पृथग् विभज्, अंश् (c. 10. अंशयति -यितुं), व्यंस् (c. 10. -अंसयति -यितुं), वण्ट्, परिक्लृप्.—(Part the hair) सीमन्त (nom. सीमन्तयति -यितुं).

To PART, *v. n.* (Be separated or divided) वियुज् in pass. (-युज्यते), विभिद् in pass. (-भिद्यते), भिद्, विश्लिष् (c. 4. (-श्लिष्यति -श्लेष्टुं), विच्छिद् in pass., विगम् (c. 1. -गच्छति -गन्तुं), वियुक्तः -क्ता -क्तं भू.—(Open in two, cleave open) स्फुट् (c. 1. स्फोटति, c. 6. स्फुटति -टितुं), दल् (c. 1. दलति -लितुं), विदल्, विदलीभू, विदलितः -ता -तं भू.—(Depart) अपगम्, व्यपगम्, अपया, व्यपया.—(Bid farewell) आमन्त्र्, अनुमन्त्र्.—(Part with) त्यज् (c. 1. त्यजति, त्यक्तुं), परित्यज्. *See* RESIGN.

To PARTAKE, *v. n.* अंशं or भागं ग्रह् (c. 9. गृह्णाति, ग्रहीतुं) or हृ (c. 1. हरति, हर्तुं), भागी -गिनी -गि भू, भज् (c. 1. भजते, भक्तुं), संविभज्, अंशं भुज् (c. 7. भुनक्ति, भुङ्क्ते, भोक्तुं); 'in common with another,' अन्येन सह भुज् or भज्.

PARTAKER, *s.* भागी *m.* -गिनी *f.* (न्), अंशी *m.* -शिनी *f.* (न्), संविभागी &c., भागहारी *m.* (न्), भागहरः, भागग्राही *m.*, अंशहारी *m.*, अंशहरः, अंशग्राही *m.*, अंशकः, अंशभोगी *m.*, सहभोगी *m.*, सहभागी *m.*, भाक् *m.* (ज्) in comp., भुक् *m.* (ज्) in comp.

PARTED, *p. p.* (Separated) वियुक्तः -क्ता -क्तं, विश्लिष्टः -ष्टा -ष्टं, विभक्तः &c., विविक्तः &c., विगतः -ता -तं; 'as the hair,' सीमन्त्यमानः -ना -नं.

PARTERRE, *s.* पुष्पवाटी -टिका, कुसुमाकरः, पुष्पाकरः, उद्यानं.

PARTIAL, *a.* (Inclined to favor one side) पक्षपाती -तिनी -ति (न्), पक्षस्नेही &c., सपक्षस्नेही &c., पक्षानुरागी &c. पक्षोद्ग्राही &c., सपक्षपातः -ता -तं, पक्षपातकृतस्नेहः -हा -हं, सपक्षकृतस्नेहः &c., सङ्गी &c., सङ्गवान् -वती -वत् (त्), सङ्गयुक्तः -क्ता -क्तं, पाक्षिकः -की -कं, —(Not fair) असमः -मा -मं, असमदर्शी &c., असमदृष्टिः -ष्टिः -ष्टि, असमानवृत्तिः -त्तिः -त्ति.—(Not general or total) असार्व्वत्रिकः -की -कं, अपूर्णः -र्णा -र्णं, असम्पूर्णः &c., असकलः -ला -लं, असमग्रः -ग्रा -ग्रं, अव्यापी &c., अव्यापकः -का -कं, अव्याप्तः -प्ता -प्तं, असाधारणः -णा -णी -णं, असर्व्वव्यापी &c., एकाङ्गी &c., एकदेशी &c., एकपक्षी &c., खण्डितः -ता -तं, खण्ड in comp.; 'partial deluge,' खण्डप्रलयः; 'partial shower,' खण्डवृष्टिः *f.*; 'partial eclipse,' खण्डग्रासः.

PARTIALITY, *s.* (Inclination to favor one side) पक्षपातः -तिता, पक्षस्नेहः, सपक्षस्नेहः, पक्षोद्ग्राहः -हित्वं, सङ्गः, स्नेहः, असमता, असमदृष्टिः *f.*, असमबुद्धिः *f.*, पक्षता, पक्षानुरागः.—(Fondness for) स्नेहः, रुचिः *f.*, अभिरुचिः *f.*, अनुरागः, अनुरक्तिः *f.*, प्रणयः, प्रेम *n.* (न्).

PARTIALLY, *adv.* (With undue bias to one side) सपक्षपातं, सपक्षभेदं, पक्षपातपूर्वं, सङ्गपूर्वं, असमं, असमदृष्ट्या.—(Not generally or totally) असर्वतस्, असर्वेण, सकलतस्, सकलशस्, अंशतस्, असकलं, असाकल्येन, अकृत्स्नशस्, असमग्रं, भागतस्, एकदेशेन, एकभागेन, एकाङ्गतस्, अपूर्णं, असम्पूर्णं, खण्ड or खण्डित in comp.; as, 'partially learned,' खण्डविद्यः -द्या -द्यं or खण्डितविद्यः.

PARTIBLE, *a.* विभाज्यः -ज्या -ज्यं, अंशनीयः -या -यं, अंश्यः -श्या -श्यं, अंशयितव्यः -व्या -व्यं, वण्टनीयः -या -यं, पृथक्करणीयः &c.

PARTICIPANT, *a.* भागी -गिनी -गि (न्), संविभागी &c., अंशी &c., समांशी &c., अंशग्राही -हिणी &c., भाक् *m.f.n.* (ज्). *See* PARTAKER.

To PARTICIPATE, *v. n.* भज्, संविभज्, भागं or अंशं ग्रह् or हृ. *See To* PARTAKE.

PARTICIPATION, *s.* अंशग्रहणं, भागग्रहणं, अंशहरणं, भागहरणं, भजनं, संविभागः -गित्वं, संविभजनं, अंशभोगः, अंशप्राप्तिः *f.*, अंशप्रापणं, सहभोगः, सहभुक्तिः *f.*

PARTICIPIAL, *a.* सकालकृदन्तरूपः -पा -पं, कृदन्तधर्मकः -का -कं.

PARTICIPLE, *s.* सकालकृदन्तः, कालबोधककृदन्तः, कृदन्तः.

PARTICLE, *s.* कणः, कणिका, कणिकः, लवः, लेशः, अणुः *m.*, परमाणुः *m.*, कला, काकिणिका, सूक्ष्मः, सूक्ष्माणुः, तिलः, अंशुः *m.*, अंशः, क्षुद्रांशः, सूक्ष्मांशः, तूलं, रेणुः *m.*; 'very minute particle,' अणुरेणुः *m.f.*, अतिसूक्ष्माणुः *m.*, सूक्ष्ममृत्तिका.—(In grammar) अव्ययः -यं, अव्ययशब्दः, निपातः; 'declinable particle,' अङ्गीव्ययं.

PARTICULAR, *a.* (Noting something peculiar or distinctive) विशेष in comp., विशिष्टः -ष्टा -ष्टं, विशेषकः -का -कं, सविशेषः -षा -षं, विशेषवान् -वती -वत् (त्), विशेषणः -णा -णं, अवच्छेदकः -का -कं, विच्छेदकः &c., परिच्छेदकः &c.; 'particular mark,' विशेषलक्षणं; 'particular duty,' विशेषधर्मः; 'particular condition,' दशाविशेषः; 'at particular times,' विशेषकाले, कालविशेषे.—(Distinct individual) विशिष्टः &c., विशेष in comp., व्यक्तः -क्ता -क्तं, व्यक्तिकः -का -कं, पृथग्व्यक्तिकः &c., पृथगात्मकः &c., उद्दिष्टः -ष्टा -ष्टं, उद्देशकः -का -कं, भिन्नः -न्ना -न्नं, विविक्तः &c.; 'particular person,' अमुकजनः, अमुकव्यक्तिः *f.*—(Not general) असाधारणः -णा -णी -णं, असामान्यः -न्या -न्यं, अव्यापी -पिनी -पि (न्), अव्यापकः -का -कं, अव्याप्यः -प्या -प्यं.—(Not common) अप्राकृतः -ता -तं, अलौकिकः -की -कं, अप्रसिद्धः -द्धा -द्धं.—(Special, more than ordinary) विशेष in comp., विशेषकः &c., अधिकोत्तरः -रा -रं, लोकोत्तरः &c.; 'particular rule,' विशेषविधिः *m.*; 'particular occasion,' समयविशेषः.—(Odd, singular) विलक्षणः -णा -णं, अपूर्वः -र्वा -र्वं, अलौकिकः -की -कं.—(Minute, attentive to particulars, strict) सूक्ष्मदर्शी -र्शिनी &c., सूक्ष्मदृष्टिः -ष्टिः -ष्टि, सूक्ष्मः -क्ष्मा -क्ष्मं.

PARTICULAR, *s.* विशेषः, अवच्छेदः, व्यवच्छेदः, विच्छेदः.—(Single or distinct point) अर्थः, विषयः, प्रकरणं, विशेषः; 'the particulars of a story,' वृत्तान्तः; 'he told all the particulars,' सर्ववृत्तान्तम् अकथयत्; 'in particular,' विशेषतस्.

PARTICULARITY, *s.* (Distinct notice of particulars) एकैकशो निर्देशः or समुद्देशः or उद्देशः, विशेषकथनं, सर्ववृत्तान्तकथनं, विशेषनिर्देशः, अवच्छेदः.—(Individuality) व्यक्तता, अव्याप्तिः *f.*, अव्यापकत्वं, असाधारणता.—(Distinctness) भिन्नता, व्यक्तिः *f.*, पार्थक्यं, विशिष्टता.—(Detail) विवरणं, विस्तारः.

PARTICULARIZATION, *s.* विशेषवर्णनं -ना, विशेषनिर्देशः, विशेषकथनं, सर्ववृत्तान्तकथनं, समुद्देशः, अवच्छेदः, परिसंख्या -ख्यानं.

To PARTICULARIZE, *v. a.* एकैकशो निर्दिश् (c. 6. -दिशति -देष्टुं) or उद्दिश् or समुद्दिश् or कथ् (c. 10. कथयति -यितुं) or वर्ण् (c. 10. वर्णयति -यितुं), विशेषवर्णनं कृ, विशेषनिर्देशं कृ, विशेषकथनं कृ, विशेष (nom. विशेषयति -यितुं), विशिष् (c. 7. -शिनष्टि -शेष्टुं).

PARTICULARIZED, *p. p.* एकैकशो निर्दिष्टः -ष्टा -ष्टं or समुद्दिष्टः &c. or उद्दिष्टः &c. or कथितः -ता -तं, विशेषितः &c., व्यवच्छिन्नः -न्ना -न्नं.

PARTICULARLY, *adv.* (In an especial manner) विशेषतस्, विशेषेण, सविशेषं, मुख्यशस्, प्रधानतस्.—(Distinctly, severally) व्यक्तं, विविक्तं, पृथक्, अवयवशस्.—(Minutely) अतिसूक्ष्मत्वेन.

PARTING, *s.* (Separation) वियोगः, विप्रयोगः, विगमः, विरहः, विश्लेषः, प्रविश्लेषः, विप्रलम्भः, भेदः, विभेदः, विभागः, प्रविभागः, पृथग्भावः, पृथक्त्वं, अपगमः.—(Of the hair) सीमन्तः.

PARTING, *a.* (Given at parting) प्रस्थानिकः -की -कं, प्रास्थानिकः -की -कं, प्रस्थान or प्रयाण in comp.; as, 'a parting embrace,' प्रस्थानालिङ्गनं.

PARTISAN, *s.* पक्षपाती *m.* (न्), सपक्षः, एकपक्षः, पक्षकः, पक्षधारी *m.*, पक्षचरः, पक्षावलम्बी *m.* (न्), पक्षः, पार्श्वकः, पार्श्विकः, सहोत्थायी *m.* (न्), अर्थी *m.*, आनुग्राहकः, सङ्गी *m.*, अनुषङ्गी *m.* (न्).

PARTISANSHIP, *s.* पक्षपातिता, पक्षपातः, पक्षधारणं -रिता, पक्षावलम्बनं.

PARTITION, *s.* (Separation) परिच्छित्तिः *f.*, परिच्छेदः. *See* PARTING, *s.*—(Division of shares) विभागः, विभागकल्पनं -ना, भागकरणं, भागः, अंशनं, उद्धारः, उद्धारविभागः, वण्टनं.—(That by which separation is made, a wall, &c.) भित्तिः *f.*, भित्तिका, व्यवधानं, व्यवधा, सन्धिः *m.*

To PARTITION, *v. a.* (Divide) विभिद्, भिद्, विच्छिद्, परिच्छिद्, छिद्, विभज्, पृथक्कृ.—(Distribute into shares) विभज्, प्रविभज्, संविभज्, अंश्, व्यंस्, अंशांशि दा or कॢप् or परिकॢप्, वण्ट्, वण्टनं कृ.

PARTITIONED, *p. p.* विभक्तः -क्ता -क्तं, प्रविभक्तः &c., संविभक्तः &c., अंशितः -ता -तं, परिकल्पितः &c., उद्धृतः &c., कृतवण्टनः -ना -नं.

PARTLY, *adv.* अंशतस्, भागतस्, किञ्चित्, ईषत्, कियत्, कियत्पर्यन्तं, अल्पं, अल्पमात्रं.

PARTNER, *s.* सहायः, सहकारी *m.* (न्), सङ्गी *m.* (न्), सम्भूयकारी *m.*, अंशी *m.*, समांशी *m.*, संसर्गी *m.*, अंशग्राही *m.*, अंशभोगी *m.*, सहभोगी *m.*, सहभागी *m.*, सहवर्त्ती *m.*, भागी *m.*, प्रतियोगी *m.*, उपसङ्गी *m.*, अनुषङ्गी *m.*, सखा *m.* (खि), पक्षकः.—(Partner of joys and sorrows, as a husband or wife) समदुःखसुखः -खा. *See* HUSBAND, WIFE, MATE, &c.

PARTNERSHIP, *s.* समांशिता -त्वं, सहायता, सम्भूयकारिता -त्वं, सम्भूयसमुत्थानं, संसर्गिता -त्वं, प्रतियोगिता, सहकारिता.

PARTRIDGE, *s.* तित्तिरः, तित्तिरिः *m.*, चकोरः -रकः, कृकणः, क्रकणः, क्रकरः, कपिञ्जलः, टिट्टिभः; 'flock of partridges,' तैत्तिरं.

PARTURIENT, *a.* आसन्नप्रसवा, आसन्नप्रसववेदना, प्रसवोन्मुखा, उपस्थितप्रसवकाला, आसन्नप्रसवकाला.

PARTURITION, *s.* प्रसवः, प्रसूतिः *f.*, सूतिः *f.*, सूः *f.*, सूत्या, जननं, उत्पादनं.

PARTY, *s.* (Side, cause) पक्षः, मतं; 'one's own party,' आत्मपक्षः, [illegible]ः; 'belonging to one's own party,' स्वपक्षावलम्बी *m.*, [illegible], आत्मपक्षधारी *m.* (न्); 'one of the opposite party,' विपक्षः, प्रतिपक्षः; 'attachment to a party,' पक्षपातः. *See* PARTIALITY, PARTISANSHIP.—(Number of persons associated in opposition to others) पक्षः, सपक्षिणः *m. pl.*, सपक्षिणां गणः

or संसर्गः or समूहः or सङ्घातः or सङ्घः, शाखा.—(One of two litigants) वादी *m.* (न्), अर्थी *m.*—(Set of people) गणः, पंक्तिः *f.*, समूहः, सङ्घः, सङ्घातः, मण्डलं, दलं; 'a party of men,' पुरुषगणः, जनसमूहः; 'of soldiers,' सैन्यदलं; 'of rogues,' धूर्त्तमण्डलं.—(Assembly) सभा, पंक्तिः *f.*, समाजः, रासेरसः.—(Convivial party) सहभोजनं, सम्भोजनं, सहपानं, सम्प्रीतिः *f.*, उत्सवतालं.—(Person particularized) विवक्षितजनः, व्यक्तिः *f.*, मनुष्यः, जनः, विवक्षितमनुष्यः.—(One concerned or interested) सम्बन्धी *m.* (न्), भागी *m.*, अंशी *m.*

PARTY, *a.* पक्ष in comp., पाक्षिकः -की -कं, पाक्षः -क्षी -क्षं.

PARTY-COLORED, *a.* नानावर्णः -र्णा -र्णं, नानारङ्गः -ङ्गा -ङ्गं, चित्रविचित्रः -त्रा -त्रं, विचित्रवर्णः &c., विचित्ररङ्गः &c.

PARTYISM, *s.* पक्षपातिता. *See* PARTISANSHIP, PARTIALITY.

PARTY-MAN, *s.* पक्षपाती *m.* (न्), पक्षकः, पार्श्विकः. *See* PARTISAN.

PARTY-WALL, *s.* भित्तिः *f.*, भित्तिका, कुड्यं -ड्यकं. *See* PARTITION.

PÁRVATÍ, *s.* (The goddess Durgá, the wife of Śiva and mother of Kártikeya and Ganeśa, called Párvatí in her capacity of daughter of Himála, the sovereign of the snowy mountains. She has many names, some of which will be found under the head of Bhavání and Durgá. They are here all collected together) पार्व्वती, हैमवती, हिमवत्सुता, हिमशैलजा, हिमजा, देवी, महादेवी, उमा, दुर्गा, काली, चण्डी, चण्डिका, कालिका, भवानी, गौरी, मङ्गलागौरी, सर्व्वमङ्गला, भैरवी, भद्रकाली, रुद्राणी, सर्व्वाणी, ईश्वरी, शिवा, मृडानी, अम्बा, अम्बिका, जगदम्बा, जगन्माता *f.* (तृ), दक्षजा, श्यामा, भगवती, ज्येष्ठागौरी, महामाया, शाकम्भरी, कात्यायनी, अपर्णा, शाम्भवी, शाबरी, षष्ठी.

PARVENU, *s.* (An upstart) आगन्तुकः, आगन्तुः *m.*

PASQUINADE, *s.* निन्दालेखः, निन्दार्थकलेखः, उपहासककविता.

To PASS, *v. n.* (Move, go) गम्, या, चल्, चर्, सृ, इ &c.—(Be spent, go on, as time, &c.) वृत् (c. 1. वर्त्तते -र्त्तितुं), प्रवृत्, गम्.—(Gain currency) प्रचलीभू, प्रचलितः -ता -तं भू, प्रचल्, प्रचर्. (Be enacted) सिध् (c. 4. सिध्यति, सेद्धुं), सिद्धीभू, निष्पन्नीभू, व्यवस्थापितः -ता -तं भू.—(Be approved) सम्मतः -ता -तं भू.—(Occur, come to pass) उपस्था, समुपस्था, उपपद्, सम्पद्, उपपन्नः -न्ना -न्नं भू, आपत्, सम्भू, संवृत्, संवृत्तः -त्ता -त्तं भू, आगम्, उपागम्, घट्.—(Be transferred) संक्रम् (c. 1. -क्रामति -क्रमितुं), उपसंक्रम्.—(Pass away, disappear, fade away) नश्, प्रणश्, क्षि, प्रली, विली, प्रविली, तिरोगम्, तिरोभू, क्षर्.—(Pass away, as time, &c.) अतिक्रम्, अतिवृत्, अती, व्यती, समती, गम्, 'six months passed away,' षण्मासम् अत्यवर्त्तत; 'six seasons passed away,' ऋतूनां षट् समत्ययुः; 'let not the moment pass away,' नातिवर्त्तेत क्षणं.—(Pass by) अतिक्रम्, अती, अतिगम्, अतिचर्, अतिया, समतिया.—(Pass on) प्रया, प्रगम्, प्रवृत्, प्रसृ, गम्, या; 'jokes pass,' प्रवर्त्तन्ते हासः.—(Pass over, cross) तॄ, अतितॄ, निस्तॄ, अतिक्रम्, अती.—(Let pass, omit) त्यज्, परित्यज्, उत्सृज्, विसृज्, उपेक्ष्; 'let it pass,' यातु; 'that which passes in the mind,' मनोगतं, अन्तर्गतं मनः.

To PASS, *v. a.* (Go over, through, beyond, cross or pass over) तॄ (c. 1. तरति -रितुं -रीतुं), अतितॄ, सन्तॄ, निस्तॄ, उत्तॄ, समुत्तॄ, अतिक्रम्, व्यतिक्रम्, अती, व्यती, अतिगम्, पारं गम् (c. 1. गच्छति, गन्तुं); 'to pass a river,' नदीपारं गम्.—(Spend time, &c.) गम् (c. 10. गमयति -यितुं), परिगम्, वृत् (c. 10. वर्त्तयति -यितुं), नी (c. 1. नयति, नेतुं), वह् (c. 10. वाहयति -यितुं), विहृ (c. 1. -हरति -ते -हर्त्तुं), विवस् (c. 1. -वसति -वस्तुं); 'eight years were passed,' अष्टौ समाः परिगमिताः; 'he passes his days,' दिवसानि गमयति; 'he passed the night,' निशां निनाय; 'passing the night there,' तत्र रात्रिं उष्य.—(Cause to move) चल् (c. 10. चालयति -यितुं), सञ्चल्, सञ्चर् (c. 10. -चारयति -यितुं), स्थानान्तरीकृ.—(Transfer) संक्रम् (c. 10 -क्रामयति -यितुं), उपसंक्रम्.—(Enact) सिद्धं -द्धां कृ, सिद्धीकृ, निष्पन्नं -न्नां कृ, निष्पद् (c. 10. -पादयति -यितुं), व्यवस्था in caus. (-स्थापयति -यितुं), स्था, व्यवस्थां कृ.—(Pass sentence) निर्णयं कृ, प्रणयनं कृ.—(Pass by) अतिक्रम्, व्यतिक्रम्, समतिक्रम्, अतिवृत्, अतिचर्, अतिगम्, अतिया, समतिया, अती, व्यती, अत्यभिसृ.—(Pass by, neglect) त्यज्, परित्यज्, हा, अपहा, अपास्, उत्सृज्, अतिसृज्, लङ्घ्, उल्लङ्घ्.—(Pass off). *See To* PALM.—(Pass over, overlook) उपेक्ष्, समुपेक्ष्, क्षम् &c. *See* OVERLOOK.—(Pass through the bowels, &c.) *See To* EVACUATE.

PASS, *s.* (Narrow passage, defile) सङ्कटपथः, सङ्कटमार्गः, दुर्गमार्गः, सङ्कटं, सञ्चरः, सञ्चारः, दुर्गं, घर्घरः.—(Fissure between hills) दरी -रा, विदरः, रन्ध्रं.—(Passport) अभिज्ञानपत्रं, अभयपत्रं.—(Thrust in fencing) प्रहारः, यष्टिप्रसारणं.—(State, distressed state) दशा, अवस्था, गतिः *f.*, दुर्दशा, दुर्गतिः *f.*, कष्टं.

PASSABLE, *a.* (That may be crossed or travelled over) तार्य्यः -र्य्या -र्य्यं, तरणीयः -या -यं, गम्यः -म्या -म्यं, गमनीयः -या -यं, गमनयोग्यः -ग्या -ग्यं, सुगमः -मा -मं, उल्लंघ्यः -घ्या -घ्यं.—(Tolerable) त्रिगुणः -णा -णं, सहनीयः -या -यं, सह्यः -ह्या -ह्यं.—(Current) प्रचलः -ला -लं.

PASSABLY, *adv.* त्रिगुणं, सहनीयं, यावच्छावत्. *See* TOLERABLY.

PASSAGE, *s.* (Act of passing) गमनं, तरणं, उत्तरणं, चलनं, गतिः *f.*, तरः; 'to and fro,' गमनागमनं, गतागतं, यातायातं.—(Passing through or beyond) सङ्क्रमः -मणं, सङ्क्रान्तिः *f.*, सञ्चारः, क्रान्तिः *f.*, अतिक्रमः -मणं, पारगमनं, उल्लंघनं.—(Time of passing) गमनकालः, सङ्क्रमकालः, पारगमनकालः.—(Road, way) पथः, मार्गः, द्वारं.—(Difficult passage) संक्रमः -मं, संक्रामः, सञ्चारः, सञ्चरः, दुर्गमार्गः, दुर्गपथः, दुर्गं.—(Liberty to pass) गमनशक्तिः *f.*, गमनाधिकारः.—(Of a book) स्थलं, देशः, एकदेशः, वचनं; 'a passage of scripture,' वेदस्य एकदेशः.—(Occurrence) वृत्तं, भूतं.

PASSAGE-MONEY, *s.* आतारः, आतरः, तरमूल्यं, तरपण्यं, तारिकं, तार्य्यं.

PASSED, *p. p.* (Gone by) अतिक्रान्तः -न्ता -न्तं, अतीतः -ता -तं, व्यतीतः &c., सम्प्रवृत्तः -त्ता -त्तं.—(Crossed, gone through or over) तीर्णः -र्णा -र्णं, उत्तीर्णः &c., संक्रान्तः -न्ता -न्तं, पारगतः -ता -तं; 'hard to be passed,' दुस्तरः -रा -रं, दुरत्ययः -या -यं, दुर्गमः -मा -मं.—(Passed over) लंघितः -ता -तं, उल्लंघितः &c.—(Spent, as time) गमितः -ता -तं, नीतः -ता -तं.—(As faeces, &c.) हन्नः -न्ना -न्नं, गूनः -ना -नं, उच्चरितः -ता -तं, उच्चारितः &c.—(Ended, gone). *See* PAST.

PASSENGER, *s.* (Traveller) पथिकः, यात्रिकः, यायी *m.* (न्), गामी *m.*, गमी *m.*, मार्गस्थः, पथस्थः, पादचिकः, सारणिकः.—(One who crosses) तरी *m.*, तरः, तरिता *m.* (तृ), तर्त्तरीकः, उत्तरणकृत् *m.*—(In a vessel) नौयायी *m.*, नौगामी *m.*, नौकान्तर्वर्त्ती *m*, नौकारूढः, औडुपिकः.

PASSER, *s.* तरी *m.* (न्), तरः, तरिता *m.* (तृ), तर्त्तरीकः, गामी *m.*

PASSIBILITY, *s.* सुखदुःखक्षमता, सुखदुःखवेदनक्षमता, सुखदुःखयोग्यता, सुखदुःखसहत्वं, सुखदुःखवेदित्वं.

PASSIBLE, *a.* सुखदुःखक्षमः -मा -मं, सुखदुःखवेदनक्षमः -मा -मं, सुखदुःखयोग्यः -ग्या -ग्यं, सुखदुःखवेदी -दिनी -दि (न्).

PASSING, *s.* (The act) तरणं, उत्तरणं, गमनं, चलनं. *See* PASSAGE. (Passing by) अत्ययः, अतिक्रमः.

PASSING, *part.* तरन् -रन्ती -रत् (त्), गामी -मिनी -मि (न्), यायी &c. —(Surpassing) अतिगः -गा -गं, अतिक्रामकः -का -कं.

PASSING, *a.* (Eminent) उत्तमः -मा -मं, परमः -मा -मं, श्रेष्ठः -ष्ठा -ष्ठं.

PASSING, *adv.* अत्यन्तं अतिशयेन, अतिमात्रं, अति or अतिशय in comp.

PASSION, *s.* (Feeling or affection of the mind) मनोभावः, भावः, मनोविकारः, मनोविकृतिः *f.*, विकारः, विकृतिः *f.*, मनोवृत्तिः *f.*, वृत्तिः *f.*, रागः, मनोरागः, रसः, मनोधर्म्मः; 'passion of love,' कामविकारः, कामविकृतिः *f.*; 'of anger,' क्रोधविकारः; 'of lust,' लोभविकारः. The word इन्द्रियाणि *n. pl.* may sometimes be used generally to express 'the passions'; as, 'restraint of the passions,' इन्द्रियनिग्रहः, इन्द्रियदमनं, कामक्रोधलोभादिदमनं; 'having the passions subdued,' जितेन्द्रियः -या -यं; 'void of passions,' वीतरागः -गा -गं, विरक्तः -क्ता -क्तं, विरागी &c.; 'absence of passion,' वैराग्यं, विरागः, विरक्तिः, रागहीनता; 'having passions,' रागी &c., अनुरागी &c.; 'the class of six passions, viz. desire, wrath, avarice, bewilderment, pride, and envy,' षड्वर्गः.—(Anger, warmth of temper, rage) क्रोधः, कोपः, प्रकोपः, रोषः, अमर्षः, संरम्भः, प्रतिरम्भः, उत्तापः, उग्रता -त्वं, चण्डता, तिग्मता, उष्मः, रुष्यं, भामः, कौशिकः; 'fit of passion,' क्रोधावेशः; 'in a passion,' क्रुद्धः -द्धा -द्धं, क्रोधी &c., जातक्रोधः -धा -धं, जातामर्षः -र्षा -र्षं.—(Mental agitation or excitement) मनःक्षोभः, चित्तक्षोभः, चित्तवेगः, मनस्तापः, मनोव्याकुलता, उत्तापः, व्याक्षोभः.—(Love, lust) कामः, कामिता, कामुकत्वं, मदः, मदनः, स्मरः, अनुरागः, स्मरमोहः, कौशिकः.—(Eager desire) लालसा, लोभः, उत्कण्ठा, उत्सुकता, औत्सुक्यं.—(Suffering) दुःखभोगः, दुःखं, व्यथा, पीडा, क्लेशः, श्रमः.—(As opposed to action) सहनं, सहत्वं, ग्रहणं, कर्म्माश्रयत्वं, कर्म्मपात्रता.—(The quality or property of passion) रजस् *n.*

PASSIONATE, *a.* (Easily moved to anger) शीघ्रकोपी -पिनी -पि (न्), शीघ्रक्रोधी &c., सुलभकोपः -पा -पं, क्रोधी &c., क्रोधनः -ना -नं, कोपी &c., कोपनः -ना -नं, क्रोधशीलः -ला -लं, कोपशीलः &c., अमर्षी &c., संरम्भी &c., अमर्षणः -णा -णं, रोषणः -णा -णं, रोषशीलः &c., संरम्भशीलः &c., कोपिष्ठः -ष्ठा -ष्ठं, क्रोधिष्ठः &c., चित्तवेगी &c., भामी &c., चित्तस्वभावः -वा -वं; 'very passionate,' अत्यन्तकोपनः -ना -नं.—(Highly excitable, warm, ardent) समतापशीलः -ला -लं, उत्तापशीलः &c., चण्डः -ण्डा -ण्डं, उच्चण्डः &c., चण्डवान् -वती -वत् (त्), उष्णः -ष्णा -ष्णं, उग्रः -ग्रा -ग्रं, रौद्रः -द्री -द्रं, तिग्मः -ग्मा -ग्मं, तीक्ष्णः -क्ष्णा -क्ष्णं—(Full of strong feeling) रागी &c., रागवान् &c., रागान्वितः -ता -तं, सरागः -गा -गं, संरक्तः -क्ता -क्तं, सानुरागः &c.. अनुरागी &c., रागिष्ठः &c., अनुरक्तः &c., सरसः -सा -सं, रसी &c., रसिकः &c., उत्कण्ठितः -ता -तं.—(Having the quality or property of passion) रजोगुणी &c.; 'a passionate woman,' कोपना, भामिनी.

PASSIONATELY, *adv.* (With strong feeling) सरागं, रागेण, रागपूर्व्वं, सानुरागं, सरसं.—(Ardently) अतिकौतूहलेन, तीक्ष्णं, सतैक्ष्ण्यं, चण्डं, प्रचण्डं, उच्चण्डं, उत्कण्ठापूर्व्वं.—(With anger) सकोपं, सक्रोधं, सरोषं, सामर्षं, संरम्भपूर्व्वं.

PASSIONATENESS, *s.* शीघ्रकोपिता, कोपशीलता, क्रोधशीलता, क्रोधवशता, क्रोधाधीनता, चित्तस्वभावः.—(Strong feeling) सानुरागता, सरागता, अनुरागः.

PASSIONLESS, *a.* वीतरागः -गा -गं, रागहीनः -ना -नं, शान्तरागः &c., विरागी -गिणी -गि (न्), विरक्तः -क्ता -क्तं, अननुरागी &c.

PASSIVE, *a.* (Suffering without resistance) सहनः -ना -नं, सहः -हा -हं, सहिष्णुः -ष्णुः -ष्णु, सहनधर्म्मकः -का -कं, सहनवृत्तिः -त्तिः -त्ति, सहनशीलः -ला -लं, सहनधर्म्मी -र्म्मिणी -र्म्मि (न्), तितिक्षुः -क्षुः -क्षु, अनिवारकः -का -कं, अप्रतीकारकः &c.—(Opposed to active not an actor) निश्चेष्टः -ष्टा -ष्टं, निष्क्रियः -या -यं, अप्रवर्त्तकः -का -कं, क्रियाशून्यः -न्या -न्यं, कर्म्मपात्रं, कर्म्माधारः, कर्म्माश्रयः.—(In grammar, the passive voice) कर्म्मणिवाच्यं, कर्म्मणि आत्मनेपदं; 'reflective passive,' कर्म्मणिकर्तृवाच्यं; 'impersonal passive,' भाववाच्यं. The grammatical symbol for the passive is यक्भावः.

PASSIVENESS, PASSIVITY, *s.* सहनत्वं, सहिष्णुता, सहनशीलता, सहनधर्म्मः, सहनवृत्तिः *f.*—(Opposed to activity) निश्चेष्टता -त्वं, निष्क्रियता, कर्म्मपात्रता, कर्म्माश्रयता.

PASSPORT, *s.* अभयपत्रं, अभयवाक् *f.* (च्), अभिज्ञानपत्रं, अभिज्ञानमुद्रा, अभिज्ञानं, मुद्रा.

PAST, *p. p.* or *a.* (Gone by, not present) गतः -ता -तं, भूतः -ता -तं, अतीतः -ता -तं, व्यतीतः &c., समतीतः &c., व्यपेतः &c., वृत्तः -त्ता -त्तं, संवृत्तः &c., अतिक्रान्तः -न्ता -न्तं, निभृतः -ता -तं, परोक्षः -क्षा -क्षं, प्रतीतः -ता -तं. *See* PASSED. (Former, relating to the past) पूर्व्वः -र्व्वा -र्व्वं, पौर्व्वः -र्व्वी -र्व्वं, पौर्व्विकः -की -कं, पूर्व्वतनः -नी -नं, प्राक्तनः -नी -नं; 'in past times,' पुरा, पूर्व्वं, परोक्षे.—(Ended, accomplished) वृत्तः -त्ता -त्तं, निर्वृत्तः &c., समाप्तः -प्ता -प्तं.—(Past tense) अद्यतनभूतः -तं, परोक्षभूतं, अतीतकालः.

PAST, *s.* (Past time) गतकालः, भूतकालः, अतीतकालः, प्राक्कालं, पूर्व्वकालं, परोक्षं; 'knowing past and future,' परावरदृक् *m.f.n.* (श्).

PAST, *adv.* (Beyond) अति prefixed; as, 'past mortal strength,' अतिमानुषशक्तिः. Expressed also by अ or निर् prefixed, or by the use of the passive participle अतीत, हीन, त्यक्त, नष्ट, अतिक्रान्त &c. in comp.; as, 'past cure,' असाध्यः -ध्या -ध्यं, निरुपचारः -रा -रं, औषधिपथातिगः -गा -गं; 'past the range of sight,' चक्षुर्विषयातिक्रान्तः -न्ता -न्तं; 'past work,' अतीतव्यवहारः -रा -रं; 'past remedy,' उपायातीतः -ता -तं; 'past age,' वयोतीतः &c.; 'past all sense of shame,' निर्लज्जः -ज्जा -ज्जं, लज्जाहीनः -ना -नं, नष्टलज्जः &c., त्यक्तलज्जः &c.

PASTE, *s.* उदपेषं, उदकपेषं, जलपेषं, उदकचूर्णं, गोधूमसम्भवं.

To PASTE, *v. a.* उदपेषेण बन्ध् (c. 9. बध्नाति, बन्द्धुं) or सम्बन्ध्, उदपेषेण लिप् (c. 6. लिम्पति, लेप्तुं).

PASTEBOARD, *s.* स्थूलकार्पासं, घनपत्रं, दृढकार्पासं, स्थूलपत्रं.

PASTERN, *s.* अश्वखुरसन्धिः *m.*, अश्वस्य खुरोपरिस्थः पादभागः.

PASTIME, *s.* विनोदः, क्रीडा, विहारः, खेला -लनं, विलासः, कौतुकं, क्रीडाकौतुकं, केलिः -ली *m. f.*, लीला, देवनं, परीहासः, नर्म्म *n.* (न्), कूर्दनं, रासेरसः; 'juvenile,' बालक्रीडा, बाललीला, बालचरितं.

PASTOR, *s.* (Shepherd) मेषपालः -लकः, मेषपोषकः.—(Religious instructor) धर्म्मोपदेशकः, धर्म्माध्यापकः, आचार्य्यः, गुरुः *m.*, उपाध्यायः.

PASTORAL, *a.* (Pertaining to shepherds) मेषपालसम्बन्धी &c.,

नेमपालविषयः -या -यं.—(Pertaining to a minister of religion) धर्म्मोपदेशकसम्बन्धी &c., धर्म्माध्यापकसम्बन्धी &c., धर्म्मोपदेशविषयः -या -यं.

PASTORAL, *s.* (Poem) नेमपालनादिविषयकं काव्यं, गोमेमादिविषयं गीतं.

PASTRY, *s.* पिष्टकं, पिष्टिकं, पिष्टान्नं, मिष्टान्नं, आपूपिकं, शाष्कुलिकं.

PASTRY-COOK, *s.* पिष्टककारी *m.* -रिणी *f.* (न्), पिष्टान्नकृत् *m.*, मिष्टान्नकृत्, पिष्टकविक्रयी *m.* -यिणी *f.* (न्), आपूपिकः -की.

PASTURAGE, *s.* (Grazing ground) गोचरः, गोप्रचारः, गोमेषादिचारणस्थानं, गोचारणक्षेत्रं, गोचारणभूमिः.—(Meadow grass) यवसः, यावसः, क्षेत्रियं, पाशवपालनं, पशव्यं, घासः, तृणं, गवादनं.

PASTURE, *s.* (Grass for cattle) गवादनं, गोभक्षणं, यवसः, पशव्यं, पशुभोजनं, पशुखाद्यं, घासः, तृणं.—(Ground covered with grass for grazing) यावसभूमिः *f.*, यवसीयभूमिः *f.*, गोचारणभूमिः *f.*, पशुचारणभूः *f.*, शाड्वलभूः *f.*, शाद्वलभूमिः. *See* PASTURAGE.

To PASTURE, *v. a.* (Graze) चर् (c. 10. चारयति -यितुं), तृणं भुज् or खाद् or दा.

To PASTURE, *v. n.* (Graze) चर् (c. 1. चरति -रितुं), तृणप्, तृणं खाद् &c.

PASTY, *a.* क्षौदपेषिकः -की -कं, उदपेषगुणकः -का -कं.

PASTY, *s.* (Pie made of paste) पिष्टकः -कं, पिष्टिकं, शष्कुली.

PAT, *a.* युक्तः -क्ता -क्तं, योग्यः -ग्या -ग्यं, सङ्गतः -ता -तं. *See* FIT.

PAT, *adv.* युक्तं, यथायोग्यं, सम्यक्, अञ्जसा, समञ्जसं. *See* FITLY.

PAT, *s.* (Light blow) लघुप्रहारः, लघ्वाघातः, चपेटः, चपेटाघातः.—(Flattish lump) ईषच्चिपिण्डः; 'of butter,' नवनीतपिण्डः.

To PAT, *v. a.* चपेटेन प्रहृ or आहन्, लघुप्रहारं कृ, लघु प्रहृ.—(A horse, &c.) स्फल् (c. 10. स्फालयति -यितुं), आस्फल्, स्फालनं कृ.

PATCH, *s.* (Piece of cloth) वस्त्रखण्डः, पटखण्डः; 'patched garment,' कर्पटः, कन्था; 'weaving one,' कन्थाधारणं, कर्पटधारणं; 'a beggar who wears one,' कर्पटधारी *m.* (न्), कन्थाधारी *m.*, कर्पटी *m.*, कर्पटिकः.—(Piece of any thing) खण्डः -ण्डं, शकलः -लं.

To PATCH, *v. a.* वस्त्रखण्डं निषिव् (c. 4. -षीव्यति -षेवितुं) or निविश् (c. 10. -वेशयति -यितुं), जीर्णवस्त्राणि समाधा (c. 3. -दधाति -धत्ते -धातुं) or सन्धा, कन्था (nom. कन्थायति), कर्पट (nom. कर्पटायति).

PATCHED, *p. p.* or *a.* खण्डी -ण्डिनी -ण्डि (न्), खण्डमयः -यी -यं, खण्डयुक्तः -क्ता -क्तं, खण्डरूपः -पा -पं; 'patched garments.' *See* PATCH, *s.*

PATCHER, *s.* वस्त्रखण्डसन्धाता *m.* (तृ), जीर्णवस्त्रसमाधाता *m.*

PATCH-WORK, *s.* खण्डकर्म्म *n.* (न्), कन्थाकरणं, कर्पटकरणं.

PATE, *s.* मस्तकाग्रं, मस्तकः -कं, मुण्डः -ण्डं -ण्डकं. *See* HEAD, *s.*

PATENT, *a.* (Plain) स्पष्टः -ष्टा -ष्टं, विस्पष्टः &c., व्यक्तः -क्ता -क्तं, प्रव्यक्तः &c., प्रत्यक्षः -क्षा -क्षं, प्रकाशः -शा -शं, सुगमः -मा -मं.

PATENT, *s.* विशेषाधिकारपत्रं -त्रिका, प्रकाशपत्रं, प्रकाशलेख्यं.

PATENTEE, *s.* प्रकाशपत्रधारी *m.* (न्), अधिकारपत्रधारी *m.* (न्).

PATER-FAMILIAS, *s.* कुटुम्बी *m.* (न्), कौटुम्बिकः, कुलपतिः *m.*, कुलोद्वहः.

PATERNAL, *a.* पैतृकः -की -कं, पैत्रिकः &c., पितृकः -का -कं, पैत्रः -त्री -त्रं, पित्र्यः -त्र्या -त्र्यं, पितृ in comp.; 'paternal mansion,' पितृमन्दिरं; 'paternal aunt,' पितृष्वसा *f.* (सृ); 'paternal affection,' पुत्रस्नेहः, सुतस्नेहः, वात्सल्यं.—(Like a father) पितृतुल्यः -ल्या -ल्यं, पितृसदृशः -शी -शं, पितृसन्निभः -भा -भं, पितृसमः -मा -मं.—(Derived from a father) पितृप्राप्तः -प्ता -प्तं, पित्रागतः -ता -तं, पितृक्रमायातः -ता -तं; 'paternal estate,' पैतृकभूमिः *f.*

PATERNALLY, *adv.* पितृवत्, तातवत्, जनकवत्, पितृरूपेण.

PATERNITY, *s.* पितृत्वं -ता, जनकता -त्वं, पितृभावः, पैतृकत्वं, पितृधर्म्मः.

PATH, *s.* पथः, पन्थाः *m.* (पथिन्), मार्गः, पद्धतिः -ती *f.*, पदविः -वी *f.*, सरणिः -णी *f.*, सृतिः *f.*, वर्त्म *n.* (न्), वर्त्मनिः *f.*, वर्त्तनिः -नी *f.*, अध्वा *m.* (न्), अयनं, पद्या, एकपदी; 'of the planets,' कक्षः -क्षा; 'the right path,' सत्पथः, सन्मार्गः; 'the wrong path,' उत्पथः, कुपथः, उन्मार्गः, विमार्गः; 'going on the wrong path,' उन्मार्गगामी &c.; 'to seduce from the right path,' उत्पथं नी (c. 1. नयति, नेतुं).

PATHETIC, PATHETICAL, *a.* करुणारसमयः -यी -यं, करुणारसात्मकः -का -कं, रसिकः -का -कं, करुणाजनकः -का -कं, करुणोत्पादकः -का -कं, कारुणिकः -की -कं, करुणात्मकः -का -कं, हृदयङ्गमः -मा -मं, हृदयवेधकः &c., हृदयाविद् *m. f. n.* (ध्), मनोद्रावकः &c., चित्तमोहकः &c., चित्तमोहजनकः &c. *See* MOVING, *a.*

PATHETICALLY, *adv.* सरसं, करुणारसपूर्व्वं, सकारुण्यं, करुणं, यथा करुणा जायते or यथा हृदयं स्पृश्यते तथाप्रकारेण.

PATHIC, *s.* (Catamite) विटः, वेश्याचार्य्यः, नारङ्गः; 'keeper of pathics,' विटपः.

PATHLESS, *a.* अपथः -था -थं, निष्पथः -था -थं, अमार्गः -र्गा -र्गं, अगम्यः -म्या -म्यं.

PATHOLOGIC, PATHOLOGICAL, *a.* निदानविषयकः -का -कं, रोगनिदानसम्बन्धी &c.

PATHOLOGY, *s.* निदानविद्या, रोगनिदानविद्या, निदानशास्त्रं, रोगलक्षणविद्या, रोगलक्षणशास्त्रं, रोगनिरूपणविद्या.

PATHOS, *s.* करुणारसः, कारुण्यरसः, रसः, रागः, करुणा, कारुण्यं, रसिकता -त्वं, चित्तद्रावकत्वं, करुणाजनकता.

PATHWAY, *s.* पथः, मार्गः, पदविः -वी *f.*, वर्त्म *n.* (न्), गमनागमनपथः.

PATIENCE, *s.* क्षमा, क्षान्तिः *f.*, सहिष्णुता -त्वं, सहनं, सहनशीलता, सहनशक्तिः *f.*, सहत्वं, तितिक्षा, धैर्य्यं, धृतिः *f.*, धीरता, दमः, दमथः, दमथुः *m.*, मर्षः -र्षणं, उत्साहः, साहनं.

PATIENT, *a.* सहिष्णुः -ष्णुः -ष्णु, सहनः -ना -नं, सहनशीलः -ला -लं, क्षमावान् -वती -वत् (त्), सहः -हा -हं, क्षमः -मा -मं, तितिक्षुः -क्षुः -क्षु, क्षमी -मिणी -मि (न्), क्षमायुक्तः -क्ता -क्तं, क्षान्तिमान् -मती -मत् (त्), क्षन्ता -न्त्री -न्तृ (न्तृ), क्षमिता &c., क्षमाशीलः -ला -लं, तितिक्षाशीलः &c., धीरः -रा -रं, धैर्य्यवान् &c., धृतिमान् &c., मर्षी &c., मर्षणः -णा -णं, मर्षितः -ता -तं, मर्षितवान् &c., क्षामः -मा -मं, सासहिः -हिः -हि, सहमानः -ना -नं, दान्तः -न्ता -न्तं. The words सह and क्षम are especially used in comp.; as, 'patient of labor,' क्लेशसहः -हा -हं; 'of austerities,' तपःसहः, तपःक्षमः &c.; 'very patient,' बहुक्षमः -मा -मं, बहुसहः &c., विश्वसहः &c.; 'to be patient of,' सह् (c. 1. सहते, सोढुं), क्षम् (c. 1. क्षमते, क्षन्तुं), तिज् in des. (तितिक्षते -क्षितुं), मृष् (c. 4. मृष्यति, मर्षितुं).

PATIENT *s.* (As apposed to agent) कर्म्मपात्रं, कर्म्माधारः, कर्म्माश्रयः.—(Sick person) रोगी *m.* -गिणी *f.* (न्), आतुरः -रा, रोगार्त्तः -र्त्ता, सरोगः -गा.

PATIENTLY, *adv.* क्षमापूर्व्वं, तितिक्षापूर्व्वं, तितिक्षया, सधैर्य्यं, समर्षं, तितिक्षितं.

PATLY, *adv.* युक्तं, यथायोग्यं, सङ्गतं. *See* PAT, *adv.*

PATRIARCH, *s.* आदिपुरुषः, मूलपुरुषः, वृद्धपिता *m.* (तृ), गोत्रपतिः *m.*, प्रजापतिः *m.*, गोत्रस्वामी *m.* (न्), वंशपतिः *m.*, गोत्रजनकः.—(Venerable person) वृद्धजनः, गुरुजनः.

PATRIARCHAL, *a.* आदिपुरुषसम्बन्धी -न्धिनी &c., मूलपुरुषसम्बन्धी &c.

PATRICIAN, *a.* कुलीनः -ना -नं, महाकुलीनः &c., सत्कुलीनः &c., सद्वंशः -शा -शं, सद्वंशीयः -या -यं, अप्राकृतः -ती -तं, असामान्यः &c., अभिजातः &c. *See* NOBLE.

PATRICIAN, *s.* कुलीनजनः, कुलीनपुरुषः, शिष्टजनः, अभिजनवान् *m.* (त्).

PATRIMONIAL, *a.* (Inherited from a father, &c.) पैतृकः -की -कं, पितृप्राप्तः -प्ता -प्तं, पित्रागतः -ता -तं, पितृक्रमायातः &c., दायप्राप्तः &c., दायलब्धः -ब्धा -ब्धं, दायोपागतः &c.—(Relating to a patrimony) पैतृकरिक्थसम्बन्धी &c., दायसम्बन्धी &c.

PATRIMONY, *s.* पैतृकरिक्थं, पैतृकं रिक्थं or ऋक्थं, गोत्ररिक्थं, पैतृकधनं, ऋक्थभागः, गोत्रधनं, दायः, पैतृकं, औद्धारकं, क्रमागतरिक्थं, पित्रागतरिक्थं, पित्रागतधनं; 'confiscation of it,' वृत्तिच्छेदः; 'title deed of it,' रिक्थपत्रं.

PATRIOT, *s.* स्वदेशाभिमानी *m.* (न्), स्वदेशानुरागी *m.* (न्), जन्मभूम्यनुरागी *m.*, जन्मभूमिवत्सलः, स्वदेशभक्तः, स्वदेशहितैषी *m.*

PATRIOTIC, *a.* स्वदेशाभिमानी -निनी -नि (न्), स्वदेशानुरागी -गिणी &c., स्वदेशानुरक्तः -क्ता -क्तं, जन्मभूम्यनुरक्तः &c., जन्मभूमिवत्सलः -ला -लं, स्वदेशभक्तः -क्ता -क्तं, स्वदेशासक्तः &c., स्वदेशहितैषी -षिणी &c., स्वदेशहितकारी &c., स्वदेशपालकः -का -कं.

PATRIOTISM, *s.* स्वदेशाभिमानं, स्वदेशानुरागः, स्वदेशानुरक्तिः *f.*, देशाभिमानं, देशानुरागः, जन्मभूम्यनुरागः, जन्मभूमिवात्सल्यं, स्वदेशभक्तिः *f.*, स्वदेशासक्तिः *f.*, स्वदेशप्रीतिः *f.*, स्वदेशप्रतिपालनं, स्वदेशहितैषा.

PATROL, *s.* (Walking round by a guard in the night) रक्षकेण रात्रौ परिक्रमणं or परिभ्रमणं.—(The guard who goes the round) रात्रिपरिचरः, रात्रिचरः, रात्रिरक्षकः, रक्षकः, आरक्षकः, रक्षी *m.* (न्).

To PATROL, *v. n.* रक्षकवद् रात्रौ परिक्रम् (c. 1. -क्रामति, c. 4. -क्राम्यति -क्रमितुं) or परिभ्रम् (c. 4. -भ्राम्यति -भ्रमितुं).

PATRON, *s.* (One who supports and protects) पालकः, प्रतिपालकः, अनुपालकः, उपकारकः, उपकारी *m.* (न्), संवर्धकः, अनुग्राही *m.*, पक्षधारी *m.*, पोषकः, रक्षकः, आश्रयः, आश्रयभूतः, शरणं, शरणभूतः, आश्रयस्थानं, नाथः, पुरस्कारी *m.*, पुरस्कर्त्ता *m.* (र्तृ), उपकर्त्ता *m.*, साहाय्यकारी *m.*, सहायः, पिण्डदः.—(Appreciator of merit) गुणग्राही *m.* (न्), गुणग्राहकः, गुणज्ञः, गुणदर्शी *m.*; 'patron of learning,' विद्यानुपालकः.

PATRONAGE, *s.* पालनं, अनुपालनं, प्रतिपालनं, उपकारः, आश्रयः, संश्रयः, अनुग्रहः, उपग्रहः, सङ्ग्रहः, आग्रहः, आधारः, अवष्टम्भः, वर्धनं, संवर्धनं, अवलम्बः -म्बनं, शरण्यता, पुरस्कारः, रक्षा -क्षणं, अभिरक्षा, पोषणं, पालनपोषणं, साहाय्यं, सहायत्वं, साहित्यं, प्रतिपालकता.—(Appreciation of merit) गुणग्रहणं, गुणज्ञानं.

PATRONAL, *a.* पालकः -का -कं, उपकारकः &c., संवर्धकः &c., रक्षकः &c.

PATRONESS, *s.* प्रतिपालिका, उपकारिणी, अभिरक्षिका, रक्षाकारिणी.

To PATRONIZE, *v. a.* प्रतिपाल् (c. 10. -पालयति -यितुं), अनुपाल्, अनुग्रह् (c. 9. -गृह्णाति -ग्रहीतुं), उपग्रह्, संवृध् (c. 10. -वर्धयति -यितुं), अभिरक्ष् (c. 1. -रक्षति -क्षितुं), उपकृ, साहाय्यं कृ; 'to patronize learning,' विद्यानुपालनं कृ.

PATRONIZED, *p. p.* प्रतिपालितः -ता -तं, अनुपालितः &c., संवर्धितः &c., अवलम्बितः &c., अभिरक्षितः &c., अनुगृहीतः &c.

PATRONLESS, *a.* निराश्रयः -या -यं, अनाश्रयः &c., अशरणः -णा -णं, निरवलम्बः -म्बा -म्बं, निःसहायः -या -यं, निराधारः -रा -रं.

PATRONYMIC, *s.* अपत्यवाचकः, अपत्यवाचकनाम *n.* (न्), पैतृकनाम *n.*, पितृप्राप्तनाम *n.*, पित्रागतनाम *n.*, गोत्रनाम *n.*, उपाधिः *m.*

PATTEN, *s.* काष्ठपादुका, स्त्रीजनव्यवहारिता काष्ठमयपादुका.

To PATTER, *v. n.* पटपट (nom. पटपटायते -ति), पटपटशब्दं कृ.

PATTER, PATTERING, *s.* पटपटशब्दः; 'of rain,' धाराध्वनिः *m.*

PATTERN, *s.* (Model, exemplar) उपमा -मानं, प्रतिमा -मानं, आदर्शः, निदर्शनं, प्रतिरूपं, प्रतिकृतिः *f.*, प्रतिमूर्त्तिः *f.*, संस्कारः, प्रमाणं, प्रतिरूपदृक् *m.* (श्); 'of propriety,' न्यायाधारः.—(Specimen) आदर्शः, निदर्शनं.—(Figure) आकारः, संस्कारः, रूपं.

PAUCITY, *s.* अल्पता, स्वल्पता, स्वाल्प्यं, संख्याल्पता, अबहुत्वं, स्तोकता.

PAUNCH, *s.* (Belly) उदरं, जठरं, तुन्दं -न्दि *n.*, कुक्षिः *m.*, पिचिण्डः; 'having one,' उदरी -रिणी &c., तुन्दी &c., पिचिण्डिलः -ला -लं.—(Protuberant belly) लम्बोदरं.

To PAUNCH, *v. a.* निरुदरीकृ, निरन्त्रीकृ, उदरादि बहिष्कृ.

PAUPER, *s.* (Poor person who lives on alms) भिक्षोपजीवी *m.* -विनी *f.*, भैक्षजीवी *m.* (न्), भिक्षाजीवी *m.* &c., भिक्षुः *m.*, भिक्षुकः *m.* -की *f.*, अन्यदत्तोपजीवी *m.* &c., दरिद्रः, निर्धनः, क्षिद्रः.—(In law) आकाशेशः.

PAUPERISM, *s.* भिक्षोपजीवनं, भैक्षोपजीवनं, भैक्षजीविका, भिक्षोपजीविका, अन्यदत्तोपजीविका, भिक्षावृत्तिः *f.*, भिक्षुकवृत्तिः *f.*

PAUSE, *s.* (Temporary stop) विरामः, विरतिः *f.*, अवरतिः *f.*, उपरतिः *f.* उपरमः, निवृत्तिः *f.*, विश्रामः, विच्छेदः, उपशमः, शमः, शान्तिः *f.*, अपशमः, अवसायः, अवसानं, आश्वासः, अवहः, यतिः *f.*, यामः, सन्धिः *m.*—(Interval) अन्तरं, कालान्तरं, अवकाशः, व्यवधानं, सन्धिः *m.*—(Suspense) कर्मान्तरं, भावसन्धिः *m.*—(In poetry or music) यतिः *f.*, अवसानं.

To PAUSE, *v. n.* विरम् (c. 1. -रमति -रन्तुं), उपरम्, निवृत् (c. 1. -वर्त्तते -र्त्तितुं), विनिवृत्, निर्वृत्, विश्रम् (c. 4. -श्राम्यति -श्रमितुं), विच्छिद् in pass. (-च्छिद्यते), शम् c. 4. शाम्यति, शमितुं), विरामं कृ, अवसानं कृ.

To PAVE, *v. a.* प्रस्तरैः or इष्टकाभिर् आस्तॄ (c. 9. -स्तृणाति -स्तरितुं).

PAVED, *p. p.* प्रस्तरास्तीर्णः -र्णा -र्णं, पाषाणास्तीर्णः &c., इष्टकास्तीर्णः &c.

PAVEMENT, *s.* परिस्रस्तरः, पाषाणास्तरः, प्रस्तरास्तरणं, शिलास्तरः, शिलाफलकं, इष्टकाफलकं, इष्टकास्तरः -रणं.

PAVER, PAVIER, *s.* प्रस्तरास्तरणकृत् *m.*, परिस्रस्तरकृत् *m.*, शिलाफलकास्तरिता *m.* (तृ), इष्टकास्तरिता *m.*

PAVILION, *s.* मण्डपः -पं, पटमण्डपः, हर्म्यं, मन्दिरं, वातायनं.

PAW, *s.* (Foot of a beast) पशुपादः, पशुपदं.—(Hand) हस्तः, करः.

To PAW, *v. a.* or *n.* (As a horse) खुराभिघातं कृ, खुरप्रसारणं कृ.—(Handle) हस्तेन स्पृश् or परिस्पृश् or परामृश् or आलभ् or समालभ्.

PAWN, *s.* (Pledge) न्यासः, उपन्यासः, निक्षेपः, आधिः *m.*, बन्धकः -कं, उपनिधिः *m.*, उपनिधानं, उपनिक्षेपः, आधानं, अन्वाधिः *m.*, पणः, परिपणनं, आधीकरणं, प्रतिदेयं.—(At chess) नरः, शारः -रिः *m.*

To PAWN, *v. a.* आधीकृ, न्यासीकृ, न्यस् (c. 4. -अस्यति -असितुं), उपन्यस्, निक्षिप् (c. 6. -क्षिपति -क्षेप्तुं), पण् (c. 1. पणते -णितुं), परिपण्, परिपणनं कृ, न्यासं कृ, बन्धकं कृ or दा; 'having pawned,' आधीकृत्य.

PAWNBROKER, *s.* बन्धकव्यापारी *m.* (न्), निक्षेपव्यापारी *m.*, निक्षेपव्यवसायी *m.*

PAWNED, *p. p.* न्यस्तः -स्ता -स्तं, उपन्यस्तः &c., न्यासीकृतः -ता -तं, आधीकृतः &c., निक्षिप्तः -प्ता -प्तं, पणितः -ता -तं, परिपणितः &c.

To PAY, *v. a.* (Discharge a debt) ऋणं शुध् or अपनी or विनी or अपाकृ or अपवृज् or साध् or तॄ, ऋणशोधनं कृ, ऋणसिद्धिं कृ, ऋणमुक्तिं कृ.—(Liquidate) शुध्, परिशुध्, संशुध्, विनी, अपनी.—(Fulfil, perform) सम्पद्, निष्पद्, सम्पॄ, पॄ, साध्.—(Give, render) दा, कृ.—(Give pay to) वेतनं दा, वर्त्तनं दा.—(Pay the price of any thing bought) मूल्यं दा.—(Pay for, atone for) निस्तॄ (c. 10. -तारयति -यितुं) उद्धृ, निष्कृ, निष्कृतिं दा or कृ, प्रायश्चित्तं कृ.

—(Pay off, discharge) वेतनं दत्त्वा विसृज् or मुच्.—(Pay off, retaliate) प्रतिकृ.

Pay, *s.* वेतनं, मूल्यं, वर्त्तनं, भृतिः *f.*, भृत्या, भाटिः *f.*, भाटकः -कं; 'monthly pay,' मासिकं; 'yearly pay,' वार्षिकं.

Payable, *a.* देयः -या -यं, शोध्यः -ध्या -ध्यं, शोधनीयः -या -यं, संशोध्यः &c., परिशोधनीयः -या -यं, दातव्यः -व्या -व्यं, दानीयः -या -यं, दानयोग्यः -ग्या -ग्यं, दानोचितः -ता -तं.

Pay-day, *s.* वेतनदानदिवसः, वर्त्तनदानदिवसः, शोधनदिनं, परिशोधनदिवसः, भृतिदानदिवसः.

Payer, *s.* दाता *m.* (तृ), शोधयिता *m.*, शोधकः, परिशोधकः.

Pay-master, *s.* वेतनदाता *m.* (तृ), वर्त्तनदाता *m.*, भृतिदाता *m.*, वेतनाध्यक्षः.

Payment, *s.* शोधनं, परिशोधनं, संशोधनं, शुद्धिः *f.*, परिशुद्धिः *f.*, दानं, साधनं, सिद्धिः *f.*, अपकरणं, अपाकरणं, अपनयनं, निस्तारः, निस्तरणं, उद्धरणं; 'of a debt,' ऋणशोधनं, ऋणसिद्धिः *f.*, ऋणापाकरणं, ऋणापनयनं, ऋणमुक्तिः *f.*, ऋणापनोदनं, विगणनं, निरादेशः, आनृण्यं; 'of wages, &c.,' वेतनदानं, वर्त्तनदानं, भृतिदानं; 'non-payment,' अनपक्रिया, अनपकरणं, अनपाकरणं, अनपाकर्म्म *n.* (न्), अनपकर्म्म *n.*

Pea, *s.* कलायः, सतीनः -नकः, सतीलः -ला -लकः, सितीलकः, सातीलकः, सातिलकः, खण्डिकः, हरेणुः *m.*, वर्त्तुलः.

Peace, *s.* (Freedom from war) सन्धिः *m.*, सन्धानं, अयुद्धं, युद्धाभावः, अविग्रहः, विग्रहाभावः, असङ्ग्रामः, निर्द्वन्द्वं; 'peace and war,' सन्धिविग्रहौ *m. du.*; 'to make peace,' सन्धिं कृ, सन्धा (c. 3. -दधाति -धत्ते -धातुं); 'made peace with,' सन्धितः -ता -तं; 'wishing to make peace,' सन्धित्सुः -त्सुः -त्सु.—(State of rest or quiet) निर्वृतिः *f.*, शान्तिः *f.*, विश्रामः, विश्रान्तिः *f.*, शमः, उपशमः, प्रशान्तिः *f.*, निर्वृत्तिः *f.*, सुखं, सौख्यं, स्वस्थता, स्वास्थ्यं, समाधानं, निरुद्वेगः; 'peace of mind,' मनःशान्तिः *f.*; 'internal peace,' अन्तःसुखं.—(Harmony) ऐक्यं, सन्धिः *m.*, सख्यं, मैत्र्यं, सङ्गः, अविरोधः, विरोधाभावः.—(Freedom from commotion or riot) निरुपद्रवता, उपद्रवाभावः, निरुपप्लवता -त्वं, उपप्लवाभावः, निष्कण्टकत्वं, कण्टकाभावः, स्वस्थता, स्वास्थ्यं.—(Silence) मौनं, मौन्यं, अभाषणं, तूष्णीम्भावः; 'to hold one's peace,' तूष्णीम्भू, मौनीभू, वाचं यम् or नियम्, निःशब्दीभू; 'peace,' तूष्णीम्भव, मौनीभव, नियच्छ वाचं, शान्तं.—(Peace be with thee) स्वस्ति.

Peaceable, *a.* (Free from war, tumult, &c.) युद्धहीनः -ना -नं, सङ्ग्रामहीनः &c., विग्रहहीनः &c., निर्द्वन्द्वः -न्द्वा -न्द्वं, निरुपद्रवः -वा -वं, निरुपप्लवः &c., निरुपसर्गः -र्गा -र्गं, उपद्रवहीनः &c., निष्कण्टकः -का -कं.—(Quiet, calm) शान्तः -न्ता -न्तं, प्रशान्तः &c., अक्षुब्धः -ब्धा -ब्धं, प्रसन्नः -न्ना -न्नं, स्वस्थः -स्था -स्थं, अव्याकुलः -ला -लं, निराकुलः &c.; 'in mind,' शान्तात्मा -त्मा -त्म (न्), प्रशान्तात्मा &c., शान्तचेताः -ताः -तः (स्).—(Fond of peace, not wishing to fight) सन्धिप्रियः -या -यं, शान्तिप्रियः &c., युद्धविमुखः -खा -खं, युद्धपराङ्मुखः &c., युयुत्सारहितः -ता -तं, सन्धित्सुः -त्सुः -त्सु, अयुयुत्सुः &c., कलहपराङ्मुखः &c., कलहविमुखः &c., अकलहकारी &c.

Peaceableness, *s.* (Freedom from war) युद्धाभावः, युद्धहीनता, उपद्रवाभावः, निरुपद्रवता. *See* **Peace**. (Quietness) शान्तता, शान्तिः *f.*, प्रशान्तिः *f.*, स्वास्थ्यं, स्वस्थता.—(Aversion to fight) युद्धविमुखता, युद्धद्वेषः, कलहद्वेषः, सन्धित्सा, अयुयुत्सा.

Peaceably, *adv.* (Without war, &c.) युद्धव्यतिरेकेण, युद्धं विना, निरुपद्रवं.—(Quietly) शान्तं, शान्त्या, प्रशान्तं, शान्तिपूर्व्वं.—(With pacific measures) सामोपायैः, सामोपायेन, साम्ना.

Peace-breaker, *s.* सन्धिभेदकः, सन्धिभञ्जकः, सन्धिविघातकः.

Peaceful, peacefulness, peacefully. *See* **Peaceable**, &c.

Peace-maker, *s.* सन्धिकर्त्ता *m.* (र्त्तृ), सन्धानकर्त्ता *m.*, सन्धिविद् *m.*

Peace-making, *s.* सन्धिकरणं, सन्धानकरणं, सन्धानं.

Peace-offering, *s.* शान्तिहोमः, शान्तिनैवेद्यं, शान्तिकबलिः *m.*

Peacock, *s.* मयूरः, बर्हिणः, बर्ही *m.* (न्), शिखी *m.* (न्), शिखावलः, शिखण्डी *m.* (न्), शिखाधारः -धरः, कलापी *m.*, नीलकण्ठः, श्यामकण्ठः, शुक्लापाङ्गः, सितापाङ्गः, भुजङ्गभुक् *m.* (ज्), भुजङ्गभोजी *m.*, भुजङ्गहा *m.* (न्), भुजगाभोजी *m.*, भुजगदारणः, भुजगान्तकः, भुजगाशनः, सर्पाशनः, केकी *m.* (न्), नर्त्तकः, नर्त्तनप्रियः, मेघानन्दी *m.*, मेघसुहृद् *m.*, मेघनादानुलासी *m.* (न्), वर्षामदः, चित्रमेखलः, चित्रपिच्छकः, कुमारवाही *m.* (न्), राजसारसः, कान्तपक्षी *m.*, शुक्रभुक् *m.* (ज्), शापठिकः, दार्व्वाघाटः; 'flock of peacocks,' साधृतं; 'peacock's tail,' बर्हः -र्हं, शिखण्डः -ण्डी *m.*, पिच्छं, कलापः, शिखिपुच्छं; 'his crest,' शिखा, चूडा, शेखरं, शिखिशेखरं, शिखिशिखा; 'his train,' बर्हभारः; 'eye in his tail,' चन्द्रकः, मेचकः, गूपणा; 'his cry,' केका, मयूरनादः, मयूरशब्दः.

Peahen, *s.* मयूरी, बर्हिणी, शिखिनी, शिखण्डिनी, कलापिनी, नर्त्तकी, केकिनी, कुमारवाहिनी.

Peak, *s.* (Of a mountain, &c.) शिखरं, शृङ्गं, कूटः, ककुद् *f.*, ककुदः -दं, चूडा, पर्व्वताग्रं, शैलाग्रं, अद्रिशृङ्गं, दशनः, वानरायणः, टङ्कः; 'three peaks,' शृङ्गाटकं; 'having three peaks,' त्रिकूटः -टा -टं, त्रिककुद् *m. f. n.*—(Point or end of any thing) अग्रं, शिखरं.

Peaked, *a.* शिखरी -रिणी -रि (न्), शृङ्गी -ङ्गिनी &c., शृङ्गवान् -वती -वत् (त्), कूटवान् &c., सकूटः -टा -टं, ककुद्मान् &c., ककुद्मी &c., शेखरितः -ता -तं.—(Having a sharp point) तीक्ष्णाग्रः -ग्रा -ग्रं, सूच्यग्रः &c.

Peal, *s.* (Of bells) घण्टाध्वनिः *m.*, घण्टाशब्दः.—(Loud sound) महाध्वनिः *m.*, उच्चध्वनिः *m.*, महाशब्दः, उच्चशब्दः.

To **peal**, *v. n.* उच्चशब्देन ध्वन् (c. 1. ध्वनति -नितुं) or स्वन् (c. 1. स्वनति -नितुं) or क्वण् (c. 1. क्वणति -णितुं), महाध्वनिं कृ, उच्चध्वनिं कृ, महाशब्दं कृ, उच्चशब्दं कृ.

Pear, *s.* (The Indian prickly pear) विदरं, विघ्नसारकं.

Pearl, *s.* मुक्ता, मौक्तिकं -का, शुक्तिजं, शौक्तेयं, शुक्तिबीजं, मुत्यं, मुक्ताफलं, मुक्तिका, तौतिकं, मञ्जरं -री -रिः *f.*, हेमबलं; 'mother of pearl,' शुक्तिवधूः *f.*, मौक्तिकप्रसवा, मुक्ताप्रसूः *f.*, मुक्तास्फोटः; 'pearl-necklace,' मुक्तावलिः -ली *f.*, मुक्ताहारः, मौक्तिकहारः, मौक्तिकाहारः, मुक्तालता, मुक्ताकलापः, मुक्ताप्रलम्बः, मणिसरं; 'pearl in the head of an elephant,' गजमुक्ता.

Pearled, *a.* मुक्तालङ्कृतः -ता -तं, मुक्ताखचितः &c., मुक्तापिनद्धः -द्धा -द्धं.

Pearl-oyster, *s.* शुक्तिः *f.*, शुक्तिका, मौक्तिकशुक्तिः *f.*, मुक्तागारं, मुक्ताप्रसूः *f.*, मौक्तिकप्रसवा, मुक्तास्फोटः, तौतिकं; 'its shell,' शुक्तिपुटं, शुक्तिपेशी.

Pearly, *a.* मौक्तिकः -की -कं, मुक्तामयः -यी -यं, मुक्ताप्रचुरः -रा -रं, मुक्तापूर्णः -र्णा -र्णं.—(Resembling pearls) मुक्तोपमः -मा -मं, मुक्तातुल्यः -ल्या -ल्यं, मुक्ताशुभ्रः -भ्रा -भ्रं, मुक्ताधवलः -ला -लं, मुक्तागौरः -रा -री -रं.

Peasant, *s.* ग्रामवासी *m.* (न्), ग्राम्यजनः, ग्रामी *m.* (न्), ग्रामीयः, क्षेत्रिकः, क्षैत्रिकः, क्षेत्री *m.* (न्), क्षेत्राजीवः, कैषिकः, कृषकः, कर्षकः, कृषिकः, कृषिजीवी *m.*, कृषीवलः, कार्षकः, गोपः, गोपालः, गावध्वः -क्षकः, जानपदः, कुटुम्बी *m.*, पशुपालकः.

Peasantry, *s.* ग्राम्यलोकः, क्षेत्रजनता, क्षेत्रिकजनसमूहः.

Pease, *s.* कलायः, सतीलः -लकः, सतीनः -नकः &c. *See* **Pea**.

PEA-SHELL, PEAS-COD, *s.* कलायपुटं, कलायपेशी, शमिः -मी *f.*

PEAS-PORRIDGE, PEAS-SOUP, *s.* सूपं, यूषः -षं, जुष्ककः.

PEBBLE, PEBBLE-STONE, *s.* शर्करा, चूर्णखण्डः, कर्करखण्डः, उपलः, कर्करोपलः, क्षुद्रप्रस्तरः, सूक्ष्मप्रस्तरः, शिला, क्षुद्रशिला; 'pebble sacred to Vishnu,' शालग्रामः, शालग्रामः.

PEBBLY, PEBBLED, *a.* शर्करावान् -वती -वत् (त्), शर्करिलः -ला -लं, शार्करीयः -यी -यं, शार्करिकः -की -कं, सशर्करः -रा -रं, चूर्णखण्डपूर्णः -र्णा -र्णं.

PECCABILITY, *s.* पापाधीनता, पापक्षमता, पापवशता, पापसम्भवः.

PECCABLE, *a.* पापाधीनः -ना -नं, पापक्षमः -मा -मं, पापवशः -शा -शं, शक्यपापः &c., सम्भाव्यपापः &c., पापसम्भवधर्म्मा -र्म्मा -र्म्म (न्), पापायत्तः -त्ता -त्तं.

PECCADILLO, *s.* अल्पदोषः, अल्पापराधः, क्षुद्रापराधः.

PECCANCY, *s.* दोषः, सदोषत्वं, विकारः, विकृतिः *f.*

PECCANT, *a.* (Criminal) अपराधी -धिनी -धि (न्), दोषी -षिणी &c., सापराधः -धा -धं, सदोषः -षा -षं.—(Vibrated) दोषयुक्तः -क्ता -क्तं, दूषितः -ता -तं, विकृतः -ता -तं; 'peccant state of the humors,' दोषः.

PECCAVI, *s.* दोषस्वीकारः, अपराधस्वीकारः, दोषाङ्गीकारः; 'to cry peccavi,' अपराद्धोऽहम् इति दोषं स्वीकृ.

PECK, *s.* आढकपादः, द्रोणपादः. *See* MEASURE.

To PECK, *v. a.* (Strike with the beak) चञ्च्वा प्रतुद् (c. 6. -तुदति -तोत्तुं) or आतुद् or तुद्, चञ्च्वा लिख् (c. 6. लिखति, लेखितुं) or प्रलिख् or अभिहन् (c. 2. -हन्ति -न्तुं) or आहन् or अभ्याहन्.—(Pick up grain, &c., with the beak) धान्यादि चञ्च्वा ग्रह् (c. 9. गृह्णाति, ग्रहीतुं) or आदा (c. 3. -ददाति -दत्ते -दातुं) or अवलिह् (c. 2. -लेढि -ढुं) or खाद् (c. 1. खादति -दितुं).

PECKED, *p. p.* प्रतुन्नः -न्ना -न्नं, चञ्चुप्रतुन्नः &c., चञ्चुलिखितः -ता -तं, चञ्चुहतः -ता -तं, मुखोपहतः &c.—(Picked up or eaten with the beak) चञ्च्वा गृहीतः -ता -तं or खादितः &c. or जग्धः -ग्धा -ग्धं or अवलीढः -ढा -ढं.

PECKER, *s.* (Bird that pecks) प्रतुदः.

PECTORAL, *a.* (Relating to the breast) उरःसम्बन्धी &c., उरस्यः -स्या -स्यं, वक्षःसम्बन्धी &c.—(Relieving the lungs) कासघ्नः -घ्नी -घ्नं, कासशमकः -का -कं, कफनाशकः &c., श्लेष्मघ्नः -घ्नी -घ्नं.

PECTORAL, *s.* कासघ्नं, कासशमकं, कफघ्नं, श्लेष्मघ्नं.

To PECULATE, *v. n.* ग्रस् (c. 1. ग्रसते -सितुं), निक्षिप्तद्रव्यं छलेन or निह्नवेन स्वीयं कृ or स्वीकृ, परद्रव्यं छलेन स्वकीयं कृत्वा हृ (c. 1. हरति, हर्तुं) or अपहृ or मुष् (c. 9. मुष्णाति, मोषितुं), मोषणं कृ, मूषणं कृ.

PECULATION, *s.* ग्रसनं, छलेन निक्षिप्तद्रव्यहरणं or न्यस्तद्रव्यापहारः, मोषणं, मूषणं, स्तेयकरणं.

PECULATOR, *s.* मोषकः, मूषणकृत्, स्तेयकृत्, निक्षिप्तद्रव्यहारी *m.* (न्), चाटः.

PECULIAR, *a.* (Appropriate, exclusively own) स्व in comp., स्वीयः -या -यं, स्वकीयः -या -यं, आत्म in comp., आत्मीयः -या -यं, आत्मकीयः -या -यं, स्वकः -का -कं, निज in comp., निजः -जा -जं, आत्मभूतः -ता -तं, अव्यापकः -का -कं, अव्यापी -पिनी -पि (न्), अव्याप्यः -प्या -प्यं, अनन्यसम्बन्धी &c., असाधारणः -णा -णी -णं, असामान्यः -न्या -न्यं, अनन्यवर्त्ती, तन्मात्रवर्त्ती &c., तन्मात्राधीनः -ना -नं, यथास्वः -स्वा -स्वं; 'peculiar duty,' स्वधर्म्मः.—(Particular) विशेष in comp., विशेषकः -का -कं, विशेषणः -णा -णं, विशिष्टः -ष्टा -ष्टं, सविशेषः -षा -षं, विशेषवान् -वती -वत् (त्), अवच्छेदकः -का -कं, विच्छेदकः &c., परिच्छेदकः &c., असाधारणः -णा -णी -णं, असामान्यः -न्या -न्यं; 'peculiar mark,' विशेषलक्षणं; 'peculiar condition,' दशाविशेषः.—(Natural, inherent) स्वाभाविकः -की -कं, स्वभावजः -जा -जं, निजः &c., सहजः &c.

PECULIAR, *s.* (Exclusive possessions) निजधनं, स्वधनं, आत्मधनं, निजस्वं, स्वस्वं, असाधारणधनं, असामान्यधनं, अनन्यस्वामिकधनं.

PECULIARITY, *s.* विशेषः, विशेषणं, विशेषकः -कं, विशेषधर्म्मः, विशेषगुणः, विशेषलक्षणं, स्वधर्म्मः, स्वगुणः, स्वलक्षणं, स्वभावः, विशेषभावः, धर्म्मः, गुणः, लक्षणं, उपाधिः *m.*, असाधारण्यं, असाधारणता, अनन्यवर्त्तित्वं.

PECULIARLY, *adv.* विशेषतस्, सविशेषं, विशेषेण, असाधारणतस्, असामान्यतस्, स्वतस्, यथास्वं.

PECUNIARY, *a.* (Pertaining to money) धन in comp., धनिकः -का -कं, धनसम्बन्धी &c., आर्थिकः -की -कं, अर्थसम्बन्धी &c., द्रव्य in comp., द्रव्यसम्बन्धी &c., धनविषयः -या -यं.—(Consisting of money) धनरूपः -पा -पं, द्रव्यरूपः &c.

PEDAGOGUE, *s.* बालकाध्यापकः, अर्भकाध्यापकः, बालशिक्षकः, बालपाठकः, शिशुपाठकः, बालोपदेशकः.

PEDAL, *a.* पादिकः -की -कं, पादी -दिनी -दि (न्), पदिकः &c., पादसम्बन्धी &c., पादविषयकः -का -कं.

PEDAL, *s.* पादसञ्चारितं वाद्योपकरणं.

PEDANT, *s.* पण्डितम्मन्यः, पण्डितमानी *m.* (न्), पाण्डित्याभिमानी *m.*, विद्याभिमानी *m.*, विद्यागर्व्वितः, पाण्डित्यगर्व्वी *m.*, विद्यासमुन्नद्धः, विद्यादाम्भिकः.

PEDANTIC, PEDANTICAL, *a.* पाण्डित्यदर्शकः -का -कं, पाण्डित्यदर्शी -र्शिनी -र्शि (न्), समुन्नद्धः -द्धा -द्धं.

PEDANTICALLY, *adv.* पण्डितम्मन्यवत्, विद्यागर्व्वितवत्, विद्याभिमानेन.

PEDANTRY, *s.* पण्डितम्मन्यता, पाण्डित्याभिमानं, विद्याभिमानं, दम्भार्थं पाण्डित्यदर्शनं or विद्यादर्शनं.

To PEDDLE, *v. a.* (Be occupied in trifles) तुच्छविषयेषु or लघुविषयेषु व्यापृ in pass.—(Travel about on foot and retail goods) पादभ्रमणं कृत्वा तुच्छवाणिज्यं कृ or क्षुद्रवाणिज्यं कृ.

PEDDLER, *s.* क्षुद्रभाण्डविक्रयार्थं पादभ्रमणकृत् *m.*, तुच्छद्रव्यविक्रेता *m.* (तृ), तुच्छवाणिज्यकारी *m.* (न्).

PEDDLERY, *s.* तुच्छभाण्डकं, तुच्छभाण्डानि *n. pl.*, तुच्छपण्यानि *n. pl.*

PEDESTAL, *s.* स्तम्भतलः -लं, स्तम्भपदं, स्तम्भपादः, स्तम्भाधोभागः, पादनिकेतः, फलकः -कं, मञ्चः.

PEDESTRIAN, *a.* (Going on foot) पादचारी -रिणी -रि (न्), पादगामी -मिनी &c., पादगः -गा -गं, पदगः -गा -गं, पादव्राजकः -का -कं, पन्नः -न्ना -न्नं, पत्कापी -पिणी -पि (न्), चरणगामी &c.—(Performed on foot) पाद in comp., पादिकः -की -कं, पदिकः &c.

PEDESTRIAN, *s.* पदगः, पदिकः, पत्तः, पदातिः *m.*, पदातिकः, पादातिकः, पादातः, पत्तिः *m.*, पादगामी *m.* (न्), पादचारी *m.* (न्).

PEDESTRIANISM, *s.* पादचारः, पादगमनं, पदगमनं, पादभ्रमणं.

PEDICLE, *s.* मञ्जरिः -री *f.*, वल्लरिः -री *f.*, वल्लिका.—(Foot-stalk) वृन्तं, पुष्पबन्धनं, प्रसवबन्धनं.

PEDICULAR, PEDICULOUS, *a.* यूकालः -ला -लं. *See* LOUSY.

PEDIGREE, *s.* (Lineage) वंशावलिः -ली *f.*, वंशपरम्परा, वंशविततिः *f.*, वंशः, अन्वयः, सन्ततिः *f.*, सन्तानः, कुलं.—(List of a line of ancestors) वंशावलिपत्रं, वंशपरिसंख्यापत्रं, पितृपितामहादिपरिसंख्या.—(Account of ancestors) वंशचरितं, वंशानुचरितं.

PEDILUVIUM, PEDILUVY, *s.* पादक्षालनं, पादप्रक्षालनं, पादधावनं.

PEDLER, PEDLERY, *s.* *See* PEDDLER, PEDDLERY.

PEDOBAPTISM, *s.* शिशुमज्जनं, बालकमज्जनं, शैशवकाले जलसंस्कारेण

ख्रीष्टीयधर्म्मप्रवेशनं or ख्रीष्टीयानां मध्ये प्रवेशनं.

Pedobaptist, *s.* शिशुमज्जनमतपक्षी *m.*, बालकमज्जनमतधारी *m.*

Pedometer, *s.* पादन्यासमापकयन्त्रं, पदक्रमपरिमापकयन्त्रं.

Peduncle, *s.* वृन्तं, मञ्जरिः -री *f.*, प्रसवबन्धनं, पुष्पबन्धनं.

To peel, *v. a.* त्वच (nom. त्वचयति -यितुं), निस्त्वचीकृ, त्वक्परिपुटनं कृ, त्वचं निष्कृष् (c. 1. -कर्षति -क्रष्टुं) or निर्हृ (c. 1. -हरति -हर्तुं), वल्क (nom. वल्कयति -यितुं), वल्कं or वल्कलं निर्हृ, निर्वल्कलीकृ, त्वक्ष् (c. 1. त्वक्षति -क्षितुं), निस्तुषीकृ, निस्तुष (nom. निस्तुषयति -यितुं), निश्चर्म्म (nom. निश्चर्म्मयति -यितुं).

To peel, *v. n.* निस्त्वचीभू, निस्तुषीभू, निर्वल्कलीभू, शकलीभू.

Peel, *s.* त्वक् *f.* (च्), त्वचा -चं, वल्कलं, वल्कं, वल्कुतं, चर्म्म *n.* (न्), शल्कं -ल्कलं, शल्कं, छल्लिः -ल्ली *f.*; 'having much peel,' त्वचीयान् -यसी -यः (स्) त्वचिष्ठः -ष्ठा -ष्ठं.

Peeled, *p. p.* निस्त्वच -चा -चं, निस्त्वचीकृतः -ता -तं, निस्त्वक् *m. f. n.* (च्), हृतत्वक् *m. f. n.*, परिपुटितः -ता -तं, निस्तुषः -षा -षं, निस्तुषितः -ता -तं.

Peeling, *s.* त्वक्परिपुटनं, परिपुटनं, निस्त्वचीकरणं, त्वक्षणं.

To peep, *v. n.* (Look narrowly or slyly) सूक्ष्मं निरूप् (c. 10. -रूपयति -यितुं) or निरीक्ष् or निर्वर्ण्, प्रच्छन्नस्थानात् सूक्ष्मनिरूपणं कृ, प्रच्छन्नछिद्रात् सूक्ष्मं निरीक्ष्.—(Come forth from concealment, appear gradually) प्रच्छन्नस्थानात् or गूढस्थानात् शनैः शनैर् निर्गम् or प्रतिभा (c. 2. -भाति -तुं) or निर्भा or प्रादुर्भू or प्रभू or प्रकाश or आविर्भू or दृश् in pass., or लक्ष् in pass.

Peep, *s.* (Curious or sly look) सूक्ष्मनिरूपणं, सूक्ष्मवीक्षणं, सूक्ष्मवीक्षितं, सूक्ष्मदृष्टिः *f.*, प्रच्छन्नस्थानात् सूक्ष्मनिरीक्षा -क्षणं.—(First appearance) पूर्व्वदर्शनं, पूर्व्वप्रकाशनं, पूर्व्वप्रतिभा; 'of day,' प्रभातं, पूर्व्वप्रभा.

Peep-hole, peeping-hole, *s.* छिद्रं, प्रच्छन्नछिद्रं, निरूपणयोग्यं प्रच्छन्नछिद्रं.

Peeping, *s.* प्रच्छन्नस्थानात् सूक्ष्मनिरीक्षणं, प्रच्छन्नछिद्रात् सूक्ष्मवीक्षणं.

Peer, *s.* (One of the same rank) समपदस्थः, समानपदस्थः, तुल्यपदस्थः.—(Fellow, associate) वयस्यः, सचिवः, सहायः.—(Nobleman) कुलीनजनः, शिष्टजनः &c.

To peer, *v. n.* (Appear). *See* the word. (Look narrowly). *See* *To* peep.

Peerage, *s.* (Rank of a peer) कुलीनपदं, कुलीनपदविः *f.*, शिष्टपदं,—(Body of peers) कुलीनलोकः, कुलीनजनसमूहः, कुलीनजनाः *m. pl.*, शिष्टजनाः *m. pl.*, कौलेयं, राजन्यकं.

Peerer, *s.* सूक्ष्मनिरूपकः, सूक्ष्मनिरीक्षकः, वानरदृष्टिः *m.*

Peeress, *s.* कुलीना, कुलीनस्त्री, शिष्टस्त्री, कुलीनपदस्था.

Peerless, *a.* अनुपमः -मा -मं, निरुपमः &c., अप्रतिमः &c., अप्रतिरूपः -पा -पं, अतुलः -ला -लं, अतुल्यः -ल्या -ल्यं, अतुलनीयः -या -यं, अद्वितीयः -या -यं, असहायः -या -यं, सर्व्वोत्तमः -मा -मं, सर्व्वोत्कृष्टः -ष्टा -ष्टं.

Peevish, *a.* प्रतीपः -पा -पं, कर्कशः -शा -शं, वक्रः -क्रा -क्रं, कर्कशस्वभावः -वा -वं, कर्कशशीलः -ला -लं, वक्रभावः &c., वक्रशीलः &c., सदावक्रः &c., रूक्षशीलः &c., दुष्प्रकृतिः -तिः -ति.

Peevishly, *adv.* प्रतीपवत्, कर्कशवत्, सकार्कश्यं, वक्रभावेन.

Peevishness, *s.* कर्कशता, कार्कश्यं, कर्कशशीलता, वक्रशीलता, वक्रभावः, वक्रस्वभावः, स्वभाववक्रता, प्रकृतिवक्रता, स्वभावरूक्षता.

Peg, *s.* कीलः -लकः, शङ्कुः *m.*, नागदन्तः -न्तकः; 'of a lute,' कूणिका.

To peg, *v. a.* कील (nom. कीलयति -यितुं), कीलकेन बन्ध् (c. 9. बध्नाति, बन्द्धुं).

Pegasus, *s.* (In astronomy) प्रोष्ठपदा, भाद्रपदा.

Pegged, *p. p.* कीलितः -ता -तं, कीलबद्धः -द्धा -द्धं, कीलकबद्धः &c.

Pelf, *s.* अन्यायार्जितद्रव्यं, वृजिनार्जितद्रव्यं, अन्यायोपार्जितधनं.

Pellet, *s.* गुटिका, गुलिका, गुलिः -ली *f.*, गुडिका.

Pellicle, *s.* तनुत्वक् *f.* (च्), सूक्ष्मत्वक् *f.*, तनुचर्म्म *n.* (न्), सूक्ष्मचर्म्म *n.*, पटलं, पुटः -टं, सूक्ष्मपटलं.

Pell-mell, *s.* सङ्कुलं, सङ्कीर्णं, साङ्कर्य्येण, अक्रमेण, क्रमेण विना.

Pellucid, *a.* स्वच्छः -च्छा -च्छं, निर्म्मलः -ला -लं, विमलः &c., अमलः &c., विशदः -दा -दं, प्रसन्नः -न्ना -न्नं, अच्छः &c., शुद्धः -द्धा -द्धं, स्फटिकप्रभः -भा -भं, किरणभेद्यः -द्या -द्यं, दृष्ट्यरोधकः -का -कं, अदृष्टिरोधकः &c.

Pellucidity, pellucidness, *s.* स्वच्छता, निर्म्मलता, नैर्म्मल्यं, विमलता, वैमल्यं, विशदता, वैशद्यं, अच्छता, प्रसादः, प्रसन्नता, किरणभेद्यता, दृष्ट्यरोधकता.

Pelt, *s.* (Hide) पशुचर्म्म *n.* (न्), पशुलोम *n.* (न्), दृतिः *f.*, अजिनं, कृत्तिः *f.*—(Blow, throw) प्रहारः, आघातः, क्षेपः -पणं.

To pelt, *v. a.* तड् (c. 10. ताडयति -यितुं), प्रहृ (c. 1. -हरति -हर्तुं), हन् (c. 2. हन्ति -न्तुं), अभिहन्, आहन्, अभ्याहन्; 'with stones,' प्रस्तरैः प्रहृ, प्रस्तराघातं कृ, प्रस्तरान् क्षिप् (c. 6. क्षिपति, क्षेप्तुं) or पत् (c. 10. पातयति -यितुं).

To pelt, *v. n.* (Rain hard) धारासारेण or धाराभ्यापातेन वृष्, उपलान् इव वृष् or पत्, तीव्रं वृष्, बलवद् वृष्.

Pelt-monger, *s.* पशुचर्म्मविक्रयी *m.* (न्), पशुलोमव्यापारी *m.*

Pelvis, *s.* (In anatomy) वस्तिदेशः, वस्तिप्रदेशः.

Pen, *s.* (Instrument for writing) लेखनी, आलेखनी, कलमः, तूलिः *f.* -लिका, अक्षरतूलिका, वर्णिका, वर्णाङ्का, श्रीकरणः, मसिपथः.—(Inclosure, coop) अवरोधः -धकं, व्रजः; 'for cattle,' गोव्रजः.

To pen, *v. a.* (Write, commit to paper) लिख् (c. 6. लिखति, लेखितुं), लेख्यारूढं -ढां कृ.—(Shut up in a pen) व्रजे निरुध् or अवरुध्, व्रजं प्रविश् (c. 10. -वेशयति -यितुं).

Penal, *a.* (Pertaining to punishment) दण्डसम्बन्धी -न्धिनी &c. दण्डविषयकः -का -कं, ताडनसम्बन्धी &c., शासनसम्बन्धी &c., दाण्डः -ण्डी -ण्डं, दाण्डिकः -की -कं, वैनयिकः -की -कं.—(Subject to it) दण्डनीयः -या -यं, दाण्ड्यः -ण्ड्या -ण्ड्यं, दण्डयोग्यः -ग्या -ग्यं, दण्डार्हः -र्हा -र्हं.

Penalty, *s.* दण्डः, शासनं, अनुशासनं, शिष्टिः *f.*—(Pecuniary) दण्डः, धनदण्डः, अर्थदण्डः, साहसं; 'to exact penalty,' दा in caus. (दापयति -यितुं).

Penance, *s.* तपस् *n.*, तपस्या, प्रायश्चित्तं, कृच्छ्रं -च्छ्रः, तपश्चर्य्या, कायक्लेशः, देहक्लेशः, देहदण्डः, कायतपनं, यमः, पावनं, व्रतं, प्रगाढं; 'general penance for all sins,' सर्व्वप्रायश्चित्तं; 'mortal or extreme penance,' देहान्तप्रायश्चित्तं. The different kinds of penance as described in Manu, Book XI. v. 211, &c., are: प्राजापत्यं, सान्तपनं, अतिकृच्छ्रं, तप्तकृच्छ्रं, पराकः, चान्द्रायणं; 'of these the last or 'lunar penance,' चान्द्रायणव्रतं, चान्द्रायणविधानं is the most celebrated; it consists in diminishing the food by one mouthful each day during the fortnight of the moon's wane, and increasing it in the same proportion during the other fortnight, eating fifteen mouthfuls on the day of the opposition, and fasting entirely on the day of conjunction. 'To perform penance,' तपस् तप् in pass. (तप्यते), सन्तप्, तपस् (nom. तपस्यति), तपस् or व्रतं चर् (c. 1. चरति -रितुं), or आचर् or अनुष्ठा or आस्था, प्रायश्चित्त (nom. प्रायश्चित्तीयते).

Penates, *s.* कुलदेवताः *f. pl.*, गृहदेवताः *f. pl.*, गृह्या देवताः *f. pl.*, आराध्यदेवताः *f. pl.*; 'worship of them,' कुलदेवतार्च्चा.

PENCHANT, *s.* अभिरुचिः *f.*, रुचिः *f.*, अनुरक्तिः *f.*, अनुरागः, अभिलाषः.

PENCIL, *s.* लेखनी, आलेखनी, ईषिका, तूलिका, चित्रवर्त्तिका, लेख्यचूर्णिका, वर्त्तिका, कूर्चिका.

To PENCIL, *v. a.* लिख् (c. 6. लिखति, लेखितुं), आलिख्, ईषिकया लिख् or अङ्क् (c. 10. अङ्कयति -यितुं).

PENDANT, *s.* प्रलम्बः -म्बकः -कं, लोलकः.—(Ear-ring) कुण्डलं.

PENDENT, *a.* लम्बः -म्बा -म्बं, प्रलम्बः &c., लम्बमानः -ना -नं, प्रलम्बमानः &c., विलम्बमानः &c., अवलम्बितः -ता -तं, प्रलम्बितः &c., आलम्बितः &c., लम्बितः &c., अवलम्बी -म्बिनी -म्बि (न्), विलम्बी &c., आलम्बी &c., प्रलम्बी &c., लम्बी &c.; 'pendent branch,' अवरोहः.

PENDING, *a.* अनिर्णीतः -ता -तं, अजातनिर्णयः -या -यं, अनिश्चितः -ता -तं, अज्ञातनिश्चयः -या -यं, असिद्धः -द्धा -द्धं, अनिष्पन्नः -न्ना -न्नं, अनिर्धारितः &c., अजातनिर्धारः -रा -रं, अतीरितः -ता -तं, विलम्बितः -ता -तं.

PENDULOSITY, PENDULOUSNESS, *s.* लम्बता -त्वं, प्रलम्बता -त्वं, विलम्बः.

PENDULOUS, *a.* लम्बः -म्बा -म्बं, प्रलम्बः &c., लोलः -ला -लं, लोलमानः -ना -नं, आन्दोलितः -ता -तं, लम्बी -म्बिनी -म्बि (न्). *See* PENDENT.

PENDULUM, *s.* दोला, लोलकः, आन्दोलकसूत्रं.

PENETRABILITY, *s.* वेध्यता, वेधनीयता, भेद्यता, प्रवेश्यता, व्याप्यता.

PENETRABLE, *a.* वेध्यः -ध्या -ध्यं, वेधनीयः -या -यं, व्यध्यः -ध्या -ध्यं, भेद्यः -द्या -द्यं, भेदनीयः -या -यं, प्रवेशनीयः -या -यं, प्रवेश्यः -श्या -श्यं, प्रवेष्टव्यः -व्या -व्यं, वेधनार्हः -र्हा -र्हं, भेदार्हः &c., भेदयोग्यः -ग्या -ग्यं, भेदशक्यः -क्या -क्यं, वेधनशक्यः &c.—(That may be pervaded) व्याप्यः -प्या -प्यं.

PENETRANT, *a.* वेधकः -का -कं, प्रवेशकः &c. *See* PENETRATIVE.

To PENETRATE, *v. a.* or *n.* व्यध् (c. 4. विध्यति, व्यद्धुं), परिव्यध्, प्रविश् (c. 6. -विशति -वेष्टुं), निविश्, आविश्, विश्, भिद् (c. 7. भिनत्ति, भेत्तुं), निर्भिद्, छिद्र् (c. 10. छिद्रयति -यितुं), छिद् (c. 7. छिनत्ति, छेत्तुं), गाह् (c. 1. गाहते -हितुं, गाढुं), निखन् (c. 1. -खनति -ते -नितुं), वेधनं कृ, प्रवेशं कृ.—(Pervade) व्याप्.—(Read the meaning) अर्थभेदं कृ, मर्म्मभेदं कृ, अर्थबोधं कृ, अर्थं गम् or बुध्.

PENETRATED, *p. p.* विद्धः -द्धा -द्धं, वेधितः -ता -तं, भिन्नः -न्ना -न्नं, प्रविष्टः -ष्टा -ष्टं, छिद्रितः &c., व्याप्तः -प्ता -प्तं.

PENETRATION, *s.* (Act of piercing or entering) वेधनं, वेधः, प्रवेशः -शनं, निवेशः -शनं, आवेशः -शनं, वेशः -शनं, भेदः -दनं.—(Pervading) व्यापनं, व्याप्तिः *f.*—(Penetrating the meaning) अर्थभेदः, अर्थबोधः, मर्म्मभेदः.—(Acuteness, shrewdness) बुद्धिसूक्ष्मता, सूक्ष्मबुद्धित्वं, सूक्ष्मबुद्धिः *f.*, तीक्ष्णबुद्धित्वं, बुद्धितीक्ष्णता, सूक्ष्मदृष्टिः *f.*, दूरदृष्टिः *f.*, कुशाग्रमतित्वं, कुशाग्रबुद्धित्वं, कुशाग्रीयबुद्धिः *f.*, विदग्धता, वैदग्ध्यं; 'a man of penetration,' सूक्ष्मबुद्धिः *m.*, मर्म्मज्ञः, मर्म्मवेदी *m.* (न्), मर्म्मिकः, मार्म्मिकः, मर्म्मविद् *m.*

PENETRATIVE, PENETRATING, *a.* (Entering, piercing) वेधकः -का -कं, वेधी -धिनी -धि (न्), भेदकः &c., भेदी &c., प्रवेशकः -का -कं, आवेशिकः -की -कं, वेशकः -का -कं, भेदकारी &c., प्रवेशकारी &c.; 'penetrating deep,' गम्भीरवेधः -धा -धं.—(Pervading) व्यापी &c., व्यापकः -का -कं.—(Acute, discerning) सूक्ष्मबुद्धिः -द्धिः -द्धि, तीक्ष्णबुद्धिः &c., तीक्ष्णमतिः -तिः -ति, कुशाग्रबुद्धिः &c., कुशाग्रीयमतिः &c., प्रखरबुद्धिः &c., अर्थभेदी &c., विषयवेधकः &c., मर्म्मभेदी &c., मर्म्मवेदी &c., मर्म्मिकः &c., सूक्ष्मदर्शी &c., दूरदर्शी &c., सूक्ष्मदृष्टिः -ष्टिः -ष्टि, दूरदृष्टिः &c., अव्यक्तमार्गवित् *m.f.n.*

PENINSULA, *s.* द्वीपप्रायः -यं, द्वीपकल्पः, द्वीपः, प्रायो जलवेष्टितभूमिः *f.*; 'of India,' दक्षकः.

PENINSULAR, *a.* द्वीपकल्पसम्बन्धी &c., द्वीपकल्पस्थः -स्था -स्थं, द्वीपकल्परूपः -पा -पं, द्वीपकल्पाकारः -रा -रं, प्रायो or प्रायशो जलवेष्टितः -ता -तं.

PENIS, *s.* शिश्नः, पुंलिङ्गं, पुंश्चिह्नं, लिङ्गं, ध्वजः, उपस्थः, जघन्यं, नरङ्गं, पुरुषाङ्गं, चर्म्मदण्डः -ण्डं; 'its glans,' मणिः *m.f.*, लिङ्गाग्रं, शिश्नाग्रं.

PENITENCE, PENITENCY. *s.* पश्चात्तापः, अनुतापः, अनुशोकः, अनुशोचनं, पश्चात्तापबुद्धिः *f.*, अनुतापबुद्धिः *f.*, अनुशयः, सन्तापः, विप्रतिसारः, खेदः, पापखेदः, पापसन्तापः, दुष्कृतखेदः, पापशोकः, दुष्कृतखेदः, काप्यकारः.

PENITENT, *a.* पश्चात्तापी -पिनी -पि (न्), अनुतापी &c., कृतपश्चात्तापः -पा -पं, जातपश्चात्तापः &c., सञ्जातपश्चात्तापः &c., जातानुतापः &c., पश्चात्तापयुक्तः -क्ता -क्तं, पश्चात्तापबुद्धिः -द्धिः -द्धि, अनुतापबुद्धिः &c., अनुशोचकः -का -कं, अनुशयी &c., काप्यकरः -रा -रं.

PENITENTIAL, *a.* पश्चात्तापसूचकः -का -कं, पश्चात्तापबोधकः -का -कं, पश्चात्तापवाचकः -का -कं, पश्चात्तापरूपः -पा -पं, पश्चात्तापार्थकः &c., अनुतापार्थकः &c., पश्चात्तापजनितः -ता -तं, अनुतापजनितः &c.

PENITENTIALLY, *adv.* सपश्चात्तापं, सानुतापं, पश्चात्तापबुद्ध्या.

PENITENTIARY, *s.* (House of correction or penance) प्रायश्चित्तशाला, प्रायश्चित्तगृहं, प्रायश्चित्तस्थानं, कारागारं.—(Prescriber of penance) प्रायश्चित्तविधायकः, प्रायश्चित्तनिर्देशकः.

PENITENTLY, *adv.* सपश्चात्तापं, पश्चात्तापेन, पापखेदपूर्व्वं, सखेदं.

PENKNIFE, *s.* कलमच्छेदनी, कलमकर्त्तनी, कलमकृन्तत्रं.

PENMAN, *s.* लेखनपटुः, लिखनकुशलः, लेखननिपुणः, लेखकः, लिपिज्ञः, लिखनज्ञः, लिपिकरः.

PENMANSHIP, *s.* (Art of writing) लिखनविद्या, लेखनविद्या, लिपिविद्या, लिपिः *f.*—(Good writing) सुलिपिः *f.*, सल्लिपिः *f.*, सुलिखनं.

PENNANT, PENNON, *s.* पताका, सूक्ष्मपताका, केतुवसनः, ध्वजः.

PENNATE, PENNATED, *a.* सपक्षः -क्षा -क्षं, पक्षी -क्षिणी -क्षि (न्), पक्षयुक्तः -क्ता -क्तं, पक्षवान् -वती -वत् (त्), पक्षविशिष्टः -ष्टा -ष्टं.

PENNILESS, *a.* निर्धनः -ना -नं, अधनः -ना -नं, धनहीनः -ना -नं, द्रव्यहीनः &c., निष्काञ्चनः -ना -नं, निष्किञ्चनः -ना -नं, अकाञ्चनः &c.

PENNY, *s.* ताम्रमुद्रा, क्षुद्रमुद्रा, मुद्रापादः.

PENSILE, *a.* लम्बः -म्बा -म्बं, लम्बमानः -ना -नं. *See* PENDENT, *a.*

PENSION, *s.* वृत्तिः *f.*, वार्षिकवृत्तिः *f.*, वार्षिकं, जीर्णसेवकवृत्तिः *f.*, जीर्णभृत्यवृत्तिः *f.*, जीर्णसेवकवेतनं, कर्म्मनिवृत्तवेतनं, कर्म्मनिवृत्तमूल्यं, सेवानिवृत्तवेतनं, भूतसेवामूल्यं, वृत्तसेवापेक्षकवेतनं.

To PENSION, *v. a.* वृत्तिं दा, वार्षिकवृत्तिं दा, जीर्णसेवकस्य वृत्तसेवामपेक्ष्य वार्षिकवेतनं दा or वार्षिकमूल्यं दा.

PENSIONER, *s.* वृत्तिभोगी *m.* (न्), वार्षिकवृत्तिभोगी *m.*, वृत्तिधारी *m.*, वेतनग्राही कर्म्मनिवृत्तसेवकः.—(Dependant) आश्रितः, अनुजीवी *m.* उपजीवी *m.* (न्).

PENSIVE, *a.* ध्यानपरः -रा -रं, चिन्तापरः &c., ध्यानस्थः -स्था -स्थं, ध्यायन् -यन्ती -यत् (त्), सचिन्तः -न्ता -न्तं, चिन्ताक्रान्तः -न्ता -न्तं, सखेदध्यानस्थः &c., सखेदचिन्तकः &c., उदासीनः -ना -नं, उदासः -सा -सं, उन्मनस्कः -स्का -स्कं, भावनायुक्तः -क्ता -क्तं, समाधिस्थः &c.

PENSIVELY, *adv.* सचिन्तं, ध्यानपूर्व्वं, सध्यानं, सखेदचिन्तापूर्व्वं.

PENSIVENESS, *s.* ध्यानपरता, चिन्तापरता, सखेदचिन्ता, सखेदध्यानं, औदास्यं, उदासीनता, औदासीन्यं, उन्मनस्कता, विषादः, विषण्णता.

PENT, *p. p.* or *a.* (Pent up) संरुद्धः -द्धा -द्धं, सबाधः -धा -धं, रुद्धः &c.

PENTACHORD, *s.* पञ्चतारवाद्यं, पञ्चतन्त्रिवाद्यं, पञ्चतन्त्रीकवाद्यं.

PENTAGON, *s.* पञ्चकोणः -णं, पञ्चभुजः, पञ्चास्रं -स्री, पञ्चकोणा मूर्त्तिः.

PENTAGONAL, *a.* पञ्चकोणः -णा -णं, पञ्चभुजः -जा -जं, पञ्चास्रः -स्रा -स्री -स्रं, पञ्चकोणाकृतिः -तिः -ति, पञ्चकोणाकारः -रा -रं.

Pentameter, *s.* पञ्चपादी *m.* (न्), पञ्चपदी *m.* (न्).

Pentangular, *a.* पञ्चकोणः -णा -णं, पञ्चास्रः -स्रा -स्री -स्रं.

Pentapetalous, *a.* पञ्चदलः -ला -लं, पञ्चदलविशिष्टः -ष्टा -ष्टं.

Pentarchy, *s.* पञ्चजनराज्यं, पञ्चजनप्रभुत्वं.

Pent-house, *s.* बहिर्गृहं, बहिःस्थगृहं, बहिःस्थितगृहं, प्राग्गृहं, उपगृहं.

Penultima, *s.* उपधा, उपान्त्यः, उपान्त्याक्षरं.

Penultimate, *a.* उपान्त्यः -न्त्या -न्त्यं, उपान्तिकः -की -कं, अन्त्योपसन्नः -न्ना -न्नं.

Penumbra, *s.* अपूर्णछाया, खण्डछाया, छायाकल्पः.

Penurious, *a.* कृपणः -णा -णं, व्ययशङ्की -ङ्किनी -ङ्कि (न्), व्ययशङ्कितः -ता -तं, गाढमुष्टिः -ष्टिः -ष्टि, दृढमुष्टिः &c., बद्धमुष्टिः &c. *See* Niggardly, Miserly.

Penuriously, *adv.* सकार्पण्यं, कृपणवत्, व्ययशङ्कया, स्वल्पव्ययेन, कार्पण्येन.

Penuriousness, *s* कृपणता, कार्पण्यं, व्ययशङ्का, दृढमुष्टित्वं. *See* Niggardness.

Penury, *s.* दरिद्रता, दारिद्र्यं, दारिद्रं, निर्धनता, अधनता, निष्किञ्चनत्वं, कार्पण्यं, कृपणता -त्वं, दीनता, दैन्यं, दुर्गतिः *f.*, निःस्वता.

Peon, *s.* (Foot-soldier) पदातिः *m.* -तिकः पादातिः *m.* -तिकः, पत्तिः *m.*

People, *s.* (Body of persons who compose a nation, &c.) जनता, देशजनाः *m. pl.*, देशलोकः, देशवासिनः *m. pl.*, प्रजा, प्रजाः *f. pl.*, लोकः, जनपदः, विशेषदेशलोकः, विशेषदेशजनता, देशमनुष्याः *m. pl.* —(Commonalty) प्रजा, लोकः, जनः, जनपदः, जगती; 'courting the people,' लोकरञ्जनं, जनरञ्जनं; 'fear of the people,' लोकलज्जा, जनलज्जा.—(Common people) अवरलोकः, अवरवर्णाः *m. pl.*, अन्त्यवर्णाः *m. pl.*, अन्त्यजातीयाः *m. pl.*, अधमलोकः, हीनलोकः, पृथग्जनाः *m. pl.*, सामान्यलोकः, प्राकृतलोकः, साधारणलोकः.—(Folk) लोकः, जनः, मनुष्यः, जनपदः, मनुष्यजातिः *f.*, नृजातिः *f.*, जगती.—(Particular class) वर्गः, वर्णः गणः, जनः, लोकः; 'country people,' ग्रामीयलोकः; 'people of the brahminical class,' ब्राह्मणवर्गः; 'of the servile class,' शूद्रवर्गः, शूद्रवर्णः, शूद्रलोकः. —(Servants, attendants) सेवकजनः, सेवकवर्गः, परिजनः, परिवारः.

To people, *v. a.* सजनीकृ, सजनं -नां कृ, समनुष्यीकृ, समनुष्यं -ष्यां कृ, जनपूर्णं -र्णां कृ, वस् (c. 10. वासयति -यितुं).

Peopled, *p. p.* सजनीकृतः -ता -तं, जनविशिष्टः -ष्टा -ष्टं, वासितः -ता -तं.

Pepper, *s.* (Black) मरीचं, मरिचं, कोलं -लकं, कृष्णं, कालमरीचं, ऊषणं, जपणं, वेल्लजं, धर्मपत्तनं, त्रिकटुः *m.* -टु *n.*, पल्लीजं, शिरोवृत्तं, शाकाङ्गं, श्यापनं, सुल्करी, क्षुताभिजननः, क्षुधाभिजननः.—(White pepper) धवलं.—(Long pepper) पिप्पली -लिः *f.* *See* the word; 'the plant,' पिप्पलवृक्षः.

To pepper, *v. a.* मरीच (nom. मरीचयति -यितुं), समरीचीकृ, मरीचाक्तं -क्तां कृ.—(Sprinkle, pelt) कॄ, अवकॄ, अवाकॄ, प्रहृ.

Pepper-box, *s.* मरीचपात्रं, मरिचपात्रं, मरीचाधारः.

Pepper-corn, *s.* मरीचबीजं, मरीचफलं, मरिचबीजं.

Peppered, *p. p.* मरीचितः -ता -तं, मारिचिकः -की -कं, समरीचः -चा -चं.

Peptic, *a.* पाचकः -का -कं, पाचनः -ना -नं, अग्निवर्धकः -का -कं, अग्निदः -दा -दं, वह्निकरः -रा -रं, अग्निदीपकः -का -कं, आग्नेयः -यी -यं.

Peracute, *a.* अतितीक्ष्णः -क्ष्णा -क्ष्णं, अतितीव्रः -व्रा -व्रं, अतिप्रखरः -रा -रं.

Peradventure, *adv.* किंस्वित्, अपिनाम, दैवात्, दैववशात्, अदृष्टवशात्, कदापि, कदाचित्, नाम.

To peragrate, *v. a.* (Wander over) भ्रम्, परिभ्रम्, परिक्रम्, सङ्क्रम्, पर्यट्, परिगम्, अनुगम्, अनुचर, गाह्, अवगाह्.

Peragration, *s.* परिभ्रमणं, परिक्रमः, पर्यटनं, संक्रमणं, संक्रान्तिः *f.*
PLANET, *s.* ग्रहः, भ्रमन् ग्रहः, तारा, तारका -कं, ज्योतिस् *n.*, ज्योतिषी, ज्योतिष्कः, खेचरः, खगः, गगनेचरः, गगणाध्वगः, विहगः, खोल्कः, नक्षत्रं, ऋक्षः, द्युषद् *m.*, द्युसद् *m.*, भं; 'minor planet,' उपग्रहः; 'the planets collectively,' ग्रहगणः, ज्योतिर्गणः, ग्रहमण्डलं, भ्रमन्तो ग्रहाः *m. pl.*; 'the nine planets,' नवग्रहाः *m. pl.* These, according to the Hindús, are 1. the sun, सूर्य्यः; 2. the moon, चन्द्रः; 3. Mercury, बुधः; 4. Venus, शुक्रः; 5. Mars, मङ्गलः; 6. Jupiter, गुरुः *m.*; 7. Saturn, शनिः *m.*; 8. the ascending node, राहुः *m.*; 9. the descending node, केतुः *m.* The two last are considered to be minor planets. The other names of the planets will be found under each separate head of Mercury, &c.—(Auspicious planet) शुभग्रहः, सुग्रहः, सौम्यग्रहः; of these there are four, viz. Mercury, Venus, Jupiter, and the Moon.—(Inauspicious planet) कुग्रहः, अशुभग्रहः, पापग्रहः; of these there are five, viz. Mars, Saturn, the Sun, and the two nodes. 'Planet at its apex,' तुङ्गी *m.* (न्); 'motion of the planets,' ग्रहचारः; 'motion in their orbits,' गतिः *f.*; 'passage of a planet,' सङ्क्रमः, सङ्क्रान्तिः *f.*; 'conjunction,' सङ्गमः; 'aspect,' ग्रहदशा; 'influence,' ग्रहयोगः, ग्रहावेशः; 'unpropitious influence,' ग्रहपीडा, ग्रहबाधा; 'propitious influence,' ग्रहानुकूल्यं, ग्रहबलं; 'worship of the planets,' ग्रहपूजा; 'propitiation of them,' ग्रहशान्तिः *f.*, ग्रहसाधनं; 'sacrifice in propitiation of them,' ग्रहयागः, ग्रहयज्ञः, ग्रहमखः; 'presents made to Bráhmans for propitiating them,' ग्रहदानं; 'incantations to render them propitious,' ग्रहजपः; 'ascertainment of their aspect,' ग्रहसाधनं; 'calculations or tables for determining their position,' ग्रहसारणी; 'diagram representing their aspect,' ग्रहकुण्डली; 'meeting of the seven planets under one sign,' सप्तग्रहसङ्गमः.

PLANETARY, *a.* ग्रह in comp., ग्रहसम्बन्धी &c., ग्रहविषयकः -का -कं, नाक्षत्रिकः -की -कं, नाक्षत्रः -त्री -त्रं, तारकी -किणी -कि (न्) 'planetary influence,' ग्रहावेशः; 'planetary conjunction,'

PLANET-STRUCK, *a.* ग्रहपीडितः -ता -तं, ग्रहोपहतः &c., ग्रहाविष्टः -ष्टा -ष्टं.

PLANING, *s.* तक्षणं, त्वक्षणं, श्लक्ष्णीकरणं, समीकरणं.

PLANK, *s.* फलकः -कं, काष्ठफलकः -कं, दारुफलकः, दीर्घकाष्ठं, दीर्घदारुः *m.*, सूक्ष्मदारुः *m.*, काष्ठं, किलिञ्जः, कटः.

To PLANK, *v. a.* फलकैः or दीर्घकाष्ठैः or काष्ठफलकैर् आस्तॄ (c. 9. -स्तृणाति -स्तरितुं -रीतुं), फलक (nom. फलकयति -यितुं), सफलकीकृ.

PLANKED, *p. p.* फलकास्तीर्णः -र्णा -र्णं, फलकी -किनी -कि (न्), सफलकः &c.

PLANNED, *p. p.* कल्पितः -ता -तं, परिकल्पितः &c., मनसा कल्पितः &c., मन्त्रितः &c., प्रचिन्तितः &c., घटितः &c., चिहितः &c.

PLANNING, *s.* उपायकल्पना, उपायपरिकल्पना, अनुसन्धानं, घटनं.

PLANT, *s.* उद्भिद् *m. f. n.*, ओषधिः -धी *f.*, औषधिः -धी *f.*, उद्भिज्जं, उद्भिदं, पल्लवः -वं, अङ्कुरः, प्ररोहः, रोहः, शाकः; 'gramineous,' तृणं.

To PLANT, *v. a.* (Put in the ground for growth) रुह् in caus. (रोपयति -यितुं), निरुह्, निखन् (c. 1. -खनति -नितुं), रोपणं कृ.—(Fix, set, place) स्था in caus., प्रतिष्ठा, न्यस्, विन्यस्, धा, निधा, निविश्, रुह् or आरुह् in caus.; 'to plant the foot,' पादं न्यस्. (Plant a colony) वस् in caus. (वासयति -यितुं).

PLANTAIN, *s.* (Tree) कदली -लः, कदलकः, रम्भा, तृणसारा, गुच्छफला, ततपत्री, मोचा, मोचकः, अंशुमत्फला, काष्ठीला, वारणबुषा, वारणबुसा, वारणवल्लभा, वारबुषा; 'the fruit,' कदलीफलं, मोचं, मोचाटः, रम्भा; 'wild plantain tree,' काष्ठकदली; 'mixture of sugar and milk with plantains and spices,' शिखरिणी.

PLANTATION, *s.* (Act of planting) रोपणं, आरोपणं, आरोपः.—(Place planted) वृक्षवाटिका, वृक्षवाटी, वाटः -टी -टिका, कृत्रिमवनं, उपवनं, वनं, कर्म्मान्तः, शाकटं or शाकिनं in comp.; as, 'a plantation of sugar canes,' इक्षुशाकटं, इक्षुशाकिनं.

PLANTED, *p. p.* रोपितः -ता -तं, आरोपितः &c., निखातः -ता -तं, न्यस्तः -स्ता -स्तं, विन्यस्तः &c., स्थापितः -ता -तं.

PLANTER, *s.* रोपयिता *m.* (तृ), आरोपयिता *m.*, रोपकः, आरोपकः, रोपणकृत् *m.*, आरोपणकृत्; 'of trees,' वृक्षरोपयिता *m.*, वृक्षरोपकः.—(Owner of a plantation) वाटिकापतिः *m.*, वाटिकेश्वरः.

PLASH, *s.* वर्त्तरूकः, क्षुद्रजलौघः, क्षुद्रजलगुल्मः, पङ्कगुल्मः.

To PLASH, *v. n.* जले or पङ्के क्रीड् (c. 1. क्रीडति -डितुं).

PLASHY, *a.* अनूपः -पा -पं, जलाढ्यः -ढ्या -ढ्यं, जलपङ्कमयः -यी -यं.

PLASTER, *s.* (For covering a wall, &c.) लेपः, विलेपः, चूर्णलेपः, कर्कररलेपः, सुधा, उदपेषः.—(For a wound) उपनाहः, उपदेहः, अनुलेपनं.

To PLASTER, *v. a.* लिप् (c. 6. लिम्पति, लेप्तुं), अनुलिप्, आलिप्, विलिप्, प्रलिप्, उपलिप्, दिह् (c. 2. देग्धि -ग्धुं), लेपनं कृ, अनुलेपनं कृ, विलेपनं कृ, प्रलेपनं कृ, उपनाहनं कृ.

PLASTERED, *p. p.* लिप्तः -प्ता -प्तं, अनुलिप्तः &c., उपलिप्तः &c., आलिप्तः &c., प्रलिप्तः &c., दिग्धः -ग्धा -ग्धं, निदिग्धः &c., उपचितः &c.; 'with cement,' सुधालिप्तः &c., सुधाधवलितः &c., सुधामयः -यी -यं.

PLASTERER, *s.* लेपकः, प्रलेपकः, विलेपकः, लेपकरः, विलेपनकृत् *m.*, सुधाजीवी *m.* (न्).

PLASTERING, *s.* लेपनं, विलेपनं, अनुलेपनं, उपलेपः -पनं, लिपिः *f.*, पुस्तं.

PLASTIC, *a.* रूपकारी -रिणी -रि (न्), रूपकरः -रा -रं, आकारदः -दा -दं, आकारकरः -रा -रं, मूर्त्तिदः &c., कल्पकः -का -कं, कल्पनक्षमः -मा -मं.

To PLAT, *v. a.* (Weave) ग्रन्थ्, उद्ग्रन्थ्, वे, वय्, उत्तव्, गुम्फ्.

PLAT, *s.* (Of ground). *See* PLOT.

PLATE, *s.* (Vessel from which food is eaten) पात्रं, भोजनपात्रं, शरावः, भाजनं, भाण्डं.—(Wrought silver, &c.) कोशः, कोषः, सुवर्णरूप्यादिमयभाण्डानि *n. pl.*—(Flat piece of metal) पत्रं, फलकः -कं; 'gold plate,' सुवर्णपत्रं; 'copper-plate,' ताम्रपत्रं.—(Plate of metal for engraving or inscription) पट्टः -ट्टं, पत्रं, फलकं; 'copper-plate,' ताम्रपट्टं, ताम्रफलकं; 'a plate of copper on which a grant or edict is inscribed,' शासनपत्रं, पट्टः.

To PLATE, *v. a.* रूप्यपत्रपिनद्धं -द्धां कृ, राजतीकृ, राजतान्वितं -तां कृ.

PLATED, *p. p.* or *a.* राजतान्वितः -ता -तं, रसितः -ता -तं, राजतपत्रपिनद्धः -द्धा -द्धं, रूप्यप्रतिबद्धः -द्धा -द्धं, रूप्यपत्रोपेतः -ता -तं.

PLATFORM, *s.* मञ्चः, मञ्चकः, शिबिका, कर्णवंशः, इन्द्रकोषः; 'for any particular ceremony,' मञ्चमण्डपः.—(Plan). *See* the word.

PLATINUM, *s.* No Sanskrit equivalent. प्लाटिनं may be used.

PLATOON, *s.* (Particular array of soldiers) पत्तिः *m.*

PLATTER, *s.* शरावः, पात्रं, भाजनं, भोजनपात्रं, बृहत्पात्रं.

PLAUDIT, *s.* प्रशंसा, प्रणादः, जयशब्दः, धन्यवादः, प्रशंसाशब्दः.

PLAUSIBILITY, *s.* सत्याभासः -सत्वं, प्रमाणाभासः -सत्वं, सत्यसङ्काशता -त्वं, सत्यसादृश्यं, सत्यसन्निभता.

PLAUSIBLE, *a.* सत्यसङ्काशः -शा -शं, सत्यसन्निभः -भा -भं, सत्यसदृशः -शी -शं, सत्याभासरूपः -पा -पं, सत्याभासात्मकः -का -कं, प्रमाणाभासरूपः &c., सव्याजः -जा -जं, ग्राह्यः -ह्या -ह्यं, ग्रहणीयः -या -यं, वाह्यतो दर्शनीयः -या -यं or सुदृश्यः -श्या -श्यं or रमणीयः -या -यं.—(Using plausible arguments) आभासवादी -दिनी -दि (न्).

PLAUSIBLY, *adv.* सत्याभासपूर्व्वं, प्रमाणाभासपूर्व्वं, प्रमाणाभासेन, सत्यसादृश्येन, सत्यसदृशं, सत्यसन्निभं, सव्याजं.

To PLAY, *v. n.* (Frolic, sport) क्रीड् (c. 1. क्रीडति -ते -डितुं), आक्रीड्, विक्रीड्, संक्रीड्, परिक्रीड्, अनुक्रीड्, दिव् (c. 4. दीव्यति -ते, देवितुं), खेला (nom. खेलायति), रम् (c. 1. रमते, रन्तुं), विहृ (c. 1. -हरति -हर्त्तुं), विलस् (c. 1. -लसति -सितुं), तेव् (c. 1. तेवते -वितुं), लल् (c. 1. ललति -लितुं), कुर्द् or कूर्द् (c. 1. कूर्दते -र्दितुं), क्रीडां कृ, खेलां कृ.—(Play as a child) कुमार् (c. 10. कुमारयति -यितुं) or कुमाल्, कुड् (c. 6. कुडति -डितुं), कुमारवत् क्रीड्.—(Play at dice or any game) दिव्, प्रदिव्, प्रतिदिव्, अक्षैः or अक्षान् दिव्, अक्षैः क्रीड्, ग्लह् (c. 1. ग्लहते -हितुं), अक्षादिक्रीडां कृ, द्यूतक्रीडां कृ, अक्षद्यूतं कृ.—(On a musical instrument) वद् (c. 10. वादयति -यितुं), संवद्, वादित्रं वद्.—(Act in any character) अभिनयं कृ, नट्, often expressed by a nominal verb; as, 'he plays the king,' राजायते; 'he plays the lion,' सिंहायते; 'he plays the fool,' मूर्खायते.—(Move about, wanton) इतस्ततश् चल् (c. 1. चलति -लितुं) or सृ (c. 1. सरति, सर्त्तुं), विलस्.—(Operate, be in action or motion) चेष्ट् (c. 1. चेष्टते -ष्टितुं), विचेष्ट्, वृत् (c. 1. वर्त्तते -र्त्तितुं), प्रवृत्, चल्.

To PLAY, *v. a.* (Put in action or motion) प्रवृत् (c. 10. -वर्त्तयति -यितुं), चल् (c. 10. चालयति -यितुं), सञ्चल्, सृ (c. 10. सारयति -यितुं), चर् (c. 10. चारयति -यितुं), सञ्चर्.—(A musical instrument) वादित्रं or तूर्य्यं वद् (c. 10. वादयति -यितुं) or संवद् or मूर्छ् (c. 10. मूर्छयति -यितुं); 'a finger-instrument,' सृ or चल्.—(Represent dramatically) अभिनी (c. 1. -नयति -नेतुं), नट् (c. 10. नाटयति -यितुं), रूप् (c. 10. रूपयति -यितुं), अभिनयं कृ.—(Perform, act, do) कृ, विधा (c. 3. -दधाति -धातुं), अनुष्ठा (c. 1. -तिष्ठति -ष्ठातुं), आस्था.

PLAY, *s.* क्रीडा -डनं, खेला -लनं, केलिः *m. f.*, देवनं, विलासः, विलसनं -सितं, लीला, विनोदः, परिहासः, परीहासः, विहारः, क्रीडाकौतुकं, कौतुकं, नर्म्म *n.* (न्), कूर्दनं, कुर्दनं, तेवनं, खेलितं; 'play of fancy,'

बुद्धिविलासः; 'in play,' परिहासेन, लीलया, विलासेन; 'play of children,' बालक्रीडा, बाललीला; 'game of play,' रासः, रासेरसः. —(Playing at dice, &c.) अक्षादिक्रीडा, अक्षक्रीडा, द्यूतक्रीडा, अक्षद्यूतं, द्यूतं, पणपूर्विका क्रीडा, देवनं.—(Action, operation) चेष्टा, चेष्टितं, प्रवृत्तिः *f.*, प्रवर्त्तनं, क्रिया, व्यवसायः, व्यापारः.—(Motion) चलनं, चरणं, सञ्चलनं, चरणं, सञ्चरणं, चारः, सरणं, क्ष्वेलितं, क्ष्वेलिका, क्ष्वेल्या.—(Room for free motion) अवकाशः, प्रसरः, अवसरः, चेष्टापर्य्याप्तस्थलं-स्थानं.—(Drama, dramatic composition) नाटकः, प्रकरणं, रूपं -पकं.—(Dramatic show) प्रेक्षणं, प्रेक्षा, कौतुकं.

Play-day, *s.* क्रीडादिवसः, क्रीडनदिनं, विश्रामदिवसः, अनध्यायदिवसः, अनध्यायतिथिः *m. f.*, अस्वाध्यायतिथिः *m. f.*

Played, *p. p.* क्रीडितः -ता -तं.—(As an instrument) वादितः -ता -तं, प्रवादितः &c.—(Set in motion) चालितः -ता -तं, सञ्चालितः &c., सारितः &c., सञ्चारितः &c.—(Acted) अभिनीतः -ता -तं.—(Performed) कृतः -ता -तं, अनुष्ठितः &c.

Player, *s.* (One who sports) क्रीडकः, क्रीडाकारी *m.* (न्), देवकः, देवी *m.*, खेलाकारी *m.*—(Actor) नटः, कुशीलवः, रङ्गाजीवः, रङ्गजीवकः, अभिनेता *m.* (तृ), रङ्गावतारकः, नर्त्तकः; 'manager of a company of players,' सूत्रधारः, मारिषः.—(At dice, &c.) द्यूतक्रीडकः, अक्षक्रीडकः, अक्षदेवी *m.* (न्), अक्षधूर्त्तः, अक्षधूः *m.*, देवी *m.* —(On an instrument of music) वाद्यवादकः, भाण्डवादकः.

Play-fellow, play-mate, *s.* सहक्रीडकः, सहदेवी *m.* (न्), सहदेवकः.

Playful, *a.* क्रीडावान् -वती -वत् (त्), क्रीडाशीलः -ला -लं, लीलाशीलः -ला -लं, क्रीडापरः -रा -रं, लीलापरः -रा -रं, लीलाखेलः -ला -लं, विलासी -सिनी -सि (न्), क्रीडासक्तः -क्ता -क्तं, विनोदी &c., सलीलः -ला -लं, लीलावान् &c., केलिकः -का -कं, केलिपरः &c., खेलापरः -रा -रं, कलाकेलिः -लिः -लि, कौतुकी &c., कृतकौतुकः -का -कं, अभिलुलितः -ता -तं, चञ्चलः -ला -लं, क्रीडापरायणः -णा -णं, क्रीडकः -का -कं; 'playful anger,' क्रीडाकोपः.

Playfully, *adv.* विलासेन, सकौतुकं, लीलया, परिहासेन, क्रीडापूर्व्वं.

Playfulness, *s.* क्रीडाशीलता, सलीलत्वं, सविलासत्वं, चञ्चलता, क्रीडासक्तिः *f.*, क्रीडापरता, लीलापरता, लीलासक्तता.

Play-ground, *s.* क्रीडास्थानं, केलिस्थानं, क्रीडारामः, तेवनं, निकषेणः.

Play-house, *s.* नाटकशाला, रङ्गशाला, नाटकमन्दिरं, नृत्यशाला, रङ्गः.

Play-thing, *s.* क्रीडनकं, क्रीडाद्रव्यं, खेलनी, क्रीडावस्तु *n.*, क्रीडामृगः.

Plea, *s.* (Excuse) छद्म *n.* (न्), उत्तरं, व्यपदेशः, अपदेशः, उपदेशः, निमित्तं, कारणं.—(In law) उत्तरं, उत्तरवादः, उत्तरपादः; 'special plea,' कारणोत्तरं, प्राङ्न्यायः; 'false plea,' अपार्थकरणं; 'raising a plea,' अक्षीकरणं.

To plead, *v. n.* उत्तरं वद् (c. 1. वदति -दितुं), उत्तरं कृ or दा, निमित्तं वद्, व्यपदेशं कृ, व्यपदिश् (c. 6. -दिशति -देष्टुं), अपदेशं कृ.—(Supplicate earnestly) विनयेन प्रार्थ् (c. 10. -अर्थयति -यितुं), विनयेन स्वार्थं निविद् (c. 10. -वेदयति -यितुं).

To plead, *v. a.* (Adduce in proof) प्रमाणीकरणार्थम् उपन्यस् (c. 4. -अस्यति -असितुं), हेतुम् or निमित्तम् उपन्यस् हेतूपन्यासं कृ, निमित्तोपन्यासं कृ.—(Alledge in excuse) व्यपदेशार्थं वद् (c. 1. वदति -दितुं) or उपन्यस्, अपदेशार्थं वद्.—(Plead the cause of another) परार्थं वद्, परार्थम् उत्तरं वद्.

Pleadable, *a.* व्यपदेशार्थं or प्रमाणीकरणार्थम् उपन्यसनीयः -या -यं or उपन्यास्यः -स्या -स्यं.

Pleaded, *p. p.* व्यपदेशार्थं or प्रमाणीकरणार्थम् उपन्यस्तः -स्ता -स्तं.

Pleader, *s.* उत्तरवादी *m.* (न्), हेतुवादी *m.*, निमित्तवादी *m.*—(For another) परार्थं वादी *m.* or उत्तरवादी *m.*

Pleading, *s.* उत्तरवादः, हेतुवादः, निमित्तवादः, व्यपदेशकरणं, छद्मकरणं, प्रमाणीकरणार्थं or व्यपदेशार्थं हेतूपन्यासः or निमित्तोपन्यासः.

Pleasant, *a.* रम्यः -म्या -म्यं, रमणीयः -या -यं, प्रियः -या -यं, सुप्रियः -या -यं, मनःप्रियः &c., मनोरमः -मा -मं, रामः -मा -मं, अभिरामः -मा -मं, मनोभिरामः -मा -मं, मनोज्ञः -ज्ञा -ज्ञं, सुभगः -गा -गं, अभिमतः -ता -तं, यथाभिमतः -ता -तं, सुखः -खा -खं, सुखदः -दा -दं, सुखावहः -हा -हं, सुखप्रदः -दा -दं, सुखकरः -रा -रं, सुखदायकः -का -कं, यथासुखः -खा -खं, काम्यः -म्या -म्यं, कमनीयः -या -यं, कान्तः -न्ता -न्तं, नन्दकः -का -कं, आनन्ददः -दा -दं, आनन्दकरः &c., हर्षकः &c., हर्षणः -णा -णं, हर्षकरः &c., हर्षावहः -हा -हं, मोदकः -का -कं, मधुरः -रा -रं, रुचिकरः &c., रुचिरः -रा -रं, रुच्यः -च्या -च्यं, प्रशस्तः -स्ता -स्तं, तुष्टिकरः &c., हृदयङ्गमः -मा -मं, हृद्यः -द्या -द्यं, सुरभिः -भिः -भि, मनोरञ्जकः &c., मनोरञ्जनः &c., चोक्षः -क्षा -क्षं, चौक्षः -क्षी -क्षं.

Pleasantly, *adv.* सुखेन, सुखं, यथासुखं, सुखरूपेण, रम्यं, रमणीयं, मनोरमं, सुभगं, यथाभिमतं, प्रियं, सुप्रियं, मधुरं, रुचिरं.

Pleasantness, *s.* रम्यता, रमणीयता, अभिरामता, प्रियता, सुप्रियता, काम्यत्वं, कान्तता, अभिमतत्वं, सुखत्वं, सौख्यं, सुखदायकत्वं.

Pleasantry, *s.* विनोदः, विनोदवाक्यं, विनोदोक्तिः *f.*, नर्म्मोक्तिः *f.*, नर्म्मभाषणं, परिहासः, परीहासः, हासिका.

To please, *v. a.* (Gratify) सुख् (c. 10. सुखयति -यितुं), सन्तुष् (c. 10. -तोषयति -यितुं), परितुष्, प्री (c. 9. प्रीणाति, c. 10. प्रीणयति -यितुं), तृप्, प्रमुद्, रम्, ह्लाद्, आह्लाद, हृष्, विनुद् (c. 10. -नोदयति -यितुं), अनुरञ्ज् (c. 10. -रञ्जयति -यितुं), आराध (c. 10. -राधयति -यितुं), सभाज्, सुखं कृ or दा, प्रीतिं कृ or दा; 'anxious to please,' अनुग्रहकातरः -रा -रं.—(Approve itself to) रुच् (c. 1. रोचते -चितुं) with dat. or gen. of the person, शुभ् (c. 1. शोभते -भितुं), अभिमतः -ता -तं भू, अनुमतः -ता -तं भू, प्रियः -या -यं भू; 'that pleases me,' तन् मह्यं or मम रोचते, तन् मया or मम अनुमतं or अभिमतं. *See To* like.

To please, *v. n.* (Choose) रुच् (c. 1. रोचते -चितुं, c. 10. रोचयति -यितुं), इष् (c. 6. इच्छति, एषितुं); 'as you like,' यथा भवते रोचते, यथाकामं. *See To* like, *v. n.*—(Condescend, as a word of ceremony) कृपां or दयां कृ. Usually expressed by the 2d or 3d person of the rt. अर्ह्, or by the use of तावत्, or some other particle; as, 'Be pleased to speak to me,' मां वक्तुम् अर्हसि or अर्हति भवान्: 'please to go,' गच्छ तावत्.

Pleased, *p. p.* प्रीतः -ता -तं, प्रीतात्मा -त्मा -त्म (न्), तुष्टः -ष्टा -ष्टं, सन्तुष्टः &c., परितुष्टः &c., हृष्टः &c., हृष्टचित्तः -त्ता -त्तं, प्रसन्नः -न्ना -न्नं, प्रसादितः -ता -तं, मोदितः &c., मुदितः &c., आह्लादितः &c., प्रह्लादितः &c., आनन्दितः &c., अभिरुचितः &c., तृप्तः -प्ता -प्तं, रममाणः -णा -णं, प्रतीतः -ता -तं: 'in mind,' प्रीतमनाः -नाः -नः (स्).

Pleasing, *a.* रम्यः -म्या -म्यं, मनोरमः -मा -मं, रमणीयः -या -यं, सुभगः -गा -गं, नन्दकः -का -कं, मोदकः &c., कमनीयः -या -यं, रुचिरः -रा -रं, रोचिष्णुः -ष्णुः -ष्णु, चन्दकः -का -कं, मञ्जुलः -ला -लं, मनोज्ञः -ज्ञा -ज्ञं, मनोनुकूलः -ला -लं, मनआपः -पा -पं, मनोरञ्जकः &c. *See* Pleasant, *a.*—(To the eye) चाक्षुष्यः -ष्या -ष्यं, सुदृश्यः -श्या -श्यं, चारुरूपः -पा -पी -पं, दृश्यः &c. *See* Beautiful.—(To the ear) सुखश्रवः -वा -वं, श्रोत्रसुखः -खा -खं, श्रुतिसुखः &c., श्रोत्राभिरामः -मा -मं, सुचारुस्वनः -ना -नं, मधुस्वनः &c., सुश्राव्यः -व्या -व्यं; 'pleasing language,' चाटुः -टु *m. n.*, चाटूक्तिः *f.*

PLEASINGLY, *adv.* सुभगं, रमणीयं, रम्यं, मनोरमं, सुख or चारु or मधु in comp.; as, 'singing pleasingly,' चारुस्वनः -ना -नं, सुखस्वनः &c., मधुस्वनः &c.

PLEASURABLE, *a.* रम्यः -म्या -म्यं, रमणीयः -या -यं, सौख्यीयः -या -यं, सुखावहः -हा -हं, भोगवान् -वती -वत् (त्). *See* PLEASANT.

PLEASURE, *s.* (Gratification, enjoyment) प्रीतिः *f.*, सुखं, सौख्यं, आनन्दः, तुष्टिः *f.*, सन्तोषः, परितोषः, तोषः, हर्षः, मोदः, आमोदः, प्रमोदः, आह्लादः, प्रह्लादः, रतिः *f.*, उल्लासः, अभिरुचिः *f.*, नन्दः, ह्लादः, मुदा, मुद् *f.*, विलासः, कुतूहलं, कौतुकं, शर्म्म *n.* (न्), उत्साहः; 'intense pleasure,' परमानन्दः, अत्यानन्दः, रोमहर्षः -षणं, पुलकः, रोमाञ्चः; 'in pleasure and pain,' सुखदुःखयोः loc. du.—(Liking, friendship for) रुचिः *f.*, अभिरुचिः *f.*, इच्छा, अभिमतता, अनुरक्तिः *f.*, अभिलाषः, अभिलषितं, छन्दं, छन्दस् *n.*; 'one's own pleasure,' स्वेच्छा; 'at one's pleasure,' स्वेच्छया, स्वेच्छातस्, कामतस्, यथाकामं, कामं, अनुकामं.—(Sensual pleasure) विषयभोगः, विषयकामः, विषयसुखं, विषयानुरागः, कामः, भोगः.—(Sexual pleasure) रतिः *f.*, सुरतं, रतं, भोगः, भोगविलासः.—(Cause of pleasure) सुखहेतुः *m.*, सुखकारणं; 'goddess of pleasure,' रङ्गदेवता.

PLEASURE-BOAT, *s.* क्रीडानौका, केलिनौका, विलासनौका.

PLEASURE-GROUND, *s.* उद्यानं, क्रीडोद्यानं, आरामः, क्रीडारामः, क्रीडावनं, विलासवनं, क्रीडाकाननं, विलासकाननं, केलिकाननं, केलिवनं, प्रमदवनं, किलोद्यानं, तेयनं.

PLEASURE-HOUSE, *s.* केलिगृहं, क्रीडागृहं, विलासगृहं, विलासमन्दिरं.

PLEASURIST, *s.* भोगासक्तः, विषयासक्तः, विषयसेवी *m.* (न्), केलिनागरः, केलिपरः, विषयी *m.* (न्), वैषयिकः, भोगपरायणः.

PLEBEIAN, *a.* प्राकृतः -ती -तं, दुष्कुलीनः -ना -नं, अकुलीनः -ना -नं, लौकिकः -की -कं, साधारणः -णा -णी -णं, सामान्यः -न्या -न्यं, अवरवर्णः -र्णा -र्णं, अधमवर्णः &c., अन्त्यवर्णः &c., अधमजातीयः -या -यं, अन्त्यजातीयः -या -यं, पामरः -री -रं.

PLEBEIAN, *s.* प्राकृतजनः, पृथग्जनः, निहीनजनः, इतरजनः, अकुलीनजनः, वृषलः, अपसदः, नीचजनः, पामरजनः.

PLECTRUM, *s.* कोणः, शारिका, परिवादः, रणः.

PLEDGE, *s.* (Any thing deposited as a security) न्यासः, निक्षेपः, आधिः *m.*, आधानं, उपन्यासः, बन्धकः, उपनिधिः *m.*, उपनिक्षेपः, उपनिधानं, औपनिधिकं, अन्वाधिः *m.*, पणः, परिपणनं, आधमनं, आधीकरणं; 'counter-pledge,' प्रतिपाणं.—(Any thing deposited as security for the repayment of something borrowed) गृहीतस्य द्रव्यस्योपरि विश्वासार्थम् अधमर्णेनोत्तमर्णे न्यस्त आधिः; 'act of depositing a pledge,' आधीकरणं.—(Hostage) बन्धकः, शरीरबन्धकः.—(Token) अभिज्ञानं.

To PLEDGE, *v. a.* आधीकृ, न्यस् (c. 4. -अस्यति -असितुं), प्रतिन्यस्, उपन्यस्, निक्षिप् (c. 6. -क्षिपति -क्षेप्तुं), उपनिक्षिप्, निधा (c. 3. -दधाति -धातुं), आधा, पण् (c. 1. पणते -णितुं), परिपण्, न्यासीकृ.—(Pledge one's self, pledge one's word) प्रतिज्ञा (c. 9. -जानीते -ज्ञातुं), प्रतिज्ञां कृ, प्रतिज्ञाबद्धः -द्धा -द्धं भू, वचनबद्धः -द्धा -द्धं भू, अङ्गीकृ, उरीकृ.

PLEDGED, *p.p.* आधीकृतः -ता -तं, न्यस्तः -स्ता -स्तं, उपन्यस्तः &c., निक्षिप्तः -प्ता -प्तं, परिपणितः -ता -तं, न्यासीकृतः -ता -तं.—(Promised) प्रतिज्ञातः -ता -तं, अङ्गीकृतः &c., अभ्युपेतः &c.; 'that has pledged his word,' कृतप्रतिज्ञः -ज्ञा -ज्ञं, प्रतिज्ञाबद्धः -द्धा -द्धं, वचनबद्धः &c., दत्तप्रतिज्ञः &c., दत्तवचनः &c.

PLEDGET, *s.* (In surgery) विकेशिका, पट्टः -ट्टकः, आवेष्टनं, तूलिका.

PLEIADS, PLEIADES, *s. pl.* कृत्तिका, बहुलाः *f. pl.*

PLENARY, *a.* सम्पूर्णः -र्णा -र्णं, परिपूर्णः &c., निःशेषः -षा -षं.

PLENILUNAR, PLENILUNARY, *a.* पूर्णचन्द्रसम्बन्धी &c., पूर्णेन्दुसम्बन्धी &c.

PLENIPOTENCE, *s.* पूर्णसामर्थ्यं, सामर्थ्यपूर्णता, पूर्णशक्तित्वं, शक्तिपूर्णता.

PLENIPOTENT, *a.* पूर्णशक्तिः -क्तिः -क्ति, पूर्णशक्तिमान् -मती -मत् (त्).

PLENIPOTENTIARY, *s.* पूर्णशक्तियुक्तः, पूर्णशक्तिविशिष्टः, पूर्णशक्तिकः.

PLENIST, *s.* पूर्णतावादी *m.* (न्), पूर्णत्ववादी *m.*

PLENITUDE, *s.* पूर्णता, सम्पूर्णता -त्वं, परिपूर्णता -त्वं, पूर्त्तिः *f.*, आपूर्त्तिः *f.*, पुष्कलता, विपुलता, समृद्धिः *f.*, सामृद्ध्यं, प्राचुर्य्यं, उत्सेकः.

PLENTEOUS, PLENTIFUL, *a.* बहुलः -ला -लं, बहुः -हुः -ह्वी -हु, प्रचुरः -रा -रं, पुष्कलः -ला -लं, विपुलः -ला -लं, समृद्धः -द्धा -द्धं, परिपूर्णः -र्णा -र्णं, भूरिः -रिः -रि, अतिरिक्तः -क्ता -क्तं, उद्रिक्तः &c., उत्सिक्तः &c., उपचितः &c.

PLENTEOUSLY, PLENTIFULLY, *adv.* बाहुल्येन, बहुशस्, प्राचुर्य्येण, प्रचुरं, पुष्कलं, विपुलं, वैपुल्येन, भूरिशस्, भूरि, बहु, अनेकशस्, अतिरिक्तं, उद्रेकेण.

PLENTEOUSNESS, PLENTIFULNESS, *s.* बाहुल्यं, प्राचुर्य्यं, पुष्कलत्वं. *See* next.

PLENTY, *s.* बाहुल्यं, बहुत्वं -ता, प्राचुर्य्यं, प्रचुरता -त्वं, वैपुल्यं, विपुलता, पुष्कलता, समृद्धिः *f.*, सामृद्ध्यं, वृद्धिः *f.*, समृद्धता, प्रभूतता, उद्रेकः, अतिरेकः, उत्सेकः, अतिरिक्तता, उत्सिक्तता, स्फीतिः *f.*, स्फातिः *f.*; 'time of plenty or abundance of corn, &c.,' सुभिक्षं, धान्यसमृद्धिः *f.*; 'cow of plenty,' कामदा, कामदुघा, कामधुक् *f.* (ह्). *See* PHILOSOPHER'S STONE.

PLEONASM, *s.* शब्दातिशयः, शब्दबाहुल्यं, शब्दाधिक्यं, स्वार्थं, मात्रं.

PLEONASTIC, *a.* स्वार्थः -र्था -र्थं, अतिरिक्तः -क्ता -क्तं, अतिरिक्तशब्दः -ब्दा -ब्दं.

PLEONASTICALLY, *adv.* शब्दबाहुल्येन, शब्दाधिक्येन, स्वार्थतस्.

PLETHORA, *s.* रक्तपित्तं -त्तः, पित्तरक्तं, अम्लपित्तं, रक्तातिशय्यं, रक्ताधिक्यं, अतिपुष्टिः *f.*

PLETHORIC, *a.* रक्तपित्तरोगी -गिणी -गि (न्), अतिपुष्टिशीलः -ला -लं, अतिपुष्टः -ष्टा -ष्टं, अतिशयपुष्टः -ष्टा -ष्टं.

PLEURISY, *s.* (Disease of the chest) उरोग्रहः, वक्षोग्रहः.

PLEURITIC, *a.* उरोग्रहरोगी -गिणी -गि (न्), उरोग्रही &c., वक्षोग्रही &c.

PLIABILITY, PLIANCY, *s.* सुनम्यता, सुनमनीयत्वं, नमनशीलता, आनम्यता, आयम्यता, मृदुता, मार्दवं, कोमलता, शिथिलता, शैथिल्यं, अदृढता.

PLIANT, PLIABLE, *a.* सुनम्यः -म्या -म्यं, सुखनम्यः &c., सुनमनीयः -या -यं, नमनशीलः -ला -लं, आनम्यः &c., नम्यः &c., नमनीयः &c., आयम्यः &c., मृदुः -दुः -द्वी -दु, कोमलः -ला -लं, शिथिलः -ला -लं, अदृढः -ढा -ढं.

To PLIGHT, *v. a.* *See* *To* PLEDGE.

PLIGHT, *s.* (Condition) अवस्था, दशा, स्थितिः *f.*, भावः, वृत्तिः *f.*, गतिः *f.*; 'bad plight,' दुर्दशा, दुःस्थितिः *f.*, दुर्गतिः *f.*; 'in bad plight,' दुर्दशाग्रस्तः -स्ता -स्तं, दुःस्थः -स्था -स्थं.—(Gage). *See* PLEDGE.

PLIGHTED, *p. p.* परिपणितः -ता -तं, न्यस्तः -स्ता -स्तं, उपन्यस्तः &c., प्रतिज्ञातः -ता -तं, कृतप्रतिज्ञः -ज्ञा -ज्ञं; 'in marriage,' प्रतिज्ञाविवाहितः &c., वाग्दत्तः -त्ता -त्तं.

PLINTH, *s.* प्राकारमूलं, भित्तिमूलं, प्राकारतलं, स्तम्भमूलं, स्तम्भतलं.

To PLOD, *v. n.* मन्दं मन्दं निरन्तरायासेन or अविरतक्लेशेन श्रम् (c. 4. श्राम्यति, श्रमितुं) or अविरतश्रमेण आयस् (c. 4. -यस्यति -यसितुं), अतिमान्द्येन नित्यश्रमं कृ or नित्यायासं कृ or नित्यकष्टं कृ or नित्यक्लेशं कृ or नित्यप्रवृत्तिं कृ.

PLODDER, *s.* अतिमान्द्येन निरन्तरायासी *m.* (न्) or अविरतायासी *m.* or निरन्तरश्रमी or नित्यश्रमी *m.* (न्) or नित्योद्योगी *m.* (न्) or नित्य-

व्यवसायी, आयासाध्ययनी *m.* (न्), श्रमाध्यायी *m.*, आयासव्यासङ्गी *m.*, आयासगामी *m.*, पिपीलिकाधर्म्मी *m.* (न्)

PLODDING, *s.* अतिमान्द्यपूर्व्वो निरन्तरायासः or अविरतायासः, अतिमान्द्येन नित्यश्रमः or नित्योद्योगः or नित्यव्यवसायः, आयासाध्ययनं, श्रमाध्ययनं, पिपीलिकाधर्म्मः.

PLODDING, *a.* अतिमान्द्यपूर्व्वं निरन्तरायासी -सिनी -सि(न्) or नित्यश्रमी &c.

PLOT, *s.* (Complicated scheme, deep-laid stratagem) कपटप्रबन्धः, छलप्रबन्धः, कापट्यप्रबन्धः, उपायप्रबन्धः, कूटप्रबन्धः, कल्पना, उपायकल्पना, सङ्कल्पः, उपायप्रयोगः, प्रयोगः, युक्तिः *f.*, अपदेशः, व्यपदेशः, मन्त्रणा, उपायः.—(Scheme of mischief) कुसङ्कल्पः, कुकल्पना, कुमन्त्रणा, कुकर्म्मसम्पादनार्थं or द्रोहसम्पादनार्थं कपटप्रबन्धः.—(Of a drama, &c.) वस्तु *n.*; 'secondary plot,' प्रतिमुखं; 'good plot,' सुवस्तु; 'a play with a plot composed by Kálidása,' कालिदासग्रथितवस्तुनाटकः.—(Of ground) स्थलं -ली -ला, भूमिभागः, भूभागः, भूप्रदेशः, भूमिप्रदेशः, भूमिः *f.*, वसुधा.

To PLOT, *v. a.* or *n.* (Form a scheme) मनसा उपायप्रबन्धं क्लृप् (c. 10. कल्पयति -यितुं) or प्रचिन्त् (c. 10. -चिन्तयति -यितुं) or अनुसन्धा (c. 3. -दधाति -धातुं), मन्त्र् (c. 10. मन्त्रयते -यितुं), सम्मन्त्र्, उपायकल्पनां कृ, कपटप्रबन्धं कृ, उपायप्रबन्धं कृ, सङ्कल्पं कृ.—(Form a scheme of mischief) कुसङ्कल्पं कृ, कुकर्म्मसम्पादनार्थं कपटप्रबन्धं कृ or उपायकल्पनां कृ, द्रोहकरणार्थं कुमन्त्रणां कृ or सम्मन्त्रणां कृ.—(Plot against) द्रुह् (c. 4. द्रुह्यति, द्रोग्धुं), अभिद्रुह्, द्रोहं चिन्त् or प्रचिन्त्, कपटप्रबन्धेन द्रोहं कृ.

PLOTTER, *s.* कपटप्रबन्धकारी *m.* (न्), उपायकल्पकः, उपायचिन्तकः, द्रोहचिन्तकः, कुमन्त्रणाकृत्, कुकल्पनाकृत् *m.*, कुसङ्कल्पकारी *m.* (न्).

PLOUGH, *s.* हलं, लाङ्गलं, गोदारणं, सीरः, शीरः, हालः, गोकीलः, गोकिलः, कृमतन्त्रं, कर्षणी, आकर्षणी, राधरङ्कुः, कुन्तलः; 'body of a plough,' फालः, फलं, निरीशं, निरीषं, कूटकं; 'the share,' *see* PLOUGHSHARE; 'the pole or shaft,' ईषा, ईशा, लाङ्गलदण्डः; 'the yoke,' युगं, कुशः; 'pin of it,' युगकीलकः; 'tie of it,' योक्त्रं, योत्रं, आबन्धः; 'handle of a plough,' ईषादण्डः, ईशादण्डः; 'relating or belonging to a plough,' हालिकः -की -कं, लाङ्गलिकः &c., सैरिकः -की -कं; 'to hold, drive or follow the plough,' लाङ्गलं or हलं ग्रह् (c. 9. गृह्णाति, ग्रहीतुं) or भृ or धृ or वह् (c. 10. वाहयति -यितुं) or चल् (c. 10. चालयति -यितुं).

To PLOUGH, *v. a.* हलेन or लाङ्गलेन कृष् (c. 1. कर्षति, क्रष्टुं) or कर्षणं कृ, लाङ्गलेन भूमिं दृ (c. 10. दारयति -यितुं) or भिद् (c. 7. भिनत्ति, भेत्तुं), हल् (c. 1. हलति -लितुं, c. 10. हलयति -यितुं), हलहतिं कृ, लाङ्गलहतिं कृ, हलहतं -तां कृ, हलकृष्टं -ष्टां कृ.

To PLOUGH, *v. n.* (Drive a plough) लाङ्गलं or हलं वह् (c. 10. वाहयति -यितुं) or चल् (c. 10. चालयति -यितुं).

PLOUGHABLE, *a.* कर्षणीयः -या -यं, कृषियोग्यः -ग्या -ग्यं, सीत्यः -त्या -त्यं, हल्यः -ल्या -ल्यं, हलहतियोग्यः &c.

PLOUGH-BOY, *s.* बालकृषकः, बालकर्षकः, बालहालिकः.

PLOUGHED, *p.p.* कृष्टः -ष्टा -ष्टं, कर्षितः -ता -तं, हलकृष्टः &c., फालकृष्टः &c., फालकर्षितः &c., सीत्यः -त्या -त्यं, शीत्यः &c., हल्यः -ल्या -ल्यं; 'twice-ploughed,' द्विगुणाकृतः -ता -तं, द्वितीयाकृतः &c., द्विहल्यः &c., द्विसीत्यः -त्या -त्यं, शम्बाकृतः -ता -तं, सम्बाकृतः &c.; 'thrice-ploughed,' त्रिसीत्यः &c., त्रिगुणाकृतः &c., तृतीयाकृतः &c., त्रिहल्यः &c.; 'ploughed by two ploughs,' हलद्वयेन कृष्टः &c. or वाहितः; 'a ploughed field,' फालकृष्टक्षेत्रं, फालकृष्टं, हल्यक्षेत्रं; 'land ploughed after sowing,' बीजाकृतः -ता -तं, उप्तकृष्टः -ष्टा -ष्टं.

PLOUGHER, *s.* कृषकः, कर्षकः, कर्षी *m.* (न्), हालिकः, सैरिकः.

PLOUGH-GEAR, *s.* हलोपकरणं, लाङ्गलोपकरणं, लाङ्गलसामग्री, हलसज्जा.

PLOUGH-HANDLE, *s.* ईषादण्डः, ईशादण्डः, ईषायष्टिः *m.f.*

PLOUGHING, *s.* कर्षणं, कृषिः *f.*, कार्षिः *f.*, उत्कर्षणं, प्रकर्षणं, सङ्कर्षणं, लाङ्गलकर्षणं, भूमिकर्षणं, क्षेत्रकर्षणं, भूमिदारणं, हलहतिः *f.*, हलभृतिः *f.*, लाङ्गलग्रहणं, उत्कषणं.

PLOUGH-LAND, *s.* हल्यक्षेत्रं, हल्यभूमिः *f.*, फालकृष्टं, हल्यं, सीत्यं, शीत्यं, हालिकं, हालिकक्षेत्रं, लाङ्गलिकं. *See* PLOUGHED.

PLOUGH-MAN, *s.* हालिकः, लाङ्गलिकः, लाङ्गली *m.* (न्), लाङ्गलग्रहः, हलधरः, लाङ्गलधरः, हलभृत् *m.*, लाङ्गलभृत् *m.*, हलवाहकः, कृषिकः, कृषकः, कर्षकः, कृषिजीवी *m.* (न्), कर्षी *m.* (न्), कार्षकः -र्षिकः, कृषीवलः, क्षेत्रकर्षकः, भूमिकर्षकः, सैरिकः, शैरिकः.

PLOUGH-SHARE, *s.* फालः, कृषिकः -का, कृषकः, फलं, जित्या, कुशी, कूटकं.

PLOUGH-TAIL, *s.* लाङ्गलपृष्ठं, लाङ्गलस्य पश्चाद्भागः or पश्चिमभागः.

To PLUCK, *v. a.* (Pull off, out or from) उत्कृष् (c. 1. -कर्षति -क्रष्टुं), निष्कृष्, कृष्, उद्धृ (c. 1. -हरति -हर्त्तुं), निर्हृ, हृ, उत्पट् (c. 10. -पाटयति -यितुं), उत्पाटनं कृ.—(As the hair) लुञ्च् (c. 1. लुञ्चति -ञ्चितुं), उल्लुञ्च्, अवलुञ्च्, केशान् उत्पट्, केशोत्पाटनं कृ, केशोल्लुञ्चनं कृ.—(As feathers, &c.) पक्षान् or पर्णान् उत्पट् or निष्कृष् or निर्हृ or हृ, पक्षोत्पाटनं कृ, निष्पक्षीकृ, निष्पर्णीकृ, निष्पत्रीकृ.—(Gather by plucking) अङ्गुलिभिर् ग्रह् (c. 9. गृह्णाति, ग्रहीतुं) or आदा (c. 3. -ददाति -दत्ते -दातुं) or चि or अवचि or लू or छिद्.—(Pluck up) उत्पट्, उद्धृ, समुद्धृ, उन्मूल् (c. 10. -मूलयति -यितुं), समुन्मूल्, उच्छिद्, उत्खन्.

PLUCK, *s.* (Of an animal) पशोर् हृद्यकृदादि *n.*—(Mettle, courage) वीर्य्यं, सत्त्वं, साहसं, पौरुषं.

PLUCKED, *p.p.* हृतपर्णः -र्णा -र्णं, उद्धृतपर्णः &c., हृतलोमा -मा -म (न्).

PLUCKER, *s.* उत्पाटयिता *m.* (तृ), उत्पाटी *m.* (न्), उद्धर्त्ता *m.* (र्त्तृ).

PLUCKING, *s.* उत्पाटः -टनं, उत्कर्षणं, निष्कर्षणं, उद्धरणं.—(As of hair) उल्लुञ्चनं, अवलुञ्चनं.—(Gathering) चयः -यनं, अवचयः, ग्रहणं.

PLUG, *s.* रोधनी, निरोधनी, स्तम्भनी, पिधानं

To PLUG, *v. a.* रुध् (c. 7. रुणद्धि, रोद्धुं), निरुध्, स्तम्भ् (c. 10. स्तम्भयति -यितुं), पिधा (c. 3. -दधाति -धातुं).

PLUM, *s.* (Fruit) बदरफलभेदः.—(Sum of one hundred thousand) लक्षं -क्षा, लक्ष्यं; 'one who is worth a plum,' लक्षाधीशः.

PLUMAGE, *s.* पक्षः, पर्णः, पक्षिपर्णाः *m. pl.*, पक्षिपत्राणि *n. pl.*, पतत्रं, पिच्छं, गरुत् *m.*; 'of a peacock,' गुच्छः -च्छकः, बर्हं; 'having good or beautiful plumage,' सुपर्णः -र्णा -र्णं, सुपर्णी -र्णिनी -र्णि (न्), सुपक्षवान् -वती -वत् (त्), चारुपर्णः &c., चारुपर्णी &c.

PLUMB, *s.* लम्बः -म्बकः, लम्बसीसकं, ससीसकसूत्रं. *See* PLUMMET.

PLUMB, *a.* लम्बः -म्बा -म्बं, लम्बरूपः -पा -पं, ऋजुः -जुः -जु.

To PLUMB, *v. a.* (Adjust with a line) सूत्र् (c. 10. सूत्रयति -यितुं), सूत्रेण समायुज् (c. 10. -योजयति -यितुं) or युज्.—(Sound depth) सूत्रेण वेधपरिमापणं कृ or गाम्भीर्य्यपरिमापणं कृ.

PLUMBEAN, PLUMBEOUS, *a.* सीसमयः -यी -यं, सीसगुणकः -का -कं, सैसकः &c.

PLUMBER, *s.* सीसकारः -रकः, सीसकर्त्ता *m.* (र्त्तृ), सीसकव्यापारी *m.*

PLUMB-LINE, *s.* लम्बसीसकं, लम्बसूत्रं. *See* PLUMB, *s.*

PLUM-CAKE, *s.* चित्रापूपः, चित्रपिष्टकः, शुष्कफलपूरितापूपः.

PLUME, *s.* (Feather) पक्षः, पर्णः, पिच्छं.—(Feather worn as ornament, crest) शेखरः, चूडा, शिखा, किरीटः, मुकुटं, मौलिः *m.f.*

To PLUME, *v. a.* (Adjust feathers) पक्षान् or पर्णान् रच् (c. 10. रचयति -यितुं) or विरच्.—(Strip of feathers) पक्षान् or पर्णान् उत्कृष् or निष्कृष् or हृ or उत्पट्, निष्पक्षीकृ. *See To* PLUCK.—(Pride one's self) अभिमन् (c. 4. -मन्यते -मन्तुं), आत्मानं श्लाघ् (c. 1. श्लाघते -घितुं); 'to plume one's self on one's learning,' पण्डितम्मन्यः -न्या -न्यं भू or अस्.

PLUMELESS, *a.* पक्षहीनः -ना -नं, चूडाहीनः &c., अपक्षः -क्षा -क्षं.

PLUMIGEROUS, *a.* पक्षवान् -वती -वत् (त्), पक्षी -क्षिणी -क्षि (न्), सपक्षः -क्षा -क्षं.

PLUMIPED, *a.* सपक्षपादः -दा -दं, सपर्णपादः &c., सपक्षचरणः &c.

PLUMMET, *s.* लम्बः -म्बकः, लम्बसीसकं, ससीसकसूत्रं, सीसालम्बितसूत्रं, सीसलग्नसूत्रं, सूत्रलग्नसीसकं, लम्बसूत्रं, लम्बकसूत्रं.

PLUMOSE, PLUMOUS, *s.* सपक्षः -क्षा -क्षं, सपिच्छः -च्छा -च्छं, पक्षवान् -वती -वत् (त्), पिच्छिलः -ला -लं. *See* FEATHERED.

PLUMP, *a.* पीवरः -रा -रं, पीनः -ना -नं, घनः -ना -नं, घनमांसः -सा -सं, उन्नतमांसः &c., उन्नतः -ता -तं, पुष्टः -ष्टा -ष्टं, परिपुष्टः &c., मांसपुष्टः &c., स्थूलमांसः &c., सुललितः -ता -तं, सुललितमांसः &c., आप्यानः -ना -नं, स्थूलः -ला -लं, उच्छूनः -ना -नं, तुन्दी -न्दिनी -न्दि (न्), तुन्दिकः -का -कं, स्फीतः -ता -तं, स्फातः &c., फुल्लः -ल्ला -ल्लं.

PLUMP, *adv.* अकस्मात्, आकस्मिकशब्देन, आस्फोटनशब्देन.

To PLUMP, *v. a.* आप्यै (c. 10. -प्याययति -यितुं), स्थूलीकृ, पीवरीकृ, स्फाय् (c. 10. स्फावयति -यितुं), श्वि (c. 10. श्वाययति -यितुं), उच्छूनीकृ, शूनीकृ.

To PLUMP, *v. n.* अकस्मात् or आकस्मिकशब्देन or आस्फोटनशब्देन पत् (c. 1. पतति -तितुं), अतिभारेण पत्.

PLUMPLY, *adv.* सुव्यक्तं, सुस्पष्टं, अतिव्यक्तं, व्यक्तार्थतस्, अवक्रं.

PLUMPNESS, *s.* घनता, स्थूलता -त्वं, पीवरत्वं, पीनत्वं, पुष्टता, सुपुष्टता, पुष्टिः *f.*, सुपुष्टिः *f.*, स्फीतिः *f.*, स्फीतता -त्वं, स्फातिः *f.*, फुल्लता, आप्यानं, उन्नतिः *f.*

PLUM-PUDDING, *s.* पिष्टापूपः, पिष्टपोलिका, मोदकादिपूरितपोलिका.

PLUMY, *a.* सपक्षः -क्षा -क्षं, पक्षविशिष्टः -ष्टा -ष्टं. *See* FEATHERED.

PLUNDER, *s.* लोप्त्रं, लोत्रं, लुप्तं, लोतः -तं, लुण्ठनं, लुण्ठा, लुण्टनं, लुण्टा, हरणं, अपहारः, अभिग्रहः, धनापहारः -हरणं, नष्टाप्तिसूत्रं, होढं.

To PLUNDER, *v. a.* धनद्रव्यादि हृ (c. 1. हरति, हर्त्तुं) or अपहृ or अभिहृ, लुण्ठ् (c. 1. लुण्ठति -ण्ठितुं) or लुण्ट् or लुण्ड् or रुण्ठ् or रुण्ट्, चुर् (c. 10. चोरयति -यितुं), विलुप् (c. 6. -लुम्पति -लोप्तुं), लुप्, कल् (c. 10. कालयति -यितुं), प्रकल्, साहसेन or साहसपूर्व्वम् अपहृ.

PLUNDERED, *p. p.* हृतधनः -ना -नं, हृतद्रव्यः -व्या -व्यं, हृतस्वः -स्वा -स्वं, अपहृतस्वः &c., लुण्ठितः -ता -तं, साहसेन or साहसपूर्व्वम् अपहृतः -ता -तं, लुप्तः -प्ता -प्तं, होढः -ढा -ढं.

PLUNDERER, *s.* अपहारकः, अपहारी *m.* (न्), हारकः, हारी *m.*, अपहर्त्ता *m.* (र्त्तृ), लुण्टाकः, लुण्टनकृत् *m.*, साहसेन or साहसपूर्व्वम् अपहारी *m.*, साहसिकः.

PLUNDERING, *s.* अपहारः, अपहरणं, हरणं, धनापहारः, लुण्ठनं, लुण्टनं.

To PLUNGE, *v. a.* (Immerse) मज्ज् (c. 10. मज्जयति -यितुं), निमज्ज्, प्लु (c. 10. प्लावयति -यितुं), आप्लु, अवगाह् (c. 10. -गाहयति -यितुं), जलं प्रविश् in caus., जले निविश्, स्ना in caus.

To PLUNGE, *v. n.* (Dive) मज्ज् (c. 6. मज्जति -ज्जितुं, मंक्तुं), निमज्ज्, अवगाह् (c. 1. -गाहते -हितुं -गाढुं), व्यवगाह्, विगाह्, आप्लु (c. 1. -प्लवते -प्लोतुं), जलमध्ये प्रविश्, जलान्तः प्रविश्, जलं प्रविश्, जलान्तःप्रवेशं कृ, जलान्तःप्लवनं कृ, स्ना.

PLUNGE, PLUNGING, *s.* मज्जनं, निमज्जनं, प्रमज्जनं, प्लवनं, आप्लवः, आप्लावः -वनं, अवगाहनं, विगाहः -हनं, गाहनं, जलप्रवेशः, जलान्तःप्लवनं, जलान्तःप्रवेशः, निष्णानं; 'of an elephant,' निर्वाणं.

PLUNGED, *p. p.* मग्नः -ग्ना -ग्नं, निमग्नः &c., मज्जितः -ता -तं, निमज्जितः &c., प्रमग्नः &c., गाहितः -ता -तं, अवगाहितः &c., अवगाढः -ढा -ढं, विगाढः &c., आप्लुतः -ता -तं, निवेशितः &c., अभिनिवेशितः &c., निविष्टः -ष्टा -ष्टं, अभिनिविष्टः &c., लीनः -ना -नं, निर्वाणः -णा -णं; 'in a sea of sorrow,' शोकसागरमग्नः &c., शोकसागरावगाढः -ढा -ढं. *See* IMMERSED.

PLUNGEON, *s.* (The Diver bird) प्लवः, प्लावी *m.* (न्).

PLUNGER, *s.* गाहिता *m.* (तृ), अवगाहिता *m.*, मंक्ता *m.* (क्तृ), निर्मंक्ता *m.*

PLURAL, *a.* अनेकः -का -कं, बहुः -हुः -ह्वी -हु, बहुलः -ला -लं.—(Plural number, in grammar) अनेकवचनं, बहुवचनं.

PLURALITY, *s.* अनेकत्वं -ता, अनैक्यं, बहुत्वं -ता, बाहुल्यं, अनेकसंख्यत्वं; 'of gods,' देवबहुत्वं; 'of wives,' सापत्न्यं.

PLUS, *s.* (In Algebra) धनं, स्वं.

PLUSH, *s.* स्थूलदुकूलं, घनदुकूलं, घनलोमवद् दुकूलं.

PLUTO, *s.* (God of the infernal regions) यमः. *See* YAMA.

PLUTUS, *s.* (God of wealth) कुवेरः, धनपतिः *m.* *See* KUVERA.

PLUVIAL, PLUVIOUS, *a.* वृष्टिमान् -मती -मत् (त्), वर्षुकः -का -कं, वर्षिकः -की -कं, वार्षिकः &c., वृष्टिमयः -यी -यं, प्रचुरवृष्टिः -ष्टिः -ष्टि, बहुवृष्टिः &c.

PLUVIAMETER, *s.* वृष्टिमापनयन्त्रं, वृष्टिमापकः, वृष्टिमापनी.

To PLY, *v. a.* (Lay on) ऋ in caus. (अर्पयति -यितुं), प्रयुज् (c. 10. -योजयति -यितुं), न्यस्, आधा, धा, पत् in caus.; 'to ply with repeated blows,' पुनः पुनः पत्, मुहुर्मुहुः पत् or दण्डपातनं कृ.—(Employ diligently) यत्नतः or निर्बन्धेन प्रयुज् or उपयुज् or प्रवृत्.—(Keep in motion) प्रयत्नतस् or अविरतं चल् (c. 10. चालयति -यितुं), or सञ्चल्.—(Urge, press perseveringly) निर्बन्धेन प्रत्युपस्था (c. 1. -तिष्ठति -स्थातुं) or उपस्था or आक्रम् (c. 1. -क्रामति -क्रमितुं); 'with entreaties,' अतिनिर्बन्धेन प्रार्थ् or अभ्यर्थ् or प्रार्थनं कृ.

To PLY, *v. n.* (Be steadily employed) अनालस्येन or सतान्द्रतम् or अविरतं व्यापृ in pass. (-प्रियते) or व्यापृतः -ता -तं भू or निविष्टः -ष्टा -ष्टं भू or प्रवृत् or यत्, अविरतयत्नं कृ.

PLY, *s.* (Fold) ऊर्म्मिः *m. f.*, ऊर्म्मी -र्म्मिका, व्यावर्त्तनं, तरङ्गः, पुटः.

PNEUMATIC, PNEUMATICAL, *a.* (Consisting of air) वायुमयः -यी -यं, वायुरूपः -पा -पं.—(Pertaining to air) वायवः -वी -वं, वायुसम्बन्धी -न्धिनी -न्धि (न्), वायुविषयकः -का -कं, वायु in comp.—(Moved or played by air) वायु in comp., वायुसञ्चारितः -ता -तं, वायुवादितः -ता -तं; 'pneumatic instrument,' वायुयन्त्रं, वायुवाद्यं.

PNEUMATICS, *s. pl.* वायुविद्या, वायुधर्म्मविद्या, वायुगुणविद्या, वायुशास्त्रं, वायुगुणविषयका विद्या.

PNEUMONIA, *s.* (Inflammation of the lungs) फुप्फुसदाहः.

PNEUMONIC, *a.* फुप्फुससम्बन्धी &c., फुप्फुसविषयकः -का -कं.

To POACH, *v. a.* (Boil eggs slightly) अण्डानि तप्तजलान्तः कृत्वा ईषत् पच् (c. 1. पचति, पक्तुं) or क्वथ् or अर्द्धसिद्धानि कृ.—(Steal or pocket game) वनपक्ष्यादि or जङ्गलपक्ष्यादि चुर् or गूढकोषान्तः कृत्वा अपहृ. *See* the next.

To POACH, *v. n.* कूटयन्त्रेण वनपक्षिणो ग्रह् (c. 9. गृह्णाति, ग्रहीतुं), कूटोपायेन जङ्गलपक्ष्यादि ग्रह् or चुर् (c. 10. चोरयति -यितुं) or अपहृ (c. 1. -हरति -हर्त्तुं), जाङ्गलजन्तुचौर्य्यं कृ, वन्यजन्तुहरणं कृ, वन्यजन्तुस्तेयं कृ, मृगयाचौर्य्यं कृ.

Poacher, *s.* कौटिकः, कौटकिकः, कौटिलिकः, कूटयन्त्रेण वनपक्षिग्राहकः, कूटोपायेन वन्यजन्तुहारी *m.* (न्) or जाङ्गलपश्वपहारकः, जाङ्गलचौरः, मृगयाचौरः, वनचौरः, मृगयाचोरः, वैतंसिकः.

Poaching, *s.* कूटयन्त्रेण वनपक्षिग्रहणं, कूटोपायेन जङ्गलपक्षिग्रहणं or जाङ्गलजन्तुहरणं, मृगयाचौर्य्यं, जाङ्गलचौर्य्यं, वन्यजन्तुचौर्य्यं, वन्यजन्तुस्तेयं, वनचौर्य्यं, वनस्तेयं.

Pock, *s.* रक्तवरटी, रक्तवटी, वटी, वरटी, रक्तस्फोटः, सूक्ष्मस्फोटः -टकः, स्फोटः -टकः, विस्फोटः, सिध्मं, सिध्म *n.* (न्), गुटिका.

Pocket, *s.* वस्त्रान्तःस्थकोषः, वस्त्रस्थकोषः, वस्त्रान्तरस्थकोषः, कोषः, कोशः, स्राधारः.

To pocket, *v. a.* कोषान्तः कृ, कोषे or कोशे निविश् (c. 10. -वेशयति -यितुं) or निधा (c. 3. -दधाति -धातुं), वस्त्रान्तर्गतं -तां कृ, कोषान्तः स्था in caus. (स्थापयति -यितुं), कोषस्थं -स्थां कृ.—(Put up with) सह् (c. 1. सहते, सोढुं), क्षम् (c. 1. क्षमते, क्षन्तुं).

Pocket-book, *s.* कोषस्थपुस्तकं, कोषगतपुस्तकं, कोषपुस्तकं.

Pocketed, *p. p.* कोषान्तःकृतः -ता -तं, कोषान्तः स्थापितः -ता -तं, कोषनिवेशितः &c., कोषगतः -ता -तं, कोषान्तर्गतः &c., कोषान्तर्हितः &c., कोषगुप्तः -प्ता -प्तं.

Pocket-handkerchief, *s.* नासामार्जनी, नासिकामार्जनी, मुखमार्जनी, नक्तकः, वरकं.

Pocket-hole, *s.* कोषछिद्रं, कोशछिद्रं, वस्त्रान्तःस्थकोषछिद्रं.

Pocket-money, *s.* क्षुद्रद्रव्यक्रयणार्थं वारं वारं दत्तं धनं.

Pocky, *a.* रक्तवरटीपूर्णः -र्णा -र्णं, रक्तस्फोटविशिष्टः -ष्टा -ष्टं.

Pod, *s.* बीजकोशः, बीजगुप्तिः *f.*, सिम्बा -म्बिः -म्बी *f.*, शिम्बा म्बिः -म्बी *f.*, शिम्बिका, शमिः *f.*, शमी, पुटः; 'grain in pods,' शमीधान्यं.

Podagrical, *a.* वातकी -किनी -कि (न्), वातरोगी -गिणी &c., वातिकः -की -कं, वातुलः -ला -लं, सन्धिवायुरोगी &c., सन्धिवायुग्रस्तः -स्ता -स्तं.

Podded, *a.* सिम्बियुक्तः -क्ता -क्तं, शिम्बीयुक्तः &c., शमियुक्तः &c.

Poem, *s.* काव्यं, कविता, कवनं, काव्यबन्धः; 'interspersed with prose,' खण्डकाव्यं.

Poesy, *s.* (Art of composing poems) कविता, काव्यविद्या, काव्यरचनविद्या, काव्यलेखनविद्या, काव्यरचना, श्लोकरचना, कविताशक्तिः *f.*, कविकर्म्म *n.* (न्), रसविद्या, रसज्ञता.—(Metrical composition) कविता, काव्यं, व्यञ्जनावृत्तिः *f.* *See* Poetry.

Poet, *s.* कविः *m.*, काव्यरचकः, कवितारचकः, पद्यरचकः, काव्यकर्त्ता *m.* (र्तृ), कविताकर्त्ता *m.*, रसज्ञः, पद्मा *m.* (न्), भविनः, वागीशः; 'a quasi poet,' कविकल्पः; 'a ready poet,' शीघ्रकविः *m.*

Poetaster, *s.* कुकविः *m.*, कविकल्पः, कविदेशीयः, कविदेश्यः.

Poetess, *s.* काव्यकर्त्री, कविताकर्त्री, काव्यरचका.

Poetic, poetical, *a.* (Relating to poetry, suitable to it) कवितासम्बन्धी -न्धिनी &c., कविताविषयः -या -यं, काव्यरचनयोग्यः -ग्या -ग्यं, काव्ययोग्यः &c.—(Possessing the beauties of poetry) रसिकः -का -कं, सरसः -सा -सं, रसी -सिनी &c., रसवान् -वती -वत् (त्), काव्यरसवान् &c., कविता or काव्य in comp.; as, 'poetical genius,' कविताशक्तिः *f.*—(Expressed in poetry or measure) श्लोकबद्धः -द्धा -द्धं, पद्यरूपः -पा -पं, श्लोकरूपः &c., काव्यरूपः -पा -पं, कवितारूपः &c., कवितामयः -यी -यं, श्लोकमयः &c., छन्दोरूपः &c., छन्दोबद्धः &c.

Poetically, *adv.* कवितायोग्यं, कवितारूपेण, पद्यरूपेण, कवितापूर्व्वं, छन्दोनुसारेण, काव्यरसपूर्व्वं, सरसं.

Poetics, *s.* काव्यशास्त्रं, कविताशास्त्रं, रसशास्त्रं, पद्यशास्त्रं.

To poetize, *v. n.* काव्य रच् (c. 10. रचयति -यितुं), काव्यरचनां कृ, कवितां कृ.

Poet-laureate, *s.* वन्दी *m.* (न्), वन्दारुः *m.*, राजवन्दी *m.*, राजस्तुतिपाठकः.

Poetry, *s.* (Metrical composition, verse) कविता -त्वं, काव्यं, कवनं, पद्यं.—(Art or practice of composing in verse) कविता -त्वं, काव्यरचना, श्लोकरचना, काव्यविद्या, काव्यरचनविद्या, कविकर्म्म *n.* (न्), कविताविद्या, रसविद्या, रसज्ञता.—(Poetical works) काव्यशास्त्रं, पद्यशास्त्रं, साहित्यं.

Poignancy, *s.* तीक्ष्णता, तीव्रता, तिग्मता, उग्रता -त्वं, कटुता, मार्म्मिकत्वं.

Poignant, *a.* तीक्ष्णः -क्ष्णा -क्ष्णं, तीव्रः -व्रा -व्रं, तिग्मः -ग्मा -ग्मं, उग्रः -ग्रा -ग्रं, कटुः -टुः -टु, अरुन्तुदः -दा -दं, मर्म्मस्पृक् *m.f.n.* (श्), मर्म्मभेदी -दिनी -दि (न्), मार्म्मिकः -की -कं.

Point, *s.* (Sharp end) अग्रं, शिखा, शिखरं, आणः *m.*, आणिः *m.*, अंशुः *m.*, अग्रांशुः *m.*, मुखं, कण्टकः, शलाका; 'of a needle,' सूच्यग्रं, कण्टकः; 'of the foot,' पादाग्रं, प्रपदं.—(Of a blade, &c.) धारा -रं, कोटिः *f.*, अश्रिः *f.*, पालिः -ली *f.* -लिका, अणिः *m.*, शिखरं, अग्रं; 'a sharp point,' तीक्ष्णाग्रं.—(Of land, head-land) भूमिनासिका, उदग्रभूमिः *f.*, उदग्रस्थलं, भशलाका.—(Sting, wit of an epigram, &c.) दंशः, उपदंशः, मर्म्म *n.* (न्), रसः, रहस्यं.—(Of space or time) अणुः *m.*, परमाणुः *m.*, सन्धिः *m.*—(Of the compass) दिक् *f.* (श्), दिशा, ककुभ् *f.*, काष्ठा, आशा, हरित् *f.*, दिग्विभागः; 'intermediate point,' विदिक् *f.*, प्रदिक् *f.*, अपदिशं.—(Dot) विन्दुः *m.*, शून्यं, विप्रुट् *f.* (ष्), अङ्कः, चिह्नं.—(Mark in punctuation) चिह्नं, विश्रामचिह्नं, विरामचिह्नं.—(Particular subject, case under discussion) विषयः, अर्थः, पदं, स्थलं, आस्पदं, प्रकरणं, प्रसङ्गः, प्रस्तावः; 'being to the point,' प्रासङ्गिकः -की -कं, प्रास्ताविकः &c.; 'on this point at least,' अत्र तावत्.—(Aim, object) लक्ष्यं, लक्ष्यं, अर्थः, आशयः, उद्देशः, अभिप्रायः.—(Characteristic mark, as of a horse, &c.) लक्षणं, विशेषणं, गुणः.—(Degree, pitch) पर्य्यन्तं, अन्तः -न्तं, परिमाणं, पदं, आस्पदं, पर्य्यायः, क्रमः; 'highest point,' उत्तमपदं, परमपदं, परमास्पदं; 'to such a point,' एतावत्पर्य्यन्तं, एतावत्; 'to what point?' किम्पर्य्यन्तं, कियत्पर्य्यन्तं; 'to that point,' तदन्तं, तत्पर्य्यन्तं.—(Critical moment) सन्धिः *m.*, कालसन्धिः *m.*, समयः; 'on the point of, at the point of,' उद्यतः -ता -तं, उद्युक्तः -क्ता -क्तं, उन्मुखः -खा -खं, or expressed by the desiderative or other forms of adjective, thus, 'on the point of dying, at the point of death,' मरणोन्मुखः -खा -खं, मुमूर्षुः -र्षुः -र्षु, आसन्नमृत्युः -त्युः -त्यु, आसन्नमरणः -णा -णं, मृतप्रायः -या -यं, मृतकल्पः -ल्पा -ल्पं, सन्न्यासस्थः -स्था -स्थं; 'on the point of going,' गमनोद्यतः -ता -तं, गन्तुमुद्यतः &c., गमनोन्मुखः &c., जिगमिषुः -षुः -षु, गन्तुकामः -मा -मं; 'on the point of bringing forth,' प्रसवोन्मुखी, आसन्नप्रसवा, आसन्नप्रसवकाला; 'he is on the point of rising,' उत्थातुमुद्यतोऽस्ति, उत्थातुम् इच्छति.—(Point of view) दृष्टिः *f.*—(Punctilio, nicety) सूक्ष्मता, सौक्ष्म्यं.

To point, *v. a.* (Sharpen to a point) तीक्ष्णाग्रीकृ, तीक्ष्णीकृ, तीक्ष्णधारीकृ, शिताग्रीकृ, निशो (c. 4. -श्यति -शातुं), तिज् (c. 10. तेजयति -यितुं), साग्रीकृ.—(Direct towards, aim at) लक्ष्यीकृ, उद्दिश्, समुद्दिश्, निर्दिश्, अभिसन्धा, लक्ष्; 'pointing to,' उद्दिश्य.—(Punctuate) विश्रामचिह्नानि or विरामचिह्नानि अङ्क् (c. 10. अङ्कयति -यितुं) or कृ.—(Point out, show by the finger, &c.) प्रदिश्

(c. 6. -दिशति -देष्टुं), निर्दिश्, उद्दिश्, विनिर्दिश्, सन्दिश्, आदिश्, अङ्गुल्या निर्दिश् or प्रदिश् or दृश् (c. 10. दर्शयति -यितुं) or प्रदृश् or सूच् (c. 10. सूचयति -यितुं) or संसूच्; point out the way,' मार्गम् आदेशय.

To POINT, *v. n.* (With the finger) अङ्गुलिनिर्देशं कृ, अङ्गुल्या निर्दिश् or प्रदिश्. *See* the last.—(Have direction or aim) उद्दिश्, उद्देशकः -का -कं भू, उद्देशं कृ, लक्षीकृ or expressed by दिश्य or मुख or अग्र in comp.; as, 'to point towards the south,' दक्षिणदिश्यः -श्या -श्यं भू, दक्षिणमुखः &c. भू, दक्षिणाग्रः &c. भू.

POINT-BLANK, *a.* or *adv.* समसूत्रः -त्रा -त्रं, एकसूत्रः &c., समरेखः -खा -खं, क्षितिजैकसूत्रः &c., समसूत्रेण, एकसूत्रेण.

POINTED, *p. p.* or *a.* (Have a sharp end) तीक्ष्णाग्रः -ग्रा -ग्रं, शिताग्रः &c., साग्रः &c., तीक्ष्णशिखः -खा -खं, शातशिखः &c., अंशुमान् -मती -मत् (त्), तीक्ष्णांशुमान् &c., शिखावलः -ला -लं, शिखाधरः -रा -रं, शितः -ता -तं, निशितः &c., शैक्यः -क्या -क्यं.—(Epigrammatical, keen, witty) रसिकः -का -कं, सरसः -सा -सं, रसवान् &c., मार्म्मिकः -की -कं, मर्म्मस्पृक् *m. f. n.* (श्), अरुन्तुदः -दा -दं, दंशकः -का -कं; 'pointed words,' वाग्असिः *f.*—(Pointed out) निर्दिष्टः -ष्टा -ष्टं, उद्दिष्टः &c., प्रदिष्टः &c., सूचितः -ता -तं, अङ्गुलिनिर्दिष्टः &c.

POINTEDLY, *adv.* अमुकममुद्दिश्य, उद्दिश्य, उद्देशपूर्व्वं, सममर्म्मभेदं.

POINTEDNESS, *s.* रसिकता -त्वं, सरसता, दंशकता -त्वं, मार्म्मिकत्वं.

POINTER, *s.* निर्देशकः, देशकः, प्रदेशकः, निर्देष्टा *m.* (ष्टृ), निदेष्टा *m.*, निर्देशी *m.* (न्), प्रदेशी *m.*, देशी *m.*, दर्शकः, प्रदर्शकः, सूचकः.—(Dog) वनपक्षिनिर्देशको मृगयाकुक्कुरः, वन्यपक्षिनिर्देशने शिक्षितो मृगयाश्वा *m.* (न्).

POINTING, *s.* निर्देशः -शनं, अङ्गुलिनिर्देशः, निदेशः, सूचनं, अङ्गुलिप्रदर्शनं.

POINTLESS, *a.* (Having no point or edge) निरग्रः -ग्रा -ग्रं, अग्रहीनः -ना -नं, धाराहीनः &c., अतीक्ष्णः -क्ष्णा -क्ष्णं.—(Destitute of wit) विरसः -सा -सं, अरसिकः -का -कं, रसहीनः &c., फल्गुः -ल्गुः -ल्गु.

POISE, *s.* (Weight) भारः, तुला, तोलः.—(Balance, equilibrium) भारतुल्यता, भारसमता, भारसाम्यं, समतौल्यं, समतोलः, तुल्यता, तुलासाम्यं.

To POISE, *v. a.* समभारीकृ, तुल्यभारीकृ, समतोलीकृ, समीकृ, तुल्यीकृ, तुल् (c. 10. तुलयति -यितुं).

POISON, *s.* विषं, गरं -रः, गरलं, गरदं, भुगरं, जीवनाघातं, अङ्कुलं, आकुलं, हलाहलं -लः, हालाहलं, हालहालं, हालहलं, हलहलं, हाहलं -लः, कालकूटं -टः, कलाकुलं, काकोलं -लः, सौराष्ट्रिकं, सौराष्ट्रिकं, दारदः, प्रदीपनः, ब्रह्मपुत्रः, शौल्किकेयः, वत्सनाभः, धूलकं, निदः, क्ष्वेडः; 'administering poison,' विषप्रयोगः, विषविधानं, विषदानं; 'taking poison,' विषभक्षणं; 'worthy of death by poison,' विष्यः -ष्या -ष्यं; 'yielding poison,' विषदः -दा -दं; 'removing or curing poison,' विषघ्नः -घ्नी -घ्नं, विषनाशी -शिनी -शि (न्), विषघाती &c., विषहरः -री -रं, विषापहः -हा -हं, गरघ्नः &c.; 'art of curing poisons,' विषविद्या, विषनाशनविद्या; 'curer of poisons,' विषवैद्यः, विषभिषक् *m.* (ज्), जाङ्गुलिकः, जाङ्गुलिः *m.*, गारुडिकः; 'charm against poison,' गारुडः -डं.

To POISON, *v. a.* (Infect with poison) विषाक्तं -क्तां कृ, विषयुक्तं -क्तां कृ, विषेण दुष् (c. 10. दूषयति -यितुं), विषदिग्धं -ग्धां कृ.—(Administer poison, kill by it) विषं दा, विषप्रयोगं कृ, विषेण हन् or मृ in caus., विषदानेन हन्.—(Poison one's self, take or eat poison) विषं भुज् or भक्ष् or खाद्, विषेण or विषप्रयोगेण आत्मानं हन्.—(Corrupt, taint) दुष्, सन्दुष्, लिप्, नश् in caus.

POISONED, *p. p.* or *a.* (Infected with poison) विषाक्तः -क्ता -क्तं, विषदिग्धः -ग्धा -ग्धं, विषलिप्तः -प्ता -प्तं, विषदूषितः -ता -तं; 'a poisoned arrow,' दिग्धः, लिप्तकः.—(Killed by poison) विषमारितः -ता -तं, विषनाशितः &c.

POISONER, *s.* विषदः, विषदायी *m.* (न्), गरदः, गरदायी *m.*, तीक्ष्णरसदायी.

POISONING, *s.* विषप्रयोगः, विषदानं, विषविधानं, विषेण मारणं.

POISONOUS, *a.* विषालुः -लुः -लु, गरली -लिनी -लि (न्), विषमयः -यी -यं, सविषः -षा -षं, विषधरः -रा -रं, विषगुणकः -का -कं, विषधर्म्मकः -का -कं, विषदः -दा -दं, सगरः -रा -रं, तीक्ष्णविषः -षा -षं, विषपूर्णः -र्णा -र्णं, विषजुष्टः -ष्टा -ष्टं, दूषकः -का -कं, विष in comp.; as, 'poisonous snake,' विषभुजङ्गः.

POISONOUSLY, *adv.* सविषं, सगरं, सगरलं, सदूषणं, दूषकप्रकारेण.

POISONOUSNESS, *s.* विषालुता, सविषत्वं, सगरत्वं, विषपूर्णता, दूषकत्वं.

POITREL, *s.* उरस्त्राणं, वक्षस्त्राणं, उरश्छदः, वक्षस्त्रं.

To POKE, *v. a.* (Thrush, push against, stick) तड् (c. 10. ताडयति -यितुं), दण्डादि प्रसारयित्वा तड् or आहन् (c. 2. -हन्ति -न्तुं) or अभ्याहन् or प्रहृ (c. 1. -हरति -हर्तुं), प्रमृ (c. 10. -मारयति -यितुं), प्रविश् (c. 10. -वेशयति -यितुं), ताडनं कृ, आघातं कृ, प्रहारं कृ.—(Search for, grope for, with a long instrument) दण्डादि प्रसारयित्वा परामृश् (c. 6. -मृशति- म्रष्टुं) or अन्विष् (c. 4. -इष्यति -एषितुं).

To POKE, *v. n.* (Grope) तमः प्रविश्य परामृश् or परिमृश्, अन्धकारे दण्डादि प्रसारयित्वा अन्विष् or निरूप्.—(Dawdle, trifle) विलम्बेन किञ्चित् कृ, विलम्ब्. *See To* PEDDLE.

POKE, *s.* ताडनं, आघातः, प्रहारः, अभिघातः, आहतिः *f.*, दण्डप्रसारणं.

POKER, *s.* शलाका, लोहशलाका, अङ्गारचालनशलाका, अङ्गारचालकः, अङ्गारचालकदण्डः, अङ्गारोत्थापकः.

POLAR, *a.* ध्रुवसम्बन्धी -न्धिनी -न्धि (न्), मेरुसम्बन्धी &c., ध्रुवविषयकः -का -कं, ध्रुवस्थः -स्था -स्थं, केन्द्रस्थः &c., ध्रुवनिकटस्थः &c.; 'polar star,' ध्रुवः, औत्तानपादिः *m.*, उत्तानपादजः, नक्षत्रनेमिः *m.*, द्युतिकरः, ज्योतीरथः; 'polar circle,' कदम्बभ्रमवृत्तं; 'polar distance,' ध्रुवज्याचापांशः.

POLARITY, *s.* ध्रुवाभिसरणशीलता, ध्रुवाभिगमनशीलता, ध्रुवाभिजिगमिषा, ध्रुवाभिमुखशीलता, ध्रुवाभिमुखता, केन्द्राभिमुखता.

POLARY, *a.* ध्रुवाभिसरणशीलः -ला -लं, ध्रुवाभिगमनशीलः &c., ध्रुवाभिजिगमिषुः -षुः -षु, ध्रुवाभिगामी -मिनी -मि (न्), ध्रुवाभिसारी &c., ध्रुवाभिमुखशीलः &c.

POLE, *s.* (Long piece of wood) दण्डः -ण्डं, यष्टिः *m. f.*, दीर्घकाष्ठं, काष्ठं; 'for carrying burdens,' भारयष्टिः *m. f.*, विहङ्गिका; 'raised on a pole,' उद्दण्डः -ण्डा -ण्डं.—(Of a carriage) धूः *f.* (धुर्), धुरा, धूर्व्वी, कूबरः, युगन्धरः, यानमुखं.—(Of a plough) ईषा, ईशा, हलदण्डः, लाङ्गलदण्डः.—(The measure) दण्डः.—(In astronomy) ध्रुवः, मेरुः *m.*, केन्द्रं; 'north pole,' उत्तरध्रुवः, ध्रुवः, मेरुः *m.*, उत्तराग्रं; 'south pole,' दक्षिणध्रुवः, कुमेरुः *m.*, दक्षिणाग्रं; 'elevation of the pole,' ध्रुवोन्नतिः *f.*; 'pole of the ecliptic,' कदम्बः.

POLE-AXE, *s.* परशुः *m.*, कुठारः, दीर्घयष्टिलग्नपरशुः *m.*, दीर्घटङ्कः.

POLE-CAT, *s.* पूतिशारिका, लोमशमार्जारः, गन्धमार्जारः, गन्धोतुः *m.*, पूतिका, जाहकः, मृगचैटकः, कस्तूरीमृगः, गात्रसङ्कोची *m.* (न्), सङ्काशः -शी.

POLEMIC, POLEMICAL, *a.* विवादी -दिनी -दि (न्), विवादात्मकः -का -कं, वादानुवादात्मकः -का -कं, वादानुवादार्थकः -का -कं, वादानुवादी &c.,

वादप्रतिवादी &c., विसंवादी &c., विप्रतिपत्तिकः -का -कं.

POLEMIC, POLEMICAL, *s.* वादानुवादशीलः, वादानुवादप्रियः, वादानुवादकुशलः, विवादप्रियः, विवादकुशलः, वादरतः, वादानुवादकारी *m.* (न्), वादविवादकर्त्ता *m.* (र्तृ).

POLEMICS, *s.* धर्म्मविषयो वादानुवादः or विवादः or विसंवादः.

POLE-STAR, *s.* (Fabled as the son of Uttánapáda, and grandson of the first Manu) ध्रुवः, औत्तानपादिः *m.*, उत्तानपादजः. *See* POLAR, *a.*

POLICE, *s.* (Government of a city or town) नगरव्यवस्था, नगरव्यवस्थितिः *f.*, नगरानुशासनं, नगरकार्य्यानुशासनं.—(Internal regulation of a kingdom) राष्ट्रानुशासनं, देशानुशासनं, देशकार्य्यानुशासनं, राष्ट्रव्यवस्था, देशव्यवस्था, राष्ट्रव्यवस्थितिः *f.*—(Body of police-officers) नगररक्षिणः *m.pl.*, नगररक्षकाः *m.pl.*, नगररक्षिपुरुषाः *m.pl.*, नगरपालाः *m. pl.*, नगरपालकाः *m. pl.*, नगररक्षिगणः, नगरपालगणः, नगरपालवर्गः; 'rural police,' ग्रामरक्षिणः *m.pl.*, ग्रामरक्षकाः *m.pl.*, ग्रामपालाः; 'highway police,' मार्गपालाः -लकाः, मार्गरक्षकाः *m.pl.*

POLICE-MAGISTRATE, *s.* दण्डनायकः, दण्डप्रणेता *m.* (तृ), दण्डाधिकारी *m.* (न्).

POLICE-MAN, POLICE-OFFICER, *s.* नगररक्षी *m.* (न्), नगररक्षकः, नगररक्षिपुरुषः, नगरपालः -लकः, आरक्षकः, राजपुरुषः.

POLICY, *s.* (Art or manner of governing or managing public affairs) नीतिः *f.*, नीतिविद्या, नयः, नयनं, नयप्रयोगः, राजनीतिः *f.*, राजनयः, राज्यशासनरीतिः *f.*, राज्यनयनं, राज्यनयनरीतिः *f.*, राज्यनिर्वाहरीतिः *f.*, राज्यव्यवहारमार्गः, राज्यानुशासनमार्गः; 'good policy,' सुनीतिः *f.*, सुनयः; 'bad policy,' दुर्णीतिः *f.*, दुर्णीतं, दुर्णयः, दुर्नीतिः &c.—(Prudence or skill in the management of public affairs) नीतिकौशल्यं, नीतिकुशलता, नीतिचातुर्य्यं, राज्यनयनयुक्तिः *f.*, राज्यकरणयुक्तिः *f.*, राज्यशासनयुक्तिः *f.*, राज्यचातुर्य्यं, राज्यकौशल्यं, नीतिज्ञता.—(In the management of affairs generally, prudence) व्यवहारयुक्तिः *f.*, व्यवहारचातुर्य्यं, व्यवहारदक्षता, व्यवहारकौशल्यं, कर्म्मनिर्वाहयुक्तिः *f.*; 'good policy,' सुयुक्तिः *f.*; 'prudential policy,' समीक्ष्यकारित्वं, सुविमृश्यकारित्वं, समीक्षापुरःसरं उपायप्रयोगः.

To POLISH, *v. a.* (Make smooth and glossy) तिज् (c. 10. तेजयति -यितुं), परिष्कृ, निष्टप् (c. 10. निष्टापयति -यितुं, rt. तप्), कान्तिं दा, स्निग्धीकृ, श्लक्ष्णीकृ, मृज् (c. 2. मार्ष्टि -र्ष्टुं), प्रमृज्.—(Refine, make polite) परिष्कृ, संस्कृ, शिष्टीकृ, सभ्यं -भ्यां कृ, सभ्यतां or शिष्टतां जन् (c. 10. जनयति -यितुं) or दा.

POLISH, *s.* (Glossiness) कान्तिः *f.*, शोभा, स्निग्धता, स्नैग्ध्यं, श्लक्ष्णता.—(Finish) परिष्कारः, परिष्कृतिः *f.*, संस्कारः, संस्कृतिः *f.*—(Refinement) शिष्टता, परिष्कारः, सभ्यता, सभाचातुर्य्यं, सुजनता, सौजन्यं, शिष्टाचारसम्पन्नता, सभ्याचारसम्पन्नता.

POLISHED, *p. p.* (Made glossy) परिष्कृतः -ता -तं, तेजितः -ता -तं, निष्टप्तः -प्ता -प्तं, स्निग्धीकृतः &c., श्लक्ष्णीकृतः &c., मृष्टः -ष्टा -ष्टं, प्रमृष्टः &c., निर्धौतः -ता -तं, निशातः -ता -तं, उज्ज्वलितः -ता -तं.—(Refined) परिष्कृतः -ता -तं, संस्कृतः &c., शिष्टः -ष्टा -ष्टं, सभ्यः -भ्या -भ्यं, शिष्टाचारसम्पन्नः -न्ना -न्नं, सभ्याचारसम्पन्नः &c., अग्राम्यः -म्या -म्यं.

POLISHER, *s.* परिष्कर्त्ता *m.* (र्तृ), परिष्कारकः, तेजकः, कान्तिदः, कान्तिदायकः, निर्णेजकः, मार्जकः, सम्मार्जकः.

POLISHING, *s.* परिष्कारः, परिष्कृतिः *f.*, संस्कारः, तेजनं, श्लक्ष्णीकरणं.

POLITE, *a.* (Refined in manners) शिष्टः -ष्टा -ष्टं, सभ्यः -भ्या -भ्यं, शिष्टाचारी -रिणी -रि (न्), सभ्याचारी &c., सभ्यशीलः -ला -लं, शिष्टाचारसम्पन्नः -न्ना -न्नं, सभ्याचारसम्पन्नः &c., सुजनः -ना -नं, विनीतः -ता -तं, विनयवान् -वती -वत् (त्), सविनयः -या -यं, अग्राम्यः -म्या -म्यं.—(Courteous, obliging) सुशीलः -ला -लं, आदरशीलः &c., वन्दारुः -रुः -रु, दक्षिणः -णा -णं, अनुनयी &c., सानुनयः -या -यं, अनुरोधी &c., अनुकूलः -ला -लं, प्रियंवदः -दा -दं, अभिवादकः -का -कं, शक्तुः -क्तुः -क्तु, सत्कारी &c.

POLITELY, *adv.* सभ्यवत्, शिष्टवत्, विनीतवत्, सविनयं, सानुनयं, सुशीलवत्, सदाक्षिण्यं, सभ्याचारानुसारेण, शिष्टाचारानुसारात्.

POLITENESS, *s.* (Refinement of manners) शिष्टता, सभ्यता, सभ्यशीलता, शिष्टाचारित्वं, सभ्याचारित्वं, विनीतता -त्वं, विनयः, सुजनता, सौजन्यं, अग्राम्यता.—(Courteousness) सुशीलता, आदरशीलता, दाक्षिण्यं, अनुनयः, आनन्दनं, अनुरोधः, अनुकूलता.—(Polite behaviour) शिष्टाचारः, शिष्टाचरणं, सभ्याचारः, सभ्याचरणं.

POLITIC, *a.* (Skilful in managing public affairs) नीतिकुशलः -ला -लं, नीतिज्ञः -ज्ञा -ज्ञं, नीतिविद्याज्ञः -ज्ञा -ज्ञं, नीतिविशारदः -दा -दं, नीतिदक्षः -क्षा -क्षं, नीतिमान् -मती -मत् (त्), नीतिविद् *m. f. n.*, नयविद्, नीतिचतुरः -रा -रं.—(Skilful in the management of affairs generally) व्यवहारकुशलः -ला -लं, व्यवहारदक्षः -क्षा -क्षं, कर्म्मनिर्वाहकुशलः -ला -लं, कुशलः -ला -लं, विचक्षणः -णा -णं, निपुणः -णा -णं.—(Wise, well devised, adapted to its end) सुनीतः -ता -तं, सुयुक्तः -क्ता -क्तं, सुप्रयुक्तः &c., सुघटितः &c., सम्यङ्नीतः &c., यौक्तिकः -की -कं, सुसमीक्ष्य or सुविमृश्य or सुसमीक्षापूर्व्वं कृतः -ता -तं, अर्थसम्पादकः -का -कं, अर्थसाधकः -का -कं, कार्य्यसाधकः &c., अर्थकरः -रा -री -रं, हितः -ता -तं.

POLITICAL, *a.* नीतिसम्बन्धी -न्धिनी &c., नीतिविद्यासम्बन्धी &c., राजनीतिसम्बन्धी &c., राज्यनयनसम्बन्धी &c., राज्यव्यवहारसम्बन्धी &c., नीतिविषयकः -का -कं, राजनीतिविषयः -या -यं, राजकीयः -या -यं, नीति or देश or राष्ट्र or राज्य in comp.; as, 'political lore,' नीतिविद्या, नीतिशास्त्रं; 'political rights,' देशाधिकारः, पौरजनाधिकारः.

POLITICAL ECONOMY, *s.* नीतिविद्या, देशपोषणविद्या, देशपालनविद्या, राष्ट्रपालनविद्या, राष्ट्रपोषणविद्या, राज्यव्यवस्थाविद्या, राज्यनिर्वाहविद्या, राज्यकर्म्मनयः -यनं.

POLITICALLY, *adv.* नीतिमपेक्ष्य, नीतिविद्यामपेक्ष्य, राज्यव्यवस्थामपेक्ष्य.

POLITICIAN, *s.* नीतिज्ञः, नीतिकुशलः, नीतिविद् *m.*, नीतिवेदी *m.* (न्), नीतिविशारदः, नीतिविद्याज्ञः, राजनीतिकुशलः, राजनीतिविशारदः, नयविशारदः.

POLITICS, *s.* (Science of government) नीतिः *f.*, नीतिविद्या, नयः, राजनीतिः *f.*, राजनीतिविद्या, नीतिशास्त्रं, राजनीतिशास्त्रं, राज्यनयनविद्या, राज्यशासनविद्या.—(Political or public affairs) राज्यविषयाः *n. pl.*, राज्यकर्म्माणि *n. pl.*, राज्यकार्य्याणि *n. pl.*, देशव्यवहारः, राष्ट्रव्यवहारः.

POLITY, *s.* (System of government) राज्यनीतिः *f.*, राज्यरीतिः *f.*, राज्यनीतिरूपं, राज्यव्यवस्था, राज्यस्थितिः *f.*, राज्यनियमः, राज्यविधिः *m.*, राज्यप्रवृत्तिः *f.*, राज्यकरणनियमः, नीतिः *f.*, दण्डनीतिः *f.*

POLL, *s.* (Head) मुण्डः -ण्डं -ण्डकं, शिरस् *n.*, शीर्षं, मस्तकः -कं.—(Entry of the names of electors) नामाभिलेखनं, नामलिखनं, नामलेखनं, नामारोपणं, नामसमारोपणं.—(List of names) नामावलिः -ली *f.*, नामपरिसंख्या.

To POLL, *v. a.* (Cut off the hair) केशान् छिद् or लू or वप्.—(Enter names of electors, &c., in a list) नामावलिपत्रे or नामपरिसंख्यापत्रे नामानि समारुह् in caus. or आरुह् or अभिलिख् or लिख्

POLLARD, *s.* छिन्नाग्रवृक्षः, छिन्नाग्रद्रुमः, लूनाग्रवृक्षः, लूनाग्रतरुः *m.*

POLLED, *p. p.* (Lopped) छिन्नः -न्ना -न्नं, लूनः -ना -नं.—(Registered as the names of voters) नामावलिपत्रारोपितः -ता -तं अभिलिखितः -ता -तं.

POLLEN, *s.* (Of a flower) परागः, रजस् *n.*, पुष्परजस् *n.*, पुष्परेणुः *m.*, पांशुः *m.*; 'laden with pollen,' परागवान् -वती -वत् (त्), परागी -गिणी -गि (न्).

To POLLUTE, *v. a.* दुष् (c. 10. दूषयति -यितुं), सन्दुष्, प्रतिदुष्, मलिनीकृ, मलिन (nom. मलिनयति -यितुं), कलुषीकृ, कलुष (nom. कलुषयति -यितुं), लिप् (c. 6. लिम्पति, लेप्तुं), अनुलिप्, दिह् (c. 2. देग्धि -ग्धुं), मलेन दुष् or लिप् or अञ्ज् (c. 7. अनक्ति, अंक्तुं), कलङ्क (nom. कलङ्कयति -यितुं), समलीकृ, अमेध्येन लिप्, अमेध्यीकृ, मलीमसीकृ, अपवित्रीकृ.—(Taint with guilt) दुष्, भ्रंश् (c. 10. भ्रंशयति -यितुं), भ्रष्टीकृ, भ्रष्टं -ष्टां कृ.—(A virgin) कन्यां दुष् or धृष् (c. 10. धर्षयति -यितुं).

POLLUTED, *p. p.* दूषितः -ता -तं, दुष्टः -ष्टा -ष्टं, मलदूषितः &c., मलिनितः -ता -तं, मललिप्तः -प्ता -प्तं, लिप्तः &c., अमेध्यलिप्तः &c., अमेध्याक्तः -क्ता -क्तं, कलुषितः -ता -तं, कलुषीकृतः &c., मलीमसः -सा -सं, समलः -ला -लं, मलवान् -वती -वत् (त्), कलङ्कितः -ता -तं.—(As a virgin) दूषिता, भ्रष्टा, धर्षिता

POLLUTER, *s.* दूषकः, दूषणः, कलुषकारी *m.* (न्), मलावहः, अशौचकृत्

POLLUTION, *s.* (The act) दूषणं, मलदूषणं, मललेपनं, मलिनीकरणं, कलुषीकरणं, अमेध्यदूषणं, अमेध्यलेपः, अपवित्रीकरणं.—(The state) मलिनत्वं, मालिन्यं, समलता -त्वं, अमेध्यता -त्वं, मलदूषितत्वं, अमेध्यलिप्तता, अमेध्याक्तत्वं, अशुचित्वं, अशौचं -चत्वं, अपवित्रता -त्वं, दुष्टता -त्वं.—(Nocturnal) स्वप्नदोषः, स्वप्नावस्था, स्वप्नमध्ये शुक्रपातः.

POLTROON, *s.* कापुरुषः, कुपुरुषः, क्लीवः, कातरः, हतकः, कृपणः, भीरुजनः, निर्वीर्य्यः, धैर्य्यहीनः, शौर्य्यहीनः, अधीरः.

POLTROONERY, *s.* क्लीवता, कापुरुषत्वं, अपौरुषं, कातरता, भीरुता.

POLYANDROUS, POLYANDRIST, *s.* बहुभर्तृका, बहुपतिका, अनेकभर्तृका.

POLYANDRY, *s.* बहुभर्तृत्वं, बहुभर्तृधारणं, अनेकपतिधारणं.

POLYCHORD, *a.* बहुतन्त्री -न्त्रिणी -न्त्रि (न्), बहुतन्तुः -न्तुः -न्तु, अनेकतन्त्री &c.

POLYGAMIST, *s.* (Practiser of polygamy) बहुभार्य्यः, अनेकभार्य्यः, बहुपत्नीकः, दारी *m.* (न्), अनेकस्त्रीकः.—(Defender of it) बहुपत्नीवादी *m.* (न्).

POLYGAMY, *s.* बहुपत्नीत्वं, बहुभार्य्यत्वं -ता, अनेकभार्य्यता, सापत्न्यं.

POLYGENOUS, *a.* बहुविधः -धा -धं, अनेकविधः &c., बहुप्रकारः -रा -रं.

POLYGLOT, *a.* बहुभाषः -षा -षं, अनेकभाषः -षा -षं.

POLYGLOT, *s.* बहुभाषग्रन्थः, अनेकभाषग्रन्थः, बहुभाषपुस्तकं.

POLYGON, *s.* बहुकोणः -णं, बहुभुजः, बह्वस्रं -स्री, अनेकास्रं -स्री, बहुकोणाकृतिः *f.*, बह्वस्राकृतिः *f.*, बहुकोणा मूर्त्तिः.

POLYGONAL, POLYGONOUS, *a.* बहुकोणः -णा -णं, बहुभुजः -जा -जं, बह्वस्रः -स्रा -स्रं, अनेकास्रः -स्रा -स्रं.

POLYMATHY, *s.* बहुविद्याज्ञानं, अनेकविद्याज्ञानं, बहुशास्त्रज्ञानं.

POLYPETALOUS, *a.* बहुदलः -ला -लं, अनेकदलः &c., बहुदली -लिनी &c.

POLYPHAGOUS, *a.* बहुभक्षः -क्षा -क्षं, बहुखादकः -का -कं, बह्वाशी -शिनी &c.

POLYPHONOUS, *a.* बहुस्वरः -रा -रं, बहुस्वनः -ना -नं, बहुध्वनिः -निः -नि.

POLYPUS, *s.* बहुपादः, बहुपाद् *m.*, अनेकपाद्, बहुमूलः, अनेकमूलः

POLYSPERMOUS, *a.* बहुबीजः -जा -जं, प्रचुरबीज &c., अनेकबीजः &c.

POLYSYLLABIC, *a.* बह्वक्षरः -रा -रं, अनेकाक्षरः &c., बह्वक्षरी -रिणी -रि (न्).

POLYSYLLABIC, *s.* बह्वक्षरं, बह्वक्षरशब्दः, अनेकाक्षरशब्दः.

POLYTHEISM, *s.* बहुदेवमतं, बहुदेववादः, अनेकदेवमतं, अनेकवादः.

POLYTHEIST, *s.* बहुदेवमतावलम्बी *m.* (न्), अनेकदेववादी *m.*, अनेकवादी *m.*

POMANDER, *s.* भावितं, वासितं, वासितचूर्णं, सुगन्धिचूर्णं.

POMATUM, POMADE, *s.* विलेपनं, सुगन्धिलेपः, गात्रानुलेपनी, यक्षकर्दमः.

POMEGRANATE, *s.* (The tree) दाडिमः -मी, दाडिम्बः, दालिमः, डालिमः, करकः, रक्तबीजः, शुकवल्लभः, फलशाडवः, मणिबीजः, मधुबीजः, सत्फलः, कुचफलः, सुनीलः, पिण्डीरः, नीरसः.—(Its fruit) दाडिमं, दालिमं, दाडिमफलं.

POMMEL, *s.* (Knob) पिण्डः, गण्डः, गुल्मः, आभोगः.—(Of a saddle) पर्य्याणपिण्डः, पर्य्याणबहिःस्थपिण्डः, पर्य्याणगुल्मः.

To POMMEL, *v. a.* तड् (c. 10. ताडयति -यितुं), वेत्राघातं कृ, दण्डाघातं कृ.

POMP, *s.* (Procession) यात्रा, यात्राप्रसङ्गः.—(Show) आडम्बरं, ऐश्वर्य्यं, शोभा, प्रतापः, अतिप्रतापः, अतिशोभा, दम्भार्थं शोभा or तेजस् *n.*, चमत्कारः, कौतुकं. *See* PARADE, PAGEANTRY.

POMPOUS, *a.* (Displaying pomp, showy) महाप्रतापः -पा -पं, अतिप्रतापी -पिनी -पि (न्), अतिशोभनः -ना -नं, आडम्बरी &c., कौतुकी &c.—(Ostentatious) दाम्भिकः -की -कं, दम्भी &c., दम्भार्थकः -का -कं, साटोपः -पा -पं, अतिगर्व्वितः -ता -तं, दर्पाध्मातः &c., गर्व्वितः &c., गर्व्वितवाक्यः -क्या -क्यं, विकत्थनः -ना -नं.

POMPOUSLY, *adv.* (Magnificently) अतिप्रतापेन, अतिशोभापूर्व्वं, साडम्बरं.—(Ostentatiously) दम्भार्थं, सदम्भं, दम्भपूर्व्वं, सगर्व्वं, गर्व्वितप्रकारेण, लोकदर्शनार्थं, विकत्थनपूर्व्वं, साटोपं.

POMPOUSNESS, *s.* (Magnificence) ऐश्वर्य्यं, सप्रतापत्वं. *See* POMP.—(Ostentatiousness) दम्भः, दाम्भिकत्वं, साटोपत्वं, गर्व्वितत्वं, विकत्था, दर्पाध्मातता.

POND, *s.* तडागः, जलाशयः, जलाधारः, सरस् *n.*, ह्रदः, खातं, सरोवरः -रं, क्रीडासरोवरः, वापी -पिः *f.*, कासारः, पुष्करिणी, सरसी, पद्माकरः, मीनगोधिका: 'a natural pond,' अखातं, देवखातकं; 'an oblong pond,' दीर्घिका.

To PONDER, *v. a.* and *n.* मनसा विचर् (c. 10. -चारयति -यितुं) or विगण् (c. 10. -गणयति -यितुं), चिन्त् (c. 10. चिन्तयति -यितुं), विचिन्त्, सञ्चिन्त्, ध्यै (c. 1. ध्यायति, ध्यातुं), अनुध्यै, अभिध्यै, सन्ध्यै, भू (c. 10. भावयति -यितुं), विभू, सम्भू, विमृश् (c. 6. मृशति -म्रष्टुं), परिमृश्, वितर्क् (c. 10. -तर्कयति -यितुं), अनुतर्क्.

PONDERABLE, *a.* (That may be weighed) तुलायोग्यः -ग्या -ग्यं, तुलनीयः -या -यं.—(To be pondered) चिन्त्यः -न्त्या -न्त्यं, चिन्तनीयः -या -यं.

PONDERATION, *s.* (Act of weighing) तुलाधारणं.—(Act of pondering) सुविचारणं -णा, सुचिन्तनं, विगणनं -ना, सम्भावना

PONDERED, *p. p.* चिन्तितः -ता -तं, सुविचारितः &c., विगणितः &c., सुचिन्तितः &c.

PONDEROSITY *s.* भारित्वं, सभारत्वं, अतिभारित्वं, गुरुता, अतिगुरुता -त्वं, गरिमा *m.* (न्), भारवत्त्वं.

PONDEROUS, *a.* भारी -रिणी -रि (न्), अतिभारी &c., सभारः -रा -रं, भारवान् -वती -वत् (त्), गुरुः -र्व्वी -रु, अतिगुरुः &c.

PONDEROUSLY, *adv.* अतिभारेण, सुभारेण, सभारं, सगौरवं, अतिगुरु.

PONIARD, *a.* कट्टारः, कृपाणी, शङ्कुः *m.*, छुरिका, असिपुत्रिका, कर्त्तरी.

To PONIARD, *v. a.* कट्टारेण व्यध् (c. 4. विध्यति, व्यद्धुं), छुर् (c. 6. छुरति -रितुं).

PONTAGE, *s.* सेतुकरः, सेतुशुल्कः -ल्कं, सेतुदेयं.

PONTIFF, *s.* प्रधानधर्म्माध्यक्षः, प्रधानधर्म्माधिकारी *m.* (न्), मुख्यधर्म्माध्यक्षः, महाधर्म्माध्यक्षः, महाधर्म्माधिकारी *m.* (न्), प्रधानयाजकः, मुख्यपुरोहितः, महायाजकः.

PONTIFICAL, *a.* प्रधानधर्म्माध्यक्षसम्बन्धी -न्धिनी &c., प्रधानयाजकीयः -या -यं.

Pontificate, *s.* प्रधानधर्म्माध्यक्षस्य पदं or अधिकारः, धर्म्माध्यक्षता -त्वं.

Pontoon, *s*, सेतुबन्धने प्रयुक्तस् तरालुः or तरान्धुः; 'bridge,' तरालुबद्धसेतुः.

Pony, *s.* क्षुद्रघोटकः, क्षुद्राश्वः, क्षुद्रशरीरो घोटकः or अश्वः.

Pool, *s.* तडागः, जलाशयः, जलाधारः, पल्वलं, कुण्डं, सरस् *n.*, ह्रदः, कासारः, पुष्करिणी, निपानं, परिवापः, कूपं.

Poop, *s.* नावः पश्चिमभागः or पश्चाद्भागः, नौपृष्ठं, नौकापृष्ठं.

Poor, *a.* (Destitute of money or property) दरिद्रः -द्रा -द्रं, निर्धनः -ना -नं, अधनः -ना -नं, धनहीनः &c., अल्पधनः &c., निर्धनकः -का -कं, क्षीणधनः -ना -नं, धनशून्यः -न्या -न्यं, दीनः -ना -नं, अर्थहीनः &c., वित्तहीनः &c., द्रव्यहीनः &c., द्रव्यशून्यः &c., विभवहीनः &c., अल्पद्रव्यः -व्या -व्यं, निःस्वः -स्वा -स्वं, गतार्थः -र्था -र्थं, दुर्गतः -ता -तं, अनर्थः -र्था -र्थं, निष्काञ्चनः -ना -नं, निःकाञ्चनः &c., अकाञ्चनः &c., निष्किञ्चनः &c., दारिद्र्यग्रस्तः -स्ता -स्तं, दरिद्रितः -ता -तं, दरिद्रायकः -का -कं, दरिद्रिता -त्री -तृ (तृ), कृपणः -णा -णं, अधन्यः -न्या -न्यं, दुराढ्यः -ढ्या -ढ्यं, किंवान् -वती -वत् (त्); 'to be poor,' दरिद्रा (c. 2. दरिद्राति -द्रितुं), दरिद्रीभू.—(Paltry, mean, inferior) तुच्छः -च्छा -च्छं, कृपणः -णा -णं, कुत्सितः -ता -तं, गर्हितः &c., निर्गुणः -णा -णं, विगुणः &c., क्षुल्लकः -का -कं, अधमः -मा -मं, जघन्यः -न्या -न्यं, खलः -ला -लं, तृणप्रायः -या -यं, अनुत्तमः -मा -मं, or expressed by दुर्, कु, कल्प, पाश, देशीय in comp.; as 'a poor poet,' कुकविः *m.*, कविकल्पः &c.; 'a poor grammarian,' कुवैयाकरणः, वैयाकरणपाशः; 'poor fare,' कदन्नं.—(Wretched, pitiable) दीनः -ना -नं, कृपणः -णा -णं, दुर्बलः -ला -लं, अनुकम्प्यः -म्प्या -म्प्यं, दुःखी -खिनी &c., दुःखान्वितः &c., वराकः -की -कं; 'poor wretch,' तपस्वी *m.* (न्), कृपणजनः.—(As soil) रूक्षः -क्षा -क्षं, ईरिणः -णा -णं.—(Word of endearment) प्रियः -या, दयितः -ता, वत्सः -त्सा.

Poor-house, poor-asylum, *s.* धर्म्मशाला, दरिद्रशाला, दरिद्रालयः -यं, दरिद्राश्रयः, दरिद्रगृहं.

Poorly, *a.* (Somewhat indisposed) अस्वस्थः -स्था -स्थं, ईषदस्वस्थः &c., ईषद्रोगी -गिणी -गि (न्), असुस्थः -स्था -स्थं, ईषद्रोगार्त्तः -र्त्ता -र्त्तं.

Poorly, *adv.* (Without wealth, in indigence) दारिद्र्येण, सदारिद्र्यं, दरिद्रवत्, निर्धनवत्, कृपणं, दीनं, सदैन्यं, धनेन विना.—(With little success) असिद्धिपूर्व्वं, असिद्ध्या, सिद्धिं विना, फलं विना, निष्फलं.

Poorness, *s.* (Want of money or property) दरिद्रता, दारिद्र्यं, दारिद्रं, निर्धनता -त्वं, अधनता, धनहीनता, धनशून्यता, दीनता, दैन्यं, अर्थहीनता, वित्तहीनता. *See* Poverty.—(Meanness, paltriness) तुच्छता, कृपणता, कार्पण्यं, निर्गुणता, खलता.—(Barrenness, unproductiveness) रूक्षता, शुष्कता -त्वं, निष्फलता, विफलता -त्वं, अफलदत्वं, अफलोत्पादकता.

Poor-spirited, *a.* कृपणबुद्धिः -द्धिः -द्धि, दीनबुद्धिः &c., दीनमनस्कः -स्का -स्कं.

Pop, *s.* (Sharp, sudden sound) स्फुत्कारः, स्फुत् indecl., आकस्मिकशब्दः, पटशब्दः, क्वणितं, आकस्मिकध्वनिः *m.*, अकस्मात्क्वणितं.

To **pop**, *v. n.* (Enter suddenly) अकस्मात् प्रविश् (c. 6. -विशति -वेष्टुं) or निविश्, आकस्मिकध्वनिपूर्व्वं प्रविश्, आकस्मिकप्रवेशं कृ.—(Pop out) अकस्मात् or आकस्मिकध्वनिपूर्व्वं निर्गम् (c. 1. -गच्छति -गन्तुं) or निर्गतः -ता -तं भू; 'in and out,' गमनागमनं कृ.—(Make a sudden sound) स्फुत् शब्दं कृ, आकस्मिकध्वनिं कृ, अकस्मात् क्वण् (c. 1. क्वणति -णितुं) or ध्वन्, पट् शब्दं कृ.

To **pop**, *v. a.* (Cause to enter suddenly) अकस्मात् प्रविश् (c. 10. -वेशयति -यितुं) or निविश्, आकस्मिकध्वनिपूर्व्वं प्रविश्.—(Cause to issue suddenly, pop out) अकस्मात् निर्गम् (c. 10. -गमयति -यितुं) or निःसृ (c. 10. -सारयति -यितुं).

Pop, *adv.* स्फुत्कारेण, स्फुत् शब्देन, अकस्मात्, आकस्मिकध्वनिपूर्व्वं.

Pope, *s.* रोमीयधर्म्माध्यक्षः, रोमीयधर्म्माधिपतिः *m.*, महाधर्म्माध्यक्षः.

Popinjay, *s.* शुकः, कीरः. *See* Parrot.

Popish, *a.* रोमीयधर्म्माध्यक्षसम्बन्धी &c., रोमीयधर्म्मसम्बन्धी &c.

Poplar, *s.* दीर्घवृक्षः, दीर्घतरुः *m.*, दीर्घपादपः, दीर्घद्रुमः.

Poppy, *s.* खसखसः; 'its juice,' खसखसरसः; 'seed,' लिक्षा, लिक्ष्या.

Populace, *s.* लोकः, प्रजा, सामान्यलोकः -काः *m. pl.*, साधारणलोकः -काः *m. pl.*, प्राकृतलोकः, प्राकृतजनाः *m. pl.*, अवरजनाः, अवरलोकाः *m. pl.*, अवरवर्णाः *m. pl.*

Popular, *a.* (Pertaining to the common people) लौकिकः -की -कं, साधारणलोकसम्बन्धी &c., सामान्यलोकसम्बन्धी &c., लोक or जन in comp.; 'courting popular favor,' लोकरञ्जनं, जनरञ्जनं, लोकानुरञ्जनं.—(Prevailing among the people, general) लौकिकः -की -कं, सार्व्वलौकिकः &c., लोकसिद्धः -द्धा -द्धं, लोकप्रसिद्धः &c., लोकरूढः -ढा -ढं, रूढः &c., लोकसम्मतः -ता -तं, लोकमतः &c., लोक or जन in comp.; 'popular usage or custom,' लोकव्यवहारः, जनव्यवहारः, लोकाचारः, जनाचारः, लौकिकाचारः, लोकमर्य्यादा, जनमर्य्यादा, जनरीतिः *f.*, लौकिकरीतिः *f.*, लोकरीतिः *f.*, लोकप्रवाहः; 'popular rumour or report,' लोकप्रवादः, जनप्रवादः, लोकवादः, जनवादः, लोकवार्त्ता, जनवार्त्ता, जनश्रुतिः *f.*, जनरवः, लोकवदन्ती, जनवदन्ती; 'popular story,' लोककथा, जनकथा; 'popular accusation,' जनापवादः; 'odium,' जनविद्वेषः; 'tumult,' प्रकृतिक्षोभः; 'apprehension or acceptation,' लोकग्रहः; 'conforming to popular opinion,' लोकानुसरणं, लौकिकानुसरणं, गतानुगमनं; 'one who does so,' लोकानुसारी *m.* (न्), गतानुगतिकः.—(Suitable to common people) सामान्यलोकयोग्यः -ग्या -ग्यं, सामान्यलोकोपयोगी -गिनी -गि (न्), सर्व्वलोकयोग्यः &c., साधारणः -णी -णं.—(Pleasing to the people, enjoying the favor of people) लोकप्रियः -या -यं, सर्व्वलोकप्रियः &c., जनप्रियः &c., लोकानुकूलः -ला -लं, लोकग्राह्यः -ह्या -ह्यं, सर्व्वप्रियः &c., सकलप्रियः &c.

Popularity, *s.* लोकप्रीतिः *f.*, जनप्रीतिः *f.*, लोकप्रियता, सर्व्वलोकप्रीतिः *f.*, लोकानुकूल्यं, लोकानुकूलता, जनानुकूल्यं, जनानुकूलता, जनप्रियता, सर्व्वप्रियता, लोकानुरागः, जनानुरागः, लोकरञ्जनं, लोकसम्मानं, लोकग्राह्यता; 'desire of it,' लोकरञ्जनेच्छा, लोकानुरञ्जनैषा.

Popularly, *adv.* लोकतस्, लोकयोग्यं, लौकिकप्रकारेण, लोकरञ्जनार्थं.

To **populate**, *v. a.* (People) सजनीकृ, सजनं -नां कृ, जनविशिष्टं -ष्टां कृ, वस् in caus.

To **populate**, *v. n.* प्रजोत्पत्तिं कृ, प्रजोत्पादनं कृ, प्रजावृद्धिं कृ or जन्, प्रजन् (c. 4. -जायते -जनितुं), प्रजाम् उत्पद् (c. 10. -पादयति -यितुं).

Population, *s.* प्रजा, प्रजासंख्या, जनसंख्या, लोकसंख्या, जनाः *m. pl.*, जनता, देशजनता, देशजनाः *m. pl.*, देशप्रजा, लोकः, देशलोकः.

Populous, *a.* बहुप्रजः -जा -जं, बहुजनः -ना -नं, प्रचुरजनः &c., प्रचुरपुरुषः -षा -षं, प्रचुरप्रजः &c., जनसम्बाधः -धा -धं, प्रजाबहुलः -ला -लं, जनपदायुतः -ता -तं, वासितः -ता -तं.

Populousness, *s.* बहुप्रजत्वं, प्रजाप्राचुर्य्यं, प्रजाबाहुल्यं, बहुजनत्वं, जनबाहुल्यं, लोकबाहुल्यं, पुरुषप्राचुर्य्यं, पुरुषबाहुल्यं.

Porcelain, *s.* कौलालकं, मृण्मयभाण्डानि *n. pl.*, मृद्भाण्डानि *n. pl.*, मार्त्तिकं.

Porch, *s.* देहली -लिः *f.*, द्वारमण्डपः -पं, वातायनं, द्वारप्रकोष्ठकं, निष्काशः; 'side seat of a portico,' मृगासनं; 'portico before a temple,' सभामण्डपः -पं.

Porcupine, *s.* शल्यकण्ठः, शल्यः, -ल्यकः, शलाका, शल्की *m.* (न्), श्वाविद् *m.* (ध्), कण्टकागारः, सेधा; 'his quills,' शललं-ली, शलः-लं.

Pore, *s.* (Of the skin) रोमकूपः, तनुकूपः, रोमरन्ध्रं, लोमरन्ध्रं, लोमकूपः, स्वेदद्वारं, स्वेदमार्गः.—(Small spiracle) सूक्ष्मरन्ध्रं.

To **pore**, *v. n.* (Read books with fixed application) बद्धदृष्ट्या or स्थिरदृष्ट्या or अनिमिषनयनाभ्यां or अनन्यदृष्ट्या ग्रन्थान् अधी (c. 2. अधीते, अध्येतुं, rt. इ), अत्यभिनिवेशेन or अभिनिविष्टचेतसा or अनन्यमनसा ग्रन्थाध्ययनं कृ, अनन्यदृष्टिर् अध्ययनं कृ.

Pork, *s.* शूकरमांसं, सूकरमांसं, वराहमांसं, वाराहं, शौकरं.

Porker, *s.* शूकरः, वराहः, पचनयोग्यः शूकरशावकः, क्षुद्रशूकरः.

Porous, *a.* (Having interstices in the skin) रोमकूपयुक्तः -क्ता -क्तं, रोमकूपविशिष्टः -ष्टा -ष्टं, रोमकूपमयः -यी -यं, सरोमकूपः -पा -पं.—(Having minute spiracles) सूक्ष्मरन्ध्रयुक्तः -क्ता -क्तं, सूक्ष्मरन्ध्रपूर्णः -र्णा -र्णं, सूक्ष्मरन्ध्रविशिष्टः -ष्टा -ष्टं, सरन्ध्रः -न्ध्रा -न्ध्रं.—(Having interstices for exudation) विरलावयवकः-का-कं, शिथिलावयवकः &c., द्रावकावयवकः &c., स्वेदमार्गविशिष्टः -ष्टा -ष्टं.

Porousness, porosity, *s.* सरोमकूपत्वं, रोमकूपपूर्णता, सूक्ष्मरन्ध्रपूर्णता, बहुरन्ध्रपूर्णता, सूक्ष्मरन्ध्रबाहुल्यं, सरन्ध्रता, विरलावयवत्वं, शिथिलावयवत्वं, द्रावकावयवत्वं.

Porpoise, *s.* शिशुकः, शिशुमारः, उलुपी *m.* (न्), चुलुकी *m.* (न्), अम्बुकूर्म्मः, अम्बुकीशः, सीरकः, वाःकिटि *m.*, जलशूकरः, वारिशूकरः, समुद्रीयशूकरः.

Porridge, *s.* यूषं, यूषः -षं, जुष्कः, मन्थः, चूर्णधान्यमन्थः.

Porringer, *s.* यूषपात्रं, यूषपात्रं, पात्रं, भाजनं, भाण्डं.

Port, *s.* (Harbour, haven) नौकाशयः, नौकाश्रयः, आशयः, आश्रयस्थानं, उत्तरणस्थानं, खातं, उत्तरणखातं, नौकोत्तरणयोग्यं खातं, नौबन्धनखातं, नौबन्धनयोग्यं खातं, नौरक्षणस्थानं; 'reaches the desired port, इष्टस्थानं or इष्टदेशं गच्छति.—(Gate) द्वारं.

Portability, *s.* वाह्यता, सुवाह्यता, सुवहनीयता, हस्तवाह्यत्वं, लघुता.

Portable, *a.* सुवाह्यः -ह्या -ह्यं, वाह्यः &c., वहनीयः -या -यं, सुवहनीयः &c., सुखवाह्यः &c., अनायासवाह्यः &c., सुखवहनीयः &c., हस्तवाह्यः &c., सहजवाह्यः &c., लघुः -घुः -घ्वी -घु.

Portal, *s.* द्वारं, द्वार् *f.*, उपद्वारं, प्रतीहारः, प्रवेशद्वारं, मुखं.

Portcullis, *s.* नगरद्वारोपरिस्थो जङ्गमकपाटः तेन च शत्रोरागमनकाले पातितेन द्वारवर्त्म रुध्यते, द्वारवर्त्मरोधनयन्त्रं.

To **portend**, *v. a.* अग्रे सूच् (c. 10. सूचयति -यितुं), पूर्व्वं or पूर्व्वं दृश् (c. 10. दर्शयति -यितुं) or प्रदृश्, अनिष्टं सूच् or आविद् (c. 10. वेदयति -यितुं), पूर्व्वचिह्नं or पूर्व्वलक्षणं दा, पूर्व्वलक्षणेन भविष्यत् सूच् or अनिष्टसूचनं कृ or भाविव्यसनसूचनं कृ, भाविक्षयं or उत्पातं or विनिपातं शंस् (c. 1. शंसति -सितुं), कुलक्षणं दा.

Portent, *s.* (Omen) पूर्व्वलक्षणं, पूर्व्वचिह्नं, पूर्व्वलिङ्गं, शकुनं, भाविसूचकचिह्नं, भविष्यत्सूचकचिह्नं.—(Omen of ill, prodigy) उत्पातः, उपसर्गः, विनिपातः, व्यतीपातः, अद्भुतं, अरिष्टं, दुर्लक्षणं, अवलक्षणं, दुश्चिह्नं, अपचिह्नं, अपशकुनं, उपप्लवः, उपलिङ्गं, उपद्रवः, अत्याहितं, उपाकृतं, अजन्यं, विनिहतः, अशुभलक्षणं, अनिष्टसूचकचिह्नं, भाविव्यसनसूचकं or भाविक्षयसूचकं चिह्नं, कुलक्षणं; 'ceremonies to avert portents,' अद्भुतशान्तिः *f.*

Portentous, *a.* उत्पातशंसी -सिनी -सि (न्), विनिपातशंसी &c., औत्पातिकः -की -कं, औपसर्गिकः -की -कं, अनिष्टशंसी &c., अनिष्टसूचकः -का -कं, अनिष्टवेदी &c., अशुभशंसी &c., अशुभसूचकः &c., भविष्यसूचकः &c., अभद्रसूचकः &c., अद्भुतशंसी &c., अद्भुतसूचकः &c., अद्भुतः -ता -तं, अत्याहितः &c., शाकुनः -नी -नं, शाकुनिकः -की -कं.

Portentously, *adv.* सोत्पातं, अद्भुतं, उत्पातपूर्व्वं, दुर्लक्षणेन, कुलक्षणेन.

Porter, *s.* (Gate-keeper) द्वारपालः, द्वारी *m.* (न्), द्वाररक्षकः, द्वाःस्थः, द्वारस्थः, द्वाराध्यक्षः, दौवारिकः, द्वारिकः, प्रतिहारः, प्रतीहारः -री *f.*, द्वाःस्थितः, द्वाःस्थितदर्शकः, दर्शकः.—(Carrier of burdens) भारवाहः -हकः, भारवाही *m.* (न्), भारवाहिकः, भारिकः, भारी *m.* (न्), भारहरः, भारहारी *m.*, भारहारकः, वोढा *m.* (ढृ).

Porterage, *s.* (Cost of carriage) वहनमूल्यं, वाहनमूल्यं, भारवाहनमूल्यं.—(Business of a porter) भारवाहनं, भारिककर्म्म *n.* (न्).

Portfolio, *s.* पत्राधारः, पृथुपत्राधारः, महापत्राधारः, बृहत्पत्राधारः.

Porthole, *s.* नौपार्श्वछिद्रं, नौपार्श्वमुखं, नौपार्श्ववातायनं.

Portico, *s.* वरण्डः, द्वारप्रकोष्ठकं, बहिर्द्वारप्रकोष्ठकं, द्वारमण्डपः -पं, देहली -लि: *f.*, निष्काशः, वरण्डकः, वातायनं, पिण्डः, द्वारपिण्डः.

Portion, *s.* (Part) अंशः, भागः, विभागः, खण्डः -ण्डकः, अवयवः, अङ्गं, भित्तं, छेदः, भिन्नं, शकलः -लं.—(Portion allotted, share) विभागः, अंशः, भागः, भाजितं, भाज्यं, वण्टः -ण्टकः, उद्धारः.—(Share of an estate) ऋक्थांशः, ऋक्थभागः, रिक्थभागः, पैतृकरिक्थभागः, दायः, उद्धारः, औद्धारिकं.—(Wife's fortune) स्त्रीधनं, यौतकं, यौतुकं, युतकं, शुल्कः, औद्वाहिकं, अध्यावाहनिकं, कन्याधनं, परिबर्हं.

To **portion**, *v. a.* (Parcel out) विभज् (c. 1. -भजति -ते -भक्तुं), प्रविभज्, वण्ट् (c. 10. वण्टयति -यितुं), विभागशः or अंशांशि कृप् or परिकॢप् or विन्यस्, अंश्, व्यंस्.—(Endow) यौतकं or शुल्कं or वृत्तिं दा, प्रतिष्ठां कृ, प्रतिष्ठा.

Portionable, *a.* विभाज्यः -ज्या -ज्यं, भाज्यः &c., वण्टनीयः &c., औद्धारिकः &c.

Portioned, *p. p.* (Divided out) विभक्तः -क्ता -क्तं, प्रविभक्तः &c., संविभक्तः &c., अंशितः -ता -तं, परिकॢप्तः &c.—(Endowed) प्रतिष्ठितः -ता -तं, गृहीतशुल्कः -ल्का -ल्कं, गृहीतयौतकः &c.

Portioning, *s.* विभागः, विभाजनं, प्रविभागः, विभागकरणं, भाजनं, अंशनं, उद्धारविभागः, विभागकल्पना, वण्टनं.

Portionless, *a.* अनंशः -शा -शं, अंशहीनः -ना -नं, शुल्कहीनः -ना -नं.

Portliness, *s.* उदरविस्तारः, कायविस्तारः, शरीरगौरवं, शरीरस्थूलता, स्थूलशरीरत्वं, स्थूलकायत्वं, शरीरवृहत्त्वं.

Portly, *a.* (Dignified in mien) गौरवशाली -लिनी -लि (न्), साटोपगामी &c., गौरवगतिः -तिः -ति, गौरववृत्तिः &c.—(Bulky, corpulent) विस्तीर्णोदरः -रा -रं, विस्तीर्णकायः -या -यं, पृथूदरः -रा -रं, स्थूलकायः &c., वृहत्कायः &c., स्थूलशरीरः &c.

Portmanteau, *s.* चर्म्ममयं वस्त्रपात्रं or वस्त्रभाजनं, वस्त्राधारः.

Portrait, *s.* प्रतिमा, प्रतिमानं, उपमा, उपमानं, उपमितिः *f.*, प्रतिमूर्त्तिः *f.*, प्रतिकृतिः *f.*, चित्रलेखा, आलेख्यं, चित्राकृतिः *f.*, चित्रं, प्रतिच्छन्दः -न्दकं, प्रतिच्छाया, शोधितव्यक्तिप्रतिमा.

Portrait-painter, *s.* उपमाता *m.* (तृ), चित्रलेखकः, चित्रकारः, चित्रकरः, चित्रलिख् *m.* (ख्), आलेख्यकृत् *m.*, उपमानकृत् *m.*, प्रतिमानकृत् *m.*

Portrait-painting, *s.* चित्रलिखनं, चित्रलेखनं, उपमानकरणं, रूपकरणं.

To **portray**, *v. a.* (Paint) आलिख्, विलिख्, लिख्, चित्र्, वर्ण्, उपवर्ण्.—(Describe) वर्ण्, अनुवर्ण्, उपवर्ण्, निरूप्.

Portrayed, *p. p.* वर्णितः-ता-तं, आलिखितः &c., चित्रितः &c., चित्रगतः &c.

Portress, porteress, *a.* दौवारिकी, द्वारपालिका, प्रतीहारी, द्वाररक्षकी.

To **pose**, *v. a.* निरुत्तरीकृ, वाग्रोधं कृ, उत्तररोधं कृ, वाक्यरोधं कृ, प्रतिवाक्यरोधं कृ, वाक्स्तम्भनं कृ, उपमर्दं कृ, बाध् (c. 1. बाधते -धितुं), मुह् (c. 10. मोहयति -यितुं), विमुह्, शून्यं कृ.

Posed, *p. p.* निरुत्तरः -रा -रं, निरुत्तरीकृतः -ता -तं, बाधितः -ता -तं,

मोहितः -ता -तं, विमोहितः &c., कुण्ठितः &c., इतिकर्त्तव्यतामूढः -ढा -ढं.

Poser, *s.* उपमर्दकः, बाधकः, वाग्रोधकः, मोहकः, विमोहकः.

Position, *s.* (Situation) स्थानं, स्थितिः *f.*, अवस्थितिः *f.*, संस्थानं, पदं, आस्पदं, पदविः -वी *f.*—(Attitude) अङ्गस्थितिः *f.*, शरीरस्थितिः *f.*, आकारः; 'of the feet,' पदन्यासः, पादविन्यासः.—(Principle laid down, proposition advanced) पक्षः, प्रतिज्ञा, फक्किका, प्रमेयं, प्रतिज्ञेयं, प्रतिज्ञातं, भाषा, हेतुः *m.*, पूर्व्वपक्षः, उपन्यासः, अर्थः; 'false position,' हेत्वाभासः, पक्षाभासः, आभासः, मिथ्याहेतुः *m.*—(State, circumstances) अवस्था, स्थितिः *f.*, दशा, संस्थितिः *f.*, भावः, वृत्तिः *f.*, गतिः *f.*

Positive, *a.* (Explicit, express, direct) स्पष्टः -ष्टा -ष्टं, स्पष्टार्थः -र्था -र्थं, व्यक्तः -क्ता -क्तं, सुव्यक्तः &c., सुस्पष्टः &c., अवक्रः -क्रा -क्रं, अवक्रार्थः -र्था -र्थं, असन्दिग्धार्थः &c., अगूढः -ढा -ढं, अगर्भितः -ता -तं, प्रत्यक्षः -क्षा -क्षं.—(Peremptory, definite) नियतः -ता -तं, अवश्यकः -का -कं, आवश्यकः -की -कं, सुनियतः -ता -तं, निश्चितः &c., सुनिश्चितः &c., निर्णीतः &c., अवैकल्पिकः -की -कं, अविकल्पकः -का -कं.—(Absolute, real, existing in fact) वास्तवः -वी -वं, वास्तविकः -की -कं, तथ्यः -थ्या -थ्यं, सत्यः -त्या -त्यं, यथार्थः -र्था -र्थं, सन् सती सत् (त्), विद्यमानः -ना -नं, भूतः -ता -तं, तात्त्विकः -की -कं; 'positive charge,' तत्त्वाभियोगः.—(Settled by arbitrary appointment, not inbred) नियोगसिद्धः -द्धा -द्धं, नियोगप्रयुक्तः -क्ता -क्तं, नियोगहेतुकः -का -कं, अभावसिद्धः &c., अस्वाभाविकः -की -कं, अनैसर्गिकः -की -कं, असहजः -जा -जं, बहिर्जातः -ता -तं.—(Confident, sure) दृढनिश्चयः -या -यं, कृतनिश्चयः &c., जातनिश्चयः &c., निश्चितमनाः -नाः -नः (स्), निश्चितमनस्कः -स्का -स्कं, निश्चयी -यिनी -यि (न्), बद्धनिश्चयः -या -यं, दृढमतिः -तिः -ति, निःसंशयः -या -यं, निःसन्देहः -हा -हं.—(Confident in assertion) दार्ढ्येन स्वमतवादी &c., or स्वमताग्रही &c., मताग्रही &c., स्वमताभिमानी &c., मताभिमानी &c., दृढोक्तिः -क्तिः -क्ति, उक्तनिर्वाही &c., प्रोक्तनिर्वाही &c.

Positively, *adv.* (Expressly) स्पष्टं, सुस्पष्टं, व्यक्तं, सुव्यक्तं, स्पष्टार्थतस्, अवक्रं, असन्दिग्धं.—(Peremptorily, definitely) नियतं, सुनियतं, अवश्यं, अवश्यमेव, निश्चितं, सुनिश्चितं, विकल्पेन विना.—(Absolutely, really) वस्तुतस्, तत्त्वतस्, यथार्थतस्, तथ्यं, सत्यं, सत्यमेव.—(Confidently, surely) निश्चयेन, दृढनिश्चयेन, दृढनिश्चयपूर्व्वं, सुनिश्चयेन, सुनिश्चयपूर्व्वं, दार्ढ्येन, दृढं, सुदृढं.—(Dogmatically) स्वमताग्रहेण, मताग्रहेण, मताभिमानेन, दृढोक्त्या.

Positiveness, *s.* (Reality of existence) वास्तविकत्वं, तथ्यता, यथार्थत्वं, सत्ता, सत्त्वं, विद्यमानता, सत्यता -त्वं.—(Peremptoriness) दृढनिश्चयः -यत्वं, सुनिश्चयत्वं, दृढता, सुदृढता, दार्ढ्यं, अवक्रता, सुस्पष्टता, नियतत्वं, सुनियतत्वं, दृढनिर्णयः, सुनिर्णीतत्वं.—(Dogmaticalness) स्वमताग्रहः, मताग्रहः, मताभिमानं, दृढोक्तिः *f.*

To possess, *v. a.* (Have, hold) धृ (c. 10. धारयति -यितुं, c. 1. धरति, धर्त्तुं), धा (c. 3. दधाति, धत्ते, धातुं), आधा, विधा, भृ (c. 3. बिभर्त्ति, भर्त्तुं), दध् (c. 1. दधते -धितुं), शील् (c. 10. शीलयति -यितुं), भुज्, आप्, प्राप्.—(Hold in use, enjoy, occupy) भुज् (c. 7. भुनक्ति, भुंक्ते, भोक्तुं), उपभुज्, परिभुज्, अनुभुज्, अधिभुज्, भोगं कृ, परिभोगं कृ, अधिष्ठा, अध्यास्.—(Gain, obtain information of) आप् (c. 5. आप्नोति, आप्तुं), प्राप्, अवाप्, लभ्, उपलभ्, आसद्, अधिगम्, आविश्, समाविश्, आक्रम्, अध्याक्रम्.—(Have power over) अधिकृ, प्रभू, अधिष्ठा, वशीकृ.—(Engross, take up, as a thought, passion, &c.) आविश्, व्याप्, ग्रस्, आक्रम्.—(As an evil spirit, &c.) आविश्, समाविश्.—(Give possession, make possessed of) अधिकारं दा, अधिकृ, युज् in caus. *See* Possessed of.

Possessed, *p. p.* (Held, occupied, enjoyed) धृतः -ता -तं, धारितः &c., आविष्टः -ष्टा -ष्टं, समाविष्टः &c., आक्रान्तः -न्ता -न्तं, भुक्तः -क्ता -क्तं, परिभुक्तः &c., हस्तगतः -ता -तं, ग्रस्तः -स्ता -स्तं, आस्वादितः &c., अधिष्ठितः &c., अध्यासितः &c., आश्रितः &c., अधीनः -ना -नं.—(Gained) आप्तः -प्ता -प्तं, प्राप्तः &c., लब्धः -ब्धा -ब्धं, आसादितः -ता -तं, अधिगतः &c.—(Engrossed, affected by) आविष्टः &c., समाविष्टः &c., आक्रान्तः -न्ता -न्तं, ग्रस्तः -स्ता -स्तं, उपहतः &c.; as, 'by love,' कामाविष्टः &c.; 'by avarice,' लोभाविष्टः &c.—(Possessed of, endowed with) युक्तः -क्ता -क्तं, अन्वितः -ता -तं, उपेतः -ता -तं, समन्वितः -ता -तं, उपपन्नः -न्ना -न्नं, सम्पन्नः &c., संयुतः -ता -तं, अनपेतः -ता -तं, विशिष्टः -ष्टा -ष्टं, शालितः &c., सनाथः -था -थं or expressed by the affixes वत्, मत्, and इन्; as, 'possessed of wealth,' धनवान् -वती -वत् (त्), धनी -निनी -नि (न्), धनयुक्तः &c., धनान्वितः &c.; 'possessed of prosperity,' श्रीमान् &c.; 'possessed of learning,' विद्यावान् &c., विद्यासम्पन्नः &c.; 'of a father,' पितृमान्. *See* Possessing.—(By evil spirits) भूताविष्टः &c., भूतसमाविष्टः &c., पिशाचाविष्टः &c., भूतग्रस्तः &c., भूतसञ्चारितः &c., भूतार्त्तः -र्त्ता -र्त्तं, प्रेतवाहितः &c., भूतोपहतः &c.

Possessing, *part.* धारी -रिणी -रि (न्), धारयन् -यन्ती -यत् (त्), दधत् -धती -धत् (त्), दधानः -ना -नं, दधः -धा -धं, शाली &c. *See* Possessed of.

Possession, *s.* (Having, holding) धारणं, धरणं.—(Occupancy, ownership) अधिकारः, अधिकृतिः *f.*, आधिकारण्यं, अधिकारिता -त्वं, भोगः, भुक्तिः, परिभोगः, आवेशः, समावेशः; 'taking possession,' आवेशनं, समावेशनं, आक्रमणं, आक्रान्तिः *f.*, अध्याक्रमणं; 'to take possession of,' आविश् (c. 6. -विशति -वेष्टुं), समाविश्, आक्रम् (c. 1. -क्रामति -क्रमितुं), अध्याक्रम्; 'to put in possession,' नियुज् (c. 7. -युनक्ति -युंक्ते, c. 10. -योजयति -यितुं), युज्, अधिकृ, अधिकारं दा; 'come into one's possession,' हस्तगतः -ता -तं, स्वाधीनभूतः -ता -तं, स्वाधीनः -ना -नं.—(State of being possessed of or by) आविष्टता, आवेशः, आक्रान्तता, सम्पन्नता, युक्तता, शालिता, विशिष्टता.—(By evil spirits) भूतावेशः, पिशाचावेशः, आवेशः, समावेशः, भूतसञ्चारः, पिशाचसञ्चारः, भूतग्रस्तता, भूतोपहतत्वं, भूतबाधा, पिशाचबाधा, भूताक्रान्तिः *f.*, भूतक्रान्तिः *f.*, ग्रहामयः, भूतपीडा, पिशाचपीडा, उपद्रवः, उपसर्गः.—(Thing possessed of, property) स्वं, स्वाधीनद्रव्यं, स्वाधीनवस्तु *n.*, द्रव्यं, वस्तु *n.*—(Goods, possessions) द्रव्यं -व्याणि *n. pl.*, वस्तु -स्तूनि *n. pl.*, वित्तं, विभवः, अर्थः, धनं, द्रविणं, वसु *n.*, रिक्थं, ऋक्थं, पृक्थं, क्षेत्रादि *n.*, भूमिः *f.*

Possessive, *a.* (In grammar) सम्बन्धवाचकः -का -कं, अधिकरणवाचकः &c.; 'possessive case,' सम्बन्धः, षष्ठी, षष्ठी विभक्तिः.

Possessor, *s.* धारी *m.* -रिणी *f.* (न्), धारयन् *m.* -यन्ती *f.* (त्), धारयः -या, अधिकारी *m.* -रिणी *f.* (न्), भोक्ता *m.* (क्तृ), परिभोक्ता *m.*, भोगी *m.* (न्), परिभोगी *m.*, उपभोक्ता *m.*, शाली *m.* (न्), स्वामी *m.* -मिनी *f.*

Possibility, *s.* सम्भवः, सम्भावनं -ना, सम्भाव्यता, सम्भावनीयता, शक्यता, साध्यता, करणीयता, सम्भूतिः *f.*

Possible, *a.* शक्यः -क्या -क्यं, सम्भाव्यः -व्या -व्यं, सम्भावनीयः -या -यं, सम्भावितः -ता -तं, घटनशक्यः &c.; 'possible to be done,' करणीयः -या -यं, साध्यः -ध्या -ध्यं, साधनीयः -या -यं, कर्त्तुं शक्यः &c., उपपाद्यः -द्या -द्यं, सम्पाद्यः &c., सम्पादनीयः -या -यं; as much

as possible,' यथाशक्ति, यथाशक्यं; 'to be possible,' शक् in pass. (शक्यते), सम्भू; 'it is not possible,' न सम्भवति. The root शक् gives a passive sense to the infin.; as, 'it is not possible to be done,' कर्त्तुं न शक्यते.

POSSIBLY, *adv.* (By any power). This sense must be rendered by शक्यं, or the root शक् thus, 'all that can possibly be known,' यत् सर्व्वं ज्ञातुं शक्यते or शक्यं.—(Any how, by any means) कथञ्चित्, यथाकथञ्चित्, कथञ्चन, यथाकथञ्चन.—(Perhaps) किंस्वित्, अपिनाम, किल, स्यात्, कदापि, कदाचित्, नाम.

POST, *s.* (Piece of timber set upright, pillar) स्तम्भः, स्थाणुः *m.*, स्थूणा, अवष्टम्भः, अवस्तम्भः, उपस्तम्भः, दारुः *m.*; 'of a house,' गृहस्तम्भः, गृहदारुः *m.*; 'for securing an elephant,' आलानं, वन्यस्तम्भः.—(Office) अधिकारः, पदं, पदवी -विः *f.*, नियोगः; 'post under government,' अधिकारपदं; 'an honorable post,' श्लाघ्यपदं.—(Station, position) स्थानं, पदं, पदविः -वी *f.*, आस्पदं, स्थितिः *f.*, अवस्थितिः *f.*—(Military station) गुल्मस्थानं, सैन्यस्थानं.—(Post of danger in battle) वीराशंसनं, भयप्रदा युद्धभूमिः.—(For carrying letters) पत्रवाहनं, राजपत्रवाहनं, राजपत्रवाही *m.* (न्), लेखवाहनं, राजलेख्यवाहनं -हकः, राजनियोगिभिर् भृतः पत्रकोषः, राजधावकभृतो लेख्यकोषः, राजपत्रवाहकः, राजलेखहारी *m.*

To POST, *v. n.* (Travel with post horses or with speed) जवेन गम् (c. 1. गच्छति, गन्तुं), जववाहनेन गम्, जवतुरगैः or जवाश्वैः or जवघोटकैर् गम् or व्रज् (c. 1. व्रजति -जितुं).

To POST, *v. a.* (Station) स्था in caus. (स्थापयति -यितुं), अवस्था, प्रतिष्ठा, नियुज् (c. 7. -युनक्ति -युंक्ते, c. 10. -योजयति -यितुं), विनियुज्.—(Fix to a post) स्तम्भे बन्ध्, स्तम्भबद्धं -द्धां कृ.—(Expose to public reproach) नामादि प्रकाशयित्वा परिभवास्पदं कृ or अवमानास्पदं कृ or तिरस्कारास्पदीकृ.—(Place in the post-office) पत्रस्थाने or लेख्यस्थाने निविश् in caus.

POSTAGE, *s.* पत्रवाहनमूल्यं, लेख्यवाहनमूल्यं, वाहनमूल्यं.

POST-BOY, *s.* जवाश्वपः, जवाश्वपालः, जवाश्वारोही *m.* (न्), जवाश्वप्रेरकः.

POST-CHAISE, *s.* जववाहनं, जवनरथः, पत्रवाहनं, जवाश्वयुक्तं वाहनं.

To POST-DATE, *v. a.* पश्चात् or परस्तात् कालं लिख् (c. 6. लिखति, लेखितुं).

POST-DILUVIAL, POST-DILUVIAN, *a.* प्रलयोत्तरकालीनः -ना -नं, प्रलयानन्तरः -रा -रं.

POSTER, *s.* जवी *m.* (न्), प्रजवी *m.*, जवनः, जवः, जवाश्वः, जवनाश्वः.

POSTERIOR, *a.* पश्चात्कालीनः -ना -नं, पश्चात्कालिकः -की -कं, उत्तरकालीनः -ना -नं, पाश्चात्यः -त्या -त्यं, उत्तरः -रा -रं, अपरः -रा -रं, अवरः &c., परः &c., अवरकालिकः -की -कं, अपरकालिकः -की -कं.

POSTERIORITY, *s.* पश्चात्कालीनता, पश्चात्कालिकत्वं, अपरता -त्वं, अवरता -त्वं, परता, उत्तरता -त्वं, अपरकालिकत्वं, अवरकालिकत्वं.

POSTERIORLY, *adv.* पश्चात्, अपरतस्, उत्तरतस्, परतस्, अवरतस्, परस्तात्, परं, अपरं, उत्तरं.

POSTERIORS, *s.* नितम्बः, गुदप्रदेशः, गुददेशः, परिधायः, चटिकं, पश्चाद्देशः, पश्चाद्भागः.

POSTERITY, *s.* (Descendants, offspring) सन्तानं -नः, सन्ततिः *f.*, अपत्यं, वंशः, कुलसन्ततिः *f.*, कुलं.—(Succeeding generations in a general sense) पुत्रपौत्राः *m. pl.*, पुत्रपौत्रादि .., पुत्रपौत्रादिसन्तानं.

POSTERN, *s.* पक्षद्वारं, प्रच्छन्नद्वारं, पक्षकः, क्षुद्रद्वारं, उपद्वारं, खडक्किका.

POST-HASTE, *adv.* जवेन, सजवं, सवेगं, जवाश्ववत्, जवनाश्ववत्.

POST-HORSE, *s.* जवाश्वः, जवनाश्वः, जवतुरगः, जवघोटकः.

POSTHUMOUS, *a.* (Born after the death of the father) पितृमरणोत्तरजः -जा -जं, जनकमृत्युत्तरजः &c., पितृमरणोत्तरकः -का -कं.—(Published after the death of the author) कर्तृमृत्युत्तरकः -का -कं, कर्तृमरणोत्तरकः -का -कं, कर्तृगत्युत्तरकः &c.

POSTILLION, *s.* जवाश्वारोही *m.* (न्), रथवाहकः, सारथिः *m.*, सूतः.

POSTMAN, *s.* पत्रवाहकः, पत्रवाहः, पत्रवाही *m.* (न्), लेख्यवाहकः, लेखवाहकः, लेखहारः -रकः, लेखहारी *m.*, लेखनिकः.

POSTMASTER, *s.* पत्रवाहकाध्यक्षः, लेखहारकाध्यक्षः, पत्रवाहनादिकर्म्माध्यक्षः, पत्रप्रेरणादिकर्म्माधिकारी *m.* (न्).

POSTMERIDIAN, *a.* आपराह्णिकः -की -कं, अपराह्णकालिकः -की -कं, पराह्णकालिकः -की -कं.

POSTMORTEM, *a.* मरणोत्तरः -रा -रं, मृत्युत्तरः &c., मरणानन्तरः -रा -रं.

POSTNATE, *a.* उत्तरः -रा -रं, उत्तरजः -जा -जं, अवरजः &c., परः -रा -रं.

POST-OFFICE, *s.* पत्रस्थानं, लेखस्थानं, लेख्यस्थानं, पत्रगृहं, पत्रागारं, लेख्यागारं, लेखगृहं, लेख्यकुटी, लेख्यगृहं.

To POSTPONE, *v. a.* आकालान्तरात् or परकालं यावत् त्यज् (c. 1. त्यजति, त्यक्तुं) or परित्यज्, उत्तरकालं यावद् विसृज् (c. 6. -सृजति -स्रष्टुं) or अवसृज् or या in caus. (यापयति -यितुं), विलम्ब् (c. 1. -लम्बते -म्बितुं, c. 10. -लम्बयति -यितुं), विलम्बनं कृ, शिथिल (nom. शिथिलयति -यितुं).

POSTPONED, *p. p.* आकालान्तरात् or परकालं यावत् त्यक्तः -क्ता -क्तं or परित्यक्तः &c. or विसर्जितः -ता -तं or विसृष्टः -ष्टा -ष्टं or यापितः -ता -तं, विलम्बितः -ता -तं, शिथिलितः &c.

POSTPONEMENT, *s.* आकालान्तरात् or परकालं यावत् त्यागः or परित्यागः or विसर्जनं or यापनं, कालयापः -पनं, विलम्बः -म्बनं.

POSTSCRIPT, *s.* पश्चाल्लेखः, पश्चाल्लिखितं, पश्चाल्लिपिः *f.*, अनुलिखितं.

POSTULATE, *s.* अनुमानमूलं, स्वीकृतपक्षः, देयं, सिद्धवद् गृहीतपदं.

POSTURE, *s.* अङ्गस्थितिः *f.*, अङ्गसंस्थितिः *f.*, अङ्गविन्यासः, शरीरस्थितिः *f.*, शरीरविन्यासः, शरीरसंस्था, स्थितिः *f.*, भूमिः *f.*, भूमिका.—(A posture in religious meditation as practised by devotees, &c.) आसनं, ध्यानयोगासनं. Eighty-four kinds of these postures are enumerated, of which some are the following: पद्मासनं, ब्रह्मासनं, भद्रासनं, कूर्म्मासनं, मयूरासनं, प्रेतासनं, कुक्कुटासनं, गोमुखासनं, गोरक्षासनं, वीरासनं, दण्डासनं, वासनं, मुद्रा.—(Position, condition) स्थितिः *f.*, अवस्था, संस्थितिः *f.*, दशा.

POSTURE-MASTER, *s.* अङ्गविन्यासशिक्षकः, शरीरविन्यासशिक्षकः, अङ्गविक्षेपशिक्षकः, अङ्गविन्यासदेशिकः.

POSY, *s.* (Motto on a ring, &c.) अङ्गुरीयकलेखः, मुद्रास्थवाक्यं.—(Nosegay) पुष्पगुच्छः -च्छकः, पुष्पस्तबकः.

POT, *s.* (For culinary or domestic purposes) भाण्डं, पात्रं, भाजनं, स्थाली -लं, पिठरः -रं, उखा, पिष्टपचनं, वासनं, पाडिनी, कुण्डं, उषा; 'interior of a pot,' स्थालीविलं.—(Water pot) घटः, कुम्भः -म्भी, कुण्डी, कलशः, कलसः -सी, उदकपात्रं, उदकुम्भः, कमण्डलुः *m.*, निपः, अलुः; 'iron pot,' अयस्कुम्भः; 'boiled in a pot,' स्थालीपक्कः -क्का -क्कं; 'fit to be boiled in a pot,' स्थालीविलीयः -या -यं, स्थालीविल्यः -ल्या -ल्यं.

To POT, *v. a.* भाण्डे निविश् in caus. or निधा or रक्ष्, भाण्डीकृ, उपस्कृ.

POTABLE, *a.* पेयः -या -यं, पानीयः &c., पानयोग्यः -ग्या -ग्यं, पानार्हः -र्हा -र्हं.

POTASH, *s.* क्षारः, यवक्षारः, सर्ज्जिकाक्षारः, सर्ज्जिः *f.*, सर्ज्जिका.

POTATION, *s.* पानं, पानोत्सवः, सम्पीतिः *f.*, सपीतिः *f.*, पानसमारम्भः.

Potato, *s.* आलुः *m.*, आलुकं.—(Sweet potato) मध्वालुकं, मधुमूलं, खण्डकालुः -लुकं, खण्डकर्णः.

Pot-bellied, *a.* लम्बोदरः -रा -रं, लम्बजठरः -रा -रं, बृहत्कुक्षिः -क्षिः -क्षि, वृद्धनाभिः -भिः -भि, तुन्दी -न्दिनी -न्दि (न्), तुन्दिकः -का -कं, तुन्दिलः -ला -लं, तुन्दितः -ता -तं, तुन्दिभः -भा -भं, तुन्दिकरः -रा -रं, तुन्दवान् -वती -वत् (त्), तुण्डिलः -ला -लं, तुण्डिभः &c., पिचिण्डिलः -ला -लं, पिचिण्डवान् &c.

Pot-belly, *s.* लम्बोदरं, लम्बजठरं, बृहत्कुक्षिः *m.*, पिचिण्डः.

Pot-boy, *s.* यवसुरादिविक्रयगृहे भाण्डवाहकः or भाण्डवाही *m.*

Pot-companion, *s.* सहपायी *m.* (न्), पानसहायः, पानसुहृद् *m.*

Potency, *s.* प्रभावः -वत्वं, प्राबल्यं, बलं, शक्तिः *f.*, वीर्य्यं, तेजस् *n.*, सत्त्वं, प्रतापः, ओजस् *n.*, पराक्रमः, प्रभविष्णुता.

Potent, *a.* प्रबलः -ला -लं, महाबलः &c., महाबलवान् -वती -वत् (त्), सप्रभावः -वा -वं, शक्तिमान् &c., महाशक्तिमान् &c., प्रभविष्णुः -ष्णुः -ष्णु, प्रतापी -पिनी -पि (न्), तेजोवान् &c., महौजाः -जाः -जः (स्), सतेजाः &c., बलाढ्यः -ढ्या -ढ्यं, प्रतापवान् &c., वीर्य्यवान् &c., पराक्रमी &c., महोदारः -रा -रं.

Potentate, *s.* अधिपतिः *m.*, महीपतिः *m.*, नरेश्वरः, नरपतिः *m.* *See* King.

Potential, *a.* (Existing in possibility) सम्भाव्यः -व्या -व्यं, सम्भावनीयः -या -यं, भाविसम्भाव्यः &c.—(Potential mood) सम्भावनं, विधिलिङ्.

Potentiality, *s.* सम्भाव्यता -त्वं, सम्भावनीयता -त्वं, सम्भावनं -ना.

Potently, *adv.* प्रबलं, सबलं, प्राबल्येन, सप्रभावं, सप्रतापं, महाबलेन.

Pother, *s.* क्लेशः, तुमुलं, व्यग्रता, व्यस्तता, वैक्लव्यं, सम्भ्रमः, बाधा.

Potherb, *s.* शाकः -कं, हरितकं, शिग्रुः *m.*, सिग्रुः *m.*; 'its stalk,' कडम्बः, कलम्बः. The following are various sorts of pot-herbs: विशल्या, अग्निशिखा, अनन्ता, फलिनी, शक्रपुष्पी, ऋक्षगन्धा, ऋष्यगन्धा, छगलान्त्री, छगलांघ्री, आवेगी, वृद्धदारकः, जुङ्गः -ङ्गा, वितुन्नं, सुनिषण्णकं, शूरणं.

Pothouse, *s.* शुण्डागृहं, शुण्डापानं, शुण्डा, यवसुरागृहं, पानगोष्ठिका.

Potion, *s.* पेयौषधं, पानीयौषधं, औषधीयपेयं, औषधं.

Potsherd, *s.* भिन्नभाण्डं, भिन्नपात्रं, भग्नभाण्डं, भग्नभाण्डशकलं, कपालिका, शर्करा, भग्नमृण्मयभाजनशकलं.

Pottage, *s.* सूपं, सूपः -पं, जुष्कः, शृतमांसपेयं.

Potter, *s.* कुम्भकारः -रकः, कुलालः, घटीकारः, घटकारः -रकः, घटिन्धमः, मृत्करः, चक्रजीवकः, चक्री *m.* (न्), भटः; 'potter's wheel,' कुलालचक्रं.

Pottery, *s.* (Place where earthen vessels are made) कुम्भशाला, घटशाला, घटनिर्म्माणस्थानं.—(Earthenware) कौलालकं, मृण्मयं, मृण्मयभाण्डानि *n. pl.*, मार्त्तिकं, कुलालकर्म्म *n.* (न्).

Pottle, *s.* क्षुद्रपरिमाणो फलधारणयोग्यः दीर्घकरण्डः.

Potulent, *a.* ईषन्मत्तः -त्ता -त्तं.—(Fit to drink) पानयोग्यः -ग्या -ग्यं.

Pouch, *s.* (Bag) कोषः, कोशः, पेशी.—(Of an animal) पेशिः -शी *f.* —(Of a bird, &c.) पूर्व्वजठरः, उपजठरः, पूर्व्वोदरं.—(A protuberant belly) लम्बोदरं, लम्बजठरः.

To **pouch,** *v. a.* कोषे निविश् (c. 10. -वेशयति -यितुं), कोषस्थं -स्थां कृ.

Pouched, *p. p.* (Pocketed) कोषनिवेशितः -ता -तं, कोषस्थः -स्था -स्थं. —(Having a pouch) पेशीविशिष्टः -ष्टा -ष्टं, कोषविशिष्टः &c.

Poulterer, *s.* खाद्यपक्षिविक्रेता *m.* (तृ), खाद्यपक्षिविक्रयी *m.* (न्), गृह्यपक्षिविक्रेता *m.* (तृ), ग्राम्यपक्षिविक्रयी, कुक्कुटादिविक्रेता *m.*, वैतंसिकः, शौनिकः.

Poultice, *s.* उत्कारिका, लेपः, प्रलेपः, उपनाहः, पाकजननपिष्टप्रलेपः.

To **poultice,** *v. a.* उपनाहेन or उत्कारिकया लिप् (c. 6. लिम्पति, लेप्तुं).

Poultry, *s.* गृह्यपक्षिणः *m. pl.*, ग्राम्यपक्षिणः *m. pl.*, कुक्कुटादिग्राम्यपक्षिणः *m. pl.*, कुक्कुटादिखाद्यपक्षिणः *m. pl.*

Poultry-yard, *s.* ग्राम्यपक्षिपोषणयोग्या वाटिका, कुक्कुटादिस्थानं.

Pounce, *s.* (Powder to prevent ink from spreading) मसीशोषणचूर्णं, मसिशोषकचूर्णं.—(Talon, claw) नखः, नखरः.

To **pounce,** *v. n.* (Fall upon suddenly and seize) अकस्मात् पतित्वा नखैर् ग्रह् (c. 9. गृह्णाति, ग्रहीतुं) or धृ (c. 1. धरति, धर्त्तुं), ग्रहणार्थम् अकस्माद् आपत् (c. 1. -पतति -तितुं) or आक्रम् (c. 1. -क्रामति -क्रमितुं).

Pounce-box, pouncet-box, *s.* शोषकचूर्णाधारः, शोषणचूर्णपात्रं.

Pound, *s.* (Weight or measure) प्रस्थः.—(Fence for stray cattle, &c.) यूथभ्रष्टपशुरोधकं, यूथभ्रष्टपशुवारणी -णं, भ्रष्टपशुरक्षणस्थानं, भ्रष्टपशुरोधनस्थानं, अवरोधः -धकं, अवरोधस्थानं.—(Gold coin) स्वर्णमुद्रा.

To **pound,** *v. a.* (Confine in a pound) यूथभ्रष्टपश्वादि अवरोधस्थाने निरुध् (c. 7. -रुणद्धि -रोद्धुं) or रुध्.—(Comminute) पिष् (c. 7. पिनष्टि, पेष्टुं), निष्पिष्, सम्पिष्, विनिष्पिष्, प्रतिपिष्, उत्पिष्, चूर्ण्, प्रचूर्ण्, विचूर्ण्, सञ्चूर्ण्, चूर्णीकृ, मृद्, अवमृद्, विमृद्, प्रमृद्, अभिमृद्, खण्ड्, क्षुद् (c. 7. क्षुणत्ति, क्षोत्तुं), प्रक्षुद्, संक्षुद्, क्षोदीकृ, पुथ् (c. 10. पोथयति -यितुं), विपुथ्, मथ् or मन्थ् (c. 1. मथति, मन्थति, c. 9. मथ्नाति, मथितुं), कुट्ट् (c. 10. कुट्टयति -यितुं), प्रकुट्ट्, गुण्ड् (c. 10. गुण्डयति -यितुं), खण्डशः कृ, खण्डीकृ.—(Beat) तड्, वितड्, तुद्, आतुद्.

Poundage, *s.* (Fee, due) शुल्कः -ल्कं, देयं, करः, राजग्राह्यं.

Pounded, *p. p.* (Comminuted) चूर्णितः -ता -तं, सञ्चूर्णितः &c., चूर्णीकृतः &c., चूर्णीभूतः &c., पिष्टः -ष्टा -ष्टं, सम्पिष्टः &c., निष्पिष्टः &c., मर्दितः -ता -तं, क्षोदितः &c., क्षुण्णः -ण्णा -ण्णं, क्षोदीकृतः &c., खण्डितः &c., गुण्डितः &c., गुण्ठितः &c., रूषितः -ता -तं; 'finely pounded,' क्षोदिष्टः -ष्टा -ष्टं; 'pounded coarsely,' अवचूर्णितः -ता -तं, अपध्वस्तः -स्ता -स्तं, अवध्वस्तः &c.

Pounder, *s.* पेष्टा *m.* (ष्टृ), सम्पेष्टा *m.*, पेषणः, पेषणिः -णी *f.*, पेष्वरः, मर्दनकृत्, कुट्टनकृत्.—(Pestle) मुसलं, मुषलं -लः, मुद्गरः.

Pounding, *s.* चूर्णनं, सञ्चूर्णनं, चूर्णीकरणं, पेषणं, सम्पेषणं, मर्दनं, विमर्दनं, सम्मर्दः, खण्डनं, क्षोदीकरणं, मथनं, मन्थनं, कुट्टनं, अवहननं.

To **pour,** *v. a.* (Cause to flow in a stream) स्रु (c. 10. स्रावयति -यितुं), प्रस्रु, सिच् (c. 6. सिञ्चति, सेक्तुं), निषिच्, अवसिच्.—(Pour out) पत् (c. 10. पातयति -यितुं), उत्सिच्, अवतृ (c. 10. -तारयति -यितुं), प्रस्रु, उत्सृज्, प्रमुच्, स्कन्द्.—(Emit) उत्सृज् (c. 6. -सृजति -स्रष्टुं), विसृज्, सृज्, मुच्, प्रमुच्, स्कन्द्, निरस्, निःसृ in caus., उत्क्षिप्, क्षिप्, उत्, उदीर्, उद्वम्.—(Scatter or pour forth in profusion) कॄ (c. 6. किरति, करितुं -रीतुं), प्रकॄ, विकॄ, बहुशः क्षिप्, वृष् (c. 1. वर्षति -र्षितुं), प्रवृष्; 'the clouds poured forth blood,' मेघाः शोणितं ववृषुः; 'he poured forth arrows,' शरान् ववर्ष.

To **pour,** *v. n.* (Flow in a stream) स्रु (c. 1. स्रवति, स्रोतुं), प्रस्रु, बहुशः or बाहुल्येन स्रु or प्रस्रु or परिस्रु, स्यन्द्, प्रस्यन्द्, क्षर्, री, गल्, च्युत् or श्च्युत्, जलं or तोयं स्रु, जलं प्रवह्.—(As rain) वृष् (c. 1. वर्षति -र्षितुं), प्रवृष्, अभिवृष्, अभिप्रवृष्, अजस्रं or अतिशयेन वृष्.—(Issue forth) निःसृ, प्रस्रु, निःसृ, विनिःसृ, निर्गम्.—(Rush in a crowd) बहुशो निपत् or प्रपत्.

Poured, *p. p.* स्रावितः -ता -तं, प्रस्रावितः &c., सिक्तः -क्ता -क्तं, अवसिक्तः &c., उत्सिक्तः &c., पातितः -ता -तं, स्कन्दितः -ता -तं, उत्सृष्टः -ष्टा -ष्टं.

Pourer, *s.* सेक्ता *m.* (क्तृ), सेचकः, निषेक्ता *m.*, स्रावकः, स्रावयिता *m.* (तृ).

POURING, *s.* सेचनं सेकः, निषेकः, निषेचनं, स्रावणं, प्रस्रावणं, स्रवः -वणं, च्योतः, श्च्योतः, प्राधारः.

POURING, *part.* बहुशः सुतः -ता -तं or प्रसुतः &c., स्रवन् -वन्ती -वत् (त्) or स्यन्दी -न्दिनी -न्दि (न्), वर्षन् &c., अतिवर्षन् &c., बहुवर्षकारी &c., बहुजलस्रावी &c.

To POUT, *v. n.* अन्तःक्रोधात् ओष्ठौ प्रसृ (c. 10. -सारयति -यितुं), ओष्ठप्रसारणं कृ, ओष्ठौ or ओष्ठाधरौ प्रसार्य अन्तःकोपं दृश् (c. 10. दर्शयति -यितुं) or सूच्, अन्तःकोपात् प्रसारितोष्ठः -ष्ठा or प्रसारितौष्ठः -ष्ठा स्था (c. 1. तिष्ठति, स्थातुं) or वृत्, अन्तःक्रोधेन ओष्ठौ प्रसार्य उदासीनः -ना स्था or वृत्.—(Be prominent) उन्नतः -ता -तं भू, उन्नतीभू, प्ररूढः -ढा -ढं भू.

POUT, *s.* (Fish) स्थूलशिरस्कः समुद्रीयमत्स्यभेदः.—(Fit of sullenness) अन्तःक्रोधावेशः, अन्तःकोपावेशः, वैरस्यावेशः.

POUTING, *s.* अन्तःक्रोधात् or अन्तःकोपात् ओष्ठप्रसारणं, अन्तःकोपसूचनार्थम् ओष्ठाधरप्रसारणं, अन्तःकोपजा उदासीनता.

POVERTY, *s.* दरिद्रता, दारिद्र्यं, दारिद्रं, निर्धनता -त्वं, धनहीनता, अल्पधनता, अधनता -त्वं, दरिद्रदशा, दरिद्रावस्था, धनाभावः, अर्थहीनता, अर्थाभावः, द्रव्यहीनता, द्रव्याभावः, निर्द्रव्यता, दीनता, दैन्यं, निष्किञ्चनत्वं -ता, निष्काञ्चनत्वं, अनिर्वृतिः *f.*, दुर्गतिः *f.*; 'reduced to poverty,' गतधनः -ना -नं, विगतधनः &c., गतविभवः -वा -वं, नष्टधनः &c., नष्टार्थः -र्था -र्थं, धनच्युतः -ता -तं, गतार्थः &c., विगतश्रीकः -का -कं, गतश्रीकः &c., दरिद्रितः -ता -तं.

POVERTY-STRICKEN, *a.* दारिद्र्यग्रस्तः -स्ता -स्तं, दारिद्र्योपहतः -ता -तं.

POWDER, *s.* चूर्णं, पिष्टं, क्षोदः, क्षोदितं, पिष्टातः, पटवासः -सकः, रेणुः *m.*, पांशुः *m.*, वासयोगः, गुण्डकः -गिण्डकः -का.—(Gunpowder) आग्नेयचूर्णं, शीघ्रदाह्यचूर्णं; 'to reduce to powder,' चूर्णीकृ, क्षोदीकृ, रेणुशः कृ.

To POWDER, *v. a.* (Pulverize) चूर्ण् (c. 10. चूर्णयति -यितुं), चूर्णीकृ, क्षोदीकृ, पिष् (c. 7. पिनष्टि, पेष्टुं), निष्पिष्, क्षुद् (c. 7. क्षुणत्ति, क्षोत्तुं), गुण्ड्, कुट्ट्, रेणुशः कृ.—(Cover with powder) चूर्णावृतं -तां कृ, चूर्णाकीर्णं -र्णां कृ, सचूर्णीकृ.

POWDER-BOX, *s.* चूर्णाधारः, चूर्णपात्रं, केशचूर्णाधारः.

POWDERED, *p. p.* चूर्णितः -ता -तं, चूर्णीकृतः &c., संचूर्णितः &c., पिष्टः -ष्टा -ष्टं, क्षोदितः -ता -तं, क्षोदीकृतः &c., गुण्डितः &c.; 'finely powdered,' क्षोदिष्टः -ष्टा -ष्टं; 'coarsely,' अवचूर्णितः &c.

POWDER-MAGAZINE, *s.* आग्नेयचूर्णागारं, दाह्यचूर्णागारं.

POWDERY, *a.* (Friable) सुचूर्णनीयः -या -यं, चूर्णयोग्यः -ग्या -ग्यं.—(Made of powder, resembling it) चूर्णी -र्णिनी -र्णि (न्), चूर्णमयः -यी -यं, चूर्णवान् -वती -वत् (त्), क्षोदवान् &c., सचूर्णः -र्णा -र्णं, सक्षोदः -दा -दं, पांशुलः -ला -लं.

POWER, *s.* (Force, strength) शक्तिः *f.*, बलं, सामर्थ्यं, समर्थता, वीर्य्यं, ऊर्जः, प्रभावः, पराक्रमः, प्राणः, सहः -हं, सहस् *n.*, द्रविणं.—(Ability, faculty) शक्तिः *f.*, आशक्तिः *f.*, शक्तता, बलं, सामर्थ्यं, क्षमता, कर्तृत्वं, विभवः; 'according to one's power, to the utmost of one's power,' यथाशक्ति, यथाबलं, यथासामर्थ्यं, यावच्छक्यं, शक्तितस्; 'power of utterance,' वाक्शक्तिः *f.*, वाग्विभवः.—(Power of the mind) मनःशक्तिः *f.*, धीशक्तिः *f.*—(Energy, might) वीर्य्यं, तेजस्, प्रतापः, पराक्रमः, विक्रमः, ऊर्जः, शौर्य्यं, सारता, स्थाम *n.* (न्), शुष्म *n.* (न्), शुष्मं.—(Momentum) वेगः, आपातः, तरस् *n.*—(Efficacy, influence) प्रभावः, प्रभवः, प्राबल्यं, प्रभुता, प्रभविष्णुता, प्राभवत्यं, अधिकारः, शक्तिः *f.*, बलं, गौरवं, भारः, प्रतापः, वशः.—(Command, subjection, authority) वशं, अधिकारः -रित्वं, आधिपत्यं, ऐश्वर्य्यं, प्रभुत्वं -ता, ईशत्वं, अधीनत्वं; 'to bring under one's power,' वशीकृ, आत्मवशीकृ, आत्मवशं नी, आत्माधीनं -नां कृ, स्वाधीनं -नां कृ, स्ववशीकृ, आत्मायत्तं -त्तां कृ; 'in the power or under the power of,' वशः -शा -शं, अधीनः -ना -नं, आयत्तः -त्ता -त्तं in comp.; as, 'in the power of the king,' राजवशः -शा -शं, राजाधीनः -ना -नं.—(Possession, occupancy) अधिकारः, आधिकारत्वं, हस्तः; 'fallen into one's power,' हस्तगतः -ता -तं.—(Legal authority) अधिकारः.—(Superhuman power) विभूतिः, भूतिः *f.*, प्रभावः.—(Sovereign, one invested with power) अधिपतिः *m.*, अधिकारी *m.* (न्), प्रभुः *m.*, अधीशः.—(Force, army) बलं, सैन्यं, सेना, सैन्यभारः.—(In algebra and arithmetic) कुट्टकः, घातः; 'to have power over,' प्रभू (c. 1. -भवति -वितुं), ईश् (c. 2. ईष्टे, ईशितुं).

POWERFUL, *a.* (Having great strength or force) बलवान् -वती -वत् (त्), बली -लिनी -लि (न्), प्रबलः -ला -लं, सबलः -ला -लं, महाबलः &c., शक्तिमान् &c., महाशक्तिः -क्तिः -क्ति, शक्तः -क्ता -क्तं, बलिष्ठः -ष्ठा -ष्ठं, बलाढ्यः -ढ्या -ढ्यं, समर्थः -र्था -र्थं, क्षमः -मा -मं, ऊर्जस्वलः -ला -लं, ऊर्जस्वी &c., ऊर्जस्वान् -स्वती &c., ऊर्जितः -ता -तं, बलोर्जितः &c., प्रभावी &c., सप्रभावः -वा -वं, प्रभविष्णुः -ष्णुः -ष्णु, अलन्तमः -मा -मं, कुण्डीरः -रा -रं.—(Mighty, puissant, potent) महाविक्रमः -मा -मं, उरुविक्रमः &c., पराक्रान्तः -न्ता -न्तं, पराक्रमी &c., विक्रमी &c., ऐश्वर्य्यवान् &c., प्रतापवान् &c., प्रतापी &c., वीर्य्यवान् &c., महान् -हती -हत् (त्), महातेजाः -जाः -जः (स्), महौजाः &c., विभूतिमान् &c., महोदारः -रा -रं.—(Efficacious) सप्रभावः -वा -वं, प्रभविष्णुः -ष्णुः -ष्णु, सतेजाः &c., तेजस्वी &c., अमोघः -घा -घं, क्षमः -मा -मं.—(Forcible to persuade) सुनिश्चायकः -का -कं, सुनिश्चयजनकः -का -कं, प्रबलः &c., सबलः &c., सुदृढः -ढा -ढं.

POWERFULLY, *adv.* बलवत्, सबलं, प्रबलं, प्राबल्येन, महाबलेन, सप्रभावं, प्रभावेण, महाशक्त्या, महाशक्तिपूर्व्वं.

POWERFULNESS, *s.* सबलता, महाबलता, प्रबलता, प्राबल्यं, बलवत्त्वं, शक्तता, शक्तिमत्त्वं, सप्रभावत्वं, वीर्य्यवत्त्वं.

POWERLESS, *a.* निर्बलः -ला -लं, अबलः &c., बलहीनः -ना -नं, शक्तिहीनः &c., अशक्तः -क्ता -क्तं, असमर्थः -र्था -र्थं, निःशक्तिः &c., शक्तिशून्यः -न्या -न्यं, निष्पराक्रमः -मा -मं, निष्प्रभावः -वा -वं, सामर्थ्यहीनः &c., वीर्य्यहीनः &c., विवशः -शा -शं, अवशः &c.

POWERLESSNESS, *s.* अशक्तिः *f.*, निर्बलता, बलहीनता, असामर्थ्यं, शक्तिहीनता, शक्तिशून्यता, बलाभावः, प्रभावाभावः, निष्प्रभावत्वं.

POX, *s.* (Small pox) रक्तवटी, रक्तवरटी, विस्फोटः, रक्तस्फोटः, शीतला. *See* the word.—(Cow pox) गोस्तनशीतला.—(Venereal disease) उपदंशः, वृषणकच्छूः *f.*; 'afflicted with it,' उपदंशी -शिनी &c.

PRACTICABILITY, PRACTICABLENESS, *s.* साध्यता -त्वं, करणीयता, सुसाध्यता, शक्यता -त्वं, करणशक्यता, सम्भाव्यता -त्वं, सुगमत्वं.

PRACTICABLE, *a.* साध्यः -ध्या -ध्यं, करणीयः -या -यं, करणशक्यः -क्या -क्यं, शक्यः &c., कर्तुं शक्यः &c., कृत्यः -त्या -त्यं, सम्भाव्यः -व्या -व्यं, सम्भावनीयः -या -यं, उपपाद्यः -द्या -द्यं, सुकरः -रा -रं, सुगमः -मा -मं, सुसाध्यः &c., सुससाध्यः &c., अदुष्करः -रा -रं.

PRACTICAL, *a.* (Pertaining to practice or action) आभ्यासिकः -की -कं, अभ्याससम्बन्धी -न्धिनी -न्धि (न्), क्रियासम्बन्धी &c., कार्म्मिकः -की -कं, कार्य्यिकः &c.—(Capable of practice) अभ्यासी &c., व्यवसायी &c., अभ्यासात्मकः -का -कं, क्रियावान् -वती -वत् (त्), अभ्यासक्षमः -मा -मं.—(That may be used in practice) व्यवहार्य्यः

-र्य्यो -र्य्यं, व्यवहारयोग्यः -ग्या -ग्यं, अभ्यासयोग्यः &c., व्यवहारोचितः -ता -तं, व्यवहारोपयोगी &c.—(Derived from practice) अभ्यासिद्धः -द्धा -द्धं, क्रियासिद्धः &c., अभ्यासजनितः -ता -तं, अभ्यासप्राप्तः -प्ता -प्तं.—(Having practical knowledge) कर्म्मदृष्टः -ष्टा -ष्टं, कर्म्मज्ञः -ज्ञा -ज्ञं, दृष्टकर्म्मा -र्म्मा -र्म्म (न्), कर्म्मज्ञानी &c., बहुदृष्टः -ष्टा -ष्टं, व्यवहारज्ञः -ज्ञा -ज्ञं, व्यवहारवृद्धः -द्धा -द्धं.

Practically, *adv.* अभ्यासतस्, अभ्यासेन, कर्म्मतस्, कार्य्यतस्, व्यवहारतस्, व्यवसायतस्, अभ्यासपूर्व्वं, व्यवहारमपेक्ष्य.

Practice, *s.* (Frequent or habitual doing) अभ्यासः, अभ्यसनं, निरन्तराभ्यासः, नित्याभ्यासः, नित्यकृत्यं, नित्यकर्म्म *n.* (न्), निरन्तरकर्म्म *n.*, नित्यक्रिया, निरन्तरप्रवृत्तिः *f.*, नित्यवृत्तिः *f.*, नित्यप्रवृत्तिः *f.*, नित्यचर्य्या, आवर्त्तनं, आवृत्तिः *f.*, वृत्तिः.—(Actual doing or performance) करणं, आचरणं, विधानं, अनुष्ठानं, अनुष्ठा, क्रिया, कृतिः *f.*, प्रवृत्तिः *f.*, निर्वर्त्तनं, प्रवर्त्तनं, चर्य्या, चरितं, वृत्तं, व्यापारः, व्यवसायः.—(Course of procedure, custom) आचारः, व्यवहारः, व्यवहृतिः *f.*, समाचारः, प्रचारः, रीतिः *f.*, सम्प्रदायः, मार्गः, क्रियामार्गः, कर्म्मविधिः *m.*, क्रमः, पद्धतिः *f.*, नियमः, अनुसारः; 'according to usual practice,' यथाव्यवहारं, यथारीति; 'ancient practice,' वृद्धाचारः, वृद्धपरम्परा; 'noble practice,' शिष्टाचारः; 'family practice,' कुलाचारः, कुलधर्म्मः; 'local,' देशाचारः, देशरीतिः *f.*; 'popular or general practice,' लोकाचारः, लोकरीतिः *f.*, जनव्यवहारः; 'good practice,' सदाचारः; 'following good practices,' सदाचारी -रिणी -रि (न्), सद्वृत्तिः -त्तिः -त्ति, सद्वृत्तः -त्ता -त्तं; 'bad practice,' दुराचारः, असदाचारः, दुर्वृत्तिः *f.*; 'following bad practices,' दुराचारः -रा -रं, दुराचारी &c., कदाचारः &c., असदाचारी &c., दुर्वृत्तः -त्ता -त्तं, दुर्वृत्तिः -त्तिः -त्ति, जघन्यवृत्तिः &c.—(Exercise of a profession) सेवनं, निषेवनं, अनुसेवनं, आचरणं, करणं, अनुष्ठानं.—(Of medicine) उपचारः, वैद्योपचारः, उपचर्य्या, उपचार्य्यः, उपक्रमः, वैद्योपक्रमः, औषधप्रयोगः, वैद्यक्रिया, चिकित्सा, रुक्प्रतिक्रिया.—(Of arms) शस्त्राभ्यासः, शस्त्रभृत्त्वं.—(Of the law courts) व्यवहारः, व्यवहारविधिः *m.*

To **practise**, *v. a.* (Do habitually) अभ्यस् (c. 4. -अस्यति -असितुं), नित्यम् अभ्यस् or कृ, निरन्तरम् अभ्यस् or कृ, नित्याभ्यासं कृ, निरन्तराभ्यासं कृ.—(Do, perform) आचर् (c. 1. -चरति -रितुं), समाचर्, चर्, अनुष्ठा (c. 1. -तिष्ठति -ष्ठातुं), आस्था, समास्था, विधा (c. 3. -दधाति -धत्ते -धातुं), कृ, सङ्कृ, अभिकृ, प्रवृत् in caus., वृत्.—(Use, employ) प्रयुज्, उपयुज्, व्यवहृ, सेव्, निषेव्, अनुसेव्, आश्रि.—(Exercise a profession or business) आचर्, कृ, सेव्, निषेव्, अनुसेव्, आसेव्, समासेव्, उपसेव्, अभ्युपसेव्, उपास्; 'he practises the law,' व्यवहारं सेवते or निषेवते, व्यवहारसेवनं करोति, व्यवहारं करोति; 'he practises gambling,' द्यूतं सेवते.—(Practise medicine) वैद्योपचारं कृ, उपचारं कृ, औषधप्रयोगं कृ, चिकित्सां कृ, कित् in desid.—(Practise arms) शस्त्राभ्यासं कृ.

To **practise**, *v. n.* अभ्यासं कृ, नित्याभ्यासं कृ, अभ्यस्. *See* the last.—(Use artifices) छलं कृ, व्यपदेशं कृ, छद्म कृ, कपटं कृ, कपटप्रयोगं कृ, छलप्रयोगं कृ, कैतवप्रयोगं कृ.

Practised, *p. p.* (Habitually done or performed) अभ्यस्तः -स्ता -स्तं, आचरितः -ता -तं, चरितः -ता -तं, अनुष्ठितः &c., सेवितः -ता -तं, निषेवितः &c., व्यवहृतः -ता -तं, व्यवहारितः &c., कृतः -ता -तं.—(Having had much practice) बहुदृष्टः -ष्टा -ष्टं, दृष्टकर्म्मा -र्म्मा -र्म्म (न्), कर्म्मज्ञः -ज्ञा -ज्ञं, कृतकर्म्मा -र्म्मा -र्म्म (न्), व्यवहारज्ञः -ज्ञा -ज्ञं, ज्ञानवृद्धः -द्धा -द्धं, पक्वबुद्धिः -द्धिः -द्धि, पक्वः -क्वा -क्वं, कोविदः -दा -दं, परिज्ञाता -त्री -तृ (तृ), व्युत्पन्नः -न्ना -न्नं.

Practising, *part.* अभ्यासी -सिनी -सि (न्), कृताभ्यासः -सा -सं, आचरन् -रन्ती -रत् (त्), आस्थितः -ता -तं, आश्रितः &c., प्रवर्त्तमानः -ना -नं, सेवी &c., सेवमानः -ना -नं, निषेवमाणः -णा -णं, व्यवसायी &c., शाली &c., आस्थाय indec.

Practitioner, *s.* (One who exercises any profession or businsss) व्यवसायी *m.* (न्), व्यापारी *m.*, सेवी *m.*, वृत्ति or प्रवृत्ति or वृत्तिक in comp.—(Medical) वैद्यः, वैद्यवृत्तिः *m.*, वैद्यवृत्तिकः, चिकित्सकः, उपचारकः, उपचारकृत् *m.*, औषधप्रयोगी *m.*—(Lawyer) व्यवहारज्ञः, व्यवहारविद् *m.*, दृष्टव्यवहारः, आचारज्ञः, व्यवहारदर्शी *m.*

Pragmatic, pragmatical, *a.* परकार्य्यचर्चकः -का -कं, अनधिकारचर्चकः &c., पराधिकारचर्चकः &c., पराधिकारव्यापारी -रिणी -रि (न्), परव्यापारचर्चकः &c.

Pragmatically, *adv.* अनधिकारचर्चया, पराधिकारचर्चया, परव्यापारचर्चया

Pragmaticalness, *s.* परकार्य्यचर्चा, परव्यापारचर्चा, अनधिकारचर्चा.

Prairie, *s.* दीर्घतृणावृतः सुविस्तीर्णः समभूभागः.

Praise, *s.* प्रशंसा, स्तुतिः *f.*, स्तवः, श्लाघा, शंसा, प्रशंसनं, संस्तवः, स्तवनं कीर्त्तनं, अनुकीर्त्तनं, स्तोत्रं, स्तोतृत्वं, ईडा, नुतिः *f.*, नवः, नव्यः, वर्णनं -ना, वन्दना, व्यावृत्तिः *f.*, सामीची, व्यावृत्तिः *f.*; 'ground of praise,' स्तुतिहेतुः *m.*, स्तुतिकारणं.

To **praise**, *v. a.* प्रशंस् (c. 1. -शंसति -सितुं), अभिप्रशंस्, स्तु (c. 2. स्तौति, स्तोतुं), संस्तु, अभिष्टु, विष्टु, परिसंस्तु, श्लाघ् (c. 1. श्लाघते -घितुं, c. 10. श्लाघयति -यितुं), कृत् (c. 10. कीर्त्तयति -यितुं), अनुकृत् ईड् (c. 2. ईट्टे -डितुं), प्रसमीड्, वर्ण् (c. 10. वर्णयति -यितुं), वन्द् (c. 1. वन्दते -न्दितुं), विख्या (c. 2. -ख्याति -ते -तुं), प्रख्या, प्रथ् (c. 10. प्रथयति -यितुं), नु or नू (c. 2. नौति, c. 6. नुवति, नवितुं, नुवितुं), अभिनु, अभिप्रणु, प्रणु, पण् (c. 1. पणायति -यितुं, पणितुं) or पन्, ऋच् (c. 6. ऋचति, अर्चितुं), ईल् (c. 1. ईलते -लितुं).

Praised, *p. p.* प्रशंसितः -ता -तं, स्तुतः -ता -तं, संस्तुतः &c., अभिष्टुतः &c., प्रस्तुतः &c., प्रशस्तः -स्ता -स्तं, शस्तः &c., शंसितः &c., श्लाघितः -ता -तं, कीर्त्तितः &c., अनुकीर्त्तितः &c., ईडितः -ता -तं, प्रसमीडितः &c., वर्णितः &c., विख्यातः &c., नुतः -ता -तं, नूतः &c., प्रणुतः &c., पणायितः -ता -तं, पनायितः &c., पणितः &c., पनितः &c., ईलितः &c., गीर्णः -र्णा -र्णं, अपिगीर्णः &c.

Praiser, *s.* प्रशंसकः, स्तोता *m.* (तृ), प्रशंसिता *m.* (तृ), शंसिता *m.*, शंस्ता *m.* (स्तृ), स्तावकः, प्रशंसाकृत् *m.*, वर्णकः, स्तुतिपाठकः, वन्दी *m.* (न्), स्तुतिकारकः, स्तवनकृत् *m.*

Praiseworthiness, *s.* श्लाघ्यता, श्लाघनीयता, प्रशंसनीयता, स्तुतियोग्यता.

Praiseworthy, *a.* श्लाघ्यः -घ्या -घ्यं, श्लाघनीयः -या -यं, प्रशंसनीयः -या -यं, प्रशंसितव्यः -व्या -व्यं, प्रशंस्यः -स्या -स्यं, शंस्यः &c., प्रशस्यः &c., शस्यः &c., स्तुत्यः -त्या -त्यं, स्तोतव्यः -व्या -व्यं, स्तुतियोग्यः -ग्या -ग्यं, ईड्यः -ड्या -ड्यं, पाय्यः -य्या -य्यं. *See* Laudable.—(Praiseworthy person) स्तुतिपात्रं, प्रशंसापात्रं, श्लाघापात्रं, श्लाघाभाजनं.

To **prance**, *v. n.* अश्ववत् प्लु (c. 1. प्लवते, प्लोतुं) or नृत् (c. 4. नृत्यति, नर्त्तितुं) or वल्ग् (c. 1. वल्गति -ल्गितुं) or प्लुतगत्या चल् (c. 1. चलति -लितुं).

Prancing, *s.* अश्वप्लुतं, प्लुतगतिः *f.*, प्लुतं, प्लवः, वल्गितगतिः *f.*, वल्गितं.

Prancing, *part.* or *a.* प्लुतगतिः -तिः -ति, प्लवगतिः &c., वल्गितगतिः &c.

Prank, *s.* कुचेष्टा, चेष्टा, मर्कटचेष्टा, वानरचेष्टा, मर्कटक्रीडा, वानरक्रीडा, क्रीडा, चापलं, खेला, लीला, छन्दस् *n.*, छन्दः, कुछन्दस्, लहरी.

To **prank**, *v. a.* दम्भार्थं or लोकदर्शनार्थं भूष् or अलङ्कृ.

Prankish, *a.* कुचेष्टः -ष्टा -ष्टं, वानरचेष्टः -ष्टा -ष्टं, मर्कटचेष्टः &c., वान-

रचेष्टाकारी -रिणी -रि (न्), वानरशीलः -ला -लं, क्रीडाशीलः &c., छन्दी &c., चपलः -ला -लं.

To PRATE, *v. n.* जल्प् (c. 1. जल्पति -ल्पितुं), उपजल्प्, प्रलप् (c. 1. -लपति -पितुं), अनर्थकं or वृथा भाष् (c. 1. भाषते -षितुं) or वद् (c. 1. वदति -दितुं), बहु भाष् or वद्, अतिशयेन or अत्यन्तं भाष्, अनर्थकवचनं कृ, आलस्यवचनं कृ, वृथाजल्पं कृ.

PRATER, *s.* जल्पकः, जल्पाकः, जल्पी *m.* (न्), उपजल्पी *m.*, वाचालः, वाचाटः, वावदूकः, बहुभाषी *m.* (न्), बहुवादी *m.*

PRATING, *s.* जल्पः -ल्पनं, प्रजल्पः, जल्पितं, प्रलापः, प्रलपितं, निरर्थकभाषणं, वृथाभाषणं, अनर्थकवचनं, बहुभाषणं.

PRATIQUE, *s.* संसर्गानुज्ञा, गमनागमनानुज्ञा, सम्पर्कानुज्ञा.

To PRATTLE, *v. n.* बालवद् जल्प् or भाष्, चटचट (nom. चटचटायते). *See To* PRATE.

PRATTLE, PRATTLING, *s.* जल्पितं, जल्पः, प्रलापः, प्रलपितं, बालप्रलापः, बालालापः, बालभाषणं, बालवचनं, बालशब्दः, कलभाषणं. *See* PRATING.

PRATTLER, *s.* बालवद् जल्पी or जल्पकः, बालालापी *m.* (न्), बालभाषी *m.*

PRAVITY, *s.* भ्रष्टता, भ्रंशः, दुष्टता, विप्रदुष्टता, भ्रेषः, विक्रिया.

PRAWN, *s.* बृहच्छल्कः, इच्चाकः, गङ्गाटेयः, अग्निमत्स्यः.

To PRAY, *v. n.* प्रार्थ् (c. 10. -अर्थयते -यितुं), प्रार्थनां कृ, प्रार्थनं कृ, कृताञ्जलिः or अञ्जलिं कृत्वा प्रार्थ्.—(To God) ईश्वरप्रार्थनां कृ, देवप्रार्थनां कृ, भगवत्प्रार्थनां कृ, ईश्वरपूजां कृ.—(Invoke by prayer) आशास् (c. 2. -शास्ते, c. 1. -शासते -सितुं).—(Pray in a low voice) जप् (c. 1. जपति -पितुं), प्रजप्, जपनं कृ.

To PRAY, *v. a.* (Entreat, implore) प्रार्थ्, अभ्यर्थ्, सम्प्रार्थ्, अर्थ्, कृताञ्जलिः प्रार्थ् or याच् or अभियाच् or संयाच् or सम्प्रयाच्, विनयेन स्वार्थं निविद्, विज्ञी, याच्ञां कृ.

PRAYED, *p. p.* प्रार्थितः -ता -तं, अभ्यर्थितः &c., याचितः &c., अभियाचितः &c.

PRAYER, *s.* प्रार्थना, प्रार्थनं, अभ्यर्थना, अर्थः, याचना, याच्ञा, विनयेन स्वार्थनिवेदनं; 'to God,' ईश्वरप्रार्थना, देवप्रार्थना, भगवत्प्रार्थना, ईश्वरपूजा; 'inaudible repetition of prayers,' जपः, जपनं, जपयज्ञः; 'engaged in repeating prayers,' जपपरायणः -णा -णं; 'granting prayers,' वरदः -दा -दं.

PRAYER-BOOK, *s.* प्रार्थनापद्धतिः -ती *f.*, प्रार्थनासंहिता, प्रार्थनाग्रन्थः.

PRAYERFUL, *a.* प्रार्थनापरः -रा -रं, प्रार्थनाशीलः -ला -लं, जपपरायणः -णा -णं, जपनशीलः &c., भजनशीलः &c., ईश्वरपूजाशीलः &c., ईश्वरभावनः -ना -नं, प्रार्थनानिष्ठः -ष्ठा -ष्ठं, भजनपरायणः -णा -णं.

To PREACH, *v. n.* धर्म्मं प्रवच् (c. 2. -वक्ति -क्तुं) or प्रचर् (c. 10. -चारयति -यितुं) or उपदिश् (c. 6. -दिशति -देष्टुं), धर्म्मोपदेशं कृ, धर्म्मप्रवचनं कृ, धर्म्मप्रचारणं कृ, धर्म्मकथनं कृ, धर्म्मोपदेशभाषणं कृ, धर्म्मोपदेशविषयवाक्यं कृ.

To PREACH, *v. a.* (Proclaim, publish) प्रचर् (c. 10. -चारयति -यितुं), उच्चर्, विघुष् (c. 10. घोषयति -यितुं), घुष्, उद्घुष्, प्रख्या (c. 2. -ख्याति -तुं or caus. -ख्यापयति -यितुं), आख्या, ख्या, कथ्, प्रवच्, प्रवद्, कृत्, प्रकृत्, प्रकटीकृ.—(Deliver, pronounce) वद्, प्रवद्, वच्, उच्चर्, उदाहृ, उदीर्.

PREACHER, *s.* (Of religion) प्रवक्ता *m.* (क्तृ), धर्म्मप्रवक्ता *m.*, प्रचारकः, धर्म्मप्रचारकः, उपदेशकः, धर्म्मोपदेशकः, उपदेशी *m.* (न्), धर्म्मोपदेशी *m.*, कथकः, धर्म्मकथकः.—(Proclaimer) घोषकः, विघोषकः, ख्यापकः, घोषणाकृत्.

PREACHING, *s.* धर्म्मोपदेशः, उपदेशः, धर्म्मप्रचारणं, प्रचारणं, धर्म्मप्रवचनं, प्रवचनं, उच्चारणं, घोषणं -णा, विघोषणा, ख्यापनं.

PREAMBLE, *s.* प्रस्तावना, उपोद्घातः, आभाषः, आरम्भः, उपन्यासः, प्रकरणं.

PREBEND, PREBENDARY, *s.* *See* CANON, CANONRY, *s.*

PRECARIOUS, *a.* (Uncertain, doubtful) अनिश्चितः -ता -तं, सन्दिग्धः -ग्धा -ग्धं, सन्देहस्थः -स्था -स्थं, संशयस्थः &c., सांशयिकः -की -कं, शङ्कान्वितः -ता -तं, शङ्कनीयः -या -यं, सशङ्कः -ङ्का -ङ्कं, शङ्कामयः -यी -यं, वैकल्पिकः -की -कं, अस्थिरः -रा -रं, अध्रुवः -वा -वं, अनैश्चिकः -की -कं, स्थितिसंशयी &c., स्थितिशङ्की &c.—(Depending on the will of another) अन्याधीनः -ना -नं, पराधीनः &c., परायत्तः -त्ता -त्तं, अस्वाधीनः &c., अस्वायत्तः &c.

PRECARIOUSLY, *adv.* अनिश्चितं, सन्दिग्धं, सशङ्कं, ससंशयं, अस्थिरं.

PRECARIOUSNESS, *s.* अनिश्चितत्वं, अनैश्चित्यं, सन्दिग्धता, सशङ्कता -त्वं, शङ्कनीयता -त्वं, अस्थैर्य्यं, अस्थिरता -त्वं, अन्याधीनता, पराधीनता, अस्वाधीनता, स्थितिसंशयः, स्थितिशङ्का.

PRECATIVE, PRECATORY, *a.* प्रार्थकः -का -कं, प्रार्थनात्मकः &c., प्रार्थनारूपः -पा -पं, प्रार्थनाकारी -रिणी -रि (न्), याचकः -का -कं.—(Precative tense) प्रवर्त्तना.

PRECAUTION, *s.* पूर्व्वोपायः, अग्रोपायः, निवारणोपायः, अनिष्टनिवारणोपायः, अनिष्टवारणोपायः, निषेधनोपायः, प्रतिषेधोपायः, आपन्निवारणोपायः, अपायनिवारणोपायः, पूर्व्वावधानं -नता, अग्रावधानं, पूर्व्वसमीक्षा, पूर्व्वचिन्ता; 'to take precautions,' पूर्व्वावधानं कृ.

PRECAUTIONARY, *a.* पूर्व्वोपायसाधकः -का -कं, पूर्व्वोपायरूपः -पा -पं, पूर्व्वोपायैर् अनिष्टनिवारकः -का -कं or अनिष्टप्रतिषेधकः &c., पूर्व्वोपायेन अनिष्टवारकः &c.

To PRECEDE, *v. a.* अग्रे or अग्रतो गम् (c. 1. गच्छति, गन्तुं) or सृ (c. 1. सरति, सर्त्तुं), पुरस् or पुरतो गम् or सृ or चर् (c. 1. चरति -रितुं) or या (c. 2. याति -तुं), अग्रे वृत् (c. 1. वर्त्तते -र्त्तितुं), पुरतो वृत्, मुख्यः -ख्या -ख्यं भू, मुख्यतो वृत्.—(In rank) अग्रपदस्थः -स्था -स्थं भू, अग्रमानार्हः -र्हा -र्हं भू, अग्रमानम् अर्ह् (c. 1. अर्हति -र्हितुं), अग्रपदे वृत् or स्था.

PRECEDED, *p. p.* पुरोगतः -ता -तं, अग्रगतः -ता -तं, पुरःसरः -रा -रं in comp., पुरोगमः -मा -मं in comp., पूर्व्वकः -का -कं in comp.

PRECEDENCE, PRECEDENCY, *s.* (Going before) पुरोगतिः *f.*, पुरोगमनं, अग्रगतिः *f.*, अग्रगमनं, अग्रसरणं, अग्रतःसरणं, अग्रेसरणं, अग्रवर्त्तनं, अग्रवर्त्तित्वं.—(In rank) अग्रपदं, अग्रपदवर्त्तनं, श्रेष्ठपदं, श्रेष्ठपदवर्त्तनं, अग्रमानं, अग्रमान्यता, अग्रगण्यता, अग्रपूजा, अग्रपूज्यता, अग्रमानार्हता -त्वं, अधिकपदं, अधिकमानार्हता, श्रेष्ठता, प्राग्भावः, श्रैष्ठ्यं, मुख्यता, प्रधानता, प्राधान्यं, प्रथमता, प्राथम्यं, आदित्वं, उत्कर्षः.

PRECEDENT, *s.* (Previous example) पूर्व्वप्रतिमा, पूर्व्वदृष्टान्तः, पूर्व्वनिदर्शनं, पूर्व्वोदाहरणं, प्रतिमा, प्रमाणं; 'an unheard of precedent,' अपूर्व्वप्रतिमा.

PRECEDENT, PRECEDING, *a.* or *part.* अग्रगः -गा -गं, अग्रगामी -मिनी -मि (न्), अग्रसरः -रा -रं, अग्रेसरः &c., अग्रतःसरः &c., पुरोगः -गा -गं, पुरोगमः -मा -मं, पुरोगामी &c., पुरःसरः -रा -रं, प्राग्गामी &c., पुरःसरः &c., पुरस्सरः &c., पूर्व्वसरः &c., पुरोगतः -ता -तं, पुरोगतिः -तिः -ति, पूर्व्वः -र्व्वा -र्व्वं, पूर्व्वकः -का -कं, प्राक्तनः -नी -नं.

PRECEDENTED, *a.* दृष्टपूर्व्वः -र्व्वा -र्व्वं, भूतपूर्व्वः &c., दृष्टप्रतिमः -मा -मं, सपूर्व्वप्रतिमः &c., दृष्टोदाहरणः -णा -णं, दृष्टसादृश्यः -श्या -श्यं.

PRECEDENTLY, *adv.* पूर्व्वं, पूर्व्वतस्, अग्रे, अग्रतस्, मूर्द्धे, पुरस्, पुरतस्.

PRECENTOR, *s.* अग्रगायकः, अग्रगाता *m.* (तृ), पूर्व्वगाता, पूर्व्वगायकः.

PRECEPT, *s.* विधिः *m.*, विधानं, नियमः, कल्पः, निदेशः, निर्देशः, सूत्रं, शासनं, अनुशासनं, आदेशः, चोदना, प्रचोदनं, आज्ञा, नियोगः, निगमः, क्रमः,

स्थिति: *f.*, व्यवस्था, स्मरणं, उपदेशः; 'secondary precept,' अनुकल्पः.

Preceptive, *a.* वैधिकः -की -कं, वैधः -धी -धं, विधिरूपः -पा -पं, विधिमयः -यी -यं, विधायकः -का -कं, विधिप्रदर्शकः -का -कं, विधिप्रकाशकः &c., नैयमिकः -की -कं, अनुशासकः -का -कं, आदेशकः &c., उपदेशकः &c., काल्पः -ल्पी -ल्पं, सौत्रः -त्री -त्रं.

Preceptor, *s.* उपदेशकः, उपदेशी *m.* (न्), उपदेष्टा *m.* (ष्टृ), शिक्षकः, शिक्षाकरः, अध्यापकः, बालाध्यापकः, शासिता *m.* (तृ), अनुशासिता *m.*, शिक्षादाता *m.*; 'spiritual preceptor,' आचार्य्यः, उपाध्यायः, गुरुः *m.*, पाठकः; 'family preceptor,' कुलगुरुः *m.*, कुलाचार्य्यः.

Preceptress, *s.* उपदेशिका, उपदेशिनी, शिक्षिका, अध्यापिका, उपदेष्ट्री.

Precession, *s.* (Going before) पुरोगतिः *f.*, अग्रगतिः *f.*—(Of the equinoctial points) अयनचलनं, विषुवायनं, अयनांशः.

Precinct, *s.* (Limit) सीमा, परिसीमा, अवधिः *m.*, मर्य्यादा, समन्तः, पर्य्यन्तः, परिसरः, परिच्छेदः, अवच्छेदः.—(Vicinity) उपान्तं, उपान्त्यं, अन्तिकं, परिसरः, सामन्तं, सामन्तदेशः.

Precious, *a.* महार्घः -र्घा -र्घं, महामूल्यः -ल्या -ल्यं, बहुमूल्यः &c., बहुमूल्यकः -का -कं, महार्हः -र्हा -र्हं, उत्कृष्टः -ष्टा -ष्टं, अत्युत्कृष्टः &c., अनर्घ्यः -र्घ्या -र्घ्यं, अनर्घः -र्घा -र्घं, अर्घ्यः &c., अमूल्यः &c., गुरुः -र्वी -रु, गुर्वर्घः &c., बहुमतः -ता -तं, महाधनः -ना -नं, प्रयाः -याः -यः (स्); 'precious stone,' रत्नं, मणिः *m.*; 'precious metals,' सुवर्णादि *n.*, हेमादि; 'more precious,' गरीयान् -यसी -यः (स्); 'most precious,' गरिष्ठः -ष्ठा -ष्ठं.

Preciousness, *s.* महार्घता -त्वं, महामूल्यता -त्वं, बहुमूल्यता -त्वं, बहुमूल्यं, उत्कृष्टता, अत्युत्कृष्टता, बहुमतिः *f.*, अनर्घ्यता -त्वं, गुरुता.

Precipice, *s.* प्रपातः, अतटः -टं, पातुकः, पातुकभूमिः *f.*, प्रवणभूमिः *f.*, भृगुः *m.*, तटः, दरद् *f.*, विषमं, विषमभूमिः *f.*, कटकः -कं; 'casting one's self down a precipice,' भृगुपातः -तनं.

Precipitance, precipitancy, *s.* साहसं, क्षिप्रकारित्वं, अविमृश्यकारित्वं, असमीक्ष्यकारित्वं, गमकारित्वं, विषमसाहसं.

Precipitate, precipitant, *a.* (Rashly, impetuous) साहसी -सिनी -सि (न्), साहसिकः -की -कं, क्षिप्रकारी -रिणी &c., गमकारी &c., अविमृश्यकारी &c., असमीक्ष्यकारी &c., अतिक्षिप्रः -प्रा -प्रं, जाल्मः -ल्मा -ल्मं, जातविभ्रमः -मा -मं.—(Headlong) अधोमुखः -खी -खं, अवाङ्मुखः &c. *See* the word.

To precipitate, *v. a.* अधः or अवाक् क्षिप् (c. 6. क्षिपति, क्षेप्तुं), अधः or अवाक् पत् (c. 10. पातयति -यितुं) or निपत् or प्रपत् or अवपत् or अवनी in caus. (-नाययति -यितुं).

Precipitated, *p. p.* अधःक्षिप्तः -प्ता -प्तं, अधःपातितः -ता -तं, अवपातितः &c., अवाक्क्षिप्तः &c., अवाक्पातितः &c., अवाङ् निपात्यमानः -ना -नं, पात्यमानः -ना -नं.

Precipitately, *adv.* सहसा, अनवेक्षया, साहसेन, ससाहसं, साहसिकवत्, जाल्मवत्, असमीक्ष्य, अविमृश्य, क्षिप्रं, अतिक्षिप्रं, द्रुतपदं.—(Headlong) अवाक्, अधोमुखेन, अवाङ्मुखेन.

Precipitation, *s.* (Rash impetuosity) अतिक्षिप्रता, अतिक्षिप्रकारित्वं, क्षिप्रकारिता, गमकारित्वं, अविमृश्यकारित्वं, असमीक्ष्यकारित्वं, साहसं, दुःसाहसं, साहसिकत्वं, जाल्मता.—(Act of throwing headlong) अधःपातनं, अधःक्षेपः -पणं, अवाक्क्षेपणं, अवाक्पातनं, अवपातनं, अवनायः -यनं.

Precipitous, *a.* (Steep) पातुकः -का -कं, प्रवणः -णा -णं, दुरवरोहः -हा -हं, दुरारोहः -हा -हं.—(Headlong, rash). *See* the word.

Precipitousness, *s.* पातुकत्वं -ता, प्रवणता -त्वं, दुरवरोहत्वं, दुरारोहत्वं

Precise, *a.* (Exact, nice, definite) सूक्ष्मः -क्ष्मा -क्ष्मं, समञ्जसः -सा -सं, सम्यङ् -मीची -म्यक् (च्), नियतः -ता -तं, निश्चितः -ता -तं, सुनिश्चितः &c., निर्दिष्टः -ष्टा -ष्टं, सुनिर्दिष्टः &c., वस्तुनिर्देशकः -का -कं, नामनिर्देशकः &c., नामनिर्देशात्मकः &c., यथार्थः -र्था -र्थं, केवलः -ला -लं.—(Distinct) व्यक्तः -क्ता -क्तं, सुव्यक्तः &c., स्फुटः -टा -टं, भिन्नार्थः -र्था -र्थं; 'precise measurement,' सूक्ष्ममानं; 'precise area,' स्फुटफलं.—(Punctilious) सूक्ष्मनियमनिष्ठः -ष्ठा -ष्ठं, सूक्ष्मोपचारनिष्ठः &c., सूक्ष्मादरनिष्ठः &c., सूक्ष्मादरशीलः -ला -लं, सत्याचारी &c.—(Keeping to stipulated agreement) सामयिकः -की -कं, समयपालकः -का -कं, नैयमिकः -की -कं.

Precisely, *adv.* नियतं, सम्यक्, समञ्जसं, अञ्जसा, सुनिर्दिष्टं, सूक्ष्मं, सूक्ष्मत्वेन, सूक्ष्मतया, यथार्थं, यथार्थतस्, व्यक्तं, सुव्यक्तं, भिन्नार्थतस्; 'precisely so,' एवमेव, तथैव.

Preciseness, precision, *s.* (Exactness) सूक्ष्मता -त्वं, सौक्ष्म्यं, सम्यक्त्वं, सामञ्जस्यं, नियतत्वं, निर्देशः, निर्दिष्टता -त्वं, सुनिश्चितत्वं, नामनिर्देशः, वस्तुनिर्देशः, यथार्थता, याथार्थ्यं.—(Distinctness) व्यक्तता, भिन्नता, स्फुटता.—(Punctiliousness) सूक्ष्मनियमपरता, सूक्ष्मनियमनिष्ठा, सूक्ष्मोपचारनिष्ठा, सूक्ष्मोपचारशीलता.

To preclude, *v. a.* प्रतिबन्ध् (c. 9. -बध्नाति -बन्द्धुं), निरुध् (c. 7. -रुणद्धि -रोद्धुं), अवरुध्, रुध्, निषिध् (c. 1. -षेधति -षेद्धुं), प्रतिषिध्, वृ (c. 10. वारयति -यितुं), निवृ, बाध् (c. 1. बाधते -धितुं), सार्गलीकृ.

Precluded, *p. p.* प्रतिबद्धः -द्धा -द्धं, रुद्धः -द्धा -द्धं, निरुद्धः &c., अवरुद्धः &c., निषिद्धः -द्धा -द्धं, वारितः -ता -तं, निवारितः -ता -तं, भोगवारितः &c., बाधितः &c., सार्गलः -ला -लं.

Preclusion, *s.* प्रतिबन्धः -न्धनं, रोधः -धनं, निरोधः -धनं, निषेधः, प्रतिषेधः, वारणं, निवारणं, भोगप्रतिबन्धः, भोगवारणं.

Preclusive, *a.* प्रतिबन्धकः -का -कं, रोधकः -का -कं, निरोधकः -का -कं, निषेधकः &c., निवारकः &c., बाधकः -का -कं.

Precocious, *a.* (Ripe before the proper time) अपूर्णकालपक्वः -क्वा -क्वं, कालपूर्वपक्वः &c., कालपूर्वफली -लिनी -लि (न्), कालपूर्वफलितः -ता -तं.—(Applied to persons) प्रौढबुद्धिः -द्धिः -द्धि, प्रौढः -ढा -ढं, बालप्रौढः &c., बालपक्वः -क्वा -क्वं.

Precociousness, precocity, *s.* अपूर्णकालपक्वता, प्रौढिः *f.*, बुद्धिप्रौढता, प्रौढबुद्धित्वं, बालप्रौढिः *f.*, बालपक्वता.

To precogitate, *v. a.* अग्रे or पूर्व्वं चिन्त् or विचर् or विमृश् or विवेचनां कृ.

Precogitation, *s.* अग्रचिन्ता, पूर्व्वचिन्ता, अग्रविचारणं, अग्रविवेचना.

Precognition, *s.* अग्रज्ञानं, पूर्व्वज्ञानं, अग्रविज्ञानं, अग्रबोधः -धनं.

To preconceive, *v. a.* अग्रे or पूर्व्वं मन् or बुध् or मनसा कॢप् in caus.

Preconceived, *p. p.* अग्रकल्पितः -ता -तं, पूर्व्वकल्पितः &c., अग्रोपलब्धः -ब्धा -ब्धं.

Preconception, *s.* अग्रकल्पना, पूर्व्वकल्पना, अग्रबुद्धिः *f.*, अग्रमतिः *f.*, पूर्व्वबोधः, पूर्व्वज्ञानं, अग्रवासना, अग्रोपलब्धिः *f.*, पूर्व्वतर्कः.

To preconcert, *v. a.* पूर्व्वसङ्केतेन घट् or सञ्चिन्त् or साध् or परिकॢप्.

Preconcerted, *p. p.* पूर्व्वसङ्केतघटितः -ता -तं, पूर्व्वसङ्केतपरिकल्पितः &c., पूर्व्वसङ्केतसिद्धः -द्धा -द्धं, पूर्व्वघटितः &c., अग्रघटितः &c., साङ्केतिकः -की -कं.

Preconcertion, *s.* अग्रघटनं, पूर्व्वघटनं, पूर्व्वसङ्केतघटनं, पूर्व्वसङ्केतपरिकल्पना.

Precursor, *s.* प्राग्गामी *m.* (न्), अग्रगामी *m.*, पूर्व्वगः, अग्रगः, अग्रसरः, पुरोगामी *m.*, प्राग्भावी *m.*, प्राग्वर्त्ती *m.*, अग्रवर्त्ती.—(Sign which precedes) पूर्व्वचिह्नं, पूर्व्वलक्षणं, अग्रलक्षणं, पूर्व्वलिङ्गं.

Precursory, *a.* पूर्व्वसूचकः -का -कं, अग्रसूचकः &c., पूर्व्वगः -गा -गं, अग्रगः &c., अग्रसरः -रा -रं, पुरःसरः &c., अग्रवर्त्ती -र्त्तिनी -र्त्ति (न्), प्राग्भावी &c.

PREDATORY, *a.* लुण्ठनकारी -रिणी -रि (न्), अपहारकः -का -कं, अपहारार्थकः -का -कं, लुण्टाकः -का -कं, उपद्रवी &c., उपद्रवार्थकः &c.

PREDECESSOR, *s.* पूर्व्वाधिकारी *m.* (न्), पूर्व्वगः, अग्रगः, पूर्व्वभोगी *m.* (न्).

PREDESTINARIAN, *s.* दैष्टिकः, दैववादी *m.* (न्), अदृष्टवादी *m.* (न्), अदृष्टमतावलम्बी *m.*, दैवचिन्तकः, दैवपरः, दैवाधीनः, दैवायत्तः, दैवपरायणः, प्रारब्धवादी *m.*

To PREDESTINATE, PREDESTINE, *v. a.* अग्रे or पूर्व्वं निरूप् (c. 10. -रूपयति -यितुं) or प्रक्लृप् or निर्दिश् or नियुज् or प्रयुज् or विधा.

PREDESTINATED, PREDESTINED, *p. p.* अग्रनिरूपितः -ता -तं, पूर्व्वनिरूपितः &c., अग्रप्रकल्पितः &c., पूर्व्वनिर्दिष्टः -ष्टा -ष्टं, दैष्टिकः -की -कं, अवश्यम्भावी -विनी -वि (न्), भावी &c., अवश्यम्भवितव्यः -व्या -व्यं, दैवाधीनः -ना -नं, दैवपरः -रा -रं, अदृष्टाधीनः &c.

PREDESTINATION *s.* अग्रनिरूपणं, पूर्व्वनिरूपणं, पूर्व्वयोजनं -ना, पूर्व्वनियोजनं, पूर्व्वनिर्देशः, अग्रप्रकल्पनं -ना.—(The doctrine) दैष्टिकता -त्वं, दैववादः, अदृष्टवादः, दैवमतं, अदृष्टमतं, प्रारब्धवादः, दैवचिन्ता.—(State of being predestined) दैवाधीनता, दैवायत्तता -त्वं, अदृष्टाधीनता, दैवपरता, अवश्यम्भवितव्यता.

PREDETERMINATION, *s.* अग्रनिश्चयः, पूर्व्वनिश्चयः, पूर्व्वसङ्कल्पः, पूर्व्वनिर्णयः.

To PREDETERMINE, *v. a.* अग्रे or पूर्व्वं निश्चि or निर्णी, पूर्व्वनिश्चयं कृ, पूर्व्वसङ्कल्पं कृ.

PREDETERMINED, PREDETERMINATE, *v. a.* पूर्व्वनिश्चितः -ता -तं, अग्रनिश्चितः &c., अग्रनिर्णीतः &c., पूर्व्वनिर्णीतः &c., पूर्व्वसङ्कल्पितः -ता -तं, पूर्व्वनिर्दिष्टः -ष्टा -ष्टं.

PREDIAL, *a.* क्षैत्रिकः -की -कं, क्षेत्र in comp.; 'predial slave,' क्षेत्रदासः.

PREDICABILITY, *s.* वाच्यता, कथनीयता, कथ्यता, वक्तुं शक्यता, वाद्यता.

PREDICABLE, *a.* वाच्यः -च्या -च्यं, कथनीयः -या -यं, वक्तुं शक्यः -क्या -क्यं, वाद्यः -द्या -द्यं.

PREDICAMENT, *s.* (In logic) पदार्थः, समानाधिकरणं, समानपदं, समानवर्गः, प्रकृतिः *f.*—(Condition, plight) दशा, अवस्था, स्थितिः *f.*, गतिः *f.*, दुर्दशा.

To PREDICATE, *v. a.* वद् (c. 1. वदति -दितुं), कथ् (c. 10. कथयति -यितुं), वच् (c. 2. वक्ति -क्तुं), उपदिश् (c. 6. -दिशति -देष्टुं), अभिधा (c. 3. -दधाति -धातुं), अवच्छेदं कृ, विशेषणं कृ, विशिष् (c. 10. -शेषयति -यितुं).

PREDICATE, *s.* वाच्यं, पदार्थः, विशेषणं, विशेषकं, लक्षणं, वार्थं, पदाभिधेयं, पदशक्यं, अवच्छेदः -दकः; 'relation between the predicate and the subject,' वाच्यवाचकभावः, विशेषणविशेष्यभावः; 'subject of a predicate,' विशेष्यं, अनुवाद्यं.

PREDICATED, *p. p* कथितः -ता -तं, विशेषितः -ता -तं, अवच्छिन्नः -न्ना -न्नं, विहितः -ता -तं; 'is predicated,' उच्यते, कथ्यते, उपदिश्यते.

PREDICATION, *s.* कथनं, विशेषणं, अवच्छेदनं, पदाभिधानं, विधानं.

To PREDICT, *v. a.* (Foretell) अग्रे or अग्रतः or पूर्व्वं कथ् (c. 10. कथयति -यितुं) or वद् (c. 1. वदति -दितुं) or प्रवद् or वच्, प्राक्सम्भवात् कथ्, भविष्यद् वद् or कथ्, भावि कथ्, भाविकथनं कृ, भविष्यत्कथनं कृ, भविष्यत् or अनागतं प्रदृश् in caus. or अग्रे दृश्, प्रत्याहृ (c. 1. -हरति -ते -हर्त्तुं)

PREDICTED, *p. p.* अग्रकथितः -ता -तं, पूर्व्वकथितः &c., प्राक् सम्भवात् कथितः &c. or उक्तः -क्ता -क्तं or प्रदर्शितः &c.

PREDICTION, *s.* भाविकथनं, भविष्यत्कथनं, अनागतकथनं, अग्रकथनं, पूर्व्वकथनं, प्राक्सम्भवात् कथनं, प्रदर्शनं, अनागतप्रदर्शनं, भविष्यद्बोधनं, भविष्यद्वाक्यं, उद्बोधनं.

PREDICTIVE, *a.* पूर्व्वकथकः -का -कं, अग्रकथकः &c., प्रदर्शकः &c., उद्बोधकः &c.

PREDICTOR, *s.* भाविकथकः, भविष्यत्कथकः, भविष्यद्वक्ता *m.* (क्तृ), अग्रवादी *m.* (न्), पूर्व्ववादी *m.*, प्रदर्शकः, अनागतदर्शकः, भाविवक्ता *m.*, भाविदर्शकः, दैवज्ञः, नैमित्तिकः.

PREDILECTION, *s.* पूर्व्वानुरागः, पूर्व्वानुरक्तिः *f.*, पूर्व्वप्रीतिः *f.*, पूर्व्वस्नेहः, पूर्व्वरुचिः *f.*, पूर्व्वच्छन्दस् *n.*, प्रावण्यं.

To PREDISPOSE, *v. a.* अग्रे or पूर्व्वं प्रवृत् in caus. or प्रयुज् or नियुज् or प्रोत्सह् in caus., प्रवणीकृ, प्रवणं -णां कृ, उन्मुखीकृ, उन्मुखं -खां कृ; 'to predispose to disease,' रोगसुग्राह्यं कृ, रोगयोग्यं -ग्यां कृ, रोगपात्रं कृ, रोगास्पदं कृ; 'to anger,' क्रोधप्रवणं -णां कृ.

PREDISPOSED, *p. p.* प्रवणः -णा -णं, अग्रप्रवर्त्तितः -ता -तं, उन्मुख in comp.

PREDISPOSITION, *s.* प्रावण्यं, प्रवणता, मनःप्रावण्यं, प्रवाहः, प्रवृत्तिः *f.*, उन्मुखता; 'to disease,' रोगसुग्राह्यता, रोगयोग्यता, रोगसुभेद्यता, रोगसुग्राह्यदशा.

PREDOMINANCE, PREDOMINANCY, *s.* प्राबल्यं, प्रबलता, प्राधान्यं, प्रधानता, प्रभावः, प्रभुता, प्रभूतता -त्वं, प्राभवं, आधिक्यं, अधिकत्वं, अतिरेकः, अतिरिक्तता.

PREDOMINANT, *a.* प्रबलः -ला -लं, प्रभविष्णुः -ष्णुः -ष्णु, प्रभूतः -ता -तं, प्रभवः -वा -वं, प्रधानः -ना -नं, अधिकः -का -कं, अतिरिक्तः -क्ता -क्तं, अतिरेकी -किणी -कि (न्), अतिशयी &c., सातिशयः -या -यं.

PREDOMINANTLY, *adv.* प्रबलं, प्राबल्येन, प्रधानतस्, प्रभावतस्, अतिरिक्तं.

To PREDOMINATE, *v. n.* प्रभू, अतिरिच् in pass. (-रिच्यते), उद्रिच्, व्यतिरिच्, प्रबलः -ला -लं भू, प्रबलीभू, अधिकः -का -कं भू, अधिकीभू.

PRE-EMINENCE, *s.* श्रेष्ठत्वं -ता, श्रैष्ठ्यं, सर्व्वश्रेष्ठता, उत्कर्षः, उत्कृष्टता, सर्व्वोत्कृष्टता, औत्कर्ष्यं, प्रकर्षः, प्रकृष्टता -त्वं, प्रमुखता -त्वं, मुख्यता, प्रधानता, सर्व्वप्रधानता, प्राधान्यं, विशिष्टता, वैशिष्ट्यं, ज्येष्ठता, प्रभुता -त्वं, उन्नतिः *f.*, समुन्नतिः *f.*, आधिक्यं, अधिकत्वं, शिष्टता, वैशेष्यं, गुणवैशेष्यं, पुरोगतिः *f.*, अग्रगण्यता, उत्तमता, सर्व्वोत्तमता.

PRE-EMINENT, *a.* श्रेष्ठः -ष्ठा -ष्ठं, सर्व्वश्रेष्ठः &c., सर्व्वोत्तमः -मा -मं, उत्कृष्टः -ष्टा -ष्टं, उत्तमः -मा -मं, सर्व्वोत्कृष्टः &c., प्रधानः -ना -नं, सर्व्वप्रधानः &c., प्रधानोत्तमः -मा -मं, प्रमुखः -खा -खं, विशिष्टः &c., शिष्टः &c., मुख्यः -ख्या -ख्यं, अग्रियः -या -यं, अग्र्यः -ग्र्या -ग्र्यं, अग्रगण्यः -ण्या -ण्यं, अग्रणीः -णीः -णि, परमः -मा -मं, परः -रा -रं, ज्येष्ठः -ष्ठा -ष्ठं, सर्व्वज्येष्ठः &c., वृन्दारकः -का -कं, सातिशयः -या -यं or expressed by इन्द्रः, व्याघ्रः, सिंहः, शार्दूलः, ऋषभः, पुङ्गवः, नागः, चन्द्रः, कुञ्जरः, मुखः, प्रकाण्डः in comp. *See* EXCELLENT.

PRE-EMINENTLY, *adv.* परमं, प्रधानतस्, प्राधान्यतस्, सर्व्वप्रधानतस्, मुख्यशस्, सर्व्वश्रेष्ठं, सातिशयं, अतिशयेन, अधिकं, अत्यन्तं

PRE-EMPTION, *s.* पूर्व्वक्रयः -यणं, अग्रक्रयः, पूर्व्वक्रयाधिकारः, अग्रक्रयाधिकारः; 'claimed by right of pre-emption,' प्रख्यातः -ता -तं.

To PRE-ENGAGE, *v. a.* पूर्व्वनियमेन or पूर्व्वसङ्केतेन बन्ध् or बद्धं -द्धां कृ, पूर्व्वं प्रतिज्ञा, पूर्व्वनियमं कृ, पूर्व्वसङ्केतं कृ, पूर्व्वप्रतिज्ञां कृ.

PRE-ENGAGED, *p. p.* पूर्व्वनियमबद्धः -द्धा -द्धं, पूर्व्वसङ्केतबद्धः &c., पूर्व्वनियमितः -ता -तं, पूर्व्वप्रतिज्ञातः &c., पूर्व्वसङ्केतितः &c.

PRE-ENGAGEMENT, *s.* पूर्व्वनियमः, पूर्व्वसङ्केतः, पूर्व्वप्रतिज्ञा, पूर्व्वसमयः.

PRE-EXAMINATION, *s.* पूर्व्वनिरूपणं, अग्रनिरूपणं, पूर्व्वविचारणं, पूर्व्वपरीक्षा.

To PRE-EXIST, *v. n.* अग्रे or अग्रतः or पूर्व्वं भू or वृत् or विद् or जीव्.

PRE-EXISTENCE, *s.* प्राग्भावः, पूर्व्वभावः, पूर्व्वभवः, पूर्व्वभूतिः *f.*, पूर्व्वजन्म *n.* (न्), पूर्व्वसत्त्वं, पूर्व्ववृत्तिः *f.*, प्राग्वृत्तिः *f.*, पूर्व्वदेहः, पूर्व्वजीवनं, पूर्व्वसत्ता, पूर्व्ववर्त्तनं.

PRE-EXISTENT, *a.* पूर्व्वभवः -वा -वं, पूर्व्वभूतः -ता -तं, पूर्व्वजीवी -विनी -वि (न्), पूर्व्ववर्त्ती &c., पूर्व्वदेहवान् -वती -वत् (त्).

Preface, *s.* प्रस्तावना -नं, प्रस्तावः, आभाषः, परिभाषा, उपोद्घातः, उपन्यासः, वाङ्मुखं, प्रकरणं, प्रारम्भः, प्रारम्भोक्तिः *f.*, आरम्भोक्तिः *f.*, उपक्रमोक्तिः *f.*, सूची.

To **preface**, *v. a.* प्रस्तावनां कृ or लिख् (c. 6. लिखति, लेखितुं), प्रस्तु (c. 2. -स्तौति -स्तुते, c. 10. -स्तावयति -यितुं), प्रब्रू (c. 2. -ब्रवीति -वक्तुं), अग्रतः or पूर्व्वतो ब्रू or वद् or वच् or भाष्, वाक्यारम्भं कृ, परिभाषां कृ, सप्रस्तावनं -नां कृ.

Prefatory, *a.* पारिभाषिकः -की -कं, प्रस्तावनारूपः -पा -पं, आभाषिकः &c., उपोद्घातरूपः -पा -पं, आरम्भकः &c.

Prefect, *s.* पुराध्यक्षः, पुराधिपतिः *m.*, नगराध्यक्षः, नगराधिष्ठाता *m.* (तृ), अधिष्ठाता *m.*, अधिपतिः *m.*, नगराधिकारी *m.*

Prefecture, *s.* पुराध्यक्षता, नगराध्यक्षता, अध्यक्षता, अधिष्ठातृत्वं.

To **prefer**, *v. a.* (Esteem more, value more, have greater liking for) अधिकं मन् (c. 4. मन्यते, मन्तुं, c. 10. मानयति -यितुं) or प्रशंस् (c. 1. -शंसति -सितुं), अधिकं रुच् (c. 10. रोचयति -यितुं, c. 1. रोचते -चितुं) or अनुरुच् or अभिरुच् or इष् with abl., अधिकानुरागं कृ, अधिकानुरक्तः -क्ता -क्तं भू, अधिकाभिमतः -ता -तं भू. The construction of the sentence will vary as the Sanskrit verb may have an active or neuter sense; thus, 'I prefer this to that,' एतत् तस्मात् मह्यम् अधिकं रोचते, एतत् तस्मात् अधिकं रोचयामि or इच्छामि or प्रशंसामि, or मया अधिकं प्रशस्यते or मया अधिकम् अनुमतं or मम अधिकम् अभिमतं. The adverb वरं or the root शिष् with वि may be used to express the sense of 'prefer'; thus, 'I prefer death to poverty,' वरं मृत्युर् न च दारिद्र्यं (*i. e.* 'better death and not poverty'); 'I prefer death to dishonour,' अपमानात् प्राणत्यागो विशिष्यते. —(Choose before) पूर्व्वं वृ (c. 5. वृणोति -णुते, c. 9. वृणाति -णीते, c. 1. वरति -रितुं, c. 10. वरयति -यितुं), पूर्व्वं or अग्रे ग्रह् (c. 9. गृह्णाति, ग्रहीतुं) or आदृत्, पुरोधा (c. 3. -दधाति -धातुं); 'I prefer retirement to all pleasures,' अपक्रमणं सर्व्वकामैः or सर्व्वकामेभ्यो वृणे.—(Exalt, promote to an office, &c.) पदं वृध् (c. 10. वर्धयति -यितुं) or संवृध्, श्रेष्ठपदे or उत्कृष्टपदे नियुज् or प्रतिपद्, पदवृद्धिं कृ, प्रतिपत्तिं दा, पुरस्कृ.—(Present, offer) समृ in caus., निविद् in caus., उपहृ, निवेदनं कृ, समर्पणं कृ.

Preferable, *a.* (Worthy to be chsoen before, more desirable or excellent) वरं indec., वरीयान् -यसी -यः (स्), वरिष्ठः -ष्ठा -ष्ठं, वरणीयः -या -यं, पूर्व्ववरणीयः &c., अधिकवरणीयः &c., पूर्व्वग्राह्यः -ह्या -ह्यं, प्रथमग्राह्यः &c., अग्रग्राह्यः &c., श्रेयान् &c., श्रेष्ठः &c., गरीयान् &c., अधिकं प्रार्थनीयः -या -यं. The adverb वरं is usually followed by न च or न पुनर्; as, 'death is preferable to poverty,' वरं मृत्युर् न च दारिद्र्यं; 'death is preferable to intercourse with the base,' वरं प्राणत्यागो न पुनर् अधमानाम् उपगमः. *See* examples under *To* **prefer**.

Preferableness, *s.* वरता -त्वं, पूर्व्वग्राह्यता, प्रथमग्राह्यता, श्रेष्ठता, श्रैष्ठ्यं, श्रेयस्त्वं, वरीयस्त्वं, गरीयस्त्वं.

Preferably, *adv.* वरं, वरीयस्, श्रेयस्, गरीयस्, वरिष्ठं, श्रेष्ठं.

Preference, *s.* अधिकरुचिः *f.*, अधिकाभिरुचिः *f.*, पूर्व्वरुचिः *f.*, अग्ररुचिः *f.*, अधिकानुरागः, पूर्व्वानुरागः, अधिकमानं, अभिप्रेतं, वरता -त्वं, वरणं, वृतिः *f.*

Preferment, *s.* (Advancement to a higher office) पदवृद्धिः *f.*, पदवर्धनं, स्थानवृद्धिः *f.*, प्रतिपत्तिः *f.*, वर्धनं, संवर्धनं -ना, प्रवर्धनं.—(Act of presenting) निवेदनं, समर्पणं.

Preferred, *p. p.* (Chosen before others) पूर्व्वगृहीतः -ता -तं, वृतः -ता -तं, पूर्व्ववृतः &c., मनोनीतः -ता -तं, पुरोहितः -ता -तं—(Advanced in rank) संवर्धितः -ता -तं, श्रेष्ठपदनियुक्तः -क्ता -क्तं, पुरस्कृतः &c.

Prefiguration, *s.* प्रतिरूपद्वारेण पूर्व्वप्रदर्शनं or पूर्व्वसूचनं, दृष्टान्तद्वारा प्राक्प्रदर्शनं, प्रतिरूपकद्वारेण अग्रप्रदर्शनं, सादृश्येन पूर्व्वदर्शनं, पूर्व्वलक्षणदर्शनं, पूर्व्वलक्षणकरणं.

Prefigurative, *a.* उद्बोधकः -का -कं, पूर्व्वप्रदर्शकः &c., पूर्व्वलाक्षणिकः -की -कं, लाक्षणिकः &c., बोधकः -का -कं, पूर्व्वसूचकः &c.

To **prefigure**, *v. a.* प्रतिरूपद्वारेण पूर्व्वं प्रदृश् (c. 10. -दर्शयति -यितुं) or पूर्व्वतो दृश् or अग्रे प्रदृश्, दृष्टान्तद्वारा पूर्व्वं प्रदृश् or सूच् (c. 10. सूचयति -यितुं), प्रतिरूपकं दा or कृ, प्रतिबिम्बं दा, पूर्व्वलक्षणं दा or दृश्.

Prefigured, *p. p.* प्रतिरूपकद्वारा पूर्व्वप्रदर्शितः -ता -तं or पूर्व्वसूचितः &c.

To **prefix**, *v. a.* (Put or place before) पुरस्कृ, पुरतस्कृ, अग्रतस्कृ, पुरोधा (c. 3. -दधाति -धातुं), अग्रे or पुरतः स्था in caus.—(In writing) अग्रे or अग्रतः or पुरतः or मुखे लिख्.—(Settle beforehand) अग्रे or पूर्व्वं निश्चि or निर्णी or निरूप् or प्रकॢप् or नियुज्.

Prefix, *s.* (In grammar, particle prefixed) उपसर्गः.

Prefixed, *p. p.* (Put before) पुरस्कृतः -ता -तं, पुरतस्कृतः &c., पुरःकृतः &c., पुरोहितः &c., अग्रे स्थापितः &c.—(Settled before) पूर्व्वनिश्चितः -ता -तं, पूर्व्वनिरूपितः -ता -तं.

Pregnancy, *s.* गर्भधारणं, गर्भिणीत्वं, गर्भिणीभावः, गर्भग्रहणं, सगर्भता, धृतगर्भता, पूर्णगर्भता, सञ्जातगर्भता, गर्भपोषणं, ससत्त्वता, आपन्नसत्त्वता, सगर्भावस्था, अन्तरापत्यता, गर्भः.

Pregnant, *a.* (Being with young) गर्भिणी, गर्भवती, सगर्भा, धृतगर्भा, गर्भधारिणी, गृहीतगर्भा, पूर्णगर्भा, आपन्नगर्भा, सञ्जातगर्भा, प्ररूढगर्भा, ससत्त्वा, आपन्नसत्त्वा, अन्तर्वत्नी, उदरिणी, गुर्व्विणी, अन्तरापत्या, द्विहृदया; 'a pregnant woman longing for any thing,' दोहदवती, श्रद्धालुः *f.*; 'number of pregnant women,' गार्भिणं -ण्यं.—(Full of, abounding with) पूर्णः -र्णा -र्णं, सम्पूर्णः &c., गर्भः -र्भा -र्भं in comp., सङ्कुलः -ला -लं, आढ्यः -ढ्या -ढ्यं.—(Fruitful) सफलः -ला -लं, अबन्ध्यः -न्ध्या -न्ध्यं.

Pregustation, *s.* पूर्व्वस्वादनं, पूर्व्वास्वादनं, अग्रास्वादनं, पूर्व्वप्राशनं.

To **prejudge**, **prejudicate**, *v. a.* अग्रे or पूर्व्वं विचर् (c. 10. -चारयति -यितुं) or निर्णी (c. 1. -णयति -णेतुं) or निश्चि, पूर्व्वविचारं कृ, पूर्व्वविचारणं कृ, पूर्व्वनिर्णयं कृ, पूर्व्वनिश्चयं कृ, वृत्तान्तम् अनिरूप्य or अविचार्य्य निर्णयं कृ, अविचारपूर्व्वं निर्णयं कृ or निष्पत्तिं कृ, वृत्तान्तनिर्णयम् अकृत्वा निष्पत्तिं कृ, वृत्तान्तनिरूपणम् अकृत्वा निर्णयं कृ.

Prejudged, *p. p.* पूर्व्वविचारितः -ता -तं, पूर्व्वनिर्णीतः &c., पूर्व्वनिष्पन्नः -न्ना -न्नं.

Prejudgment, *s.* पूर्व्वनिर्णयः, पूर्व्वविचारः -रणं, पूर्व्वनिष्पत्तिः *f.*, पूर्व्वनिश्चयः.

Prejudice, *s.* (Decision or opinion formed without due examination) अविचारपूर्व्वो निर्णयः, अनिरूपणपूर्व्वो निश्चयः, अपरीक्षापूर्व्वा बुद्धिः *f.*, अविचारपूर्व्विका मतिः *f.*, अविचारबुद्धिः *f.*, अविचारमतिः *f.*, अविचारितनिश्चयः, अविचारितनिर्णयः.—(Bias) दुराग्रहः, सङ्गः, मनोवक्रता, बुद्धिवक्रता, वक्रमतं, साचीकृतं, वक्रीकृतं, वक्रीभावः, आग्रहः, ग्रहः; 'free from prejudice,' मुक्तसङ्गः -ङ्गा -ङ्गं.—(Partiality for) पक्षपातः.—(Damage, detriment) क्षतिः *f.*, हानिः *f.*, अपचयः, अपायः, अपकारः, नाशः, हिंसा, क्षयः, बाधः, दूषणं, ध्वंसः.

To **prejudice**, *v. a.* (Bias) साचीकृ, वक्रीकृ, बुद्धिवक्रतां कृ or जन्, दुराग्रहं कृ, दुराकर्षणं कृ, आकृष्, आवृज् (c. 10. -वर्जयति -यितुं), दुरावर्जनं कृ, चित्ताकर्षणं कृ, चित्तावर्जनं कृ.—(Injure, damage)

घाति कृ, अपकृ, हिंस्, घात्, दुष्, क्षि, नश्, बाध्.

PREJUDICED, *p. p.* (Biased) मायीकृतः -ता -तं, वक्रीकृतः &c., सक्की -क्किनी -क्कि (न्), सङ्गयुक्तः -क्ता -क्तं, मायीकृतबुद्धिः -द्धिः -द्धि, वक्रीकृतबुद्धिः &c., मायीकृतमतिः -तिः -ति.—(Damaged) अपकृतः -ता -तं, प्राप्तहानिः -निः -नि.

PREJUDICIAL, *a.* अहितः -ता -तं, अपकारकः -का -कं, क्षतिजनकः &c., अहितकरः -रा -रं, हानिजनकः &c., हिंसकः &c., घातुकः &c. *See* INJURIOUS.

PREJUDICIALLY, *adv.* अहितं, सापकारं, सापायं, हिंसया, सक्षतं.

PREKNOWLEDGE, *s.* पूर्व्वज्ञानं, अग्रज्ञानं, पूर्व्वबोधः, अग्रबोधः.

PRELACY, PRELATE. *See* EPISCOPACY, BISHOP, &c.

PRELECTION, *s.* पाठः -ठनं, पठनं, अध्यायः. *See* LECTURE.

PRELECTOR, *s.* पाठकः, पाठकारी *m.* (न्). *See* LECTURER.

PRELIBATION, *s.* पूर्व्वभोगः, पूर्व्वभुक्तिः *f.*, पूर्व्वानुभवः, आदिभोगः. *See* FORETASTE.

PRELIMINARY, *a.* प्राथमिकः -की -कं, आरम्भकः -का -कं, प्रारम्भकः &c., पूर्व्वः -र्व्वा -र्व्वं, पौर्व्विकः -की -कं, प्रथमः -मा -मं, पूर्व्वकर्त्तव्यः -व्या -व्यं, पूर्व्वकरणीयः -या -यं, अग्रकर्त्तव्यः &c., अग्रकरणीयः -या -यं, आद्यः -द्या -द्यं, आदि in comp., आदिकः -का -कं, आदिस्थः -स्था -स्थं, आरम्भस्थः &c., उपक्रमस्थः &c.—(Prefatory) पारिभाषिकः -की -कं, प्रस्तावनारूपः -पा -पं.

PRELIMINARY, *s.* पूर्व्वविषयः, पूर्व्वाङ्गं, पूर्व्वकर्म्म *n.* (न्), आद्याङ्गं, पूर्व्वोपायः, आरम्भकर्म्म *n.*, प्रारम्भककर्म्म *n.*, उपकरणं.—(Preliminary remarks) परिभाषा, आभाषः. *See* PREFACE.

PRELUDE, *s.* (In music) पूर्व्वरङ्गः, पूर्व्ववादनं, आरम्भवाद्यं.—(Dramatic) प्रस्तावना -नं, प्रस्तावः, आमुखं.—(Something introductory) आरम्भः, प्रारम्भः, उपक्रमः, प्रकरणं.—(Forerunner, something indicatory) पूर्व्वलक्षणं, पूर्व्वसूचकं, पूर्व्वचिह्नं, पूर्व्वरूपं.

To PRELUDE, *v. a.* प्रस्तु (c. 2. -स्तौति -स्तुते, c. 10. स्तावयति -यितुं), प्रस्तावनां कृ, पूर्व्वरङ्गं कृ, आरभ् (c. 1. -रभते -रब्धुं), समारभ्, उपक्रम् (c. 1. -क्रमते -मितुं), प्रक्रम्, प्रकृ, अभ्युपकृ.

PRELUDER, *s.* प्रस्तावनाकृत, पूर्व्वरङ्गकारी *m.* (न्), पूर्व्ववादकः, आरम्भकः.

PRELUSIVE, PRELUSORY, *a.* आरम्भकः -का -कं, पूर्व्वसूचकः -का -कं.

PREMATURE, *a.* कालपूर्व्वपक्वः -क्वा -क्वं, प्राक्पूर्णकालपक्वः &c., अपूर्णकालः -ला -लं, अपूर्णकालिकः -का -कं, असम्पूर्णकालः &c., पूर्णकालपूर्व्वजः -जा -जं, अपूर्णकालजः -जा -जं, अकालपक्वः -क्वा -क्वं, अपक्वः &c., अपूर्णकालोत्पन्नः -न्ना -न्नं, अकालजः &c., अकालोत्पन्नः &c., अकालभवः -वा -वं, अकालिकः -की -कं, अप्राप्तकालः -ला -लं, असामयिकः -की -कं.—(Not waiting for the proper time) अकालसहः -हा -हं. *See* PRECIPITATE.

PREMATURELY, *adv.* प्राक्पूर्णकालात्, पूर्णकालात्पूर्व्वं, अपूर्णकाले, असम्पूर्णकाले, अकाले, असमये; 'prematurely born,' अपूर्णकालजः -जा -जं, अपूर्णकालोत्पन्नः -न्ना -न्नं, पूर्णकालपूर्व्वजातः -ता -तं; 'prematurely grey-haired,' युवपलितः -ता -तं; 'prematurely old,' युवजरन् -रती -रत् (त्), युवाजरन् &c.; 'prematurely bald,' युवखलतिः -तिः -ती -ति.

PREMATURENESS, PREMATURITY, *s.* कालपूर्व्वपक्वता, अपूर्णकालत्वं, अपूर्णकालिकत्वं -ता, अकालपक्वता, अकालोत्पत्तिः *f.*, अपूर्णकालोत्पत्तिः *f.*, अकालजत्वं, अकालिकत्वं.

To PREMEDITATE, *v. a.* पूर्व्वं or अग्रे चिन्त् or मनसा कॢप्, पूर्व्वकल्पनां कृ.

To PREMEDITATE, *v. n.* पूर्व्वं or अग्रे चिन्त् or ध्यै or विचर् or विमृश् or विगण्, पूर्व्वचिन्तां कृ, पूर्व्वविवेचनां कृ, पूर्व्वोपायं चिन्त्, पूर्व्वविचारणं कृ.

PREMEDITATED, *p. p.* or *a.* पूर्व्वकल्पितः -ता -तं, पूर्व्वचिन्तितः &c., पूर्व्वघटितः &c., बुद्धिपूर्व्वः -र्व्वा -र्व्वं, मतिपूर्व्वः &c., बुद्धिकृतः -ता -तं, पूर्व्वसङ्कल्पितः -ता -तं, साङ्कल्पिकः -की -कं, सङ्कल्पकृतः &c., पूर्व्वरचितः &c., पूर्व्वयोजितः &c.

PREMEDITATION, *s.* पूर्व्वकल्पना, पूर्व्वसङ्कल्पः, पूर्व्वपरिकल्पना, पूर्व्वघटना, पूर्व्वरचना, पूर्व्वयोजना, पूर्व्वानुसन्धानं, पूर्व्वचिन्ता -न्तनं, पूर्व्वविचारणा, पूर्व्वविवेचना.

PREMICES, *s. pl.* (First-fruits) नवान्नं, प्रथमफलं. *See* the word.

PREMIER, *a.* मुख्यः -ख्या -ख्यं, प्रमुखः -खा -खं, प्रधानः -ना -नं.

PREMIER, *s.* (Prime-minister) मुख्यमन्त्री *m.* (न्), प्रधानमन्त्री *m.*, प्रधानामात्यः, महामन्त्री *m.*, प्रधानसचिवः, मुख्यप्रधानः.

PREMIERSHIP, *s.* मुख्यमन्त्रिता -त्वं, प्रधानमन्त्रिता -त्वं.

To PREMISE, *v. a.* उपन्यस् (c. 4. -अस्यति -असितुं), पूर्व्वं or अग्रे or वाङ्मुखे कथ् (c. 10. कथयति -यितुं) or ब्रू (c. 2. ब्रवीति, वक्तुं) or वद् (c. 1. वदति -दितुं) प्रस्तावपूर्व्वं कथ् or व्याख्या (c. 2. -ख्याति -तुं), पूर्व्वव्याख्यां कृ, पूर्व्वकथनं कृ, प्राक्कथनं कृ, प्रस्तावपूर्व्वकथनं कृ, उपक्रम् (c. 1. -क्रमते -मितुं), प्रक्रम्, प्रस्तु (c. 2. -स्तौति -स्तुते, c. 10. -स्तावयति -यितुं).

PREMISE, *s.* (In logic) पक्षः, अवयवः, प्रतिज्ञा, उपन्यासः, साधनं; 'major premise,' गुर्व्ववयवः, गुरुपक्षः, पूर्व्वपक्षः, आद्यपक्षः, हेत्वादिपक्षः; 'minor premise,' लघ्ववयवः, उत्तरपक्षः.

PREMISED, *p. p.* उपन्यस्तः -स्ता -स्तं, पूर्व्वकथितः -ता -तं, प्रस्तावपूर्व्वकथितः &c., प्रस्तावपूर्व्वसूचितः &c., प्रस्तुतः -ता -तं, प्रक्रान्तः -न्ता -न्तं; 'having premised,' उपन्यस्य, प्रतिपाद्य.

PREMISES, *s. pl.* (In logic). *See* PREMISE.—(In law, house with its adjuncts) गृहवाटिकादि *n.*, गृहक्षेत्रादि *n.*, गृहादि *n.*

PREMIUM, *s.* पारितोषिकं, मूल्यं, फलं, लभ्यं, लाभः, अधिकमूल्यं, अतिरिक्तमूल्यं, मूल्यातिरिक्तपारितोषिकं.

To PREMONISH, *v. a.* (Forewarn) अग्रे or पूर्व्वं बुध् in caus. or प्रबुध् or प्रत्यादिश् or उपदिश् or ज्ञा in caus., पूर्व्वं सूच् (c. 10. सूचयति -यितुं), पूर्व्वसूचनं कृ, पूर्व्वलक्षणं दा, पूर्व्वरूपं दा.

PREMONISHED, *p. p.* पूर्व्वबोधितः -ता -तं, पूर्व्वोपदिष्टः -ष्टा -ष्टं, पूर्व्वसूचितः &c.

PREMONITION, PREMONISHMENT, *s.* पूर्व्वबोधः -धनं, पूर्व्वप्रबोधः, पूर्व्वसूचना -नं, पूर्व्वलक्षणं, पूर्व्वरूपं.

PREMONITORY, *a.* पूर्व्वसूचकः -का -कं, पूर्व्वबोधकः -का -कं, उद्बोधकः &c., पूर्व्वसूचनकारी -रिणी -रि (न्), पूर्व्वलक्षणदः -दा -दं, पूर्व्वलाक्षणिकः -की -कं, पूर्व्वज्ञापकः &c.

PRENOMEN, *s.* व्यक्तिनाम *n.* (न्), उपाधिः *m.*

PRENTICE, *s.* अन्तेवासी *m.* (न्), छात्रः, सङ्केतपत्रबद्धशिष्यः, शिष्यः.

PRENTICESHIP, *s.* अन्तेवासित्वं, अन्तवासित्वं, अन्तेवासिभावः, अन्तेवासित्वकालः.

PRE-OCCUPATION, PRE-OCCUPANCY, *s.* पूर्व्वभोगः, पूर्व्वभुक्तिः *f.* पूर्व्वधारणं, पूर्व्वग्रहणं.

PRE-OCCUPIED, *p. p.* पूर्व्वगृहीतः -ता -तं, पूर्व्वाविष्टः -ष्टा -ष्टं, पूर्व्वभुक्तः -क्ता -क्तं.

To PRE-OCCUPY, *v. a.* पूर्व्वं or अग्रे धृ or ग्रह् or भुज्, पूर्व्वधारणं कृ.

To PRE-ORDAIN, *v. a.* अग्रे or पूर्व्वं विधा or कॢप् or प्रकॢप् or निर्दिश् or स्था in caus., पूर्व्वविधानं कृ, पूर्व्वविधिं कृ, पूर्व्वस्थापनं कृ.

PREPARATION, *s.* (Act of getting ready, providing or fitting for any purpose) सज्जनं -ना, सज्जीकरणं, सज्जकर्म्म *n.* (न्), साधनं, सिद्धीकरणं, आयोजनं, उपकल्पनं -ना, परिकल्पनं -ना, कल्पनं -ना,

पुरस्करणं, पुरस्कारः, संस्कारः, संस्करणं, रचनं -ना, विरचनं -ना, उपाकर्म्म *n.* (न्), सम्भारः, सम्भृतिः *f.*, सन्धानं, समवधानं, प्रतिविधानं, उद्योगः, प्रस्तुतीकरणं.—(State of preparation) सिद्धिः *f.*, सिद्धता -त्वं.—(Previous or preparative measure) उपायः, साधनोपायः, अभ्युपायः, साधनं.—(That which is prepared or compounded, a compound) योगः, रसायनं; 'a preparation of mercury,' रसगर्भं, रसपुष्पं.—(Of medicine or food) संस्कारः, पाकः, पचनं.—(Prepared food) पक्वान्नं, सिद्धान्नं.

PREPARATIVE, PREPARATORY, *a.* सिद्धिजनकः -का -कं, सिद्धिकारकः -का -कं, सिद्धताजनकः -का -कं, साधकः -का -कं, उपक्रमसाधकः &c., आरम्भसाधकः &c., सिद्धिसाधकः &c., उपक्रमसहायः -या -यं, आरम्भोपकारी -रिणी -रि (न्), उपक्रमोपकारी &c., उपकल्पकः &c., परिकल्पकः &c., आयोजनकारी &c., उपक्रमप्रवर्त्तकः &c., प्रस्तुतकारी &c., योग्यताजनकः &c., आरम्भकारी &c.

PREPARATIVE, *s.* उपक्रमसाधनं, आरम्भसाधनं, सिद्धिसाधनं, सिद्धिजनकविषयः, सिद्धिजनककर्म्म *n.* (न्), परिकर्म्म *n.*, सिद्धताजनकविषयः.

PREPARATIVELY, *adv.* आयोजनपूर्व्वं, उपक्रमसाधनार्थं, आरम्भसाधनार्थं.

To PREPARE, *v. a.* (Make ready, fit for any purpose) सज्जीकृ, उपकॢप् (c. 10. -कल्पयति -यितुं, c. 1. -कल्पते -ल्पितुं), परिकॢप्, प्रकॢप्, कॢप्, युज् (c. 10. योजयति -यितुं), आयुज्, समायुज्, सिद्धीकृ, प्रस्तुतीकृ, उपस्कृ, संस्कृ, पुरस्कृ, रच् (c. 10. रचयति -यितुं), विरच्, सम्भृ (c. 1. -भरति -भर्त्तुं), सज्ज् (c. 1. सज्जति -ज्जितुं), साध् (c. 10. साधयति -यितुं), प्रतिविधा (c. 3. -दधाति -धातुं), विधा, विनिर्मा (c. 2. -माति -तुं), योग्यं -ग्यां कृ, उपयुक्तं -क्तां कृ, कार्य्यक्षमं -मां कृ, कार्य्योपयुक्तं -क्तां कृ.—(Provide with all necessary articles) सोपकारद्रव्यैः समायुज्, उपयुक्तद्रव्याणि परिकॢप् or उपकॢप् or सम्प्रकॢप् or उपस्था in caus. (-स्थापयति -यितुं) or उपपद् (c. 10. -पादयति -यितुं) or विधा, सोपकारद्रव्ययुक्तं -क्तां कृ, उपयुक्तद्रव्यसाधनं कृ.—(Dress) रच्, विरच्, प्रसाध्, विन्यस्.—(Prepare food) अन्नं संस्कृ or सिद्धीकृ or पच् or सन्धा.

To PREPARE, *v. n.* (Make all things ready) उपयुक्तद्रव्याणि परिकॢप् or उपकॢप्, सोपकारद्रव्यसम्भारं कृ, द्रव्यसम्भारं कृ, उपकरणसम्भारं कृ, सज्जनं कृ, संस्कारं कृ.—(Make one's self ready, be ready) उद्यतः -ता -तं भू, समुद्यतः -ता -तं भू, अभ्युद्यतः -ता -तं भू, उद्युक्तः -क्ता -क्तं भू, प्रस्तुतः -ता -तं भू; 'he prepared to kill the child,' स बालं हन्तुम् उद्यतः.

PREPARED, *p. p.* or *a.* सज्जीकृतः -ता -तं, सज्जितः -ता -तं, सज्जः -ज्जा -ज्जं, प्रस्तुतः -ता -तं, उपकल्पितः &c., परिकल्पितः &c., कल्पितः &c., उपकॢप्तः -प्ता -प्तं, प्रकॢप्तः &c., सम्भृतः -ता -तं, सिद्धः -द्धा -द्धं, सम्प्रस्तुतः -ता -तं, पुरस्कृतः -ता -तं, उद्यतः -ता -तं, समुद्यतः &c., अभ्युद्यतः &c., उद्युक्तः -क्ता -क्तं, आयुक्तः &c., संस्कृतः &c., संस्कारितः &c., संहितः &c., सोपकारद्रव्ययुक्तः &c., उपपादितः -ता-तं, परिनिर्मितः &c.; 'to be prepared,' उद्यतः -ता -तं भू or अस्, उद्युक्तः &c. भू, सज्जीभू.

PREPAREDNESS, *s.* सिद्धता -त्वं, सिद्धिः *f.*, प्रस्तुतत्वं, उद्यतत्वं, उद्युक्तत्वं.

PREPARER, *s.* उपकल्पकः, परिकल्पकः, आयोजनकर्त्ता *m.* (र्त्तृ), सिद्धिकर्त्ता *m.*, साधकः, रचकः, विरचकः, संस्कर्त्ता *m.* (र्त्तृ).

PRE-PAYMENT, *s.* पूर्व्वशोधनं, पूर्व्वशुद्धिः *f.*, पूर्व्वसिद्धिः *f.*, पूर्व्वदानं.

PREPENSE, PREPENSED, *a.* *See* PREMEDITATED.—(Malice prepense) द्रोहचिन्ता -न्तनं, व्यापादः -दनं; 'with malice prepense,' द्रोहचिन्तापूर्व्वं, बुद्धिपूर्व्वं, मतिपूर्व्वं, कामतस्; 'without malice prepense,' अबुद्धिपूर्व्वकं, अमतिपूर्व्वकं, अकामात् -मतस्.

PREPONDERANCE, *s.* (Superiority of weight) भाराधिक्यं, भारातिरिक्तता, भारातिरेक्यं, अधिकभारः, अतिरिक्तभारः, गुरुतरभारः.—(Superiority of power or force) अधिकप्रभावः, प्रभावाधिक्यं, प्रधानता, प्राधान्यं, प्रभविष्णुता, प्रभावः, प्राबल्यं, प्रबलता, गौरवं, अधिकशक्तिः *f.*, बलाधिक्यं.

PREPONDERANT, *a.* अधिकभारी -रिणी -रि (न्), अतिरिक्तभारी &c. अतिभारी &c.

To PREPONDERATE, *v. n.* अधिकभारी -रिणी -रि भू or अस्, अतिरिक्तभारी &c. भू, अतिभारी &c. भू, गुरुतरभारी &c. भू, गुरुतरः -रा -रं भू, भारेण अतिरिच् in pass. (-रिच्यते) or वृध् (c. 1. वर्धते -र्धितुं), गौरवेण अतिरिच् or वृध्, प्रभावेण अतिरिच्, अधिकः -का -कं भू, अधिकप्रभावः &c. भू or अस्, अधिकशक्तिः -क्तिः -क्ति भू.

PREPOSITION, *s.* (In grammar) उपसर्गः, शब्दयोगी अव्ययशब्दः.

PREPOSITIONAL, PREPOSITIVE, *a.* औपसर्गिकः -की -कं, उपसर्गसम्बन्धी -न्धिनी &c.

To PREPOSSESS, *v. a.* (Pre-occupy). *See* the word.—(Bias in favor of) चित्ताकर्षणं, चित्तावर्जनं कृ, चित्तम् आकृष् or आवृज्.—(Bias against). *See To* PREJUDICE.

PREPOSSESSED, *p. p.* आकृष्टचित्तः -त्ता -त्तं, आकर्षितचित्तः &c., पूर्व्वाकर्षितः -ता -तं, प्रथमदर्शनादपि or दर्शनमात्राद् आकृष्टचित्तः &c., दृष्टमात्राद् एव आकृष्टचित्तः &c., सङ्गी -ङ्गिनी -ङ्गि (न्), ससङ्गः -ङ्गा -ङ्गं.

PREPOSSESSING, *a.* दर्शनमात्रात् or अवलोकनक्षणात् or प्रथमदर्शनात् चित्ताकर्षकः -का -कं, दृष्टमात्रचित्ताकर्षकः &c., चित्तापहारी -रिणी -रि (न्).

PREPOSSESSION, *s.* (Pre-occupation). *See* the word.—(Previous impression). *See* PRECONCEPTION.—(Inclination in favor of) चित्ताकर्षणं, सङ्गः, ग्रहः, आग्रहः, पक्षपातः.

PREPOSTEROUS, *a.* (Inverted in order) विपरीतः -ता -तं, विपरीतक्रमः -मा -मं, विपर्य्यस्तः &c. *See* INVERTED.—(Absurd) असङ्गतः -ता -तं, अयुक्तः -क्ता -क्तं, अनर्थकः -का -कं, युक्तिविरुद्धः -द्धा -द्धं, असम्बद्धः -द्धा -द्धं, अयुक्तिकः -का -कं, न्यायविरुद्धः &c., असमञ्जसः -सा -सं, अयथोचितः -ता -तं.

PREPOSTEROUSLY, *adv.* असङ्गतं, अयुक्तं, अयुक्तिपूर्व्वं, युक्तिविरुद्धं, विपरीतक्रमेण.

PREPOSTEROUSNESS, *s.* असङ्गतत्वं, अयुक्तता -त्वं, युक्तिविरुद्धता, अयुक्तिः *f.*, अनर्थकता, असम्बद्धता -त्वं, न्यायविरुद्धता, असामञ्जस्यं, वैपरीत्यं, क्रमविपर्य्यासः, विपरीतता.

PREPOTENCY, *s.* प्रभावाधिक्यं, बलाधिक्यं, प्रबलता. *See* PREDOMINANCE.

PREPUCE, *s.* लिङ्गाग्रत्वक् *f.* (च्), शिश्नाग्रत्वक् *f.*, लिङ्गाग्रचर्म्म *n.* (न्), अग्रत्वक् *f.*; 'frenum of the prepuce,' सेवनं, सीवनी.

PREREQUISITE, *a.* पूर्व्वाकांक्षितः -ता -तं, पूर्व्वापेक्षितः &c., पूर्व्वावश्यकः -का -कं.

PREREQUISITE, *s.* पूर्व्वावश्यकविषयः, पूर्व्वाकांक्षितविषयः, पूर्व्वावश्यकवस्तु *n.*

PREROGATIVE, *s.* विशेषाधिकारः, असाधारणाधिकारः, अद्वितीयाधिकारः, असामान्याधिकारः, विशेषशक्तिः *f.*, असाधारणशक्तिः *f.*, अद्वितीयक्षमता, विशेषसत्ता.

PRESAGE, *s.* पूर्व्वलक्षणं, पूर्व्वलिङ्गं, पूर्व्वचिह्नं, पूर्व्वसूचना, भविष्यत्सूचना.

To PRESAGE, *v. a.* पूर्व्वं or अग्रे सूच् (c. 10. सूचयति -यितुं), पूर्व्वलक्षणं दा or कृ, पूर्व्वचिह्नं दा, पूर्व्वसूचनं कृ, अग्रसूचनं कृ.

PRESCIENCE, *s.* पूर्व्वज्ञानं, अग्रज्ञानं, अग्रनिरूपणं, भविष्यज्ज्ञानं, भाविज्ञानं, भविष्यज्ञानं, भविष्यद्दर्शनं, प्रेक्षणं. *See* FOREKNOWLEDGE.

PRESCIENT, *a.* भविष्यज्ज्ञानी -निनी -नि (न्), भाविज्ञानी &c., भविष्यदर्शी &c., भविष्यज्ज्ञानी &c., भविष्यद्दर्शी &c., प्रवेक्ष्यन् -क्ष्यन्ती -क्ष्यत् (त्), प्रपश्यन् &c., अनागतदर्शी &c.

To PRESCRIBE, *v. a.* (Direct) निर्दिश् (c. 6. -दिशति -देष्टुं), आदिश्,

प्रदिश्, विनिर्दिश्, क्लृप्, प्रक्लृप्, विधा, संविधा, आज्ञा in caus., चुद्, प्रचुद्, शास्, प्रशास्, अनुशास्, सूच्, आज्ञां कृ, नियमं कृ, विधिं कृ.—(Direct medically) उपचारं कृ, औषधं विधा or निर्दिश्.

To prescribe, *v. n.* (Direct remedies) उपचारं कृ, औषधोपचारं कृ, औषधविधानं कृ, औषधविधिं कृ, औषधप्रयोगं कृ, भेषजप्रयोगं कृ, औषधनिर्देशं कृ.

Prescribed, *p. p.* निर्दिष्टः -ष्टा -ष्टं, निदिष्टः -ष्टा -ष्टं, विहितः -ता -तं, नियमितः &c., चोदितः &c., प्रचोदितः &c., विध्युक्तः -क्ता -क्तं, विधिप्रोक्तः &c., उदितः -ता -तं, वैधिकः -की -कं, वैधः -धी -धं, वाचनिकः -की -कं, उद्दिष्टः -ष्टा -ष्टं, विधीयमानः -ना -नं.

Prescriber, *s.* निर्देष्टा *m.* (ष्टृ), निर्देशकः, आदेष्टा *m.*, विधायी *m.* (न्), अनुशासकः.

Prescript, *s.* निर्देशः, आदेशः, विधिः *m.*, विधानं, आज्ञा. *See* Command.

Prescription, *s.* (Direction) निर्देशः, आदेशः, निदेशः, विधानं, विधिः *m.*, चोदनं -ना, प्रचोदनं, नियमः, शासनं, शास्तिः *f.*, अनुशासनं, प्रेरणा, वचनं.—(Recipe, prescribed medicine) उपचारलेखः, उपचारपत्रं, चिकित्सालेखः, चिकित्सापत्रं, औषधविधिः *m.*, औषधविधानं, उपचारविधिः *m.*—(Immemorial use) अनादिपरम्परा, चिरकालभोगः, चिरकालव्यवहारः, चिरकालीनव्यवहारः, चिरकालपरम्परा, प्राचीनव्यवहारः, प्राचीनभोगः, आचारः.

Prescriptive, *a.* (Consisting in or acquired by immemorial use) अनादिपरम्पराप्राप्तः -प्ता -प्तं, अनादिपरम्परायातः -ता -तं, चिरकालभुक्तः -क्ता -क्तं, चिरकालव्यवहृतः -ता -तं, चिरकालव्यवहारितः &c., चिरकालभोगाश्रयी -यिणी -यि (न्), चिरव्यवहारसिद्धः -द्धा -द्धं, आचारिकः -की -कं, व्यवहारिकः &c.

Presence, *s.* (As opposed to absence) प्रत्यक्षता, समक्षता, आभिमुख्यं, आभिमुख्यता -त्वं, सन्निधानं, सान्निध्यं, सन्निधिः *m.*, पारिमुख्यं, सम्मुखता -त्वं, विद्यमानता -त्वं, वर्त्तमानता, अन्तिकं -कता -त्वं, अपरोक्षता, उपस्थानं, उपस्थितिः *f.*; 'in my presence,' मत्सन्निधाने; 'in presence of,' प्रत्यक्षे -क्षतस्, समक्षं -क्षे, साक्षात्, अग्रे, सम्मुखं -खे, प्रतिमुखं, अभितस्; 'into the presence of,' सकाशं, समीपं, अन्तिकं, साक्षात्; 'they took him into the presence of the magistrate,' धर्म्माधिकारिसमीपं तम् आनीतवन्तः; 'into the presence of her husband,' भर्त्तुः सकाशं or समीपं; 'into my presence,' मत्सकाशं, ममान्तिकं.—(Mien, personal appearance) आकारः, आकृतिः *f.*, रूपं, शरीररूपं, शरीराकारः, शरीरसंस्थानं.—(Presence of mind) चित्ताभ्रान्तिः *f.*, अव्यग्रचित्तत्वं, अव्यग्रता, अभ्रान्तचित्तत्वं, स्वस्थचित्तत्वं, स्थिरचित्तता -त्वं, असम्भ्रमः, अव्यस्तता, अव्याकुलता, सावधानता, चित्तसत्त्वं, सत्त्वं, अस्तब्धता; 'having presence of mind,' अव्यग्रचित्तः -त्ता -त्तं, तत्कालधीः -धीः -धि. *See* Present.

Presence-chamber, *s.* दर्शनशाला, दर्शनगृहं, राजदर्शनशाला.

Present, *a.* (Not absent) प्रत्यक्षः -क्षा -क्षं, विद्यमानः -ना -नं, वर्त्तमानः -ना -नं, अभिमुखः -खा -खी -खं, पारिमुखिकः -की -कं, उपस्थायी -यिनी -यि (न्), उपस्थितः -ता -तं, सन्निहितः -ता -तं, अपरोक्षः -क्षा -क्षं, सम्मुखः -खा -खं, सम्मुखीनः -ना -नं, सन्निधिस्थः -स्था -स्थं, अभिमुखस्थः &c., अन्तिकः -का -कं, समीपः -पा -पं; 'to be present,' उपस्था, वृत्, समास्.—(Now in view or under consideration) प्रस्तुतः -ता -तं, विद्यमानः -ना -नं, उपस्थितः -ता -तं, प्रकृतः -ता -तं; 'present matter,' प्रस्तुतविषयः.—(Now existing, not past or future) वर्त्तमानः -ना -नं, तात्कालिकः -की -कं, तत्क्षणिकः -का -की -कं, सद्यस्कालीनः -ना -नं, सद्यस्कः -स्का -स्कं, वर्त्तमानकालीनः -ना -नं, अधुनातनः -नी -नं, इदानीन्तनः -नी -नं, आधुनिकः -की -कं, साम्प्रतिकः -की -कं, प्रस्तुतकालीनः -ना -नं, अद्यतनः -नी -नं, ऐहिकः -की -कं, ऐहकालिकः &c., अनतीतः -ता -तं; 'present time,' वर्त्तमानकालः, तत्कालः, तत्क्षणः -णं, सद्यस्कालः, तदात्वं, इहकालः, साम्प्रतकालः, इहसमयः, अस्ति indec. भवन्तिः *m.*; 'at the present time,' वर्त्तमानकाले, तत्काले, तत्क्षणे, सद्यस्काले, इहकाले, इहसमये, इदानीं अधुना, इह, अधुनातनकाले, सम्प्रति, साम्प्रतं, साम्प्रतकाले, एतर्हि, अद्य, प्रस्तुतकाले; 'for the present,' प्रस्तुतकालं, साम्प्रतकालं, इहकालं, साम्प्रतं.—(Present tense) वर्त्तमानं, विद्यमानं; 'the grammatical symbol is लट्.—(Having presence of mind) सावधानः -ना -नं, अभ्रान्तचित्तः -त्ता -त्तं, स्थिरचित्तः &c., अव्यग्रचित्तः &c., स्वस्थचित्तः &c., समाहितचित्तः &c., समाहितमनाः -नाः -नः (स्), सुसमाहितः -ता -तं, अव्याकुलचित्तः &c., तत्कालधीः -धीः -धि, अवहितः -ता -तं.

Present, *s.* (Gift) दानं, प्रदानं, सम्प्रदानं, दत्तं, उपदा, उपदानकं, उपायनं, दक्षिणा, उपहारः -रकं, उपग्राह्यं, उपढौकनं, प्रीतिदानं, प्रदेशनं, प्रादेशनं, पारितोषिकं, प्राभृतं, वितरणं &c. *See* Gift.—(The time being, the present) वर्त्तमानकालः, तत्कालः, तत्क्षणः, सद्यस्कालः, तदात्वं, साम्प्रतकालः, अधुनातनकालः, इदानीन्तनकालः, प्रस्तुतकालः, आपातः, भवन्तिः *m.*, अस्ति indec., प्रमुखं; 'present and future,' दृष्टादृष्टं.

To present, *v. a.* (Introduce to the presence of another) प्रविश् (c. 10. -वेशयति -यितुं), दर्शनं कृ in caus., दृश् in caus., पुरस्कृ, प्रवेशनं कृ, परसमीपं or परसकाशम् आनी.—(Present one's self or itself) आत्मानं दृश् in caus. (दर्शयति -यितुं), उपस्था (c. 1. -तिष्ठति -स्थातुं), प्रविश् (c. 6. -विशति -वेष्टुं), दर्शनं दा, प्रवेशं कृ, उपस्थितः -ता -तं भू, आविर्भू, प्रादुर्भू, दृश् in pass., लक्ष् in pass.—(Exhibit) दृश् in caus., प्रदृश्, प्रत्यक्षीकृ, प्रकटीकृ, प्रादुष्कृ, आविष्कृ, व्यक्तीकृ, सूच्, प्रकाश्, प्रसृ in caus.—(Offer, present for acceptance) आहृ, उपाहृ, अभ्याहृ, उपहृ, समुपहृ, उपहारीकृ, प्रदा, अभिदा, सम्प्रदा, उपदा, दा, प्रयम्, ग्रह in caus., प्रतिग्रह, प्रतिपद् in caus., उपपद्, ऋ in caus., सम्, निविद् in caus., निक्षिप्, उपढौक्, ढौक्, उपस्था in caus., उपनिधा, उपहरणं कृ.—(Present an oblation) उपहृ, उपहारीकृ, निविद्, निवेदनं कृ, निर्वप्, निर्वपणं कृ, उत्सृज्, उत्सर्गं कृ, बलिदानं कृ, उपायनं कृ.—(Give) दा, प्रदा, उपदा, उपायनं कृ.—(Lay before) उपन्यस्, निविद्, ऋ in caus., सम्.

Presentable, *a.* (That may be introduced) प्रवेशनीयः -या -यं.—(That may be exhibited) दर्शनीयः -या -यं.—(That may be offered) देयः -या -यं, प्रदेयः -या -यं, उपहार्य्यः -र्य्या -र्य्यं, निवेदनीयः -या -यं.—(Admissible into society) सभ्यः -भ्या -भ्यं, सभायोग्यः -ग्या -ग्यं, पांक्तेयः -या -यं, पांक्तः -क्ता -क्तं; 'not presentable,' असभ्यः &c., अपांक्तेयः &c., अपांक्तः &c., अपांक्त्यः &c.

Presentation, *s.* उपहरणं, प्रतिपादनं, प्रतिपत्तिः *f.*, अर्पणं, समर्पणं, निवेदनं, प्रदानं, अभिवादनं.—(Of an oblation) बलिदानं, निर्वपणं, निर्वापणं, निर्वापः, उत्सर्गकरणं.—(To a benefice) धर्म्माध्यापकवृत्तिप्रतिपादनं, धर्म्मवृत्तिनियोजनाधिकारः.—(Bad presentation of the child at birth) मूढगर्भः.

Presented, *p. p.* (Introduced to the presence of another) प्रवेशितः -ता -तं, पुरस्कृतः &c., परसमीपं or परसकाशं or परसाक्षाद् आनीतः -ता -तं.—(Exhibited) दर्शितः -ता -तं, प्रदर्शितः &c., प्रत्यक्षीकृतः &c., प्रसारितः &c.—(Presented for acceptance) उपहृतः

-ता -तं, समुपहृतः &c., प्रदत्तः -त्ता -त्तं, प्रत्तः &c., अर्पितः -ता -तं, समर्पितः &c., प्रतिपादितः &c., उपपादितः &c., उपनीतः &c., उपनिहितः &c., उपस्थापितः &c., ढौकितः &c., उपढौकितः &c.—(As an oblation, &c.) उपहृतः &c., उपहारीकृतः &c., निर्वापितः &c., निवेदितः &c., उत्सृष्टः -ष्टा -ष्टं, अर्पितः &c.—(Given) दत्तः -त्ता -त्तं, प्रदत्तः &c., नीत्तः &c., निहितः &c., निक्षिप्तः -प्ता -प्तं, विश्राणितः -ता -तं, वितीर्णः -र्णा -र्णं.—(Laid before) उपन्यस्तः -स्ता -स्तं, समर्पितः -ता -तं.

PRESENTIMENT, *s.* पूर्व्वबोधः, अग्रबोधः, पूर्व्ववासना, पूर्व्ववेदनं, अग्रवेदनं पूर्व्वभावना, पूर्व्वकल्पना.

PRESENTLY, *adv.* (At present) तत्काले, तत्क्षणे, अद्यस्काले. *See* under PRESENT, *a.*—(Soon, in a short time) अनन्तरं अचिरेण, अचिरात्, क्षणान्तरे, नचिरेण, नचिरात्, शीघ्रं, मङ्क्षु, आशु, झटिति, सपदि, द्राक्.—(Immediately) अनन्तरं.

PRESERVABLE, *a.* रक्षणीयः -या -यं, संरक्षणीयः &c., रक्ष्यः -क्ष्या -क्ष्यं, संरक्ष्यः &c., रक्षितव्यः -व्या -व्यं, गोपनीयः -या -यं, गोप्यः -प्या -प्यं, पालनीयः -या -यं, अवनीयः -या -यं.

PRESERVATION, *s.* रक्षणं, रक्षा, परिरक्षणं, अभिरक्षा -क्षणं, संरक्षा -क्षणं, संरक्षः, गुप्तिः *f.*, त्राणं, परित्राणं, पालनं, प्रतिपालनं, परिपालनं, गोपनं, संगोपनं, अवनं, तारणं, पोषणं, स्थितिः *f.*

PRESERVATIVE, *a.* रक्षकः -का -कं, संरक्षकः &c., रक्षी -क्षिणी -क्षि (न्), रक्षणकारी -रिणी -रि (न्), पालकः -का -कं, गोपकः -का -कं, गोपिलः -ला -लं, पौष्टिकः -की -कं, रक्षिता -त्री -तृ (तृ), तारकः -का -कं, रक्षणसाधकः -का -कं.

PRESERVATIVE, *s.* रक्षणं, रक्षणसाधनं, रक्षणोपायः, त्राणं in comp., त्राणसाधनं, त्रं in comp., गुप्तिसाधनं, पात्रं.

To PRESERVE, *v. a.* (Save from injury) रक्ष् (c. 1. रक्षति -क्षितुं), अभिरक्ष्, परिरक्ष्, संरक्ष्, प्रतिरक्ष्, त्रै (c. 1. त्रायते, त्रातुं), परित्रै, संत्रै, पाल् (c. 10. पालयति -यितुं), परिपाल्, अभिपाल्, प्रतिपाल्, अनुपाल्, सम्पाल्, उपपाल्, पा (c. 2. पाति -तुं), परिपा, गुप् (c. 1. गोपायति, गोप्तुं, c. 10. गोपयति -यितुं), अभिगुप्, अनुगुप्, प्रगुप्, तॄ in caus. (तारयति -यितुं), अव् (c. 1. अवति -वितुं), धृ (c. 10. धारयति -यितुं), पर्य्याप् in des. (परीप्सति -ते -प्सितुं), परिप्राप् in des., रक्षणं कृ, रक्षां कृ, पालनं कृ, गुप्तिं कृ, गोपनं कृ, अवनं कृ.—(Maintain) धृ, सन्धृ, भृ, सम्भृ, भरणं कृ, पुष् (c. 10. पोषयति -यितुं), पोषणं कृ.—(Conserve, pickle) सन्धा, उपस्कृ, मिष्टीकृ.

PRESERVE, *s.* (Fruit preserved in sugar) मिष्टफलं, सन्धितफलं, सन्धितं.—(Place for the shelter of game) वीतंसः, वितंसः, जङ्गलपक्ष्यादिरक्षणस्थानं.

PRESERVED, *p. p.* रक्षितः -ता -तं, संरक्षितः &c., अभिरक्षितः &c., त्राणः -णा -णं, त्रातः -ता -तं, गुप्तः -प्ता -प्तं, गोपितः -ता -तं, संगोपितः &c., पालितः -ता -तं, प्रतिपालितः &c., परिपालितः &c., गोपायितः -ता -तं, तारितः &c., अवितः -ता -तं, धारितः &c., भृतः &c., पोषितः -ता -तं.—(Pickled) सन्धितः -ता -तं, उपस्कृतः &c.

PRESERVER, *s.* रक्षकः, रक्षी *m.* (न्), त्राता *m.* (तृ), पालकः, पालः, पालयिता *m.* (तृ), रक्षिता *m.* (तृ), संरक्षकः, गोप्ता *m.* (प्तृ), गोपकः, संगोपकः, गोपः, गोपी *m.* (न्), गुप्तकः, गोपिलः, गोपायकः, तारकः, रक्षणकारी *m.*, रक्षणकर्त्ता *m.* (र्तृ), पालनकारी *m.*, पालनकृत् *m.*, पः in comp., गुप्तिकर्त्ता *m.* (र्तृ), स्थितिकर्त्ता *m.*

To PRESIDE, *v. a.* अधिष्ठा (c. 1. -तिष्ठति -ते -ष्ठातुं), समधिष्ठा, अध्यास् (c. 2. -आस्ते -आसितुं), अधीश् (c. 2. -ईष्टे -ईशितुं), अध्यक्षः -क्षा -क्षं भू or अस्, अधिकृतः -ता -तं भू, अधिकारी -रिणी -रि भू, अधिभू, प्रभू, अधिपतिर् भू or अस्.—(Exercise superintendence, watch over) अवेक्ष् (c. 1. -ईक्षते -क्षितुं), कार्य्यावेक्षणं कृ, कार्य्येक्षणं कृ, कार्य्यदर्शनं कृ, कार्य्याधीशो भू; 'the deity who presides over learning,' विद्याधिष्ठात्री देवता.

PRESIDED OVER, *p. p.* अधिष्ठितः -ता -तं, समधिष्ठितः &c., अध्यासितः &c., प्रभूतः &c.

PRESIDENCY, *s.* (Superintendence) अध्यक्षता -त्वं, अधिकारः, अधीकारः, अधिष्ठितिः *f.*, अधिष्ठानं, अध्यासं. *See* the word.—(Office of a president) अधिष्ठातृत्वं -ता, अध्यक्षता, अध्यक्षपदं, अधिकारित्वं, अधीशता, आधिपत्यं, प्रभुता, उपद्रष्टृत्वं.—(Country under the jurisdiction of a president) अध्यक्षाधीनः प्रदेशः or देशः or विषयः, मण्डलं.

PRESIDENT, *s.* अध्यक्षः, अधिष्ठाता *m.* (तृ), अध्यासीनः, अधिकारी *m.* (न्), अधिकृतः, अधीशः, अधिपतिः *m.*, अधिपः, पतिः *m.*, प्रभुः *m.*, अधीश्वरः, कर्म्माध्यक्षः, अग्री *m.* (न्), नायकः, प्रामाणिकः, उपद्रष्टा *m.*, मुख्यः, उदास्थितः; 'of an assembly,' सभापतिः *m.*, सभाध्यक्षः, सभानायकः, गोष्ठीपतिः *m.*

PRESIDENTSHIP, *s.* अध्यक्षता -त्वं, अधिष्ठातृत्वं, आधिपत्यं. *See* PRESIDENCY.

PRESIDING, *part.* or *a.* अध्यासीनः -ना -नं, अध्यक्षः -क्षा -क्षं, अधिष्ठाता -त्री -तृ (तृ); 'presiding deity,' अधिष्ठात्री देवता; 'the deity presiding over learning,' विद्याधिष्ठात्री देवता.

To PRESS, *v. a.* (Squeeze, compress) पीड् (c. 10. पीडयति -यितुं) सम्पीड्, निपीड्, अभिनिपीड्, आपीड्, संकुच्, संहृ, प्रतिसंहृ, घट्ट्, संघट्ट्, संवृ, संहन्.—(Urge, drive) प्रेर्, कृष्, आकृष्, समाकृष्, प्रणुद्.—(Urge, importune) अतिनिर्बन्धेन प्रार्थ् or अभ्यर्थ् or याच्, आग्रहेण प्रार्थ्, वारं वारं प्रार्थ्, पुनः पुनः प्रार्थ्, अतिप्रार्थनेन परम् उद्विज् or आयस् or आक्रम् or उपस्था.—(Inculcate urgently) अतिनिर्बन्धेन or मुहुर्मुहुर् उपदिश् or शिक्ष्.—(Force, constrain) बलेन or बलात्कारेण or बलात् कृ in caus. or प्रवृत् in caus., or expressed generally by the causal form.—(Distress, straiten) बाध् (c. 1. बाधते -धितुं), प्रबाध्, परिबाध्, अधिबाध्, पीड्, उपपीड्, अभिपीड्, क्लिश्, व्यथ्, तप्, सन्तप्, उद्विज् in caus., क्लेशं कृ or दा.—(Impress seamen) बलात्कारेण पुरुषान् धृत्वा नाविकादिकर्म्मणि व्याप् in caus.

To PRESS, *v. n.* (Go forward with force or effort) यत्नतस् or महायत्नेन or सोद्योगं or सोत्साहं प्रया or प्रगम् or अग्रे गम् or अग्रे सृ.—(Bear on, encroach upon) आक्रम्, अभिक्रम्, अध्याक्रम्, उपस्था (c. 1. -तिष्ठति -स्थातुं), समुपस्था, प्रत्युपस्था.—(Crowd, press upon) बाध् (c. 1. बाधते -धितुं), प्रबाध्.

PRESS, *s.* (Instrument for pressing) चक्रयन्त्रं, चक्रं, पीडनयन्त्रं, पेषणयन्त्रं; 'oil-press,' घरट्टः, तैलिकयन्त्रं, तैलिकचक्रं.—(For printing) मुद्राङ्कनयन्त्रं, मुद्राङ्कनचक्रं.—(Printed publications in general) मुद्रितपुस्तकगणः, मुद्राङ्कितपुस्तकसमूहः.—(Crowd, throng) जनसम्मर्दः, जनसङ्कुलं, लोकसंघः, लोकसम्मर्दः.—(Urgency, urgent pressure) बाधा -धः -धनं, निर्बन्धः, पीडा, भारः.

PRESSED, *p. p.* (Squeezed) पीडितः -ता -तं, निपीडितः &c., सम्पीडितः &c., घट्टितः &c., संघट्टितः &c.—(Urged) प्रेरितः -ता -तं.—(Importuned) अतिनिर्बन्धेन प्रार्थितः -ता -तं.—(Distressed, straitened) बाधितः -ता -तं, पीडितः &c., क्लेशितः &c.

PRESSER, *s.* पीडकः, पीडयिता *m.* (तृ), बाधकः, प्रबाधकः

PRESSING, *a.* अतिप्रार्थकः -का -कं, निर्बन्धेन प्रार्थकः &c., अतियाचकः &c., निर्बन्धशीलः -ला -लं, बाधकः &c.

PRESSINGLY, *adv.* निर्बन्धेन, सनिर्बन्धं, आग्रहेण, साग्रहं, सबाधं.

PRESSURE, *s.* पीडा, पीडनं, निपीडनं.—(Force) शक्तिः *f.*, बलं, वेगः, भारः, प्रभावः.—(Impulse) प्रेरणा, प्रवर्त्तनं, प्रणोदः, प्ररोचनं, प्रोत्साहः.—(Distress) बाधः -धा -धनं, क्लेशः, पीडा, आकुलता.

PRESTIGE, *s.* मायाशक्तिः *f.*, माया, मोहनशक्तिः *f.*, आकर्षणशक्तिः, इन्द्रजालं, इन्द्रजालं, वञ्चनशक्तिः *f.*, प्रतारणशक्तिः *f.*

PRESTIGIOUS, *a.* मायाकरः -रा -रं, मायावी -विनी -वि (न्), मायामयः -यी -यं, मायी &c., ऐन्द्रजालिकः -की -कं, मोही &c.

PRESTO, *adv.* द्रुतं, ओघः, शीघ्रं, क्षिप्रं, त्वरितं, सत्वरं, अविलम्बितं.

To PRESUME, *v. a.* अविचार्य्य or अविचारपूर्व्वं or अनिर्णयपूर्व्वं or अनिश्चित्य or अनिश्चयपूर्व्वम् अनुमा (c. 2. -माति -तुं, c. 3. -मिमीते) or तर्क् (c. 10. तर्कयति -यितुं) or अनुतर्क् or अवगम् or ऊह् or अनुमानं कृ.

To PRESUME, *v. n.* (Venture without leave, be bold or arrogant) धृष् (c. 5. धृष्णोति, धर्षितुं), प्रधृष्, धृष्टत्वात् or प्रगल्भत्वात् किञ्चित् अननुज्ञातः कृ, धृष्टत्वात् or प्रगल्भशीलत्वाद् अननुज्ञापूर्व्वं or अनधिकारपूर्व्वं किञ्चित् कृ, धर्षेण आक्रम् (c. 1. -क्रामति -क्रमितुं) or अतिक्रम्, मर्य्यादातिक्रमं कृ, प्रगल्भवद् आचर् (c. 1. -चरति -रितुं), धृष्टवत् or धार्ष्ट्यपूर्व्वं किञ्चित् कृ, प्रगल्भ् (c. 1. -गल्भते -ल्भितुं), दृप् (c. 4. दृप्यति -ते).

PRESUMPTION, *s.* (Supposition without direct proof) अनुमानं, अनुमितिः *f.*, अनुमा, अनुमेयत्वं, अनिर्णयपूर्व्वम् or अनिश्चयपूर्व्वम् or असिद्धान्तपूर्व्वम् अनुमानं, अनिर्णयपूर्व्वा कल्पना, तर्कः, अनुमानग्रहणं.—(Strong probability) सम्भावना, सम्भावनीयता -त्वं, सम्भवः, सत्यसङ्काशता -त्वं.—(Arrogance) धृष्टता, धार्ष्ट्यं, धर्षः, प्रगल्भता, प्रागल्भ्यं, दर्पः, अभिमानं, अत्यभिमानं, निर्लज्जत्वं, अहङ्कारः, अवलेपः, स्मयः, प्रगल्भत्वाद् मर्य्यादातिक्रमः or अत्याचारः -रित्वं.

PRESUMPTIVE, *a.* आनुमानिकः -की -कं, अनुमानसिद्धः -द्धा -द्धं, सम्भावितः -ता -तं, सम्भाव्यः -व्या -व्यं, सम्भावनीयः -या -यं, अनुमानावलम्बी -म्बिनी -म्बि (न्); 'presumptive proof or evidence,' अनुमानं, आनुमानिकप्रमाणं, अनुमाननिर्णयः, अर्थापत्तिः *f.*; 'heir-presumptive,' सम्भावितस्थानाधिकारी *m.* (न्), अप्रतिबन्धस्थानाधिकारी *m.*, सलोपस्थानाधिकारी *m.*, उत्तराधिकारी *m.*

PRESUMPTUOUS, *a.* (Arrogant) धृष्टः -ष्टा -ष्टं, धृष्णुः -ष्णुः -ष्णु, प्रगल्भः -ल्भा -ल्भं, प्रधृष्टः &c., प्रधर्षितः -ता -तं, दृप्तः -प्ता -प्तं, अवलिप्तः -प्ता -प्तं, अभिमानी -निनी -नि (न्), अत्यभिमानी &c., साहसिकः -की -कं, धृष्णक् *m. f. n.* (ज्), निर्लज्जः -ज्जा -ज्जं.—(Founded on presumption) अभिमानमूलः -ला -लं.

PRESUMPTUOUSLY, *adv.* सधर्षं, सधार्ष्ट्यं, धृष्टं, प्रधर्षितं, धृष्टवत्, सप्रागल्भ्यं, प्रागल्भ्येन, प्रगल्भं, प्रगल्भवत्, साभिमानं, अभिमानपुरःसरं.

PRESUMPTUOUSNESS, *s.* धार्ष्ट्यं, धृष्णुत्वं, धृष्टता, प्रगल्भता, प्रागल्भ्यं, प्रधृष्टता, दृप्तता, अवलिप्तता, अभिमानं, अत्यभिमानं, अभिमानिता, साहसिकत्वं.

To PRESUPPOSE, *v. a.* पूर्व्वं or अग्रे कृप् or भू in caus., or सूच् (c. 10. सूचयति -यितुं), पूर्व्वसूचनं कृ, पूर्व्वकल्पनां कृ, पूर्व्वग्रहणं कृ, पूर्व्वभावनां कृ.

PRESUPPOSED, *p. p.* पूर्व्वकल्पितः -ता -तं, पूर्व्वभावितः &c., पूर्व्वगृहीतः &c.

PRESUPPOSITION, *s.* पूर्व्वकल्पना, पूर्व्वभावना, पूर्व्वग्रहणं, पूर्व्वमतं.

PRETENCE, *s.* (Pretext, feint) छद्म *n.* (न्), अपदेशः, व्यपदेशः, छलं, व्याजः, उपधा, कूटः -टं, कपटः, कैतवं, ध्वजीकरणं, मिषं.—(False plea) मिथ्याहेतुः *m.*, मिथ्यानिमित्तं, हेतुः *m.*, निमित्तं; 'under pretence of studying the Shastras,' शास्त्राध्ययनहेतुना.—(Claim) अधिकारः, अभिमानं, अभियोगः; 'false claim' मिथ्याभिमानं, मिथ्याभियोगः.

To PRETEND, *v. a.* or *n.* (Sham, feign) छद्म कृ, कूटं कृ, व्याजं कृ, छलं कृ, कपटं कृ, ध्वजीकृ, छल् (c. 10. छलयति -यितुं), वेशं धृ (c. 10. धारयति -यितुं) or भृ, छद्मवेशं धृ. Often expressed by the root दृश् in caus., or by मिथ्या in comp.; as, 'he pretends to be asleep,' आत्मानं प्रसुप्तम् इव or प्रसुप्तवद् दर्शयति, मिथ्यासुप्तो or मिथ्याप्रसुप्तो भवति; 'he pretends to be dead,' आत्मानं मृतवत् सन्दर्शयति; 'to pretend to be just,' साधुवेशं धृ, आर्य्यवेशं धृ, धर्म्मध्वजी -जिनी -जि भू, आर्य्यरूपः -पा -पं भू.—(Allege a false plea) मिथ्याहेतुं वद्, मिथ्यानिमित्तं वद्, मिथ्या वद्.—(Lay claim, pretend to) अभिमन् (c. 4. -मन्यते -मन्तुं), मिथ्या अभिमन्, मिथ्याभिमानं कृ, मिथ्या ग्रह्, अनधिकारपूर्व्वं ग्रह्, अभिप्रेतः -ता -तं भू; 'to pretend to learning,' विद्याभिमानं कृ, विद्याभिप्रेतः -ता -तं भू, विद्याभिमानी -निनी -नि भू. *See* PRETENDER, *s.*

PRETENDED, *p. p.* छाद्मिकः -की -कं, कौटिकः -की -कं, कौटः -टी -टं, सव्याजः -जा -जं, सछलः -ला -लं, ध्वजीकृतः -ता -तं, ध्वजी &c. in comp., छद्म or कपट or कूट or मिथ्या in comp.; as, 'a pretended ascetic,' तापसध्वजी *m.* (न्), छद्मतापसः, कूटतापसः; 'pretended services,' मिथ्योपचारः; 'pretended reason,' मिथ्याहेतुः *m.*, मिथ्यानिमित्तं.

PRETENDEDLY, *adv.* मिथ्या, सकपटं, सव्याजं, सकूटं, छलेन, छद्म or कपट in comp.; as, 'pretendedly asleep,' मिथ्याप्रसुप्तः -प्ता -प्तं; 'pretendedly religious,' कपटधर्म्मी &c.

PRETENDER, *s.* छाद्मिकः, सव्याजः, वेशधारी *m.* (न्), अभिमानी *m.* (न्), अभियोक्ता *m.* (क्), अभियोगी *m.* (न्), ध्वजी *m.*, मन्य or मिथ्या in comp.; as, 'a pretender to learning,' विद्याभिमानी *m.*, विद्याभिप्रेतः, मिथ्यापण्डितः, पण्डितम्मन्यः, विद्याध्वजी *m.* (न्); 'pretender to virtue or religion,' कपटधर्म्मी *m.*, धर्म्मध्वजी *m.*, सव्याजधर्म्मी *m.*, धर्म्माभिमानी *m.*, साधुम्मन्यः आर्य्यवेशधारी *m.*, धार्म्मिकवेशधारी *m.*; 'to the sovereignty,' राज्याभियोगी *m.* (न्), राज्यस्वत्ववादी *m.*, राज्यलिप्सुः *m.*

PRETENSION, *s.* अभिमानं, अधिकारः, स्वत्ववादः, स्वाधिकारवादः, स्वामित्ववादः, स्वार्थवादः, अभियोगः; 'pretension to learning,' विद्याभिमानं; 'false pretension,' मिथ्याभिमानं, मिथ्याभियोगः.—(Desire of obtaining honor, power, fame, &c.) यशोलिप्सा, यशोलोभः, प्रभावाकांक्षा, प्रभावलिप्सा, प्रभुत्वलिप्सा, महत्त्वलिप्सा, महत्त्वाकांक्षा, प्रतिष्ठालिप्सा, जिगीषा; 'pretension to the sovereignty,' राज्यलिप्सा, राज्यस्वत्ववादः, राज्याभियोगः.

PRETER-IMPERFECT, *a.* (In grammar) अपूर्णभूतः -ता -तं.

PRETERIT, *a.* (In grammar) भूतः -ता -तं, परोक्षः -क्षा -क्षं; 'tense,' भूतं, परोक्षं, परोक्षभूतं.

PRETERITION, *s.* अतिक्रमः -मणं, अत्ययः, व्यतिक्रमः, अतिचारः, अतिचरणं.

PRETERMISSION, *s.* त्यागः, परित्यागः, अपासनं, उपात्ययः, लंघनं.

To PRETERMIT, *v. a.* (Omit) परित्यज्, त्यज्, अपास्, अतिक्रम्, व्युत्क्रम्.

PRETERMITTED, *p. p.* परित्यक्तः -क्ता -क्तं, अपासितः -ता -तं, अन्तरितः &c.

PRETERNATURAL, *a.* प्रकृतिक्रमबाह्यः -ह्या -ह्यं, प्रकृतिक्रमबहिर्भूतः -ता -तं, निसर्गक्रमबाह्यः &c., प्रकृतिनियमबाह्यः &c., निसर्गनियमबाह्यः &c., प्रकृतिक्रमातीतः -ता -तं, प्रकृतिमार्गातीतः &c., प्रकृतिमार्गबाह्यः &c., अतिप्रकृतिः -तिः -ति, अप्रकृतः -ता -तं, विलक्षणः -णा -णं, अद्भुतः -ता -तं, आश्चर्य्यः -र्य्या -र्य्यं.

PRETERNATURALLY, *adv.* प्रकृतिमार्गबहिस्, प्रकृतिक्रमबहिस्, अद्भुतं, वैलक्ष्ण्येन.

PRETERPERFECT, *a.* (In grammar) पूर्णभूतः -ता -तं, परोक्षभूतः &c.

PRETERPLUPERFECT, *a.* (In grammar) प्राक्पूर्णभूतः -ता -तं.

PRETEXT, *s.* छद्म *n.* (न्), अपदेशः, व्यपदेशः, उपधा, व्याजः, छलं, उपदेशः, निमित्तं, ध्वजीकरणं, मिथ्याहेतुः *m.*, मिथ्यानिमित्तं, संवरणं.

PRETTILY, *adv.* चारु, सुन्दरं, सौन्दर्य्येण, मञ्जु, चारु or मञ्जु in comp.; 'singing prettily,' मञ्जुस्वनः -ना -नं; 'smiling prettily,' चारुहासी -सिनी -सि (न्).

PRETTINESS, *s.* चारुता -त्वं, सौन्दर्य्यं, सुरूपता, चारुरूपता, सुदृश्यता, दर्शनीयता, वामता -त्वं, विनीतता -त्वं, मञ्जुता -त्वं, रूपलावण्यं.

PRETTY, *a.* चारुः -र्व्वी -रु, चारुदर्शनः -ना -नं, सुन्दरः -रा -री -रं, चारुमान् -मती -मत् (त्), सुदृश्यः -श्या -श्यं, सुरूपः -पी -पं, रूपवान् -वती -वत् (त्), चारुरूपः &c., सुरूपी -पिणी -पि (न्), सुरेखः -खा -खं, दर्शनीयः -या -यं, विनीतः -ता -तं, आकारशुद्धः -द्धा -द्धं, वामः -मा -मं, मञ्जुः -ञ्जुः -ञ्जु, मञ्जुलः -ला -लं; 'having a pretty face,' चारुवदनः -ना -नी -नं, सुमुखः -खा -खी -खं; 'having pretty eyes,' चारुलोचनः -ना -नी -नं, सुनयनः -ना -नी -नं; 'having pretty teeth,' सुदन्तः -न्ता -न्तं, चारुदन्तः &c.

PRETTY, *adv.* (Moderately, in some degree) ईषत्, कियत्, अल्पं, अल्पमात्रं, स्तोकं, अभृशं, परिमितं, आ prefixed, कल्प or देश्य or देशीय affixed; 'pretty warm,' ईषदुष्णः -ष्णा -ष्णं, मन्दोष्णः &c., 'pretty ripe,' आपक्वः -क्वा -क्वं; 'pretty clever,' पटुकल्पः -ल्पा -ल्पं, पटुदेश्यः -श्या -श्यं, पटुदेशीयः -या -यं.—(Pretty nearly) प्रायस्, प्रायशस्, भूयिष्ठं, ईषदूनं, अल्पोनं; 'prett nearly finished,' समाप्तभूयिष्ठः -ष्ठा -ष्ठं; 'pretty nearly dead,' मृतप्रायः -या -यं.

To PREVAIL, *v. n.* (Overcome) प्रभू, अभिभू, पराभू, जि, पराजि, विजि, निर्जि, अतिक्रम्, अधिक्रम्, अतिशी.—(Be predominant, efficacious) अतिरिच् in pass. (-रिच्यते), व्यतिरिच्, उद्रिच्, प्रभू, प्रबलीभू, प्रबलः -ला -लं भू, प्रोष् (c. 1. प्रोषति -षितुं), सबलः -ला -लं भू, क्षमः -मा -मं भू, अलन्तमः -मा -मं भू.—(Be in force) प्रभू, प्रचलीभू, प्रचलः -ला -लं भू, प्रचरितः -ता -तं भू, प्रचलीभू, सिद्धः -द्धा -द्धं भू, प्रसिद्धः -द्धा -द्धं भू, सिद्धीभू, प्रसिद्धीभू, निष्पन्नः -न्ना -न्नं भू.—(Succeed) सिध् (c. 4. सिध्यति -ते), सिद्धीभू.—(Persuade, induce) अनुनी, आकृष्, प्रोत्सह्, उत्सह्, प्रवृत् in caus., नियुज् in caus., प्रयुज् or expressed by the causal form. *See To* PERSUADE, &c.

PREVAILING, *part.* or *a.* (Predominant) प्रबलः -ला -लं, प्रभूतः -ता -तं, प्रसिद्धः -द्धा -द्धं, अतिरिक्तः -क्ता -क्तं, अतिरेकी -किणी &c., अधिकः -का -कं, प्रधानः -ना -नं भू, प्रबलः -ला -लं.—(Efficacious) प्रभावी &c., सप्रभावः -वा -वं, प्रभविष्णुः -ष्णुः -ष्णु, साधकः -का -धिका -कं, सफलः -ला -लं.—(General) साधारणः -णा -णी -णं, प्रसिद्धः -द्धा -द्धं, सर्व्वत्र प्रचलः -ला -लं or प्रचलितः -ता -तं. *See* PREVALENT.

PREVALENCE, PREVALENCY, *s.* प्रचारः, प्रबलत्वं प्रसिद्धिः *f.*, प्रसिद्धता, प्रभावः, प्राबल्यं, प्रचरणं, प्रचलनं, प्रचलितत्वं, सर्व्वत्र व्याप्तिः *f.* or अभिव्याप्तिः *f.* or विस्तारः, व्यापकता -त्वं, प्रभूतता -त्वं, प्रबलता, प्रभविष्णुता, प्रवृत्तिः *f.*, प्रधानता, प्राधान्यं, प्राभवं, अतिरेकः, अतिरिक्तता, आधिक्यं, साधारणता, साधारण्यं, सर्व्वसाधारणव्यवहारः.

PREVALENT, *a.* प्रचलः -ला -लं, प्रचलितः -ता -तं, प्रचरितः -ता -तं, प्रसिद्धः -द्धा -द्धं, प्रभूतः -ता -तं, प्रबलः -ला -लं, प्रभविष्णुः -ष्णुः -ष्णु, प्रवृत्तः -त्ता -त्तं, व्यापकः -का -कं, साधारणः -णा -णी -णं; 'universally prevalent,' सर्व्वत्र प्रचलः &c. or प्रसिद्धः &c.

PREVALENTLY, *adv.* प्रसिद्धं, प्रबलं, प्राबल्येन, अतिरिक्तं, सप्रभावं.

To PREVARICATE, *v. n.* सर्व्ववैकल्यं कृ, वक्रोक्त्या सत्यवैकल्यं कृ or यथार्थवैकल्यं कृ, वक्रोक्तिं कृ, वक्रं वद् (c. 1. वदति -दितुं), वाक्छलं कृ, निह्नु (c. 2. -ह्नुते -ह्नोतुं), अपदिश् (c. 6. -दिशति -देष्टुं), व्यपदिश्, अपदेशं कृ, व्यपदेशं कृ, निह्नवेन वद्, अपदेशेन वद्, निह्नवोत्तरं कृ, हीनवादं कृ, अन्यवादं कृ, अपलापं कृ.

PREVARICATING, *a.* हीनवादी -दिनी -दि (न्), अन्यवादी &c., निह्नववादी &c., वक्रवादी &c., वक्रोक्तिवादी &c., व्यपदेशवादी &c.

PREVARICATION, *s.* वक्रोक्तिः *f.*, हीनवादः, वाक्छलं, सर्व्ववैकल्यं, यथार्थवैकल्यं, सत्यवैकल्यं, अन्यवादः, अन्यवचनं, हीनवचनं, निह्नुतिः *f.*, निह्नवोत्तरं, अपलापः, अपदेशः, व्यपदेशः, व्यपदेशवादः, छद्मवादः, उत्तराभासः.

PREVARICATOR, *s.* हीनवादी &c., निह्नववादी &c., अन्यवादी. *See* PREVARICATING.

PREVENIENT, *a.* अग्रगः -गा -गं, अग्रवर्त्ती -र्त्तिनी -र्त्ति (न्), अग्रगामी &c., पूर्व्वसरः -रा -रं, अग्रसरः &c. *See* PRECEDENT, *a.*

To PREVENT, *v. a.* (Hinder) निवृ (c. 10. -वारयति -यितुं), विनिवृ, प्रतिवृ, आवृ, वृ, रुध्, प्रतिरुध्, निरुध्, संरुध्, अवरुध्, उपरुध्, प्रतिषिध्, निषिध्, बाध्, प्रतिबन्ध्, विहन्, व्याहन्, प्रतिहन्, स्तम्भ्, विष्टम्भ्, निवृत् (c. 10. -वर्त्तयति -यितुं), प्रत्याख्या (c. 2. -ख्याति -तुं), विघ्न, रोधं कृ, अवरोधं कृ, प्रतिबन्धं कृ, प्रतिकृ.—(Go before) अग्रे गम् or सृ, अग्रे या or वृत्. *See To* PRECEDE.

PREVENTABLE, *a.* निवारणीयः -या -यं, निवार्य्यः -र्य्या -र्य्यं, वारणीयः &c.

PREVENTED, *p. p.* निवारितः -ता -तं, वारितः &c., रुद्धः -द्धा -द्धं, निरुद्धः &c., विरुद्धः &c., अवरुद्धः &c., उपरुद्धः &c., प्रतिषिद्धः -द्धा -द्धं, निषिद्धः &c., बाधितः -ता -तं, प्रतिबद्धः -द्धा -द्धं, विहतः -ता -तं, व्याहतः &c., प्रतिहतः &c., विघ्नितः &c., स्तम्भितः &c., निवर्त्तितः &c., आप्रतिनिवृत्तः -त्ता -त्तं; 'prevented from seeing by the smoke,' धूमोपरुद्धदृष्टिः -ष्टिः -ष्टि.

PREVENTION, *s.* निवारणं, वारणं, निवारः, रोधः -धनं, अवरोधनं, निरोधः, प्रतिरोधः, उपरोधः, संरोधः, प्रतिबन्धः -न्धनं, प्रतिषेधः -धनं, निषेधः, विघातः, व्याघातः, प्रतीकारः. *See* HINDERANCE.—(Going before) अग्रगमनं, पुरोगमनं.

PREVENTIVE, *a.* वारकः -का -कं, निवारकः &c., बाधकः &c., प्रतिषेधकः &c., प्रतिबाधकः &c., रोधकः &c., प्रतिरोधकः &c., व्याघातकः &c.

PREVENTIVE, *s.* वारणं, निवारणं, बाधकः, प्रतिबन्धकं, निवारकं.

PREVIOUS, *a.* पूर्व्वः -र्व्वा -र्व्वी -र्व्वं, पौर्व्विकः -की -कं, पूर्व्वकः &c., पूर्व्वगतः -ता -तं, पूर्व्वभूतः -ता -तं, पूर्व्ववृत्तः -त्ता -त्तं, पूर्व्वसिद्धः -द्धा -द्धं, पूर्व्वजातः &c., भूतपूर्व्वः -र्व्वा -र्व्वं, पूर्व्वतनः -नी -नं, वृत्तपूर्व्वः &c., जातपूर्व्वः &c., प्रागागतः -ता -तं, प्राग्भूतः &c., प्राग्भवः -वा -वं, अग्रः -ग्रा -ग्रं, अग्रभूतः -ता -तं, प्रथमः -मा -मं, प्राक् in comp.; 'previous possession,' पूर्व्वभुक्तिः *f.*; 'previous existence,' प्राग्भावः.

PREVIOUSLY, *adv.* पूर्व्वं, पूर्व्वकं, पूर्व्वतस्, अग्रे, अग्रतस्, पुरस्, पुरस्तात्, प्राक्, प्रथमतस्; 'done previously,' पूर्व्वकृतः -ता -तं.

PREVIOUSNESS, *s.* पूर्व्वत्वं -ता, अग्रत्वं -ता, प्रथमता -त्वं, प्राथम्यं, आदित्वं.

PREVISION, *s.* पूर्व्वदृष्टिः *f.*, अग्रदृष्टिः *f.*, प्रदर्शनं, अग्रनिरूपणं.

PREY, *s.* (That which is seized to be devoured) आमिषं, मांसं, भक्ष्यं, भक्षणीयं, खाद्यं, भोज्यं.—(Booty) लोप्त्रं, लोत्रं, लोतं, लुप्तं, लुण्टा. *See* PLUNDER.—(Beast of prey) हिंस्रपशुः *m.*, पशुभक्षकः, पशुपजीवी *m.* (न्), आमिषाशी *m.*, आमिषभुक् *m.* (ज्), आमिषप्रियः, मांसाशी *m.*, मांसखादकपशुः *m.*, दंष्ट्रेरः, प्रसहः -हनः.—(Bird of prey) पतुदः, विष्किरः, नखविष्किरः, बलिभुक् *m.* (ज्), बलिप्रियः.

To PREY, *v. a.* (Seize and devour) आमिषं धृत्वा or हत्वा भक्ष् or खाद् or ग्रस्.—(Corrode) क्रमशः क्षि in caus. or नश् in caus. —(Prey upon) लुण्ट् or लुण्ठ्. *See To* PLUNDER.

PRIAPISM, *s.* ध्वजोच्छ्रायः, ध्वजोच्छ्रयः, शिश्नोच्छ्रयः, लिङ्गोच्छ्रायः.

PRICE, *s.* (Value set or paid) मूल्यं, अर्घः, अवक्रयः, पणः, भाटकः, पण्यं, पणता; 'high price,' बहुमूल्यं, महामूल्यं, दुर्मूल्यं, महार्घः, महार्घ्यं; 'low price,' अल्पमूल्यं, सुमूल्यं; 'what is the price?' कियता मूल्येन विक्रीयते; 'I will not give such a price,' एतावन् मूल्यं न दित्सामि.—(Reward, recompense) फलं, वेतनं.

PRICED, *a.* (High-priced) महामूल्यः -ल्या -ल्यं, दुर्मूल्यः &c., बहुमूल्यः &c., महार्घः -र्घा -र्घं, महार्घ्यः -र्घ्या -र्घ्यं.—(Low-priced) अल्पमूल्यः &c., अल्पार्घः -र्घा -र्घं, सुमूल्यः &c.

PRICELESS, *a.* अनर्घ्यः -र्घ्या -र्घ्यं, अनर्घः -र्घा -र्घं, अमूल्यः -ल्या -ल्यं.

To PRICK, *v. a.* (Puncture) व्यध् (c. 4. विध्यति, व्यद्धुं), तुद् (c. 6. तुदति, तोत्तुं), वितुद्, छिद् (c. 10. छिद्रयति -यितुं), भिद् (c. 7. भिनत्ति, भेत्तुं), निर्भिद्; 'with a thorn or sharp-pointed substance,' कण्टकेन or शल्येन व्यध् or वितुद्; 'with a needle,' सूच्या व्यध् or भिद्.—(Pain by puncture, sting) व्यथ् (c. 10. व्यथयति -यितुं), पीड्, तप्, सन्तप्, मर्म्म व्यध्.—(Goad) प्रतोदेन तुद् or वितुद्.—(Incite) प्रेर्, प्रचुद्, प्रणुद्, उत्तिज्, प्रोत्सह्.—(Erect the ears) कर्णौ स्तब्धीकृ or उन्नम् or उच्छ्रि or उच्चैः or उच्चीकृ; 'an animal that pricks its ears,' स्तब्धकर्णः -र्णी -र्णं, स्तब्धश्रोत्रः -त्रा -त्रं.—(Designate by a puncture) सूच्या अङ्क् or चिह्न्.

PRICK, *s.* (Puncture) वेधः -धनं, तोदः, सूचिः -ची *f.*, सूचनं -ना, व्यधः -धनं, उत्खण्डितं.—(Instrument for pricking) तोदनं, प्रतोदः, तोत्रं, सूचिः -ची -चिनी -चिका, शल्यं, कण्टकः.—(Sharp pain) तोद-शूलः -लं, व्यथा, यातना, तीक्ष्णव्यथा.

PRICKED, *p. p.* विद्धः -द्धा -द्धं, वेधितः -ता -तं, तोदितः -ता -तं, तुन्नः -न्ना -न्नं, छिद्रितः -ता -तं, भिन्नः -न्ना -न्नं, सशल्यः -ल्या -ल्यं, शल्यविद्धः &c., कण्टकविद्धः &c., सूचिभिन्नः &c.; 'at heart,' विद्धमर्म्मा -र्म्मा -र्म्म (न्), भिन्नमर्म्मा &c., विद्धहृदयः -या -यं.—(Pained) व्यथितः -ता -तं, अनुभूततीक्ष्णव्यथः -था -थं.

PRICKER, *s.* (Instrument for pricking) तोदनं, तोत्रं, प्रतोदः, सूचिः -ची *f.*, सूचिका, शल्यं.—(One who pricks) वेधकः.

PRICKING, *s.* (Act of piercing with a sharp point) वेधः -धनं, व्यधः -धनं, शल्यवेधनं, कण्टकवेधनं, तोदः -दनं, प्रतोदः -दनं, सूचिः -ची *f.*, सूचनं -ना.—(Sensation of sharp pain) तोदः, शूलः -लं, तीक्ष्णव्यथा.

PRICKLE, *s.* कण्टकः -कं, शूकः -कं, सूचिः -ची *f.*, त्वक्कण्टकः.

PRICKLINESS, *s.* कण्टकितत्वं, सकण्टकत्वं, सशूकत्वं, बहुकण्टकत्वं.

PRICKLY, *a.* कण्टकितः -ता -तं, कण्टकी -किनी -कि (न्), सकण्टकः -का -कं, बहुकण्टकः -का -कं, प्रचुरकण्टकः &c., शूकी &c., शूकवान् -वती -वत् (त्), सशूकः -का -कं, बहुशूकः &c.

PRICKLY-PEAR, *s.* विदरं, विष्णुमारकं.

PRIDE, *s.* गर्व्वः, दर्पः, अहङ्कारः, अहङ्कृतिः *f.*, अभिमानं -नता, अभिमानिता, मानं, मानिता, उद्धतिः *f.*, औद्धत्यं, चित्तसमुन्नतिः *f.*, चित्तोन्नतिः *f.*, मदः, मादः, दृप्तता, अवलेपः, अवहेला -लनं, अहम्मानं, अहम्मतिः *f.*, ममता, दम्भः, मन्युः *m.*, आत्माभिमानं, उन्मादः, साटोपः, साटोपत्वं, प्रतिभानं, प्रौढता, धर्षः, प्रगल्भता, उन्मायः, शौटीर्य्यं, शौण्डीरता, आवेशः, उत्सेकः, उत्सिक्तता; 'pride of caste,' जात्यभिमानं; 'of riches धनदर्पः; 'of strength,' बलदर्पः, बलावलेपः.—(Generous or proper pride) अभिमानं, गुणाभिमानं, स्वगुणाभिमानं.

To PRIDE, *v. a.* (One's self) आत्मानं श्लाघ् (c. 1. श्लाघते -घितुं), कत्थ् (c. 1. कत्थते -त्थितुं), विकत्थ्, both with instr. c. of the thing on which one prides one's self; आत्मानं मन् (c. 4. मन्यते, मन्तुं), अभिमन् with two acc., अभिमानं कृ; 'he prides himself on his learning,' आत्मानं विद्यया श्लाघते, आत्मानं पण्डितं मन्यते, विद्याभिमानं करोति; 'one who prides himself on his learning,' पण्डितम्मन्यः; 'she prides herself on her beauty,' आत्मानं सौन्दर्य्येण श्लाघते, आत्मानं सुन्दरीं मन्यते; 'one who does so,' सुन्दरीम्मन्या, रूपगर्विता.

PRIER, *s.* परकार्य्यनिरूपकः, परचेष्टानिरूपकः, परकार्य्यचर्चकः.

PRIEST *s.* (Member of the Brahminical caste) ब्राह्मणः, विप्रः, द्विजः, द्विजातिः *m.*, द्विजन्मा *m.* (न्), देवलः, भूदेवः; 'who is learned in the Vedas,' श्रोत्रियः, वेदविद् *m.*, वेदविद्वान् *m.* (स्) मन्त्रविद् *m.*, मन्त्रज्ञः.—(Sacrificing or officiating priest) याजकः, याज्ञिकः, याजी *m.* (न्), यज्ञकृत् *m.*, होता *m.* (तृ), हविर्याजी *m.*, प्रवर्ग्यः.—(Family or domestic priest) पुरोहितः, पुरोधाः *m.* (स्), ऋत्विक् *m.* (ज्), कुलविप्रः, कुलाचार्य्यः.—(Spiritual preceptor, officiator in sacred offices) आचार्य्यः, उपाध्यायः, गुरुः *m.*, पुरोहितः, धर्म्माध्यापकः, धर्म्मशिक्षकः, धर्म्मोपदेशकः. *See* CLERGYMAN.

PRIESTCRAFT, *s.* पुरोहितछलं, उपाध्यायछलं, उपाध्यायकैतवं, उपाध्यायकपटः -टं, आचार्य्यकापट्यं, धर्म्माध्यापककैतवं.

PRIESTESS, *s.* याज्ञिकी, याजिका, होत्री, उपाध्याया, धर्म्मोपदेशिनी.

PRIESTHOOD, *s.* (Office or character of a priest) पौरोहित्यं, पुरोहितत्वं, आर्त्विज्यं, उपाध्यायपदं, धर्म्माध्यापकपदं, ब्राह्मण्यं, ब्राह्मणता -त्वं.—(The order of priests) पुरोहितवर्गः, पुरोहितगणः, उपाध्यायवर्गः, याज्ञिकवर्गः, धर्म्माध्यापकवर्गः, धर्म्माध्यापकगणः, याजकसमूहः, उपाध्यायसमूहः, पौरोहित्यं.

PRIESTLY, *a.* पौरोहितः -ती -तं पौरोहितिकः -की -कं, पुरोहितयोग्यः -ग्या -ग्यं, पुरोहितसम्बन्धी &c., याजकीयः -या -यं, याज्ञिकसम्बन्धी &c., उपाध्यायसम्बन्धी &c., पौरोहित्यसम्बन्धी &c., धर्म्माध्यापकसम्बन्धी &c.

PRIEST-RIDDEN, *a.* पुरोहिताधीनः -ना -नं, उपाध्यायाधीनः &c., पुरोहितवशः &c.

PRIG, *s.* दाम्भिकः, दम्भी *m.* (न्), रूपगर्वितः, दर्शनीयमानी *m.* (न्).

PRIGGISH, *a.* दाम्भिकः -की -कं, आत्माभिमानी -निनी -नि (न्).

PRIM, *s.* अतिविनीतः -ता -तं, एकान्तविनीतः &c., अतिसूक्ष्मः -क्ष्मा -क्ष्मं, सूक्ष्मनियमनिष्ठः -ष्ठा -ष्ठं, सूक्ष्मादरशीलः -ला -लं, अत्यादरशीलः &c., अत्याचारी &c.

PRIMACY, *s.* प्रधानधर्म्माध्यक्षपदं, मुख्यधर्म्माध्यक्षपदवी.

PRIMARILY, *adv.* प्रथमतस्, प्रायेण, पूर्व्वं, पूर्व्वतस्, मुख्यशस्, मुख्यतस्, आदितस्, प्रधानतस्, प्राधान्येन.

PRIMARINESS, *s.* प्रथमता, प्राथम्यं, मुख्यता, प्रधानता, प्राधान्यं.

PRIMARY, *a.* (First) प्रथमः -मा -मं, प्राथमिकः -की -कं, आद्यः -द्या -द्यं, आदिमः -मा -मं, आदि in comp., पूर्व्वः -र्व्वा -र्व्वं, पौर्व्विकः -की -कं.—(Original) मौलः -ली -लं, मौलिकः -की -कं, मूलिकः -का -कं, आद्यः -द्या -द्यं; 'primary cause,' निदानं, आदिकारणं, आदिबीजं, आद्यबीजं. *See* PRIMITIVE.—(First in dignity, chief) प्रधानः -ना -नं, मुख्यः -ख्या -ख्यं, प्रमुखः -खा -खं, अग्रः -ग्रा -ग्रं, अग्रियः -या -यं, अग्र्यः -ग्र्या -ग्र्यं.—(Elementary) आरम्भकः -का -कं, प्रारम्भकः.

PRIMATE, *s.* प्रधानधर्म्माध्यक्षः, मुख्यधर्म्माध्यक्षः, प्रधानोपाध्यायः, मुख्योपाध्यायः, प्रधानधर्म्माधिपतिः *m.*, मुख्यधर्म्माधिपतिः *m.*

PRIME, *a.* (First) प्रथमः -मा -मं, प्राथमिकः &c. *See* PRIMARY.—(First in rank, chief) मुख्यः -ख्या -ख्यं, प्रधानः -ना -नं, प्रमुखः -खा -खं, अग्रः -ग्रा -ग्रं, उत्तमः -मा -मं; 'prime minister,' मुख्यमन्त्री *m.* (न्), प्रधानमन्त्री *m.*, महामन्त्री *m.*, प्रधानामात्यः, मुख्यामात्यः; 'office of prime minister,' मुख्यमन्त्रिता.—(First in excellence) उत्कृष्टः -ष्टा -ष्टं, श्रेष्ठः -ष्ठा -ष्ठं, शिष्टः -ष्टा -ष्टं, उत्तमः -मा -मं, वरः -रा -रं, सर्व्वोत्कृष्टः &c., सर्व्वश्रेष्ठः &c.—(Full, blooming) प्रौढः -ढा -ढं.

PRIME, *s.* (Dawn) उदयः, दिनारम्भः, दिवसमुखं, दिनादिः *m.*—(Beginning) आरम्भः, आदिः *m.*—(Best state, heyday, height) प्रौढिः *f.*, प्रौढता, अक्षतता -त्वं, उत्तमता -त्वं, उत्तमावस्था, उत्तमदशा, सिद्धिः *f.*; 'the prime of youth,' यौवनप्रौढिः *f.*, प्रौढयौवनं, अक्षतयौवनं, नवयौवनं, यौवनश्रीः *f.*, 'in the prime of youth,' प्रौढयौवनः-ना-नं, अक्षतयौवनः &c.—(Best part) उत्तमभागः, उत्तमांशः.

To PRIME, *v. a.* आग्नेययन्त्रोपरि ज्वलनचूर्णं धा (c. 3. दधाति, धातुं).

PRIMELY, *adv.* प्रथमतस्, प्रधानतस्.—(Excellently) उत्तमं, श्रेष्ठं, सुष्ठु.

PRIMENESS, *s.* श्रेष्ठता, उत्कृष्टता, उत्तमता, उत्कर्षः, सारत्वं.

PRIMER, *s.* बालकशिक्षार्थं प्रथमपुस्तकं or आरम्भपुस्तकं, व्याकरणारम्भः.

PRIMEVAL, PRIMEVOUS, *a.* प्राक्तनः -नी -नं, सनातनः -नी -नं, आद्यः -द्या -द्यं, आद्यकालीनः -ना -नं, मौलः -ली -लं, मौलिकः -की -कं, प्राक्तनकालीनः -ना -नं, प्राक्कालीनः &c.

PRIMITIVE, *a.* (Pertaining to the beginning, original) प्रथमकालिकः -की -कं, आद्यकालिकः &c., प्राथमिकः -की -कं, प्रथमः -मा -मं. *See* the last.—(Not derived, primary) मूलिकः -का -कं, मौलिकः -की -कं, मौलः -ली -लं, अव्युत्पन्नः -न्ना -न्नं.—(Following ancient forms) प्राक्कालीनरीतिनिष्ठः -ष्ठा -ष्ठं, वृद्धाचारसेवी &c., प्राक्तनव्यवहारसेवी -विनी -वि (न्), प्राक्तनरीतिसेवी &c., प्राक्तनमार्गानुयायी &c., प्राक्तनमार्गानुसारी &c., आद्यकालानुसारी &c.

PRIMITIVELY, *adv.* (Originally) आदौ, आदितस्, मूलतस्, प्रथमतस्, आरम्भतस्, आरम्भे.—(According to primitive custom) प्राक्तनव्यवहारानुसारेण, प्राक्तनरीत्यनुसारेण, आद्यकालानुसारतस्, आद्यकालानुरूपेण, वृद्धाचारतस्.

PRIMITIVENESS, *s.* (State of being original) मौलत्वं -ता, मौलिकत्वं, प्राथमिकत्वं, प्राथम्यं, प्रथमता, आद्यत्वं, आदित्वं.—(Conformity) प्राक्तनव्यवहारसेवनं, प्राक्कालीनरीत्यनुसारः, प्राक्तनमार्गानुयायिता, वृद्धाचारसेवनं.

PRIMNESS, *s.* अतिविनीतता -त्वं, सूक्ष्मनियमनिष्ठा, सूक्ष्मादरशीलता, अतिसूक्ष्मता, अतिसौक्ष्म्यं, अत्यादरसेवनं, अत्याचारसेवनं.

PRIMOGENIAL, *a.* प्रथमजातः -ता -तं, प्रथमजः -जा -जं, आदिजातः &c.

PRIMOGENITURE, *s.* ज्येष्ठता -त्वं, ज्यैष्ठ्यं, पूर्व्वजत्वं, पूर्व्वजातत्वं, अग्रजत्वं, अग्रजातत्वं, वयोज्येष्ठता, ज्येष्ठवयस्कता, आदिजत्वं, आदिजातत्वं.

PRIMORDIAL, *a.* प्राक्कालीनः -ना -नं, प्राक्कालिकः -की -कं, प्राक्तनकालिकः &c., प्राक्तनः -नी -नं, आद्यः -द्या -द्यं, आदिकालिकः &c., मौलिकः -की -कं, मौलः -ली -लं.

PRIMROSE, *s.* वसन्तकुसुमः or वसन्तपुष्प ओषधिभेदः.

PRINCE, *s.* (Sovereign) राजा *m.* (न्), नृपतिः *m.*, भूपतिः *m.*, पार्थिवः, महीपतिः *m.*, छत्रपः, छत्रपतिः *m.*, पः in comp. *See* KING.—(Sovereign of a certain territory or province) देशपतिः *m.*, राष्ट्रपतिः *m.*, मण्डलपतिः.—(Son of a king) राजपुत्रः, राजसुतः, राजतनयः, राजकुमारः, नृपात्मजः, नृपसुतः, नृपपुत्रः, नृपनन्दनः, युवराजः, कुमारः.—(In theatrical language) भर्तृदारकः.

PRINCEDOM, *s.* (Kingdom) राज्यं, राजत्वं. *See* the word.—(Rank or condition of a king's son) यौवराज्यं, युवराजत्वं.

PRINCELINESS, *s.* राजतेजस् *n.*, राजश्रीः *f.*, राजैश्वर्य्यं. *See* MAJESTY.

PRINCELY, PRINCELIKE, *a.* (Resembling a prince, royal) राजसदृशः -शी -शं, नृपसदृशः &c., राजसन्निभः -भा -भं, नृपोपमः -मा -मं, राजजातीयः -या -यं, नृपजातीयः &c., राजकीयः -या -यं, प्रतापवान् -वती -वत् (त्), प्रतापशाली -लिनी -लि (न्), वैभवशाली &c., ऐश्वर्य्यवान् &c. *See* MAJESTIC.—(Having the rank of a prince) राजजातीयः -या -यं, नृपजातीयः &c., राजकुलजः -जा -जं, राजकुलप्रसूतः -ता -तं, राजवंश्यः -श्या -श्यं.—(Becoming a prince) राजयोग्यः -ग्या -ग्यं, राजार्हः -र्हा -र्हं, नृपोचितः -ता -तं, राजोचितः &c., राजोपयुक्तः -क्ता -क्तं, राजकीयः &c.

PRINCE'S-METAL, *s.* (Compound of copper and zinc) कांस्यं -स्यकं, कंसः -सं.

PRINCESS, *s.* (Female sovereign) राज्ञी, महिषी. *See* QUEEN.—(Daughter of a king) राजपुत्री -त्रिका, राजकुमारी, राजकन्या, राजसुता, नृपसुता, नृपात्मजा, राजतनया, नृपनन्दिनी, कुमारी, युवराजपत्नी.—(In theatrical language) भर्तृदारिका.

PRINCIPAL, *a.* मुख्यः -ख्या -ख्यं, परमः -मा -मं, प्रधानः -ना -नं, प्रमुखः -खा -खं, अग्रः -ग्रा -ग्रं, अग्र्यः -ग्र्या -ग्र्यं, प्राग्र्यः &c., वरः -रा -रं, प्रवरः &c., वरेण्यः -ण्या -ण्यं, वर्य्यः -र्य्या -र्य्यं, उत्तमः -मा -मं, पुरोगमः -मा -मं, श्रेष्ठः -ष्ठा -ष्ठं, विशिष्टः -ष्टा -ष्टं, उत्कृष्टः &c., शिष्टः &c., प्रथमः -मा -मं, अग्रगण्यः -ण्या -ण्यं, विशेष्यः -ष्या -ष्यं, मूलिकः -की -कं, मौलिकः &c., सिंह in comp. *See* CHIEF, EMINENT, EXCELLENT; 'principal door,' सिंहद्वारं; 'principal queen,' पट्टमहिषी, पट्टदेवी; 'principal minister.' *See* PRIME, *a.*

PRINCIPAL, *s.* (Chief, head) मुख्यः, मुखरः, पतिः *m.*, अधिपतिः *m.*, अध्यक्षः, नायकः. *See* LEADER, PRESIDENT; 'principal of a convent,' आश्रमगुरुः *m.*; 'of a college,' विद्यालयपतिः *m.*, विद्यालयाधिपतिः *m.*, विद्यालयाध्यक्षः.—(Capital) मूलधनं, मूलं, धनमूलं, मूलद्रव्यं, नीविः -वी *f.*, परिपणं, परिणतं, कायः, प्रयोज्यं; 'of a debt,' सामकं.—(Principal perpetrator) प्रवर्त्तकः.

PRINCIPALITY, *s.* (Territory of a prince) राष्ट्रं, देशः, मण्डलं, राज्यं, माण्डलिकराष्ट्रं, माण्डलिकराज्यं, माण्डलिकदेशः, माण्डलिकविषयः.

PRINCIPALLY, *adv.* प्रधानतस्, प्राधान्यतस्, मुख्यशस्, मुख्यतस्, विशेषतस्, विशेषेण, अधिकन्तु.

PRINCIPALNESS, *s.* प्राधान्यं, प्रधानत्वं, मुख्यता -त्वं, श्रेष्ठता, उत्कृष्टता.

PRINCIPLE, *s.* (Cause, source, origin) कारणं, हेतुः *m.*, आदिकारणं, आदिः *m.*, वीजं, मूलं, प्रयोजनं, आदिकारणं, आदिहेतुः *m.*—(Element, constituent part) मूलवस्तु *n.*, तत्त्वं, मूलं, मूलतत्त्वं, अङ्गं, अवयवः, मूलद्रव्यं, मूलावयवः, मूलाङ्गं, वस्तु *n.*, धातुः *m.*, सारः, साधनं, वीजं, मात्रं, तन्मात्रं.—(Fundamental or elementary truth) तत्त्वं मूलतत्त्वं, सूत्रं, मूलसूत्रं, प्रथमसूत्रं, वीजं, परिभाषा, आरम्भः.—(Rule general truth) नियमः, सूत्रं, विधिः *m.*, स्थितिः *f.*, न्यायः, उक्तवाक्यं, वचनं, उत्सर्गः.—(Settled law or property) धर्म्मः, गुणः, भावः, क्रमः, स्वभावः, व्यवस्था.—(Settled process) रीतिः *f.*, क्रमः, मार्गः, विधानं, मर्य्यादा, धारा.—(Groand, foundation) हेतुः *m.*, प्रमाणं, प्रामाण्यं, उपपत्तिः *f.*, उपपादनं, मूलं, आधारः, आश्रयः, उपष्टम्भः.

PRINCIPLED, *a.* (High-principled, well-principled) धर्म्मनिष्ठः -ष्ठा -ष्ठं, धर्म्मतत्त्वनिष्ठः &c., पुण्यनियमनिष्ठः &c., सुनियमान्वः &c., सुनियमनिष्ठितः -ता -तं, उदारः -रा -रं, उदारशीलः -ला -लं.

To PRINT, *v. a.* मुद्र (nom. मुद्रयति -यितुं), मुद्रीकृ, मुद्रितं -तां कृ, मुद्राङ्कितं -तां कृ, मुद्राक्षरीकृ, अङ्क् (c. 10. अङ्कयति -यितुं), मुद्राक्षरैर् अङ्क्, समुद्रीकृ. *See To* IMPRINT, IMPRESS.

PRINT, *s.* (Mark made by impression) मुद्रा, मुद्रिका, अङ्कः, चिह्नं.—(Instrument for impressing) मुद्रा, मुद्राङ्कनयन्त्रं.—(Impression of types or the type itself) मुद्राक्षरचिह्नं, मुद्राक्षरं.—(State of being printed) मुद्रितत्वं, मुद्राङ्कितत्वं; 'in print,' मुद्रितः -ता -तं; 'out of print,' अमुद्रितः &c.—(Print of a foot) पादचिह्नं, पदाङ्कः, पादमुद्रा, पदं, पदवी.

PRINTED, *p. p.* मुद्रितः -ता -तं, मुद्राङ्कितः &c., मुद्रीकृतः &c., मुद्राक्षरैरङ्कितः -ता -तं, मुद्राक्षराङ्कितः &c., अङ्कितः &c., कृतमुद्रः -द्रा -द्रं, कृताङ्कः -ङ्का -ङ्कं, समुद्रः &c.; 'printed book,' मुद्रितपुस्तकं.

PRINTER, *s.* मुद्राकरः, मुद्राकारी *m.* (न्), मुद्राकृत्, मुद्रकः, मुद्राङ्कनकृत्.

PRINTING, *s.* मुद्राङ्कनं, मुद्राकरणं, मुद्रीकरणं, अङ्कनं, मुद्राक्षरप्रयोगः.

PRINTING-HOUSE, *s.* मुद्राङ्कनशाला, मुद्रायन्त्रालयः -यं, यन्त्रालयः.

PRINTING-INK, *s.* मुद्राङ्कनमसिः -सी, मुद्राङ्कनमसिका, अङ्कनमसी.

PRINTING-PRESS, *s.* मुद्राङ्कनयन्त्रं, मुद्रायन्त्रं, मुद्राङ्कनचक्रं.

PRIOR, *a.* पूर्व्वः -र्व्वा -र्व्वं, पूर्व्वकः -का -कं, पौर्व्विकः -की -कं, पौरस्त्यः -स्त्या -स्त्यं, अग्र्यः -ग्र्या -ग्र्यं, प्राक् in comp., प्राक्तनः -नी -नं, आद्यः -द्या -द्यं, आदिमः -मा -मं, आदि in comp., प्रथमः -मा -मं; 'prior possession,' पूर्व्वभुक्तिः *f.*; 'prior existence,' प्राग्भावः; 'prior and subsequent,' पूर्व्वापरः -रा -रं, परापरः -रा -रं, परावरः -रा -रं, परावरीणः -णा -णं.

PRIOR, *s.* (Superior of a convent) आश्रमगुरुः *m.*, मठाधिपतिः *m.*, मठाध्यक्षः, आश्रमाध्यक्षः, मठाधिकारी *m.* (न्).

PRIORITY, *s.* पूर्व्वता -त्वं, अग्रता -त्वं, प्रथमता -त्वं, प्राथम्यं, आद्यता, आदित्वं.—(In rank) अग्रपदं, श्रेष्ठपदं, प्राधान्यं, प्रधानता, अग्रमान्यता, अग्रगण्यता, अग्रपूज्यता, अग्रमानं, अग्रपूजा.

PRIORY, *s.* मठः, आश्रमः, अवसथः, वीहारः, धर्म्मशाला.

PRISM, *s.* त्रिपार्श्वकाचः, चतुर्भुजाकृतिः पार्श्वत्रयविशिष्टः काचखण्डः.

PRISMATIC, *a.* (Pertaining to a prism) त्रिपार्श्वकाचसम्बन्धी &c.—(Resembling one) त्रिपार्श्वकाचाकारः -रा -रं.—(Distributed or formed by one) त्रिपार्श्वकाचविकीर्णः -र्णा -र्णं, त्रिपार्श्वकाचकल्पितः -ता -तं.

PRISON, *s.* कारागारं, कारागृहं, कारा, कारावेश्म *n.* (न्), बन्धनागारं, बन्धनालयः, बन्धनगृहं, बन्धनस्थानं, निरोधस्थानं, निरोधगृहं, निरोधशाला, वन्दिशाला, वन्दिवेश्म *n.*, गुप्तिः *f.*, चारः.

To PRISON, *v. a.* *See To* IMPRISON.

PRISONER, *s.* वन्दिः *f.*, वन्दी *f.*, कारास्थः, कारागारस्थः, कारागुप्तः, प्रग्रहः, उपग्रहः, ग्रहणः, कवरकी *f.*, करमरी *m.* (न्), वारिः *f.*, गोरकुः *m.*—(One taken in war) युद्धधृतः, युद्धगृहीतः, शत्रुधृतः, शत्रुगृहीतः, युद्धदासः.

PRISTINE, *a.* प्राक्तनः -नी -नं, पुरातनः &c., प्राक्कालीनः -ना -नं, प्राक्कालिकः -की -कं, आद्यकालिकः &c., पूर्व्वकालीनः &c., पूर्व्वकालिकः &c., पुराणः -णा -णी -णं, प्राचीनः -ना -नं.

PRIVACY, *s.* (State of retirement or secrecy) विविक्तता -त्वं, विविक्तभावः, विविक्तवासः, एकान्तता, एकान्तभावः, एकान्तवासः, रहस् *n.*, रहः, रहोभावः, रहोभावः, रहोवासः, रहस्यत्वं, निभृतत्वं, गुप्तता, छन्नता, प्रच्छन्नता, निर्ज्जनता, विजनता.—(Place of seclusion, retreat) विविक्तस्थानं, रहःस्थानं, रहःस्थलं, एकान्तस्थानं, निर्ज्जनस्थानं, विजनस्थानं, निर्ज्जनदेशः.

PRIVATE, *a.* (Separate, unconnected with others) विविक्तः -क्ता -क्तं, विभिन्नः -न्ना -न्नं, पृथक्स्थितः -ता -तं, पृथगात्मकः -का -कं, असाधारणः -णा -णी -णं, असामान्यः -न्या -न्यं.—(Peculiar to one's self) स्व in comp., आत्म in comp., स्वकीयः -या -यं, स्वीयः &c. *See* PECULIAR; 'private conclusion,' स्वानुमितिः *f.*; 'private advantage,' आत्महितं; 'private property,' स्वस्वं, स्वधनं, आत्मधनं, निजस्वं, असाधारणधनं, अनन्यस्वामिकधनं.—(Sequestered, secluded, retired) विविक्तः -क्ता -क्तं, विजनः -ना -नं, निर्ज्जनः &c., एकान्तः -न्ता -न्तं, निभृतः -ता -तं, निःशलाकः -का -कं.—(Secret, not open) रहस्यः -स्या -स्यं, गूढः -ढा -ढं, गुप्तः -प्ता -प्तं, गुह्यः -ह्या -ह्यं, छन्नः -न्ना -न्नं, प्रच्छन्नः &c., अव्यक्तः -क्ता -क्तं, अप्रकाशः -शा -शं, अप्रकटः -टा -टं, अस्पष्टः -ष्टा -ष्टं, अन्तर् in comp.; 'very private,' सुगुप्तः &c., सुगूढः &c.; 'private intelligence,' गूढभाषितं, गूढवार्त्ता; 'private road,' गूढमार्गः; 'private door,' अन्तर्द्वारं, गूढद्वारं, प्रच्छन्नं, पक्षद्वारं; 'private apartments,' अन्तर्गृहं, अन्तःपुरं, अवरोधनं, उपरोधकं, अन्तर्भवनं, कक्षान्तरं, निष्कुटः, दर्भटः; 'private room,' अन्तःशाला -लिका, अन्तःकोष्ठकं, उपरोधकं; 'private part,' गुह्यं, रहस् *n.*, उपस्थः, अधोङ्गं.—(Not in public office or employment) अनधिकारी -रिणी -रि (न्), अनधिकारस्थः -स्था -स्थं, अनधिकारस्थितः -ता -तं; 'a private person,' पृथग्जनः, पृथग्लोकः, पृथग्जानपदः, अनधिकारस्थव्यक्तिः *f.*—(Not official) अनाधिकारिकः -की -कं.—(In private). *See* PRIVATELY.

PRIVATE, *s.* (Common soldier) सैनिकः, सैन्यः, पृथक्सैन्यः.

PRIVATEER, *s.* गृहीतानुज्ञापत्रेण पृथग्जनेन सज्जीकृता साहसिकनौः.

PRIVATELY, *adv.* रहसि, रहस्, रहस्यं, निभृतं -ते, विविक्तं -क्ततम्, एकान्ततम्, एकान्तं, विजने, गूढं, गूढतस्, गुप्तं, उपांशु, प्रच्छन्नं -न्ने, अप्रकाशं, अप्रकटं, मिथस्; 'going privately,' गूढचारी -रिणी &c., गुप्तगतिः -तिः -ति.

PRIVATENESS, *s.* विविक्तता -त्वं. *See* PRIVACY.

PRIVATION, *s.* (Deprivation, absence of) अभावः, विरहः, रहितत्वं, राहित्यं, हानिः *f.*, असम्भवः, अविषयः, अप्राप्तिः *f.*, वियोगः, अपचयः, नाशः, क्षतिः *f.*, क्षयः, हरणं, लोपः.—(Absence of food or things necessary to comfort) अन्नवस्त्राभावः, आहारविरहः, आहाराभावः, अन्नवस्त्रहानिः *f.*, ग्रासाच्छादनराहित्यं, अन्नोदकाभावः, अन्नोदकलोपः, सुखसाधनाभावः, सुखसाधनलोपः.

PRIVATIVE, *a.* (Causing privation) हानिकरः -री -रं, हानिकारकः -का -कं, लोपकरः &c., क्षयकरः &c., नाशकरः &c.—(Consisting in the absence of something) अभावसूचकः -का -कं, अभावरूपः -पा -पं, अभावात्मकः -का -कं, अभावदर्शकः &c.

PRIVATIVE, *s.* (Word) अभावशब्दः, अभावसूचकशब्दः.—(Prefix, in grammar) नपदं, नञ्पदं. Privative prefixes are such as अ, अन्, निर्, वि.

PRIVATIVELY, *adv.* अभावरूपेण, सनिषेधं, निषेधरूपेण, अभावतस्.

PRIVILEGE, *s.* अधिकारः, विशेषाधिकारः, असाधारणाधिकारः, असामान्याधिकारः, स्वाधिकारः, स्वत्वं.

To PRIVILEGE, *v. a.* अधिकारं दा, विशेषाधिकारं दा, अधिकारवन्तं -वतीं -वत् कृ, साधिकारं -रां कृ, विशेषाधिकारयुक्तं -क्तां कृ.

PRIVILEGED, *p. p.* or *a.* अधिकारवान् -वती -वत् (त्), साधिकारः -रा -रं, विशेषाधिकारवान् &c., विशेषाधिकारयुक्तः -क्ता -क्तं, अधिकारविशिष्टः -ष्टा -ष्टं.—(Exempt from tax) अकरः -रा -रं.

PRIVILY, *adv.* रहसि, गुप्तं निभृतं, सुनिभृतं, *See* PRIVATELY.

PRIVITY, *s.* (Joint knowledge with another) सहज्ञानं, सहबोधः, सहवेदनं, समवेदनं, समज्ञानं, समवेतृत्वं.—(Private part) गुह्यं, गुह्याङ्गं, गूढाङ्गं, गुप्ताङ्गं, गोप्याङ्गं, गुह्येन्द्रियं, गुप्तेन्द्रियं, गुह्यस्थानं, गुप्तस्थानं, गुह्यस्थलं, रहस् *n.*, कौलीनं, उपस्थः -स्थं, अधोङ्गं; 'of a man,' शिश्नः, ध्वजः, *see* MEMBRUM VIRILE; 'of a woman,' *see* PUDENDUM.

PRIVY, *a.* (Private). *See* the word. (Admitted to the participation of knowledge) सहज्ञानी -निनी -नि (न्), समज्ञानी &c., सहज्ञाता *m.* (तृ), सहवेत्ता *m.* (तृ), सहवेदी *m.*, समवेत्ता *m.*—(Privy council) गूढसभा, प्रधानमन्त्रिणां गूढसभा, धीसचिवानां सभा, शिष्टसभा.

PRIVY, *s.* शौचकूपः, पायुक्षालनवेश्म *n.* (न्), कर्दमाटकः, अवस्करः.

PRIVY-COUNSELLOR, *s.* गूढसभाभ्यन्तरः, गूढसभासद्, गूढसभास्थः.

PRIZE, *s.* (That which is taken in war) युद्धजितद्रव्यं, युद्धसम्पादितद्रव्यं, युद्धोपार्जितद्रव्यं, युद्धजितधनं.—(That which is gained as the reward of success or victory) जयफलं, सिद्धिफलं, जयलब्धफलं, जयलाभः, जयलब्धवस्तु *n.*, पणजितद्रव्यं, जयपारितोषिकं, स्पर्द्धाफलं.—(That which is offered as the reward of contest) स्पर्द्धाजेयं, पणजेयं, पणः.—(Reward) फलं, प्रतिफलं, पारितोषिकं.—(Valuable acquisition) रत्नं, निधिः *m.*

To PRIZE, *v. a.* (Estimate) मन् (c. 4. मन्यते, मन्तुं, c. 10. मानयति -यितुं), सम्मन्, प्रतिमन्, मूल्यं or अर्घं निरूप् or निर्णी or संख्या.—(Value highly) बहु मन्, बहु सम्मन्, अतिशयेन सम्मन्, बहुमतिं कृ.

PRIZED, *p. p.* बहुमतः -ता -तं, बहुसम्मानितः &c., इष्टः -ष्टा -ष्टं, प्रतिष्ठितः -ता -तं; 'by mankind,' जनेष्टः -ष्टा -ष्टं.

PRIZE-FIGHTER, *s.* मल्लयोद्धा *m.* (द्धृ), मल्लयोधी *m.* (न्), मल्लः, कल्लः.

PRIZE-FIGHTING, *s.* मल्लयुद्धं, कल्लयुद्धं, मुष्टियुद्धं, बाहुयुद्धं.

PRO, (Forward, forth) प्र, अग्रे.—(For). In the phrase 'pro and con,' pro may be expressed by विधिपक्षः, कर्त्तव्यपक्षः, and con by निषेधपक्षः, अकर्त्तव्यपक्षः, अभावपक्षः.

PROBABILITY, *s.* सम्भावना, सम्भवः, सम्भाव्यता -त्वं, सम्भावनीयता -त्वं, अनुमेयता -त्वं, प्रमेयता, अभ्युपगमः, अभ्युपगम्यता, सम्भावनायोग्यता, भवनयोग्यता, योग्यता -त्वं, सत्यसङ्काशता.

PROBABLE, *a.* सम्भाव्यः -व्या -व्यं, सम्भावनीयः -या -यं, सम्भावितः -ता -तं, सम्भावनार्हः -र्हा -र्हं, सत्यसङ्काशः -शा -शं, अनुमेयः -या -यं, अभ्युपगम्यः -म्या -म्यं, अभ्युपगतः -ता -तं, प्रमेयः -या -यं, सम्भावनायोग्यः -ग्या -ग्यं, भवनयोग्यः &c.; 'this is probable,' इदम् उपपद्यते or सम्भवति or युज्यते.

PROBABLY, *adv.* सम्भावनीयं, यथासम्भवं, यथायोग्यं, प्रायस्, प्रायशस्, स्यात्, किल, नाम.

PROBATE, *s.* (Of a will) मृतपत्रप्रमाणं, मृतलेखप्रमाणं.

PROBATION, *s.* (Trial) परीक्षा -क्षणं, उपधा, कषिः *f.*—(Proof) प्रमाणं, प्रामाण्यं, निर्णयः. *See* PROOF.

PROBATIONARY, PROBATIONAL, *a.* परीक्षकः -का -कं, परीक्षाकारी -रिणी -रि (न्), परीक्ष्यमाणः -णा -णं, परीक्षा in comp., उपधा in comp.

PROBATIONER, *s.* परीक्ष्यमाणः, परीक्षारूढः, परीक्षाविषयः, परीक्षापात्रं, प्राथमकल्पिकः, नूतनशिष्यः, नवीनशिष्यः.

PROBATOR, *s.* परीक्षकः, विचारकः, अनुसन्धाता *m.* (तृ), परीक्षाकृत्.

PROBATORY, *a.* परीक्षकः -का -कं. *See* PROBATIONARY, *a.*

PROBE, *s.* शलाका, एषणी, आरा, आरं, क्षतशोधनी, व्रणशोधनी.

To PROBE, *v. a.* शलाकाद्वारेण क्षतशोधनं कृ or उन्मन्थनं कृ or क्षतान्वेषणं कृ, क्षतान्तः शलाकां प्रविश् (c. 10. -वेशयति -यितुं) or निविश्.—(Search to the bottom, scrutinise) मर्म्मान्वेषणं कृ, सूक्ष्मपरीक्षां कृ, सूक्ष्मजिज्ञासां कृ, मर्म्मनिरीक्षणं कृ.

PROBING, *s.* शलाकाद्वारेण क्षतशोधनं, क्षतपरीक्षा, उन्मन्थनं, मर्म्मान्वेषणं.

PROBITY, *s.* आर्जवं, साधुता, ऋजुता, उपधाशुचित्वं. *See* INTEGRITY.

PROBLEM, *s.* (In logic, questionable proposition) विकल्पविषयः, विवादविषयः, प्रश्नः, वादः.—(In geometry) कृत्यं, कृतिसापेक्षसिद्धान्तः.—(In general) प्रश्नः, जिज्ञासा.

PROBLEMATICAL, *a.* वैकल्पिकः -की -कं, सविकल्पः -ल्पा -ल्पं, सन्दिग्धः -ग्धा -ग्धं, संशयस्थः -स्था -स्थं, ससंशयः -या -यं, अनिश्चितः -ता -तं, अनिर्णीतः &c.

PROBLEMATICALLY, *adv.* सविकल्पं, ससंशयं, सन्दिग्धं, संशयपूर्व्वं.

PROBOSCIS, *s.* (Of an elephant, &c.) शुण्डा, हस्तः, करः.

PROCEDURE, *s.* (Proceeding, measure taken) क्रिया, व्यवहारः, व्यापारः, चरितं, कृतिः *f.*, कर्म्म *n.* (न्), अनुष्ठानं, आचरणं, आचरितं, आचारः, वृत्तिः *f.*, वृत्तं, उपायः, साधनं, उपचारः, विधानं.—(Mode of proceeding) रीतिः *f.*, मार्गः, विधिः *m.*, क्रियाविधिः *m.*, क्रियाप्रसङ्गः, पर्य्यायः, क्रमः, मर्य्यादा, सम्प्रदायः.—(Legal) व्यवहारः, व्यवहारमार्गः, व्यवहारविधिः *m.*

To PROCEED, *v. n.* (Go forward) प्रगम् (c. 1. -गच्छति -गन्तुं), अग्रे गम्, पुरो गम्, प्रया, अग्रे या, अग्रतो या, प्रसृ, अग्रे सृ, प्रसृप्, प्रवृत्, चल्, प्रचल्, प्रचर्, प्रविचर्, प्रस्था, क्रम्, प्रे (c. 2. प्रैति -तुं, rt. इ); 'the work proceeds,' कर्म्म प्रवर्त्तते; 'let the game proceed,' द्यूतं प्रवर्त्ततां.—(Proceed from one topic to another) पुनर् वद् (c. 1. वदति -दितुं), क्रमेण वद्, वचनप्रसङ्गं कृ, वचनप्रबन्धं कृ.—(Issue, arise from) उत्पद् (c. 4. -पद्यते -पत्तुं), समुत्पद्, जन् (c. 4. जायते, जनितुं), प्रभू, निःसृ, प्रवृत्, उच्चर्, उदि; 'his uneasiness proceeds from no other cause,' अस्य बाधा न अन्यनिमित्ता भवति.—(Proceed in an undertaking, carry on measures) प्रवृत्, प्रारब्धं प्रवृत् (c. 10. -वर्त्तयति -यितुं) or सम्पद् (c. 10. -पादयति -यितुं) or निष्पद् or निर्वह् (c. 10. -वाहयति -यितुं), प्रारब्धसम्पादनं कृ.—(Enter upon a business, begin) प्रवृत्, प्रवृत्तिं कृ, प्रक्रम्, उपक्रम्, आरभ्.—(Proceed against at law) अभियुज्.

PROCEEDING, *part.* (Issuing from) उत्पन्नः -न्ना -न्नं, समुत्पन्नः &c., जातः -ता -तं, सञ्जातः &c., निःसृतः -ता -तं, विनिःसृतः &c., प्रवृत्तः -त्ता -त्तं, प्रभवः -वा -वं, उद्भवः &c. in comp., उत्थितः -ता -तं; 'sound proceeding from the throat,' कण्ठोत्थितः स्वरः.

PRROCEEDING, *s.* क्रिया, कर्म्म *n.* (न्), व्यवहारः, चरितं, चरित्रं, चेष्टितं, चेष्टा, व्यापारः, आचरणं, आचरितं, वृत्तिः *f.*, प्रवृत्तिः *f.*, वृत्तं, अनुष्ठानं, आचारः, चर्य्या, विधानं.—(Course of proceeding) रीतिः *f.*, मार्गः, पर्य्यायः, क्रियाविधिः *m.*, क्रियाप्रसङ्गः, क्रमः, गतिः *f.* *See* PROCEDURE.

PROCEEDS, *s.* उत्पन्नं, समुत्पन्नं, उत्पन्नधनं, समुत्पन्नधनं.

PROCELEUSMATICUS, *s.* (Metrical foot) ह्यः.

PROCESS, *s.* (Proceeding on, progressive course) प्रगमनं, अग्रगमनं, प्रयाणं, प्रक्रमः, प्रवृत्तिः *f.*, प्रसरः, गतिः *f.*—(Gradual course) क्रमः -मणं, क्रमे क्रमे गमनं, क्रमशो गमनं or गतिः *f.*, क्रमिकगतिः *f.*—(Of time) कालगतिः *f.*, कालपर्य्यायः, कालावृत्तिः *f.*, कालान्तरं; 'in process of time,' कालान्तरे, दिनेषु गच्छत्सु.—(Regular course or order) क्रमः, अनुक्रमः, रीतिः *f.*, मार्गः, पर्य्यायः, प्रसङ्गः नियमः, व्यवस्था, पद्धतिः *f.*, परिपाटी, परिपाटिः *f.*, विधिः *m.*, धारा, गतिः *f.*, वृत्तिः *f.*, प्रबन्धः.—(Course of proceeding) क्रियाप्रसङ्गः, क्रिया-

विधिः *m.*, क्रियाप्रबन्धः.—(Legal) व्यवहारः, व्यवहारमार्गः, व्यवहरणं, कार्य्यं, अक्षः.

PROCESSION, *s.* (Issuing) निर्गमः, निर्गतिः *f.*, निःसरणं, निस्सरणं, विनिर्गमः, निष्क्रमणं, प्रवृत्तिः *f.*, उत्पत्तिः *f.*, अपसरणं.—(Proceeding on) प्रगमनं, गमनं, प्रयाणं, प्रस्थानं, गतिः *f.*, चलनं.—(Train of persons moving) यात्रा, यात्राप्रसङ्गः, दण्डयात्रा, जनयात्रा, लोकयात्रा, लोकश्रेणी, गतिः *f.*

PROCESSIONAL, PROCESSIONARY, *a.* यात्रिकः -की -कं, यात्रासम्बन्धी &c., दण्डयात्रासम्बन्धी &c., यात्रारूपः -पा -पं, दण्डयात्रारूपः &c., दण्डयात्रिकः &c.

Proportionateness, **proportionableness**, *s.* प्रमाणसमता, परिमाणसमता, समप्रमाणकता, सम्मितिः *f.*, अनुगुणता, आनुगुण्यं, सदृशता, सादृश्यं, समता, तुल्यता, अनुरूपता, आनुरूप्यं, परस्परानुगुण्यं. *See* Proportion.

Proportionably, *adv.* अनुरूपतस्, अनुरूप, अनुसारेण -रतस्, सादृश्येन, सदृशं, प्रमाणतस्, यथाप्रमाणं, यथापरिमाणं, प्रमाणानुसारात् -रेण, यथांशतस्, विभागशस्; 'to one's strength,' *see* under Proportion.

Proportioned, *p. p.* यथाप्रमाणं परिकल्पितः -ता -तं, प्रमाणानुसारात् कल्पितः &c. or विहितः &c. *See* Proportionate.

Proposal, *s.* उपन्यासः, कर्त्तव्योपन्यासः, प्रतिज्ञा, प्रतिज्ञातं, कर्त्तव्यसूचना -नं, कर्त्तव्यप्रतिज्ञा, कर्त्तव्यनिर्देशः, अभिधानं, अभिहितं, उक्तं, वाक्यं.—(Of marriage), *see* the next.

To **propose**, *v. a.* उपन्यस् (c. 4. -अस्यति -असितुं), उपन्यासं कृ, उपन्यासीकृ, कर्त्तव्योपन्यासं कृ, कर्त्तव्यसूचनं कृ, प्रतिज्ञा (c. 9. -जानाति -नीते -ज्ञातुं), प्रतिज्ञां कृ, कर्त्तव्यप्रतिज्ञां कृ, निविद् (c. 10. -वेदयति -यितुं), निवेदनं कृ, अभिधा (c. 3. -दधाति -धातुं), कर्त्तव्यं or यथाकर्त्तव्यं निर्दिश् (c. 6. -दिशति -देष्टुं) or सूच् (c. 10. सूचयति -यितुं), कर्त्तव्यनिर्देशं कृ.—(Intend), *see* the word.—(Make an offer of marriage) विवाहप्रतिज्ञां कृ, प्रेमनिवेदनं कृ.

Proposed, *p. p.* उपन्यस्तः -स्ता -स्तं, उपन्यासीकृतः -ता -तं, प्रतिज्ञातः &c., निवेदितः -ता -तं, निर्दिष्टः -ष्टा -ष्टं, अभिहितः &c.

Proposition, *s.* उपन्यासः, प्रतिज्ञा, प्रतिज्ञातं, वाक्यं, उक्तं, वचनं.—(In logic, geometry, &c.) प्रतिज्ञा, प्रतिज्ञेयं, फक्किका, प्रमेयं, पूर्व्वपक्षः, प्रतिज्ञातार्थः; 'abandonment of the original proposition,' प्रतिज्ञासन्न्यासः, प्रतिज्ञाहानिः *f.*; 'denial of a proposition,' प्रतिज्ञाविरोधः; 'completing it,' आकांक्षापूरणं; 'subsequent proposition,' प्रतिज्ञान्तरं.

To **propound**, *v. a.* (Propose) उपन्यस्, प्रतिज्ञा, निर्दिश्, अभिधा, सूच् (c. 10. सूचयति -यितुं), निविद्, प्रतिपद् (c. 10. -पादयति -यितुं).

Propounded, *p.p.* उपन्यस्तः -स्ता -स्तं, प्रतिज्ञातः -ता -तं, निर्दिष्टः -ष्टा -ष्टं.

Proprietary, *a.* स्वामिसम्बन्धी -न्धिनी -न्धि (न्), स्वाम्यधीनः -ना -नं; 'proprietary right,' स्वत्वं, अधिकारः -रिता, स्वामित्वं, स्वाम्यं, प्रभुत्वं -ता.

Proprietor, *s.* स्वामी *m.* (न्), अधिकारी *m.* (न्), प्रभुः *m.*, पतिः *m.*, ईश्वरः, स्वत्ववान् *m.* (त्), अधिकारवान् *m.*, स्वत्वाधिकारी *m.*; 'without title,' अनपसरः.

Proprietorship, *s.* स्वामित्वं, स्वाम्यं, स्वत्वं, अधिकारिता -त्वं, प्रभुत्वं.

Proprietress, *s.* स्वामिनी *f.*, अधिकारिणी *f.*, स्वत्वाधिकारिणी *f.*

Propriety, *s.* यथायोग्यता, युक्तता, योग्यता, यथायुक्तता, युक्तिः *f.*, उपयुक्तता, उपयोगिता -त्वं, उचितत्वं, औचित्यं, यथोचितत्वं, उपपत्तिः *f.*, सामञ्जस्यं, समञ्जसं, सम्भावना, न्यायः -यता, सङ्गतत्वं, साङ्गत्यं, याथार्थ्यं, यथार्हता, याथातथ्यं, अभेषः, पर्य्याप्तिः, पात्रं -त्रता; 'of conduct,' मर्य्यादा, मर्य्यादानतिक्रमः, विनयः, विनीतता, सुचर्य्या, सुचरितं, स्थितिः *f.*, संस्था, अनतिक्रमः, अव्यभिचारः, कर्त्तव्यता, इतिकर्त्तव्यता; 'pattern of propriety,' न्यायाधारः.

Prorogation, *s.* चिरकालपर्य्यन्तं महासभाविसर्जनं or कार्य्यनिवृत्तिः *f.* or कार्य्यत्यागः.—(Prolongation) दीर्घीकरणं.

To **prorogue**, *v. a.* (Adjourn to a distant period) चिरकालपर्य्यन्तं महासभां विसृज् (c. 6. -सृजति -स्रष्टुं, c. 10. -सर्जयति -यितुं) or कार्य्यनिवृत्तिं कृ or कार्य्यत्यागं कृ.—(Prolong) द्राघ (nom. द्राघयति -यितुं), दीर्घीकृ, दीर्घकालस्थं -स्थां कृ, चिरकालस्थं -स्थां कृ.

Prorogued, *p. p.* चिरकालपर्य्यन्तं विसर्जितः -ता -तं or विसृष्टः -ष्टा -ष्टं.

Prosaic, *a.* गद्यरूपः -पा -पं, गद्यमयः -यी -यं, गद्यात्मकः -का -कं, छन्दोहीनः -ना -नं, छन्दोरहितः -ता -तं.—(Dull) विरसः -सा -सं, अरसिकः -का -कं, फल्गुः -ल्गुः -ल्गु, रसहीनः -ना -नं, तेजोहीनः &c., लवणहीनः &c.

To **proscribe**, *v. a.* (Doom to destruction) घोषणापूर्व्वं वधदण्डार्हं ख्या in caus. (ख्यापयति -यितुं), प्रकाशलेखेन वधार्हं ज्ञा in caus., or वधदण्डार्हं निर्दिश् or वध्यं निर्दिश् or घातव्यं निर्दिश्, अमुकजनो वध्यो ऽस्ति इति सूचनार्थं प्रकटनपत्रे नाम लिख् (c. 6. लिखति, लेखितुं) or अभिलिख्, मृत्युपात्रं निर्दिश्.—(Denounce and expel) प्रकटनपत्रेण बहिष्कृ or निरस् or प्रत्यादिश्.—(Interdict) प्रकाशनपत्रेण निषिध् or प्रतिषिध्, प्रकटनलेखेन निवृ or बाध्.

Proscribed, *p. p.* वध्यनामावलिपत्राभिलिखितः -ता -तं, वधदण्डार्हः -र्हा -र्हं, प्रकाशपत्रेण निषिद्धः -द्धा -द्धं or प्रतिषिद्धः &c. or निवारितः -ता -तं.

Proscription, *s.* प्रकाशनपत्रेण वध्यजननिर्देशः or वध्यनामावलिनिर्देशः, घोषणापूर्व्वं वधदण्डार्हख्यापनं, प्रकटनपत्रेण वधार्हज्ञापन.

Prose, *s.* गद्यं, हारकः, छन्दोरहितवाक्यं; 'prose and verse,' गद्यपद्यं; 'alternate prose and verse,' चम्पूः *m.*

To **prose**, *v. n.* दीर्घोच्चारणेन विरसवाक्यानि or विरसकथाः वद् (c. 1. वदति -दितुं), दीर्घसूत्रतया or दीर्घसूत्रवद् विरसकथोपाख्यानं कृ.

To **prosecute**, *v. a.* (Pursue, follow up, carry on continuously) अनवरतम् अनुष्ठा (c. 1. -तिष्ठति -ष्ठातुं), अविरतम् अनुसेव् (c. 1. -सेवते -वितुं) or उपसेव् or सेव्, नित्यं प्रवृत् (c. 1. -वर्त्तते -र्त्तितुं), अविरतप्रवृत्तिं कृ, निर्वह् (c. 10. -वाहयति -यितुं); 'to prosecute one's efforts,' अविरतयत्नं कृ, अनवरतप्रयत्नं कृ, नित्योत्साहं कृ; 'one's undertakings,' प्रारब्धानि सम्पद् (c. 10. -पादयति -यितुं); 'one's studies,' नित्याध्ययनं कृ, अविरताध्ययनं कृ, विद्यानुसेवनं कृ.—(In law) अभियुज् (c. 7. -युनक्ति -योक्तुं), अभियोगं कृ, अभिशंस् (c. 1. -शंसति -सितुं), अभिशंसनं कृ, व्यवहाराभियोगं कृ, व्यवहाराभिशंसनं कृ.

Prosecuted, *p. p.* (Carried on continuously) अविरतम् अनुष्ठितः -ता -तं or अनुसेवितः &c. or सेवितः &c., निर्वाहितः &c.—(In law) अभियुक्तः -क्ता -क्तं, अभिशस्तः -स्ता -स्तं, व्यवहाराभियुक्तः -क्ता -क्तं, व्यवहाराभिशस्तः -स्ता -स्तं.

Prosecution, *s.* (Carrying on continuously) अविरतानुष्ठानं, नित्यानुष्ठानं, नित्यानुसेवनं, नित्यसेवनं, नित्यप्रवृत्तिः *f.*, अविरतप्रवृत्तिः *f.*, नित्यप्रवर्त्तनं, निर्वाहनं; 'of efforts,' अविरतयत्नकरणं, नित्योद्योगः; 'of study,' नित्याध्ययनं, अविरताध्ययनं, विद्यानुसेवनं, विद्यानुपालनं, प्रवृत्तिः *f.*—(In law) अभियोगः, अभिशंसनं, व्यवहाराभियोगः, व्यवहाराभिशंसनं, अभियुक्तता.

Prosecutor, *s.* (One who carries on continuously) अविरतानुष्ठायी *m.* (न्), अविरतानुसेवी *m.*, निर्वाहकः.—(In law) अभियोगी *m.* (न्), अभियोक्ता *m.* (क्तृ), अभिशंसकः, व्यवहाराभियोगकृत्, व्यवहाराभिशंसनकृत् *m.*, अभियोगकारी *m.* (न्), विवादार्थी *m.*, अर्थी *m.*

Proselyte, *s.* धर्म्मपरिवर्त्तकः, धर्म्मान्तरग्राही *m.* (न्), मतान्तरग्राही *m.*, धर्म्मान्तरावलम्बी *m.*, स्वधर्म्मग्राही *m.*, स्वधर्म्मावलम्बी *m.*, अन्यधर्म्मग्राही *m.*, अन्यधर्म्मावलम्बी *m.*, स्वधर्म्मी *m.*, धर्म्मान्तरप्राप्तः, परधर्म्माश्रितः, स्वधर्म्मत्यागी *m.*, स्वधर्म्मत्यागपूर्व्वं धर्म्मान्तरग्राही *m.*; 'to Judaism,' यिहुदीयधर्म्मग्राही *m.*; 'to Christianity,' ख्रीष्टीयधर्म्मग्राही *m.*, ख्रीष्टीयमतग्राही *m.*

To **proselyte**, **proselytize**, *v. a.* धर्म्मान्तरं or स्वधर्म्मं ग्रह् in caus., मतान्तरं or स्वमतं ग्रह्, धर्म्मपरिवर्त्तकं कृ; 'to Judaism,' यिहुदीयमतं ग्रह् in caus.

Proselytism, *s.* धर्म्मपरिवर्त्तनं, धर्म्मान्तरग्रहणं, धर्म्मान्तरप्रापणं.

Proser, *s.* दीर्घोच्चारणेन विरसकथाख्यायकः, दीर्घसूत्री *m.* (न्).

Prosing, *s.* दीर्घोच्चारणेन विरसकथोपाख्यानं, दीर्घसूत्रता -त्वं.

Prosodial, **prosodical**, *a.* छान्दसः -सी -सं, छन्दःशास्त्रसम्बन्धी &c., छन्दःशास्त्रविषयकः -का -कं, छन्दोविषयकः &c., छन्दःसम्बन्धी &c.

Prosodian, *s.* छन्दःशास्त्रज्ञः, छन्दःशास्त्रविद् *m.*, छन्दःशास्त्रव्युत्पन्नः

Prosody, *s.* छन्दस् *n.*, छन्दःशास्त्रं, छन्दोविद्या, छन्दोज्ञानं.

Prosopopœia, *s.* *See* **Personification**.

Prospect, *s.* (View) दृष्टिः *f.*, दर्शनं, दृष्टिपातः, दृक्पातः.—(View of future events, expectation) भाविदर्शनं, भविष्यद्दर्शनं, भाविघटनादर्शनं, अनागतदर्शनं, मानसिकदृष्टिः *f.*, अपेक्षा, उदीक्षणं, आशा, प्रत्याशा.—(That which is presented to the view) दृक्पातविषयः, दृष्टिपातविषयः, दृष्टिगतदेशः, दृक्पातान्तर्गतदेशः, दृष्टिपातगतप्रदेशः, दृष्टिगोचरदेशः, दृग्गोचरप्रदेशः.

Prospective, *a.* भाविकालापेक्षकः -का -कं, उत्तरकालापेक्षकः &c., भाविकालसापेक्षः -क्षा -क्षं, भविष्यदपेक्षकः &c., आगामिकालसापेक्षः &c., भाविस्पृक् *m.f.n.* (श्).

Prospectively, *adv.* भाविकालापेक्षया, उत्तरकालापेक्षया, भविष्यदपेक्षया, भाविकालसापेक्षं, आगामिकालसापेक्षं, भाविकालमपेक्ष्य, उत्तरकालमपेक्ष्य.

Prospectiveness, *s.* भाविकालापेक्षा, उत्तरकालापेक्षा -क्षकता -त्वं.

Prospectus, *s.* कर्त्तव्यसूचनपत्रं, कर्त्तव्यार्थसूचनपत्रं, कर्त्तव्यार्थबोधनपत्रं.

To **prosper**, *v. a.* (Render successful, favor) सफलीकृ, सिद्धिं or सिद्धतां कृ or नी (c. 1. नयति, नेतुं) or साध् (c. 10. साधयति -यितुं), सिद्धीकृ, सिद्धिमन्तं -मतीं -मत् कृ, वृध् (c. 10. वर्धयति -यितुं), संवृध्, ऋध् (c. 10. ऋधयति -यितुं), समृद्धीकृ, उपकृ, अनुग्रह्, उपग्रह्, प्रतिपाल्, अनुपाल्.

To **prosper**, *v. n.* (Thrive) ऋध् (c. 4. ऋध्यति, c. 5. ऋध्नोति, अर्धितुं), समृध्, समृद्धीभू, समृद्धः -द्धा -द्धं भू, वृध् (c. 1. वर्धते -र्धितुं), संवृध्, विवृध्, एध् (c. 1. एधते -धितुं), समेध्, सम्पत्तिं गम्, समृद्धिम् इ or गम्, सश्रीकः -का -कं भू, श्रीमान् -मती &c. भू or अस्.—(Be successful) सिध् (c. 4. सिध्यति, सेद्धुं), सिद्धिं गम् or इ, कृतार्थीभू, प्राप्तार्थीभू, सिद्धार्थीभू, सम्पद् (c. 4. -पद्यते -पत्तुं), सम्पदं or सम्पत्तिं गम्, सफलीभू, सफलः -ला -लं भू.

Prosperity, *s.* समृद्धिः *f.*, साफल्यं, ऋद्धिः *f.*, सम्पत्तिः *f.*, सम्पद् *f.*, सुसम्पद् *f.*, वृद्धिः *f.*, संवृद्धिः *f.*, उदयः, पुण्योदयः, अभ्युदयः, श्रीः *f.*, लक्ष्मीः *f.*, सौभाग्यं, भाग्यं, भूतिः *f.*, क्षेमः -मं, एधा, कुशलं -लता, कौशल्यं, शर्म्म *n.*

(न्), कल्याणं, मङ्गलं, माङ्गल्यं, भद्रं, शुभं, शिवं, श्रुतिः *f.*, रिष्टं, उपचयः; 'season of prosperity,' समृद्धिसमयः, समृद्धिकालः, उदयकालः.—(Success) सिद्धिः *f.*, साध्यसिद्धिः *f.*, अर्थसिद्धिः *f.*, कृतार्थता सफलता, साफल्यं; 'national,' योगक्षेमः.

PROSPEROUS, *a.* (Thriving) समृद्धः -द्धा -द्धं, वर्धमानः -ना -नं, वर्धिष्णुः -ष्णुः -ष्णु, श्रीमान् -मती -मत् (त्), लक्ष्मीवान् &c., क्षेमवान् &c., वृद्धिमान् &c., समृद्धिमान् &c., उदयी -यिनी -यि (न्), शर्म्मवान् &c., विपद्रहितः -ता -तं, निरापद् *m. f. n.*, सुस्थः -स्था -स्थं, ऋध्यमानः -ना -नं. समेधमानः &c., श्रीलः -ला -लं, सश्रीकः -का -कं, लक्षणः -णा -णं, श्रीयुक्तः -क्ता -क्तं, अधिकर्द्धिः -र्द्धिः -र्द्धि.—(Successful) सफलः -ला -लं, सिद्धिमान् &c., सिद्धः -द्धा -द्धं, सिद्धार्थः -र्था -र्थं, कृतार्थः &c.—(Fortunate, favorable, auspicious) कल्याणः -णा -णं, कल्याणी &c., मङ्गलः -ला -लं, माङ्गलिकः -की -कं, शुभः -भा -भं, शिवः -वा -वं, शुभान्वितः -ता -तं, सौभाग्यवान् &c., भाग्यवान् &c., धन्यः -न्या -न्यं, कुशलः -ला -लं, क्षेमः -मा -मं, क्षेम्यः -म्या -म्यं, भद्रः -द्रा -द्रं, प्रसन्नः -न्ना -न्नं, शङ्करः -रा -रं, शिवङ्करः &c., श्रीकरः &c.

PROSPEROUSLY, *adv.* समृद्धा, सम्पदा, सुसम्पदा, श्रिया, सक्षेमं, सौभाग्येन, कौशल्येन, सकल्याणं, कल्याणं, कुशलं, शुभं, अभ्युदयेन, सफलं, अवृथा.

PROSPICIENCE, *s.* प्रदर्शनं. *See* FORESIGHT.

PROSTITUTE, *s.* वेश्या, गणिका, पण्यस्त्री, वारस्त्री, साधारणस्त्री, वाराङ्गना, भोग्या, पण्याङ्गना, सामान्या स्त्री, बन्धुरा. *See* HARLOT.

PROSTITUTE, *v. a.* गर्हकर्म्मार्थं or कुत्सितकर्म्मार्थं प्रयुज् (c. 7. -युनक्ति -युंक्ते -योक्तुं) or उपयुज् or विनियुज्, गर्हकर्म्मणि or कुत्सितकर्म्मणि नियुज्, पण्यं -ण्यां कृ, साधारणीकृ, सर्व्वोपभोग्यं -ग्यां कृ.

PROSTITUTION, *s.* वेश्यात्वं, वेश्यावृत्तिः *f.*, पौंश्चल्यं, वारसेवा, भगवृत्तिः *f.*, भगव्यापारः, भगजीविका, वेश्याजीविका. *See* HARLOTRY.—(Devoting to infamous purposes) गर्हकर्म्मार्थं प्रयोगः, कुत्सितकर्म्मार्थं विनियोगः, गर्हकर्म्मणि or कुत्सितकर्म्मणि नियोजनं, पण्यकरणं, सर्व्वोपभोग्यकरणं; 'wages of prostitution,' पण्यस्त्रिया भृतिः *f.* or भाटकं, वेशः.

PROSTRATE, *a.* (Lying at length) अवमूर्द्धशयः -या -यं, क्षिप्तदेहः -हा -हं, भूमिशायी -यिनी -यि (न्), भूमिगतः -ता -तं, अवनिगतः &c.—(In supplication, adoration, &c.) साष्टाङ्गपतितः -ता -तं, साष्टाङ्गप्रणतः &c., साष्टाङ्गनमस्कारं प्रणिपतितः &c., चरणगतः -ता -तं, चरणपतितः -ता -तं, पादपतितः &c., दण्डवत् पतितः &c., पादप्रणतः &c., प्रणिपतितः &c., प्रपतितः &c., उपनतः &c., प्रणतः &c., नतः &c.

To PROSTRATE, *v. a.* (Throw down) पत् (c. 10. पातयति -यितुं), निपत्, अधःपत्, ध्वंस् (c. 10. ध्वंसयति -यितुं), प्रध्वंस्, नश् (c. 10. नाशयति -यितुं), विनश्, प्रणश्, अधरोत्तरीकृ, भूमिं गम् in caus.—(One's self in reverence, &c.) प्रणिपत् (c. 1. -पतति -तितुं), साष्टाङ्गं or साष्टाङ्गपातं प्रणिपत् or पत्, प्रणिपतनं कृ, प्रणम् (c. 1. -णमति -णन्तुं), कायं प्रणम्, साष्टाङ्गप्रणामं कृ, साष्टाङ्गनमस्कारं कृ, अष्टाङ्गपातं कृ, अष्टाङ्गप्रणामं कृ, प्रणिपातं कृ, पादप्रणामं कृ, चरणप्रणामं कृ, दण्डवत् पत् or भू or पतनं कृ, चरणपतनं कृ, पादपतनं कृ, दण्डवत् प्रणामं कृ.—(The strength) सर्व्वशक्तिं हृ (c. 1. हरति, हर्त्तुं), शक्तिपातं कृ, शक्तिनाशं कृ, क्षीणशक्तिं कृ.

PROSTRATED, *p. p.* पातितः -ता -तं, निपातितः &c., अधःपातितः &c., दण्डवत् पातितः &c., प्रणिपातितः &c., प्रणिपतितः &c., भूमिं गमितः &c.—(As strength) हृतशक्तिः -क्तिः -क्ति, नष्टशक्तिः &c., क्षीणशक्तिः &c., गतशक्तिः &c., हृतौजाः -जाः -जः (स्), गतौजाः &c., नष्टौजाः &c.

PROSTRATION, *s.* (Of the body in reverence, &c.) प्रणिपातः, प्रणिपतनं, अष्टाङ्गपातः, अष्टाङ्गप्रणिपातः, साष्टाङ्गप्रणामः, साष्टाङ्गपातः साष्टाङ्गनमस्कारः, दण्डवत् पतनं or पातः, दण्डवत् प्रणामः, चरणपतनं पादपतनं, पादप्रणामः, देहपातनं, शरीरपातनं, प्रपतनं.—(Of strength) शक्तिपातः, शक्तिहानिः *f.*, सत्त्वहानिः *f.*, शक्तिक्षयः, विस्रंसः -सा, ग्लानिः *f.*—(Of spirits) अवसादः, अवसन्नता, विषादः, विषण्णता, ग्लानिः *f.*

PROSY, *s.* विरसः -सा -सं, अरसिकः -का -कं, फल्गुः -ल्गुः -ल्गु. *See* PROSER.

To PROTECT, *v. a.* (Guard) रक्ष् (c. 1. रक्षति -क्षितुं), अभिरक्ष्, परिरक्ष्, संरक्ष्, प्रतिरक्ष्, गुप् (c. 1. गोपायति, c. 10. गोपयति -यितुं), अनुगुप्, निर्गुप्, अभिगुप्, प्रगुप्, संगुप्, अभिसंगुप्, पाल्, परिपाल्, अनुपाल्, प्रतिपाल्, अभिपाल्, सम्पाल्, उपपाल्, पा, परिपा, त्रै, परित्रै, संत्रै, तृ in caus., अव्, पुष्, गुप्तिं कृ, गोपनं कृ, संगोपनं कृ, रक्षणं कृ, संरक्षणं कृ, पालनं कृ, परिपालनं कृ, पोषणं कृ.

PROTECTED, *p. p.* रक्षितः -ता -तं, संरक्षितः &c., अभिरक्षितः &c., परिरक्षितः &c., सुरक्षितः &c., गुप्तः -प्ता -प्तं, गोपितः -ता -तं, गोपायितः &c., सङ्गोपितः &c., पालितः &c., उपपालितः &c., अनुपालितः &c., प्रतिपालितः &c., त्रातः &c., त्राणः -णा -णं, अवितः -ता -तं, तारितः &c., अभ्युपपन्नः -न्ना -न्नं, आश्रितः &c., समाश्रितः &c.

PROTECTION, *s.* (The act) रक्षा, रक्षणं, संरक्षणं, अभिरक्षा -क्षणं, परिरक्षणं, प्रतिरक्षणं, गुप्तिः *f.*, गोपनं, सङ्गोपनं, पालनं, परिपालनं, प्रतिपालनं, अनुपालनं, अभिपालनं, त्राणं, परित्राणं, अवनं, क्षेमकरणः, क्षेमः, अभ्युपपत्तिः *f.*—(That which protects or shelters) आश्रयः, संश्रयः, समाश्रयः, अयनं, आश्रयणं, शरणं, शरण्यता, शरण्यं; 'to seek the protection of, go for protection,' आश्रि (c. 1. -श्रयति -यितुं), संश्रि, समाश्रि, शरणार्थं गम्.—(Favor, countenance) प्रसादः, अनुग्रहः, सङ्ग्रहः, अनुपालनं, आश्रयः.—(Writing that protects) अभयपत्रं.

PROTECTIVE, *a.* रक्षकः -का -कं, संरक्षकः &c., पालकः -का -कं, प्रतिपालकः &c., गोपकः &c., रक्षाकारी -रिणी -रि (न्), पौष्टिकः -की -कं.

PROTECTOR, *s.* रक्षकः, रक्षी *m.* (न्), रक्षिता *m.* (तृ), गोप्ता *m.* (प्तृ), गोपकः, गोपायकः, गोपी *m.* (न्), गोपः, संरक्षकः, पालकः, प्रतिपालकः, पालयिता *m.* (तृ), पालः, पः in comp., त्राता *m.* (तृ), भयत्राता *m.*, शरणं, शरण्यं, आश्रयः, आश्रयभूतः, शरणभूतः, आश्रयदाता *m.* (तृ).

PROTECTRESS, *s.* रक्षिका, रक्षिणी, रक्षित्री, पालिका, पालयित्री, रक्षाकारिणी, गोपिनी, गोपिका, गोपी, त्रायन्ती, आश्रयदात्री.

PROTEGÉ, *s.* आश्रितः, संश्रितः, रक्षणीयः, पालनीयः, पोष्यः, शरणागतः.

To PROTEND, *v. a.* प्रसृ (c. 10. -सारयति -यितुं), प्रसारणं कृ. *See To* EXTEND.

To PROTEST, *v. n.* (Declare solemnly) दृढनिश्चयपूर्व्वं or दृढप्रतिज्ञापूर्व्वं वद्, दृढोक्त्या वद्, दार्ढ्येन वद्, दृढं वद्, दृढोक्तिपूर्व्वं ख्या or आख्या or प्रख्या, दृढोक्तिं कृ.—(Make a solemn declaration expressive of dissent or opposition) अस्वीकारसूचकं दृढवाक्यं वद् or दृढवादं कृ or दृढनिषेधं कृ, असम्मतिसूचकां दृढोक्तिं कृ, विरोधसूचकां दृढप्रतिज्ञां कृ, दृढोक्तिपूर्व्वम् अस्वीकारं ख्या in caus. or ज्ञा in caus., दृढनिश्चयपूर्व्वं or दृढप्रतिज्ञापूर्व्वम् असम्मतिं ज्ञा in caus. or प्रकाश् (c. 10. -काशयति -यितुं), दृढोक्तिपूर्व्वं निषेधं कृ, दृढवाक्यपूर्व्वं न सम्मन्ये or न स्वीकरोमि इति वद्, दृढोक्तिपूर्व्वं मतान्तरं ख्या or प्रकाश्, दृढप्रतिज्ञापूर्व्वं न सम्मन् or विपरीतं मन् or अन्यथा मन्.—(In writing) असम्मतिलेखं प्रकाश्, अस्वीकारपत्रं प्रकाश्.

PROTEST, *s.* अस्वीकारसूचकं दृढनिषेधवाक्यं, असम्मतिसूचकं दृढविरोधवाक्यं, अस्वीकारवादः, दृढोक्तिपूर्व्वो निषेधः, दृढप्रतिज्ञापूर्व्वो निषेधः, दृढनि-

श्चयपूर्व्वम् अस्वीकारप्रकाशनं, दृढप्रतिज्ञापूर्व्वम् असम्मतिप्रकाशनं, दृढोक्तिपूर्व्वं मतान्तरख्यापनं or असम्मतिख्यापनं or विपरीतमतख्यापनं, दृढनिश्चयपूर्व्वम् अस्वीकारवाक्यं or असम्मतिवाक्यं or अनङ्गीकारवाक्यं. —(In writing) दृढनिषेधसूचकं or दृढविरोधार्थकम्, अस्वीकारपत्रं or असम्मतिपत्रं or अनङ्गीकारपत्रं.

PROTESTANT, *s.* असम्मतः, अस्वीकारवादी *m.* (न्), अस्वीकर्त्ता *m.* (र्तृ), रोमीयमतविरोधी *m.* (न्), रोमीयमतविरुद्धः, रोमीयधर्म्मासम्मतः.

PROTESTATION, *s.* (Solemn declaration) दृढोक्तिः *f.*, दृढवाक्यं, दृढवादः, दृढप्रतिज्ञापूर्व्वो वादः, दृढभाषणं, दृढप्रतिज्ञापूर्व्वं भाषणं. *See* PROTEST.

PROTEUS, *s.* (Taking any shape at will) कामरूपी *m.* (न्), कामरूपः, छद्मरूपी *m.*, छद्मरूपः, दुः *m.*

PROTOTYPE, *s.* मूलरूपं, मूलप्रतिमा, मूलमूर्त्तिः *f.*, आदर्शः, मूलादर्शः, मूलं, प्रतिरूपं, प्रतिकृतिः *f.*, प्रत्युपमा -मानं, प्रतिमूर्त्तिः *f.*

To PROTRACT, *v. a.* (Lengthen) दीर्घीकृ, द्राघ (nom. द्राघयति -यितुं). *See To* PROLONG, LENGTHEN.—(Delay) विलम्ब्. *See* the word.

PROTRACTED, *p. p.* दीर्घः -र्घा -र्घं, द्राघिमवान् -वती -वत् (त्), विलम्बितः -ता -तं, चिरायितः &c., चिरस्थः -स्था -स्थं, चिरस्थितः -ता -तं; 'sound,' प्लुतः -तं.

PROTRACTION, *s.* दीर्घीकरणं, द्राघिमा *m.* (न्), दीर्घता, विलम्बः -म्बनं.

To PROTRUDE, *v. a.* (Thrust forward) प्रसृ (c. 10. -सारयति -यितुं), वहिःसृ, वहिर् निःसृ, वहिर् गम् (c. 10. गमयति -यितुं), प्रसारणं कृ.

To PROTRUDE, *v. n.* वहिः सृ (c. 1. सरति, सर्त्तुं), प्रसृ, वहिर् निःसृ, वहिर् गम् (c. 1. गच्छति, गन्तुं), वहिर् भू, वहिःस्था, वहिर् वृत्, अतिवृत्, अतिक्रम्, उद्भिद् in pass. (-भिद्यते), प्रोद्भिद्, उद्भेदं कृ, प्रलम्ब्, वहिर् लम्ब्. *See To* PROJECT, *v. n.*

PROTRUDED, *p. p.* वहिर्गतः -ता -तं वहिःसृतः &c., वहिर्भूतः -ता -तं, वहिःस्थितः &c., वहिर्वर्त्तितः &c., निःसारितः &c., वहिःसारितः &c., वहिर् निःसारितः &c., प्रसृतः &c., प्रसारितः &c., उद्भिन्नः -न्ना -न्नं, प्रोद्भिन्नः &c.

PROTRUDING, *part.* वहिःस्थः -स्था -स्थं,वहिर्वर्त्ती -र्त्तिनी -र्त्ति (न्), वहिर्गतः -ता -तं, वहिर्लम्बः &c. *See* PROJECTING.

PROTRUSION, *s.* वहिर्वर्त्तनं, वहिःसरणं, उद्भेदः, प्रोद्भेदः. *See* PROJECTION.

PROTUBERANCE, *s.* (Tumour, prominence) स्फोटः, विस्फोटः, गुल्मः, गण्डः -ण्डका, शोफः, आभोगः, उन्नतिः *f.*, प्रलम्बता. *See* PROJECTION.

PROTUBERANT, *a.* उन्नतः -ता -तं, प्रलम्बः -म्बा -म्बं, वहिर्लम्बः &c., गुल्मी -ल्मिनी -ल्मि (न्), आभोगी &c., वृहद्विस्तेशः -शा -शं. *See* PROJECTING.

To PROTUBERATE, *v. n.* उन्नतः -ता -तं भू, प्रलम्ब्, वहिर्लम्ब्. *See To* PROJECT, *v. n.*

PROUD, *a.* गर्व्वितः -ता -तं, गर्व्वी -र्व्विणी -र्व्वि (न्), सगर्व्वः -र्व्वा -र्व्वं, गर्व्वरः -रा -रं, गर्व्ववान् -वती -वत् (त्), गर्व्वितचित्तः -त्ता -त्तं, दृप्तः -प्ता -प्तं, सदर्पः -र्पा -र्पं, दर्पवान् &c., दृप्तः -प्ता -प्तं, दर्पी &c., मानी &c., मानवान् &c., अभिमानी &c., अभिमानवान् &c., साभिमानः -ना -नं, अहङ्कारी &c., अहङ्कारवान् &c., अहंयुः -युः -यु, साहङ्कारः -रा -रं, अहम्मानी &c., प्रगल्भः -ल्भा -ल्भं, उद्धतः -ता -तं, उद्धतचित्तः -त्ता -त्तं, उद्धतमनाः -नाः -नः (स्), समुद्धतः &c., प्रौढः -ढा -ढं, उन्नद्धः -द्धा -द्धं, उन्नद्धचेताः &c., समुन्नद्धः &c., साटोपः -पा -पं, आटोपी &c., उत्सिक्तः -क्ता -क्तं, उन्नतशिरस्कः -स्का -स्कं, उन्नतमनस्कः &c., समुन्नतचित्तः &c., ऊर्द्ध्वदृष्टिः -ष्टिः -ष्टि, अवलिप्तः -प्ता -प्तं, दर्पध्मातः &c., सावहेलः -ला -लं, प्रधृष्टः -ष्टा -ष्टं; 'proud of one's beauty,' रूपगर्व्वितः -ता -तं, रूपाभिमानी &c.; 'of one's birth,' कुलाभिमानी &c.; 'of one's learning,' पाण्डित्याभिमानी &c., पण्डितम्मन्यः -न्या -न्यं; 'of the body,' देहमानी &c.; 'to be proud,' गर्व्व् (c. 1. गर्व्वति -र्व्वितुं, c. 10. गर्व्वयते -यितुं), गर्व्वितः &c. भू, सगर्व्वीभू, दृप् (c. 4. दृप्यति, दर्प्तुं, द्रप्तुं), मन् (c. 4. मानयते -यितुं), प्रगल्भ् (c. 1. -गल्भते -ल्भितुं); 'to render proud,' दृप् (c. 10. दर्पयति -यितुं), गर्व्वितं -तां कृ.

PROUDLY, *adv.* सगर्व्वं, सदर्पं, समानं, साभिमानं, साहङ्कारं, साटोपं, सोन्मादं, गर्व्वितं, उन्नतचेतसा, सावहेलं, सावलेपं, गर्व्वितवत्, दृप्तवत्, प्रगल्भवत्.

PROVABLE, *a.* प्रमेयः -या -यं, साधनीयः &c., साध्यः -ध्या -ध्यं, उपपादनीयः &c., उपपाद्यः -द्या -द्यं, प्रतिपाद्यः &c., प्रतिपादनीयः &c., समर्थनीयः &c., सूच्यः -च्या -च्यं.

To PROVE, *v. a.* (Establish as truth) साध् (c. 10. साधयति -यितुं), सिद्धीकृ, प्रमाण (nom. प्रमाणयति -यितुं), प्रमाणीकृ, सप्रमाणं -णां कृ, उपपद् (c. 10. -पादयति -यितुं), प्रतिपद्, विभू (c. 10. -भावयति -यितुं), भू, निर्णी (c. 1. -णयति -णेतुं), सत्याकृ, सत्यीकृ; 'by testimony or other evidence,' साक्षिणा or साक्ष्येण or प्रमाणेन साध् or भू or उपपद्.—(Evince, demonstrate) सूच् (c. 10. सूचयति -यितुं), दृश् (c. 10. दर्शयति -यितुं), अभिदृश्, अनुदृश्, निर्दिश् (c. 6. -दिशति -देष्टुं), विनिर्दिश्, प्रदिश्, निर्णी, समर्थ (c.10. -सर्थयति -यितुं), प्रकाश्. —(Try, ascertain, bring to the test) परीक्ष् (c. 1.-ईक्षते-क्षितुं), परीक्षां कृ, निरूप्, ज्ञा in des., निर्णी, निश्चि, अनुभू, प्रतीतिं कृ.—(Experience) अनुभू, अनुभवं कृ, अनुभूतिं कृ.

To PROVE, *v. n.* (Be found, turn out) सम्भू (c. 1. -भवति -वि॑), सम्पद् (c. 4. -पद्यते -पत्तुं), उत्पद्, उपपद्, विद् in pass. (विद्यते), सिध् (c. 4. सिध्यति -ते), आपत् (c. 1. -पतति -तितुं), संवृत्, वृत्.—(Be ascertained or shown to be true) निर्णी in pass. (-णीयते), निश्चि in pass. (-चीयते), सूच् in pass. (सूच्यते), अनुभू in pass. (-भूयते), विभू, प्रमाणीभू, प्रती in pass. (-ईयते).

PROVED, *p. p.* (Established as true) सिद्धः -द्धा -द्धं, साधितः -ता -तं, उपपादितः &c., उपपन्नः -न्ना -न्नं, प्रमाणितः -ता -तं, प्रमाणीकृतः &c., भावितः &c., विभावितः &c., प्रतिपादितः &c., प्रमितः -ता -तं.—(Evinced, demonstrated) सूचितः -ता -तं, दर्शितः &c., निर्दिष्टः -ष्टा -ष्टं, निर्णीतः -ता -तं, समर्थितः &c.—(Tested, ascertained) परीक्षितः -ता -तं, निरूपितः -ता -तं, निश्चितः &c., निर्णीतः &c., अनुभूतः &c., प्रतीतः -ता -तं; 'thing to be proved,' साध्यं, प्रमेयं; 'proved by evidence,' साक्षिभावितः &c., साक्ष्यसिद्धः &c.

PROVENDER, *s.* पाथेयं, यात्रिकं, शम्बलं, सम्बलः -लं, खाद्यद्रव्यं, भक्ष्यद्रव्यं, पश्वादिखाद्यद्रव्यं, शुष्कतृणादि *n.*, शुष्कघासादि, माषादि, शस्यादि.

PROVER, *s.* उपपादकः, सिद्धिकर्त्ता *m.* (र्तृ), साधकः, प्रमाता *m.* (तृ), प्रतिपादकः, उपपत्तिकारी *m.* (न्), प्रतिपत्तिकारकः, निर्णेता *m.*, विभावकः.

PROVERB, *s.* लोकवाक्यं, लोकोक्तिः *f.*, प्राचीनवाक्यं, पुराणवाक्यं, लोकप्रचलितवाक्यं, वाक्यं, वचनं, वाक् *f.* (च्), सूत्रं, प्राचीनसूत्रं, पुराणसूत्रं, उपमानं, उपदेशवाक्यं, उपदेशसूत्रं, न्यायः, न्यायवाक्यं.

PROVERBIAL, *a.* (Mentioned in a proverb) प्राचीनसूत्रप्रोक्तः -क्ता -क्तं, पुराणसूत्रप्रोक्तः &c., लोकप्रोक्तः &c., लोकोक्तः &c.—(Comprised in a proverb, current as one) प्राचीनसूत्ररूपः -पा -पं, पुराणसूत्ररूपः &c., लोकप्रसिद्धः -द्धा -द्धं, लोकप्रचलितः -ता -तं, लोकप्रचलः -ला -लं, न्यायरूपः &c., न्यायप्रसिद्धः &c.

PROVERBIALLY, *adv.* लोकप्रसिद्धं, जनप्रसिद्धं, प्राचीनसूत्रानुसारेण.

To PROVIDE, *v. a.* (Procure or prepare beforehand) अग्रे or पूर्व्वं कॢप् (c. 10. कल्पयति -यितुं) or उपकॢप् or परिकॢप् or सम्प्रकॢप् or

सोपकारद्रव्याणि कॢप् or विधा or उपस्था in caus. or in caus. or सम्भृ or पुरस्कृ or प्रस्तुतीकृ or निर्मा, अग्रे द्रव्यपरिकल्पनं कृ or द्रव्यसम्भारं कृ or उपकरणसम्भारं कृ or द्रव्यसामग्र्यं परिकॢप्. *See To* PREPARE.—(Make a previous stipulation) पूर्व्वनियमं कृ, पूर्व्वपणं कृ, पूर्व्वसन्धिं कृ, पूर्व्वसङ्केतं कृ, पूर्व्वप्रतिज्ञां कृ.—(Provide against or for) expressed by some of the above roots in conjunction with अर्थं or अर्थे in comp.; 'to provide necessaries against a time of want,' आपदर्थं द्रव्याणि सम्भृ or आपदर्थं द्रव्यसम्भारं कृ; 'to provide thick clothing against the cold,' शीतनिवारणार्थं स्थूलवस्त्राणि कॢप्; 'to provide for another,' परार्थं प्रयोजनीयद्रव्याणि परिकॢप् or परं प्रयोजनीयद्रव्ययुक्तं कृ; 'to provide for another comfortably,' परस्वास्थ्यं कृ or अनु, परसुस्थतां कृ, परं सुस्थं कृ; 'to provide for, take measures against,' पूर्व्वोपायं कृ, अग्रे उपायं कृ, पूर्व्वोपायं प्रयुज्, उपायप्रयोगं कृ.

PROVIDED, *p. p.* (Furnished or prepared beforehand) अग्रे परिकल्पितः -ता -तं or परिकॢप्तः -प्ता -प्तं or उपकॢप्तः -प्ता -प्तं or सम्प्रकॢप्तः &c. or कल्पितः -ता -तं, पूर्व्वं सम्भृतः -ता -तं or युक्तः -क्ता -क्तं or समायुक्तः &c. or संयुक्तः &c. or अन्वितः -ता -तं or समन्वितः &c. or उपेतः &c. or संहितः &c. or निर्म्मितः -ता -तं; 'provided for,' प्रयोजनीयद्रव्ययुक्तः -क्ता -क्तं, सर्व्वसोपकारद्रव्ययुक्तः &c., जातस्वास्थ्यः -स्थ्या -स्थ्यं, अन्नवस्त्रयुक्तः &c.—(Stipulated previously) पूर्व्वनियमितः -ता -तं, पूर्व्वपणितः &c., पूर्व्वसङ्केतितः &c.; 'provided that, with this condition,' पूर्व्वनियमे कृते, पूर्व्वसङ्केते कृते, एतेन सन्धिना.

PROVIDENCE, *s.* (Fore-sight, fore-thought) पूर्व्वदृष्टिः *f.*, अग्रदृष्टिः *f.*, दूरदृष्टिः *f.*, दूरदर्शनं, दीर्घदृष्टिः *f.*, दीर्घदर्शनं, पूर्व्वचिन्ता, अग्रचिन्ता, पूर्व्वविवेचनं, पूर्व्वविचारः -रणं -णा, अग्रविचारः, भविष्यद्दर्शनं, भविष्यच्चिन्ता, भाविचिन्ता, भाविकालावलोकनं, पूर्व्वविमर्शः, प्रसमीक्षा.—(The providence of God) ईश्वरानुसन्धानं, ईश्वरविधिः *m.*, ईश्वरविधानं.—(Divine Providence himself) विधाता *m.* (तृ), धाता *m.*, अनागतविधाता *m.*, भविष्यद्विधाता *m.*, विधिः *m.*, ईश्वरः, परमेश्वरः.

PROVIDENT, *a.* दीर्घदर्शी -र्शिनी -र्शि (न्), दूरदर्शी &c., दीर्घदृष्टिः -ष्टिः -ष्टि, दूरदृष्टिः &c., परिणामदर्शी &c., अग्रदर्शी &c., भविष्यद्दर्शी &c., अनागतदर्शी &c., भविष्यच्चिन्तकः -का -कं, भाविचिन्तकः &c., पूर्व्वविचारी &c., पूर्व्वविवेकी &c., अग्रज्ञः -ज्ञा -ज्ञं.

PROVIDENTIAL, *a.* ईश्वरकृतः -ता -तं, ईश्वरविहितः &c., ईश्वरानुसन्धानप्रयुक्तः -क्ता -क्तं, ईश्वरविधानप्रयुक्तः &c., विधातृकृतः -ता -तं, विधातृसिद्धः -द्धा -द्धं, ईश्वरसिद्धः &c.

PROVIDENTIALLY, *adv.* ईश्वरविधानेन, ईश्वरविधिना, ईश्वरानुसन्धानात्, दिष्ट्या.

PROVIDENTLY, *adv.* दीर्घदृष्ट्या, अग्रदर्शनात्, परिणामदर्शनात्, भविष्यद्दर्शनात्, चिन्तापूर्व्वं, विवेचनापूर्व्वं, पूर्व्वविचारेण, पूर्व्वविचारं कृत्वा, पूर्व्वविवेचनं कृत्वा, प्रसमीक्ष्य, प्रविमृश्य.

PROVIDER, *s.* परिकल्पकः, उपकल्पकः. *See* PROCURER, &c.

PROVINCE, *s.* (Division of a kingdom) मण्डलं, चक्रं, देशः, प्रदेशः, विषयः, राष्ट्रं, निर्गः, ग्रामशतं; 'governor of a province,' मण्डलेश्वरः, मण्डलपतिः *m.*, मण्डलाध्यक्षः, मण्डलाधिपतिः *m.*, माण्डलिकः.—(Peculiar office or business) स्वधर्म्मः, स्वकर्म्म *n.* (न्), कर्म्म *n.*, कार्य्यं, अधिकारः, प्रकरणं, क्रिया, नियोगः, निबन्धनं; 'woman's province,' स्त्रीधर्म्मः, स्त्रीनिबन्धनं.—(Department of science, &c.) प्रकरणं, देशः, चक्रं, विषयः.

PROVINCIAL, *a.* दैशिकः -की -कं, देशीयः -या -यं, प्रदेशीयः &c., देश्यः -श्या -श्यं, देशी -शिनी -शि (न्), माण्डलिकः -की -कं, मण्डलसम्बन्धी &c., राष्ट्रिकः -की -कं, राष्ट्रीयः -या -यं, देश in comp., ग्रामीयः -या -यं, ग्राम्यः -म्या -म्यं, जानपदः -दी -दं.

PROVINCIAL, *s.* देशस्थः, देशजः, देशवासी *m.* (न्), ग्रामस्थः, ग्राम्यजनः.

PROVINCIALISM, *s.* देशभाषा, प्रदेशिकभाषा, ग्रामीयभाषा, ग्रामिकभाषा.

PROVISION, *s.* (Act of providing) उपकल्पनं, परिकल्पनं, कल्पनं, सम्भारः, विधानं, उपस्थापनं, उपपादनं, प्रस्तुतीकरणं.—(Measures taken beforehand) पूर्व्वोपायः, अग्रोपायः, उपायः, पूर्व्वकल्पना, पूर्व्वविधानं; *see* PREPARATION.—(Store or stock collected) सम्भारः, संग्रहः, सञ्चयः, सञ्चितं, सामग्री -ग्र्यं, साहित्यं; 'provision of victuals,' अन्नसम्भारः, अन्नसंग्रहः, खाद्यद्रव्यसामग्री; 'of materials,' द्रव्यसामग्री, उपकरणसामग्री, उपकरणसम्भारः.—(Victuals, provisions) अन्नं, भोजनं, भोज्यं, भक्ष्यं, आहारः, खाद्यद्रव्यं, भक्ष्यद्रव्यं, पाथेयं, यात्रिकं, निर्वाहः, शम्बलं, सम्बलः -लं; 'furnished with provisions,' खाद्यद्रव्ययुक्तः -क्ता -क्तं, पाथेयवान् -वती -वत् (त्).—(Previous stipulation) पूर्व्वनियमः, पूर्व्वसन्धिः *m.*, पूर्व्वसङ्केतः, पूर्व्वप्रतिज्ञा, पूर्व्वपणः, पूर्व्वसमयः, *See* PROVISO.

To PROVISION, *v. a.* (Furnish with provisions) खाद्यद्रव्ययुक्तं -क्तां कृ, खाद्यद्रव्याणि सम्भृ or उपकॢप्, खाद्यद्रव्यसम्भारं कृ, अन्नसम्भारं कृ, खाद्यद्रव्यसम्भृतं -तां कृ.

PROVISIONAL, *a.* आपाततः स्थापितः -ता -तं, आपाततो नियोजितः -ता -तं, सामयिकः -की -कं, प्रासङ्गिकः &c., समयोपयोगी -गिनी -गि (न्), समयानुरूपः -पा -पं, अल्पकालीनः -ना -नं.

PROVISIONALLY, *adv.* आपाततस्, यथासमयं, यथाप्रयोजनं, अल्पकालमात्रं.

PROVISIONARY, PROVISORY, *a.* *See* PROVISIONAL.

PROVISO, *s.* उपनियमः, प्रकरणं, नियमप्रकरणं, सङ्केतः, उपसङ्केतः, प्रतिबन्धः, अनुबन्धः, नियमानुबन्धः, नियमपश्चानुबन्धः, नियमपश्चाङ्गं, नियमपश्चखण्डः, नियमपश्चावयवः, नियमैकदेशः; 'to annex one,' अर्थान्तरोपन्यासं कृ.

PROVISORY, *a.* (Conditional) साङ्केतिकः -की -कं, सप्रतिबन्धः -न्धा -न्धं

PROVOCATION, *s.* (Act of exciting anger) प्रकोपः -पणं, क्रोधकरणं, कोपकरणं, क्रोधोत्पादनं, कोपोत्पादनं, क्रोधोद्दीपनं, क्रोधोत्तेजनं.—(Cause of anger) कोपकारणं, क्रोधकारणं, कोपहेतुः *m.*—(Act of exciting) उत्तेजनं, उद्दीपनं, उद्बोधनं, प्रवर्त्तनं.

PROVOCATIVE, *a.* उद्दीपकः -का -कं, अग्निवर्धकः &c., क्षुधाजनकः &c.

PROVOCATIVE, *s.* अग्निवर्धनं, रोचकः -कं, रुचकं, प्ररोचनं, खर्जिका.

To PROVOKE, *v. a.* (Excite to anger) प्रकुप् (c. 10. -कोपयति -यितुं), कुप्, क्षुभ् (c. 10. क्रोधयति -यितुं), कोपं or क्रोधं जन् or उत्तिज् or उद्दीप् or उत्पद् (c. 10. -पादयति -यितुं), कोपोत्पादनं कृ, क्रोधोत्तेजनं कृ, क्रोधोद्दीपनं कृ.—(Excite) उद्दीप् (c. 10. -दीपयति -यितुं), उत्तिज् (c. 10. -तेजयति -यितुं), उत्तप् in caus., प्रवृत् in caus., प्ररुच् in caus.—(Challenge) आह्वे, समाह्वे, उपाह्वे.

PROVOKED, *p. p.* प्रकोपितः -ता -तं, प्रकुपितः &c., कुपितः &c., कोपितः &c., उपजातकोपः -पा -पं, जातकोपः &c., इद्धमन्युः -न्युः -न्यु, इद्धक्रोधः -धा -धं, उद्दीप्तमन्युः &c., कोपदीप्तः -प्ता -प्तं, उत्पन्नमन्युः &c., उत्तेजितः -ता -तं, उद्दीपितः &c., उत्तापितः &c., उत्तप्तः -प्ता -प्तं, सन्तप्तः &c., सन्तापितः &c.

PROVOKING, *part.* or *a.* प्रकोपजनकः -का -कं, कोपजनकः &c., क्रोधजनकः &c., प्रकोपकः -का -कं, क्रोधोत्पादकः &c., क्रोधोद्दीपकः &c., कोपोद्दीपकः &c., क्रोधोत्तेजकः &c., उत्तेजकः &c.. उद्दीपकः &c., उद्बोधकः &c.

PROVOKINGLY, *adv.* यथा कोपो जायते तथा, यथा क्रोध उद्दीप्यते तथा.

PROVOST, *s.* अध्यक्षः, अधीशः, अधिकारी *m.* (न्), अधिपतिः, श्रेष्ठी *m.*

PROW, *s.* नौकाग्रं, नौकाग्रभागः, नौपूर्व्वभागः, नौकोदग्रभागः.

PROWESS, *s.* पराक्रमः, विक्रमः, सुविक्रमः, शौर्य्यं, वीर्य्यं, सुवीर्य्यं, रणशौर्य्यं, रणोत्साहः, पौरुषं, कृतपौरुषं, अतिशक्तिता, अनौजस् *n.*, प्रौढिः *f.*, कर्म्मोदारं; 'personal prowess,' बाहुवीर्य्यं; 'gained by one's own prowess,' स्वहस्तार्जितः -ता -तं, स्वभुजोपार्जितः &c.; 'man of great prowess,' सुपराक्रमी *m.* (न्), सुविक्रमी *m.*, पराक्रान्तः, अतिशक्तिमान् *m.* (त्); 'to show prowess,' पराक्रम् (c. 1. -क्रामति -क्रमति -मितुं), विक्रम्.

To PROWL, *v. n.* मांसार्थं or आमिषार्थं भ्रम् (c. 4. भ्राम्यति, भ्रमितुं) or परिभ्रम्, मांसान्वेषणार्थं भ्रम् or पर्य्यट् (c. 1. -अटति -टितुं).

PROWLER, *s.* मांसार्थं भ्रमणकारी *m.* (न्) or परिभ्रमणकारी *m.*, परिभ्रमी *m.*

PROWLING, *s.* मांसार्थं or मांसान्वेषणार्थं भ्रमणं or परिभ्रमणं or पर्य्यटनं.

PROXIMATE, *a.* समीपः -पा -पं, निकटः -टा -टं, समीपस्थः -स्था -स्थं, निरन्तरः -रा -रं, सन्निहितः -ता -तं, निरन्तरालः -ला -लं, उपस्थः -स्था -स्थं, उपस्थायी -यिनी -यि (न्), आसन्नः -न्ना -न्नं, अन्तिकः -का -कं, उपस्थितः -ता -तं, संसक्तः -क्ता -क्तं, सन्निकृष्टः -ष्टा -ष्टं, समीपगः &c. *See* NEAR, NEXT; 'proximate cause,' उपादानकारणं, उपादानं.

PROXIMATELY, *adv.* समीपतस्, सन्निहितं, सन्निकृष्टं, निरन्तरालं, अनन्तरालं.

PROXIMITY, *s.* समीपता, सामीप्यं, सन्निकर्षः, सन्निकृष्टता, सन्निधिः *m.*, सान्निध्यं, सन्निधानं, सन्निधं, अन्तिकं -कता, उपस्थानं, उपस्थितिः *f.*, नैकट्यं, प्रत्यासत्तिः *f.*, प्रत्यासन्नता, संसक्तिः *f.*, संसर्गः, उपश्लेषः, आनन्तर्य्यं, तादस्थ्यं. *See* NEARNESS.

PROXY, *s.* (Agency of another who acts as substitute) प्रतिनिधित्वं -ता.—(Person who acts) प्रतिनिधिः *m.*, प्रतिपुरुषः, प्रतिहस्तः -स्तकः; 'by proxy,' प्रतिनिधिद्वारा, प्रतिनिधिद्वारेण; 'one who signs a paper by proxy,' लेखनिकः.

PRUDE, *s.* मिथ्याविनीता, अत्यन्तविनयनिष्ठा, विनयाभिमानिनी, अतिविनीताम्मन्या, सूक्ष्मविनयनिष्ठा, सूक्ष्माचारनिष्ठा, सत्याचारिणी, सत्याचारसेविनी, सुव्रीडिताम्मन्या, अतिविनयसेविनी, अत्यन्तविनीता.

PRUDENCE, *s.* पूर्व्वविचारः -रणा, परिणामदृष्टिः *f.*, पूर्व्वसमीक्षा, प्रसमीक्षा, समीक्षा -क्षणं, समीक्ष्यकारिता -त्वं, विमृश्यकारिता, परिणामदर्शनं, दीर्घदृष्टिः, सदसद्दर्शनं, सदसद्विवेकः, विनयः, विनीतता, नीतिः *f.*, नीतिज्ञता, प्राज्ञता, प्रज्ञता, विज्ञता, विवेकः, मनस्विता, विचारशीलता, पूर्व्वापरविचारः, मतिमत्त्वं, बुद्धिः *f.*, मनीषा, हिताहितविवेकः, पूर्व्वचिन्ता, चिन्ता, कार्य्यचिन्ता, परिवेदना, सावधानता, पूर्व्वदृष्टिः *f.*, अग्रदृष्टिः *f.*, विमर्शः, विवेचना, पूर्व्वविवेचना.

PRUDENT, *a.* परिणामदर्शी -र्शिनी -र्शि (न्), पूर्व्वविचारशीलः -ला -लं, दीर्घदर्शी &c., दीर्घदृष्टिः -ष्टिः -ष्टि, समीक्ष्यकारी -रिणी &c., विमृश्यकारी &c., समीक्षाकारी &c., प्राज्ञः -ज्ञा -ज्ञं, प्रज्ञः &c., विज्ञः &c., मनस्वी -स्विनी &c., मतिमान् -मती -मत् (त्), बुद्धिमान् &c., प्रज्ञावान् &c., मनीषी -षिणी &c., परिवेदी -दिनी &c., परिवेदकः -का -कं, बुधः -धा -धं, सुबोधः -धा -धं, विनीतः &c., विनयवान् &c., नीतिमान् &c., नीतिज्ञः -ज्ञा -ज्ञं, पूर्व्वापरविचारी &c., विचारशीलः -ला -लं, सदसद्दर्शी &c., सदसद्विवेकी &c., दूरदर्शी &c., हिताहितविवेकी &c., पूर्व्वचिन्तकः -का -कं, पूर्व्वचिन्ताशीलः &c., कार्य्यचिन्तकः &c., धीरः -रा -रं, सावधानः -ना -नं, कृतावधानः -ना -नं, कृतधीः -धीः -धि, प्रयतः -ता -तं.

PRUDENTIAL, *a.* पूर्व्वविचारप्रयुक्तः -क्ता -क्तं, पूर्व्वसमीक्षाप्रयुक्तः &c., प्रसमीक्षाप्रयुक्तः &c., सविचारः -रा -रं, सविवेकः -का -कं.

PRUDENTLY, *adv.* सविचारं, समीक्षापूर्व्वं, प्रसमीक्ष्य, सुसमीक्ष्य, सुविमृश्य, परिणामदर्शनात्, परिणामदृष्ट्या, पूर्व्वविचारेण, सावधानं, सपरिवेदनं, प्राज्ञवत्, विज्ञवत्.

PRUDERY, *s.* मिथ्याविनयः, मिथ्यालज्जा, एकान्तविनयः, सूक्ष्मविनयनिष्ठा, सूक्ष्माचारनिष्ठा, सत्याचारनिष्ठा, विनयाभिमानं, अतिसूक्ष्मशीलता, अतिसूक्ष्मता, अतिविनीतता.

PRUDISH, *a.* मिथ्याविनीतः -ता -तं, एकान्तविनीतः &c., अत्यन्तविनीतः &c., अतिसूक्ष्मः -क्ष्मा -क्ष्मं, विनयाभिमानी -निनी &c. *See* PRUDE, *s.* PRECISE, *a.*

To PRUNE, *v. a.* क्षुद्रपल्लवान् or निरर्थकविटपान् अवछिद् (c. 7. -छिनत्ति -छेत्तुं) or अवकृत् (c. 6. -कृन्तति -कर्त्तितुं) or लू (c. 9. लुनाति लवितुं) or लुप् (c. 6. लुम्पति, लोप्तुं).

PRUNED, *p. p.* छिन्नपल्लवः -वा -वं, छिन्नविटपः -पा -पं, लूनविटपः &c.

PRUNER, *s.* विटपच्छिद् *m.*, पल्लवच्छिद् *m.*, निरर्थकविटपछेत्ता *m* (तृ).

PRUNING, *s.* पल्लवावच्छेदः, विटपावच्छेदः, निरर्थकविटपावकर्त्तनं.

PRUNING-HOOK, PRUNING-KNIFE, *s.* पल्लवच्छेदनी, विटपछेदनी, पल्लवकर्त्तनी.

PRURIENCE, PRURIENCY, *s.* कण्डूतिः *f.*, कण्डूः *f.*, कण्डुः *f.*, कण्डूया, कण्डूयनं.—(Longing desire for any thing) अतिस्पृहा, अत्यन्तस्पृहा, अतिशयेच्छा, अत्यभिलाषः.

PRURIENT, *a.* कण्डूलः -ला -लं, कण्डूतिमान् -मती -मत् (त), सकण्डूतिः -तिः -ति.

PRURIGO, *s.* कण्डूः *f.*, कण्डुः *f.*, खर्जूः *f.*, कच्छूः *f.*, कच्छुः *f.*, सुकण्डुः *f.*

To PRY, *v. a.* सूक्ष्मं निरूप् (c. 10. -रूपयति -यितुं), सूक्ष्मं निरीक्ष् (c. 1. -ईक्षते -क्षितुं) or दृश् (c. 1. पश्यति, द्रष्टुं), सूक्ष्मदर्शनं कृ, सूक्ष्मम् अन्विष् (c. 4. -इष्यति -एषितुं) or अनुसन्धा (c. 3. -दधाति -धातुं), सूक्ष्मान्वेषणं कृ, सूक्ष्मानुसन्धानं कृ, सूक्ष्मं चर्च् (c. 1. चर्चति -र्चितुं), सूक्ष्मचर्चां कृ, चर्चां कृ, अनधिकारचर्चां कृ, मर्म्मान्वेषणं कृ, सूक्ष्मगवेषणं कृ, मर्म्मगवेषणं कृ.

PRYING, *s.* सूक्ष्मनिरूपणं, सूक्ष्मनिरीक्षणं, सूक्ष्मदर्शनं, सूक्ष्मदृष्टिः *f.*, सूक्ष्मान्वेषणं, सूक्ष्मानुसन्धानं, सूक्ष्मचर्चा, अनधिकारचर्चा, चर्चा, मर्म्मान्वेषणं.

PSALM, *s.* गीतं, स्तुतिगीतं, गानं, स्तुतिगानं, स्तोत्रं, सङ्कीर्त्तं, सङ्गीतं, ईश्वरस्तुतिगीतं, भक्तिगीतं, भक्तिगानं, धर्म्मगीतं.

PSALMIST, *s.* गीतरचकः, स्तुतिगीतरचकः, स्तोत्ररचकः, गीतकारः, गीतकविः *m.*

PSALMODY, *s.* स्तुतिगानं, स्तोत्रगानं, स्तोत्रगीतिः *f.*, ईश्वरस्तुतिगानं.

PSALMOGRAPHY, *s.* गीतरचनं, स्तुतिगीतरचनं, स्तोत्ररचनं, गीतकरणं.

PSALTER, *s.* गीतपुस्तकं, गीतसंहिता, गीतसंहारः, स्तोत्रपुस्तकं, खिलं.

PSEUDO. A prefix expressed in Sanskrit by मिथ्या, मृषा, कृत्रिम कु &c. prefixed, or कल्प, देशीय &c. affixed; as, 'a pseudo-poet,' मिथ्याकविः *m.*, कुकविः, कविकल्पः, कविदेशीयः; 'pseudology,' मिथ्यावादः, मृषावादः; 'pseudo-morphous,' कृत्रिमरूपः -पा -पं; 'pseudonymous,' कृत्रिमनामा &c.

PSHAW, *exclam.* धिक्, धै, स्वे, अरे, रे, किम्, हुम्, अपैहि.

PSYCHOLOGICAL, *a.* आत्मतत्त्वविषयः -या -यं, अध्यात्मविषयकः -का -कं.

PSYCHOLOGY, *s.* आत्मतत्त्वविद्या, अध्यात्मविद्या, अध्यात्मशास्त्रं.

PUBERTY, PUBESCENCE, *s.* यौवनं, यौवनावस्था, तारुण्यं, तारुण्यावस्था, तरुणत्वं, युवत्वं, यौवनकालः, प्रौढता, प्रौढिः *f.*, प्रौढदशा; 'attained to puberty,' प्राप्तयौवनः -ना -नं, प्राप्तयौवनकालः -ला -लं; 'not attained to it,' अप्राप्तयौवनः &c.

PUBESCENT, *a.* प्राप्तयौवनः -ना -नं, अङ्कुरितयौवनः &c., प्राप्ततारुण्यावस्थः -स्था -स्थं.

Public, *a.* (Pertaining to the community) सर्व्वसम्बन्धी -न्धिनी -न्धि (न्), सर्व्वलोकसम्बन्धी &c., प्रजासम्बन्धी &c., लोक in comp., प्रजा in comp. (General, common to many,) साधारणः -णा -णी -णं, सामान्यः -न्या -न्यं, सर्व्वसाधारणः &c., सर्व्वसामान्यः &c., सार्व्वलौकिकः -की -कं, लौकिकः &c., सार्व्वजनिकः -की -कं, सर्व्वजनीनः -ना -नं, सर्व्वजनीयः -या -यं, विश्वजनीनः &c., विश्वजनीयः -या -यं, सार्व्वः -र्व्वा -र्व्वं, सार्व्वः -र्व्वी -र्व्वं, सर्व्वीयः -या -यं, लोक or जन in comp., (Commonly known or current) प्रसिद्धः -द्धा, लोकप्रसिद्धः &c., सर्व्वप्रसिद्धः &c., जनप्रसिद्धः &c., सर्व्वजनप्रसिद्धः &c., सर्व्वलोकप्रसिद्धः &c., जगत्प्रसिद्धः &c., देशप्रसिद्धः &c., लोकविश्रुतः -ता -तं, सर्व्वत्र प्रचलः -ला -लं or प्रचलितः -ता -तं, लोक or जन in comp., *see* Popular.—(Open to all) प्रकाशः -शा -शं, सर्व्वप्रकाशः &c., सर्व्वलोकप्रकाशः &c., प्रकटः -टा -टं, सर्व्वप्रकटः &c., लोकप्रकाशः &c., अविविक्तः -क्ता -क्तं; 'public sale,' प्रकाशविक्रयः प्रकाशक्रयः; 'public benefit,' लोकोपकारः; 'public business,' लोकव्यवहारः व्यवहारः; 'public odium,' जनविद्वेषः; 'public property,' गणद्रव्यं; 'public feeling,' लोकचित्तं, प्रकृतिचित्तं.

Public, *s.* लोकः, सर्व्वलोकः, सर्व्वजनाः *m. pl.*, प्रजा, प्रजालोकः; 'for the benefit of the public,' प्रजार्थं, लोकार्थं, लोकोपकारार्थं; 'in public,' प्रकाशं, प्रकाशतस्, प्रकटं, प्राकट्येन, सर्व्वप्रकाशं, लोकसाक्षात्, लोकसम्मुखं; 'in public and in private,' प्रकाशं विविक्ते च, प्रकाशम् एकान्ततश्च; 'regard for the public or public opinion,' लोकलज्जा, जनलज्जा.

Publican, *s.* (Collector of tribute or toll) करग्रहः, करग्राही *m.* (न्), करसंग्राही *m.*, शुल्कग्राही *m.*—(Retailer of beer and spirits) शौण्डिकः, शुण्डी *m.* (न्), यवसुरादिविक्रयी *m.* (न्) शुण्डादिविक्रेता *m.* (तृ) सुराविक्रयी *m.*

Publication, *s.* (The act) प्रकाशनं, प्रकटनं, प्रकटीकरणं, प्रसिद्धीकरणं, प्रकाशीकरणं.—(A published book) प्रकाशितपुस्तकं, प्रसिद्धपुस्तकं.

Public-house, *s.* शुण्डास्थानं, मदस्थानं, पानगोष्ठिका, शुण्डापानं, शुण्डा, मदिरागृहं, मदिराशाला, आपानं, यवसुरादिविक्रयस्थानं, शुण्डादिविक्रयस्थानं, सुराविक्रयस्थानं.

Publicity, *s.* प्रकाशता, लोकप्रकाशता, लोकप्रकाशः, जनप्रकाशः, प्रकाशः, प्राकट्यं, लोकप्राकट्यं, प्रसिद्धिः *f.*, लोकप्रसिद्धिः *f.*, प्रसिद्धता, लोकप्रसिद्धता -त्वं, लोकविश्रुतिः *f.*, विश्रुतिः, जनप्रसिद्धिः *f.*, प्रख्यातिः *f.*, विख्यातिः *f.*, ख्यातिः *f.*, लौकिकता -त्वं, स्फुटता, व्यक्तता, स्पष्टता.

Publicly, *adv.* (Openly, before the world) प्रकाशं, प्रकाशतस्, प्रकटं, प्राकट्येन, लोकप्रकाशं, सर्व्वप्रकाशं, प्रसिद्धं, अविविक्तं; 'publicly and privately,' *see* Public, *s.*—(Without concealment) व्यक्तं, सुव्यक्तं, स्पष्टं, स्फुटं, साक्षात्, प्रादुस्, आविस्, आविष्कारं, अगूढं.

Public-spirited, public-minded, *a.* लोकोपकारशीलः -ला -लं, लोकोपकारबुद्धिः -द्धिः -द्धि, लोकार्थबुद्धिः &c., जनार्थबुद्धिः &c., लोकार्थी -र्थिनी -र्थि (न्), जनार्थी &c., लोकहितेच्छुः -च्छुः -च्छु, लोकहितः -ता -तं, सर्व्वजनहितैषी &c., साधारणमङ्गलेच्छुः &c.

Public-spiritedness, *s.* लोकोपकारशीलता, लोकोपकारबुद्धिः *f.*, लोकहितेच्छा.

To **publish**, *v. a.* (Make generally known) प्रकाश् (c. 10. -काशयति -यितुं), विकाश्, प्रकटीकृ, प्रकट (nom. प्रकटयति -यितुं), प्रसिद्धीकृ, ख्या in caus. (ख्यापयति -यितुं), प्रख्या, विख्या, आख्या, घुष् (c. 10. घोषयति -यितुं), विघुष्, आघुष्, प्रचर् (c. 10. -चारयति -यितुं), विज्ञा in caus. (-ज्ञापयति -ज्ञपयति -यितुं), बुध् (c. 10. बोधयति -यितुं), प्रथ् (c. 10. प्रथयति -यितुं), निविद् (c. 10. -वेदयति -यितुं), विद्, आविष्कृ, प्रादुष्कृ.—(Publish a book) पुस्तकं प्रकाश् or प्रसिद्धीकृ.—(Put into circulation) प्रचलीकृ, प्रचल् (c. 10. -चलयति -यितुं), प्रचर्.

Published, *p.p.* प्रकाशितः -ता -तं, प्रकटीकृतः -ता -तं, प्रकटितः -ता -तं, प्रसिद्धीकृतः &c., ख्यापितः -ता -तं, घोषितः &c., विघोषितः &c., आघोषितः &c., विज्ञापितः &c., प्रख्यातः -ता -तं, प्रचलीकृतः &c., प्रचारितः &c., आविष्कृतः &c., प्रादुष्कृतः &c., प्रथितः &c. ,

Publisher, *s.* प्रकाशकः, प्रकाशयिता *m.* (तृ), ख्यापकः, विज्ञापकः, प्रसिद्धकर्त्ता *m.* (र्त्तृ), आविष्कर्त्ता *m.*, प्रादुष्कर्त्ता *m.*

To **pucker**, *v. a.* संकुच् (c. 1. -कोचति -चितुं), कुञ्च् (c. 1. कुञ्चति -ञ्चितुं), आकुञ्च्, संहृ (c. 1. -हरति -हर्त्तुं), पुटीकृ, सम्पुटीकृ, सङ्कोचं कृ.

Pucker, puckering, *s.* पुटः, पुटीकरणं, सङ्कोचः -चनं, कुञ्चनं, आकुञ्चनं,

Pudder, *s.* तुमुलं, कोलाहलः, सम्भ्रमः, विप्लवः, व्यग्रता, व्यस्तता.

Pudding, *s.* चोलिका, पोलिका; 'plum-pudding,' *see* the word.

Puddle, *s.* वर्षोदकः, पङ्कजलौघः, कर्दमजलौघः, सपङ्कजलौघः, पङ्कजलगुल्मः, मलिनजलौघः, समलजलौघः, पङ्कगुल्मः.

To **puddle**, *v. a.* समलीकृ, पङ्किलीकृ, कलुषीकृ, आविलीकृ. *See* Muddle.

Pudency, pudicity, *s.*, *see* Modesty.

Pudendum, pudenda, *s.* (Of a woman) भगं, योनिः *f.*, अधोङ्गं, अधोपरं, अधोवशः, अधस्, अधस्तात्, उपस्थः, गुह्याङ्गं, रतिकुहरं, रतिमन्दिरं, रतिगृहं. *See* Privity.

Puerile, *a.* बालिशः -शा -शं, बालेयः -या -यं, बालकीयः -या -यं, बालयोग्यः -ग्या -ग्यं, शिशुयोग्यः &c., बालधर्म्मकः -का -कं, बालबुद्धिः -द्धिः -द्धि.

Puerility, *s.* बालिश्यं, बालेयत्वं -ता, बालकीयता, बालयोग्यता.

Puerperal, *a.* प्रासूतिकः -की -कं, प्रसवसम्बन्धी -न्धिनी -न्धि (न्).

Puerperous, *a.* बालप्रसविनी, बालप्रसवन्ती, प्रसूतिका, सूतिका.

Puff, *s.* (Breath from the mouth) श्वासः, श्वसितं, मुखमरुतः, वदनमरुतः.—(A puff or sudden whiff) फुत्कृतं, फुत्कारः, फूत्कृतं, फूत्कारः फूत् indec.—(Blast, gust) ध्मानं, आध्मानं, ध्मातं, वातः, वातरूपः, वात्या, निर्घातः, प्रभञ्जनः.—(Kind of cake) पिष्टकं, आपूपिकं.—(Tumid commendation) अतिशयप्रशंसा, अत्युक्तिरूपा प्रशंसा, अधिकप्रशंसा, अतिशयोक्तिः *f.*

To **puff**, *v. n.* (Breathe) श्वस् (c. 2. श्वसिति -तुं), श्वासं कृ, प्रश्वासं कृ.—(Pant) कृच्छ्रेण श्वस्, कृच्छ्रेण श्वासप्रश्वासं कृ, उद्ध्मा (c. 1. -धमति -ध्मातुं), उद्गमं कृ, प्राणकृच्छ्रोपहतः -ता -तं भू.—(Blow) वा, प्रवा.—(Eject air from the mouth suddenly) अकस्माद् वदनमरुतं or मुखमरुतं निरस् (c. 4. -अस्यति -असितुं) or निःसृ in caus.—(Blow upon with a puffing noise) फुत्कृ, फूत्कृ, फुत्कारं कृ, फूत्कारं कृ, फुत्कारेण or फुत्शब्देन प्रवा.—(Swell or be inflated with air) ध्मा in pass. (ध्मायते), आध्मा, वातेन पृ in pass. (पूर्य्यते).

To **puff**, *v. a.* (Inflate, dilate with air) ध्मा (c. 1. धमति, ध्मातुं), आध्मा, समाध्मा, प्रध्मा, उपध्मा, वातेन पृ (c. 10. पूरयति -यितुं), श्वासेन पृ, वायुपूरितं -तां कृ.—(Blow away) अपध्मा, विध्मा.—(Puff up with pride, &c.) दर्पाध्मातं -तां कृ, गर्व्वाध्मातं -तां कृ, उद्धतीकृ, उन्मत्तीकृ.—(Praise with exaggeration) अत्युक्त्या or अतिशयोक्त्या प्रशंस्. अतिशयप्रशंसां कृ.

Puffed, *p. p.* (Inflated) ध्मातः -ता -तं, आध्मातः &c., समाध्मातः &c., प्रध्मातः &c., वातपूरितः -ता -तं, वायुपूर्णः -र्णा -र्णं, श्वासपूरितः &c. —(Puffed up with pride, &c.) दर्पाध्मातः -ता -तं, गर्व्वाध्मातः &c., मदोद्धतः &c., दर्पोद्धतः &c., मदोद्धतः &c.

Puffy, *a.* आध्मातः -ता -तं, वातमयः -यी -यं, शब्दमात्रः -त्रा -त्रं.

Pug-dog, *s.* मर्कटमुखः क्षुद्रकुक्कुरभेदः.

Pug-faced, *a.* वानरमुखः -खी -खं, मर्कटवदनः -ना -नं, कपिमुखः &c.

Pug-nose, *s.* चिपिटः, चिपिटकः, चिपुटः, चिकिनः, अवभटः.

Pugilism, *s.* मुष्टियुद्धं, मुष्टियोधनं, मुष्टिपातः, मल्लयुद्धं, मुष्टीमुष्टि, बाहुयुद्धं.

Pugilist, *s.* मुष्टियोद्धा *m.* (द्धृ), मुष्टियोधः, मुष्टियोधी *m.* (न्), बाहुयोधी *m.*

Pugilistic, *a.* मुष्टियुद्धसम्बन्धी -न्धिनी -न्धि (न्), बाहुयुद्धसम्बन्धी &c.

Pugnacious, *a.* युयुत्सुः -त्सुः -त्सु, कलहप्रियः -या -यं, युद्धप्रियः &c., रणप्रियः &c., युद्धेच्छुः -च्छुः -च्छु, युद्धकारी -रिणी -रि (न्), कलहकारी &c., रणकामी -मिनी &c., युद्धकामी &c.

Pugnacity, *s.* युयुत्सा, युद्धेच्छा, युद्धप्रियता, कलहप्रियता, कलहेच्छा.

Puisne, *a.* अवरः -रा -रं, अवरपदस्थः -स्था -स्थं, अवरजः -जा -जं.

Puissance, *s.* पराक्रमः, विक्रमः, प्रभावः, ऐश्वर्य्यं, तेजस् *n.*, प्राबल्यं.

Puissant, *a.* पराक्रमी -मिणी -मि (न्), विक्रमी &c., पराक्रान्तः -न्ता -न्तं, विक्रान्तः &c., महाबलः -ला -लं, बलवान् -वती -वत् (त्), महाशक्तिः -क्तिः -क्ति, महाविक्रमः -मा -मं.

To **puke**, *v.n.* वम् (c. 1. वमति -मितुं), वमनं कृ, छर्द् (c. 10. छर्दयति -यितुं).

Puke, *s.* वान्तिकारकम् औषधं, वान्तिकृत्, छर्दनकृत्.

Puking, *s.* वान्तिः *f.*, वमनं, छर्दनं; *part.*, वमी -मिनी -मि (न्).

Pulchritude, *s.* *See* Beauty.

To **pule**, *v. n.* (Like a child) बालकवद् रु (c. 2. रौति, रवितुं), शिशुवद् रुद् (c. 2. रोदिति -तुं); 'like a chicken,' पक्षिशावकवत् कूज् (c. 1. कूजति -जितुं).

To **pull**, *v. a.* or *n.* (Draw, drag) कृष् (c. 1. कर्षति, c. 6. कृषति -ते, क्रष्टुं, कर्ष्टुं), आकृष्, समाकृष्, परिकृष्, प्रतिकृष्, संकृष्, कर्षणं कृ.—(Pull forcibly) हृ (c. 1. हरति, हर्तुं), हरणं कृ.—(Pluck, gather by plucking) ग्रह् (c. 9. गृह्णाति, ग्रहीतुं), आदा (c. 3. -ददाति -दत्ते -दातुं), अङ्गुलिभिर् ग्रह् or आदा or चि or अवचि; 'to pull the hair,' केशग्रहं कृ, केशग्रहणं कृ, केशान् ग्रह्.—(Pull down) अपकृष्, अवकृष्, व्यपकृष्, पत् in caus., अधःपत्.—(Pull off) अपकृष्, अवकृष्, व्यपकृष्, उत्कृष्, अपहृ, व्यपहृ, अपनी, अवतृ in caus. (-तारयति -यितुं); 'he pulls off his clothes,' वस्त्रम् अवतारयति.—(Pull out) उत्कृष्, निष्कृष्, उद्धृ, निर्हृ, उत्पट् (c. 10. -पाटयति -यितुं), उत्खन् (c. 1. -खनति -नितुं), निर्णी in caus., उत्पाटनं कृ; 'the hair,' लुञ्च् (c. 1. लुञ्चति -ञ्चितुं), उल्लुञ्च्, अवलुञ्च्, विलुञ्च्, उत्पट्, केशोल्लुञ्चनं कृ, केशोत्पाटनं कृ.—(Pull towards) आकृष्, समाकृष्, प्रतिकृष्.—(Pull in pieces, pull in two) विदृ (c. 10. -दारयति -यितुं), अवदृ, विभिद्, विदलीकृ, खण्डशः कृ, खण्डं खण्डं कृ.—(Pull up) उत्पट्, उद्धृ, समुद्धृ, उच्छिद्, उत्खन्; 'by the roots,' उन्मूल् (c. 10. -मूलयति -यितुं), समुन्मूल्, समूलं or आमूलम् उद्धृ.

Pull, *s.* कर्षणं, कृष्टिः *f.*, कर्षः, आकर्षः -र्षणं, आकृष्टिः *f.* संकर्षणं, विकर्षणं.

Pulled, *p. p.* कर्षितः -ता -तं, कृष्टः -ष्टा -ष्टं, आकर्षितः &c., आकृष्टः &c., अवकृष्टः &c., विकर्षितः &c., विकृष्टः &c., हृतः -ता -तं, गृहीतः -ता -तं; 'pulled by the hair,' केशगृहीतः &c., केशेषु गृहीतः; &c.; 'pulled off, as clothes, &c.,' अवतारितः -ता -तं; pulled out,' उत्कृष्टः -ष्टा -ष्टं, निष्कर्षितः &c., उद्धृतः &c., उत्पाटितः &c.; 'as the hair,' उल्लुञ्चितः &c.; 'pulled up,' उन्मूलितः -ता -तं, उत्पाटितः &c., उत्खातः &c., व्यपरोपितः &c.

Pullet, *s.* कुक्कुटीशावकः, कुक्कुटशावकः, पक्षिशावकः, पक्षिणीशावकः.

Pulley, *s.* काष्ठान्तर्गतं क्षुद्रचक्रं, काष्ठान्तःस्थं सूक्ष्मचक्रं तत्र रज्जुखण्डं भूत्वा कीलकोपरि परिवर्त्तते, कीलकोपरि परिवर्त्तमानं क्षुद्रचक्रं.

Pulling, *s.* कर्षणं, कृष्टिः *f.*, आकर्षणं, आकृष्टिः *f.*, संकर्षणं, विकर्षः -र्षणं, उत्कर्षः, हरणं, ग्रहणं, अङ्गुलिग्रहणं; 'pulling the hair,' केशग्रहः -हणं; 'mutual pulling of the hair,' केशाकेशि indec.; 'pulling up the hair,' केशलुञ्चनं, केशोल्लुञ्चनं.

To **pullulate**, *v. n.* (Germinate) स्फुट्, फुल्ल्, अङ्कुर्, विकस्.

Pullulation, *s.* स्फुटनं, फुल्लतिः *f.*, फुल्लिः *f.*, उद्भेदः, विकसनं.

Pulmonary, **pulmonic**, *a.* फुप्फुससम्बन्धी -न्धिनी -न्धि (न्), फुप्फुसनिष्ठः -ष्ठा -ष्ठं, फुप्फुसस्थः -स्था -स्थं, फुप्फुसीयः -या -यं.

Pulp, *s.* मज्जा, मज्जा *m.* (न्), मज्जनं, सारः, गर्भः.—(Of fruit) फलसारः, फलगर्भः, फलस्य कोमलभागः or मृदुभागः.

Pulpiness, *s.* समज्जता, मज्जावत्त्वं, मज्जागुणकत्वं, कोमलता, मृदुता.

Pulpit, *s.* उपदेशासनं, उपदेशपीठं, धर्म्मोपदेशपीठं, पीठं, पुरोहितासनं, धर्म्मोपदेशकासनं, धर्म्माध्यापकासनं, धर्म्माध्यापकपीठं.

Pulpous, **pulpy**, *a.* मज्जागुणकः -का -कं, मज्जोपमः -मा -मं, मज्जामयः -यी -यं, समज्जः -ज्जा -ज्जं, मांसलः -ला -लं, मांसगुणकः -का -कं, कोमलः -ला -लं, आर्द्रमृदुः -द्वी -दु, मृदुः &c.

To **pulsate**, *v. n.* (Palpitate) स्पन्द्, स्फुर्, कम्प्, वेप्.

Pulsation, *s.* स्पन्दनं, प्रतिस्पन्दनं, स्पन्दितं, कम्पः -म्पनं, स्फुरणं, विष्पन्दः, चलत्वं; 'of the heart,' हृदयस्पन्दनं, हृत्कम्पः; 'of an artery,' नाडिस्फुरणं, नाड्याघातः.

Pulse, *s.* (Of the blood or an artery) नाडिः -डी *f.*, नाली -लिः *f.*, नाडीस्फुरणं, नालीस्फुरणं, नाडीस्पन्दनं, नाड्याघातः; 'feeling the pulse,' नाडीपरीक्षा; 'to feel the pulse,' नाडीपरीक्षां कृ.—(Leguminous plant) कलायः, सतीनः -नकः, सतीलः -ला -लकः, सितीलकः, सातीलकः, सातिलकः, द्विदलं, चिपुटः, खण्डिकः, हरेणुः *m.*, शमीधान्यं, वनसङ्कटः, धान्यवीरः, मुद्गः, वर्त्तुलः; 'pulse ground and fried,' वडा, वटकः.

Pulverable, *a.* क्षोदनीयः -या -यं, चूर्णनीयः &c., चूर्णीकरणयोग्यः &c.

Pulverization, *s.* चूर्णीकरणं, क्षोदीकरणं, चूर्णनं, सञ्चूर्णनं, क्षोदनं.

To **pulverize**, *v. a.* चूर्ण् (c. 10. चूर्णयति -यितुं), संचूर्ण्, प्रचूर्ण्, विचूर्ण्, चूर्णीकृ, क्षुद् (c. 7. क्षुणत्ति, क्षोत्तुं), प्रक्षुद्, संक्षुद्, क्षोदीकृ, पिष्, गुण्ड् &c. *See To* pound, powder.

Pulverized, *p. p.* चूर्णितः -ता -तं, चूर्णीकृतः -ता -तं, संचूर्णितः &c., चूर्णीभूतः -ता -तं, क्षोदितः -ता -तं, क्षोदीकृतः &c., पिष्टः -ष्टा -ष्टं, गुण्डितः -ता -तं, गुण्डितः -ता -तं.

Pulverulent, *a.* चूर्णमयः -यी -यं, पांशुलः -ला -लं. *See* Powdery.

Pummel, *s.* (Of a saddle) वङ्का.

Pump, *s.* जलोत्तोलनयन्त्रं, जलोत्तोलननाडिः -डी *f.*, जलोत्क्षेपणयन्त्रं, जलोत्क्षेपकयन्त्रं, जलोत्क्षेपकनाडी, जलोत्तोलनी, जलोत्क्षेपणी, जलनाडी, जलनाली; 'place where water is distributed,' प्रपा.

To **pump**, *v. a.* or *n.* नाडीद्वारेण जलम् उत्तुल् (c. 10. -तोलयति -यितुं) or उत्क्षिप् (c. 6. -क्षिपति -क्षेप्तुं) or जलोत्तोलनं कृ or जलोत्क्षेपणं कृ, जलनाडीं सञ्चल् (c. 10. -चालयति -यितुं), जलोत्तोलनयन्त्रं सञ्चल्.—(Interrogate artfully) सव्याजं प्रच्छ् or अनुप्रच्छ् or परिप्रच्छ्, प्रश्नेन परीक्ष् or अनुसन्धा.

Pumpkin, *s.* कुष्माण्डः -ण्डा -ण्डी, कुष्माण्डकः, कूष्माण्डः -ण्डी -ण्डकः, अलाबूः *f.*, अलाबुः *f.*, आलाबुः *f.*, तुम्बी, कर्कारुः *m.*

Pun, *s.* श्लेषः, श्लेषोक्तिः *f.*, श्लेषवाक्यं, श्लेषालङ्कारः, द्व्यर्थवाक्यं, अर्थापत्तिः *f.*

To **pun**, *v. n.* श्लेषोक्तिं कृ, श्लेषवाक्यं वद् (c. 1. वदति -दितुं)

Punch, *s.* (Instrument for perforating) वेधनी, वेधनिका.—(Thrust, blow) आघातः, अभिघातः, प्रहारः; 'with the elbow,' कोलः

-ला, कीलाघातः, अरत्निप्रहारः.—(Kind of drink) शर्करादिमिश्रितं मद्यजलक्षीरादिरसमयं पानीयं.—(In a puppet show) पुत्तलिकाक्रीडायां वैहासिकः or विदूषकः.

To Punch. *v. a.* (Pierce with a punch) पूर्व्वोक्तयन्त्रेण व्यध्.—(With the elbow) अरत्निना तड् (c. 10. ताडयति -यितुं) or आहन् (c. 2. -हन्ति -न्तुं) or प्रहृ (c. 1. -हरति -हर्त्तुं), अरत्निं प्रसार्य्य तड्, कीलाघातं कृ.

Puncheon, *s.* (Instrument), *see* Punch.—(A measure), *see* Cask.

Punchy, *a.* ह्रस्वस्थूलः -ला -लं स्थूलह्रस्वः -स्वा -स्वं, घनह्रस्वः &c.

Punctilio, *s.* सूक्ष्मविषयः, सूक्ष्मविधिः *m.*, सूक्ष्मनियमः, सूक्ष्मता, अतिसूक्ष्मता, सौक्ष्म्यं, अतिसौक्ष्म्यं, शिष्टाचारसौक्ष्म्यं, सभ्याचारसूक्ष्मता.

Punctilious, *a.* अतिसूक्ष्मदृष्टिः -ष्टिः -ष्टि, अतिसूक्ष्मदर्शी -र्शिनी -र्शि (न्), अतिसूक्ष्मः -क्ष्मा -क्ष्मं, सूक्ष्मोपचारदर्शी, सूक्ष्माचारनिष्ठः -ष्ठा -ष्ठं, अतिसूक्ष्माचारी &c., सूक्ष्मनियमनिष्ठः &c., सूक्ष्मोपचारनिष्ठः &c., सूक्ष्मोपचारशीलः -ला -लं, सूक्ष्मादरनिष्ठः &c., सूक्ष्मनियमी &c., नियमनिष्ठः &c., अत्याचारी &c.

Punctiliousness, *s.* अतिसूक्ष्मदर्शनं, अतिसूक्ष्मदृष्टिः *f.*, सूक्ष्मोपचारनिष्ठा, सूक्ष्मनियमनिष्ठा, सूक्ष्मादरनिष्ठा, सूक्ष्मसत्कारनिष्ठा, सूक्ष्मादरशीलता, अत्याचारः.

Punctual, *a.* समयपालकः -का -कं, समयरक्षकः -का -कं, समयनिष्ठः -ष्ठा -ष्ठं, समयसेवी -विनी -वि (न्), कालरक्षकः -का -कं, कालनिष्ठः -ष्ठा -ष्ठं, कालपालकः -का -कं, कालसेवी &c., सामयिकः -की -कं, सङ्केतपालकः -का -कं, सङ्केतनिष्ठः &c., नियमपालकः &c., नियमनिष्ठः &c., वचननिष्ठः &c., प्रतिज्ञानिष्ठः &c., प्रतिज्ञापालकः &c., दृढनियमी &c.

Punctuality, punctualness, *s.* समयपालनं, समयनिष्ठा, समयसेवनं, कालनिष्ठा, कालसेवनं, कालपालनं, समयरक्षणं, कालरक्षणं, सङ्केतपालनं, सङ्केतनिष्ठा, नियमनिष्ठा, नियमपालनं, वचननिष्ठा, प्रतिज्ञानिष्ठा.

Punctually, *adv.* यथासमयं, समयतस्, यथाकालं, कालतस्, नियमतस्, यथानियमं, यथासङ्केतं, समयनिष्ठापूर्व्वं, कालनिष्ठापूर्व्वं.

To punctuate, *v. a.* विरामचिह्नैर् अङ्क् (c. 10. अङ्कयति -यितुं) विरामचिह्नानि लिख् (c. 6. लिखति, लेखितुं) or कृ, विरामचिह्नाङ्कनं कृ, विरामचिह्नाङ्कितं -तां कृ.

Punctuated, *p. p.* विरामचिह्नाङ्कितः -ता -तं, अवसानचिह्नाङ्कितः -ता -तं.

Punctuation, *s.* विरामचिह्नाङ्कनं, अवसानचिह्नाङ्कनं, विरामचिह्नलिखनं.

To puncture, *v. a.* सूक्ष्मकीलकाग्रेण व्यध् (c. 4. विध्यति, व्यद्धुं). *See To* prick.

Puncture, *s* वेधः -धनं, सूक्ष्मकीलकवेधः, व्यधः -धनं. *See* Prick.

Punctured, *p.p.* वेधितः -ता -तं, कीलकवेधितः &c., कीलकविद्धः -द्धा -द्धं,

Pundit, *s.* पण्डितः, विद्वान् *m.* (स्), प्राज्ञः, बहुश्रुतः, अधीयानः. श्रोत्रियः, वेदविद् *m.*, वेदविद्वान् *m.*, अनूचानः. *See* Learned.

Pungency, *s.* कटुता -त्वं, उग्रता -त्वं, तीव्रता, तिग्मता -त्वं, खरता, प्रखरता, प्राखर्य्यं, तैग्म्यं, तीक्ष्णता, तैक्ष्ण्यं, अरुन्तुदत्वं, चण्डता -त्वं, उष्णता -त्वं, औष्ण्यं, ओषणः, दाहः, विदाहः.

Pungent, *a.* कटुः -टुः -ट्वी -टु, उग्रः -ग्रा -ग्रं, तीव्रः -व्रा -व्रं, तिग्मः -ग्मा -ग्मं, तीक्ष्णः -क्ष्णा -क्ष्णं, खरः -रा -रं, प्रखरः रा -रं, अरुन्तुदः दा -दं, चण्डः -ण्डा -ण्डं, उष्णः -ष्णा -ष्णं, तिक्तः -क्ता -क्तं, विदाही -हिनी -हि (न्), दाही &c.

Puniness, *s.* अल्पता, क्षुद्रता -त्वं, शरीरक्षुद्रता, अल्पशरीरता, तनुता.

To punish, *v. a.* दण्ड् (c. 10. दण्डयति -यितुं), शास् (c. 2. शास्ति, -सितुं, c. 10 शासयति -यितुं), अनुशास्, तड् (c. 10. ताडयति -यितुं), निग्रह् (c. 9. -गृह्णाति -ग्रहीतुं), दम् (c. 10. दमयति -यितुं) वियत् (c. 10. -यातयति -यितुं) बन्ध् (c. 9. बध्नाति बन्धुं), दण्डं प्रणी *See To* inflict.—(Pain) पीड्, व्यथ्, तप्, सन्तप्.

Punishable, *a.* दण्डनीयः -या -यं, दण्ड्यः -ण्ड्या -ण्ड्यं, दण्डार्हः -र्हा -र्हं, दण्डनार्हः &c., ताडनीयः -या -यं, ताड्यः -ड्या -ड्यं, शासनीयः -या -य, शास्यः -स्या -स्यं, शासनार्हः -र्हा -र्हं, दमनीयः -या -यं, दण्डयोग्यः -ग्या -ग्यं, शिक्षणीयः &c., शिक्ष्यः -क्ष्या -क्ष्यं, शिक्षार्हः &c., विनेयः -या -यं.

Punished, *p. p.* दण्डितः -ता -तं, शासितः -ता -तं, शिष्टः -ष्टा -ष्टं, ताडितः -ता -तं, निगृहीतः &c., पीडितः &c., विनीतः &c., शिक्षितः &c.

Punisher, *s.* दण्डयिता *m.* (तृ), शासिता *m.*, शास्ता *m.*, शासकः, ताडयिता *m.*, ताडकः, दण्डप्रणेता *m.*, शिक्षकः.

Punishment, *s.* दण्डः, दण्डनं, शासनं, अनुशासनं, शास्तिः *f.*, शिष्टिः *f.*, ताडनं, साहसं, दमः, दमनं, दमथः -थं, दमथुः *m.*, निग्रहः, शिक्षणं; 'corporal punishment,' शरीरदण्डः -ण्डनं, शारीरदण्डः, शारीरिकदण्डः, शारीरः, देहदण्डः -ण्डनं; 'just punishment,' सम्यग्दण्डनं; 'infliction of punishment,' दण्डयोगः, दण्डप्रयोगः, दण्डप्रणयनं, *see* Infliction; 'capital punishment,' वधदण्डः, प्राणदण्डः, प्राणान्तदण्डः, जीवान्तदण्डः, देहान्तदण्डः, उत्तमसाहसं; 'severity of punishment,' दण्डपारुष्यं; 'repeated punishment,' त्रिवारदण्डः; 'fear of punishment,' दण्डभीतिः *f.*, दण्डभयं; 'through fear of it,' दण्डभयात्.

Punitive, punitory, *a.* दाण्डः -ण्डी -ण्डं, दाण्डिकः -की -कं, दण्डसम्बन्धी -न्धिनी &c., साहसिकः -की -कं, दण्डविषयकः -का -कं, दण्ड in comp.

Punjáb, *s.* (The country) पञ्चनदः. *See* Panjáb.

Punka, *s.* तालवृन्तः -न्तकं, धवित्रं, मरुदान्दोलः.

Punster, *s.* मश्लेषवक्ता *m.* (क्तृ), मश्लेषवादी *m.* (न्).

Punt, *s.* तरालुः *m.*, तरान्धुः *m.*, तरण्डः -ण्डं, वहित्रं.

Puny, *a.* क्षुद्रः -द्रा -द्रं, अल्पः -ल्पा -ल्पं, क्षुद्रशरीरः -रा -रं.

Pup, *s.* कुक्कुरशिशुः *m.*, कुक्कुरशावकः, शिशुः *m.*, डिम्भः.

To pup, *v. n.* कुक्कुरशावकान् सु or प्रसु or जन्, कुक्कुरशिशून् सु.

Pupil, *s.* (Scholar) शिष्यः, विद्यार्थी *m.* (न्), छात्रः, अन्तेवासी *m.* (न्), अन्तेवासिजनः, अध्यायी *m.*, अध्येता *m.* (तृ), प्राचार्य्यः, बालः, शिशुः *m.*, माणवकः, मृडङ्कुणः, प्रबालः.—(Of the eye) तारा, तारका, अक्षितारा -रका, तारः -रकं, कनीनिका, दृष्टिः *f.*, लोचकः, ज्योतिस् *n.*, नयना.

Pupilage, *s.* शिष्यत्वं, शिष्यावस्था, शिष्यदशा, विद्यार्थित्वं -ता, अन्तेवासित्वं, बालत्वं, शिशुत्वं -ता, शैशवं.

Pupilary, *a.* शैष्यः -ष्यी -ष्यं, शिष्यसम्बन्धी &c., शैशवः -वी -वं.

Puppet, *s.* पुत्रिका, दारुपुत्रिका, पाञ्चालिका, पाञ्चलिका, पाञ्चाली, पुत्तली -लिका, शालाङ्की, शालभञ्जी -ञ्जिका, दारुस्त्री, दारुगर्भा, कुरुण्टी, अञ्जलिकारिका, याचा.

Puppet-show, *s.* पुत्तलिकाक्रीडा, पुत्रिकाक्रीडा, पाञ्चालिकाक्रीडा.

Puppy, *s.* कुक्कुरशावकः, कुक्कुरशिशुः *m.*, शिशुः *m.*, डिम्भः.—(Conceited person) दर्शनीयमानी *m.* (न्), आत्माभिमानी *m.*, मानी *m.*, रूपगर्वितः, दाम्भिकः.

To pur, *v. n.* मार्जारवत् सन्तोषसूचकं रणरणाशब्दं कृ or रणत्कारं कृ.

Purána, *s.* (Sacred and mythological poem, derived from the same religious system as the Rámáyana and Mahábhárata, or from the mytho-heroic style of Hindú belief; being a departure from the purer system of the Vedas. They are eighteen in number, and each one is supposed to treat of five topics, viz. 1. the creation, 2. the destruction and renovation of worlds, 3. the genealogy of gods and heroes, 4. the reign of the Manus, 5. the transac-

tions of their descendants. From this five-fold division, and from the antiquity of the stories narrated, come the general names पुराणं, पञ्चलक्षणं. The specific titles are as follows: 1. ब्रह्मपुराणं or ब्राह्मपुराणं, 2. पद्मपुराणं, 3. विष्णुपुराणं, 4. शिवपुराणं, 5. भागवतपुराणं or भगवत्पुराणं, 6. नारदपुराणं, 7. मार्कण्डपुराणं, मार्कण्डेयपुराणं, 8. अग्निपुराणं, 9. भविष्यपुराणं, 10. ब्रह्मवैवर्त्तपुराणं, 11. लिङ्गपुराणं, 12. वराहपुराणं, 13. स्कन्दपुराणं, 14. वामनपुराणं, 15. कूर्म्मपुराणं, 16, मत्स्यपुराणं, 17. गारुडपुराणं, 18. ब्रह्माण्डपुराणं. Sometimes a Purána called the वायुपुराणं or वायवीयपुराणं is substituted for the शिवपुराणं, and another called the नरसिंहपुराणं for the ब्रह्माण्डपुराणं. These eighteen mythological works are the repository of the modern and popular religious creed of the Hindús. They are amplifications of the two great heroic and historical poems or Itihása, called Rámáyana and Mahábhárata, giving a more connected and definite explanation of the mythical fictions and historical traditions contained in those works. They are consequently remarkable for attributing paramount importance to the two divinities, Śiva and Vishnu, who, under one form or other, are almost the sole objects that are made to claim homage. Each separate Purána cannot, therefore, be taken as a guide to Hindú belief as a whole, but rather to some separate branch of it, in which the worship of either one of these deities in particular incarnations is encouraged in preference to that of the other. The most celebrated of them all is the fifth in the above list, or Bhágavata Purána, designed for the glorification of Bhagavat or Vishnu, in the form of Krishna. This exercises a more direct and powerful influence on the opinions of the natives of India than any other. The third, or Vishnu Purána, translated by Professor Wilson, is also a work of great celebrity, and conforms most closely to the definition of Panchalakshanam, *i. e.* treating of five specified topics. There are also eighteen Upapuránas, or similar poems of inferior sanctity and different appellations, viz.: 1. सनत्कुमारं, 2. नारसिंहं, 3. नारदीयं, 4. शिवं, 5. दुर्वाससं, 6. कापिलं, 7. मानवं, 8. औशानसं, 9. वारुणं, 10. कालिका, 11. शाम्बं, 12. नन्दिकेश्वरं, 13. सौरं, 14. पाराशरं, 15. आदित्यं, 16. माहेश्वरं, 17. भागवतं, 18. वाशिष्ठं. The collector and arranger of the Puránas, as well as of the more ancient Vedas, was a sage named Krishna कृष्णः, or Dwaipáyana द्वैपायनः, or Krishnadwaipáyana कृष्णद्वैपायनः. The surname of Vyása व्यासः or 'Arranger' (from the root अस् with वि, meaning to 'dispose' or 'set in order'), was given to him, and is now used to denote any expounder of the Vedas or Puránas. His seat is called व्यासासनं, व्यासपीठं.

Puranic, *a.* पौराणिकः -की -कं, पौराणः -णी -णं, पुराणविषयकः &c.

Purblind, *a.* अस्पष्टदृक् *m. f. n.* (श्), अव्यक्तदृक् *m. f. n.*, हतदृष्टिः -ष्टिः -ष्टि, अदीर्घदृष्टिः &c., ईषदन्धः -न्धा -न्धं.

Purchasable, *a.* क्रेयः -या -यं, क्रेतव्यः -व्या -व्यं, क्रय्यः -य्या -य्यं.

To purchase, *v. a.* क्री (c. 9. क्रीणाति -णीते, क्रेतुं), उपक्री, संक्री, मूल्यं दत्त्वा लभ् or प्राप्, पण् (c. 1. पणते -णितुं), पणीकृ

Purchase, *s.* (The act of buying) क्रयः, क्रयणं, संक्रयणं, उपक्रयः, क्रीणनं.—(Thing purchased) क्रीतवस्तु *n.*, क्रीतद्रव्यं.—(Hold, force) ग्रहणं, ग्राहः, संग्राहः, संग्रहणं, ग्रहः, आग्रहः, धृतिः *f.*, ग्रहणशक्तिः *f.*, शक्तिः *f.*

Purchased, *p. p.* क्रीतः -ता -तं, क्रयक्रीतः &c., संक्रीतः &c., उपक्रीतः &c.

Purchase-money, *s.* क्रयमूल्यं, क्रयणमूल्यं, मूल्यं, अर्घः.

Purchaser, *s.* क्रयी *m.* (न्), क्रेता *m.* (तृ), क्रायकः, क्रयिकः, क्रयकर्त्ता *m.*

Pure, *a.* (Clean, free from dirt) निर्मलः -ला -लं, विमलः -ला -लं, अमलः &c., अमली -लिनी -लि (न्), मलहीनः -ना -नं, शुद्धः -द्धा -द्धं, विशुद्धः &c., पवित्रः -त्रा -त्रं, स्वच्छः -च्छा -च्छं, अच्छः &c., शुचिः -चिः -चि.—(Free from sin or guilt, morally pure) शुद्धः -द्धा -द्धं, शुचिः -चिः -चि, पुण्यः -ण्या -ण्यं, अनघः -घा -घं, निष्कलङ्कः -ङ्का -ङ्कं, निष्पापः -पा -पं, अदृष्टपापः &c., अपापः &c., पापहीनः -ना -नं, अकृतपापः &c., अज्ञातपापः &c., अकल्मषः -षा -षं, धूतकल्मषः &c., अलिप्तः -प्ता -प्तं, साधुः -ध्वी -धु, अदृष्टदोषः -षा -षं, सात्त्विकः -की -कं, प्राञ्जलः -ला -लं.—(Ceremonially clean) पवित्रः -त्रा -त्रं, पूतः -ता -तं, पावनः -ना -नं, पवनः -ना -नं, शुचिः -चिः -चि, शौचवान् -वती -वत् (त्), शौचोपेतः -ता -तं, मेध्यः -ध्या -ध्यं.—(Unadulterated, incorrupted) अदूषितः -ता -तं, अदुष्टः -ष्टा -ष्टं, शुद्धः -द्धा -द्धं, अविकारितः -ता -तं, अभ्रष्टः -ष्टा -ष्टं, असंसृष्टः -ष्टा -ष्टं.—(Mere, simple) केवलः -ला -लं, केवली &c., मात्रकः -का -कं, मात्र in comp., शुद्धः &c.—(Free from corrupt words, as speech) अपशब्दहीनः -ना -नं, अपशब्दरहितः -ता -तं, अपशब्दशून्यः -न्या -न्यं, शुद्धः -द्धा -द्धं, अपप्रयोगहीनः -ना -नं.—(Chaste, ignorant of carnal intercourse) अज्ञातव्यवायः -या -यं, अज्ञातमैथुनः -ना -नं; 'as a woman,' पुरुषास्पृष्टा.—(Of pure descent or blood) मौलः -ली -लं.—(Pure in heart or mind) शुद्धमतिः -तिः -ति, शुद्धात्मा -त्मा -त्म (न्), शुद्धहृदयः &c., *see* Pure-minded; 'to be pure,' शुध् (c. 4. शुध्यति -ते, शोद्धुं), शुद्धीभू, शुचि (nom. शुचीयते), पवित्रीभू.

Purely, *adv.* (Cleanly) निर्मलं, विमलं, शुद्धं, पवित्रं, शुचि.—(Merely) मात्रं, केवलं. *See* Merely.

Pure-minded, *a.* शुद्धमतिः -तिः -ति, शुद्धात्मा -त्मा -त्म (न्), विमलात्मा &c., अमलात्मा &c., निर्मलान्तःकरणः -णा -णं, शुद्धहृदयः -या -यं, प्रयतात्मा &c.

Pureness, *s.* निर्मलता, शुचिता, शुद्धता -त्वं, शुद्धिः *f.* *See* Purity.

Purgation, *s.* रेचनं, विरेचनं, रेकः, विरेकः, शोधनं, शुद्धिः *f.*

Purgative, *a.* रेचकः -की -कं, विरेचकः &c., शोधकः -का -कं, उदरशोधकः &c., अधोभागहरः -रा -रं, अतिसारी -रिणी -रि (न्), सारकः -का -कं, अतिसारकः &c.

Purgative, *s.* (Medicine) रेचकं, रेचनं, विरेचनं, विरेकः, अधोभागहरं, उदरशोधनं, अधोभागशोधकं, सारकं, सारकौषधं.

Purgatory, *a.* शोधकः -का -कं, पावनः -ना -नं, पावकः -का -कं, पापशोधनः -ना -नं, पापनाशकः &c., पापनाशनः -ना -नं, पापघ्नः -घ्नी -घ्नं, अघनाशनः &c., अघमर्षणः -णी -णं.

Purgatory, *s.* पापशोधनस्थानं, अघशोधनस्थानं, यातनास्थानं; 'pain of purgatory.' यातना, भैरवी यातना.

To purge, *v. a.* (The bowels, &c.) विरिच् (c. 7. -रिणक्ति -रिंक्ते -रेक्तुं),

रिच्, उदरं or अधोभागं शुध् (c. 10. शोधयति -यितुं), उदरशोधनं कृ, मलं सृ in caus. (सारयति -यितुं), मलशोधनं कृ, मलशुद्धिं कृ.—(Cleanse from guilt) पापात् शुध् or परिशुध् or विशुध्, पापशोधनं कृ, अघशोधनं कृ.—(Cleanse in general) पू, परिपू, शुध्, मलापकर्षणं कृ.

PURGE, *s.* रेचनं, विरेचनं, रेचकं, विरेकः, उदरशोधनं, अधोभागहरं.

PURGED, *p. p.* (As the bowels) रेचितः -ता -तं, विरेचितः &c., रिक्तः -क्ता -क्तं, विरिक्तः &c., शोधितः -ता -तं, सारितः &c.—(Cleared) शोधितः &c., पूतः &c., पावितः &c.

PURGING, *s.* (Of the bowels) रेचना -नं, रेकः, विरेकः, सारणः, अतिसारः. *See* DIARRHŒA, DYSENTERY.

PURIFICATION, *s.* शोधनं, संशोधनं, विशोधनं, परिशोधनं, शोधः, परिशोधः, शुद्धिः *f.*, संशुद्धिः *f.*, विशुद्धिः *f.*, पावनं, पवित्रीकरणं, मार्जनं, परिमार्जनं, निर्मलीकरणं, विमलीकरणं, मलापकर्षणं, मलापनयनं, मलहरणं, शुचीकरणं, क्षालनं, प्रक्षालनं, निर्णेकः, स्वच्छीकरणं.—(State) शुद्धिः *f.*, संशुद्धिः, शुद्धता -त्वं, विशुद्धता, शोधितत्वं, शौचं, शुचिता, पवित्रता, पूतत्वं, पावितत्वं, पूतिः *f.*, निर्मलता; 'of a new house,' शल्योद्धारः, वास्तुसंशमनं.

PURIFICATIVE, PURIFICATORY, *a.* पावकः -का -कं, पावनः -ना -नं, पावी -विनी -वि (न्), पावमानः -ना -नं, शोधकः -का -कं, शोधनः -ना -नं, संशोधकः &c., विशोधकः &c., शुद्धिकरः -रा -री -रं, मलापकर्षकः -का -कं.

PURIFIED, *p. p.* पावितः -ता -तं, पूतः &c., परिपूतः &c., शोधितः -ता -तं, शुद्धः -द्धा -द्धं, संशोधितः &c., संशुद्धः &c., विशुद्धः &c., पवित्रः -त्रा -त्रं, पवित्रितः &c., पवित्रीकृतः -ता -तं, कृतशौचः -चा -चं, मार्जितः &c., प्रक्षालितः &c., निर्णिक्तः -क्ता -क्तं, धौतः -ता -तं, अवदातः &c.; 'from sin' पापशोधितः -ता -तं, पापपूतः -ता -तं, अघनिष्कृतः -ता -तं; 'by austerity,' प्रयतः -ता -तं; 'to be purified,' शुध् (c. 4. शुध्यति -ते, शोद्धुं), पू in pass. (पूयते), पवित्रीभू, शुद्धीभू.

To PURIFY, *v. a.* पू (c. 9. पुनाति -नीते, पवितुं, c. 10. पावयति -यितुं), परिपू, विपू, शुध् (c. 10. शोधयति -यितुं), विशुध्, परिशुध्, संशुध्, शुद्धीकृ, पवित्रीकृ, पवित्र (nom. पवित्रयति -यितुं), निर्मलीकृ, विमलीकृ, मृज् (c. 1. मार्जति, c. 2. मार्ष्टि -ष्टुं), सम्मृज्, निर्णिज् (c. 3. -णेनेक्ति -णेक्तुं), धाव् (c. 10. धावयति -यितुं), शुचीकृ, मलं हृ (c. 1. हरति, हर्त्तुं) or अपनी (c. 1. -नयति -नेतुं), मलापकर्षणं कृ, परिष्कृ, प्रक्षल्.

PURIFYING, *part.* or *a.* पुनानः -ना -नं, पावमानः -ना -नं, पवमानः &c., पावनः -ना -नं, पावकः -का -कं. *See* PURIFICATIVE.

PURITAN, *s.* पवित्रमतावलम्बी *m.* (न्), पवित्रमतधारी *m.* (न्).

PURITY, *s.* (Freedom from dirt, defilement &c.) निर्मलता -त्वं, नैर्मल्यं, निर्माल्यं, विमलता, वैमल्यं, मलहीनता, मलराहित्यं, शुद्धता -त्वं, शुद्धिः *f.*, विशुद्धिः *f.*, पवित्रता, पूतता, पूतिः *f.*, शुचिता, शौचं, मेध्यता, अक्लिष्टता.—(Clearness, transparency) प्रसादः, प्रसन्नता, प्रसत्तिः, *f.*, स्वच्छता, वैशद्यं, विशदत्वं.—(Freedom from guilt, moral purity) शुचिता -त्वं, शुद्धता, शुद्धिः *f.*, अनघता, पापहीनता, अघहीनता, निष्पापत्वं, पुण्यता, साधुता, निष्कलङ्कता.—(Purity of mind) चित्तशुद्धिः *f.*, मतिशुद्धता, विमलचित्तत्वं, शुद्धमतित्वं.—(Chastity in a woman) सतीत्वं, पुरुषास्पृहता, साध्वीत्वं.—(Of language) शुद्धिः अपशब्दहीनता.

To PURL, *v. n.* नदीप्रकारेण रणरणाशब्दं कृ or शुभगस्तनितं कृ.

PURLIEU, *s.* समन्तः, सामन्तदेशः, पर्य्यन्तदेशः, उपान्तदेशः, सामन्तं, परिसरः.

To PURLOIN, *v. a.* चुर्, हृ, अपहृ, मुष्, परिमुष्. *See To* PILFER.

PURLOINED, *p. p.* अपहृतः -ता -तं, मूषितः -ता -तं, चौरहृतः -ता -तं.

PURLOINER, *s.* अपहर्त्ता *m.* (र्तृ), परिमोषी *m.* (न्), स्तेयकृत्. *See* PILFERER.

PURPLE, *a.* धूम्रः -म्रा -म्रं, धूम्रवर्णः -र्णा -र्णं, धूमलः -ला -लं, कृष्णलोहितः -ता -तं, नीललोहितः &c., धूमाभः -भा -भं, कालसन्ध्याभः &c., धूम्ररुक् *m. f. n.* (च्).

PURPLE, *s.* धूम्रवर्णः, धूम्रः, धूमलः, धूमलवर्णः, रक्तः.

To PURPLE, *v. a.* धूम्रीकृ, लोहितीकृ, धूम्रवर्णेन रञ्ज् (c. 10. रञ्जयति -यितुं).

PURPLISH, *a.* ईषद्धूम्रः -म्रा -म्रं, आधूम्रः &c., आधूमलः ला -लं.

PURPORT, *s.* अर्थः, अभिप्रायः तात्पर्य्यं, आशयः, अभिप्रेतं, उद्देशः, भावार्थः, भावः, विवक्षितं, विवक्षा, अन्वयः, छन्दः. *See* MEANING.

To PURPORT, *v. a.* or *n.* अभिप्रे, उद्दिश्, वच् in des., अर्थवान् &c. भू or अस्. *See To* MEAN.

PURPOSE, *s.* अभिप्रायः, अभिप्रेतं, चिकीर्षितं, चिकीर्षा, आशयः, सङ्कल्पः, मनःसङ्कल्पः, उद्देशः, अर्थः, तात्पर्य्यं, इच्छा, आकांक्षा, कार्य्यं, बुद्धिः *f.*. कल्पना, परिकल्पना, आकूतं, मनोनिरूपणं, चिन्ता, प्रयोजनं, उपयोगः, *See* INTENTION; 'fixed purpose,' निश्चयः, निश्चितं; 'of unfailing purpose,' सत्यसङ्कल्पः -ल्पा -ल्पं; 'declared purpose,' ईरिताकूतं, 'one who does not effect his purpose,' अकृतार्थः -र्था -र्थं, असिद्धार्थः &c., अचरितार्थः &c., वृथार्थः &c., अकृतकृत्यः -त्या -त्यं; 'one who effects it,' कृतार्थः &c.; 'for the purpose of,' अर्थं or अर्थे or हेतोः affixed, कृते, निमित्ते; 'for the purpose of religion, or for religious purposes,' धर्म्मार्थं; 'to no purpose,' वृथा, मुधा, व्यर्थः -र्था -र्थं; 'for what purpose,' किमर्थं, किमुद्दिश्य; 'on purpose,' बुद्धिपूर्व्वं, बुद्ध्या. *See* PURPOSELY.

To PURPOSE, *v. a.* अभिप्रे, अभिप्रायं कृ, कृ in des., उद्दिश्, मनसा उद्दिश्, अभिसन्धा, इष्, परिक्लृप्, सङ्कल्पं कृ, बुद्धिं कृ. *See To* INTEND.

PURPOSED, *p. p.* अभिप्रेतः -ता -तं, चिकीर्षितः &c., उद्दिष्टः -ष्टा -ष्टं.

PURPOSELY, *adv.* बुद्धिपूर्व्वं -र्व्वकं, बुद्धिपुरःसरं, मतिपूर्व्वं, साभिप्रायं, अभिप्रायपूर्व्वं, बुद्ध्या, कामतस्, इच्छातस्. *See* INTENTIONALLY.

PURSE, *s.* कोषः धनकोषः, मुद्राकोषः, कटिबन्धः, ग्रन्थिः *m.*, कौलिकं.

To PURSE, *v. a.* (Put in a purse) कोषे निविश्; in caus.—(Contract) संकुच्, संहृ, संकृ, आकुञ्च्.

PURSE-CUTTING, *s.* ग्रन्थिभेदः, ग्रन्थिभेदनं, ग्रन्थिच्छेदः, कोषच्छेदः.

PURSE-PRIDE, *s.* धनगर्वः, धनदर्पः, धनाभिमानं, अर्थगर्वः, द्रव्याभिमानं.

PURSE-PROUD, *a.* धनगर्वितः -ता -तं, द्रव्यगर्वितः &c., धनाभिमानी -निनी &c.

PURSER, *s.* युद्धनावि कोषाधिकारी *m.* (न्), or धनभोजनादिपरिकल्पकः.

PURSUANCE, *s.* अनुसरणं, अनुसारः, अनुवर्त्तनं, अनुगमनं 'in pursuance of,' अनुसारेण, अनुसारतस्, अनुरूपेण.

PURSUANT, *a.* अनुसारी -रिणी -रि (न्), अनुरूपः -पा -पं, अनुवर्त्ती &c.

PURSUANTLY, *adv.* अनुसारेण -रात्, अनुसारतस्, अनुरूपेण.

To PURSUE, *v. a.* (Follow) अनुसृ (c. 1. -सरति -सर्त्तुं), अनुगम् (c. 1. -गच्छति -गन्तुं) अनुया (c. 2. -याति -तुं), अनुवृत्, अनुव्रज्, अनुक्रम्.—(Chase) अनुधाव्, (c. 1. -धावति -वितुं), पश्चाद् धाव्, अनुसृ, पश्चाद् वृत्.—(Prosecute, practise), अनुष्ठा (c. 1. -तिष्ठति -ष्ठातुं) आस्था, आचर् (c. 1. -चरति -रितुं), समाचर्, सेव्, निषेव्, अनुसेव्. *See* PROSECUTE.—(Carry on) निर्वह् in caus., प्रवृत् in caus., प्रणी, सम्प्रणी, विधा.—(Endeavour to obtain) आप् in des. (ईप्सति -प्सितुं), अभ्याप in des., प्राप् in des., लभ् in des. (लिप्सते -प्सितुं) अभिलभ्.—Imitate) अनुकृ, अनुगम्.

PURSUED, *p. p.* (Followed) अनुसृतः -ता -तं, अनुगतः &c., अनुयातः

&c., अनुगम्यमानः -ना -नं, अन्वीयमानः &c.—(Chased) अनुधावितः -ता -तं.—(Prosecuted, practised) अनुष्ठितः -ता -तं, आचरितः &c., सेवितः -ता -तं, निषेवितः &c.

PURSUER, *s.* अनुगामी *m.* (न्), अनुयायी *m.*, अनुसारी *m.*, अनुधावकः.

PURSUIT, *s.* (Following) अनुसरणं, अनुवर्त्तनं, अनुगमनं, अनुव्रजनं. —(Running after, chasing) अनुधावनं, अभिधावनं, पश्चाद् धावनं, अनुसरणं, अनुसारः, अन्वेषणं, मार्गणं, मृगणं.—(Prosecution, carrying on with a view to obtain) अनुष्ठानं, सेवनं, निषेवनं, अनुसेवनं, आचरणं, प्रवृत्तिः *f.*, प्रवर्त्तनं, व्यापारः, व्यवसायः, निष्ठता, अभियोगः, अनुशीलनं, परिशीलनं, अनुसन्धानं.—(Course of occupation, employment) व्यापारः, व्यवसायः, कर्म्म *n.* (न्), उद्योगः, उद्यमः, प्रवृत्तिः *f.*, व्यवहारः, कार्य्यं; 'interesting pursuit,' विनोदः, विनोदजनकव्यापारः.

PURSUIVANT, *s.* राजदूतः, राजदूतपरिचरः, वेत्रधरः, याष्टीकः.

PURSY, *a.* दुःश्वासी -सिनी &c., प्राणकृच्छ्रग्रस्तः -स्ता -स्तं, ह्रस्वस्थूलः &c.

PURULENCE, PURULENCY, *s.* पूयत्वं, सपूयत्वं -ता, पूयपूर्णता, पूययुक्तता.

PURULENT, *s.* सपूयः -या -यं, पूयमयः -यी -यं, पूयरूपः -पा -पं, पूययुक्तः -क्ता -क्तं, पूयपूर्णः -र्णा -र्णं.—(Running with pus) पूयस्रावी -विणी -वि (न्).

To PURVEY, *v. a.* and *n.* खाद्यद्रव्याणि परिकॢप् (c. 10. -कल्पयति -यितुं) or उपकॢप् or सम्भृ (c. 1. -भरति -भर्त्तुं) or युज् (c. 10. योजयति -यितुं) or समायुज्, भोजनपरिकल्पनं कृ, भोजनसम्भारं कृ, आहारयोजनां कृ, आहारनिर्वाहं कृ.

PURVEYANCE, *s.* खाद्यद्रव्यपरिकल्पनं, भोजनपरिकल्पनं, अन्नादिपरिकल्पनं, भोजनसम्भारः, आहारयोजना, आहारनिर्वाहः, परिकल्पनं, निर्वाहः.

PURVEYOR, *s.* भोजनपरिकल्पकः, अन्नादिपरिकल्पकः, भोजनाधिकारी *m.* (न्), भोजनाधिकृतः, आहारयोजकः.

PUS, *s.* पूयं, पूयरक्तं, पूयशोणितं, दूष्यं, मलजं, क्षतजं, प्रसितं, अवक्लेदः.

To PUSH, *v. a.* and *n.* (Make a thrust) तड् (c. 10. ताडयति -यितुं), प्रसृ (c. 10. -सारयति -यितुं), प्रसारणं कृ, आहन् (c. 2. -हन्ति -न्तुं), अभिहन्, अभ्याहन्.—(Impel, move by pressure) हस्ताभ्याम् अवलम्ब्य चल् (c. 10. चालयति -यितुं) or सञ्चल् or सृ (c. 10. सारयति -यितुं) or स्थानान्तरीकृ or प्रेर् or प्रणुद् or नुद् or कृष् or समाकृष्.—(Push aside, push out) अपसृ in caus., वहिष्कृ, वहिःकृ. —(Push forward) प्रसृ, प्रचल् in caus., अग्रे चल् or सृ, अग्रे नी.

PUSH, PUSHING, *s.* ताडनं, आहतिः *f.*, आघातः, अभिघातः, अभ्याघातः, प्रहारः, प्रसारणं, अपसारणं, सारणं.—(Impelling) प्रणोदः, प्रेरणं -णा, वेगः.—(Vigorous effort, onset) सुयत्नः, आक्रमः -मणं.

PUSHED, *p. p.* ताडितः -ता -तं, आहतः &c., अभिहतः &c., प्रसारितः -ता -तं, अपसारितः &c., सारितः &c., चालितः &c., प्रेरितः -ता -तं, प्रणोदितः &c., प्रणुन्नः -न्ना -न्नं, स्थानान्तरीकृतः &c., वहिष्कृतः &c.

PUSHING, *a.* (Enterprising) साहसिकः -की -कं, साहसशीलः -ला -लं, साहसबुद्धिः -द्धिः -द्धि, उद्योगी -गिनी &c., अत्युद्योगी &c., उद्योगशीलः -ला -लं, अत्युद्यमी &c., धृष्टः -ष्टा -ष्टं, प्रगल्भः -ल्भा -ल्भं, प्रतिभानवान् -वती -वत् (त्).

PUSILLANIMITY, *s.* भीरुता, कातरता, धैर्य्यहीनता, शौर्य्यहीनता, वीर्य्यहीनता, निर्वीर्य्यं, कार्पण्यं, कृपणबुद्धित्वं, क्लीवता, भीरुहृदयत्वं, कापुरुषत्वं.

PUSILLANIMOUS, *a.* भीरुहृदयः -या -यं, कृपणबुद्धिः -द्धिः -द्धि, कातरबुद्धिः &c., धैर्य्यहीनः -ना -नं, शौर्य्यहीनः &c., पौरुषहीनः &c.

PUSS, PUSSY, *s.* मार्जारः, विडालः. *See* CAT.

PUSTULE, *s.* स्फोटः -टकः, विस्फोटः, रक्तवटी, रक्तवरटी, वटी, वरटी, व्रणः, तनुव्रणः, गण्डः, गुटिका. *See* PIMPLE.

PUSTULOUS, *a.* स्फोटपूर्णः -र्णा -र्णं, स्फोटमयः -यी -यं, सस्फोटः -टा -टं.

To PUT, *v. a.* (Lay, place, set) धा (c. 3. दधाति, धातुं), स्था in caus. (स्थापयति -यितुं), ऋ in caus. (अर्पयति -यितुं), निविश् (c. 10. -वेशयति -यितुं), सन्निविश्, न्यस् (c. 4. -अस्यति -असितुं), विन्यस्, आरुह् in caus. (-रोपयति -यितुं), दा (c. 3. ददाति, दातुं), धृ (c. 1. धरति, धर्त्तुं), कृ (c. 8. करोति, कर्त्तुं). *See To* LAY, PLACE.—(Apply) आधा, संयुज् (c. 10. -योजयति -यितुं), आयुज्, युज्, ऋ or सृ in caus.—(Incite) प्रवृत् in caus., प्रोत्सह् in caus., प्रेर्.—(Put a question), *see To* PROPOSE.—(Put about, as a ship, &c.) नौमार्गं परिवृत् (c. 10. -वर्त्तयति -यितुं), मार्गपरिवर्त्तनं कृ, गतिपरिवर्त्तनं कृ.—(Put away) अपसृ (c. 10. -सारयति -यितुं), निःसृ, वहिष्कृ, दूरीकृ.—(Put aside, put by) न्यस्, सन्न्यस्, व्युदस्, निधा, रक्ष्, परिरक्ष्.—(Put down, lay down) न्यस्, उपन्यस्, निधा, अवधा, निक्षिप्.—(Put down), *see To* REPRESS, DEGRADE.—(Put forth, extend) प्रसृ in caus.—(Put forth), *see To* SPROUT, BUD.—(Put forth), *see To* EXERT; 'he puts forth his strength,' कृतशक्तिर् भवति.—(Put off), *see To* POSTPONE.—(Put off, divest one's self) वस्त्राणि अवतॄ (c. 10. -तारयति -यितुं), उत्कृष्, उन्मुच्, अवमुच्, विमुच्, उच्छद्, अपनह्.—(Put off), *see To* DISCARD.—(Put off from land) तीराद् अपगम् or अपया or अपसृ. —(Put on clothes, dress) वस्त्रं परिधा or पिधा, वस्, प्रवस्, विवस्, प्रतिवस्, वेष्ट्, परिवेष्ट्, प्रवेष्ट्, आच्छद्, प्रावृ, संव्ये, परिव्ये, परिधा, वस्त्राणि परिधा or आच्छद् or आमुच्, प्रसाध्, वस्त्र, संवस्त्र, *see To* DRESS, INVEST.—(Put on armour) नह् (c. 4. नह्यति -ते, नद्धुं), सन्नह्, दंशनं सन्नह्, वर्म्म (c. 10. वर्म्मयति -यितुं), संवर्म्म.—(Put on shoes) पादुके अधिरुह् (c. 1. -रोहति -रोढुं) or रुह् or आरुह् in caus.—(Put on, assume) ग्रह्, धृ (c. 10. धारयति -यितुं), स्वीकृ, अङ्गीकृ. —(Put out, extinguish) शम् in caus., उपशम्, प्रशम्, निशम्, निर्वा in caus.; 'having put out the fire,' अग्निं शमयित्वा or निशाम्य.—(Put out, extend) प्रसृ in caus.—(Put out), *see To* CONFUSE, DISCONCERT.—(Put out the eyes) लोचने उत्पट् in caus. or उत्कृष् or उच्छिद्.—(Put to it), *see To* DISTRESS, PERPLEX.—(Put together) सन्धा, समाधा, संयुज्.—(Put up, lodge) उत्तॄ, उत्तरणगृहे वस्, रथाद् अवतॄ.—(Put up with) सह् (c. 1. सहते, सोढुं), विषह्.—(Put up), *see To* PACK.—(Put up), *see To* EXPOSE.—(Put upon), *see To* DECEIVE.—(Put in order) विरच्, रच्, विन्यस्, सज्जीकृ.—(Put in mind), *see To* REMIND. —(Put in practice), *see To* EXERCISE, PRACTISE.—(Put in fear), *see To* FRIGHTEN.—(Put in writing), *see To* COMMIT TO WRITING.—(Put in jeopardy) संशयितं -तां कृ, *see To* JEOPARDY.—(Put to death), *see To* KILL.

PUT, *p. p.* स्थापितः -ता -तं, अर्पितः &c., निहितः &c., निवेशितः &c., न्यस्तः -स्ता -स्तं. *See* PLACED.—(Put on, as clothes) परिहितः -ता -तं.—(Put off, discarded) अवतारितः -ता -तं, अपास्तः -स्ता -स्तं, सन्न्यस्तः &c., व्युदस्तः &c., त्यक्तः -क्ता -क्तं.

PUT, *s.* (Clown) वृषलः, ग्राम्यजनः.—(Harlot) वेश्या.

PUTATIVE, *a.* लोकप्रसिद्धः -द्धा -द्धं, जनप्रसिद्धः &c., लोकमतः -ता -तं.

PUTID, *a.* क्षुद्रः -द्रा -द्रं, कुत्सितः -ता -तं, कृपणः -णा -णं, तुच्छः &c

PUTIDNESS, *s.* क्षुद्रता, कुत्सितत्वं, तुच्छता -त्वं, कृपणता, कार्पण्यं.

PUT-OFF, *s.* (An excuse) अपदेशः, व्यपदेशः, छद्म *n.* (न्), छलं.

PUTREFACTION, *s.* पूतिः *f.*, पूतत्वं -ता, गलितत्वं, गलनं, विगलनं, गलितावस्था, विलयः -यनं, दौर्गन्ध्यं, दौर्गन्धिः *m.*, दुर्गन्धता, पूतिगन्धः.

PUTREFIED, *p. p.* गलितः -ता -तं, विगलितः &c., पूतीभूतः &c., विलीनः -ना -नं.

To PUTREFY, *v. a.* पूतीकृ, गल् in caus. (गालयति, गलयति -यितुं), विगल्, गलितीकृ, विली in caus. (-लापयति -यितुं).

To PUTREFY, *v. n.* गल् (c. 1. गलति -लितुं), विगल्, गलितः -ता -तं भू, पूतीभू, विली (c. 4. -लीयते -लेतुं), प्रविली, दुर्गन्धः -न्धा -न्धं भू, पूतिगन्धिकः -का -कं भू.

PUTRESCENCE, *s.* गलनं, विगलनं, विलयः -यनं, पूतिः *f.*, पूतत्वं.

PUTRESCENT, *a.* गलन् -लन्ती -लत् (त्), विगलन् &c., विलीयमानः -ना -नं.

PUTRID, *a.* पूतः -ता -तं, पूतिगन्धः -न्धा -न्धं, दुर्गन्धः -न्धा -न्धं, दुर्गन्धी -न्धिनी -न्धि (न्), पूतिगन्धिकः -का -कं, उग्रगन्धिः -न्धिः -न्धि, गलितः -ता -तं, विगलितः &c., विलीनः -ना -नं.

PUTRIDNESS, PUTRIDITY, *s.* पूतत्वं -ता, पूतिः *f.*, दुर्गन्धता, दौर्गन्ध्यं, दौर्गन्धिः *m.*, पूतिगन्धिता, गलितत्वं -ता, विगलितत्वं, विलीनता.

PUTTY, *s.* काचबन्धनलेपः, काचबन्धनयोग्यो विलेपः, उदपेषं.

To PUTTY, *v. a.* पूर्वोक्तलेपेन काचं बन्ध् (c. 9. बध्नाति, बन्द्धुं).

To PUZZLE, *v. a.* मुह् (c. 10. मोहयति -यितुं), विमुह्, व्यामुह्, भ्रम् (c. 10. भ्रमयति -यितुं), भ्रान्तिं जन्, निरुत्तरीकृ, बुद्धिभ्रान्तिं कृ, शल्यं कृ. *See To* POSE.

PUZZLE, *s.* (Enigma) गूढं, कूटं, प्रवह्लिः *f.* -ह्लिका, प्रहेलिका, समलापिका.—(Perplexity) व्यस्तता, मोहः, व्यामोहः, भ्रान्तिः *f.*, भ्रमः, व्याकुलता, व्यग्रता, बुद्धिभ्रान्तिः *f.*, बुद्धिभ्रमः.

PUZZLED, *p. p.* मोहितः -ता -तं, विमोहितः &c., भ्रान्तः -न्ता -न्तं, सम्भ्रान्तः &c., भ्रान्तहृदयः -या -यं, व्यस्तः -स्ता -स्तं, निरुत्तरीकृतः -ता -तं, इतिकर्त्तव्यतामूढः -ढा -ढं.

PUZZLE-HEADED, *a.* भ्रान्तबुद्धिः -द्धिः -द्धि, व्यस्तबुद्धिः &c., जडबुद्धिः &c.

PUZZLING, *part.* or *a.* भ्रमजनकः -का -कं, मोहजनकः &c. *See* PERPLEXING.

PYGMY, *s.* वामनः, खर्वः, खर्वः, वाममूर्त्तिः *m.*, ह्रस्वमूर्त्तिः, ह्रस्वकायः.

PYGMY, PYGMEAN, *a.* वामनः -ना -नं, वामनतनुः -नुः -नु. *See* DWARFISH.

PYLORUS, *s.* जठरस्य अधःस्थमुखं, जठराधोमुखं, जठराधोद्वारं.

PYRAMID, *s.* सूच्यग्रस्तम्भः, सूच्याकारस्तम्भः, शुण्डाकारस्तम्भः, सूचिः -चीf., शिखा, शङ्कुः *m.*, सूक्ष्माग्रस्तम्भः.

PYRAMIDAL, PYRAMIDICAL, *a.* सूच्यग्रः -ग्रा -ग्रं, सूच्याकारः -रा -रं, सूच्यग्रस्तम्भाकारः &c., शुण्डाकारः &c., सूक्ष्माग्रस्तम्भाकृतिः -तिः -ति, शङ्कुरूपः -पा -पं, शिखावलः -ला -लं, शिखरी -रिणी &c.

PYRE, *s.* चितिः -ती *f.*, चिता, चित्या, श्मशानाग्निः *m.* *See* PILE.

PYRITES, *s.* विटमाक्षिकं, सुवर्णमाक्षिकं, स्वर्णमाक्षिकं, माक्षिकं, आवर्त्तः, सुवर्णमुखी, कामारिः *m.*, मधुधातुः *m.*, आग्नेयप्रस्तरः; 'iron pyrites,' नीलमृत्तिका, तस्तुलोयः -यकः; 'hepatic iron pyrites,' कृष्णमाक्षिकं, कांस्यमाक्षिकं.

PYRITIC, *a.* माक्षिकसम्बन्धी -न्धिनी &c., माक्षिकगुणकः -का -कं.

PYROTECHNY, *s.* अग्निक्रीडाविद्या, आग्नेयक्रीडाविद्या, अग्निशिल्पं.

PYRRHIC, *s.* (Foot in prosody) सुप्रियः, लल.

PYRRHONIST, *s.* नास्तिकः, शास्त्रादिविश्वासी *m.* (न्), चार्वाकः, धर्म्मनिन्दकः.

Q.

QUACK, *s.* (Cry of a duck or goose) हंसनादः, हंसरावः, हंसचीत्कारः, क्रक्शब्दः.—(Empiric, pretender to medical skill) दुश्चिकित्सकः, मिथ्याचिकित्सकः, मिथ्यावैद्यः, छद्मवैद्यः, वैद्यम्मन्यः, वैद्यमानी *m.* (न्), आयुर्वेदानभिज्ञः.

To QUACK, *v. n.* हंसवद् नद् (c. 1. नदति -दितुं) or रु (c. 2. रौति, रवितुं) or चीत्कृ or कृ, हंसनादं कृ, क्रक् शब्दं कृ.—(Pretend to medical skill) दुश्चिकित्सां कृ, मिथ्याचिकित्सनं कृ, आयुर्वेदविरोधेन चिकित्सां कृ.

QUACKERY, *s.* दुश्चिकित्सा -त्सनं, मिथ्याचिकित्सा -त्सनं, आयुर्वेदविरुद्धा चिकित्सा, आयुर्वेदानभिज्ञता.

QUADRAGESIMA, *s.* चत्वारिंशद्दिवसोपवासः, चत्वारिंशद्दिनोपवासः.

QUADRAGESIMAL, *a.* चत्वारिंशद्दिनोपवाससम्बन्धी -न्धिनी -न्धि (न्).

QUADRANGLE, *s.* चतुरस्रं, चतुष्कोणः, चतुर्भुजः; 'formed by four houses,' चतुःशालं -ला -लकं, चतुश्शाला, प्रकोष्ठः.

QUADRANGULAR, *a.* चतुष्कोणः -णा -णं, चतुरस्रः -स्रा -स्रं, चतुर्भुजः -जा -जं.

QUADRANT, *s.* (Fourth part) पादः, चतुर्थभागः, तुरीयभागः.—(Of a circle) वर्त्तुलपादः, त्रिज्या, पदं.—(The instrument) तुरीययन्त्रं, सूर्य्ययन्त्रं.

QUADRATE, *To* QUADRATE, *see* SQUARE, *To* SQUARE.

QUADRATIC, *a.* चतुष्कोणीयः -या -यं, वर्गीयः -या -यं, चतुरस्रीयः &c.

QUADRATURE, *s.* (Of a circle, &c.) वर्गीकरणं.

QUADRENNIAL, *a.* चतुर्वर्षीयः -या -यं, चातुर्वर्षिकः -की -कं, चातुरब्दिकः &c.

QUADRILATERAL, *a.* चतुर्भुजः -जा -जं, चतुःपार्श्वीयः -या -यं, चतुःपार्श्वः -र्श्वा -र्श्वं, चतुःपार्श्वयुक्तः -क्ता -क्तं, चतुःपार्श्वविशिष्टः -ष्टा -ष्टं.

QUADRILITERAL, *a.* चतुरक्षरः -रा -रं, चतुर्वर्णः -र्णा -र्णं.

QUADRILLE, *s.* चतुर्नृत्यं, सम्मुखस्थानां स्त्रीपुरुषाणां नृत्यं.

QUADRIMESTRAL, *a.* चतुर्मास्यः -स्या -स्यं, चातुर्मासिकः -की -कं.

QUADRIPARTITE, *a.* चतुर्विधः -धा -धं, चतुर्भागः -गा -गं, चतुर्विभागः &c.

QUADRISYLLABLE, *s.* चतुरक्षरं, चतुरक्षरविशिष्टः शब्दः, चतुरक्षरः शब्दः.

QUADRIVIAL, *a.* चतुष्पथीयः -या -यं, चतुर्मार्गीयः -या -यं.

QUADRIVIUM, *s.* (Place where four roads meet) चतुष्पथं, चतुर्मार्गं.

QUADRUPED, *s.* चतुष्पदः -दी, चतुष्पादः, चतुष्पाद् *m. f. n.*, चतुष्पादः पशुः, चतुष्पदपशुः *m.*, चतुष्पदप्राणी *m.* (न्), चतुर्गतिः -तिः -ति.

QUADRUPLE, *a.* चतुर्गुणः -णा -णं, चतुर्विधः -धा -धं, चतुष्टयः -यी -यं.

To QUADRUPLE, QUADRUPLICATE, *v. a.* चतुर्गुणं -णां कृ, चतुर्गुणीकृ, चतुर्विधीकृ.

To QUAFF, *v. a.* बाहुल्येन पा (c. 1. पिबति पातुं) or आपा or निपा.

QUAFFED, *p. p.* पीतः -ता -तं, आपीतः -ता -तं, निपीतः -ता -तं.

QUAFFER, *s.* पाता *m.* (तृ), पायी *m.* (न्), अतिपायी *m.*, बहुपायी.

QUAGGY, *a.* पङ्किलः -ला -लं, पङ्कमयः -यी -यं, बहुपङ्कः -ङ्का -ङ्कं.

QUAGMIRE, *s.* पङ्कः, कुपङ्कः, पङ्किलभूः *f.*, कार्दमभूमिः *f.*, सपङ्कभूमिः *f.*, पङ्ककर्वटः, अनूपभूः *f.*, पङ्कस्थानं.

To QUAIL, *v. n.* कम्प् (c. 1. कम्पते -म्पितुं), प्रकम्प्, विकम्प्, सद् (c. 1. सीदति, सत्तुं), अवसद्, विषद्, क्षि in pass. (क्षीयते), प्रली (c. 4. -लीयते -लेतुं).

QUAIL, *s.* (The bird) वर्त्तिका, वर्त्तकः, वर्त्तकपक्षी *m.* (न्), फणिखेलः, गञ्जिकायः, लावः, लावकः, गहद्योधी *m.* (न्), भारती, विष्णुलिङ्गी.

QUAINT, *a.* (Odd) विलक्षणः -णा -णं, असङ्गतः -ता -तं, अपरूपः -पा -पं, प्राचीनरीत्यनुरूपः -पा -पं.—(Over exact) अतिसूक्ष्मः -क्ष्मा -क्ष्मं.

QUAINTLY, *adv.* विलक्षणं, वैलक्षण्येन, असङ्गतं, प्राचीनरीत्यनुरूपेण.

QUAINTNESS, *s.* वैलक्षण्यं, विलक्षणता, असङ्गतत्वं, अपरूपता, अतिसूक्ष्मता.

To QUAKE, *v. n.* कम्प् (c. 1. कम्पते -म्पितुं), प्रकम्प्, विकम्प्, अभिकम्प्, वेप् (c. 1. वेपते -पितुं), प्रवेप्, त्रस् (c. 4. त्रस्यति -सितुं), वित्रस्, उद्विज् (c. 6. -विजते -जितुं), ह्वल् (c. 1. ह्वलति -लितुं), विह्वल्, प्रह्वल्.

QUAKE, *s.* कम्पः, प्रकम्पः, उत्कम्पः, कम्पनं, वेपनं, प्रवेपणं, वेपथुः *m.*

Quaker, *s.* कम्पान्वितः -ता, कम्पनः -ना, कम्पमानः -ना, सकम्पः.

Quaking, *part.* कम्पमानः -ना -नं, वेपमानः -ना -नं, कम्पितः -ता -तं.

Qualification, *s.* (That which fits a person for any office, &c.) योग्यता, उपयुक्तता, उपयोगिता, क्षमता, कार्य्यक्षमता, गुणविशिष्टता, गुणवैशिष्ट्यं, गुणता.—(Endowment) गुणः, विशेषणं.—(Modification, limitation) मर्य्यादा, नियमनं, परिच्छेदः -दनं, अवच्छेदः -दनं, शमनं, परिमितत्वं, नियतत्वं, परिमाणं, न्यूनत्वं, न्यूनीकरणं, विशेषः; 'without qualification,' अविशेषणः -णा -णं.

Qualified, *p.p.* (Fitted) योग्यः -ग्या -ग्यं, उपयुक्तः -क्ता -क्तं, उपयोगी -गिनी -गि (न्), क्षमः -मा -मं, कार्य्यक्षमः -मा -मं, कर्म्मक्षमः &c., अलङ्कर्मीणः -णा -णं, उचितः -ता -तं, पर्य्याप्तः -प्ता -प्तं, गुणवान् -वती -वत् (त्), गुणी &c., गुणोपेतः -ता -तं.—(Modified) नियमितः -ता -तं, नियतः &c., निबद्धः -द्धा -द्धं, समर्य्यादः -दा -दं, सपरिमाणः -णा -णं, परिमितः -ता -तं, परिच्छिन्नः -न्ना -न्नं, शमितः &c.

To qualify, *v. a.* (Make fit) योग्यं -ग्यां कृ, उपयुक्तं -क्तां कृ, क्षमं -मां कृ, कार्य्यक्षमं -मां कृ, उपयोगिनं -गिनीं कृ, पर्य्याप्तं -प्तां कृ, गुणवन्तं -वतीं कृ, योग्यीकृ, क्षमीकृ, उपयुक्तगुणान् दा.—(Modify, limit, diminish) नियम् (c. 1. -यच्छति -यन्तुं), निबन्ध् (c. 9. -बध्नाति -बन्द्धुं), समर्य्यादं -दां कृ, परिमा, परिमितं -तां कृ, सपरिमाणं -णां कृ, परिच्छिद्, शम्, उपशम्, प्रशम्, न्यूनीकृ, ह्रस्, लुप्.

Quality, *s.* (Property) गुणः, धर्म्मः; 'good quality,' सद्गुणः, सुगुणः, गुणः; 'possessed of good qualities,' सद्गुणः -णा -णं, गुणी गिनी -णि (न्), सद्गुणी &c., सुगुणी &c., गुणवान् -वती -वत् (त्), गुणान्वितः -ता -तं, गुणोपेतः -ता -तं, गुणसागरः -रा -रं, गुणाकरः -रा -रं, गुणयुक्तः -क्ता -क्तं, गुणाश्रयः -या -यं; 'the possession of good qualities,' गुणता, गुणवत्ता; 'destitute of them,' गुणहीनः -ना -नं; 'the loss of them,' गुणभ्रंशः; 'a collection or heap of them,' गुणसंग्रहः, गुणौघं, गुणपूगं; 'variety of quality,' गुणान्तरं; 'bad quality,' दुर्गुणः -णं, अवगुणः, असद्गुणः; 'possessed of bad qualities,' दुर्गुणी &c.; 'essential or inherent quality,' सनातनधर्म्मः, वस्तुशक्तिः *f.*—(Distinguishing property) धर्म्मः, भावः, स्वभावः, विशेषगुणः, विशेषधर्म्मः, विशेषः, लक्षणं, गुणलक्षणं, स्वभावलक्षणं, रूपं, स्वरूपं, शीलः -लं.—(Nature, disposition) भावः, स्वभावः, प्रकृतिः *f.*, शीलः -लता; 'good quality,' सद्भावः.—(Character, whether good or bad) भावः, सदसद्भावः, गुणागुणं, गुणावगुणं, सत्त्वं, सत्त्वासत्त्वं.—(High rank) श्रेष्ठपदं, पदश्रेष्ठता उत्कृष्टपदं, पदोत्कृष्टता, कुलीनता.—(People of rank) कुलीनवर्गः, श्रेष्ठपदस्थाः *m. pl.*, कुलीनजनाः *m. pl.* कौलीनं.

Qualm, *s.* (Nausea) वमनेच्छा, विवमिषा, उत्क्लेशः.—(Of conscience) मनस्तापः, अन्तःकरणतापः, ईषत्तापः, ईषत्सन्तापः, पश्चात्तापः.

Qualmish, *a.* वमनेच्छुः -च्छुः -च्छु, विवमिषुः &c., वमनोन्मुखः -खा -खं.

Quandary, *s.* सन्देहः, संशयः, सम्भ्रमः, व्यस्तता, व्यामोहः.

Quantity, *s.* (Magnitude, a mass or collection of indeterminate dimensions) परिमाणं, प्रमाणं, परिमितिः *f.*, मानं, मात्रा, भागः, अंशः; 'a quantity of water equivalent to a piece of gold,' सुवर्णखण्डसमो or सुवर्णखण्डपरिमाणो or सुवर्णखण्डपरिमितो जलांशः.—(Great quantity, abundance) बाहुल्यं, बहुत्वं -ता, प्राचुर्य्यं, प्रचुरता, प्रायः, आधिक्यं, महाभागः or expressed by the adjectives बहु, प्रचुर, अधिक prefixed; 'in great quantities,' बाहुल्येन, बहुशस्, अनेकशस्, प्राचुर्य्येण.—(Great quantity, collection) समयः, निचयः, प्रचयः, सञ्चयः, वृन्दं, ओघः, संग्रहः, पुञ्जः, राशिः *m.*, पूगः, पुञ्जः -ञ्जं, निवहः, वारः. *See* Heap.—(Small quantity) अल्पभागः, अल्पांशः, अल्पं -ल्पिका, अल्पमात्रं, मात्रा, स्तोकं, मुष्टिमात्रं, मुष्टिपरिमाणं; 'in small quantities,' अल्पशस्, *see* Little.—(Measure, in prosody) मात्रा.—(In arithmetic or algebra) राशिः *m.f.*; 'known quantity,' व्यक्तराशिः *m.f.*, रूपं; 'unknown quantity,' अव्यक्तराशिः, अव्यक्तः; 'negative,' क्षयः; 'infinite,' अनन्तराशिः; 'figurative,' क्षेत्रराशिः.

Quantum, *s.* परिमाणं, निरूपितांशः, निरूपितभागः, उपयुक्तभागः.

Quarantine, *s.* चत्वारिंशद्दिनपर्य्यन्तं गमनागमननिषेधः or संसर्गनिषेधः, चत्वारिंशद्दिवसपर्य्यन्तं गमनागमनावरोधः.

Quarrel, *s.* विवादः, कलहः -हं, वाग्युद्धं, वाक्कलहः -हं, वादयुद्धं, विप्रलापः, वाक्कलिः *m.*, विसंवादः, विप्रयोगः, विप्रतिपत्तिः *f.*, द्वन्द्वं, द्वैधं, विरोधोक्तिः *f.*, वाग्विरोधः, मैत्रीभङ्गः, सौहृदभङ्गः, वैरं, वैरिता; 'quarrel in fun,' क्रीडाकलहः.

To quarrel, *v. n.* कलहं कृ, कलह (nom. कलहायते), विवद् (c. 1. -वदते -दितुं), विसंवद्, विप्रलप् (c. 1. -लपति -पितुं), व्यवक्रुश् (c. 1. -क्रोशति -क्रोष्टुं), वाक्कलहं कृ, वाग्युद्धं कृ, युध् (c. 4. युध्यते, योद्धुं), वैर (nom. वैरायते), द्वन्द्वं कृ.

Quarreler, *s.* विवादी *m.* (न्), कलहकारी *m.* (न्), कलिकारकः.

Quarreling, *s.* कलहकरणं, विवादकरणं, व्यवक्रोशनं, कल्कनं.

Quarrelsome, *a.* कलहकारी -रिणी -रि (न्), कलहकारः -री -रं, कलहप्रियः -या -यं, कलिकारी &c., कलिकारकः -का -कं, कलिप्रियः -या -यं, विवादार्थी -र्थिनी &c., विवादी &c., विवादशीलः -ला -लं, विवादप्रियः -या -यं, युयुत्सुः -त्सुः -त्सु, सद्वन्द्वः -न्द्वा -न्द्वं, शीघ्रक्रोधी &c., आशुक्रोधी &c., क्रोधशीलः &c.

Quarrelsomeness, *s.* कलहकारिता, विवादशीलता, क्रोधशीलता, युयुत्सा.

Quarry, *s.* (For stone) आकरः, खनिः -नी *f.*, खानिः -नी *m. f.*, प्रस्तरखानिः *f.*, पाषाणस्थली, पाषाणस्थानं, पाषाणकन्दरः, प्रस्तरोत्पत्तिस्थानं, पाषाणभूमिः *f.*—(Of a hawk, &c.) श्येनानुसृतः पक्षी, श्येनानुसृतं पक्ष्यादि, आमिषं.

Quarryman, *s.* प्रस्तरखनकः, पाषाणखनकः, पाषाणखनिकः.

Quart, *s.* कुडवः, अर्द्धप्रस्थस्य चतुर्थांशः or पादः.

Quartan, *s.* (Ague) चातुर्थकः, चातुर्थिकः, त्र्याहिकः.

Quarter, *s.* (Fourth part) पादः, चतुर्थांशः, चतुर्थभागः, तुरीयभागः, तुरीयांशः, तुरीयः, चतुर्भागः, पादिकः, पादिनः, अर्द्धार्द्धः, टः; 'three quarters, or a whole minus a quarter,' पादोनः -ना -नं.—(Region or quarter of the sky) दिक् *f.* (श्), दिशा, दिशः *f.* (स्), आशा, काष्ठा, ककुभ् *f.*, हरित् *f.*, दिग्विभागः, खनिः -नी *m. f.*, विदेशिनी; the four quarters are, East प्राची, पूर्व्वदिक् *f.*, पूर्व्वकाष्ठा, South अवाची, दक्षिणा, दक्षिणाशा, West प्रतीची, पश्चिमाशा, पश्चिमकाष्ठा, North उदीची, उत्तरा, उत्तराशा; 'intermediate quarter or point,' विदिक् *f.* (श्), प्रदिक्, अपदिशं; these are 'South-east,' दक्षिणपूर्व्वा; 'South-west,' नैर्ऋतिः *f.*, दक्षिणपश्चिमा; 'North-west,' वायवी, पश्चादुत्तरा, पश्चादुदीची, उत्तरपश्चिमा; 'North-east,' प्रागुत्तरा, प्रागुदीची, उत्तरपूर्व्वा; 'Regent of a quarter,' दिक्पालः, लोकपालः; 'the eight regents,' अष्टदिक्पालाः *m. pl.*, *see* Regent; 'quarter of the wind,' वायवी; 'from every quarter,' चतुर्दिग्भ्यः; 'in every quarter,' चतुर्दिक्षु; 'from various quarters,' नानादिग्भ्यः.—(Region, in general) देशः, प्रदेशः, उद्देशः, अपदेशः; 'from various quarters,' नानादेशेभ्यः, नानादिग्देशेभ्यः.—(Quarters, lodgings) वासस्थानं, आवासस्थानं,

वसतिस्थानं, वसतिः f., निवसतिः f., निकेतनं; 'of an army,' सैन्यनिवेशः -शनं, सैन्यनिकेतः -तनं, बलस्थितिः f., सैन्यस्थितिः f., कटकः; 'head-quarters,' सेनापतिनिकेतः -तनं.—(Indulgence shewn in battle) जीवदानं, प्राणदानं, दया, क्षमा, कृपा, धर्म्मः; 'quarter shall be given to him,' तस्य दया or धर्म्मो भविष्यति; 'quarter!' दयस्व, क्षमस्व, क्षम्यतां.—(Quarter of a year) वत्सरपादः, मासत्रयं, त्रिमासं.—(Close quarters) बाहुबाहवि, हस्ताहस्ति; 'to come to close quarters in battle,' बाहुयुद्धं कृ.

To QUARTER, *v. a.* (Divide into four parts) चतुर्भागीकृ, चतुरंशीकृ, चतुर्धा कृ, चतुर्धा खण्ड् or विभिद् or विछिद्, चतुर्भागशः कृ, चतुःखण्डशः कृ.—(Lodge) वस् in caus.

To QUARTER, *v. n.* (Lodge) वस्, निवस्, प्रतिवस्, वासं कृ.

QUARTER-DAY, *s.* पाददिनं, पाददिवसः, वत्सरपाददिवसः, त्रिमासान्तदिनं.

QUARTER-DECK, *s.* नौपृष्ठस्य पश्चिमभागः or उन्नतभागः.

QUARTERED, *p. p.* चतुर्भागीकृतः -ता -तं, चतुर्धा विभिन्नः -न्ना -न्नं, चतुर्धा खण्डितः -ता -तं.—(Lodged) वासितः -ता -तं.

QUARTERLY, *a.* त्रैमासिकः -की -कं, त्रिमासीनः -ना -नं, पादिकः -की -कं.

QUARTERLY, *adv.* त्रिमासान्ते, मासत्रयान्ते, मासत्रयावसाने.

QUARTO, *s.* चतुःपत्रकपुस्तकं, चतुःफलकपुस्तकं, चतुःपत्रकः -कं.

QUARTZ, *s.* काचमणिः m., सितमणिः, स्फटिकः. *See* CRYSTAL.

To QUASH, *v. a.* (Crush, subdue) खण्ड्, मृद्, दम्, प्रदम्, पराजि, वशीकृ.—(Annul) लुप् (c. 6. लुम्पति, लोप्तुं), लोपं कृ, खण्ड्, निवृत् in caus., प्रचारनिवर्त्तनं कृ, प्रचारखण्डनं कृ, अवस्थितिभङ्गं कृ, अवस्थितिखण्डनं कृ, नियमोच्छेदं कृ.

QUASI, Expressed by कु, कल्प, देशीय, देश्य &c. in comp.; as, 'a quasi-poet,' कुकविः m., कविकल्पः, कविदेशीयः; 'a quasi king,' राजदेशीयः.

QUATERNARY, QUATERNION, *s.* चतुष्टयं, चतुष्कं.

QUATRAIN, *s.* चतुष्पादकविता, चतुष्पदकविता, चतुष्पदश्लोकः.

To QUAVER, *v. n.* (Sing with tremor of the voice) स्वरभङ्गेन or स्वरकम्पेन or कम्पनस्वरेण गै (c. 1. गायति, गातुं), शारीरं कृ.—(Vibrate) कम्प्, स्फुर्.

QUAVER, *s.* (In singing) शारीरः -रं, स्वरकम्पः, स्वरभङ्गः.—(Note in music) गान्धर्वविद्यायां शीघ्रतालसूचकं चिह्नं.

QUAY, *s.* घट्टः, घट्टी, उत्तरणस्थानं, नौकोत्तरणस्थानं, गुल्मः.

QUEAN, *s.* बन्धकी, पुंश्चली, कुलटा, गणिका, भण्डा, वारस्त्री.

QUEEN, *s.* (Wife of a king) राजपत्नी, राजमहिषी, महिषी, राज्ञी, देवी, नृपपत्नी, नृपवल्लभा, भट्टिनी; 'principal queen, one who has been inaugurated and crowned,' पट्टमहिषी, पट्टदेवी, पट्टाभिषिक्तराज्ञी; 'queen mother,' राजजननी.—(Woman who is the sovereign of a kingdom) राज्ञी, राज्यकारिणी महिषी.—(At chess) प्रधानः.

QUEENLY, QUEENLIKE, *a.* राज्ञीसदृशः -शी -शं, राज्ञीयोग्यः -ग्या -ग्यं.

QUEEN'S METAL, *s.* कांस्यं -स्यकं, कंसः -सं, कंशः -शं.

QUEER, *a.* विलक्षणः -णा -णं, असङ्गतः -ता -तं, अपरूपः -पा -पं.

QUEERLY, *adv.* विलक्षणं, वैलक्षण्येन, असङ्गतं, अपरूपं, अद्भुतं.

QUEERNESS, *s.* विलक्षणता, वैलक्षण्यं, असङ्गतत्वं, अपरूपता, अद्भुतता.

To QUELL, *v. a.* (Cause to cease, allay) निवृत् (c. 10. -वर्त्तयति -यितुं), शम् (c. 10. शमयति -यितुं), प्रशम्, उपशम्.—(Subdue, crush) दम्, प्रदम्, पराजि, खण्ड्, मृद्, वशीकृ.

QUELLED, *p. p.* निवर्त्तितः -ता -तं, शमितः -ता -तं, पराजितः &c., वशीकृतः &c.

QUELLER, *s.* पराजेता m. (तृ), पराजयी m. (न्), दमकः, शमकः.

To QUENCH, *v. a.* (Extinguish) निर्वा in caus. (-वापयति -यितुं), शम्, (c. 10. शमयति -यितुं) उपशम्, प्रशम्.—(Allay) शम्, उपशम्, प्रशम्, शान्तिं कृ; 'to quench the thirst,' तृष्णां छिद् (c. 7. छिनत्ति, छेत्तुं), तृष्णाछेदं कृ, तृष्णाशान्तिं कृ, तृष्णां शम्, पिपासाछेदं कृ, पिपासाविच्छेदं कृ, वैतृष्ण्यं कृ.

QUENCHABLE, *a.* शमनीयः -या -यं, शाम्यः -म्या -म्यं, विच्छेदनीयः -या -यं.

QUENCHED, *p. p.* शमितः -ता -तं, निर्वाणः -णा -णं, छिन्नः -न्ना -न्नं, विच्छिन्नः &c.

QUENCHING, *s.* शमनं, शान्तिः f., छेदः; 'of the thirst,' पिपासाविच्छेदः, तृष्णाछेदः.

QUENCHLESS, *s.* अशमनीयः -या -यं, अनिर्वापणीयः &c., अविच्छेदनीयः &c.

QUERIST, *s.* प्रष्टा m. (ष्टृ), पृच्छकः, प्रश्नकृत्. *See* INTERROGATOR.

QUERULOUS, *a.* विलापशीलः -ला -लं, विलपनशीलः &c., विलापी -पिनी -पि (न्), विलापकारी -रिणी &c., परिदेवनशीलः &c., परिदेवनकारी &c., परिदेवी &c., परिदेवकः -का -कं.

QUERULOUSLY, *adv.* विलापेन, सविलापं, सपरिदेवनं, विलापशीलत्वात्.

QUERULOUSNESS, *s.* विलापशीलता -त्वं, विलापकारित्वं, परिदेवनशीलता.

QUERY, *s.* प्रश्नः, आकांक्षा, आशङ्का, संशयः, सन्देहः, अनुयोगः.

QUEST, *s.* अन्वेषणं, अनुसन्धानं, अनुसरणं, जिज्ञासा, शोधनं; 'in quest,' अन्वेषी -षिणी -षि (न्), अर्थी -र्थिनी &c.

QUESTION, *s.* (Interrogatory) प्रश्नः, पृच्छा -च्छनं, प्रच्छनं -ना, अनुयोगः, पर्य्यनुयोगः, अनुयोजनं, सम्प्रश्नः, जिज्ञासा, आकांक्षा, आशङ्का, अर्थः; 'question and answer,' प्रश्नोत्तरं; 'a string of questions,' प्रश्नमाला, प्रश्नावलिः f.—(Inquiry, investigation) अनुसन्धानं, जिज्ञासा, निरूपणं, परीक्षा, पर्य्येषणा, विचारः -रणा, परीष्टिः f., वितर्कः.—(Subject of debate or controversy) वादविषयः, वादानुवादविषयः, वादास्पदं, विचारविषयः, विचारास्पदं, वितर्कविषयः; 'the topic in question,' प्रस्तुतविषयः, प्रस्तावः, प्रसङ्गः, प्रसक्तिः f.—(Doubt, subject of doubt) सन्देहः, संशयः, विकल्पः, वितर्कः, शङ्का, आशङ्का.

To QUESTION, *v. a.* (Interrogate) प्रच्छ् (c. 6. पृच्छति, प्रष्टुं), अनुप्रच्छ्, परिप्रच्छ्, समनुप्रच्छ्, अभिप्रच्छ्, प्रश्नं कृ, पृच्छनं, प्रच्छनं कृ, ज्ञा in des., (जिज्ञासति -ते -सितुं), अनुयुज्, प्रश्नेन परीक्ष्, प्रश्नोत्तरक्रमेण ज्ञा in des.—(Examine) परीक्ष्, अनुसन्धा, ज्ञा in des., निरूप्, विचर्.—(Doubt of dispute) शङ्क् (c. 1. शङ्कते -ङ्कितुं), आशङ्क्, अभिशङ्क्, परिशङ्क्, विशङ्क्, संशङ्क्, संशयस्थं -स्थां कृ, सन्देहस्थं -स्थां कृ, विचर्, वितर्क्.

QUESTIONABLE, *a.* शङ्कनीयः -या -यं, आशङ्कनीयः &c., शङ्कार्हः -र्हा -र्हं, विचार्य्यः -र्य्या -र्य्यं, विचारणीयः -या -यं, वितर्क्यः -र्क्या -र्क्यं, सन्दिग्धः -ग्धा -ग्धं, संशयस्थः -स्था -स्थं, सन्देहस्थः &c., संशययुक्तः -क्ता -क्तं, संशयापन्नः -न्ना -न्नं, वैकल्पिकः -की -कं.

QUESTIONABLENESS, *s.* शङ्कनीयता, आशङ्कनीयता, विचार्य्यता, सन्दिग्धता.

QUESTIONABLY, *adv.* शङ्कनीयं, आशङ्कनीयं, सन्दिग्धं, शङ्कापूर्व्वं, सशङ्कं.

QUESTIONARY, *a.* प्रश्नमयः -यी -यं, प्रश्नात्मकः -का -कं, पृच्छकः -का -कं.

QUESTIONED, *p. p.* (Interrogated) पृष्टः -ष्टा -ष्टं, अभिपृष्टः &c., अनुयुक्तः -क्ता -क्तं.—(Doubted) शङ्कितः -ता -तं, आशङ्कितः &c., संशयितः &c.

QUESTIONER, *s.* प्रष्टा m. (ष्टृ), पृच्छकः, प्रच्छकः, प्रश्नकर्त्ता m. (र्त्तृ), प्राट् m. (च्छ्), अनुयोक्ता m. (क्तृ), अनुयोगकृत् m., जिज्ञासुः m., जिज्ञासाकारी m. (न्), कथङ्कथिकः.

QUESTIONLESS, *adv.* असंशयं, अनाशङ्कनीयं, निःसंशयं, सुनिश्चितं.

QUIBBLE, *s.* वाक्छलं, वक्रोक्तिः f., वक्रवाक्यं, वक्रभणितं, कैतववादः, व्याजोपन्नि: f., छलवादः, कपटवादः, श्लेषः, अपदेशः, व्यपदेशः, अपलाप

To QUIBBLE, *v. n.* वाक्छलं कृ, वक्रोक्तिं कृ, अर्थापत्तिं कृ, वक्रं or वक्रवाक्यं वद् (c. 1. वदति -दितुं), अपदेशं कृ, अपलप्, व्यपदिश्, अपदिश्.

QUIBBLER, *s.* वाक्छलकारी *m.* (न्), अर्थापत्तिकृत् *m.*, वक्रोक्तिवादी *m.* (न्).

QUIBBLING, *s.* वाक्छलकरणं, वक्रोक्तिः *f.*, अर्थापत्तिः *f.*, अर्थापत्तिकरणं.

QUICK, *a.* (Swift) शीघ्रः -घ्रा -घ्रं, त्वरितः -ता -तं, द्रुतः -ता -तं, तूर्णः -र्णा -र्णं, सत्वरः -रा -रं, त्वरान्वितः -ता -तं, क्षिप्रः -प्रा -प्रं, अविलम्बः -म्बा -म्बं, अविलम्बितः -ता -तं, अविलम्बी -म्बिनी -म्बि (न्), तुरः -रा -रं, अकुण्ठितः &c.—(Quick in motion) त्वरितगतिः -तिः -ति, द्रुतगतिः &c., शीघ्रगः -गा -गं, शीघ्रगामी -मिनी -मि (न्), वेगवान् -वती -वत् (त्), महावेगः -गा -गं, अविलम्बगतिः &c.; 'a quick pace,' द्रुतपदं, अविलम्बितक्रमः.—(Quick in action) आशुकारी &c., क्षिप्रकारी &c., शीघ्रकारी &c., शीघ्रकर्म्मा -र्म्मा -र्म्म (न्), अविलम्बितकर्म्मा &c. —(In apprehension) शीघ्रबुद्धिः -द्धिः -द्धि, शीघ्रग्राही &c. *See* SHARP; 'to be quick,' त्वर् (c. 1. त्वरते -रितुं), शीघ्र (nom. शीघ्रायते); 'be quick,' त्वरतां, त्वरस्व, सत्वरस्व.—(Living, moving with life) सजीवः -वा -वं, जीवी &c., जीवभूतः -ता -तं, चलितः -ता -तं, चलः -ला -लं, चलमानः -ना -नं, स्पन्दितः -ता -तं, स्पन्दमानः -ना -नं.—(Quick with child) चलितगर्भा, स्पन्दितगर्भा, गर्भवती, *see* PREGNANT.

QUICK, *adv.* शीघ्रं, त्वरितं, सत्वरं, क्षिप्रं, द्रुतं, आशु, शीघ्र in comp. *See* QUICKLY.

QUICK, *s.* (Sensitive part of the flesh, living flesh) मर्म्म *n.* (न्), मर्म्मस्थलं, मर्म्मस्थानं, मर्म्मदेशः; 'to pierce to the quick,' मर्म्म भिद्; 'cutting or piercing to the quick,' मर्म्मभेदः, मर्म्मस्पर्शनं, मर्म्मताडनं; 'that pierces to the quick,' मर्म्मभेदी -दिनी -दि (न्), मर्म्मस्पृक् *m.f. n.* (श्), मर्म्माविद्.

To QUICKEN, *v. a.* (Make alive) सजीवं -वां कृ, सजीवीकृ, जीव् (c. 10. जीवयति -यितुं), संजीव्, जीवं दा, जीवनं दा.—(Accelerate) त्वर् (c. 10. त्वरयति -यितुं), संत्वर्, गतिं वृध् in caus., गतिवर्धनं कृ, शीघ्रीकृ, क्षेप (nom. क्षेपयति -यितुं), द्रुततरं -रां कृ.—(Stimulate, incite) उद्दीप् (c. 10. -दीपयति -यितुं), उत्तिज् (c. 10. -तेजयति -यितुं), वीर्य्यं दा or वृध्, तेजो वृध्.

To QUICKEN, *v. n.* (Become living) सजीवः -वा -वं भू, सजीवीभू, जीवितं प्राप्, चैतन्यं प्राप्.—(As a woman with child) स्पन्द् (c. 1. स्पन्दते -न्दितुं), चल् (c. 1. चलति -लितुं), चलितगर्भा भू, स्पन्दितगर्भा भू.—(Have increased motion) शीघ्रतरं or द्रुततरं गम् or चल्, शीघ्र (nom. शीघ्रायते), त्वर् (c. 1. त्वरते -रितुं).

QUICKENED, *p. p.* (Made alive) सजीवः -वा -वं, सजीवीकृतः -ता -तं, जीवभूतः &c., जीवितः &c.—(Accelerated) त्वरितः -ता -तं, वर्धितगतिः -तिः -ति, वेगितः &c.

QUICKENING, *part.* or *a.* जीवदः -दा -दं, उद्दीपकः -का -कं. *See* LIFE-GIVING.

QUICKENING, *s.* (Of the child in the womb) स्पन्दनं, गर्भचलनं, गर्भस्पन्दनं.

QUICK-LIME, *s.* तप्तचूर्णं, तप्तकर्करः -रं, तप्तलेपः, उष्णलेपः.

QUICKLY, *adv.* शीघ्रं, त्वरितं, सत्वरं, क्षिप्रं, द्रुतं, आशु, सहसा, तूर्णं, लघु, अविलम्बितं, अविलम्बं, चपलं, द्रुतपदं, अविलम्बितपदं, अरं, शीघ्र or त्वरित or क्षिप्र in comp.; as, 'going quickly,' शीघ्रगः -गा -गं, शीघ्रगामी &c., त्वरितगतिः; 'spoken quickly,' त्वरितोदितः -ता -तं; 'acting quickly,' शीघ्रकारी &c., क्षिप्रकारी &c., आशुकारी &c.—(Soon, without delay) अचिरेण, अचिरात्, सद्यस्, आशु, झपदि, झटिति, अविलम्बेन.

QUICKNESS, *s.* शीघ्रता -त्वं, सत्वरता -त्वं, द्रुतता -त्वं, क्षिप्रता, शैघ्र्यं, त्वरा, त्वरणं, अविलम्बः, लघुता, वेगिता.

QUICK-SAND, *s.* आर्द्रसिकताः *pl.*, जलार्द्रसिकताः, अनूपसिकताः, द्रवसिकताः.

QUICK-SCENTED, *a.* शीघ्रघ्राणः -णा -णं, तीक्ष्णघ्राणः &c., सूक्ष्मघ्राणः &c.

QUICK-SIGHTED, QUICK-EYED, *a.* शीघ्रदृष्टिः -ष्टिः -ष्टि, तीक्ष्णदृष्टिः &c., सूक्ष्मदृष्टिः &c., सूक्ष्मदर्शी -र्शिनी -र्शि (न्), प्रखरदृष्टिः &c.

QUICK-SIGHTEDNESS, *s.* सूक्ष्मदर्शिता, दृष्टिसूक्ष्मता, दृष्टितीक्ष्णता, सूक्ष्मदृष्टिः *f.*

QUICKSILVER, *s.* पारदः, पारः, पारतः, रसः, रसधातुः *m.*, दिव्यरसः, सिद्धधातुः *m.*, रसराजः, रसनाथः, चपलः, सूतः -तं, रेतस् *n.*, दारदः, खलमूर्त्तिः *f.*, देहदः, पतङ्गः, खेचरः, मृत्युनाशकः, रुद्रजं, शिववीजं, हरवीजं, अशोकं, अमरः, मुकुन्दः, अचिरजः -जा -जं, योगवाही.

QUICK-WITTED, *a.* शीघ्रबुद्धिः -द्धिः -द्धि, सूक्ष्मबुद्धिः &c., तीक्ष्णबुद्धिः &c.

QUIESCENCE, *s.* शान्तता, शान्तिः *f.*, निश्चलता, अचलता, नैश्चल्यं, चलनाभावः, निश्चलभावः, चेष्टानिवृत्तिः *f.*, चेष्टाभावः, निवृत्तिः *f.*, निर्वृतिः *f.*, विश्रामः, विश्रान्तिः *f.*, स्थिरता, समाधानं; 'of mind,' मनःशान्तिः *f.*, सौमनस्यं.

QUIESCENT, *a.* निश्चलः -ला -लं, अचलः &c., अचरः -रा -रं, निश्चेष्टः -ष्टा -ष्टं, निवृत्तचेष्टः &c., शान्तः -न्ता -न्तं, स्थिरः -रा -रं, समाहितः -ता -तं, सुसमाहितः &c., निर्वृतः -ता -तं, निवृत्तः -त्ता -त्तं, विरतः -ता -तं. —(In grammar) अनुच्चारितः -ता -तं, लुप्तोच्चारः -रा -रं; 'quiescent mark,' विरामः.

QUIET, *a.* (Not moving) निश्चलः -ला -लं, अचलः -ला -लं, अचरः -रा -रं, स्थिरः -रा -रं, सुस्थिरः &c.—(Calm, not agitated, at rest) शान्तः -न्ता -न्तं, प्रशान्तः &c., उपशान्तः &c., निशान्तः &c., शमितः -ता -तं, शमी -मिनी -मि (न्), सुस्थिरः -रा -रं, स्थिरः -रा -रं, स्वस्थः -स्था -स्थं, अक्षुब्धः -ब्धा -ब्धं, अव्याकुलः -ला -लं, निराकुलः &c., समाहितः -ता -तं, विश्रान्तः -न्ता -न्तं, निर्वृतः -ता -तं, निवृत्तः -त्ता -त्तं.—(Free from wind) निर्वातः -ता -तं, निवृत्तवातः &c., निवृत्तवायुः -युः -यु.—(Mild, gentle) सौम्यः -म्या -म्यं, सौम्यवृत्तिः -त्तिः -त्ति, मृदुः -द्वी -दु, मन्दः -न्दा -न्दं, अनुग्रः -ग्रा -ग्रं, अनाहासिकः -की -कं, अचण्डः -ण्डा -ण्डं.—(Unmolested) निर्विघ्नः -घ्ना -घ्नं, अविघ्नितः -ता -तं, निरुपद्रवः -वा -वं, निरुपप्लवः &c., निष्कण्टकः -का -कं, अबाधः -धा -धं, अप्रतिबन्धः -न्धा -न्धं, प्रतिबन्धहीनः -ना -नं, स्वस्थः -स्था -स्थं.—(Silent) तूष्णीकः -का -कं, निःशब्दः -ब्दा -ब्दं, निश्शब्दः &c.; 'be quiet!' तूष्णीम्भव, तूष्णीमास्यतां, विरम.

QUIET, *s.* शान्तिः, शमः, शान्तता, प्रशान्तिः *f.*, उपशमः, निर्वृतिः *f.*, निवृत्तिः *f.*, विश्रामः, विश्रान्तिः *f.*, स्वस्थता, स्वास्थ्यं, समाधानं, निरुपद्रवता, उपद्रवाभावः, निर्विघ्नता, निरुपप्लवता, प्रतिबन्धहीनता, प्रतिबन्धाभावः, निष्कण्टकत्वं, कण्टकाभावः, निश्चलता, स्थिरता.

To QUIET, *v. a.* शम् (c. 10. शमयति -यितुं), प्रशम्, उपशम्, शान्त् or सान्त्व् (c. 10. सान्त्वयति -यितुं), अभिशान्त्व्, परिशान्त्व्, उपसान्त्व्, निवृत् (c. 10. -वर्त्तयति -यितुं), विरम् (c. 10. -रमयति -यितुं), निर्विघ्नीकृ, निरुपद्रवीकृ, निश्चलीकृ, स्थिरीकृ.

QUIETISM, *s.* शमः, शान्तिः *f.*, निवृत्तिमार्गः, वैराग्यं. According to the Vedánta system there are six stages of this state, or six duties to be performed by him who practices it, viz. श्रद्धा, समाधानं, तितिक्षा, उपरतिः *f.*, दमः, शमः.

QUIETIST, *s.* वेदान्ती *m.* (न्), वेदान्तज्ञः, वेदान्तगः, वेदान्तसेवी *m.* (न्), वेदान्तमार्गी *m.* (न्), वेदान्ताधिकारी *m.*, निवृत्तमार्गी *m.*

QUIETLY, *adv.* शान्तं, शान्त्या, स्थैर्य्येण, निर्वृतिपूर्व्वं, शान्तवत्, अव्याकुलं,

निराकुलं, अक्षुब्धं, अक्षोभेण, अनुग्रं, अचपलं, मन्दं, स्वस्थं, स्वास्थ्येन, सशमं, निःशब्दं, तूष्णीं, निश्चलं.

QUIETNESS, *s.* शान्तता, प्रशान्तता, शान्तिः *f.*, स्थिरता, निश्चलता, नैश्चल्यं, अक्षुब्धता, अक्षोभः, अव्याकुलत्वं. *See* QUIET, *s.*

QUIETUDE, *s.* शान्तिः *f.*, शमः. *See* QUIETNESS, QUIET, *s.*

QUILL, *s.* (Feather) पक्षः, पर्णः; 'for writing,' कलमः, लेखनी, आलेखनी.—(Of a porcupine) शललौ -लं, शलः -लं.—(Of a lute, &c.) रणः, परिवादः, शारिका, कोणः.

QUILT, *s.* तूलिका, तूला -ली, उत्तरप्रच्छदः, उत्तरच्छदः, शयनीयप्रच्छदः, शय्याप्रच्छदपटः, शय्याच्छादनं, तूलादिनिर्म्मितः प्रच्छदः, आस्तरणं, आस्तरः, संस्तरः, स्तरिमा *m.* (न्).

To QUILT, *v. a.* तूलादि निवेशयित्वा निषिव् (c. 4. -षीव्यति -षेवितुं) or परिषिव् or विषिव् or संसिव् or सिव्.

QUINARY, *a.* पञ्चकः -का -कं, पञ्चरूपः -पा -पं, पञ्चाङ्गः -ङ्गी -ङ्गं.

QUINCE, *s.* (The tree) श्रीफलः may be used.—(The fruit) श्रीफलं.

QUINDECAGON, *s.* पञ्चदशकोणः -णं, पञ्चदशभुजः, पञ्चदशास्रं -स्री.

QUINQUAGESIMA, *a.* ख्रीष्टपुनरुत्थानोत्सवात् पूर्व्वं पञ्चाशत्तमदिवसः.

QUINQUENNIAL, *a.* पाञ्चवर्षिकः -की -कं, पञ्चवर्षिकः &c., पञ्चवर्षीयः -या -यं, पाञ्चाब्दिकः -की -कं.

QUINSY, *s.* अधिमांसकः, घटसर्पः, गण्डमाला, कण्ठरोगः.

QUINTESSENCE, *s.* सारः, सारांशः, पञ्चमसारः, उत्तमसारः, परमसारः.

QUINTUPLE, *a.* पञ्चगुणः -णा -णं, पञ्चविधः -धा -धं, पञ्चाङ्गः -ङ्गी -ङ्गं.

QUIP, *s.* (Taunt, sarcasm) क्षेपः, अवक्षेपः, व्यञ्जना -नं.

QUIRE, *s.* (Band of singers) गायकगणः, गायकचक्रं.—(Of paper) पत्रचतुर्विंशकं.

QUIRISTER, *s.* सहगायकः, सहगायकः, गायकगणाभ्यन्तरः.

QUIRK, *s.* (Fancy) मनोलौल्यं, बुद्धिचापल्यं, लहरी, छन्दस्, अखट्टिः *m.*, दुर्वासना, मृषार्थकं.—(Taunt) क्षेपः, अवक्षेपः.—(Quibble) वाक्छलं, वक्रोक्तिः *f.*

QUIRKISH, *a.* चपलः -ला -लं, लोलः -ला -लं, वाक्छलमयः -यी -यं.

To QUIT, *v. a.* (Give up, abandon) त्यज् (c. 1. त्यजति, त्यक्तुं), परित्यज्, संत्यज्, हा (c. 3. जहाति, हातुं), विहा, अपहा, अपाहा, प्रहा, विसृज्, उत्सृज्, अतिसृज्, व्यपसृज्, अपास्, व्युदस्, उज्झ्, प्रोज्झ्, मुच्, विमुच्, रह्, विरह्, परिहृ, वृज्, परिवृज्, विवृज्.—(Depart from) अपगम् (c. 1. -गच्छति -गन्तुं), विगम्, व्यपगम्, अपया, अपे, व्यपे, अपसृ, प्रस्था, विप्रस्था.—(Clear) शुध्, परिशुध्, मुच्, विमुच्, निस्तॄ in caus.—(Perform one's duty) स्वकर्त्तव्यं or स्वकर्म्म सम्पद् (c. 10. -पादयति -यितुं) or विधा.

QUIT, *a.* मुक्तः -क्ता -क्तं, विमुक्तः &c., विमोचितः -ता -तं, ऋणमुक्तः &c., उत्तीर्णः -र्णा -र्णं, अवतीर्णः -र्णा -र्णं, उपकारमुक्तः &c., शोधितः -ता -तं.

QUITE, *adv.* सर्व्वथा, सर्व्वतस्, सर्व्वशस्, साकल्येन, सकलं, सम्यक्, अशेषतस्, अशेषेण, पर्य्याप्तं, विश्वतस्, अखिलेन, निखिलेन, अन्यूनं, सर्व्वभावेन.—(To a great degree, very) अति or सु prefixed, अत्यन्तं, अतिशयं -येन; 'quite fresh,' अतिनवः -वा -वं, अतिसद्यस्कः -स्का -स्कं, सद्यस्कालीनः -ना -नं.—(Not quite) ईषदूनः -ना -नं, अल्पोनः &c.

QUITS. अन्योन्यं or परस्परम् ऋणमुक्तौ *m. du.*, or उपकारमुक्तौ.

QUITTANCE, *s.* निस्तारः, मुक्तिः *f.*, मोक्षः, निष्कृतिः *f.*, उत्तरणं, शुद्धिः *f.*, शोधनं, अपनयनं; 'from debt or obligation,' ऋणमुक्तिः *f.*, ऋणमोक्षः, ऋणशुद्धिः *f.*, ऋणशोधनं, ऋणापनयनं, ऋणापाकरणं, ऋणापनोदनं, निगणनं; 'of a grudge,' वैरशुद्धिः *f.*

QUITTED, *p. p.* त्यक्तः -क्ता -क्तं, परित्यक्तः &c., रहितः -ता -तं, विरहितः &c., उत्सृष्टः -ष्टा -ष्टं, विसर्जितः &c., उज्झितः &c., प्रोज्झितः &c.

QUIVER, *s.* तूणः -णा -णी, तूणीरः, शरधिः *m.*, इषुधिः *m.*, शराश्रयः, बाणाश्रयः, निषङ्गः, अपासङ्गः, उपासङ्गः, तूलसारिणी, खोलिः *f.*; 'having a quiver,' तूणी -णिनी &c.; 'carrying one,' धृतेषुधिः -धिः -धि, तूणधरः -रा -रं.

To QUIVER, *v. n.* स्फुर् (c. 6. स्फुरति -रितुं), प्रस्फुर्, विस्फुर्, कम्प् (c. 1. कम्पते -म्पितुं), विकम्प्, प्रकम्प्, अभिकम्प्, स्पन्द् (c. 1. स्पन्दते -न्दितुं), परिस्पन्द्, वेप् (c. 1. वेपते -पितुं), प्रवेप्, त्रस् (c. 4. त्रस्यति -सितुं), वित्रस्, ह्वल् (c. 1. ह्वलति -लितुं), विह्वल्, प्रह्वल्; 'his lips quiver,' ओष्ठाधरौ स्फुरतः; 'his lip quivers,' अधरः स्फुरति; 'his arm quivered,' बाहुः पुस्फोर.

QUIVERED, *a.* तूणी -णिनी -णि (न्), धृतेषुधिः -धिः -धि, सतूणः -णा -णं.

QUIVERING, *part.* or *a.* स्फुरन् -रन्ती -रत् (त्), स्फुरितः -ता -तं, प्रस्फुरितः &c., स्पन्दमानः -ना -नं, स्पन्दितः &c., कम्पमानः -ना -नं, प्रकम्पमानः &c., कम्पितः &c., वेपमानः -ना -नं, सकम्पः -म्पा -म्पं, चञ्चलः -ला -लं; 'having a quivering lip,' स्फुरिताधरः -रा -रं, प्रस्फुरिताधरः &c., स्फुरदोष्ठी -ष्ठिनी &c.

QUIVERING, *s.* स्फुरणं, स्फुरितं, विस्फुरणं, प्रस्फुरणं, स्फूर्त्तिः *f.*, स्पन्दनं, कम्पनं, वेपनं; 'of the lip,' अधरस्फुरणं.

QUIZ, *s.* (Odd fellow) अपरूपजनः, विलक्षणजनः.—(One who ridicules others) उपहासकः, अवक्षेपकः, परिहासकृत् *m.*, अवज्ञाकारी *m.*

To QUIZ, *v. a.* अपहस् (c. 1. -हसति -सितुं), अपहस्, अवहासभूमिं कृ, अपहासास्पदं कृ, अवज्ञास्पदं कृ, अवज्ञाभूमिं कृ, अवक्षिप्.

QUOIF, QUOIFFURE, QUOIN, *see* COIF, COIFFURE, &c.

QUOIT, *s.* (Circular ring of iron) चक्रं, लोहचक्रं, लौहचक्रं, अट्टनं; 'game of quoits,' चक्रक्रीडा.

To QUOIT, *v. a.* लोहचक्राणि क्षिप् (c. 6. क्षिपति, क्षेप्तुं), चक्रक्रीडां कृ.

QUONDAM, *a.* पूर्व्वः -र्व्वा -र्व्वं, प्राक्तनः -नी -नं. *See* FORMER.

QUORUM, *s.* कार्य्यनिर्वाहक्षमसंख्या, कार्य्यनिर्वाहोपयुक्तसंख्या, कार्य्यनिर्वाहोचितसंख्या, कार्य्यनिर्वाहावरसंख्या, कार्य्यसाधकावरसंख्या.

QUOTA, *s.* उपयुक्तांशः, उपयुक्तभागः, यथायोग्यांशः, यथोचितांशः.

QUOTATION, *s.* (The act) अवतरणं, अवतारणं, उद्धारः, उद्धरणं, उपन्यासः, उपन्यसनं, of the Vedas श्रुतादानं.—(Passage quoted) उपन्यस्तवाक्यं, उद्धृतवाक्यं, उपन्यस्तवचनं, उद्धृतलेखः, अवतारितवाक्यं, उपनीतवाक्यं, प्रमाणार्थम् अमुकग्रन्थोद्धृतम् अनुवादकवाक्यं.

To QUOTE, *v. a.* अवतॄ (c. 10. -तारयति -यितुं), अवतरणं कृ, उपन्यस् (c. 4. -अस्यति -असितुं), उपन्यासं कृ, उद्धृ (c. 1. -हरति -हर्त्तुं), उद्धारं कृ, प्रमाणार्थम् अमुकग्रन्थाद् अनुवादकवाक्यम् उद्धृ or उपनी (c. 1. -नयति -नेतुं).

QUOTED, *p. p.* अवतीर्णः -र्णा -र्णं, अवतारितः -ता -तं, उद्धृतः -ता -तं, उपन्यस्तः -स्ता -स्तं, प्रमाणार्थम् उपनीतः -ता -तं.

QUOTH, *v. defect.* Expressed by आह, उवाच &c.

QUOTIDIAN *a.* प्रात्यहिकः -की -कं, प्रात्याह्निकः &c., ऐकाहिकः &c., अन्वाहिकः &c., प्रतिदैनिकः &c., आह्निकः &c., अन्येद्युष्कः -ष्का -ष्कं; 'fever,' प्रात्याहिकज्वरः, अन्येद्युष्कः.

QUOTIENT, *s.* लब्धिः *f.*, आप्तं, फलं, क्षेत्रफलं, भागः.

R.

RABBIT, *s.* शशः, शशकः, लम्बकर्णः, लोमकर्णः -र्णकः, मृदुलोमकः; 'its skin,' शशोर्णः, शशलोम *n.* (न्), शशचर्म्म *n.*, शशाजिनं.

RABBLE, *s.* अन्त्यजातीयाः *m. pl.*, प्राकृतजनाः *m. pl.*, अन्त्याः *m. pl.*,

खला: *m. pl.*, हीनवर्णा: *m. pl.*, पृथग्जना: *m. pl.*, अधमजातीया: *m. pl.*, अधमजनसमूह:, नीचजनसमूह:, प्राकृतजनसम्मर्द:.

RABID, *a.* उन्मत्त: -त्ता -त्तं, उन्माद: -दा -दं, उन्मादवान् -वती -वत् (त्), मत्त: -त्ता -त्तं, प्रमद: -दा -दं, वातुल: -ला -लं; 'a rabid dog,' अलर्क:, अलक:.

RABIDLY, *adv.* उन्मत्तवत्, मत्तवत्, सोन्मादं, उन्मादेन, प्रमदवत्.

RABIDNESS, *s.* उन्मत्तता, उन्माद:, सोन्मादता, प्रमदता. *See* MADNESS.

RACE, *s.* (Lineage) वंश:, सन्तति: *f.*, सन्तान:, अन्वय:, कुलं, जाति: *f.*, अन्ववाय:, गोत्रं, वंशपरम्परा, वंशावलि: *f.*, वंशवितति: *f.*, पुत्रपौत्रादिवंशपरम्परा, तन्तु: *m.*, अभिजन:, प्रवरं, वर्ण:, जननं, अनूकं, सगोत्रं; 'human race,' मनुष्यजाति: *f.*, नृजाति: *f.*—(A running or course) चर्य्या, धावनं, मार्ग:; 'horse-race,' अश्वचर्य्या, अश्वधावनं, अश्वमार्ग:.—(Ginger) गुल्ममूलं.

To RACE, *v. n.* अग्रोपस्थानेच्छया धाव् (c. 1. धावति -वितुं), अग्राभिगमनेच्छया धाव्, परस्परजिगीषया धाव्, जवेन धाव्.

RACE-COURSE, *s.* चर्य्याभूमि: *f.*, चर्य्यास्थानं, धावनभूमि: *f.*, धावनस्थानं.

RACE-HORSE, *s.* जवाश्व:, जवन:, जवी *m.* (न्), जवाधिक:, धावक:.

RACER, *s.* धावक:, धावनकृत्. *See* RACE-HORSE.

RACK, *s.* (For hay) गवादनी, द्रोणी -णि: *f.*—(Instrument of torture) यातनायन्त्रं, यातनयन्त्रं, प्रमाथयन्त्रं.—(Extreme pain) यातना, अतिव्यथा, तीव्रवेदना, तीक्ष्णवेदना.

To RACK, *v. a.* यत् (c. 10. यातयति -यितुं), यातनयन्त्रेण व्यथ् (c. 10. व्यथयति -यितुं) or प्रमथ् (c. 10. -माथयति -यितुं), अत्यन्तं व्यथ् or पीड् (c. 10. पीडयति -यितुं), यातनां कृ.

RACKED, *p. p.* अतिव्यथित: -ता -तं, अतिपीडित: &c., प्रमाथित: &c., प्रमथित: &c.

RACKET, *s.* (Confused noise) कोलाहल:, कलकल:, कलरव:, हलहलाशब्द:, कालकोल:, रास:, तुमुलं.—(In tennis) गुलिकाताडनी, गुलिकाप्रक्षेपणी, गुलिकाप्रणोदनी, गुलिकाक्षेपणयष्टि: *m.*, गुलिकाप्रणोदनयन्त्रं.

RACKETY, *a.* कोलाहलकारी -रिणी -रि (न्), तुमुलकारी &c., तुमुली &c.

RACY, *a.* रसिक: -का -कं, रसी -सिनी -सि (न्), रसवान् -वती -वत् (त्), सरस: -सा -सं, सुरस: &c., तीक्ष्णरस: &c., उग्ररस: &c.

RADIANCE, RADIANCY, *s.* प्रभा, दीप्ति: *f.*, तेजस् *n.*, उज्ज्वलता, प्रकाशता, त्विष् *f.*, उद्भास:, भ्राजिष्णुता, घर्म्मरश्मि: *m.* *See* BRIGHTNESS, BRILLIANCY, LUSTRE.

RADIANT, *a.* देदीप्यमान: -ना -नं, प्रकाशमान: &c., द्योतमान: &c., दीप्तिमान् -मती -मत् (त्), प्रदीप्तिमान् &c., प्रभावान् &c., सुप्रभ: -भा -भं, तेजोमय: -यी -यं, कान्तिमान् &c., किरणमय: -यी -यं, मरीचिमाली -लिनी -लि (न्), विशद: -दा -दं. *See* BRIGHT, BRILLIANT, LUSTROUS.

RADIANTLY, *adv.* अतितेजसा, सुप्रभं, उज्ज्वलं, सुप्रकाशं.

To RADIATE, *v. n.* स्फुर् (c. 6. स्फुरति -रितुं), किरण (nom. किरणायते), दीप् in freq. (देदीप्यते), वर्च्चस् (nom. वर्च्चायते), अंशु (nom. अंशूयति), किरणरूपेण स्फुर्, किरणान् पत् (c. 10. पातयति -यितुं).

RADIATION, *s.* किरणस्फुरणं, रश्मिस्फुरणं, अंशुपातनं, किरणपातनं, रश्मिविकिरणं, अंशुविकिरणं, दीप्तिविकिरणं.

RADICAL, *a.* (Original, fundamental) मौलिक: -की -कं, मौल: -ली -लं, मूलिक: -की -कं, मूली -लिनी -लि (न्), वास्तव: -वी -वं.—(Natural) स्वाभाविक: -की -कं, प्राकृतिक: &c., स्वभावज: -जा -जं, मात्रिक: -की -कं.—(Primitive) मूलिक: &c., *see* the word.

RADICALLY, *adv.* मूलतस्, आमूलं, समूलं, स्वभावतस्, जातितस्.

To RADICATE, *v. a.* मूलतो रुह् in caus. (रोपयति -यितुं) बद्धमूलं -लां कृ.

RADISH, *s.* मूलक: -कं, कन्दमूलं, सेकिमं, पाटीर:, पटीरं, हरिपर्णं, हरित्पर्णं.

RADIUS, *s.* (Of a circle) त्रिज्या, व्यासार्द्धं, व्यासार्द्धरेखा, कर्कट:.—(Of the equator) भूकर्ण:.—(Of a wheel) अरं.

RAFF, *s.* अधमजातीया: *m. pl.*, हीनवर्णा:, अन्त्यजातीया: &c. *See* RABBLE.

RAFFLE, *s.* गुटिकापात:, महामूल्यद्रव्यप्रापणार्थं गुटिकापातनं.

To RAFFLE, *v. n.* महामूल्यद्रव्यप्रापणार्थं गुटिका: पत् (c. 10. पातयति -यितुं).

RAFT, *s.* उडुप: -पं, तरण: -णी, तरणि: *m.*, प्लव:, प्रवाका, तरण्ड:, तरत् *n.*, तरि: *m.*, तारण:, वहित्रं, वारिरथ:, कोल:, भेल: -लक:, होड:.

RAFTER, *s.* गृहस्थूणा, वेश्मस्थूणा, पटलस्थूणा, स्थूणा, पटलकाष्ठं, पटलदारु: *m.*, गृहदारु: *m.*, गृहकाष्ठं, दीर्घस्थूणा, दीर्घकाष्ठं, दीर्घदारु: *m.*

RAG, *s.* (Piece of tattered cloth) वस्त्रखण्ड:, जीर्णवस्त्रखण्ड:, जर्जरवस्त्रखण्ड:, पटखण्ड:, चीरं, चीवरं, कर्पट:, कन्था, लक्तकं, कर:.—(Ragged garment) जीर्णवस्त्रं, जर्ज्जरवस्त्रं; 'dressed in rags,' *see* RAGGED; 'a bundle of rags,' चीरसमूह:, करोत्कर:.

RAGAMUFFIN, *s.* चीरवासा: *m.* (स्), कर्पटी *m.* (न्), खल:, धूर्त्त:, अधमजातीय:.

RAGE, *s.* (Great anger, fury) क्रोध:, कोप:, प्रकोप:, अतिक्रोध:, अतिकोप:, क्रोधावेश:, कोपावेश:, संरम्भ:, प्रतिरम्भ:, संरब्धता, अमर्ष:, क्रुध् *f.*, उग्रता -त्वं, रौद्रं -द्रता, चण्डता, उच्चण्डता, राग:, अतिराग:, उत्ताप:, सन्ताप:, कोपाकुलता, प्रतिघ:; 'in a rage,' संरब्ध: -ब्धा -ब्धं, संरम्भी -म्भिणी &c., क्रुद्ध: -द्धा -द्धं, क्रोधी -धिनी &c., जातक्रोध: -धा -धं, कोपाकुल: -ला -लं, जातामर्ष: -र्षा -र्षं, क्रोधाविष्ट: -ष्टा -ष्टं.—(Violence, vehemence) संरम्भ:, उग्रता, तीक्ष्णता, अतितीक्ष्णता, तैक्ष्ण्यं, रौद्रता, तीव्रता, तिग्मता.—(Agitation) क्षोभ:, व्याक्षोभ:, वेग:, अतिक्षोभ:.

To RAGE, *v. n.* (Be angry) क्रुध् (c. 4. क्रुध्यति, क्रोद्धुं), संक्रुध्, रुष् (c. 4. रुष्यति, रोषितुं), कुप् (c. 4. कुप्यति, कोपितुं), प्रकुप्, क्रोधाकुल: -ला -लं भू, कोपाकुल: -ला -लं भू, संरब्ध: -ब्धा -ब्धं भू, संरब्धीभू.—(Become violent or intense) उग्रतर: -रा -रं भू, तीक्ष्णतर: -रा -रं भू, रौद्रतर: -रा -रं भू, रौद्रीभू, तिग्मतर: -रा -रं भू, भृश (nom. भृशायते), उच्चण्ड: -ण्डा -ण्डं भू, क्षुभ् (c. 4. क्षुभ्यति, क्षोभितुं).

RAGEFUL, *a.* क्रोधी -धिनी -धि (न्), क्रोधान्वित: -ता -तं, कोपान्वित: &c., कोपाकुल: -ला -लं, कोपी &c., संरम्भी &c., सकोप: -पा -पं.

RAGGED, *a.* जर्ज्जर: -रा -रं, जर्ज्जरीक: -का -कं, जीर्ण: -र्णा -र्णं, छिन्न: -न्ना -न्नं, विच्छिन्न: &c., विषमधार: -रा -रं; 'ragged garment,' जीर्णवस्त्रं, जर्ज्जरवस्त्रं, छिन्नवस्त्रं, भिक्षुसंघाटी *m.* (न्), कर्पट:, चीरं, चीवरं, कन्था; 'dressed in ragged garments,' चीरवासा: -सा: -स: (स्), कर्पटधारी -रिणी -रि (न्), कर्पटिक:, चीवरी &c.

RAGGEDNESS, *s.* जर्ज्जरता, जर्ज्जरीकता, जीर्णता, छिन्नवस्त्रता, छिन्नता.

RAGING, *part.* or *a.* उग्र: -ग्रा -ग्रं, रोषण: -णा -णं, वेगी -गिनी -गि (न्), महावेग: -गा -गं, उदीर्णवेग: &c., संरम्भी &c., संरब्ध: -ब्धा -ब्धं, तीक्ष्ण: -क्ष्णा -क्ष्णं, तीव्र: -व्रा -व्रं, चण्ड: -ण्डा -ण्डं, उच्चण्ड: &c.

RAGMAN, *s.* चीरव्यापारी *m.* (न्), चीरविक्रेता *m.* (तृ), छिन्नवस्त्रव्यापारी.

RAGOUT, *s.* मिष्टान्नं, सव्यञ्जनाहार:, व्यञ्जनं, उपस्कर:.

RÁHU, *s.* (The ascending node, fabled as a demon, the son of Singhiká, with the tail of a dragon. His head was cut off by Vishnu, at the churning of the ocean; but being immortal, by having tasted the amrit, the head and tail retained their separate existence, and were transferred to the stellar sphere. The head, or Ráhu, became the cause of eclipses, by endeavouring at various

times to swallow the sun and moon. The tail was called Ketu, or the descending node, *see* PLANET) राहुः, सिंहिकासूनुः *m.*, सैंहिकः, सैंहिकेयः, ग्रहः, ग्रहकल्लोलः, खेटः, विधुन्तुदः, सूर्यग्रहः. An eclipse is called राहुग्राहः, राहुग्रासः, राहुसंस्पर्शः.

RAIL, *s.* लोहस्तम्भः, लोहशङ्कुः *m.*, लोहावरणं. *See* RAILING.

To RAIL, *v. a.* (Inclose with rails) लोहस्तम्भेन परिवेष्ट् or परिवृ or आवृ or अवरुध् or संरुध्, लोहस्तम्भावृतं -तां कृ.

To RAIL, *v. n.* (Reproach, revile, abuse) निन्द्, अपवद्, तिरस्कृ, आक्रुश्, अवगुर्, अवक्षिप्, अधिक्षिप्, परिक्षिप्, क्षिप्, शप्, अभिशप्, परिशप्, आक्षर्, गर्ह्, भर्त्स्, कुत्स्, मुखरीकृ, गुप् in des., उपालभ्.

RAILED AT, *p.p.* आक्रुष्टः -ष्टा -ष्टं, उपालब्धः -ब्धा -ब्धं, अधिक्षिप्तः -प्ता -प्तं.

RAILER, *s.* निन्दकः, आक्रोशकः, उपक्रोष्टा *m.* (ष्टृ), कुत्सावादी *m.* (न्), अपवादकः, निर्भर्त्सकः, उपालम्भकारी *m.*, अवक्षेपकः.

RAILING, *s.* (Reviling) निन्दा -न्दनं, अपवादः, परिवादः, परीवादः, तिरस्कारः, उपालम्भः, जुगुप्सा, वाक्पारुष्यं, आक्रोशः -शनं, उपक्रोशः, दुर्वाक्यं, धिक्क्रिया.—(Fence) आवरणं, लोहावरणं, आवारः, कटघ्नं, *see* FENCE.

RAILLERY, *s.* अपहासः, परिहासः, परीहासः, प्रहसनं, हासिका.

RAIL-ROAD, RAIL-WAY, *s.* लोहवर्त्म *n.* (न्), लोहमार्गः अयोवर्त्म *n.* (न्).

RAIMENT, *s.* वस्त्रं, वासस् *n.*, वसनं, वेशः, अम्बरं, आच्छादनं, परिधानं, प्रसाधनं, संव्यानं, सिचयः, प्रच्छादनं, परिच्छदः; 'clothed in white raiment,' शुक्लाम्बरधारी -रिणी -रि (न्), शुक्लवासाः -साः -सः (स्).

To RAIN, *v. n.* वृष् (c. 1. वर्षति -ते -र्षितुं), अभिवृष्, प्रवृष्, अभिप्रवृष्, वर्षणं कृ, वृष्टिं कृ, मेघेभ्यः पत् (c. 1. पतति -तितुं), वृष्टिं सु (c. 1. स्रवति, स्रोतुं), जलं or तोयं सु; 'to rain slightly or softly,' शीक् (c. 1. शीकते -कितुं); 'to rain heavily,' अतिवृष्टिं कृ; 'to cease to rain,' निर्वृष्; 'it rains,' वर्षन्ति मेघाः, वृष्टिर् मेघेभ्यः पतति.

To RAIN, *v. a.* वृष् (c. 1. वर्षति -ते -र्षितुं), अभिवृष्, प्रवृष्, अभिप्रवृष्, सु (c. 1. स्रवति, स्रोतुं or c. 10. स्रावयति -यितुं), पत् (c. 10. पातयति -यितुं), शीक् (c. 1. शीकते -कितुं); 'the clouds rain water,' जलं स्रवन्ति मेघाः; 'the clouds rained blood,' मेघाः शोणितं ववृषुः; 'the sky rained blood,' स्रावयामास शोणितं व्योम, शिशीके शोणितं व्योम.

RAIN, *s.* वृष्टिः *f.*, वर्षः -र्षं, आवृष्टिः *f.*, अजलं, घनाम्बु *n.*, मेघाम्बु *n.*, अब्वारि *n.*, मेघजलं, गोघृतं, पर्जन्यः, परामृतं; 'soft rain,' शीकरः; 'heavy rain,' अतिवृष्टिः *f.*; 'untimely rain,' अकालवृष्टिः *f.*; 'shower of rain,' धारासम्पातः, धारासारः; 'broken or partial rain,' खण्डवृष्टिः *f.*—(Rains, season of the rains) वर्षाः *m. pl.*, वर्षाकालः, वृष्टिकालः, मेघकालः, मेघागमः, प्रावृट् *f.* (ष्), प्रावृट्कालः प्रावृषा. *See* RAINY.

RAIN-BOW, *s.* इन्द्रधनुस् *n.*, इन्द्रचापः, शक्रधनुस् *n.*, इन्द्रायुधं, देवायुधं, शक्रशरासनं, मेघधनुः *m.*, सुरधनुः *m.*, मणिधनुः *m.*, वायुफलं, धनुर्ब्भं, कौशिकायुधं, परामृतं.

RAINED, *p.p.* वर्षितः -ता -तं, अभिवर्षितः -ता -तं, प्रवर्षितः &c.

RAINNESS, *s.* वर्षुकत्वं, वार्षिकत्वं, बहुवृष्टित्वं, वृष्टिबाहुल्यं.

RAINWATER, *s.* वर्षाम्बु *n.*, वृष्टिजलं, वर्षजलं, वृष्टिवारि *n.*

RAINY, *a.* वर्षुकः -का -कं, वार्षिकः -की -कं, वर्षिकः &c., वृष्टिमान् -मती -मत् (त्), बहुवृष्टिः -ष्टिः -ष्टि, वर्षी -र्षिणी -र्षि (न्), प्रावृषिकः -की -कं. *See* PLUVIAL; 'rainy cloud,' वर्षुकमेघः, वर्षुकाब्दः; 'a rainy day,' दुर्दिनं, वार्दलं; 'rainy night,' वर्षारात्रः; 'rainy season,' वृष्टिकालः, वर्षकालः, वर्षाकालः, मेघागमः, मेघकालः, प्रावृट् *f.* (ष्), प्रावृट्कालः, प्रावृषा, घनकालः, जलदकालः, घनसमयः, जलदागमः, तपात्ययः, धाराकालनन्दनः.

To RAISE, *v. a.* (Lift, raise up) उत्था in caus. (-थापयति -यितुं, rt. स्था), उत्तुल् (c. 10. -तोलयति -यितुं), उन्नम् (c. 10. -नमयति -नामयति -यितुं), उन्नी (c. 1. -नयति -नेतुं), उद्धृ (c. 1. -हरति -हर्तुं), उच्छ्रि (c. 1. उच्छ्रयति -यितुं, rt. श्रि), समुच्छ्रि, प्रोच्छ्रि, उत्कृष्.—(Erect, elevate, set up) उत्था in caus., स्था in caus., उन्नम्, उच्छ्रि, उत्क्षिप्, समुत्क्षिप्, उद्बृह् (c. 6. -वृहति -वर्हितुं), उद्यम् (c. 1. -यच्छति -यन्तुं), समुद्यम्, अभ्युद्यम्, अधिरुह् in caus. (-रोपयति -यितुं), आरुह्, रुह्, ऊर्द्ध्वीकृ, उच्चीकृ, उच्चैः कृ.—(Erect, build) निर्मा, विनिर्मा.—(Elevate, exalt) उन्नम्, उच्छ्रि, उद्यम्, उद्धन् (c. 2. -हन्ति -न्तुं), उन्नतिं कृ; 'in rank,' पदवृद्धिं कृ, उत्कृष्टपदे or श्रेष्ठपदे नियुज् or प्रतिपद् (c. 10. -पादयति -यितुं), प्रतिपत्तिं कृ or दा.—(Increase, enhance) वृध् in caus., संवृध्, अधिकीकृ, अधिकं -कां कृ.—(Produce, make) उत्पद् in caus., जन् (c. 10. जनयति -यितुं), संजन.—(Excite, incite) उत्पद्, जन्, उन्नप्, उत्था, उद्युज्, नियुज्, प्रवृत्.—(Levy), *see* *To* LEVY.—(Raise one's voice) उच्चैःस्वरेण भाष् or वद्, उच्चैर् वद्, उच्चवाक्यम् उदीर्.—(Raise a clamor) उत्क्रुश् (c. 1. -क्रोशति -क्रोष्टुं), उच्चैःस्वरेण घुष्, उद्घुष्, उच्चशब्दं कृ, महाशब्दं कृ, उच्चैर्घुष्टं कृ.—(Crops, cattle, &c.) उत्पद् in caus.—(Dust) रजः or रेणुम् उद्धू (c. 5. -धूनोति -धोतुं) or समुद्धू.—(Raise a siege) अवरोधत्यागं कृ.

RAISED, *p.p.* (Lifted, raised up) उत्थापितः -ता -तं, उत्तोलितः &c., उन्नमितः &c., उन्नतः -ता -तं, उच्छ्रितः &c., समुच्छ्रितः &c., उद्यतः -ता -तं, उद्धृतः &c., समुद्धृतः &c., उत्कर्षितः &c., उद्वर्हितः &c., उत्थितः &c., उद्वाहितः &c., उत्क्षिप्तः -प्ता -प्तं, उद्गूर्णः -र्णा -र्णं; 'is raised,' उत्थाप्यते.—(Erected, set up) उत्थापितः &c., स्थापितः &c., रोपितः &c., अधिरोपितः &c., ऊर्द्ध्वीकृतः &c., उद्वृत्तः -त्ता -त्तं.—(Produced) उत्पादितः -ता -तं, उत्पन्नः -न्ना -न्नं, जनितः &c., जातः &c.—(Raised on high) ऊर्द्ध्वीकृतः &c., उच्चीकृतः &c., कृतोच्चैस्, उच्चैःकृतः &c.; 'having the hands raised,' उच्छ्रितपाणिः -णिः -णि, उत्थितहस्तः -स्ता -स्तं; 'having the arms raised,' उद्बाहुः -हुः -हु, उद्यतबाहुः &c.; 'having the spear raised,' उद्यतशूलः -ला -लं; 'having the weapon raised,' उद्यतायुधः -धा -धं; 'sitting with the feet raised,' प्रौढपादः -दा -दं; 'dust raised by the hoofs,' रजः खुरोद्धूतं; 'the dust is raised by the wind,' वातेन रज उद्धूयते.

RAISER, *s.* उत्थापकः, उत्तोलकः, उन्नायकः, उन्नेता *m.* (तृ), उद्धारकः.

RAISIN, *s.* (Dried grape) यवक्षुद्री, शुष्कद्राक्षा, शुष्कमृद्वीका.

RAISING, *s.* उत्थापनं, उत्थानं, अभ्युत्थानं, उत्थितिः *f.*, उत्तोलनं, उच्छ्रयः, समुच्छ्रयः, उच्छ्रायः, समुच्छ्रायः, उच्छ्रितिः *f.*, उत्कर्षः, उन्नतिः, समुन्नतिः *f.* उन्नयनं; 'of a weapon to strike,' शस्त्रोत्थापनं, शस्त्रोद्यमः.

RAISING, *part.* उत्थापकः -का -कं, उत्थापयन् -यन्ती -यत् (त्), उत्थाप्य indec.; 'raising a dreadful dust,' रजो घोरम् उद्धून्वन् -न्वती &c. or उद्धून्वानः -ना -नं or उद्धूय or समुद्धूय indec.

RAJAH, RÁJA, *s.* (King) राजा *m.* (न्), *see* KING.

RÁJPOOT, *s.* (Man of the military tribe) राजपुत्रः, *see* MILITARY, *a.*

RAKE, *s.* (Libertine) व्यसनी *m.* (न्), स्त्रीव्यसनी *m.*, लम्पटः, नागरः, धूर्त्तः, विटः, *see* LIBERTINE.—(The tool) तृणसंग्रहणी, पांसुसंग्रहणी, दन्तयुक्तः शुष्कतृणादिसंग्रहणयोग्यो दण्डः or यष्टिः.

To RAKE, *v. a.* (Gather or clear with a rake) पूर्वोक्तयन्त्रेण संग्रह् (c. 9. -गृह्णाति -ग्रहीतुं) or शुध्.—(Collect) संग्रह्, संचि, समाचि.

To RAKE, *v. n.* (Lead a dissolute life) लम्पटवद् आचर् (c. 1. -चरति

-रितुं), लाम्पट्यं कृ, व्यभिचर्, भोगासक्तः -क्ता -क्तं भू, विषयासक्त &c. भू.

RAKISH, *a.* व्यसनी -निनी -नि (न्), व्यसनीयः -या -यं, लाम्पटिकः -की -कं, लम्पटस्वभावः -वा -वं, व्यभिचारी &c., छेकः -का -कं. *See* DISSOLUTE, LIBERTINE.

RAKISHNESS, *s.* व्यसनिता, व्यभिचारः, लम्पटता. *See* LIBERTINISM.

To RALLY, *v.a.* (Restore to order troops thrown into confusion) विश्रृङ्खलसैन्यान् or विद्रुतसैन्यान् or भग्नव्यूहसैन्यान् पुनर् व्यूहीकृ or व्यूह् (c. 1. -ऊहते -हितुं) or पुनः समूहीकृ or पुनर् व्यूहक्रमेण रच्, पुनः संग्रह्.—(Jest, banter) अवहस्, अपहस्, अवहासभूमिं कृ, अवक्षिप्, मस्करीकृ.

To RALLY, *v.n.* (Recover order) पुनर् व्यूहीभू or समूहीभू.—(Recover strength) पुनर् बलं लभ् (c. 1. लभते, लब्धुं), समुत्था (c. 1. तिष्ठति -थातुं, rt. स्था), प्रत्याश्वस् (c. 2. -श्वसिति -तुं), पुनः स्वस्थः -स्था -स्थं भू.

RAM, *s.* (Male sheep) मेषः, उरभ्रः, मेढ्रः, मेढ्कः, मेढ्रः -ढ्रकः, मेढः, अविः *m.*, एडकः, ऊर्णायुः *m.*, उरणः -णकः, रोमशः, लोमशः, वृष्णिः *m.*, भेडः, हुडुः *m.*, सम्फालः, संम्फालः.—(Battering ram), *see* the word.—(The sign aries) मेषः.

To RAM, *v. a.* बलात् or बलेन निविश् (c. 10. -वेशयति -यितुं) or प्रविश्, अतिबलेन निविश्, अतिबलेन प्रणुद् (c. 6. -णुदति -णोत्तुं), अतिबलेन ताडयित्वा निविश् or अन्तः प्रविश् or सम्बाध् (c. 1. -बाधते -धितुं) or सम्पीड् (c. 10. -पीडयति -यितुं).

RÁMA, *s.* The name common to three incarnations of Vishnu, viz. 1. Paraśu Ráma, or Ráma with the axe, the sixth avatár or incarnation of Vishnu. He was a Brahman, the son of the holy sage Jamadagni, and born at the beginning of the second or Treta age, for the purpose of repressing the tyranny, and punishing the violence of the Kshatriya or military tribe. He appears to typefy the class of Brahmans, and their contest with the Kshatriyas. Some of his names are परशुरामः -मकः, परशुधरः, पर्शुरामः, जमदग्निसुतः, जामदग्न्यः. 2. Rámachandra or the moon-like Ráma, the seventh incarnation of Vishnu. He was born into the world as the son of Daśaratha, king of Oude, and great grandson of Raghu, at the close of the second or Treta age, for the purpose of destroying the demons who infested the earth, and especially Rávana, the Daitya sovereign of Ceylon. His names are रामचन्द्रः, रघुनन्दनः, रघूद्वहः, रघुवरः, रघुनाथः, राघवः, रावणारिः *m.*, रावणजित् *m.*, दशास्यजित् *m.*, मखत्राता *m.* (तृ), रामभद्रः. 3. Balaráma, or the strong Ráma, according to some the eighth incarnation of Vishnu. He was born at the end of the Dwápara, or third age, as the seventh son of Vasudeva and Devakí, and therefore elder brother of Krishna, but was transferred from the womb of Devakí to that of Rohiní the other wife of Vasudeva. Hence one of his names सङ्कर्षणः. He is sometimes regarded as an incarnation of the serpent Ananta or Śesha, and hence called, अनन्तः, शेषः. His other names are बलरामः, बलदेवः, बलभद्रः, बलः, बललः, हलायुधः, हलभृत् *m.*, हली *m.* (न्), सीरपाणिः *m.*, कृष्णाग्रजः, अच्युताग्रजः, प्रियमधुः *m.*, मधुप्रियः, मुष्टिकान्तकः, गुप्तचरः, रेवतीरमणः, रेवतीशः. *See* BALARÁMA.

To RAMBLE, *v. n.* इतस्ततो भ्रम् (c. 4. भ्राम्यति, भ्रमितुं) or परिभ्रम् or विहृ (c. 1. -हरति -हर्तुं) or पर्यट् (c. 1. -अटति -टितुं), इतस्ततो भ्रमणं कृ or परिभ्रमणं कृ, विहारं कृ.

RAMBLE, *s.* भ्रमणं, परिभ्रमणं, विहारः, विहरणं, पर्यटनं, इतस्ततो विहारः, इतस्ततोगमनं.

RAMBLER, *s.* विहारी *m.* (न्), परिभ्रमकः, भ्रमणकारी *m.* (न्), भ्रमणकृत् *m.*

RAMBLING, *s.* इतस्ततो विहारः or विहरणं or भ्रमणं. *See* RAMBLE.

RAMIFICATION, *s.* (Small branch) उपशाखा, क्षुद्रशाखा, सूक्ष्मशाखा, मूलखण्डः.—(State of having many branches) बहुशाखत्वं, सूक्ष्मशाखाबाहुल्यं.

RAMIFIED, *p. p.* बहुशाखी -खिनी -खि (न्), शाखी &c., सशाखः -खा -खं, सूक्ष्मशाखामयः -यी -यं, उपशाखामयः &c., बहुशाखाविशिष्टः -ष्टा -ष्टं.

To RAMIFY, *v. a.* बहुशाखीकृ, उपशाखारूपेण पृथक्कृ or विभिद्.

To RAMIFY, *v. n.* शाखा (nom. शाखायते), सूक्ष्मशाखारूपेण विस्तृ in pass. (-स्तीर्य्यते), उपशाखारूपेण भिन्नीभू or विभिद् in pass. or विच्छिद् in pass.

RAMIFYING, *part.* शाखी -खिनी -खि (न्), शाख्यः -ख्या -ख्यं. *See* RAMIFIED.

RAMMER, *s.* मुद्गरः, दीर्घमुद्गरः, घनः, दीर्घघनः, ताडनी.

RAMMISH, *a.* उग्रगन्धः -न्धा -न्धं, तीक्ष्णगन्धः &c., उग्रगन्धिः -न्धिः -न्धि.

RAMMISHNESS, *s.* उग्रगन्धत्वं, तीक्ष्णगन्धत्वं, उग्रत्वं, दौर्गन्धिः *m.*

RAMOUS, *a.* शाखी -खिनी -खि (न्), शाख्यः -ख्या -ख्यं, काण्डीरः -रा -रं.

To RAMP, *v. n.* प्लु (c. 1. प्लवते, प्लोतुं), वल्ग्, नृत्, क्रीड्, विस्फुल्.

RAMP, *s.* प्लवः -वनं, प्लुतं, वल्गितं, झम्पः -म्पा, उत्प्लुतं, उत्फालः.

RAMPANCY, *a.* अतिवृद्धिः *f.*, उत्सेकः, उद्रेकः, मर्य्यादातिक्रमः, अपरिमितता अतिरिक्तता, अतिक्रमः, उत्क्रमः, आधिक्यं.

RAMPANT, *a.* अतिरिक्तः -क्ता -क्तं, उद्रिक्तः &c., उत्सिक्तः &c., मर्य्यादातीतः -ता -तं, अतिक्रान्तमर्य्यादः -दा -दं, उत्क्रान्तमर्य्यादः &c., अतिमर्य्यादः &c., अपरिमितः &c.

RAMPART, *s.* प्राकारः, वप्रः, चयः, धूलिकेदारः, धूलिकुट्टिमं, प्रगण्डी.

RAMROD, *s.* चूर्णमर्दननी, चूर्णसम्पीडनी, चूर्णप्रणोदनी, चूर्णप्रणोदकदण्डः, आग्नेयनाडीसम्बद्धो लोहदण्डः स च नाडीमुखनिविष्टो भूत्वा आग्नेयचूर्णगुलिकादि संहतीकरोति.

RANCID, *a.* उग्रगन्धः -न्धा -न्धं, उग्रगन्धिकः -का -कं, उग्ररसः -सा -सं, तीक्ष्णरसः &c., विरसः &c., कुरसः &c., पर्य्युषितः -ता -तं.

RANCIDNESS, RANCIDITY, *s.* उग्ररसत्वं, तीक्ष्णरसत्वं, विरसता, वैरस्यं कुरसता.

RANCOR, *s.* अतिद्वेषः, द्रोहबुद्धित्वं, अतिद्रोहः, दीर्घद्वेषः, अतिमात्सर्य्यं, अतिमत्सरता, विषपूर्णता, दंशः, दंशशीलता, अतिदंशः, जिघांसा. *See* MALIGNITY, MALICE.

RANCOROUS, *a.* अतिद्वेषी -षिणी -षि (न्), दीर्घद्वेषी &c., दंशी &c., अतिदंशी, दंशशीलः -ला -लं, द्रोहबुद्धिः -द्धिः -द्धि, अतिद्रोही -हिणी &c., अतिमत्सरी &c., जिघांसुः -सुः -सु, विषहृदयः -या -यं, विषपूर्णः -र्णा -र्णं. *See* MALIGNANT.

RANCOROUSLY, *adv.* अतिद्वेषेण, सद्रोहं, अतिद्रोहेण, सदंशं, सविषं.

RANDOM, *a.* सन्धानहीनः -ना -नं, सन्धानरहितः -ता -तं, अभिसन्धिहीनः &c., अभिसन्धानहीनः &c., आकस्मिकः -की -कं, आगन्तुकः -का -कं, अनियमितः -ता -तं, अनियतः -ता -तं, अनिरूपितः &c., अयन्त्रितः &c., निर्यन्त्रणः -णा -णं, यादृच्छिकः -की -कं, आपतिकः &c., दैवागतः -ता -तं, दैवोपस्थितः &c., अकस्मादुपस्थितः &c., अकस्मादागतः &c., अकस्मादुत्पन्नः -न्ना -न्नं, अकस्मात्कृतः &c., अशृङ्खलः -ला -लं; 'at random,'

अकस्मात्, सन्धानं विना, अभिसन्धानं विना, अनियतं, अयन्त्रितं, निर्यन्त्रणं, यदृच्छया, अशृङ्खलं; to talk at random,' प्रलप् (c. 1. -लपति -पितुं).

RANDY, *a.* उन्मत्तः -त्ता -त्तं, मत्तः &c., उच्छृङ्खलः -ला -लं.

To RANGE, *v. a.* (Arrange, dispose) विन्यस्, विरच्, विधा, संविधा, प्रतिविधा, व्यूह्, व्यूहीकृ, क्रमेण स्था, पंक्तिक्रमेण विन्यस्.

To RANGE, *v. n.* (Wander) भ्रम् (c. 4. भ्राम्यति, भ्रमितुं), परिभ्रम्, भ्रमणं कृ, अट्, पर्यट्, विचर् (c. 1. -चरति -रितुं), विहृ (c. 1. -हरति -हर्तुं), गाह् (c. 1. गाहते -हितुं), व्रज्, प्रव्रज्, पर्यटनं कृ.—(Lie in a particular direction, be situated) वृत् (c. 1. वर्त्तते -र्त्तितुं), स्था (c. 1. तिष्ठति, स्थातुं).

RANGE, *s.* (A row, rank) पंक्तिः *f.*, श्रेणिः -णी *f.*, राजिः -जी *f.*, राजिका, आवलिः -ली, पद्धतिः *f.*, वीथिः -थी, ततिः *f.*, आलिः -ली *f.*, पालिः -ली *f.*, माला, विञ्जोली.—(Class, grade) वर्गः, गणः, वर्णः.—(Reach, compass, extent, room) विषयः, गोचरः -रं, परिमाणं, प्रसरः; 'the range of sight,' चक्षुर्विषयः, नयनविषयः; 'of an arrow,' वाणगोचरः -रं, शरायणं, वातरायणं; 'within range of the ear,' कर्णगोचरः -रा -रं; 'the utmost range,' पारः; 'beyond the range,' अविषयः -या -यं, विषयातिक्रान्तः -न्ता -न्तं, विषयातीतः &c., अगम्यः -म्या -म्यं, अपारणीयः -या -यं.—(Kitchen range) पाकोपकरणपंक्तिः *f.*—(Range of mountains) कुलपर्व्वतः, कुलगिरिः *m.*, कुलशैलः; 'range of mountains supposed to encircle the earth,' चक्रवालः, लोकालोकः. *See* the names of the seven ranges under MOUNTAIN.

RANGED, *p. p.* विन्यस्तः -स्ता -स्तं, व्यवस्थापितः &c., व्यूढः -ढा -ढं.

RANGER, *s.* परिभ्रमकः.—(Keeper of a forest) अरण्यरक्षकः -रक्षी *m.* (न्), अरण्यपालः -लकः, अरण्याध्यक्षः.

RANK, (Line, row) पंक्तिः *f.*, श्रेणिः -णी *f.*, राजिः -जी *f.*, राजिका, आवलिः -ली, पद्धतिः *f.*, ततिः *f.*, आलिः -ली *f.*, पालिः -ली *f.*—(Station in life) पदं, पदविः -वी *f.*, आस्पदं, स्थानं, वृत्तिः *f.*—(High station, high rank or dignity) उच्चपदं, परमपदं, उच्चपदता, उच्चपदविः *f.*, प्रतिपत्तिः *f.*, उत्कृष्टपदं, उत्कर्षः, कुलोत्कर्षः, औत्कर्षं, उत्कृष्टता, अभिजातता, आभिजात्यं, आभिजनं, उन्नतिः *f.*, समुन्नतिः *f.* कुलीनता, कौलीनं, प्रधानता, मान्यता, सेव्यता, मर्य्यादा, मानं; 'man of high rank,' उच्चपदस्थः, उच्चपदभाक् *m.* (ज्), पदभाक् *m.*, प्रतिपत्तिमान् *m.* (त्), अभिजातः, अभिजनवान् *m.* (त्), कुलीनः. *See* HIGH-BORN.—(Class, order) वर्गः, गणः, वर्णः.—(Ranks of the army, line of soldiers) व्यूहः, सैन्यपंक्तिः *f.*, दण्डः; 'breaking the ranks,' व्यूहभङ्गः, व्यूहभेदः.

RANK, *a.* (Luxuriant in growth) अतिवर्धिष्णुः -ष्णुः -ष्णु, अतिवर्धी -र्धिनी -र्धि (न्), अतिवर्धनः -ना -नं, अतिस्फीतः -ता -तं, अतिपीनः -ना -नं.—(Strong to the smell or taste) उग्रगन्धः -न्धा -न्धं, उग्रगन्धिकः -का -कं, उग्ररसः -सा -सं, उग्रः -ग्रा -ग्रं, तीक्ष्णगन्धः &c., तीक्ष्णरसः &c.

To RANK, *v. a.* (Place in a line) पंक्तिक्रमेण स्था in caus. (स्थापयति -यितुं) or विन्यस् or विरच्.—(Place in a particular class or station) वर्णक्रमेण or वर्गक्रमेण विरच् (c. 10. -रचयति -यितुं) or विन्यस्, यथावर्गं or यथावर्णं स्था in caus., विशेषपदस्थं -स्थां कृ, विशेषगणाभ्यन्तरं -रां कृ, विशेषवर्गाभ्यन्तरं -रां कृ.

To RANK, *v. n.* (Be placed or stand in a line) पंक्तिक्रमेण स्था.—(Be placed in a particular class or station) विशेषपदस्थः -स्था -स्थं भू, विशेषगणाभ्यन्तरः -रा -रं भू, विशेषवर्गाभ्यन्तरः -रा -रं भू, विशेषपदयुक्तः -क्ता -क्तं भू, यथावर्गं स्था.

To RANKLE, *v. n.* (Be inflamed, fester) सन्तप् तप् in pass. (तप्यते), अन्तर् दह् (c. 4. दह्यति -ते, दग्धुं), व्रणवत् पक्वः -क्वा -क्वं भू or पूय् (c. 1. पूयते -यितुं) or सपूयः -या -यं भू.—(Become more violent or virulent) उग्रतरः -रा -रं भू, तीक्ष्णतरः -रा -रं भू, रौद्रतरः -रा -रं भू, तिग्मतरः -रा -रं भू, चण्डतरः -रा -रं भू, भृश (nom. भृशायते).

RANKNESS *s.* (Too great luxuriance) अतिवृद्धिः *f.*, अधिकवृद्धिः *f.*, अतिवर्धनं, अत्यन्तवर्धनं, अतिस्फीतिः *f.*, अतिस्फातिः *f.*, अतिपीनता, उत्सेकः, उद्रेकः.—(Of smell or taste) उग्रता, तीक्ष्णता, उग्रगन्धता, तीक्ष्णगन्धता, उग्ररसत्वं, उग्रस्वादः, उग्रवासः.

To RANSACK, *v. a.* (Plunder, pillage), *see* the words.—(Search by turning things over) अस्तव्यस्तीकृत्य अन्विष् (c. 4. -इष्यति -एषितुं) or अनुसन्धा (c. 3. -दधाति -धातुं), अनुसन्धानार्थं or अन्वेषणार्थम् अस्तव्यस्तीकृ.

RANSACKED, *p. p.* लुण्ठितः -ता -तं, अन्वेषणार्थम् अस्तव्यस्तीकृतः -ता -तं.

RANSOM, *s.* परिक्रयणमूल्यं, परिक्रयमूल्यं, त्राणमूल्यं, तारणमूल्यं, निस्तारमूल्यं, उद्धारमूल्यं, निष्कृतिमूल्यं, त्राणं, उद्धारः, मुक्तिः, मोक्षः; 'he gave his life a ransom for many,' बहूनां त्राणाय or बहूनां मोक्षाय स्वप्राणान् ददौ.

To RANSOM, *v. a.* मूल्यं दत्त्वा परिक्री (c. 9. -क्रीणीते -क्रेतुं), सममूल्यकद्रव्यं दत्त्वा परिक्री or त्रै (c. 1. त्रायते -त्रातुं) or परित्रै, मूल्यं दत्त्वा निस्तॄ (c. 10. -तारयति -यितुं) or तॄ or उद्धृ (c. 1. -हरति -हर्तुं) or मुच् (c. 6. मुञ्चति, मोक्तुं) or मोक्ष् (c. 10. मोक्षयति -यितुं).

RANSOMED, *p. p.* परिक्रीतः -ता -तं, त्रातः -ता -तं, निस्तारितः -ता -तं.

RANSOMER, *s.* परिक्रेता *m.* (तृ), त्राता *m.* (तृ), निस्तारकः, परिक्रयकृत्

To RANT, *v. n.* उच्चैःस्वरेण शब्दालङ्कारमयं फल्गुवाक्यं वद् (c. 1. वदति -दितुं), उच्चैःस्वरेण शब्दमात्रमयं वाक्यं वद्, अतिशब्दनवाक्यं वद्, उच्चैःस्वरेण प्रलप्.

RANT, *s.* शब्दमात्रमयं फल्गुवाक्यं or निरर्थकवाक्य, शब्दमात्रवाक्यं, अलङ्कारमात्रनयम् अतिशब्दनवाक्यं, प्रलापः.

RANTER, *s.* शब्दमात्रवादी *m.* (न्), शब्दमात्रवक्ता *m.* (क्तृ), महाशब्दकवाक्यवादी *m.*, प्रलापी *m.*

To RAP, *v. a.* (Strike with a quick, sharp blow) लघु or लघुप्रहारेण तड् (c. 10. ताडयति -यितुं), लघु प्रहृ (c. 1. -हरति -हर्तुं) or आहन् (c. 2. -हन्ति -न्तुं) or अभिहन्.—(Snatch or hurry away) हृ, अपहृ, अभिहृ, ग्रह्, कृष्, समाकृष्.—(Seize the mind, affect with rapture) मनो or चित्तं हृ or अपहृ, हृदयं हृ or ग्रह्, परमहर्षेण मुह् (c. 10. मोहयति -यितुं).

RAP, *s.* लघुप्रहारः, लघ्वाघातः, आघातः, आहतिः *f.*, ताडनं.

RAPACIOUS, *a.* हरणशीलः -ला -लं, अपहरणशीलः &c., अपहारबुद्धिः -द्धिः -द्धि, अपहारप्रवणः -णा -णं, अपहारकः -का -कं, अपहारी -रिणी -रि (न्), ग्रसनशीलः &c., ग्रसनबुद्धिः &c., ग्रहणशीलः -ला -लं, सर्व्वग्राही &c., सर्व्वहारी &c., सर्व्वग्रासी &c., लुब्धः -ब्धा -ब्धं, अतिलुब्धः &c., अतिलोभी &c., लोभी &c., विप्रलुम्पकः -का -कं, हिंसकः &c., साहसिकः -की -कं.

RAPACIOUSLY, *adv.* हरणशीलत्वात्, अपहारबुद्ध्या, अतिलोभेन.

RAPACIOUSNESS, RAPACITY, *s.* हरणशीलता, अपहारशीलत्वं, अपहारबुद्धिः *f.*, अपहारकत्वं, अपहारिता, ग्रहणशीलता, लुब्धता, अतिलोभः साहसिकत्वं.

RAPE, *s.* बलात्कारेणाभिगमः, बलात्कारसम्भोगः, स्त्रीहरणं, कन्याहरणं, धर्षणं, स्त्रीधर्षणं, बलात्कारधर्षणं, हठधर्षणं, कन्यादूषणं, हठसम्भोगः साहसं, राक्षसं.

RAPID, *a.* शीघ्रः -घ्रा -घ्रं, त्वरितः -ता -तं, सत्वरः -रा -रं, त्वरान्वितः -ता -तं, द्रुतः &c., क्षिप्रः -प्रा -प्रं, तूर्णः -र्णा -र्णं, वेगवान् -वती -वत् (त्), महावेगः -गा -गं, शीघ्रगः -गा -गं. *See* QUICK, SWIFT.

RAPIDITY, RAPIDNESS, *s.* शीघ्रता, त्वरा, सत्वरता, द्रुतता, शैघ्र्यं, वेगः, महावेगः, क्षिप्रता, तरस् *n.*, तूर्णता. *See* QUICKNESS, VELOCITY.

RAPIDLY, *adv.* शीघ्रं, त्वरितं, सत्वरं, क्षिप्रं, द्रुतं, अशनैस्, महावेगेन, शीघ्र in comp.; 'going rapidly,' शीघ्रगामी -मिनी &c.

RAPIER, *s.* क्षुद्रखड्गः, क्षुद्रकृपाणः, कृपाणः, निस्त्रिंशः.

RAPINE, *s.* लुण्ठनं, लुण्ठा, लुण्टनं, अपहारः -रणं, युद्धेनापहारः -रणं, हरणं, उपद्रवः, विप्लवः, हठः. *See* PILLAGE, PLUNDER.

To RAPINE, *v. a.* लुण्ठ्, अपहृ, उपद्रु. *See To* PILLAGE, PLUNDER.

RAPPER, *s.* ताडयिता *m.* (तृ), ताडकः, प्रहर्त्ता *m.* (र्तृ).

RAPT, *a.* हर्षमोहितः -ता -तं, सम्मोहितः &c., परमहृष्टः -ष्टा -ष्टं, परमानन्दितः -ता -तं, हर्षोन्मत्तः -त्ता -त्तं, आनन्दमग्नः &c., मग्नः &c.

RAPTURE, *s.* परमहर्षः, परमानन्दः, अत्यानन्दः, अत्यन्तहर्षः, हर्षसम्मोहः, आनन्दमोहः, मोहावस्था, आनन्दावेशः, आह्लादावेशः, हर्षावेशः, परमसुखं, ब्रह्मसुखं, ब्रह्मानन्दः, प्रहर्षः, प्रमदः, उन्मदः, मादः, हर्षोन्मत्तता, हर्षोन्मादः, रोमहर्षः, पुलकितत्वं; 'to feel rapture,' अत्यन्तं हृष् or प्रहृष्.

RAPTURED, *a.* हर्षमोहितः -ता -तं. *See* ENRAPTURED, ECSTASIED.

RAPTUROUS, *a.* मादनः -ना -नं, उन्मादनः &c., मोहनः &c., परमानन्ददः -दा -दं, परमानन्दकरः -रा -रं, परमहर्षदः &c., सपुलकः -का -कं. *See* ECSTATIC.

RAPTUROUSLY, *adv.* सपरमानन्दं, परमहर्षेण, परमाह्लादेन, समादं.

RARE, *a* (Not frequent, scarce) विरलः -ला -लं, विरलागतः -ता -तं, दुर्लभः -भा -भं, दुर्लभ्यः -भ्या -भ्यं, दुष्प्रापः -पा -पं, दुष्प्राप्यः -प्या -प्यं, अलभ्यः -भ्या -भ्यं, अप्राप्यः &c., असाधारणः -णा -णं, असामान्यः -न्या -न्यं, अप्रसिद्धः -द्धा -द्धं, क्वाचित्कः -त्की -त्कं, कादाचित्कः &c., कार्हिचित्कः &c., चिरचेष्टितः -ता -तं.—(Unusually excellent) परमोत्कृष्टः -ष्टा -ष्टं, अत्युत्कृष्टः &c., सर्व्वोत्कृष्टः &c., परमः -मा -मं, उत्तमः &c., अनुत्तमः &c., अद्भुतः -ता -तं, अतुल्यः -ल्या -ल्यं, अपूर्व्वः -र्व्वा -र्व्वं, सौन्दर्य्यविरलः -ला -लं.—(Thin, not dense) सूक्ष्मः -क्ष्मा -क्ष्मं, अघनः -ना -नं.

RAREFACTION, *s.* तापप्रयुक्तसूक्ष्मता -त्वं, तापजनितसूक्ष्मता, सूक्ष्मता, सौक्ष्म्यं.—(The act) सूक्ष्मीकरणं.

RAREFIED, *p. p.* सूक्ष्मः -क्ष्मा -क्ष्मं, सूक्ष्मीभूतः -ता -तं, सूक्ष्मीकृतः &c.

To RAREFY, *v. a.* सूक्ष्मीकृ, सूक्ष्मं -क्ष्मां कृ, सूक्ष्मतां कृ or जन्.

To RAREFY, *v. n.* सूक्ष्मीभू, सूक्ष्मः -क्ष्मा -क्ष्मं भू, सूक्ष्मतरः -रा -रं भू.

RARELY, *adv.* विरलं, वैरल्येन, क्वचित्, कदाचित्, कर्हिचित्, यथाकथाच, कथमपि. दुर् in comp.; as, 'rarely to be met with,' दुर्लभः -भा -भं, दुष्प्रापः -पा -पं.

RARENESS, *s.* (Infrequency, scarceness) विरलता -त्वं, वैरल्यं, दौर्लभ्यं, दुर्लभता, दुर्लभ्यता, अप्रसिद्धता -त्वं, दुष्प्रापत्वं, असामान्यता, असाधारणता, क्वाचित्कता -त्वं.—(Unusual excellence) अत्युत्कृष्टता, परमोत्कृष्टता, सर्व्वोत्कृष्टता, उत्तमता, अतुल्यता, अपूर्व्वता.—(Thinness) सूक्ष्मता, सौक्ष्म्यं.

RARITY, *s.* (Scarceness), *see* the last.—(Rare thing) दुर्लभवस्तु *n.*, दुर्लभद्रव्यं, उत्कृष्टद्रव्यं, कौतकं कौतूहलं.

RASCAL, *s.* धूर्त्तः, दुर्जनः, दुरात्मा *m.* (न्), दुर्वृत्तः, कृष्णकर्म्मा *m.* (न्), खलः, अधमवृत्तिः *m.*, दुष्टजनः, पापात्मा *m.*, जघन्यवृत्तिः *m.*, नीचवृत्तिः *m.*, अपकृष्टवृत्तिः, पापिष्ठः, शठः, दुष्कर्म्मा *m.*

RASCALITY, *s.* धूर्त्तता, दुर्जनता -त्वं, दौर्जन्यं, दौरात्म्यं, दुरात्मत्वं, दुर्वृत्तत्वं खलता दुष्टता, पापिष्ठता -त्वं, शठता, जघन्यता, अपकृष्टता, अधमवृत्तित्वं, कैतवं, वञ्चनं.

RASCALLY, *a.* दुर्वृत्तः -त्ता -त्तं, पापिष्ठः -ष्ठा -ष्ठं, अधमवृत्तिः -त्तिः -त्ति, जघन्यवृत्तिः &c., शठः -ठा -ठं, कापटिकः -की -कं, दुष्टः -ष्टा -ष्टं.

To RASE, *v. a.* (Graze) घृष् (c. 1. घर्षति -र्षितुं). *See To* RAZE.

RASH, *a.* अविमृश्यकारी -रिणी -रि (न्), असमीक्ष्यकारी &c., अविचार्य्यकारी &c., साहसी &c., साहसिकः -की -कं, प्रगल्भः -ल्भा -ल्भं, गमकारी &c., प्रमत्तः -त्ता -त्तं, अपरिणामदर्शी &c., अदूरदर्शी &c., असावधानः -ना -नं, अविचारी &c —(Of measures) अविचार्य्य कृतः -ता -तं, अविमृश्य कृतः &c., अविचारपूर्व्वः -र्व्वा -र्व्वं, असमीक्षापूर्व्वः &c., अनवेक्षापूर्व्वः &c.

RASH, *s.* (Eruption) दद्रुः *m.*, खर्ज्जूः *f.*, उदर्दः, स्फोटोत्पत्तिः *f.*, विस्फोटः, वरटी, रक्तवरटी, रक्तस्फोटोत्पत्तिः *f.*, रक्तस्फोटः.

RASHER, *s.* (Of bacon) वल्लूरखण्डः, वल्लूरच्छेदः, शूकरमांसखण्डः.

RASHLY, *adv.* अविचार्य्य, असमीक्ष्य, अविमृश्य, सहसा, अनवेक्षया, अविचारेण, अविचारपूर्व्वं, असमीक्षापूर्व्वं, अनवेक्षापूर्व्वं, दर्पात्, दर्पेण.

RASHNESS, *s.* अविमृश्यकारिता -त्वं, असमीक्ष्यकारिता -त्वं, अविचार्य्यकारिता, गमकारित्वं, साहसं, साहसिकत्वं, विषमसाहसं, दुःसाहसं, अविचारः, अविचारिता, अनवेक्षा, असमीक्षा, अविवेकः, असावधानता, अपरिणामदर्शनं, मदः, दर्पः; 'of youth,' यौवनदर्पः.

RASP, *s.* घर्षणी, घर्षणयन्त्रं, निर्घर्षणकः, घर्षकः, आघट्टकः.

To RASP, *v. a.* पृष्ठोक्तयन्त्रेण घृष् (c. 1. घर्षति -र्षितुं).

RASPBERRY, *s.* कण्टकगुल्मफलं, कण्टकस्तबफलं.

RASPED, *p. p.* पृष्ठोक्तयन्त्रेण घर्षितः -ता -तं, आघर्षितः &c.

RASURE, *s.* (Scraping) घर्षणं, उल्लेखनं, तक्षणं. *See* ERASURE.

RAT, *s.* उन्दुरुः *m.*, उन्दरुः *m.*, उन्दरः, इन्दुरः, इन्दुरुः *m.*, मूषिकः -का, मुषकः -का, मूषी *m.*, (न्), मूषीकः -का. आखुः *m.*, विलेशयः, वज्रदन्तः, तुदुमः, धान्यारिः *m.*, महिन्धकः, आखनिकः; 'swarm of rats,' आखूत्थः; 'rat-hole,' मूषिकविवरं, आखुविलं, मूषिकोत्करः.

To RAT, *v. n.* (Desert one's party and go over to the opposite) स्वपक्षं त्यक्त्वा अन्यपक्षम् or विपरीतपक्षम् आश्रि (c. 1. -श्रयति -यितुं)

RATABLE, *a.* शुल्कयोग्यः -ग्या -ग्यं, करयोग्यः &c., शुल्कस्थानं.

RATAN, *s.* वेतसः, कीचकः, वेणुः *m.*, वेत्रः -त्रं, वंशः, वानीरः, वञ्जुलः, भेदी *m.* (न्) छैदिकः.

RAT-CATCHER, *s.* मूषिकघाती *m.* (न्), मूषिकग्राही *m.*, आखुघातः -तकः.

RATE, *s.* (Price) मूल्यं, अर्घः.—(Degree of price or value) अर्घबलाबलं, मूल्यबलाबलं, मूल्यप्रमाणं, अर्घपरिमाणं, अर्घप्रमाणं; 'market rate,' आपणिकः.—(Proportion, degree) प्रमाणं, परिमाणं, मानं, मितिः *f.*, परिमितिः *f.*; 'at the rate of,' प्रमाणेन -शतम्.—(Degree of velocity) वेगः, गतिः *f.*, गतिप्रमाणं, गतिमानं, गतिमितिः *f.*; 'rate of the velocity of light,' प्रकाशशीघ्रगतिमितिः *f.*, 'at a quick rate,' द्रुतगत्या, लघुगत्या, द्रुतपदं.—(Settled allowance) निरूपितमूल्यं, नियतमूल्यं, परिमितमूल्यं.—(Tax, assessed sum) शुल्कः -ल्कं, करः, देयं, यासं.—(At any rate) तावत्.

To RATE, *v. a.* (Set a value on, fix the value) मूल्यं निरूप् (c. 10. -रूपयति -यितुं), अर्घं निरूप्, अर्घबलाबलं निरूप् or निर्णी, अर्घपरिमाणं निरूप्, मूल्यप्रमाणं निरूप्, द्रव्यादिमूल्यं निरूप् or स्था in caus., अर्घं संख्या in caus. (-ख्यापयति -यितुं), अर्घसंख्यापनं कृ, मूल्यनिर्णयं कृ, मूल्यनिरूपणं कृ.—(Fix the magnitude or proportion) प्रमाणं or परिमाणं निरूप् or निर्णी, प्रमाणनिरूपणं कृ, प्रमाणनिर्णयं कृ.—(Chide, scold) निन्द् (c. 1. निन्दति -न्दितुं), उपालभ् (c. 1. -लभते -लब्धुं) भर्त्स्.

RATED, *p. p.* निरूपितमूल्यः -ल्या -ल्यं, निर्णीतमूल्यः &c., संख्यातः -ता -तं,

संख्यापितः &c., परिसंख्यातः &c.—(Chid) निन्दितः -ता -तं, उपालब्धः -ब्धा -ब्धं.

RATHER, *adv.* (Preferably) वरं usually followed by न च or न पुनर् as 'rather death than poverty,' वरं मृत्युर् न च दारिद्र्यं. The root शिष् with वि may be used to express the sense of 'rather,' as 'rather death than dishonour,' अपमानात् प्राणत्यागो विशिष्यते or the sense may be expressed by some other construction, as 'I would rather that the sons of Dhritaráshtra should kill me in the battle,' यदि मां धार्त्तराष्ट्रा रणे हन्युस् तन् मे क्षेमतरं भवेत्. *See* PREFERABLE, PREFERABLY.—(Somewhat, a little) ईषत्, किञ्चित्, किमपि; 'rather less,' ईषदूनः -ना -नं, किञ्चिदूनः -ना -नं.

RATI, *s.* (The wife of Kámadeva the god of love) रतिः *f.*, कामपत्नी, कामप्रिया, कामकला, स्मरप्रिया, कामिः *f.*, रागलता, प्रीतिः *f.*, रेवा, मायावती, केलिकिला.

RATIFICATION, *s.* सत्याकृतिः *f.*, सत्याकरणं, सत्यापनं, सत्यङ्कारः, सत्यकरणं, दृढीकरणं, स्थिरीकरणं, संस्तम्भः, निश्चयकरणं, निश्चितकरणं.

RATIFIED, *p. p.* सत्याकृतः -ता -तं, दृढीकृतः -ता -तं, स्थिरीकृतः &c.

RATIFIER, *s.* सत्यापकः, सत्यकारी *m.* (न्), सत्यङ्कारी *m.*, दृढकारी *m.*, स्थिरकारी *m.*, निश्चयकारी *m.*, संस्तम्भकारी *m.*

To RATIFY, *v. a.* सत्याकृ, सत्यं -त्यां कृ, सत्य (nom. in caus. सत्यापयति -यितुं), दृढीकृ, स्थिरीकृ, दृढ (nom. दृढयति -यितुं), निश्चयं कृ, संस्तम्भ् (c. 5. -स्तभ्नोति -स्तम्भितुं, c. 10. -स्तम्भयति -यितुं).

RATING, *s.* (Chiding) निन्दा, भर्त्सनं, निर्भर्त्सनं, उपालम्भः.

RATIO, *s.* प्रमाणं, मानं, परिमाणं, क्रमः. *See* PROPORTION.

To RATIOCINATE, *v. n.* विचारं कृ, विचर् (c. 10. -चारयति -यितुं), वितर्कं कृ.

RATIOCINATION, *s.* विचारः -रणं, वितर्कः -र्कणं, तर्कविद्या, तर्कज्ञानं.

RATION, *s.* आहारभागः, आहारांशः, निरूपिताहारांशः.

RATIONAL, *a.* (Having the faculty of reasoning) ज्ञानशक्तिकः -का -कं, ज्ञानशक्तिसम्पन्नः -न्ना -न्नं, चिच्छक्तिकः &c., सचेतनः -ना -नं, सचेताः -ताः -तः (स्), बुद्धिजीवी -विनी -वि (न्), तर्कशक्तिकः &c., तर्कशक्तिसम्पन्नः -न्ना -न्नं, सज्ञानः -ना -नं, बुद्धिमान् -मती -मत् (त्), तर्कज्ञः -ज्ञा -ज्ञं.—(Agreeable to reason) युक्तः -क्ता -क्तं, उपयुक्तः &c., यथायुक्तः &c., यथायोग्यः -ग्या -ग्यं, यथोचितः -ता -तं, न्याय्यः -य्या -य्यं, युक्तिसिद्धः -द्धा -द्धं, न्यायसिद्धः &c., न्यायानुसारी -रिणी &c., यथार्थः -र्था -र्थं, युक्तिमान् &c., सयुक्तिकः -का -कं, उपपत्तिमान् &c., उपपन्नः -न्ना -न्नं, तर्कविद्यानुसारी &c.

RATIONALE, *s.* (Detailed account of principles) उपपत्तिः *f.*

RATIONALISM, *s.* हेतुवादः, कारणवादः, हेतुदर्शनं, हैतुकत्वं.

RATIONALIST, *s.* हेतुवादी *m.* (न्), कारणवादी *m.*, हेतुदर्शी, हैतुकः.

RATIONALITY, RATIONALNESS, *s.* (Power of reasoning) ज्ञानशक्तिः *f.*, चिच्छक्तिः *f.*, तर्कशक्तिः *f.*—(Reasonableness) युक्तता, युक्तिः *f.*, उपयुक्तता, युक्तिसिद्धता, न्यायसिद्धता.

RATIONALLY, *adv.* युक्तं, यथायुक्तं, न्यायतस्, न्यायानुसारेण, तर्कानुसारेण -रतस्, उपपन्नं, यथोचितं, युक्तितस्, यथार्थं, तर्कविद्यानुसारेण.

To RATTLE, *v. n.* क्वण् (c. 1. क्वणति -णितुं), शिञ्ज् (c. 2. शिंक्ते, c. 1. शिञ्जते -ञ्जितुं), विशिञ्ज्, ध्वन् (c. 1. ध्वनति -नितुं), स्तन् (c. 1. स्तनति -नितुं), स्वन् (c. 1. स्वनति -नितुं), विरु (c. 2. -रौति -रवितुं), कणकण (nom. कणकणायते), झञ्झन (nom. झञ्झनायते), झञ्झनं कृ, झञ्झा (nom. झञ्झायते), क्वणितं कृ, शिञ्जितं कृ, कणकणशब्दं कृ.—(Utter words in a clattering manner) जल्प्, चटचटशब्दं कृ, चटचट (nom. चटचटायते), कटकट.

To RATTLE, *v. a.* ध्वन् in caus. (ध्वनयति, ध्वानयति -यितुं), क्वण् in caus., स्वन् in caus., स्तन् in caus., शिञ्ज् in caus.

RATTLE, *s.* (Rattling noise) क्वणितं, क्वणनं, स्तनितं, स्तननं, ध्वनिः *m.*, ध्वनितं, शिञ्जितं, झञ्झनं, झञ्झा, झनत्कारः, कणकणशब्दः.—(Clattering talk) जल्पनं, जल्पितं, चटचटशब्दः.—(Instrument for making a rattling sound) शिञ्जिनी, क्वणनी, झञ्झनी.

RATTLING, *s.* क्वणितं, क्वणनं, झञ्झनं; 'of thunder,' रसितं, स्तनितं, गर्जितं, मेघनिर्घोषः. *See* RATTLE.

RATTLING, *part.* क्वणन् -णन्ती -णत् (त्), क्वणितः -ता -तं, झञ्झनकारी -रिणी -रि (न्), शिञ्जी -ञ्जिनी -ञ्जि (न्), ध्वनन् &c., स्वनन् &c.

To RAVAGE, *v. a.* उपप्लु (c. 1. -प्लवते -प्लोतुं), उपद्रु (c. 1. -द्रवति -द्रोतुं), बाध् (c. 1. बाधते- धितुं), प्रबाध्, परिबाध्, अवमृद् (c. 1. -मर्दति -र्दितुं), विप्लवं कृ, उपप्लवं कृ, उपद्रवं कृ, अवमर्दं कृ.

RAVAGE, *s.* उपप्लवः, विप्लवः, उपद्रवः, अवमर्दः -र्दनं, उपमर्दः, बाधा -धनं, प्रबाधा, उत्पातः, उच्छेदः, विनाशः.

RAVAGED, *p. p.* उपद्रुतः -ता -तं, विप्लुतः &c., उपप्लुतः &c., अवमर्दितः &c., प्रबाधितः &c., विनाशितः &c., उच्छिन्नः -न्ना -न्नं.

RAVAGER, *s.* उपद्रवी *m.* (न्), विप्लवकारी *m.* (न्), प्रबाधकः, अवमर्दकः.

RÁVANA, *s.* (The Daitya sovereign of Ceylon, fabled as having ten faces. He was killed by Rámachandra) रावणः, लङ्कापतिः *m.*, लङ्केशः, दशाननः, दशास्यः, दशमुखः, दशग्रीवः, दशकण्ठः.

To RAVE, *v. n.* (Be delirious, talk incoherently) चित्तविभ्रमात् or भ्रान्तचित्तत्वात् प्रलापं कृ, चित्तविप्लवात् प्रलप् (c. 1. -लपति -पितुं), चैतन्यनाशाद् जल्प् (c. 1. जल्पति -ल्पितुं) or जल्पनं कृ.—(Wander in mind) भ्रान्तचित्तः -त्ता -त्तं भू, चैतन्यरहितः -ता -तं भू, नष्टचेतनः -ना -नं भू, बुद्धिभ्रष्टः -ष्टा -ष्टं भू, उन्मद् (c. 4. -माद्यति -मदितुं), प्रमद्.

To RAVEL, *v. a.* (Untwist) उद्ग्रन्थ् (c. 9. -ग्रथ्नाति, c. 1. -ग्रन्थति -न्थितुं), समुद्ग्रन्थ्, तन्तोद्ग्रन्थनं कृ, तन्तूद्ग्रन्थनं कृ, विश्लिष् in caus.—(Entangle, entwist) ग्रन्थ्, ग्रन्थिलीकृ, आकुञ्च्, संश्लिष्टीकृ, व्यावृत् in caus.

RAVELED, *p. p.* (Untwisted) उद्ग्रथितः -ता -तं, समुद्ग्रथितः &c., उद्ग्रन्थितः &c., विश्लिष्टः -ष्टा -ष्टं.—(Twisted) ग्रथितः &c., आकुञ्चितः &c., संश्लिष्टः -ष्टा -ष्टं.

RAVELIN, *s.* दुर्गबहिःस्थितः सेतुद्वययुक्तः परिकूटविशेषः.

RAVELINGS, *s. pl.* उद्ग्रथिततन्तवः *m. pl.*, विश्लिष्टतन्तवः, उद्ग्रथिततन्त्वाणि *n. pl.*

RAVEN, *s.* द्रोणकाकः, काकोलः, काकालः, दग्धकाकः, पर्वतकाकः, अरण्यवायसः, वनाश्रयः, क्रूररावी *m.* (न्), पललप्रियः, महाप्राणः, दरा -री, काकपक्षी *m.* (न्).

To RAVEN, *v. a.* and *n.* अतिगृध्नत्वेन भक्ष् (c. 10. भक्षयति -यितुं), अतिलोभेन आमिषं ग्रस् (c. 1. ग्रसते -सितुं), गृध् (c. 4. गृध्यति, गर्धितुं), घस्मरः -रा -रं भू, हिंसनशीलः -ला -लं भू.

RAVENOUS, *a.* अतिघस्मरः -रा -रं, अतिबुभुक्षुः -क्षुः -क्षु, अतिक्षुधितः -ता -तं, क्षुधापीडितः &c., क्षुधातुरः -रा -रं, आमिषलोभी -भिनी -भि (न्), अतिभक्षकः -का -कं, ग्रसनशीलः -ला -लं, हरणशीलः &c., हिंसनशीलः -ला -लं. *See* HUNGRY.

RAVENOUSLY, *adv.* अतिक्षुधितवत्, अतिघस्मरवत्, अतिबुभुक्षया.

RAVENOUSNESS, *s.* अतिबुभुक्षा, अतिघस्मरत्वं, अतिभक्षकत्वं, अतिक्षुधा.

RAVER, *s.* चित्तविभ्रमात् प्रलापी *m.* (न्), भ्रान्तचित्तत्वात् प्रलापी *m.*

RAVÍ, *s.* (River in the Panjab) ऐरावती.

RAVINE, *s.* दरा -री, दरीभूः *f.*, कन्दरः -री, द्रोणी, निम्नभूमिः *f.*

RAVING, *s.* चित्तविभ्रमप्रयुक्तः प्रलापः or जल्पः -ल्पनं, चित्तविभ्रमः, चित्तविप्लवः, चैतन्यनाशः, ज्ञानभ्रान्तिः *f.*—(The disease) प्रलापवायुः *m.*, प्रलापवातः.

To RAVISH, *v. a.* (Have carnal knowledge of by force) बलात्कारेण अभिगम् (c. 1. -गच्छति -गन्तुं) or सम्भोगं कृ, धृष् (c. 10. धर्षयति -यितुं), प्रधृष्, बलात्कारेण कन्यां दुष् (c. 10. दूषयति -यितुं) or हृ (c. 1. हरति, हर्त्तुं) or अपहृ, परामृश् (c. 6. -मृशति -म्रष्टुं), प्रमथ् in caus. (-माथयति -यितुं), बलात्कारसम्भोगं कृ, हठधर्षणं कृ, हठसम्भोगं कृ, धर्षणं कृ, हठधर्षणं कृ.—(Seize, carry away by force) हृ, अपहृ, व्यपहृ.—(Enrapture) मनो or चित्तं हृ or परमहर्षेण मुह् (c. 10. मोहयति -यितुं).

RAVISHED, *p. p.* धर्षितः -ता -तं, हठधर्षितः &c., बलात्कारेण दूषितः &c., बलात्कारेणाभिगतः &c., प्रमाथितः &c., हृतः &c., अपहृतः &c.—(Enraptured), *see* the word.

RAVISHER, *s.* स्त्रीहर्त्ता *m.* (र्त्तृ), स्त्रीहारी *m.* (न्), कन्याहर्त्ता *m.*, धर्षकः, हठधर्षकः, हठदूषकः, बलात्कारदूषकः, कन्यादूषकः, स्त्रीप्रमाथी *m.*, प्रमाथी *m.*, हर्त्ता *m.*, अभिहर्त्ता *m.*, अपहारी *m.*, रतहिण्डकः.

RAVISHING, *s.* स्त्रीहरणं, स्त्रीधर्षणं, बलात्कारेणाभिगमः. *See* RAPE.

RAVISHING, *part.* or *a.* चित्तहारी -रिणी -रि (न्), चित्तापहारी &c., मनोहरः -रा -रं, चित्तमोहनः -ना -नं, चित्तमोही &c.

RAVISHMENT, *s.* (Of a woman) स्त्रीहरणं, कन्याहरणं, धर्षणं, बलात्कारेणाभिगमनं.—(Of the senses) चित्तहरणं, चित्तापहरणं, मनोहरणं, चित्तमोहः -हनं, *see* ENRAVISHMENT, RAPTURE.

RAW, *a.* (Undressed, uncooked) आमः -मा -मं, अपक्वः -क्वा -क्वं, असिद्धः -द्धा -द्धं, असंस्कृतः -ता -तं, अनुपस्कृतः &c.; 'half-dressed, nearly raw,' आपक्वः -क्वा -क्वं, यातयामः -मा -मं.—(Unripe, crude) अपक्वः -क्वा -क्वं, अपरिपक्वः &c., अपरिणतः -ता -तं, कलः -ला -लं.—(Inexperienced) अपक्वः &c., अविपक्वबुद्धिः -द्धिः -द्धि, अपरिपक्वबुद्धिः &c., *see* the word.—(Not covered with skin) चर्म्मरहितः -ता -तं, विगतचर्म्मा -र्म्मा -र्म्म (न्), विचर्म्मा &c., निश्चर्म्मा &c., अचर्म्मा &c., त्वग्रहितः &c.—(Damp and cold) आर्द्रशीतलः -ला -लं, आर्द्रशिशिरः -रा -रं.—(Raw flesh) आममांसं, क्रव्यं; 'smell of it,' विस्रं; 'eater of it,' आममांसादः, क्रव्यादः, *see* CANNIBAL.—(Raw fruit) आमफलं, शलाटुः -टुः -टु.

RAW-BONED, *a.* त्वगस्थिमात्रभृतः -ता -तं, केवलास्थिमयः -यी -यं.

RAWNESS, *s.* (State of being uncooked or unripe) आमता, अपक्वता, अपक्तिः *f.*, अपाकः, अपरिपाकः, अपरिपक्वता, असिद्धता, असंस्कृतत्वं, अनुपस्कृतत्वं, अपरिणतत्वं, अपरिणतिः *f.*, अपरिणामः, असिद्धिः *f.*, कलता.—(Inexperience) अपाकः, अपरिपाकः, अपक्वता, अपक्वबुद्धित्वं, अविपक्वबुद्धित्वं.—(Dampness and coldness) आर्द्रशीतता, आर्द्रशीतलता.—(Of smell) विस्रता.

RAY, *s.* (Of light) किरणः, रश्मिः *m.*, मरीचिः *m. f.*, करः, अंशुः *m.*, अभीशुः *m.*, अभीषुः *m.*, मयूखः, गभस्तिः *m. f.*, दीधितिः *m.*, अर्कत्विट् *f.* (ष्) पादः, उस्रः, रुचिः *f.*, त्विषिः *m.*, विभा, अर्च्चिस् *f.*, भानुः *m.*, शिपिः *m.*, घृणिः *m.*, पृश्निः *f.*, वीचिः *f.*, धृणिः *m.*, उपधृतिः *f.*, पृश्निः *f.*, स्योनः, स्यूमः; 'ray of the sun,' सूर्य्यरश्मिः *m.*, सूर्य्यकरः; 'of the meridian sun,' चर्कराटः; 'of the moon,' चन्द्रपादः, शशिपादः, शशिकरः, शशिमयूखः, सोमांशुः *m.*; 'pencil or stream of rays,' करजालं, अंशुजालं.

RAYLESS, *a.* किरणहीनः -ना -नं, रश्मिहीनः &c., निस्तेजाः -जाः -जः (स्).

To RAZE, *v. a.* (Demolish) उच्छिद् (c. 7. -छिनत्ति -छेत्तुं), उद्धृ, मृद्, नश् or विनश् in caus., ध्वंस् or विध्वंस् in caus., अधःपत् or निपत् in caus., लुप्, विलुप्, उन्मूल्. *See* ERASE.

RAZED, *p. p.* उच्छिन्नः -न्ना -न्नं, उन्मूलितः -ता -तं, विनाशितः &c.

RAZOR, *s.* क्षुरः, खुरः, क्षौरी, क्षौरयन्त्रं, क्षौरिकयन्त्रं, वृद्धिपत्रं; 'the edge of a razor,' क्षुरधारा; 'sharp as a razor,' क्षुरधाराभः -भा -भं.

RAZOR-CASE, *s.* क्षुरभाण्डं, खुरभाण्डं, क्षुराधारः, क्षुरालिकः.

RAZOR-STROP, *s.* क्षुरतेजनी, खुरतेजनी, क्षुरतेजनचर्म्म *n.* (न्).

RAZURE, *s.* उच्छेदः -दनं, विनाशः -शनं, व्यामर्षः -र्षणं, लोपः.

RE This prefix is expressed in Sanskrit by पुनर् or प्रति, by the former when 're' signifies again, as in the verbs, 're-absorb,' 're-appear;' by the latter when it signifies back, as in the verbs, 're-demand,' 'repay.' In cases where the word formed with 're' is not given in this Dictionary, the student must take the simple verb or noun, and use the above prefixes.

To reduce, *v. a.* (Bring to a former state) पूर्व्ववत् कृ, पूर्व्वावस्थां or पूर्व्वस्थितिं नी (c. 1. नयति, नेतुं) or आनी or गम् in caus.—(Bring to any state) नी, आनी, गम् in caus. (गमयति -यितुं), कृ in comp.; 'to redace to proverty,' दारिद्र्यं गम्, दरिद्रीकृ; 'to subjection,' वशीकृ; 'to one's own power,' स्ववशीकृ, आत्मसात्कृ; 'to ashes,' भस्मसात्कृ, भस्मीकृ; 'to a heap of ashes,' भस्मराशीकृ; 'to nothing,' निष्किञ्चनीकृ. Or expressed by आपन्न or सम्पन्न in comp.; as, 'to reduce to poverty,' दारिद्र्यापन्नं -न्नां कृ.—(Diminish, lower) न्यूनीकृ, अल्पीकृ, लघूकृ, ऊनीकृ, न्यून् (c. 10. न्यूनयति -यितुं), ऊन्, ह्रस् (c. 10. ह्रासयति -यितुं), लघ (nom. लघयति -यितुं), कन् (c. 10. कनयति -यितुं), शिथिलीकृ; 'to reduce one's strength,' बलं or वीर्य्यं शिथिलीकृ.—(Make thin) कृशीकृ, क्षीणीकृ, मांसक्षयं कृ, क्षि in caus. (क्षपयति -यितुं), शुष्कीकृ.—(Subdue) वशीकृ, पराजि, विजि, जि, खण्ड्.—(In arithmetic) रूपान्तरं कृ, रूपं दा or कृ.—(Reduce to order), *see To* methodize, arrange.

Reduced, *p. p.* (Brought to a former state) पूर्व्ववत्कृतः -ता -तं, पूर्व्ववद्गतः &c., पूर्व्वावस्थाङ्गतः &c., पूर्व्वदशाङ्गमितः &c., पूर्व्वस्थितिङ्गतः &c.—(Brought to any state) गमितः -ता -तं, परिगमितः &c., गतः -ता -तं, कृतः &c. in comp. भूतः &c. in comp.; 'reduced to poverty,' दारिद्र्यगतः -ता -तं, दारिद्र्यङ्गतः &c., दरिद्रीकृतः &c., दरिद्रीभूतः &c., गतधनः -ना -नं, गतविभवः -वा -वं, प्रचलितविभवः &c., शिथिलवसुः -सुः -सु, *see* Poverty; 'reduced to misery,' कृच्छ्रगतः -ता -तं, कृच्छ्रङ्गमितः &c.; 'reduced to ashes,' भस्मीकृतः &c., भस्मीभूतः &c., भस्मसात्कृतः &c.; 'to powder,' चूर्णीकृतः &c.; 'to nothing,' निष्किञ्चनः -ना -नं.—(Brought into subjection) वशीकृतः -ता -तं, वशीभूतः &c.—(Diminished, lowered) न्यूनीकृतः -ता -तं, न्यूनीभूतः &c., अल्पीकृतः &c., लघूकृतः &c., शिथिलीकृतः &c., शिथिलितः &c.; 'in strength of body,' शिथिलबलः -ला -लं, क्षीणबलः &c., विकलबलः &c., क्षीणः &c., कृशः -शा -शं.

Reducible, *a.* आनेयः -या -यं, आनेतव्यः -व्या -व्यं, करणीय in comp.; as, 'reducible to a former state,' पूर्व्ववत्करणीयः &c.; 'to ashes,' भस्मसात्करणीयः &c., भस्मीकरणीयः &c.

Reduction, *s.* (Bringing to any state) करणं in comp.; as, 'reduction to ashes,' भस्मीकरणं; 'to powder,' चूर्णीकरणं.—(Diminution, impairment) न्यूनीकरणं, न्यूनता -त्वं, अल्पीकरणं, लघूकरणं, ऊनीकरणं, ह्रासः, वैकल्यं, विकलीकरणं, शिथिलीकरणं, शैथिल्यं.—(Subjugation) वशीकरणं, विजयः, खण्डनं.—(In arithmetic) रूपान्तरं, रूपान्तरकरणं.

Redundance, redundancy, *s.* आधिक्यं, अधिकता -त्वं, अतिरेकः, उद्रेकः, आतिरेक्यं, अतिरिक्तता, आतिशय्यं, उत्सेकः, उद्वर्त्तः, गाढता. *See* Excess, Exuberance.

Redundant, *a.* अधिकः -का -कं, अतिरिक्तः -क्ता -क्तं, उद्रिक्तः &c., समतिरिक्तः &c., अतिशय in comp., अतिशयितः -ता -तं, अतिशयी -यिनी &c., अतिशायनः -ना -नं, अत्यन्तः -न्ता -न्तं, व्यर्थः -र्था -र्थं, उत्सिक्तः &c., उद्वर्त्तः -र्त्ता -र्त्तं, गाढः -ढा -ढं. *See* Excessive, Exuberant.

Redundantly, *adv.* अतिरिक्तं, उद्रिक्तं, अतिशयेन, सातिशयं, व्यर्थं.

To reduplicate, *v. a.* (Double) द्विगुणीकृ.—(A syllable or letter) आम्रेड् (c. 10. -म्रेडयति -यितुं), अक्षराम्रेडनं कृ, अक्षराभ्यासं कृ, अक्षरद्वित्वं कृ, द्विरुक्तिं कृ.

Reduplicated, *p. p.* आम्रेडितः -ता -तं, अभ्यस्तः -स्ता -स्तं, द्विरुक्तः -क्ता -क्तं.

Reduplication, *s.* आम्रेडनं, आम्रेडितं, द्विरुक्तिः *f.*; 'of a letter,' द्वित्वं; 'the reduplicated syllable,' अभ्यासः; 'word formed by reduplication,' प्रतिशब्दः. Reduplication is denoted by the symbol द्वि.

Red-wood, *s.* (Kind of red sandal) पत्राङ्गं, रक्तचन्दनं.

To re-echo, re-echoing, *see To* echo, echoing.

Reed, *s.* नलः, नडः, वेत्रं -त्रः, वेतसः -सी, वेणुः *m.*, वंशः, शरः, धमनः, नालः -ली, नाडिः -डी *f.*, कीचकः, तृणं, तृणध्वजः, तृणकेतुः *m.*, पोटगलः, कुक्षिरन्ध्रः, छिद्रान्तरः, खखीरकः, त्वक्सारः, शतपर्व्वा *m.* (न्), मस्करः; 'leaf of a reed,' वेतसपत्रं; 'reed-mat,' नलपट्टिका; 'reed for writing, reed pen,' कलमः, लेखनी, आलेखनी.

Reedy, *a.* (Abounding with reeds) वेत्रकीयः -या -यं, वैत्रकः -की -कं, वेत्रवान् -वती -वत् (त्), वेत्रमयः -यी -यं, वेत्रपूर्णः -र्णा -र्णं, नडकीयः -या -यं, नड्मः -ड्मा -ड्मं, नड्वलः -ला -लं, नलमयः -यी -यं, वेतस्वान् -स्वती -स्वत् (त्), वेतसपूर्णः -र्णा -र्णं, शरमयः &c.—(Sounding like a reed) कीचकस्वरः -रा -रं.

Reef, *s.* (Of a sail) वातवसनपुटः, नौकावसनपुटः.—(Of rocks) समुद्रमध्ये शैलसेतुः *m.* or शैलश्रेणी or शैलपंक्तिः *f.*

To reef, *v. a.* वातवसनानि संहृ (c. 1. -हरति -हर्त्तुं) or संवृ or सम्पुटीकृ.

Reefy, *a.* शैलसेतुपूर्णः -र्णा -र्णं, शैलश्रेणीपूर्णः -र्णा -र्णं.

Reek, *s.* वाष्पः, उष्णवाष्पः, तप्तजलवाष्पः, धूमः -मिका, फेनः, स्वेदः.

To reek, *v. n.* वाष्प (nom. वाष्पायते), वाष्पम् उद्गृ or उत्क्षिप् or उद्गम् in caus. or मुच्, वाष्पोद्गतिं कृ, वाष्पोद्गारं कृ, धूम (nom. धूमायते).

Reeking, reeky, *a.* वाष्पायमानः -ना -नं, वाष्पोद्गारी -रिणी &c., वाष्पमयः -यी -यं, वाष्पार्द्रः -र्द्रा -र्द्रं, आर्द्रः &c., धूममयः -यी -यं, धूमायमानः -ना -नं.

Reel, *s.* (For winding thread) आवापनं.—(Lively dance) लघुनृत्यं.—(Movement on one side) विचलनं, चलनं.

To reel, *v. n.* विचल् (c. 1. -चलति -लितुं), सञ्चल्, चल्, इतस्ततो विचल्, एकपार्श्वे पत् in des. (पिपतिषति -षितुं, पित्सति -त्सितुं).

To re-enforce, *s.* बलाधिक्यं कृ, सेनाधिक्यं कृ. *See* Re-inforce.

To re-enter, *v. a.* पुनः प्रविश् (c. 6. -विशति -वेष्टुं), पुनर् आगम्.

To RE-ESTABLISH, *v. a.* पुनः स्था in caus. (स्थापयति -यितुं) or प्रतिष्ठा, पुनः संस्था.

REFECTION, *s.* अल्पाहारः, लघुभोजनं, अल्पभोजनं, लघ्वाहारः, आहारः, उपहारः, अल्पान्नखादनं, श्रमापहारः, श्रमपरिच्छेदः, क्लमपरिच्छेदः, शरीराप्यायनं.

REFECTORY. *s.* उपहारगृहं, उपहारशाला, आहारशाला, भोजनशाला.

To REFER, *v. a.* (Deliver over, consign to another for decision) निष्पादनार्थं परस्मिन् समृ in caus. (-अर्पयति -यितुं) or न्यृ or निक्षिप् or न्यस् or परस्मै प्रतिपद् in caus.—(Leave to the decision of another) परविचारं प्रार्थयित्वा कार्य्यं or अर्थं त्यज् (c. 1. त्यजति, त्यक्तुं) or अपास् (c. 4. -अस्यति -सितुं) or विसृज् (c. 6. -सृजति -स्रष्टुं) or अवसृज् or मुच् or अवमुच् or हा.—(Assign) आरुह् in caus. (-रोपयति -यितुं), समारुह्, अध्यारुह्, अभिसम्बन्ध् (c. 9. -बध्नाति -बन्द्धुं), सम्बन्ध्.

To REFER, *v. n.* (Have reference) अपेक्ष् (c. 1. -ईक्षते -क्षितुं), अवेक्ष्, प्रतीक्ष्, उद्दिश् (c. 6. -दिशति -देष्टुं), समुद्दिश्, निर्दिश्, अभिसम्बन्ध् in pass. (-बध्यते), सम्बन्ध् in pass.—(Allude) उद्दिश्, समुद्दिश्, सूच् (c. 10. सूचयति -यितुं).

REFERABLE, *a.* आरोपणीयः -या -यं, समारोपणीयः &c., अध्यारोपणीयः &c., समर्पणीयः -या -यं, अर्पणीयः &c., सम्बन्धनीयः -या -यं, अभिसम्बन्धनीयः -या -यं, सम्बन्धीयः -या -यं.

REFEREE, *s.* मध्यस्थः, प्रमाणपुरुषः, स्थेयः, निर्णेता *m.* (तृ), विचारकृत्.

REFERENCE, *s.* (Directing or consigning to another for information, &c.) समर्पणं, अर्पणं, प्रतिपादनं, निवेदनं, आरोपणं, समारोपणं, आरोपः.—(Relation, regard, allusion) अपेक्षा, अवेक्षा, प्रतीक्षा, उद्देशः, समुद्देशः, सम्बन्धः, अभिसम्बन्धः, अन्वयः, समन्वयः, विषयत्वं -ता, विषयः, सम्पर्कः, गोचरत्वं -ता; 'containing a reference,' सापेक्षः -क्षा -क्षं; 'in reference to,' अपेक्षया, अपेक्ष्य, प्रतीक्ष्य, उद्दिश्य, उद्देशेन, समुद्दिश्य, सापेक्षं.

REFERRED, *p. p.* (Consigned or directed to another) परसमर्पितः -ता -तं, परप्रतिपादितः &c., परनिवेदितः &c., अर्पितः &c., प्रस्थापितः &c.—(Assigned) आरोपितः -ता -तं, समारोपितः &c., अध्यारोपितः &c., अभिसम्बद्धः -द्धा -द्धं, निर्दिष्टः -ष्टा -ष्टं, उद्दिष्टः &c.

REFERRIBLE *a.* आरोपणीयः -या -यं. *See* REFERABLE, *a.*

To REFINE, *v. a.* (Purify) शुध् (c. 10. शोधयति -यितुं), संशुध्, विशुध्, शुद्धीकृ, शोधनं कृ, विमलीकृ, निर्मलीकृ, पवित्रीकृ, विमल (nom. विमलयति -यितुं), मलं हृ or अपनी.—(Make elegant or polite, polish) परिष्कृ, संस्कृ, शिष्टीकृ, शिष्टं -[illegible] -भ्यं -भ्यां कृ, शिष्टतां or सभ्यतां जन् (c. 10. जनयति -यितुं) or दा, सूक्ष्मीकृ.

To REFINE, *v. n.* (Become pure) शुध् (c. 4. शुध्यति -ते, शोद्धुं), संशुध्, विशुध्, शुद्धीभू, विमलीभू.—(Be over nice) अतिसूक्ष्मीभू, अतिसूक्ष्मतां सेव्.

REFINED, *p. p.* (Purified) शोधितः -ता -तं, संशोधितः &c., शुद्धः -द्धा -द्धं, संशुद्धः &c., विशोधितः &c., शुद्धीकृतः &c., विमलीकृतः &c., निर्मलीकृतः &c., हृतमलः -ला -लं, पवित्रीकृतः &c.—(Polished) परिष्कृतः -ता -तं, संस्कृतः &c., शिष्टः -ष्टा -ष्टं, सभ्यः -भ्या -भ्यं, सभ्यतापन्नः -न्ना -न्नं, सभ्यतासम्पन्नः &c.—(Nice, over nice) सूक्ष्मः -क्ष्मा -क्ष्मं, अतिसूक्ष्मः &c.

REFINEMENT *s.* (Act of purifying) शोधनं, संशोधनं, विशोधनं, शुद्धीकरणं, शोधः.—(Purity) शुद्धिः *f.*, संशुद्धिः *f.*, विशुद्धिः *f.*, शोधितत्वं, शुद्धता -त्वं, पवित्रता, *see* PURITY.—(Act of polishing) परिष्कारः, परिष्कृतिः *f.*, परिष्करणं, संस्कारः, संस्कृतिः *f.*, संस्करणं, सभ्यकरणं, शिष्टकरणं.—(State of being polished, elegance) शिष्टता -त्वं, सभ्यता -त्वं, परिष्कारः, परिष्कृतत्वं, सुजनता, सौजन्यं; 'of manners,' शिष्टाचारत्वं, सभ्याचारत्वं, सभ्याचारसम्पन्नता, शिष्टाचारसम्पन्नता, सभाचातुर्य्यं, सुशीलता, सुनीतिः *f.*, विनयः; 'of mind,' मनःशुद्धिः *f.*, चित्तशुद्धिः *f.*—(Nicety, over nicety) सूक्ष्मता, अतिसूक्ष्मता, सौक्ष्म्यं, अतिसौक्ष्म्यं.

REFINER, *s.* शोधकः, संशोधकः, शोधयिता *m.* (तृ), मलापहारकः.—(Of metals) धातुशोधकः, धातुमलहारी *m.* (न्), धातुकलङ्कहारी *m.*

REFINING, *s.* (Of metals) धातुशोधनं, धातुमलापहारः, धातुकलङ्कहरणं.

To REFIT, *v. a.* प्रतिसंकृ, प्रतिकृ, समाधा, प्रतिसमाधा, जीर्णोद्धारं कृ, जीर्णसमाधानं कृ, पुनः कॢप् or परिकॢप्, पुनः सज्जीकृ, पुनः समायुज्. *See To* REPAIR.

To REFLECT, *v. a.* (Throw back, cause to return, as a mirror, &c.) प्रतिक्षिप् (c. 6. -क्षिपति -क्षेप्तुं) प्रतिहन् (c. 2. -हन्ति -न्तुं), पराहन्, परावृत् in caus. (-वर्त्तयति -यितुं), प्रत्यावृत्, परावर्त्तनं कृ, प्रतिक्षेपं कृ, प्रतिबिम्ब (nom. प्रतिबिम्बयति -यितुं), बिम्ब, प्रतिबिम्बितं -तां कृ, प्रतिबिम्बं कृ, प्रतिमूर्त्तिं कृ, प्रतिरूपं कृ; 'a body which reflects all the rays of light,' पदार्थो यस्मात् सर्व्वकिरणाः परावर्त्तन्ते or परावर्जन्ति, पदार्थो यः सर्व्वकिरणान् परावर्त्तयति; 'a lake which reflects the stars,' ताराप्रतिबिम्बं सरस्, ताराछायं सरस्; 'the mirror reflects the image,' दर्पणो मूर्त्तिबिम्बं प्रतिक्षिपति, दर्पणो मूर्त्तिं प्रतिबिम्बयति, दर्पणो मूर्त्तिप्रतिबिम्बं करोति.

To REFLECT, *v. n.* (In the mind, consider) चिन्त् (c. 10. चिन्तयति -यितुं), संचिन्त्, विचिन्त्, मनसा विचर् (c. 10. -चारयति -यितुं), ध्यै (c. 1. ध्यायति, ध्यातुं), अनुध्यै, संध्यै, अभिध्यै, विमृश् (c. 6. -मृशति -म्रष्टुं), परिमृश्, वितर्क (c. 10. -तर्कयति -यितुं), अनुतर्क्, तर्क्, भू (c. 10. भावयति -यितुं), विभू, सम्भू, मनसा विगण् (c. 10. -गणयति -यितुं), समाधा (c. 3. -धत्ते -धातुं), निरूप् (c. 10. -रूपयति -यितुं), अवेक्ष् (c. 1. -ईक्षते -क्षितुं), समवेक्ष्, समीक्ष्, प्रसमीक्ष्, मन् (c. 4. मन्यते, मन्तुं), चिन्तां कृ, विचारणां कृ.—(Bring reproach, cast censure upon) तिरस्कारम् आवह्, कलङ्कं or दोषं क्षिप् (c. 6. क्षिपति, क्षेप्तुं), यशोहानिं or कीर्त्तिहानिं or कलङ्कम् आवह्, यशो or कीर्त्तिं न्यूनीकृ.

REFLECTED, *p. p.* (Thrown back, as in a mirror, &c.) प्रतिबिम्बितः -ता -तं, बिम्बितः &c., बिम्बागतः &c., बिम्बगतः &c., प्रतिहतः &c., प्रतिक्षिप्तः -प्ता -प्तं, परावर्त्तितः -ता -तं, पराहतः &c., प्रतिफलितः &c., संक्रान्तः -न्ता -न्तं; 'reflected in water,' जलप्रतिबिम्बितः -ता -तं; 'to be reflected,' परावृत् (c. 1. -वर्त्तते -र्त्तितुं), प्रतिहन् in pass. (-हन्यते); 'the rays of the sun are reflected,' सूर्य्यकिरणाः परावर्त्तन्ते; 'it is seen by reflected light,' परावृत्तकिरणैर् विलोक्यते; 'reflected image,' प्रतिबिम्बं, बिम्बः -म्बं, प्रतिच्छाया, छाया, प्रतिच्छन्दः -न्दकं, प्रतिफलनं; 'reflected light,' प्रतिभा.

REFLECTING, *part.* or *a.* (Throwing back as a mirror, &c.) परावर्त्तनकारी -रिणी -रि (न्), प्रतिबिम्बकारी &c., बिम्बप्रतिक्षेपकः -का -कं, प्रतिक्षेपकः &c., परावर्त्तकः &c.; 'a lake reflecting the stars,' ताराप्रतिबिम्बं सरस्, ताराछायं सरस्.—(Given to meditation) चिन्ताशीलः -ला -लं, ध्यानशीलः &c., विचारशीलः &c., चिन्तयन् -यन्ती -यत् (त्), चिन्तावान् &c. *See* MEDITATIVE.

REFLECTION, *s.* (Act of throwing back) प्रतिक्षेपः -पणं, प्रतिहतिः *f.*, परावर्त्तनं, प्रतिबिम्बकरणं, संक्रान्तिः *f.*; 'reflection of rays of light,' किरणपरावर्त्तनं; 'the angle of reflection,' परावर्त्तनकोणः.—(That which is reflected, image &c. reflected) प्रतिबिम्बं, बिम्बं -म्बः, प्रतिच्छाया, छाया, छायात्मा *m.* (न्), प्रतिभासः, आभासः,

प्रतिमा, प्रतिरूपं, प्रतिमूर्त्तिः *f.*, प्रतिफलं -लनं, प्रतिकृतिः *f.*; 'reflection of the moon,' प्रतिमेन्दुः *m.*—(Consideration, thought) चिन्ता -न्तनं, सुचिन्ता, विचारः, विचारणं -णा, विमर्शः, ध्यानं, आध्यानं, अभिध्यानं, अन्तर्ध्यानं, चर्चा, समाधिः *m.*, समाधानं, भावना, सम्भावना, चिन्तितं, चिन्तितिः *f.*, चिन्तिया.—(Reproach, censure) कलङ्कः, कीर्त्तिहानिः *f.*, यशोहानिः *f.*

REFLECTOR, *s.* (Something polished for reflecting) प्रतिबिम्बातः, आदर्शः, दर्शनं, दर्पणः.—(One who considers) विचारकृत् *m.*, विचारकः, चिन्ताकारी *m.* (न्).

REFLEXIBILITY, *s.* परावर्त्तनीयता, परावर्त्तनयोग्यता, प्रतिबिम्बयोग्यता.

REFLEXIBLE, *a.* परावर्त्तनीयः -या -यं, परावर्त्तनक्षमः -मा -मं, परावर्त्तनयोग्यः &c., प्रतिबिम्बयोग्यः &c., प्रतिक्षेपणीयः -या -यं, प्रतिहननीयः -या -यं.

REFLEXIVE, *a.* पूर्व्वापेक्षकः -का -कं, पूर्व्वोद्देशकः &c., पूर्व्वप्रतीक्षकः &c.

REFLUENT, *a.* परावर्त्ती -र्त्तिनी -र्त्ति (न्), पश्चात्प्रवाही &c., विपरिवर्त्ती &c.

REFLUX, REFLUENCE, *s.* पश्चाद्वेला, विपरीतवेला, पश्चात्प्रवाहः, विपरीतप्रवाहः, वेलाया विपरीतगतिः *f.*, वेलापरावर्त्तः -र्त्तनं, वेलापरिवर्त्तनं, वेलाविपरिवर्त्तनं.

To REFORM, *v. a.* (Cause to cease from wickedness, bad conduct, &c.) पापात् or दुष्कर्म्मणो निवृत् (c. 10. -वर्त्तयति -यितुं) or विनिवृत् or परावृत् or परिवृत् or विरम् (c. 10. -रमयति -यितुं), अधर्म्मात् or कुकर्म्मणो निवर्त्तयित्वा धर्म्मे प्रवृत् in caus. or नियुज् in caus., पापाद् विप्रतिसृ in caus. (-सारयति -यितुं), विप्रतिसारं जन्, पापनिवर्त्तनं कृ, पापपरिवर्त्तनं कृ, निवृत्तपापं -पां कृ; 'to reform a bad habit,' दोषनिवर्त्तनं कृ, दोषखण्डनं कृ.—(Amend, correct) शुध् (c. 10. शोधयति -यितुं), विशुध्, समाधा, प्रतिसमाधा, प्रतिकृ प्रतिसंकृ. *See To* RECTIFY.

To REFORM, *v. n.* (Cease from bad conduct and return to good) पापात् or दुष्कर्म्मणो निवृत् (c. 1. -वर्त्तते -र्त्तितुं) or विनिवृत् or परावृत् or विरम् (c. 1. -रमति -रन्तुं), अधर्म्मात् or कुकर्म्मणो निवृत्य धर्म्मप्रवृत्तिं कृ or धर्म्मे प्रवृत्, पापाद् विप्रतिसृ (c. 1. -सरति -सर्त्तुं) विप्रतिसारं कृ, विप्रतीसारं कृ, निवृत्तपापः -पा -पं भू, पापत्यागं कृ, पापपरित्यागं कृ, दोषत्यागं कृ, त्यक्तपापः -पा -पं भू, त्यक्तदोषः -पा -पं भू.

REFORM, REFORMATION, *s.* पापनिवर्त्तनं, दोषनिवर्त्तनं, पापनिवृत्तिः *f.*, दोषनिवृत्तिः *f.*, निवर्त्तनं, निवृत्तिः *f.*, परिवर्त्तनं, परिवृत्तिः *f.*, विनिवर्त्तनं, पापत्यागः, दोषत्यागः, दोषपरित्यागः, दोषखण्डनं, दोषपरिच्छेदः, दोषच्छेदः, दोषप्रतिकारः, दोषप्रतीकारः, दोषशोधनं, दोषसमाधानं, प्रतिसमाधानं, विप्रतिसारः, विप्रतीसारः, शोधनं.—(Of religion) धर्म्मपरिवर्त्तनं, दुष्टधर्म्मपरिवर्त्तनं, धर्म्मपरिवृत्तिः *f.*, दूषितधर्म्मशोधनं, धर्म्मशोधनं.

REFORMED, *p. p.* निवृत्तपापः -पा -पं, निवृत्तदोषः -षा -षं, त्यक्तपापः &c., त्यक्तदोषः &c., गतपापः &c., गतदोषः &c., विगतदोषः &c., हृतदोषः &c., गतमायः -या -यं, विरतपापः &c., विनिवृत्तपापः &c., खण्डितदोषः &c., छिन्नदोषः &c., शोधितः -ता -तं, शुद्धः -द्धा -द्धं, विशोधितः &c., जातविप्रतीसारः -रा -रं, कृतविप्रतीसारः &c.

REFORMER, *s.* निवर्त्तकः, पापनिवर्त्तकः, पापनिवृत्तिकर्त्ता *m.* (र्त्तृ), दोषनिवर्त्तकः, दोषखण्डकः, दोषच्छेदकः, दोषहारी *m.* (न्), शोधनकारी *m.*, शोधकः.—(Of religion) धर्म्मशोधकः, दूषितधर्म्मशोधकः.

To REFRACT, *v. a.* वक्रीकृ, गतिवक्रतां कृ, वक्रगतिं कृ; 'to refract rays of light,' किरणवक्रतां कृ.

REFRACTED, *p. p.* वक्रीभूतः -ता -तं, वक्रीकृतः &c.; 'to be refracted,' वक्रीभू; 'the rays are refracted downwards,' अधो वक्रीभवन्ति किरणाः.

REFRACTION, *s.* किरणवक्रता, किरणवक्रीभावः, किरणवक्रीभवनं, किरणवक्रगतिः *f.*, किरणवक्रीकरणं.

REFRACTORINESS, *s.* प्रतीपता -त्वं, विप्रतीपता, अवश्यता, दुःशास्यता, अविनेयता, दुःसाध्यता, दुर्दान्तता, अविधेयता, दुर्निग्रहता, अनायत्तता.

REFRACTORY, *a.* प्रतीपः -पा -पं, विप्रतीपः &c., प्रतीपकारी -रिणी -रि (न्), विपरीतकारी &c., अवश्यः -श्या -श्यं, दुःशास्यः -स्या -स्यं, दुःशासनः -ना -नं, अविनेयः -या -यं, अविधेयः &c., दुर्निग्रहः -हा -हं, दुःसाध्यः -ध्या -ध्यं, अनिवार्य्यः -र्य्या -र्य्यं, उल्लंघितशासनः -ना -नं. *See* INTRACTABLE, PERVERSE; 'to be refractory,' प्रतीप (nom. प्रतीपायते), प्रतीपीभू.

REFRAGABLE, *a.* खण्डनीयः -या -यं, खण्ड्यः -ण्ड्या -ण्ड्यं, खण्डितव्यः &c.

To REFRAIN, *v. a.* (Restrain) यम्, नियम्, विनियम्, संयम्, निग्रह्, निरुध्, अवरुध्, संहृ, वृ, निवृ, निषिध्, निवृत् in caus.

To REFRAIN, *v. n.* (Forbear, restrain one's self) निवृत् (c. 1. -वर्त्तते -र्त्तितुं) with abl. c., विरम् (c. 1. -रमति -रन्तुं) with abl. c., आत्मानं यम् (c. 1. यच्छति, यन्तुं) or संयम्, परिहृ (c. 1. -हरति -हर्त्तुं) with acc., वृज् (c. 10. वर्जयति -यितुं) with acc., परिवृज्, विवृज्, प्रोज्झ्, त्यज्, हा; 'he should refrain from eating flesh,' निवर्त्तेत मांसभक्षणात् or मांसं वर्जयेत्.

REFRANGIBLE, *a.* वक्रीकरणीयः -या -यं, वक्रीभवनीयः &c., वक्रताक्षमः &c.

To REFRESH, *v. a.* (Invigorate, relieve from fatigue) क्लान्तिं or श्रमं हृ (c. 1. हरति, हर्त्तुं), श्रमापहारं कृ, क्लान्त्यपहारं कृ, क्लान्तिच्छेदं कृ, श्रमच्छेदं कृ, विश्रान्तिं दा, आप्यै (c. 10. -प्याययति -यितुं), समाप्यै, बलं or तेजो or सत्त्वं वृध् (c. 10. वर्धयति -यितुं), सत्त्वं or वीर्य्यं दा.—(Revive, cheer) आश्वस् (c. 10. -श्वासयति -यितुं), प्रत्याश्वस्, पुनर् आश्वस्, पुनर् जीव् (c. 10. जीवयति -यितुं), पुनर्जीवनं दा, सुख् (c. 10. सुखयति -यितुं), आनन्द् in caus., तृप् in caus., ह्लाद् in caus.—(Cool) शीतल (nom. शीतलयति -यितुं), शीतलीकृ, निर्वा in caus. (-वापयति -यितुं), निर्वापनं कृ.—(Make new or fresh) नवीकृ.

REFRESHED, *p. p.* (Relieved from fatigue) हृतक्लान्तिः -न्तिः -न्ति, हृतश्रमः -मा -मं, हृतक्लमः &c., अपहृतक्लान्तिः &c., अपहृतश्रमः &c., गतक्लमः &c., गतश्रमः &c., विगतश्रमः &c., छिन्नक्लान्तिः &c., छिन्नश्रमः &c., विश्रान्तः -न्ता -न्तं, विश्रान्तः -न्ता -न्तं, आप्यायितः -ता -तं.—(Revived, cheered) आश्वासितः &c., समाश्वासितः &c., प्रत्याश्वस्तः -स्ता -स्तं, आनन्दितः -ता -तं, अनुभूतसुखः -खा -खं.—(Cooled) शीतलीकृतः -ता -तं, निर्वापितः &c.—(Made fresh) नवीकृतः -ता -तं.

REFRESHING, *a.* क्लान्तिहरः -रा -रं, क्लान्तिहारकः -का -कं, श्रान्तिहरः &c., श्रमहारी -रिणी -रि (न्), श्रमापहारी &c., श्रमापहः -हा -हं, क्लान्त्यपहः &c., श्रान्त्यपहः &c., क्लान्तिच्छिद् *m. f. n.*, विश्रान्तिदः -दा -दं, श्रमच्छेदकः -का -कं, आप्यायकः -का -कं, आश्वासकः &c., आनन्ददः -दा -दं, बलवर्धकः &c., निर्वापकः &c.

REFRESHMENT, *s.* (Act of refreshing) श्रमापहारः, श्रमापहरणं, क्लान्तिहरणं, क्लान्त्यपहारः, क्लान्त्यपहरणं, क्लान्तिच्छेदः, श्रमच्छेदः, श्रान्तिच्छेदः, आप्यायः -यनं, विश्रान्तिदानं, बलवर्धनं, सत्त्ववर्धनं, सत्त्वदानं, आश्वासनं, विश्रापनं.—(State) विश्रान्तिः *f.*, विश्रामः, विश्रान्तिः *f.*, विश्रान्तता.—(Food, slight repast) उपाहारः, लघुभोजनं, लघ्वाहारः, अल्पाहारः, आहारः.

REFRIGERANT, *a.* तापहरः -रा -रं, सन्तापहरः &c., दाहहरः &c., दाहनाशकः -का -कं, शीतलकारी -रिणी -रि (न्), निर्वापकः -का -कं.

REFRIGERANT, *s.* (Medicine) निर्वापनं, दाहहारकं, तापनाशकम् औषधं.

To REFRIGERATE, *v. a.* तापं or दाहं हृ (c. 1. हरति, हर्त्तुं) or नश्

(c. 10. नाशयति -यितुं), शीतलीकृ, शीतल (nom. शीतलयति -यितुं), निर्वा in caus. (-वापयति -यितुं).

Refrigeration, *s.* निर्वापनं, निर्वाणं, तापहरणं, दाहहरणं, शीतलीकरणं.

Refuge, *s.* (Shelter, protection) आश्रयः, समाश्रयः, आश्रयणं, संश्रयः, शरणं, आशयः, अयणं, आयः, गतिः *f.*, अवस्थानं, त्राणं.—(That which shelters, cause of protection) आश्रयः, शरणं, संश्रयः, आश्रयभूतः -ता -तं, शरणभूतः -ता -तं, आश्रयस्थानं, शरण्यं, शरण्युः *m.*, पालकः, रक्षकः.—(Resource, expedient) गतिः *f.*, आश्रयः, उपायः, युक्तिः *f.*; 'to take refuge,' आश्रि (c. 1. -श्रयति -यितुं), समाश्रि, संश्रि, उपाश्रि, समुपाश्रि, शरणार्थं गम् (c. 1. गच्छति, गन्तुं) or आगम् or उपे (c. 2. उपैति -तुं, rt. इ), अवलम्ब् (c. 1. -लम्बते -म्बितुं), आश्रयणं कृ; 'having but one refuge,' अनन्यगतिः -तिः -ति, अनन्यगतिकः -का -कं; 'come for refuge,' शरणागतः -ता -तं, शरणार्थम् आगतः &c., शरणापन्नः -न्ना -न्नं, प्रपन्नः &c.; 'seeking refuge,' शरणार्थी -र्थिनी &c., शरणैषी &c.; 'one who affords refuge,' शरणार्पकः.

Refugee, *s.* शरणागतः, शरणार्थम् आगतः, शरणार्थी *m.* (न्), शरणैषी *m.* (न्), शरणार्थम् आश्रितः, अवलम्बी *m.* (न्), अवलम्बितः, प्रपन्नः; 'protector of refugees, kind to them,' शरणागतपालकः, शरणागतवत्सलः, प्रपन्नपालः -लकः.

Refulgence, *s.* प्रतापः, अतितेजस् *n.*, महातेजस् *n.*, उज्ज्वलता, अतिप्रभा, विभा.

Refulgent, *a.* प्रतापवान् -वती -वत् (त्), अतिप्रतापी -पिनी -पि (न्), सुप्रभः -भा -भं, उज्ज्वलः -ला -लं, द्योती &c., विभ्राजमानः -ना -नं. *See* Splendid, Bright.

To refund, *v. a.* प्रतिदा (c. 3. -ददाति -दातुं), पुनर् दा or प्रदा or प्रयम्.

Refusal, *s.* (Denial of a thing demanded) प्रत्याख्यानं, प्रत्यादेशः, अपह्नवः, अपह्नुतिः *f.*, अपलापः, निरसनं, निरासः, निराकरणं, निराकृतिः *f.*, अपवादः, निह्नवः, निह्नुतिः *f.*, निषेधः, प्रतिषेधः, व्यपाकृतिः *f.*, प्रणयविहतिः *f.*—(Declining to accept) अग्रहणं, अप्रतिग्रहः, अपरिग्रहः, अस्वीकारः, अस्वीकरणं, अनङ्गीकारः, अनङ्गीकरणं, निरसनं, निराकरणं, अननुज्ञानं.—(Of a lover) अवधीरणं -णा, धीरता -त्वं.—(Right of buying or taking in preference) पूर्वक्रयाधिकारः, पूर्वग्रहणाधिकारः.

To refuse, *v. a.* (Deny a request or demand, decline to do what is asked) प्रत्याख्या (c. 2. -ख्याति -तुं), अन्तःख्या, अतिख्या, प्रत्यादिश् (c. 6. -दिशति -देष्टुं), अपह्नु (c. 2. -ह्नुते -ह्नोतुं), निह्नु, अपलप् (c. 1. -लपति -पितुं), निरस् (c. 4. -अस्यति -असितुं), अपास्, निराकृ, प्रत्याचक्ष् (c. 2. -चष्टे), अपवद् (c. 1. -वदति -दितुं), निषिध् (c. 1. -षेधति -षेद्धुं), प्रतिषिध्, अपव्यय् (c. 1. -व्ययते -यितुं), प्रत्यादेशं कृ, निरासं कृ, न अनुज्ञा, न अनुमन्, न सम्मन्.—(Decline to accept, reject) न ग्रह् (c. 9. गृह्णाति, ग्रहीतुं), न प्रतिग्रह्, अग्रहणं कृ, न स्वीकृ, न अङ्गीकृ, निरस्, अपास्, निराकृ, अवधीर् (c. 10. अवधीरयति -यितुं). The sense of 'refuse' may be expressed simply by the negative particle न; as, 'to refuse to give,' न दा or even by अलं as अलन्दा.

Refuse, *a.* उच्छिष्टः -ष्टा -ष्टं, अवशिष्टः &c., असारः -रा -रं, निःसारः &c.

Refuse, *s.* उच्छिष्टं, अवशिष्टं, शेषः, अवशेषः, शेषभागः, उद्वर्त्तः, भुक्तं, समुज्झितं, असारः, असारद्रव्यं, निःसारद्रव्यं, मलं. *See* Leavings.

Refused, *p. p.* प्रत्याख्यातः -ता -तं, प्रत्यादिष्टः -ष्टा -ष्टं, अपह्नुतः -ता -तं, निरस्तः -स्ता -स्तं, निराकृतः -ता -तं, अपवादितः &c., निषिद्धः -द्धा -द्धं, अस्वीकृतः &c., अनङ्गीकृतः &c., अननुज्ञातः -ता -तं, अननुमतः &c., असम्मतः &c., अवधीरितः &c.

Refutable, *a.* खण्डनीयः -या -यं, खण्ड्यः -ण्ड्या -ण्ड्यं, खण्डितव्यः -व्या -व्यं, प्रत्याख्येयः -या -यं, निरसनीयः &c., उपमर्दनीयः &c., खण्डनशक्यः -क्या -क्यं.

Refutation, *s.* खण्डनं, वाक्यखण्डनं, पक्षाघातः, बाधा -धः, निरासः, वाक्यनिरासः, वाक्यनिरसनं, निराकरणं, वाक्यनिराकरणं, प्रत्याख्यानं, उपमर्दः, अधरीकरणं, आधर्षणं, विक्षेपः, वितण्डा, जल्पः, अनिश्चयः; 'other side of the argument,' उत्तरपक्षः.

To refute, *v. a.* वाक्यं खण्ड् (c. 10. खण्डयति -यितुं) or निरस् (c. 4. -अस्यति -असितुं) or निराकृ, बाध् (c. 1. बाधते -धितुं), प्रत्याख्या (c. 2. -ख्याति -तुं), अधरीकृ, आधृष् (c. 10. -धर्षयति -यितुं), संसूच् (c. 10. -सूचयति -यितुं), विक्षिप् (c. 6. -क्षिपति -क्षेप्तुं), उपमर्दं कृ, वाक्योपमर्दं कृ, अपवद्, वितण्डां कृ.

Refuted, *p. p.* खण्डितः -ता -तं, निरस्तः -स्ता -स्तं, निराकृतः -ता -तं, बाधितः &c., अधरीकृतः &c., प्रत्याख्यातः &c., आधर्षितः &c., विक्षिप्तः -प्ता -प्तं, उपमर्दितः &c., निर्धूतः &c., वितण्डितः &c., निस्तीर्णः -र्णा -र्णं, विखण्डितः &c.

Refuter, *s.* उपमर्दकः, वाक्यखण्डकः, बाधकः, निरासकारी *m.* (न्).

To regain, *v. a.* प्रतिलभ् (c. 1. -लभते -लब्धुं), पुनर् लभ्, पुनर् उपलभ्, पुनः प्राप् (c. 5. -आप्नोति -आप्तुं), पुनर् आप्, पुनर् अवाप्, अनुप्राप्, प्रत्यवाप्, प्रत्यादा (c. 3. -ददाति -दत्ते -दातुं), पुनर् आदा, प्रतिपद् (c. 4. -पद्यते -पत्तुं), पुनर् आपद्, प्रत्याह्, पुनर् ग्रह्. *See To* recover, *v. a.*

Regained, *p. p.* प्रतिलब्धः -ब्धा -ब्धं, पुनर्लब्धः &c., पुनरुपलब्धः &c., प्रत्युपलब्धः &c., पुनः प्राप्तः -प्ता -प्तं, पुनराप्तः &c., पुनरवाप्तः &c., प्रतिपन्नः -न्ना -न्नं, आपन्नः &c. *See* Recovered.

Regal, *a.* राजकीयः -या -यं, राजयोग्यः -ग्या -ग्यं, राजार्हः -र्हा -र्हं, नृपोचितः -ता -तं, राजसम्बन्धी -न्धिनी &c., ऐश्वरः -री -रं, ऐशिकः -की -कं ऐशः -शी -शं. *See* Kingly, Princely, Majestic.—(Man of the regal class) राजन्यः, विराट् *m.* (ज्), क्षत्रियः, मूर्द्धाभिषिक्तः, बाहुजः.

To regale, *v. a.* सन्तुष् (c. 10. -तोषयति -यितुं), तुष्, सन्तृप् (c. 10. -तर्पयति -यितुं), तृप्, संवृध् (c. 10. -वर्धयति -यितुं), सुख् (c. 10. सुखयति -यितुं), आनन्द् in caus.; 'with choice food,' परमान्नैः or भोजनविशेषैः सन्तुष्, उत्तमाहारं भुज् in caus.—(Regale one's self) उत्तमान्नैः सन्तुष् (c. 4. -तुष्यति -तोष्टुं) or आत्मानं सन्तुष् in caus., or सन्तृप् (c. 4. -तृप्यति) or आत्मानं सन्तृप् in caus., उत्तमाहारं कृ, उत्तमभोजनं कृ, उत्सवं कृ, महोत्सवं कृ.

Regaled, *p. p.* सन्तोषितः -ता -तं, सन्तर्पितः &c., संवर्धितः -ता -तं.

Regalia, *s.* राजलक्षणानि *n. pl.*, राजचिह्नानि *n. pl.*, राजलिङ्गानि *n. pl.*, नृपचिह्नानि *n. pl.*, नृपलिङ्गानि *n. pl.*, नृपलक्षणानि *n. pl.*, राजैश्वर्यचिह्नानि *n. pl.*

Regality, *s.* राजत्वं -ता, नृपत्वं, राज्यं. *See* Kingship, Royalty.

To regard, *v. a.* (Look at, observe) अवेक्ष् (c. 1. -ईक्षते -क्षितुं), अपेक्ष्, प्रतीक्ष्, प्रत्यवेक्ष्, अभिप्रेक्ष्, प्रेक्ष्, निरीक्ष्, वीक्ष्, समीक्ष्, ईक्ष्, दृश् (c. 1. पश्यति, द्रष्टुं), प्रतिदृश्, अनुदृश्, अभिदृश्, आलोक् (c. 10. -लोकयति -यितुं), समालोक्, आलोच्, आलक्ष्, समालक्ष्, लक्ष्.—(Point or be directed towards) उद्दिश् (c. 6. -दिशति -देष्टुं), समुद्दिश्.—(Mind, heed) मन् (c. 4. मन्यते, मन्तुं), अनुमन्, मननं कृ, अपेक्ष्, अवेक्ष्, अवेक्षणं कृ, अपेक्षां कृ, अवधा (c. 3. -धत्ते -धातुं), अवधानं कृ, सावधानः -ना -नं भू, अवहितः -ता -तं भू or अस्.—(Esteem,

respect) मन् (c. 10. मानयति -यितुं), सम्मन्, प्रतिमन्, अभिमन्, पूज्, सेव्, निषेव्, भज्, अवेक्ष्, आदृ, अभिनन्द्, सम्मानं कृ.—(Keep, observe) पाल्, प्रतिपाल्, सेव्, निषेव्, उपसेव्.—(Have relation to) प्रतीक्ष्, अपेक्ष्, उद्दिश्.

REGARD, *s.* (Look) दृष्टिः *f.*, लक्ष्यं, *see* LOOK.—(Attention of the mind towards any thing, respect unto) प्रतीक्षा, अवेक्षा, अपेक्षा, अपेक्षणं, अन्ववेक्षा, निरीक्षा -क्षणं, उद्देशः, आस्था, अनुसन्धानं; 're-gard to results,' फलोद्देशः.—(Relation, reference) अपेक्षा, प्रतीक्षा, उद्देशः, समुद्देशः, सम्बन्धः, अन्वयः, समन्वयः, विषयत्वं -ता, विषयः, सम्पर्कः; 'having regard to,' सापेक्षः -क्षा -क्षं; 'in regard to,' अपेक्षया, अपेक्ष्य, प्रतीक्ष्य, उद्दिश्य, उद्देशेन, सापेक्षं, विषये.—(Esteem, respect) मानं, सम्मानं, मान्यता -त्वं, आदरः, पूजा.—(Love, affection) स्नेहः, प्रणयः, प्रश्रयः, प्रेम *n.* (न्), अनुरागः, अनुरक्तिः *f.*, प्रीतिः *f.*

REGARDED, *p. p.* प्रतीक्षितः -ता -तं, अवेक्षितः &c., अपेक्षितः &c., मतः &c.

REGARDFUL, *a.* प्रतीक्षकः -का -कं, अवेक्षकः &c., अवेक्षाकारी -रिणी -रि(न्), अपेक्षकः &c.—(Heedful) सावधानः -ना -नं, अवहितः -ता -तं.

REGARDFULLY, *adv.* सावेक्षं, सापेक्षं, अपेक्षया, अवेक्षया, सावधानं.

REGARDING, *part.* प्रतीक्षकः -का -कं, अपेक्षकः &c., सापेक्षः -क्षा -क्षं.—(Relating to) सम्बन्धी -न्धिनी &c., विषयकः -का -कं.

REGARDLESS, *a.* निरपेक्षः -क्षा -क्षं, अनपेक्षः &c., अनपेक्षकः -का -कं, अपेक्षाहीनः -ना -नं, उपेक्षकः &c., विरक्तः -क्ता -क्तं, उदासीनः -ना -नं, अनुत्सुकः &c.

REGARDLESSLY, *adv.* निरपेक्षं, अनपेक्षं, अनपेक्षया, अनवेक्षया, उपेक्षया.

REGARDLESSNESS, *s.* अनपेक्षा, अनवेक्षा, निरपेक्षता -त्वं, उपेक्षा.

REGATTA, *s.* नौकाक्रीडा, नौकाकौतुकं, बहुनौकानां क्रीडायुद्धं.

REGENCY, *s.* राजप्रतिनिधेर् अधिकारः or पदं, राजप्रतिनिधित्वं.—(Body of persons governing vicariously) राजप्रतिनिधिमण्डलं, राजप्रतिनिधिसमाजः.

REGENERACY, *s.* पुनर्जन्म *n.* (न्), पुनर्जाततत्वं, पुनर्जातावस्था.

To REGENERATE, *v. a.* पुनर् जन् (c. 10. जनयति -यितुं), पुनर्जन्म दा, पुनर्जातं -तां कृ, जन्मान्तरं दा, पुनः सृज् (c. 6. सृजति, स्रष्टुं).

REGENERATE, REGENERATED, *a.* पुनर्जातः -ता -तं, पुनर्भवः -वा -वं, द्विजन्मा -न्मा -न्म (न्), पुनर्जन्मा &c., पुनर्भूः -भूः -भु, द्विजः -जा -जं, पुनः सृष्टः -ष्टा -ष्टं, पुनरुत्पन्नः -न्ना -न्नं.

REGENERATION, *s.* पुनर्जन्म *n.* (न्), पुनर्जातिः *f.*, पुनर्भवं, पुनर्जन्मावस्था, द्विजन्मावस्था, पुनर्जातावस्था, जन्मान्तरं, पुनरुत्पत्तिः *f.*, नवसृष्टिः *f.*, नव्यसृष्टिः *f.*

REGENT, *s.* (Ruler) अधिपतिः *m.*, शासिता *m.* (तृ), शास्ता *m.*, शासकः.—(Vicarious ruler) राजप्रतिनिधिः *m.*—(Regent of the quarter) दिक्पालः; 'the eight regents of the quarters,' अष्टदिक्पालाः *m. pl.* These are, 'of the East,' इन्द्रः; 'of the S. E.' अग्निः or वह्निः; 'of the S.,' यमः or पितृपतिः *m.*; 'of the S. W.,' नैर्ऋतिः; 'of the W.,' वरुणः; 'of the N. W.,' मरुत्; 'of the N.,' कुबेरः; 'of the N. E.,' ईशः or शिवः. Their elephants are ऐरावतः, पुण्डरीकः &c., *see* under ELEPHANT.

REGENT, *a.* शासनकारी -रिणी &c., शासिता -त्री -तृ (तृ), राज्याधिकारी &c.

REGICIDE, *s.* (Killer of a king) राजघातकः, राजघाती *m.* (न्), राजघातकः, राजहा *m.* (न्), राजहन्ता *m.* (न्तृ), राजघः, राजघ्नः, राजहिंसकः, नृपहा *m.* &c.—(Killing of a king) राजहत्या, राजवधः, राजघातः, नृपघातः, राजहिंसा.

REGIME, *s.* *See* GOVERNMENT, ADMINISTRATION.

REGIMEN, *s.* (Regulation of diet) पथ्यं, पथ्यापथ्यं, पथ्यापथ्यविचारः, पथ्यापथ्यनियमः; 'violation of it,' अपथ्यं; 'one under it,' पथ्याशी -शिनी -शि (न्).

REGIMENT, *s.* सैन्यदलं, सैन्यव्यूहः, सैन्यगुल्मः, सैन्यसमूहः, सैन्यगणः.

REGIMENTAL, *a.* सैन्यदलसम्बन्धी -न्धिनी -न्धि(न्), सैन्यगुल्मविषयकः -का -कं.

REGIMENTALS, *s.* सैन्यवेषः, सैन्यवेशः, सैन्यदलविशेषको वेशः.

REGION, *s.* (Country) देशः, प्रदेशः, विषयः, राष्ट्रं, भूमिः *f.*, चक्रं, मण्डलं, प्रान्तः, धिष्ण्यं, निर्गः; 'the lower regions,' अधोलोकः, अधोभुवनं, अवाची; 'the upper regions,' ऊर्द्ध्वलोकः, ऊर्द्ध्वभुवनं, उदीची; 'centre of a region,' मध्यदेशः.—(Quarter of the sky) दिक् *f.* (श्), दिशा, दिशः *f.* (स्), दिशी, आशा, काष्ठा, खनिः *m. f.*, *see* QUARTER.—(Part of the body) देशः, चक्रं, मण्डलं; 'the region of the heart,' हृदयदेशः; 'of the liver,' यकृद्देशः; 'umbilical region,' नाभिदेशः, स्वाधिष्ठानचक्रं; 'of the head,' मस्तकमण्डलं.

REGISTER, *s.* लेख्यं, लेखः, लेख्यपत्रं, पञ्जिः -ञ्जी *f.*, पञ्जिका, पदभञ्जिका.

To REGISTER, *v. a.* लेख्ये or लेख्यपत्रे आरुह् in caus. (-रोपयति -यितुं) or समारुह् or अभिलिख् (c. 6. -लिखति -लेखितुं), or लिख्, लेख्यारूढं -ढां कृ. *See To* RECORD.

REGISTERED, *p. p.* लेख्यारूढः -ढा -ढं, लेख्यारोपितः &c., अभिलिखितः &c., लेख्यसमर्पितः &c. *See* RECORDED.

REGISTRAR, *s.* लेखकः, अभिलेखकः, कायस्थः, पञ्जिकाकारकः, लिपिकृत्.

REGISTRY, REGISTRATION, *s.* (The act of registering) अभिलिखनं, अभिलेखनं, लेख्यारोपणं, लेख्यसमर्पणं, नामाभिलेखनं, नामाभिलिखनं.—(The place) अभिलिखनस्थानं, लेख्यस्थानं, लेखस्थानं, लेख्यगृहं.

REGNANT, *a.* शासनकारी -रिणी -रि (न्), राज्याधिकारी -रिणी &c., राजाधिकारयुक्तः -क्ता -क्तं, राज्यधारी &c., प्रबलः -ला -लं.

REGRESS, REGRESSION, *s.* व्यतिक्रमः, विपरीतगतिः *f.*, परावर्त्तः -र्त्तनं.

REGRET, *s.* पश्चात्तापः, अनुतापः, अनुशोकः, अनुशोचनं, मनस्तापः, तापः, सन्तापः, उद्वेगः, अनुशयः, शोकः, खेदः, उत्कण्ठा, औत्कण्ठ्यं, उत्सुकता, औत्सुक्यं, दुःखं, मनोदुःखं, मनोव्यथा, उद्भ्रमः, उत्कः.

To REGRET, *v. a.* अनुतप् in pass. (-तप्यते), पश्चात् तप्, सन्तप्, तप्, अनुशुच् (c. 1. -शोचति -चितुं), शुच्, खिद् (c. 4. खिद्यते, खेत्तुं), उद्विज् (c. 6. -विजते -जितुं), उत्कण्ठ् (c. 1. -कण्ठते -ण्ठितुं), उत्सुक (nom. उत्सुकायते), अनुशी (c. 2. -शेते -शयितुं), उन्मनस् (nom. उन्मनायते), दु (c. 5. दुनोति c. 4. दूयते, दोतुं), विदु, अवदु.

REGRETFUL, *a.* अनुशोचकः -का -कं, अनुतापी -पिनी -पि (न्), पश्चात्तापी &c., उत्कण्ठितः -ता -तं, उत्सुकः -का -कं, उद्विग्नः -ग्ना -ग्नं, उत्कः -त्का -त्कं.

REGRETTED, *p. p.* अनुशोचितः -ता -तं, शोचितः &c., अवदूनः -ना -नं.

REGULAR, *a.* (According to rule) यथाविधिः -धिः -धि, वैधिकः -की -कं, वैधः -धी -धं, सविधिः -धिः -धि, विधियुक्तः -क्ता -क्तं, विध्यनुसारी -रिणी -रि (न्), नैयमिकः -की -कं, नियमानुसारी &c., यथामार्गः -र्गा -र्गं, यथाशास्त्रः -स्त्रा -स्त्रं, यथापद्धतिः -तिः -ति, सूत्रानुसारी &c., ससूत्रः -त्रा -त्रं, सौत्रः -त्री -त्रं.—(According to established usage) आचारिकः -की -कं, व्यवहारिकः &c., व्यावहारिकः &c., यथाव्यवहारः -रा -रं, यथारीतिः -तिः -ति, यथामार्गः -र्गा -र्गं, मार्गानुसारी &c., नित्यः -त्या -त्यं, नैत्यिकः -की -कं, स्थावरः -रा -रं.—(Governed by rule, steady in a course, said of persons) नियमनिष्ठः -ष्ठा -ष्ठं, नियमशीलः -ला -लं, नियमपरः -रा -रं, नियमी &c., नियमानुसारी &c., नियमानुयायी &c., विधिनिष्ठः &c., विध्यनुयायी &c., विधिवर्त्ती

&c., नियमवर्त्ती &c., विध्यनुवर्त्ती &c., यथामार्गचारी &c., यथाविधिचारी &c., यथानियमाचारी &c., अव्यभिचारी &c., व्यवस्थितः -ता -तं. —(In due order or course) यथाक्रमः -मा -मं, यथानुक्रमः &c., क्रमिकः -का -कं, क्रमकः &c., सक्रमः -मा -मं, क्रमानुगतः -ता -तं, क्रमानुसारी &c., अनुक्रान्तः -न्ता -न्तं, यथापर्य्यायः -या -यं, पारम्परिकः -की -कं, अनुलोमः -मा -मं, अनुपूर्व्वः -र्व्वा -र्व्वं, आनुलोमिकः -की -कं, अविकलः -ला -लं.—(Periodical) नियतकालिकः -की -कं, नियतः -ता -तं, नित्यः -त्या -त्यं.

Regularity, *s.* (Agreeableness to rule) विध्यनुसारः -रिता, नियमानुसारः -रिता, यथाविधिता, सविधिता, नैयमिकत्वं, सूत्रानुसारः-रिता, नियमः, समूत्रता.—(Steadiness in a course, observance of rule) नियमनिष्ठा, विधिनिष्ठा, नियमशीलता, नियमपरता, विध्यनुवर्त्तनं, नियमानुयायिता, नियमानुवर्त्तित्वं, अव्यभिचारः, व्यवस्थितिः *f.*—(Method, regular course) क्रमः, अनुक्रमः, यथाक्रमता, सक्रमता, क्रमिकता -त्वं, यथानुक्रमता, पर्य्यायः, व्यवस्था, व्यवस्थितिः *f.*, परिपाटिः -टी *f.*, पारिपाट्यं, परम्परा, पारम्पर्य्यं, आनुपूर्व्यं, आनुपूर्वी, आनुलोम्यं.—(Regular arrangement) विन्यासः, विन्यसनं, व्यूहनं, व्यूढिः *f.*, रचनं -ना, विरचना.

Regularly, *adv.* (According to rule) यथाविधि, विधिवत्, विधितस्, विध्यनुसारेण, विध्यनुरूपेण, यथानियमं, नियमानुसारेण, यथामार्गं, मार्गानुसारेण, यथापद्धति, यथासूत्रं, विधिपूर्व्वं -र्व्वकं.—(Methodically, in due order or course) यथाक्रमं, यथानुक्रमं, सक्रमं, क्रमतस्, क्रमशस्, क्रमेण, क्रमात्, यथापर्य्यायं, पर्य्यायेण, अनुपूर्व्वशस्, आनुपूर्व्येण, शनकैः, शनैः शनैः.

To regulate, *v. a.* (Adjust by rule) विधिवत् or यथाविधि व्यवस्था in caus. (-स्थापयति -यितुं) or परिकॢप् (c. 10. -कल्पयति -यितुं) or संविधा (c. 3. -दधाति -धातुं) or विधा, यथासूत्रं विधा, सूत्र (nom. सूत्रयति -यितुं), परिमाणं निरूप् (c. 10. -रूपयति -यितुं), परिमा, परिमितं -तां कृ.—(Direct, subject to rules and good management) अनुशास् (c. 2. -शास्ति -शासितुं), समनुशास्, शास्, विनियम् (c. 1. -यच्छति -यन्तुं), नियम्, विधा, संविधा, विधृ (c. 10. -धारयति -यितुं), अनुशासनं कृ.—(Dispose, put in good order) विधा, संविधा, परिकॢप्, व्यवस्था in caus., प्रणी, सम्प्रणी, विन्यस्, विरच्, व्यूह्, व्यवस्थां कृ, नियमं कृ.

Regulated, *p. p.* व्यवस्थितः -ता -तं, व्यवस्थापितः &c., विनियतः -ता -तं, नियतः &c., नियमितः &c., विहितः &c., अनुशासितः &c., शासितः &c., यन्त्रितः -ता -तं, परिमितः &c., प्रमितः &c., सूत्रितः &c.; 'well regulated,' सुव्यवस्थितः -ता -तं, सुविहितः &c., सुयन्त्रितः &c.; 'ill-regulated,' अव्यवस्थितः -ता -तं, अयन्त्रितः &c.; 'having regulated,' विनियम्य.

Regulation, *s.* (The act of regulating) व्यवस्थापनं, व्यवस्थितिः *f.*, विनियमः, व्यवस्था, अनुशासनं, शासनं, विधानं, संविधानं, परिकल्पनं, विधारणं -णा, यन्त्रणं, प्रणयनं, अनुनयः -यनं.—(Rule) नियमः, विनियमः, विधिः *m.*, विधानं, व्यवस्था, व्यवस्थितिः *f.*, स्थितिः *f.*, सूत्रं, क्रमः, मर्य्यादा.

Regulator, *s.* नियन्ता *m.* (न्तृ), विनियन्ता *m.*, अनुशासकः, शासकः, शास्ता *m.* (स्तृ), अनुशास्ता *m.*, विधाता *m.* (तृ), व्यवस्थापकः, परिकल्पकः.

Rehearsal, *s.* (Repetition of the words of another) पठनं, पाठः, अनुवादः, वाचनं, अनुवाचनं, उल्लेखः -खनं.—(Narration) कथनं, आख्यानं.—(Recital in preparation for the public representation) भाव्यनुकरणं, पूर्व्वाभिनयः -यनं.

To rehearse, *v. a.* (Repeat the words of another) पठ (c. 1. पठति -ठितुं), सम्पठ्, अनुवद्, पठनं कृ, अनुवादं कृ.—(Narrate) कथ्, आख्या, श्रु in caus.—(Recite, preparatory to a public representation) भाव्यनुकरणं कृ, पूर्व्वाभिनयं कृ.

Rehearsed, *p. p.* पठितः -ता -तं, अनुवादितः &c., पूर्व्वाभिनीतः -ता -तं.

To reign, *v. n.* राज्यं कृ, राजत्वं कृ, राज्यपालनं कृ, राज्यशासनं कृ, राज्याधिकारं कृ, राजव्यवहारं कृ, राजकार्य्यं कृ, आधिपत्यं कृ, सिंहासनारूढः -ढा -ढं भू.

Reign, *s.* राज्यं, राजत्वं -ता, आधिपत्यं.—(Period of rule) राज्यशासनकालः, राज्यकालः, आधिपत्यकालः.—(Prevalence), *see* the word.

Reigning, *part.* or *a.* राज्यकारी -रिणी -रि (न्), राज्यशासनकारी &c., राज्यारूढः -ढा -ढं, सिंहासनारूढः &c., राजपदारूढः &c., राज्याधिकारी &c.

To re-imburse, *v. a.* प्रतिदा, पुनर् दा, क्षतिपूरणं कृ, हानिपूरणं कृ, निष्कृतिं दा, अपाकृ, प्रतिकृ, प्रत्युपकृ, परिशोधनं कृ.

Re-imbursement, *s.* पुनर्दानं, प्रतिदानं, क्षतिपूरणं, हानिपूरणं, परिशोधनं.

Rein, *s.* (Of a horse) रश्मिः *m.*, अभीशुः *m.*, अभीषुः *m.*, प्रग्रहः, प्रग्राहः, वसुः *m.*, वागा, वल्गा, दन्तालिका.—(Reins), *see* the word.

To rein, *v. a.* अश्वं रश्मिभिर् यम् (c. 1. यच्छति, यन्तुं) or संयम् or नियम् or निग्रह् (c. 9. -गृह्णाति -ग्रहीतुं) or प्रग्रह्.

Re-infect, *a.* अकृतार्थः -र्था -र्थं, असिद्धार्थः &c., अकृतार्थीभूतः &c.

To re-inforce, re-inforcement. *See To* recruit.

Reins, *s. pl.* (Lower part of the back) कटिः -टी, कटिदेशः, श्रोणिः -णी *f.*, श्रोणिदेशः, कटिपश्चाद्भागः.—(Kidneys), *see* Kidney.

To re-instate, *v. a.* पुनः स्था in caus. (स्थापयति -यितुं), प्रतिष्ठा, प्रत्यवस्था, पुनर् अवस्था, पुनर् नियुज् (c. 10. -योजयति -यितुं), पुनः स्थापनं कृ.

Re-instated, *p. p.* पुनः स्थापितः -ता -तं, पुनर् अवस्थापितः &c. or नियोजितः &c.

Re-instatement, *s.* पुनःस्थापनं -ना, पुनरवस्थापनं, प्रतिष्ठापनं -ना, प्रत्यवस्थापनं, पुनर्नियोगः, पुनर्नियोजनं.

To re-iterate, *v. a.* (Say again) पुनर् वद्, पुनःपुनर् वद्, मुहुर् वद्, अनुवद्, पुनरुक्तिं कृ, आम्रेड्.—(Do again) पुनः कृ, पुनःपुनः कृ, मुहुः कृ, वारं वारं कृ, मुहुर् मुहुः कृ.

Re-iterated, *p. p.* पुनःपुनः कृतः -ता -तं, वारं वारं कृतः &c., मुहुर् मुहुः कृतः &c., पौनःपुनिकः -की -कं, पुनरुक्तः -क्ता -क्तं, पुनःपुनरुक्तः &c.

Re-iteration, *s.* पुनःपुनःकरणं, मुहुःकरणं, पौनःपुन्यं, पुनरुक्तिः *f.*, पौनरुक्तं, पुनर्वचनं, अनुवादः, आम्रेडनं, समभिहारः.

To reject, *v. a.* निरस् (c. 4. -अस्यति -सितुं), अपास्, व्युदस्, प्रत्याख्या (c. 2. -ख्याति -तुं), निराकृ, पराकृ, प्रतिक्षिप् (c. 6. -क्षिपति -क्षेप्तुं), विक्षिप्, त्यज् (c. 1. त्यजति, त्यक्तुं), निर्णुद् (c. 6. -णुदति -णोत्तुं), प्रत्यादिश् (c. 6. -दिशति -देष्टुं), अपाहा (c. 3. -जहाति -हातुं), प्रत्याचक्ष् (c. 2. -चष्टे), निर्धू (c. 5. -धूनोति -धोतुं), अपव्यध् (c. 4. -विध्यति -व्यद्धुं), व्यपव्यध्, वृज् (c. 10. वर्जयति -यितुं), अवधीर् (c. 10. अवधीरयति -यितुं), न स्वीकृ, न ग्रह्, अस्वीकारं कृ, अग्रहणं कृ. *See To* refuse.

Rejected, *p. p.* निरस्तः -स्ता -स्तं, अपास्तः &c., व्युदस्तः &c., प्रत्याख्यातः -ता -तं, निराकृतः -ता -तं, पराकृतः &c., प्रतिक्षिप्तः -प्ता -प्तं, निक्षिप्तः &c., विक्षिप्तः &c., प्रत्यादिष्टः -ष्टा -ष्टं, अपविद्धः -द्धा -द्धं, निर्धूतः -ता -तं, अवधीरितः &c., त्यक्तः -क्ता -क्तं, परित्यक्तः &c., वर्जितः &c., अस्वीकृतः &c.

Rejection, *s.* निरसनं, निरासः, निराकृतिः *f.*, निराकरणं, निकृतिः *f.*, प्रत्याख्यानं, प्रत्यादेशः, प्रतिक्षेपः, त्यागः, परित्यागः, वर्जनं, अपवर्जनं,

विसर्जनं, अस्वीकारः, अनङ्गीकारः, अग्रहणं, अवधीरणं -णा.

To REJOICE, *v. n.* आनन्द् (c. 1. -नन्दति -न्दितुं), अभिनन्द्, विनन्द्, नन्द्, हृष् (c. 4. हृष्यति, हर्षितुं), प्रहृष्, संहृष्, सम्प्रहृष्, ह्लाद् (c. 1. ह्लादते -दितुं), आह्लाद्, प्रह्लाद्, उल्लस् (c. 1. -लसति -सितुं), समुल्लस्, प्रोल्लस्, रम् (c. 1. रमते, रन्तुं), अभिरम्, आरम्, संरम्, तुष् (c. 4. तुष्यति, तोष्टुं), परितुष्, सन्तुष्, मुद् (c. 1. मोदते -दितुं), प्रमुद्, प्रतिमुद्, प्री (c. 4. प्रीयते, प्रेतुं), सम्प्री, मद् (c. 4. माद्यति, मदितुं), आनन्दितः -ता -तं भू, हृष्टः -ष्टा -ष्टं भू, हर्षं or आनन्दं गम् or इ.

To REJOICE, *v. a.* आनन्द् (c. 10. -नन्दयति -यितुं), अभिनन्द्, नन्द्, हृष्, (c. 10. हर्षयति -यितुं), प्रहृष्, परिहृष्, ह्लाद् (c. 10. ह्लादयति -यितुं), प्रह्लाद्, आह्लाद्, रम् (c. 10. रमयति -यितुं), उल्लस् (c. 10. -लासयति -यितुं), तुष् (c. 10. तोषयति -यितुं), सन्तुष्, तृप् (c. 10. तर्पयति -यितुं), प्रमुद् (c. 10. मोदयति -यितुं), मुद्, प्री (c. 9. प्रीणाति, c. 10. प्रीणयति -यितुं), आनन्दं or हर्षं जन् (c. 10. जनयति -यितुं), आनन्दितं -तां कृ, आनन्दं दा.

REJOICED, *p. p.* आनन्दितः -ता -तं, नन्दितः &c., आह्लादितः &c., हर्षितः &c., हृष्टः -ष्टा -ष्टं, प्रहर्षितः -ता -तं, उल्लसितः &c., उल्लासितः &c., तुष्टः -ष्टा -ष्टं, परितुष्टः &c., हर्षयुक्तः -क्ता -क्तं, हर्षाविष्टः -ष्टा -ष्टं; 'in mind,' हृष्टमनाः -नाः -नः (स्), हृष्टमानसः -सा -सं, हृष्टहृदयः -या -यं.

REJOICING, *part. act.* नन्दकः -का -कं, आनन्दकः &c., नन्दनः -ना -नं, आनन्दनः &c., आनन्ददः -दा -दं, आनन्दकरः -रा -रं, हर्षदः -दा -दं, हर्षकः -का -कं, हर्षप्रदः &c., आह्लादकः &c., मोदकः &c., हर्षणः -णा -णं, उत्सवकरः -रा -रं. —*Neut. part.* हर्षमाणः -णा -णं, रममाणः -णा -णं, मोदमानः -ना -नं, प्रीयमाणः &c., सम्प्रीयमाणः &c.

REJOICING, *s.* आनन्दः -न्दनं, हर्षः -र्षणं, आह्लादः -दनं, नन्दनं, प्रमोदः -दनं, सन्तोषणं, *see* JOY.—(Public rejoicing) [illegible]

To REJOIN, *v. n.* प्रतिवच् (c. 2. -वक्ति -क्तुं), पुनर्वच्, प्रतिवद्, प्रत्युत्तरं कृ.

REJOINDER, *s.* प्रतिवाक्यं, प्रतिवचनं, उत्तरं, प्रत्युत्तरं, उत्तरपक्षः, प्रत्युक्तिः *f.*, प्रत्युक्तं, प्रत्यर्पं, कक्षा, उत्तरोत्तरं. *See* REPLY.

To RELAPSE, *v. n.* पुनः पत् (c. 1. पतति -तितुं), पुनर् आगम् (c. 1. -गच्छति -गन्तुं), पुनर् आवृत् (c. 1. -वर्त्तते -र्त्तितुं), प्रत्यावृत्, पर्य्यावृत्, आवृत्, पुनर्ग्रस्तः -स्ता -स्तं भू, पुनः पीडितः &c. भू, पुनराविष्टः -ष्टा -ष्टं भू; 'relapse into a former state,' पूर्व्वावस्थां or पूर्व्वदशां गम् or आपद् or इ or प्राप्, पूर्व्ववद् भू; 'relapse into vice,' पुनर् व्यसनी भू, पुनर् व्यभिचारी भू, पुनर् व्यभिचारं कृ, पुनर् व्यभिचर्, पुनर् धर्म्माद् भ्रंश्, पुनर् धर्म्मं त्यज्, पुनः सत्पथाद् भ्रंश् or च्यु or विचल् or उत्क्रम्; 'relapse into a fever,' पुनर् ज्वरग्रस्तः -स्ता -स्तं भू, पुनर्ज्वरी -रिणी &c. भू, पुनर्ज्वरातुरः -रा -रं भू.

RELAPSE, *s.* पुनःपतनं, आवृत्तिः *f.*, आवर्त्तनं, प्रत्यावृत्तिः *f.*, प्रत्यावर्त्तनं, पर्य्यावर्त्तः, प्रत्यागमः; 'into a former state,' पूर्व्वावस्थाप्राप्तिः *f.*; 'into vice,' पुनर्व्यभिचारः, पुनर्धर्म्मत्यागः, पुनर्धर्म्माद्भ्रंशः, पुनःसत्पथाद्भ्रंशः; 'into a fever,' पुनर्ज्वरग्रस्तता.

To RELATE, *v. a.* कथ् (c. 10. कथयति -यितुं), संकथ्, आख्या (c. 2. -ख्याति -तुं), समाख्या, ख्या in caus. (ख्यापयति -यितुं), अभिख्या, शंस् (c. 1. शंसति -सितुं), श्रु in caus., आश्रु, संश्रु, वद्, निविद्, आविद्, आचक्ष्, समाचक्ष्, प्रचक्ष्, वर्ण्, उपवर्ण्, अनुवर्ण्, संवर्ण्, निगद्, उदाहृ, व्याहृ, अभिधा, विवृ, विवरणं कृ, कृत्, अनुकृत्, वृत् in caus., कथनं कृ, *see To* NARRATE, TELL; 'to relate over again,' पुनर् आख्या, सम्प्रत्याचक्ष्.

To RELATE, *v. n.* (Have reference) उद्दिश् (c. 6. -दिशति -देष्टुं), अपेक्ष् (c. 1. -ईक्षते -क्षितुं), विषयकः -का -कं भू, सम्बन्ध् in pass. (-बध्यते), सम्बद्धः -द्धा -द्धं भू, सम्बन्धी &c. भू. *See To* REFER.

RELATED, *p. p.* (Narrated) कथितः -ता -तं, आख्यातः -ता -तं, समाख्यातः &c., *see* TOLD.—(Connected) सम्बद्धः -द्धा -द्धं, सम्बन्धी -न्धिनी -न्धि (न्), ससम्बन्धः -न्धा -न्धं, कृतसम्बन्धः -न्धा -न्धं, अनुबद्धः &c., अनुसम्बद्धः &c., सम्पृक्तः -क्ता -क्तं, सम्पर्की -र्किणी &c., अनुषङ्गी &c., आनुषङ्गिकः -की -कं, संसक्तः -क्ता -क्तं, सान्वयः -या -यं, अन्वितः -ता -तं, समन्वितः &c.; 'mutually related,' व्यतिषक्तः &c.—(Related by consanguinity, or by blood on the father's side) गोत्रसम्बन्धी -न्धिनी &c., गोत्रसम्बद्धः -द्धा -द्धं, एकगोत्रः -त्रा -त्रं, सगोत्रः &c., गोत्रजः -जा -जं, एकगोत्रजः &c., गोत्री &c., एकशरीरः -रा -रं, एकशरीरसम्बन्धी &c., एकरक्तः -क्ता -क्तं, एकरक्तसम्बन्धी &c., एकशरीरावयवः -वा -वं, एकशरीरान्वयी &c., सकुल्यः -ल्या -ल्यं, सजातीयः -या -यं, स्वजातीयः &c., सवंशीयः &c., स्ववंशीयः &c., आत्मीयसम्बन्धी &c., *see* KINDRED, *a.*—(Related by blood on the mother's side or by marriage) यौनिसम्बन्धी &c., यौनिसम्बद्धः -द्धा -द्धं, शरीरसम्बन्धी &c., आप्तसम्बन्धी &c., यौनः -नी -नं.

RELATER, *s.* कथकः, आख्यायकः, ख्यापकः, उपकथकः, काथिकः.

RELATING, *part.* (Having reference) विषयकः -का -कं, सम्बन्धी -न्धिनी -न्धि (न्), उद्देशकः -का -कं or expressed by the affix ईय, *see* REFERENCE, REGARD, REGARDING.

RELATION, *s.* (Act of telling) कथनं, आख्यानं, उपकथनं, उपाख्यानं, ख्यापनं, वर्णनं -ना, शंसनं, विवरणं, व्याहरणं, अनुकीर्त्तनं, निरूपणं, श्रावणं, निवेदनं, उद्गारः; 'exact relation of particulars,' वस्तुकथनं, वृत्तान्तकथनं, वस्तुस्थितिकथनं.—(Reference) विषयत्वं, सम्बन्धः, उद्देशः, अन्वयः, अपेक्षा, गोचरत्वं; 'in reference to,' अपेक्षया, उद्दिश्य, *see* REFERENCE, REGARD.—(Connexion) सम्बन्धः -न्धित्वं, अभिसम्बन्धः, सम्पर्कः, अन्वयः, समन्वयः, सन्दर्भः, अनुषङ्गः, संसक्तिः *f.*, समासक्तिः *f.*, संसर्गः; 'mutual relation,' अन्योन्यसम्बन्धः, मिथःसम्बन्धः, व्यतिषङ्गः; 'intimate and inseparable relation, as of properties with substances,' समवायः, समवायसम्बन्धः, नित्यसम्बन्धः; 'as of material with produce,' समवायिकारणं.—(Connexion by blood, alliance of kin) एकशरीरता, एकशरीरसम्बन्धः, एकशरीरान्वयः, एकशरीरावयवत्वं, ज्ञातित्वं, ज्ञातिभावः, सम्बन्धित्वं, बन्धुता, बान्धवत्वं, सजातित्वं, सगर्भत्वं, समानोदर्य्यता, सोदर्य्यता, सगोत्रत्वं, एकगोत्रता, समगोत्रता, गोत्रसम्बन्धः, एकरक्तसम्बन्धः, समरक्तसम्बन्धः, सपिण्डता, एकपिण्डता, सापिण्ड्यं.—(Connexion on the mother's side, or by marriage) यौनिसम्बन्धः, शरीरसम्बन्धः, आप्तभावः, आप्तता.—(Kinsman) बान्धवः, बन्धुः *m.*, बन्धुजनः, गोत्रबन्धुः *m.*, ज्ञातिः *m.*, स्वज्ञातिः *m.*, गोत्रजनः, गोत्रपुरुषः, गोत्रजः, सम्बन्धी *m.* (न्), सपिण्डः, समानोदकः, कुटुम्बी *m.*, स्वकुटुम्बी, *see* KINSMAN; 'relations,' बन्धुवर्गः, बान्धवाः *m. pl.*, ज्ञातिवर्गः, बान्धवगणः, *see* KINDRED; 'having relations,' सबान्धवः -वा -वं, कौटुम्बिकः -की -कं. The सपिण्डः is a relation connected by the offering of the funeral cake to the manes of common ancestors; the समानोदकः is connected by the offering of water only.

RELATIONSHIP, *s.* सम्बन्धः, सम्बन्धित्वं, बन्धुता -त्वं, बान्धवत्वं -ता, ज्ञातित्वं, ज्ञातिभावः, ज्ञातेयं, सजातित्वं. *See* under RELATION.

RELATIVE, *a.* (Having relation) सम्बन्धी -न्धिनी -न्धि (न्), सम्बन्धकः -का -कं, सम्बन्धीयः -या -यं, विषयकः -का -कं, अनुषङ्गी &c., आनुषङ्गिकः -की -कं, सम्पर्की &c., ससम्बन्धः -न्धा -न्धं, ससम्पर्कः -र्का -र्कं, सान्वयः -या -यं, उद्देशकः -का -कं, परायणः -णा -णं.—(Not abso-

lute) अन्यापेक्षकः -का -कं, अन्यसापेक्षः -क्षा -क्षं, सापेक्षः &c., अन्योद्देशकः &c., अकेवलः -ला -लं.—(Correlative, mutually related) अन्योन्यसम्बन्धी &c., अन्योन्याश्रितः -ता -तं, अन्योन्यान्वितः &c.—(In grammar) तत्पदापेक्षकः -का -कं, तत्पदापेक्षी &c.

RELATIVE, *s.* बन्धुः *m.*, बान्धवः, सम्बन्धी *m.* (न्), ज्ञातिः *m.* *See* KINSMAN.

RELATIVELY, *adv.* अपेक्षया, अन्यापेक्षया, सापेक्षं, उद्देशेन, उद्दिश्य, अन्योद्देशेन, अन्यमुद्दिश्य, अन्यमपेक्ष्य, अन्यसापेक्षं. *See* REGARD.

To RELAX, *v. a.* शिथिलीकृ, शिथिल (nom. शिथिलयति -ते -यितुं), श्लथ् (c. 10. श्लथयति -यितुं), प्रश्लथ्, श्रथ् (c. 1. श्रथति, c. 10. श्रथयति -यितुं), श्रन्थ् (c. 9. श्रथ्नाति, श्रन्थितुं), श्लथीकृ, स्रंस् (c. 10. स्रंसयति -यितुं), विस्रंस्, स्रस्तीकृ, विस्रस्तीकृ, विगल् in caus.—(Remit) मुच् (c. 6. मुञ्चति, मोक्तुं, c. 10. मोचयति -यितुं), विमुच्, अवमुच्, अवसृज् (c. 6. -सृजति -स्रष्टुं), विसृज्.—(Abate, diminish) शम् (c. 10. शमयति -यितुं), उपशम्, लघूकृ, न्यूनीकृ; 'relax one's efforts,' उद्योगशैथिल्यं कृ.—(Relax the mind) विनुद् (c. 10. -नोदयति -यितुं), विनोदनं कृ, मनोविनोदं कृ.—(The bowels) कोष्ठमृदुतां जन्, नाडिमृदुतां जन्, कोष्ठलघुतां जन्, लघुकोष्ठतां कृ, अतिसारं or सारणं जन्, *see To* PURGE.—(Untie) उद्ग्रन्थ्, उन्मुच्, वियुज्, विसन्धा, विपाश्, उत्सूत्रीकृ.

To RELAX, *v. n.* शिथिलीभू, शिथिल (nom. शिथिलायते), श्लथ (nom. श्लथायते), श्रथ (nom. श्रथायते), श्रन्थ् (c. 1. श्रन्थते -न्थितुं), श्लथीभू, स्रंस् (c. 1. स्रंसते -सितुं), स्रस्तीभू.—(Abate) शम् (c. 4. शाम्यति, शमितुं), उपशम्, प्रशम्, न्यूनीभू.—(Remit in close attention) उद्योगशैथिल्यं कृ, शिथिलोद्योगः -गा -गं भू.

RELAXATION, *s.* (Act) शिथिलीकरणं, श्रन्थनं, श्रथनं, विस्रंसनं, मोचनं.—(State) शैथिल्यं, शिथिलता, विस्रंसा, विस्रंसः, प्रश्रयः, मुक्तिः *f.*, मुक्तता.—(Abatement, remission) शमः, उपशमः, शान्तिः *f.*, उपशान्तिः *f.*, न्यूनता.—(Amusement, remission of labor) विनोदः -दनं, मनोविनोदः, विश्रामः, विश्रान्तिः *f.*, उद्योगविश्रामः, उद्योगविश्रान्तिः *f.*, उद्योगविच्छेदः, उद्योगशैथिल्यं, अनध्यायः.—(Of bowels) कोष्ठमृदुता, मृदुकोष्ठता, कोष्ठलघुता, लघुकोष्ठता, अतिसारः, सारणं.

RELAXED, *p. p.* शिथिलितः -ता -तं, शिथिलीकृतः &c., शिथिलः -ला -लं, श्लथः -था -थं, प्रश्लथः &c., विश्लथः &c., स्रस्तः -स्ता -स्तं, विस्रस्तः &c., विगलितः -ता -तं, मुक्तः -क्ता -क्तं, मोचितः -ता -तं; 'in the body,' विस्रस्ताङ्गः -ङ्गा -ङ्गं, स्रस्ताङ्गः &c.; 'in strength,' शिथिलबलः -ला -लं, शिथिलशक्तिः -क्तिः -क्ति; 'in the bowels,' मृदुकोष्ठः -ष्ठा -ष्ठं, लघुकोष्ठः &c.; 'one who has relaxed his hold,' स्रस्तहस्तः -स्ता -स्तं, शिथिलितहस्तः &c.

RELAXING, *part.* or *a.* शैथिल्यकारी -रिणी -रि (न्), शैथिल्यजनकः -का -कं, ग्लानिकारकः &c., ग्लानिकरः &c., बलशैथिल्यकारकः &c., बलशैथिल्यजनकः &c.

RELAY, *s.* मार्गे निरूपितस्थानेषु सज्जीकृतो जवाश्वगणः, जवाश्वस्थानं.

To RELEASE, *v. a.* मुच् (c. 6. मुञ्चति, मोक्तुं, c. 10. मोचयति -यितुं), विमुच्, प्रविमुच्, निर्मुच्, मोक्ष् (c. 10. मोक्षयति -यितुं), विमोक्ष्, उद्धृ (c. 1. -हरति -हर्तुं), त्रै (c. 1. त्रायते, त्रातुं), परित्रै, निस्तॄ (c. 10. -तारयति -यितुं), उत्तॄ, विसृज्, त्यज्. *See To* FREE, LIBERATE.

RELEASE, *s.* मुक्तिः *f.*, विमुक्तिः *f.*, मोक्षः -क्षणं, विमोक्षः -क्षणं, मोचनं, विमोचनं, उद्धारः, उद्धरणं, समुद्धरणं, त्राणं, परित्राणं, निस्तारः, निस्तरणं, उत्तरणं, विसर्जनं, त्यागः; 'from confinement,' बन्धनमुक्तिः *f.*

RELEASED, *p. p.* मुक्तः -क्ता -क्तं, विमुक्तः &c., मोचितः -ता -तं, विमोचितः &c., मोक्षितः &c., उद्धृतः &c., *see* LIBERATED; 'from obligation,' ऋणमुक्तः -क्ता -क्तं, उत्तीर्णः -र्णा -र्णं, अवतीर्णर्णः &c.; 'from confinement,' बन्धनमुक्तः &c.

RELEASER, *s.* मोचकः, विमोचकः, उद्धर्त्ता *m.* (र्तृ). *See* LIBERATOR.

To RELENT, *v. n.* दयार्द्रः -र्द्रा -र्द्रं भू, दयार्द्रचित्तः -त्ता -त्तं भू, दयार्द्रीभू, मृदूभू, मृदुचित्तः -त्ता -त्तं भू, दयां कृ, करुणां कृ, कृपां कृ, सकरुणः -णा -णं भू, करुण (nom. करुणायते), कृपा (nom. कृपायते), पुनर् दयां कृ, पुनर् अनुग्रहं कृ, कोमलचित्तः -त्ता -त्तं भू, स्निग्धीभू, द्रवीभू, शम् (c. 4. शाम्यति, शमितुं), शान्तिं or सान्त्वं गम्.

RELENTLESS, *a.* निर्दयः -या -यं, निष्करुणः -णा -णं, अकरुणः &c., निष्कृपः -पा -पं, अशाम्यः -म्या -म्यं, अशमनीयः -या -यं, उग्रदण्डः -ण्डा -ण्डं, उग्रः -ग्रा -ग्रं, निष्ठुरः -रा -रं, कठोरः &c., पाषाणहृदयः -या -यं; निर्द्रवहृदयः &c.; 'a relentless foe,' दृढवैरी *m.* (न्).

RELENTLESSLY, *adv.* निर्दयं, निष्करुणं, निष्कृपं, निष्ठुरं, कठोरं, उग्रदण्डेन.

RELEVANCE, RELEVANCY, *s.* प्रासङ्गिकत्वं, प्रसङ्गयोग्यता, प्रसङ्गानुसारः, प्रसङ्गसङ्गतिः *f.*, प्रसङ्गौचित्यं, प्रसङ्गान्वयः, प्रकरणयोग्यता, प्रकरणानुसारः, प्रकरणसङ्गतिः *f.*, प्राकरणिकत्वं, प्रस्तावानुसारः, प्रस्तावान्वयः, प्रस्तावौचित्यं, प्रस्तावानुषङ्गः, प्रस्तुतानुषङ्गः, प्रस्तुतसङ्गतिः *f.*, युक्तिः *f.*, योग्यता, यौक्तिकत्वं, विषयकत्वं.

RELEVANT, *a.* प्रासङ्गिकः -की -कं, प्रसङ्गानुसारी -रिणी -रि (न्), प्रसङ्गसङ्गतः -ता -तं, प्रसङ्गोचितः -ता -तं, प्रसङ्गयोग्यः -ग्या -ग्यं, प्रसङ्गसदृशः -शी -शं, प्रसङ्गान्वयी &c., प्रकरणयोग्यः &c., प्रकरणानुसारी &c., प्रकरणसङ्गतः &c., प्राकरणिकः -की -कं, प्रस्तावोचितः -ता -तं, प्रस्तावानुसारी &c., प्रस्तावानुषङ्गी &c., प्रस्तुतानुषङ्गी &c., प्रस्तावसदृशः -शी -शं, प्रास्ताविकः -की -कं, यौक्तिकः -की -कं, प्रयुक्तः -क्ता -क्तं, युक्तिमान् -मती -मत् (त्), प्रतीक्षकः -का -कं, अपेक्षकः &c., उद्देशकः &c., विषयकः &c.

RELIANCE, *s.* विश्वासः, प्रत्ययः, विश्रम्भः, निष्ठा, आश्रयः, उपाश्रयः, संश्रयः, समाश्रयः, आशयः, श्रयणं, श्रायः, अवलम्बनं, तन्त्रता.

RELIC, *s.* शेषः -षं, अवशेषः -षं, शिष्टं, अवशिष्टं, अवशिष्टांशः, नष्टशिष्टांशः, परिशेषः, परिशिष्टं, शेषभागः, अवशिष्टभागः, शेषखण्डः.—(Corpse) शवः -वं.

RELICT, *s.* (Widow) विधवा, गतभर्तृका, मृतपतिका.

RELIEF, *s.* (Removal of pain or distress, alleviation) दुःखशमनं, दुःखशान्तिः *f.*, दुःखोद्धरणं, दुःखापहरणं, दुःखापहारः, दुःखमोचनं, दुःखमुक्तिः *f.*, दुःखपरिहारः, दुःखापनयनं, श्रमापनयनं, श्रमापहारः, श्रमपरिहारः, अनिष्टापनयनं, दुःखपरिमार्जनं, उद्धरणं, उद्धारः, शमनं, प्रशमनं.—(Ease or alleviation obtained) सुखं, शान्तिः *f.*, प्रशान्तिः *f.*, शमः, उपशमः, शान्तता, विश्रान्तिः *f.*, विश्रामः, स्वास्थ्यं, स्वस्थता, सुस्थता, सुस्थितिः *f.*, निर्वृतिः *f.*, समाधानं.—(In sculpture), *see* BASS-RELIEF.

RELIEVABLE, *a.* उद्धरणीयः -या -यं, शमनीयः &c., शाम्यः -म्या -म्यं.

To RELIEVE, *v. a.* (Free from pain, remove distress) उद्धृ (c. 1. -हरति -हर्तुं), दुःखम् अपहृ or हृ or अपनी (c. 1. -नयति -नेतुं), दुःखाद् मुच् (c. 6. मुञ्चति, मोक्तुं, c. 10. मोचयति -यितुं), दुःखं शम् (c. 10. शमयति -यितुं), दुःखशमनं कृ, दुःखोद्धरणं कृ, दुःखापहरणं कृ, श्रमम् अपहृ or हृ, श्रमापनयनं कृ, श्रमापहरणं कृ, दुःखमोचनं कृ.—(Alleviate) शम् (c. 10. शमयति -यितुं), प्रशम्, उपशम्, शान्तिं दा or कृ, शमनं कृ, प्रशमनं कृ, विश्रामं दा, विश्रान्तिं दा, लघ (nom. लघयति -यितुं), लघूकृ.—(Help) उपकृ, साहाय्यं कृ, सहायत्वं कृ, उपचर्.—(Relieve guard) सैनिकपरिवर्त्तनं कृ, रक्षकपरिवृत्तिं कृ, जागरणाद् मुच्.—(Set off by contrast) विपरीतगुणप्रकाशेन अधिकशोभां दा.

RELIEVED, *p.p.* (Freed from pain, &c.) मुक्तदुःखः -खा -खं, शान्तदुःखः

&c., शमितदुःखः &c., दुःखमुक्तः -क्ता -क्तं, श्रममुक्तः &c., मुक्तः &c., दुःखोद्धृतः -ता -तं, उद्धृतः &c., उद्धृतदुःखः -खा -खं, उद्धृतश्रमः -मा -मं, परिहृतदुःखः &c., विगतदुःखः &c., गतदुःखः &c., विगतश्रमः &c.; 'relieved of anxiety,' विगतोद्वेगः -गा -गं, गताधिः -धिः -धि; 'of fever,' विगतज्वरः -रा -रं, गतज्वरः &c., ज्वरमुक्तः &c., शान्तज्वरः &c.—(Alleviated) शान्तः -न्ता -न्तं, शमितः -ता -तं, प्रशमितः &c., उपशान्तः &c., प्राप्तविश्रामः -मा -मं, प्राप्तविरामः -मा -मं.—(Helped) उपकृतः -ता -तं.—(Relieved from watching) जागरणमुक्तः -क्ता -क्तं.—(Set off by contrast) विपरीतगुणप्रकाशेन प्राप्तशोभः -भा -भं.

RELIGION, *s.* धर्म्मः, ईश्वरभक्तिः *f.*, देवभक्तिः *f.*, भक्तिः *f.*, ईश्वरसेवा. *See* PIETY.—(System of faith) धर्म्मः, धर्म्ममार्गः, मतं, मार्गः; 'establishment of a religion,' धर्म्मसंस्थापनं; 'extinction of one,' धर्म्मोच्छेदः; 'good religion,' सद्धर्म्मः; 'of the same religion,' सधर्म्मा -र्म्मा -र्म्म (न्), एकधर्म्मा &c., अपृथग्धर्म्मशीलः -ला -लं.

RELIGIOUS, *a.* (Devoted to the practice of religion) धार्म्मिकः -की -कं, धर्म्मपरः -रा -रं, धर्म्मपरायणः -णा -णं, धर्म्मशीलः -ला -लं, भक्तिमान् -मती -मत् (त्), भजनशीलः &c., पुण्यात्मा -त्मा -त्म (न्), पुण्यशीलः &c., धर्म्माचारी &c., भक्तिनिष्ठः &c., व्रती &c., कर्म्मनिष्ठः &c., क्रियानिष्ठः &c., क्रियावान् &c., कर्म्मिष्ठः &c., नियमनिष्ठः &c., नियमशीलः &c., नियमपरः -रा -रं, *see* PIOUS.—(Pertaining to religion) धर्म्मसम्बन्धी &c., धर्म्मविषयकः -का -कं, धर्म्मप्रकरणः -णा -णं, धर्म्म in comp., देव in comp.; 'religious rite,' कर्म्म *n.* (न्), क्रिया, देवकार्य्यं *n.*

RELIGIOUSLY, *adv.* धार्म्मिकवत्, ईश्वरभक्त्या. *See* PIOUSLY.

RELIGIOUSNESS, *s.* धार्म्मिकत्वं, धर्म्मशीलता, कर्म्मनिष्ठा, नियमनिष्ठा, नियमपरता.

To RELINQUISH, *v. a.* त्यज् (c. 1. त्यजति, त्यक्तुं), परित्यज्, संत्यज्, हा (c. 3. जहाति, हातुं), विहा, अपहा, उपाहा, प्रहा, प्रोज्झ् (c. 6. -उज्झति -ज्झितुं), उज्झ्, विमुच् (c. 6. -मुञ्चति -मोक्तुं), उत्सृज् (c. 6. -सृजति -स्रष्टुं), विसृज्, अपसृज्, व्यपसृज्, अतिसृज्, परिहृ (c. 1. -हरति -हर्त्तुं), प्रत्यादिश् (c. 6. -दिशति -देष्टुं), रह (c. 10. रहयति -यितुं), विरह्, वृज् (c. 10. वर्जयति -यितुं), पृष्ठतः कृ.

RELINQUISHED, *p. p.* त्यक्तः -क्ता -क्तं, परित्यक्तः &c., उत्सृष्टः -ष्टा -ष्टं, प्रोज्झितः -ता -तं, समुज्झितः &c., उज्झितः &c., प्रत्याख्यातः &c.

RELINQUISHMENT, *s.* त्यागः, त्यजनं, परित्यागः, उत्त्यागः, विसर्जनं, विसर्गः, उत्सर्जनं, उत्सर्गः, प्रोज्झनं, वर्जनं, विमोचनं, मोचनं, परिहारः, परित्यजनं, प्रत्यादेशः; 'of right or title,' स्वत्वनिवृत्तिः *f.*, स्वत्वानिवृत्तिः *f.*, स्वत्वत्यागः.

RELIQUARY, *s.* शिष्टभाण्डं, शिष्टपात्रं, शिष्टसम्पुटकः, अवशिष्टभाण्डं.

RELISH, *s.* रुचिः *f.*, स्वादः -दनं, आस्वादः -दनं, रसः, *see* TASTE.—(Relish for, liking for) अभिरुचिः *f.*, रुचिः *f.*, अभिनन्दनं, अभिलाषः, अनुमोदनं.—(Something eaten with food to increase the pleasure of eating or to provoke thirst) अवदंशः, उपदंशः, स्वर्जिका, मद्यपासनं.

To RELISH, *v. a.* (Give a nice taste) रसं दा, सुरसं दा, सुस्वादं दा, स्वादुकृ, सरसं -सां कृ, सरसीकृ, सुरसीकृ, स्वादुरसीकृ.—(Taste) आस्वाद् (c. 1. -स्वादति -दितुं), रसम् आस्वाद्, रस् (c. 10. रसयति -यितुं), प्राश् (c. 9. -अश्नाति -अशितुं), प्राशनं कृ, आस्वादनं कृ, रसास्वादनं कृ.—(Like the taste of) रुच् (c. 10. रोचयति -यितुं), अभिरुच्, अभिनन्द्. *See To* LIKE.

To RELISH, *v. n.* (Have a nice taste) स्वद् (c. 1. स्वदते, स्वादते -दितुं), सुरसः -सा -सं भू, सरसः -सा -सं भू, सरसीभू, स्वादुरसीभू, रुचिरः -रा -रं भू.

RELISHED, *p. p.* आस्वादितः -ता -तं, रुचितः &c., अनुमोदितः -ता -तं.

RELUCTANCE, RELUCTANCY, *s.* अकामः, अकामता, निष्कामता, अनिच्छा, अनिच्छुता, विमुखता, अरुचिः *f.*, अनभिरुचिः *f.*, अस्पृहा, असन्तोषः.

RELUCTANT, *a.* अनिच्छुः -च्छुः -च्छु, अकामः -मा -मं, निष्कामः -मा -मं, अनिच्छुकः -का -कं, विमुखः -खा -खं, विमतः -ता -तं, असन्तोषी -षिणी -षि (न्).

RELUCTANTLY, *adv.* अकामतस्, अकामेन, अनिच्छया, अनिच्छातस्, कृच्छ्रेण, निष्कामं, परिक्लिष्टं.

To RELY, *v. n.* अवलम्ब् (c. 1. -लम्बते -म्बितुं), समालम्ब्, आलम्ब्, आश्रि (c. 1. -श्रयति -ते -यितुं), समाश्रि, उपाश्रि, संश्रि, विश्वस् (c. 2. -श्वसिति -तुं), विश्रम्भ् (c. 1. -श्रम्भते -म्भितुं), अवलम्बनं कृ.

RELYING, *part.* अवलम्बी -म्बिनी -म्बि (न्), अवलम्बितः -ता -तं, आश्रितः -ता -तं, उपाश्रितः &c., संश्रितः &c., विश्वासी &c., विश्रम्भी &c., संश्रय in comp.

To REMAIN, *v. n.* (Continue) स्था (c. 1. तिष्ठति, स्थातुं), अवस्था, पर्य्यवस्था, वृत् (c. 1. वर्त्तते -र्त्तितुं), आस् (c. 2. आस्ते), *see To* CONTINUE, *v. n.*—(Dwell, reside) स्था, अधिष्ठा, वृत्, वस् (c. 1. वसति -स्तुं), निवस्, आवस्, निली.—(Be left) शिष् in pass. (शिष्यते), अवशिष्, समवशिष्, परिशिष्, उच्छिष्, शिष्टः -ष्टा -ष्टं भू, अवशिष्टः &c. भू, उच्छिष्टः &c. भू, उद्धृत्; 'by subtracting two from six, four remain,' षड्भ्यो द्वयस्य वर्जनेन चत्वारः शिष्यन्ते; 'that which remains of the whole,' सर्व्वशेषः -षा -षं; 'those who remained alive, or those who remained out of the slain,' हतशेषः -षा -षं, हतशिष्टः -ष्टा -ष्टं.

REMAINDER, *s.* शेषः -षं, अवशेषः, अवशिष्टं, शिष्टं, उच्छिष्टं, परिशिष्टं, परिशेषः, शेषांशः, अवशिष्टांशः, शेषभागः, शेषखण्डः -ण्डं, परभागः, उद्वृत्तः -त्तं, उद्धृतं, उच्छेषणं, स्थितं.—(In arithmetic) अन्तरं, अन्तरितं; 'for the remainder of one's life,' यावज्जीवं.

REMAINING, *part.* or *a.* शिष्टः -ष्टा -ष्टं, अवशिष्टः &c., अवशेषितः -ता -तं, उच्छिष्टः &c., परिशिष्टः &c., शेषः -षा -षं, उद्धृत्तः -त्ता -त्तं, उद्वृत्तः -त्ता -त्तं, अन्तरितः -ता -तं, उर्व्वरितः -ता -तं.

REMAINS, *s. pl.* शेषाणि *n. pl.*, शिष्टानि. *See* REMAINDER, RELIC, CORPSE.

To REMAND, *v. a.* पुनः प्रेर् (c. 10. प्रेरयति -यितुं, rt. ईर्) or प्रस्था in caus. (-स्थापयति -यितुं), पुनर् आह्वे (c. 1. -ह्वयति -ह्वातुं), पुनराह्वानं कृ, पुनरर्पणं कृ.

REMARK, *s.* (Act of taking notice) अवेक्षा -क्षणं, निरीक्षा, अपेक्षा, निरूपणं, आलोकनं, *see* OBSERVATION.—(Notice expressed in words) लिखितं, चर्चा, व्याख्या, अभिधानं, ग्रहणं, कथनं. *See* NOTE, NOTICE.

To REMARK, *v. a.* अवेक्ष्, अपेक्ष्, निरूप्, भण्. *See To* OBSERVE, NOTICE.

REMARKABLE, *a.* (Notable, extraordinary) प्रसिद्धः -द्धा -द्धं, विशिष्टः -ष्टा -ष्टं, विशेष in comp., लोकप्रसिद्धः &c., ख्यातः -ता -तं, लोकख्यातः &c., उत्कृष्टः -ष्टा -ष्टं, स्मरणीयः -या -यं, स्मरणार्हः -र्हा -र्हं, अपूर्व्वः -र्व्वा -र्व्वं, आश्चर्य्यः -र्य्या -र्य्यं, अद्भुतः -ता -तं.—(To be observed) विभाव्यः -व्या -व्यं, *see* OBSERVABLE, NOTICEABLE.

REMARKABLY, *adv.* विशिष्टप्रकारेण, उत्कृष्टप्रकारेण, अद्भुतं, स्मरणीयं.

REMARKED, *p. p.* अभिहितः -ता -तं, भणितः &c., कथितः &c., निरूपितः &c.

REMARRIED, *p. p.* पुनरूढः -ढा -ढं, पुनर्विवाहितः -ता -तं, पुनरुद्वाहितः &c.

REMEDIABLE, *a.* प्रतिकार्य्यः -र्य्या -र्य्यं, प्रतीकार्य्यः &c., उपायसाध्यः -ध्या -ध्यं, उपायप्रतिकार्य्यः &c., चिकित्स्यः -त्स्या -त्स्यं, चिकित्सनीयः -या -यं,

चिकित्सितुं शक्यः &c., शमनीयः -या -यं, उपायपरिहार्य्यः &c., परिहार्य्यः &c., समाधेयः -या -यं, प्रतिसमाधेयः &c., परिच्छेद्यः -द्या -द्यं, उपाययोग्यः -ग्या -ग्यं, उपचारयोग्यः &c., शक्यप्रतिकारः -रा -रं, शक्यपरिच्छेदः -दा -दं, शक्योपचारः -रा -रं, शक्योपायः -या -यं, विद्यमानप्रतीकारः &c.

REMEDIAL, *a.* प्रतिकारकः -का -कं, प्रतीकारी -रिणी -रि (न्), उपायसाधकः -का -कं, उपायदः -दा -दं, उपायकारी &c., परिहारकः &c., अभिघाती &c., प्रतिघाती &c.

REMEDIED, *p. p.* प्रतिकृतः -ता -तं, परिच्छिन्नः -न्ना -न्नं, परिहृतः -ता -तं, चिकित्सितः -ता -तं, शमितः &c., उपायसाधितः &c., उपायप्रतिकृतः &c., लब्धौषधः -धा -धं.

REMEDILESS, *a.* निरुपायः -या -यं, अनुपायः &c., उपायहीनः -ना -नं, निरुपचारः -रा -रं, उपचारशून्यः -न्या -न्यं, उपायासाध्यः -ध्या -ध्यं, गतिहीनः -ना -नं, अप्रतिकारः -रा -रं, अपरिच्छेदः -दा -दं. *See* IRREMEDIABLE, INCURABLE.

REMEDY, *s.* (Medicine) भेषजं, भैषज्यं, भेषजं, औषधं, अगदः, वैद्योपचारः.—(That which cures or counteracts an evil of any kind) प्रतिकारः, प्रतीकारः, प्रतिक्रिया, प्रतिविधिः *m.*, उपायः, उपचारः, परिच्छेदः, प्रतिसमाधानं, समाधानं, अभिघातः, प्रतिघातः, उपचर्य्या, उपक्रमः, चिकित्सा; 'mild remedy,' सामोपायः, सामोपचारः, सौम्योपचारः; 'violent remedy,' राक्षसोपायः.

To REMEDY, *v. a.* प्रतिकृ, प्रतिसमाधा (c. 3. -दधाति -धातुं), समाधा, उपायेन प्रतिकृ or शम् (c. 10. शमयति -यितुं), कित् in des. (चिकित्सति -त्सितुं), स्वस्थं -स्थां कृ, परिछिद् (c. 7. -छिनत्ति -छेत्तुं), उपचारं कृ, उपायप्रयोगं कृ, भिषज (nom. भिषज्यति), औषधीकृ; 'by mild measures,' सामोपायैः प्रतिकृ.

To REMEMBER, *v. a.* स्मृ (c. 1. स्मरति, स्मर्त्तुं), अनुस्मृ, संस्मृ, अनुसंस्मृ, अभिसंस्मृ, अनुचिन्त् (c. 10. -चिन्तयति -यितुं), समनुचिन्त्, अनुबुध् (c. 4. -बुध्यते -बोद्धुं), स्मरणं कृ, हृदये कृ, मनसि कृ.—(Recollect) स्मृ, अभिज्ञा. *See To* RECOLLECT.

REMEMBERED, *p. p.* स्मृतः -ता -तं, संस्मृतः &c., हृदयस्थः -स्था -स्थं, हृद्गतः &c.

REMEMBERER, *s.* स्मर्त्ता *m.* (र्त्तृ), स्मरणकृत्, स्मृतिमान् *m.* (त्), अनुचिन्तकः.

REMEMBRANCE, *s.* स्मरणं, स्मृतिः *f.*, संस्मृतिः *f.*, संस्मरणं, अनुस्मृतिः *f.*, स्मर्त्तृत्वं, अविस्मृतिः *f.*, अनुचिन्ता, धारणं -णा, अवधारणं; 'continual remembrance,' सन्ततस्मरणं. *See* RECOLLECTION.—(Memorial, memento) स्मारकवस्तु *n.*, स्मारकविषयः, स्मारणं, स्मरणार्थकवस्तु *n.*, स्मृतिचिह्नं; 'of friendship,' प्रीतिदानं, प्रीतिदायं. *See* MEMORIAL.

REMEMBRANCER, *s.* स्मारकः, स्मारणः -णी, उद्बोधकः, स्मरणकारी *m.* (न्).

To REMIND, *v. a.* स्मृ (c. 10. स्मारयति -यितुं), संस्मृ, अनुस्मृ, बुध् (c. 10. बोधयति -यितुं), उद्बुध्, प्रबुध्, प्रतिबुध्, सूच् (c. 10. सूचयति -यितुं), स्मारणं कृ, स्मृतिं or स्मरणं जन् (c. 10. जनयति -यितुं), सूचनं कृ. The construction of the sentence will require 2 acc.; as, 'the Kandalí with its flowers reminds me of her eyes,' कुसुमैः कन्दली स्मारयति मां लोचने तस्याः; 'the Vimba reminds me of her lower lip,' बिम्बं स्मारयति माम् अधरं तस्याः.

REMINDED, *p. p.* स्मारितः -ता -तं, उद्बोधितः -ता -तं, उद्बुद्धः -द्धा -द्धं.

REMINDING, REMINDER, *part.* or *s.* स्मारकः -का -कं, स्मृतिजनकः -का -कं, स्मारणः -णा -णं, उद्बोधकः -का -कं, उपलम्भकः -का -कं.

REMINISCENCE, *s.* स्मृतिः *f.*, स्मरणं. *See* MEMORY, RECOLLECTION.

REMISS, *a.* अनवधानः -ना -नं, अनवहितः -ता -तं, असावधानः &c., उपेक्षकः -का -कं, निरपेक्षः -क्षा -क्षं, मन्दादरः -रा -रं, अव्यवसायी -यिनी -यि (न्), अव्यवसायवान् -वती -वत् (त्), शिथिलः -ला -लं, शिथिलोद्योगः -गा -गं, शिथिलयत्नः -त्ना -त्नं, अलसः -सा -सं, प्रमत्तः -त्ता -त्तं.

REMISSION, *s.* (Relaxation) शैथिल्यं, शिथिलता, मोचनं, मुक्तिः *f.*—(Abatement) शान्तिः *f.*, उपशान्तिः *f.*, शमः, उपशमः.—(Release) मुक्तिः *f.*, विमुक्तिः *f.*, मोक्षः, उद्धारः, निस्तारः, विसर्जनं.—(Pardon) क्षमा, क्षान्तिः *f.*, मोचनं, मुक्तिः *f.*, निष्कृतिः *f.*; 'of sin,' पापमोचनं, पापमुक्तिः *f.*, पापमार्जना.—(Intermission) विरामः, विरतिः *f.*, अन्तरतिः *f.*, निवृत्तिः *f.*, विच्छेदः, छेदः; 'of study, &c.' अनध्यायः, अनध्यायः, अध्ययनविरामः, अध्ययननिवृत्तिः *f.*

REMISSLY, *adv.* अनवधानेन, अनवहितं, मन्दादरं, अनपेक्षया, सशैथिल्यं.

REMISSNESS, *s.* अनवधानं -नता, अनवहितत्वं, उपेक्षा, अनपेक्षा, अनवेक्षा, अव्यवसायः, प्रमादः, प्रमत्तता, शैथिल्यं, शिथिलता, यत्नशैथिल्यं, अयत्नः.

To REMIT, *v. a.* (Relax, slacken) शिथिलीकृ, शिथिल (nom. शिथिलयति -यितुं), मुच् (c. 6. मुञ्चति, मोक्तुं, c. 10. मोचयति -यितुं), विमुच्, अवसृज्, विसृज्.—(Abate, diminish) शम् (c. 10. शमयति -यितुं), उपशम्, न्यूनीकृ, लघूकृ.—(Release, relinquish) मुच्, विमुच्, मोक्ष्, विसृज् (c. 6. -सृजति -स्रष्टुं), अवसृज्, त्यज्.—(Pardon) क्षम् (c. 1. क्षमते -ति, क्षन्तुं), मृष्, मुच्, विमुच्, पापमोचनं कृ.—(Transmit, as money, &c.) संचर in caus., धनादि संक्रम् in caus., हुण्डिकापत्रद्वारा or लेख्यपत्रादिद्वारा धनं सम् in caus.

To REMIT, *v. n.* (Become less intense) शिथिलीभू, शम् (c. 4. शाम्यति शमितुं), उपशम्, प्रशम्, न्यूनीभू.

REMITTANCE, *s.* (The act) हुण्डिकापत्रद्वारा or लेख्यपत्रादिद्वारा धनसमर्पणं or धनसंक्रान्तिः *f.*—(The sum) लेख्यपत्रद्वारा समर्पितधनं.

REMITTED, *p. p.* मुक्तः -क्ता -क्तं, मोचितः -ता -तं, अवसृष्टः -ष्टा -ष्टं, शान्तः -न्ता -न्तं, उपशान्तः &c., क्षान्तः &c., त्यक्तः -क्ता -क्तं.

REMITTENT, *a.* विषमः -मा -मं, सन्ततः -ता -तं, अविरतः -ता -तं; 'fever,' विषमज्वरः, सन्ततज्वरः.

REMNANT, *s.* शेषः -षं, शिष्टं, अवशिष्टं, उच्छिष्टं. *See* REMAINDER.

REMONSTRANCE, *s.* आपत्तिः *f.*, आपत्तिवादः, आपत्तिभाषणं, आपत्तिलेख्यं, प्रत्यादेशकवादः, प्रबोधवाक्यं, औपदेशिकवादः. *See* EXPOSTULATION.

To REMONSTRATE, *v. n.* आपत्तिं कृ, आपत्तिपूर्व्वं वद् (c. 1. वदति -दितुं) or भाष्, आपत्तिवादं कृ, प्रत्यादिश् (c. 6. -दिशति -देष्टुं). *See To* EXPOSTULATE.

REMORSE, *s.* पश्चात्तापः, पश्चात्सन्तापः, अनुतापः, मनस्तापः, अनुशोकः, अनुशोचनं, अन्वाधिः *m.*, अनुशयः.

REMORSEFUL, *a.* पश्चात्तापी -पिनी -पि (न्), अनुतापी &c., अनुतप्तः -प्ता -प्तं.

REMORSELESS, *a.* निर्दयः -या -यं, उग्रदण्डः -ण्डा -ण्डं. *See* RELENTLESS.

REMOTE, *a.* दूरः -रा -रं, दूरस्थः -स्था -स्थं, दूरस्थितः -ता -तं, दूरस्थायी -यिनी -यि (न्), दूरवर्त्ती -र्त्तिनी &c., विदूरः &c., विप्रकृष्टः -ष्टा -ष्टं, असन्निकृष्टः &c., असन्निहितः -ता -तं, दविष्ठः -ष्ठा -ष्ठं, दवीयान् -यसी -यः (स्), अनुपस्थायी &c., अनुपस्थः -स्था -स्थं, नोपान्त्यः &c., नोपस्थाता -त्री -तृ (तृ), असमीपः -पा -पं, आरातीयः -या -यं, परः -रा -रं.

REMOTELY, *adv.* दूरं, दूरात्, -रेण, विदूरं, विप्रकृष्टं, असमीपं.

REMOTENESS, *s.* दूरता -त्वं, विदूरता -त्वं, दूरस्थता, असन्निधानं, असान्निध्यं, विप्रकर्षः, असमीपता, असामीप्यं, असन्निकर्षः.

REMOVABLE, *a.* अपनेयः -या -यं, अपनेतव्यः -व्या -व्यं, अपनयनीयः -या -यं, अपहरणीयः -या -यं, अपहार्य्यः -र्य्या -र्य्यं, हार्य्यः &c., परिहार्य्यः &c., अपनेयः -या -यं, व्यावर्त्त्यः -र्त्त्या -र्त्त्यं, विनेयः -या -यं, अपसार्य्यः &c., स्थानान्तरकरणीयः &c.

REMOVAL, *s.* (Act of removing or causing to change place) अपनयनं, विनयनं, अपसारणं, उत्सारणं, निःसारणं, सारणं, अपहरणं

हरणं, अपहारः, परिहारः, अपकर्षणं, अपादानं, अपवर्त्तनं, अपनोदः -दनं, अपनुत्तिः *f.*, चालनं, विचालनं, स्थानान्तरीकरणं, स्थलान्तरीकरणं. —(State of being removed, change of place, going away) स्थानभेदः, स्थलभेदः, स्थानान्तरं, स्थलान्तरं, अपगमः, अपायः, विचलनं, अपसरः -रणं, अपयानं, व्यावृत्तिः *f.*, व्यावृतिः *f.*—(Act of displacing or expelling) निरसनं, निरासः, अपासनं, निराकरणं, निराकृतिः *f.*, अपाकृतिः *f.*, अपाकरणं, निष्कासनं, निःकासनं, अपसारणं, अपनोदनं, बहिष्करणं, दूरीकरणं, निकृतिः *f.*; 'from an office,' पदात् or स्थानात् प्रभ्रंशनं or निराकरणं, पदभ्रंशनं.—(Putting an end to) खण्डनं, नाशः -शनं, परिच्छेदः, उच्छेदः, उद्धरणं, अभिघातः, प्रतिघातः, साधनं, सिद्धिः *f.*, प्रतिकारः, प्रतीकारः; 'removal of obstacles,' विघ्ननाशनं, विघ्नसिद्धिः *f.*, विघ्नखण्डनं; 'of ignorance,' अज्ञानखण्डनं; 'of disease,' रोगनाशः, रोगप्रतीकारः; 'of fear,' भयप्रतीकारः.

To REMOVE, *v. a.* (Take away) अपनी (c. 1. -नयति -नेतुं), विनी, व्यपनी, अपसृ (c. 10. -सारयति -यितुं), उत्सृ, निःसृ, सृ, अपहृ (c. 1. -हरति -हर्त्तुं), हृ, अपकृष् (c. 1. -कर्षति -क्रष्टुं), व्यपकृष्, अवकृष्, अपादा (c. 3. -ददाति -दातुं), अपनुद् (c. 6. -नुदति -नोत्तुं), अपानुद्, व्यपनुद्, व्यपानुद्, अपोह (c. 1. अपोहते -ति -हितुं, rt. ऊह्), व्यपोह. —(Move, cause to change place) विचल् (c. 10. -चालयति -यितुं), चल्, स्थानान्तरं गम् in caus., स्थानान्तरीकृ, स्थलान्तरीकृ, अन्यत्र कृ. —(Displace, expel) निरस् (c. 4. -अस्यति -सितुं), अपास्, निराकृ, अपाकृ, निष्कस् (c. 10. -कासयति -यितुं), अपसृ in caus., अपनुद्, अपसिध् (c. 1. -सेधति -सेद्धुं), बहिष्कृ, बहिः कृ, दूरीकृ; 'from an office, &c.,' पदात् or स्थानात् प्रभ्रंश् (c. 10. -भ्रंशयति -यितुं) or भ्रंश् or च्यु in caus. (च्यावयति -यितुं) or निराकृ.—(Put an end to) खण्ड् (c. 10. खण्डयति -यितुं), नश् (c. 10. नाशयति -यितुं), उद्धृ (c. 1. उद्धरति, उद्धर्त्तुं, rt. हृ), उच्छिद् (c. 7. -छिनत्ति -छेत्तुं), परिच्छिद्, प्रतिकृ; 'doubt is removed,' अपनीयते or निर्णीयते संशयः.

To REMOVE, *v. n.* (Move or change place) चल् (c. 1. चलति -लितुं), विचल्, स्थानान्तरं गम् (c. 1. गच्छति, गन्तुं), स्थलान्तरं गम् or या.—(Change residence) वासान्तरं गम् or या, गृहान्तरं गम्.—(Go away) अपगम्, अपसृ (c. 1. -सरति -सर्त्तुं), अपया (c. 2. -याति -तुं).

REMOVE, *s.* (Removing or changing place), *see* REMOVAL.—(Going away) अपगमः, अपसरः -रणं, अपयानं.—(Step in a scale) पदं, पदविः -वी *f.*, क्रमः.

REMOVED, *p.p.* (Taken away) अपनीतः -ता -तं, अपसारितः &c., उत्सारितः &c., निःसारितः &c., अपहृतः -ता -तं, हृतः &c., अपकर्षितः &c., अपनोदितः &c., अपोढः -ढा -ढं.—(Moved, changed in place) चालितः -ता -तं, विचालितः &c., स्थानान्तरीकृतः -ता -तं, स्थानान्तरगतः &c., स्थानान्तरकृतः &c., स्थानान्तरक्रमितः &c., स्थानान्तरप्राप्तः -प्ता -प्तं, स्थलान्तरीकृतः &c., व्यावृत्तः -त्ता -त्तं, व्यावृतः &c.—(Displaced, expelled) निरस्तः -स्ता -स्तं, अपास्तः &c., उदस्तः &c., परास्तः &c., निराकृतः -ता -तं, अपाकृतः &c., निष्कासितः &c., बहिष्कृतः &c., दूरीकृतः &c., निर्धूतः -ता -तं, अवधूतः &c., निकृतः &c., विप्रकृतः &c., अपकृष्टः -ष्टा -ष्टं, अवमृष्टः &c., प्रत्यादिष्टः -ष्टा -ष्टं, प्रत्याख्यातः -ता -तं; 'from office,' स्थानभ्रष्टः -ष्टा -ष्टं, स्थानात्प्रभ्रंशितः &c., पदच्यावितः -ता -तं.

REMOVER, *s.* अपनेता *m.* (तृ), अपनायकः, विनायकः, अपहारकः, अपहारी *m.* (न्), हारी *m.*, हारकः, हरः in comp., अभिहरः, अपकर्षी *m.* (न्), अपनोदकः, अपहः in comp., हः in comp., घ्नः in comp., नाशकः, नाशी *m.*, अन्तकः in comp.; 'remover of obstacles,' विघ्नविनायकः, विघ्नहारी *m.*, विघ्नहरः, विघ्ननाशकः, विघ्ननाशनः; 'of fear,' भयापहः; 'of disease,' रोगघ्नः, रोगहः, रोगान्तकः; 'of wind,' मारुतापहः.

To REMUNERATE, *v. a.* *See To* RECOMPENSE, REWARD, COMPENSATE.

REMUNERATED, *p. p.* गृहीतपारितोषिकः -का -कं, गृहीतवेतनः -ना -नं.

REMUNERATION, *s.* पारितोषिकं, वेतनं, फलं, निस्तारः, *see* COMPENSATION.

RENCOUNTER, *s.* *See* ENCOUNTER, CLASH, COLLISION.

To REND, *v. a.* दृ (c. 9. दृणाति, दरितुं -रीतुं, c. 10. दारयति -यितुं), विदृ, अवदृ, भिद् (c. 7. भिनत्ति, भेत्तुं), विभिद्, निर्भिद्, विदल् (c. 10. -दलयति -यितुं), विदलीकृ, दल्, छिद्, व्यवच्छिद्, विच्छिद्, खण्ड् (c. 10. खण्डयति -यितुं); 'in two,' द्विधा भिद् or छिद्, द्विखण्डीकृ.

RENDER, *s.* (One who tears) विदारकः, दारकः, विभेदकः.

To RENDER, *v. a.* (Pay back, restore) प्रतिदा, पुनर् दा, प्रत्यृ in caus. (प्रत्यर्पयति -यितुं, rt. ऋ), प्रतिपद् in caus.—(Give, afford) दा, प्रदा, प्रयम् (c. 1. -यच्छति -यन्तुं), प्रतियम्, प्रतिपद् (c. 10. -पादयति -यितुं), ऋ in caus. (अर्पयति -यितुं), उपस्था in caus., उपकॢप्.—(Cause to be, make, effect) कृ, जन् (c. 10. जनयति -यितुं), साध् (c. 10. साधयति -यितुं), उत्पद् (c. 10. -पादयति -यितुं), युक्तं -क्तां कृ, विशिष्टं -ष्टां कृ, कल् (c. 10. कलयति -यितुं). Or more commonly expressed by the use of the caus. form of any verb; as, 'to render proud,' दृप् in caus. (दर्पयति -यितुं); 'to render fat,' प्यै in caus. (प्याययति -यितुं); 'to render illustrious,' यशस्विनं कृ, कीर्त्तिं दा.—(Translate) भाषान्तरीकृ, अवतॄ.

RENDERED, *p. p.* (Restored) प्रतिदत्तः -त्ता -त्तं, प्रत्यर्पितः -ता -तं, प्रतिपादितः &c.—(Given) दत्तः -त्ता -त्तं, अर्पितः &c.—(Made, caused to be) कृत in comp., जात in comp., जनितः -ता -तं, or expressed by the pass. part. of the caus. form; 'rendered poor,' दरिद्रीकृतः -ता -तं; 'rendered proud,' जातदर्पः -र्पा -र्पं, दर्पितः -ता -तं; 'rendered beautiful,' शोभितः -ता -तं; 'rendered populous,' वासितः -ता -तं; 'rendered unfriendly,' विकारितः -ता -तं.

RENDERING, *s.* (Version) भाषान्तरं, पाठः, पाठान्तरं.

RENDEZ-VOUS, *s.* समागमस्थानं, सङ्गमस्थानं, सङ्केतस्थानं, सङ्केतस्थलं.

To RENDEZ-VOUS, *v. n.* सङ्केतस्थाने समागम् (c. 1. -गच्छति -गन्तुं) or संगम्.

RENDING, *s.* विदारः -रणं, दारणं, विदरः, विभेदनं, भिदा, स्फुटनं.

RENEGADE, RENEGADO, *s.* स्वपक्षत्यागी *m.* (न्), स्वधर्म्मत्यागी *m.*, स्वधर्म्मभ्रष्टः.

To RENEW, *v. a.* (Make new) नवीकृ, नवीनीकृ, नवं -वां कृ, नवीनं -नां कृ, नूतनं -नां -नं कृ, नूतनीकृ.—(Restore to a former state repair) पूर्व्ववत् कृ, पूर्व्वावस्थां or पूर्व्वदशां गम् (c. 10. गमयति -यितुं) or नी (c. 1. नयति, नेतुं), प्रतिसमाधा, प्रतिकृ, प्रतिसंकृ, उद्धृ (c. 1. उद्धरति, उद्धर्त्तुं, rt. हृ), उद्धरणं कृ, जीर्णोद्धारं कृ.—(Make or do again) पुनः कृ, वारं वारं कृ, मुहुः कृ.—(Begin again) पुनर् आरभ्, पुनरारम्भं कृ.

RENEWABLE, *a.* नवीकरणीयः -या -यं, पुनःकरणीयः &c., उद्धरणीयः &c.

RENEWAL, *s.* (Making new) नवीकरणं, नवीनीकरणं, नूतनीकरणं. (Restoration to a former state, repairing) पूर्व्ववत्करणं, प्रतिसमाधानं, सन्धानं, समाधानं, उद्धरणं, उद्धारः, जीर्णोद्धारः.—(Doing again, beginning again) पुनःकरणं, पुनरारम्भः.

RENEWED, *p. p.* नवीकृतः -ता -तं, नवीनीकृतः &c., पुनःकृतः &c., पूर्व्ववत्कृतः &c.

To RENOUNCE, *v. a.* (Disown, disclaim) प्रत्याख्या (c. 2. -ख्याति -तुं), प्रत्यादिश् (c. 6. -दिशति -देष्टुं), निह्नु (c. 2. -ह्नुते -ह्नोतुं), अपह्नु, निरस्

(c. 4. -अस्यति -सितुं), अपास्, उदस्, व्युदस्, निराकृ, प्रत्याचक्ष्, न स्वीकृ, न ग्रह्, न अङ्गीकृ.—(Relinquish) त्यज् (c. 1. त्यजति, त्यक्तुं), परित्यज्, संत्यज्, हा (c. 3. जहाति, हातुं), विहा, अपहा, अपाहा, उत्सृज् (c. 6. -सृजति -स्रष्टुं), विसृज्, अवसृज्, व्यपसृज्, अपसृज्, प्रोज्झ् (c. 6. -उज्झति -ज्झितुं), उज्झ्, पृष्ठतः कृ; 'to renounce the world,' सन्न्यस्, सन्न्यासं कृ, सर्व्वसङ्गान् परित्यज्.

RENOUNCED, *p. p.* प्रत्याख्यातः -ता -तं, प्रत्यादिष्टः -ष्टा -ष्टं, त्यक्तः -क्ता -क्तं, परित्यक्तः &c., निरस्तः -स्ता -स्तं, अपास्तः &c., सन्न्यस्तः &c.

To RENOVATE, *v. a.* नवीकृ, नवीनीकृ, नूतनीकृ, पूर्व्ववत्कृ. *See To* RENEW.

RENOVATED, *p.p.* नवीकृतः -ता -तं, पूर्व्ववत्कृतः &c. *See* RENEWED.

RENOVATION, *s.* नवीकरणं, नवीनीकरणं, नवता, नवीनता, नूतनावस्था, नवताप्राप्तिः *f.*, उद्धारः. *See* RENEWAL.

RENOWN, *s.* कीर्त्तिः *f.*, ख्यातिः *f.*, यशस् *n.*, विश्रुतिः *f.*, प्रतिपत्तिः *f.*, प्रख्यातिः *f.*, प्रतिख्यातिः *f.*, आख्या, प्रख्या. *See* FAME.

RENOWNED, *a.* कीर्त्तिमान् -मती -मत् (त्), यशस्वी -स्विनी -स्वि (न्), ख्यातः -ता -तं, आख्यातः &c., प्रख्यातः &c., प्रसिद्धः -द्धा -द्धं, सुप्रसिद्धः &c., जगत्प्रसिद्धः &c., ख्यात्यापन्नः -न्ना -न्नं, प्रतिष्ठितः -ता -तं, आख्यासम्पन्नः -न्ना -न्नं, प्रथितः -ता -तं, विश्रुतः &c., महायशाः -शाः -शः (स्), प्राप्तयशाः &c., कीर्त्तियुतः -ता -तं, कीर्त्तियुक्तः -क्ता -क्तं, नामधारी &c., रूढः -ढा -ढं.

RENT, *p.p.* (Torn) विदारितः -ता -तं, विदीर्णः -र्णा -र्णं, दारितः &c., दीर्णः &c., प्रविदारितः &c., दलितः -ता -तं, विदलितः &c., भिन्नः -न्ना -न्नं, विभिन्नः &c., पाटितः -ता -तं, स्फुटः -टा -टं, स्फुटितः -ता -तं.

RENT, *s.* (Tear) छिद्रं, भेदः, भित्तिः *f.*, भङ्गः, विदरः, दरी, दारणं, छेदः.—(Revenue) करः, महाकरः, उत्पन्नं, *see* PRODUCE.—(Sum paid for any thing held of another) करः, मूल्यं; 'raising the rent of land,' परिबाध्यः.

To RENT, *v. a.* (Grant the possession of lands &c., by lease, for a certain sum) पट्टोलिकापूर्व्वं निरूपितमूल्यमपेक्ष्य क्षेत्रगृहादि परप्रयोजनीयं दा, आविहितकालाद् वार्षिकमूल्यमपेक्ष्य क्षेत्रगृहादि परहस्ते समृ in caus.—(Take or hold by lease) पट्टोलिकापूर्व्वं वार्षिकमूल्यं प्रतिज्ञाय क्षेत्रगृहादि परहस्ताद् ग्रह् (c. 9. गृह्णाति, ग्रहीतुं) or परहस्ताद् गृहीत्वा प्रयुज् or परहस्ताद् गृहीत्वा अध्यास् or अधिवस्.

RENTAL, RENT-ROLL, *s.* करपरिसंख्या, करपरिसंख्यापत्रं.

RENTER, *s.* (One who leases) पट्टदायी *m.* (न्), पट्टदः.—(One who takes on lease) पट्टादायी *m.* (न्), पट्टग्राही *m.*, पट्टधारी *m.*, पट्टोलिकाधारी *m.*

RENUNCIATION, *s.* प्रत्याख्यानं, प्रत्यादेशः, त्यागः, परित्यागः, उत्सर्गः, उत्सर्जनं, विसर्गः, विसर्जनं, निरसनं, निरासः, प्रोज्झनं, वर्जनं, परिहारः, अस्वीकारः, अग्रहणं; 'of the world,' सन्न्यासः, सन्न्यासित्वं, सर्व्वसङ्गपरित्यागः.

REPAID, *p. p.* प्रतिदत्तः -त्ता -त्तं, प्रत्यर्पितः -ता -तं, प्रतिकृतः -ता -तं.

To REPAIR, *v. a.* (Restore to a sound state, after decay, &c.) प्रतिसमाधा (c. 3. -दधाति -धत्ते -धातुं), पुनः समाधा, पुनः सन्धा, उद्धृ (c. 1. उद्धरति, उद्धर्त्तुं, rt. हृ), उद्धारं कृ, जीर्णोद्धारं कृ, जीर्णोद्धरणं कृ, प्रतिकृ, प्रतिसंकृ, पुनः स्वस्थं -स्थां कृ or स्वस्थीकृ, पुनः सुस्थं -स्थां कृ or सुस्थ (nom. सुस्थयति -यितुं), साध् (c. 10. साधयति -यितुं), पूर्व्ववत् कृ, सन्धानं कृ, प्रतिसमाधानं कृ.—(Make good a loss) क्षतिं पृ (c. 10. पूरयति -यितुं) or सम्पृ, क्षतिपूरणं कृ, क्षतिनिष्कृतिं कृ, क्षतिं निष्कृ or शुध् (c. 10. शोधयति -यितुं), हानिपूरणं कृ, हानिप्रतिकारं कृ.

To REPAIR, *v. n.* (Have recourse, go to) आश्रि (c. 1. -श्रयति -यितुं), श्रि, आश्रयणं कृ, शरणार्थं गम् (c. 1. गच्छति, गन्तुं) or आगम् or उपगम् or अभिगम् or प्रतिगम् or या (c. 2. याति -तुं) or अभिया or प्रत्याया or इ (c. 2. एति -तुं), अभ्युपे.

REPAIR, *s.* प्रतिसमाधानं, सन्धानं, पुनः सन्धानं, समाधानं, साधनं, उद्धारः, जीर्णोद्धारः, जीर्णोद्धरणं, प्रतिकारः, प्रतीकारः, प्रतिकरणं, स्वस्थकरणं, सुस्थकरणं, पूर्व्ववत्करणं.

REPAIRED, *p.p.* जीर्णोद्धृतः -ता -तं, पुनः सन्धितः -ता -तं, पुनः साधितः &c., प्रतिसमाहितः &c., पुनः समाहितः &c., पूर्व्ववत्कृतः &c., प्रतिकृतः &c., स्वस्थीकृतः &c., स्वस्थः -स्था -स्थं, सुस्थीकृतः &c., सुस्थितः &c.

REPAIRER, *s.* जीर्णोद्धारकः, जीर्णोद्धर्त्ता *m.* (र्त्तृ) सन्धाता *m.* (तृ).

REPARABLE, *a.* सन्धेयः -या -यं, समाधेयः &c., प्रतिसमाधेयः &c., साध्यः -ध्या -ध्यं, साधनीयः -या -यं, प्रतिकार्य्यः -र्य्या -र्य्यं, उद्धार्य्यः &c. उद्धरणीयः -या -यं.

REPARATION, *s.* (Repair), *see* above.—(Amends) क्षतिपूरणं, हानिपूरणं, क्षतिनिष्कृतिः *f.*, हानिनिष्कृतिः *f.*, क्षतिशोधनं. *See* INDEMNITY, COMPENSATION.

REPARTEE, *s.* रसिकोत्तरं, सरसोत्तरं, सरसप्रत्युक्तिः *f.*, भङ्गिः *f.*

REPAST, *s.* आहारः, भोजनं, भक्षणं, भक्षिका, अशनं, प्राशनं, अभ्याहारः; 'light repast,' लघुभोजनं, लघ्वाहारः, अल्पाहारः, उपाहारः, फलाहारः.

To REPAY, *v. a.* प्रतिदा (c. 3. -ददाति -दत्ते -दातुं), पुनर् दा or प्रदा, पुनर् ऋ in caus. (अर्पयति -यितुं), प्रत्यृ, पुनः प्रतिपद् (c. 10. -पादयति -यितुं) or प्रयम् (c. 1. -यच्छति -यन्तुं), निर्यत् (c. 10. -यातयति -यितुं), निवृत् (c. 10. -वर्त्तयति -यितुं), प्रतिकृ.—(Requite) प्रतिकृ, निर्यत्, प्रतिफल (nom. प्रतिफलयति -यितुं); 'to repay a kindness,' प्रत्युपकारं कृ, प्रत्युपकृ; 'an injury,' प्रत्यपकृ, प्रत्यपकारं कृ.—(Compensate) प्रतिफलं दा, निष्कृतिं दा or कृ, निस्तारं कृ, अपाकृ, निष्कृ, *see To* COMPENSATE, RECOMPENSE.

REPAYMENT, *s.* प्रतिदानं, पुनर्दानं, प्रत्यर्पणं, पुनरर्पणं, प्रतिपादनं, पुनःप्रतिपादनं, निर्यातनं, निवर्त्तनं, प्रतिफलं. *See* REQUITAL, RECOMPENSE, COMPENSATION.

To REPEAL, *v. a.* परावृत् (c. 10. -वर्त्तयति -यितुं), निवृत्, प्रचारपरावर्त्तं कृ, प्रचारनिवर्त्तनं कृ, लुप् (c. 6. लुम्पति, लोप्तुं), लोपं कृ, प्रचारलोपं कृ, खण्ड् (c. 10. खण्डयति -यितुं), प्रचारखण्डनं कृ, अवरुह् in caus. (-रोपयति -यितुं), प्रचारभङ्गं कृ, प्रचारभञ्जनं कृ, उच्छिद्, उच्छेदं कृ, प्रचारोच्छेदं कृ, प्रचाररोधं कृ.

REPEAL, *s.* परावर्त्तः -र्त्तनं, निवर्त्तनं, प्रचारपरावर्त्तः, प्रचारनिवर्त्तनं, लोपः, प्रचारलोपः, खण्डनं, अवरोपः -पणं, भङ्गः, प्रचारभङ्गः, अनुशयः, उच्छेदः, निरूहणं.

REPEALABLE, *a.* परावर्त्त्यः -र्त्त्या -र्त्त्यं, निवर्त्त्यः &c., लोपनीयः -या -यं.

REPEALED, *p. p.* परावृत्तः -त्ता -त्तं, परावर्त्तितः -ता -तं, निवर्त्तितः &c., निवृत्तः -त्ता -त्तं, लुप्तः -प्ता -प्तं, खण्डितः -ता -तं, अवरोपितः &c., उच्छिन्नः -न्ना -न्नं.

REPEALER, *s.* परावर्त्तकः, लोपकारी *m.* (न्), परावर्त्तवादी *m.* (न्).

To REPEAT, *v. a.* (Say again) पुनर् वद् (c. 1. वदति -दितुं), अनुवद्, मुहुर् वद्, अनुवच् (c. 2. -वक्ति -क्तुं), पुनर् वच्, पुनरुक्तिं कृ, पुनर्वचनं कृ, मुहुर्वचनं कृ, आम्रेड् (c. 1. -म्रेडति -डितुं), पुनर् भाष्, मुहुर्भाषां कृ.—(Do or make again) पुनः कृ, पुनः पुनः कृ, मुहुः कृ, पुनर् विधा, पुनर् अनुष्ठा or आवृत् in caus., मुहुर् अनुष्ठा, वारं वारं कृ.—(Rehearse, recite) पठ् (c. 1. पठति -ठितुं), सम्पठ्, अनुपठ्, कथ् (c. 10. कथयति -यितुं), आख्या (c. 2. -ख्याति -तुं), समाख्या, श्रु (c. 10. श्रावयति -यितुं), गॄ (c. 9. गृणाति, गरितुं -रीतुं), पठनं कृ.

(Tell) कथ्, वद्.—(A sound or word) आम्रेड्, आम्रेडनं कृ.

Repeated, *p. p.* (Said again) पुनरुक्तः -क्ता -क्तं, मुहुरुक्तः &c., पुनर्भाषितः -ता -तं; 'said twice,' द्विरुक्तः -क्ता -क्तं.—(Done again or often) पुनः कृतः -ता -तं, पुनरावृत्तः -त्ता -त्तं, पुनरावर्त्तितः -ता -तं, पुनः पुनः कृतः &c., मुहुः कृतः &c., वारं वारं कृत &c., पौनःपुनिकः -की -कं, अभीक्ष्णः -क्ष्णा -क्ष्णं; 'twice,' द्विरावृत्तः &c.—(Recited, told) पठितः -ता -तं, कथितः &c.

Repeatedly, *adv.* पुनः, पुनर्, मुहुस्, मुहुर्मुहुस्, वारं वारं, अनुवारं, असकृत्, भूयस्, भूयोभूयस्, बहुवारं, वारेण, शश्वत्, अनेकशस्.

Repeater, *s.* अनुवादकः, अनुवादी *m.* (न्), कथकः, आख्यायकः.

To repel, *v. a.* प्रतिहन् (c. 2. -हन्ति -न्तुं), पराहन्, व्याहन्, प्रतिसृ (c. 10. -सारयति -यितुं), अपास्, प्रतिवृ (c. 10. -वारयति -यितुं), निवृ, वृ, अपानुद् (c. 6. -नुदति -नोत्तुं), व्यपानुद्, अपनुद्, प्रतिक्षिप् (c. 6. -क्षिपति -क्षेप्तुं), समयक्षिप्, प्रतिबाध् (c. 1. -बाधते -धितुं), निरस् (c. 4. -अस्यति -असितुं), अपास्, परास्, निराकृ, अपाकृ, प्रतिकृ, अपोह् (c. 1. -ऊहते -हितुं), अपावृत् in caus., प्रत्यादिश् (c. 6. -दिशति -देष्टुं), निवृत् in caus. *See To* resist.

Repelled, *p. p.* पराहतः -ता -तं, प्रतिहतः &c., व्याहतः &c., प्रतिसारितः -ता -तं, प्रतिवारितः &c., परास्तः -स्ता -स्तं, निरस्तः &c., निराकृतः &c., अपावृत्तः -त्ता -त्तं, अपनोदितः -ता -तं.

Repellent, repelling, *a.* or *part.* प्रतिघाती -तिनी -ति (न्), प्रतिवारकः -का -कं, निवारकः &c., प्रतिवारणः -णा -णं, प्रतिसारकः &c., प्रतिकारकः -का -कं; 'a repellent,' प्रतिकारः -रं, प्रतीकारः -रं.

Repelling, *s.* प्रतिघातः -तनं, प्रतिसारणं, प्रतिवारणं, निवारणं, वारणं, निराकरणं, निरसनं, परासनं, प्रतिकारः, प्रतिकरणं.

To repent, *v. n.* (Feel regret or remorse) अनुतप् in pass. (-तप्यते), पश्चात् तप्, प्रत्यनुतप्, पश्चात् सन्तप्, तप्, मनसा तप्, अनुशुच् (c. 1. -शोचति -चितुं), पश्चात् शुच्, खिद् in pass. (खिद्यते), पश्चात् खिद्, अनुशी (c. 2. -शेते -शयितुं), पापस्मृत्या पीड् in pass., अनुतापं कृ, पश्चात्तापं कृ, अनुतप्तः -प्ता -प्तं भू, सन्तप्तः &c. भू, अनुशोकं कृ, अनुशयं कृ.—(Change the mind) मनः परिवृत् (c. 10. -वर्त्तयति -यितुं) or परावृत् or व्यावृत्, अन्यमानसीभू.

Repentance, *s.* पश्चात्तापः, अनुतापः, सन्तापः, पश्चात्सन्तापः, मनस्तापः, अनुशोकः, अनुशोचनं, अनुशयः दुष्कृतखेदः, पापखेदः, खेदः, पश्चात्खेदः, अन्वाधिः *m.*, पश्चाच्छोकः, विमृरितं, विप्रतीसारः, विप्रतिसारः, निवर्त्तनं, पश्चात्तापवृद्धिः *f.*, अनुतापबुद्धिः *f.*—(Change of mind) मनःपरिवर्त्तनं, मनःपरावर्त्तनं, मनोव्यावर्त्तः.

Repentant, *a.* अनुतापी -पिनी -पि (न्), पश्चात्तापी &c., अनुतप्तः -प्ता -प्तं, अनुशोचकः -का -कं, अनुशयी -यिनी &c., पश्चात्तापयुक्तः -क्ता -क्तं, पश्चात्तापान्वितः -ता -तं, जातानुतापः -पा -पं, जातपश्चात्तापः &c., जातानुशोकः -का -कं, जातानुशयः -या -यं, पापस्मृतिपीडितः -ता -तं, दुष्कृतस्मृतिपीडितः &c., जातखेदः -दा -दं, खेदान्वितः &c., अनुतापबुद्धिः -द्धिः -द्धि, पश्चात्तापवृद्धिः &c., शाकुणः -णी -णं.

Repented, *p. p.* अनुशोचितः -ता -तं, पश्चात् शोचितः &c., अनुशयितः &c.

Repercussion, *s.* प्रतिघातः, प्रतिहतिः *f.*, प्रतिहननं, प्रतिसारणं, परापतनं.

Repercussive, *a.* प्रतिघाती -तिनी -ति (न्), परापाती &c., प्रतिसारकः -का -कं.

Repertory, *s.* कोषः, कोषागारं, भाण्डागारं, सञ्चयागारं, भाण्डगृहं.

Repetition, *s.* (Saying again) अनुवादः, पुनर्वादः, पुनरुक्तिः *f.*, पौनरुक्त्यं, पुनःकथनं, पुनर्वचनं, पुनरुच्चारणं, मुहुर्वचनं, मुहुर्भाषा, पुनर्भाषा, अनुलापः; 'saying twice,' द्विरुक्तिः *f.*—(Doing again) पुनःकरणं, मुहुःकरणं, पुनर्विधानं, पुनरनुष्ठानं, पुनरावृत्तिः *f.*, पुनरावर्त्तनं, आवृत्तिः *f.*, आवर्त्तनं, पौनःपुन्यं; 'doing twice,' द्विरावृत्तिः *f.*—(Of a word or sound) आम्रेडनं, आम्रेडितं.—(A word repeated) कथितपदं, कथितवाक्यं.—(Of an act) क्रियासमभिहारः, क्रियावृत्तिः *f.*—(Recital, rehearsal) पठनं, पाठः, अनुवादः; 'from memory,' अभ्यसनं, अभ्यासः.

To repine, *v. n.* व्यथ् (c. 1. व्यथते -थितुं), शुच् (c. 1. शोचति -चितुं), तप् in pass. (तप्यते), परितप्, सन्तप्, आत्मानं तप् in caus. or व्यथ् in caus., खिद् in pass. (खिद्यते), अवसद् (c. 1. -सीदति -सत्तुं), ग्लै, परिग्लै, म्लै.

Repining, *s.* आत्मव्यथा, मनस्तापः, मनःसन्तापः, मनोव्यथा, अवसादः.

To replace, *v. a.* (Put again in its place) स्वस्थाने पुनर् ऋ in caus. (अर्पयति -यितुं) or पुनर् धा (c. 3. दधाति, धातुं) or पुनर् आधा or पुनः स्था in caus. (स्थापयति -यितुं) or पुनर् न्यस्, प्रतिसृ (c. 10. -सारयति -यितुं), पुनराधानं कृ, पुनरर्पणं कृ, पुनःस्थापनं कृ.—(Supply the place of) उपक्लृप् (c. 10. -कल्पयति -यितुं), उपसृज् (c. 6. -सृजति -स्रष्टुं), उपसर्जनं कृ, प्रतिनिधिं दा.

Replaced, *p. p.* पुनरर्पितः -ता -तं, पुनःस्थापितः &c., प्रतिसारितः &c.

To replenish, *v. a.* पृ (c. 10. पूरयति -यितुं), पुनः पृ, पुनः सम्पृ.

Replenished, *p. p.* पूरितः -ता -तं, सम्पूर्णः -र्णा -र्णं, समृद्धः -द्धा -द्धं.

Replete, *a.* पूर्णः -र्णा -र्णं, सम्पूर्णः -र्णा -र्णं, परिपूर्णः &c., पर्याप्तः -प्ता -प्तं, पूरितः -ता -तं, संकीर्णः -र्णा -र्णं, आकीर्णः &c., आढ्यः -ढ्या -ढ्यं in comp., मयः -यी -यं in comp.; 'replete with knowledge,' विद्यापूर्णः &c., सम्पूर्णविद्यः -द्या -द्यं; 'with guile,' मायामयः &c.

Repletion, *s.* (State of being completely filled) पूर्णता, परिपूर्णता, सम्पूर्णता, पर्याप्तिः *f.*, पूर्त्तिः *f.*, आपूर्त्तिः *f.*, परिपूर्त्तिः *f.*, आभोगः.—(Fulness of the blood or system from eating, &c.) अतिपुष्टिः *f.*, अतिसौहित्यं, रक्तबाहुल्यं, रक्तवृद्धिः *f.*, रक्ताधिक्यं.

Replicant, *s.* उत्तरवादी *m.* (न्), प्रतिवादी *m.*, उत्तरपक्षी *m.*

Replied, *p. p.* प्रत्युक्तः -क्ता -क्तं, पुनरुक्तः &c. *See* Answered.

To reply, *v. a.* प्रतिवच् (c. 2. -वक्ति -क्तुं), प्रतिवद् (c. 1. -वदति -दितुं), पुनर् वद्, अनुवद्, पुनर् वच्, प्रतिब्रू, पुनर् ब्रू, प्रतिभाष्, पुनर् भाष्, प्रतिभण्, पुनर् भण्; 'he replied,' प्रत्युवाच, पुनराह, प्रत्याह, *see To* answer.—(In law) उत्तरं वद्, उत्तरं कृ, प्रतिवद्.

Reply, *s.* (Answer) प्रतिवचनं, प्रतिवाक्यं, प्रत्युक्तिः *f.*, प्रत्युक्तं, उत्तरं, प्रत्युत्तरं, प्रतिवाक् *f.* (च्), प्रतिवादः, प्रतिवाणी -णिः *f.*—(In disputation) उत्तरं, प्रत्युत्तरं, कक्षा, उद्ग्राहः, कोटिः *f.*, प्रत्यर्थं.

To report, *v. a.* (Give an account, relate) आविद् (c. 10. -वेदयति -यितुं), निविद्, विद्, आख्या, ख्या in caus., ज्ञा in caus., विज्ञा in caus., कथ्, संकथ्, शंस्, बुध् in caus.—(Give an official account) अधिकारपूर्व्वं विज्ञापनं कृ or आवेदनं कृ or विज्ञा in caus.

Report, *s.* (Account given, statement) आवेदनं, विज्ञापनं, विज्ञप्तिः *f.*, वादः, कथा; 'written report,' आवेदनपत्रं, विज्ञापनपत्रं, लेखः.—(Rumor, common talk) प्रवादः, जनप्रवादः, जनवादः, जनश्रुतिः *f.*, जनवार्त्ता, जनरवः, जनवदन्ती, लोकप्रवादः, लोकवार्त्ता, वार्त्ता, किंवदन्ती, यदन्ती, वादः, उपश्रुतिः *f.*, रवः, वृत्तान्तः, आख्या, चर्चा, उद्घोषः,—(Reputation) कीर्त्तिः *f.*, ख्यातिः *f.*, यशस् *n.*; 'good report,' सुख्यातिः *f.*; 'evil,' कुख्यातिः *f.*, कुकीर्त्तिः *f.*, अकीर्त्तिः *f.*, कौलीनं.—(Sound, noise) शब्दः, ध्वनिः *m.*, क्वणः -णितं.

Reported, *p. p.* (Related) आवेदितः -ता -तं, कथितः &c., विज्ञप्तः -प्ता -प्तं, विज्ञापितः -ता -तं, आख्यातः &c., शंसितः &c.—(Rumored) घोषितः -ता -तं, उद्घोषितः &c., कीर्त्तितः &c.

REPORTER, *s.* वृत्तान्तलेखकः, समाचारलेखकः, वाक्यसारलेखकः.

To REPOSE, *v. n.* (Lie, rest) शी (c. 2. शेते, शयितुं), संविश् (c. 6. -विशति -वेष्टुं), विश्रम् (c. 4. -श्राम्यति -श्रमितुं), शयनं कृ, *see To* LIE.—(Rest on) अवलम्ब्, समालम्ब्, संश्रि, समाश्रि, उपाश्रि, निली, अवलम्बनं कृ.—(Confide in) विश्वस्, विश्रम्भ्.

REPOSE, *s.* विश्रामः, विश्रान्तिः *f.*, विश्रमः, शमः, शान्तिः, विरामः, श्रमच्छेदः, क्लान्तिच्छेदः, श्रमनिवृत्तिः *f.*, निर्वृतिः *f.*, शीः *f.*

REPOSED, *p. p.* विश्रान्तः -न्ता -न्तं, गतश्रमः -मा -मं, गतक्लमः &c., नष्टश्रमः &c., अपहृतश्रमः &c., निवृत्तश्रमः &c., छिन्नक्लान्तिः -न्तिः -न्ति.

To REPOSIT, *v. a.* निधा (c. 3. -दधाति -धातुं), न्यस् (c. 4. -अस्यति -असितुं), न्यासीकृ, रक्षणार्थं न्यस् or निधा, रक्ष् (c. 1. रक्षति -क्षितुं), संरक्ष्, निधिं कृ.

REPOSITED, *p. p.* न्यस्तः -स्ता -स्तं, निहितः -ता -तं, रक्षितः -ता -तं.

REPOSITORY, *s.* निधिः *m.*, निधानं, आधारः, कोषः, आगारं, भाण्डं, भाजनं, पात्रं, कोष्ठः -ष्ठकं, रक्षणस्थानं; 'of corn,' धान्यागारं, धान्यकोष्ठकं.

To REPREHEND, *v. a.* *See To* BLAME, REPROVE, &c.

REPREHENSIBLE, *a.* निन्द्यः -न्द्या -न्द्यं, निन्दनीयः -या -यं, गर्ह्यः -र्ह्या -र्ह्यं, गर्हणीयः -या -यं, विगर्ह्यः &c., परिभाषणीयः &c., दूषणीयः &c., दूष्यः -ष्या -ष्यं, दूषणार्हः -र्हा -र्हं, दोषवान् -वती -वत् (त्), सदोषः -षा -षं, निन्दापात्रं, निन्दाभाजनं, परिभाषणीयः &c.

REPREHENSION, *s.* निन्दा -न्दनं, उपालम्भः. *See* REPROOF, BLAME.

To REPRESENT, *v. a.* (Exhibit) दृश् (c. 10. दर्शयति -यितुं), प्रदृश्, *see To* SHOW.—(Describe) वर्ण् (c. 10. वर्णयति -यितुं), अनुवर्ण्, विवृ, निरूप्; 'in writing or drawing,' लिख् (c. 6. लिखति, लेखितुं), आलिख्, विलिख्.—(Personate) रूप् (c. 10. रूपयति -यितुं), अभिनी, वेषं धृ or भृ.—(State respectfully) निविद् (c. 10. -वेदयति -यितुं), विज्ञा in caus. (-ज्ञापयति -यितुं), निवेदनं कृ, विज्ञापनं कृ.—(Stand in the place of) प्रतिनिधिर् भू or अस्, प्रतिभूर् अस्, प्रतिपुरुषो भू or अस्.

REPRESENTATION, *s.* (Act of exhibition) दर्शनं, प्रदर्शनं, प्रकाशनं; 'on the stage,' अभिनयः -यनं.—(Description) वर्णनं -ना, अनुवर्णनं, उपवर्णनं, निरूपणं.—(Respectful statement) निवेदनं, विज्ञापनं -ना, विज्ञप्तिः *f.*, आवेदनं, उपन्यासः, उपपादनं.—(Delineation, sketch) आलेख्यं, आलेखनं, लेख्यं.—(Image, likeness, picture) प्रतिरूपं, प्रतिकृतिः *f.*, प्रतिमा, प्रतिमानं, प्रतिमूर्त्तिः *f.*, मूर्त्तिः *f.*, प्रतिनिधिः *m.*, प्रतिबिम्बं, प्रतिच्छाया, प्रतिच्छन्दः -न्दकं, चित्रं, चित्रलेखा.

REPRESENTATIVE, *a.* प्रदर्शकः -का -कं, उद्बोधकः -का -कं, प्रतिरूपकः &c.

REPRESENTATIVE, *s.* प्रतिनिधिः *m.*, प्रतिभूः *m.*, प्रतिपुरुषः, उपसर्जनं.

REPRESENTED, *p. p.* (Exhibited) दर्शितः -ता -तं, प्रदर्शितः &c.—(Described) वर्णितः -ता -तं.—(In a picture, &c.) चित्रलिखितः -ता -तं, आलिखितः &c., *see* PAINTED.—(Stated respectfully) निवेदितः -ता -तं, आवेदितः &c., विज्ञापितः &c., विज्ञप्तः -प्ता -प्तं, उपन्यस्तः -स्ता -स्तं, उपपादितः &c.—(Having substitutes) सप्रतिनिधिः -धिः -धि, सप्रतिभूः -भूः -भु.

To REPRESS, *v. a.* निग्रह् (c. 9. -गृह्णाति -ग्रहीतुं), नियम् (c. 1. -यच्छति -यन्तुं), संयम्.

REPRESSED, *p. p.* निगृहीतः -ता -तं, संयतः &c., जातनिग्रहः -हा -हं.

REPRESSION, *s.* निग्रहः -हणं, संयमः -मनं, निगृहीतिः *f.*, यन्त्रणं.

REPRESSIVE, *a.* नियामकः -का -कं, निग्रहकारी -रिणी -रि (न्).

REPRIEVE, *a.* दण्डविलम्बः -म्बनं, दण्डनविलम्बः, आकालान्तराद् दण्डत्यागः or दण्डयापनं, दण्डकालयापनं, दण्डकालान्तरनयनं, परावर्त्तः, दण्डकालपरावर्त्तः, दण्डपरावर्त्तः.

To REPRIEVE, *v. a.* दण्डविलम्बनं कृ, दण्डविलम्बं कृ, आकालान्तराद् दण्डनं त्यज् or या in caus., शिक्षाविलम्बनं कृ, दण्डं or दण्डकालं परावृत् (c. 10. -वर्त्तयति -यितुं), दण्डकालपरावर्त्तं कृ, प्राणदानं कृ, प्राणदण्डविलम्बं कृ.

To REPRIMAND, *v. a.* निन्द् (c. 1. निन्दति -न्दितुं), प्रत्यादिश् (c. 6. -दिशति -देष्टुं), उपालभ् (c. 1. -लभते -लब्धुं), गर्ह्, विगर्ह्, अभिशंस्, क्षिप्, भर्त्स्, शब्दताडनं कृ, मुखदण्डनं कृ, वाग्दण्डं कृ, धिग्दण्डं कृ. *See To* REPROVE.

REPRIMAND, *s.* उपालम्भः, वाग्दण्डः, शब्ददण्डः, शब्दताडनं, धिग्दण्डः, मुखदण्डः -ण्डनं, प्रत्यादेशः, प्रत्यादेशवाक्यं, भर्त्सनवाक्यं, अभिशंसनं, निन्दा.

REPRIMANDED, *p. p.* उपालब्धः -ब्धा -ब्धं, प्रत्यादिष्टः -ष्टा -ष्टं, अभिशस्तः &c.

To REPRINT, *v. a.* पुनर् मुद्र् (nom. मुद्रयति -यितुं), पुनर् मुद्रीकृ.

REPRINTED, *p. p.* पुनर्मुद्रितः -ता -तं, पुनर्मुद्रीकृतः &c., पुनर्मुद्राङ्कितः &c.

REPRISAL, *s.* प्रत्यपहारः, प्रत्यपहरणं, प्रत्यपकारः, प्रत्यपकरणं, प्रतिपीडनं, क्षतिपूरणार्थम् अपहरणं or अपहारः, हानिपूरणार्थं प्रत्यपहरणं or प्रतिहरणं.

To REPROACH, *v. a.* निन्द् (c. 1. निन्दति -न्दितुं), विनिन्द्, प्रतिनिन्द्, प्रणिन्द्, तिरस्कृ, परिवद् (c. 1. -वदति -दितुं), परिभाष् (c. 1. -भाषते -षितुं) उपालभ् (c. 1. -लभते -लब्धुं), गर्ह्, विगर्ह्, परिगर्ह्, कुत्स्, अभिकुत्स्, भर्त्स्, अपवद्, आक्रुश्, समाक्रुश्, उपक्रुश्, गुप् in des., तर्ज्, क्षिप्, अधिक्षिप्, दोषम् आरुह् in caus., दोषं क्षिप्, दोषारोपं कृ, दोषीकृ, वाक्पारुष्यं कृ, धिक्कृ, धिक्पारुष्यं कृ. *See To* BLAME, CENSURE.

REPROACH, *s.* निन्दा -न्दनं, तिरस्कारः, तिरस्क्रिया, परिवादः, परीवादः, परिभाषा -षणं, गर्हा -र्हणं, उपालम्भः, उपक्रोशः, आक्रोशः, जुगुप्सा, परुषोक्तिः *f.*, परुषवचनं, वाक्पारुष्यं, धिक्पारुष्यं, धिक्क्रिया, दुर्वाक्यं, दुरुक्तं, कुत्सा, घृणा, ऋतीया, पर्यनुयोगः, अर्द्दनं, वाच्यता, वचनीयता, हृणीया, रोञ्ज्या, छिः *m.*, अपकारगी, *f.*

REPROACHABLE, *a.* निन्द्यः -न्द्या -न्द्यं, परिभाषणीयः &c., गर्ह्यः -र्ह्या -र्ह्यं.

REPROACHED, *p. p.* निन्दितः -ता -तं, तिरस्कृतः &c., उपालब्धः -ब्धा -ब्धं, परिभाषितः &c., गर्हितः &c., अभिक्रुष्टः -ष्टा -ष्टं, धिक्कृतः &c.

REPROACHFUL, *a.* (Opprobrious) निन्दकः -का -कं, परिवादकः &c., कुत्सावादी -दिनी -दि (न्), निन्दात्मकः &c., घृणाकरः -रा -रं, निन्दामयः -यी -यं.—(Shameful) गर्ह्यः -र्ह्या -र्ह्यं, लज्जाकरः -रा -री -रं, लज्जाप्रदः -दा -दं.

REPROACHFULLY, *adv.* सनिन्दं, निन्दया, सतिरस्कारं, सासूयं, सपरिवादं.

REPROBATE, *a.* दुष्टः -ष्टा -ष्टं, दुराचारः -रा -रं, दुरात्मा -त्मा -त्म (न्), धर्म्मबाह्यः -ह्या -ह्यं, त्यक्तधर्म्मा -र्म्मा -र्म्म (न्), दुष्टभावः -वा -वं, पापात्मा &c., पापचेताः -ताः -तः (स्), त्यक्तलज्जः -ज्जा -ज्जं, दुःशीलः -ला -लं.

REPROBATE, *s.* दुष्टजनः, कुलनाशः -शनः, वृषलः, हतपरलोकः.

To REPROBATE, *v. a.* गर्ह् (c. 1. गर्हते -र्हितुं), विगर्ह्, गर्हापूर्व्वम् असम्मतिं सूच् (c. 10. सूचयति -यितुं), निन्द् (c. 1. निन्दति -न्दितुं), घृणां कृ, न्यक्कृ.

REPROBATED, *p. p.* गर्हितः -ता -तं, गर्हापूर्व्वं निन्दितः &c., विगर्हितः &c.

REPROBATION, *s.* (Act) गर्हा -र्हणं, विगर्हणं -णा, निन्दा -न्दनं, घृणा.—(State) अतिदुष्टता, त्यक्तत्वं, गर्ह्यता.

To RE-PRODUCE, *v. a.* प्रत्युत्पद् (c. 10. -पादयति -यितुं), पुनर् उत्पद् or जन्.

REPRODUCED, *p. p.* प्रत्युत्पन्नः -न्ना -न्नं, प्रत्युत्पादितः -ता -तं, पुनरुत्पन्नः &c.

REPRODUCTION, *s.* प्रत्युत्पादनं, प्रत्युत्पत्तिः *f.*, पुनरुत्पादनं, पुनरुत्पत्तिः *f.*

REPROOF, *s.* निन्दा -न्दनं, परिभाषणं, परिवादः, परीवादः, उपालम्भः, प्रत्यादेशः, निन्दावाक्यं, भर्त्सनवाक्यं, भर्त्सना, वाग्दण्डः, मुखदण्डः, शब्ददण्डः. *See* CENSURE, CHIDING.

Reprovable, *a.* निन्द्यः -न्द्या -न्द्यं, निन्दनीयः -या -यं, परिभाषणीयः &c.

To reprove, *v. a.* निन्द् (c. 1. निन्दति -न्दितुं), प्रतिनिन्द्, विनिन्द्, प्रणिन्द्, प्रत्यादिश् (c. 6. -दिशति -देष्टुं), उपालभ् (c. 1. -लभते -लब्धुं), परिवद्, अपवद्, परिभाष्, अपभाष्, गर्ह्, विगर्ह्, भर्त्स्, गुप् in des., कुत्स्, अभिकुत्स्, क्षिप्, अधिक्षिप्, तिरस्कृ, वाग्दण्डं कृ, आक्रुश्, उपक्रुश्, धिक्कृ. *See To* censure.

Reproved, *p. p.* निन्दितः -ता -तं, प्रत्यादिष्टः -ष्टा -ष्टं, उपालब्धः -ब्धा -ब्धं.

Reprover, *s.* निन्दकः, प्रत्यादेशकः, परिवादकः, वाग्दण्डकारी *m.* (न्).

Reptile, *s.* उरगः, उरोगामी *m.* (न्), उरोगः, उरोगमः, उरङ्गः, उरङ्गमः, सर्पः, सरीसृपः, सर्पी *m.* (न्), कृमिः *m.*, बिलवासी *m.* (न्), बिलेवासी *m.*, बिलौकाः *m.* (स्), अपदः, अपादः, बहुपादः.

Reptile, *a.* (Creeping) सर्पी -र्पिणी -र्पि (न्), सर्पन् -र्पन्ती -र्पत् (त्), सर्पणः -णा -णं.—(Relating to a reptile) सार्पः -र्पी -र्पं, कृमिलः -ला -लं.

Republic, *s.* लोकप्रभुत्वं, सर्व्वलोकप्रभुत्वं, लोककर्त्तृकप्रभुत्वं, प्रजाप्रभुत्वं, सर्व्ववर्णप्रभुत्वं, सर्व्ववर्णाधिपत्यं, साधारणप्रभुत्वं, साधारणाधिपत्यं, साधारणजनप्रभुत्वं, लोकसाधारणाधिपत्यं, सर्व्वप्रजाधिपत्यं, लोककर्त्तृकराज्यं, सामान्यजनकर्त्तृकराज्यं, लोकपालितं राज्यं, साधारणजनपालितराज्यं, प्रजापालितराज्यं.

Republican, *a.* लोकप्रभुत्वसम्बन्धी -न्धिनी -न्धि (न्), प्रजाप्रभुत्वसम्बन्धी &c., लोकाधिपत्यसम्बन्धी &c., लोकप्रभुत्वविषयकः -का -कं, लोकप्रभुत्वानुसारी &c., लोकप्रभुत्वानुरूपः -पा -पं.

Republican, *a.* लोकप्रभुत्ववादी *m.* (न्), लोकाधिपत्यपक्षपाती *m.*, लोकप्रभुत्वावलम्बी *m.*, प्रजाधिपत्यवादी *m.*, प्रजाधिपत्यानुग्राही *m.*, प्रजानाथः, लोकनाथः.

Republicanism, *s.* लोकप्रभुत्वपक्षपातः, लोकाधिपत्यपक्षपातः, लोकप्रभुत्वावलम्बनं, प्रजाधिपत्यवादः, लोकाधिपत्यानुग्रहः.

To repudiate, *v. a.* प्रत्याख्या (c. 2. -ख्याति -तुं), निराकृ, निरस्, प्रत्यादिश्, त्यज्, परित्यज्, प्रत्याचक्ष्, निर्नुद्, अपध्वंस्. *See To* reject.

Repudiated, *p. p.* प्रत्याख्यातः -ता -तं, निराकृतः &c., प्रत्यादिष्टः -ष्टा -ष्टं.

Repudiation, *s.* प्रत्याख्यानं, निरसनं, निरासः, निराकरणं, निराकृतिः *f.*, त्यागः, परित्यागः, प्रत्यादेशः, *see* Rejection.—(Divorce) विवाहसम्बन्धत्यागः, विवाहसम्बन्धमुक्तिः *f.*, दाम्पत्यमुक्तिः *f.*, भार्य्यानिराकरणं.

Repugnance, repugnancy, *s.* प्रतिकूलता, प्रातिकूल्यं, विरोधः, विरुद्धता, वैपरीत्यं, विमुखता, विमतिः *f.*, अनिच्छा.

Repugnant, *a.* प्रतिकूलः -ला -लं, विरुद्धः -द्धा -द्धं, विपरीतः -ता -तं, विरोधी -धिनी &c., विमुखः -खा -खी -खं. *See* Opposed, Adverse.

Repulse, *s.* प्रतिघातः, प्रतिहतिः *f.*, पराहननं, प्रतिहननं, प्रतिसारणं, निवारणं, वारणं, व्यपाकृतिः *f.*, विद्रवः, विद्रावणं, पराजयः, अपजयः.

To repulse, *v. a.* पराहन् (c. 2. -हन्ति -न्तुं), प्रतिहन्, प्रतिस्. *See To* repel.

Repulsed, *p. p.* पराहतः -ता -तं, प्रतिहतः &c., व्याहतः &c., निहतः &c., आहतः &c., प्रहतः &c., प्रतिसारितः &c., प्रतिक्षिप्तः -प्ता -प्तं, विद्रावितः &c., निवारितः &c., व्यपाकृतः &c., पराजितः &c., प्रत्याख्यातः &c.

Repulsion, *s.* प्रतिसारकत्वं, प्रतिघातकत्वं, प्रतिसारणगुणः, प्रतिसारणशक्तिः *f.*, प्रतिहननशक्तिः *f.*, प्रतिहननं, प्रतिसारणं. *See* Repulse.

Repulsive, *a.* (Repelling) प्रतिघाती -तिनी -ति (न्), प्रतिघातकः -का -कं, प्रतिसारकः -का -कं, निवारकः &c., वारकः &c.—(Forbidding) अप्रीतिजनकः -का -कं, त्रासजनकः &c., त्रासकरः -री -रं, अमङ्गलः -ला -लं, अप्रसन्नमुखः -खी -खं.

Reputable, *a.* (In good esteem) मान्यः -न्या -न्यं, सम्मान्यः &c., माननीयः -या -यं, आदरणीयः &c., प्रशंसनीयः &c., मानार्हः -र्हा -र्हं, सम्मानार्हः &c., शिष्टः -ष्टा -ष्टं.—(Conferring reputation, not disgraceful) मानदः -दा -दं, मानप्रदः &c., मानदायी -यिनी &c., यशस्यः -स्या -स्यं, यशस्करः -री -रं, कीर्त्तिकरः -री -रं, ख्यातिकरः &c., सुप्रतिष्ठः -ष्ठा -ष्ठं, अलङ्कारकः &c.

Reputably, *adv.* समानं, यथा सुख्यातिर् उत्पद्यते तथाप्रकारेण.

Reputation, *s.* कीर्त्तिः *f.*, ख्यातिः *f.*, विख्यातिः *f.*, प्रतिष्ठा, समाख्या, यशस् *n.*, परिख्यातिः *f.*, प्रतिख्यातिः *f.*, प्रविख्यातिः, प्रकीर्त्तिः *f.*, कीर्त्तना -नं, प्रतिपत्तिः *f.*, प्रथा, सम्प्रथा, मर्य्यादा, समाज्ञा, प्रसिद्धिः *f.*, गौरवं, चारित्रं; 'one who has established a reputation,' लब्धप्रतिष्ठः -ष्ठा -ष्ठं, प्राप्तप्रतिष्ठः &c.; 'good reputation,' सुकीर्त्तिः *f.*, सत्कीर्त्तिः *f.*, सुख्यातिः *f.*; 'bad reputation,' कुकीर्त्तिः *f.*, दुष्कीर्त्तिः *f.*, अकीर्त्तिः, अपकीर्त्तिः *f.*, कुख्यातिः *f.*, अख्यातिः *f.*, अयशस् *n.*, वाच्यता.

To repute, *v. a.* गण् (c. 10. गणयति -यितुं), विगण्, मन् (c. 4. मन्यते, मन्तुं, c. 10. मानयति -यितुं), संख्या, परिसंख्या, कृत् (c. 10. कीर्त्तयति -यितुं).

Repute, *s.* कीर्त्तिः *f.*, ख्यातिः *f.*, प्रसिद्धिः *f.* *See* Reputation.

Reputed, *p. p.* मतः -ता -तं, गणितः &c., विगणितः &c., कीर्त्तितः &c.

Request, *s.* (Entreaty) प्रार्थनं -ना, अर्थना, अभ्यर्थना, अर्थः, याचना, याच्ञा, स्वार्थनिवेदनं, अर्थविज्ञापना, सनिः -नी *m. f.*—(Desire) आकांक्षा, अभिकांक्षा, कांक्षा, इच्छा, एषा, अध्येषणा.—(State of being desired or held in estimation) अपेक्षा, आकांक्षा, मान्यता -त्वं, माननीयता; 'general request,' लोकमान्यता.

To request, *v. a.* प्रार्थ् (c. 10. -अर्थयते -ति -यितुं), अभ्यर्थ्, सम्प्रार्थ्, अर्थ्, याच् (c. 1. याचति -ते -चितुं), अभियाच्, प्रयाच्, सम्प्रयाच्, संयाच्, अर्थं निविद् (c. 10. -वेदयति -यितुं) or विज्ञा in caus. (-ज्ञापयति -यितुं), वृ (c. 9. वृणीते, वरितुं -रीतुं, c. 10. वारयति -यितुं), कांक्ष्, आकांक्ष्, अभिकांक्ष्.

Requested, *p. p.* प्रार्थितः -ता -तं, अभ्यर्थितः &c., अर्थितः &c., याचितः &c., अर्दितः -ता -तं.

To require, *v. a.* (Ask, demand) प्रार्थ् (c. 10. -अर्थयति -ते -यितुं), याच् (c. 1. याचति -चितुं), अभियाच्.—(Need, call for) आकांक्ष् (c. 1. -कांक्षति -क्षितुं), अभिकांक्ष्, कांक्ष्, अर्ह् (c. 1. अर्हति -र्हितुं), प्रार्थ्; or expressed by भू or अस् in conjunction with the nouns प्रयोजनं, उपयोगः or कार्य्यं. *See To* need. The desid. form may sometimes be used to express the sense of 'require,' thus; 'three quantities being given, it is required to find a fourth,' त्रीन् राशीन् निर्दिश्य चतुर्थो जिज्ञास्यते (desid. pass. of ज्ञा).

Required, *p. p.* आकांक्षितः -ता -तं, अभिकांक्षितः &c., प्रार्थितः &c.

Requisite, *a.* आकांक्षितः -ता -तं, आकांक्षणीयः -या -यं, अभिकांक्षितः &c., प्रयोजनीयः &c., प्रयोजनार्हः -र्हा -र्हं, अवश्यकः -का -कं, आवश्यकः -की -कं, अवश्यप्रापणीयः &c. *See* Needful.

Requisite, *s.* अवश्यकवस्तु *n.*, अवश्यकद्रव्यं, अवश्यकविषयः; 'requisites,' प्रयोजनीयद्रव्यसामग्री, उपकरणसाहित्यं. *See* Necessaries.

Requisition, *s.* आकांक्षा, अभिकांक्षा, कांक्षा, प्रार्थनं -ना, अभ्यर्थनं -ना, अर्थना, याचनं -ना, अपेक्षा -क्षणं; 'is in requisition,' सेव्यतां याति.

Requital, *s.* (Recompense, return) प्रतिफलं, प्रतिदानं, निस्तारः, निष्कृतिः *f.*, प्रत्युपकारः, पारितोषिकं, उपकारमोक्षः, उपकारशुद्धिः *f.*, शुद्धिः *f.*, परिशोधः, परिवर्त्तनं.—(Retaliation) प्रतिकारः, प्रतीकारः, प्रतिकृतिः *f.*, प्रतिक्रिया, प्रत्यपकारः, प्रतिकर्म्म *n.* (न्), प्रतिहिंसा, निर्यातनं.

To requite, *v. a.* (Compensate, repay) प्रतिफलं दा, प्रतिदा, प्रतिफल (nom. प्रतिफलयति -यितुं), निष्कृतिं दा, प्रत्युपकृ, निस्तारं कृ, पारि-

तोषिकं दा.—(Retaliate) प्रतिकृ, विप्रतिकृ, प्रत्यपकृ, प्रतिकारं कृ, प्रतिहिंस् (c. 1. -हिंसति -सितुं, c. 7. -हिनस्ति), निर्यत् (c. 10. -यातयति -यितुं).

Requited, *p. p.* प्रतिफलितः -ता -तं, प्रतिकृतः &c., विप्रतिकृतः &c., निर्यातितः &c.

To resalute, *v. a.* प्रत्यभिनन्द् (c. 1. -नन्दति -न्दितुं), प्रतिनन्द्, प्रत्यभिवद्, प्रत्यर्च्.

To rescind, *v. a.* लुप् (c. 6. लुम्पति, लोप्तुं), लोपं कृ, खण्ड् (c. 10. खण्डयति -यितुं), उच्छिद् (c. 7. -छिनत्ति -छेत्तुं), परिच्छिद्, उच्छिद्, भङ्गं कृ, भञ्ज्. *See To* repeal.

Rescinded, *p. p.* लुप्तः -प्ता -प्तं, खण्डितः &c., उच्छिन्नः -न्ना -न्नं, परिच्छिन्नः &c.

Rescission, *s.* लोपः, खण्डनं, उच्छेदः, परिच्छेदः, भङ्गः, उद्धरणं, निरुद्धरणं, अवरोपः -पणं, अनुशयः, विप्रतिपत्तिः *f.*; 'of sale,' क्रयानुशयः. *See* Repeal.

Rescript, *s.* शासनं, आज्ञापत्रं, शासनपत्रं, राजाज्ञा, निबन्धः.

To rescue, *v. a.* त्रै (c. 1. त्रायते, त्रातुं), परित्रै, संत्रै, उद्धृ (c. 1. -हरति -हर्त्तुं), समुद्धृ, रक्ष् (c. 1. रक्षति -क्षितुं), परिरक्ष्, अभिरक्ष्, संरक्ष्, मुच् (c. 6. मुञ्चति, मोक्तुं, c. 10. मोचयति -यितुं), विमुच्, निर्मुच्, मोक्ष् (c. 10. मोक्षयति -यितुं), विमोक्ष्, निस्तॄ (c. 10. -तारयति -यितुं), तॄ, उद्धरणं कृ, उद्धारं कृ, रक्षणं कृ; 'from confinement,' बन्धनाद् मुच्.

Rescue, *s.* त्राणं, परित्राणं, उद्धरणं, उद्धारः, समुद्धारः, समुद्धरणं, रक्षा -क्षणं, परिरक्षणं, निस्तारः, निस्तरणं, तारणं, मुक्तिः *f.*, मोचनं, विमोचनं, मोक्षः -क्षणं, परिमोक्षणं; 'to the rescue!' त्राहि, त्रायस्व.

Rescued, *p. p.* उद्धृतः -ता -तं, समुद्धृतः &c., त्राणः -णा -णं, त्रातः -ता -तं, रक्षितः -ता -तं, परिरक्षितः &c., मुक्तः -क्ता -क्तं, मोचितः -ता -तं, विमोचितः &c., निस्तारितः &c.; 'from confinement,' मुक्तबन्धनः -ना -नं, बन्धनमुक्तः -क्ता -क्तं.

Rescuer, *s.* त्राता *m.* (तृ), उद्धर्त्ता *m.* (र्त्तृ), रक्षकः, मुक्तिदाता *m.* (तृ), उद्धारकः, मोचकः, निस्तारकः. *See* Deliverer.

Research, *s.* अन्वेषणं -णा, पर्येषणं -णा, अनुसन्धानं, परीष्टिः *f.*, संवीक्षणं, गवेषणं -णा, निरूपणं, जिज्ञासा, मीमांसा, मार्गणं, मृगणा, मृगया, मृगः, विचारणा, तत्त्वानुसन्धानं, विचयः, वीचयनं, विचयनं.

Resemblance, *s.* (Likeness) औपम्यं, सादृश्यं, सदृशता, सरूपता, सारूप्यं, समता, साम्यं, समानता, तुल्यता -त्वं, तुला, तौल्यं, सारूप्यं, सरूपता, उपमा, उपमितिः *f.*, उपमानं -नता, अनुकारः, अनुहारः, *see* Likeness.—(Something similar, a representation) उपमा, प्रतिमा -मानं, प्रतिरूपं, प्रतिभासः, प्रतिकृतिः *f.*, प्रतिमूर्त्तिः *f.*, प्रतिच्छाया, प्रतिबिम्बं, प्रतिनिधिः *m.*

To resemble, *v. a.* (Be like) सदृशः -शी -शं भू or अस्, सदृशीभू, अनुकृ (c. 8. -करोति -कर्त्तुं), तुल्यः -ल्या -ल्यं भू, समः -मा -मं भू, समानः -ना -नं भू, उपमः -मा -मं भू, सरूपः -पा -पं भू, अनुरूपः -पा -पं भू; 'the son resembles his father,' पुत्रः पितुर् अनुकरोति or पुत्रः पितृरूपो भवति or पुत्रः पित्रा सदृशाकारो भवति; 'no one resembles him,' अनेन सदृशः कश्चिन् नास्ति or तस्य तुल्यः or तेन तुल्यः or तेन समो न को ऽपि भवति. A nominal verb may sometimes express the sense of 'resemble,' thus; 'he resembles a lion,' सिंहायते; 'it resembles heaven,' स्वर्गायते.—(Liken) उपमा (c. 2. -माति, c. 3. -मिमीते -मातुं), सदृशीकृ, समीकृ, समान (nom. समानयति -यितुं).

Resembling, *part.* अनुकारी -रिणी -रि (न्), सदृशः -शी -शं, तुल्यः -ल्या -ल्यं, समः -मा -मं, समाकारः -रा -रं, सरूपः -पा -पं, रूपधृक् *m. f. n.*, रूपभृत् *m. f. n.*, सवर्णः -र्णा -र्णं &c. *See* Like.

To resent, *v. n.* अपकारम् अपेक्ष्य कुप् (c. 4. कुप्यति, कोपितुं) or प्रकुप् or क्रुध् (c. 4. क्रुध्यति, क्रोद्धुं) or रुष् (c. 4. रुष्यति, रोषितुं) or रोषं कृ or मन्युं कृ, अपकारमपेक्ष्य प्रत्यपकाराय or प्रतिकाराय मनः कृ, अपकारमपेक्ष्य जातमन्युः -न्युः -न्यु भू or जातक्रोधः -धा -धं भू, अपकारमपेक्ष्य क्रोधात् प्रत्यपकारं कृ in des., हिंसाम् अपेक्ष्य जातक्रोधत्वात् प्रतिहिंसां कृ in des. (चिकीर्षति -र्षितुं) or प्रतिद्रोहाय मनः कृ.

Resentful, *a.* समन्युः -न्युः -न्यु, जातमन्युः &c., प्रतिहिंसाबुद्धिः -द्धिः -द्धि, प्रतिद्रोहबुद्धिः &c., प्रत्यपकारबुद्धिः &c., क्रोधशीलः -ला -लं, कोपशीलः &c., प्रतिहिंसाशीलः &c., दंशी -शिनी -शि (न्), सासूयः -या -यं.

Resentment, *s.* मन्युः *m.*, क्रोधः, कोपः, रोषः, प्रकोपः, प्रतिद्रोहबुद्धिः *f.*, प्रत्यपकारबुद्धिः *f.*, प्रतिहिंसाबुद्धिः *f.*, दंशः, द्वेषः, असूया, ईर्ष्या, मात्सर्य्यं.

Reservation, *s.* (Keeping back, concealing) गोपनं, गुप्तिः *f.*, उपसंहारः, उपसंहरणं, उपसंहृतिः *f.*, संहरणं, संहृतिः *f.*, प्रत्याहारः, प्रत्याहरणं, संवृतिः *f.*, संवरणं, अपवरणं, अपावरणं, धृतिः *f.*, धरणं, विधृतिः *f.*, विधरणं, विनिग्रहः, निभृते स्थापनं.—(Mental reservation) मनोगुप्तिः *f.*, मनोगोपनं, मनोसंवृतिः *f.*, मनोसंवरणं, निह्नुतिः *f.*, अपह्नुतिः *f.*, निह्नवः, अपह्नवः.—(Custody, keeping in store) रक्षा -क्षणं, परिरक्षणं, संग्रहणं, सञ्चयः -यनं.

To reserve, *v. a.* (Keep back, withhold to a future time) उपसंहृ (c. 1. -हरति -हर्त्तुं), प्रत्याहृ, संहृ, विधृ (c. 1. -धरति -धर्त्तुं, c. 10. -धारयति -यितुं), विनिग्रह् (c. 9. -गृह्णाति -ग्रहीतुं), निग्रह्, आकालान्तरात् or कालान्तरं यावद् उपसंहृ or रक्ष् (c. 1. रक्षति -क्षितुं) or परिरक्ष्.—(Lay up, keep in store to a future time) रक्ष्, परिरक्ष्, आकालान्तरात् or परकालं यावद् रक्ष् or निधा (c. 3. -दधाति -धातुं) or न्यस् (c. 4. -अस्यति -सितुं) or संचि (c. 5. -चिनोति -चेतुं) or संग्रह्.—(Conceal to another time) आकालान्तराद् गुप् (c. 1. गोपायति, c. 10. गोपयति, गोप्तुं) or गोपनं कृ or निभृते स्था in caus. (स्थापयति -यितुं) or संवृ (c. 5. -वृणोति -वरितुं, c. 10. -वारयति -यितुं) or अपवृ or अपावृ or संवरणं कृ; 'in the mind,' मनसा गुप्, मनोगोपनं कृ.—(Suffer to remain to another time) आकालान्तरात् शिष् (c. 10. शेषयति -यितुं) or परिशिष् or अवशिष् or रक्ष्; 'one should reserve one's money for a time of want,' आपदर्थं धनं रक्षेत्.

Reserve, *s.* (Withholding, keeping back), *see* Reservation.—(Something concealed in the mind, withheld from disclosure) मनोगुप्तिः *f.*, मनोगुप्तं, निह्नुतिः *f.*, अपह्नुतिः *f.*—(Restraint) यन्त्रणं, निग्रहः, विनिग्रहः, निगृहीतिः *f.*—(In manner, disinclination to talk) कथाविरक्तिः *f.*, कथाविमुखता, कथावैरक्त्यं, वाग्यतत्वं, वाग्यतिः *f.*, वाग्यन्त्रणं, अल्पभाषणं, कथापराङ्मुखता, संलापपराङ्मुखता, आलापविरक्तिः *f.*, धीरता.—(Stock laid up) सञ्चयः, सञ्चितं, संग्रहः, निचयः.—(Stratagem in reserve, double resource) द्वैधं.—(Of an army) प्रतिग्रहः, परिग्रहः, सन्नहनं, पार्ष्णित्रं, पतद्ग्रहः. *See* Rear-guard.—(Without reserve), *see* Unreservedly.—(In reserve) निभृते, गोपने, गुप्तं. *See* the next.

Reserved, *p. p.* or *a.* (Kept back or concealed to a future time) आकालान्तरात् or परकालं यावद् रक्षितः -ता -तं or उपसंहृतः -ता -तं or विधारितः &c. or विधृतः &c. or गुप्तः -प्ता -प्तं or निभृते स्थापितः -ता -तं or संवृतः &c.—(Left remaining) शिष्टः -ष्टा -ष्टं, अवशेषितः -ता -तं, आकालान्तराद् अवशेषितः &c.—(Restrained in manner, disinclined to talk) वाग्यतः -ता -तं, वाग्यन्त्रितः &c., यन्त्रितकथः -था -थं, यन्त्रितवाक् *m. f. n.* (च्), कथाविरक्तः -क्ता -क्तं.

86)

संवादविरक्तः &c., कथाविमुखः -खा -खी -खं, कथापराङ्मुखः &c., संलापविमुखः &c., आलापविरक्तः &c., अनालापी -पिनी -पि (न्), अल्पभाषी -षिणी &c., अल्पालापी &c., परिमितालापी &c., परिमितकथः &c., गूढभावः -वा -वं, गूढस्वभावः &c., लज्जाशीलः -ला -लं, धीरः -रा -रं.

Reservedly, *adv.* वाग्यतम्, वाग्यतत्वात्, परिमितवाचा, गूढभावेन.

Reservedness, *s.* वाग्यतत्वं, कथाविरक्तिः *f.*, धीरता. *See* Reserve.

Reservoir, *s.* जलाशयः, तडागः, जलाधारः, उदकाधारः, निपानं, खातं, वापी, अम्भोनिधिः *m.*, जलदानगृहं, सरोवरः, क्रीडासरस् *n.*, वरासनं, तल्लः.

To reside, *v. n.* वस् (c. 1. वसति, वस्तुं), निवस्, अधिवस्, आवस्, समावस्, प्रतिवस्, वासं कृ, वृत्, स्था, आश्रि, निली, अध्यास्. *See* *To* dwell.—(Reside together or with) संवस्, सहवासं कृ; 'resided,' उषितः -ता -तं.

Residence, *s.* (Act of dwelling) वासः -सनं, वसनं, वसतिः *f.*, निवसतिः *f.*, निवासः, अधिवासनं -सिता, अधिष्ठानं, अधिष्ठितिः *f.*, अवस्थितिः *f.*, स्थितिः *f.*, संस्थितिः *f.*, प्रतिष्ठा, वर्त्तनं, निलयनं, आश्रयणं, अध्यासः -सनं; 'residence abroad,' प्रवासः.—(Place of dwelling) वसतिः *f.*, वासः, वासस्थानं, निवसतिः *f.*, निवासः, निवासस्थानं, निवासभूयं, गृहं, आवासः, अधिवासः, समावासः, आवसथः, वास्तुः -स्तु *m. n.*, स्थानं, अवस्थानं, प्रतिष्ठा, आयतनं, निकेतनं, आलयः, निलयः, निलायिता, क्षिः *f.*; 'permanent residence,' स्थिरप्रतिष्ठा, स्थावरप्रतिष्ठा; 'changing of residence,' गृहान्तरगमनं, स्थानान्तरगमनं, स्थलान्तरकरणं. *See* Dwelling.

Resident, *a.* वासी -सिनी -सि (न्), निवासी &c., वासकारी &c., स्थायी &c., स्थः -स्था -स्थं in comp., संस्थः -स्था -स्थं in comp., निलायी &c., कृतवासः -सा -सं, कृतालयः -या -यं, आश्रितः -ता -तं, समाश्रितः &c., समावासितः &c., अवस्थितः &c., अधिष्ठितः &c.; 'resident in Mathurá,' मथुरावासी &c., मथुरानिवासी &c.; 'in the city,' नगरस्थः &c.; 'the people resident there,' तत्रस्था जनाः.

Resident, *s.* वासी *m.* (न्); 'temporary resident,' आगन्तुः -न्तुकः.

Residentiary, *a.* वासी -सिनी &c., वासकारी &c. *See* Resident, *a.*

Residuary, residual, *a.* शेषसम्बन्धी -न्धिनी &c.; 'legatee,' शेषभागी *m.* (न्), शेषाधिकारी *m.*, शेषरिक्थभागी *m.*, शेषरिक्थभाक् *m.* (ज्).

Residue, *s.* शेषः -षं, अवशेषः, अवशिष्टं, परभागः, *see* Remainder.

To resign, *v. a.* (Give up) त्यज् (c. 1. त्यजति, त्यक्तुं), परित्यज्, संत्यज्, उत्सृज् (c. 6. -सृजति -स्रष्टुं), विसृज्, अपसृज्, उत्सर्गं कृ, उत्सर्जनं कृ, हा (c. 3. जहाति, हातुं), विहा, प्रहा, प्रोज्झ्, संन्यस्, प्रत्यादिश्; 'by writing,' त्यागपत्रेण उत्सृज्; 'to resign a title or claims,' अधिकारत्यागं कृ, स्वत्वत्यागं कृ, स्वत्वनिवृत्तिं कृ.—(Commit) सम् in caus. (-अर्पयति -यितुं), ऋ in caus., न्यस्, निक्षिप्, न्यासीकृ, प्रतिपद् in caus., परिदा, समर्पणं कृ.—(Submit to) सह् (c. 1. सहते, सोढुं), विषह्, क्षम् (c. 1. क्षमते, क्षन्तुं), तिज् in des.

Resignation, *s.* (Giving up) त्यागः, परित्यागः, उत्सर्गः, उत्सर्जनं, विसर्जनं, संन्यसनं, संन्यासः; 'written resignation,' त्यागपत्रं, परित्यागपत्रं, त्यागलेखः; 'of claim,' स्वत्वत्यागः, स्वत्वनिवृत्तिः *f.*—(Committing, yielding) समर्पणं, अर्पणं, निक्षेपः, न्यसनं, न्यासीकरणं.—(Submission) क्षमा, क्षान्तिः *f.*, तितिक्षा, सहनं, सहिष्णुता, धीरता, मर्षः, शान्तिः *f.*, सन्तोषवृत्तिः *f.*—(To the will of God) ईश्वरेच्छासन्तोषवृत्तिः *f.*, ईश्वरेच्छानुवृत्तिः *f.*, ईश्वरेच्छानुवर्त्तनं, ईश्वरेच्छानुमतिः *f.*, ईश्वरेच्छानुरोधः, ईश्वरेच्छापरितोषः, भगवदिच्छानुमतिः *f.*, तितिक्षा, ईश्वरसंकल्पानुवृत्तिः *f.*

Resigned, *p. p.* or *a.* (Given up) त्यक्तः -क्ता -क्तं, परित्यक्तः &c., उत्सर्जितः -ता -तं, उत्सृष्टः -ष्टा -ष्टं, संन्यस्तः -स्ता -स्तं.—(Submissive) क्षान्तः -न्ता -न्तं, क्षमावान् -वती -वत् (त्), सहिष्णुः -ष्णुः -ष्णु, तितिक्षुः &c., शान्तः &c., *see* Patient.—(To the will of God) ईश्वरेच्छासन्तोषवृत्तिः -त्तिः -त्ति, ईश्वरेच्छानुवर्त्ती -र्त्तिनी -र्त्ति (न्), ईश्वरेच्छानुरोधी &c., ईश्वरेच्छासन्तुष्टः -ष्टा -ष्टं, ईश्वरेच्छाभिमतः -ता -तं, ईश्वरेच्छानुमतः &c., ईश्वरसङ्कल्पानुवर्त्ती &c., भगवत्सङ्कल्पपरितुष्टः &c., यतचित्तः -त्ता -त्तं, शान्तचेताः -ताः -तः (स्).

Resilience, resiliency, *s.* प्रतिघातः. *See* Rebound.

Resin, *s.* सर्ज्जरसः, यक्षधूपः, अरालः, रालः, वृक्षधूपः, वृक्षनिर्य्यासः, शालनिर्य्यासः, सर्ज्जमणिः *m.*, सुरधूपः, धूपनः, सर्व्वरसः, रसाङ्कः, दधि *n.*, तीक्ष्णतैलं, अग्निवल्लभः, वह्निवल्लभः, महारूपः, बहुरूपः, कलकलः, धूनकः.

Resinous, *a.* सर्ज्जरसगुणकः -का -कं, यक्षधूपसगुणः -णा -णं.

To resist, *v. a.* or *n.* (Oppose, withstand) प्रतिकृ, विप्रतिकृ, विप्रकृ, विरुध् (c. 7. -रुणद्धि -रोद्धुं), प्रतिरुध्, प्रतिकूल (nom. प्रतिकूलयति -यितुं), प्रतिकूलः -ला -लं भू, पर्य्यवस्था (c. 1. -तिष्ठति -स्थातुं), प्रत्यवस्था, प्रत्याहन् (c. 2. -हन्ति -न्तुं), व्याहन्, निहन्, प्रतीप (nom. प्रतीपायते), प्रतियुध्, प्रतिसमास् (c. 2. -आस्ते -आसितुं), परिपन्थ (nom. परिपन्थयति -यितुं), विपक्षतां कृ, विरोधं कृ, प्रतिरोधं कृ, प्रातिकूल्यं कृ.—(Hinder) निवृ (c. 10. -वारयति -यितुं), बाध् (c. 1. बाधते -धितुं), प्रतिबन्ध् (c. 9. -बध्नाति -बन्द्धुं), रुध्, निरुध्.—(Check) निग्रह् (c. 9. -गृह्णाति -ग्रहीतुं), विनिग्रह्, स्तम्भ् (c. 10. स्तम्भयति -यितुं), प्रतिष्टम्भ्.

Resistance, *s.* प्रतिकारः, प्रतीकारः, विप्रतिकारः, प्रतिक्रिया, विरोधः, प्रतिरोधः, प्रतिकूलता, प्रातिकूल्यं, प्रतियोगः -गिता, पर्य्यवस्थानं, पर्य्यवस्था, पर्य्यवस्थितिः *f.*, प्रत्यवस्थानं, प्रत्यवस्थितिः *f.*, प्रतिच्छेदः, निकारः, प्रतिबन्धः -न्धकता, प्रतिष्टम्भः, निग्रहः -हणं, अवग्रहः, निवारणं, प्रतियत्नः, प्रत्युपायः.—(In mechanics) प्रत्याघातः, प्रतिघातः.

Resisted, *p. p.* प्रतिकृतः -ता -तं, विप्रतिकृतः &c., विप्रकृतः &c., प्रतिरुद्धः -द्धा -द्धं, रुद्धः &c., पर्य्यवस्थितः &c., प्रत्यवस्थितः &c., प्रतिष्टब्धः -ब्धा -ब्धं, निवारितः -ता -तं, प्रतिहतः &c., व्याहतः &c.

Resister, *s.*, विरोधी *m.* (न्), प्रतिरोधी *m.*, प्रतियोगी *m.*, पर्य्यवस्थाता *m.* (तृ), प्रत्यवस्थाता *m.*, प्रतिरोधकः, प्रतिघाती *m.*, विरोधकारी *m.*

Resistless, *s.* अप्रतिकार्य्यः -र्य्या -र्य्यं, अनवग्रहः -हा -हं. *See* Irresistible.

Resolute, *a.* दृढनिश्चयः -या -यं, स्थिरनिश्चयः &c., दृढसंकल्पः -ल्पा -ल्पं, स्थिरमतिः -तिः -ति, स्थिरचेताः -ताः -तः (स्), सुस्थिरचेताः &c., स्थितधीः -धीः -धि, वज्रसंकल्पः -ल्पा -ल्पं, स्थिरः -रा -रं, सुस्थिरः &c., धीरः -रा -रं, सुधीरः &c., धैर्य्यवान् -वती -वत् (त्), धृतिमान् &c., साङ्कल्पिकः -की -कं, प्रगल्भः -ल्भा -ल्भं, व्यवसायी -यिनी -यि (न्), कृतनिश्चयः &c.

Resolutely, *adv.* दृढनिश्चयपूर्व्वं, सुस्थिरनिश्चयं, सुस्थिरं, स्थिरचेतसा.

Resoluteness, *s.* स्थिरमतित्वं, दृढसंकल्पता, धैर्य्यं. *See* the next.

Resolution, *s.* (Fixed purpose, determination) निश्चयः, विनिश्चयः, सङ्कल्पः, व्यवसायः, अध्यवसायः, निर्णयः, दृढनिश्चयः, दृढसङ्कल्पः, स्थिरनिश्चयः, कल्पः, मतिः *f.*, दृढमतिः *f.*, सम्प्रधारणा.—(Constancy) स्थिरमतित्वं, स्थिरता, सुस्थिरता, स्थैर्य्यं, धीरता, धैर्य्यं, धृतिः *f.*, धृतिमत्त्वं, धारणं -णा, प्रगल्भता, प्रागल्भ्यं, आग्रहः, निर्बन्धः.—(Decision or proposition offered for determination) निश्चयः, निर्णयः, उपन्यासः.—(Separation of parts), *see* Dissolution, Solution.

Resolvable, *s.* विलयनीयः -या -यं, विभाज्यः -ज्या -ज्यं, विभेद्यः -द्या -द्यं.

To resolve, *v. a.* (Dissolve) विली in caus., विद्रु in caus., *see* Dissolve, Liquefy.—(Separate component parts) पृथक्कृ,

विभज्, वियुज्, विभिद्, विछिद्, विश्लिष् in caus., विद्रु in caus., मूलतत्त्वशोधनं कृ, उपोद्घातं कृ.—(Resolve doubts or difficulties) संशयान् छिद् (c. 7. छिनत्ति, छेत्तुं) or उच्छिद्, व्याख्या (c. 2. -ख्याति -तुं), *see To* SOLVE.—(Constitute by resolution) निश्चयपूर्व्वं व्यवस्था in caus. or संस्था or विधा or क्लृप्.

To RESOLVE, *v. n.* (Determine in the mind) निश्चयं कृ, विनिश्चयं कृ, निर्णयं कृ, सङ्कल्पं कृ, मनसा निश्चि (c. 5. -चिनोति -चेतुं) or निर्णी (c. 1. -णयति -णेतुं) or संक्लृप् (c. 10 -कल्पयति -यितुं), व्यवसो (c. 4. -स्यति -सातुं), अध्यवसो, मतिं कृ, बुद्धिं कृ, मनः कृ with dat. or loc. c.; as, 'he resolves to go,' गमनाय मनः or मतिं करोति, गमनाय निश्चयं करोति; 'he resolves to do that,' तत् कर्त्तुं व्यवस्यति; 'he is resolved to sacrifice his life,' स्वप्राणान् परित्यक्तुं व्यवसितो ऽस्ति.—(Dissolve), *see* DISSOLVE, MELT.

RESOLVED, *p. p.* (Analyzed) पृथक्कृतः -ता -तं, व्याकृतः &c., विभक्तः -क्ता -क्तं.—(Determined) कृतनिश्चयः -या -यं, कृतसङ्कल्पः -ल्पा -ल्पं, निश्चितः -ता -तं, सुनिश्चितः &c., सङ्कल्पितः &c., साङ्कल्पिकः -की -कं, व्यवसितः -ता -तं, प्रपतितः &c., कृतबुद्धिः -द्धिः -द्धि; 'having resolved on going to the forest,' वनगमनाय कृतबुद्धिः or वनं गन्तुं व्यवसितः.

RESOLVENT, *s.* (In medicine) द्रावकः, द्रावणं, शोथघ्नः, शोथहृत्.

RESOLVER, *s.* (Of doubts) संशयछेत्ता *m.* (त्तृ), संशयोच्छेदी *m.* (न्).

RESONANCE, *s.* अनुनादः, व्यनुनादः, प्रोद्घोषणं, उद्घोषणं, प्रतिध्वनिः *m.*

RESONANT, *a.* अनुनादी -दिनी -दि (न्), अनुनादः -दा -दं, प्रोद्घुष्टः -ष्टा -ष्टं, संघुष्टः &c., परिसंघुष्टः &c., उपघुष्टः &c., निह्रादी &c., मुखरितः -ता -तं.

To RESORT, *v. n.* आश्रि (c. 1. -श्रयति -यितुं), श्रि, आश्रयणं कृ, गम् (c. 1. गच्छति, गन्तुं), उपगम्, प्रतिगम्, अभिगम्, आगम्, उपे (c. 2. उपैति -तुं, rt. इ), अभ्युपे, अभिसृ (c. 1. -सरति -सर्त्तुं), या (c. 2. याति -तुं), प्रतिया, प्रत्याया, अभिया, या, सेव् (c. 1. सेवते -वितुं); 'resorted to,' आश्रितः -ता -तं; 'having resorted to,' आश्रित्य.

RESORT, *s.* (Act of going or betaking one's self) आश्रयणं, श्रयणं, उपगमः -मनं, अभ्युपगमः -मनं, प्रतिगमनं, अभिगमः -मनं, गमनं, अभिसारणं.—(Place of resort) गमनागमनस्थानं, अभिगमनस्थानं, अभिसारणस्थानं, आश्रयणस्थानं, आश्रयः, समाश्रयः, आयतनं, आशयः; 'resort of man,' लोकयात्रा.—(Refuge, means of relief) गतिः *f.*, उपायः.

To RESOUND, *v. a.* अनुनद् (c. 10. -नादयति -यितुं), व्यनुनद्, अभिनद्, आनद्, सन्नद्, नद्, ध्वन् (c. 10. ध्वनयति -यितुं), प्रतिध्वन्, प्रतिध्वनिं कृ.

To RESOUND, *v. n.* ध्वन् (c. 1. ध्वनति -नितुं), प्रतिध्वन्, प्रध्वन्, स्वन् (c. 1. स्वनति -नितुं), प्रतिस्वन्, स्तन् (c. 1. स्तनति -नितुं), प्रोद्घुष् (c. 1. -घोषति -षितुं), परिसंघुष्, गुञ्ज् (c. 1. गुञ्जति -ञ्जितुं), प्रक्ष्वेड् (c. 1. -क्ष्वेडति -डितुं), रस् (c. 1. रसति -सितुं).

RESOUNDING, *part.* (Sounding with) अनुनादः -दा -दं, निर्घुष्टः -ष्टा -ष्टं, परिसंघुष्टः &c., उपकूजितः -ता -तं, विकूजितः &c.

RESOURCE, *s.* गतिः *f.*, उपायः, अभ्युपायः, युक्तिः *f.*, प्रयुक्तिः *f.*, उपपत्तिः *f.*, तरणोपायः, क्लृप्तिः *f.*, कल्पना; 'other resource,' गत्यन्तरं, अन्योपायः, अन्यगतिः *f.*; 'having no other resource,' अनन्यगतिः -तिः -ति, अनन्यगतिकः -का -कं; 'having no resource,' अगतिकः -का -कं, गतिहीनः -ना -नं, निरुपायः -या -यं; 'last resource,' चरमगतिः *f.*, चरमोपायः, अगतिकगतिः *f.*—(Resources) विभवः, वित्तं, सम्भवः, धनं, अर्थः, आगमः, आयः; 'of small resources,' अल्पविभवः -वा -वं; 'of concealed resources,' उपगुप्तवित्तः -त्ता -त्तं.

RESOURCELESS, *a.* अगतिकः -का -कं, गतिहीनः -ना -नं, निरुपायः -या -यं.

To RESPECT, *v. a.* (Regard, relate to) अपेक्ष् (c. 1. अपेक्षते -क्षितुं, rt. ईक्ष्), अवेक्ष्, प्रतीक्ष्, उद्दिश् (c. 6. -दिशति -देष्टुं), विषयकः -का -कं भू, सम्बन्ध् in pass. (-बध्यते), सम्बद्धः -द्धा -द्धं भू, सम्बन्धी -न्धिनी -न्धि भू.—(Esteem, reverence) मन् (c. 10. मानयति -यितुं), प्रतिमन्, सम्मन्, पूज् (c. 10. पूजयति -यितुं), सम्पूज्, अभिपूज्, आदृ (c. 6. -द्रियते -दर्त्तुं), सेव् (c. 1. सेवते -वितुं, c. 10. सेवयति -यितुं), भज् (c. 1. भजति, भक्तुं), अर्ह् (c. 10. अर्हयति -यितुं), अर्च् (c. 1. अर्चति -र्चितुं, c. 10. अर्चयति -यितुं), अभ्यर्च्, समभ्यर्च्, समर्च्, सम्भू (c. 10. -भावयति -यितुं), पुरस्कृ, आदरं कृ, सम्मानं कृ.

RESPECT, *s.* (Relation, reference, regard) अपेक्षा, प्रतीक्षा, उद्देशः, विषयत्वं -ता, सम्बन्धः, अवेक्षा, अन्ववेक्षा, सन्धानं; 'with respect to,' अपेक्षया, अपेक्ष्य, प्रतीक्ष्य, उद्दिश्य, उद्देशेन, प्रति affixed; as, 'with respect to me,' मां प्रति.—(Esteem, reverence) मानं, सम्मानं, आदरः, मान्यत्वं, पूजा, अर्हा -र्हणं -णा, सम्भावना, अर्चा, अर्चनं -ना, अभ्यर्चा -र्चनं, सेवा -वनं, पुरस्कारः, प्रतीतिः *f.*, सत्कारः, अनुनयः, भक्तिः *f.*, सम्भ्रमः, मर्य्यादा; 'much respect,' बहुमानं.—(Respects, act of reverence) प्रणिपातः, प्रणामः, प्रणतिः *f.*, प्रणिपतनं, अभिवादनं, नमस्कारः, नमस्, नमस्या, वन्दनं, अभिवन्दनं; 'to pay one's respects,' प्रणिपत्, प्रणम्, नमस्कृ, अभिवद्, अभिवन्द्, वन्दनं कृ, प्रणामं कृ.—(Regard, view) अवेक्षा, अन्ववेक्षा, प्रतीक्षा, दृष्टिः *f.*; 'respect of persons,' भेददृष्टिः *f.*, पक्षदृष्टिः, पक्षपातः.—(Particular) विषयः, प्रकरणं.

RESPECTABILITY, *s.* मान्यता, सम्मान्यता, आर्य्यता -त्वं, गौरवं, गुरुता -त्वं, मर्य्यादा, प्रतिष्ठा; 'family respectability,' कुलमर्य्यादा.

RESPECTABLE, *a.* आर्य्यः -र्य्या -र्य्यं, मान्यः -न्या -न्यं, माननीयः -या -यं, सम्मान्यः &c., आदरणीयः -या -यं, पूजनीयः -या -यं, पूज्यः -ज्या -ज्यं, पूजनार्हः -र्हा -र्हं, प्रतीक्ष्यः -क्ष्या -क्ष्यं, प्रतीक्षणीयः -या -यं, अर्च्यः -र्च्या -र्च्यं, अर्चनीयः -या -यं, गुरुः -र्वी -रु, सगौरवः -वा -वं, गौरवितः -ता -तं, मर्य्यादावान् -वती -वत् (त्), मर्य्यादापालकः -का -कं, कुलमर्य्यादापालकः &c., मानी -निनी -नि (न्), पुरस्करणीयः &c., शिष्टः -ष्टा -ष्टं, सम्भावितः -ता -तं, भद्रकः -का -कं, अकुत्सितः -ता -तं, प्रतिष्ठितः &c., सप्रतिष्ठः -ष्ठा -ष्ठं; 'highly respectable,' परममान्यः &c.; 'a respectable person,' आर्य्यजनः, आर्य्यकः, आर्य्यमिश्रः, सज्जनः, सुजनः; 'respectable woman,' आर्य्यिका, आर्य्यका, कुलपालिका, कुलमर्य्यादापालिका, कुलस्त्री, कुलवधूः *f.*—(Moderate, fair) मध्यमः -मा -मं.

RESPECTABLY, *adv.* आर्य्यं, सगौरवं, समर्य्यादं, आर्य्यवत्, मान्यवत्, शिष्टवत्, आर्य्यजनवत्, आर्य्य in comp.; as, 'respectably dressed,' आर्य्यवेशः -शा -शं.

RESPECTED, *p. p.* सम्मानितः -ता -तं, पूजितः &c., आदृतः &c., कृतादरः -रा -रं, सेवितः -ता -तं, अर्चितः &c., प्रतीक्षितः &c.

RESPECTER, *s.* पूजकः, सम्पूजकः, आदरकृत्, प्रतीक्षकः, अवेक्षकः.

RESPECTFUL, *a.* आदरकारी -रिणी -रि (न्), आदृतः -ता -तं, दत्तादरः -रा -रं, कृतादरः &c., सादरः -रा -रं, आदरपूर्व्वः -र्व्वा -र्व्वं, आदरशीलः -ला -लं, आदरयुक्तः -क्ता -क्तं, मानकारी &c., मर्य्यादाशीलः &c., समर्य्यादः -दा -दं, प्रतीतः -ता -तं, सम्प्रतीतः &c.

RESPECTFULLY, *adv.* सादरं, समानं, आदरपूर्व्वं, आदरपुरःसरं, ससम्मानं, सम्मानपूर्व्वं, समर्य्यादं, अर्चापूर्व्वकं.

RESPECTFULNESS, *s.* आदरशीलता, मर्य्यादाशीलता, सादरत्वं, मर्य्यादा.

RESPECTING, *part.* प्रतीक्षकः -का -कं, अपेक्षकः &c., उद्देशकः &c.

अपेक्ष्य, प्रतीक्ष्य, उद्दिश्य, प्रति affixed with an acc. c.

RESPECTIVE, *a.* (Relative, not absolute) सापेक्षः -क्षा -क्षं, अपेक्षकः -का -कं,ससम्बन्धः -न्धा -न्धं. *See* RELATIVE.—(Several) इतरेतरः -रा -रं, अन्योन्यः -न्या -न्यं, *see* SEVERAL; 'respective inclination,' इतरेतरकाम्या.—(Own) expressed by doubling the pronouns स्व, स्वकीय, स्वीय, स्वक, निज, आत्म, आत्मीय &c.; thus, 'in their respective stations,' स्वेषु स्वेषु स्थानेषु or simply by doubling the noun; thus, 'they dwell each in their respective houses,' गृहे गृहे प्रत्येकं वसन्ति.

RESPECTIVELY, *adv.* इतरेतरं, अन्योन्यं, प्रत्येकं, प्रति or अनु prefixed, or more usually expressed by doubling a pronoun or noun, *see* the last.

RESPIRATION, *s.* श्वासप्रश्वासं, श्वासोच्छ्वासं, श्वासः, श्वसनं, उच्छ्वसनं, प्राणः.

RESPIRATORY, *a.* श्वासप्रश्वासकारी -रिणी &c., श्वासोच्छ्वाससम्बन्धी &c.

To RESPIRE, *v. n.* श्वासप्रश्वासं कृ, श्वासोच्छ्वासं कृ, श्वस् (c. 2. श्वसिति -तुं), आश्वस्, उच्छ्वस्, प्रश्वस्, प्राण् (c. 2. प्राणिति -तुं, rt. अन्).

RESPITE, *s.* विश्रामः, विश्रान्तिः *f.*, विरामः, विरतिः *f.*, निवृत्तिः *f.*, उपशमः, अपशमः, शमः, शान्तिः *f.*, विच्छेदः, अवरतिः *f.* *See* REPRIEVE.

To RESPITE, *v. a.* विश्रामं दा, विश्रान्तिं दा, विश्रम् in caus. (-श्रामयति -यितुं), विरामं दा, अवकाशं दा. *See To* REPRIEVE.

RESPLENDENCE, RESPLENDENCY, *s.* प्रतापः, तेजस् *n.*, अतितेजस्. *See* SPLENDOR.

RESPLENDENT, *a.* प्रतापी -पिनी -पि (न्), सुप्रभः -भा -भं, देदीप्यमानः -ना -नं, प्रकाशमानः &c., विभ्राजमानः &c., अत्यादित्यः -त्या -त्यं, भानुमान् -मती -मत् (त्) *See* SPLENDID.

To RESPOND, *v. n.* प्रतिवच् (c. 2. -वक्ति -क्तुं), प्रतिवद् (c. 1. -वदति -दितुं), प्रतिब्रू, प्रतिभण्, प्रतिजल्प्. *See To* ANSWER, REPLY, CORRESPOND.

RESPONDENT, *s.* (In law) प्रतिवादी *m.* (न्), उत्तरवादी *m.*, प्रतिपक्षी *m.*, उत्तरपक्षी *m.*, समाधानपक्षी *m.*—(Party or cause of the respondent) उत्तरपक्षः, प्रतिपक्षः, समाधानपक्षः.

RESPONSE, *s.* (Answer) प्रतिवाक्यं, प्रतिवचनं, उत्तरं, *see* REPLY.—(In disputations) प्रतिवादः, उत्तरं, प्रत्युत्तरं, समाधानं.—(Of an oracle) शकुनः -नं, प्रश्नः, प्रसादः, देववाणी, आकाशवाणी.—(In a litany, &c.) उत्तरवाक्यं.

RESPONSIBILITY, *s.* अनुयोगाधीनता, अनुसन्धानाधीनता, विचाराधीनता, आह्वानाधीनता, अभियोज्यता, अनुयोज्यता, अभियोजनीयता, पर्यनुयोगाधीनता, पर्यनुयोज्यता, अनुसन्धानयोग्यता, आह्वानयोग्यता, आह्वेयता, उत्तरदानाधिकारः, उत्तरदानाधीनता, पृच्छाधीनता.

RESPONSIBLE, *a.* (Liable to account or answer) अनुयोगाधीनः -ना -नं, पर्यनुयोगाधीनः &c., अनुसन्धानाधीनः &c., आह्वानाधीनः &c., आह्वेयः -या -यं, विचाराधीनः -ना -नं, अभियोज्यः -ज्या -ज्यं, अनुयोज्यः &c., पर्यनुयोज्यः &c., अनुयोजनीयः -या -यं, अनुयोक्तव्यः -व्या -व्यं, अभियोक्तव्यः &c., पृच्छाधीनः &c., आह्वानयोग्यः &c., अभियोक्त्राह्वानाधीनः &c., उत्तरदानाधिकारी -रिणी -रि (न्), उत्तरदानाधीनः -ना -नं; 'a responsible person,' अनुयोगाधीनजनः, यः प्रत्युत्तरं or प्रतिवाक्यं दातुम् अर्हति or येन प्रत्युत्तरं दातव्यम् ईदृशो जनः.—(Admitting or requiring an answer) प्रतिवाक्यः -क्या -क्यं.

RESPONSION, *s.* प्रतिवचनं, प्रतिवाक्यं, उत्तरकरणं, प्रत्युत्तरकरणं.

RESPONSIVE, *a.* उत्तरकारी -रिणी -रि (न्), उत्तरदायकः -का -कं, उत्तरदायी &c.

REST, *s.* (Cessation of action or motion) विश्रामः, विश्रान्तिः *f.*, विश्रमः, निर्वृतिः *f.*, निवृत्तिः *f.*, विरामः, विरतिः *f.*, अवरतिः *f.*, उपरतिः *f.*, चेष्टानिवृत्तिः *f.*, व्यापारनिवृत्तिः *f.*, श्रमनिवृत्तिः *f.*, निश्चलता, श्रमच्छेदः, निर्व्यापारता, निरुद्यमता, व्यापाराभावः, उद्योगनिवृत्तिः *f.*, स्थिरता, नैश्चल्यं, अचलता, चलनाभावः. *See* QUIESCENCE.—(Tranquillity, ease, quiet) सुखं, शान्तिः *f.*, शमः, उपशमः, शान्तता, प्रशान्तिः *f.*, स्वस्थता, स्वास्थ्यं, सौख्यं, समाधानं.—(Sleep, repose) निद्रा, निद्रावस्था, निद्रादशा, स्वप्नः, शयनं; 'at rest,' शान्तः -न्ता -न्तं, निर्वृतः -ता -तं, विश्रान्तः -न्ता -न्तं, निश्चलः -ला -लं, निर्व्यापारः -रा -रं, निश्चेष्टः -ष्टा -ष्टं, निरुद्यमः -मा -मं, निरुद्योगः -गा -गं.—(Pause in music or poetry) यतिः *f.*, अवमानं.—(That which is left) शिष्टं, अवशिष्टं, उच्छिष्टं, शेषः -षं, अवशेषः, *see* REMAINDER.—(The others) शिष्टजनाः *m. pl.*, अवशिष्टजनाः *m. pl.*, इतरे *m. pl.*, अपरे *m. pl.*, अन्ये *m. pl.* *See* ET-CÆTERA.

To REST, *v. n.* (Cease from action or motion, be still) विश्रम् (c. 4. -श्राम्यति -श्रमितुं), निश्चलीभू, निश्चलः -ला -लं भू, विरम् (c. 1. -रमति -रन्तुं), आरम्, उपरम्, निवृत् (c. 1. -वर्त्तते -र्त्तितुं), निर्वृत्, विनिवृत्, स्थिरीभू.—(Be tranquil, quiet) शम् (c. 4. शाम्यति, शमितुं), उपशम्, प्रशम्, सुखी -खिनी -खि भू, स्वस्थः -स्था -स्थं भू.—(Repose, sleep) शी (c. 2. शेते, शयितुं), स्वप् (c. 2. स्वपिति -तुं), संविश् (c. 6. -विशति -वेष्टुं), निद्रा, शयनं कृ, स्वप्नं कृ, निद्रां कृ.—(Lean on) अवलम्ब् (c. 1. -लम्बते -म्बितुं), समालम्ब्, आलम्ब्, संश्रि (c. 1. -श्रयति -ते -यितुं), समाश्रि, उपाश्रि, अवस्था (c. 1. -तिष्ठति -स्थातुं), निली (c. 4. -लीयते -लेतुं), संनिली, अवलम्बनं कृ.—(Confide) विश्वस्, विश्रम्भ्.—(Remain) स्था, वृत्.

To REST, *v. a.* (Lay to rest, cause to rest) शी in caus. (शाययति -यितुं), विश्रम् (c. 10. -श्रामयति -यितुं), संविश् (c. 10. -वेशयति -यितुं), शयनं कृ.—(Lay, place on a support) अवलम्ब् in caus. (-लम्बयति -यितुं), न्यस् (c. 4. -अस्यति -सितुं), निधा, आधा, निविश्, स्था in caus., श्रि in caus., सम्, आधारं कृ, आश्रयं कृ.

RESTED, *p.p.* (Relieved from fatigue) विश्रान्तः -न्ता -न्तं, गतक्लमः -मा -मं, गतश्रमः -मा -मं, *see* REFRESHED.—(Laid on for support) अवलम्बितः -ता -तं, आश्रितः -ता -तं, निलीनः -ना -नं, निषण्णः -ण्णा -ण्णं, निहितः &c., न्यस्तः -स्ता -स्तं; 'having rested upon,' अवलम्ब्य, उपधाय.

RESTING, *part.* अवलम्बी -म्बिनी -म्बि (न्), अवलम्बितः -ता -तं, आश्रितः &c., संश्रितः &c., सन्निष्ठमानः -ना -नं; 'her face resting on her hand,' हस्तनिहितवदना; 'resting on the head,' मस्तकस्थः -स्था -स्थं; 'a vessel resting on his head,' मस्तकावस्थितभाण्डं.

RESTING-PLACE, *s.* विश्रामस्थानं, विश्रमस्थानं, शयनस्थानं, उपधानं.

RESTITUTION, *s.* प्रतिदानं, प्रत्यर्पणं, परिदानं, हृतप्रतिदानं, हृतप्रत्यर्पणं, हृतपरिदानं, पुनरर्पणं, प्रत्यानयनं. *See* RESTORATION.

RESTIVE, RESTIFF, *a.* दुर्दम्यः -म्या -म्यं, दुर्विनीतः -ता -तं, दुर्विनेयः -या -यं, दुर्वश्यः -श्या -श्यं, अदम्यः &c., अवश्यः &c., अविनेयः &c., प्रतीपः -पा -पं, विषमः -मा -मं, दुर्निग्रहः -हा -हं, दुर्द्धरः -रा -रं, दुष्टः -ष्टा -ष्टं; 'horse,' शूकलः, शूलकः; 'elephant,' अंकुशदुर्द्धरः.

RESTIVENESS, *s.* दुर्दम्यता, दुर्विनीतता, अवश्यता, प्रतीपता, दुष्टता.

RESTLESS, *a.* (Unquiet) अशान्तः -न्ता -न्तं, शान्तिहीनः -ना -नं, अनिर्वृतः -ता -तं, अशान्तचित्तः -त्ता -त्तं, अस्वस्थः -स्था -स्थं, व्यग्रः -ग्रा -ग्रं, व्यग्रचित्तः &c., परिप्लवः -वा -वं, व्याकुलः -ला -लं, विह्वलः -ला -लं, असमाहितः -ता -तं.—(Fidgety, always moving) चञ्चलः -ला -लं, चपलः -ला -लं, सदाचलः &c., सततगतिः -तिः -ति, सदा-

गतिः &c., निरास्पदः -दा -दं, चलमतीनः -ना -नं.—(Sleepless) निर्निद्रः -द्रा -द्रं, विनिद्रः &c., अनिद्रः &c., उन्निद्रः &c., निद्राहीनः -ना -नं, स्वप्नहीनः &c.

RESTLESSLY, *adv.* अशान्तं, अशान्त्या, चञ्चलं, सचाञ्चल्यं, अनिर्वृतं.

RESTLESSNESS, *s.* अशान्तिः *f.*, शान्तिहीनता, अनिर्वृतिः *f.*, अस्वस्थता, अस्वास्थ्यं, चञ्चलता, चाञ्चल्यं, चपलता, व्यग्रता, व्याकुलता, असमाधानं, असमाहितत्वं.

RESTORABLE, *a.* परावर्त्यः -र्त्या -र्त्यं, प्रतिदेयः -या -यं, प्रत्यर्पणीयः &c.

RESTORATION, *s.* (Act of giving back) प्रतिदानं, प्रत्यर्पणं, परावर्त्तः -र्त्तनं, परावृत्तिः *f.*, परिदानं, हृतप्रतिदानं, हृतपरिदानं, हृतप्रत्यर्पणं.—(Bringing back, or replacing in a former state) प्रत्यानयनं, उद्धरणं, उद्धारः, पूर्व्ववत्करणं, पूर्व्वस्थितिस्थापना, पूर्व्वदशास्थापनं, पूर्व्वदशानयनं, पुनःस्थापनं -ना.—(Repairing) जीर्णोद्धारः, जीर्णोद्धरणं, नष्टोद्धारः, नष्टोद्धरणं.—(Recovery) समुत्थानं, रोगात्समुत्थानं. *See* RECOVERY.

RESTORATIVE, *a.* तेजोदायकः -का -कं, तेजस्करः -रा -रं, सत्त्वदः -दा -दं, अग्निदायकः &c., अग्निदः &c., तेजोवर्धकः &c. *See* INVIGORATING.

RESTORATIVE, *s.* अग्निदायकम् or तेजोदायकम् औषधं, तेजोवर्धनं.

To RESTORE, *v. a.* (Give back) प्रतिदा (c. 3. -ददाति -दत्ते -दातुं), परिदा, प्रत्यृ in caus. (-अर्पयति -यितुं), प्रतिपद् (c. 10. -पादयति -यितुं), पुनः प्रतिपद्, पुनर् ऋ in caus., पुनर् दा, पुनः प्रदा, परावृत् in caus. (-वर्त्तयति -यितुं), प्रयम् (c. 1. -यच्छति -दातुं), पुनः प्रयम्, निर्यत् (c. 10. -यातयति -यितुं), समुपाकृ, प्रत्यर्पणं कृ, प्रतिदानं कृ, परावर्त्तं कृ.—(Replace) पुनः स्था in caus. (स्थापयति -यितुं), प्रतिष्ठा, प्रतिरुह् in caus., प्रतिधा, *see* REPLACE.—(Bring back to its former state, repair) पूर्व्ववत् कृ, पूर्व्वस्थितिम् आनी or गम् in caus., पूर्व्वदशाम् आनी or प्रत्यानी, उद्धृ (c. 1. उद्धरति, उद्धर्त्तुं, rt. हृ), जीर्णोद्धारं कृ, प्रतिकृ, प्रतिसंस्कृ, साध्, *see To* REPAIR.—(Bring back) प्रत्यानी (c. 1. -नयति -नेतुं), प्रतिनी, पुनर् आनी.—(Restore to life) जीव् in caus., *see To* RE-ANIMATE.—(To health), *see To* CURE, RECOVER.

RESTORED, *p. p.* (Given back) प्रतिदत्तः -त्ता -त्तं, परिदत्तः &c., प्रत्यर्पितः -ता -तं, पुनरर्पितः &c., प्रतिपादितः &c., प्रत्यापन्नः -न्ना -न्नं, प्रदत्तः -त्ता -त्तं, परावृत्तः -त्ता -त्तं, परावर्त्तितः -ता -तं.—(Replaced) पुनःस्थापितः -ता -तं, प्रतिष्ठापितः &c.—(Repaired) उद्धृतः -ता -तं, जीर्णोद्धृतः &c., प्रतिसंस्कृतः &c.—(Brought back) प्रत्यानीतः -ता -तं, पुनरानीतः &c.—(To life) प्राप्तजीवनः -ना -नं.—(To one's senses) लब्धचेताः -ताः -तः (स्), प्राप्तचैतन्यः -न्या -न्यं. *See* RECOVERED.

RESTORER, *s.* प्रतिदाता *m.* (तृ), उद्धर्त्ता *m.* (र्त्तृ), जीर्णोद्धर्त्ता, जीर्णोद्धारकः.

To RESTRAIN, *v. a.* निग्रह् (c. 9. -गृह्णाति -ग्रहीतुं), विनिग्रह्, सन्निग्रह्, नियम् (c. 1. -यच्छति -यन्तुं), विनियम्, संयम्, परियम्, अभ्यायम्, यम्, निरुध् (c. 7. -रुणद्धि -रोद्धुं), अवरुध्, सन्निरुध्, संरुध्, निवृ (c. 10. -वारयति -यितुं), वृ, संहृ (c. 1. -हरति -हर्त्तुं), प्रत्याहृ, उपसंहृ, विधृ (c. 10. -धारयति -यितुं), यन्त्र् (c. 10. यन्त्रयति -यितुं), बाध्, निषिध्, प्रतिषिध्, प्रतिबन्ध्, नियमनं कृ, आकलनं कृ, आकल्.

RESTRAINABLE, *a.* निग्रहीतव्यः -व्या -व्यं, निग्रहणीयः -या -यं, नियन्तव्यः &c., नियम्यः -म्या -म्यं, निवारणीयः &c., संहरणीयः &c., प्रत्याहरणीयः &c., आकलनीयः &c.

RESTRAINED, *p. p.* निगृहीतः -ता -तं, नियमितः &c., नियतः &c., संयतः &c., संयमितः &c., यतः &c., यन्त्रितः &c., नियन्त्रितः &c., रुद्धः -द्धा -द्धं, निरुद्धः &c., विधृतः -ता -तं, विधारितः &c., निवारितः &c., प्रत्याहृतः &c., उपसंहृतः &c., बाधितः &c., आकलितः &c., बद्धः -द्धा -द्धं, निबद्धः &c., प्रतिबद्धः &c., धैर्य्यशाली -लिनी &c.; 'in desire,' यतेन्द्रियः -या -यं, बद्धकामः -मा -मं.

RESTRAINER, *s.* नियन्ता *m.* (न्तृ), यन्ता *m.*, नियामकः, निग्रहीता *m.*, निरोधकः.

RESTRAINT, *s.* निग्रहः -हणं, नियमनं, संयमः -मनं, संयामः, यमः, यतिः *f.*, नियतिः *f.*, यमनं, निगृहीतिः *f.*, यन्त्रणं, नियन्त्रणं, निरोधः, अवरोधः, प्रतिरोधः, उपरोधः, रोधः, सम्प्रतिरोधकः -कं, संग्रहः, प्रग्रहः, वियमः, वियामः, वारणं, निवारणं, आवरणं, प्रतिबन्धः, निबन्धः -न्धनं, बाधः -धा -धनं, आकलनं, दमः -मनं, स्तम्भः, गुप्तिः *f.*, निषेधः, प्रतिषेधः; 'self-restraint,' आत्मसंयमः, आत्मयमः, दान्तिः *f.*, नैयत्यं; 'absence of restraint,' निर्यन्त्रणं.—(Of speech) वाग्यमः -मनं, वाग्यतत्वं.—(In law, limitation) आसेधः; 'of time,' कालासेधः; 'of place,' स्थानासेधः; 'from living away from home,' प्रवासासेधः; 'from employment,' कर्म्मासेधः.

To RESTRICT, *v. a.* निबन्ध् (c. 9. -बध्नाति -बन्द्धुं), परिमा (c. 2. -माति -तुं), परिमितं -तां कृ, सपरिमाणं -णां कृ, नियम् (c. 1. -यच्छति -यन्तुं), संयम्, निग्रह् (c. 9. -गृह्णाति, ग्रहीतुं), निरूप् (c. 10. -रूपयति -यितुं), मर्य्यादां or सीमां निरूप्, समर्य्यादं -दां कृ, ससीमं -मां कृ.

RESTRICTED, *p. p.* निबद्धः -द्धा -द्धं, परिमितः -ता -तं, मितः &c., नियतः &c., नियमितः &c., समर्य्यादः -दा -दं, सावधिकः -का -कं, ससीमः -मा -मं; 'as a word,' मितार्थः, योगरूढः. *See* LIMITED.

RESTRICTION, *s.* निबन्धः -न्धनं, बन्धः -न्धनं, नियमः -मनं, संयमः, नियतिः *f.*, निग्रहः, मर्य्यादा, सीमा, परिसीमा, अवधिः *m.*, परिमितिः *f.*, परिमितता, परिमाणं, परिच्छेदः, विशेषः -षणं; 'without restriction,' अनिबन्धनः -ना -नं, अविशेषणः -णा -णं.

RESTRICTIVE, *a.* निबन्धनः -ना -नं, नियामकः -का -कं, परिमापनः -ना -नं, परिच्छेदकः &c., मर्य्यादानिरूपकः &c., सीमानिरूपकः &c.

To RESULT, *v. n.* (Issue, proceed) उत्पद् (c. 4. -पद्यते -पत्तुं), समुत्पद्, जन् (c. 4. जायते, जनितुं), उपजन्, सिध् (c. 4. सिध्यति, सेद्धुं), प्रभू (c. 1. -भवति -वितुं), उद्भू, अनुभू in pass., प्रवृत् (c. 1. -वर्त्तते -र्त्तितुं), अनुवृत्, निःसृ, उदि.—(End in) अवसो (c. 4. -स्यति -सातुं), पर्य्यवसो, निष्पद् in pass., विगम्, निर्गम्, अपगम्.

RESULT, *s.* (Consequence, issue) परिणामः, फलं, उत्पत्तिः *f.*, सिद्धिः *f.*, प्रयुक्तिः *f.*, प्रयोगः, उत्पन्नं, उद्भूतं, निष्पन्नं, उत्तरं, फलमुत्तरं, फलोदयः, फलोत्पत्तिः *f.*, निर्गमः, शेषः, अन्तः, उदर्कः, जन्यं, अनुभवः, भव्यं, अनुसारः, अनुवर्त्तनं, अन्वयः, प्रत्ययः, अनुषङ्गः, योगः, कार्य्यं, अर्थः, फलितार्थः, अवसानं, अवसायः, पर्य्यवसानं, गुणः, परिपाकः, *see* EFFECT; 'unexpected result,' विपाकः; 'happy result,' शुभफलं.—(Result of reasoning, conclusion) सिद्धान्तः, सिद्धिः *f.*, निष्कृतार्थः, मथितार्थः, निर्णीतार्थः, उपपत्तिः *f.*, अनुभूतिः *f.*, अनुमितिः *f.*, घटितार्थः.

RESULTING, *part.* प्रयुक्तः -क्ता -क्तं, उत्पन्नः -न्ना -न्नं, जातः -ता -तं, जनितः &c., जन्यः -न्या -न्यं, उद्भूतः &c., अनुवृत्तः -त्ता -त्तं, प्रवृत्तः &c., अनुसारी -रिणी &c., अनुयायी &c., फल in comp., प्रभव in comp., उद्भव in comp.; 'pain resulting from sin,' पापप्रयुक्तं दुःखं; 'fever resulting from fasting,' उपवासप्रयुक्तो ज्वरः; 'obedience resulting from fear,' भयप्रयुक्ता भक्तिः; 'resulting from that,' तत्फलः -ला -लं.

RESUMABLE, *a.* प्रत्याहरणीयः -या -यं, प्रत्याहार्य्यः -र्य्या -र्य्यं, अपहार्य्यः &c.

RESUMÉ, *s.* सारः, सारार्थः, सारसंग्रहः, संग्रहः, उपसंहारः.

To RESUME, *v. a.* (Take back or again) पुनर् आदा (c. 3. -ददाति

-दत्ते -दातुं), प्रत्यादा, पुनर् ग्रह् (c. 9. गृह्णाति, ग्रहीतुं), प्रत्याहृ (c. 1. -हरति -हर्त्तुं), पुनर् आहृ, पुनर् हृ, अपहृ, अनुप्राप् (c. 5. -आप्नोति -आप्तुं), पुनः प्राप्, प्रत्यवाप्, पुनर् लभ्.—(Take up again after interruption, begin again) प्रकृतम् or प्रस्तुतम् or मूलविषयम् अनुसृ (c. 1. -सरति -सर्त्तुं), प्रकृतप्रसङ्गं कृ, प्रकृतानुसरणं कृ, पुनर् आरभ् (c. 1. -रभते -रब्धुं), पुनःप्रसङ्गं कृ, पुनर् वद् or ब्रू; 'he resumed,' पुनराह.

Resumed, *p.p.* प्रत्याहृतः -ता -तं, अपहृतः &c., पुनर्गृहीतः -ता -तं.

Resuming, *part.* दत्तापहारी -रिणी -रि (न्), प्रत्याहारकः -का -कं.

Resumption, *s.* प्रत्याहरणं, प्रत्याहारः, पुनराहरणं, पुनर्हरणं, अपहारः, अपहरणं, पुनर्ग्रहणं, प्रत्यादानं, पुनरादानं; 'of a grant,' दत्तापहारः, दत्तापहरणं.

Resurrection, *s.* मृतोत्थानं, मृतोत्थितिः *f.*, मृतलोकोत्थानं, पुनरुत्थानं, पुनरुत्थितिः *f.*, मृतपुनरुत्थानं, न्यायदिने or विचारदिने मृतलोकानां पुनरुत्थितिः *f.* or श्मशानादुत्थितिः *f.*; 'resurrection day,' मृतोत्थानकालः.

To resuscitate, *v.a.* प्रतिजीव् (c. 10. -जीवयति -यितुं), संजीव्, उज्जीव्, जीव्, पुनः सजीवं -वां कृ, उत्था in caus. *See To* revive.

Resuscitated, *p.p.* संजीवितः -ता -तं, प्रतिजीवितः &c., पुनः सजीवीकृतः &c.

Resuscitation, *s.* प्रतिजीवनं, सञ्जीवनं, पुनः सजीवीकरणं, पुनरुत्थापनं.

Retail, retailing, *s.* अल्पविक्रयः, खण्डविक्रयः, क्षुद्रविक्रयः, अल्पपणाया, अल्पविपणः, अल्पवाणिज्यं, खण्डवाणिज्यं, क्षुद्रवाणिज्यं.

To retail, *v.a.* अल्पशः or खण्डशो विक्री (c. 9. -क्रीणाति -णीते -क्रेतुं), अल्पविक्रयं कृ, खण्डविक्रयं कृ, अल्पपणायां कृ, पण् (c. 1. पणते -णितुं), खण्डवाणिज्यं कृ.

Retailer, *s.* खण्डविक्रयी *m.* (न्), खण्डविक्रयकारी *m.*, अल्पविक्रयकारी *m.*, विपणी *m.* (न्), प्रापणिकः, आपणिकः, खण्डवाणिज्यकृत् *m.*, खण्डवणिक् *m.* (ज्).

To retain, *v.a.* (Keep, hold) धृ (c. 10. धारयति -यितुं, c. 1. धरति, धर्त्तुं), सन्धृ, धा (c. 3. दधाति, धत्ते, धातुं), रक्ष् (c. 1. रक्षति -क्षितुं), संरक्ष्, अभिरक्ष्, धारणं कृ.—(Keep back) विधृ, निग्रह्, विनिग्रह् सन्निग्रह्, संहृ, उपसंहृ.—(Hire, engage) वेतनेन or मूल्येन ग्रह्, निरूपितवेतनं प्रतिज्ञाय कर्म्मणि नियुज् or स्था in caus.—(Remember), *see* the word.

Retained, *p.p.* धृतः -ता -तं, धारितः &c., विधृतः &c., स्थापितः &c.

Retainer, *s.* (Dependant, adherent) आश्रितः, आश्रयी *m.* (न्), अनुचरः, अनुजीवी *m.* (न्), उपजीवी *m.*, भाक्तिकः, भृत्यः, अवलम्बी *m.*, अनुषङ्गी *m.*, अनुगामी *m.*, अनुचारी *m.*, अनुयायी *m.*, अनुगः, सपक्षः, सेवकः, पार्श्वकः; 'an old retainer,' चिराश्रितः, चिरसेवकः; 'body of retainers,' परिवारः, भृत्यवर्गः, सेवकवर्गः, अनुयायिवर्गः.

Retaining, *s.* धारणं, धरणं, धृतिः *f.*, रक्षणं, नियोजनं, स्थापनं.

To retaliate, *v.a.* प्रतिकृ, विप्रतिकृ, विप्रकृ, प्रत्यपकृ, वैरप्रतिकारं कृ, प्रत्यपकारं कृ, प्रतिफल (nom. प्रतिफलयति -यितुं), प्रतिफलं दा, प्रतियत्नं कृ, प्रतिहिंस् (c. 7. -हिनस्ति, c. 1. -हिंसति -सितुं), प्रतिहिंसां कृ, वैरशुद्धिं कृ, वैरोद्धारं कृ, निर्यत् (c. 10. -यातयति -यितुं), वैरनिर्यातनं कृ.

Retaliated, *p.p.* प्रतिकृतः -ता -तं, विप्रतिकृतः &c., विप्रकृतः &c., प्रत्यपकृतः &c., प्रतिफलितः -ता -तं, निर्यातितः -ता -तं.

Retaliation, *s.* प्रतिकारः, प्रतीकारः, प्रतिकृतिः *f.*, प्रतिक्रिया, प्रतिकर्म्म *n.* (न्), विप्रतिकारः, विप्रकारः, विप्रकृतिः *f.*, प्रत्यपकारः, वैरप्रतिक्रिया, वैरप्रतिकारः, प्रतिविधिः *m.*, प्रतिफलं, प्रतियत्नः, प्रतिहिंसा, वैरशुद्धिः *f.*, वैरोद्धारः, निर्यातनं, वैरनिर्यातनं, अपकारः, अपक्रिया, अपकरणं, समाधिः *m.*, क्षुद्रं.

To retard, *v.a.* (Diminish the velocity of motion) वेगरोधं कृ, वेगावरोधं कृ, वेगं or गतिं रुध् (c. 7. रुणद्धि, रोद्धुं) or अवरुध् or विधृ (c. 10. -धारयति -यितुं), वेगविधारणं कृ, वेगविलम्बनं कृ, गतिविलम्बनं कृ, गतिमन्दतां कृ, मन्दगतिं -तिं -ति कृ.—(Cause delay) विलम्ब् (c. 10. -लम्बयति -यितुं), विलम्बं कृ, विलम्बनं कृ, मन्दतां कृ, मन्दं -न्दां कृ.—(Hinder) रुध्, निरुध्, प्रतिरुध्, अवरुध्, संरुध्, बाध्, स्तम्भ्, प्रतिबन्ध्.

Retardation, retarding, *s.* वेगरोधः, वेगावरोधः, वेगविधारणं, वेगविलम्बनं, गतिविलम्बनं, गतिप्रतिबन्धः, वेगसंकोचः, रोधः, अवरोधः, विलम्बनं.

Retarded, *p.p.* रुद्धवेगः -गा -गं, अवरुद्धवेगः &c., रुद्धगतिः -तिः -ति, अवरुद्धगतिः &c., विलम्बितः -ता -तं, विलम्बितवेगः -गा -गं, विलम्बितगतिः -तिः -ति, विधारितवेगः &c.; 'gradually retarded motion,' क्षीयमाणो वेगः, क्षीयमाणा गतिः.

Retarding, *part.* विलम्बी -म्बिनी &c., वेगरोधकः -का -कं, वेगावरोधकः &c.

To retch, *v.n.* वमितुं or छर्दयितुं यत्नं कृ or उद्यमं कृ or उद्यम्, वमनोद्यमं कृ.

Retention, *s.* धारणं -णा, धृतिः *f.*, धरणं, आग्रहः, ग्रहः, संग्रहः -हणं.—(Faculty of the mind) धारणाशक्तिः *f.*, धारणा, स्मृतिः *f.*, मेधा.

Retentive, *a.* (As memory) धारणावान् -वती -वत् (त्), धारणाशक्तिविशिष्टः -ष्टा -ष्टं, धारणाशक्तियुक्तः -क्ता -क्तं.—(Retaining) धारकः -का -कं, धरः -रा -रं, आग्रही -हिणी &c.; 'of moisture,' क्लेदधारकः -का -कं; 'of life,' दुर्मरः -रा -रं.

Retentiveness, *s.* धारणशक्तिः *f.*, धारणक्षमता, धारकत्वं, धृतिः *f.*, दृढता.

Reticular, reticulated, *a.* जालाकारः -रा -रं, जालाकृतिः -तिः -ति, जालरूपः -पा -पं, व्यस्तरेखाविशिष्टः -ष्टा -ष्टं, जालवद् अन्तरालविशिष्टः &c.

Reticulation, *s.* जालकर्म्म *n.* (न्), जालाकारकर्म्म *n.*, जालवत्कर्म्म *n.*

Reticule, *a.* स्त्रीलोकेन हस्तेन भृतं सूच्यादिधारणयोग्यो लघुकोषः.

Retina, *s.* नेत्रान्तःस्थितचित्रपत्रं, नेत्रान्तःस्थचित्रपत्रं.

Retinue, *s.* परिवारः, परिवर्हः, वर्हः, परिग्रहः, तन्त्रं, परिकरः, परिजनः, परिजनाः *m. pl.*, परिचराः *m. pl.*, अनुचराः *m. pl.*, परिचरवर्गः, सहचरवर्गः, भृत्यवर्गः, परिच्छदः.

To retire, *v.n.* अपक्रम् (c. 1. -क्रामति -क्रमितुं), व्यपक्रम्, परावृत् (c. 1. -वर्त्तते -र्त्तितुं), प्रतिनिवृत्, निवृत्, पार्श्वे परावृत्, अवस्था (c. 1. -तिष्ठते -स्थातुं), अपसृ (c. 1. -सरति -सर्त्तुं), अपया (c. 2. -याति -तुं), अपगम् (c. 1. -गच्छति -गन्तुं), व्यपगम्, चल् (c. 1. चलति -लितुं), पलाय् (c. 1. पलायते -यितुं, rt. इ), विपलाय्.—(Retire into privacy or private life) विविक्ततां or विविक्तवृत्तिम् आस्था or सेव्, सर्व्वसङ्गान् सन्यस् (c. 4. -अस्यति -सितुं) or त्यज्, सङ्गसन्न्यासं कृ, गृहसन्न्यासं कृ, विविक्तदेशे वस्.

Retired, *a.* (Sequestered, secluded) विविक्तः -क्ता -क्तं, विजनः -ना -नं, निभृतः -ता -तं, एकान्तः -न्ता -न्तं, निर्जनः &c., निःशलाकः -का -कं.—(Secret) गूढः -ढा -ढं, गुप्तः -प्ता -प्तं, प्रच्छन्नः -न्ना -न्नं; 'a retired spot,' विविक्तस्थानं, निर्जनस्थानं, निर्जनदेशः, रहःस्थानं; 'a place whence water has retired,' परापः -पा -पं, परेपः -पा -पं; 'leading a retired life,' विविक्तसेवी -विनी -वि (न्).

Retirement, *s.* (Act of retiring) परावर्त्तः -र्त्तनं, प्रतिनिवर्त्तनं, निवर्त्तनं, पार्श्वपरिवर्त्तनं, अपक्रमः -मणं, अपसरणं, अपगमः -मनं, पलायनं.—(Act of retiring into privacy or private life) विविक्तसेवनं, विविक्तवृत्तिसेवनं, विविक्तवाससेवनं, विविक्तदेशे वासः, सङ्गसन्न्यासः, गृहसन्न्यासः.—(Private or retired life or state) विविक्तता -त्वं,

विविक्तवृत्तिः *f.*, विविक्तदशा, एकान्तता, एकान्तवृत्तिः *f.*—(Place of retirement) विविक्तस्थानं, निर्जनस्थानं, निभृतस्थानं, निषद्या.

RETIRING, *part.* or *a.* (Withdrawing) परावर्त्ती -र्त्तिनी -र्त्ति (न्), अपक्रामन् -मन्ती -मत् (त्), पार्श्वपरिवर्त्ती &c.—(Not forward or bold) विविक्तसेवी &c., एकान्तसेवी &c., विविक्तप्रियः -या -यं, एकान्तप्रियः &c., अप्रगल्भः -ल्भा -ल्भं, अधृष्टः -ष्टा -ष्टं, मन्दास्यविशिष्टः -ष्टा -ष्टं, मन्दस्वभावः -वा -वं. *See* RESERVED.

To RETORT, *v. a.* प्रतिक्षिप् (c. 6. -क्षिपति -क्षेप्तुं), प्रत्यवक्षिप्, पुनः क्षिप् or अवक्षिप्, प्रतिकृ, प्रत्यारुह् in caus. (-रोपयति -यितुं). *See To* RECRIMINATE.

To RETORT, *v. n.* प्रत्यपवद् (c. 1. -वदति -दितुं), प्रत्यपवादं कृ, प्रत्यवक्षेपं कृ, प्रत्युत्तरं कृ, प्रतिनिन्द् (c. 1. -निन्दति -न्दितुं), पुनर् निन्द्, प्रत्यारोपं कृ.

RETORT, *s.* (Return of an accusation or incivility) प्रत्यपवादः, प्रत्यवक्षेपः, प्रत्यारोपः, प्रत्यभियोगः, प्रत्युत्तरं, प्रतिनिन्दा, विप्रकृतिः *f.*, विप्रकारः, विप्रतिकारः, प्रतिकारः.—(Vessel in chemistry for distillation) वकः, वकयन्त्रं, मूषः -षी -षा -षिका; 'glass retort,' काचवकः, काचवकयन्त्रं.

To RETRACE, *v. a.* (One's steps) निवृत्, प्रतिनिवृत्. *See To* RETURN.

To RETRACT, *v. a.* or *n.* कथितत्यागं कृ, उक्तत्यागं कृ, उक्तास्वीकारं कृ, कथितास्वीकारं कृ, उक्तप्रत्यादेशं कृ, व्यतिक्रमं कृ, अनुशयं कृ, निवृत् (c. 1. -वर्त्तते -र्त्तितुं) with abl.; 'induce to retract,' निवृत् in caus. *See To* RECANT, RECALL.

RETRACTATION, RETRACTION, *s.* कथितत्यागः, उक्तत्यागः, उक्तप्रत्यादेशः, उक्तास्वीकारः, कथितास्वीकारः, निवर्त्तनं, निवृत्तिः *f.*, अनुशयः, व्यतिक्रमः. *See* RECANTATION.

RETRACTED, *p. p.* अनुशयितः -ता -तं, प्रत्यादिष्टः -ष्टा -ष्टं, व्यतिक्रान्तः -न्ता -न्तं.

RETREAT, *s.* (Act of retiring) अपक्रमः -मणं, अपसरणं, अपयानं, परावर्त्तः, परावृत्तिः *f.*, अपावर्त्तनं, अपावृत्तिः *f.*, परिवर्त्तः -र्त्तनं, विप्रयाणं, प्रतिप्रयाणं, अपायः, अपगमः -मनं, उपक्रमः, निवर्त्तनं, प्रतिनिवर्त्तनं, वक्रमः.—(Of an army) पलायनं, विपलायनं, प्रपलायनं, द्रावः, विद्रवः, प्रद्रावः, सन्द्रावः, उद्द्रावः, द्रवः, संयुगे निवर्त्तनं.—(Place of retirement) विविक्तस्थानं, विविक्तदेशः, निर्जनस्थानं, निर्जनदेशः, निभृतस्थानं, रहःस्थानं, परावर्त्तनस्थानं.

To RETREAT, *v. n.* (Retire) अपक्रम् (c. 1. -क्रामति -क्रमितुं), व्यपक्रम्, परावृत्, अपया, अपगम्, *see To* RETIRE.—(As an army) पलाय् (c. 1. पलायते -यितुं, rt. इ), विपलाय्, प्रपलाय्, सम्पलाय्, प्रद्रु (c. 1. -द्रवति -द्रोतुं), विद्रु, विप्रद्रु, अपधाव् (c. 1. -धावति -वितुं), प्रधाव्.—(Withdraw into privacy), *see To* RETIRE.

RETREATED, *p. p.* परावृत्तः -त्ता -त्तं, अपावृत्तः &c., पलायितः -ता -तं.

To RETRENCH, *v. a.* (Cut off, curtail) छिद् (c. 7. छिनत्ति, छेत्तुं), अवछिद्, अवकृत् (c. 6. -कृन्तति -कर्त्तितुं), लू (c. 9. लुनाति, लवितुं), लुप् (c. 6. लुम्पति, लोप्तुं), खण्ड्, छेदनं कृ.—(Lessen expenses, &c.) व्ययं न्यूनीकृ or अल्पीकृ or ह्रस् in caus. or संहृ.

RETRENCHMENT, *s.* छेदः, अवच्छेदः, लोपः, व्ययच्छेदः, व्ययलोपः, न्यूनव्ययः.

RETRIBUTION, *s.* प्रतिफलं, प्रतिक्रिया, प्रतिकृतिः *f.*, प्रतिकारः, निष्कृतिः *f.*

RETRIBUTIVE, RETRIBUTORY, *a.* प्रतिफलप्रदः -दा -दं, प्रतिफलदायकः -का -यिका -कं, प्रतिफलदः &c., परिशोधकः -का -कं, प्रतिकारकः -का -कं, प्रतिकारी -रिणी -रि (न्).

RETRIEVABLE, *a.* उद्धरणीयः -या -यं, पुनरुद्धरणीयः &c., पुनःप्रापणीयः &c.

To RETRIEVE, *v. a.* उद्धृ (c. 1. -हरति -हर्तुं), समुद्धृ, पुनर् उद्धृ, पुनः प्राप् (c. 5. -आप्नोति -आप्तुं), पुनर् लभ्, पुनर् आनी, उद्धारं कृ, उद्धरणं कृ. *See To* RECOVER, RESTORE.

RETRIEVED, *p. p.* उद्धृतः -ता -तं, समुद्धृतः &c., पुनः प्राप्तः -प्ता -प्तं.

To RETROCEDE, *v. n.* प्रतिगम् (c. 1. -गच्छति -गन्तुं), विपरीतं गम्, परावृत्.

RETROCESSION, *s.* प्रतिगमनं, पश्चाद्गमनं, विपरीतगमनं, परावर्त्तनं.

RETROGRADATION, *s.* प्रतिक्रमः, व्यतिक्रमः, विपरीतगतिः *f.*, वक्रगतिः *f.*

RETROGRADE, *a.* विपरीतगामी -मिनी -मि (न्), प्रतिगामी &c., व्यतिक्रान्तः -न्ता -न्तं, विपरीतगतिकः -का -कं, परावृत्तः -त्ता -त्तं, प्रतीपः -पा -पं, प्रातीपिकः &c.—(In astronomy) वक्रगतिः -तिः -ति, वक्रः -क्रा -क्रं.

To RETROGRADE, *v. n.* (Go backward) परावृत् (c. 1. -वर्त्तते -र्त्तितुं), विपरीतं गम् (c. 1. गच्छति, गन्तुं), प्रतिगम्, पश्चाद् गम्, प्रतिक्रम् (c. 1. -क्रामति -क्रमितुं), व्यतिक्रम्, व्यतिक्रमं कृ.—(Decline) क्षीणसत्त्वः -त्त्वा -त्त्वं भू, मूलसत्त्वाद् भ्रंश्. *See To* DEGENERATE, DECLINE.

RETROGRESSION, *s.* पश्चाद्गमनं, विपरीतगमनं, प्रतिगमनं, व्यतिक्रमः.

RETROSPECT, *s.* गतावलोकनं, अतीतावलोकनं, गतकालावलोकनं, अतीतकालावलोकनं, भूतावलोकनं, भूतकालावलोकनं, अनुदर्शनं, अनुदृष्टिः *f.*, पश्चाद्दर्शनं, पश्चाद्दृष्टिः *f.*, पश्चादवलोकनं, अन्ववलोकनं.

RETROSPECTIVE, *a.* (Looking back) पश्चाद्दर्शी -र्शिनी -र्शि (न्), पश्चादवलोकी &c., गतावलोकी &c., गतकालावलोकी &c., अनुदर्शी &c.—(Relating to what is past) गतापेक्षकः -का -कं, भूतापेक्षकः &c., अतीतापेक्षकः &c., गतकालापेक्षकः &c., गतकालापेक्षी -क्षिणी &c., गतकालसापेक्षः -क्षा -क्षं, भूतकालसापेक्षः &c.

RETROSPECTIVELY, *adv.* गतापेक्षया, गतकालापेक्षया, गतकालसापेक्षं, भूतापेक्षया.

To RETURN, *v. n.* (Come back, go back) पुनर् आगम् (c. 1. -गच्छति -गन्तुं), प्रत्यागम्, प्रतिगम्, निवृत् (c. 1. -वर्त्तते -र्त्तितुं), प्रत्यावृत्, प्रतिनिवृत्, सन्निवृत्, पर्यावृत्, उपावृत्, व्यावृत्, विनिवृत्, आवृत्, पुनर् आवृत्, प्रतिया (c. 2. -याति -तुं), प्रत्याया, पुनर् आया, प्रत्युपया, प्रत्ये (c. 2. प्रत्यैति -तुं, rt. इ), पुनर् ए, प्रतिक्रम् (c. 1. -क्रामति -क्रमितुं), प्रतिपद् (c. 4. -पद्यते -पत्तुं), पुनर् अभिपद्, पुनर् उपस्था (c. 1. -तिष्ठति -स्थातुं), प्रत्युपस्था, पुनर् आव्रज्; 'he returned to the place whence he came,' प्रतिजगाम यथागतं.—(Turn back or round) परावृत्, परिवृत्, पर्यावृत्, परिवर्त्तनं कृ.—(Answer), *see* REJOIN, RETORT.

To RETURN, *v. a.* (Give back) प्रतिदा (c. 3. -ददाति -दातुं), पुनर् दा, परिदा, प्रत्यृ in caus., पुनर् ऋ, प्रतिपद्, *see To* RESTORE.—(Bring or send back) पुनर् नी or आनी, पुनर् आनी in caus. (-नाययति -यितुं), पुनर् गम् in caus., पुनः प्राप् in caus.—(Give in recompense) प्रतिकृ, प्रतिफलं दा, प्रतिफलाय दा, प्रतिदा; 'to return a benefit,' प्रत्युपकृ; 'an injury,' प्रत्यपकृ, प्रतिहिंस्, प्रतिहिंसां कृ; 'to return evil for good,' परेणोपकारे कृते प्रत्यपकारं कृ or आचर्, उपकारात् प्रति अपकारं कृ, उपकारं प्राप्य अपकारं कृ; 'to return good for evil,' परेणापकारे कृते प्रत्युपकारं कृ or आचर्.—(Render an official account), *see To* REPORT.

RETURN, *s.* (Coming back) पुनरागमनं, प्रत्यागमः -मनं, प्रतिगमनं, प्रत्यावृत्तिः *f.*, प्रत्यावर्त्तनं, निवर्त्तनं, निवृत्तिः *f.*, प्रतिनिवृत्तिः *f.*, सन्निवृत्तिः *f.*, पर्यावृत्तिः *f.*, पर्यावर्त्तः -र्त्तनं, पुनरावृत्तिः *f.*, आवृत्तिः *f.*, परावृत्तिः *f.*, उपयानं.—(Turning back or round) परावर्त्तनं, परावृत्तिः *f.*, परिवृत्तिः *f.*—(Periodical revolution) परिवर्त्तः -र्त्तनं, परिवृत्तिः *f.*, पुनरावर्त्तः, पुनरावृत्तिः *f.*, विवर्त्तः, पर्ययः, पर्यायः; 'of the seasons,' ऋतुपरिवर्त्तः, ऋतुपर्यायः.—(Repayment) प्रतिदानं, परिदानं.—(Requital) प्रतिक्रिया, प्रतिकृतिः *f.*, प्रतिकर्म्म *n.* (न्),

प्रतिकारः, प्रतीकारः, प्रतिफलं, *see* REQUITAL; 'return of a benefit,' प्रत्युपकारः, उपकारमोक्षः; 'of an injury,' प्रत्यपकारः; 'of good for evil,' परेणापकारे कृते तस्य प्रत्युपकाराचरणं.—(Profit, return of trade) उत्पन्नं, फलं, फलोदयः, लाभः, लब्धिः *f.*, प्राप्तिः *f.* —(Official statement), *see* REPORT.—(In return for) प्रति with abl. c., विनिमयेन, हेतोः, हेतौ, *see* FOR.

RETURNED, *p. p.* पुनरागतः -ता -तं, प्रत्यागतः &c., प्रतिगतः &c., आगतः &c., पुनरायातः &c., प्रत्यावृत्तः -त्ता -त्तं, प्रतिनिवृत्तः &c., विनिवृत्तः &c., निवृत्तः &c., पुनरावृत्तः &c., परावृत्तः &c.—(Given back) प्रतिदत्तः -त्ता -त्तं, परिदत्तः &c.—(Requited) प्रतिकृतः -ता -तं, प्रतिफलितः &c.

RE-UNION, *s.* पुनर्योगः, पुनःसंयोगः, पुनःसंसर्गः, पुनर्मेलनं, पुनःसन्धिः *m.*, पुनःसन्धानं, प्रतिसमाधानं, पुनःसमागमः.—(Assembly) सभा.

To RE-UNITE, *v. a.* पुनः संयुज्, पुनः सन्धा, पुनः संसृज्, पुनर् एकीकृ.

RE-UNITED, *p. p.* पुनःसंयुक्तः -क्ता -क्तं, पुनःसंसृष्टः -ष्टा -ष्टं, पुनर्मिलितः -ता -तं.

To REVEAL, *v. a.* प्रकाश् (c. 10. -काशयति -यितुं), विकाश्, विवृ (c. 5. -वृणोति -वृणुते -वरितुं -रीतुं), अपवृ, अपावृ, व्यक्तीकृ, व्यञ्ज् (c. 7. -अनक्ति -अंक्तुं, c. 10. -अञ्जयति -यितुं) प्रकटीकृ, प्रकट (nom. प्रकटयति -यितुं), आविष्कृ, प्रादुष्कृ.—(Tell) सूच्, ज्ञा in caus., ख्या in caus., निविद्.—(A secret) रहस्यभेदं कृ.

REVEALED, *p. p.* प्रकाशितः -ता -तं, विवृतः &c., आविष्कृतः &c., प्रादुष्कृतः &c., व्यक्तीकृतः &c., सूचितः &c., ज्ञापितः &c., प्रकटितः -ता -तं.

REVEALER, *s.* प्रकाशकः, विवरणकृत्, सूचकः, ज्ञापकः, ख्यापकः; 'of a secret,' रहस्यभेदकः, रहस्यप्रकाशकः.

REVEALING, REVEALMENT, *s.* प्रकाशनं, विवरणं, विवृतिः *f.*, व्यक्तीकरणं, प्रकटीकरणं, आविष्करणं, स्पष्टीकरणं; 'of a secret,' रहस्यभेदः.

To REVEL, *v. n.* अतिशयहास्यशब्देन उत्सवं कृ, रात्रिकाले हासिकादिशब्देन उत्सवं कृ or अतिशयतुमुलेन सम्प्रीतिं कृ or केलिं कृ; 'one who revels in his lusts,' कामकामी *m.* (न्).

REVEL, *s.* अतिशयहास्यशब्देन उत्सवः, हासिकादिशब्देन सम्प्रीतिः *f.* or केलिः *m. f.*; 'master of the revels,' केलिसचिवः.

REVELATION, *s.* प्रकाशनं, विवरणं, प्रादुष्करणं, आविष्करणं, स्पष्टीकरणं, प्रकाशितवाक्यं, ईश्वरप्रत्यादेशः. *See* REVEALING.

REVELER, *s.* अतिशयहास्यशब्देन or अतिशयहासिकादिशब्देन उत्सवकारी *m.* (न्), सम्प्रीतिरतः, सम्प्रीतिप्रसक्तः, सम्प्रीतिप्रियः, पानोत्सुकः, पानासक्तः.

REVELRY, *s.* अतिशयहासिकादिशब्देन उत्सवकरणं. *See* REVEL.

To REVENGE, *v. a.* प्रतिकृ, वैरशुद्धिं कृ, वैरप्रतिक्रियां कृ, वैरप्रतिकारं कृ, अपकारशुद्धिं कृ, अपकारं प्राप्य प्रत्यपकृ, हिंसां प्राप्य प्रतिहिंस् (c. 7. -हिनस्ति, c. 1. -हिंसति -सितुं), परेणापकारे कृते प्रत्यपकारं कृ, अपकारात् प्रति अपकारं कृ, परेण द्रोहे कृते प्रतिद्रोहं कृ, वैरोद्धारं कृ, वैरनिर्यातनं कृ, निर्यत् (c. 10. -यातयति -यितुं), अपकारमोक्षं कृ; 'to revenge an insult,' अवलेपप्रतिकारं कृ, अवलेपशुद्धिं कृ.

REVENGE, *s.* वैरशुद्धिः *f.*, वैरप्रतिक्रिया, वैरप्रतिकारः, वैरप्रतिकृतिः *f.*, वैरनिर्यातनं, वैरोद्धारः, अपकारशुद्धिः *f.*, प्रतिकारः, प्रतीकारः, प्रतिक्रिया, प्रतिकृतिः *f.*, प्रतिकर्म्म *n.* (न्), विप्रतिकारः, प्रतिहिंसा, प्रत्यपकारः, प्रतिद्रोहः, निर्यातनं, प्रतिफलं, प्रतिविधिः *m.*—(Feeling or desire of revenge) प्रतिहिंसाबुद्धिः *f.*, प्रतिद्रोहबुद्धिः *f.*, प्रत्यपकारबुद्धिः *f.*, प्रतिद्वेषः, प्रत्यपकारेच्छा, प्रतिद्रोहेच्छा, वैरिता, जिघांसा.

REVENGED, *p. p.* प्रतिकृतः -ता -तं, निर्यातितः &c., वैरशुद्धः -द्धा -द्धं.

REVENGEFUL, *a.* प्रतिहिंसाबुद्धिः -द्धिः -द्धि, प्रतिद्रोहबुद्धिः &c., प्रत्यपकारबुद्धिः &c., प्रतिहिंसाशीलः -ला -लं, प्रतिहिंसेच्छुः -च्छुः -च्छु, प्रतिद्रोहेच्छुः &c., प्रत्यपकारेच्छुः &c., प्रतिकारेच्छुः &c., निर्यातनशीलः &c., दंशी -शिनी -शि (न्), द्विषन्तपः -पा -पं.

REVENGEFULLY, *adv.* प्रतिहिंसाबुद्ध्या, प्रत्यपकारबुद्ध्या, प्रतिद्रोहशीलत्वात्.

REVENGEFULNESS, *s.* प्रतिहिंसाशीलत्वं, प्रतिहिंसाबुद्धिः *f.*, प्रत्यपकारशीलता.

REVENGER, *s.* प्रतिकारकः, प्रतिहिंसकः, वैरशोधकः, प्रत्यपकारकः.

REVENUE, *s.* बलिः *m.*, करः, आयः, राजस्वं, राजधनं, राजकरः -रं, उत्पन्नं, नृपांशः, राजांशः, उपस्थानं, भागधेयः, कारः, लाभः, प्राप्तिः *f.*

To REVERBERATE, *v. a.* (Send or beat back) प्रतिक्षिप् (c. 6. -क्षिपति -क्षेप्तुं), प्रतिप्रक्षिप्, प्रतिहन् (c. 2. -हन्ति -न्तुं), प्रतिहननं कृ, प्रतिघातं कृ.

To REVERBERATE, *v. n.* प्रतिध्वन् (c. 1. -ध्वनति -नितुं), प्रतिध्वनिं कृ, प्रतिध्वननं कृ, प्रतिनद् (c. 1. -नदति -दितुं), अनुनद्, व्यनुनद्, प्रतिनादं कृ, प्रतिगर्ज् (c. 1. -गर्जति -र्जितुं), प्रतिगर्जनं कृ; 'cause to reverberate,' अनुनद् in caus., व्यनुनद्, प्रतिनद्. *See To* RESOUND.

REVERBERATING, *part.* प्रतिध्वनन् -नन्ती -नत् (त्), प्रतिगर्जन् &c., प्रतिनादयन् &c.

REVERBERATION, *s.* (Sending or beating back) प्रतिक्षेपः -पणं, प्रतिप्रक्षेपः -पणं, प्रतिघातः, प्रतिहननं.—(Of sound) प्रतिध्वनिः *m.*, प्रतिध्वननं, प्रतिनादः, अनुनादः, व्यनुनादः, प्रतिगर्जनं -ना, प्रतिशब्दः, प्रतिनिनदः.

SHAMEFACED, *a.* लज्जावान् -वती -वत् (त्), लज्जाशीलः -ला -लं, ह्रीमान् &c., त्रपितः -ता -तं, व्रीडितः &c. *See* BASHFUL, MODEST.

SHAMEFUL, *a.* लज्जाकरः -रा -री -रं, अपमानकरः &c., अकीर्त्तिकरः &c., कीर्त्तिनाशकः -का -कं, गर्ह्यः -र्ह्या -र्ह्यं, गर्हणीयः -या -यं.

SHAMELESS, *a.* (Destitude of shame) निर्लज्जः -ज्जा -ज्जं, अलज्जः &c., विलज्जः &c., लज्जाहीनः -ना -नं, निस्त्रपः -पा -पं, त्रपाहीनः -ना -नं, निरपत्रपः -पा -पं, अनपत्रपः &c., त्यक्तलज्जः &c., निरस्तत्रपः &c., त्रपानिरस्तः -स्ता -स्तं, लज्जोज्झितः -ता -तं, वियातः -ता -तं, धृष्टः -ष्टा -ष्टं.—(Indicating want of shame) अलज्जासूचकः -का -कं, वैयात्यसूचकः &c.

SHAMELESSLY, *adv.* लज्जया विना, लज्जां विना, निर्लज्जं, सवैयात्यं.

SHAMELESSNESS, *s.* निर्लज्जता -त्वं, लज्जाहीनता, त्रपाहीनता, वैयात्यं.

SHAMMING, *s.* छद्मकरणं, छलनं -ना, व्याजकरणं. *See* SHAM, *s.*

To SHAMPOO, *v. a.* हस्ताभ्याम् अङ्गानि संवाह् (c. 10. -वाहयति -यितुं, c. 1. -वाहति -हितुं) or मृद् (c. 9. मृद्नाति, मर्दितुं, c. 10. मर्दयति -यितुं) or सम्पीड्, अङ्गसंवाहनं कृ.

SHAMPOOED, *p. p.* हस्ताभ्यां संवाहितः -ता -तं or मर्दितः -ता -तं.

SHAMPOOER, *s.* संवाहकः, अङ्गसंवाहकः, अङ्गमर्दकः.

SHAMPOOING, *s.* संवाहनं, अङ्गसंवाहनं, अङ्गमर्दनं, उत्सादनं, उद्वर्त्तनं.

SHANK, *s.* (Bone of the leg) जङ्घास्थि *n.*, पादास्थि *n.*, अधमास्थि *n.*—(The leg) जङ्घा.—(The long part of any thing) दीर्घांशः, दीर्घभागः; 'having long shanks,' ऊर्द्ध्वजानुः -नुः -नु, ऊर्द्ध्वज्ञुः &c., दीर्घजङ्घः -ङ्घा -ङ्घं.

To SHAPE, *v. a.* रूप (c. 10. रूपयति -यितुं), सरूपं -पां कृ, कॢप् (c. 10. कल्पयति -यितुं), आकारं कृ or दा, संस्कारं कृ, संस्कृ, रच्, विरच्, घट्.

SHAPE, *s.* आकारः, आकृतिः *f.*, रूपं, मूर्त्तिः *f.*, संस्कारः, संस्थानं, विग्रहः, विधानं, वपुस् *n.*, संहननं, कायः, शरीरं. *See* FIGURE.

SHAPED, *p. p.* रूपी -पिणी -पि (न्), साकारः -रा -रं, सरूपः -पा -पं, रूपवान् -वती -वत् (त्), आकार or आकृति or रूप in comp.; 'moon-shaped,' चन्द्राकारः -रा -रं, चन्द्राकृतिः -तिः -ति, चन्द्ररूपः -पी -पं; 'well shaped,' सुरूपः -पी -पं, रूपवान् &c., सिंहसंहननः -ना -नं.

SHAPELESS, *a.* अनाकारः -रा -रं, निराकारः -रा -रं, निराकृतिः -तिः -ति, अरूपी -पिणी -पि (न्), अरूपः -पी -पं, नीरूपः -पा -पं, रूपहीनः -ना -नं, आकारहीनः &c., अमूर्त्तः -र्त्ता -र्त्तं, विरूपः &c., अरूपवान् &c.

SHAPELESSNESS, *s.* निराकारता, आकारहीनता, अरूपता, अमूर्त्तिः *f.*

SHAPELY, *a.* सुरूपः -पा -पी -पं, रूपवान् -वती &c., आकारशुद्धः -द्धा -द्धं.

SHARD, *s.* मृण्मयभाण्डशकलं, मृण्मयपात्रखण्डः, काचखण्डः.

SHARE, *s.* (Part, portion) भागः, अंशः, विभागः, उद्धारः, वण्टः -ण्टकः, भाज्यं, भाजितं, अंसः; 'equal share,' समभागः; 'share by share,' अंशांशि.—(Of an estate) ऋक्थभागः, ऋक्थांशः, रिक्थभागः, उद्धारः, औद्धारिकं.—(Of a plough) फालः, पोत्रं, फलं, निरीशं, कुशी, कूटकं.

To SHARE, *v. a.* (Distribute, divide) विभज् (c. 1. -भजति -भक्तुं), प्रविभज्, संविभज्, अंश् (c. 10. अंशयति -यितुं), वण्ट् (c. 10. वण्टयति -यितुं), पृथक् पृथग् विभज्, अंशांशि दा or परिकॢप्, *see To* DISTRIBUTE.—(Partake) अंशं or भागं ग्रह् (c. 9. गृह्णाति, ग्रहीतुं) or हृ (c. 1. हरति, हर्त्तुं) or भुज्, अन्येन सह भुज् (c. 7. भुनक्ति, भुंक्ते, भोक्तुं), अन्येन सह भज्.

To SHARE, *v. n.* सहभागी -गिनी -गि (न्) भू, अंशी &c. भू, भागी &c. भू, अन्येन सह भोगं कृ or सहोपभोगं कृ, अंशं or भागं प्राप् (c. 5. -आप्नोति -आप्तुं) or लभ् (c. 1. लभते, लब्धुं), अंशं ग्रह् or आदा, सहभोगी &c. भू.

SHARE-HOLDER, *s.* अंशधारी *m.* (न्), भागधारी *m.*, विभागधारी *m.*, अंशभागी *m.*, अंशी *m.*, अंशग्राही *m.* (न्).

SHARED, *p. p.* विभक्तः -क्ता -क्तं, संविभक्तः &c., प्रविभक्तः &c., अंशितः -ता -तं, परिकल्पितः &c., अन्येन सह भुक्तः -क्ता -क्तं or सहोपभुक्तः &c.

SHARER, *s.* भागी *m.* (न्), अंशी *m.*, अंशहारी *m.* *See* PARTAKER.

SHARK, *s.* ग्राहः, तन्तुः *m.*, तन्तुणः, तन्तुनागः, नक्रराजः, मकरः, दृढदंशकः, जलकिराटः, समुद्रारुः *m.*, अवहारः, हाङ्गरः.

SHARP, *a.* (Having a keen edge) तीक्ष्णः -क्ष्णा -क्ष्णं, तीक्ष्णधारः -रा -रं, शितधारः &c., धाराधरः -रा -रं, शितः -ता -तं, निशितः &c., तीव्रः -व्रा -व्रं, तिग्मः -ग्मा -ग्मं, खरः -रा -रं, शातः -ता -तं, निशातः &c., प्रखरः -रा -रं, तेजोवान् -वती -वत् (त्), लविः -विः -वि; 'a sharp sword,' तीक्ष्णखड्गः, निशितनिस्त्रिंशः; 'sharp as a razor,' क्षुरधाराभः -भा -भं.—(Having a sharp point) तीक्ष्णाग्रः -ग्रा -ग्रं, शिताग्रः &c., तीक्ष्णशिखः -खा -खं, शातशिखः &c., सूच्यग्रः &c., तीक्ष्णः &c.—(Acute of mind, quick, ready) तीक्ष्णबुद्धिः -द्धिः -द्धि, सूक्ष्मबुद्धिः &c., शीघ्रबुद्धिः &c., तीव्रबुद्धिः &c., विदग्धः -ग्धा -ग्धं, निपुणमतिः -तिः -ति, कुशलबुद्धिः &c., उत्पन्नमतिः &c., कुशाग्रीयमतिः &c., कुशाग्रमतिः &c., कुशाग्रबुद्धिः &c., प्रखरबुद्धिः &c., निपुणः -णा -णं, पटुः -टुः -टु, चतुरः -रा -रं.—(Quick in perception) शीघ्रग्राही -हिणी &c., सूक्ष्मः -क्ष्मा -क्ष्मं, सूक्ष्मग्राही &c., तीक्ष्णः -क्ष्णा -क्ष्णं; 'a sharp sight,' सूक्ष्मदृष्टिः *f.*, तीक्ष्णदृष्टिः *f.*—(Quick in action, smart) तीक्ष्णकर्म्मा -र्म्मा -र्म्म (न्), शीघ्रकर्म्मा &c., आशुकारी &c., शीघ्रकारी &c., क्षिप्रकारी &c.—(Witty) रसिकः -का -कं, विदग्धः -ग्धा -ग्धं.—(Sour, acid) अम्लः -म्ला -म्लं, अम्लरसः -सा -सं, शुक्तः -क्ता -क्तं, शौक्तिकः -की -कं, अरुन्तुदः -दा -दं.—(Pungent) कटुः -टुः -टु, उग्रः -ग्रा -ग्रं, रूक्षकः -का -कं, *see* PUNGENT.—(Severe, cutting)

तीक्ष्णः -क्ष्णा -क्ष्णं, तीव्रः -व्रा -व्रं, उग्रः -ग्रा -ग्रं, कटुः -टुः -टु, प्रखरः -रा -रं, खरः &c., अरुन्तुदः -दा -दं, मर्म्मस्पृक् *m. f. n.* (श्), मर्म्मवेधी &c., मर्म्मभेदी -दिनी &c.; 'sharp language,' वागसिः *f.*, वागिषुः *m.*, कटुवाक्यं, अरुन्तुदवाक् *f.* (च्); 'sharp pain,' तीव्रवेदना, शूलः लं. —(Piercing) वेधकः -का -कं, वेधी &c.—(As sound) उदात्तः -त्ता -त्तं, कर्कशः -शा -शं.

SHARP, *s.* (Note) उदात्तः, उदात्तस्वरः, उच्चस्वरः.

SHARP-EDGED, *a.* तीक्ष्णधारः -रा -रं, शितधारः &c., निशितधारः &c.

To SHARPEN, *v. a.* तिज् (c. 10. तेजयति -यितुं), निशो (c. 4. श्यति -शातुं), शो, निशि (c. 5. -शिनोति -शेतुं), क्ष्णु (c. 2. क्ष्णौति, क्ष्णवितुं), प्रक्ष्णु, संक्ष्णु, तीक्ष्णीकृ, तीक्ष्णधारीकृ, शितधारीकृ, तीक्ष्णाग्रीकृ; 'the appetite,' रुच् in caus. (Sharpen up) उत्तिज्.

SHARPENED, *p. p.* तेजितः -ता -तं, निशितः -ता -तं, शितः &c., शातः &c., निशातः &c., विशितः &c., क्ष्णुतः &c.; 'as the appetite,' रुचितः &c.

SHARPER, *s.* कितवः, वञ्चकः, धूर्त्तः, कूटकः, प्रतारकः, कुहकः.

SHARPLY, *adv.* तीक्ष्णं, तीव्रं, सतैक्ष्ण्यं, तिग्मं, प्रखरं, अरुन्तुदं, निपुणं.

SHARPNESS, *s.* (Keenness of edge) तीक्ष्णता, तैक्ष्ण्यं, धारातीक्ष्णता, तेजस् *n.*, तीव्रता, तिग्मता, तैग्म्यं.—(Of point) तीक्ष्णाग्रता -त्वं, शिताग्रता.—(Of mind) बुद्धितीक्ष्णता, बुद्धितैक्ष्ण्यं, तीक्ष्णबुद्धित्वं, बुद्धिसूक्ष्मता, विदग्धता, वैदग्ध्यं, निपुणता, नैपुण्यं, बुद्धिकौशल्यं, पटुता, पाटवं, चतुरता, चातुर्य्यं, मतिप्रकर्षः.—(Sourness) अम्लता, शुक्तता.—(Pungency) कटुता, प्रखरता, प्राखर्य्यं, उग्रता, तीक्ष्णता.—(Severity) तीक्ष्णता, तैक्ष्ण्यं, तीव्रता, तिग्मता.—(Of sound) कर्कशता, कार्कश्यं, उदात्तत्वं.

SHARP-NOSED, *a.* खरणाः -णाः -णः (स्), खरणसः -सा -सं, तीक्ष्णनासः &c.

SHARP-POINTED, *a.* तीक्ष्णाग्रः -ग्रा -ग्रं, शिताग्रः &c., सूच्यग्रः &c.

SHARP-SET, *a.* तीक्ष्णक्षुधान्वितः -ता -तं, बुभुक्षान्वितः &c., तीक्ष्णक्षुधार्त्तः &c.

SHARP-SHOOTER, *s.* शीघ्रवेधी *m.*, लक्ष्यवेधी *m.* (न्), लक्ष्यवेधनकुशलः.

SHARP-SIGHTED, *a.* सूक्ष्मदृष्टिः -ष्टिः -ष्टि, सूक्ष्मदर्शी -र्शिनी -र्शि (न्), तीक्ष्णदृष्टिः &c., तीव्रदृष्टिः &c., काकदृष्टिः &c.

SHARP-WITTED, *a.* तीक्ष्णबुद्धिः -द्धिः -द्धि, सूक्ष्मबुद्धिः &c., शीघ्रबुद्धिः &c.

SHASTRA, SHASTER, *s.* A term applied to scientific or philosophical treatises and books of law. There are properly only six Shástras, comprising the five philosophical systems (*see* SCHOOL), and the code of legal institutes; viz. 1. मीमांसाशास्त्रं or पूर्व्वमीमांसाशास्त्रं, 2. सांख्यशास्त्रं, 3. वेदान्तशास्त्रं, 4. न्यायशास्त्रं, including under it the वैशेषिकशास्त्रं, 5. योगशास्त्रं, 6. धर्म्मशास्त्रं. The last includes the celebrated code of Manu or मानवधर्म्मशास्त्रं. The term Shástra is also applied to less important branches of literature, and when used in the singular number denotes the body of all that has been written on each subject; as, 'Treatises on rhetoric,' अलङ्कारशास्त्रं; 'poetical works,' काव्यशास्त्रं; 'Treatises on the mechanical arts,' शिल्पिशास्त्रं.

To SHATTER, *v. a.* (Break into many pieces) शतखण्डशः कृ or भिद् or भञ्ज्, सहस्रखण्डशः कृ, बहुखण्डशः कृ or भञ्ज्, शतखण्डीकृ, शतचूर्णीकृ, खण्डविखण्डीकृ, बहुशकलीकृ, खण्डं खण्डं कृ, छिन्नभिन्नीकृ, छेदविच्छेदं कृ, खण्ड्, मृद्, निष्पिष्, परिभञ्ज्, प्रभञ्ज्, विदॄ, चूर्ण्.

To SHATTER, *v. n.* शतखण्डशो भू or भिद् in pass., शतचूर्णीभू.

SHATTERED, *p. p.* शतखण्डशो भिन्नः -न्ना -न्नं or भग्नः -ग्ना -ग्नं, शतचूर्णीकृतः -ता -तं, सहस्रखण्डशो भग्नः -ग्ना -ग्नं, छिन्नभिन्नः -न्ना -न्नं.

SHATTERING, *s.* परिभङ्गः, शतखण्डीकरणं, शतचूर्णीकरणं, छेदविच्छेदः.

To SHAVE, *v. a.* (With a razor) क्षौरं कृ, क्षुर् (c. 6. क्षुरति, क्षोरितुं), खुर् (c. 6. खुरति, खोरितुं), मुण्ड् (c. 1. मुण्डति -ण्डितुं, c. 10. मुण्डयति -यितुं), मुण्डनं कृ, आवप् (c. 10. -वापयति -यितुं, c. 1. -वपति -वप्तुं), परिवप्, वप्, वपनं कृ, वापं कृ, क्षुरेण or खुरेण छिद् (c. 7. छिनत्ति, छेत्तुं) or लू (c. 9. लुनाति, लवितुं), भद्राकरणं कृ; 'to shave the head,' शिरोमुण्डनं कृ.—(Pare) तक्ष् (c. 1. तक्षति -क्षितुं), तक्षणं कृ, त्वक्ष्, छिद्, अवलिख्, अवकृत्, कॢप्.

SHAVED, SHAVEN, *p. p.* मुण्डितः -ता -तं, वापितः &c., परिवापितः &c., कृतक्षौरः -रा -रं, कृतवापनः -ना -नं, क्षुरितः -ता -तं, मुण्डः -ण्डा -ण्डं, कॢप्तः -प्ता -प्तं; 'a number of shaved heads,' मुण्डमण्डली.

SHAVELING, *s.* मुण्डितशिराः *m.* (स्), वापितशिराः *m.*, मुण्डितः, मुण्डः.

SHAVER, *s.* (One who shaves) मुण्डकः, मुण्डी *m.* (न्), क्षुरी *m.*, मुण्डनकृत् *m.*, क्षौरकारी *m.* (न्), वपनकृत्.—(Boy) माणवकः.

SHAVING, *s.* (Act of cutting with a razor) क्षौरं, क्षौरकरणं, मुण्डनं, वपनं, वपः, वापः, परिवापः, वापनं, आवपनं.—(That which is pared off) तष्टं, विदलं, शकलं, खण्डः, छेदः, तनुछेदः, सूक्ष्मछेदः.

SHAWL, *s.* उत्तरीयं, प्रावरणं, प्रावारः, स्कन्धावरणं, स्कन्धवस्त्रं.

SHE, *pron.* सा (तद्), एषा (एतद्), इयं (इदं), असौ (अदस्).

SHEAF, *s.* शस्यस्तम्बः, शस्यस्तबकः, शस्यगुच्छः -च्छकः, शस्यमुष्टिः -ष्टी *f.*, शस्यभारः, स्तम्बः, स्तबकः, भारः.

To SHEAR, *v. a.* लू (c. 9. लुनाति, लवितुं), कृत् (c. 6. कृन्तति, कर्त्तितुं), छिद् (c. 7. छिनत्ति, छेत्तुं), आवप् (c. 10. -वापयति -यितुं), परिवप्, वप्, मुण्ड् (c. 1. मुण्डति -ण्डितुं, c. 10. मुण्डयति -यितुं), कॢप्, वपनं कृ, क्षौरं कृ; 'sheep,' मेषलोम छिद् or अवलिख् or लू.

SHEARED, *p. p.* लूनः -ना -नं, छिन्नलोमा -मा -म (न्), कॢप्तलोमा &c.

SHEARER, *s.* छेदकः, छिद् in comp., लोमछिद्, लोमछेदकः, लवकः, लोमछेत्ता *m.* (तृ); 'of sheep,' मेषलोमछिद्.

SHEARING, *s.* छेदनं, लूनिः *f.*, लवनं, लवः, लुः *m.*, कर्त्तनं, कल्पनं, कॢप्तिः *f.*, क्षौरं, वपनं, वापः, परिवापः, मुण्डनं; 'of wool,' लोमछेदनं, लोमकर्त्तनं, मेषलोमछेदः.

SHEARS, *s. pl.*, कर्त्तनी, कर्त्तरी, कल्पनी, कृपाणी, खण्डधारा.

SHEAT-FISH, *s.* बोदालः, वदालः, सहस्रदंष्ट्रः, सहस्रदंष्ट्री *m.* (न्).

SHEATH, *s.* (Case, covering) कोषः, कोशः, पिधानं, तिरोधानं, आवेष्टनं, परिवेष्टनं, वेष्टनं, आवरणं, आच्छादनं, पुटः, पेशी.—(Of a sword) खड्गकोषः, खड्गपिधानं, खड्गाधारः, कोषः, दलं, पेशी, *see* SCABBARD.—(In botany) शुङ्गा, दलं.

To SHEATHE, SHEATH, *v. a.* (Put into a case) कोषे निविश् (c. 10. -वेशयति -यितुं), कोषं प्रविश्, कोषस्थं -स्थां कृ.—(Envelop with a covering) आवेष्ट्, परिवेष्ट्, आच्छद्, परिच्छद्, पिधा, आवृ, परिवृ, कोशेन परिवेष्ट्.

SHEATHED, *p. p.* कोषस्थः -स्था -स्थं, कोशस्थः &c., कोषनिवेशितः -ता -तं.

To SHED, *v. a.* (Let fall, cast) पत् (c. 10. पातयति -यितुं), मुच् (c. 6. मुञ्चति, c. 10. मोचयति -यितुं), निर्मुच्, गल् in caus., गलनं कृ, विगलनं कृ; 'the feathers,' पक्षगलनं कृ.—(Let flow, spill) पत् (c. 10. पातयति -यितुं), स्रु (c. 10. स्रावयति -यितुं, c. 1. स्रवति, स्रोतुं), मुच्, प्रमुच्, सृज् (c. 6. सृजति, स्रष्टुं), उत्सृज्, वृत् in caus., आवृत्, स्कन्द् (c. 10. स्कन्दयति -यितुं), क्षर् (c. 1. क्षरति -रितुं); 'to shed tears,' अश्रूणि पत् in caus., वाष्पं सृज्, अश्रूणि नेत्राभ्याम् आवृत् in caus.; 'to shed blood,' रक्तं स्रु in caus. or मुच् or मोक्ष्.

Shed, *p. p.* गलितः -ता -तं, विगलितः &c., पातितः &c., स्रावितः -ता -तं.

Shed, *s.* (Slight building) मण्डपः, मण्डपिकः, मण्डपिका, श्रामः, वितर्द्धिः -र्द्धी *f.*, विहारः; 'for cattle,' गोष्ठं, गोगोष्ठं, गोस्थानकं, गोगृहं, गोशाला.

Shedder, *s.* (Of blood) रक्तस्रावकः, रक्तस्रावी *m.* (न्), रक्तमोचकः, रक्तपातकः, रक्तोत्पादकः, शोणितोत्पादकः, असृक्स्रावी *m.*

Sheep, *s.* मेषः, अविः *m.*, अविकः, उरभ्रः, उरणः, एडकः, भेडः, रोमशः, लोमशः, बहुरोमा *m.* (न्) ऊर्णायुः *m.*, अजः, *see* Ram; 'female,' मेषी -षिका, एडका, भेडी, उरणी, अविला, जालकिनी; 'flock of sheep,' औरभ्रकं, आविकटः.

Sheep-cot, sheep-fold, *s.* मेषस्थानं -नकं, मेषशाला, मेषव्रजः, मेषालयः -यं.

Sheepish, *a.* अतिलज्जाशीलः -ला -लं, अतिलज्जावान् -वती -वत् (त्), मेषस्वभावः -वा -वं, मेषशीलः -ला -लं, जनभीतः -ता -तं, सभाभीतः &c.

Sheepishness, *s.* अतिलज्जा, मेषशीलता, जनभीतिः *f.*, सभाभीतिः *f.*

Sheep-shearer, sheep-shearing. *See* Shearer, Shearing.

Sheep-skin, *s.* मेषचर्म्म *n.* (न्), मेषलोम *n.* (न्), मेषाजिनं, अविचर्म्म.

Sheep-stealer, *s.* मेषहर्त्ता *m.* (र्तृ), मेषहारी *m.* (न्), मेषापहारकः.

Sheep-stealing, *s.* मेषहरणं, मेषापहारः, मेषापहरणं, मेषचौरं.

Sheer, *a.* (Mere, unmixed) मात्र in comp., मात्रकः -का -कं, केवलः -ला -ली -लं, केवली -लिनी -लि (न्), शुद्धः -द्धा -द्धं, *see* Mere.

To sheer off, *v. n.* अपसृ, अपसृप्, व्यपसृप्, पलाय्, *see* *To* decamp. —(Move off on one side) पार्श्वं or पार्श्वतो गम् or चल्.

Sheet, *s.* (Of a bed, &c.) प्रच्छदपटः, प्रच्छदवस्त्रं, उत्तरप्रच्छदः, उत्तरच्छदः, शय्याच्छादनं, निचोलः. —(Of paper) पत्रं -त्रकं, पत्रिका, फलकः. —(Of metal) पत्रं, फलकः. —(Of water) वारिराशिः *m.*, वारिचत्वरः. —(Winding sheet) शववस्त्रं.

Sheet-anchor, *s.* बृहल्लङ्गरः, महालङ्गरः, बृहदङ्कुशः. There is no Sanskrit equivalent for the modern anchor: लङ्गरः is borrowed from the Persian.

Sheet-iron, *s.* लोहपत्रं -त्रकं, लोहपत्रिका, लोहफलकः.

She-goat, *s.* अजा, छागी. *See* Goat.

Shelf, *s.* (Board or bracket in a wall) नागदन्तः -न्तकः, नागनिर्व्यूहः, निर्व्यूहः, जागः, मालारं, भित्तिबहिःस्थः फलकः, भित्तिबहिःस्थं दीर्घकाष्ठं; 'set of shelves,' कपाटः -टं. —(Sand-bank) सैकतं.

Shell, *s.* (Hard covering of an animal) कम्बुः -म्बु *m. n.*, कवचः -चं; 'conch-shell,' शङ्खः, शङ्खकः -कं, शम्बूकः, जलकं, शुक्तिः *f.*, मृत्पिकामृत्वं, कम्बुः -म्बुकः; 'bivalve-shell,' कम्बुः *m.*, शम्बुः *m.*, शम्बुकः, शम्बूकः, शम्बुक्कः, जलशुक्तिः *f.*; 'oyster-shell,' शुक्तिः *f.*, शुक्तिपुटं, शुक्तिपेशी; 'small shell,' क्षुद्रशङ्खः, शुक्तिः *f.*, शङ्खनखः; 'used as a coin,' कपर्दः, कपर्दकः, *see* Cowrie; 'worker or dealer in shells,' शङ्खकारः, शङ्खी *m.* (न्), शाङ्खिकः, काम्बविकः; 'contained in a shell,' शुक्त्यन्तर्गतः -ता -तं. —(Of an egg) अण्डकवचः -चं, पेशी -शिः *f.*, अण्डपुटः -टं, अण्डपेशी. —(Of a nut, &c.) कवचः -चं. —(Of a pea, &c.) बीजकोशः, मिसा. —(Husk) त्वक् *f.* (च्), तुषः, कञ्चुकः, कोशः, पुटः—(Envelope) पुटः, कोशः, कोषः, आवेष्टनं, परिवेष्टनं, पेशी -शिः *f.*—(Outer part) बहिर्भागः, बाह्यभागः, बहिर्भागमात्रं. (Bomb), *see* the word.

To shell, *v. a.* निस्त्वचीकृ, निस्त्वच (nom. निस्त्वचयति -यितुं), त्वच (nom. त्वचयति -यितुं), निस्तुषीकृ, निष्पुटीकृ, त्वचं or पुटं हृ or निर्हृ.

Shell-cutter, *s.* शाङ्खिकः, शङ्खी *m.* (न्), शङ्खछेदकः, काम्बविकः.

Shelled, *p. p.* निस्त्वचः -चा -चं, निस्त्वचीकृतः -ता -तं, निस्तुषितः &c.

Shell-fish, *s.* कम्बुस्थः, कम्बुवासी *m.* (न्), शङ्खस्थः, शुक्तिस्थः, कोशस्थः, कोशवासी *m.*, कम्बुयुक्तजन्तुः *m.*, कम्बुस्थमत्स्यः.

Shelly, *a.* शङ्खी -ङ्खिनी -ङ्खि (न्), शाङ्खिकः -की -कं, काम्बवः -वी -वं, कम्बुमयः -यी -यं, शङ्खमयः &c., कम्बुपूर्णः -र्णा -र्णं, शङ्खाढ्यः &c.

Shelter, *s.* आश्रयः, समाश्रयः, संश्रयः, आश्रयणं, शरणं, आशयः, श्रायः, छत्रं, अवस्थानं, निवासस्थानं, अवकाशः; 'to take shelter,' आश्रि, समाश्रि, शरणार्थं गम्, *see* under Shelter; 'being in shelter,' आश्रयस्थः -स्था -स्थं; 'having taken shelter,' आश्रित्य.

To shelter, *v. a.* (Give shelter) आश्रयं दा, आश्रयः or शरणं भू. —(Protect, cover) रक्ष्, गुप्, पाल्, छद्, प्रच्छद्, गुप्तिं कृ, गोपनं कृ. (Shelter one's self) आश्रि (c. 1. -श्रयति -यितुं), समाश्रि.

Sheltered, *p. p.* or *a.* आश्रितः -ता -तं, समाश्रितः &c., संश्रितः &c., साश्रयः -या -यं. —(From the wind) निर्वातः -ता -तं.

Sheltering, *part.* आश्रयभूतः -ता -तं, आश्रयदाता -त्री -तृ (तृ).

Shelterless, *a.* निराश्रयः -या -यं, अनाश्रयः &c., आश्रयहीनः -ना -नं.

To shelve, *v. n.* प्रवणः -णा -णं भू, प्रवणीभू, पातुकः -का -कं भू, क्रमशः प्रवणीभू or अधोगम् or पत्.

Shelving, *part.* or *a.* प्रवणः -णा -णं, पातुकः -का -कं, क्रमशः प्रवणः -णा -णं or अधोगामी -मिनी &c.; 'shelving ground,' प्रवः, प्रवणभूमिः.

Shepherd, *s.* मेषपालः -लकः, पशुपालः -लकः, अविपालः, पशुरक्षी *m.* (न्), मेषरक्षी *m.*, मेषरक्षकः, मेषपोषकः, औरभ्रिकः, उरभ्रपालः; 'his business,' मेषपालनं, पशुपालनं, पाशुपाल्यं; 'shepherd's boy,' पालदारकः.

Shepherdess, *s.* मेषपाली, मेषपालिका, पशुपाली, मेषरक्षिणी.

Sherbet, *s.* शर्बतसंज्ञकं रसिकपानीयं, शर्करादिमिश्रितं मद्यजक्षीरादिरसमयं पानीयं

Sheriff, *s.* न्यायसभाध्यक्षः, धर्म्मसभाध्यक्षः, निर्णयपादप्रवर्त्तनाधिकारी *m.* (न्), निर्णयप्रवर्त्तकः, राज्यनियमप्रवर्त्तकः.

Sherry, *s.* स्पेनाख्यदेशजः प्रसिद्धमद्यविशेषः.

Shew, *To* shew, shewn, *see* Show, *To* show, &c.

Shield, *s.* (Buckler) फलकः -कं, फलं, फरं, चर्म्म *n.* (न्), चर्म्मं, आवरणं, चर्म्मावरणं, आवरकः -कं, स्फुरः, खड्गराटः, खेटिका, टालं, अङ्कल्कं; 'armed with a shield or bearing one,' फलकी *m.* (न्), फलकपाणिः *m.*, चर्म्मी *m.*, टाली *m.* (न्), फलकभृत् *m.*—(Defence) रक्षणं, गुप्तिः *f.*, त्राणं.

To shield, *v. a.* रक्ष्, त्रै, गुप्, पाल्, छद्. *See* *To* protect, cover.

Shielded, *p. p.* रक्षितः -ता -तं, छादितः &c., आवृतः &c., अन्तरितः &c.

To shift, *v. n.* (Change) परिवृत् (c. 1. -वर्त्तते -र्त्तितुं), विवृत्, विपरिवृत्, सम्परिवृत्. —(Move, change place) चल् (c. 1. चलति -लितुं), विचल्, स्थानान्तरं गम् (गच्छति, गन्तुं) or चल् or या, स्थलान्तरं गम्. —(Change clothes) वस्त्रान्तरं परिधा, निवस्. —(Shift for a livelihood) दिननिर्वाहं कृ, अगतिकगतिं कृ.

To shift, *v. a.* (Change) परिवृत् (c. 10. -वर्त्तयति -यितुं), विपरिवृत्, विकृ (c. 8. -करोति -कर्त्तुं), विहृ; 'he shifts his course,' स्वमार्गं विकरोति. —(Cause to change place) विचल् (c. 10. -चालयति -यितुं), चल्, स्थानान्तरं गम् in caus., स्थानान्तरीकृ, स्थलान्तरीकृ, अन्यत्र कृ. —(Shift off), *see* *To* put off.

Shift, *s.* (Expedient) उपायः, गतिः *f.*, युक्तिः *f.*, अभ्युपायः. —(Evasion, trick) छद्म *n.* (न्), छलं, अपदेशः, व्यपदेशः. —(Under garment) अन्तरीयं, अधोवस्त्रं, अधोवसनं, अधोंशुकं.

SHILLY-SHALLY, *s.* विकल्पः, अस्थिरता, चापल्यं. *See* IRRESOLUTION.

SHIN, *s.* जङ्घाग्रभागः, जङ्घायाः पूर्व्वास्थि *n.*, अग्रजङ्घा.

To SHINE, *v. n.* प्रकाश् (c. 1. -काशते -शितुं, c. 4. -काश्यते), काश्, द्युत् (c. 1. द्योतते -तितुं), विद्युत्, राज् (c. 1. राजति -ते -जितुं), अभिराज्, अभिविराज्, दीप् (c. 4. दीप्यते -पितुं), स्फुर् (c. 6. स्फुरति -रितुं), शुभ् (c. 1. शोभते -भितुं), विशुभ्, भास् (c. 1. भासते -सितुं), आभास्, प्रभास्, अवभास्, भा (c. 2. भाति -तुं), प्रभा, आभा, विभा, उद्भा, चकास् (c. 2. चकास्ति -सितुं), रुच् (c. 1. रोचते -चितुं), ज्वल् (c. 1. ज्वलति -लितुं), उज्ज्वल्, वर्चस् (nom. वर्चायते), ओजस् (nom. ओजायते); 'to shine very brightly,' दीप् in freq. (देदीप्यते), ज्वल् in freq. (जाज्वल्यते), शुभ् in freq. (शोशुभ्यते), अतितेजसा प्रकाश्; 'the fixed stars shine by their own light,' नक्षत्राणि स्वप्रकाशानि भवन्ति; 'planets shine by reflected light,' ग्रहाः परावृत्तकिरणैर् प्रकाश्यन्ते.

SHINE, *s.* प्रभा, प्रकाशः, द्युतिः *f.*, तेजस् *n.* *See* SUN-SHINE.

SHINGLE, *s.* (Gravel, pebble) शर्करा, शिलाखण्डः, वर्त्तुलशिला, वेलाहतशिला, वेलाहतशर्करा.—(Thin plank) फलकः.

SHINING, *part.* or *a.* प्रकाशमानः -ना -नं, दीप्तिमान् -मती -मत् (त्), द्युतिमान् &c., द्योती -तिनी -ति (न्), द्योतमानः -ना -नं, विद्योतमानः &c., शोभमानः &c., देदीप्यमानः &c., विराजमानः &c., प्रभावान् &c., कान्तिमान् &c., तेजस्वी &c., भास्वान् &c., भास्वरः -री -रं, भास्करः -रा -रं, प्रकाशन् -शन्ती -शत् (त्), स्फुरन् &c., भासयन् &c., प्रकाशः -शा -शं, प्रकाशी &c., काशी &c., काशिष्णुः -ष्णुः -ष्णु. *See* BRIGHT.

SHINY, *a.* दीप्तिमान् -मती -मत् (त्), तेजोमयः -यी -यं. *See* BRIGHT.

SHIP, *s.* वृहन्नौका, वृहन्नौः *f.*, वृहत्तरणी, नौः *f.*, नौका, वृहत्पोतः, पोतः, तरणिः -णी *f.*, अर्णवयानं, जलयानं, अर्णवपोतः, वोहित्थं, मद्गुः *m.*, प्लवः; 'to take ship,' नौकाम् आरुह् (c. 1. -रोहति -रोढुं); 'ship of war,' युद्धनौः *f.*, युद्धनौका.

SHIP, an affix denoting abstract state or office is rendered by ता or त्वं; as, 'a judge,' धर्म्माध्यक्षः; 'judgeship,' धर्म्माध्यक्षता -त्वं; 'a son,' पुत्रः; 'sonship,' पुत्रता -त्वं.

To SHIP, *v. a.* (Put on board ship) नौकाम् आरुह् in caus. (-रोपयति -यितुं) or प्रविश् (c. 10. -वेशयति -यितुं), नौकायां निविश् or सम् in caus.—(Fix in its place) स्वस्थाने धा or रुह् in caus., स्वस्थानीकृ.

SHIP-MASTER, *s.* नौकापतिः *m.*, नौस्वामी *m.* (न्), नौकास्वामी *m.*, नौकाधिपतिः.

SHIPMENT, *a.* नौकारोपणं, नौकाप्रवेशनं, नौकासमर्पणं.

SHIPPING, *s.* नौकासमूहः, नौकादिसमूहः, नौकासमवायः, नाविकं.

SHIP-WRECK, *s.* नौभङ्गः, नौकाभङ्गः, नौभेदः, नौकानाशः, नौव्यसनं, नौकाव्यसनं, नौकामज्जनं.—(Destruction) नाशः, विनाशः.

To SHIP-WRECK, *v. a.* नौकां भञ्ज् (c. 7. भनक्ति, भंक्तुं) or भिद् (c. 7. भिनत्ति, भेत्तुं) or नश् (c. 10. नाशयति -यितुं) or विनश्, नौभङ्गं कृ, नौभेदं कृ, नौव्यसनं कृ or जन्, उत्कूल् (c. 10. -कूलयति -यितुं), कूलोपरि क्षिप्.

SHIP-WRECKED, *p. p.* भिन्ननौकः -का -कं, भग्ननौकः &c., उत्कूलितः -ता -तं, कूलोपरि क्षिप्तः -प्ता -प्तं, सैकतोपरि क्षिप्तः &c.

To SHIRK, *v. a.* or *n.* छलेन कर्त्तव्यतां त्यज् or परिहृ or हा, छलेन पलाय् (c. 1. पलायते -यितुं, rt. इ) or व्यपदिश् (c. 6. -दिशति -देष्टुं), छलं धृ, छद्म कृ, व्यपदेशं कृ, अपदेशं कृ, अपसृप्, व्यपसृप्, अपक्रम्, अपधाव्.

93 SHIRK, SHIRKER, *s.* कर्त्तव्यत्यागी *m.* (न्), कर्त्तव्यतात्यागी *m.*, छद्मकारी *m.*

SHIRT, *s.* अन्तरीयं, अधोवस्त्रं, अधोवसनं, अधोंशुकं, अन्तर्वस्त्रं, अन्तर्वसनं, क्षौमवस्त्रं, क्षौमवसनं, क्षौमाम्बरं.

To SHIVER, *v. a.* शतखण्डशः कृ or भिद्, सूक्ष्मखण्डशो भिद्, शतखण्डीकृ, सहस्रखण्डशो भञ्ज्, शतचूर्णीकृ, चूर्णीकृ, चूर्ण्, निष्पिष्. *See To* SHATTER, *v. a.*

To SHIVER, *v. n.* (Fall or be broken into many small pieces) सहस्रखण्डशो भिद् in pass. or पत्, शतखण्डशो भिद् in pass., शतचूर्णीभू.—(Quake or shake with cold, &c.) शीतार्त्तत्वात् कम्प् (c. 1. कम्पते -म्पितुं) or विकम्प् or प्रकम्प्, हिमार्त्तत्वाद् वेप् (c. 1. वेपते -पितुं) or प्रवेप्, सीत्कारं कृ, शीत्कारं कृ.

SHIVER, *s.* (Small fragment) सूक्ष्मखण्डः -ण्डकः, भित्तिः *f.*, शकलः -लं, छेदः, दलं, छिन्नं, भिन्नं; 'into shivers,' सहस्रखण्डशः, सूक्ष्मखण्डशः.—(Shaking) कम्पः, सीत्कारः, *see* SHIVERING, *s.*

SHIVERED, *p. p.* सहस्रखण्डशो भिन्नः -न्ना -न्नं, सूक्ष्मखण्डशो भिन्नः &c., शतखण्डीकृतः -ता -तं, छिन्नभिन्नः &c., चूर्णितः &c., जर्ज्जरः -रा -रं.

SHIVERING, *s.* (The act of shattering) सहस्रखण्डशो भेदः -दनं, शतखण्डीकरणं, शतचूर्णीकरणं, चूर्णीकरणं, निष्पेषः -षणं.—(Quaking, trembling with cold, &c.) शीतार्त्तत्वात् or शीतातिशयात् कम्पः or कम्पनं, विकम्पः, स्पन्दः, शरीरकम्पः, देहकम्पः, अङ्गकम्पः, वेपनं, वेपथुः *m.*, सीत्कारः, शीत्कारः, सीत्कृतं.

SHIVERING, *part.* (As with cold) कम्पमानः -ना -नं, विकम्पमानः &c., कम्पनः -ना -नं, कम्पान्वितः -ता -तं, वेपमानः -ना -नं, कम्पितः -ता -तं.

SHOAL, *s.* (A shallow) सैकतं, पुलिनं, कूलं, गाधभूमिः *f.*, उत्तानभूमिः *f.*—(Crowd) सङ्घः, सङ्घातः, समूहः; 'of fish,' मत्स्यसङ्घातः, मत्स्यसङ्घः, पोताधानं.

SHOCK, *s.* (Concussion) क्षोभः, विक्षोभः, संक्षोभः, संघट्टः -ट्टनं, आकस्मिकक्षोभः, आघातः, व्याघातः.—(Impression of terror or disgust) त्रासावेशः, बीभत्सावेशः.—(Pile of sheaves) शस्यस्तम्बोत्करः, शस्यस्तवकचितिः *f.* -राशिः *m.*

To SHOCK, *v. a.* (Shake by sudden collision) क्षुभ् (c. 10. क्षोभयति -यितुं), विक्षुभ्, संक्षुभ्, अकस्मात् क्षुभ्, संघट्ट् (c. 10. -घट्टयति -यितुं), आकस्मिकक्षोभं कृ.—(Strike with sudden terror or disgust) आकस्मिकत्रासं कृ or जन् (c. 10. जनयति -यितुं), आकस्मिकसाध्वसं कृ or जन्, बीभत्सं कृ or जन्, दारुण्यं कृ or जन् or उत्पद् in caus., भैरवं जन्.—(Pile sheaves) शस्यस्तम्बान् राशीकृ.

SHOCKED, *p. p.* (Struck with sudden horror) आकस्मिकत्रासोपहतः -ता -तं, साध्वसोपहतः &c., अकस्मात् साध्वसोपहतः &c. or बीभत्सोपहतः &c.

SHOCKING, *a.* आकस्मिकत्रासदः -दा -दं, आकस्मिकत्रासकरः -रा -रं, साध्वसकारी -रिणी -रि (न्), त्रासजनकः -का -कं, बीभत्सकरः -रा -रं.

SHOD, *p. p.* सपादुकः -का -कं, उपपादुकः -की -कं, पादुकायुक्तः -क्ता -क्तं, सपादत्रः -त्रा -त्रं, उपानद्युक्तः -क्ता -क्तं, उपानद्गुप्तः -प्ता -प्तं, उपानद्गूढः &c.

SHOE, *s.* पादुका, पादत्रं, उपानत् *f.* (ह्), पादूः *f.*, पादपा, पादत्राणं, पादरक्षा, चरणत्राणं, प्राणहिता, वध्रं, पादबन्धनं; 'of a horse,' खुरत्रं, खुरत्राणं.

To SHOE, *v. a.* पादुकायुक्तं -क्तां कृ, सपादुकं कां कृ, उपानद्युक्तं -क्तां कृ, पादुकाबन्धनं कृ, पादुकां बन्ध् (c. 9. बध्नाति, बन्द्धुं).

SHOE-BLACK, SHOE-CLEANER, *s.* पादुकामार्जकः, पादुकासम्मार्जकः, पादुकामार्जः.

SHOELESS, *a.* पादुकाहीनः -ना -नं, अपपादत्रः -त्रा -त्रं, निष्पादुकः -का -कं.

SHOE-MAKER, *s.* पादुकाकारः, पादुकाकृत् *m.*, पादूकृत् *m.*, पादुकृत् *m.*, चर्म्मकारः -रकः, चर्म्मकृत् *m.*, चर्म्मकारी *m.* (न्), चर्म्मारः; 'shoe-maker's knife,' चर्म्मप्रभेदिका, आरा.

SHO

SHOE-STRING, *s.* पादुकाबन्धनं -नी, पादुकाबन्धः, पादुकायोक्त्रं, उपानद्बन्धनं, पादुकाबन्धनसूत्रं, पादुकाबन्धनरज्जुः *m. f.*

To SHOOT, *v. a.* (Let fly, discharge) क्षिप् (c. 6. क्षिपति, क्षेप्तुं), प्रक्षिप्, मुच् (c. 6. मुञ्चति, मोक्तुं), प्रमुच्, मोक्ष् (c. 10. मोक्षयति -यितुं), अस् (c. 4. अस्यति -सितुं), प्रास्, सृज् (c. 6. सृजति, स्रष्टुं), पत् (c. 10. पातयति -यितुं), ईर् (c. 10. ईरयति -यितुं), उदीर्, त्यज्; 'to shoot an arrow,' शरं प्रक्षिप्; 'a dart,' अस्त्रं क्षिप्; 'a bullet from a gun,' आग्नेयनाडेर् लोहगुलिकां प्रक्षिप् or निःसृ in caus.—(Strike with any thing, kill) प्रहृ (c. 1. -हरति -हर्तुं), आहन् (c. 2. -हन्ति -न्तुं), हन्, अभ्याहन्, व्यध् (c. 4. विध्यति, व्यद्धुं), आव्यध्; 'with an arrow,' शरेण आहन्.—(Emit) उत्सृज्, विसृज्, निरस्, निःसृ in caus.—(Thrust forward) प्रसृ in caus.

To SHOOT, *v. n.* (With an arrow) शरप्रक्षेपं कृ, शरासनं कृ.—(With a gun) गुलिकाप्रक्षेपं कृ.—(Germinate) स्फुट्, उद्भिद् in pass., प्रोद्भिद्, प्ररुह्, विकस्, अङ्कुर (nom. अङ्कुरयति -यितुं), फुल्ल्.—(As pain) मर्म्म व्यध् (c. 4. विध्यति, व्यद्धुं), मर्म्मवेधनं कृ, शूल् (c. 1. शूलति -लितुं), शूलोपहतः -ता -तं भू, तीक्ष्णवेदनाम् अनुभू, तीव्रवेदनोपहतः -ता -तं भू.

SHOOT, *s.* (Sprout) अङ्कुरः, पल्लवः, किसलयः, किशलयः, किसलः -लं, नवपल्लवः, प्ररोहः, प्रवालः, उद्भिज्जः, उद्भिद् *f.*, विसलं, नवविटपः, बालविटपः.

SHOOTER, *s.* क्षेप्ता *m.* (प्तृ), प्रक्षेप्ता *m.*, शरप्रक्षेपकः, गुलिकाप्रक्षेपकः; 'a good or sharp shooter,' शीघ्रवेधी *m.* (न्).

SHOOTING, *part.* (Sprouting) उद्भिज्जः -ज्जा -ज्जं, उद्भिद् *m. f. n.*, प्ररोही &c.

SHOOTING, *s.* (Act of shooting arrows) शरप्रक्षेपः -पणं, शरासनं, बाणासनं, बाणमोक्षणं, शरमोक्षणं.—(Bullets, &c., with a gun) गुलिकाप्रक्षेपः, गुलिकासनं, गोलासनं.—(Sharp pain) शूलः -लं, तोदः -दनं, वेदना, तीक्ष्णवेदना, तीव्रवेदना.

SHOP, *s.* पण्यशाला, विक्रयशाला, विक्रयगृहं, विक्रयस्थानं, पण्यवीथी -थिः *f.*, पण्यवीथिका, वीथिः -थी *f.*, विपणिः -णी *m. f.*, आपणः, आसनी, पाणिः *f.*, आवारिः *m.*; 'work-shop,' शिल्पशाला, शिल्पगृहं.

To SHOP, *v. n.* द्रव्यक्रयणार्थं विक्रयशालाम् अभिगम् (c. 1. -गच्छति -गन्तुं).

SHOP-KEEPER, *s.* आपणिकः, विपणी *m.* (न्), पण्याजीवः, पण्यशालाधिकारी *m.* (न्), व्यापारी *m.*, क्रयविक्रयोपजीवी *m.*, क्रयविक्रयिकः, तुलाधारः.

SHOP-LIFTER, *s.* चिल्लाभः, विक्रयशालास्थद्रव्यापहर्त्ता *m.* (र्त्तृ).

SHOP-LIFTING, *s.* विक्रयशालास्थद्रव्यहरणं, पण्यशालास्थद्रव्यापहरणं.

SHOP-MAN, *s.* विक्रयशालायां सेवकः or कर्म्मकरः, आपणिकः.

SHOPPING, *s.* पण्यशालाभिगमनं, विक्रयशालाभिगमनं, पण्यशालासेवनं.

SHORE, *s.* तीरं, कूलं, तटं, प्रतीरं, रोधस्, वेला, कूलभूः *f.*, मर्य्यादा, अंशुमान् *m.* (त्), वप्रः, आयोगः, पाटकः; 'of the sea,' समुद्रतीरं, समुद्रतटं, समुद्रान्तः -न्तं; 'brought to shore,' उत्कूलितः -ता -तं.—(Prop) उपस्तम्भः, उपघ्नः.

To SHORE, *v. a.* (Prop) दीर्घकाष्ठेन उपस्तम्भ् or संस्तम्भ्.

SHORN, *p. p.* (Cut off) छिन्नः -न्ना -न्नं, अवच्छिन्नः &c., लूनः -ना -नं.—(Having the hair or wool cut off) छिन्नकेशः -शा -शं, छिन्नलोमा -मा -म (न्), लूनकेशः &c., लूनलोमा &c., मुण्डितः -ता -तं, कृतमुण्डनः -ना -नं, कृतवापः -पा -पं, परिवापितः -ता -तं, कृतचूडः -डा -डं.—(Deprived) हृतः -ता -तं, अपहृतः &c., हीनः -ना -नं.

SHORT, *a.* (Not long, not having great extension) ह्रस्वः -स्वा -स्वं, अल्पः -ल्पा -ल्पं, क्षुद्रः -द्रा -द्रं, स्वल्पः -ल्पा -ल्पं, अल्पकः -का -कं, अदीर्घः -र्घा -र्घं; 'very short,' ह्रसिष्ठः -ष्ठा -ष्ठं; 'a short plank,' क्षुद्रफलकः, ह्रस्वफलकः; 'a short distance,' कियद्दूरं, ईषद्दूरं, कियत्पर्य्यन्तं.—(Not long in time) अल्पकालिकः -की -कं, अल्पकालीनः -ना -नं, अदीर्घकालिकः &c., अदीर्घकालीनः &c., अल्पकालस्थायी -यिनी -यि (न्), अचिरस्थायी &c.; 'in a short time,' *see* SHORTLY; 'for a short time,' अल्पकालं, अल्पकालमात्रं, अल्पमात्रं, कियत्कालं, ईषत्कालं; 'a short delay,' क्षणक्षेपः.—(Short in size or measure) ह्रस्वपरिमाणः -णा -णं, अल्पपरिमाणः &c., क्षुद्रपरिमाणः &c., अल्पप्रमाणः &c., अल्पप्रमाणकः -का -कं.—(In stature) ह्रस्वः -स्वा -स्वं, ह्रस्वशरीरः -रा -रं, ह्रस्वाङ्गः -ङ्गी -ङ्गं, अल्पशरीरः &c., अल्पतनुः -नुः -नु, वामनतनुः &c., क्षुद्रतनुः &c., अल्पमूर्त्तिः -र्त्तिः -र्त्ति, ह्रस्वमूर्त्तिः -र्त्तिः -र्त्ति, स्तोककायः -या -यं, वामनः -ना -नं, खर्वः -र्वा -र्वं, अतुङ्गः -ङ्गा -ङ्गं, नीचः -चा -चं, नीचकः -का -कं, पृश्निः -श्निः -श्नि, न्यङ्, नीची न्यक्.—(Brief) अविस्तीर्णः -र्णा -र्णं, संक्षिप्तः -प्ता -प्तं, परिमितशब्दकः -का -कं, अल्पशब्दकः &c.—(Insufficient) न्यूनः -ना -नं, हीनः -ना -नं, अपर्य्याप्तः -प्ता -प्तं, अनुपयुक्तः &c.—(Deficient in) हीनः -ना -नं, न्यूनः -ना -नं, विकलः -ला -लं, रहितः -ता -तं, ह्रसितः &c.—(Not of adequate extent) न्यूनपरिमाणः -णा -णं, न्यूनः -ना -नं; 'short of one's expectations,' आशान्यूनः -ना -नं; or expressed by ऋते, विना, अन्तरेण, वर्जयित्वा &c.; as, 'I shall be satisfied with nothing short of Ráma's exile,' नान्येन तुष्येयम् ऋते रामविवासनात्, *see* EXCEPT.—(As a vowel, &c.) लघुः -घुः -घ्वी -घु, ह्रस्वः -स्वा -स्वं; 'a short vowel,' ह्रस्वस्वरः, मात्रा.—(Friable) सुचूर्णनीयः -या -यं, आशुचूर्णनीयः &c., चूर्णगुणकः -का -कं, चूर्णनशीलः -ला -लं, भञ्जनशीलः &c., भिदुरः -रा -रं.—(To be short, come short), *see To* FAIL, *v. n.*—(To cut short), *see To* CURTAIL, LESSEN.—(To fall short), *see To* FAIL, *v. n.*—(To stop short) अकस्मात् स्था or अवस्था, मार्गमध्ये स्था, अर्द्धमार्गे स्था or निवृत्.—(In short) संक्षेपतस्, समासतस्, अल्पशब्दतस्, सङ्क्षेपतस्, वस्तुतस्.

SHORT-BREAD, SHORT-CAKE, *s.* सुभेद्यपिष्टकः, सुचूर्णनीयपिष्टकः.

SHORT-COMING, *s.* दोषः, अपराधः, न्यूनता, अतिपातः, अधक्रिया, उपेक्षणं, परित्यागः, छिद्रं, वैकल्यं. *See* FAULT.

To SHORTEN, *v. a.* (Make short) ह्रस् (c. 10. ह्रासयति -यितुं), ह्रस्वीकृ, अल्पीकृ, न्यूनीकृ, वामनीकृ.—(Contract) संक्षिप्, संहृ, संकुच्.

To SHORTEN, *v. n.* अल्पीभू, न्यूनीभू, ह्रस् (c. 1. ह्रसते -सितुं), ह्रस्वीभू.

SHORTENED, *p. p.* ह्रसितः -ता -तं, न्यूनीकृतः -ता -तं, न्यूनीभूतः &c., अल्पीकृतः &c., अल्पीभूतः &c., संक्षिप्तः -प्ता -प्तं, संकुचितः -ता -तं.

SHORT-HAND, *s.* संक्षिप्ताक्षरलिखनं, संक्षिप्ताक्षरलिपिः *f.*, संक्षिप्ताक्षरं; 'the art,' संक्षिप्ताक्षरलेखनविद्या.

SHORT-LIVED, *a.* अल्पायुः -युः -यु or अल्पायुः -युः -युः (स्), ह्रसितायुः &c., अल्पवयाः -याः -यः (स्), अल्पकालिकः -का -कं, अचिरस्थायी -यिनी -यि (न्), अचिरजीवी &c., अदीर्घजीवी &c., क्षणस्थायी &c., क्षणजीवी &c.

SHORTLY, *adv.* (Quickly, in a little time) अचिरेण, अचिरात्, न चिरेण, न चिरात्, शीघ्रं, सद्यस्, झटिति.—(In a few words) अल्पशब्दतस्, संक्षेपतस्, समासतस्, अविस्तरेण, अविस्तरशस्.

SHORTNESS, *s.* ह्रस्वता -त्वं, ह्रसिमा *m.* (न्), अल्पता -त्वं, क्षुद्रता, अदीर्घता.—(Of time) अल्पकालिकत्वं, कालाल्पता.—(Of life) आयुरल्पता -त्वं.—(Of size or stature) ह्रस्वता, ह्रस्वशरीरता, अल्पशरीरता,

वामनता, खर्वता, नीचता, खतुल्लता.—(Briefness) अविस्तीर्णता, अविस्तारः, अविस्तरः, संक्षेपः, संक्षिप्तता, संक्षिप्तिः *f.*, उपसंक्षेपः, समस्तता, विस्ताराभावः, अल्पविस्तारः.—(Insufficiency, deficiency) न्यूनता -त्वं, हीनता, अपर्य्याप्तिः *f.*, अल्पत्वं, वैकल्यं, परिमितता.

Short-sighted, *a.* अल्पदृष्टिः -ष्टिः -ष्टि, अल्पदृक् *m. f. n.* (श्), स्वल्पदृक्, अदूरदृष्टिः &c., अदीर्घदृष्टिः &c., अदूरदर्शी -र्शिनी &c., अदीर्घदर्शी &c.

Short-sightedness, *s.* अदीर्घदृष्टिः *f.*, अदूरदृष्टिः *f.*, अल्पदृष्टिः *f.*

Short-winded, *a.* दुःश्वासी -सिनी -सि (न्), श्वासकृच्छ्रग्रस्तः -स्ता -स्तं.

Shot, *p. p.* (Discharged, as an arrow, &c.) क्षिप्तः -प्ता -प्तं, प्रक्षिप्तः &c., अस्तः -स्ता -स्तं, निरस्तः &c., मुक्तः -क्ता -क्तं, धनुर्मुक्तः &c.; 'as a bullet, &c.,' आग्नेययन्त्रमुक्तः &c., यन्त्रमुक्तः &c.; 'is shot forth,' प्रक्षिप्यते, निःसार्य्यते.—(Struck with an arrow) शराहतः -ता -तं, बाणाहतः &c., शरविद्धः -द्धा -द्धं; 'with a bullet,' गुलिकाहतः -ता -तं.

Shot, *s.* (Shooting, discharge of any missile) क्षेपः -पणं, प्रक्षेपः असनं, पातः -तनं, प्रहारः; 'of an arrow,' *see* Shooting, *s.*—(Missile, weapon) अस्त्रं, मुक्तं.—(Bullet) गुलिका, गुटिका, लोहगुलिका, गुलिः -ली *f.*, सीसकगुलिः *f.*, दूरवेधिनी गुलिका, आग्नेयास्त्रं.—(Flight of an arrow) शरायणं, वाततरायणं, शरपातः.—(Of a bullet) गुलिकायनं, गुटिकायनं.—(A good shot, a good marksman) शीघ्रवेधी *m.* (न्), लक्ष्यवेधी, लक्ष्यवेधनकुशलः.

To shot, *v. a.* गुलिकां निविश् in caus., गुलिकागर्भं -र्भां कृ.

Shotted, *p. p.* गुलिकागर्भः -र्भा -र्भं, आग्नेयगुलिगर्भः &c., लोहगुलिगर्भः &c.

Should. When this auxiliary expresses obligation, it is rendered in Sanskrit by the fut. past. part., *see* Ought. When it expresses present or future time conditionally, it may be rendered by the present tense, or not unfrequently by the conditional tense.

Shoulder, *s.* स्कन्धः, अंशः, अंसः, भुजशिरस् *n.*, भुजशिखरं, दोःशिखरं, बाहुमूलं; 'having wide shoulders,' पृथुस्कन्धः -न्धा -न्धं, विपुलस्कन्धः &c., विपुलांशः -शा -शं; 'shoulder-joint,' स्कन्धसन्धिः *m.*, चिह्न *n.*; 'upon the shoulder,' स्कन्धे, स्कन्धेन, प्रतिस्कन्धं; 'he bears faggots on his shoulder,' इन्धनं स्कन्धेन वहति; 'the dog is borne on the shoulder,' कुक्कुरः स्कन्धेन उह्यते; 'he places the goat on his shoulder,' छागं स्कन्धे करोति; 'resting on the shoulder,' स्कन्धस्थः -स्था -स्थं.

To shoulder, *v. a.* (Take or place on the shoulder, carry on the shoulder) स्कन्धे कृ or स्था in caus., स्कन्धस्थं -स्थां कृ, स्कन्धे आरुह् in caus., स्कन्धेन वह्.—(Push with the shoulder) स्कन्धेन तड् (c. 10. ताडयति -यितुं).

Shoulder-blade, *s.* फलकः, स्कन्धफलकः, अंशः, अंसः, भुजशिरस् *n.*, स्कन्धः, कासवरं.

To shout, *v. n.* (Utter a loud cry) उत्क्रुश् (c. 1. -क्रोशति -क्रोष्टुं), उच्चैःस्वरेण क्रुश् or प्रक्रुश् or विक्रुश्, उच्चैः or उच्चैःस्वरेण नद् (c. 1. नदति -दितुं) or प्रणद् or घुष् (c. 10. घोषयति -यितुं) or उद्घुष्, मुक्तकण्ठं क्रुश्, महानादं कृ, महाघोषं कृ, महाध्वनिं कृ, प्रणादं कृ, उत्क्रोशं कृ, कोलाहलं कृ, चित्कारं कृ, चीत्कृ.—(For joy) हर्षनादं कृ, हर्षघोषं कृ, जयघोषं कृ, जयशब्दं कृ, जयकोलाहलं कृ, किलकिल (nom. किलकिलायति), जयजयेतिशब्दं कृ.

Shout, *s.* (Loud cry) उत्क्रोशः, उत्क्रुष्टं, विक्रुष्टं, प्रणादः, महानादः, निनादः, महाघोषः, घोषणं -णा, उद्घोषणं, कोलाहलः, उच्चैर्घुष्टं, उच्चैःस्वरः, चित्कारः, चीत्कारः, महाध्वनिः *m.*, संहूतिः *f.*, बहुभिः कृता संहूतिः.—(Of joy or triumph) जयघोषः, जयकोलाहलः, जयशब्दः, जयध्वनिः *m.*, जयरवः, जयारवः, हर्षनादः, हर्षस्वनः, जयजयेतिशब्दः.

To shove, *v. a.* प्रसृ (c. 10. -सारयति -यितुं), संचल् in caus. *See* *To* push.

Shove, *s.* प्रसारणं, अपसारणं, सञ्चालनं, प्रहारः. *See* Push, *s.*

Shovel, *s.* अभ्रिः *f.*, कुद्दालः, कुदालः, काष्ठकुद्दालः.

To show, *v. a.* (Exhibit) दृश् (c. 10. दर्शयति -यितुं), प्रदृश्, अभिदृश्, निदृश्, प्रतिदृश्, सन्दृश्, विदृश्, दर्शनं कृ, प्रदर्शनं कृ; 'to show cause of fear,' भयहेतुप्रदर्शनं कृ.—(Point out, indicate) निर्दिश् (c. 6. -दिशति -देष्टुं), प्रदिश्, आदिश्, विनिर्दिश्, उद्दिश्, आदिश् in caus. (-देशयति -यितुं), सूच् (c. 10. सूचयति -यितुं), संसूच्; 'show the way,' मार्गम् आदेशय.—(Inform, make known) ज्ञा in caus., बुध् in caus., प्रबुध्, निविद् in caus., आख्या, ख्या, कथ्.—(Manifest) प्रकाश् (c. 10. -काशयति -यितुं), व्यञ्ज्, व्यक्तीकृ, आविष्कृ, प्रादुष्कृ, प्रकटीकृ.—(Show a kindness, favor, &c.) उपकृ, उपकारं कृ, अनुग्रहं कृ, अनुग्रह्.—(Show forth), *see* *To* manifest.—(Show off) दम्भार्थं दृश् in caus.—(Show one's self) आत्मानं दृश् in caus., दृश् in pass. (दृश्यते); 'he shows himself as if dead,' आत्मानं मृतवद् दर्शयति.—(Show up), *see* *To* expose.

To show, *v. n.* दृश् in pass. (दृश्यते), लक्ष् in pass. (लक्ष्यते), प्रतिभा (c. 2. -भाति -तुं).

Show, *s.* (Appearance, semblance) आभासः, भासः, आकारः, आभा, दर्शनं.—(Ostentatious parade) दम्भः, आडम्बरः -रं, दम्भार्थं प्रकाशनं, कौतुकं.—(Pretence) छद्म *n.* (न्), व्यपदेशः.—(Spectacle) प्रेक्षा -क्षणं, कौतुकं, चमत्कारः.

Shower, *s.* (One who shows) दर्शकः, प्रदर्शकः, दर्शनकृत्, दर्शयिता *m.* (तृ).

Shower, *s.* (Of rain) धारासारः, धारासम्पातः, धारा, आसारः, वर्षः, वृष्टिः *f.*, आवृष्टिः *f.*, ध्वसरं, तरन्तः.—(Of arrows) शरवर्षः, शरवृष्टिः *f.*, शरधारा, पत्रपूगः.—(Of tears) अश्रुधारा.

To shower, *v. a.* or *n.* वृष् (c. 1. वर्षति -ते -र्षितुं), धारासारेण वृष्; 'to shower down water,' जलवर्षेण or जलवर्षं वृष्, वारिणा अभिवृष्; 'to shower blood,' रक्तं वृष्; 'to shower arrows,' शरान् वृष्. *See* *To* rain.

Shower-bath, *s.* धारायन्त्रगृहं, धारायन्त्रमन्दिरं, धारायन्त्रं, शिरोभिषेचनयन्त्रं, शिरोभिषेचनी, शिरोभिषेकः, शिरःस्नानं.

Showery, *a.* वर्षुकः -का -कं, बहुवृष्टिः -ष्टिः -ष्टि, वृष्टिमान् -मती -मत् (त्), बहुधारः -रा -रं, वर्षिकः -की -कं. *See* Rainy.

Showing, *s.* दर्शनं, प्रदर्शनं, सन्दर्शनं, निर्देशः, प्रकाशनं, सूचनं.

Show-man, *s.* दर्शकः, प्रदर्शकः, दर्शयिता *m.* (तृ), कौतुकदर्शकः.

Shown, *p. p.* दर्शितः -ता -तं, प्रदर्शितः &c., सन्दर्शितः &c., निर्दिष्टः -ष्टा -ष्टं, प्रदिष्टः &c., सूचितः -ता -तं, ज्ञापितः &c., प्रकाशितः &c.

Showy, *a.* (Make a fine show) अतिशोभनः -ना -नं, एकान्तशोभनः -ना -नं, अतिदर्शनीयः -या -यं, अतिप्रकाशः -शा -शं, आडम्बरी -रिणी -रि (न्); 'showy learning,' सभापाण्डित्यं.

Shred, *s.* खण्डः -ण्डकः, पटखण्डः, वस्त्रखण्डः, दीर्घखण्डः -ण्डकः.

To shred, *v. a.* दीर्घखण्डीकृ, दीर्घखण्डशः कृ or छिद् or व्यवछिद्.

Shrew, *s.* (Scold) कर्कशा, कुशीला, वामशीला, वक्रशीला, दुःशीला, उग्रशीला, कटुशीला.—(Mouse) वेश्मनकुलः, *see* Shrew-mouse.

Shrewd, *a.* (Cunning, knowing) विदग्धः -ग्धा -ग्धं, विचक्षणः -णा -णं, चतुरः -रा -रं, चातुरः -री -रं, पक्वबुद्धिः -द्धिः -द्धि, परिपक्वबुद्धिः

&c., पक्वः -क्वा -क्वं, परिपक्वः &c., सूक्ष्मबुद्धिः &c., कुबुद्धिः &c., दीर्घदृष्टिः -ष्टिः -ष्टि, निपुणः -णा -णं, कुशलः -ला -लं, नागरः -रा -रं.—(Proceeding from cunning) विदग्ध in comp., वैदग्ध्यप्रयुक्तः -क्ता -क्तं.

SHREWDLY, *adv.* विदग्धवत्, वैदग्ध्येन, सवैदग्ध्यं, विचक्षणवत्.

SHREWDNESS, *s.* वैदग्ध्यं, वैदग्धं, विदग्धता, विचक्षणता, वैचक्षण्यं, चतुरता, चातुर्य्यं, बुद्धिपक्वता, पक्वता, परिपक्वता, परिपाकः, नैपुण्यं, परिवेदना.

SHREWISH, *a.* कर्कशः -शा -शं, कर्कशस्वभावः -वा -वं, कर्कशशीलः -ला -लं, वामशीलः &c., वक्रशीलः &c., क्रूरशीलः &c., कुप्रकृतिः -तिः -ति.

SHREW-MOUSE, *s.* चेभ्मनकुलः, लिङ्गालिका, दीना, चिक्का.

To SHRIEK, *v. n.* उत्क्रुश् (c. 1. -क्रोशति -क्रोष्टुं), कर्कशस्वरेण क्रुश् or रु or क्रन्द् (c. 1. क्रन्दति -न्दितुं), चित्कारं कृ, चीत्कारं कृ. *See To* SCREAM.

SHRIEK, *s.* रावः, कर्कशरावः, चित्कारः, चीत्कारः, उत्क्रोशः, उत्क्रुष्टं, विक्रुष्टं, नादः, क्रन्दनं, क्रन्दितं, कोलाहलं, दुमहध्वनिः *m.*

SHRIKE, *s.* (Fork tailed butcher-bird) कलिङ्गः, भिङ्गकः, भृङ्गः, भृङ्गकः, धूम्याटः, धूमाटः.

SHRILL, *a.* कर्कशः -शा -शं, पटुः -टुः -टु, कर्णवेधकः -का -कं, कर्णवेधी -धिनी -धि (न्), कर्णकटुः -टुः -टु, कलोत्तालः -ला -लं, उत्तालः -ला -लं; 'shrill-voiced,' कर्कशस्वरः -रा -रं, उच्चैःस्वरः &c.

SHRILLNESS, *s.* कर्कशता -त्वं, कार्कश्यं, कटुता, कर्णवेधकत्वं.

SHRILLY, *a.* कर्कशं, कर्कशस्वरेण, उच्चैःस्वरेण, पटुस्वरेण.

SHRIMP, *s.* जलवृश्चिकः, इष्वाकः, गङ्गाटेयः, चिङ्गटः, गलायिलः, गलालिलः, गलानिकः.

SHRINE, *s.* आयतनं, देवतायतनं, देवायतनं, पुण्यतीर्थं, तीर्थं, पुण्यद्रव्यायतनं, पुण्यद्रव्याधारः, पवित्रद्रव्याधारः.

To SHRINK, *v. n.* संकुच् in pass. (-कुच्यते), सङ्कोचम् इ (c. 2. एति -तुं), सङ्कोचं या, कुञ्चनम् इ, कुञ्च् in pass. (कुच्यते), आकुञ्च्, संक्षिप् in pass. (-क्षिप्यते), संहृ in pass. (-ह्रियते), सद् (c. 1. सीदति, सत्तुं); 'as in fear, terror, &c.,' विकम्प् (c. 1. -कम्पते -म्पितुं), वित्रस् (c. 4. -त्रस्यति -सितुं), उद्विज्; 'with shame,' लज्ज् (c. 1. लज्जते -ज्जितुं), विलज्ज्.

To SHRINK, *v. a.* (Cause to contract) संकुच् (c. 1. -कोचति -चितुं), कुञ्च् (c. 1. -कुञ्चति -ञ्चितुं, c. 10. -कुञ्चयति -यितुं), सङ्कोचं गम् in caus., सङ्कोचं कृ.

SHRINKING, *s.* सङ्कोचः, आकुञ्चनं, कुञ्चनं, संक्षेपः, *see* CONTRACTION.

To SHRIVEL, *v. n.* संकुच् in pass. (-कुच्यते), आकुञ्च् in pass. (-कुच्यते), कुञ्च्, शॄ in pass. (-शीर्य्यते), विशॄ, संश्यानः -ना -नं भू, वलिपूर्णः -र्णा -र्णं भू, वलिरूपः -पा -पं भू.

To SHRIVEL, *v. a.* (Cause to shrink) संकुच् (c. 1. -कोचति -चितुं), शॄ in caus. (शारयति -यितुं), शीर्णीकृ, विशीर्णीकृ, संश्यानीकृ.

SHRIVELLED, *p. p.* सङ्कुचितः -ता -तं, कुञ्चितः &c., आकुञ्चितः &c., शीर्णः -र्णा -र्णं, विशीर्णः &c., संश्यानः -ना -नं, विक्लिन्नः -न्ना -न्नं; 'into wrinkles,' वलिनः -ना -नं, वलिभः -भा -भं, वलिमान् -मती -मत् (त्).

SHROFF, *s.* धनव्यापारी *m.* (न्), मुद्राव्यापारी *m.*, कलोपजीवी *m.*

SHROUD, *s.* (For a corpse) शववस्त्रं, शववसनं, शवपरिधानं, प्रेतवस्त्रं, शवाच्छादनं.—(Cover) आच्छादनं.

To SHROUD, *v. a.* छद् (c. 10. छादयति -यितुं), प्रच्छद्. *See To* SHELTER.

SHROUDED, *p. p.* प्रच्छन्नः -न्ना -न्नं, प्रच्छादितः &c., गूढः -ढा -ढं, उपगूढः &c.

SHRUB, *s.* (Woody plant, dwarf tree) गुल्मः, स्तम्बः, क्षुपः, क्षुपः, लुपः, अप्रकाण्डः, विस्तारः, क्षुद्रवृक्षः, अल्पवृक्षः.—(Drink), *see* PUNCH.

SHRUBBERY, *s.* गुल्मवाटिका, गुल्मवाटी, वृक्षवाटिका, उपवनं.

SHRUBBY, *a.* गुल्मावृतः -ता -तं, तरुगुल्मावृतः &c., गुल्ममयः -यी -यं.

To SHRUG, *v. a.* or *n.* (The shoulders) असमतोषसूचनार्थं स्कन्धसङ्कोचं कृ or स्कन्धाकुञ्चनं कृ or स्कन्धोत्कर्षणं कृ or स्कन्धचेष्टनं कृ.

SHRUG, *s.* स्कन्धसङ्कोचः, स्कन्धाकुञ्चनं, स्कन्धोत्कर्षणं, स्कन्धचेष्टा.

SHRUNK, *s.* सङ्कुचितः -ता -तं, कुञ्चितः -ता -तं, आकुञ्चितः &c., संवृतः -ता -तं, शीर्णः -र्णा -र्णं, संश्यानः -ना -नं, संहतः -ता -तं, संक्षिप्तः -प्ता -प्तं, ह्रसितः -ता -तं, सन्नः -न्ना -न्नं, सङ्कीर्णः -र्णा -र्णं.

To SHUDDER, *v. n.* कम्प् (c. 1. कम्पते -म्पितुं), विकम्प्, स्फुर् (c. 6. स्फुरति -रितुं), विस्फुर्, प्रस्फुर्, वेप् (c. 1. वेपते -पितुं), प्रवेप्, ह्वल् (c. 1. ह्वलति -लितुं), सीत्कारं कृ, शीत्कारोपहतः -ता -तं भू, सीत्कारग्रस्तः -स्ता -स्तं भू.

SHUDDER, SHUDDERING, *s.* अङ्गकम्पः, शरीरकम्पः, अङ्गस्फुरणं, शरीरस्फुरणं, विस्फुरणं, अङ्गवेपनं, कम्पः -म्पनं, विकम्पः -म्पनं, सीत्कारः, सीत्कृतं, शीत्कारः.

To SHUFFLE, *v. a.* (Shove one way and the other) इतस्ततः संचल् (c. 10. -चालयति -यितुं) or चल्, इतस्ततः सृ (c. 10. सारयति -यितुं) or विक्षिप्, बहुधा चल्; 'to shuffle the feet,' पादास्फालनं कृ, पादचापल्यं कृ.—(Mix together) सम्मिश्रीकृ, व्यस्तव्यस्तीकृ, अधरोत्तरीकृ, संकुलीकृ, सङ्करीकृ, विक्षिप्, सम्मिश्र्; 'cards,' द्यूतपत्रसम्मिश्रणं कृ.

To SHUFFLE, *v. n.* (Practice evasions) छद्म कृ, छलं कृ, व्यपदेशं कृ, अपदेशं कृ, व्यपदिश् (c. 6. -दिशति -देष्टुं), कपटं कृ, वक्रवृत्तिः -त्तिः -त्ति भू, चपलः -ला -लं भू.

SHUFFLE, SHUFFLING, *s.* (Mixing, pushing together) सम्मिश्रणं, व्यस्तव्यस्तीकरणं, इतस्ततः सञ्चालनं or सारणं or विक्षेपः; 'of the feet,' पादास्फालनं, पादचापल्यं.—(Evasion) छद्म *n.* (न्), छलं, व्यपदेशः, अपदेशः, वक्रता, चपलता, चापल्यं.

SHUFFLER, *s.* वक्रवृत्तिः *m.*, चपलवृत्तिः *m.*, छद्मवृत्तिः *m.* छली *m.* (न्).

To SHUN, *v. a.* वृज् (c. 10. वर्जयति -यितुं), परिवृज्, विवृज्, परिहृ (c. 1. -हरति -हर्त्तुं), प्रोज्झ् (c. 6. प्रोज्झति -ज्झितुं, rt. उज्झ्), उज्झ्, हा (c. 3. जहाति, हातुं), त्यज् (c. 1. त्यजति, त्यक्तुं), परित्यज्, वर्जीकृ.

SHUNNED, *p. p.* वर्जितः -ता -तं, विवर्जितः &c., परिहृतः -ता -तं, प्रोज्झितः -ता -तं, वर्जीकृतः -ता -तं, त्यक्तः -क्ता -क्तं, परित्यक्तः &c.

SHÚDRA, *s.* *See* SÚDRA.

To SHUT, *v. a.* (Close, fasten up) पिधा (c. 3. -दधाति -धातुं), अपिधा, रुध् (c. 7. रुणद्धि, रोद्धुं), निरुध्, अवरुध्, संवृ (c. 5. -वृणोति -वरितुं -रीतुं), बन्ध् (c. 9. बध्नाति, बन्द्धुं), संहृ (c. 1. -हरति -हर्त्तुं), संहन् (c. 2. -हन्ति -न्तुं); 'shut the door,' द्वारं पिधेहि or रुन्द्धि; 'they shut the doors,' द्वाराणि पिदधुः or रुरुधुः; 'to shut the mouth,' मुखं संवृ or पिधा; 'the hands,' हस्तौ बन्ध् or संहन्; 'a book,' पुस्तकं बन्ध्; 'the lips,' ओष्ठौ संवृ; 'the eyes,' मील्, निमील्, निमिष्, *see To* CLOSE, *v. a.*—(Contract, compress) संवृ, संहृ, संकुच्, संहन्, सम्पीड्.—(Bar) अर्गलेन बन्ध्.—(Obstruct) रुध्, निरुध्, स्तम्भ्, प्रतिबन्ध्.—(Shut in), *see To* CONFINE, INCLOSE.—(Shut out) बहिष्कृ, निवृ, निराकृ, निषिध्, *see To* EXCLUDE, PRECLUDE.—(Shut up) निरुध्, अवरुध्; 'in a prison,' कारायां निरुध्; 'in a box,' सम्पुटीकृ.

SHUT, *p. p.* रुद्धः -द्धा -द्धं, पिहितः -ता -तं, संवृतः -ता -तं, बद्धः -द्धा -द्धं, पिधानवान् -वती -वत् (त्), सपिधानः -ना -नं; 'as a bud,' अविकचः -चा -चं, मुकुलीकृतः -ता -तं; 'as the eye,' निमीलितः -ता -तं, मुकुलितः &c.

Shutter, *s.* अवरोधकं, प्रतिबन्धकं, आच्छादनं, कपाटः; 'of a window,' जालकावरोधकं, जालकाच्छादनं, वातायनावरोधकं.

Shuttle, *s.* (Of a weaver) त्रसरः, सूत्रवेष्टनं, सूत्रयन्त्रं, तसरः, मञ्जिकः, नाडिचीरं.

Shuttle-cock, *s.* लघुगुलिकाविशेषो यो विनोदार्थं दण्डाहतो भूत्वा इतस्ततः प्रक्षिप्यते.

Shy, *a.* सभाभीतः -ता -तं, सभाभीरुः -रुः -रु, जनभीतः -ता -तं, लोकभीतः &c., भाषणविमुखः -खा -खी -खं, अल्पभाषी -षिणी -षि (न्), आलापविरक्तः -क्ता -क्तं, कातरः -रा -रं, आगमनभीरुः -रुः -रु, भीरुः -रुः -रु.

Shyness, *s.* सभाभीतिः *f.*, सभाभीरुता, जनभीतिः *f.*, लोकभीतिः *f.*, सभाकम्पः, भाषणविमुखता, आलापवैरक्त्यं, भीरुता, कातरता.

Sibilant, *s.* (Letter) ऊष्मः. *See* Hissing.

Sick, *a.* (Inclined to vomit) वमनेच्छुः -च्छुः -च्छु, विवमिषुः -षुः -षु, वमनोन्मुखः -खा -खं, वमी -मिनी -मि (न्), उद्गारी -रिणी &c., छर्दनेच्छुः -च्छुः -च्छु.—(Ill) रोगी -गिणी -गि (न्), रोगार्त्तः -र्त्ता -र्त्तं, रोगातुरः -रा -रं, रोगान्वितः -ता -तं, रोगग्रस्तः -स्ता -स्तं, अस्वस्थः -स्था -स्थं, सामयः -या -यं, व्याधितः -ता -तं, व्याधियुक्तः -क्ता -क्तं, अमी &c., विकारी &c., आमयावी &c., उपतापी &c., अभ्यान्तः -न्ता -न्तं, रुग्नः -ग्ना -ग्नं, *see* Ill, *a.*—(Disgusted) जातबीभत्सः -त्सा -त्सं, द्वेषी -षिणी &c., विकृतः -ता -तं, निर्विण्णः -ण्णा -ण्णं; 'sick of the world,' भवरोगी -गिणी &c., भवार्त्तः -र्त्ता -र्त्तं; 'sick-room,' विशिखा.—(To be sick, vomit) वम् (c. 1. वमति -मितुं), छर्द् (c. 10. छर्दयति -यितुं).

To **sicken**, *v. a.* (Disgust) बीभत्सं कृ or जन् (c. 10. जनयति -यितुं), वैकृत्यं जन्.—(Make sick) वमनेच्छां जन्, छर्दनेच्छां जन्, रोगार्त्तीकृ, सरोगीकृ.

To **sicken**, *v. n.* (Fall sick) रोगग्रस्तः -स्ता -स्तं भू, रोगार्त्तः -र्त्ता -र्त्तं भू, ज्वर् (c. 1. ज्वरति -रितुं), सरोगीभू, *see To* languish.—(Feel disgust) बीभत्सोपहतः -ता -तं भू, जातबीभत्सः -त्सा -त्सं भू.

Sickening, *a.* बीभत्सजनकः -का -कं, विरक्तिजनकः &c., *see* Disgusting.

Sickish, *a.* ईषद्वमनेच्छुः -च्छुः -च्छु, ईषद्रोगी -गिणी -गि (न्).

Sickle, *s.* लवित्रं, दात्रं, लवाणकं, लवाकः, शस्यकर्त्तनी, शस्यच्छेदनी, कर्त्तनी, खलघ्नः, खलहननं -नी, खलधनः, सङ्क्रीकः.

Sickliness, *s.* सरोगता, रोगिता, रोगाधीनता, रोगशीलता, जन्मरोगिता.

Sickly, *a.* (Unwell), *see* Sick.—(Habitually ill) सदारोगी -गिणी -गि (न्), नित्यरोगी &c., रोगाधीनः -ना -नं, रोगशीलः -ला -लं; 'by birth or nature,' जन्मरोगी &c., जातिरोगी &c., प्रकृतिरोगी &c., स्वभावरोगी &c.; 'having a sickly countenance,' रुग्नवदनः -ना -नं, रुग्नमुखः &c.

Sickness, *s.* (Inclination to vomit, nausea) वमनेच्छा, छर्दनेच्छा, विवमिषा, वमनोन्मुखता, वमः -मनं, वमिः *f.*, वामिः *f.*, उत्क्लेशः, उत्क्लेदः, उत्क्षेपः, उद्गारः, छर्दनं, छर्दी, छर्दिः, छर्दिः *f.*, छर्दिस् *f.*, प्रच्छर्दिका.—(Disease) रोगः, व्याधिः *m.*, आमयः, रुज् *f.* (ज्), अस्वास्थ्यं, अस्वस्थता, विकारः, असमाधानं, रुग्नावस्था, रोगिता, रोगग्रस्तता, रोगव्याप्तिः *f.*, *see* Disease, Illness.

Side, *s.* (Of a man or any animal) पार्श्वः, पार्श्वभागः, पक्षः -क्षकः, पक्षभागः, कुक्षिः *m.*, कक्षः, पार्श्वाङ्गं, अर्द्धाङ्गं, अङ्कः, कोलः; 'pain in the side,' पार्श्वशूलः -लं, कुक्षिशूलः -लं; 'left side,' वामपार्श्वः, वामाङ्गं; 'turning upon the side,' पार्श्वपरिवर्त्तनं, अङ्गपरिवर्त्तनं; 'removed from the side of a parent,' पितुर् अङ्कात् परिभ्रष्टः, पितृपार्श्वात्परिभ्रष्टः -ष्टा -ष्टं; 'at one's side,' पार्श्वे, पार्श्वतस्; 'staying close at the side,' पार्श्वस्थः -स्था -स्थं, पार्श्वगतः -ता -तं, पार्श्वपरिवर्त्ती -र्त्तिनी &c., उपान्तस्थः -स्था -स्थं; 'sleeping at the side of,' पार्श्वशयः -या -यं.—(Edge, border) प्रान्तः, उपान्तः -न्तं, अन्तः, सीमा, धारा; 'of a wood,' वनान्तः -न्तं, वनधारा; 'of a river,' नदीतीरं, नदीकूलं, नदीतटं; 'of a roof,' पटलप्रान्तं; 'of a mountain,' पर्व्वतधारा, पर्व्वततटङ्का.—(Declivity or slope of a mountain) उत्सङ्गः, नितम्बः, कटकः.—(Part considered in respect to its direction) दिक् *f.* (श्), दिशा, पार्श्वः or more usually expressed by the affixes तस्, त्र &c.; as, 'on all sides,' सर्व्वतस्, समन्ततस्, समन्तात्, विश्वतस्, परितस्, अभितस्, सर्व्वत्र, सर्व्वदिक्षु चतुर्दिक्षु; 'on both sides,' उभयतस्, उभयत्र, उभयपार्श्वयोः; 'on the other side,' अपरतस्, परतस्; 'on the opposite side,' अभिमुखतस्, विपरीतभागे; 'side by side,' पार्श्वापार्श्वि.—(Any part being in opposition to another) पक्षः; 'side of an argument,' पक्षः; 'both sides of an argument,' पक्षद्वयं; 'taking up a side,' पक्षता; 'another side of the argument,' पक्षान्तरं.—(Party faction) पक्षः; 'one's own side,' आत्मपक्षः, स्वपक्षः; 'having a side,' पक्षवान् &c.; 'one of the opposite side,' विपक्षः, प्रतिपक्षः; 'one of the same side,' सपक्षः, स्वपक्षावलम्बी *m.* (न्), स्वपक्षकः; 'to take a side,' पक्षपातं कृ, *see To* side; 'one who takes a side,' पक्षपाती *m.* (न्), पक्षोद्ग्राही *m.*—(Any part of a thing) भागः; 'the outer side,' बाह्यभागः; 'black on the two sides,' द्वयोर् भागयोः श्यामः -मा -मं.—(Branch of a family, separate line) पक्षः; 'relations on the father's side,' पितृपक्षा ज्ञातयः; 'on the mother's side,' मातृपक्षा बान्धवाः; 'noble on both sides,' मातृतःपितृतश्चाभिजनवान् -वती &c.—(Side of a geometrical figure) भुजः, बाहुः *m.*, दोस् *m.*

Side, *a.* पार्श्विकः -की -कं, पार्श्वः -र्श्वी -र्श्वं, पार्श्वीयः -या -यं, पार्श्वस्थः -स्था -स्थं, पाक्षिकः -की -कं, पाक्षः -क्षी -क्षं, पार्श्व or पक्ष in comp.; 'a side door,' पक्षद्वारं.

To **side**, *v. n.* (Embrace or adopt a side) पक्षपातं कृ, पक्षोद्ग्राहं कृ, पक्षं ग्रह् or उद्ग्रह् or अनुग्रह्.

Side-board, *s.* पक्षफलकः -कं, पार्श्वफलकः, पार्श्वस्थफलकः.

Side-long, *a.* अनुपार्श्वः -र्श्वा -र्श्वं, पार्श्विकः -का -कं, आनुपार्श्विकः -की -कं, वक्रः -क्रा -क्रं, तिरश्चीनः -ना -नं, तिर्य्यङ् -रश्ची -र्य्यक् (च्); 'side-long glance,' तिर्य्यग्दृष्टिः *f.*, अपाङ्गदृष्टिः.

Side-long, *adv.* अनुपार्श्वं, पार्श्वतस्, तिर्य्यक्, तिरस्, पार्श्वदिशि.

THORN-APPLE, *s.* धत्तूरः, धुस्तूरः, धुत्तूरः, धस्तूरः, कनकः, कितवः, उन्मत्तः, धूर्त्तः, मातुलः, मदनः, मारः, हेमतरुः *m.*, पुरीमोहः, खरदूषणः, काहलापुष्पः, तीक्ष्णकण्टकः; 'its fruit,' मातुलपुत्रकः.

THORNLESS, *a.* निष्कण्टकः -का -कं, अकण्टकः &c., कण्टकहीनः -ना -नं.

THORNY, *a.* कण्टकितः -ता -तं, कण्टकी -किनी -कि (न्), सकण्टकः -का -कं, बहुकण्टकः &c., प्रचुरकण्टकः &c., कण्टकयुक्तः -क्ता -क्तं.

THOROUGH, *a.* साद्यन्तः -न्ता -न्तं, पर्य्याप्तः -प्ता -प्तं. *See* COMPLETE.

THOROUGH-BRED, *a.* (Horse) आजानेयः, कुलीनः, *see* under HORSE.

THOROUGHFARE, *s.* सर्व्वसाधारणमार्गः, सर्व्वसामान्यपथः, सर्व्वगम्यमार्गः, लोकगम्यपथः, अप्रतिरोधपथः; 'a great thoroughfare,' लोकयात्रा, सर्व्वलोकयात्रा, जनाकीर्णमार्गः, जनाकीर्णं.

THOROUGHLY, *adv.* साद्यन्तं, पर्य्याप्तं, साकल्येन. *See* COMPLETELY.

THOSE, *pron.* ते *m.*, ताः *f.*, तानि *n. pl.* (तद्), अमी *m. pl.* *See* THESE.

THOU, *pron.* त्वं (युष्मद्); 'to thou and thee,' त्वङ्कृ.

THOUGH, *conj.* यद्यपि, अपि, तथापि, यदि. *See* ALTHOUGH.

THOUGHT, *s.* (Operation of the mind, act of thinking) चिन्ता -न्तनं, विचारणं -णा, विचारः, ध्यानं, अभिध्यानं, आध्यानं, भावना, चर्चा, मननं, मनोव्यापारः, अन्तःकरणव्यापारः, चित्तव्यापारः, चित्तचेष्टा, मनश्चेष्टा, अन्तःकरणचेष्टा, *see* REFLECTION, MEDITATION.—(That which is formed in the mind) बुद्धिः *f.*, मतिः *f.*, मतं, मनस *n.*, बोधः, मनोगतं, कल्पना, मनःकल्पना, मनःकल्पितं, सङ्कल्पः, मनोगृहं, मनसिजं, मनोवृत्तिः *f.*, चित्तवृत्तिः *f.*, हृद्गतं, भावना, तर्कः; 'inmost thoughts,' अन्तर्गतं मनस्; 'evil thoughts,' कुकल्पना, कुतर्कः, अपध्यानं; 'speed of thought,' मनोवेगः, मनोजवः; 'swift as thought,' मनोजवः -वा -वं, मनोयायी -यिनी &c.; 'beyond thought,' अचिन्त्यः -न्त्या -न्त्यं, अचिन्तनीयः -या -यं; 'in thought, word, or deed,' मनोवचनकर्म्मभिः *inst. pl.*

THOUGHT, *p. p.* चिन्तितः -ता -तं, मतः &c., भावितः &c., कल्पितः &c.

THOUGHTFUL, *a.* (Contemplative) चिन्तापरः -रा -रं, *see* MEDITATIVE.—(Considerate, attentive) विचारशीलः -ला -लं, विचारवान् -वती &c., सविचारः -रा -रं, सचिन्तः -न्ता -न्तं, चिन्तावान् &c., चिन्तायुक्तः -क्ता -क्तं.

THOUGHTFULNESS, *s.* विचारशीलता, सविचारता, सचिन्तता, मानसत्वं

THOUGHTLESS, *a.* निश्चिन्तः -न्ता -न्तं, विवेकहीनः -ना -नं, विचारहीनः &c., अविचारशीलः -ला -लं, अनूहः -हा -हं. *See* HEEDLESS, NEGLIGENT.

THOUGHTLESSLY, *adv.* अचिन्तया, निश्चिन्तं, अविचारेण, अविवेकेन; 'thoughtlessly done,' अविचारकृतः -ता -तं, अविवेककृतः &c.

THOUGHTLESSNESS, *s.* अविचारः -रता, अविवेकता, अविवेकः, विचारहीनता, विवेकहीनता, प्रमादः. *See* HEEDLESSNESS.

THOUSAND, *a.* सहस्रं *n. sing.*, दशशतं. The word सहस्रं may be used with the nom. pl. or gen. pl.; as, 'a thousand ancestors,' सहस्रं पितरः or सहस्रं पितॄणां; 'ten thousand,' अयुतः -तं; 'one hundred thousand,' लक्षं -क्षा; 'a thousand times,' सहस्रकृत्वस्; 'in a thousand ways,' सहस्रधा; 'thousand eyed,' सहस्रनयनः -ना -नं; 'a regiment of a thousand men,' सहस्री *m.* (न्), साहस्रः; 'the aggregate of a thousand,' साहस्रं; 'thousand-fold,' सहस्रगुणः -णा -णं; 'by thousands,' सहस्रशस्.

THOUSANDTH, *a.* सहस्रतमः -मी -मं, साहस्रः -स्री -स्रं.

THRALDOM, *s.* दास्यं, वशता, पारतन्त्र्यं, *see* SERVITUDE, SLAVERY.

To THRASH, *v. a.* निस्तुषीकृ, कण्डनं कृ, पू, तड्. *See To* THRESH.

THREAD, *s.* सूत्रं, तन्तुः *m.*, तन्त्रं, गुणः, सूत्रतन्तुः *m.*, सरत् *n.*, सरित् *f.*, कुत्रं, चीनः, स्तार्त्रं; 'point of a thread,' पक्ष्म *n.* (न्), सूत्राग्रं; 'thread of a story or subject,' प्रबन्धार्थः, अर्थप्रबन्धः, अन्वयः अर्थान्वयः, अर्थसन्दर्भः, कथासन्दर्भः, कथाप्रबन्धः, सन्धानं, अनुसन्धानं; 'thread of hope,' आशातन्तुः *m.*; 'sacrificial thread,' *see* under SACRIFICIAL.

To THREAD, *v. a.* सूत्र (Nom. सूत्रयति -यितुं), गुम्फ्, *see To* STRING.

THREADBARE, *a.* जर्जरीकः -का -कं, जर्जरः -रा -रं, सूत्रदरिद्रः &c.

THREADED, *p. p.* सूत्रितः -ता -तं, गुम्फितः &c., ग्रन्थितः &c., ग्रथितः &c.

THREAT, *s.* भर्त्सनं, निर्भर्त्सनं, तर्जनं, दण्डसूचनं. *See* MENACE.

To THREATEN, *v. a.* भर्त्स् (c. 10. भर्त्सयति -ते -यितुं), निर्भर्त्स्, तर्ज्, *see To* MENACE.—(Declare purpose of punishing) दण्डसूचनं कृ, दण्डप्रदर्शनं कृ, दण्डसङ्कल्पप्रदर्शनं कृ.—(Exhibit the appearance of something evil approaching) अनिष्टसूचनं कृ, अनिष्टावेदनं कृ, *see To* FOREBODE.

THREATENED, *p. p.* भर्त्सितः -ता -तं, निर्भर्त्सितः &c., तर्जितः -ता -तं.

THREATENING, *part.* भर्त्सनकारी -रिणी &c., अनिष्टावेदी -दिनी &c.

THREE, *a.* त्रयः *m. pl.*, तिस्रः *f. pl.*, त्रीणि *n. pl.* (त्रि); 'the three worlds,' त्रिभुवनं; 'the aggregate of three,' त्रयं, त्रयी, त्रिकं, त्रितयं. The word त्रयं is often used at the end of a compound to express 'three;' as, 'three months,' मासत्रयं; 'three years,' वर्षत्रयं; 'three steps,' पदत्रयं; 'the three properties,' गुणत्रयं; 'he was seen by three rogues,' स धूर्त्तत्रयेण दृष्टः; 'two or three,' द्वित्राः -त्राः -त्राणि (त्र being here put for त्रि); 'two or three or any number,' द्वित्र्यादिसंख्या, द्वित्राद्याः *m. pl.*; 'three or four,' त्रिचतुराः -राः -राणि; 'rule of three,' त्रैराशिकगणितं, *see* under RULE, *s.*

THREE-FOLD, *a.* त्रिगुणः -णा -णं, त्रिविधः -धा -धं, त्रिवृत् *m. f. n.*

THREE-FOURTHS, *s. pl.* त्रयश्चतुर्थांशाः *m. pl.*, त्रिपादाः, त्र्यंशाः.

THRENODY, *s.* यमगाथा, यमगीतं, यमगानं.

To THRESH, *v. a.* (Corn) धान्यादि मृद् (c. 9. मृद्नाति, मर्दितुं) or पू or परिपू or निस्तुषीकृ, धान्यादिमर्दनं कृ, धान्यादिकण्डनं कृ, अवघातं कृ.—(Beat) तड् (c. 10. ताडयति -यितुं), ताडनं कृ.

THRESHED, *p. p.* मर्दितः -ता -तं, मृदितः &c., निस्तुषितः &c., निस्तुषीकृतः &c., पूतः &c., परिपूतः &c., अवहतः &c., बहुलीकृतः &c.

THRESHING, *s.* धान्यादिमर्दनं, धान्यादिकण्डनं, कण्डनं, निस्तुषीकरणं, अवघातः, पावनं, ताडनं.

THRESHING-FLOOR, *s.* धान्यादिमर्दनस्थानं, धान्यादिकण्डनस्थानं, धान्यमर्दनभूमिः *f.*, खलः, शस्यमर्दनस्थानं.

THRESHOLD *s.* देहली, गृहावग्रहणी, गृहतटी, शिला -ली, द्वारपिण्डी, हरिद्धिका, अधुरः, उडुम्बरः.

THRICE, *adv.* त्रिवारं, वारत्रयं, त्रिः, त्रिकृत्वस्, त्रिगुणः -णा -णी -णं, त्रि in comp.; 'thrice ploughed,' त्रिसीत्यः -त्या -त्यं, त्रिहल्यः -ल्या -ल्यं, त्रिगुणाकृतः -ता -तं.

THRIFT, THRIFTINESS, THRIFTY, &c. *See* FRUGALITY, FRUGAL, &c.

THRILL, *s.* स्फुरणं, स्फूर्त्तिः *f.*, स्फुरितं, हर्षः; 'of joy,' रोमहर्षः -र्षणं, रोमोद्धर्षणं, रोमोद्गमः, रोमोद्भेदः, रोमाञ्चः, पुलकः, पुलकोद्गमः.

To THRILL, *v. n.* स्फुर् (c. 6. स्फुरति -रितुं), हृष् (c. 4. हृष्यति, हर्षितुं).

THRILLING, *part.* स्फुरन् -रन्ती -रत् (त्), स्फुरितः -ता -तं; 'with joy,' हृष्टः -ष्टा -ष्टं, हर्षी -र्षिणी -र्षि (न्), पुलकितः -ता -तं, रोमाञ्चितः &c.

To THRIVE, *v. n.* *See To* FLOURISH, PROSPER, *v. n.*

THRIVING, *v. n.* समृद्धः -द्धा -द्धं. *See* PROSPEROUS, FLOURISHING.

THROAT, *s.* कण्ठः, गलः, ग्रीवा, कन्धरः -रा, कुहरं, कृकः, निगरणः, *see* NECK; 'relating to it,' कण्ठ्यः -ण्ठ्या -ण्ठ्यं; 'seated in it,' कण्ठस्थः -स्था -स्थं, कण्ठगतः -ता -तं; 'up to the throat,' आकण्ठात्; 'dryness of it,' कण्ठशोषः.

To THROB, *v. n.* स्फुर् (c. 6. स्फुरति -रितुं), विस्फुर्, स्यन्द् (c. 1. स्यन्दते -न्दितुं), प्रतिस्यन्द्, परिस्यन्द्, कम्प्, विकम्प्, वेप्. *See To* PALPITATE, BEAT.

THROB, THROBBING, *s.* स्फुरणं -णा, स्फुरितं, स्यन्दनं, स्पन्दितं, विष्पन्दः, स्पन्दः, कम्पः, स्फोरणं, स्फुरः, स्फरणं, स्फारणं, स्फुलनं; 'of the eye,' चक्षुःस्पन्दः.

THROE, *s.* (Of child-birth) प्रसववेदना, गर्भवेदना, वेधना.

THRONE, *s.* सिंहासनं, नृपासनं, राजासनं, उच्चासनं, भद्रासनं, राजशय्या, महाशय्या, मञ्चः, राजासनमञ्चः.

THRONG, *To* THRONG. *See* CROWD, *To* CROWD.

THRONGED, *p. p.* सङ्कीर्णः -र्णा -र्णं, समाकीर्णः &c., बाधितः -ता -तं.

To THROTTLE, *v. a.* गलग्रहं कृ, गलहस्त. *See To* CHOKE, SUFFOCATE.

THROUGH, *prep.* (From one end or side to the other) पारं, आपार्श्वान्तरात्, पार्श्वान्तरपर्य्यन्तं, पार्श्वान्तरं यावत्, तीरान्तरं.—(Denoting passage) मध्येन, अन्तरेण or expressed by the inflection of the noun; 'he goes through a fissure in the rock,' गिरिरन्ध्रमध्येन गच्छति; 'through the branches,' विटपान्तरेण.—(By means of, through the agency or influence of) expressed by the abl. or instr. case; as, 'through ambition,' लोभात्, लोभेन; 'through anger,' कोपात्, रोषवशतया; 'through him,' तेन, *see* under BY, *prep.*

THROUGH, *adv.* (From the beginning to the end) साद्यन्तं, आद्यन्तं.—(To the end) शेषपर्य्यन्तं, शेषं यावत्, समाप्तिपर्य्यन्तं, अवसानपर्य्यन्तं, आसमाप्तेः, आशेषात्, *see* THROUGHOUT; 'to carry through, get through,' पार् (c. 10. पारयति -यितुं), तीर् (c. 10. तीरयति -यितुं), *see To* FINISH, *v. a.*

THROUGHOUT *adv.* (From the beginning to the end) साद्यन्तं,

व्याप्तं, शेषपर्य्यन्तं.—(Of time) expressed by पर्य्यन्तं, यावत् or आ in comp.; thus, 'throughout the month,' मासपर्य्यन्तं; 'throughout the year,' वर्षपर्य्यन्तं; 'throughout the whole year,' आवर्षान्तात् or वर्षान्तं यावत् (*i. e.* to the end of the year); 'throughout life,' यावज्जीवं, जीवनपर्य्यन्तं, आजीवनान्तात्.

To THROW, *v. a.* क्षिप् (c. 6. क्षिपति, क्षेप्तुं), प्रक्षिप्, अस् (c. 4. अस्यति -सितुं), प्रास्, मुच् (c. 6. मुञ्चति, मोक्तुं), प्रमुच्, ईर् (c. 10. ईरयति -यितुं), समीर्, उदीर्, पत् (c. 10. पातयति -यितुं), सृज्, प्रहृ, प्रेष् in caus.—(Throw away) अपास्, व्युदस्, अपध्वंस्, त्यज्, अपहा, विहा, नश् in caus., *see To* LOSE, REJECT; 'one's time,' कालं क्षिप्, कालक्षेपं कृ.—(Throw about) विक्षिप्, इतस्ततः क्षिप्.—(Throw behind one's back) पृष्ठतः कृ or क्षिप्.—(Throw down) पत् in caus., अवपत्, अधःपत्, अधः क्षिप्, अधः कृ, भ्रंश् in caus., प्रभ्रंश्, च्यु in caus., प्रच्यु.—(Throw into disorder) व्यूहान् भञ्ज् or भिद्, पिच्छलीकृ.—(Throw off) अवधू, निर्धू, विधू, निरस्, निराकृ, अपध्वंस्.—(Throw out) निरस्, निराकृ; 'as hints, &c.,' सूच्, सूचनां कृ.—(Throw up) उत्क्षिप्, उत्क्षेपं कृ, *see To* VOMIT.—(Throw up), *see To* RESIGN.—(Throw one's self down) स्वदेहावपातं कृ; 'from a cliff,' गिरिशिखराद् अवपातं कृ or प्रपतनं कृ.

THROW, *s.* क्षेपः -पणं, प्रक्षेपः, आक्षेपः, असनं, पातः -तनं, क्षिप्तिः *f.*

THROWER, *s.* क्षेपकः, प्रक्षेपकः, क्षेप्ता *m.* (प्तृ), प्रासकः, क्षेपणकृत्.

THROWN, *p. p.* क्षिप्तः -प्ता -प्तं, प्रक्षिप्तः &c., अस्तः -स्ता -स्तं, प्रास्तः &c., ईरितः -ता -तं, पातितः -ता -तं; 'away,' अपास्तः &c., व्युदस्तः &c., अपविद्धः -द्धा -द्धं, अपसारितः -ता -तं, त्यक्तः -क्ता -क्तं, नष्टः -ष्टा -ष्टं; 'a kindness is thrown away on bad men,' सुकृतम् असत्सु नष्टं; 'thrown down,' पातितः -ता -तं, निपातितः &c., अधःपातितः &c., अधःक्षिप्तः -प्ता -प्तं, अधःकृतः -ता -तं, भ्रंशितः -ता -तं; 'thrown into disorder,' भग्नव्यूहः -हा -हं, भिन्नव्यूहः &c., पिच्छलः -ला -लं, समुत्पिञ्जलः &c.; 'thrown off,' निर्धूतः -ता -तं, अवधूतः &c., अपविद्धः &c.; 'as from a horse, &c.,' निरस्तः -स्ता -स्तं.

THRUM, *s.* (Ends of threads) दशाः *f. pl.*, वस्तयः *f. pl.* (वस्ति).

THRUSH, *s.* (Bird) सारिका, शारिका, मदनसारिका, शलाका, शरारिः *f.*, शरालिः *f.*, सरातिः *f.*, आटिः *f.*, आडिः *f.*, आतिः *f.*

To THRUST, *v. a.* तड् (c. 10. ताडयति -यितुं), प्रसृ (c. 10. -सारयति -यितुं), प्रसारणं कृ; 'aside,' अपसृ, *see To* PUSH.

THRUST, *s.* ताडनं, आघातः, अभिघातः, प्रसारणं, प्रहारः, *see* PUSH.

THUMB, *s.* अङ्गुष्ठः, अङ्गूलः, वृद्धाङ्गुलिः *f.*; 'thumb and forefinger,' सन्तोषः.

To THUMB, *v. a.* अङ्गुलीभिर् अङ्क् (c. 10. अङ्कयति -यितुं) or परामृश् or स्पृश्, अङ्गुल्यङ्कितं -तां कृ. *See To* FINGER, *v. a.*

THUMP, *s.* आघातः, प्रहारः, करघातः, मुष्टिघातः. *See* BLOW.

To THUMP, *v. a.* तड् (c. 10. ताडयति -यितुं), प्रहृ, आहन्. *See To* BEAT.

THUNDER, *s.* गर्जनं -ना, गर्जितं, मेघगर्जितं, मेघनादः, मेघशब्दः, मेघनिर्घोषः, स्फूर्जः, स्फूर्जनं, स्फूर्जथुः *m.*, विस्फूर्जथुः *m.*, विस्फूर्जितं, मेघविस्फूर्जितं, स्तनितं, मेघस्तनितं, स्तननं, मेघस्तननं, स्तनयित्नुः *m.*, घनशब्दः, घनस्वनः, घनरवः, मेघध्वनिः *m.*, परिघोषः, गम्भीरनादः, गर्जिः *m.*, गर्जः, रसितं.

To THUNDER, *v. n.* गर्ज् (c. 1. गर्जति -र्जितुं), परिगर्ज्, स्फूर्ज् (c. 1. स्फूर्जति -र्जितुं), विस्फूर्ज्, स्तन् (c. 1. स्तनति -नितुं), गर्जनं कृ, स्फूर्जनं कृ.

THUNDERBOLT, *s.* वज्रः -ज्रं, वज्राघातः, कुलिशः -शं, भिदुरं, भिदिः *m.*, भिदिरं, भिदुः *m.*, अशनिः *m. f.*, वज्राशनिः *m.*, ह्रादकं, मृदाकरः, शतधारं, शतारं, बहुधारः, शतकोटिः *m.*, षट्कोणं, अभोत्थं, त्रिदशाङ्कुशं, गिरिज्वरः, गिरिध्वजः, गिरिकण्टकः, इन्द्रप्रहरणं, स्वरुः *m.*, दम्भोलिः *m.*, ह्रादिनी, पविः *m.*, शब्दः, शम्बः, पेशिः *m.*, जसुरिः *m.*, व्याधामः, मेघभूतिः *f.*, दृम्भूः *m.*, दधीच्यस्थि *n.*, वैद्युतोऽग्निः; 'fall of a thunderbolt,' वज्रपातः; 'like a thunderbolt,' वज्रप्रायः -या -यं.

THUNDER-CLAP, *s.* स्फूर्जथुः *m.*, वज्रनिर्घोषः, वज्रनिष्पेषः, वज्राघातः, वज्रज्वाला, वज्रपातशब्दः, वज्रस्तनितं, वज्रनिस्वनः.

THUNDER-CLOUD, *s.* घनः, वज्रघनः, मेघः, वज्रमेघः, वज्राभ्रं.

THUNDERER, *s.* वज्री *m.* (न्), वज्रपाणिः *m.*, वज्रधरः, कुलिशभृत्.

THUNDERING, *s.* स्फूर्जनं, गर्जनं, मेघगर्जनं. *See* THUNDER.

THUNDERING, *part.* गर्जन् -र्जन्ती -र्जत् (त्), स्फूर्जावान् -वती -वत् (त्).

THUNDER-STORM, *s.* वज्रवर्षः, अशनिवर्षः, कुलिशवर्षः.

THUNDERSTRUCK, *a.* वज्राहतः -ता -तं, वज्रहतः &c., वज्रप्रहतः &c., वज्रताडितः -ता -तं, विद्युद्धतः &c. *See* ASTOUNDED.

THURSDAY, *s.* बृहस्पतिवारः, गुरुवारः, गुरुवासरः, लक्ष्मीवारः.

THUS, *adv.* (In this manner) एवं, इत्थं, अनेन प्रकारेण, एवम्प्रकारेण, उक्तेन प्रकारेण, उक्तप्रकारेण, अनया रीत्या, अनयथा, अतएव.—(So) तथा, तथाहि, इति, एतादृशं.—(Thus much) इयान् -यती -यत् (त्), एतावान् &c.

To THWART, *v. a.* व्याहृ, प्रतिहन्, प्रतिरुध्, *see To* FRUSTRATE, HINDER.

THWARTED, *p. p.* संरुद्धचेष्टः -ष्टा -ष्टं, प्रतिबद्धः &c. *See* FRUSTRATED.

THY, *pron.* तव gen. c. (युष्मत्), त्वदीयः -या -यं.

THYSELF, *pron.* स त्वं, आत्मा *m.* (न्). *See* MYSELF.

TIARA, *s.* मुकुटं, किरीटः, मौलिः *m. f.*, अवतंसः, ललाटपट्टं, चूडा.

TIBIA, *s.* जङ्घाया: पूर्वास्थि *n.* or अग्रास्थि *n.*

TICK, *s.* (Credit), *see* CREDIT.—(Louse) यूकः, लोमकीटः.

To TICK, *v. n.* (As a clock) कालमापकवत् किटकिटशब्दं कृ or पटपटशब्दं कृ, पटपट (nom. पटपटायते -ति).

TICKET, *s.* पत्रकं, पत्रं, सूचकपत्रं, निदर्शनपत्रं, अङ्कपत्रं.

To TICKET, *v. a.* अङ्कपत्रयुक्तं -क्तां कृ, अङ्कपत्रविशिष्टं -ष्टां कृ.

To TICKLE, *v. a.* कण्डू (nom. कण्डूयति), कण्डूयनं कृ, कण्डूयां कृ.

TICKLER, *s.* कण्डूयनकः, कण्डूतिकारी *m.* (न्), कण्डूयाकृत्.

TICKLISH, *a.* कण्डूयनासहनः -ना -नं, कण्डूयासहः -हा -हं, कण्डूत्यसहः &c.

TID-BIT, *s.* सुग्रासः, विशिष्टग्रासः, आहारविशेषः, भोजनविशेषः.

TIDE, *s.* वेला, स्रोतस् *n.*, प्रवाहः, रयः; 'of the sea,' समुद्रवेला; 'against the tide,' प्रतिस्रोतस्.

TIDINGS, *s.* वार्त्ता, सन्देशः, समाचारः. *See* NEWS, INTELLIGENCE.

TIDY, TIDINESS, TIDILY. *See* NEAT, NEATNESS, NEATLY.

To TIE, *v. a.* बन्ध् (c. 9. बध्नाति, बन्द्धुं), निबन्ध्, पिनह्; 'together,' सम्बन्ध्, योक्त्र (nom. योक्त्रयति -यितुं), संयुज्, संश्लिष् in caus., सन्धा, संलग्नीकृ, संनह्, ग्रन्थ्, गुम्फ्, *see To* FASTEN, KNIT, &c.; 'with a fetter,' पाशीकृ, पाश (nom. पाशयति -यितुं); 'to tie up a young deer,' मृगपोतकं संयोजयितुं; 'to tie up in a bag,' वस्त्रबद्धं -द्धां कृ.

TIE, *s.* (A fastening, knot) बन्धः -न्धनं -नी, ग्रन्थिः *m.*, बन्धनग्रन्थिः *m.*, 'of a yoke,' आबन्धः, योक्त्रं, योत्रं; 'of a letter or parcel,' नालिकः.—(A fetter) पाशः, बन्धनं.—(String) गुणः, दाम -मा, *see* STRING.—(Attachment, tie of affection, &c.) सङ्गः; 'free from ties,' निःसङ्गः -ङ्गा -ङ्गं, सङ्गवर्जितः -ता -तं, असंश्लिष्टात्मा -त्मा -त्म (न्).

TIED, *p. p.* बद्धः -द्धा -द्धं, निबद्धः &c., सन्निबद्धः &c., नियन्त्रितः -ता -तं, आबद्धः &c., पिनद्धः -द्धा -द्धं, आनद्धः &c., दृब्धः &c., गुणवान् -वती &c.; 'together,' सम्बद्धः -द्धा -द्धं, आबद्धः &c., संयोजितः -ता -तं, संसक्तः -क्ता -क्तं, संलग्नीकृतः -ता -तं, सन्धानितः &c., सन्धितः &c., सन्दितः &c.; 'tied with a fetter,' पाशितः -ता -तं, पाशीकृतः &c.; 'tied up in,' निबद्धः -द्धा -द्धं; 'a quantity of money tied up in a bag,' वस्त्रबद्धो मुद्रासञ्चयः; 'a man with his arms tied behind him,' पश्चाद्बद्धबाहुः पुरुषः.

TIER, *s.* पंक्तिः *f.*, श्रेणिः -णी *f.*, राजिः -जी *f.* *See* ROW, LINE.

TIGER, *s.* व्याघ्रः, शार्दूलः, द्वीपी *m.* (न्), विचित्राङ्गः, गुहाशयः, मृगारिः *m.*, मृगाद् *m.*, हिंसारुः *m.*, भयानकः; 'state of one,' व्याघ्रता; 'relating to one,' वैयाघ्रः &c.; 'its skin,' व्याघ्रचर्म्म *n.*

TIGHT, *a.* (Close, firm) दृढः -ढा -ढं, घनः -ना -नं, संहतः -ता -तं, अशिथिलः -ला -लं, गाढः -ढा -ढं, प्रगाढः &c.—(Tied tight) दृढबद्धः -द्धा -द्धं, सन्निबद्धः &c., दृढसन्धिः -न्धिः -न्धि.—(Tight-drawn) आततः -ता -तं, दृढः &c., *see* STRETCHED.—(Pinching) सम्बाधकः -का -कं, सम्बाधः -धा -धं, सङ्कोचकः &c.

To TIGHTEN, *v. a.* दृढीकृ, दृढ (nom. दृढयति -यितुं), दृढतरीकृ.

TIGHTLY, *adv.* दृढं, गाढं, प्रगाढं; 'tied tightly,' दृढबद्धः -द्धा -द्धं.

TIGHTNESS, *s.* दृढता, दार्ढ्यं, घनता, संहतत्वं, सम्बाधता -धकता.

TIGRESS, *s.* व्याघ्री, शार्दूली, द्वीपिनी, विचित्राङ्गी.

TIGRINE, TIGRISH, *a.* वैयाघ्रः -घ्री -घ्रं, व्याघ्रोपमः -मा -मं.

TILE, *s.* पक्वेष्टका, पक्वेष्टिका, पक्वमृत्तिकाफलकः.

To TILE, *v. a.* पक्वेष्टकाभिर् आच्छद्, पक्वेष्टकाच्छादनं कृ.

TILL, *s.* (Money-box) मुद्राभाण्डं, मुद्रापात्रं, मुद्राधारः.

TILL, *prep.* or *adv.* यावत्, पर्य्यन्तं, अवधि, आ. The last is prefixed, and governs the abl. c.; 'till now,' अद्य यावत्, इदानीं यावत्, अद्यपर्य्यन्तं, एतत्कालपर्य्यन्तं, अद्यावधि, आवर्त्तमानकालात्; 'till then,' तदानीं यावत्, तत्कालं यावत्, तत्कालपर्य्यन्तं; 'till satisfied,' आतृप्तेः; 'till death,' आमृत्योः, आमरणात्; 'till the whole was mixed together,' आसर्व्वमिश्रणात्, सर्व्वमिश्रणपर्य्यन्तं; 'abide ye there till you have to go to another place,' स्थानान्तरगमनपर्य्यन्तं तत्र तिष्ठत; 'he kept him in prison till he should pay the debt,' यावद् ऋणं न परिशोधयति तावत् तं कारायां बद्धवान्.

To TILL, *v. a.* कृष् (c. 1. कर्षति, क्रष्टुं), कर्षणं कृ, कृषिं कृ, *see To* PLOUGH.

TILLAGE, TILLING, *s.* कृषिः *f.*, कृषिकर्म्म *n.* (न्), प्रमृतं. *See* PLOUGHING.

TILLED, *p. p.* कृष्टः -ष्टा -ष्टं, कर्षितः -ता -तं. *See* PLOUGHED.

TILLER, *s.* कृषकः, कर्षकः, क्षेत्रकर्षकः, कृषीवलः, कृषिजीवी *m.*

TILT, *s.* (Kind of awning) वितानं -नकं, आच्छादनं, उल्लोचः.—(Tournament) अश्वारोहिणां क्रीडायुद्धं.

To TILT, *v. a.* (Incline) आवृज् (c. 10. -वर्जयति -यितुं).

To TILT, *v. n.* (Lean) नम्, अवनम्.—(Fight) क्रीडायुद्धं कृ.

TILTED, *p. p.* (Inclined) आवर्जितः -ता -तं.—(Covered) सवितानः -ना -नं.

TIMBER, *s.* दारुः *m.* -रु *n.*, काष्ठं, दलिकः, विसारं; 'of a door,' नासा.

TIMBREL, *s.* मृदङ्गः, पटहः, पणवः. *See* TABOR, DRUM.

TIME, *s.* (In general) कालः, समयः, वेला, दिष्टः, अनेहाः *m.* (स्), हरिमा *m.* (न्), सर्व्वमूषकः, भसमः, अमसः, अहकः; 'lapse of time,' कालगतिः *f.*, कालचक्रं, कालावृत्तिः *f.*, कालपर्य्यायः; 'in the course of time,' कालगत्या, काले गच्छति, दिनेषु गच्छत्सु, कालपर्य्यायेण; 'through the influence of time,' कालवशात्; 'measurement of time,' कालमानं, कालमापनं, कालसाधनं; 'spirit of the time,' कालधर्म्मः; 'to waste one's time,' कालं क्षिप्, कालक्षेपं कृ, *see To* SPEND; 'to make good use of one's time,' सत्कालक्षेपं कृ; 'without loss of time,' अकालक्षेपं -पेण; 'one whose time is come,' प्राप्तकालः.—(Space of time) कालः, समयः, अवधिः *m.*, कालमर्य्यादा, *see* SPACE; 'for a long time,' चिरं, चिरकालं, चिरात्, *see* LONG; 'for a short time,' किञ्चित्कालं, कियत्कालं, *see* SHORT; 'for the time being,' आपाततस्; 'at this time,' इदानीं, अधुना, एतर्हि, *see* NOW; 'at that time,' तदानीं, तत्काले, *see* THEN; 'at a certain time,' एकदा; 'at any time,' यदा कदाचित्, कदापि; 'at times,' *see* SOMETIMES; 'at all times,' सर्व्वदा, सदा; 'at the same time,' युगपत्, एकपदे; 'for such a time,' तावत्कालं; 'former time,' पूर्व्वकालः; 'in former time,' *see* FORMERLY; 'past time,' गतकालः; 'specific time,' निमित्तकालः; 'during all time,' सर्व्वकालं; 'the three times, or present, past, and future,' त्रिकालं.—(Season) कालः, समयः, प्रसङ्गः; 'in time, out of time,' *see* SEASONABLY, UNSEASONABLY.—(Particular time, occasion) समयः, कालः, समयविशेषः, विशेषकालः, वारः, वासरः; 'according to the time,' समयानुसारेण; 'auspicious time,' सुवेला, शुभवेला; 'hard times,' आपत्कालः; 'dark times,' कलिकालः; 'from time to time,' वारं वारं, काले काले, अनुवेलं.—(A time, with reference to repetition) कृत्वस् or वारं in comp., गुण in comp., आवृत्ति in comp.; as, 'five times,' पञ्चकृत्वस्; 'three times,' त्रिवारं, वारत्रयं; 'a hundred times,' शतकृत्वस्, शतगुणं; 'for a thousand times,' सहस्रकृत्वस्, सहस्रावृत्ति; 'often times,' बहुवारं; 'how many times?' कतिकृत्वस्; 'the repetition of texts is a hundred times better than sacrifices,' जपो यज्ञाद् दशगुणैर् विशिष्यते; 'the second number is contained in the first as many times as the fourth in the third,' द्वितीया संख्या प्रथमायां तावद्वारं वर्त्तते यावद्वारं चतुर्थी तृतीयायां; 'gold is nineteen times as heavy as water,' सुवर्णगुरुत्वं जलगुरुत्वमपेक्ष्य एकोनविंशतिगुणं.—(In music) तालः, लयः; 'beating time,' तालः, कुलङ्कः; 'quick time,' द्रुतं, ओघः; 'slow time,' विलम्बितं, विलम्बितवृत्तिः *f.*, तत्त्वं; 'mean time,' मध्यं, घनं; 'out of time,' वैतालिकः -की -कं.—(Measures of time), *see* under MEASURE.—(Time personified) कालः, उग्रदेवता.

To TIME, *v. a.* (Adapt to the time) कालयोग्यं -ग्यां कृ, कालोपयुक्तं -क्तां कृ, समयोपयुक्तं -क्तां कृ, कालानुरूपं कृ, कालसदृशं -शीं कृ.—(Regulate the time) कालं परिक्लृप् or निर्णी.

TIMELY, *a.* कालिकः -की -कं, कालीनः &c. *See* SEASONABLE.

TIME-PIECE, *s.* कालमापनयन्त्रं, कालयन्त्रं. *See* CLOCK.

TIME-SERVER, *s.* कालानुवर्त्ती *m.* (न्), कालानुरोधी *m.*, समयानुरोधी *m.*

TIME-SERVING, *s.* कालानुवर्त्तनं, समयानुवर्त्तनं, कालानुरोधः.

TIMID, TIMOROUS, *a.* भीरुः -रुः -रु, भीरुहृदयः -या -यं, भयशीलः -ला -लं, हरिणहृदयः &c., कातरः -रा -रं, त्रस्नुः -स्नुः -स्नु, दीनचेतनः -ना -नं, दीनः -ना -नं, असाहसिकः -की -कं, अप्रगल्भः -ल्भा -ल्भं, चकितः -ता -तं. *See* FEARFUL.

TIMIDITY, TIMOROUSNESS, *s.* भीरुता -त्वं, भयशीलता, कातरता, कातर्य्यं, सभयत्वं, चकितं, त्रस्नुता, दीनता, विक्लवता, सत्रासत्वं.

TIMIDLY, TIMOROUSLY, *adv.* सभयं, सत्रासं, सचकितं, सकातर्य्यं.

TIN, *s.* त्रपु *n.*, त्रपुस् *n.*, त्रपुलं, वङ्गं, रङ्गं, पिच्चटं, स्वर्णजं, नागं, कुरूप्यं, कस्तीरं, सुरेभं, आपूषं, तीरः, आलीनकं, कुटिलं, वार्ङ्कटीरं; 'calx of it,' वङ्गभस्म *n.* (न्); 'made of tin,' त्रापुषः -षी -षं, त्रपुमयः -यी -यं.

To TIN, *v. a.* त्रपुपत्रावृतं -तां कृ, वङ्गाच्छादितं -तां कृ, त्रपुलीकृ.

TINCTURE, *s.* (Slight admixture) ईषत्प्रक्षेपः, ईषत्संसर्गः, ईषत्सम्पर्कः, ईषत्सम्मिश्रणं.—(Infusion, extract) निर्यासः, निष्कर्षः.

To TINCTURE, *v. a.* ईषत् प्रक्षिप् (c. 6. -क्षिपति -क्षेप्तुं), ईषत्प्रक्षेपं कृ, ईषत् सम्मिश्र् (c. 10. -मिश्रयति -यितुं), ईषत्सम्मिश्रणं कृ, ईषद्ग्रासं -सां कृ.

TINDER, *s.* शीघ्रदाह्यवस्तु *n.*, शीघ्रज्वलनीयवस्तु *n.*, शीघ्रदाह्यं.

TINGE, *s.* रागः, रङ्गः, ईषद्रागः, ईषद्रङ्गः, छाया.

To TINGE, *v. a.* रञ्ज् (c. 10. रञ्जयति -यितुं), अभिरञ्ज्, *see To* TINCTURE.

TINGED, *p. p.* रञ्जितः -ता -तं, अभिरञ्जितः &c., सरागः -गा -गं.

To TINGLE, *v. n.* तीक्ष्णवेदनोपहतत्वात् स्फुर् (c. 6. स्फुरति -रितुं), तोदवेदनोपहतत्वात् स्फुर् or तुप्, सशूलस्फुरणम् अनुभू or मृच्; 'a speech that makes the ears tingle,' श्रवणविदारणं वचः.

TINGLING, *s.* सशूलस्फुरणं, शूलसहितस्फुरणं, तीक्ष्णवेदनासहितस्फुरणं, तोदसहितस्फुरणं, हर्षः; 'of the feet,' पादहर्षः.

TINKER, *s.* जीर्णभाण्डसन्धाता *m.* (तृ), जीर्णपिठरसन्धानजीवी *m.* (न्).

To TINKLE, *v. n.* शिञ्ज्, विशिञ्ज्, क्वण् (c. 1. क्वणति -णितुं), विरु, कणत्कण (nom. कणत्कणायते), खणखण (nom. खणखणायते). *See To* JINGLE.

TINKLING, *s.* शिञ्जितं, क्वणितं. *See* JINGLE, JINGLING, CLINK.

TIN-MAN, *s.* त्रपुमयभाण्डकारकः, त्रपुमयभाण्डविक्रेता *m.* (तृ).

TINSEL, *s.* मिथ्याशोभनवस्तु *n.*, मिथ्याशोभायुक्तद्रव्यं, कुशोभनवस्तु.

TINSEL, *a.* मिथ्याशोभनः -ना -नं, मिथ्याशोभायुक्तः -क्ता -क्तं.

TINT, *s.* रागः, रङ्गः, छाया, ईषद्रागः, ईषद्रङ्गः, ईषद्वर्णः.

To TINT, TINTED, &c. *See To* TINGE, TINGED.

TINY, *a.* अतिक्षुद्रः -द्रा -द्रं, अत्यल्पः -ल्पा -ल्पं, सूक्ष्मः -क्ष्मा -क्ष्मं.

TIP, *s.* अग्रं, मुखं, अन्तः, अणिः *m.*, शिखरं, अग्रभागः; 'of the finger,' अङ्गुल्यग्रं, अङ्गुल्यग्रभागः, अङ्गुलिमुखं; 'on the tip of the fingers,' अङ्गुलीनाम् अग्रे; 'of the tongue,' जिह्वाग्रं; 'of the foot,' पादाग्रं, प्रपदं; 'of the hand,' हस्ताग्रं, अग्रपाणिः *m.*, हस्ताग्रभागः; 'of hair,' केशान्तः, केशाग्रं; 'of the fingers as sacred to the gods,' दैवं; 'of an elephant's trunk,' पुष्करं, करिणिका.

To TIP, *v. a.* (Strike ligthly), *see To* TAP.—(Cover the end) अग्राच्छादनं कृ, अग्रपिधानं कृ, अग्रावरणं कृ; 'with iron,' लोहाग्रं -ग्रां कृ. *See* TIPPED.

TIPPED, *p. p.* अग्र in comp., मुख in comp.; 'with iron,' लोहाग्रः -ग्रा -ग्रं, अयोग्रः &c., अयोमुखः -खा -खं.

TIPPET, *s.* ग्रीवाच्छादनं, ग्रीवापरिधानं, कण्ठाच्छादनं, कण्ठवस्त्रं.

To TIPPLE, *v. n.* वारं वारं मद्यपानं कृ, मुहुर्मुहुः सुरापानं कृ, नित्यपानं कृ, सदापानं कृ, नित्यशो मद्यपानं कृ, पानव्यसनं कृ.

TIPPLER, *s.* सुरापः, मद्यपः, नित्यपायी *m.* (न्). *See* DRUNKARD, SOT.

TIPPLING, *s.* सुरापानं, मद्यपानं, अतिशयमद्यपानं, नित्यपानं, पानव्यसनं, मधुवारः, मधुक्रमः, मद्यवर्तं.

TIPSY, *a.* मद्यविह्वलः -ला -लं, मद्यवशः -शा -शं. *See* DRUNK.

TIPTOE, *s.* पादाग्रं, पदाग्रं, पादाङ्गुष्ठाग्रं, पादाङ्गुल्यग्रं, अग्रपादः, प्रपदं; 'on tip toe,' पादाग्रेण, पदाग्रेण, पादाङ्गुल्यग्रैः, प्रपदेन, पादाङ्गुष्ठास्थितावनिः -निः -नि.

TIPTOP, *s.* अग्राग्रं, अग्रतमभागः, अग्रशिखरं, अग्रशिखा.

TIRADE, *s.* भर्त्सनवाक्प्रबन्धः, निन्दावाक्प्रबन्धः, उपालम्भवाक्यं.

TIRE, *s.* (Of a wheel) चक्रनेमिपरिगतो लोहवलयः.

To TIRE, TIRED. *See To* FATIGUE, FATIGUED, *To* BE FATIGUED.

TIRESOME, *a.* श्रमजनकः -का -कं, खेदकरः -रा -रं. *See* WEARISOME.

TIRHUT, *s.* (The country) मिथिला, तीरभुक्तिः *f.*, निच्छविः *f.*

TIRING-ROOM, *s.* (In a theatre) नेपथ्यं, शाणी.

TISSUE, *s.* (Brocade), *see* BROCADE.—(Connected string) ग्रन्थः -न्थनं, प्रबन्धः, रचना, क्रमः, व्यूहनं, संव्यूहः, विधानं

TITAN, *s.* दानवः, दैत्यः, दितिजः, राक्षसः. *See* GIANT.

TITHE, *s.* दशमांशः, दशमभागः, दशमांशरूपो करः.

To TITILLATE, TITILLATION. *See To* TICKLE, &c.

TITLE, *s.* (Head) स्थानं, पदं, विषयः, अधिकरणं, मार्गः.—(Inscription in the beginning of a book, &c.) नामपत्रं -त्रकं, अभिधानपत्रं, मुखपत्रं, नामलेखः.—(Name, appellation) नाम *n.* (न्), संज्ञा, अभिधा, अभिधानं, उपाधिः *m.*, आख्या, ख्यातिः *f.*, पद्धतिः *f.*, उक्तिः *f.*, लक्षणं; 'title of honour,' ख्यातिः *f.*, कीर्त्तिः *f.*, उपपदं; 'one who by his prowess has acquired the title of hero,' स्वहस्तार्जितवीरख्यातिः *m.*, स्वहस्तार्जितवीरशब्दः.—(Right) अधिकारः -रित्वं, स्वत्वं, स्वाम्यं, आधिपत्यं; 'written title,' आगमः, आगमपत्रं, *see* TITLE-DEED; 'without it,' आगमरहितः -ता -तं.

TITLE-DEED, *s.* आगमः, क्रयकीला, पट्टोलिका, पांशुकूलं.

TITLE-PAGE, *s.* मुखपत्रं, मुख्यपत्रं, नामपत्रं, अभिधापत्रं.

To TITTER, TITTER, TITTERING. *See To* GIGGLE, &c.

TITTLE, *s.* (Jot) लेशः, लवः, अणुः *m.*, *see* JOT, IOTA.

TITTLE-TATTLE, *s.* आलस्यवचनं, प्रलापः, जल्पः. *See* PRATING, *s.*

TITULAR, *a.* नामधारी -रिणी -रि (न्). *See* NOMINAL.

To, *prep.* Many of the meanings of 'to' are expressed by prepositions or affixes, or by the infin. mood, or are inherent in the inflections of the Sanskrit noun; thus, (Motion to or toward any place) expressed by the acc. case alone, or with प्रति &c. added; as, 'he went to the city,' नगरं or नगरं प्रति जगाम, or by the gen. c., with अन्तिकं &c.; as, 'he sent me to you,' मां तवान्तिकं or तव सकाशम् अप्रैषीत्.—(Motion to any state) by the acc. c.; as, 'he attains to fame,' ख्यातिं याति.—(Adaptation) by the dat. c. or crude form; as, 'that husband was not to her taste,' स पतिस् तस्याः सन्तोषाय नाभवत्; 'suited to royalty,' राजयोग्यः -ग्या -ग्यं, राजार्हः &c.; 'that is pleasing to me,' तन् मह्यं रोचते.—(Address, declaration, compellation) by the acc. c. or dat. c.; as, 'he addressed a speech to the king,' राजानं वचनम् अब्रवीत्; 'speak to me,' मां ब्रूहि; 'I will declare this to my pupils,' शिष्येभ्यः प्रवक्ष्यामि तत्; 'he made it known to the king,' तद् राज्ञे विज्ञापयति.—(Giving) by the dat., gen., or loc. c.; 'he gives sweetmeats to his son,' पुत्राय or पुत्रस्य मोदकान् ददाति.—(Up to, as far as, denoting extent, degree, &c.) आ prefixed to the abl. or acc. c., पर्य्यन्त or अन्त in comp.; as, 'to the ocean,' आसमुद्रात् or समुद्रपर्य्यन्तं; 'to the throat,' आकण्ठात्; 'to the knee,' आजानु; 'the numbers from one up to ten thousand,' एकाद्ययुतान्तसंख्याः.—(Possession, appertainment) by the gen. c.; as, 'money belongs to me,' मम धनं भवति.—(Purpose, intention, object) by the dat. c. or infin. mood, or by अर्थं &c. affixed; as, 'they

sat down to consult,' मन्त्रणाय or मन्त्रयितुं or मन्त्रणार्थम् उपविष्टाः; 'the barber came to shave his master,' भर्तृक्षौरकरणाय नापित आगच्छत्; 'he came to make peace,' सन्धिं कर्तुम् आगच्छत्; give me something to eat,' आहारार्थं किञ्चिन् मम देहि.—(As a sign of the infinitive) expressed by the infinitive, or by यथा &c.; as, 'unable to move,' चलितुम् असमर्थः; 'I desire to hear,' श्रोतुम् इच्छामि; 'I did not expect to see you again,' न म आसीद् आशंसा यथा पुनरपि त्वां प्रेक्षिष्ये. There may be other ways of expressing 'to' in Sanskrit, as in the following examples: 'the peacock dances to the songs of the bees,' शिखी नृत्यति मधुकरगीतैः; 'he performed penance to the deity,' देवम् उद्दिश्य तपस् तेपे; 'the town was speedily reduced to ashes,' नगरी सहसा भस्मसाद् अक्रियत; 'compared to that,' तदपेक्ष्य or तदपेक्षया; 'to the east of the village,' प्राग् ग्रामात्; 'he goes to and fro,' गमनागमनं करोति, *see* FRO; 'to one's face,' प्रत्यक्षं -क्षतस्, समक्षं; 'to a man,' अशेषतस्, अशेषेण; 'I have a debt to pay,' मया ऋणं दातव्यं; 'ready to go,' गन्तुम् उद्यतः, गमनोन्मुखः; 'he causes her to enter the house,' तां गृहं प्रवेशयति.

TOAD, *s.* स्थूलमण्डूकः, स्थूलभेकः, वर्षाभूः *m.*

TOADSTOOL, *s.* गोमयच्छत्रं, विड्जं, विड्जच्छत्रं. *See* FUNGUS.

To TOAST, *v. a.* उपाग्नि धृत्वा शुष्कीकृ, अग्निशुष्कं -ष्कां कृ, अग्निना तप् (c. 10. तापयति -यितुं), भृज्, भ्रज्ज्. *See To* FRY, *v. a.*

TOAST, *s.* दग्धापूपः, दग्धपिष्टकः, अग्निशुष्कापूपः, भृष्टापूपः.

TOASTED, *p. p.* भृष्टः -ष्टा -ष्टं, भर्जितः -ता -तं, अग्निशुष्कः -ष्का -ष्कं.

TOBACCO, *s.* ताम्रकुटः -टकः, ताम्रकूटः, ताम्रपत्रिका.

TOBACCONIST, *s.* ताम्रकुटविक्रयी *m.* (न्), ताम्रकुटकव्यापारी *m.*

TOCSIN, *s.* आसन्नभयसूचकघण्टा, भयज्ञापकघण्टा.

TO-DAY, *s.* or *adv.* अद्य; 'of to-day,' अद्यतनः -नी -नं.

To TODDLE, *v. n.* बालकवत् स्खलद्गत्या क्रम् or चर्.

TODDY, *s.* (Of the palm) ताली, तालकी, ताडी -डिः *f.*—(Of the cocoa-nut) नारिकेलासवः, नारिकेरासवः.

TOE, *s.* पादाङ्गुली -लिः *f.*, पादाङ्गुरिः *f.*, पदाङ्गुली -लिः *f.*, पादशाखा, अङ्गुरिः *f.*; 'the great toe,' पादाङ्गुष्ठः; 'the little toe,' पादस्य कनिष्ठाङ्गुली; 'toe-nail,' पादनखः, चरणनखः.

TOGETHER, *adv.* (In company) सह in comp., समं, सहितं, एक in comp., एकत्र; 'going together,' सहगामी -मिनी &c.; 'dancing together,' सहनर्तनं; 'drinking together,' सहपानं; 'eating together,' सहभोजनं, एकभोजनं, एकत्र भोजनं; 'fighting together,' सहयुध्वा *m.* (न्); 'all together, in a body,' सङ्घशस्, एकसङ्घ -ङ्घतस्, साकल्येन.—(Into union or junction) सम् prefixed; as, 'to bind together,' सन्नह्; 'to meet together,' सङ्गम्, सम्मिल्; 'having the feet together,' सम्पदं; 'two letters placed together,' सन्निहितवर्णौ *m. du.*—(In the same place) एकत्र, एकस्थाने, एकदेशे.—(At the same time) एककाले, समकाले, युगपत्, सह in comp.; 'born at the same time,' एककालजः -जा -जं, समकालजः &c., सहजः &c.—(With one another) परस्परं, अन्योन्यं; 'quarelling together,' परस्परकलहः, अन्योन्यकलहः.—(Together with) सह, समं, सार्द्धं, सहितं, साकं, all with instr. c.; 'together with him,' तेन सह.

To TOIL, *v. n.* आयस्, श्रम्, क्लिश्. *See To* LABOUR, DRUDGE, FAG.

TOIL, *s.* आयासः, क्लेशः, श्रमः, कष्टं. *See* LABOR, DRUDGERY.

TOILET, *s.* (Act or mode of dressing) वस्त्रमाल्यादिविन्यासः, वस्त्रमाल्यादिरचना, अङ्गसंस्कारः, मण्डनं, नेपथ्यं, भूषणं; 'he makes his toilet,' नेपथ्यं धारयति, वस्त्रविन्यासं करोति; 'one who has finished her toilet,' अवसितमण्डना; 'toilet-table,' भूषणाधारः; 'cover,' भूषणाधाराच्छादनं.

TOILSOME, *a.* कष्टसाध्यः -ध्या -ध्यं, श्रमसाध्यः &c. *See* LABORIOUS.

TOKEN, *s.* लक्षणं, चिह्नं, अभिज्ञानं, सङ्केतः, *see* SIGN, MEMENTO.

TOLA, *s.* (Indian weight for gold and silver) तोलः -लं, तोलकः -कं.

TOLD, *p. p.* कथितः -ता -तं, आख्यातः &c., समाख्यातः &c., उक्तः -क्ता -क्तं, भणितः -ता -तं, आवेदितः &c., निवेदितः &c., ज्ञापितः -ता -तं, ज्ञपितः &c., ख्यापितः &c., ज्ञप्तः -प्ता -प्तं, सन्दिष्टः -ष्टा -ष्टं.

TOLERABLE, *a.* (Bearable) सहनीयः -या -यं, सह्यः -ह्या -ह्यं, सोढव्यः -व्या -व्यं.—(Moderately good) विगुणः -णा -णं, मध्यमगुणः -णा -णं, मध्यमः -मा -मं.

TOLERABLY, *adv.* विगुणं, यावत्तावत्, कल्प or देशीय or देश्य in comp.; 'tolerably clever,' पटुकल्पः -ल्पा -ल्पं, पटुदेशीयः &c.

TOLERANCE, *s.* सहनं, सहिष्णुता, क्षमा. *See* TOLERATION.

TOLERANT, *a.* सहनः -ना -नं, सहिष्णुः -ष्णुः -ष्णु, अनिषेधकारी -रिणी -रि (न्), अप्रतिबन्धकारी &c. *See* PATIENT, INDULGENT.

To TOLERATE, *v. a.* सह्, विषह्, क्षम्, मृष्, तिज् in des., उपेक्ष्, अनिषेधं कृ, अप्रतिबन्धं कृ, अनिवारणं कृ. *See To* SUFFER, PERMIT.

TOLERATED, *p. p.* अनिषिद्धः -द्धा -द्धं, अनिवारितः -ता -तं, उपेक्षितः &c.

TOLERATION, *s.* क्षमा, क्षान्तिः *f.*, तितिक्षा, सहिष्णुता, अनिषेधः, अनिवारणं, अप्रतिबन्धः, उपेक्षा, अप्रतिरोधः, अनिरोधः.

TOLL, *s.* शुल्कः -ल्कं, तारिकं, तार्य्यं, घट्टादिदेयं, करः. *See* TAX.

To TOLL, *v. a.* (A bell) शनैः शनैः or वारं वारं घण्टां वद् in caus.

To TOLL, *v. n.* (As a bell) शनैः शनैः or वारं वारं क्वणितं कृ.

TOLL-BOOTH, TOLL-HOUSE, *s.* शुल्कस्थानं, शुल्कग्रहणस्थानं.

TOLL-GATHERER, *s.* शौल्किकः, शुल्कग्राही *m.* (न्), करग्राही *m.*

TOMATO, *s.* हिङ्गोटः, हिङ्गुली, वङ्गनः. *See* EGG-PLANT.

TOMB, *s.* समाधिः *m.*, श्मशानं, स्तूपः, प्रेतकुण्डं. *See* GRAVE.

TOMB-STONE, *s.* चित्यं, चैत्यं, चिताचूडकं. *See* GRAVE-STONE.

TO-MORROW, *s.* or *adv.* श्वस्, परेद्युस्, परदिनं, *see* MORROW; 'day after,' परश्वस्; 'belonging to to-morrow,' श्वस्तनः -नी -नं, श्वस्त्यः &c.,

TOM-TOM, *s.* मृदङ्गः, पटहः, दुन्दुभिः *m.*, डिण्डिमः. *See* DRUM.

TON, *s.* सभ्याचारः, सभ्यरीतिः *f.*, सभ्यसम्प्रदायः, शिष्टाचारः.

TONE, *s.* (Sound, note) स्वरः, नादः, ध्वनिः *m.*, विरावः, विरुतं, *see* SOUND; 'having a good tone,' सुस्वरः -रा -रं.—(Musical sound) स्वरः, क्वणः, क्वाणः, क्वणनं, निक्वणः, निक्वाणः; 'of a lute,' प्रक्वणः, प्रक्वाणः.—(Seventh part of a scale) मूर्छनं -ना; 'half tone,' स्वरांशः; 'quarter tone,' श्रुतिः *f.*—(In medicine) शुभावना, सम्भावना, सद्भावः, तेजस् *n.*, अग्निः *m.*

TONGS, *s. pl.* सन्दंशः, सन्दंशकं -का, कङ्कमुखः.

TONGUE, *s.* जिह्वा, रसना, रसज्ञा, रसाज्ञा, रसिका, रसाला, रसनं, ललना, लोला, जिह्वः, विलासा, मुखचीरी; 'root of the tongue,' जिह्वामूलं; 'tip of it,' जिह्वाग्रं; 'that is on the tip of it,' जिह्वाग्रवर्त्ती -र्त्तिनी -र्त्ति; 'hold your tongue,' वाचं नियच्छ, तूष्णीम्भव; 'tongue-scraper,' *see* SCRAPER; 'one of the seven tongues of fire,' स्फुलिङ्गिनी; 'tongue of a bell,' लोलः; of a bolt,'

कण्टकः.—(Speech) भाषा; 'mother-tongue,' जन्मभाषा.

Tongue-less, *a.* अजिह्वः -ह्वा -ह्वं, जिह्वाहीनः -ना -नं, निर्जिह्वः &c.

Tongue-tied, *a.* बद्धजिह्वः -ह्वा -ह्वं, संयन्त्रितजिह्वः &c., यतजिह्वः &c.

Tonic, *a.* रुचकः -का -कं, रोचकः &c., तेजस्करः -रा -रं, दीपकः &c., अग्निवर्धकः &c., अग्निदः -दा -दं, पाचकः -का -कं, दीपनः -ना -नं.

Tonic, *s.* रुचकं, रोचकः, अग्निवर्धनः -नं, पाचकं, दीपनं.

To-night, *adv.* अद्य रात्रौ, अद्य निशि, अद्य नक्तं.

Tonsil, *s.* कण्ठासन्नवर्ती श्लेष्माशयो मृदुमांसपिण्डः; 'enlargement of them,' अधिमांसकः, शतघ्नी, गलमाला.

Tonsure, *s.* (Shaving the head) क्षौरं, क्षौरकर्म्म *n.* (न्), केशवपनं, शिरोवपनं, मुण्डनं, शिरोमुण्डनं, केशच्छेदः.—(As a sacred rite) चूडाकर्म्म *n.*(न्), चूडाकरणं, चूडा, चौडं, चौलं, चौलकर्म्म *n.*, चूडालक्षणं.

Too, *adv.* (Over much) अति or सु prefixed, अतीव, अत्यन्तं, एकान्ततस्, एकान्त in comp., *see* Excessively; 'too great a load,' अतिभारः; 'he approaches too near the fire,' अग्नेर् अतिसमीपम् उपसर्पति; 'too compassionate,' अतिकरुणः -णा -णं, एकान्तकरुणः &c.; 'too early,' अतिप्रगे, अतिकल्यं; 'too late in the evening,' अतिसायं -ये; 'too long,' सुदीर्घः -र्घा -र्घं.—(Also) चैव, च, अपि, तथा.

Tool, *s.* उपकरणं, यन्त्रं, साधनं, शस्त्रं, *see* Instrument; 'a mere tool,' निमित्तमात्रं, कारणमात्रं, उपकरणमात्रं.

Tooth, *s.* दन्तः, दशनः -नं, रदः, रदनः, दंशः, दंष्ट्रा, खादनः, दाढा, द्विजः, द्विजन्मा *m.* (न्), मुखजः, क्षुरः, दन्दशः, जम्भः, हालुः *m.*, खरुः *m.*, वक्त्रखुरः, रुचकः, मल्लकः, फटः; 'a row of teeth,' दन्तपंक्तिः *f.*, दन्तावली, *see* Teeth; 'two middle fore teeth,' राजदन्तौ *m. du.*; 'double tooth,' माढिः *f.*; 'decay of a tooth,' द्विजव्रणः.—(Of a saw, comb, wheel, &c.) दन्तः.

Tooth-ache, *s.* दन्तवेदना, दन्तव्यथा, दन्तशूलः, दालनं.

Tooth-brush, *s.* दन्तधावनं, दन्तकाष्ठं, कूर्चकं.

Toothed, *a.* दन्ती -न्तिनी -न्ति (न्), रदी &c., दन्तजातः -ता -तं, दन्त or दत् &c. in comp.; as, 'handsome-toothed,' सुदन् -दती -दत् (त्); 'iron-toothed,' अयोदन्तः -न्ता -न्तं, अयोदन् &c.

Toothless, *a.* अदन्तः -न्ता -न्तं, निर्दन्तः &c., दन्तहीनः -ना -नं, निर्दशनः -ना -नं, गतदन्तः -न्ता -न्तं, गलितदन्तः &c., नीरदः -दा -दं, अदंष्ट्री -ष्ट्रिणी -ष्ट्रि (न्), भग्नदंष्ट्रः -ष्ट्रा -ष्ट्रं, उद्धृतदंष्ट्रः &c., दशनोच्छिष्टः -ष्टा -ष्टं.

Tooth-pick, *s.* दन्तशोधनी, शलाका, दन्तनिर्घर्षणकः.

Tooth-powder, *s.* दन्तपवनं, दन्तशाणं, निघृष्टचूर्णं. *See* Dentifrice.

Top, *s.* (Highest part, upper end) अग्रं, शिखा, शिखरं, अग्रभागः, पृष्ठं, शृङ्गं, चूडा, शिरस् *n.*, उपरिभागः, शीर्षकं, मस्तकं, तुङ्गः, नीचकी *m.* (न्); 'of a tree,' वृक्षाग्रं, वृक्षशिरस् *n.*; 'fallen from the top of a tree,' वृक्षाग्रात् पतितः; 'of a palace or house,' प्रासादपृष्ठं, गृहपृष्ठं; 'of a mountain,' गिरिशृङ्गं, गिरिपृष्ठं, प्राग्भारः.—(Lid) पिधानं.—(Highest or chief place) मुख्यस्थानं.—(Spinning top) भ्रमरं, भ्रमरक्रीडनकं.

Top, *a.* (in comp.) उपरिस्थः -स्था -स्थं, अग्रस्थः -स्था -स्थं.

Topaz, *s.* पीताश्मा *m.* (न्), पीतस्फटिकः, पीतमणिः *m.*, पीतसारः, पीतरक्तं, पीतः, पुष्परागः, पद्मरागः, गुरुरत्नं.

Tope, *s.* (Mound of earth) स्तूपः.

Top-heavy, *a.* भाराधिकशिरस्कः -स्का -स्कं, अर्द्धगुरुः -रुः -रु.

Topic, *s.* विषयः, प्रकरणं, प्रसङ्गः, प्रसक्तिः *f.*, वृत्तान्तः, पदं. *See* Subject.

Topic, topical, *a.* प्राकरणिकः -की -कं, विशेषस्थानिकः -की -कं.

Top-knot, *s.* चूडा, शिखा, शिखण्डः -ण्डकः, शिखरः -रं, शेखरः.

Topmost, *a.* सर्व्वोपरिस्थः -स्था -स्थं, सर्व्वाग्रस्थः &c., अग्रतमः -मा -मं.

Topography, *s.* विशेषस्थानवर्णनं, विशेषस्थलविवरणं, स्थानवर्णनं.

To topple, *v. n.* अर्द्धगुरुत्वाद् अग्रतः पत् (c. 1. पतति -तितुं).

Topsy-turvy, *a.* or *adv.* अधरोत्तरः -रा -रं, अर्द्धोधरः -रा -रं.

Torch, *s.* उल्का, ज्वलनकाष्ठं, अग्निकाष्ठं, उल्मुकं, अङ्गारं, अलातं, अग्निकुक्कुटः, कण्ठनीलकः.

Torch-bearer, *s.* उल्काधारी *m.* (न्), उल्कावाही *m.* -वाहकः.

To torment, *v. a.* अत्यन्तं पीड् (c. 10. पीडयति -यितुं) or तप् (c. 10. तापयति -यितुं) or सन्तप् or परितप्, यत् (c. 10. यातयति -यितुं), अतीव व्यथ् (c. 10. व्यथयति -यितुं), अतिशयेन बाध् (c. 1. बाधते -धितुं) or क्लिश्, अतियातनां कृ or दा, अतिवेदनां कृ or दा, तीव्रवेदनां कृ or दा, अतिव्यथां कृ or दा, परमदुःखं कृ, विडम्ब् (c. 10. -म्बयति -यितुं). *See To* harass, vex, annoy.

Torment, *s.* (Extreme pain) यातना, अतियातना, अतिवेदना, अतिव्यथा, अतिदुःखं, अतिपीडा, तीव्रवेदना, तिग्मवेदना, तिग्मयातना, अतिक्लेशः, परमदुःखं, दारुणदुःखं, दारुणयातना, यमयातना, तापः, परितापः, यन्त्रणं -णा, विडम्बनं -ना, क्लेशः, दुःखं.—(That which gives annoyance) कण्टकः.

Tormented, *p. p.* अतिपीडितः -ता -तं, अतिव्यथितः &c., अतिबाधितः &c., विडम्बितः -ता -तं, कर्षितः -ता -तं, तुन्नः -न्ना -न्नं, दुःखदग्धः -ग्धा -ग्धं.

Tormenting, tormenter, *a.* and *s.* अतिपीडकः -का -कं, अतिपीडाजनकः &c., अतिक्लेशकरः -री -रं, अतिदुःखकरः &c., अरुन्तुदः -दा -दं, प्रमाथी -थिनी &c., आयासकारी &c., परिक्लेष्टा -ष्टी -ष्टृ (ष्टृ).

Torn, *p. p.* विदारितः -ता -तं, विदीर्णः -र्णा -र्णं, दारितः -ता -तं, प्रविदारितः &c., दीर्णः -र्णा -र्णं, दलितः -ता -तं, विदलितः &c., पाटितः -ता -तं, भिन्नः -न्ना -न्नं; 'with the nails,' नखभिन्नः -न्ना -न्नं; 'being torn,' विदीर्य्यमाणः -णा -णं; 'having torn,' विदार्य्य; 'is torn,' विदीर्य्यते.

Tornado, *s.* घूर्णवातः, घूर्णवायुः *m.*, प्रभञ्जनः. *See* Tempest.

Torpid, *a.* जडः -डा -डं, विचेतनः -ना -नं, सुप्तः &c., *see* Numb.

Torpor, torpidity, *s.* जडता, जाड्यं, जडिमा *m.* (न्), चैतन्यस्तम्भः, चैतन्यनाशः, सुप्तिः *f.*, स्वापः, मान्द्यं, कुण्ठता, तन्द्रा. *See* Numbness.

Torrent, *s.* निर्झरः -री, झरः, जलप्रवाहः, जलप्रपातः, जलधारा, ओघः, जलौघः, प्रस्रवणं, स्रोतस् *n.*, रयः; 'of rain,' वृष्टिधारा, धारासारः, धारासम्पातः, तरन्तः; 'a mountain torrent,' गिरिनदी, गिरिसरित्.

Torrid, *a.* उष्णदग्धः -ग्धा -ग्धं, ग्रीष्मदग्धः &c.; 'zone,' उष्णकटिबन्धः.

Tortoise, *s.* कूर्म्मः, कच्छपः, कमठः, कामठः, गूढाङ्गः, पञ्चाङ्गगुप्तः, पञ्चगुप्तः, कठिनपृष्ठं, चतुर्गतिः *m.*, क्रोडपादः, उद्रङ्कः, स्मरणापत्यतर्पकः; 'female,' कूर्म्मी, कच्छपी, कमठी, दुलिः -ली *f.*, दुलिः *f.*; 'relating to a tortoise,' कौर्म्मः -र्म्मी -र्म्मं, कामठः -ठी -ठं.

Tortoise-shell, *s.* कूर्म्मकर्पर: -र्परं, कूर्म्मकम्बुः -म्बु *m. n.*, कूर्म्मपृष्ठं, कौर्म्मं.

Tortuosity, *s.* वक्रता, वक्रिमा *m.* (न्), कुटिलत्वं, जिह्मता, तिर्य्यक्त्वं.

Tortuous, *a.* वक्रः -क्रा -क्रं, कुटिलः -ला -लं, तिर्य्यङ् -रश्ची -र्य्यक् (च्); 'moving tortuously,' तिर्य्यग्गामी -मिनी &c., कुटिलगामी &c., दन्द्रमणः -णा -णं; 'movement,' चङ्क्रमा -मणं, दन्द्रमं -मणं.

To torture, *v. a.* यत् (c. 10. यातयति -यितुं), यातनयन्त्रेण व्यथ् or प्रमथ् (c. 10. -माथयति -यितुं), यातनां कृ, अत्यन्तं पीड् &c. *See To* torment.

Torture, *s.* यातना, अतिव्यथा, व्यथा, प्रमाथः, व्याधिः *m.*, अतिव्याधिः *m.*,

तिग्मव्यथा, तिग्मवेदना, सम्पीडः, उद्वेजनं. *See* TORMENT.

TORTURED, *p. p.* व्यथितः -ता -तं, सन्तप्तः -प्ता -प्तं, प्रमथितः -ता -तं.

TORTURER, *s.* यातनाकारी *m.* (न्), यातनकृत् *m.*, व्यथाकरः, प्रमाथी *m.* (न्), उद्वेजनकरः, सन्तापकः, परिक्लेष्टा *m.* (ष्टृ). *See* TORMENTING.

To TOSS, *v. a.* क्षिप् (c. 6. क्षिपति, क्षेप्तुं), विक्षिप्, उत्क्षिप्, समुत्क्षिप्, क्षुभ् (c. 10. क्षोभयति -यितुं), विक्षुभ्, संक्षुभ्, उद्धू (c. 5. -धूनोति -धोतुं), विधू.

To TOSS, *v. n.* विक्षिप् in pass. (-क्षिप्यते), इतस्ततो विक्षिप् or विचल् (c. 1. -चलति -लितुं) or प्रचल्, इतस्ततो लुट् (c. 6. लुठति -ठितुं) or प्रलुठ् or लुल्, घूर्ण् (c. 1. घूर्णति -ते -र्णितुं), विघूर्ण्, व्याघूर्ण्, परिघूर्ण्, उद्धू in pass. (-धूयते), विधू, इतस्ततः प्लु (c. 1. प्लवते, प्लोतुं).

TOSS, *s.* क्षेपः -पणं. उत्क्षेपः -पणं, समुत्क्षेपः, क्षोभः, व्याक्षोभः.

TOSSED, *p. p.* क्षिप्तः -प्ता -प्तं, उत्क्षिप्तः &c., क्षुब्धः -ब्धा -ब्धं, संक्षुब्धः &c., उद्धूतः -ता -तं, विधूतः &c., व्यस्तः -स्ता -स्तं, प्रलोठितः -ता -तं, उद्भ्रान्तः -न्ता -न्तं, विक्षिप्तः &c., विकीर्य्यमाणः -णा -णं, कम्प्यमानः &c.

TOSSING, *s.* क्षेपणं, उत्क्षेपणं, हल्लनं. *See* ROLLING, *s.* and *part.*

TOTAL, *a.* सम्पूर्णः -र्णा -र्णं, पूर्णः &c., समग्रः -ग्रा -ग्रं, आत्यन्तिकः -की -कं, *see* ENTIRE, COMPLETE; 'total rout,' सुपलायितं.

TOTAL, TOTALITY, *s.* साकल्यं, समुदायः, समस्तिः *f.*, समासः, सामग्र्यं, ऐक्यं, पारायणं, कार्त्स्न्यं, समाम्नायः. *See* WHOLE, *s.*

TOTALLY, *adv.* सर्व्वतस्, सर्व्वशस्, सम्यक्, साकल्येन. *See* ENTIRELY.

To TOTTER, *v. n.* स्खल् (c. 1. स्खलति -लितुं), प्रस्खल्, विचल् (c. 1. -चलति -लितुं), संचल्, चल्, विह्वल् (c. 1. -ह्वलति -लितुं), प्रह्वल्, ह्वल्.

TOTTERING, *part.* स्खलितः -ता -तं, विचलन् -लन्ती -लत् (त्), स्खलितगतिः -तिः -ति, विक्लवगतिः &c., स्खलद्गतिः &c., चलविचलः -ला -लं.

To TOUCH, *v. a.* स्पृश् (c. 6. स्पृशति, स्प्रष्टुं), संस्पृश्, परिस्पृश्, हस्तेन परामृश् or आलभ्, स्पर्शं कृ. *See* *To* HANDLE, MOVE.

To TOUCH, *v. n.* (Come in contact) सम्पर्कम् इ or गम्, संसर्गम् इ or गम्, परस्परस्पर्शं कृ; 'as a vessel,' लग् (c. 1. लगति -गितुं).

TOUCH, *s.* (The sense) स्पर्शः, स्पृष्टिः *f.*, स्पर्शेन्द्रियं.—(The perception, the act of touching) स्पर्शः -र्शनं, संस्पर्शः, परिमर्शः, परिमार्गः, स्पर्शबोधः, स्पर्शज्ञानं, त्वग्ज्ञानं.—(Contact) सम्पर्कः, पृक्तिः *f.*, संस्पर्शः, संसर्गः, *see* CONTACT.—(Touch as a test of gold) वर्णिका.

TOUCHED, *p. p.* स्पृष्टः -ष्टा -ष्टं, संस्पृष्टः &c., *see* MOVED; 'my heart is touched with grief,' उत्कण्ठया संस्पृष्टं हृदयं; 'to be touched,' स्प्रष्टव्यः -व्या -व्यं, स्पृश्यः -श्या -श्यं, स्पर्शनीयः -या -यं.

TOUCHING, *a.* हृदयङ्गमः -मा -मं. *See* MOVING, PATHETIC, *a.*

TOUCH-STONE, *s.* निकषः, कषः, निकषपाषाणः, कषपाषाणः, निकषग्रावा *m.* (न्), आकषः, निकसः, कसः, शाणः, शानः, हेमलः.

TOUCHY, *a.* शीघ्रकोपी -पिनी &c. *See* IRRITABLE, PEEVISH.

TOUGH, *a.* दृढः -ढा -ढं, दुःखभेद्यः -द्या -द्यं, दुर्भेद्यः &c., दुःखच्छेद्यः &c., दुश्छेद्यः &c., दुःखच्छिन्नः -न्ना -न्नं, कठिनः -ना -नं, शिथिलदृढः &c.

TOUGHNESS, *s.* दृढता, दुर्भेद्यता, दुःखच्छेद्यता, कठिनता, काठिन्यं.

TOUR, *s.* भ्रमणं, परिभ्रमणं, पर्य्यटनं, विहारः, विहरणं.

TOURIST, *s.* परिभ्रमकः, भ्रमणकारी *m.* (न्), भ्रमणकृत्, विहारी *m.*

TOURNAMENT, TOURNEY, *s.* अश्वारोहिणां क्रीडायुद्धं.

TOW, *s.* स्थूलशाणं, शाणसूत्रं, स्थूलभङ्गा, शाणस्थूलं.

To TOW, *v. a.* रज्जुना or रज्ज्वा कृष्, रज्जुना आकृष्य चल् in caus.

TOWARD, TOWARDS, *adv.* (In the direction of) प्रति, अनु, अभिमुखं, उद्दिश्य; 'towards the city,' नगरं प्रति, नगराभिमुखं; 'he set out towards the north,' उत्तरां दिशमुद्दिश्य प्रस्थितः.—(With respect to) उपरि, उद्दिश्य, उद्देशेन, प्रति affixed; 'towards me,' ममोपरि, मामुद्दिश्य, मां प्रति; 'want of courtesy towards you,' तवोपरि अदाक्षिण्यं; 'not behaving properly towards his father,' पितुरुपरि असदृशव्यवहारी.—(Nearly) प्रायस्; 'towards evening,' अभिसायं.

TOWARD, TOWARDLY, &c. *See* APT, FORWARD, SHARP, &c.

TOWEL, *s.* गात्रमार्जनी, अङ्गमार्जनी, गात्रमार्जनवस्त्रं, चरकं.

TOWER, *s.* प्रासादशिखरं -शृङ्गं, मञ्चः *f.*, दुर्गं. *See* TURRET.

TOWERING, *a.* प्रोन्नतः -ता -तं, उन्नतः -ता -तं. *See* ELEVATED.

TOWN, *s.* नगरं -री, पुरी, *see* CITY; 'town and country,' पुरजनपदं.

TOWN-FOLK, TOWNS-MAN, *s.* नगरजनः, नगरनिवासिजनः. *See* CITIZEN.

TOWN-HALL, *s.* नगरकार्य्यनिर्वाहयोग्या महाशाला.

TOY, *s.* क्रीडनकं, क्रीडाद्रव्यं, क्रीडावस्तु *n.*, खेलनी, क्रीडामृगः.

To TOY, *v. n.* *See* *To* PLAY, SPORT, DALLY, TRIFLE.

TOY-SHOP, *s.* क्रीडाद्रव्यविक्रयस्थानं, क्रीडावस्तुविक्रयगृहं.

TRACE, *s.* अभिज्ञानं, चिह्नं, लक्षणं, अङ्कः, पदवी, तक्षं, *see* MARK, FOOTSTEP.—(Of a carriage, &c.) प्रग्रहः, प्रग्राहः, चर्म्मबन्धः.

To TRACE, *v. a.* (Follow by some mark) अनुसृ, मार्गानुसरणं कृ, वर्त्मानुसरणं कृ, मृग्, मार्ग्, *see* *To* TRACK.—(Mark out) वाह्यरेखाम् अङ्क् (c. 10. अङ्कयति -यितुं) or लिख् (c. 6. लिखति, लेखितुं).

TRACHEA, *s.* श्वासमार्गः, श्वासप्रश्वासमार्गः, प्राणमार्गः.

TRACK, *s.* पदवी -विः *f.*, मार्गः, पथः, पन्थाः *m.*, *see* ROAD, TRACE.

To TRACK, *v. a.* पादानुसरणं कृ, पदानुसरणं कृ, मार्गानुसरणं कृ, अनुपदं या (c. 2. याति -तुं) or गम्, अनुसृ, *see* *To* PURSUE.

TRACKLESS, *a.* पादास्पृष्टः -ष्टा -ष्टं, पादाङ्करहितः &c., पदविहीनः &c.

TRACT, *s.* देशः, प्रदेशः, *see* REGION, COUNTRY.—(Short treatise) लेखः, पत्रिका, अल्पप्रबन्धः, स्वल्पप्रबन्धः.

TRACTABILITY, *s.* विधेयता, विनेयता, वश्यता, सविनयता.

TRACTABLE, *a.* विधेयः -या -यं, वश्यः &c., *see* DOCILE, MANAGEABLE.

TRADE, *s.* (Commerce) वाणिज्यं -ज्या, वणिज्यं, वणिक्कर्म्म *n.* (न्), वणिक्क्रिया, अर्थप्रयोगः, क्रयविक्रयः, व्यापारः, नैगमः, कोशातकी *m.* (न्), *see* COMMERCE.—(Occupation of a man of the third class) वैश्यक्रिया, वैश्यवृत्तिः *f.*—(Occupation) व्यापारः, व्यवसायः, व्यवहारः.

To TRADE, *v. n.* वाणिज्यं कृ, क्रयविक्रयं कृ, व्यापारं कृ, उपक्री.

TRADER, *s.* वणिक् *m.* (ज्), वाणिजिकः &c. *See* MERCHANT.

TRADESMAN, *s.* पत्तनवणिक् *m.* (ज्), नगरवणिक्, *see* SHOP-KEEPER.

TRADITION, *s.* लोककथा, इतिहासः, परम्परागतकथा, परम्परागतवाक्यं, पारम्पर्य्यं, परम्परागताचारः, पारम्पर्य्योपदेशः, पारम्परीयकथा, ऐतिह्यं, इतिह ind., सम्प्रदायः, आम्नायः, पुराणं, पूर्व्वं, धोरणिः *f.*, प्रवादः, आख्यायिका, गुरुक्रमः, ओघः.

TRADITIONAL, TRADITIONARY, *a.* परम्परागतः -ता -तं, परम्परायातः &c., परम्परीणः -णा -णं, पारम्परीयः -यी -यं, परम्पराप्राप्तः -प्ता -प्तं, ऐतिहासिकः -की -कं, पौराणिकः -की -कं, पुराणोक्तः -क्ता -क्तं, साम्प्रदायिकः -की -कं, क्रमागतः -ता -तं, क्रमायातः &c., क्रमप्राप्तः &c., ओघप्राप्तः &c., रूढः -ढा -ढं; 'instruction,' पारम्पर्य्योपदेशः; 'practice,' वंशानुचरितं.

TRADITIONALLY, *adv.* पारम्पर्य्येण, परम्पराक्रमेण, सम्प्रदायतस्,

To TRADUCE, TRADUCED. *See* *To* CALUMNIATE, MALIGN, &c.

TRADUCER, *s.* अपवादकः, अभिशंसी *m.* (न्), *see* CALUMNIATOR.

TRAFFIC, *s* वाणिज्यं, लोकव्यवहारः, लोकयात्रा, *see* COMMERCE.

To TRAFFIC, *v. n.* वाणिज्यं कृ, पण्. *See To* COMMERCE, TRADE.

TRAGEDIAN, *s.* करुणरसाभिनयकुशलः, करुणारसाभिनेता *m.* (तृ).

TRAGEDY, *s.* दुःखपरिणामकनाटकं, करुणारसप्रधाननाटकं.

TRAGIC, TRAGICAL, *a.* (Pertaining to tragedy) दुःखपरिणामनाटकसम्बन्धी &c., करुणारसप्रधानः -ना -नं, करुणारसविषयकः -का -कं.—(Ending tragically) दुःखपरिणामकः -का -कं, दुष्परिणामी -मिनी &c., दुरन्तः -न्ता -न्तं.

To TRAIL, *v. a.* विकृष् (c. 1. -कर्षति -क्रष्टुं), आकृष्, समाकृष्, कृष्.

To TRAIL, *v. n.* विकृष् in pass. (-कृष्यते), आकृष्, कृष्, कृष्टः -ष्टा -ष्टं भू.

TRAIL, *s.* (Track) पदविः -वी *f.*—(Scent left) गन्धः.

To TRAIN, *v. a.* विनी (c. 1. -नयति -नेतुं), शिक्ष् (c. 10. शिक्षयति -यितुं), अनुशिक्ष्, शास्, अनुशास्, अनुशासनं कृ, नियमनं कृ. *See To* DISCIPLINE.

